Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

BHARTI

1953 G.K.U.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

113536

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

COMPILED

२७

भारती

२०१०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

COMPILED

# भारती

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा

मर्यादापुरुषोत्तमः श्रीरामचन्द्रः

चैत्र-पूर्णिमा-सं० २०१० | वर्षः ३ | षष्ठोऽङ्कः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# विषय-सूची


| लेख-नामानि | लेखकनामानि | पृष्ठसंख्या |
|---|---|---|
| १—वसन्तवर्णनम् | भट्टश्रीमथुरानाथशास्त्रिणः, जयपुरम् | १०१ |
| " | श्रीगङ्गाधरशास्त्री साहित्याचार्यः, बून्दी | |
| २—दीक्षान्तभाषणम् | श्रीह्यू गोवाल्वानमहोदयः | १०२ |
| ३—अविवेकः परमापदां पदम् | श्रीशिवचरणलालशर्मा, दौसा | १०५ |
| ४—गेयं संस्कृतप्रचारसाधनम् | श्री को० कृष्णः सोमयाजी, गुण्टुर | १०७ |
| ५—भक्तः श्रीगरीबदासः | श्रीचन्द्रशेखरशर्मा "गौतम" नरेनानिवासी | १०८ |
| ६—ग्रामवाससौख्यं निसर्गवर्णनं च | महादेवसूनुः त्र्यम्बकशर्मा गुणे, पूना | १०९ |
| ७—साहित्यस्यापि दर्शनत्वम् | श्री कृष्णानन्दशर्मा साहित्याचार्यः बून्दी | १११ |
| ८—शिक्षाधिकारः | श्री स्वामी मनोहरलाल ब्रह्मचारी, जयपुरम् | ११३ |
| ९—क्षमाशीलो युधिष्ठिरः | श्री ठाकुर ओंप्रकाशः शास्त्री, सोनीपत | ११५ |
| १०—चपलः श्यालकः | श्री दीनानाथत्रिवेदी 'मधुपः' जयपुरम् | ११७ |
| ११—विजय-संवत्सर-स्वागतम् | श्री अणे इत्युपाह्वः श्रीहरिसूनुर्माधवः, पूना | ११७ |
| १२—नूतनवर्षारम्भे शुभाशिषः | भट्टश्रीमथुरानाथशास्त्री, जयपुरम् | ११७ |
| १३—कोटानगरेऽभूतपूर्वं संस्कृतसम्मेलनम् | सम्पादकः | ११८ |
| १४—नाटकानि भवेयुः [illegible]साधनानि | सम्पादकः | १२० |
| १५—सरलसंस्कृतशिक्षणोपायः | श्रीदुर्गादत्तशर्मा व्याकरणसाहित्याचार्यः, जयपुरम् | |
| १६—संस्कृत-समाचाराः, देशदर्शनम् | सम्पादकः | |


## —❀ "भारती" पत्रस्य उद्देश्यानि नियमाश्च ❀—

१—संस्कृतभाषायः प्रचारः सरलेन संस्कृतेन सामयिकानां विचाराणां, उत्कृष्टाया मानसिकविचारपरिपोषिकायाः सामग्र्याश्च समर्पणम् अस्य पत्रस्योद्देश्यानि ।

२—'भारती' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम् ।

३—मासिकपत्रमिदं प्रतिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात् ।

४—एकस्याङ्कस्य मूल्यम् ।=) आणकपट्कम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

113536

Digitized by Arya Samaj Foundation Chennai and eGangotri

113536

सम्पादकः—
श्रीवृद्धिचन्द्रशर्मा शास्त्री
व्याकरण-धर्मशास्त्राचार्यः
महाराज-संस्कृत-महाविद्यालयः
जयपुरम्

# भारती

—भारतीशुल्कम्
वार्षिकं मूल्यम् रूप्यकत्रयम्
एकस्याङ्कस्य मूल्यम्
आणकषट्कम्

वर्ष ३ } चैत्र–पूर्णिमा, सं० २०१० 1953 { अङ्क ६

## वसन्त–वर्णनम्

[ कविशिरोमणि–भट्टश्रीमथुरानाथशास्त्रिणः, जयपुरम् ]

वनविटपेषु भूरि शोभते कुसुमघटा रोचते सरोजखण्डसुषमा सरसि
भाति सहकारे कलकोकिलकुहूनां रवो मधुकरयूनां स्वनः सरसां पयसि पयसि ।
मञ्जुनाथ ! रसिकमनस्सु मदलक्ष्मीर्भाति दशमुपयाति कामचर्चासौ रहसि रहसि
मन्ये मधुपर्वणि मनोभूमंदजन्मोन्मादमङ्कते विशङ्कं निजमुद्रया मनसि मनसि ॥

——*——

[ पं० गङ्गाधरशास्त्री, साहित्याचार्यः, बूंदी ]

नवीनसंवत्सरहर्षदन्तं नमामि भक्तार्थदमेकदन्तम् ।
सत्कामुकानां हृदये वसन्तं समीक्ष्य कस्तुष्य[illegible] नो वसन्तम् ॥ १ ॥

पुराणपर्णानि विसृज्य वृक्षा युक्ता श्छटाभिर्नवपल्लवानाम् ॥
सन्मञ्जरीपूरित आम्रवृक्षे फलं विलम्बादि[illegible] न विषाद[illegible] २ ॥

सरोजलं सत्कमलैः प्रपूर्णं प्रवाति वातो मकरन्दगन्धी ॥
प्रदोषकालोपि सुखावहोस्मिन् सर्वत्र जाता परिवर्तनश्रीः ॥ ३ ॥

विलोक्य तान्ताङ्कमनीयशोभां न चेतनाः किन्तु जडाः प्रसन्नाः ॥
मधोः सुबन्धोरधिकारकाले जातिर्दरिद्रेति जगद्विचित्रम् ॥ ४ ॥

पुष्पैर्वियुक्तास्तु फलैः सुयुक्ताः फलैर्विहीनाः कुसुमैः समेताः ॥
परं न कस्यापि दया समीक्ष्य यवन्दने नैव फलं न पुष्पम् ॥ ५ ॥

——*——

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# फिनलैंडराजदूतस्य दीक्षान्त-भाषणम्

[ राजकीय-काशी-संस्कृत-महाविद्यालयस्य दीक्षान्तसमारोहे संस्कृते भाषमाणेन फिनलैंडदेशस्य भारत-स्थितराजदूतेन श्रीह्यू गोवाल्वानमहोदयेन संस्कृतभाषायाः साहित्यस्य च विषये ये विचाराः प्रकटिताः ते मननीयाः सर्वथा समुपादेयाश्च वर्तन्ते। संस्कृतभाषावारिधौ कीदृशानि सन्ति निहितानि रत्नानि ? तेषां प्रभावेण सकलोपि संसारोऽधुनापि कथं मन्त्रमुग्ध इव वर्तते ? स्वतन्त्रे भारते च सा कथं राष्ट्रभाषास्थानमभि-लषतीति सर्वमत्र विलोकनीयम्। भाषणमिदमविकलम् अवश्यपठनीयं भारतीपाठकैः ] —संपादकः।

मान्या अध्यक्षमहोदयाः, सभासदः, स्नातकाश्च,

अस्मिन् अवसरे दीक्षान्तभाषणार्थम् आमन्त्रितो-ऽहम् आत्मानं सम्मानितं मन्ये। पुण्यायां काशी-नगर्याम् आगत्य अहं प्रमुदितः अस्मि। इयं हि अनादिकालात् विद्यायाः पवित्रतायाश्च महत् क्षेत्रम्। अत्र भारतीया आत्मनो जीवने तीर्थयात्रार्थं भूयोभूयः आगन्तुम् इच्छन्ति, गङ्गाम् आश्रित्य देहत्यागं वाञ्छन्ति। अस्मिन् महाविद्यालये स्थित्वा अहं प्रसीदामि। अयं ... षष्ट्यधिकात् एकशतात् अधिकेभ्यः वर्षेभ्यः संस्कृतविद्यायाः विशिष्टविदुषां समवायस्य च प्रधानं केन्द्रम्।

संस्कृतभाषाम् उपजीव्य भवन्तो भारतीयाः समु-ज्ज्वलां संस्कृतिं निर्मितवन्तः या वस्तुतः भवतां गौर-वाय कल्पते। पुरातनं संस्कृत-साहित्यम् एकं भव्यं मन्दिरं, यस्मिन् मानवस्य प्राचीनकालिकं सर्वं ज्ञानं कात्स्न्येन संगृहीतं वर्तते। जीवनमरणविषये ... जिज्ञासाया अन्तिमं समाधानं ... भवन्तो यं परिणामं प्राप्तवन्तः स यवनदेशीयदार्शनिकानां सिद्धान्तान् अतिशेते। धर्मं मीमांसमाना भारतीयाः ... जीवनस्य सुगूढानां समस्यानाम् अन्त-स्तलम् आलोडितवन्तः। वेदाः भवताम् अध्यात्मज्ञानस्य आधारभूमिः। ब्राह्मणानि, आरण्यकानि, उपनिषदश्च अर्थं न उपबृंहन्ति। भवतां सूत्रग्रन्थाश्च जीवनस्य ... सम्पादकान् नियमान् प्रतिपादयन्ति।

भवतां युगकाव्यं महाभारतं रामायणं च भारतस्य इतिवृत्तमुखेन पूर्वभावानुभूतिम् प्रदर्शयतः। भवतां पुराणानि विविधायाः परम्परायाः विचारधारायाश्च महानिधयः। भवतां शास्त्राणि मानवज्ञानस्य विविधानि अङ्गानि प्रकाशयन्ति। भवतां कवयः, येषु कालिदासः सर्वप्रधानः, संसारस्य सर्वश्रेष्ठान् नाटकग्रन्थान् सौन्दर्यपूर्णानि गीतिकाव्यानि च रचितवन्तः। भवतां साहित्यं लतागुल्मादिसंपन्नं भारतीयं वनमिव सुसमृद्धं चित्रविचित्रं च वर्तते। तस्मिन् साहित्ये च अनश्वरप्रभाभासुराणि भूयांसि रत्नानि समुपलभ्यन्ते। भगवद्गीता अज्ञातकालतः मनुष्याणां मार्गप्रदर्शनं शान्तिप्रदानं च कुरुते। इयं हि नव-भारतस्य राष्ट्रपितुः महात्मगान्धिनः सततसहायिका आसीत्। अथ चेयं सुदूरे भविष्यत्यपि साधकानां मार्गप्रदर्शनं करिष्यति। संस्कृतस्य साम्राज्यं भारते एव न सीमितम्, किन्तु हिमालयपर्वतमालामुल्लङ्घ्य, महावनानि अन्तः प्रविश्य बङ्गसागरं च अतिक्रम्य प्रसृतम्।

भारतीया विचारधारा अस्यामेव काशीनगर्याम् शिक्षमाणेन स्थितप्रज्ञेन भगवता बुद्धेन प्रभाविता प्राच्यस्य एशियाद्वीपस्य अधिकतरेषु भागेषु ब्रह्मदेश, श्यामदेश, भारत-एशिया, भारत चीन, जापान, कोरिया, मंगोलिया, तिब्बत, पारसीकप्रभृति-देशेषु रूसभूमिं यावत् अभिव्याप्ता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भारतीयः सन्देशः तेषु सर्वेषु देशेषु निवसताम् रूक्षाणाम् युद्धप्रियाणाम् अपि जनानां विचारान् मृदूकुर्वन् तेषां मनोवृत्तिषु परिवर्तनम् अकरोत्। अतीतेषु द्विसहस्रवर्षेषु बौद्धधर्मः एशियायाः विशालेषु प्रदेशेषु स्वप्रभावम् प्राकाशयत् किन्तु पाश्चात्त्यदेशेषु संस्कृतजगत् सुचिरम् अज्ञातम् आसीत्। भारतस्य पश्चिमे भागे प्रतिस्पर्धिन्याः यवनसंस्कृतेः प्रभावः प्रसृतः अवर्तत। यवनदेशीयं दर्शनं महतीम् समुन्नतिम् आरोहत्। साहित्यं च विपुलान् मौलिकग्रन्थान् असृजत्। यवनदेशस्य राज्यपद्धतिं विज्ञानं च आश्रित्य महान्ति राज्यानि निर्मितानि अभवन्। यथा भारतीया विचारधारा एशियादेशं शालीनं सुसंस्कृतं च अकरोत्, तथैव यवनविचारधारा यूरोपदेशं क्वचित् साक्षात् क्वचिच्च लेटिनभाषायाः माध्यमेन शालीनं सुसंस्कृतं च अकरोत्।

यथा संस्कृतं सुदीर्घकालं भारतस्य सांस्कृतिकी भाषा आसीत्, तथैव मध्ययुगेषु लेटिनभाषा एशियायाः मुख्यभूमेः अपरप्रायद्वीपस्य यूरोपस्य सांस्कृतिकी भाषा आसीत्। यथा च भारतस्य प्रादेशिक्यः भाषाः शनैः शनैः संस्कृतस्य स्थाने स्वतन्त्राः सांस्कृतिकभाषाः अभवन्, तथैव यूरोपस्य प्रादेशिक्यः भाषा अपि लेटिनभाषायाः स्थाने स्वतन्त्राः भाषाः अभवन्, येन मन्मतानुसारेण यूरोपस्य एकतायाः हानिः जाता।

अष्टादशशताब्द्याः अन्ते एव वस्तुतः यूरोपे संस्कृतस्य सत्तायाः परिचयः जातः। अस्मिन् कर्मणि भवतां संस्कृतविद्यालयः, यत्र वयं समवेताः स्मः, भृशम् प्रयतमानः आसीत्। यूरोपीयाः विद्वांसः इदम् ज्ञात्वा भृशं विस्मिताः अभवन् यत् भारते अत्यन्तम् अभिवृद्धा, प्रतिपादनक्षमा, सौन्दर्यसम्पन्ना, विविधविशालसाहित्यसमृद्धा च भाषा वर्तते। इदन्तु अनुसंधाय ते अधिकतरम् विस्मिताः अभवन् यत् इयं संस्कृतभाषा यूरोपदेशस्य प्रायः सर्वाभिः भाषाभिः न केवलं सम्बद्धा, किन्तु यूरोपीयभाषापरिवारस्य प्राचीनतमा शाखा अपि अस्ति। यूरोपस्य उत्कृष्टविदुषां संस्कृतं प्रति महती रुचिः समुत्पन्ना। एकोनविंशायां च शताब्द्यां यूरोपस्य अमेरिकायाश्च बहुषु विश्वविद्यालयेषु महाविद्यालयेषु च अनेकानि संस्कृतप्राध्यापकपदानि प्रतिष्ठापितानि अभवन्।

महतः पाणिनेः तदनुयायिनां च व्याकरणानि पाश्चात्त्यदेशे संस्कृतस्य सुबोधतासम्पादने सहायकानि अभूवन् एकं रोचकं नवीनं भाषाविज्ञाननामकं ज्ञानक्षेत्रं च अजनयन्। इतः परं शनैः शनैः संस्कृतस्य बहवो मूलग्रन्थाः यूरोपस्य अमेरिकायाश्च विद्वद्भिः प्रकाशिताः अनूदिताः टिप्पणिताश्च अभवन्। भारतस्य दार्शनिकाः धार्मिकाश्च विचाराः पाश्चात्त्यदेशे अभिज्ञाताः सन्तः तत्रत्यान् विदुषः प्राभावयन्। भारतीयाः नाटकग्रन्थाः गीतिकाव्यानि च पाश्चात्त्यभाषासु अनूदितानि अभवन् येन पाश्चात्त्यानां समक्षम् एकः नवीनः अपूर्वः सौन्दर्यसंसारः प्रादुरभवत्।

मम सुदूरवर्तिनि फिनलैण्डदेशे अपि संस्कृतं प्रति रुचिः उदपद्यत। एकोनपञ्चाशदधिके अष्टादशे शतके प्रथमः फिनलैण्डदेशीयः विद्वान् डाक्टरपदप्राप्तिनिमित्तं ध्यानवधेः [illegible] विभिन्नानि पुराणानि तदीयाः व्याख्याश्च उपजीव्य संस्कृतसाहित्यविषयकम् एकं निबन्धं प्राकाशयत्। पञ्चसप्तत्यधिके अष्टादशे शतके हेल्सिकी-विश्वविद्यालये एकं संस्कृतप्राध्यापकपदं स्थापितम् अभवत्। फिनलैण्डदेशः कतिपयान् श्रेष्ठान् संस्कृतविदुषः अजनयत्। चीनतुर्किस्तानदेशस्य हस्तलिखितानां संस्कृतग्रन्थानां गवेषणं सम्पादनं च फिनलैण्डदेशस्य वैशिष्ट्यमस्ति। सप्तत्रिंशद्वर्षपूर्वम् अहम् अपि हेल्सिंकीविश्वविद्यालयात् उपाधि-परीक्षां समुत्तीर्णः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भारतीयस्वातन्त्र्यात् प्राक् विगतेषु द्विसहस्रवर्षेषु संस्कृतसाहित्यम् एशियायाः पौरस्त्यभागस्य जनान् अनुप्राणितान् अकरोत् । गतेषु द्विशतवर्षेषु च यूरोपीयान् विदुषः बुद्धिजीविनश्च प्राभावयत् । स्वतन्त्र-भारतस्य समक्षं देशे विदेशे च संस्कृतपरम्परायाः संरक्षणस्य संवर्धनस्य च महत् कार्यम् प्रस्तुतम् अस्ति । भारतम् समस्तस्य जगतः कृते संस्कृतशिक्षायाः महत् केन्द्रं भवेत् ।

सप्तदशे शतके फ्रांसदेशे एकं सुप्रसिद्धं विद्या-मन्दिरम् संस्थापितं येन फ्रेंचभाषा भृशं परिष्कृता ...ती अन्ताराष्ट्रियसंस्कृतेः अभिव्याप्तौ महत् साधनं ...जायत । अन्येषु अपि बहुषु देशेषु एवंविधानि बहूनि विद्यामन्दिराणि सन्ति । अहम् आशासे यत् भारते ...कम् तादृशम् विद्यामन्दिरम् स्थापितम् भविष्यति यत् ...स्कृतस्य विषये विश्वस्मिन् प्रामाणिकम् केन्द्रम् भविष्यति । अहम् विश्वसिमि यत् संस्कृतविश्व-परिषदः अस्यां दिशि प्रथमः आरम्भः, यस्याः अधि-...ाने गते नवम्बरमासि अहम् उपस्थितः आसम् ।

संस्कृतस्य बहवो मूलग्रन्थाः अद्यावधि प्रकाशिताः, ...न्तु अनेके अमूल्याः ग्रन्थाः अधुना अपि प्रकाशनम् ...क्षन्ते । ग्रीकलेटिनसाहित्ययोः अ...काः भागाः ...लोचनम् सम्पादिताः मुद्रिताश्च । अहम् आशासे ... संस्कृतसाहित्यस्य अपि अमूल्याः भागाः तथैव ...चरादेव सालोचनं सम्पादिताः मुद्रिताश्च ...विष्यन्ति ।

...तथैव इदमपि अहम् आशासे यत् अविलम्बमेव ...रतवर्षे एको विशालः राष्ट्रियः पुस्तकालयः स्थापितः ...विष्यति यत्र सर्वे अपि मुद्रिताः संस्कृतग्रन्थाः देशे ...देशे च प्रकाशिताः तेषाम् अनुवादाः संगृहीताः ...विष्यन्ति ।

...एवमेव इदमपि आशासे यत् स्वतन्त्रं भारतम् ...कृतसाहित्यस्य मौलिकग्रन्थानाम् अनुवादद्वारा विश्व-स्य सर्वेषु भागेषु न केवलं विद्वत्समाजे अपितु सर्व-साधारणजनतायां च प्रचारयिष्यति ।

इत्थमेव एतदपि विश्वसिमि यत् सोऽपि समयः आगमिष्यति यदा संस्कृतवाङ्मयस्य मौलिकानां नाटकानां प्रदर्शनम् सफलः अभिनयश्च भारतस्य विदेशानां च रङ्गमञ्चेषु भविष्यति ।

अहम् विश्वसिमि यदस्य देशस्य बहूनां जनानाम् इयम् इच्छा आसीत् यत् संस्कृतं स्वतन्त्रभारतस्य तथैव राष्ट्रभाषा भवेत् यथा आयरलैण्डदेशे तस्य मूलभूता आयरिशभाषा राष्ट्रभाषारूपेण प्रतिष्ठापिता, इजराइल-देशे तत्रत्या मूलभूता हिब्रू भाषा देशस्य राष्ट्रभाषा जाता, तथापि भारते संस्कृतभाषायाः पुत्रीभूता हिन्दी राष्ट्र-भाषात्वेन अङ्गीकृता ।

पाश्चात्त्यदेशानां विभिन्नासु राष्ट्रभाषासु अस्माभिः पारिभाषिकाणां सांस्कृतिकानां च शब्दानाम् अभि-मतार्थस्य यथावत् प्रतिपत्तये संग्रहः कृतः । भारते तादृशशब्दानाम् उपलब्धये भवद्भिः संस्कृतम् आश्रियते । एवम् नूनं संस्कृतम् हिन्दीभाषायाः सुसमृद्धये अलं भविष्यति ।

अहम् सुदृढम् आशासे यत् स्वतन्त्रं भारतम्, यत्र विविधभाषासमस्याः विद्यन्ते, सुसमृद्धायाः सुविक-सितायाः संस्कृतभाषायाः, अध्ययनस्य संरक्षणस्य च उपेक्षां कदापि न करिष्यति ।

अस्माकं युगे विश्वम् एकतायाः अभिमुखं प्रवर्तते । अस्मिन् विकासे विभिन्नानि राष्ट्राणि सहयोगाय आहूतानि सन्ति, यानि विश्वसंस्कृतिनिर्माणे स्वीयं साहाय्यं दास्यन्ति, स्वापेक्षितं च राष्ट्रान्तरेभ्यः ग्रही-ष्यन्ति । पाश्चात्त्यदेशैः विभिन्नविषयकं विशिष्टज्ञानं भारताय प्रदेयमस्ति, स्वतन्त्रभारतेनापि पाश्चात्त्य-देशेभ्यो योगदानम् कर्तव्यम् वर्तते । वैज्ञानिकप्रगति-प्रवाहे पाश्चात्त्यदेशैः स्वीयम् आध्यात्मिकस्वरूपम् विस्मृतम् । सुसम्पन्नस्य परम्परागतस्य संस्कृतवाङ्मय-स्य मुखेन भारतम् अध्यात्मविद्याया एकम् बहुमूल्यम् कोषम् बिभर्ति, यम् देशोऽयम् एकीभूतस्य विश्वस्य अन्यैः राष्ट्रैः सह उपभोक्तुम् अर्हति ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अविवेकः परमापदां पदम् ।

[ आख्यायिका ]

लेखकः—शिवचरणलालशर्मा, दौसा, जयपुरम् ।

एकदा कश्चित् शल्यतन्त्रनिष्णातः आधुनिकश्चिकित्सकः ( सर्जन ) प्रातः शय्यात उत्थित एवाऽऽसीत्, तदैव एको वस्त्रबन्धावृतप्रकोष्ठ-कूर्पर-मध्य-प्रदेशः आतुरः तत्सन्निधावागतः। स च भृशं पीडया विह्वल आसीत्। बन्धमुन्मोच्य स्वीयं करं दर्शयामास तस्मै। सर्जनेन सम्यक्तया करो दृष्टः। परं नाऽऽसीत्तत्र कोऽपि रुजासूचको व्रणशोथादिविशेषः। आतुरः ततः कराङ्गुलिं स्वरुजास्थाने संस्थाप्योवाच—किन्नात्र मेऽसह्या रुजा। बहुयत्ने कृतेऽपि न दृष्टस्तत्र कोऽपि विकारः, तत् त्वेकं निर्दोषम् एव स्थानं दृश्यते स्म। सर्जनः प्राह-किल श्रीमता पुनरागन्तव्यं मत्सन्निधे, अहमपि तावत्स्नानाशनादिभिर्निवृत्तो भवामि। पुनर्विचार्याहं सम्यक् चिकित्सिष्यामि। किन्त्वातुरः प्राह श्रीमन्! अहन्त्वधुना भृशं रुजार्दितोऽस्मि, नाहं शक्तः क्षणमप्युपेक्षितुम्। उपेक्षायां स्यामहमवश्यं पुरन्दरपुरातिथिः। श्रीमन्तः अधुनैव स्थानमिदं केनाऽपि शस्त्रेण भिन्द्युः अन्तःस्थं च रुजाकरं पूयादिकं दोषविशेषं निष्कासयेयुः, इत्युक्त्वा तेन सहस्रमिता मुद्राः तत्सन्निधौ न्यस्ताः। सर्जनः प्राह यदि भवन्तो कोटिमुद्रा अपि दद्युस्तदाऽप्यहं निर्दोषं स्थानं नैव छेत्स्यामि। तीव्रया रुजया पीड्यमान आतुरः तत्रस्थं किमपि शस्त्रमेकं स्वहस्तगतं कृत्वा प्राह-आस्ताम्, अहमेव स्थानमिदं वामकरेण भिनद्मि, परं प्रार्थये किल अतोऽग्रिमं कर्म श्रीमतामेवाश्रितम्। इत्युक्त्वा सपद्येव तच्छस्त्रं रुजास्थाने प्रावेशयत्। सर्जनः आतुरस्य ईदृशमसाधारणं साहसं पीडां च दृष्ट्वा भृशमाश्चर्यान्वितो बभूव। तस्येदृशीं कारुणिकीं दशां च वीक्ष्य सिरादिच्छेदभयाच्छस्त्रं स्वहस्ते कृत्वा सम्यग् भेदितवान्, परमन्तः किंचिदपि पूयादिकं रुजाकरं न ददर्श। केवलमस्थिनि लोहितबिन्दुमेकं ददर्श। रुजासूचकं स तं लोहितबिन्दुमेव अमंस्त। अतस्तं निष्कास्य मलहरादिभिर्व्रणरोपणैर्व्रणमभिसंधाय प्रेषितवान्। आतुरो भृशं स्वस्थो नीरोगश्च दृश्यते स्म। सप्ताहादनन्तरं स व्रणः सम्यग् भरितः। तदुपरि नूतनं चर्म प्रादुरभवत्। आत्मानं स्वस्थं वीक्ष्य सः स्वकीयं पुरमागतः। चिरं स्वस्थ एवाऽसीत् किन्तु सहसैव पुनस्तीव्ररुजार्दितोऽभवत्। आत्मानमासन्नविलयं वीक्ष्य सर्जनायैकं पत्रमलिखत्—

श्रीमन्तः सर्जनमहोदयाः! सादरं वन्दे।

अद्य पुनः मत्करे सहसैव तादृशी पीडा उदस्थात्। अद्य मे मरणं निश्चितम्। मरणात् प्रागहमात्मनो रोगनिदानज्ञापनम् आवश्यकं मन्ये। अद्यावधि मया गोपितमेव तत्, किन्त्वहं तम् वृत्तान्तम् आत्मना सह नैव नेतुमिच्छामि।

एकस्य संपन्नस्य धनिकस्य कुले मे प्रादुर्भावोऽभवत्। बाल्यकालोऽतीवदुःखेन मे व्यतीतः। विंशे वर्षे मदुद्वाहः एकया कुलीनया वनितया सहाऽभवत्। गृहे आवां द्वावेव आस्ताम्। ग्रामाधीशस्य कुमार्या सह मद्भार्यायाः गाढं सौहार्दमासीत्। मद्भार्यायाः मय्यप्यासीदत्यधिको निश्छलः शुद्धस्नेहः। पाणिग्रहणतः षण्मासा आवयोः सुखेन व्यतीताः। प्रतिदिनं गतदिवसात्सुखकरम् एव ज्ञायते स्म। सा स्वप्नेऽपि मदन्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पुरुषं नावलोकयति स्म। कथयितुमशक्तोऽहं किल केन संदेहेन मद्भ्रमस्य पुष्टिर्विहिता। सत्यमेव मूढपुरुषः स्वीये सुखे स्वयमेवान्वेषयति दुःखम्। तत्सन्निधावासीदेका काष्ठनिर्मिता लघ्वी पेटिका। तां सा सदैव एकेन तालकेन जटितां रक्षति स्म। न रोचते स्म मह्यं तत्। तत्कुञ्जिकां साऽहर्निशमेव स्वसमीपे रक्षति स्म। कदाऽपि स तालको विवृतो मया न दृष्टः। कदाचिदपि सा तत्पेटिकोद्घाटनं मत्संमुखे नैव करोति स्म। ईर्षयाहं तस्या ईदृशं भयमत्यधिकं स्नेहमपि छलमेवामन्ये।

एकदा सा ग्रामाधीशकुमारी तां स्वसार्द्धं नेतुमागता। तत्स्नेहवशात्तामहं तया सार्धं प्रेषितवान्। तत्परोक्षे केनाऽप्युपायेन सा पेटिका मयोद्घाटिता। तस्यामेकः कौशेयवस्त्रावृतः पत्राणां समूहो मिलितः। स्वधर्मस्याऽवहेलनां कृत्वा तानि एकैकशः पठितुमारभे। मज्जीवनेऽयमत्यधिको दुःखदः काल आसीत्। पत्राणि केनाऽपि गाढमित्रेण स्वप्रेमिकायै लिखितान्यासन्। तेषां भाषायामेका प्रच्छन्ना वासना निहिताऽऽसीत्। पत्रेषु दिनाङ्का आवयोर्विवाहात् पूर्वतना एवासन्। वाचयित्वा पुनर्मया तानि पत्राणि तथैव तस्यां निहितानि। पेटिका पूर्ववत् संवृता विहिता। सायंकाले समागता सा पूर्ववन्मदालिङ्गनार्थमग्रे आगता। अहं बलप्रयत्नैः रहस्यरोधं कृत्वा तदालिङ्गनाय पूर्ववदुद्युक्तोऽभवम्, पूर्ववदेवावाभ्यां सार्द्धमेव भोजनं कृतम्। पुनश्च स्वीये स्वीये शयनागारे समायातौ। शयने निद्रा कुतो मम। असंख्या विचारा मन्मानसे समागताः। ईदृशोऽयमस्ति छलयुक्तो नारकीयः स्नेहः। असह्यदुःखेन दुःखितोऽहमर्धरात्रौ शय्यात उत्थाय सहसैव तच्छयनागारे प्रविश्य च क्रूरेण मया मदीयो दक्षिणहस्तः सुप्तायास्तस्याः कण्ठे न्यस्तः। सर्वशक्त्या च पीडितः कण्ठमणिः। क्षणाय तया दृष्टिरुन्मीलिता। इदमेवासीत्तस्यै मदीयमन्तिमं दर्शनम्। आत्मरक्षायै न कृतस्तया कोऽप्युपायः। आसीत् सैका निर्बला नारी। सुप्ता सा दीर्घनिद्रायाम्। मरणात् प्राक् तन्मुखान्निःसृत एको लोहितबिन्दुः मद्धस्ते पतितः। तत् स्थानं श्रीमन्तो जानन्त्येव। शुष्कः स बिन्दुः प्रातःकाले। मह्यं नाऽऽसीत्कोऽपि खेदः। किङ्किल! अहमेकः क्रूरः पुरुषः। तस्या मया कृतोऽन्तिमः संस्कारः—अन्तिमे संस्कारे ग्रामणीकुमार्यपि सा सम्मिलिताऽऽसीत्। संस्कारान्निवृत्य सर्वे स्वीयं स्वीयं गृहं गताः। किन्तु एका सा राजकुमारी मया सह गृहमागता। तया कथितम्। मम एकः कौशेयवस्त्रावृतः पत्राणां समूहः तस्यै (श्रीमतां स्वर्गीयभार्यायै) दत्त आसीत्। कारणवशात् तमहं मत्सन्निधौ रक्षितुमक्षमाऽऽसम्। अधुना श्रीमता मह्यं स पत्रसमूहः प्रदेयः। श्रुत्वैव मत्पृष्ठवंशाऽस्थि शीतावृतमिवाऽभवत, मच्छिरसि सहस्रतुलामितभारं न्यस्तमिवासीत्। धैर्यमाधाय अश्रूणि नेत्रयोः एव संरुध्य, अन्तः गत्वा तं पत्रसमूहमादाय तस्यै ददौ। दृष्ट्वैव सा कथितवती, किलाऽयमेवाऽस्ति। गमनसमये कथितवती किल सा, "मया ईदृशी सत्यवती अन्येषां शुभचिन्तिका पतिव्रता साध्वी नारी नाद्यावधि कुत्राऽपि दृष्टा। तया कदाचिदपि न पृष्टं किल एषु पत्रेषु किं लिखितं कस्य वा पत्राणीति। कृता च प्रतिज्ञा तेषां गोपनार्थम्।" इत्युक्त्वा साऽन्तर्हितैवाऽभवत्। तद्गमनानन्तरं मम कीदृशी दशाऽभवत् इति तु अहमेव वेद्मि। सप्ताहात् परतः सहसैवैका वृश्चिकदंशवदसह्या तीव्रा रुजा रक्तबिन्दुपातस्थाने उत्थिता। अहं श्रीमतां शरणमागतः। शस्त्रकर्मानन्तरं मत्पीडा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# गेयं संस्कृत-प्रचार-साधनम्

लेखकः— को० कृष्णः सोमयाजी, गुण्टुर।

जयपुरस्य 'भारत्याः' मार्गशीर्षाङ्के झालरापाटन-वासिनां नवरत्नश्रीगिरिधरलालशर्मणां 'प्रेम-पयोधेः' प्रकटनमस्ति। श्रीनन्ददासविरचितस्य 'भ्रमर-गीतस्य स्वतन्त्ररूपान्तरीकरणमिदं—गीतिमयत्वादेव हरति पाठकानां स्वान्तमत्य त'मिति पत्रिकाभिप्रायः।

कृतिरियं 'गेय' रूपमिति महानयं विशेषः। कालोऽयं गद्यस्य, पद्ये गेयस्य, गद्यपद्यात्मकस्य नाटकस्य च, न तथा श्लोकस्य। अतः अद्यत्वे 'गेयं' संस्कृतस्यापि सुकरं समर्थं च प्रचारसाधनं भवितुमर्हति—

प्रजातन्त्रे प्रजामोदं विना किमपि कार्यं न भवेत्। प्राकृताः अस्मत्प्रजाः संस्कृतं नाम्नैव जानन्ति—संस्कृतं पुरा भूमिमास्थिताम्, अद्य तु स्वर्गं गतां देवतां मन्यन्ते—अतोऽद्य प्रजानां मध्ये संस्कृतप्रचारस्य परमा आवश्यकता—

प्राकृतोऽपि गेयं लीलया गृह्णाति—तस्य आपात-मधुरत्वात्। एकवारं रम्यं गीतं श्रुत्वा पादं वा पादार्द्धं वा इक्षु-खंडमिव मुखे कृत्वा रसलुब्धः सुखं चरति। पुनः संस्कृत-गेयं सद्यः स्वदेशमेकीकरोति-कियान् लाभो वक्तव्यः! काशी-वासी जनः रामेश्वरवासी जनश्च एकमेव गीतं गायति।

अतो मे प्रार्थना यत् गेय-कवयः श्रीशर्माणः संस्कृते सद्यः 'गेय-काव्य-पथ'मुद्घाटयेयुः। एतेषामेव प्रधानत्वे 'संस्कृत-गेय-समितिः' प्रतिष्ठापनीया—प्रान्ते प्रान्ते ये संस्कृतज्ञाः गेयकाराः, तान् सहकाराय आह्व यामः—प्रत्येकस्य गेयस्य यथायोग्यं संमा[नं] च करिष्यामः—

गेयानि इमानि गेयकारैः स्वयं कल्पितानि नवा[नि] वा सन्तु—नो चेत् तुकाराम, कबीर, त्यागराजादी[नां] पूर्वगेयानि संस्कृते परिवर्तितानि वा सन्तु। परिवर्तने मूलगेयानामेव रागतालादिकं रक्षितव्यं, केवलं भाष[ा] परिवर्तनमेव अस्माभिरिष्यते—संस्कृतं तु व्यस्तं, ल[घु] ललितं, मृदु, मधुरं चेति पञ्चलक्षणं भवेत्—

संस्कृत-भाषाप्रसारणे (Broad costing) बाधाः जायन्ते किन्तु गेयविषये तादृशः कोऽ[पि] प्रतिरोधो न स्यात्।

---

निःशेषताराप।

परं पुनरद्य सहसैव तस्मिन्स्थाने असह्या तीव्रा रुजोत्थिता। तदपराधादात्मानमुन्मोचयितुमशक्तोस्मि। फलमिदं तस्या निर्दयतायाः शीघ्रताया वैवास्ति। मया एकस्या निर्दोषाया साध्व्याः वधो विहितः। अधुनाऽहं पश्चात्तापं कर्तुमप्यशक्तोऽस्मि। अतः तत्सन्निधावेव गच्छामि। तां च क्षमाप्रदानाय भृशं निवेदयिष्यामि[।] विश्वसिमि, साध्वी साऽवश्यमेव मह्यं क्षमां प्रदास्यति[।] अशक्ता सा साध्वी मदृते क्षणमपि जीवितुम्। अ[तो] नाऽहं गच्छामि। सर्जनमहोदयाः, मदीयः अन्ति[म] प्रणामः स्वीकर्तव्यः। श्रीमद्भ्यः पूर्वकृतायाः सहानुभू[त्याः] कृते धन्यवादः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भक्तः श्रीगरीबदासः

[ ले० चन्द्रशेखरशर्मा "गौतम" नरेनानिवासी ]

संसरणशीलेऽस्मिन् संसारे समयानुसारेण बहवो ...न्तः संजाताः। येषां लोकोपकारककारुण्य- ...पानरसेनैवाद्याऽपि प्रदेशान्तरेषु लब्धप्रतिष्ठाः ...तः जीवामो वयम्। येषां विचारधारयैवापरप्रदेशाः ...स्कुर्वन्त्यस्मान्। यदा यवनकुलहतकानां ...द्ध साम्राज्यमासीद् भारते, तदैव दादूमतावलम्बी ...शिरोमणिः गरीबदासेति नाम्ना प्रसिद्धः कोऽपि ...त्मा जन्म लेभे।

...महात्माऽयं संसारान्निवृत्तचित्तवृत्तिः सन् भगवति ...निष्ठ आसीत्। महाजनस्यास्य जन्म पंजाबप्रदेशा- ...न्तरोहतकप्रान्ते छुडानीतिनाम्ना प्रसिद्धे ग्रामे ...मुनिमुन्येकमिते (१७७४) संवत्सरेऽभूत्। बाल्य ...स्य मनसि पूर्णविरागता वर्तते स्म गृहकार्येषु। ...र्गेकी प्रवृत्तिरासीत् विनयपरिपूर्णा भगवदुन्मुखी ... प्रसद्धिर्वर्ततेऽस्य विषये "यत् स्वप्ने शिक्षितोऽयं ... कबीरेण।"

...तज्जीवने बह्व्यः घटनाः सुघटिताः, याभिः ...विता जना अद्याऽपि स्मरन्तीमं जनम्। श्रूयते, ...नेऽस्यैकदा दुर्भिक्षं पतितम्। परं भक्तस्यास्य कारु- ...ण्येन तस्यान्तोऽभूत्। वीतरागतया "निर्मक्षिके स्थाने ...ध्यामि" एतच्चिन्तितं महात्मनानेन, परं ...क्रमणेन विह्वलमानसेन दिल्लीश्वरेणैतद् ...श्रीरितं यद् यावत् महात्मायमत्रागत्येमं जनं ...ग्रहीष्यति, तावद् नोपशमिष्यति विग्रहोऽयम्। ...न आहूतोऽयं महात्मा दिल्लीमलं चकार। ... स्वागतानन्तरं चाक्रमणविषये निवेदितम्।

समाकर्ण्य महात्मना कथितं "मदिरापानं, गोवधो बहुरमणीसङ्गतश्च पूर्वं त्याज्यम्" तदा भगवत्कारुण्येनाखिलं कार्यजातं ते साफल्यमेष्यति। परं दुष्टसचिवानां कथनेन नैवाङ्गीकृतं तेन, प्रत्युत कारावासे बन्धनं कृतं महात्मनः गरीबदासस्य। किन्तु भगवद्भक्तानां कुतः कारावासः? अन्येद्युः स्वत एव कपाटोद्घाटनं संजातम्। क्षमा प्रार्थिता दिल्लीश्वरेण। करुणापरिपूर्णानि भवन्ति महात्मनां मनांसि। अतः तदाऽपि गरीबदासेनेदमेवावाचि—"भगवद्भक्तानां कृते न कदापि दुःखं प्रदेयं, यतो हि सतां दुःखेन दुःखीभवति परमात्मा।" निवृत्तश्च स्ववासस्थाने।

महात्माऽयम् एकषष्टिवत्सरमिते (६१) वयसि बाणरामवस्वेकमिते (१८३५) वत्सरे भाद्रसितद्वितीयायां दिवमगात्। सुनिश्चितमेतत्—यत्,

> यावद् भारतवर्षं स्यात्
> यावद् विन्ध्यहिमाचलौ।
> यावद् गंगा च गोदा च
> तावत् कीर्तिर्महात्मनाम् ॥१॥

---

# भारती

आयुर्वेदाचार्यः-पं० वेदव्रतशर्मा शास्त्री, विद्यासागरः
कासगंज

> भूषिता भारती भाति, हर्षमाघसमन्विता।
> भवद्भिः पोषिता सैव भारती भातु भूतले॥
> प्रतिमासं सुरुचिरां भारतीं विमलां शुभाम्।
> सम्प्राप्य मोदते भूयो वैद्यो वेदव्रतः सुधाः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ग्रामवाससौख्य-निसर्गवर्णनं च

[ रचयिता—महादेवसूनुः त्र्यम्बकशर्मा गुणे, पूना ]

अस्ति गोदावरीतीरे कश्चिद् ग्रामो मनोरमः।
निवसन्ति जनास्तस्मिन् स्वकर्तव्ये समाहिताः ॥ १ ॥
सहयोगस्य तत्त्वेन बद्धास्ते प्रेमरज्जुभिः।
स्वधर्माचरणे दक्षाः शीलाभरणभूषिताः ॥ २ ॥
ग्रामो देशतरोर्मूलं निधानं कृषिजीविनाम्।
केन्द्रं कार्यप्रवृत्तानां मनःशान्तिसुखास्पदम् ॥ ३ ॥
चेतोहरा वनश्रीश्च रम्यं भाति चराचरम्।
प्रोत्तुङ्गशैलराजिश्च पुण्यतोया तरङ्गिणी ॥ ४ ॥
नृत्यन्ति ऋतवः सर्वे हसन्तो हर्षनिर्भरात्।
चम्पकाशोककल्हारमालतीवल्लरीयुते ॥ ५ ॥
मन्दारकेतकीजाती–मल्लिकावकुलाकुले।
कदम्बचन्दनोपेते सुगन्धिमलयानिले ॥ ६ ॥
सर्वर्तुकुसुमामोदैरुद्याने हृदयङ्गमे।
उदुम्बरवटाश्वत्थशमीबिल्वद्रुमाङ्किते ॥ ७ ॥
द्राक्षादाडिमखर्जूरबदरीजम्बुसंकुले।
रम्भाम्राकीर्णकान्तारे सर्वर्तुफलशोभिते ॥ ८ ॥
एवमाविष्कृतालोके नेत्राह्लादककानने।
इन्दुः किरति पीयूषं रश्मिभिः प्लावयन् जगत् ॥ ९ ॥
मृगाङ्कमृगराजेन्द्रो हिनस्ति ध्वान्तकुञ्जरम्।
उदयात् सुविवेकस्य हताः कामादिशत्रवः ॥ १० ॥
कुमुदानि प्रफुल्लन्ति वायुर्वहति शीतलः।
सोमरश्मिसुधां पीत्वा चकोरा भान्ति हर्षिताः ॥ ११ ॥
जगत्संजीवनं चन्द्रः सौभाग्यामृतवर्षकः।
गगने रत्नदीपोऽसौ सृष्टिदेव्या महोत्सवः ॥ १२ ॥
शृङ्गारप्रियलोकानां दैवतं रोहिणीपतिः।
रसिकान् स नियुङ्क्ते च गीतनृत्यकलादिषु ॥ १३ ॥
स्वर्वधूदर्पणोऽयं किं रतिक्रीडनकन्दुकः।
स्वर्गङ्गापुण्डरीकं वा रतिकाञ्चीस्फुरन्मणिः ॥ १४ ॥
दिग्वधूकर्णपूरः किं सिन्धुरत्नं समुज्ज्वलम्।
तारामुक्तानुविद्धो वा रत्नहारो जगत्पतेः ॥ १५ ॥
मदनस्यातपत्रं किं भासमानः सुधाकरः।
सौभाग्यं स महालक्ष्म्या यतो भ्रातृपदं गतः ॥ १६ ॥
राकेन्दोः सुषमाऽतुल्या पौर्णिमायां विलोक्यते।
रूप्यांशुपुञ्जसंपातात् शोभां पुष्णाति कामपि ॥ १७ ॥
हरगौरीगणेशाद्यैः स प्रीत्या मूर्ध्नि धार्यते।
सुपर्याप्ता सुधा तस्मादिष्यतेऽहर्निशं सुरैः ॥ १८ ॥
चन्द्रिका पुष्पमालेव शीतला चन्दनोपमा।
चण्डार्कतप्तगात्राणां शाम्यन्ति श्रमिणां क्लमाः ॥१९॥
ज्योत्स्नापीयूषधाराभिश्चेतनां यान्ति कामुकाः।
वसन्तसमये प्राप्ते द्रुमाः पल्लविता न किम् ॥ २० ॥
गङ्गाशुभ्रजलस्रोत इव ज्योत्स्ना सुमोहिनी।
दुग्धं वा श्वेतपुष्पाणि सुरा वर्षन्ति लीलया ॥ २१ ॥
दीपावलिरिवाभाति तारकादीप्तमम्बरम्।
श्यामाङ्गया भूषणाढ्यायाश्चारुहास्याभचन्द्रिका ॥२२॥
इन्द्रनीलसमव्योम हैमतारमणिस्फुटम्।
शस्यदूर्वाङ्कुराढ्याभूरास्तृता हेमचम्पकैः ॥ २३ ॥
सरोवरे जलक्रीडां कुर्वन्ति ललनानराः।
प्रसन्ननीरकासारे फुल्लपङ्कजपूरिते ॥ २४ ॥
विहरन्त्यम्भसां पृष्ठे ललिता हंससारसाः।
पक्षिणो मञ्जुलध्वाना वसन्ति तरुकोटरे ॥ २५ ॥
आम्रशाखासुखासीना मञ्जु कूजन्ति कोकिलाः।
विचित्ररूपवर्णैश्च विहगाः समलंकृताः ॥ २६ ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



निसर्गसद्मकान्तारे क्रीडन्ति मृगशावकाः ।
श्वापदा बहवो वन्या भक्ष्यार्थं विचरन्ति च ॥ २७ ॥

वनश्रीः शान्तगम्भीरा व्यनक्ति प्रभुवैभवम् ।
भग्नोत्साहमनुष्याय चित्तशान्तिं प्रयच्छति ॥ २८ ॥

विस्मारयति दुःखौघं क्षणमेकं नृणां ध्रुवम् ।
आनन्दस्य परां कोटिं यान्ति ते हरिचिन्तनात् ॥२९॥

नातिदूरेऽस्ति कस्यापि मुनेः पुण्यं तपोवनम् ।
आगच्छन्ति जना दूराद्दर्शनोत्सुकमानसाः ॥ ३० ॥

तपोधनमुनिर्देवसेवाध्यानपरायणः ।
चित्तं प्रसन्नगङ्गाम्भःस्फटिकोपमनिर्मलम् ॥ ३१ ॥

सुरतुल्यऋषेर्वासात्प्रभावात्पुण्यकर्मणः ।
रमते धेनुशार्दूलं मिथो वैरं विहाय च ॥ ३२ ॥

कुटीरे निवसन् शान्तिं सत्त्ववृत्तिं च पालयन् ।
कन्दमूलफलान्यश्नन् पिबन् पुण्यसरिज्जलम् ॥ ३३ ॥

विपन्नदीनरुग्णस्य साहाय्यार्थं स धावति ।
विद्धगाढानुरागेण यः प्रीणाति स्वबान्धवान् ॥ ३४ ॥

लोकाराधनसंतोषः स तान् नीतिं प्रबोधयन् ।
यदृच्छया नयत्यायुर्निःस्वार्थत्यागतत्परः ॥ ३५ ॥

व्यतरच्चोपदेशं स भूत्यर्थं ग्रामवासिषु ।
तेषां चाभ्युदयं काङ्क्षन् जगाद मधुरं वचः ॥ ३६ ॥

"श्रद्धानिरतचित्तेन यूयं भजत शङ्करम् ।
भवेत लोककल्याणज्ञानदानधृतादराः ॥ ३७ ॥

देवद्विजगुरूणां च साधूनां चैव वन्दनात् ।
आयुर्विद्या यशो लक्ष्मीर्वर्धन्ते प्रत्यहं नृणाम् ॥३८॥

परलोकसखो धर्मो लोकेऽस्मिन् स जयावहः ।
धर्ममूलं सदाचारस्तेन समृद्धजीवनम् ॥ ३९ ॥

वक्त्रस्याभरणं वाणी पूजार्हो विद्यया नरः ।
सत्यं वाचस्तपो मन्ये शीलं मनुजभूषणम् ॥ ४० ॥

उद्योगात्प्राप्यते लक्ष्मीर्या लब्ध्वा धर्ममाचरेत् ।
कर्म जीवनसूत्रं च कार्यं नित्यं मुमुक्षुभिः ॥ ४१ ॥

न दानादधिकं पुण्यमन्नदानं विशिष्यते ।
विद्याऽपि सर्वदानेभ्यः श्लाघ्यं निःश्रेयसास्पदम् ॥४२॥

इदं विश्वं समुद्भूतं सङ्कल्पात्परमात्मनः ।
लीलया तत्सृजन् रक्षन् लयं नीत्वा स तिष्ठति ॥ ४३ ॥

सर्वभूतनिविष्टोऽयं विश्वात्मा निखिलेश्वरः ।
कार्यं कुर्वन्नलिप्तोऽपि कर्मसाक्षी स देहिनाम् ॥ ४४ ॥

अविद्याग्रस्तजीवोऽयं भ्रमन् संसृतिबन्धने ।
प्रभोर्भक्त्या गुरूणां च सेवयाऽत्मानमुद्धरेत् ॥ ४५ ॥

तपसो जायते ज्ञानं ज्ञानोन्मीलितचक्षुषः ।
तया धन्यो मनुष्योऽस्ति भवचक्राद्विमुच्यते ॥ ४६ ॥

तपसो जायते ज्ञानं तेन मुक्तिरसंशयम् ।
ध्यानावस्थितचित्ते च स आत्मा हृदि भासते ॥ ४७ ॥

उदेति सच्चिदानन्दो योगिहृदयमन्दिरे ।
निर्विकल्पसमाधौ च ह्यात्मनि ब्रह्मणि स्थिते ॥ ४८ ॥

विभासते चिदानन्दः स्वस्वरूपस्य बोधनात् ।
तस्मिन् ज्ञाते क्षयं याति संसाराशेषकिल्बिषम् ॥ ४९ ॥

आविर्भवति चैतन्यं हृदये ज्ञाननिर्मले ।
यस्य त्विषा प्रकाशन्ते चन्द्रार्कौ ग्रहमण्डलम् ॥ ५० ॥

हृदि स्फुरति चिद्रूपः ध्यानमग्नस्य योगिनः ।
तूष्णीं भावोपपन्नस्य हर्षाम्बुधिनिमज्जनात् ॥ ५१ ॥

अष्टाङ्गयोगमार्गैश्च चित्तवृत्तिनिरोधतः ।
समाधौ शून्यवृत्तित्वात् चिदात्मा दृश्यते हृदि" ॥५२॥

उपदेशान्मुनेरेवं लोकाः सानन्दमानसाः ।
निदाघपीडिता जीवा यथा मेघाम्बुवर्षणात् ॥ ५३ ॥

कुटीरस्थोऽपि जागर्ति भूतमात्रहिताय सः ।
चित्तस्थ कोमला वृत्तिर्यन्मुखे प्रतिबिम्बिता ॥ ५४ ॥

निर्मुक्तसङ्गसङ्कल्पसन्देहो नष्टवासनः ।
अखण्डसच्चिदानन्दपरब्रह्मणि संस्थितः ॥ ५५ ॥

सद्भक्तिर्जननी यस्य निर्वेदो जनको मतः ।
भगिनी परमा शान्तिर्मुक्तिः कान्ता वशानुगा ॥ ५६ ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# साहित्यस्यापि दर्शनत्वम्

[ ले० राजकीयाचार्यः पं० कृष्णानन्दशर्मा साहित्याचार्यः, बून्दी ( राजस्थान )

अद्यत्वे प्रवर्तमाने संस्कृतविद्यायाः पठनपाठनादि-प्रचारप्रकारे प्रायशः एकैकं विषयमेवावलम्ब्य प्रवर्तन्ते स्वपाण्डित्यप्रकाशनाय विद्वांसः। न पुन-स्तथा प्रयतन्ते यथा अल्पश्रमेणैव भूयःसु विषयेषु भवेत् प्रवेशो व्युत्पित्सूनाम्। समयप्रगत्यनुसारमद्य परमावश्यकोऽस्ति बहुषु शास्त्रीयेषु लौकिकेषु च विषयेषु प्रवेशः। यतो हि—

"वर्तमानेन कालेन विचरन्ति विचक्षणाः"

यथासंभवमुभयत्र बहुज्ञतासंपादनमेव नितरां हितावहमुन्नतं पदमारुरुक्षूणाम्। यथाहुः स्मृतिकाराः—

"लोकवेदज्ञधर्मज्ञाः सप्त पञ्च त्रयोपि वा।
यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा॥"
"चत्वारो लोकधर्मज्ञाः पर्षत् त्रैविद्यमेव वा"

तत्र तन्तुषु पट इव प्रायः समस्तशास्त्राणामेक-त्रैवोतप्रोततया शास्त्रीयलौकिकादिविविधव्यावहा-रिकविषयेषु प्रावीण्यसिद्धये साहित्यशास्त्रस्यैव परमुपयोगित्वं दरीदृश्यते। वापीकूपतड़ागाद्यखिल-जलाशयसंपाद्यसमर्थ जलनिधिरिवेदं सर्वेषामपि शास्त्राणां चमत्कारोद्बोधं समुपगमयति स्वं सेवमा-नानामित्येव साहित्याभिधानमलङ्कुरुते। तथा च हितेन सह वर्तमानत्वमेव साहित्यमित्यन्वर्थतापि तस्य संगच्छते। यदि नाम निरायासं धर्मादिचतुर्वर्गः सम्पद्यते तर्हि काव्यादेव, न तु वेदादिदर्शनशास्त्रेभ्यः न वा यागादिभ्यः। तेषु हि काठिन्यादर्थगाम्भीर्या-च्छीघ्रबोधोपयोगिपदार्थानामेकत्राभावाच्च तेभ्यो मेधा-विपुरुषाणामेव लाभो न तु स्वल्पबुद्धीनाम्। किञ्च समस्तदर्शनाभिज्ञतापि निरन्तरमनेकवर्षपर्यन्तं गुरु-शुश्रूषामन्तरा न भवतीति नास्ति तिरोहितं सचेत-साम्। ननु धर्मतत्त्वं जिज्ञासूनां कृते—

"वेदप्रणिहितो धर्मो ह्यधर्मस्तद् विपर्ययः"

"धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः"

इत्यादिप्रामाण्यात् वेदार्थपरिशीलनकर्तव्यस्य जागरूकत्वे सति किमिति काव्यादिषु यत्नः करणीयः। इति चेन्न दुरवगमत्वादनल्पावयवत्वाच्च वेदार्थपरिशीलने सर्वसाधा-रणजिज्ञासूनामनधिकारत्वात्। अपि च—न खलु वेदा-विज्ञानमनन्यापेक्षं, तद्विज्ञाने हि अङ्गज्ञानस्यापि सम्य-पेक्षितत्वात्। अङ्गानि च षट्। तेषु तेषु चाङ्गेषु प्रवेश-मन्तरेण वेदेषु प्रवेशो न संभवति, प्रवेशं विना तदर्थावगमो नास्ति। अनधिगते च तदर्थे वेदपा-शुकपाठमिवाऽकिंचित्करम्। एवं च तत्तत्सर्वं दर्श-वेदादिसमादिष्टमिष्टसाधकमपि कठोरकष्टसाध-मवश्यमेवेत्यत्र नास्ति केषाञ्चिदपि मतवैषम्यम्। काव्यं च पुना रसमयं माधुर्य्यमयं मानसं प्रफुल्लयत् सर्वजीवानां न केवलं चतुर्वर्गफलप्राप्तिसाधकं

---

निर्मत्सरः स्थितप्रज्ञो जितक्रोधो जितेन्द्रियः।
निर्द्वन्द्वः प्राप्तमोक्षोऽसौ भवसागरपारगः॥ ५७॥
ध्यानगम्यात्मको देवो हृदिस्थो बहुदुर्लभः।
परं स लभ्यते सर्वैः साधुदर्शनमात्रतः॥ ५८॥
एवं मनोहरो ग्रामो सृष्टिसौन्दर्यमण्डितः।
पुण्योदयाज्जनास्तत्र सन्ति सद्वृत्तिशालिनः॥ ५९
प्रहृष्यति रसज्ञचित्तमपि वीक्ष्य सृष्टिप्रभाम्
प्रशान्ततटिनीवनद्रुमलतासुपुष्पोज्ज्वलाम्।
सुकान्तविधुचन्द्रिकां गगनतारकोद्भासिताम्
प्रसन्नसलिलाकुलं विकचपद्मकीर्णं सरः॥ ६०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रपितु कलावैलक्षण्यमपि समासादयति। तस्मात् क्तं च पूज्यपादैः—"धर्मार्थकाममोक्षेषु वैलक्षण्यं कलासु च। "करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्" इति। एवं सति कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे सति कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात्।

"अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्"।

न च काव्याद्दर्शनशास्त्रादिव्युत्पत्तिमात्रं, ततस्त वानुमानं, ततो मोक्षः, इति साहित्यापेक्षया दर्शनारेव प्रधानत्वमिति वाच्यम्। स्वातन्त्र्येणापि रामायणादिकाव्यानुष्ठानेन मोक्षलाभप्रदर्शनात्। एतदर्थं च करुणार्द्र मानसा महामहिमशालिनो जगद्धितार्थिनो महाकवयः वेदार्थान् तत्त्वतः परिकलय्य धर्मादिचतुर्वर्गसाधकं साहित्यापरनामकमन्यादृशमेव कमपि सुगमं नूतनं पन्थानमिममाविष्कृतवन्तः। सरसायां सरलायां च यस्यां साहित्यिकसरण्यां सुसुखं सञ्चरन्तः स्वल्पमेधावन्तोपि नानारसाधिगमेन कामपि लोकोत्तरां ब्रह्मानन्दसहोदरसुखपरंपरामधिगच्छन्तः जगति जीवा अपि मुक्ततामनुभवन्ति सहसा। तथा च श्रूयते "एकः शब्दः (ओमित्यादिस्वरूपः) सुप्रयुक्तः सम्यग् ज्ञातः स्वर्गे लोके च कामधुग्भवतीति। श्रूयते च कालिदासादयः कविकुलललामभूताः काव्यमार्गगौरवेणैव मृता अपि सजीवतामुपगता अद्यापि जीवितवदाभासन्ते संसारेषु। अद्यापि तेषां कीर्तिभिरा धवलयति सुधेव पूर्णसुधाकरस्य सर्वा दिशः। बहुना काव्यादेव वयमधिगच्छामो यद् रामावत्प्रवर्तितव्यं न रावणादिवत्। मृच्छकटिकप्रकरणनायकस्यार्यचारुदत्तस्य चरित्रं शिक्षणीयं न शकारस्य। शिक्षिते च शकारचरित्रे महदनिष्टं न किं श्राव्यते? चारुदत्तचरित्रे च समाचरिते—इहामुत्र च भावि मङ्गलमव्याहतं स्थास्यतीत्येवं शिवसाधकव्यवहारपरिज्ञानेन जायते सर्वथाऽऽत्मनः श्रेयःसुखमिति स्वल्पमेधसोपि काव्यं समधिगच्छन्तः संसारपरिहारमकुर्वन्तोपि स्वच्छन्दं मोक्षमपि समागन्तुं शक्नुवन्तीति वैशिष्ट्यं दर्शनादिभ्यः काव्यस्य। अथवा अलं दर्शनार्थपर्यालोचनपरिहारेण। साहित्यं हि दर्शनार्थस्य वा शब्दार्थस्य वा व्यवहारशास्त्रस्य समवाय एव। तद् यदि साहित्यालोचनया गूढांशं सुगूढमनुधरणया चित्ते धारयामस्तदैव भवति सकल-दर्शन-शास्त्रार्थ-पर्यालोचनाफलमनायासम्। एतत्सकलमपि निष्कलङ्क समुट्टङ्कितवन्तः श्रीविश्वनाथकविराजाः—

"चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि"

काव्यादेवे" त्यादि। काव्यानुशीलनेनैव केन सह कीदृशं व्यवहर्त्तव्यम्, गुरौ विनयेन वर्तितव्यं, कनिष्ठे वात्सल्येन, प्रणयिनि निर्मल-प्रणयेन, इत्यादि व्यवहारो विज्ञायते। काव्येषु च बहुलेषु स्थलेषु देवचरितपाठेन धर्मजनकनानाविषयज्ञानेन धर्मः, राजादिपरितोषणेन चार्थः, अर्थतो वा देवादिपरितोषणेन कामनालाभः, मोक्षोपाय-परिज्ञानेन तदाचरणाच्च मोक्षप्राप्तिः प्रत्यक्षसिद्धे ति। काव्यद्वारा पुरुषार्थाः सिद्ध्यन्ति कलावैलक्षण्यादि च सम्पद्यते इति निष्कृष्टम्।

वर्तमाने च कालप्रवाहे सुतरामेव समुपयोगि काव्यं परमार्थतत्त्वाधिगमे। तथा च क्षीणमस्माकमायुः सन्ततमेव क्षीयते जननिवहम्। अपिच केचिदकाले केचिच्च चत्वारिंशत्तमे पञ्चाशत्तमे वा वर्षे स्वकाले जीवनं विसर्जयन्ति। तत्र यदि सुविस्तृतवेदादिदर्शनशास्त्रानुशीलनेन ज्ञानमर्जनीयं स्यात्तदा कस्यापि ज्ञानसंभावना न स्यात्। अतः स्वल्पमेधसामस्माकं स्वल्पकालसंवेद्यं काव्यमेव सकलदर्शनादिशास्त्रार्थसारभूतं तत्त्वार्थाधिगमे परं साहाय्यमाचरितुमलंभविष्णु।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# शिक्षाधिकारः

[ श्री-स्वामी मनोहरलालब्रह्मचारी, जयपुरम् ]

यद्यपि साम्प्रतं शिक्षाप्रचारं प्रति दत्तावधानोऽस्ति लोकः; सावधानेन भवितव्यमपि। शिक्षयैव वास्तविकं मनुष्यजीवनम्; परन्तु यावत् ध्यानं परीक्षाया उत्तरणे तथा इतरेषाम् उत्तारणे दीयते न खलु तावत् योग्यतावर्धने। अत एव अद्यत्वे वहव उपाधिधारिणः सज्जना उक्तविषयस्य यथार्थज्ञानेन शून्या दरीदृश्यन्ते। परीक्षासमये पाठं रटित्वोत्तरणेन वास्तविकयोग्यता नहि वर्धते, इति प्रत्यक्षमेव।

किन्तु वास्तविकजीवनं तु केवलं ज्ञानेनापि न प्राप्यते। संप्रति कलानां महत्त्वमधिकं वर्तते। लेखनवक्तृत्वकाव्यादिकलासु कौशलप्राप्तये अत्यन्तं चेष्ट्यते। उद्योगिनः पुरुषाः सफलीभवन्त्यपि। कस्मिंश्चिदपि विषये लेखं लिखित्वा, वक्तृतां श्रावयित्वा, काव्यरचनां कृत्वा, ते लोकान् कस्मैचन कालाय मुग्धान् प्रभावितांश्च कर्तुं शक्नुयुः। परन्तु वास्तविकानुभवं विना केवलं कला, तेषां जीवनस्य केवलं बाह्यप्रदर्शनमेव वर्तते। निर्जीवशरीरेण इव तया कश्चित् प्रकृतलाभो न जायते।

वेदान्तस्य परीक्षोत्तीर्णाः विद्वांसः वेदान्ते विषये लेखने कथने च प्रत्येकं प्रक्रियायाः सूक्ष्मात्सूक्ष्मतरमपि विवेचनं कर्तुमर्हन्ति; किन्तु क्रियारूपेण तेषामन्तिके किञ्चिदपि न प्राप्यते; ते स्वतः शोकसागरे निमग्नाः दरीदृश्यन्ते। तेषां वेदान्तः केवलमध्ययनस्य, शास्त्रार्थस्य, लोकप्रदर्शनस्य वा वस्तु। इयमेवावस्था भक्तोपाधिधारिणां वक्तृत्वलेखनकलयोश्च कुशलानां नराणाम्।

कार्यक्षेत्रे भक्तिर्विषयेष्वेव प्राप्यते। परन्तु वक्तृताय
मथवा लेखने भक्त्याः स्रोतः परमेश्वरं स्पृशति।

मीरा-कवीर-सूर-दादू-तुलस्यादीनां रचनासु, त
केवलं कविताया भावस्य सौन्दर्यस्य च दृष्ट्या काव्य
रचयितॄणां महाकाव्येषु इदमेव महदन्तरमस्ति
संभाव्यते, यदेषां कविता कालदृष्ट्या सूरतुलसी
दासयोः तुलनामापद्येत, अथवा मीरा-दादू-कवीरा
साधूनां कवितापेक्षया महीयसी गण्येत; किन्तु मी
कवीर-दादूप्रभृतीनां काव्येन सदृशो हृदयानुभवश्चा
कुतः प्राप्स्यते।

भक्ति-ज्ञान-योग-वैराग्य-धर्म-विज्ञानादिविषयेषु, गु
शिष्यस्य च द्वयोरपि अधिकारस्य प्रधानता वर्तते
न हीमानि आपणिकानि वस्तूनि सन्ति। अत एव इ
सर्वेऽपि विषयाः गुरोर्मुखादेव पठनीयाः मन्यन्ते; न
लेखस्य अथवा वक्तृतायाः। यदारभ्य अनुभवरहित
लोकाः केवलं पुस्तकीयज्ञानसाहाय्येन इतस्ततः सामग्री
कत्रीकृत्य लेखितुमुपदेष्टुं च प्रवृत्ताः, यदारभ्य इमा
आपणिकानि वस्तूनि संजातानि, तदारभ्यैव ए
महत्त्वं न्यूनं सञ्जातम्। यतोऽनुभवशून्यलेखव्याख्या
योश्चानुसारमनुसर्तारः कमपि विशेषलाभमप्राप्तवन्त
अनेन तेषां श्रद्धा ह्रसिताऽभूत्।

कियन्त्येव वर्षाणि तपश्चर्यां साधनां च कृत
गुरुकृपया भगवत्कृपया च यैस्तत्त्वमुपलब्धं त
तत्तत्त्वस्योपदेशस्याधिकारिणः सन्ति। तथा च यस्तप
साधनया च तत्तत्त्वप्राप्तेः, वास्तविकाभिलाष्यस्ति,
एव गुरुहरिभक्तमनुष्यः श्रवणाधिकारी वर्तते। संप्र



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रायशः अनयोर्द्वयोरपि विद्यते अभावः। अत एव न भवति वास्तविको लाभः।

सर्वत्र कृत्रिमतायाः साम्राज्येन, बाह्याटोपमेव पश्यति लोकः, यतोऽन्तः प्रवेष्टुं नेच्छति कोऽपि। ः कीदृक् वक्तुं शक्नोति, कीदृक् लेखितुं शक्नोति, स्य रचना कीदृशी भवति, एतदेवावलोकयति लोकः। वास्तविकानुभविनं विना यथार्थतत्त्वं नैव ज्ञातुं शक्यते। ो यद्विषयस्य तत्त्वज्ञोऽस्ति कामं स इतरविषयेषु नतान्तमनभिज्ञो भवेत्; कामं स कालदृष्ट्या दूषित-भाषायामेव वदेत्, किन्तु तत्तत्त्वस्य ज्ञानं तस्मादेव प्राप्तुं शक्यते। चित्रकारः स्वर्णकारोऽथवा अन्यः कश्चित् कलाकारः कामं शुद्धसंस्कृतेऽथवाङ्गलभाषायां स्वविषयस्य प्रतिपादनं कर्तुं न पारयेत्, कामं तेषु विषयेषु सुन्दर-कवितां लेखितुं न शक्नुयात्, परन्तु तेषां विद्या-क्षणाय महाविदुषामपि तेषामनुभविनामन्तिके गमनमावश्यकम्। महिष्ठा अपि महाराजाः तथा महान्तः योऽपि रोगस्य चिकित्सायै अनुभविवैद्यस्यैव शरणं न्ति। वस्तुतोऽनुभव एव महान् वर्तते, यदि द्याथवा कलापि स्यात् तेन सार्धं तर्हि स्वर्णे सुगन्ध ति न्यायो घटेत। सूरतुलसीदासादिषु आसीत् इदं मपि।

परन्तु योऽनुभवी स्यात्, विद्वांश्च न स्यात्, कामं इतरान् पर्याप्तं लाभं प्रापयितुं शक्तो न भवेत्, मं स इतरान् न शक्नुयात् आक्रष्टुम्, परं तेन लब्धमेव तत्तत्त्वम्। अनुभवहीना विद्या अथवा ता प्राणहीनशरीरवत् भवति निरर्थका। अत एव वान् श्रीमद्भागवते समाचष्टे—

"शब्दब्रह्मणि निष्णातो न निष्णायात् परे यदि।
स्तस्य श्रमफलो ह्यधेनुमिव रक्षतः॥" (११।११।१८)

येन पुरुषेण संपूर्णो वेदोऽधीतो, यश्चाभूत् पारङ्गतो, येन च गत्वापि पारं न ज्ञातं परं ब्रह्म, तेन वन्ध्यायां गो रक्षकेणेव केवलं परिश्रम एव हस्तीक्रियते। इयमेवावस्था वर्ततेऽनुभवहीनविद्याया अपि। विद्यां विहायापि, यस्यान्तिकेऽनुभवो विद्येत, स्यात् किमपि वस्तु, तदुपसेव्याद्दृत्य च कर्तव्या उक्तवस्तुप्राप्तेश्चेष्टा। कलाहीनोऽयमिति मत्वा न स उपेक्षणीयः।

मनुष्येणानुभवस्य प्राप्तये, तत्त्वोपलब्धये एव प्रयतितव्यं, तथा च वास्तविकतत्त्वोपलब्धेः पश्चादेव तत्तत्त्वस्य संबन्धे किञ्चिद् वक्तव्यमथवा लेखनीयम्। तदैव तस्य वक्तुर्वास्तविकः प्रभावः तिष्ठति। तेन च सिध्यति कार्यम्। यद्येवं न भविष्यति, केवलं च कलानाम्ना अनुभवरहितलेखोपदेशवक्तृताकवितानां शब्दाडम्बरपूर्णप्रवाहोऽनेनैव प्रकारेण स्यन्दमानो भविष्यति, तर्हि एतेन साकमनुभविपुरुषाणां वचनाना-मपि न स्थास्यति किञ्चित् मूल्यम्। किं च तेषां प्राप्तिः, परीक्षणमवगमनञ्चापि भविष्यति दुष्करम्।

पुरा प्रत्येकं विषये प्रत्येकं मनुष्यस्य एतस्मादेव कारणात् नैव मन्यते स्म भाषणाधिकारः; किन्तु इदानी-न्तनी दशा तु विपरीतव वर्तते। अद्यत्वे तु महान्तो मिथ्यावादिनः सत्ये, विषयिणो वेदान्ते, कातराः शूरतायां, व्यभिचारिणो ब्रह्मचर्ये, असत्यः पातिव्रत्ये, स्वेच्छाचारिणो मर्यादायां, भोगिनो वैराग्ये, असाधवः साधुतायां, नास्तिकाश्च भक्तिमुद्दिश्य यथेच्छं लिखन्ति समाचक्षते च। सर्वेष्वपि क्षेत्रेषु इयमेवावस्था दरीदृश्यते। अत एव संप्रति "सब धान बाईस पंसेरी," इति हिन्दीभाषोक्तिः सफलीभवन्त्यस्ति। दुर्जनसज्जनयोश्च परीक्षणं प्रायशो नष्टमेव। अवधातव्यं जनैः।

———



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# "क्षमाशीलो युधिष्ठिरः

लेखकः—ठाकुर ओंप्रकाशः शास्त्री, रजतपदकविजेता, हिन्दी-प्रभाकरः, विद्याभूषणः, हरियाना-हाईस्कूल, सोनीपत।

## प्रथमं दृश्यम्

[ स्थानं—हस्तिनापुरे विद्यालयः, कौरवाः पाण्डवाश्च सर्वे उपविष्टाः सन्ति। ततः प्रविशति द्रोणाचार्यः। सर्वे तस्य प्रत्युत्तिष्ठन्ति, तदादेशेन स्वीयान्यासनानि चाध्यासते ]

द्रोणाचार्यः—अयि बालाः! निजनिजपुस्तकानि समानयत।

( सर्वे पुस्तकान्यादाय समायान्ति )

द्रोणाचार्यः—युधिष्ठिर! पुस्तकमुद्घास्य प्रथमं पृष्ठं पठ।

( युधिष्ठिरः पठति )

१. सदा क्षमामाचरेत्।
२. प्राणव्ययेऽपि-असत्यं न वदेत्।
३. शरीरशुद्ध्या समं मनःशुद्धिरप्यावश्यकी।
४. सदा न्यायमार्गमनुसरेत्।

द्रोणाचार्यः—अलमलं युधिष्ठिर, पठितेन। भीम! त्वमस्य पाठस्यावृत्तिं कुरु।

( भीमः पठति, तदनु सर्वे क्रमेणाधीयते।

द्रोणाचार्यः—सम्प्रति सर्वे यात निजनिजगृहम्। अपरस्मिन् सप्ताहे परीक्षा भविष्यति, तदर्थं सज्जा कर्तव्या सावधानेन मनसा।

( सर्वे बालाः सखेलं कूर्दन्तः धावन्तश्च यान्ति, युधिष्ठिरश्चिन्तानिमग्न इव अवलोक्यते )

युधिष्ठिरः—( स्वगतम् ) अहो! अद्यतनः कीदृशः आसीत् सुमनोहरः पाठः। गुरुमहोदयैः कथितमासीत् यत् क्रोधः मानवस्य देह विनाशयति, तदीयां बुद्धिं स्मृतिमपि चावधीरयति। अतः सदा क्षान्तिराश्रयणीया। अहन्तु पूर्वमिदमेव ज्ञातुं प्रयतिष्ये

( इति मन्दमुपसर्पति सदनम् )

( पटपरिवर्तनम् )

## द्वितीयं दृश्यम्

परीक्षाभवनम्—सर्वे बालाः यथासनमुपविष्टाः सन्ति आचार्यमहोदयः उन्नतमेकं काष्ठपीठ मध्यास्ते।

द्रोणाचार्यः—अयि वत्साः! अद्य युष्माकं परीक्षादिन मस्ति, अतः सर्वे यूयं क्रमेण मामुवगच्छ स्वीयं पाठं च श्रावयत।

[ सर्वे बालाः पर्यायेण आचार्यमुपसृत्य पा श्रावयन्ति, स च तेभ्यः पारितोषिकं वितरन्नस्ति ]

( ततः प्रविशति युधिष्ठिरः )

द्रोणाचार्यः—अयि युधिष्ठिर! अपि स्मृतस्त्वया पाठः

युधिष्ठिरः—आम्! भगवन्!!

द्रोणाचार्यः— तर्हि श्रावय, अलमलं विलम्बितेन।

( युधिष्ठिरः जोषमास्थाय मुखमानमय्य चावस्थितः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



द्रोणाचार्यः—रे मूढ ! कथमेवं तिष्ठसि ?

( युधिष्ठिरः पुनरपि तथैव मौनमास्थितः )

द्रोणाचार्यः—अये किन्तु पश्यामि। यः सर्वेषु ज्येष्ठः, यश्च निखिलस्यापि भारतस्य सम्राड् भविता, स एव निरक्षरः !

( सकोपं लगुडमुत्थाप्य सतड़तडाशब्दं ताडयति। सर्वे हसन्ति )

पटाक्षेपः

## तृतीयं दृश्यम्

[ आचार्यभवने-कुटीराद् बहिः प्राङ्गणे आचार्यः सचिन्त इव गतागतं विदधानोऽस्ति। तत्र प्रविशति युधिष्ठिरः ]

युधिष्ठिरः—भगवन्, एष युधिष्ठिरोऽत्रभवन्तं भवन्तमभिवादयते।

द्रोणाचार्यः—प्रसीद वत्स ! प्रसीद। अपि कुशलम् ? किमित्यागतोऽसि।

युधिष्ठिरः—भगवत्कृपया क्व नु नाम अनिष्टावकाशः ? अहमिह............( कण्ठावरोधः )

द्रोणाचार्यः—ब्रूहि वत्स ! ब्रूहि निराशङ्कम्।

युधिष्ठिरः—अहमिह निजधाष्ट्र्यं क्षामयितुमागतोऽस्मि।

द्रोणाचार्यः—कीदृक्षं तत् ?

युधिष्ठिरः—यदद्य प्रत्यूषे संजातम्।

द्रोणाचार्यः—आम्, स्मारितोऽस्मि। परं कथय, कथं त्वया नैव श्रावितः पाठः।

युधिष्ठिरः—( विनयावनतो भूत्वा ) श्रावितपूर्वोऽस्मि भगवन्।

द्रोणाचार्यः—आः ! किं ब्रवीषि। अत्र विषय एवाहं कोपपरीतमानसत्वमयासिषम्। अधुना त्वमेवं भाषसे, यदहं पूर्वमेव श्रावितवान् इति।

युधिष्ठिरः—सत्यमेतत् ! परं श्रीमद्भिरेव ग्रन्थारम्भे शिक्षयितमासीत् सदा क्षमामाचरेति। स एवाद्यः पाठो मया पठितः समनोयोगं रात्रिन्दिवं विचारितश्च।

द्रोणाचार्यः—ततः किं भवति ?

युधिष्ठिरः—तत इदं जायते, यदहं निश्चयमकरवम्, यद्यावदहं पाठमिमं नैजे जीवने नाचरिष्ये तावदन्यं पाठं नैव पठिष्ये। तदनुसारं श्रीमन्तो मां तथाऽताडयन् परमहं क्षान्त्या तत्सर्वं मर्षितवान्।

द्रोणाचार्यः—धन्योऽसि वत्स युधिष्ठिर ! धन्योऽसि। अद्यपर्यन्तं शतशोऽध्येतारो मयाऽध्यापिताः,परं त्वादृक्षः नैव लब्धो मया कश्चित्, य एकमेकमक्षरं निजजीवनेऽवतारयति। पुस्तककीटानां मोघोऽस्ति सर्वेषां परिश्रमः। अवश्यमेव त्वमेकदा भारतस्य हृदयसम्राड् भविष्यसि मदीयेनाशिषा।

यतोहि—

**उपदेशं प्रकुर्वाणा लभ्यन्ते बहवो नराः।**
**स्वयमाचारसंपन्ना दुर्लभा भुवि मानवाः ॥**



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## चपलः श्यालकः

ले० दीनानाथत्रिवेदी 'मधुपः' साहित्याचार्यः, जयपुरम्

रमेशस्य श्यामो नाम श्यालकः प्रायः दिनेऽएकवारमवश्यं निजभगिनीगृहे समागच्छति स्म। निराश्रयतया रमेशस्य विधवा भगिनी अपि स्वभ्रातुः गृहे एव स्वस्य आयुषः शेषाणि दिनानि यापयति स्म। रमेशः प्रकृत्या महाकोपशीलः आसीत् श्यामश्च विनोदप्रियः।

एकदा श्यामः रहसि रमेशस्य भगिन्याः कपोले खपरिहासं चपेटिकां ददौ। तदा भाग्यवशात् प्रकोष्ठे स्थितः एव रमेशः श्यालकस्य श्यामस्य चेष्टितमिदं दृष्टवान्। रोषारुणनेत्रः रमेशः सत्वरं बहिरागत्य श्यालकं च आहूय अवदत्—रे श्याम! संप्रति त्वया किमाचरितम्? न भूयः कदापि मम द्वारि त्वया पदार्पणं विधेयमिति। श्यामः मन्देन स्वरेण उवाद—भाम! (भगिनीपते) किं जातं? कथय कथय।

रमेशः उक्तवान्—त्वं मम भगिन्याः कपोले चपेटिकां किमिति दत्तवान्। श्यामेन प्रोक्तं—भाम! मया प्रेमूणा चपेटिकाप्रहारो दत्तः न कोपेन—इति। एतत् श्रुत्वा विवृद्धकोपः रमेशः तं प्रत्याह—प्रेम्णापि किमर्थं त्वया तस्याः चपेटिकाप्रहारः प्रत्तः?

एतत् निशम्य श्यामः तत्कोपं शमयन्निव प्रत्युत्तरं दत्तवान्-"भगिनीपते, मर्षय मर्षय मनाक् मम चापल्यम्। भाम! पश्यतु भवान् मम हृदयस्य दार्ढ्यं—यदद्य विंशतिः वर्षाणि व्यतीतानि। मम भगिनी भवतः समीप एव रात्रिन्दिवमपि वर्तते। न जाने श्रीमता मम भगिन्याः कपोले कति प्रहाराः प्रत्ताः, परमहं कदापि भवतामग्रे तदर्थं न किमपि उक्तवानस्मि। भाम! मम स्वल्पेऽप्यपराधे भवतः एतावान् महान् कोपः न भवन्तं भूषयति।" एतद्वचःश्रवणानन्तरमेव शान्तक्रोधरयः रमेशः श्यालकं भणितवान् यत् श्याम! नूनं त्वमतिचपलोऽसि।

## विजय-संवत्सर-स्वागतम्

[ प्राप्त-विश्रमस्य मगधप्रदेशराज्यपाजस्य श्रीमाधव-श्रीहरि-अणे-महोदयस्य तथा साहित्यवैभवाद्यनेकग्रन्थनिर्मातुः-भट्टश्रीमथुरानाथशास्त्रिमहाभागस्य प्राप्ते नववर्षारम्भशुभाशिषौ समुपस्थाप्येते मनो-बुद्धिविनोदाय पाठकानां सेवायाम्—] संपादकः

----

वन्देऽब्दं विजयाभिधं समुदितं विश्वप्रमोदास्पदं
गीताशास्त्ररताँश्च कर्मकुशलान् कर्तुं जनान् भारते।
मन्ये भारतयुद्धवीरविजयो प्राप्तोऽद्य धर्मानुजः
श्रीभूती सहचारिणीव वसतो यत्पार्श्वयोः सर्वदा ॥१
स्वातन्त्र्यस्य च संस्कृतेश्च युवको रक्षाबलोत्साहवान्
विद्याशीलयुतोस्तु दीनदलितोद्धारप्रयत्नवृती।
एवं बोधयितुं नु भारतजनान् द्वारस्थचूडामणिर
वैकुण्ठाद् विजयो कृपालु-हरिणा भृत्योत्तमः प्रेषितः।
भूदानेन समर्चितुं कृशतनुं दारिद्र्यनारायणं
प्रारब्धोऽग्निसमित्-कुशाज्यरहितो यज्ञोऽद्भुतोऽध्वर्यु
विप्रश्रेष्ठ-विनायकेन चरणाभ्यां देशसंचारिणा
अब्देऽस्मिन् सफलत्वमेतु स मखः प्रीतोऽस्तु नारायण
भव्यं मङ्गलमुज्ज्वलं शिवतमं यद् भूतले वा दिवि
सर्वं तत्समुपेतु भारतजनानस्मिन् नवेऽब्दे शुभे।
पुण्ये कर्मणि वृत्तिरस्तु सुदृढा पापान्निवृत्तिस्तथा
लोकानां हृदये च तिष्ठतु चिरं देशेश-सेवाव्रतम् ॥

अणे इत्युपाह्वः श्रीहरिसूनुर्माधवः पू

### नूतनवर्षारम्भे शुभाशिषः

वर्षे वर्ष[1]-प्रकर्षः स्यादुत्कर्षः कृषिजीविनाम्।
अपकर्षोऽस्तु तर्षादे[2]र्हर्ष निष्कर्ष[3] एष नः ॥ १ ॥

भट्टश्रीमथुरानाथशास्त्री, जयपुरम्

१ वृष्टेः। २ तृष्णा-शोषादेः। ३ संक्षिप्य सारः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# कोटानगरेऽभूतपूर्वं संस्कृतसम्मेलनम्

कोटानगरे फरवरीमासस्य १३, १४, १५ तारिकासु
हाशिवरात्र्याः पवित्रतमे अवसरे श्रीराजस्थानशिक्षा-
यक्षमहोदयानां प्रेरणया आयोजितः शिक्षासमारोहः
संस्कृतसम्मेलनरूपेण समभवत्। सम्मेलनेऽस्मिन्
कोटाविभागीयाभ्यः माध्यमिकशालाभ्यः प्रायशः शता-
धिकाः संस्कृताध्यापकाः विद्वांसश्च सम्मिलिताः।



( श्रीसरस्वतीविद्यापीठम् )

प्रथमदिवसेऽस्य सम्मेलनस्योद्घाटनं सुप्रसिद्धे
[श्री]सरस्वतीविद्यापीठे राजस्थानप्रान्तस्य कन्याशिक्षायाः
[प्र]धाननिरीक्षिकया विदुष्या श्रीरामप्यारीदेवीशास्त्रिण्या
[कृ]तम्। तत्र प्रथमं महारानीमहाविद्यालयस्य छात्राभिः
[स]रस्वतीवन्दना संपादिता। कुमारीनीहारवालया
[सु]रुचिरं स्वागतगानं कृतम्। स्वागतभाषणं कुर्वता
[स]रस्वतीविद्यापीठाध्यक्षेण श्रीसदाशिवपाठकशास्त्रिणा
[उ]क्तम्-यत् जातेऽपि स्वतन्त्रे भारते संस्कृतभाषायाः
[भा]रतीयसंस्कृतेश्च न स्वरूपयोग्यं सम्मानं भवति।
[सं]स्कृतं धर्मभाषेति तस्याः उपेक्षा नैवोचिता। इयं हि
[सं]स्कृतवाणी पुरा न केवलस्य भारतस्य अपितु सकल-
[स्या]पि विश्वस्य भाषासीत्। यदि संस्कृतस्य उपेक्षा-
ऽभविष्यत् तदा देशस्य संस्कृतिरपि नष्टाऽभविष्यत्।
तत्फलं च देशस्य पुनरपि पराधीनत्वमेव। अतः
स्वतन्त्रतायाः रक्षायै संस्कृतस्य राष्ट्रभाषात्वम्, अध्यापने
चैतस्य अनिवार्यत्वं घोषणीयम्। राजस्थानशिक्षाध्यक्षः
श्रीमथुरालालशर्मा धन्यवादार्हः, येन राजस्थानेऽष्टम-
कक्षापर्यन्तं संस्कृतस्यानिवार्यत्वं कृतम्।

तत्रैव च भाषमाणैः हरबर्टमहाविद्यालयस्योपाध्यक्षैः
श्री डा० फतहसिंह एम० ए० डी० लिट् महोदयैरुक्तम्
यत् संस्कृतभाषायै जगज्जीवनस्य स्वरूपमस्माभिः देयम्।
अद्यत्वे संस्कृतोन्नत्यै कृतं स्वल्पमपि प्रयतनं कालान्तरे
महत् फलदायकं भविष्यति। संस्कृतज्ञैः जनसाधारणस्य
विश्वासार्थं स्वकीये दैनिकव्यवहारे संस्कृतस्यैव प्रयोगः
करणीयः। पाण्डित्यप्रदर्शनस्य नास्ति तत्रावश्यकता।
ततश्च सभाध्यक्षया श्रीरामप्यारीदेव्या शास्त्रिण्या
संस्कृतस्य प्राचीनत्वं प्रतिपादयन्त्या तस्य आदिभाषात्वं
संसाधितम्। तत्रभवत्या चोक्तम् यत् संस्कृतोन्नतौ
व्याकरणस्य बाधकत्वं कथ्यते, परं तन्न तथा। परं
संस्कृतस्य प्रचारार्थं तां राष्ट्रभाषापदे समारोपयितुं च
व्याकरणबन्धनानि किंचित् शिथिलानि करणीयानि।
संस्कृतस्याध्ययनमनिवार्यं भवेत्, विशेषतश्च स्त्रीणां
कृते। यतोऽहि तासां कृते तु ज्ञानकरी विद्यैव आवश्यकी
न तु अर्थकरी। आंग्लमहाविद्यालये पठनेन समुत्पन्ना
छात्राणामुच्छृङ्खलता संस्कृतपाठनेनैव दूरीकर्तुं शक्यते।
शिक्षाक्षेत्रे यावत् संस्कृतस्याध्ययनस्य, अध्यापनस्य च
सुव्यवस्था न भविष्यति तावत् नैव भारतीय-
संस्कृतेः, संस्कृतस्य चोन्नतिः संभावनीया तदर्थं
चास्माभिः शीघ्रं प्रयतनीयम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भाषणानन्तरं चाध्यक्षया सरस्वतीविद्यापीठछात्रेभ्यः वर्धास्थ-राष्ट्रभाषाप्रचारसमित्याः, वंगीयसंस्कृतसमित्याः च "राष्ट्रभाषाकोविदः" "काव्यतीर्थः" इत्याद्य उपाधयः प्रदत्ताः।

तदनन्तरं वालचरसंघस्य ( स्काउट ) व्यायामादिप्रदर्शनं जातम्। रात्रौ च श्रीसरस्वती-विद्यापीठस्य छात्रैः छात्राभिश्च भवभूतेः "उत्तररामचरितं" नाटकम्, अपरं च 'गुरुदक्षिणा' नामकं नाटकमभिनीतम्। अपूर्वं चैतत् कारुण्यपूर्णं नाटकं जनमनांसि तथा रञ्जयत् यथा सहस्रशो दर्शकाः मन्त्रमुग्धाः अभूवन्। अभिनयेन साकं छायाभिनयेन रामायणप्रदर्शनं दर्शकैरतीव प्रशंसितम्। छात्रद्वयेन श्रेष्ठाभिनयकृते रजतपदके प्राप्ते। तत्रैव च संस्कृतसाहित्यस्य प्रसिद्धकर्तॄणां श्रीव्यास, वाल्मीकि, कालिदास, भर्तृहरि, भवभूति, भारवि, हर्षादीनां रूपाणि धृत्वा कविसभायां अनेकैः विद्वद्भिः तेषां काव्यपाठः कृतः।

द्वितीये तृतीये च दिवसे राजस्थानशिक्षाविभागाध्यक्षेण डा० श्रीमथुरालालशर्मणा संस्कृत-पाठनस्य नवीनतमस्य सरलस्य च विधेः प्रदर्शनं कृतं येन च दर्शकाश्चात्यन्तं प्रभाविता अभूवन्। तत्र भाषमाणेन च श्रीशिक्षाध्यक्षेणोक्तं यत् संस्कृतमेव पूर्वं राष्ट्रभाषासीत्। अष्टमशताब्द्यां तत्र विघ्नः संजातः। तत्समये एकस्याः समस्तेपि देशे विद्यमानायाः भाषायाः प्रयोगः लुप्तः, विभिन्नाः प्रान्तीयाः भाषाः समुत्पन्नाः। परं संस्कृतोद्भवत्वेन सर्वासु प्रान्तीयभाषासु संस्कृतशब्दानां बाहुल्यम् अभवत् वर्तते चाद्यापि। किंचिन्मात्रस्य व्याकरणस्याध्ययनेन तदध्ययने सारल्यं भवति। हिन्द्याः राष्ट्रभाषात्वे दाक्षिणात्यैः विरोधः क्रियते। एतद्धि भाषासाम्राज्यं न तेषामभिमतं परं संस्कृते न कोऽपि विरोधः। संस्कृतविषयिण्यः समस्याः समग्रेऽपि देशे समानाः। संस्कृते यत् काठिन्यं वर्तते तद्दूरीकरणेन सर्वं सुष्ठु भविष्यति। संस्कृतम् एव च राष्ट्रभाषा-पदमारोढुं शक्नुयात्। यथा दूषितयापि आंग्लभाषया शतशः जनाः कार्याणि संपादयन्ति तथैव सर्वसाधारणजनानामपरिष्कृतेऽपि नास्ति दोषः। अस्याः राष्ट्रभाषात्वे केचन परिष्कृतरूपेण, केचन सारल्येन, केचन कठोररूपेण अन्ये चाशुद्धरूपेणैनां व्यवहरिष्यन्तीति न काचित् विप्रतिपत्तिः। अतोऽस्माभिः संस्कृतस्यैव सदा व्यवहारः करणीयः। ततश्च क्रमशः त्रुटयः स्वतः एव दूरीभविष्यन्ति। संस्कृतं च राष्ट्रभाषा भविष्यतीति।

अत्रैव "संस्कृतं राष्ट्रभाषा भवितुमर्हति" इति विषयमवलम्ब्य छात्राणां शास्त्रार्थोऽभवत्। प्रथम



( कुमारी श्रीनिहारवाला श्यामा भटनागरी च )

पुरस्कारः श्रीसरस्वतीविद्यापीठच्छात्रया कुमारीनिहारबालयाधिगतः। द्वितीयपुरस्कारस्य विजेत्री कुमारी श्यामा-भटनागर आसीत्। इयं च महारानीमहाविद्यालये प्रथमवर्षेऽध्ययनं करोति तथा श्रीसरस्वतीविद्यापीठे च मध्यमाप्रथमखण्डे पठति। ततश्च प्रतिनिधित्वे समागतानां विदुषां चाभूवन् भाषणानि।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सम्पादकीयम्—

## नाटकानि भवेयुः प्र... धनानि

यदा सकलमपि जगत् सुप्तमासीत् तदा भारतमिदं मानवता-प्रसाराय आसीत् जागरूक इति नाविदितम् इतिहासविदाम्। साधारणोयं नियमः यत् अवनतये न केनापि प्रयतनीयं भवति; स्वत एव वस्तु नीचैः ...म्यते; किन्तु उन्नतये कर्तव्यो भवति प्रबलः प्रयत्नः। ...। हि कश्चित् प्र...नं विना उन्नतं पदम् आरोढुं समर्थः। ...ाकृतिकं सिद्धान्तमिमं सम्यग् ज्ञात्वैव अस्माकं पूर्वजैः ...ानव-समाजस्य समुन्नतये महान्तो महान्तः प्रयत्नाः ...नुष्ठिताः। सर्वतः पूर्वं तेषां जन-कल्याणकराणां ...र्तव्यानां स्वतः अनुष्ठानं ततः तेषां समाजे उपदेशः ...ति आसीत् तेषां प्रचारपरम्परा। तेषूपदेशेषु अधिक-...चत्ताकर्षकत्वात् मधुरत्वाच्च कान्तासम्मितोपदेशस्यैव ...शिष्ट्यं सर्वैरपि स्वीक्रियते। अत एव विद्यमानेषु ...दवाक्येषु, सत्सु अपि च धर्मशास्त्र-पुराणादिषु ...व्यानां सार्थकत्वम्। अत एव "काव्यं........कान्ता-सम्मितयोपदेशयुजे।" इति भणन्ति अभियुक्ताः। ...मायणकाव्यपठनेन भवति मनोविनोदः किन्तु तेनैव सह ...तुः आज्ञायाः परिपालनेन स्वधर्मानुष्ठानेन च रामस्य ...जयः, परदारहरणेन च रावणस्य नाशः इति "रामा-...वद् वर्तितव्यं न रावणादिवत्" इत्यपि पाठकस्य बुद्धौ ...हजमेव समायाति। अतः महाकविभिः प्रयासो ...हितः महाकाव्यनिर्माणे, विधीयते च अधुनापि। ...न्तु श्रव्यकाव्यैः केवलं स एव भवति लाभभाक् यः ...ठितु जानाति। अपि च श्रव्यकाव्ये तास्ताः घटनाः ...सुखे न आयान्ति। तेन न तादृशः प्रभावः समाजे ...व्यकाव्यस्य भवितुमर्हति, यादृशो हि दृश्यकाव्यस्य। ...त एव नाटकस्य जन्म संजातम्। अभिनयेन सकल-...पि वस्तुजातं पुरतः स्फुरति इति कस्यापि वस्तुनः ...चारस्य सफलम् एतत् साधनम्—इति मनसि निधायैव ...सहस्रवर्षेभ्योपि पूर्वं नाटकीदीनाम् अभिनेयानाम् ...मिन्नेव भारते संजाता जनिः। बहूनि विरचितानि नाटकानि तात्कालिकैः कविभिः। तत्र सर्वत्र आसीत् इदमेवं अनुस्यूतम् यत् अस्य दर्शनेन मानवसमाजः भवेत् उन्नतः। मानवे विद्यमानान् सहजसुलभान् दोषान् निष्कास्य तत्र गुणाधानं कर्तव्यम् इत्येव आसीत् तेषां प्रधानं लक्ष्यम्। वर्तमानेऽपि युगे यदि वयं तेनैव लक्ष्येण अभिनयादिकं विदध्मः तदा तेन मनोविनोदो-ऽपि भवेत् समाजोन्नतिश्च।

पाश्चात्त्यदेशेषु अपि पूर्वं नाटकादीनाम् ... आसीत् प्रचारः। सेक्सपीयरप्रभृतिभिः रचितानि बहूनि नाटकानि; किन्तु अस्यामेव शताब्द्यां विज्ञानविजृम्भणेन तत्स्थाने चलचित्राणां संजात आविर्भावः। किन्तु अत्रापि लक्ष्यं तदेवासीत् यद् अनेन मनोविनोदेन सह सारल्येन शीघ्रतया च सिद्धान्तानां भवितुम् अर्हति प्रचारः। भारतेऽपि अनुमानतः चत्वारिंशद् वर्षेभ्यः पूर्वं जातः चल-चित्राणां प्रवेशः। ततः प्रभृति नाटकादीनां प्रचारः प्रायो विलयं गतः। इदं तु न विस्मर्तव्यम्, पाश्चात्त्यदेशीयैः व्यापारिकदृष्ट्या कृतः अस्माकं देशे चलचित्राणां प्रचारः। अनेन देशस्यापरिमितं धनं निरर्थकमेव बहिर्गच्छति। अपि च तद्दर्शनेन स्वास्थ्य-हानिरपि निःसंशयं जायते। किं च चलचित्रनिर्मातॄणां केवलम् अर्थप्राप्तिरेव उद्देश्यमिति तादृशानि जघन्यानि चित्राणि तैः निर्मीयन्ते यानि देशस्य निःसंशयं विनाशकानीति विषयेस्मिन् स्वतन्त्रतया स्वकीयान् विचारान् प्रकटयिष्यामः। अत्र तु इदमेव निवेदनीयम् यत् स्वसंस्कृतेः प्रसाराय स्वदेशप्रेम्णः परिवर्द्धनाय, स्वदेशस्यादिभाषासंस्कृतस्य प्रचाराय च प्राचीनानि ऐतिह्यानि संग्रह्य सरलया संस्कृत-भाषया लघु-लघूनि रचनीयानि नाटकानि। यत्र तत्र उत्सवेषु अभिनेयानि च तानि। तेन स्वसंस्कृतेः प्रसारेण सह भारतप्राणभूतायाः सुरसरस्वत्याः स्यात् भूयान् प्रचारः, देशस्य द्रव्यमपि च न गच्छेद् बहिरिति भृशं समुत्साहनीयाः नाटकलेखकाः प्रशंसनीयाश्च अभिनयकर्तारः। नात्र सर्वकारस्य सहायतापेक्षापीति प्रत्येक-संस्कृत-संस्थाभिरत्र विषये अवश्यम् अवधातव्यम्—इति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

113536



बाल-स्तम्भः

# सरलः संस्कृतशिक्षणोपायः

लेखकः—श्रीदुर्गादत्तशर्मा व्याकरणसाहित्याचार्यः, जयपुर

( अकारान्तः पुल्लिंगः छात्र ( Studat ) शब्दः )

| विभक्तयः | एकवचन ( Singular ) | द्विवचन ( Dual ) | वहुवचन ( Plural ) | |
|---|---|---|---|---|
| प्रथमा | छात्रः (ने) | छात्रौ | छात्राः | ( कर्ता, Nominative ) |
| द्वितीया | छात्रम् (को) | छात्रौ | छात्रान् | ( कर्म, Accusative, object of a trasative verb) |
| तृतीया | छात्रेण (से) | छात्राभ्याम् | छात्रैः | (करण, Insteemental with or by ) |
| चतुर्थी | छात्राय (के लिए) | छात्राभ्याम् | छात्रेभ्यः | ( सम्प्रदान, Dative by theprepostion to or for) |
| पञ्चमी | छात्रात् (से) | छात्राभ्यां | छात्रेभ्यः | (अपादान, Ablative From or out of) |
| षष्ठी | छात्रस्य (का,के,की) | छात्रयोः | छात्राणाम् | ( सम्वन्ध, Geniltive of or belongina to) |
| सप्तमी | छात्रे (मे पर) | छात्रयोः | छात्रेषु | ( अधिकरण, Locative, in, on or among) |
| सम्वोधन | हे छात्र (हे अरे) | हे छात्रौ | हे छात्राः | ( सम्वोधन, Vocative, to addess a person or thing) |

राम, कृष्ण, नृप ( राजा, King ) पुत्र ( लड़का Son ) सर्प ( सांप Snake ) अन्धकार ( अंधेरा Darkness ) बालक, गेह ( घर house ) जनक ( पिता Father ) हस्त ( हाथ hand ) तण्डुल ( चांवल Rice ) गणेश, अध्यापक ( शिक्षक teacher ) मातुल ( मामा uncle दीन ( गरीव poor ) तडाग ( तालाव tank ) पितामह ( बावा grand father मातामह ( नाना grand father ) गज ( हाथी Elephant ) चटक ( चिडा Fowl ) इत्यादि अकारान्त पुल्लिङ्ग शव्द छात्र के सदृश हैं।

पठ ( पढना To read ) ( वर्तमान काल, Presant Tence )

| | एक वचन ( Singular ) | द्विवचन ( Dual ) | बहुवचन ( Plural ) | |
|---|---|---|---|---|
| प्रथम पुरुषः | पठति | पठतः | पठन्ति | 3rd Person |
| मध्यम पुरुषः | पठसि | पठथः | पठथ | 2nd ,, |
| उत्तम पुरुषः | पठामि | पठावः | पठामः | 1st ,, |

व्रज ( जाना to go ) वद ( वोलना to speak ) पच ( पकाना to cook ) नम ( नमस्कार करना to bow हस ( हंसना to laugh ) क्रीड ( खेलना to ptay ) रक्ष ( रक्षा करना to protect ) चल ( चलना to go ) पत् गिरना to fall ) उपर्युक्त धातुओं के रूप भी पठ के सदृश हैं।

## उदाहरणार्थ पाठः

वालकः ( कर्ता ) गेहं व्रजति। जनकं ( कर्म ) नृपः वदति। हस्तेन ( करण ) तण्डुलं पचति। गणेशाय (सम्प्रदान) रामः नमति। अध्यापकात् (अपादान) छात्रः पठति। मातुलस्य (सम्वन्ध) पुत्रः हसति। अन्धकारे (अधिकरण) सर्पः क्रीडति। हे कृष्ण ( सम्वोधन ) नृपः दीनं रक्षति।

एवम् अन्या अपि वाक्यरचनाः कार्याः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## संस्कृत[illegible]ः

१–गतमासे वारा[illegible]सी-संस्कृ[illegible]विद्यालयस्य उपाधिवितरणोत्सवः संपन्नः। [illegible] फिन्लैंडदेशीयराजदूतेन व्यक्तिकृताः विचाराः अस्मिन्नेवाङ्के अन्यत्र द्रष्टव्याः। आसीदस्य समारोहस्य अध्यक्षः श्रीसंपूर्णानन्दमहोदयः। प्रोक्तं तेन–"संस्कृतसाहित्यमेव तादृशं साहित्यं यद्[illegible]रेण विश्वेस्मिन् शान्तेः साम्राज्यं भवितुम[illegible], विश्वसंस्कृतेः स्थापनं च। यदि संसारस्य विना[illegible]रक्षणम् अभिलष्यते तदा तामेकां शरणं व्रजन्तु" इति।

२–गतपक्षे काष्ठमण्डपप्रदेशे संस्कृतप्रचारसमितेः अधिवेशनं जातम्। तत्र अनेके महत्त्वपूर्णाः प्रस्तावाः स्वीकृताः। समितेः विधाननिर्माणाय एका समितिः आयोजिता, यस्याः सन्ति निर्णीताः निम्नाङ्किताः सदस्याः—१ पं० हरिहरशास्त्री २ प्रो० गोपालनिधिः वेदान्ताचार्यः ३ संस्कृताध्यापकः सागरमणिः ४ पं० अच्युतराजशास्त्री च। प्रस्तावेषु १ शास्त्र्याचार्यपरीक्षोत्तीर्णेभ्योपि लोकसेवायां योग्यपदप्रदानाम्। २ तान् बी. ए. एम्. एम्. समानान् प्रतिपादयितुं च सर्वकारः प्रार्थनीयः इति, तथा ३ नारीविद्यापीठे निःशुल्कं पाठनम् एषमोऽपि प्रचलेत्। ४ राष्ट्रभाषायाम् उर्दू-आंग्ल जी-शब्दान् दूरीकृत्य तत्स्थाने संस्कृतशब्दानां सन्निवेशः करणीय इति च मुख्याः सन्ति।

३–अग्रिमे वैशाखमासे जयपुरस्य सुप्रसिद्धो विद्वान् महाराजसंस्कृतमहाविद्यालयतो लब्धविश्रमः आशुकविः श्री हरिशास्त्री तथा भारतीपत्रस्यास्य प्रबन्ध-संपादकः श्रीगिरिराजशास्त्री च संस्कृत-भारती-प्रचाराय "भारती" पत्रस्य सहायतायै संस्कृत-प्रणयिभ्यो धनिकेभ्यः आर्थिकसहायता-प्राप्तये राजस्थानस्य धनिकबहुले शेखावाटी-प्रान्ते गमिष्यतः।

४–लङ्कायाः जनतन्त्रसर्वकारेण स्वमन्त्रि-परिषदि महत्त्वपूर्णोऽयं निर्णयो विहितः यत् जल-स्थल-नभः-सेनासु विद्यमानानां समस्तसैनिकानां वस्त्रादिषु योज्यानि साङ्केतिकानि चिह्नानि (बैजेज) आङ्ग्लशब्दस्थाने संस्कृत-शब्दैः समुट्टङ्कितानि भविष्यन्ति। अनेन परं प्रसीदति भारतीया जनता। नेदं विस्मरणीयं यद् लङ्का-भारतयोः सांस्कृतिकोऽभेद्यसम्बन्धः सहस्रेभ्यो वत्सरे[illegible] प्रचलन्नास्ते। निर्णयेनानेन परमप्रीतः सन् भारती-परिवारः धन्यवादान् वितरति लङ्कासर्वकाराय।

**संस्कृतं परिपूर्णा भाषास्ति**— केम्ब्रिज-विश्वविद्यालयस्य प्राध्यापकः श्रीरोनाल्डस्मिथमहोदयः गुरुकुल-कांगडी-विद्यालये भाषमाणः अवदत् यत् संस्कृत-भाषायाः शब्दभण्डारो विपुलः गूढार्थवाहकश्च वर्तते। परिपूर्णेयं भाषा, यस्याः सर्वाङ्गीणं साहित्यं चारित्र्यबलं प्रददत् मनःशान्तिं प्रयच्छति।

## देश-दर्शनम्

भारते विद्यमानासु औद्योगिक-संस्थासु उच्चपदेषु शते ७५ जनाः सन्ति वैदेशिकाः, येषां वेतनम् एक-सहस्रतः अधिकमेवास्ति। एतादृश्यः संस्थाः १०६१ सन्ति याः वैदेशिकानामेवाधिकारे वर्तन्ते।

[ दिल्ली, ६ मार्च ] जनसंघस्याध्यक्षः डा० श्री-श्यामाप्रसाद मुकर्जी, हिन्दूसभायाः अध्यक्षः श्री एन्. सी. चटर्जी, रामराज्यपरिषदः मन्त्री श्री नन्दलालशर्मा, तथा वैद्य श्रीगुरुदत्तशर्मा च अत्र जम्मू-काश्मीरान्दोलनं निमित्तीकृत्य सर्वकारेण बन्दिनः कृताः। किन्तु भारतीय-सर्वोच्चन्यायालयेन सर्वेपि एते १२ मार्च दिवसे मोचिताः। सर्वेप्येते केन्द्रीयसंसदः सन्ति सदस्याः। ततः करपात्रिमहोदया अपि निगडिताः। एतेषां मुक्तिः नाद्यावधि संजाता, काश्मीरान्दोलनमिदं प्रचलदास्ते। यत्र प्रतिदिनं भारतीयप्रान्तेभ्यः सत्याग्रहं कर्तुम् इन्द्रप्रस्थे गच्छन्ति जनाः।

प्रकाशक–जयबहादुरसिंह। मुद्रक–श्री [illegible] प्रेस। पता–[illegible] गोपालजी का रास्ता, जयपुर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

प्रतापी परशुरामः

ज्येष्ठ-पूर्णिमा-सं० २०१० | वर्ष ३ | अष्टमोऽङ्कः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# विषय-सूची


| लेख-नामानि | लेखकनामानि | पृष्ठसंख्या |
|---|---|---|
| १—संस्कृत-भारती-स्तवः | श्रीजौहरीलालशर्मा महोपाध्यायः, नई दिल्ली, | १४१ |
| २—अशोकः सम्राट् | श्रीजयलालशर्म्मा मौद्गिल्यः, होशियारपुर (पूर्वपञ्जाब) | १४[illegible] |
| ३—श्रीतुलसी-जन्मस्थानम् | पं० भद्रदत्तशास्त्री, कासगंज | १४५ |
| ४ श्री[illegible]वाल्मीकीयरामायणे श्रीमद्[illegible]भागवते च प्रक्षिप्तांशाः | श्रीस्वामिलक्ष्मणशास्त्री, नागौर ( राजस्थान ) | १४७ |
| ५—किञ्चिन्निवेदनम् | श्रीरामचन्द्रशास्त्री दाधीचः, अजमेर | १४९ |
| ६—पञ्चगव्ये गोमयं गोमूत्रं च | श्रीदीनानाथशर्मा, शास्त्री, सारस्वतः—देहली | १५० |
| ७—भारत्या-अभिनन्दनम् | श्रीहरिदत्तपालीवालः, कायमगंज ( फर्रुखाबाद ) | १५१ |
| ८—मातृ-संदेशः | श्रीगणेशप्रसादः, गौतमः, नेपालः | १५२ |
| ९—प्राचीनभारते पोतनिर्माणकला | भट्ट-श्रीमथुरानाथशास्त्रिणः साहित्याचार्याः, जयपुरम् | १५३ |
| १०—सम्पादकीयम् | सम्पादकः— | १५७ |
| ११—भारतीव्यवस्थापकस्य-उत्तरप्रदेशयात्रा | श्रीगिरिराजशास्त्री, जयपुरम् | १५९ |
| १२—देशदर्शनम्— | सम्पादकः | |
| १३—विदेशवार्ता - | " | |
| १४—संस्कृतसमाचाराः | " | |
| १५—राजस्थान-मध्यप्रदेश-सौराष्ट्र शासनानामादेशपत्राणि | | |
| १६—पुस्तक-शब्दः | | |
| १७—प्रतियोगि-संस्कृत-कथा-लेखकेभ्यः सूचनाः— | | |


—— * ——

## — ❀ "भारती" पत्रस्य उद्देश्यानि नियमाश्च ❀ —

१—संस्कृतभाषायाः प्रचारः सरलेन संस्कृतेन सामयिकानां विचाराणां, उत्कृष्टाया मानसिकविचारपरिपोषिकायाः सामग्र्याश्च समर्पणम् अस्य पत्रस्योद्देश्यानि ।

२—'भारती' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम् ।

३—मासिकपत्रमिदं प्रतिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात् ।

४—एकस्याङ्कस्य मूल्यम् ।=) आणकपट्कम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः–
श्रीवृद्धिचन्द्रशर्मा शास्त्री
व्याकरण-धर्मशास्त्राचार्यः
महाराज-संस्कृत-महाविद्यालयः
जयपुरम्

# भारती

भारतीशुल्कम्
वार्षिक मूल्य— रूप्यकत्रयम्
एकाङ्कस्य मूल्यम्
आणकषट्कम्

वर्ष ३ | ज्येष्ठ-पूर्णिमा, सं॰ २०१० | अङ्क ८

## संस्कृत-भारती-स्तवः

[ ले॰ – जौहरीलालशर्मा महोपाध्यायः, नई दिल्ली ]

वेदोद्धार-कृतिर्महीधर-भृतिः क्ष्मायाश्च दंष्ट्रा-धृतिः
दैतेयोदरदारणं, बलिदमः, क्षत्रक्षयोऽनेकधा ॥
रक्षो-व्यूहनिकन्दनं भयहरं, कंसादिसम्मर्दनं
हिंसायाः परिवर्जनं विहरणं खड्गप्रहारि-प्रभोः ॥
एतादृक्-चरितानि मङ्गलभुवो भक्तप्रियाणि श्रुतौ
साहित्ये प्रथितानि संस्कृतगिरा मध्येमहाभारतम् ॥
धर्मस्थापन-साधुरक्षणकृते चान्येऽवतारा बभुः
एवं योऽद्वय एव भाति विविधस्तस्मै नमो विष्णवे ॥

ब्रह्मा वाग्गणनायकोऽमरगुरुर्लेखाधिपो यक्षराट्
देवर्षिर्वरुणोऽनलोऽनिलयमौ शेषो महेशो यया ॥
जेगीयन्त ऋक्षोऽपि निर्मलयशो लीलाविभूतेर्विभोः
साद्या संस्कृत-भारती विजयते विज्ञानपाथोनिधिः ॥
यस्या अक्षरमालिकाऽतिसरला विज्ञानमार्गानुगा
यस्यां यल्लिखितं तदेव पठितं निर्भ्रान्तिका यल्लिपिः ॥
वेदर्तु-[६४] प्रमिताक्षरेति शिवधीरेतद्विबुद्धं यतः
सा श्रीसंस्कृत-भारती विजयते तर्कप्रियैः संस्तुता ॥

मन्त्र-ब्राह्मण-भागरूप उदितो वेदः प्रभुश्वासकः
शाखास्वुपनिषत्सु यो विमृशितश्चारण्यकेषु श्रुतः ॥
कर्मोपासन-भक्ति-भाव-भरितो मोक्षप्रदः सम्मतः
सोऽयं यत्र विमृश्यते मुनिवरैस्सा वाग्जयेत्संस्कृता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



श्रीपतिरिष्टसिद्धिसदनं हृत्पुण्डरीके स्थितः
विदधाति सर्वजगतां सत्क्षेमयोगंकरः ॥
तच्छ्वास-श्रुतिकाशिकाप्यगहना श्रेष्ठा च या सद्गिरां
साद्या संस्कृतभारती विजयते धीमद्वरेण्यस्तुता ॥

आनन्दाद्धि यतश्चितोऽखिलपतेः श्रेयः प्रसूतेस्सतः
उत्पन्नं लसतीह यास्यति लयं त्रैगुण्यमूलं जगत् ॥
तद् ब्रह्मेति वदन्ति शिष्टकवयः सत्यं शिवं सुन्दरं
पुण्यां सूक्तिमिमां समं जयति या सा वाग्जयेत्संस्कृतम् ॥

धर्मैश्वर्य-विराग-बोधयशसामाख्या भगः सश्रियां
सम्पन्नस्सततं हि तेन भगवान् भक्तेप्सितं साधयेत् ॥
यामाश्रित्य गिरं गिरन्ति सुधयो भक्ताः प्रियं माधवं
सा श्रीसंस्कृत-भारती विजयते विद्वत्प्रकाण्डप्रिया ॥

जीवेशौ विहगौ प्रियौ निवसतः संसाररूपे तरौ
आद्यो भोक्तृशिरोमणिः प्रमुदितो भुङ्क्ते रसालं फलम् ॥
द्रष्टा हि स्थित उक्त-भोगरहितः प्राज्ञोऽद्वितीयः सुहृत्
एतत्सूक्तमलौकिकं दिशति या सा वाग्जयेत्संस्कृतम् ॥

प्रह्लादो ध्रुव-रन्तिदेव-सुरथाः खट्वाङ्गरुक्माङ्गदौ
वाल्मीकिः सुतपाः पृथुश्च जनको व्यासो वसिष्ठो बलिः ॥
सुद्युम्नोसितदेवलौ रघुभृगू शाण्डिल्य औशीनरः
मैत्रेयः कपिलः प्रियव्रत ऋभुश्चोद्दालकः सौभरिः ॥

विश्वामित्र-दधीचि-कुण्डमुनयो गोकर्णवैश्वानरौ
अत्रिः श्रीमुचुकुन्द-मुद्गल-हरिश्चन्द्रस्सुवोः शौनकः ॥
गाङ्गेयोद्धवकौ सुदामविदुरौ धर्मो मनुः श्रीधरः
अक्रूरोऽर्जुन-नन्द-वायुतनयाः पद्मा परीक्षिच्छुकः ॥

कौसल्याप्यनसूयका द्रुपदजा लोपा पृथाऽरुन्धती
श्रीमच्छंकर आर्यमस्करिवृद्धो रामानुजार्यः प्रधीः ॥
यस्या माध्यमतः स्तुवन्ति वरदं भक्तप्रियं श्रीपतिं
सा श्रीसंस्कृत-भारती विजयते भक्तः समाराधिता ॥

ओमित्यक्षरमुद्गिरन् यजति यो विष्णुं शिवं वेधसम् ऐहामुष्मिकसम्पदं स लभते भक्त्या स्मरन्सन्ततम् ।
स्वाध्यायाद्यत एतदौपनिषदं तत्त्वं परं साध्यते सा श्रीसंस्कृत-भारती विजयते संस्तूयमाना बुधैः ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# श्रीतुलसी-जन्मस्थानम्

( लेखकः—पं० भद्रदत्तशास्त्री, कासगंज । )

यवनराज्यकाले श्रीरामभक्तेन महात्मना गोस्वामि-तुलसीदासेन श्रीरामचरितमानसादीनि हृदयाकर्षकाणि ग्रन्थरत्नानि निर्मितानि । श्रीरामचरितमानसेन प्रसुप्ता भक्तिर्भारते जागरूकभावं सम्पन्ना । रङ्कसदनाद्राज-हर्म्यपर्यन्तं गृहे गृहे श्रीरामचरितमानसं विराजते। तत्सर्वे समाद्रियन्ते ।

प्रदर्शितं तस्मिन्मानसे मातृ-विमातृ-सपत्नी-पितृ-पुत्र मित्र--कलत्र--भ्रातृ- राज-प्रजानां पारस्परिकी पुरातनी व्यवहारसरणिः । तत् रामभक्तिसुधया पूर्णम् । मानसस्य प्रबन्धपाटवम्, राजनीतिवर्णनम्, चित्रचित्रणम्, कथोप-कथनम्, सर्वेषां रसानां मनोहारि वर्णनं चातिसमीचीनम्। प्रस्फुटिता तस्मिन् लोककल्याणभावना । श्रीरामगाथा-मिषेण परिरक्षिता भारतीया भद्ररूपा प्राचीना संस्कृतिः ।

गोस्वामिना वैष्णव-शैव-शाक्तादीनां सर्वेषां साम्प्र-दायिकभावानामस्मिन् ग्रन्थरत्ने समन्वयं कृत्वा दूरीकृतः संघर्षः । संस्कृतगर्भितायां ब्रजावधीभाषायां लिखितोऽयं मानसग्रन्थः । रामचरितमानसस्यास्य आँग्ल-रूस-प्रभृतिविविधदेशभाषासु तत्तद्देशीयैर्विद्वद्भिः कृतो-ऽनुवादः । अस्य लोकप्रियतायाः प्रत्यक्षं प्रमाणमेतत् ।

अयं हि तुलसीदासः नानापुराणनिगमागमानां महान् पण्डितोऽभूत् । अनेन स्वकीययशसा धवली-कृता भारतभूमिः । अस्योज्ज्वला यशोदीप्तिः सर्वेषु देशेषु देदीप्यते । अनेन स्वीयप्रतिभाबलेन निज-दिव्यवाण्यां साहित्यशास्त्रीयसौन्दर्यं दर्शयित्वा काव्य-क्षेत्रे प्रथमा श्रेणी समासादिता । अस्य कोटयो भक्ताः सन्त्यनुयायिनः । जगदीश्वरेणैव स्वेच्छया सनातन-धर्मरक्षणायै तादृशो महात्मा प्रकटीकृतः ।

जना ज्ञातुमिच्छन्ति अस्य का जन्मभूमिः ? का जातिः? को गुरुः, का माता, कः पिता? इदानीं केचिज्जन बांदा-मण्डलस्थं राजापुरमस्य जन्मस्थानं वदन्ति । केचि तारी (ताली) ताडी-ग्रामं, बह्वश्चैटामण्डलस्थं सूकर-क्षेत्रं (सोरमं) मन्यन्ते । अस्य जातिजन्मस्थानविषये विवादः । केचिद्वदन्ति तुलसीदासः कान्यकुब्जो ब्राह्मण केचिद् वदन्ति—सरयूपारीणः । बह्वो लेखकाः सङ्कु चितयैकदेशीयया मनोवृत्या जातीयतावशेन दुराग्रहेण वा स्वीये स्वीये देशे वर्गे वाकर्षयन्त्येनं „महाकविम् सरयूपारीण-कान्यकुब्जयोर्वा तारी-(ताली) राजापुर विवादे च तद्वास्तविकजन्मस्थानस्य विस्मृतिर्जाता ।

अस्मिन्कान्यकुब्जसरयूपारीणादिविवादसमये ऽकस्माल्लब्धं स्वार्थिनिमित्तं 'मूलगोसाईंचरित' 'तुलसी चरित' नामकं पुस्तकद्वयमवलम्ब्य तद्वर्गीयै राजापुर मेव जन्मस्थानममानि प्राचारि च । न केनापि सत्या न्वेषणे प्रयत्नो व्यधायि ।

ततः श्रीरामनरेशत्रिपाठिप्रभृतिभिर्विद्वद्भिर्नीर क्षीरविवेकरीत्या चरितद्वयस्याप्रमाणिकता व्यक्तीकृता सत्येतिहासविरुद्धभावपूर्णं चरितद्वयं तैर्निश्चितम् ।

श्रीतुलसीजीवनकाले निमित्तेषु श्रीवल्लभसम्प्रदाय वार्ताग्रन्थेषु सत्यमेव तुलसी-जीवनसूत्रं प्राप्यते ।

गोस्वामिगोकुलनाथस्य जीवनकाले १६६७ मित वत्सरस्य हस्तलिखितैका वार्ताप्रतिलिपिः कांकरौली-पुस्तकालये रक्षितास्ति । तस्यां चतुर्णामष्टच्छापीयान वार्ताप्रसङ्गाः । तेषु श्रीनन्ददासवार्तायां लिखितमे वार्तारम्भे—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...स्वामिनः सेवको नन्ददासः सनौढिया (सनाढ्य) ब्राह्मणो यः पूर्वस्यां दिश्यवसत, तस्य वार्ता। नन्ददासतुलसीदासौ द्वौ भ्रातरौ। तयोर्ज्येष्ठस्तुलसीदासः कनिष्ठो नन्ददासः"

पञ्चमे नन्ददासवार्ताप्रसङ्गे—"एकस्मिन्दिवसे नन्ददासस्य मनसि विचारो जातः, यथा तुलसीदासेन भाषारामायणं कृतम् तथैवाहमपि श्रीमद्भागवतस्य भाषानुवादं करवाणि" एवमन्येषु प्रसङ्गेष्वपि तुलसीदासस्य वार्ताः सन्ति।

वार्ताकालिक-श्रीहरिरायमहाप्रभुकृत-वार्ताटिप्पण्यां नन्ददासस्य 'रामपुर' वासोऽङ्गीकृतः। श्रीनाभादासेनापि भक्तमाले रामपुरग्रामनिवासीत्युक्तम्

वार्ताग्रन्थेभ्यः पूर्वलिखिते पञ्चामृतान्तर्गते 'अष्टसखामृते' भक्तकविप्राणेशेनाप्युक्तम्—

"राम भगत तुलसी अनुज, नन्ददास ब्रजख्यात।
दुज सनौढिया सुकुलकवि, कृष्णभगत अवदात ॥१॥
सौंपि अनुज चंदहासकर, सुतदारा धनधाम।
आये सूकरखेत तजि ब्रजबसि सेवत स्याम ॥२॥
करयौ रामतें स्याम निज, बदलि इष्ट अरु गाम।
रच्यो स्यामसर बाछरू, हरिबलदाऊ धाम ॥३॥

[ अष्टसखामृतस्य १७६७ मितविक्रमवत्सरस्य हस्तलिखिता प्रतिलिपिः पं० श्रीगोविन्दवल्लभभट्ट-शास्त्रि-काव्यतीर्थपुस्तकालये बम्बईनगरे विद्यते ]

रामपुरं सूकरक्षेत्रान्तर्गतं सूकरक्षेत्रात् पूर्वस्यां दिशि क्रोशमेकम्। श्रीनन्ददासेन तस्य श्याम-(कृष्ण) भक्तिवशेन श्यामपुरं नाम कृतम्। तस्मिन् वाञ्छारूप-( वाछरू ) तीर्थे श्यामसरः श्यामायन-( कृष्णबलदेव-मन्दिर ) मपि कृतम्।

पुनश्च – स्वनिर्मिते रामचरितमानसे श्रीतुलसीदासेन लिखितमेवम् "मया सूकरक्षेत्रे ( सोरों नगरे ) ऽतिबाल्यकाले कृपासिन्धुनररूपहरि-(नृसिंह) गुरुमुखाच्छ्रुता रामकथानेकवारम्।"

'मैं निजगुरुसन सुनी कथा सु सूकरखेत' इत्यादि।

एवं बाँदाप्रान्तीयप्राचीनजनश्रुतिसङ्ग्रहो (गजेटियर)ऽपि तुलसीदासस्य मूलनिवासस्थानं सूकरक्षेत्र-(सोरों) मेव वदति।

"Tradition has it that in Akbar's reign a holy man, Tulsi Das, a resident of Soron in parganah Aliganj of the Etah District, come to the jungle on the banks of the Jamna, where Rajapur now stands, erected a temple and devoted himself to prayer and meditation."

Stastical Description and Historical Account of the North Western Province of India, edited by Edwin T. Atkinson B. A. B. C. S. vol I Bundel Khand Allahabad 1874, Pages 572–3.

"जनश्रुतिरियम्—अकबरशासनकाले तुलसीदासनामैकः पूतात्मा योऽलीगंजपरगनास्थ-सोरोंवास्तव्य आसीद् यमुनातटे तदरण्यमाजगाम, यत्राधुना राजापुरं स्थितम्। तत्र स मन्दिरमेकं निर्मापयामास प्रार्थनाध्याने च दत्तचितोऽभूत्–इत्यादि।"

स्टेटिस्टिकल डिस्क्रिप्शन एण्ड हिस्टोरीकल एकाउण्ट्स ऑफ इण्डिया' सम्पादित–एडविन टी० एटकिन्सन बी० ए० बी० सी० एस० जिल्द १ बुन्देलखण्ड इलाहबाद १८७४ पृ० ५७२–५७३।

अन्यच्चापि—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# श्रीमद्वाल्मीकीयरामायणे श्रीमद्भागवते च प्रक्षिप्तांशाः

[ लेखकः—श्रीस्वामिलक्ष्मणशास्त्री, संस्कृतविद्यालयाध्यक्षः, नागौर (राजस्थान) ]

मध्यकाले लिखितपुस्तकानां वैरल्येन, शास्त्रेषु विद्वत्समित्या राजसमित्याश्च नियन्त्रणाभावाच्च प्राचीनेषु ग्रन्थेषु यत्र तत्रार्वाचीनैः विद्वद्भिः प्रक्षिप्तांशा बलान्निवेशिता इति खल्वनुमीयते । श्रीमद्वाल्मीकीयरामायणे, उत्तरकाण्डे सप्तत्रिंशत्तमात्सर्गादारभ्याग्रिमा वालिसुग्रीवोत्पत्तिवर्णनात्मका रावणस्य श्वेतद्वीपगमनवर्णनात्मकाश्च पञ्च सर्गाः, एकोनषष्टितमात्सर्गादग्रिमाः सारमेयगृध्रोलूकाख्यानरूपाश्च पञ्च सर्गाः, एवं सम्भूयेमे दश सर्गाः कतकतीर्थतिलककारादिभिर्व्याख्याकृद्भिः प्रक्षिप्तत्वेन स्वीकृताः इति विद्वांसो निर्विवादमेव विज्ञातुं प्रभवन्ति ।

किञ्च तस्यैव रामायणस्य किष्किन्धाकाण्डे, एकोनषष्टितमात्सर्गादारभ्य त्रिषष्टितमसर्गपर्यन्तं सम्पातेः स्वपूर्ववृत्तवर्णनात्मकमिदं सर्गपञ्चकमपि प्रक्षिप्तमेवेत्यत्र नास्ति कोऽपि संदेहः ।

यद्यपि पूर्वोक्तव्याख्याकृद्भिरेतत्सर्गप ञ्चविषये किमपि विशिष्य नोक्तम् ; किन्तु श्रीरामानुजसम्प्रदायविश्रुतया श्रीगोविन्दराजव्याख्ययास्य सर्गपञ्चकस्य प्रक्षिप्तत्वं स्फुटमेवोक्तम् । बहुभिर्हेतुभिश्चापरैरस्य सर्गपञ्चकस्य प्रक्षिप्तत्वं विज्ञायते ।

यथा—पूर्वन्त्वष्टापञ्चाशत्तम स्यान्तिमं पद्यार्धमिदम्—'बभूवुर्वानरा हृष्टाः प्रव मुपलभ्य ते ।' अग्रे

Rajapur was founded in the reign of Akbar by Tulsi Das, a devote from Soron, who erected a temple, and attracted many followers.

Imperial Gazetteer of India Vol. XI by W. W. Hunter. Second Edition 1886, Pages 385-6.

"राजापुरं सोरों-वास्तव्यो भक्ततुलसीदासोऽकबरराज्यकाले वासयामास । तत्रैकं मन्दिरमरीरचद् अनेकानुयायिनश्चाचकर्षेत्यादि ।"

इम्पीरियल गजेटियर ऑफ इण्डिया जिल्द ११ द्वारा डब्ल्यू० डब्ल्यू० हन्टर, द्वितीय संस्करण १८८६ पृ० ३८५-३८६ ।"

उक्तप्रमाणेन श्रीतुलसीदासेनावासितं 'राजापुरं' कथं तस्य जन्मस्थानं भवितुमर्हति । अस्मिन्नुक्तं तुलसीदासः सोरों (सूकरक्षेत्र) वास्तव्यः ।

सर्वैरेभिः प्रमाणैर्गोस्वामितुलसीदासो महाकविनन्ददासस्य ज्येष्ठभ्राता, सकुलास्पदीयः सनाढ्यब्राह्मणः, (सोरों) सूकरक्षेत्रनिवासीति निश्चितं भवति ।

(१) श्रीवाराहपुराण–गर्गसंहिता–श्रीविष्णुस्वामिचरितामृत–चौलुक्यवंशप्रदीप–प्रभृतिपुरातनग्रन्थाधारैः सूकरक्षेत्रं केवलमेकमात्रम् । तस्य स्थितिः भागीरथीगङ्गातीरे सर्वग्रन्थसम्मता यथा—

यत्र भागीरथीगङ्गा मम सौकरवे स्थिता । तत्र संस्था च मे देवि ह्युद्धृतासि रसातलात् ॥

(वाराहपुराणे अ० १३७ श्लो० ७)

सूकरक्षेत्रमद्वितीयम् । एटामण्डले भागीरथीगङ्गातटे सोरों (सोरम) नाम्ना सूकरक्षेत्रं भारते प्रसिद्धम् । 'तुलसीचर्चा' नाम्नि मुद्रिते प्रकाशिते ग्रन्थे विस्तरेण लिखितं सूकरक्षेत्रस्य लक्षणं स्थानञ्च मया ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



चतु[illegible]सर्गस्यादिमं पद्यञ्चेदम्—'आख्याता गृध्रराजेन समुत्पत्य बलीमुखाः । सङ्गताः प्रीतिसंयुक्ता विनेदुः सिंहविक्रमाः ।' इति पूर्वोक्तेन सर्गान्तिमपद्यार्धेनास्य सर्गादिमपद्यस्यैव सङ्गतिर्जायते, एतन्मध्यगतसर्गपञ्चकोक्तकथाया असाङ्गत्यं प्रतीयते ।

अन्यच्च सूक्ष्मविचारदृष्ट्या दृष्टे सर्गपञ्चकस्यास्य पद्यरचनाशैल्यपि ग्रन्थकर्त्तुः पद्यरचनाशैल्या सादृश्यं न भजते । पुनः अष्टपञ्चाशत्तमे सर्गे वानरेभ्यः सम्पाति नोक्तम्—पुरा वृत्रवधे जातेऽहं मदीयो भ्राता जटायुश्च विजयेच्छया सूर्यलोकं गन्तुं समुद्यतौ । मध्येमार्गं यदा सूर्यतेजसा जटायुर्व्याकुलोऽभूत्तदाहं भ्रातुः प्रेम्णा तं पक्षाभ्यामावृणवम् । दुराग्रहग्रहगृहीतोऽहं च पुनरपि व्योम्नि सुदूरमुड्डयमानोऽतितीक्ष्णैरर्ककिरणैर्निदग्धपक्षोऽत्र विन्ध्यपर्वतशिखरे निपतितः । मदीयपक्षाभ्यां गुप्तश्च जटायुर्न निर्दग्धः, किन्त्वसौ मम निपतनात्पूर्वमेव भूमौ कुत्रचिन्निपतितः । तदारभ्यैव मयाद्ययावत्तस्य क्वापि प्रवृत्तिर्नाकर्णिता । केवलमधुनैव भवतां मुखेन तस्य वृत्तं श्रुतम् । पुनः सम्पातिना तत्रोक्तम्—'वृद्धभावादपक्षत्वाच्छ्रृण्वंस्तदपि मर्षये । नाहि मे शक्तिरस्त्यद्य भ्रातुर्वैरविमोक्षणे ।' इति तदग्रे क्षेपकेषु चोच्यते । 'तस्य त्वेवं ब्रुवाणस्य सम्पातेर्वानरैः सह । उत्पेततुस्तदा पक्षौ समक्षं वनचारिणाम् ।' पुनरपि सम्पातिना तत्रोक्तम्—'यौवने वर्त्तमानस्य ममासीद्यः पराक्रमः । तमेवाद्यावगच्छामि बलं पौरुषमेव च ।' एवं पूर्वन्तु सम्पातिनोक्तम्—वृद्धभावादपक्षत्वाच्च भवतां मुखात् रावणेन निहतं भ्रातरं श्रुत्वापि न किञ्चिदप्यहं कर्तुं शक्नोमि । तदग्रे तु कथ्यते—यत्तस्य सम्पातेः श्रीरामस्य कृपया पक्षौ पुनरुद्गतौ, यौवनावस्थासदृशं च बलमभवत् । तदपि स स्वभ्रातृहन्तारं रावणं हन्तुं कथं न समुद्यतोऽभूत्' इत्थं पूर्वापरकथनं मिथो विरुद्धं प्रतिभाति ।

किञ्चान्यदपि—श्रीवाल्मीकिना महर्षिणा स्वप्रबन्धे श्रीरामस्य चरित्रजातं मनुष्यत्वमनतिक्रम्यैवानुवर्णितम् । वृद्धस्य सम्पातेः पुनरपि पक्षयोरुद्गमनं यौवनप्राप्तिश्च दैवी घटना भवितुं शक्नोति । एवमस्य सर्गपञ्चकस्य प्रक्षिप्तत्वे सुतरां सिद्धेऽपि प्रक्षिप्तस्यास्य सर्गपञ्चकस्यातिप्राचीनत्वमवश्यमेव विज्ञायते । यतोऽसौ विषयस्तात्त्विककृत्यैवं संश्लिष्टोऽभवत् यथा साधारणदृष्ट्या न विज्ञातुं शक्यते ।

अपरमपि—युद्धकाण्डे, आदित्यहृदयस्तववर्णनात्मकः पञ्चोत्तरशततमः सर्गोऽपि प्रक्षिप्त एव प्रतिभाति । जनेषु श्रीसूर्यभक्तिं विस्तारयितुं केनचित्सूर्यभक्तेन विदुषा स्वमत्या निर्माय निवेशितः—एतत्सर्गस्य पूर्वापरविषयानुसन्धानेनापि साङ्गत्यं न घटते । अन्यच्च युद्धे प्रवर्तमानेऽकस्मादेव तत्रागस्त्यस्य मुनेरागमनम्, तेन च श्रीरामस्य विजयोऽभवदिति न युक्तं प्रतीयते । देवदेवस्य श्रीरामस्य श्रीसूर्यस्तवकरणेन विजयोऽभवदिति श्रीरामस्यानन्यभक्तानामक्षम्यमेव । आदित्यहृदयस्तवपद्यानां निर्माणसरणिरपि सूक्ष्मदृष्ट्या दृष्टे न तात्त्विकी प्रतीयते ।

अन्येऽपि नैके विषया श्रीमद्वाल्मीकिरामायणे प्रक्षिप्ताः केषुचन कोशेषु समुपलभ्यन्ते । यथा युद्धकाण्डे सेतुबन्धनसमये श्रीरामेण रामेश्वरस्थापनाख्यानं कुत्रचिल्लभ्यते । तदपि केनचिच्छिवभक्तेन विदुषा स्वमत्या निर्माय लोके शिवभक्तेः प्रसाराय निक्षिप्तमिति नायुक्तम् ।

किञ्च श्रीमद्वाल्मीकीयरामायणेऽयोध्याकाण्डे श्रीरामस्य स्वकुलैकदैवतश्रीविष्णवतिरिक्तदेवोपासकत्वं न



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कुत्राप्युपलभ्यते । श्रीरामस्य यौवराज्यप्राप्त्यवसरे 'सह पत्न्या विशालाक्ष्या नारायणमुपागमत् । तुष्टाव प्रणतश्चैव शिरसा मधुसूदनम्' इत्यादिपद्यानां दर्शनात् श्रीरामस्य श्रीविष्णोरेवानन्योपासकत्वं विज्ञायते।

अस्तु, श्रीमद्भागवते दशमस्कन्धस्य पूर्वार्द्धे द्वादशाध्यायादारभ्य चतुर्दशाध्यायपर्यन्तोऽध्यायत्रयात्मकोऽघासुरवधवर्णनरूपश्चतुर्मुखगर्वापहरणरूपश्चाशेषो विषयः पूर्वापरकथानुसन्धानेन पर्यालोचनसरण्या च नूनं प्रक्षिप्त एवास्ति न तात्त्विक इति सूक्ष्मदृष्ट्या विज्ञायते । यद्यप्यध्यायत्रयस्यास्य व्याख्याकृद्भिः श्रीधराद्यैः प्रक्षिप्तत्वं न प्रदर्शितम्, तदपि विजयध्वजेन व्याख्याकृतास्य विषयस्य प्रक्षिप्तत्वं स्फुटं निर्दिष्टम्। अपरञ्च—'इतीरेमेऽतर्क्ये' इत्यादिपद्येषु सुतरामतिविलष्टप्रायाणां शब्दानां समावेशोऽयं पूर्वापरपद्यनिर्माणशैल्या सामञ्जस्यं लब्धुं न प्रभवति। एवं शास्त्रेषु यत्र तत्रानेके प्रक्षिप्तांशा निक्षिप्ता वर्तन्ते ।

यद्यपि सामान्यजनदृष्टौ प्रक्षिप्तांशा न किञ्चित् क्षतिप्रदाः सन्ति, तदपि विचारविचक्षणानां दृष्टौ प्रक्षिप्तांशा नूनं महत्याः क्षतेर्हेतवः सन्ति । यतस्तैः शास्त्राणां तात्त्विकं स्वरूपमवश्यमेव विलुप्यते । तक्रेण दुग्धस्येवाल्पेनापि प्रक्षिप्तांशेन तस्य शास्त्रस्याशेषं स्वरूपमन्यथैव जायते । मेघपटलैः रवेर्मण्डलमिव प्रक्षिप्तैरंशैः प्राचीनशास्त्राणां स्वारस्यं सहसैव तिरोहितं भवति । शास्त्रनिर्मातुस्तात्त्विकोऽभिप्रायश्च प्रक्षिप्तांशानां संश्लेषेण विज्ञातुमशक्यो भवति इति नैतद्विचारवतामगोचरम् । एतद्विषये विशेषं विमर्शं विधातुं विद्वांस एव प्रभवन्ति इति ।

---

## किञ्चिन्निवेदनम्

नि० प० रामचन्द्रशास्त्री दाधीचः, अजमेर

अयि आर्यवीराः !

धन्यमिदं भारतवर्षं, यस्मिन्भारते भवादृशानामार्यवीराणां जन्म ! तर्हि कथयन्तु भवन्तो यद् भारते संस्कृतस्येमां हीनां दीनां कष्टावस्थां च विलोकयन्तः कियन्तं कालं शेष्यन्ते ? किमर्थं श्रीरामकृष्णचरितानि भवतां हृदयेषु न प्रेरणां प्रददति । कथं साम्प्रतं स्वातन्त्र्यसुखमनुभवतामपि भवतां चेतांसि न प्रसन्नानि जायन्ते । नेत्रे मनागुन्मील्य समन्ततः प्रसार्य विलोकयन्तु यदार्याणामस्यां जन्मभूमौ यादृशी दुरवस्था संस्कृतभाषाया वर्तते तादृशी नान्येषु केषुचिद् देशेषु स्वभाषायाः श्रूयते कर्णपरम्परयापि ।

इयं हि गिर्वाणगिरा "अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ।" इत्यादिवचोनिचयैरनाद्यन्तत्वेन ख्यापिता, परमपवित्रा, सर्वविधविद्याकलानिधानभूता, सृष्ट्यारम्भादद्ययावत् समेषां प्राणिनामपरिमितोपकारकारिणी, प्रदीपवत्सर्वार्थद्योतिनी, धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थसाधिका कस्य वा सचेतसः कृतज्ञस्य भारतीयस्य आर्यस्य मनसि बहुमानपात्रं न स्यात् ।

एतस्या अस्याः प्रचाराय यदीदानीमपि भवन्तो दत्तावधाना न भविष्यन्ति तर्हि निःसन्देहमस्मासु जीवत्स्वेवेयमस्माकं सुरसरस्वती कथामात्रशेषा भविष्यति । किन्तु दयालुर्भगवान् यां भूमिवतीर्य असकृदलङ्करोति तस्या एवानादिभाषा एकदैव रसातलं गच्छेदिति न वरम् । अत एव बद्धपरिकरैर्भूत्वा सर्वात्मनास्माभिस्तथा प्रयत्नो विधेयो यथा पुनरपि गेहे गेहे लब्धपदा भवेदियमिति ।

---



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# पञ्चगव्ये गोमयं गोमूत्रं च

लेखकः—श्रीदीनानाथशर्मा शास्त्री सारस्वतः, विद्यावागीशः, विद्याभूषणः, विद्यानिधिः,
[ प्रिन्सिपल–सं० हि० महाविद्यालयः, रामदल, दरीबाकलां, देहली ]

सनातनधर्मिहिन्दुसम्प्रदाये गोमयगोमूत्रयोर्विशिष्टोपयोगोऽस्ति, किमपि व्रतम्, उपवासः प्रायश्चित्तं वा ते + विना न पूर्यते। गौरेतदर्थमेव सर्वप्राण्युत्तमा मता यद्-गवोत्पन्नानि सर्ववस्तूनि पवित्राणि पापशोधकानि च। तदीयं दुग्धं मनस आत्मनश्च कृते विशिष्टमुपयोगि। एतेन रोगा दूरे तिष्ठन्ति। तदीयं दधि वसूचिकायाम् आवधिकज्वरादौ ( टाइफाइड ) लाभदायकम्। गोघृतेन बुद्धिवृद्धिर्वीर्यवृद्धिरायुर्वृद्धिश्च भवति। गव्यदधितक्रं विष-वमन-मेदो-भगन्दर-प्रमेह–शूलोदर-रोगाजीर्णादिकं च चिकित्सति। तत्प्रयोगेण यौवनं चिराय तिष्ठति। एवं तदीये नवनीतेऽपि पुष्ट्यादयो बहवो गुणाः; अत एव भगवान् श्रीकृष्णस्तत् प्रसह्यापि उपयुङ्क्ते स्म। बाल्ये तदुपयोगतः शरीरं तारुण्ये वक्तृता-ग्रन्थप्रणयनादिजन्यं परिश्रमं न भावयति, न श्राम्यति तादृशः, न च विकृतमस्तिष्कता जायते। गोमयेन एतदर्थं भूमिं लिम्पन्ति यद्-महामारी, विषदोषः, कीटाणुविकारो ग्रन्थिकादिकरुजश्च नश्येयुः। 'फिनाइल' वद् अस्मिन्नपि दुर्गन्धनाशिका शक्तिरस्ति। लेपन न केवला भूमिः, प्रत्युत तत्रत्यो वायुरपि शुध्यति। एतदीयमिदमेव कारणं यद्-गोमये गोमूत्रे च पोटास, सोडा, मैगनेशिया, शोरा (क्षारः), चूना ( चूर्णं ) लोहभस्म, गन्धक, फास्फोरस, एमोनियाद्यनेकपदार्थानां तत्त्वानि सम्मिश्रितानि भवन्ति, तानि उड्डीय वायुं संस्कुर्वन्ति।

एषु पदार्थेषु 'पोटाशः' विषहारी वर्वर्ति, मलमूत्रं शोधयति, जठराग्निं वर्द्धयति, कफम् उदररोगं शीतज्वरादिकं च हरति। एवं 'सोडा'-( पाचकक्षार ) पदार्थोऽन्नं पाचयति, मलं शोधयति, कफविकारांश्च द्रवयति। 'मैगनेशिया' च वात-पित्ताम्लप्रमेह-रक्तदोषादीन् दूरीकरोति, शरीरं नैर्बल्याद् रक्षति, यतो हि स पदार्थः ( मैगनेशिया ) अभ्रकस्य मूल-तत्त्वमस्ति। चूना-(सुधा) गुणा अपि न कस्यापि अविदिताः। येषां शिशूनां मातरो म्रियन्ते, जीवन्त्योऽपि वा अल्पस्तन्या भवन्ति; तेभ्यो गव्यं दुग्धं दीयते। तदीयगुरुत्वदूरीभावाय मातृदुग्धसाम्यापादनाय तस्मिन् सुधाजलं मेल्यते। सुधा-जलमिश्रितदुग्धपानाच्च शिशोः पाचनसम्बन्धी विरेचनादिः कोऽपि दोषो न भवति। गोमये यद् लोहभस्म तिष्ठति; तद् वातकफगुल्मार्शउदररोग-रक्तदोषान् द्रवयति। एवं गन्धकद्रवे, वालुकाद्रवे, फास्फोरस–एमोनियाप्रभृतिपदार्थेष्वपि अनेके विस्मयोत्पादका रोगनाशका दिव्यगुणाः सम्भृता भवन्ति। गोमयस्य तत्त्वानां पृथक्करणेन एतदादयः पदार्था यथायोग्यपरिमाणे पार्थक्येन प्राप्तुं शक्याः।

गोमये अन्नाद्युत्पादनेऽपि विशिष्टा शक्तिः। अत एव पृथिव्यां तदीयखाद्यं दीयते। गोमयं शरीरे लिप्त्वा स्नानेन खर्जूर्व्यपैति। गोमयस्य भस्म पात्रशोधकम्, शीतनिवारकं च; अत एव साधवः शीलकाले विशिष्टं तल्लेपं कुर्वन्ति शरीरे। शीतलाव्रणे गोमयभस्मना

+ ते—गोमूत्र–गोमये विना।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



व्रणशोषो भवति । घृतेन सह भस्मयोजने व्रणश्चिकित्स्यते । अन्ने च गोमयभस्म योजयित्वा स्थापने घुणो न प्रवर्तते । एवं गुणगणान्वितस्य गोमयस्य महिमा गिरां न विषयः । तत एव सनातनधर्मस्य माङ्गलिककार्येषु तदुपयोगो जायते ।

गोमूत्रस्यापि महिमा+न्यूनो नास्ति । शारीरिकान् भयङ्करतमानपि रोगान् एकाकिगोमूत्रोपयोगोपि दवयितुं शक्तः । गोमूत्रमुदररोगाणां कृते श्वास-प्रमेह-मधुमेहाजीर्ण-जलोदरादिकृते अत्यर्थमौषधम् । कुष्ठरोगो हृदयरोगश्च एतत्पानेन नश्यति । तप्तगोमूत्रस्य कर्णे चे[illegible]ण तत्स्रावो दूरीभवति । तेन नेत्रयोः प्रक्षालनात् तदीयं ज्योतिर्वार्धक्यपर्यन्तं सम्यक् तिष्ठति । रघुवंशे रघोस्तेन दिव्यदृष्टि-प्राप्तिः प्रसिद्धैव । कृष्णधेनोर्मूत्रस्य १५ दिनानि पानात् कण्ठे सुस्वरः प्रादुर्भवति । उदरस्थाः कृमय एतेन नश्यन्ति । गोमूत्रं वैद्यानां कृते 'टानिक' +ओषधिः सेद्धुमर्हति; यदि ते अदसीयोपयोगं कुर्वन्तु ।

अत एवार्याणां सर्वेषु व्रतोपवासादिषु गोमय-गोमूत्रमिश्रितं गवां दुग्धं दधि घृतं च पञ्चगव्यत्वेनोपयुज्यते ।

# भारत्यां-अभिनन्दनम्

ले० —श्रीहरिदत्तपालीवालः, 'निर्भय', सम्पादकः 'पालीवाल-सन्देश'
कायमगंज ( फर्रुखाबाद )

मनोज्ञाभिप्रायप्रकटनकलाकौशलजुषां
प्रसिद्धानां नानाविषयसुखबोधाय सुधियाम् ।
सुराणां भारत्यां सरलसरणौ साधु लिखितै-
विराजन्ती लेखैर्भुवि खलु सदेयं विजयते ।

अज्ञानेनात्यधिकभरिते पापकूपे निमग्नान्
संरुन्धे या भुवनमहितज्ञानदीपप्रदानात् ।
सर्वोत्कृष्टा रुचिरवचनालंकृता पत्रिकेयं
सन्तोषाऽब्धौ बुधपरिषदं मज्जयन्ती विभाति ।

रम्याकारा रसिकजनता-मानसोल्लासदात्री
विद्यावारां निधिभिरखिलैरादृताऽऽपेतदोषा ।
कारुण्येनाश्रितजनपरित्राणबद्धादरस्य
श्रीनाथस्यानवधि सुयशः प्राप्नुयात्पत्रिकेयम् ।

रमणीयकथाकलापयुक्ता
रमणीवोत्तमभूषणैरुपेता ।
रसिकस्य न कस्य पत्रिकेयं
हृदयं चोरयते मनोज्ञरूपा ।

सरसकवितोद्यान-क्रीडत्-कवीश्वर-कोकिल-
स्वति-मधुरसुधाधारादर्पापहारिमृदुस्वरैः ।
मुदितहृदयास्संवृत्ताः स्मः प्रहृष्टतनूरुहाः
सुरवरगिरः प्रेयस्या नः स्वयं परिचारकाः ।

विनोदवाक्यावलिजातशोभा
विशुद्धविज्ञानविशेषदात्री ।
समस्तसम्मान्यगुणा चकास्ति
प्रसिद्ध-मानोज्ञक-पत्रिकेयम् ।

सुललितपदबन्धा वीतदोषानुषङ्गा
रुचिरवचनजाता राधिताशेषलोका ।
गुणगणबहुमान्या मुद्र्यते जयपुराद्धि
भवतु सुललितेयं लोकमान्या प्रसिद्धा ।

ललितमधुरैर्नानालेखैर्मनोरमताङ्गता
शिशुपदमतीयायोत्कृष्टा विवेकिभिरादृता ।
कविभिरनघा विद्यावद्भिः कलापरिचारकै-
र्जयति "भारती" सेयं सुसाधसमीहिता ।

जयतु ललितनामा लोकमान्या वदान्या
प्रकटितगुणजाता मासिकी पत्रिकेयम् ।
जयतु विगतदोषा भारती देवतानां
जयतु मुदितचेताः पण्डितानां समाजः ।

करुणावरुणालयस्य विष्णो-
ररुणाम्भोरुहलोचनस्य शीघ्रम् ।
दयया मधुरा मनोरमेयं
सुरवाणी परिवर्धिता हि भूयात ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# मातृ-सन्देशः

[ विद्यार्थी-गणेशप्रसादः, गौतमः, संस्कृत-महाविद्यालयः. नेपालः ]

तिष्ठ तिष्ठ ! न चल श्रमि-वर्ग ! किं न पश्यसि ? वयं धनि-वर्गाः ।
आः ! कथं भवतु ते निज-तन्त्रं, दास ! दास ! परिपालय दास्यम् ॥ १ ॥

रज्जु-पाश उत सातुल-शक्तिः, आः ! कृपा-कृपण-हिंसनचुञ्चुः ।
चन्द्र-हास-सुषमा तव कण्ठे, नृत्यति प्रतिकरोषि यदाऽऽज्ञाम ॥ २ ॥

चूः-करोषि यदि तत्क्षणमेव, जीवनाय वितराञ्जलि-तोयम ।
द्रव्य-दैवमवलम्ब्य वसामो न्याय-दैवमपि तत् तदधीनम् ॥ ३ ॥

किं न वेत्सि ? कतिचिद् बलिसद्म केचिदन्तकगृहान् कितिचिच्च ।
वह्नि-दाहमपरे जल-जालमाश्रितास्त्वमपि तां सृतिमेषि ? ॥ ४ ॥

एवमेव निरवग्रहताया जन्मसिद्ध-सरणीमधिकारम् ।
आः ! हरन्ति धनि-दानव-वर्गाः, चीत्कृतौ परिपतन्ति च दीनाः ॥ ५ ॥

सद्म-सद्मनि, जने, जनतायां, वर्त्म-वर्त्मनि, समाज-समाजे ।
दीन-दीन-जनता-करुणार्त-क्रन्दनं सरति सर्वत एव ॥ ६ ॥

क्षुत्पिपासित-हृदो न वराका आरमन्ति न च कर्मसु शक्तिम् ।
दर्शयन्ति धनिभिर्दलितास्ते, तान्प्रति प्रपतिता कदवस्था ॥ ७ ॥

हन्त ! हन्त !! सुत रे ! स्वसमाजं, पक्व-पक्व-मुखमण्डलभाजम् ।
किं न पश्यसि ? कथं धृतनेत्रो, व्यर्थमेव धरणी धरति त्वाम् ? ॥ ८ ॥

एकतो निज-पिचण्ड-पुपूर्षा व्याकुलीकृतवती श्रमिवर्गान् ।
अन्यतस्तृणमपि स्वशयेन न स्पृशन्ति परमीश्वरकल्पाः ॥ ९ ॥

चन्द्र-चुम्बिषु गृहेषु न सन्ति पञ्चषा अपि जना इतरत्र ।
जीर्ण-शीर्ण-तरु-पर्ण-कुटीरे, हन्त ! सन्ति जनता अपरत्र ॥ १० ॥

नावलोकयसि ? हा ! त्वमिदानीं, कीदृशी समपतद् दुरवस्था ।
श्रोतुमेवमपि नार्हसि कष्टं, किं पुरोऽनुभवितुं न च लज्जा ? ॥ ११ ॥

तद् बलं बलमवैमि यदन्य-प्राण-पीडनपरं परिमार्ष्टि ।
तद् धनं धनमवैमि यदाढ्य-गर्व-चूर्णनपरं परमार्हम् ॥ १२ ॥

तत् पुमानिति पदं पदवाच्यं वेद्म्यहं सधनताऽधनतानाम् ।
नाममात्रमपि भेदमकृत्वा, कल्पते प्रतिजनं प्रतिसद्मम् ॥ १३ ॥

गर्ज ! गर्ज !! धनि-कुञ्जरसङ्घे निर्भयं पुरुष-सिंह ! न तिष्ठ ।
सत्यमेव जयति स्मर सत्यं, सत्यमेव जयति प्रतिपक्षम् ॥ १४ ॥

सत्य-शस्त्र-सख ! हे रणवीर ! मा गमः कुटिल-वञ्चन-वर्त्म ।
तोभ-शक्तिरपरिक्षत-शक्तिर्नो भविष्यति पुरस्तव सत्यम् ॥ १५ ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# प्राचीनभारते पोतनिर्माणकला

कविशिरोमणि—भट्ट-श्रीमथुरानाथशास्त्रिणः, साहित्याचार्याः, जयपुरम् ।

आध्यात्मिकविषये मानवचरित्र-सभ्यतानिर्धारणे च भारतवर्षीयाः प्राचीनार्याः समग्रस्यापि भूमण्डलस्य प्रथमे मार्गोपदेशकाः समभवन्निति आग्रहिलान्कांश्चिद्विहाय विचारशीलैः सर्वदेशीयैरेवान्वेषकैर्विद्वद्भिः प्रायः स्वीकृतमेव । किन्तु शिल्पकलादीनां विषये प्राचीनार्याणां धुरन्धरत्वं बहवः किल गवेषका नाऽद्यापि स्वीकुर्वन्ति । बह्वयो भौतिककलास्तु साम्प्रतमेवाविष्कृताः । नासीत्पूर्वं तासां सत्तापि । अत एव तासां संबन्धे प्राचीनार्याणां परिज्ञानं तु न ते गवेषणाया विषयमप्यभिमन्यन्ते । किन्तु यासां कलानां प्रचारः पूर्वमप्यभूत्तासामपि कलानां प्राचीनार्याः कामं मूलाविष्कारकाः कदाचिद्भवेयुः परं तासु तैः पूर्णोन्नतिः कृताऽऽसीदिति ते न कथञ्चिदपि स्वीकर्तुं वाञ्छन्ति । नवनवान्वेषणशीलानां पाश्चात्त्यवैज्ञानिकानामेवंविधेषु विषयेषु परस्परं विचारविनिमयाः प्रायः प्रत्येकवर्षं एवाङ्गलादिभाषापत्रेषु प्रकाशिता भवन्ति । बहोः कालादेव पाश्चात्त्यान्वेषकाणामयं विचारोस्ति—"यद् अतिप्राचीनकालिका आर्याः समुद्रयानकलायां नासन् पूर्णपरिनिष्ठिताः । मध्यसमये अवश्यमेतैरर्णवनौयानकलायां समुन्नतिः कृताऽऽसीदित्यभ्युपगच्छामः । शत-शत-सहस्रसहस्र-संख्यका एतेषां महामहान्तः पोता विदेशीयैः साकं व्यवसायवाणिज्यमकुर्वन्, किन्तु अतिप्राचीनकाले एवंविधकलायामुन्नतेः प्रमाणानि न प्राप्यन्ते" इति । प्रत्युत ते स्मृतिप्रमाणैरिदं साधयितुं चेष्टन्ते यत्प्राचीनकाले ऋषिभिः समुद्रयात्रा धर्मदृष्ट्या प्रतिषिद्धाऽभूत् । अत एव धर्मप्राणा आर्याः समुद्रयात्रायां सर्वथा पराङ्मुखा एवाऽऽसन् । एवं कृते समुद्रयात्रोपयोगिनी पोतनिर्माणकलापि नोन्नतेर्मार्गं पस्पर्शेति ।

भवेदेतत्कदाचित्स्थूलमतीनां कृते पोतनिर्माणकला-प्रतिषेधकं किन्तु सूक्ष्ममतयः प्रत्यक्षमेतस्मिन्नेव प्रतिषेधे पोतनिर्माणकलायाश्चरमोन्नतेश्चिह्नं पश्यन्ति । यदि ऋषीणां काले तत्पूर्वं वा समुद्रयानसाधनान्यासन्नेव न, तर्हि लोकाः कथं वा प्रत्यन्तदेशेष्वगच्छन् ? यस्य हि प्रतिषेधः स्वग्रन्थेषु महर्षिभिः कर्तव्योऽभवत् । न केनचिदसतो निषेधः क्रियते । रासभस्य मूर्ध्नि विषाणं न भवतः । अत एव न कस्मिंश्चिदार्यग्रन्थे इदं लिखितं यद् गर्दभशृङ्गं द्विजैर्नोपादेयमिति । प्रत्युत स्पष्टं प्रतीयते यत्, आर्षसमये समुद्रनौयानकलायां भूयसी समुन्नतिरभवत्, यस्याः कारणेन हि बहवोऽप्यार्या समुद्रयानेन बहिर्देशेष्वगच्छन् । ततश्च म्लेच्छजातिभिः सह भारतीयद्विजानां धर्मभ्रंशकरो गाढसंसर्गो मा भूदिति धार्मिकदृक्कोणेन समुद्रयात्रा प्रत्यषिध्यत महर्षिभिः । किञ्च-समुद्रयात्रा द्विजानामेव कृते निषिद्धा स्मृतिसंहितासु । अन्ये तु ये केचिज्जनाः समुद्रद्वारा अन्यैर्द्वीपैः सह संबन्धमास्थापयन् तेषां नौयानं विना कथं वा निर्वाहोऽभवत् ? ततश्च भवद्भिः कथं वा साधयितुमिष्यते यत्प्राचीनार्याणां समये पोतनिर्माणकलायामभ्युन्नतिर्नाऽभवदिति ।

आर्षकालादुत्तरमपि संस्कृत-पालिभाषयोः साहित्ये सामुद्रिकजलयानानां यानि वर्णनान्युपलभ्यन्ते तैरेव सिध्यति यदिमानि यानानि अतिविशालानि सुदृढानि चिरस्थायीनि चासन् । ततश्च कथमिदं न सिध्येत् यत्प्राचीनभारतीयाः पोतनिर्माणकलायामपि पारंगताः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



आसन्निति । युवराजः सिंहवाहुर्यमर्णवपोतमारुह्य सिंहलद्वीपे यात्रामकरोत् तत्र पञ्चशतसंख्याकास्तु वणिज एवासन् । येन महापोतेन पाण्ड्यराजकुमारी सिंहलमयात, तस्मिन् अष्टादशशतं राजकर्मचारिणः, पञ्चसप्ततिः परिचारकाः, बहुसंख्यकाः क्रीतदासाः, शतशतसंख्याश्च कुमार्यः समभवन् । किञ्च 'जनकजातक–सुप्परकजातक–समुद्दवणिक्जातक' – प्रभृतिबौद्धग्रन्थेषु महामहतामर्णवपोतानां वर्णनं स्पष्टमुपलभ्यते ।

किमधिकम्–अतिप्राचीनकालनिर्मितस्य 'साँचीस्तूपस्य' पूर्वद्वारे प्रस्तरोत्कीर्णानि यानि चित्राण्युपलब्धानि तेष्वपि महामहान्त्यर्णवयानानि प्रत्यक्षमुत्कीर्णानि द्रष्टुं शक्यानि । किञ्च युरोपवासिभिः पाश्चात्त्यविद्वद्भिरेव सेयं गवेषणा कृतास्ति यद् यवद्वीपे (जावा) अतिप्राचीनकाले भारतीयसभ्यता प्रतिष्ठिताऽभवत । भारतस्य विविधान्यपि शिल्पानि तस्मिन् द्वीपे गत्वा परामुन्नतें लेभिरे इति । तत्र हि प्रस्तरगात्रे उत्कीर्णमेकमीदृशं चित्रमुपलब्धं यद्धि खिष्टजन्मतो वहु प्राचीनमिति पाश्चात्त्या अपि स्वीकुर्वन्ति । तस्मिन् चित्रे एकस्य भारतीयस्य राज्ञः समुद्रयात्रा वर्णितास्ति, यो हि सबृहता सुशोभनेन च महापोतेन पश्चिमसमुद्रस्योपकूले यात्रामारभते स्म । सेयमस्य दीर्घा च विपत्संकुला च भ्रमणयात्राऽतीव सांघातिकी समभवत्, किन्तु पोतपरिचालकैर्नाविकैः 'पटवितानम्' (पाल) उच्छित्य अद्भुतेन कौशलेन सोयं रक्षित इति चित्रेऽस्मिन्ननपरया भाषया स्पष्टमुत्कीर्णमस्ति । तदिदं चित्रमालोक्य ऐतिहासिकाश्च चित्रशिल्पिनश्च परमं प्रमोदं विस्मयं चोपलभन्ते । अस्तु, एतदुत्तरं चीनदेशीयः परिव्राजकः फाहियानः' येन किल पोतेन सिंहलद्वीपाद् यवद्वीपयात्रामकरोदसावपि महाविशालोऽभूद् यस्मिन् हि तद्वयं यात्रिणः स्थिता अभूवन् ।

किञ्च अतिप्राचीनकालस्य या आन्ध्रमुद्राः पाश्चात्यान्वेषकैर्भू निखननं कृत्वा आविर्भाविताः तास्वपि द्विश्रृङ्गाणां पोतानां मूर्तिरुत्कीर्णास्ति । पाश्चात्त्यैः वद्रङ्किरासां मुद्राणामालोचनां विधाय तदिदमैतिहासिकं तथ्यमाविष्कृतं यत् तस्मिन्काले ग्रीस–रोम–मिश्र–चीनादिदेशैस्तथा पूर्वदिग्भवैरन्यान्यैश्च देशैः साकं भारतवर्षस्य वाणिज्यसंबन्धो निष्कण्टकं प्राचलदिति । एभिः पाश्चात्त्योद्भावितैः प्राचीनगवेषणैरेव स्पष्टं सिध्यति यत्प्राचीनकालेऽपि भारतवासिनः पोतनिर्माणकलायामतिपारगामिनः समभवन्निति । सर्वमन्यद् गच्छतु, विश्वविजयी अलेग्जेण्डरो यस्मिन् काले भारतं प्रति विजययात्रामकरोत् स हि खिष्टजन्मतः कतिपयशताब्दपूर्वतनः काल इति जानन्ति सर्वेऽपि । एष हि भारतीयतरणिमेवारुह्य सिन्धुनदीमवातरत् । एतस्य सेनापतिः नियारकसः (Nearchos) यं महापोतमारुह्य पारस्योपसागरे युद्धयात्रामकरोत् सोऽपि भारतीय एवाऽऽसीत् ।

इयं तु खिष्टजन्मतः पुरातनस्य पोतनिर्माणकलाया इतिहासस्य सूचना पाठकैरवाप्ता । एतदनन्तरमपि अर्णवमहापोतनिर्माणशिल्पं भारते उत्तरोत्तरमुन्नतिमेवालम्बे । पाश्चात्त्यैरितिहासज्ञैरेवाऽन्विष्टमस्ति यत् यस्मिन् समये गज़नीनिवासी महमूदो भारतमाक्रमीत् तस्मिन् समये तद्गतिप्रतिरोधार्थं चतुःसहस्राणि सांग्रमिकमहापोताः सिन्धुवक्षसि सज्जिताः समभूवन् । मोगलशासनकालेपि भारतीया सेयं कला पूर्णोन्नताऽभवत । 'आईन अकबरी'ग्रन्थे वर्णितमस्ति यत् सम्राडकबरस्य शासनकाले सिन्धुप्रदेशस्य 'सरकब' नाम्नि पोतविश्रमस्थले ('बन्दर') नानाविधा महामहान्तः चत्वा रिंशत्सहस्रसंख्याकाः सामरिकपोताः सर्वदाप्यतिष्ठन । अपि नेदं प्राचीनभारतीयानां पोतनिर्माणकलाकौशलसूचनाय ? कलिकातास्थ-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नेशनलकालेजाध्यापकेन श्रीयुतराधाकुमुदमुखोपाध्यायेन दक्षिणभारते कलिङ्ग (उडीसा) प्रदेशे च भ्रमणं कृत्वा अतिप्राचीनकालिकानि प्रस्तरोत्कीर्णानि कानिचिद्दर्शनीयचित्राणि संगृहीतानि। तेषु जगन्नाथपुर्यां भगवतो जगन्नाथस्य मन्दिरशीर्षे पाषाणोपरि उत्कीर्णं महापोतचित्रमेकं वङ्गभाषामये 'प्रवासि' पत्रे प्रकाशितमप्यभूत्। अनेनापि प्राचीनभारतीयानां पोतनिर्माणपाटवं सर्वैरेवानुमातुं सुशकम्।

अस्मिन्विषये यावत्किल गवेषणाः प्रचरन्ति एतस्मिन्नन्तराले एव पूर्वोक्तेनाध्यापकमहाभागेन एकमीदृशं सुदृढतरं प्रमाणमन्विष्टं येन न केवलं महापोतनिर्माणकलाविषये एव युगान्तरमुपतिष्ठति, अपितु प्राचीनानां भारतीयानां सर्वविषयेष्वेव सुस्थिरकार्यशैली-प्रदर्शनं सम्यग्रूपेण प्रमाणितं भवति। कलिकत्तास्थसंस्कृत-कालिजस्य पुस्तकालये 'युक्तिकल्पतरु' नामा हस्तलिखित एको ग्रन्थ एव प्राप्तोऽस्ति यस्मिन् न केवलं पोतानां वर्णनमेव अपितु एतेषां निर्माणशिल्पविषयोऽपि सुविस्तृतरूपेण वर्णितोऽस्ति। 'ग्रन्थगुम्फनकौशलेन संस्कृतभाषां सर्वाङ्गैव विश्वव्यापिविषयानात्मसाच्चकार' इत्यभिसूचयितुं तत उद्धृतः कियांश्चन विषयः पाठकानां पुरत उपस्थाप्यते—

सर्वतः पूर्वं तु जलयाननिर्माणार्थं कीदृशं काष्ठमुपयुक्तमित्येव तावन्निर्दिष्टम्। अस्मिन्विषये प्राचीनभारतीयानां परिज्ञानं गभीरमासीदिति सर्वेप्यालोचका मन्यन्ते। वृक्षायुर्वेदे हि वृक्षा अपि ब्राह्मण-क्षत्रिय-वैश्यादिचतसृषु श्रेणिषु विभक्ताः—लघुः, कोमलः, अनायासमेव अन्येन वृक्षेण सह सुयोज्यो ब्राह्मणः। लघुः सुदृढः सहजमेवान्येन सह असंयोज्यः क्षत्रियः। कोमलो गुरुभारो वैश्यः। दृढो गुरुभारश्च शूद्रः। एतेषां विभेदानां मिश्रणेन अन्या अपि वृक्षजातयः संजाता इत्यादिस्तु त्यज्यते विस्तरः।

जलयाननिर्माणविषये भोजमतं प्रायः प्रामाणिकममन्यत। एतस्य मते क्षत्रियकाष्ठघटितानि जलयानानि सुखसंपत्प्रदानि। विशालजलराशेर्मध्ये तु एभिरेव यातायातं कर्तव्यमिति बहुशस्तेन प्रोक्तम्। अन्यकाष्ठनिर्मितास्तरणयस्तु न दीर्घकालस्थायिन्यो भवन्ति। जले पच्यन्ते, सामान्याघातेन विदीर्यन्ते। भोजेन हि समुद्रयायिनः पोतस्य निर्माणविषये अतिसतर्कता प्रदर्शिताऽस्ति—काष्ठानां मिथः संयोजनार्थं लोहधातुर्न ग्राह्य इति तेनाऽऽदिष्टम्। यतो हि समुद्रगर्भस्थे चुम्बकशैले संनिहिते सत्येव पोतघटिताः सर्वेपि लोहकीलाश्चुम्बकाभिमुखं निर्गच्छन्तः पोतमेतं समुद्रे निमज्जयेयुः। अत एव काष्ठसंयोजनाय धात्वन्तरमेव ग्राह्यमिति तस्यादेशः।

युक्तिकल्पतरौ 'सामान्य' 'विशेष' इति भेदाभ्यां जलयानानि द्विधा भक्तानि। नदीवक्षसि प्रवहन्ति 'सामान्यानि'। अपारपारावारे प्रचरन्ति तु विशेषयानानि। सामान्यतरणीनां दश प्रकाराः—क्षुद्रा, मध्यमा, समा, चपला, पटला, भया, दीर्घा, पत्रपुटा, गर्भरा, मन्थरा। आसु 'क्षुद्रा' सर्वापेक्षया लघीयसी। अस्या दैर्घ्यम् आयामः उच्चता च यथाक्रमं २१, ५$\frac{३}{४}$, ५$\frac{३}{४}$, हस्तपरिमाणेन भवति। इतोऽग्रतनानां यानानामाकारः क्रमशो वर्द्धते। 'मन्थरा' सर्वापेक्षया बृहती। एतस्या दैर्घ्यम २१०, आयामः १०५, उच्चता च १०५ हस्तमानेन भवति। दशप्रकारासु-भीमा, भया, गर्भरा, अशुभप्रदाः।

'विशेष' संज्ञया प्रथिताः समुद्रतरणयस्तु प्रधानतया द्विप्रकाराः—दीर्घाः उन्नताः। तत्र दीर्घा दैर्घ्येण, उन्नताश्चोन्नततया प्रथिताः। दीर्घाया दैर्घ्यम् आयामः उन्नतता च यथाक्रमं ४२, ५$\frac{३}{४}$, ८$\frac{१}{४}$, हस्तमिता भवन्ति। एतस्या 'दीर्घायाः' पुनरवान्तरभेदाः सन्ति—दीर्घिका, तरणिः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



लीला, गत्वरी, गामिनी, तरिः, जङ्घाला, प्लाविनी, धारिणी, वेगिनी चेति। वेगिनी सर्वापेक्षया बृहती। अस्या दैर्घ्यम् आयामः उन्नता च यथाक्रमं २५२, ३१½, २५½ हस्तमिताः। 'दीर्घ'जातिषु लीला, गामिनी, प्लाविनी चाऽशुभप्रदाः।

'उन्नता' तरणयस्तु पञ्चप्रकाराः—ऊर्ध्वा, अनूर्ध्वा, स्वर्णमुखी, गर्भिणी, मन्थरा च। आसु अनूर्ध्वा गर्भिणी मन्थरा निन्दिताः, ऊर्ध्वा तु शुभा। इतः परं जलयानानां चित्रणप्रकरणमारभ्यते—यानानां कक्ष-गृहेषु कनक-रजत-ताम्रेतिधातुत्रयनिर्मितानि वस्तून्युपादेयानि। तत्र 'चतुःशृङ्गः' (चतुर् 'मस्तूल' युक्तः) अर्णवपोतः श्वेतवर्णः, त्रिशृङ्गो रक्तवर्णः, द्विशृङ्गः पीतवर्णः, एकशृङ्गश्च नीलवर्णश्चित्रणीयः। एतेषां पोतानां मुखभागः केसरि-महिष-नाग-हस्ति-व्याघ्र-पक्षि-भेक-मनुष्यमुखाकारो निर्मीयते स्म। प्रथमप्रथमं जलावतरणमुहूर्ते पोतस्य मुखं सुवर्णेन मुक्ताहारेण वा मण्ड्यते स्म।

इमे किल समुद्रयायिनः पोता निवासगृहानुदिश्य पुनस्त्रिधा विभक्ताः, यस्मिन् पोते बहुसंख्या विशालाश्च गृहा भवन्ति स 'सर्वमन्दिरः'। एतच्छ्रेण्या एव पोता राजधनस्य अश्वानां रमणीनां च वहनाय प्रशस्ताः परिगणिताः। द्वितीयश्रेण्याः पोताः 'मध्यमन्दिराः'। तेषु हि मध्यभागे मन्दिराणि भवन्ति। इमे पोता वर्षाकाले राजभिर्व्यवह्रियन्ते स्म (उपयुज्यन्ते स्म)। येषु हि अग्रभागे मन्दिराणि भवन्ति ते 'अग्रमन्दिराः'। इमे चिरप्रवासाय संग्रामाय चोपादीयन्ते स्म। वारणावतात् पलायनकाले करुणाहृदयो विदुरः पाण्डवानां रक्षार्थं 'सर्ववातसहाम्' 'अग्रमन्दिराम्' एव नौकां सज्जयामास। रामायणेऽपि एतज्जातीयानां पञ्चशतनौकानामुल्लेखः प्राप्यते। कालिदासोऽपि वर्णयामास—

'दिग्विजयिनो रघोः प्रतिरोधार्थम्, एवंविधान् सांग्रामिकपोतानादाय गौडाः संग्रामायाऽवतस्थिरे।'

पाठकमहाभागानामेव किं मन्ये सर्वेषामेव विवेकिनामवगतं स्याद्यत् प्राचीनभारतीयानामर्णवनौयान-शिल्पमिदं विदितमासीन्न वा? कस्मिन्नपि विषये नियमनिर्माणस्य तदैवाऽऽवश्यकता भवति यदा हि बहुकालव्यापिना बहुलेन च प्रचारेण तस्मिन् काचिद्विशृङ्खलता शनैः शनैः प्रसज्यमाना भवति। जानन्त्येव सर्वेऽपि यद्—भाषायाः पूर्णप्रचारे सत्येव तस्यां व्याकरणनिर्माणस्यावश्यकता भवति। अत इदानीं सहजमेवाऽनुमातुं शक्यते यद् अब्धिनौयान-निर्माणस्य भारते बहोः कालात्प्राक्तनः प्रचार आसीद् यस्य हि नानाप्रकारा नानाभेदाश्च युक्तिकल्पतरुकारेण परिगणिताः।

सत्यं त्विदमस्ति यद् गौराङ्गाणां भारतेऽधिकार-कालपर्यन्तं पोतनिर्माणशिल्पमिदं भारते प्रशस्तरूपेण प्राचरत्। १८०० तमे ख्रिष्टाब्दे भारतस्य तदानीन्तनः सम्राट्प्रतिनिधिः लॉर्ड वेलेस्लि-महोदयः शासन-विवरणे प्रोवाच—

"वङ्गप्रदेशस्य पोतविश्रमस्थले 'बन्दर' राजकीयैस्तरैः अर्णवपोतैः यावन्ति पण्यद्रव्याणि विदेशेषु नीयन्ते, भारतं च एतस्मिन् शिल्पे यावदग्रसरमभवत् भविष्यत्काले च यथोन्नतेराशा क्रियते तेन स्पष्टमिदं विश्वसितुं शक्यते यत् सामुद्रिकव्यवसाये क्रियानपि प्रसारो भवेत्, ब्रिटिशदेशीयानां व्यवसायिनां सर्वमपि व्यवसायकार्यं भारतीयाः पोताः सम्यग्रूपेण निर्वहेयुः।"

बम्बईप्रदेशभवेन 'सागवान'काष्ठेन या समुद्रयानानि निर्मीयन्ते स्म तेषां दृढताप्रशंसा पाश्च स्त्यैरेव शासकैस्तस्मिन् काले क्रियते स्म। किमधिक बम्बईनिर्मिता अनेके पोताः पूर्वं कतिचिद्वर्षाणि व्य सायकार्यमप्यकुर्वन्, एतावत्कालमुपयोगोत्तरमपि रा तन्त्रेणैते पोता युद्धार्थमक्रीयन्त। किमियतापि प्राची भारते पोतनिर्माणशिल्पं नाऽभ्युपेयेत कैश्चित्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



संम्पादकीयम्—

# गुरुपूर्णिमा

अग्रिमा पूर्णिमा वर्तते आषाढमासस्य । तस्मिन् दिने भारतस्य सर्वप्रान्तेषु, प्रायशः सर्वेषु संप्रदायेषु च व्यास-पूजा प्रचलति । तद्दिनं गुरु-पूर्णिमा-नाम्नापि प्रसिद्धम् । अस्य कारणं स्पष्टम्-महर्षिणा श्रीव्यासेन अनुपमं साहित्यम् अस्माकं कृते निर्मितम् यद्धि अस्माकं पथप्रदर्शकमास्ते । एतादृशः सन्मार्गप्रदर्शकः ऋषिः सकलस्यापि देशस्य गुरुरेव । एतादृशस्य ज्ञानसमुद्रस्य महर्षेः संवत्सरे एकवारमपि अस्मरणं कृतघ्नतासंपादकं स्यादिति कृतज्ञताप्रकाशनार्थं पूर्णिमायामस्यां गुरुत्वेनास्य स्मरणं प्रत्येकं भारतीयस्य मुख्यो धर्मः । पूजादिद्वारा श्रद्धाप्रकाशनं भारतीया परम्परा ।

अपूर्वोऽयं ज्ञाननिधिः भगवता व्यासेन प्रदत्तः संसाराय किन्तु तज्ज्ञानं यद्द्वारास्माभिः प्राप्यते तस्यापि गुरुत्वमस्माभिः स्वीकार्यमेवेति प्रायशः आचार्येषु उपाध्यायेषु च प्रचलितेयं पूजा चिरात् । अत एव गुरुभ्यो मन्त्र-ग्रहणार्थमपि दिनमेतत् प्रशस्तं मन्यते शिष्यैः ।

किन्तु भारतस्य वर्तमानकालिकी परिस्थितिः वर्तते विलक्षणा । सहस्रवर्षाणि दासतायां स्थित्वा तेन स्वाभिमानः सर्वथा परित्यक्त एव । प्राप्तायामपि स्वतन्त्रतायां नाद्यापि मानसमस्माकं स्वतन्त्रम् । अत एव भारतीयसंस्कृतेरात्मा येषां महर्षीणां ग्रन्थैः स्पष्टं प्रकाश्यते तेषां महात्मनां पूजनं तु दूरापास्तं स्मरणमपि हन्त ! न क्रियते शिक्षितंमन्यैः भारतीयैः । "स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" इति गीतोपनिषत् स्पष्टमुद्घोषयति यत् गृहकोणे कस्यापि चित्रं संरक्ष्य श्रद्धाप्रकाशं मन्ये न पूजा, अपितु तदुपदेशपालनं वास्तविकी पूजा । समस्तोऽयं देशः अखण्डः । भौगोलिक भिन्नतायामपि एकात्मता जागर्ति अत्र । महर्षेः व्यासस्य वाणी सर्वत्र तामेव प्रकटयति । अतो यदि वयं राष्ट्रस्य पुनः समुत्थानमभिलषेम, भारतीयसंस्कृतेरात्मन साक्षात्कारयित्र्याः महर्षेर्व्यासस्य रचनायाः गभीरतम मध्ययनं कर्तव्यमेव स्यादस्माभिः । एतद् गभीरमध्यय भारतीयज्ञानस्य मूलभूतायाः संस्कृतभाषाया अध्ययनम रा न भवितुमर्हति । अतः अस्याः गीर्वाणवाण्याः प्रचार द्वारा वयं तस्य महर्षेः पूजां कुर्यामेत्यस्मा कर्तव्यम । तस्मात् सर्वेपि भारतीयाः, विशेषत भारतीपाठकाः, सादरं निवेद्यन्ते यत् 'व्यासपूजा' अस्मि पावने पर्वणि भारतजीवानुभूतायाः संस्कृतभाषाय प्रचारं कुर्वद्भिः संपादनीया । नाद्यप्रभृति अमरव णीयं 'मृतभाषा' शब्देन शक्येत केनाप्युच्चारयितु मिति बद्धपरिकरैः संकल्पः कर्तव्यः चेष्टितव्यं च त वेति ।

संस्कृतभाषायाः प्रसारकार्यं निर्विवादं स्व तन्त्रभारतस्य कृते हितावहम् । तद्विना देशस्य वास्त विकं स्वरूपं न ज्ञातुं शक्येत । किन्तु महदेतत् का कथमेकदिनस्य प्रचारेण शक्येत साधयितुम् ? सत्यम् किञ्चिद् विचारेण स्पष्टमेतज्ज्ञायेत यत् आत्मशक्त पौरुषसंपादनेन सर्वं सिद्ध्येत् । निराशायाः ना काशः वर्तते । परिस्थितिः सर्वथानुकूलास्ति । यस्य भाषायाः मन्त्रान् समुच्चार्य २० कोटि-जनानां धार्मि विधिः संपद्यते, यस्याः साधारणं ज्ञानं ५० लक्षमित जनास्त्ववश्यं रक्षन्ति, यस्यां भाषायां ग्रन्थनिर्माता आसन्नविंशसहस्राः विद्वांसो भारतेऽवश्यं वि मानाः सन्ति सा भाषा कथं भवितुमर्हति मृतभाषा अतः भारतीयसंस्कृतभक्तेभ्यः पुनरपि सादरमिदं निवे



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यत् ते व्यासपूजादिने जागर्तिमस्या अवश्यं संपादयेयुः।

कस्यापि वस्तुनो वास्तविकः प्रचारः आचरणेनैव भवति। "यस्तु क्रियावान् पुरुषः स विद्वान्"। अतः तद्दिने निम्नः कार्यक्रमः रचितव्यः—

१–यो हि संस्कृतं वक्तुं शक्नोति तेन तु तस्मिन् दिने संस्कृतज्ञैः सह संस्कृतेनैव वक्तव्यम्।

२–ये संस्कृतं वक्तुं न प्रभवन्ति किन्तु बुध्यन्ति ते सरलसरलैः संस्कृतशब्दैः युक्तां भाषां वदेयुः। प्रयत्नेन भाषान्तरभाषणं परित्यजेयुः। यदि संस्कृतस्य वक्तारः श्रोतारो वा न मिलेयुः तदा संस्कृतभाषाबद्धस्य कस्यचित् ग्रन्थस्य उच्चैः पाठ एव कर्तव्यः।

३–ये पूर्णतया संस्कृतं न जानन्ति तेषामिदं कर्तव्यं यत् ते स्वकीयसंस्कृतज्ञानवृद्ध्यर्थं संस्कृतप्रचारार्थं प्रकाश्यमानानां मासिक-साप्ताहिकादीनां पत्राणां ग्राहकत्वमङ्गीकृत्य स्वमित्रेष्वपि प्रचारोऽस्य कर्तव्यः।

४–ये सर्वथा संस्कृताद् दूरे किन्तु तस्य प्रेम तेषां मनसि वर्तते, तज्ज्ञानवर्द्धनार्थं प्रतिज्ञा तैः कर्तव्या यद् वयं वर्षाभ्यन्तर एव संस्कृतज्ञा भविष्यामः, तदर्थं प्रयत्नश्च तैः प्रारब्धव्यः।

५ ये लौकिककार्येषु समासक्ताः एतदपि न कर्तुं प्रभवन्ति तैः संस्कृतप्रोत्साहनार्थं द्रव्यं वितीर्य स्वकीया संस्कृतभक्तिः प्रकाशनीया।

एवं परिस्थित्यनुकूलं येन यत् कर्तुं शक्यते तदवश्यं विधाय व्यासपूजामहोत्सवः सफलयितव्यः।

६–अपि च आङ्गलविद्यालयेषु संस्कृतपाठशालासु च अभिनयादिकस्य कार्यक्रमो रचितव्यः। संस्कृतकविसम्मेलनं विधेयं यत्र यावच्छक्यं नवीनानि तदभावे च प्राचीनकवीनामपि सुन्दराणि पद्यानि श्रावयितव्यानि। श्लोकानाम् अन्त्याक्षरी कर्तव्या, वनविहारप्रसङ्गे सर्वं कार्यं संस्कृतेनैव प्रचलेदिति प्रयतनीयम्।

७–अपि च सर्वत्र नगरेषु ग्रामेषु संस्कृतज्ञाः संभूय परिषदः स्थापयेयुः यत्र यावच्छक्यं प्रतिदिनं सप्ताहे दिनमेकं वा सर्वैः समुपस्थाय संस्कृतप्रसाराय विचारविनिमयः कर्तव्यः वृत्तपत्रेषु प्रकाशनीयश्च।

फलतः अस्माकं मनसि संस्कृतभाषायाः कृते योऽभिमानः यच्च प्रेम वर्तते तस्य क्रियारूपे विपरिणामः कर्तव्यः। 'ज्ञानं भारः क्रियां विना' न विस्मर्तव्येयमभियुक्तोक्तिः। यदि समये प्रयत्नमकृत्वा केवलमनुशोचनेनैव कालो याप्येत न तद्दिनमतिदूरे यत्र-भारतीया संस्कृतिः, भारतीयं दार्शनिकं ज्ञानं, यत्कृते च विज्ञानमय्यामप्यस्यां विंश्यां शताब्द्यां सगर्वं वयं मस्तकमुन्नयामो यत् भारतमेव सर्वस्य जगतो गुरुः, शान्तिशिक्षा चेत् गृहीतव्या शरणं व्रजन्तु भारतस्य, कर्णे कुर्वन्तु उपनिषदः, प्राचीनादर्शम् अवलोकयन्तु भारतीयब्राह्मणानां राज्ञां चेति-सर्वमेतत् खपुष्पायितं स्यात्। यदर्थम् उग्रं तपस्तप्त्वा, भिक्षापात्रमपि हस्ते गृहीत्वा, सर्वेभ्यः सुखेभ्यः लत्ताप्रहारं कृत्वा, शिलोञ्छवृत्त्या जीवनमपि सुखाय मत्वा, भवत्पूर्वजैः रक्षितोयं सारस्वतः कोषः भवद्भिश्च तस्यैव पथोऽनुसरणं कृत्वा स्थापितः पुनरादर्शः, सर्वः स एकपदे एव लयं व्रजेत्। किं तदभीष्टम्? नो चेत् आलस्याय दत्वाञ्जलिं सर्वैरेकीभूय गुरुपूर्णिमायामस्यामेतादृशः प्रयत्नः प्रारब्धव्यो येन भारतीयाः शुकसारिका अपि संस्कृतज्ञा भवेयुः किं पुनर्मानवाः। वास्तविकी व्यासपूजा तदैव सिद्ध्येत्। "उत्तिष्ठत, जागृत, प्राप्य वरान् निबोधत" इति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भारती-व्यवस्थापकस्य उत्तरप्रदेशयात्रा

श्रीगिरिराजशास्त्री, जयपुरम्

[ श्रीगिरिराजशास्त्रिमहोदयः गतप्रथमवैशाखमासे भारतीपत्रस्य प्रचारार्थं १३ अप्रेलतः १० मई पर्यन्तम् उत्तरप्रदेशस्य प्रमुखनगराणां यात्राम् अकरोत्। फलतः तद्देशीयसंस्कृतज्ञानां संस्कृतानुरागिणां च साहाय्येन शतं वार्षिक-ग्राहकाः अवर्द्धन्त रूप्यकाणां शतद्वयं च विशेषसाहाय्यं प्राप्तम्। बहवो धनिकाः भविष्यति साहाय्यार्थम् आश्वासयन्। अस्यैव विस्तृतं विवरणं लेखेऽस्मिन्नवलोकनीयम् ] सम्पादकः

## आगरा-नगरम्

जयपुरात् प्रचलितोऽहम् आगरानगरे दिनद्वयं निवासम् अकरवम्। अत्र वैद्यराज-श्रीमनोमोहनमहाभागः संस्कृतज्ञानां नामनिर्देशं कारयित्वा स्वयं च भारतीपत्रस्य सोत्साहं ग्राहको भूत्वा माम् अत्यधिकम् उदसाहयत्। अनेके वैद्याः संस्कृतज्ञाश्च तत्र ग्राहका अभवन्। श्रीयुत-वैद्यराजः भविष्ये 'भारती'पत्रस्य संरक्षकत्व-स्वीकरणस्य आश्वासनमपि अदात्।

## कानपुरम्

ततः १६, १७ दिनाङ्के अहं कर्णपुरनगरे प्राप्त तत्रस्थ-सुप्रसिद्धनेतुः बैरिष्टर-श्रीनरेन्द्रजीतसिंहमहाभागस्य च निवासस्थाने अतिष्ठम्। तेन महाभागेन तत्रस्थ-संस्कृतज्ञानां सूचिकां निर्माय स्थानीयो विद्वान् सनातनधर्मकालेजस्य प्राध्यापकः श्रीबृहस्पतिमहाभागः सहयोगार्थं प्रेरितः। प.श्रीचन्द्रशेखरशास्त्रिणापि 'भारती' प्रचारार्थम्, आगामिनि वर्षे ग्राहकनिर्माणार्थं च आश्वासनं प्रदत्तम्।

## प्रयागः

१८, १९, २ तारिकासु न्यवसम् अहं प्रयागनगरे। तत्र श्रीरामनाथ 'सुमन', श्रीआचार्यकृष्ण, श्री.जगन्नाथप्रसादशुक्लेत्यादिविदुषां समीपे अगमम्। ते सर्वे यथाशक्यं साहाय्यं प्रादुः।

## रीवां

२० तारिकायाम् अत्र सूचनाविभागाध्यक्षेण श्रीविद्यानिवासशास्त्रिणा समस्तविन्ध्यप्रदेशे विन्ध्यसंस्कृतपरिषदः सदस्यानां च 'भारती'मासिकस्य ग्राहकत्वनिर्माणार्थम् आश्वासितः। सूचनाविभागस्थ-श्रीराजीवलोचनाग्निहोत्रिमहाभागेनापि अस्य मासिकस्य प्रचारार्थं पर्याप्तं प्रोत्साहनं प्रदत्तम्। विन्ध्यप्रदेशस्य विधानसभाध्यक्षेण श्रीशिवानन्दमहाभागेनापि भविष्ये 'भारती'पत्रस्य आजीवनसदस्यतार्थं वचनं दत्तम्। उपराज्यपाल-श्रीसंथानम्-महाभागाः अत्यधिकसंस्कृतानुरागिणः। तेषां व्यक्तिगतसचिवेनापि आश्वासितोऽहं यत् मा०श्रीमद्-उपराज्यपालमहाभागा अवश्यम् अस्य मासिकस्य संरक्षकत्वं स्वीकरिष्यन्ति। नगरे प्रचारं कृतवान् श्रीगुलाबचन्द्रः-अग्रवालमहाभागः।

## वाराणसी

२२, २३, २४, २५ तारिकासु काशीनगरे तिष्ठन्नहं संरक्षणार्थं काशीनरेशम्, रामकृष्णडालमिया-महाभागं श्रीबलदेवदासबिडलामहोदयं च प्रार्थयम्। काशीनरेशस्य गुरुवर्येण पूज्यश्रीपुरुषोत्तमशर्मचातुर्वैद्यमहाभागेन भविष्ये धनसाहाय्यार्थम् आश्वासनं प्रदत्तम्। नरेशोऽपि 'भारती'सम्बन्धिनीं वार्ताम् अशृणोत्। डालमियामहाभागेनापि आश्वासनं दत्तम्। तत्र श्रीदुर्गादत्तवैद्यैः, श्रीप्रकाशचन्द्रगौडमहोदयैः तथा श्रीहनुमत्प्रसादपोद्दारमहाशयैश्च सक्रियः सहयोगं दत्तः, भविष्येऽपि दानार्थं स्वनिश्चयः प्रकटितस्तैः।

अत्र राज०संस्कृतमहाविद्यालये (क्विंस कालेजे) २५ तारिकायाम् आसीत् पण्डितगोष्ठी; या तत्र भवति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रतिपन्नम्। तत्र सुप्रसिद्धो विद्वान् प्राध्यापकः श्रीमदनन्त-शास्त्रि-फडकेमहाभागः 'आचारः परिवर्तनशीलो न धर्मः' इति विषयमवलम्ब्य भाषमाण आसीत् यदाहमगमं तत्र। श्रीमद्भिरध्यक्षमहोदयैः श्रीबदरीप्रसादशास्त्रिमहाभागैः मह्यमपि किञ्चित् समयः 'भारती'मासिकस्य परिचयार्थम् अदायि। मम निवेदनं श्रुत्वा, भारतीमासिकस्य नैरन्तर्येण प्रकाशनम्, अस्य स्वल्पं मूल्यं, सामयिकान्, सरलान्, रोचकान् लेखांश्च दृष्ट्वा, सर्वैः स्वयम् इदमाश्वासितम् यत् ते सर्वेऽपि विद्वांसः अस्य पत्रस्य ग्राहका भविष्यन्ति तथा अन्यानपि देववाणीप्रसारार्थं ग्राहकत्वाय प्रेरयिष्यन्ति। श्रीबालकृष्णपंचोली-महाभागेन तथा श्रीवटुकनाथशास्त्रिणा 'अयं प्रयत्नः स्तुत्यः' इति निर्दिश्य लेखादीनामपि सहयोगार्थम् आश्वसितोऽहम्

आदरणीय-गुरुवर-म०म०श्रीगिरिधरशर्म-चतुर्वेदमहाभागैरपि अत्रत्यसंस्कृतज्ञानां नामनिर्देशं कृत्वा अस्य पत्रस्य प्रकर्षार्थम् उत्साहवर्धकः शुभाशीर्वादः प्रदत्तः।

## ज्ञानपुरम्, जौनपुर

काशीमण्डलान्तर्गतम् एकं ज्ञानपुरस्थानं वर्तते। अत्र एकः उत्तरभारतस्य दानशूरः श्रीप्रेमबहादुरसिंह-बघेलमहाभागः, प्रान्तेऽस्मिन् सर्वत्र सुप्रसिद्धः, निवसति। तेन अहं २७ तारिकायां श्रीरामदेवअम्बष्ठ-वाकीलेन सह भदोईग्रामं गत्वा सममिलम्। तेन महाभागेनाऽपि भविष्ये पर्याप्तम् आर्थिकसहायता उररीकृता। जौनपुरेऽपि ग्राहकाः संजाताः। तत्र प्रसिद्धसमाजसेविनः जौनपुरनरेशस्य दर्शनं न समप्राप्तं किन्तु तत्रस्थविद्वद्भिः समाश्वासितोहं यत् ते अवश्यम् अस्य मासिकस्य संरक्षकत्वं स्वीकरिष्यन्ति।

## अयोध्या

२८ तारिकायां श्रीरामचन्द्रस्य जन्मभूमिं प्राप्य अहं 'संस्कृतम्'पत्रस्य सम्पादकेन सुप्रसिद्धविदुषा श्रीकालीचरणमहाभागेन 'संस्कृत-साकेत'पत्रस्य सम्पादकेन श्रीब्रह्मदेवशास्त्रिणा च सह संभाषणं कृत्वा अत्यधिकं प्रोत्साहितः प्रसन्नश्चाभवम्। तेभ्यः प्राप्तः सहयोगो निर्देशश्च। श्रीसहदेवझामहोदयः प्रचारार्थम, श्रीमधुसूदनाचार्यमहाभागश्च भविष्ये संरक्षणार्थम् अकथयताम्। अत्र श्रीत्यागानन्दमहाभागैः एकं निःशुल्कं गुरुकुलं संचालितं वर्तते। अत्रत्ये संस्कृतकुटीरे सर्वे स्नातकाः सर्वदा संस्कृतमेव भाषन्ते। प्राप्तातिथ्योऽहम् अत्र दिनार्धमुषित्वा गुरुकुलस्य समस्तां सुव्यवस्थाम् अपश्यम्। एषा संस्था ब्रह्मचारिणां कृते अतीव हितकारिणी अस्ति।

## लखनऊ

अत्र २६, ३० तारिकासु न्यवसम्। उत्तरप्रदेशस्य समस्तविद्यालयेषु 'भारती' मासिकस्य स्वीकाराय मा० राज्यपाल-श्री क० म० मुंशीमहोदयेन तथा श्रीशिक्षा-मन्त्रिणा मा०श्रीहरगोविन्दसिंहेन सह मिलित्वा न्यवेदयम्। ताभ्यां निकटभविष्ये सहयोगार्थम् आश्वासितः। मा०श्रीमुंशीमहाभागेन तु वार्तालापानन्तरं पञ्चविंशतिरूप्यकाणि साहाय्यार्थमपि दत्तानि। अस्य पत्रस्योन्नत्यर्थं मङ्गलकामनाऽपि प्रकटीकृता। अत्र वैद्यवरश्रीलक्ष्मीकान्तमहाभागस्य निर्देशेन केचित् ग्राहका अपि संजाताः। लखनऊविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः श्रीमद्-अय्यरमहाशयोऽपि ग्राहको भूत्वा भविष्ये सहयोगदानार्थम् अवोचत।

## बरेली

१, २, ३ मई दिनाङ्केषु बरेलीनगरे अहं तत्रस्थ-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


वाक्कीलश्रीरामप्रकाशगोयलमहाभागस्य गृहे न्यवसम्। स दिनत्रयम् अहर्निशं मया सह भ्रमन् अनेकान् संस्कृतज्ञान् 'भारती' पत्रस्य ग्राहकान् अकरोत्। बरेलीकालेजस्य संस्कृतविभागाध्यक्षः सुप्रसिद्धो विद्वान् विनयस्यावतारः श्रीभोलानाथशास्त्रिमहाभागः सर्वप्रथमं ग्राहको भूत्वा मया सह द्विदिनपर्यन्तम् अटन् , सार्धशतरूप्यकाणि साहाय्यार्थम् अकारयत्। ऐश्च भविष्ये संरक्षणार्थम् आश्वासितोऽहं तेषां नामानि निम्नाङ्कितानि वर्तन्ते—

कविराजश्रीजयदेवविद्यावाचस्पतिः, श्रीलालाराधेश्यामवैद्यः, श्रीजयराममहाभागः श्रीविष्णुविद्यालयमन्त्री, बरेली।

अत्र श्रीयोगेन्द्रगोयलमहाशयः तत्क्षणमेव १०१) रूप्यकाणि दत्वा अस्य मासिकस्य आजीवनसदस्यतां स्वीकृतवान्। एष महाभागः अत्रत्यप्रसिद्धव्यापारिणः श्रीहृदयनारायणगोयलमहाभागस्य सुपुत्रः, सुशिक्षितः धर्माचरणशीलश्च वर्तते। वंश-(बांस) व्यापारक्षेत्रे अस्य महाभागस्यास्ति अतिख्यातिः। 'भारती' परिवारोऽस्य आजीवनसदस्यतास्वीकरणे कृतज्ञतां प्रकटयन् महाशयमिमं शुभाशीर्भिः युनक्ति।

## सहारनपुरम्

४, ५ मई-दिनाङ्केषु न्यवसम्। अत्र प्रसिद्धपुस्तकविक्रेत्रा श्रीमदनलालमहाभागेन सह बहूनां संस्कृतज्ञानां समीपमगमम्। तेषु श्रीसनातनधर्मसंस्कृतविद्यालयस्य अध्यक्षः स्वयं ग्राहको भूत्वा आश्वासयन्मां यत् स भविष्ये तत्रस्थश्रेष्ठिनं श्रीसेवकरामखेमकामहाभागं मासिकस्यास्य संरक्षणस्वीकरणे प्रेरयिष्यति बिजोरिया-इण्टर-कालेजोपाध्यक्षः श्रीचन्द्रभानुशर्मा 'अकिञ्चन'महाभागोऽपि समाश्वासयत्-यत् स बिजोरियामहाभागं पत्रस्यास्य संरक्षणार्थं प्रेरयिष्यतीति। श्रीलालाहरिचन्दमहाभागोऽपि मां भविष्ये साहाय्यार्थम् आश्वासयत्।

## हरिद्वारम्

५, ६, दिनाङ्के स्थितोऽहं श्रीगङ्गाप्रसादमहाभागेन सह कनखल-क्षेत्रे संस्कृतज्ञैः वैद्यैश्च सह अमिलम्। अत्र केचित् ग्राहका अभूवन् केचिच्च वैद्याः स्वौषधीनां विज्ञापनमपि अस्मिन् पत्रे प्रकाशनार्थं दत्तवन्तः। अत्रत्यः श्रीशिवशंकरशर्ममहाभागः (हिमालय-डिपो) भविष्ये ( सितम्बरमासे ) संरक्षणत्वाय वचनबद्धोऽभूत्। एषोऽस्ति महाभागः परमशिवभक्तः। अत्र ऋषिकुले श्रीरामानन्दव्याकरणाचार्येण तथा गुरुकुले श्रीशंकरदेवविद्यालंकारेण 'भारती'-प्रचारायाश्वासनं दत्तम्।

## ऋषीकेशः

७ दिनाङ्के अत्र रायबहादुरश्रीश्रीदत्तमहाभागेभ्यः संरक्षकत्वस्याश्वासनं प्राप्तं तथा श्रीपंजाबसिन्धक्षेत्रस्य मन्त्रिमहोदयेनापि साहाय्यार्थम् आश्वासितोऽहम्। अत्र कैलासाश्रमे, दर्शनमहाविद्यालये तथा पुष्करमन्दिरे अनेकविद्वज्जनानां दर्शनलाभोऽभूत्। ग्राहका अपि अत्र बहवः संजाताः।

## देहरादून

८ दिनाङ्के अस्मिन् नगरे अटन्नहं वैद्यश्रीठाकुरदत्तशर्ममहाभागानां वैद्यश्रीमदमरनाथमहाभागानां तथा महन्तश्रीमदिन्द्रेशदासमहाभागानां दर्शनेन अत्युत्साहितोऽभूवम्। श्रीमहन्तमहाभागाः 'भारती' पत्रस्य संरक्षणार्थं प्रतिज्ञातवन्तः। वैद्यश्रीठाकुरदत्तमहाशयेनापि भविष्ये साहाय्यार्थं तथा प्रकाशनाय विज्ञापनप्रेषणार्थापि कथितम्। अत्र कन्यागुरुकुलस्य वार्षिकोत्सवे बुद्धदेवविद्यालंकारस्य अध्यक्षत्वे संस्कृतसम्मेलनमभूत्। ब्रह्मचारिण्याः प्रेमलतायाः तथा उषालतायाः क्रमशः 'संस्कृतभाषैव राष्ट्रभाषा भवितुमर्हति' 'अशान्तिव्याकुले विश्वस्मिन् कथं शान्तिः स्यात्' इति विषयोपरि अतिसमीचीने भाषणे संजाते।

देहरादूनतः देहल्यलवरनगरयोः किञ्चित् कालं स्थित्वा दश-मईदिने जयपुरनगरं प्रत्यावर्तितोहम्। एवमियमुत्तरप्रदेशयात्रा सानन्दं सम्पन्ना।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## संस्कृत-समाचाराः—

**जयपुरस्थ-श्रीसंस्कृत-वाग्विवर्द्धन्याः परिषदो ार्षिकाधिवेशनम्**—१-२ मई १९५८ ईशवीये उपर्युक्त-रिषदः षष्ठवार्षिकाधिवेशनं राजस्थान-शिक्षा-भागाध्यक्षाणां डा०श्रीमथुरालालशर्म-एम्. ए. डी. ट् महोदयानामाध्यक्ष्ये ससमारोहं समपद्यत। सर्वोपि द्योपान्तः कार्यक्रमः संस्कृतभाषायामेव निर्व्यूढः। बहूनां देशमान्यानां शुभसन्देशाः समागताः। ोरञ्जनकार्यक्रमेषु भास-कवेः 'दूतवाक्य'स्याभि-;, 'चतुर्वेदिचषका'भिधं प्रहसनं, 'हीरक-णाङ्गारकयोः संवादश्च, हृदयाकर्षकाण्यतिष्ठन्।

**खिलभारतवर्षीयसंस्कृतसाहित्यसम्मेलनम्**—ीयवैशाखशुक्ल ९-१० तिथ्योः ऋषीकेशक्षेत्रे र्युक्तसम्मेलनस्य विशाधिवेशनं कानपुरस्य श्रीमतो ोविन्दमिश्रमहोदयस्य साभापत्ये सम्पन्नम्। आसन् त्रषष्टिप्रतिनिधयः सर्वेभ्यः प्रान्तेभ्यः समुपस्थिताः। कृतस्य प्रचारार्थमेका शलाका-परीक्षापि संमेलनेन नः प्रारब्धा; यत्र सर्वतः पूर्वं व्याकरण-शलाका-ीक्षायां प्राथम्यं प्राप्तवते रूप्यकाणां सहस्रं प्रदास्यते ोषितम्। शीघ्रमेव तस्याः नियमादिकं प्रकाशंमे-ते। अग्रे सम्मेलनकार्यालयः दिल्यां स्थास्यति।

**संस्कृति-सम्मेलनम्**—श्रीपुरुषोत्तमदासटण्डन-दयसंचालितस्य सम्मेलनस्यास्याधिवेशनमपि गत-२४-२५ तारिकयोः ऋषीकेश एव समभूत। आसी-सभापतिः श्री—राधाकुमुदमुकर्जीमहोदयः। ीया संस्कृतिश्च संस्कृतज्ञानमन्तरा न कथमपि पदा भविष्यतीति टण्डनमहोदयोऽनेकवारमुवाच। ता, देशभाषारक्षा, स्वदेशवेषभूषाया श्च रक्षा त्र-भारतेन अवश्यं कर्तव्येति स्तुत्यः प्रयत्नोऽस्य।

## नि० भा० आयुर्वेदशास्त्रचर्चा-परिषद्, हरिद्वारम्—

निखिल-भारतीयायुर्वेदमहासम्मेलनस्य तत्त्वावधाने, श्रीवैद्यनाथायुर्वेदभवनद्वारा संयोजिताया आयुर्वेदशास्त्र-चर्चा-परिषदो द्वितीयाधिवेशनं हरिद्वारस्थर्षिकुला-युर्वेदविद्यालयभवने मुम्बईस्थ-विद्वद्वराचार्यप्रवरस्य यादवजीमहोदयस्य सभापतित्वे २० मई १९५८तः २७ मई ५८ पर्यन्तं प्रचलितम्।

परिषद्यस्याम् उपषष्टि विद्वांसो विख्याता वैद्याः समुपस्थिताः आसन्। उद्घाटनमस्याः श्रीपुरुषोत्तम-दासटण्डनमहोदयेन विहितम्। तेनोक्तम्—अतीव-खेदास्पदमेतत् यत् राष्ट्रियशासनस्यापि दृष्टिरायुर्वेदे न सुखावहा। तत् स्थानमायुर्वेदेन नैव लब्धं यद्धि लब्धव्यमनेन। इदं हि पाश्चात्यप्रेम न देशहितकरं "सर्वकारस्य" इत्यादि।

अष्टदिनव्याप्यधिवेशने परिषदा आयुर्वेद-सिद्धान्तेषु विचारविनिमयः कृतः। तत्रौषधीनां द्रव्य-गुण-रस-वीर्य-विपाक-प्रभावेषु न केवलमायुर्वेद-दृष्ट्यैवापितु पाश्चात्यादिपद्धत्यापि तुलनात्मका-ध्ययनेन सुसूक्ष्ममालोचितम्। एतत्कृते अनुसन्धान-शालानामपि आवश्यकता प्रदर्शिता। हर्षास्पदमेतद् यदस्य कृते श्रीवैद्यनाथायुर्वेदभवनाध्यक्षेण प्रतिज्ञातं, शीघ्रमेव शोध-शालैका संस्थाप्येत, यत्र पञ्चाशत्सहस्राणि रूप्यकाणि एकाकी स एव व्ययं करिष्यति। अनुकरणीयमेतदन्येषां धनिकवैद्यानाम्।

## काष्ठमण्डपे नारी-विद्यापीठस्य पारितोषिकवितरणम्—

गतवैशाखमासे कालिकास्थाने नारीविद्यापीठस्य छात्राभ्यः पारितोषिकवितरणाय महान् समारोहः संजात आसीत्। शिक्षाविभागस्य प्रायशः सर्वेऽपि प्रमुखा अधिकारिणः आसन् समुपस्थिताः। नारीणां कृते संस्कृतशिक्षातीवोपयोगिनी यतो हि सा राष्ट्रिय-भावनां वितरतीति पं०श्रीहरिहरशास्त्रिप्रभृतिभिः सम्यक् साधितम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


## देशदर्शनम्

**चलचित्रापेक्षयातिवैशिष्ट्यमभिनेयानाम्—**

प्रसिद्धः चलचित्राभिनेता ( सिनेमा-स्टार ) बाबूरावः पेंढरकरः स्वमतं प्रकाशयतिस्म एकस्यां परिषदि यत्—यद्यपि यान्त्रिकैः कृत्रिमसाधनैः चलचित्रेषु बाह्यं वैशिष्ट्यं भासते दर्शकानां किन्तु वास्तविकानन्दः नाटकाभिनय एवेति स्वानुभवेन वच्मि निःसन्देहम् । मया यादृश आनन्दः नाटकाभिनये लब्धो न तथा कदापि चलचित्रेषु । अतोऽहं शीघ्रमेव चलचित्रशालाभ्यो बहिरागत्य नाटकाभिनये प्रवृत्तो भविष्यामि ।

**श्रीगौरीशंकर-शिखरयात्रा—**

समस्तसंसारे-सर्वोच्चपर्वतो हिमालय एवेति जानन्ति जनाः । तस्यैव सर्वोच्चं सर्वथा हिमाच्छन्नं सार्द्धपञ्चार्द्धक्रोशोन्नतं गौरीशंकरशिखरमारोढुम् अनेकधा यूरोपीयैः प्रयत्नः कृतः किन्तु वर्षेऽस्मिन् भारतीयो वीरः श्रीतेनसिंहः कार्येऽस्मिन् साफल्यमाप्तवान् । तेन सह श्रीहिलोरीमहोदयोऽप्यासीत्

**श्रीश्यामाप्रसादमुखर्जीमहोदयस्य स्वः प्रयाणम्**—जनसङ्घस्य प्रधाननेतायं मुकर्जी काश्मीरकाण्डे कारायातनां सहमानः २३ जून १९५३ दिवसे परलोकातिथिः समभवत् । अयं हि श्रीनगरे कारायां पातित आसीत् काश्मीर-सर्वकारेण । तत्र रुग्ण समभवत् । सहसा हृद्गतेरवरोधनेन पञ्चत्वं प्राप । सम्यक् चिकित्साया अभावेनैवायं परलोकं प्रापेति जनश्रुतिः । आसीदयं भारतसंसदोऽङ्गुल्या निर्देश्यः सदस्यो , विशिष्टो वक्ता, आर्यसंस्कृतेश्च पक्षपाती । अस्य मरणेन पर्याप्ता क्षतिर्देशस्य संजातेति ।

## विदेशवार्ता

**श्रीमत्या एलिजाबेथ-राज्ञ्याः राज्याभिषेकसमारोहः—**

गत २ जून-दिवसे इङ्गलेंण्डराज्यस्य अधिकार-प्राप्तमहाराज्ञ्याः श्रीजार्जषष्ठस्य ज्येष्ठपुत्र्याः राज्याभिषेकस्तत्र ससमारोहं समपद्यत । देशेभ्यो विदेशेभ्यश्च विशिष्टविशिष्टाः अनेके महापुरुषाः समारोहेऽस्मिन् सम्मिलिताः । भारतादपि प्रधानमन्त्री श्रीजवाहरलालनेहरूः राजस्थान-राजप्रमुख-श्रीमान-सिंहवर्मप्रभृतयः समारोहेऽस्मिन् संमिलिता आसन् । धर्मपुस्तके हस्तं संस्थाप्य देशरक्षायाः शपथं गृहीतं तया । ततश्च परम्पराप्राप्तं राजसिंहासनमधिरूढा । न विस्मर्तव्यम्-प्रजातन्त्रेऽप्यस्मिन् देशे राज्ञः सत्तावधि यथावत् प्रचलन्ती आस्ते ।


**अष्टवर्गयुक्तः शुद्धः च्यवनप्राशः**

सर्वविधवीर्यविकार-धातुक्षीणता-स्वप्नदोष-शीघ्रपतन-नपुंसकता-कास-जीर्णज्वर -राजयक्ष्म-हृद्रोग-यकृतादि-व्याधिषु रामबाण इव अमोघमस्त्रम् । सर्वोत्तमत्वस्य उत्तरदायित्वमस्मासु । मूल्यम् अर्द्धसेटकस्य ४) रूप्यकाणि । सेटकस्यैकस्य च ७) रु० ।

**शुद्धसत्व-शिलाजतु ( सूर्यतापि )**

विशिष्टम् अकृत्रिमं न भवेच्चेत् द्विगुणं मूल्यं परावर्तिष्यते । मूल्यम् तोलकपञ्चकस्य ५) रूप्यकाणि ।

**स्वादिष्ट-वनौषधि-चूर्णम्**

अजीर्णतायां तथान्यान्योदरविकारेषु रामबाण इव अमोघमस्त्रम् । मूल्यम् प्रतिसेटकम् १०) रूप्यकाणि ।

प्राप्तिस्थानम्:—

**श्रीवनौषधि-डिपो (रजिस्टर्ड), कनखल**




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# Government of Rajasthan.

*From*

**The Secretary to the Government of Rajasthan, Education Department, Jaipur.**

*No. D. 4999/Edu/53* *Dated, the 10 June, 1953.*

His Highness the Raj Pramukh is pleased to recognise the Sanskrit 'भारती' published by Bharti Bhawan, Gopalji-ka Rasta, Jaipur for the Libraries and Reading Rooms of all School and Colleges and Government Libraries in Rajasthan. "राजस्थानस्य राजप्रमुखमहाभागः सानन्दं 'भारती'मासिकस्य प्रान्तस्थ-समस्त विद्यालय-महाविद्यालय-पुस्तकालय-वाचनालयानां कृते स्वस्वीकृतेराज्ञापत्रं प्रकाशयति ।"

*By order,*
**(sd.) Radha Kishna Vyas**
for Secretary to Government.

**Directorate of Education Government of Saurastra**

*No. L/B/-3176* *Rajkot, Dt. 14 May 1953.*

## CIRCULAR

The Sanskrit Monthly 'Bharti' published by Bharti Bhawan, Gopalji ka Rasta, Jaipur is placed on the approved list of Journals for use in arts and Science Colleges

The annual subescription is Rs. 3/- and enrolmant may Kindly be made directly at The address above. "सौराष्ट्रशिक्षाविभागाध्यक्षः निजराज्यस्य समस्तमहाविद्यालयानां कृते, यत्र साहित्य-विज्ञानविषयाध्ययनं प्रचलति, 'भारती'पत्रं स्वीकृतपत्रसूचिकायां समावेशयति ।"

*By order*
**(sd.) Illigible**
Personal Assistant to Director of Education
Government of Saurastra

**Office of the Director of Public Instruction, Madhya pradesh**

*No. -/51-1 1Dev-v,* *Nagpur, Dated the 20th May 1953.*

The Sanskrit monthly Magazine noted below is Sanctioned for use as prize and library book in High School in Madhya Pradesh. "मध्यप्रदेशजनसूचनाविभागाध्यक्षमहोदयः 'भारती'पत्रं निजप्रान्तेऽपि-समस्तविद्यालयेषु पुस्तकालय-पुस्तकवत् स्वीकरोति ।

| S. No. 1 | Name 2 | Editor 3 | Publisher 4 | Price 5 |
|---|---|---|---|---|
| 1. | Bharti | Shri Vriddhi chandra Sharma | Shri Jaibahadur Singh, Bharti Bhawan, Gopalji ka Rasta, Jaipur. | As. 6/ Per copy |

annual Subscription Rupees Three Only

**Sd.—E. W. Franklin**
Director of Public Instruction
Madhya pradesh



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अकारान्तो नपुंसक-लिङ्गः पुस्तक-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पुस्तकम् | पुस्तके | पुस्तकानि |
| द्वितीया | पुस्तकम् | पुस्तके | पुस्तकानि |
| तृतीया | पुस्तकेन | पुस्तकाभ्याम् | पुस्तकैः |
| चतुर्थी | पुस्तकाय | पुस्तकाभ्याम् | पुस्तकेभ्यः |
| पञ्चमी | पुस्तकात् | पुस्तकाभ्याम् | पुस्तकेभ्यः |
| षष्ठी | पुस्तकस्य | पुस्तकयोः | पुस्तकानाम् |
| सप्तमी | पुस्तके | पुस्तकयोः | पुस्तकेषु |
| सम्बोधनम् | हे पुस्तक | हे पुस्तके | हे पुस्तकानि |

फल, स्थल, पुष्प*, अन्न, धन, पत्र*, पात्र*, औषध, तृण, वन, उद्यान, वस्त्र*, शस्त्र*, शास्त्र*, चित्र*, मित्र*, छत्र*, गर्त, यन्त्र* क्षेत्र* ( खेत ) दुग्ध, सत्य, मस्तक, नेत्र*, नयन, मुख, हृदय उदर*, पृष्ठ, चरण, सुवर्ण, तैल, घृत, व्यजन ( पंखा ) कुल, पठन, गमन, भोजन, मन्दिर*, गृह*, सुख, दुःख, गगन, आकाश, शासन, दिन, वर्ष* इत्यादीनाम् अकारान्तनपुंसकलिङ्गशब्दानां रूपाणि पुस्तकसमानानि एव भवन्ति।

## पठ ( पढ़ना )

### [ भूतकालः ]

| | | |
|---|---|---|
| अपठत् | अपठताम् | अपठन् |
| अपठः | अपठतम् | अपठत |
| अपठम् | अपठाव | अपठाम |

एवमेव व्रज, वद, हस, क्रीड, रक्ष, चल, पत, त्यज, पच, इत्यादिधातूनां रूपाणि ज्ञेयानि।

### उदाहरणार्थं पाठः—

रामचन्द्रः पुस्तकम् अपठत। अहं मन्दिरम् अव्रजम्। मोहनः सत्यम् अवदत्। बालकाः अहसन्। मोहनः प्राङ्गणे अक्रीडत। युवकः स्वकुलम् अरक्षत। कृष्णः मन्दम् अचलत्। सा स्त्री उद्यानात् अपतत्। बालिकाः उद्यानम् अगच्छन्। हरिः कुसङ्गतिम् अत्यजत्। पाचकः भोजनम् अपचत्।

अवधेयम्—नपुंसकशब्दानां केवलं प्रथमाद्वितीययोरेवान्तरं तृतीयादिषु तु पुल्लिंगसमानता।

* इन शब्दों के रूप लेने में 'न' की जगह 'ण' बोलना चाहिए।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## संस्कृतकथा—स्पर्धा

[अखिल-भारतीय-संस्कृत-कथा-प्रतियोगितायाः सञ्चालनस्य उत्तरदायित्वं संस्कृत-भवितव्येन स्वीकृतम् ।]

विदितमेव भवतां यत् गतवर्षात् एका सार्वभौम-कथा-स्पर्धा चलन्ती आस्ते तत्र गतवर्षीयस्पर्धायां संस्कृतभाषाया अन्तर्भावः नासीत् । प्रचलित-वर्षात् आरभ्य अस्यां स्पर्धायां संस्कृतभाषायै अपि स्थानं दातव्यम् इति हिन्दुस्थान-टाईम्स-पत्रस्यप्रबन्ध-सम्पादकेन श्रीदेवदासगान्धी-महाशयेन निश्चितम् । अतएव ते धन्यवादार्हाः। अस्यां स्पर्धायां विश्वस्य अमेरिकाप्रभृतीनि अष्टादश राष्ट्राणि सहभागीनि सन्ति । प्रत्येक-राष्ट्रस्य प्रतिनिधित्वं तद्राष्ट्रगतं प्रमुखं वृत्तपत्रं करोति । भारतस्य प्रतिनिधित्वं 'हिन्दुस्थान-टाईम्स'नामकं वृत्तपत्रं करोति । अखिल-भारतीय-कथासु सर्वश्रेष्ठाभ्यः अष्टकथाभ्यः क्रमशः १५००, १०००, ७५०, ६००, ५००, ४००, ३००, तथा २०० रूप्यकाणां पारितोषिकं हिन्दुस्थान-टाईम्स-पत्रस्य सञ्चालकाः दास्यन्ति । एतासु सर्वोत्तमासु अष्टकथासु चतस्रः कथाः विश्वस्पर्धायां प्रेष्यन्त । विश्वस्पर्धायाम् अग्रगण्यकथालेखकाय ५००० डॉलराणां प्रथम-पारितोषिकं दीयेत ।

संस्कृत-कथास्पर्धायाम् अग्रगण्य-त्रिकथाभ्यः क्रमशः ५००, ४०० तथा ३०० रूप्यकाणां पारितोषिकं हिन्दुस्थान-टाईम्सपत्रस्य सञ्चालकैः दीयेत । अस्यां संस्कृत-स्पर्धायां सहयोगं दातुं सर्वे एव ऊर्जस्वलप्रतिभाशालिनः संस्कृतलेखकाः अहंपूर्विकया अग्रेसराः भविष्यन्तीति आशास्महे । यदि अस्यां विश्वस्पर्धायां संस्कृतकथालेखकः प्राथम्यं प्राप्नुयात् तर्हि एतावत्-कालपर्यन्तं "संस्कृत-भाषा मृते" ति यैः दुर्मतिभिः अनर्गलं प्रलपितं तेषां प्रतिपादनस्य वैयर्थ्यं सुतरां सिद्ध्येत् । न केवलं पारितोषिकलोभेन अपि तु व्यास-वाल्मीकि-प्रभृतिभिः दिव्यप्रतिभाशालिभिः संसेवितायाः अस्याः भारतभूषणैक-भूतायाः अमरभारत्याः सर्वश्रेष्ठत्वम् उद्घोषयितुं संस्कृतलेखकैः इदानीं लघुकथालेखनार्थमवश्यं परिकरो बद्धव्यः ।

## संस्कृत-कथा-लेखकेभ्यः सूचनाः—

(१) संस्कृत-कथा "सम्पादकः, संस्कृतभवितव्यस्य, ...नाद्यम—कार्यालयः, वाकररोडे, नागपुरम्" इत्यत्र स्थाने प्रेषणीया । पत्रवेष्टनस्य उपरि "चित्रकथाप्रतियोगिता" इति लेखितव्यम् (२) ३१-...-१९५३ दिनाङ्कात् प्रागेव कथाः प्रेषणीयाः । (३) कथायां १५०० तः ४००० पर्यन्तं शब्दसंख्या अपेक्ष्यते (४) कथा पूर्वम् अप्रकाशिता तथाऽन्य-लिखित-कल्पनाधिष्ठिता मास्तु । (५) कथा-विषय-सम्बन्धी कोऽपि विशेषनिर्बन्धः नास्ति । (६) सुवाच्य-हस्ताक्षरैः तथा पत्रस्य एकभागे एव लिखिता कथा स्पर्धायां स्वीक्रियेत । (७) परीक्षणार्थ-कथानाम् आवृत्तित्रयम् आवश्यकम् । (८) विश्वप्रतियोगितायां तथा अखिलभारतीयप्रतियोगितायां कथानाम् आंग्लभाषानुवादः प्रमाणत्वेन गृह्येत । अतः यावच्छक्यं संस्कृतकथालेखकाः स्वयमेव कथानुवादं प्रेषयेयुः अन्यथा भवितव्यपत्र-सम्पादकः तदनुवादं कारयिष्यति ।

(९) नियततिथिपर्यन्तं प्राप्तासु संस्कृतकथासु सर्वोत्तम-त्रिकथाभ्यः क्रमशः ५००, ४०० तथा ३०० रूप्यकाणां पारितोषिकं दीयेत । एताः सर्वोत्तमकथाः (अनूदिताः) अखिल-भारतीय-स्पर्धार्थं "हिन्दुस्थान-टाइम्स"पत्रस्य कार्यालयं प्रति प्रेषयिष्यामः । तत्र या कथा अग्रगण्यासु अष्ट-कथासु स्थानं लभेत तस्यै हिन्दुस्थानटाइम्स-पत्रसंचालकाः अपरं पारितोषिकं समर्पयिष्यन्ति । तासु अष्टकथासु अग्रगण्याः चतस्रः कथाः "हिन्दुस्थान-टाइम्स" चालकाः विश्वस्पर्धार्थं प्रेषयिष्यन्ति ।

कथानां परीक्षणार्थं संस्कृतसाहित्य-विशेषज्ञानां समितिः नियुक्ता भवेत् । परीक्षकाणां सविधे प्रेष्यमाणासु कथासु लेखकस्य नाम-धामादि-संकेतः मास्तु, अतः प्रत्येकलेखकेन कथायाः आवृत्तित्रये एका आवृत्तिः नामधामादिनिर्देश-रहिता प्रेषणीया । —संपादकः

---

प्रकाशक-जयबहादुरसिंह । मुद्रक-श्री बालचन्द्र इ० प्रेस । पता-भारती भवन, गोपालजी का रास्ता, जयपुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

...ादकः-
...शर्मा शास्त्री
...र्मशास्त्राचार्यः
...-महाविद्यालयः

भारत...
वार्षिकं मूल...
एकस्या...
आग...

# भारती

— संस्कृत... प्र... मासिकं पत्रम् —

श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।

अष्टादश-पुराणानां कर्ता, महाभारतस्य
रचयिता, वेदान्तसूत्राणाञ्चाविष्कर्ता
सत्यवतीसुतो भगवान्
श्री-कृष्णद्वैपायनो
वेदव्यासः।

सम्वत् २०१० | वर्षः ३ | नवमोऽङ्कः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कृतकथा—स्पर्धा

संस्कृत-कथा-लेखकेभ्यः सूच

—संस्कृत-कथा-प्रतियोगितायाः सञ्चा-

संस्कृत-कथा "सम्पादकः, संस्

—कार्यालयः

लेख-नाम पृष्ठसंख्या


१—सरस्वति शारदे ( कविता ) गारद्वज. १६५
२—प्राचीना अर्वाचीना च शिक्षाप्रणाली,
( प्राचीना शिक्षाप्रणाली ) श्रीगिरिजशर्मा शास्त्री, जयपुरम् १६६
३—मूर्तिपूजा श्रीदीनानाथशर्मा शास्त्री, देहली १६८
४—धर्मो रक्षति रक्षितः श्रीचिन्तामणिशर्मा, नासिक १६८
५—अहमपि लेखको भविष्यामि ( व्यङ्ग्यचित्रम् ) श्रीकलानाथशास्त्री, जयपुरम १६९
६—दिलीप-चरितम् श्री वि० भा० मुसलगांवकर, गुना ( मध्यभारत ) १७०
७—तेजसां हि न वयस्समीक्ष्यते श्रीसीतारामशास्त्री, तेनाली १७१
८—श्रीकालिदासः ( कविता ) श्रीज्वालापतिलिङ्गशास्त्री, एमानी १७२
९—राज्ञो मौढ्यं महानर्थमूलम् ( कापि जनश्रुतिः ) श्रीस्वामी लक्ष्मणशास्त्री, नागौर ( मारवार ) १७३
१०—दीनेश ! दूनं जगदुन्नयेथाः ( कविता ) पं० श्रीचन्द्रदेवशर्मा, बेतिया, चम्पारन १७६
११—सर्वेषु रसेषु करुणरसस्य प्राधान्यम् श्रीप्रह्लादचन्द्रशास्त्री, डीडवाना ( राजस्थान ) १७७
१२—सर्वज्ञत्वे च मौग्ध्ये च सार्वभौममिदं महः श्रीवैद्यनाथझा, किशनगढ़ १७८
१३—तदिह जागृहि मानव-मानसे ( कविता ) आचार्यश्रीत्यागानन्दः, अयोध्या १८०
१४—सम्पादकीयम् संपादकः १८१
१५—देशदर्शनम् ,, १८३
१६—विदेशवार्ता ,, १८४
१७—'श्रीश्याम' शोक-दशकम् ( कविता ) श्रीजगन्नाथशर्मा वाशिष्ठः, साम्बा ( जम्मू ) १८५
१८—संस्कृतशिक्षणोपायाः १८६


—×—

## — "भारती" पत्रस्य उद्देश्यानि नियमाश्च —

१—संस्कृतभाषायाः प्रचारः सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचारपरिपोषिकायाः सामग्र्याश्च समर्पणम् अस्य पत्रस्योद्देश्यानि ।

२—'भारती' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम् ।

३—मासिकपत्रमिदं प्रतिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात् ।

४—एकस्याङ्कस्य मूल्यम् ।≈) आणकपट्कम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः-
श्रीवृद्धिचन्द्रशर्मा शास्त्री
व्याकरण-धर्मशास्त्राचार्यः
महाराज-संस्कृत-महाविद्यालयः
जयपुरम्

# भारती

भारतीशुल्कम्
वार्षिकं मूल्यम् रूप्यकत्रयम्
एकस्याङ्कस्य मूल्यम्
आणकषट्कम्

वर्ष ३ } आषाढ-पूर्णिमा, सं० २०१० { अङ्क ६

## सरस्वति शारदे

[ लेखकः—रायदत्तो भारद्वाजः ]

सरस्वति शारदे
शुक्लवस्त्रधारिणि
वाणी-वीणा-सम्पृक्ते
मोह-सिन्धु-तारिणि ।
हंस-यान-संयुक्ते
ज्ञान-खे विहारिणि
ब्राह्मि देवि शारदे
मोदानन्द-कारिणि ॥ १ ॥

सरस्वति शारदे
शक्तिं पुष्टिं देहि मे
सत्यं शिवं सुन्दरं
रूपं विद्यां मानं मे ।
यशो धनं सौख्यञ्च
भक्तिं ज्ञानं देहि मे
ब्रह्मलीने देवि हे
सरस्वति शारदे ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# प्राचीना अर्वाचीना च शिक्षाप्रणाली

[ पं० श्रीगिरिराजशर्मा शास्त्री, जयपुरम् ]

## — प्राचीना शिक्षाप्रणाली —

यस्मिन् 'पोरवन्दर' प्रदेशे महात्मगान्धी जन्म लेभे तस्मिन्नेव प्रदेशे महात्मा सुदामाऽपि प्राप्त-जन्मा आसीत्। सुदाम्नः पुरस्य समीपे एकस्मिन् वने सान्दीपनि-मुनेः गुरुकुलम् आसीत्। तस्मिन् एकादश विद्यार्थिनः आसन्। सुदामा श्रीकृष्णश्च तस्मिन्नेव गुरुकुले विद्या-ध्ययनं चक्रतुः।

पर्णकुटेः सम्मुखे एकस्य निम्बवृक्षस्य अधस्तात् एकस्य फलकस्य उपरि विराजमान आसीत् गुरुः सान्दीपनिः निम्न-प्रदेशे चासीत् स्वल्पानि एकादश दर्भासनानि।

प्रातःकालस्य समय आसीत्। यः कोऽपि विद्यार्थी तत्र समागच्छत् स एव गुरुं प्रणम्य तस्मै एकां पुष्प-मालां समर्प्य स्वस्थानमध्यतिष्ठत्। सर्वे विद्यार्थिनः श्वेतवस्त्रधारिणः आसन्। सैव ब्रह्मचारिणां वेशभूषा आसीत्।

गुरुः—किं शिवदत्त ! त्वं प्रातः कस्मिन् समये उत्तिष्ठसि ?

शिवदत्तः—श्रीगुरुचरणाः ! अहं प्रातः चतुर्वादन-समये निद्रात्यागं करोमि।

गुरुः—आम्, प्रत्येकं विद्यार्थी प्रातः चतुर्वादनसमये निद्रात्यागं कुर्यात्।

सर्वे विद्यार्थिनः- वयं प्रातः चतुर्वादनावसरे एव निद्रा-त्यागं कुर्मः।

गुरुः—उत्थाय किं करोषि गुरुदत्त ?

गुरुदत्तः—शौचार्थं गच्छामि आचार्य !

गुरुः—नाहं ! उत्थाय एकं गण्डूषं कृत्वा यथाशक्यं जलं पिबेत्। रात्रौ एकं जलपात्रं वस्त्रेण आच्छाद्य शय्यायाः समीपे निक्षिपेत्।

सूर्यदत्तः- आचार्य ! को लाभः अनेन ?

गुरुः—अनेन न कदापि अजीर्णं भवति न च क्षयरोगः संजायते।

गुरुः- किं भो सुदामन् ! जागरणानन्तरं त्वं किं करोषि ?

सुदामा—ईश्वरं प्रणमामि। पितरौ वन्दे गुरुं च।

गुरुः—अत्र गुरुकुले कुत्र स्तो मातपितरौ ?

सुदामा—स्वचित्ते तयोः ध्यानं कृत्वा प्रणमामि।

गुरुः—किन्तु शय्यातः पृथिव्युपरि पादनिक्षेपणात् पूर्वं पृथ्वीमातुः वन्दनमप्यावश्यकम्।

हरिदत्तः—जागरणानन्तरं एकाञ्जलिना जलेन गण्डूषं कृत्वा जलं पिबेत्।

तदनन्तरम् ईश्वरं मातापितरौ गुरुं च मनसि प्रणम्य पृथिव्या वन्दनं कुर्यात्। धन्योऽसि गुरुवर ! धन्यास्ति भवदीया शिक्षा।

प्रभुदत्तः— गुरुवर ! पृथिव्याः चरणस्पर्शेन को लाभः?

गुरुः—अन्नार्थं कदापि दुःखिनो न भविष्यथ, आयुश्च वर्धिष्यते भवताम्, विद्यां कीर्तिं शक्तिं च प्राप्स्यथ।

यज्ञदत्तः—शौचानन्तरम् अहं स्नानं करोमि। तत्पश्चात् सन्ध्यां कृत्वा भगवते सूर्याय अर्घ्यं ददामि।

सर्वे बालकाः—वयं सर्वे एव छात्राः सन्ध्यां कृत्वा सूर्याय अर्घ्यं दद्मः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुः—किं लाभोऽस्ति भगवते सूर्याय अर्घ्यप्रदानेन ?

गुरुदत्तः—न ज्ञायते एतत् भो गुरुचरणाः !

गुरुः—नेत्रयोः ज्योतिः कदापि विनष्टं न भवति। तेजश्च उत्तरोत्तरं वर्धते।

गुरुः—सूर्यस्य अर्घ्यदानसमये किम् उच्चार्यते ?

सर्वे—गायत्रीमन्त्रोच्चारणं कुर्मः गुरुवर !

गुरुः—समीचीनं वर्तते।

शिवदत्तः—अनन्तरं वयं प्रातरशनं कुर्मः।

गुरुः—प्रातराशे किं गृह्णीथ यूयम् ?

शिवदत्तः—पत्ररसे शर्करां निक्षिप्य तं रसं पिबामि प्रातराशस्य समये।

गुरुः - गो-दुग्धमपि हितकरं भवति। पत्राणां रसेऽपि दुग्धस्य सम्मिश्रणम् उचितं भवति। कदापि पर्युषितपदार्थानां प्रातराशः न विधेयः। अनेन स्वास्थ्यहानिः भवति।

प्रभुदत्तः—प्रातराशं कृत्वा वयं स्वाध्ययने संलग्ना भवामः।

गुरुः—समीचीनम्, पञ्चवादनात षड्वादनपर्यन्तम् अध्ययनस्य उपयुक्तः समयो वर्तते। यः विद्यार्थी तस्मिन् समये अध्ययनं करोति स सफलो भवति।

यज्ञदत्तः—ब्रह्मचारिणः खाद्यपदार्थेषु किं वर्जितम् ?

गुरुः—लवणं, तिक्तम्, अम्लं, मधुरं, तैलं च ब्रह्मचारी परित्यजेत्।

सुदामा—लवणस्य मधुरस्य च किञ्चित् व्यवहारस्तु भवत्येव गुरुदेव !

गुरुः—न्यूनातिन्यूनो व्यवहारो भवितुमर्हति। लवण-रहितस्य अपरिपक्वस्यान्नस्य उपयोगः चेत्, शोभनम्। परिपक्वान्नं निर्जीवं भवति। अन्नानि फलानि शाकानि च अपरिपक्वाण्येव उपयोगार्हाणि सन्ति।

यज्ञदत्तः—ब्रह्मचारिणः इदमपि आवश्यकं यत् स ब्रह्मचर्यस्य देवस्य वीरस्य हनुमतः भक्तिं कुर्यात्। मङ्गलवारस्य व्रतं कुर्यात्। स्वच्छमतानुसारं किञ्चित् नैवेद्यं समर्प्य बालकेभ्यो दद्यात्।

गुरुः—उच्यताम् चन्द्रदत्त ! अद्य जीवनार्थं का शिक्षा प्राप्ता भवता ?

चन्द्रदत्तः—प्रातः चतुर्वादनवेलायामुत्तिष्ठेत्। पानीयं पिबेत्। पितरौ गुरुं च भक्तिपूर्वकं प्रणमेत्। पृथ्वीमातुः चरणस्पर्शं कृत्वा शौचं कुर्यात्। स्नानानन्तरं सन्ध्यां कृत्वा सूर्याय अर्घ्यं दद्यात्। प्रातराशे पर्णानां रसं पिबेत्। यावच्छक्यं लवणं-तिक्तम्-अम्लं-मधुरं-तैलं च परित्यजेत्। मङ्गलवारस्य व्रतं कृत्वा महावीरस्य नैवेद्यवितरणं कुर्यात्।

गुरुः—प्रातःकाले एकहोरापर्यन्तं स्वपाठं कण्ठस्थाग्रं कुर्यात्।

सर्वे बालकाः—श्रीगुरुवर्य ! भवदीया शिक्षा जीवनप्रदायिनी दीर्घजीवनदायिनी, कल्याणकारिणी च वर्तते।

चन्द्रदत्तः—समस्तः संसारः सावधानतया शृणुयात यत् प्राचीन-भारते शिक्षायाः कीदृक् शोभनं रूपमासीत्। तदैव विद्यार्थिनः वेदं कण्ठस्थाग्रं कर्तुं मर्म च वेत्तुं समर्थाः आसन्।

[ अग्रे समाप्या ]

——:——



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# मूर्तिपूजा

[श्रीदीनानाथशर्मा शास्त्री सारस्वतः, विद्यावागीशः, विद्याभूषणः, विद्यानिधिः (प्रिन्सिपल-सं० हि० विद्यालय, रामदल, दरीबा, देहली)]

केचिद् मूर्तिं जडां विभाव्य तत्पूजातो जुगुप्सन्ते; परं तैस्तत्र इदं ज्ञेयं यद्-जडमेव लौकिकशब्देन 'जडं' (मूल) भवति। जडसेवया विना कस्यापि कार्यं न प्रचलति। वायुर्लोकदृष्टौ जडोस्ति; परं किं तदुपासनां विना कोपि प्राणितुं शक्तः? जडाग्न्युपासनया विना भवन्तः किं शक्ताः किमपि कर्तुं स्वोदरं पालयितुं च? जड-जलोपासनां विना किं कोपि स्थातुं शक्तः? धनमपि जडमस्ति; तदुपासनां विना कोपि ना सांसारिकनिर्वाहं कर्तुं शक्तः किम्? यदैवं भवन्तो जडोपासनां कुर्वाणाः सन्ति, तदा भवन्तो मूर्तिपूजातः कथं ग्लायन्ति? तत्र तु भवन्तो जडद्वारा चेतनस्य (सच्चिदानन्दस्य) पूजां कुर्वन्तः सन्ति। भवदीयं शरीरं जडमस्ति, किं तद् विना भवन्तः किमपि कर्तुमुपासनां वा कर्तुं शक्ताः? शब्दोपि जडोस्ति, तेन सर्वः संसारो निखिलवृत्तं जानाति।

भवन्तो यया बुद्ध्या, येन वा मनसा परमात्मनो ध्यानं कुर्वते; ते अपि किं न जडे? आक्षेप्तारोपि तु मन्यन्ते यत्-परमात्मापि जडप्रकृतिं विना किमपि कर्तुं न शक्त इति, सृष्टिं च कर्तुं न शक्त इति। तत् सिद्धं यद्-जडचेतनयोः परस्परं सम्बन्धोस्ति। ततः परमात्मापि कामपि मूर्तिं विना उपास्यः कथं भवेत्?

विद्युत् तावत् प्रकटीभवितुं न क्षमम्, यावत् तया सह प्राकट्यकारककेन्द्रं काचलट्टुकं न स्थाप्येत; विद्युद्व्यजनं वा आधारो न भवेत्। एवमीश्वरोपि केन्द्रेण प्रकटीभवति; यथा गोस्तनान् द्वारीकृत्य दुग्धं प्रकटीभवति, यद्यपि तद् गोः सर्वावयवव्याप्तम्।

# धर्मो रक्षति रक्षितः

"भानुवंशे"त्युपाह्वः चिन्तामणिशर्मा काव्यतीर्थः
(नासिक)

"धारणाद् धर्ममित्याहुः धर्मो धारयति प्रजाः" अपरञ्च "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः"॥ इत्यादीनि लक्षणानि सन्ति धर्मस्य। एवं शास्त्रपुराणवर्णितस्य स्वधर्मस्य रक्षणं यः मानवः करोति सः ऐहिकं पारलौकिकं च सुख लभते। न परधर्माचरणेन। अतएव स्वधर्माचरणं केनापि कदापि नैव त्याज्यम्। उक्तं च गीतायाम्-श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥३।३५

धर्मशब्देन पुत्रधर्मः पातिव्रत्यधर्मः इत्यादयः संगृह्यन्ते। पुत्रधर्मपालनतत्परेण रामचन्द्रेण वनवासे चतुर्दशवर्षाणि व्ययीकृतानि परं पुत्रधर्मोल्लङ्घनं न कृतम्; तथा च पातिव्रत्यधर्मपालने सीतासावित्रीप्रभृतयः प्रसिद्धाः। राजसभायां विडम्बनार्थं दुर्योधनेन आनीतायाः द्रौपद्याः रक्षणं भगवता श्रीकृष्णेन कृतम्। अतः कयापि स्त्रिया पातिव्रत्यधर्मः न त्याज्यः। तथा च केनापि पुत्रेण पुत्रधर्मः न त्याज्यः। सः स्वस्माद् भ्रष्टः यः स्वधर्माद् भ्रष्टः। धर्मेण अर्थकामप्राप्तिरपि भवति। उक्तञ्च भगवता वेदव्यासेनः-

**ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छ्रृणोति मे।**
**धर्मादर्थश्च कामश्च स धर्मः किन्न सेव्यते ॥१॥**

"न जातु कामान्न भयान्न लोभाद् धर्मं त्यजेज्जीवितस्यापि हेतोः॥ नित्यो धर्मः सुखदुःखे त्वनित्ये" इति स्वधर्मः सुष्ठु परिपालितश्चेत् सः धर्मः मानवान् आपद्भ्यः रक्षति। अतः स्वधर्मः अवश्यं परिपालनीयः माननीयः वन्दनीयश्च।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# राज्ञो मौढ्यं महानर्थमूलम्

—( कापि जनश्रुतिः )—

लेखकः—स्वामी लक्ष्मणशास्त्री, संस्कृतविद्यालयाध्यक्षः, नागौर (मारवार)

दिवा निरीक्ष्य वक्तव्यं रात्रौ नैव च नैव च ।
विचरन्ति महाधूर्त्ता वटे वररुचिर्यथा ॥ १ ॥

एतत्पद्यविषये श्रूयते, यद् बभूव पुरा कोऽपि चन्द्रदेवो नाम भूपतिः । स सर्वराजगुणैः सम्पन्नोऽपि दुराग्रहग्रहगृहीत इवाभूत् । अयुक्ता युक्ता वा या काचन वार्त्ता तस्य चेतसि निरूढा, तां कश्चनापि पुरुषः कयाचन युक्त्या चापि न निवर्तयितुं शक्नोति स्म । अदीर्घदर्शितया स्वचेतसि विचारितस्य कार्यस्य शुभामशुभां वा परिणतिं न लेशतोऽप्यवबुद्ध्यते स्म सः ।

अयं नृपोऽन्येद्युर्मृगयाव्यसनेनान्येन वा केनचित्कारणेन सुदूरं वनमगमत् । निर्जनेऽस्मिन्नरण्येऽभूदेकः पर्वतः । तस्य दर्यामेकः कोऽपि छद्मना कृतसाधुवेषो युवा पुरुषः तत्र प्रतिष्ठितायाः कस्याश्चन देवमूर्त्याः पुरतः श्रीदुर्गास्तवस्य पाठं करोति स्म । स केवल तत्स्तवस्य पाठमात्रमेव जानाति । पाठमपि द्वित्राणां पद्यानामेव जानाति, नाधिकम् । तावन्मात्रमेव तत्स्तवपाठं पुनः पुनः पठति । तत्पद्यानामर्थमाशयञ्च नांशतोऽप्यवैति ।

राजा तस्यां गुहायां पठनशब्दं निशम्य निर्जनेऽस्मिन् वने यः कोऽपि पाठं करोति, स नूनं महायोगी निःस्पृहो महापुरुषोऽस्ति । तद्दर्शनमवश्यं विधेयम् । सुकृतोदयेनैवैतादृशानां महापुरुषाणां दर्शनं लभ्यते । इत्यालोच्य स्वस्याश्वं कस्यचिद् द्रुमस्य मूले निबध्य स्वपुरुषांश्च तत्रैव संस्थाप्यैकाक्येव स तस्यां पर्वतगुहायां गतवान् । पाठेऽतिसक्तचित्तं तं महात्मानमवलोक्य राजातितरां मुमुदे । अन्ते गमनत्त्वरया च तं महात्मानं प्रणम्य तूष्णीं ततो निर्गम्य स्वाश्वमारुह्य च स्वपुरुषैः सह स्वपुरमागमत्सः । एवं राजा यदा कदापि समयेऽसमये तत्र गच्छति तदा तं महात्मानं तत्रैवोपविष्टं निश्चलं तसा च तथैव पाठं कुर्वन्तं पश्यति । सर्वदा च रा पञ्चषान् क्षणांस्तत्रोपविश्य तस्य पाठं शृणोति । एवं त राज्ञस्तस्मिन् महात्मनि नितरां भक्तिः श्रद्धा च ववृधे ।

अन्येद्यू राजा तस्य महात्मनो निकटेऽधिकसम यावदुपाविशत् । राजानमतिवेलमुपविष्टमवलोक्य पाठान्ते राजानमाशिषाभिनन्द्य किमिच्छसीत्यन युङ्क्त । राजा सप्रश्रयं प्रणम्योवाच-महात्मन् ! अ भवन्मुखादेतत्पुस्तकगतस्य कस्याप्येकस्यैव पद्यस्या श्रोतुमत्युत्सुकोऽस्मि ।

मात्रयाप्यर्थमाशयं चाजानन् स महात्मा स्वमौख पिधित्सुस्तत्तोत्रगतस्य 'दुर्गे स्मृता हरसि भीतिमशे जन्तोः स्वस्थैः स्मृतामतिमतीव शुभां ददासि । दा द्रयदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणा सदार्द्रचित्ता । १ । इति पद्यस्यार्थं 'माता भगवत्यस पर्वतस्योपर्युपविष्टा मोदकान् भुङ्क्ते" इति सत्वरमे प्रचलितायां तद्देशभाषायामुक्तवान् । राजापि तत्पद्द तत्पद्यार्थं च महात्मनोक्तं मषीप्रपूर्णया स्वलेखन्य कस्मिंश्चित् कर्गदपट्टे विलिख्य महात्मानमनुज्ञाप प्रणम्य च स्वपुरमागमत् ।

कुतूहलवशेन राजा तमर्थं विज्ञातुं स्वदेशनिश्र तान् सर्वान् पण्डितान् सभायामाकार्य तत्पद्यार्थं सम प्राक्षीत् । सर्वे पण्डितास्तत्पद्यस्यैकमत्येन तात्त्विकमः चक्रुः । यदा राजा तमर्थं साधु नामनुत, तदा तेषु केच महान्तोऽप्रतिमप्रतिभाभासिताखण्डभूमण्डला विद्वन्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

डलाखण्डलास्तत्पद्यस्य नानाविधानदृष्टचरानश्रुत-
रांश्च चेतश्चमत्करान् विचित्रतमानर्थान् विदधुः ।
प्राप्यसौ राजा तत्कृतान् सर्वानर्थान् सर्वथा वितथाने-
मनुते स्म । यतो महात्मनोक्तमर्थं तेषु लेशतोपि नाभूत् ।

अथ राजा सर्वांस्तान् पण्डितान् सरोषमवदत्-
द्वांसः ! यूयं शताब्दीतो मत्पूर्वजैर्मया च प्रदत्तां
लामचलां वृत्तिं लभध्वे । किमतः परं महदाश्चर्यम्
नातिविस्तृतस्यास्य पद्यमात्रस्याप्यर्थं न भवन्तो
त्रयापि विज्ञातुम्प्रभवन्ति । यूयमवश्यमेवास्मदीय-
र्मशास्त्राणां 'तात्त्विकमर्थमविदित्वा स्वमत्यार्थस्यानर्थं
धाय च मुधव प्रमुग्धान् जनान् प्रतारयथ, तान्
पथे च निपातयथ ।

अस्तु ! युष्मभ्यं मासद्वयस्यावधिर्मया प्रदीयते ।
वधिमनतिक्रम्यैव यूयमस्य पद्यस्य तात्त्विकमकृत्रिमं
र्थं मह्यं निवेदयथ, न चेदहं युष्मान्सर्वानेव, मृत्यु-
ण्डेन दण्डयिष्ये । यौष्माकीं स्थिरामस्थिरां च सर्वां
त्तिं प्रत्यादास्ये च ।

विद्वांसस्तथेत्युक्त्वा सर्वे मिथः समर्घ्य चापरं
मपि प्राणरक्षणोपायमपश्यन्तः शनैः शनैस्तद्देशं
न्नगरं च विहाय पलायाञ्चक्रिरे । तेष्वेको वररुचिर्नाम
द्वान् निर्द्रव्यतया पदातिरेव तत्पुरात्प्रस्थितः । स च
वपुषोऽतिस्थौल्यात् पद्भ्यां गमनस्यानभ्यासाच्च न
ाशेषतो गन्तुं पारयति स्म । स प्रत्यहमधिकाधिकं
ोशद्वयीं क्रोशत्रयीं वा महता परिश्रमेण समुल्लङ्घ-
ितुमपारयत् । एतावन्मात्रगमनेनापि स सायं परिश्रमे-
तिश्रान्तः श्वासोच्छ्वासैः परिपूर्णोऽभवत् । मृत्युभीति-
लवत्तरा भवतीति हेतोर्यथाशक्यमेवं गच्छन् कतिपयै-
दोभिः सुदूरमगमत्सः ।

अपरेद्युः स दिनान्तं यावन्मार्गमुल्लङ्घयन् न
मपि ग्रामं प्राप्तवान् । तदा स रात्रिमुपागतामालक्ष्य
कस्मिंश्चित्सरसि पानीयं पीत्वा किञ्चिद् विश्रम्य पाथेयमन्नं
भुक्त्वा च तस्यामेवारण्यान्यामेकस्य महतो न्यग्रोधद्रुम-
स्याधः सुष्वाप । मनोव्यथाग्रस्तस्य निकटे कर्थामयं
निद्रा समुपसर्तुमपि प्रभवति । अतः स विनिद्र एव
निखिलां तां निशां यापयामास । तस्य न्यग्रोधस्यैकस्यां
शाखायां गृध्रदम्पती निवसतः स्म । गृध्रस्य स्त्री निशायां
स्वपतिना सह प्रेमकलहं कुर्वाणा गृध्रमवदत्-अहं
तव गृहमागत्य कदापि मानवमांसं न लब्धवती । आय-
त्यामप्यहं न तल्लब्धुमाशासे कथमपि । यतो भवानस्मिन्
यौवनवयस्यपि तद् दातुं नाशक्नोत, तदोत्तरवयसि
का नामाशा तल्लब्धुम् । त्वमेकामपीमां ममाशां न
परिपूरयितुं समर्थोऽभवः । किं मृषा चाटुकारैर्मां
प्रतारयसि । नाहं किमपि तव वचो विश्वसिमि ।

इति विमनायमानां स्वस्त्रियं प्रसादयन् गृध्रः
प्रतिवदति स्म-दयिते ! दुर्दैववशंवदोऽहं नाद्ययावत्
त्तवेच्छां सफलयितुं प्राभवम् । किन्तु साम्प्रतं यदृच्छ-
याकस्मादेव मद्भाग्यमुदितमभूदिति निश्चीयते ।
न चिरात्तवेच्छां सफलयितुमहं शक्ष्यामि खलु ।
मा त्वं व्यमनायिष्ठाः । किं बहूक्त्या ! पञ्चषाणां घस्रा-
णामभ्यन्तर एव सपरिवारयोरावयोर्द्वित्रान्मासान्
यावद् यथा पर्याप्तं भोजनं भविष्यति, एतावत्प्रभूतं
मानवमांसं समानेष्ये ।

इत्थं स्वपतिवचनं निशम्य परमकुतूहलाविष्ट-
मानसा गृध्रस्य स्त्री तमेतावन्मानवमांसस्य प्राप्तौ
हेतुमपृच्छत् । तदा दूरदर्शिना गृध्रेणोक्तम्-प्रिये !
नीतिनिपुणैर्नीतिशास्त्रेषु तत्र तत्रोक्तम्-"यत्कापि रहस्य-
वार्ता दिवेतस्ततो निपुणं निरीक्ष्य वक्तव्या, रात्रौ तु कदा-
प्येव रहस्यवार्ता न वक्तव्या, यतोऽत्र संसारे विचित्र-
प्रकृतयो धूर्त्तजना विचरन्ति ।" रहस्यभेदेन निष्पन्नप्रा-
यमपि कार्यमेकपदे विनश्यत्येव खलु । प्रभूतमानवमां-
सस्यावाप्तेः सङ्क्षिप्तो हेतुस्त्वयमस्ति, यद् एत-
द्देशेश्वरो भूपतिः स्वमौर्ख्येणोन्मत्तो न चिराद् बहून्
पण्डितान् मृत्युदण्डेन दण्डयिष्यति, तदाहमन्ये च
मादृशा मांसाशिनः पक्षिणः प्रभूतं मानवमांसं प्राप्स्यामः।

गृध्रस्य स्त्री पुनरपि यदा बहूनां तेषां विदुषां



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मारणे कारणमत्याग्रहेण पृष्टवती, तदा गृध्रस्तत्परं
वक्तुमनिच्छन्नपि तत्प्रेमपरवशः प्रोवाच–प्रिये !
अन्येद्यू राजा वनं गतः सन् श्रीदुर्गास्तवस्य पाठं कु·
र्वाणं कञ्चन साधुं विलोक्य कस्यचिदेकस्य तत्स्त-
वपद्यस्यार्थं पृष्टवान् । तदर्थं मात्रयाप्यजानन् स
कृत्रिमो महात्मा स्वाज्ञता–पिधित्सायै तस्य पद्यस्य
कमपि स्वमतिकल्पितमेवार्थं राज्ञे कथयामास ।
राजा स्वपुरमागत्य स्वदेशेऽतिविश्रुतान् पण्डिता-
नेकत्रीकृत्य तदर्थं पृष्टवान् । पण्डिता अपि यथाम-
नीषं तत्पद्यस्य तात्त्विकमर्थं नानाविधानन्यानर्थांश्च
विदधुः, तदपि मूढतमेन तेन कृत्रिमेण साधुना कृत-
स्तत्पद्यार्थो न निःसृतोऽभूत, अतोऽतिरुष्टेन राज्ञा
तत्पद्यस्य तमेवार्थं विधातुं मासद्वयस्यावधिः प्रदत्तः ।
व्यतीते तदवधौ च नृपस्तान्सर्वान् पण्डितान्
घातयिष्यति । अलमितोऽधिकश्रवणकुतूहलेन ।
विशेषतः कथनेनास्माकं स्वार्थो विनश्येदेव खलु ।
इत्थमवबोधितापि सा गृध्रपत्नी सहजस्वभावपरवशा
गृध्रमवदत्–काममस्माकमीप्सितोऽर्थो विनश्येत्,
काममहं मानवमांसं न लभेय । किन्तु मह्यं तत्पद्यं
तत्पद्यार्थं चावश्यमेव ब्रूहि यत्तेन साधुना राज्ञे प्रोक्तम् ।
तच्छ्रवणाय ममोत्कटमौत्कण्ठ्यं वर्त्तते । गृध्रस्तस्या
अपरिहार्यं साहसं विदित्वा प्रणम्य च दिष्टं ताम·
वदत् । प्राणप्रेयसि ! तवैतादृशोक्त्या स्फुटं प्रतीयते
यदस्माकं विधिः साम्प्रतं प्रतिकूलो जातः खलु ।
निष्पन्नप्रायमपि सर्वं कार्यजातं तवैतेन हठेन विध्वस्तं
भविष्यति ।

अस्तु ! तत्पद्यं तत्पद्यार्थं च कथये । श्रोतुं दत्ताव-
धाना भव । "दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः
स्मृता मतिमतीव शुभां ददासि । दारिद्र्यदुःखभय-
हारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥१॥
अस्य पद्यस्य 'माता भगवत्यस्य पर्वतस्योपर्युपविष्टा
मोदकान् भुङ्क्ते ।' अर्थोऽयं तेन महात्मना स्वमति-
कल्पित एव राज्ञे कथित. । अयमर्थोऽस्मिन् पद्ये लेश-
तोऽपि न विद्यते, कुतस्ते पण्डिता तत्पद्यस्यासन्तमेतमर्थं
कर्तुं प्रभवेयुः ।

एवं तौ गृध्रदम्पती परस्परं संलप्य तूष्णीं बभूवतुः । द्रुमस्याधः समुपविष्टो वररुचिस्तु सर्वविधपक्षिवाचा-ऽभिज्ञतया तयोर्गृध्रदम्पत्योस्तत्संवादं यथावदवबुध्य तां निशामतिवाह्य च स्वगृहम्प्रति निवृत्तोऽभूत् । सर्वान् पलायितान् पण्डितान् प्रियसन्देशैः स प्रत्याह्वयत् । प्रतिष्ठितानखिलाँस्तन्नगरजनान् सभायामेकत्रीकृत्य राजानमेकान्तप्रदेशे नीत्वा च वररुचिर्गृध्रोक्तं तत्पद्यार्थं श्रावयामास जगाद च–राजन् ! एतत्पद्यस्येममर्थं ब्रुवाणः कोऽपि महात्मा ध्रुवं परमेश्वरादनवर एव भवितुमर्हति । कुतोऽन्ये मादृशा वराकाः पण्डिता एनमर्थं ज्ञातुम्प्रभवन्ति । एतादृशस्य महात्मनो दर्शनेन भवानपि संसारेऽस्मिन् सुतरां धन्यतमोऽस्ति । मया परमेश्वरं साक्षात्कर्तुं बहुभिर्दिनैः महदनुष्ठानमनुष्ठितम् । मदनुष्ठानातितुष्टेन श्रीनारायणेन स्वयमागत्य स्वमुखेन मह्यं सुगुह्योऽयमर्थः कथितः ।

राजा तमर्थं श्रुत्वा हृष्टमनाः सर्वान् पण्डितान् वररुचिं च विशेषतो दानमानाद्यैरतितरां सत्कृतवान् । वररुचिं च स्वगुरुं विधाय काञ्चिदाज्ञां प्रदातुम्प्रार्थयामास । वररुचिस्तु सर्वैः पण्डितैः सम्मन्त्र्य मूढो राजा पुनरपि कदाचिन्महतोऽनर्थस्य हेतुर्भविष्यतीति राजानं शिक्षितं विधातुं निश्चिक्ये । राजापि वररुचेराज्ञयानवरतमधीयानः कुशाग्रमतित्वेन गुरोरनुग्रहेण च स्वल्पैरेव हायनैर्गीर्वाणवाण्या भाषणे तदर्थज्ञाने चातितरां विचक्षणोऽभूत । एवं राज्ञः संस्कृतभाषायां नैपुण्यं विज्ञाय तदग्रे तदेव पद्यं निधाय सर्वजनसमक्षं तमेवार्थं कर्तुं प्रैरिरत् । राजा स्वमौर्ख्येणातिलज्जितः स्मारं स्मारं स्वकृतं कर्म, भृशमनुतप्तोऽभवत् । तान्सर्वान् पण्डितान् स्वापराधं क्षन्तुं सप्रश्रयं प्रार्थयत स राजा । वररुचिः सोत्प्रासं राजानमब्रवीत्–राजन् ! राज्ञो मौढ्यं महतेऽनर्थायास्तीति नीतिविदां यद्वचस्तदक्षरशश्चरितार्थमेवास्ति । तवैतेन वृत्तेन स्फुटं निश्चीयते–यदस्माकं दिष्टं नाभविष्यदनुकूलम् , तदा करिष्यमाणेन त्वत्कर्मणा यदस्माकं महदनिष्टमभविष्यत् तद्वाचामवाच्यं, श्रवणयोरश्राव्यं, मनसोऽचिन्त्यमेव किलाभविष्यत् ।

---


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# दीनेश ! दूनं जगदुन्नयेथाः

रचयिता—वेद-व्याकरण-साहित्य-धर्मशास्त्राचार्य-पं० चन्द्रदेवशर्मा, पुराणतीर्थः, साहित्यरत्नम्,
प्रधानाध्यापकः - राजसंस्कृतविद्यालये, बेतिया. चम्पारन।

समेत्य सर्वे वयमान्तरिक्या भक्त्या शरण्यं शरणैषिणां त्वा।
अभ्यर्थयामोऽखिलशक्तिहीना दीनेश ! दूनं जगदुन्नयेथाः ॥ १ ॥

पाश्चात्यशिक्षासवपानमत्ता, देशानुरूपं श्रुतिसिद्धमार्गम्।
अनार्यभावादवहेलयन्ते, तैरद्य दूनं जगदुन्नयेथाः ॥ २ ॥

वेदादिविद्यासु समिद्धबोधं, सद्धर्ममर्मण्यसकृत् प्रबुद्धम्।
ब्रह्मान्वयं ब्रह्मविवेकविद्धं विधाय दूनञ्जगदु नयेथाः ॥ ३ ॥

विधाय राजन्यकुलप्रसूतान्, नित्यं प्रजापालनकर्मदक्षान्।
निधाय वेदोदितधर्मसेतावघौघदूनं जगदुन्नयेथाः ॥ ४ ॥

वणिग्जनान् पुण्यविधानविज्ञान्, श्रिया महत्योपचितान् कृषिज्ञान्।
गोरक्षया रक्षितमुख्यधर्मान्, सम्पाद्य दूनं जगदुन्नयेथाः ॥ ५ ॥

समाजसेवारतयः सुशीला, नानाकलोद्भावनया समन्तात्।
तवाङ्घ्रिजाः स्युर्भगवन्, सुबुद्धिं प्रदाय दूनं जगदुन्नयेथाः ॥ ६ ॥

आबालवृद्धं व्यसने विरूढं, व्यपेतसद्वादविलासवेषम्।
देशं विधायाखिलसद्गुणेशं, दीनेश ! दूनं जगदुन्नयेथाः ॥ ७ ॥

इदं प्रसिद्धाऽखिलसद्गुणानां, निधानमासीद् भुवि भारतं नः।
धर्मोन्नयायेदमलं परात्मन्, युगे युगे त्वं कुरुषे निकेतम् ॥ ८ ॥

एतेन साकं भवतो ममत्वं, सनातनं ये सुधियः स्मरन्ति।
ते क्रूरकर्मण्यपि दुर्युगेऽस्मिन्, धर्मस्य रक्षां खलु विश्वसन्ति ॥ ९ ॥

प्रापय्य भूयो भगवन् पदं तत्, त्वदाश्रयं लोकगुरुत्वबीजम्।
महत्वपूर्णं शुचि राष्ट्रमेतद्, दीनेश ! दूनं जगदुन्नयेथाः ॥ १० ॥

ब्रह्मण्यवर्यैः श्रवणीयकृत्यैः, पुनस्तथाऽऽर्यैः सुमहामनस्कैः।
संसत्सु गीतैः परितः प्रतीता महीयमास्तां जगदार्तिहन्त्री ॥ ११ ॥

श्रिता भवन्तं बहवो गुणानां, नानाविधानां नितरां निवासाः।
प्रख्यापयन्तां परितः सुसभ्याः, लोके महत्त्वं सविशेषमस्याः ॥ १२ ॥

दिव्यप्रभाभासितसर्वलोकं, श्रुतं महीयोऽस्य समन्ततस्तत्।
राष्ट्रस्य भूयस्तरसा विभाव्य, दीनेश ! दूनञ्जगदुन्नयेथाः ॥ १३ ॥

धर्मस्य लोकाभयदस्य भूयो, बलं सुमङ्गल्यमवाप्य सद्यः।
सञ्जीवयेज्जीवगणं जगत्यां, देशोऽयमीशस्य विभूतिभूतम् ॥ १४ ॥

लोकस्य लोक्याज्ञतिमीरयेथा, अभव्यभावानपसारयेथाः।
सत्यप्रकाशं परिपूरयेथा, दीनेश ! दूनं जगदुन्नयेथाः ॥ १५ ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# सर्वेषु रसेषु करुणरसस्य प्राधान्यम्

लेखकः—पं० प्रह्लादचन्द्रः शास्त्री, काव्यतीर्थः, अध्यापकः-श्रीबाङ्गड़-इन्टर-कालेज, डीडवाना (राजस्थान)

भौतिकलोके तु षड् रसा एव विद्यन्ते, किन्तु साहित्य-संसारे लोकोत्तरचमत्कारिणो ब्रह्मानन्दसदृशममन्दानन्दवर्षिणश्च नव रसाः सन्ति। यद्यपि तेषु शृङ्गारादि-रसेषु शृङ्गाररसमेव रसराजं मन्यन्ते साहित्यकारास्तथापि "करुणादावपि रसे जायते यत्परं सुखम्। सचेतसामनुभवः प्रमाणं तत्र केवलम्" इति महामान्यविश्वनाथोक्त्या न केवलं करुणस्य रसत्वमेव, अपितु सहृदयानां सामाजिकानां चेतस्यपूर्वानन्दजनकत्वेन शृङ्गाररसस्य तां पदवीमप्यपहरत्ययं रसः। तस्य च परिपुष्टिरपि कृता श्रीभवभूतिना नाटककारेण स्वकीयोत्तररामचरिते। तदुदाहरणानि यथाः—

प्रथमाङ्के चित्रदर्शनसमये कथयति लक्ष्मणः—'अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्' इत्यनेन गुरुगभीरशोकेन रामः अवश आसीत्तेन च शोकातिशयोऽत्र ध्वन्यते। तृतीयाङ्के च वधूत्यागात्प्रभृति रामस्य कावस्था सञ्जातेति मुरलानदीमुखेन सूचयतिः—"अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः। पुटपाकप्रतीकाशो रामस्य करुणो रसः।" इति श्लोकेन रामस्यासह्यवेदनायाश्चित्रणं कृतं तेन च दुःखशोकादिहेतुत्वेपि सुखमेव जायते सहृदयानां मनःसु। तथा च पञ्चवटीवने प्रियतमया सीतया सह कृतस्वच्छन्दविहारादि-विश्वस्तव्यवहारान् प्रदेशान् विलोक्य वदति रामः—"अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः। उत्पीड़ इव धूमस्य मोहः प्रागावृणोति माम्।" यथा वह्निजनितो धूमो वह्नेः पूर्णविकासात् पूर्वं तत् स्थानमाच्छादयति तथोपहासभयेन लोकसमाजे विलापासम्भवात् गुप्तभावेनैवान्तःकरणे स्थितः सीतापरित्यागदुःखजनितो मोहो दुःखस्य पूर्णविकासात् पूर्वमेव द्य मामावृणोति। पुनरग्रे वनवासकाले जानक्या स चिरमनुभूतास्तरुविहङ्गकुरङ्गादयो विभावा रामं व्या कुलीकुर्वन्ति। तद्धेतोश्च स्थाने २ मूर्च्छामप्यधिगच्छ विलपति च रामः—

**दलितहृदयं गाढोद्वेगो द्विधा न तु भिद्यते,**
**वहति विकलः कायो मोहं न विमुञ्चति चेतनाम्,**
**ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्,**
**प्रहरति विधिर्मर्मच्छेदो न कृन्तति जीवितम्।**

श्लोकेऽस्मिन् नानाविधदारुणदुःखशोकसंतप्तस्य मे मरणमेव वरमिति भावो व्यज्यते, तेन च धीरोदात्त प्रकृतिनायकस्य रामस्य चरित्रे "साधारणकापुरुष इ रोदनं धैर्यत्यागादिकञ्च" न्यूनतैव केषाञ्चन्मते परिलक्ष्यते। किन्तु प्राणाधिकप्रियतमायाः "विनयार्जव दियुक्ता गृहकर्मपरा पतिव्रता स्वीये"त्यादिना स्वीयाया प्ररूढस्मरयौवनमध्याख्यनायिकायाः सीतायाश्चिरविर हेऽपि शोकसंवेगाभावे नायकस्य कठोरतैव ज्ञायते। स चोदारहृदयमानवानां मनसि न सम्मानं विदधाति अपितु शून्यहृदयत्वं नायकस्येति परिज्ञानं करोति। तथ चैवंविधवर्णनेन प्रकृतरसस्य परिपोष एव।

किं बहुना, रसस्त्वेकः करुण एव नानाविधा धारविभेदेन भिन्नभिन्नपरिणामान् प्राप्नोति, शृङ्गारादि नामधेयानि च धारयति इति वर्णयित्वा करुणरसस्यैव सर्वरसोत्पादकत्वं प्राधान्यञ्च स्वीकृतं कविना। तथाहि—

**एको रसः करुण एव निमित्तभेदा-**
**द्भिन्नः पृथक् पृथगिवाश्रयते विवर्तान्।**
**आवर्त्तबुद्बुदतरङ्गमयान् विकारा-**
**नम्भो यथा, सलिलमेव तु तत् समग्रम्॥** इति



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# सर्वज्ञत्वे च मौग्ध्ये च सार्वभौमामिदं महः

—( कृष्णकर्णामृतम् )—

[ लेखकः —पं० श्रीवैद्यनाथझा, श्रीनिम्बार्काचार्यपीठः–परशुरामपुरी ( सलेमाबाद ) किशनगढ़ ]

अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् ।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ॥
श्रीमद्भागवते ।

मौग्ध्यप्रदर्शनचतुरः श्रीश्यामसुन्दरः एकदा कस्या ापि सख्याः दधिनवनीतादि चोरयितुं चकमे । ौर्य्यं तु नाममात्रं, सख्यस्तु दधिदुग्धादेः का कथा, ात्मानमपि भगवते समर्पितवत्यः आसन् । तेषां समेषां ततं समीहेयमासीत् यत्, कदा कथं वा श्रीश्यामसुन्दरः, स्माकं गृहमायास्यति, तथा चास्माकं दधिदुग्धा- कञ्चात्स्यति, स्वनिरतिशयसौन्दर्य्यमाधुर्य्यपरिपूर्णं ुखचन्द्रञ्च दर्शयिष्यति । सर्वान्तरात्मा भगवानपि ासां मनोरथपूर्त्यै, कदाचिच्चौर्य्यव्याजेन, कदाचिद्- ोचारणव्याजेन, कदाचिद्योगिनीवेशेन, कदाचिन्मा- ालिनीवेषेणैवमेव नानाविधव्याजेन, तासां गृहं गच्छ- ासीत् । भगवान् न कदापीदृशभावाभाववतीनां ोपीनां गृहं गच्छन्नासीदिति न केषाञ्चिदपि विदुषा- ाविदितं भक्तानाम् ।

एकदा कस्याश्चिद् गृहं गतः श्रीश्यामसुन्दरः , त्सद्ममणिस्तम्भे स्वाननशशिप्रतिबिम्बं समवलोक्य ञ्च रक्षकं मत्वा अज्ञ इव, भीत इव, ततः किञ्चित्प- ाप्य, अहो ! अद्य सकलं समीक्षितं स्तेयमेतेन, प्रयञ्च मात्रेऽवश्यं निवेदयिष्यति, सा च मां नूनं ताड- यिष्यति । किं करणीयम् ? एतेन मैत्रीं विधाय, अस्मै न नवनीतदानं प्रतिज्ञाय, प्रतारणीयोऽयमिति निर्णय- कार्षीत । अहो प्रभोरज्ञत्वं भीतत्वञ्च ।"यः सर्वज्ञः स र्ववित्" "पराऽस्य शक्तिर्विविधैव श्रूयते" "भयादस्य अग्निस्तपति" इत्याद्युपनिषद्बोधितसर्वज्ञोऽपि, भक्तस्वान्तःसुखदानाय, अज्ञत्वभीतत्वे अप्यङ्गीकरोति, इत्यहो प्रभोर्विरुद्धधर्माश्रयत्वम् । पुनश्च तदन्तिकं प्राप्य, मित्र, अद्य प्रथममेव समागतश्चौर्य्याय त्वया निरीक्षितः। सखे ! जन- मन्ये, त्वं सख्या निरीक्षकत्वेन नियोजितः। सखे ! जन- न्यै न निवेदनीयं, तुभ्यमपि ददामि–प्रतिज्ञायते चाद्यप्र- भृति, सकलस्तेये तव भागमवश्यं दास्यामि, नय त्वमपि, सह मया भक्षय, इदं सद्यो निष्काशितं मधुरं नवनी- तम् ! मित्र ! कथं नाद्यते, कथं मयि क्रुद्धः? यदि मात्रे कथनं निश्चितमस्ति, तथाऽपि भक्षय, यदि मम ताड़- नेनैव त्वं प्रसीदसि, न काऽपि क्षतिः, परमश्नासि नो कथंकारम् ? अहं ते शपथं ददामि, इदमतिमधुरं नव- नीतम् , नो पुनर्मिलिष्यति । किं नैवात्स्यसि ? ताड़यि- ष्यामि तदा भोक्ष्यसि ? इत्याद्यज्ञवन्मौग्ध्यं प्रदर्शयन्तं, परमसुकुमारं यशोदाकुमारं, ग्रहीतुकामा प्रच्छन्ना काऽपि सखी धावितवती । चपलबालको भगवान् तां ग्रहणकामनया समायान्तीं समवलोक्य भयादिव पलायितः। सखी च भगवन्मौग्ध्यदर्शनानन्देन नृत्यन्ती प्राङ्गणे परमप्रसन्ना तद्गीतिं गातुमारब्धवती । ततः काऽपि तदपरा सखी तद्गृहमागता, तां नृत्यन्तीमव- लोक्य कारणं पप्रच्छ, सा च सर्वं निवेदितवती । ततोऽदृष्टभगवन्मौग्ध्या साऽब्रवीत्-सखि ! ममाऽपीदृशं दर्शनं भवेत्कथंकारम्, अस्ति महती समुत्कण्ठा । सख्यो- क्तम्-सखि ! प्रेमिवत्सलो भगवान, भक्त्याऽऽश्वेव ददाति दर्शनम्, त्वं तस्य भक्तिं कुरु । तदाऽपरया सख्या सखी- वचनमवधार्य भगवद्दर्शनाय कीर्तनं कर्तुमारब्धम् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगवानपि भक्तव्याकुलतामसहमानः, तत्क्षण एव कीर्तनं कुर्वतीनां तासां गृहं प्रविष्टः। सख्योऽपि क्षमपि गृहे प्रविशन्तं निरीक्ष्य, कीर्तनं विहाय, द्रष्टव्यः को हि गृहं गत इति मनसि विभाव्य प्रच्छन्ना गवाक्षेण प्रागवलोकितवती। तत्र च चिरादभिलषितं स्वप्राणधनं समवलोक्य, अनिर्वचनीयां प्रसन्नतामासाद्य नवनीत-भोजनाऽनन्तरं ग्रहीष्यामीति मनसि विचार्य, तत्रैव गवाक्षसन्निकटे स्थितवती। किञ्चित्कालाऽनन्तरं, श्रीश्यामसुन्दरेण नवनीतं भुक्तं स्यादथ कपाटावुन्मुच्य ग्रहीतव्यः स इति विचार्य गृहं प्रविष्टवती। प्रविश्य च सहसा श्यामकोमलकरौ, स्वमृदुलपाणिभ्यां परिगृह्य तत्र चानिर्वचनीयामानन्दपरम्परामनुभवन्ती, कथितवती- हे श्यामसुन्दर! अद्य कस्य नाम नीत्वा मुक्तो भविष्यसि? अद्य त्वां मातुः समीपेऽवश्यं नेष्यामि। सा तव माता कदाऽपि नो प्रत्येति, यदस्माकं सुत एवं व्यवहरति। अद्य तु न कोऽपि सखाऽप्यस्ति, येन तस्यापि नाम वक्ष्यसि। सख्या वचनं श्रुत्वा भगवतोक्तम्-सखि! किमिदं तव गृहम्? अहं तु स्वगृहभ्रमेणागतः। सखि! अहं नो गतस्तव गृहम्। तव गृहं तु मार्जारो गत आसीत्। मां परित्यज। सख्योक्तम्-हे श्यामसुन्दर! यदि त्वं मम गृहं नो गतस्तर्हि करे कथं दधि लग्नम्? परमचतुरेण भगवतोक्तं-सखि! तव दध्नि पिपीलिकाऽऽसीत, तदपनयनात, मम करे दधि संलग्नम्। सख्योक्तं महाराज! मुखे कथं लग्नम्? भगवतोक्तं सखि! दधिलग्नहस्तेन यदाननस्य कण्डूयनं कृतं, तेन मुखेऽपि संलग्नम्। सख्योक्तं-किमपि कुरु, अद्य तु, अवश्यमेव त्वां मातुः समीपं नेष्यामि। बहुशः प्रार्थ्यमानाऽपि सा सखी न त्यक्तवती, तमादाय मातुः समीपाय प्रस्थितवती। सर्वकलनिपुणः प्रभुरपि अध्वनि कस्याश्चिदन्यस्याः बालिकायाः करं ग्राहयित्वा स्वयं पलायितः। सखी च वृत्तमिममजानाना तां भगवन्तमेव मन्वाना, मातुः यशोदायाः समीपं जगाम, गत्वा च मातरं कथितवती-यत् मातः! यशोदे! त्वं कदाऽपि नो विश्वसिषि, कथमपि स, यदस्माकं कस्य वस्तुनः वैकल्यमस्ति यन्मम पुत्रश्चौर्यं कुर्य्यात्। अद्य निपुणं निरीक्षस्व, अद्याहं स्वयं गृहीत्वाऽऽनीतवत्यस्मि। माता च चकिता भीता च भूत्वा कथितवती-सखि! क्वाऽस्ति मम बालः? किमयं मम सुतः? अस्य तु मोरमुकुटादिकं किमपि नालोक्यते। सम्यक्तया माता निरीक्ष्य, अन्यस्य कस्यचिद् गोपस्य तनयां समवगम्य, तां, या सामर्षं समागतासीत, कथितवती, सखि! किं दिनेऽपि नावलोकयसि, अन्धासि किम्? योषिति पुंभ्रमो भूतः। एवमेव प्रत्यहं मिथ्याभियोगम् अनपराधिनि मम तनये योजयसि। पुत्रि! त्वां कुत इयं समानयत्? त्वं कस्यासि तनयेति भगवद्बुद्ध्याऽनीतसखीं प्रति माता यशोदाब्रवीत। तया कथितम्-मातः, अहमस्मि गोविन्दगोपस्य तनया, इयं मां मिष्ठान्नलोभेन गोष्ठादानीतवती। तदनन्तरं मात्रा यशोदया सा भृशं भर्त्सिता। सा च महालज्जिता, अवाङ्मुखी सर्वं श्यामच्छलमनुशोचन्ती, तत्रैव चित्रलिखितेव तस्थौ। तावदेव, कुतश्चित् सर्ववृत्तान्तकर्ता श्रीश्यामसुन्दरः तद्वृत्तान्तमजानन्निव, शुद्ध-बुद्ध इव, जननीमुपजगाम, कथितवांश्च मातः! अद्य मा गोपिकाः स्वप्राङ्गणे कथमागताः सन्ति? किं भोज्यमस्ति? मां निमन्त्रयितुमागताः? मात्रोक्तं-नहि कृष्ण! इयं सखी इमां समादाय आगता, कथयति-यत् हे यशोदे! अद्य तव पुत्रं स्तेयं कुर्वन्तम् आनीतवत्यस्मि। स्वपुत्रं कथं न वारयसि? प्रतिदिनं मम गृहं गत्वोपद्रवति। भगवतोक्तम्-पश्य मातः, एवमेवेमाः प्रतिदिनं चौर्यकलङ्कं कुर्वन्ति। मातः, इमाः व्रजगोप्यः मम पाणिग्रहमपि प्रतिवर्त्स्यन्तीत्यादि मौग्ध्याकृत्या मुग्धभाषया च निजमातरम् अन्याश्चाऽपि सखीः विमोहयन् व्रजे कालमयापयदित्यहो! प्रभोः श्यामसुन्दरस्य माधुर्यं मौग्ध्यं भक्तसुखप्रदत्वं भक्तसर्वविधकामनापूरकत्वञ्च। वस्तुतः इयं विशेषता ईदृशी च माधुरी न क्वाऽपि विश्वस्मिन्नस्ति न चाप्येतस्याप्यन्यरूपेष्विति नापरोक्षं परीक्षकाणामिति संक्षेपः।

———



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आर्य-सौरभम्—

# तदिह जागृहि मानव-मानसे

ले०—आचार्यस्त्यागानन्दः कुलपतिः, श्रीसाकेत-गुरुकुल-महाविद्यालयः, अयोध्या ।

धवलसंघकृतौ सुमतौ प्रभो!
रुचिरकर्म सदैव सुवर्धताम् ।
अयि ! सुपण्डितमण्डितसभ्यते !
तदिह जागृहि मानव-मानसे ॥ १ ॥

निखिलमानवबान्धवसाधने,
सकलदानव-शात्रव-शोधने ।
सुजनता शुभदाऽस्तु सुसंगते !
तदिह जागृहि मानव-मानसे ॥ २ ॥

सुभगराष्ट्रसदाञ्च सताम्मुदा,
प्रभुतया हि पलायनमागसाम् ।
भवतु भव्य-सुधाम-समुन्नते !
तदिह जागृहि मानव-मानसे ॥ ३ ॥

उदयतामथ छात्रगणो धिया,
न हि पराजयमेत्वसताम्भिया ।
विनयिता हि चकास्त्वभितो विभो !
तदिह जागृहि मानव-मानसे ॥ ४ ॥

विदितमेव सतां व्रतमीदृशं
सदनुशासनमस्तु निरन्तरम् ।
सुमनुतान्तनुताञ्च तपोनिधे !
तदिह जागृहि मानव-मानसे ॥ ५ ॥

सदुपदेशरता हि गणेशता,
सुकविताऽभिरताऽपि कवीशता ।
लसतु चारु विधौ कमनीयते !
तदिह जागृहि मानव-मानसे ॥ ६ ॥

विभवता मनुतार्थमियन्तव,
न हि कदाऽपि विषादकरी भवेत् ।
जगति सर्वहिताय शुभार्थिते !
तदिह जागृहि मानव-मानसे ॥ ७ ॥

यदि कदाचिदुपैतु विहीनता,
न च हताश-मतौ परिवर्त्तताम् ।
सदनुकीर्त्तनमस्तु महाधृते !
तदिह जागृहि मानव-मानसे ॥ ८ ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संपादकीयम्—

# काश्मीराणां भारतोत्तमाङ्गत्वम्

ब्रूमः सारस्वतभुवः किं निधेः कौतुकानां
तस्यानेकाद्भुतगुणकथाकीर्णकर्णामृतस्य ।
यत्र स्त्रीणामपि किमपरं जन्मभाषावदेव
प्रत्यावासं विलसति वचः संस्कृतं प्राकृतं च ॥

काश्मीराभिजनः सुविख्यातो महाकविः श्रीबिल्हणः स्वरचिते विक्रमाङ्कदेवचरितनाम्नि महाकाव्ये अष्टादशे सर्गे षष्ठेन पूर्वोक्तपद्येन सत्यमेन काश्मीर-चित्रं चित्रितवान् । मान्याः मनीषिणः ! विदितमेवेदं सर्वेषां गीर्वाणवाणीप्रीतिजुषां तत्रभवतां यद् भारतीय-संस्कृतिसेवासौभाग्यं यद्विधं काश्मीरमण्डलेनाधिगतं तद्विधं विरलेनैव केनचिदन्येन भारतीयप्रान्तेन प्राप्तं स्यात । विशेषतः दार्शनिक—साहित्यशास्त्राणां मनोहराणि कुसुमानि अस्मिन्नेव काश्मीरजनपदे विकासमासाद्य परिपूर्णं साफल्यमन्वभूवन् । वाग्देव्याः श्रीसरस्वत्याः सविशेषप्रसादेन देशोऽयं ''शारदा—देशः'' इति ख्यातिमधिजगाम लोके । इदमेव नामान्तरमस्य प्रदेशस्य प्राचीने संस्कृत—साहित्ये बाहुल्येनोपलभ्यते । निजगुणातिशयेन शारदादेशापराभिधानोऽयं देशः ''शास्त्र—शिल्पी'' ति तृतीय—नाम्नापि प्रख्यातिं प्राप्नोद् भुवीति नानाग्रन्थेभ्यः समवगम्यते ।

संस्कृतसाहित्यपारंगतेन भगवता श्रीशङ्कराचार्येणापि काश्मीरस्थ—मुजफराबादमण्डलान्तर्गतशारदा-विश्वविद्यालयतः सर्वज्ञत्वस्योपाधिः समासादितोऽभूत् । निखलेऽपि भारते वर्षे इतिहासग्रन्थाभावे विजृम्भमाणे राजतरङ्गिणीरूपेण कल्हणकृतो महाभारतकालतः समारभ्याखण्डधारयोपनिबद्धः काश्मीरेतिहासः कस्य वा सचेतसो न विस्मयमातनोति । नाट्यालंकारशास्त्रे अपि पुनरिहैव परिपूर्णविकासमासेदतुः । अयमेव हि "ध्वन्यालोक–काव्यप्रकाशादि" निर्मातृणामानन्दवर्धन-मम्मटादीनां पुंभाववाग्देवतानामाचार्याणां प्रसव-निकेतनम् । एवं चान्येऽपि मङ्खबिल्हणादयोऽनेके कविताकाननकेसरिणः कविवरा एनमेव जनपदं स्वजन्मनालंचक्रुः । नागर्जुनसदृशां बोधिसत्वानां पदप-द्रुमपरिपूतेनानेन मण्डलेनैव भूपति–कनिष्ककालेऽपि समस्तविश्वबौद्धानां विराट्–सम्मेलन–समवलोकनस्य सौभाग्यं समधिगतमासीत् । मण्डलमिदं काश्मीराख्यम् ईशवीयाष्टमशताब्दीतो द्वादशशताब्दीं यावत् समस्तस्यापि भारतवर्षस्य संस्कृति–साहित्ययोः प्रधान-केन्द्रमासीदिति सर्वथा निर्विवादमेव ।

किं च–अन्यत्र भुवि दुर्लभं शैवशास्त्रमपि मानवदेहधारिभिरनेकैः सिद्धप्रवरैरिहैव प्रणायि । विजयनगरस्य महामहीमशालिना माधवाचार्येणैतच्छैवशास्त्रं स्वकीये सर्वदर्शनसंग्रहे "प्रत्यभिज्ञादर्शनम्" इत्यभिख्यया स्मृतम् । शैवशास्त्रस्यादिप्रवर्तकयोः सोमानन्दवसुगुप्तयोरपीदमेव जन्मस्थानम् । शैवशास्त्रशेखरीभूतस्य "ईश्वरप्रत्यभिज्ञा"ग्रन्थस्य प्रणेता आचार्यः श्रीमदुत्पलदेवः, "ईश्वरप्रत्यभिज्ञायाः विमर्शिनी" इत्याख्यातटीकायाः कर्ता श्रीमदभिनवगुप्तोऽप्येतस्यैव देशरत्नाकरस्य देदीप्यमाने रत्ने स्तः । अपि च चरकाचार्यस्यायुर्वेदोऽप्यत्रैव ख्यातिं ययाविति सुविदितमेव सरस्वतीसेवापरायणानां विद्वत्तल्लजानाम् ।

अपि च "अलिफ–लैला" दयो विख्याता आख्या-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यिकानिबन्धाः काश्मीरमुद्भूतविद्वत्सोमदेवभट्टप्रणीत-"कथासरित्सागर"माधारीकृत्यैव निबद्धा इति विश्वविश्रुतेन आङ्गलभाषाविदुषा श्री "टानी" महोदयेन सुस्पष्टमुद्घोषितम् । किं च-न श्रुतं किं नामधेयं श्रीमद्भिस्तक्षशिलाविश्वविद्यालयस्य ? यत्र परःसहस्राश्छात्रा अधीयते स्म निगमागमविद्याः, काश्मीरानेवालमकरोत् सः । अत एव साम्प्रतमपि प्रान्तान्तरेषु धर्माचारावलम्बिनः उपनयनसंस्कारकाले वटुकान् "वेदाध्ययनार्थं काश्मीरान् काशीं वा गच्छेत्" इति विधिमनसृत्य काश्मीराभिमुखं पदत्रयं प्रस्थाप्य प्रतिनिवृत्तांश्च तान् अवाप्तविद्याकेन्द्रकाश्मीरावाससौभाग्यानिव समाकलयन्तः स्वान्तःसन्तोषमातन्वते । किं बहुना कैयट-जैयटादयो वैदिका महावैयाकरणादयश्चेमां भूमिमेव स्वजनुषा सनाथयन्ति स्मेत्यहोऽस्य देशस्य महिमा ।

किमधिकं ब्रूमः-न केवलमार्यशासनकाले न वा बौद्धकाले एवेयमस्थास्य प्रदेशस्य, अपि तु म्लेच्छकालेऽपि जगद्धरभट्टसमाः संस्कृतधूर्धराः कवयः, लल्लेश्वरीसमाः सिद्धयोगिन्यश्च जनपदमिमम् अलंचक्रुः । मुगलराज्यकालेऽपि साहिबकौलसदृशैः दार्शनिकैरलंकृतमासीत् प्रान्तोऽयम् । शैवशास्त्रस्याध्ययनाध्यापनक्रमश्चात्र अद्ययावदजस्रं प्रचलति स्म । अन्यशास्त्राणामपि अद्वितीया अनुपमाश्च बहवो ग्रन्था अत्रैव मुद्राप्य प्रकाशिता अभूवन् । कियान् परिगणयेत काश्मीराणां गुणगणः? आस्ते स भारतमूर्द्धन्यः, भारतवर्षस्य शिरोभूतश्च ।

प्रदेशोऽयं भारतस्य शीर्षरूप इति पूर्वप्रतिपादितविद्याव्यसनितयैव सुस्पष्टम् । किं च भौगोलिकक्रमेणाऽपि प्रान्तोऽयं भारतस्य शिरोभूत इति मन्ये न वक्तुमावश्यकता । प्राकृतं सौन्दर्यन्त्वस्यानिर्वचनीयमेव यद्बलात् प्रदेशमिमं भूस्वर्ग इति भण्यते भावुकैः । भारतस्योत्तरे प्रदेशे स्वर्गकल्पनापि आर्यग्रन्थानां कदाचिदेतदाधारेणैव । अपि च प्रत्येकं राष्ट्रकविः—'भारतस्य प्रदेशोऽयं शिरःस्थानापन्न' इति साभिनिवेशं साधयत्येव ।

किन्तु किं कथयामः, काश्मीराणां कदर्थनाविषये ! सहस्राब्दीतः शारदायाः कृपापात्रमयं प्रदेशः संप्रति सर्वथा सुरसरस्वतीविनाशे बद्धपरिकर इव संदृश्यते । तत्रत्यैः शासकैः प्रान्तेऽस्मिन् विद्यमानानां समेषां विद्यालयानां राज्यसाहाय्यं सर्वथाऽऽच्छिन्नमेव । ये केचन विद्यावन्तो भूसुराः तत्रत्यानां क्षत्रियशासकानां राज्यशासनकाले भूमिमलभन्त वृत्त्यर्थं, यस्याः 'यावच्चन्द्रदिवाकरौ' भोगः साधितोऽभूत, बलादपह्रियते । प्राचीनहस्तलिखितानि ताडपत्रलिखितानि च पुस्तकानि बलात् स्वाधीनीकृत्य म्लेच्छबहुले स्थाने नीयन्ते । अहो ! अतीव खेदास्पदमिदं यद् घोरेऽपि दुःशासने न विनष्टमेतदस्य सुसाहित्यं तदधुना वर्तते विनाशोन्मुखम् ! श्रद्धा-शान्ति-क्षान्त्यादयोऽपि च सुजनेष्वप्याश्रयमलभमानाः सम्प्रजायन्त बिलान्वेषणपराः । शमदमादिकमपि च नामशेषतां धत्ते । विद्रवत् शैवशास्त्रमपि कन्दरासु समन्वेषयति निजनिर्मातारं तत्रभवन्तमाचार्यमभिगुप्तम् । किं बहुना-आस्तिकसज्जनान् संक्षोभयति सर्वत्र प्रान्ते प्रसृतोऽयमनात्मवादः शिश्नोदरवादश्च ।

एतादृशस्यास्य विषयस्य पुरातनविद्यावैभवमनुसन्दधतो बुधस्य कस्य नाम पाषाणसारमपि प्रलयाचलाचलमपि च हृदयं वर्तमानदुरदृष्टसृष्टदुर्दशादर्शनेन न विगलिष्यति न विचलिष्यति वा । मन्ये, नृशंसनेत्राणामपि अजस्राश्रुसंपातः सुनिश्चित एव । एवं धन्यवादार्हैः सहस्रशः काश्मीरमहीमहीसुरैः परःसहस्रैर्यत्नैः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संरक्षितमिदं सकलमेकपद एव भवेन्नष्टं यदि भारतस्य शिरोभूतः स प्रदेशः स्वशरीराद् भारतादस्मात् पृथग् भवेत्। पृथग्भावे च समवलोकयामः प्रत्यक्षं सुदृढानि कारणानि दुरभिसन्धिश्च।

यदा विधानमस्य प्रान्तस्य पृथङ् निरमीयत, प्रधानोऽपि भारतप्रधानाद् राष्ट्रपतेः श्रीमद्राजेन्द्रप्रसादात् पृथगेव समुदघोष्यत, यद्धि राष्ट्रस्य प्रधानं चिह्नं ध्वजः, सोऽपि हन्त ! भारतीयध्वजाद् भिन्न एव तदा कथंकारं विश्वसिमो वयं विश्वसनीयेपि भारतप्रधानमन्त्रिणो वाक्ये यत् "काश्मीरप्रदेशोऽयमस्माकं भारतस्याविभाज्यमङ्गम्।"

मान्याः भारतदेशभक्ताः ! अधुना वयं स्मः स्वतन्त्राः स्वाधीनाश्च। विद्यमाने पारतन्त्र्ये निगडिते च हस्तपादादिके बलात् प्रहृत्य कश्चित् शरीरावयवान् पृथक् कुर्यात् मातुः कामं भवेदगत्या सोढव्यं तत् किन्तु सर्वथा स्वतन्त्रेऽस्मिन् दृढीयसि काये स्वजन्मभूमातुः शिरश्छेदः कथंकारं सह्येत। यदि जीवत्सु पञ्चत्रिंशत्कोटिमितेषु सुतेषु मातुः शरीरादुत्तमाङ्गं पृथक् क्रियेत, शिश्नोदरपरायणैश्च तैस्तूष्णींभूय सह्येत, तदा पञ्चत्वगतिरेव मन्ये तेषां साधीयसी, पराधीनतैव च सर्वथा श्रेयस्करी, यस्याश्छलेन कलङ्कस्त्वेष शिरसि न लगेदप्रोञ्छनीय इति सर्वथा सन्नद्धैर्भाव्यम्। भरतवाक्यमस्तु श्रीनेहरूवाक्यम् "काश्मीरोऽस्माकमविभाज्यमङ्गम्" इति।

---

## अन्योक्तिः

मयूरं प्रति—

अस्मान् विचित्र-वपुषः खलु पृष्ठलग्नान्  
किं वा विमुञ्चसि ? विभो ! यदि वा विमुञ्च।  
हा हन्त ! केकिवर ! हानिरियं तवैव  
गोपाल-बाल-मुकुटे भविता पदं नः॥

## संस्कृतसमाचाराः

**मद्रासप्रान्तस्य राज्यपालः श्रीप्रकाशमहोदयः—** वदति "अहं दुःखितोऽस्मि यदेतस्याः संस्कृतभाषायाः दिशि नाद्यावधि जनसाधारणस्यावधानं जातं न च नेतृवर्गस्यापि तादृशमवधानमत्र, यावदपेक्ष्यते। निःसन्देह राज्याश्रयात् काचिदपि भाषा बलवती न भवति, तस्याः वृद्धिस्तु लेखकैः कविभिः वक्तृभिरेव वा कर्तुं शक्यते। अवश्यमेतदर्थं भाषाभक्तानां त्यागः श्रमश्चापेक्ष्यते" इति

'भारती' परिवारद्वारा जयपुरे सम्प[illegible]तः **गुरुपूर्णिमा-महोत्सवः—** राजस्थानविश्वविद्या[illegible]पकुलपति-डॉ.श्रीमथुरालालशर्मणां साभापत्ये सुसम्पन्नेऽस्मिन्नुत्सवेऽत्रत्यानां संस्कृतसेविनां श्रीगङ्गाधरद्विवेदि-पं. श्रीदीनानाथत्रिवेदि-पं० श्रीदेवीदत्तचतुर्वेदिनां तथा भट्टश्रीकालानाथशर्म - पं० श्रीगिरिराजशास्त्रिप्रभृतीनां भाषणानि संजातानि। 'गुरुदक्षिणा' नामकमेकाङ्कनाटकमप्यभिनीतं छात्रैः।

अन्ते श्रीसभापतिनोक्तं यत् यावदस्माकं प्राचीनसंस्कृताध्ययनाध्यापनपद्धतिः पुनर्नावर्तेत तावत्-छात्रेषु प्रविष्टाऽनुशासनहीनतापि मन्ये न दूरं गच्छेत्। अतः चरित्रनिर्माणार्थं संस्कृतमवश्यमध्येतव्यम्।

**उत्तरप्रदेशस्य राज्यपालः श्रीकन्हैयालालमाणिकलालमुंशीमहोदयः** प्रकटयति—"अद्य भारते आसन्नदशसहस्रसंख्याकाः संस्कृतपाठशालाः सन्ति। इदानीं भारते २५ सहस्रतोप्यधिकाः जनाः धाराप्रवाहिकं संस्कृतं वक्तुं प्रभवन्ति। जन्मतः प्रभृति मरणपर्यन्तं १० कोटि भारतीयाः संस्कृतस्य प्रयोगं कुर्वन्ति। अतः भारतस्य सांस्कृतिको विकासः संस्कृतेनैव संभवः। भारतस्य प्रायः सर्वासु भाषासु संस्कृतस्य प्रभावोस्ति।" इति।

**लोकसभायाः उपाध्यक्षाः श्रीमदनन्तशयनमायङ्गरमहाभागाः** देहल्यां गुरुपूर्णिमोत्सवे अभाषन्त—"यत् भारतशासनेन संस्कृतस्य प्रचारः कर्तव्यः। तदध्ययनव्यवस्थापि तेनावश्यं करणीया। संस्कृतप्रणयिनोपि संबोधिताः यत् ते सुदृढं परिकरं संधार्य संस्कृतोत्थानार्थं भवेयुः सन्नद्धाः" इति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


## देशदर्शनम्

**ज्योतिस्तृणम्**—गतमासे राष्ट्रपतिः श्रीराजेन्द्रप्रसादः मध्यप्रदेशमण्डलान्तर्गतं 'कान्हा' वनमवलोकयामास। तत्रत्यैः वनवासिभिः तस्मै तृणमेकमर्पितं ससम्मानं यद् रात्रौ प्रदीपवत् प्रकाशते। कालिदासेनापि कुमारसंभवे 'भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः' इति हिमालयवर्णने स्पष्टमस्यास्तित्वं स्वीकृता।

**श्रीरामचन्द्रवीरस्यानशनं समाप्तम्**—विहारप्रान्ते गोवधनिषेधनियमनिर्माणार्थं श्रीवीरेण अनशनं कृतमासीत्—यद्धि ६३ दिनानन्तरमाचार्य-विनोबा भावेमहाशयानां प्रार्थनया समापितम्। वीरस्येदं तृतीयमनशनमासीत् गोवध-निरोधविषये। तत्रत्यैः राज्यकर्मचारिभिरपि विषयेऽस्मिन् आश्वासनं दत्तम्।

**श्रीप्रभुदत्तब्रह्मचारी कथयति**— डॉ. मुकर्जीमहोदयस्य योऽयमाकस्मिको रहस्यपूर्णश्च मृत्युः संजातस्तद्विषये भारतशासनद्वारा तात्त्विकमन्वेषणमवश्यं विधेयमिति वाञ्छति भारतीया जनता। अन्यथा जनतायाः सन्देहोऽधिकं वर्द्धेत।

**प्राणाचार्य-श्रीहिर्लेकरमहोदयानां निधनम्**—मध्यप्रदेशान्तर्गतामरावतीनगरे कृतवसतिः श्रीपुरुषोत्तमसखाराम-हिर्लेकरमहाशयो भारतप्रसिद्धश्चिकित्सकः। आयुर्वेदोद्धारकेष्वेकतम आसीदित्येतं को नाम न वेत्ति भारतीयसंस्कृतिप्रणयी। अनेन हि 'शारीरं तत्त्वदर्शनम्' नाम प्रशंसनीयो ग्रन्थः प्रणीतः। आयुर्वेदप्रचारार्थं नागपुरे आयुर्वेदविद्यालयोप्येकः संस्थापितोऽनेन। संस्कृतभाषापाटवमप्यस्य स्पृहणीयमासीत्। अस्य हि देहावसानेन महती हानिः संप्रति संजाता देशस्येति।

**श्रीवेंकटरामशास्त्रिणां निधनम्**—दक्षिणभारतस्य भीष्मः, भारतसेवकसमाजस्य भूतपूर्वोऽध्यक्षोऽयमशीतिवर्षात्मके वयसि मद्रासनगरे पञ्चत्वं प्राप्येत्यहोऽनश्वरता जगतः। अयं हि सत्यव्रतपालने कृतप्रतिज्ञ आसीत्।

**बीकानेरस्थ-श्रीशार्दूल-संस्कृतविद्यालये** १६-७-५३ दि० आयोजितायां व्याख्यानमालायां ज्योतिषाचार्य्याणां श्रीरामोत्साहमिश्राणां सभापतित्वे प्रथमं व्याख्यानं-श्रीलक्ष्मीचन्द्रशास्त्रिणा "व्याकरणस्य प्रधानलक्ष्यं शाब्दबोधः ततः परं स्फोटात्मकं परं ब्रह्म" इति गवेषणात्मकं सञ्जातम्।

पं० शिवकुमारशास्त्रि-श्रीरतनलालदाधीच-पं० राजारामशास्त्रि-श्रीमदम्बिकादत्तगोस्वामि-पं. शङ्करदत्तशास्त्रि-पं. विद्याधरशास्त्रिणोऽपि स्वस्वविचारं प्रकटीकृतवन्तः। अन्ततो गत्वा सर्वैः निर्णीतं यत् शास्त्रसंरक्षणाय प्राचीना शैली अनुसरणीया तथा व्यापकरूपेण प्रचाराय आधुनिकाऽपि पद्धतिः अवलम्बनीयेति।

---

## विदेश-वार्ता

**अमेरिकायां संस्कृतनाटकाभिनयः**—अस्मिन्नेव जुलाईमासे न्यूयार्के मृच्छकटिकं नाम संस्कृतनाटकमभिनीयते। टाइम्सपत्रम् स्वमतं प्रकाशयति विषयेऽस्मिन् यत्- 'नाटकेऽस्मिन् कापटयसारल्ययोरद्भुतं संमिश्रणम्। एवम् अमेरिकन् रिपोर्टरः स्वमतं प्रकटयति-'मृच्छकटिकेन प्राचीनभारतीयनाटकानां विषये विचित्रमाकर्षणम् उत्पादितम्' इति।

**अद्भुतोऽभिलेखागारः**— तत्रैव डा. एवांसस्य पुस्तकालये समस्तसंसारस्य महत्त्वपूर्णभवनानां मनुष्य-पर्वत-नदी-वनादीनां च सन्ति चित्राणि। नैतादृशः पुस्तकालयः क्वापि। संभाव्यते-यदि समस्तस्यापि जगतो विनाशः स्यादेकक्षणे तदापि एतदीयचित्रसहायतया तत् पुनर्यथावन्निर्मातुं शक्येत।

**अमेरिकायां संस्कृतम्**— अमेरिकातः साम्प्रतं रेडियोद्वारा सायं ७ वादनात् १० वादनपर्यन्तं हिन्दी-बंगला-तामिलभाषाभ्यो भाषणादिकं क्रियते। अग्रे अन्या अपि भाषास्ततः प्रयोक्ष्यन्ते यासु संस्कृतमपि एकं स्यादिति तद्विभागेन सूचितम्।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# 'श्रीश्याम' शोक-दशकम्

——[ ले०—जगन्नाथशर्मा वाशिष्ठः, साम्बा ( जम्मू ) ]——

काश्मीरमुत्तमतमं ननु भारताङ्ग-
मच्छेद्यमेतदिति यस्य मतं द्रढिष्ठम् ।
वाग्मी विशुद्ध-निज-संस्कृतिपक्षपाती
'श्यामो' गतः स सहसा दिवि हन्त ! हन्त ॥

वीराग्रणीः प्रथितभूरितरप्रभावो
वङ्गे नृसिंह इव चाद्भुतशक्तिशाली ।
स्वध्येयसिद्धिमधिकृत्य रणाङ्गणस्थः
'श्यामो' गतः स सहसा दिवि हन्त ! हन्त ॥

यस्य प्रभावमतुलं परिचिन्त्य चित्ते
दुःखार्दिताऽपि परमं ननु मातृभूमिः ।
आशावती गणयतीव दिनानि चासीत्,
'श्यामो' गतः स सहसा दिवि हन्त ! हन्त ॥

स्नेहात्सभाजयितुमेनमदभ्रधैर्य-
मभ्रस्थितां सुरधनुःस्रजमादरेण ।
कण्ठे निधाय घनगर्जितमाचरन्तो
निन्युः शतक्रतुगणा जयमुच्चरन्तः ॥

यं वीक्ष्य यानमधिरुह्य दिवि प्रयातं
गन्धर्व-यक्ष-सुर-चारण-सिद्ध-संघाः ।
भद्रं नु भारतभुवः कथमद्य भूया-
दित्याकुलास्तु करुणा-भरिता रुदन्ति ॥

गन्धी-पटेल-तिलकादिकराष्ट्रवन्द्य-
श्रीगोखले-मदनमोहन-धीवराणाम् ।
शोकाश्रुपूरमहहैनमनन्तपारं
त्यमेव
धाराधरो जगति मुञ्चति मुक्त[illegible] ।

श्रीभक्तसिंह-नरवीर-सुभाष-बोस-
रक्ताश्रवश्च धृत-वीर-वधूटि-रूपाः ।
क्षुण्णं नु मातृहृदयं परिसान्त्वयन्तो
मन्दं चलन्त्यविरतं स्खलितान्तरङ्गाः ॥

आकस्मिकं समधिगत्य महत्सुदुःखं
भूमिस्तदीयजननीव वियोगदग्धा ।
सन्ताड्य चोरसि महद् भृशमादधाति
नीलं वपुर्हरित-गुल्म-लतौषधीभिः ॥

किं वर्णयामि जडतामधियाति बुद्धिः
शोकाहतं हतमिवाख्यमनो मदीयम् ।
'श्यामाप्रसाद' निधनं ननु भारतीयं
सर्वस्वनाशमिव सम्प्रति संप्रवृत्तम् ॥

रे रे वारिद ! घोरगर्जितशतैः कामं नदस्वोत्तरे
'वेगे'नातिभयप्रदेन च धरां 'धारा'भिरापीडय ।
भूमौ वा गगने प्रसारय तमस्तोमं दिवा वा निशि
'श्यामो'हन्त ! दिवङ्गतस्त्यज भयं वीरो'नगोद्धारकः'॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# इकारान्तः पुल्लिंगः हरिशब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | हरिः | हरी | हरयः |
| द्वितीया | हरिम् | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पञ्चमी | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्य्योः | हरीणाम् |
| सप्तमी | हरौ | हर्य्योः | हरिषु |
| सम्बोधनम् | हे हरे ! | हे हरी | हे हरयः |

ऋषि, मुनि*, कपि* ( वन्दर ) अहि* ( सर्प ) कवि* अग्नि*, असि* ( तलवार ) श्रीपति*, रवि ( सूर्य ) इत्यादीनाम् इकारान्तपुल्लिङ्गशब्दानां रूपाणि हरिशब्दसमानानि एव भवन्ति ।

* इन शब्दों के रूप लेने में तृतीया और षष्ठी में ण की जगह न बोलना चाहिये ।

## वद ( बोलना )

### [ आज्ञा ]

| | | |
|---|---|---|
| वदतु | वदताम् | वदन्तु |
| वद | वदतम् | वदत |
| वदानि | वदाव | वदाम |

एवमेव व्रज, पठ, हस, क्रीड, चल, रक्ष, पत, त्यज, पच, इत्यादिधातूनां रूपाणि भवन्ति ।

## उदाहरणार्थं पाठः

हरिः सदा सत्यं वदतु । ऋषयः आश्रमं व्रजन्तु । छात्रौ मुनेः पठताम् । कपिं दृष्ट्वा यूयं हसत । अहिः भूमौ क्रीडतु । अहम् उद्यानं चलानि ? सदा स्वधर्मं रक्षत । दुष्टाः गर्ते पतन्तु । सदा कुसङ्गतिं त्यजत । पाचकः ओदनं पचतु ।

प्रकाशक—जयबहादुरसिंह । मुद्रक—श्री बालचन्द्र इ० प्रेस । पता—भारती भवन, गोपालजी का रास्ता, जयपुर ।
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

संस्कृतस्य प्रमुखं मासिकं पत्रम्



इतो न किञ्चित् परतो न किञ्चिद्
यतो यतो यामि ततो न किञ्चित् ।
विचार्य पश्यामि जगन्न किञ्चित्
स्वात्मावबोधादधिकं न किञ्चित् ।

**योगिराजः श्रीमदरविन्दघोषः**

[ जन्म १५ अगस्त, १८७२ ई० ]

संवत् २०१० | वर्षः ३ | दशमोऽङ्कः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# विषय-सूची


| क्रम: | लेखनामानि | लेखकनामानि | पृष्ठसंख्या |
|---|---|---|---|
| १ | भारतीयान् प्रति (पद्यानि) | ठा० ओम्प्रकाशशास्त्री, सोनीपत | १८५ |
| २ | वाण्या उपवास: मानसिकं तपो वा मौनम् | प० श्रीदीनानाथशर्मा शास्त्री, सारस्वत:, देहली | १८६ |
| ३ | अन्योक्ति: | ... | १८७ |
| ४ | प्रहसनानि | संपादक: | " |
| ५ | [illegible]ना अर्वाचीना च शिक्षाप्रणाली | श्रीगिरिराजशास्त्री, जयपुरम् | १८८ |
| ६ | [illegible]स्माकं कर्तव्यम् | प० श्रीलक्ष्मीनारायण-पुरोहित:, उदयपुरम् | १८९ |
| ७ | अन्तर्लापिका | ... | १९२ |
| ८ | प्रतिशोध: | भट्ट—श्रीमथुरानाथशास्त्री, जयपुरम् | १९३ |
| ९ | तुलसीदास: (पद्यानि) | म. म. प. दशरथशास्त्री, सूकरक्षेत्र (सोरों जि. एटा) | १९७ |
| १० | भूदान-चतुश्लोकी-गीता | प० शंकरनथ्थू शुक्ल:, बड़वाहा | " |
| ११ | अस्मदीया एलोरा-यात्रा | श्रीजगपालसिंहशास्त्री, रोहतक | १९८ |
| १२ | जगत: कर्ता परमात्मा | प० छगनशास्त्री, सीकर | १९९ |
| १३ | मधु-कण: | संपादक: | २०१ |
| १४ | संस्कृतसमाचारा: | " | " |
| १५ | पत्रालोक: | " | २०२ |
| १६ | सुभाषितानि | " | " |
| १७ | देशदर्शनम् | " | २०३ |
| १८ | विदेशवार्ता | " | " |
| १९ | पुस्तकालोक: | " | २०४ |
| २० | संपादकीयम् | " | " |


## — "भारती" पत्रस्य उद्देश्यानि नियमाश्च —

१ संस्कृतभाषाया: प्रचार: सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचारपरिपोषिकाया: सामग्र्याश्च समर्पणम् अस्य पत्रस्योद्देश्यानि ।

२ 'भारती' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम् ।

३ मासिकपत्रमिदं प्रतिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात् ।

४ एकस्याङ्कस्य मूल्यम् ।=) आणकषट्कम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः :—
श्रीवृद्धिचन्द्रशर्मा शास्त्री
व्याकरण-धर्मशास्त्राचार्यः
महाराज-संस्कृत-महाविद्यालयः
जयपुरम्

# भारती

मूल्यम्
वार्षिकं रूप्यकत्रयम्
३) रू०
एकस्याङ्कस्य मूल्यम्
आणकषट्कम्

वर्ष ३ | श्रावण-पूर्णिमा, सं० २०१० | अङ्क १०

## "भारतीयान् प्रति—

कवयिता:—ठाकुर ओंप्रकाशशास्त्री, हिन्दी-प्रभाकरः, विद्याभूषणः,
हरियाना-हाईस्कूल, सोनीपत [रोहतक]

प्रभो ! नितरां विपन्नं भारतं द्रुतमेहि हे श्रीमन् !
विपद्वारां पतौ तूर्णं निमज्जत्तारयेः भगवन् !

प्रकर्षो हर्षसंवर्षः धिनोति मानसानि नो ।
विमानितदास्यबन्धं यत् स्वतन्त्रं भारतं जातम् ॥

विहायास्माकभूदेशं इतो यातं हि गौराङ्गैः ।
परं निजसभ्यतामिह ते प्रजहुर्दुःखावकाशोऽयम् ॥

स्वपूर्वजगौरवम्मन्याः स्वतन्त्रे भारतेऽप्यस्मिन् ।
हहा ! वैदेशिकीं भाषां सगर्वं भाषमाणास्ते ॥

परेषां वेषभूषाद्यैः वपुः संभूष्य स्वं सम्यक् ।
संस्कृतेरर्थज्ञानेऽप्यत्तमा अधिकुर्वते तद्वा ॥

"षडिह वेदाः प्रसिद्धा आगमानामथ चतुः संख्या" ।
प्रवक्तारो नु धर्मस्य नमस्याः कस्य नैतेऽहो ॥

सर्वथाचारविनिपातो दृशोरुपढौकते नितराम् ।
न चेत्तव स्यात् कृपादृष्टिः गतिः वाचां परे तत्स्यात् ॥

अहो निद्रापिशाचीयं तथा व्यामोहयद्देशम् ।
प्रबोधनलक्षणस्पृक् दृश्यते नहि कोऽपि भावो हा ॥

न विद्यास्ति न वै धिषणा बलाभावस्तथा सुतराम् ।
विना करुणेशकरुणां स्यात् कथङ्कारं समुद्धारः ॥

दशामेतां विलोयकतो विदीर्यत इव च नो हृदयम् ।
यदासीत् भा-रतं पूर्वं तदधुना भा-हतं जातम् ॥

दयालो ! दीनबन्धो ! दृक् दयायाः दीन-देशेऽस्मिन् ।
निधेया तव यथोदात्तं यशो यायान्न मालिन्यम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# वाण्या उपवासः, मानसिकं तपो वा मौनम् ।

श्रीदीनानाथशर्मा शास्त्री, सारस्वतः, विद्यावागीशः, विद्याभूषणः, विद्यानिधिः,
( प्रिन्सिपल–सं० हि० महाविद्यालय, रामदल, दरीब कलां, देहली )

यथा कायिक उपवास एकादशीव्रतम्; तेन कायिकी शुद्धिर्जायते; तथा वाण्या उपवासो मौनव्रतम्; तेन वाणी-शुद्धिर्जायते। एतद् मानसिकं तपोऽप्यस्ति। यथाह भगवान्— 'मनःप्रसादः सौम्यत्वं मौनम् आत्मविनिग्रहः। भावसंशुद्धिरित्येतत् तपो मानस-मुच्यते' (भगवद्गीता १७।१६)। यथा सततम् अन्नसदन्नकदन्नानामशनेन शरीरे अशुद्धिव्याप्त्या शरीरं रुग्णं तिष्ठति; शारीरिकोपवासे च कृते साऽशुद्धिर्दूरीभूय शरीरमुल्लाघयति तथा सततभाषणेन सुभाषणापभाषणानां च मिश्रणे जाते वाण्या अपि अस्वास्थ्यं जायते। सा च वाक् तदा निर्भर्त्सनगालि-प्रदानादिपरा भूत्वा क्रोधस्य प्राज्यसाम्राज्यमाविष्कृत्य 'वाक्पारुष्यान्नान्यद्दूरत्यप्रियत्वम्' इति न्यायेन कलहयुद्ध–महायुद्धादीनि प्रवर्तयति। यावद् वाग् अस्माकमन्तरस्ति; तावद् आस्माकीना। यावद् मुखाद् बहिर्जायते; तदानीं परकीया भवति। तया यदि कश्चित् क्षतं प्राप्नोति; तर्हि स तद्वाक्प्रयोक्तारं प्रहरति, तद्विध्वंसाय वा चेष्टते। परं मौनव्रतं वाण्यास्तद्रोगस्य शमयितृ अमोघमौषधम्। मौनव्रतेन न केवलं वाग्बलम्, प्रत्युत मनोबलं, बुद्धिबलम्, आत्मबलं, शारीरिक-बलमपि च प्राप्यते। अधिक-भाषणं शारीरिकबलमपि ह्रसयति, तेन सहैव मनोबुद्धिवलादीन्यपि। आस्माकीनभाषणक्रियां गलः फुप्फुसौ च विशिष्टतया सम्पादयन्ति। फुप्फुसयोर्वायुसञ्चारे सत्येव वाणीप्रक्रिया सम्पद्यते, तदीयश्च प्रभावः शरीरमस्तिष्कादिष्वपि सम्पद्यते। मौनव्रतेन च फुप्फुसौ सुरक्षां लभेते, तौ च रक्तशुद्धि-कार्ये निरन्तरं व्याप्तौ तिष्ठतः। एतेन शारीरिक-स्वास्थ्यमुन्नमते, हृदयमपि द्रढिमानमेति। अतएव रोगिणामपि कृते मौनं विना मूल्यमौषधम्।

मौनेन शारीरिकं मानसिकं वाचिकं च स्वास्थ्यं प्रवर्तते। संसारेऽस्मिन् सर्वो व्यवहारः शरीरवाङ्मन-आयत्तः। तद्वैषम्ये एव विविधकलहानां सृष्टिर्जायते; तत्साम्ये स्वास्थ्ये च सांसारिकसर्वव्यवहाराणां सामञ्जस्यं तिष्ठति। अत एव वाचंयमता (मौनम्) प्रयोजनीया। एवँ मौनेन जीवनं सुखितं जायते। अपभाषणकुप्रवृत्तिर्ह्रसते। मित्राणि वर्धन्ते। कुटुम्बे एकता तिष्ठति, कुटुम्बैक्ये च सम्पन्ने समाजजीवनं स्वस्थं जायते। मौनसमाप्तावपि वाणीनिग्रहः प्रयोजनीयः। मितभाषणं मौनस्य प्रथमं सोपानम्। तादृशस्य जनस्य शब्दाः परिमिता भवन्ति; तेषामन्य-स्मिन् प्रभावो जञ्जन्यते। यथा सुनयनाया अवगुण्ठनवस्त्रावृतं वदनमावरणोन्मोके सति मनोहारि जायते; तद्दर्शनोत्कण्ठा सर्वस्य सम्भवति; तथा वाग्यतस्य वाक्प्रारम्भे सर्व एव तदीयमेकैकशब्दं शुश्रूषते। अत्र श्रीगाँधिमहाभागो निदर्शनम्। स नियमितदिने मौनं कृत्वा तत्समाप्य च यदा वदितुमुपक्रमते स्म; तदा तद्वचनकुतूहली जनराशिः तत्पार्श्वे समवेतो जायते स्म। मौनकारणादेव मितशब्दप्रयोक्तुस्तस्य परिमितशब्दानां जनसाधारणे



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



राजकीयाधिकारिषु च बलीयान् प्रभावः समपद्यत् ।

मौनं दम्भार्थं सेव्यमानं विशिष्टलाभं न प्रापयति । श्रद्धया, विश्वासेन, हृदयतश्च यदि मौनं पाल्येत; तर्हि वैकारिकभावनानामुपशमो विशुद्ध-सात्त्विकवृत्तीनां चोदयो जायते । एवं सति जनस्य चित्तं निर्मलं, चरित्रं चोत्तरोत्तरं विशुद्धिमद् भवति । भोजनसमये तु मौनमपेक्ष्यते एव; तदानीं तदवलम्बने भोजनस्य सुपरिपाके साहाय्यं लभ्यते । साधकस्य मौने च दैव्याः सम्पद आविर्भावकानामुदात्त-मानसिकभावानामुज्जृम्भणं भवति । मौनेनैव धर्मार्थकामानामनायासं प्राप्तिः, ततश्च कैवल्यप्राप्तिः सुलभा जायते ।

'मुखादग्निरजायत' (यजुः ३१।१२) इति मुखादग्न्युत्पत्तेरुक्त्या मुखादुद्भवन्ती वाणी अपि अग्निस्वरूपा भवति । स एव प्रवृद्धो वागग्निरुद्दीप्तो भूत्वा शापरूपं प्रपद्य अन्यदीयकुलान्यपि दहति; तेन तदाश्रयाया रसनाया आत्मनोपि च अनिष्टं सम्पादयति । ततो रसनाबलं क्षीयते । परं वाक्संयमे तु पुरुषस्य पार्श्वे स्वर्गीयवातावरणमुदेति । मौनमेव अस्माकमात्मचिन्तने, मनने, ध्यानादौ च सुविधां प्रदाय आत्मानं विशुद्धं कृत्वा, परमात्मना सह सम्मेलने सौकर्यमादधाति । मनो दृढं विधत्ते, आरोग्यं च उपलम्भयति । आत्मकल्याणेप्सुना जनेन तदिदं मौनं निश्छलमभ्यसनीयम् ।

---

## अन्योक्तिः

नास्योच्छ्रायवती तनुर्न दशनौ नो दीर्घ-दीर्घः करः
सत्यं वारण ! नैष केसरिशिशुस्त्वाडम्बरैः स्पर्धते ।
तेजोवीनमसह्यमस्य हृदये न्यस्तं पुरा वेधसा
तादृक् तादृशमेव येन सुतरां भोज्यं पशुं मन्यते ॥

## —: प्रहसनानि :—

१

वाष्पयान-स्थिति-स्थाने अटन्तमेकं पाश्चात्त्यवेश-भूषासज्जितं सज्जनमपृच्छत् कश्चिद् ग्राम्य-यात्री—

महाशय ! वाष्पयानं कदाऽऽगमिष्यति ?

महोदयः सकोपमुवाच—अरे । भगवता ते चक्षुषी प्रदत्ते । घटिकायन्त्रं च संमुखे वर्तते । त्वमेव तावद् अवलोकय ।

२

एकदा कस्यापि श्रेष्ठिनो गृहे चौराः समागताः । ते आभूषणानां मञ्जूषां गृहीत्वा प्रपलायिताः । यदा तस्य गृहिण्या सर्वमेतदवगतं तदा रोदितुमारब्धवती । किन्तु श्रेष्ठिना प्रोक्तम्—मा भैषीः । नीता यदि मञ्जूषा, किं तेन, यथेच्छं नीयताम् । कुञ्चिका तु तस्या मम समीपे वर्तते । तया विना वराकास्ते कथमुद्घाटयिष्यन्ति ताम् ।

३

पुत्रः—अम्ब ! श्रूयते नारिकेलेऽपि दुग्धं वर्तते ।

माता—आम्, वत्स ! वर्तते ।

पुत्रः—तर्हि वद मातः ! कथं तद् दुह्यते ?

४

एकस्यां श्रेण्यां पञ्चविंशतिः छात्राः आसन् अधीयानाः । तेषु सोहन एव एकः अनुत्तीर्णः अभवत् । अध्यापकः सोहनम् अपृच्छत्—

अरे सोहन ! त्वं कथम् अनुत्तीर्णः ?

सोहनः प्रत्युत्तरं ददौ—किमहं वच्मि गुरो ! मह्यम् अवसर एव न मिलितः प्रतिलिपिकरणस्य ।

---



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# प्राचीना अर्वाचीना च शिक्षाप्रणाली

## [ अर्वाचीना प्रणाली ]

प० श्रीगिरिराजशास्त्री, जयपुरम्

नगरस्य विद्यालये (हाई-स्कूले) प्रवेशिका (एन्ट्रेंस) कक्षायां प्रधानाध्यापक उत्थितः पाठयन् आस्ते । विद्यार्थिवृन्दश्च समीपे एव तिष्ठन् दत्तावधानोऽस्ति।

प्रधानाध्यापकः—पूर्वं भारते असभ्याः न्यवसन् । ते कोल, किरात, भिल्ल इति नाम्ना सम्बोध्यन्ते जनैः । यानि गोपालकाः अनर्गलं गायन्ति स्म,तान्येव जनाः वेद इति नाम्ना उद्घोषयन् । तस्मिन् समये सर्वे असभ्या आसन् । आङ्ग्ला भारतवर्षम् अशिक्षयन् ।

ज्ञानचन्द्रः – सर्वम् असत्यम् । आङ्ग्लानां जन्मतः पूर्वं भारतराष्ट्रं सभ्यं वर्तते स्म । रामायणमहाभारतकाले आङ्ग्लाः कुत्र आसन् ? अस्माकं वेदाः, शास्त्राणि, उपनिषदः पुराणानि च भारतस्य प्राचीनसभ्यतां उद्घोषयन्ति । किराता भिल्लाश्च आङ्ग्लानां देशे न सन्ति किम् ? किं तेषां देशः पूर्णतया सभ्यः संजातः ?

प्रधानाध्यापक :—उच्यताम्, कर्मचन्द्र ! स्वेज-कुल्यायाः ( स्वेज-नहर ) कति संख्याकानि पोतस्थगन-स्थानानि (बंदरगाह) सन्ति ?

कर्मचन्द्रः—स्वजीवने अनुपयुक्तानि स्वेजधारायाः पोतस्थगनस्थानानि स्वमस्तिष्के धृत्वा अहं निज-मस्तिष्कस्योपरि न वाञ्छामि इयन्तम् अत्याचारं कर्तुम् । अस्माकं विद्यालयस्य पुस्तकालये एकं भूगोलस्य पुस्तकं वर्तते, तस्मिन् लिखितानि समस्त-संसारस्य पोतस्थगनस्थानानि ।

प्रधानाध्यापकः—सुरेशः क्व गतः ?

ज्ञानचन्द्रः—वातायने स्थितो धूम्रपानं करोति।

प्रधानाध्यापकः—भो रमेशचन्द्र ! प्रशान्तमहा-सागरं............

रमेशः—हा कष्टम् , महत् कष्टम् ।

प्रधानाध्यापकः—किं भूतम् ?

रमेशः—हरिचन्द्रेण एका सूचिका मम ऊरुप्रदेशे न्यखन्यत ।

प्रधानाध्यापकः—भो हरिचन्द्र ! इदं किं चेष्टितं त्वया ?

हरिचन्द्रः—अयं मम समीपे किमर्थम् अतिष्ठत् ? अहम् एतस्मात् घृणां करोमि ।

प्रधानाध्यापकः—केन कारणेन घृणां करोषि ?

हरिचन्द्रः—रमेशः मम पितरम् एतत् अकथयत यद् अहं द्यूतं क्रीडामि, द्वौ चत्वारि वा रूप्यकाणि प्रतिदिनं गमयामि । व्येमि तु अहम् , अस्य दास्याः पुत्रस्य पितुः किम् व्ययः भवति ?

प्रधानाध्यापकः—युवां भिन्नस्थानयोः तिष्ठेतम् ।

रमेशः—उपवेशनार्थं काष्ठफलकं नास्ति समीचीनम् । अहम् आगामिदिनात् एकं दर्भासनं आनेष्यामि, सर्वेभ्यश्च दूरम् एकान्तस्थाने उपवेक्ष्यामि ।

प्रधानाध्यापकः—भो दिनेश ! बीजगणितं कण्ठ-स्थीकृतं त्वया ?

दिनेशः—यदा अहं बीजगणितं हस्ते धारयामि तदा कोऽपि मम हृदये वदति यत् 'मा कुरु स्वमस्तिष्केण सह अत्याचारम्' ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अस्माकं 'कर्तव्यम्

( निवेदक :—पण्डितश्रीलक्ष्मीनारायण-पुरोहितः, साहित्याचार्यः, कविकलानिधिः,
महाराणा-संस्कृतकालेज-साहित्य-प्राध्यापकः, उदयपुरम्, राजस्थानम् )

[ विद्वद्वरेण्यस्य हृदयस्पृशो विचाराः भारतीपाठकैः मननीयाः कार्यरूपे विपरिणमनीयाश्चेति-संपादकः ]

संस्कृतभाषाया महत्त्वं न केवला भारतीया एव, अपि तु वैदेशिका अपि मुक्त-कण्ठमूरीकुर्वन्ति। तदूरीकरणे च तेषां गतानुगतिकता अन्धश्रद्धा वा कारणं भवेत्; सा वार्ता नास्ति। किन्तु निर्गतेष्वपि गणनातीतेषु वर्षयुगेषु अमरसरस्वत्या वसुमत्या इव पूर्ववत् स्थायित्वम्, एकयैव वर्णानुपूर्व्या अनेकार्थबोधन-शक्तत्वम्, औचित्यानुसारिणा नानाविधेन स्वरूपेण तत्त्वोपस्थापनसमर्थत्वम्, जीवनोपयोगिना विविधेन साहित्येन संभृतत्वम् - एवमादयस्तस्या महान्तो गुणा एव उत्तरोत्तरमधिकाधिकानां लोकानां मानसान्यावर्जयन्तस्तन्महत्त्वस्वीकारे कारणानि सन्ति। यदा विश्वसाहित्यस्य सर्वोत्तमा ग्रन्था ज्ञानविज्ञानराशयो वेदाः, तत्त्वामृतपरिपूर्णानि गम्भीरतमानि दर्शनानि, चतुर्वर्गसाधकं सुविस्तृतं धर्मार्थकामादि-शास्त्रजातम्, मानवजीवनस्य विविधाङ्गानां विवेचकानि सरसमनोहराणि पुराणेतिहासकाव्यनाटकादीनि च अमरभारत्यां वर्तेरन्, तदा तस्या महत्त्वप्रकाशनाय अधिकं किमिव कथयितुमावश्यकं स्यात्?

किन्तु जागरूकेऽपि सुरसरस्वत्या विश्वसम्मान्ये महत्त्वव्यतिकरे साम्प्रतिकाः केचन प्रगतिशील-मानिनस्तामिमामेव मृतभाषेति खेदास्पदेन पदेनापि कलङ्कयन्ति। वयं च तदुपजीविनः केवलेन तन्महत्त्व-

---

प्रधानाध्यापकः—अस्माकं शिक्षया मस्तिष्कस्योपरि अत्याचारः हृदयस्योपरि व्यभिचारश्च भवति किम्?

ज्ञानचन्द्रः—इमानि समस्तपाठ्यपुस्तकानि त्याज्यानि।

दिनेशः—यदि अस्माकं भाग्ये लेखकत्वमेव (क्लर्कपन) लिखितम् तर्हि लेखकस्य कृते यानि आवश्यकानि तान्येव पुस्तकानि अस्माभिः पठनीयानि। इमानि तदर्थमनुपयुक्तानि व्यर्थपुस्तकानि किमर्थं पाठ्यन्ते।

प्रधानाध्यापकः—न भविष्यथ यूयं विद्यायाः पारंगताः।

ज्ञानचन्द्रः—न विद्येयम्, किन्तु अविद्या इति उच्यताम्।

प्रधानाध्यापकः—यूयं मन्दभाग्याः स्थ।

ज्ञानचन्द्रः—अपशब्दस्योत्तरम् अपशब्देनैव भविष्यति।

प्रधानाध्यापकः—अहम् त्वां विद्यालयतः सर्वथा निष्कासयिष्यामि (रेस्टीकेशन कर दूंगा)

ज्ञानचन्द्रः—विद्यालयात् योऽस्मान् निष्कासयिष्यति तस्य वयं मार्गे पादत्राणैः पूजां करिष्यामः।

रमेशः—भो सांसारिकाः! अयमस्ति अस्माकम् अर्वाचीनशिक्षाया आदर्शः।

आमूलचूडमस्ति सर्वं विपरीतम् अशुद्धं च। अतः प्राचीनशिक्षा एवं शिक्षापद्धतिरेव भारतीय-विद्यार्थिभिः भारतस्य उन्नतिकरणाय ग्राह्या।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



घोषणेनैव स्वकर्तव्यानां समाप्तिं मन्यमाना हस्तोपरि हस्तं धृत्वोपविष्यास्तच्छ्रृण्वन्त एव तिष्ठामः। तथा प्रलापिनां वराकाणां तेषां प्रलपने मा भून्नाम किमपि तत्त्वम्, तथाऽपि अस्माकमपि किं तेषां प्रतिवादे केवलं सुरगिरो महत्त्वप्रख्यापनमेव पर्याप्तमुत्तरम्? संस्कृतोपजीवितत्वेन गण्यमानासु इतरभाषास्वपि दीयतां सम्यग् दृष्टिः। यासु परःकोटयो लोकाः सरुचि परस्परं भाषन्ते, परःसहस्रा नवनवा ग्रन्थाः प्रत्यहं प्रकाशन्ते, परःशताश्च विविधाः पत्रपत्रिकाः परितः प्रसरन्ति। तान्येव च तासां जीवितत्वाभिमाने कारणानि सन्ति। किं संस्कृतानुजीविनो विद्वांसोऽपि संस्कृतज्ञैः स्वसुहृत्सम्बन्धिभिः सह संस्कृतेन व्यवहरन्ति? संस्कृते साम्प्रतमावश्यकानि कानिचित् पुस्तकानि लिखन्ति? पत्रपत्रिका वा प्रचारयन्ति?...

सर्वस्यैतस्य नकारात्मकमेव चेदुत्तरम्, तर्हि 'संस्कृतं मृतभाषेति' प्रलापाय संस्कृतानुजीविनो वयमेव किमवसरं न वितरामः?

आम्, संस्कृतसमाजस्य सुतरां कृशतया संस्कृते लिखितानां पुस्तकानां पाठका अपि स्वल्पतमाः सन्ति, तेष्वपि च मूल्येन गृहीत्वा पुस्तकानि पठितारस्तु पुनरनस्तिकल्पाः। शिक्षणालयेष्वपि च संस्कृताध्ययनस्य अनिवार्यत्वाभावात् स्वल्पमेव पाठ्यजातम्, तस्मिन्नपि च पुनः पुस्तकनिवेशन एवाऽधिकारिणामतितमामाग्रहस्तिष्ठति। नवीनग्रन्थस्य समुचितः समादर एव न भवति। तदा किंवा कुर्युः संस्कृतलेखका अपि पुस्तकानि लिखित्वा? स्वान्तःसुखायैव सुरसरस्वत्याः सेवनं विधीयेतेति चेत्, अतिकठिनमेतत् कार्यं महर्घतामयेऽस्मिन् समये प्रायेणार्थकृशानां संस्कृतविदुषां कृते। यद्यपि सर्वथा सत्यमेतत्, तथाऽपि संस्कृतज्ञा वयं संस्कृतज्ञैः स्वसुहृत्सम्बन्धिबन्धुभिः साकं वाचिकं लैखिकं वा व्यवहारं तु संस्कृतेन कर्तुं सुतरां प्रभवाम एव। तस्मिन्नपि वयं कुत्र दार्ढ्यं रक्षामः? व्यवहारस्तु, यया कयाचिदपि भाषयाऽस्तु, स्वकीयैः सह अस्माभिरपि अनिवार्यतया करणीय एव भवति। तस्मिंस्तु नास्ति कोऽपि प्रतिबन्धकः समयाभावोऽर्थाभावो वा प्रतिबन्धकाभावेऽपि संस्कृतज्ञा वयं यदि तस्मिन् स्वकीयामनास्थामरुचिं वा प्रकाशयामः, तर्हि अमरभारत्यै मृतभाषात्वरूपकलङ्कप्रदापने तदुपजीविनो वयमेव प्रतिभुवः कथं न स्मः? हन्त! विश्वमान्यायाः सुरसरस्वत्याः सोऽयं मृतभाषात्वरूपकलङ्कसम्पर्कः तदुपजीविनामस्माकमेव शैथिल्येनाऽस्तीति भृशं शोचनीयम्!

मान्या विद्वांसः! अमरसरस्वत्या मृतभाषात्वरूपकलङ्कापनोदनाय के नु खलु उपायाः सम्प्रति अस्माभिरास्थीयन्ताम्, इति यदा विचार्यते, तदा मन्मतौ अयमेव तावत् प्रथममुपारोहति, यत्-

१–संस्कृतज्ञैरस्माभिरेष सुदृढः संकल्पः करणीयः यत् संस्कृतज्ञैः स्वसुहृत्सम्बन्धिबन्धुभिः सह वयं स्वकीयं सर्वविधमपि व्यवहारजातं संस्कृतेनैव संचालयिष्यामः।

२–ततस्तावदयं, यत्-अस्माकं सम्बन्धिषु ये संस्कृतज्ञानरहिताः सन्ति, तान् संस्कृतं शिक्षयितुं नियमितरूपेण अस्माभिः प्रयतनीयम्।

३–ततश्चाऽयम्, यत्-युगमिदं संघटनशक्त्याः। संघटनमन्तरा न कानिचिदपि महान्ति कार्याणि समयेऽस्मिन् संभवन्ति। संस्कृतेतरसमाजैरपि संघटनेनैव स्वकीयानि महान्ति कार्याणि साध्यन्ते, साध्यमानानि च तान्यस्माभिर्दृश्यन्ते। अतोऽस्माभिरपि स्वकीयं संघटनं सुदृढं सम्पादनीयम्। स्थाने स्थाने संस्कृतज्ञैः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



संभूय समित्यादिरूपेण सुव्यवस्थितानि संघटनानि स्थापनीयानि। तेषां च माण्डलिकैः संघटनैः सम्बन्धं संस्थाप्य, तद्द्वारा प्रान्तीयेन अखिलभारतीयेन च सम्मेलनाख्यमहासंघटनेनापि सम्बन्धः सम्पादनीयः। स्वकीयाश्च सर्वा अपि सामाजिक्यः समस्याः सम्मेलनसम्मुखे समुपस्थापनीयाः। सम्मेलनं तासां समाधाने प्रयतेत। अस्माभिश्च तदनुसारिभिस्तत्परिगृहीतेषु कार्येषु सहयोगः करणीयः।

४—ततश्चायम्, यत्-सर्वैस्तत्स्थानीयैः संघटनैर्विविधपर्वोत्सवेषु सरल-सरलेन संस्कृतेन हिन्द्या च सम्पद्यमानानामुपदेशप्रदानां रोचकानां प्रवचनसभानाम्, आकर्षकाणां विविधवादगोष्ठीनां, सरसमधुराणां कविसम्मेलनानां, रुचिररुचिराणां च नाटकादिप्रदर्शनानां यथासमयमायोजनानि क्रियेरन्। येन संस्कृतज्ञानां जनतया नैकट्येन परिचयः स्यात्। संस्कृतसरस्वत्याः समादरदिशि जनसमुदायोऽप्याकृष्टो भवेत्। संस्कृतविदुषां च जनतायामुपयोगिताऽपि साधु गण्येत मन्येत च।

५—ततश्चाऽयम्, यत्-संस्कृताध्ययनस्य अनिवार्यता शालासु किंचिज्जाता, तस्या व्यापकता यथा पर्याप्ता जायेत तथाऽस्माकं संघटनेन निरन्तरं यतनीयम्।

६—ततश्चाऽयम्, यत्-अस्माकं संघटनेन संस्कृतप्रचारकार्यमपि सत्वरमुत्थापनीयम्। ये जनाः संस्कृते रुचिमन्तोऽपि दिवसे कार्यान्तरव्यासक्ततया शालासु गत्वा संस्कृतमध्येतुं न पारयन्ति, तेषामध्ययनाय स्थाने स्थाने संस्कृतप्रधाना रात्रिशालाः संचालनीयाः। तथा ग्रीष्मावकाशेषु अल्पकालिकसंस्कृतशिक्षणशिविराण्यपि स्थाने स्थाने उद्घाटनीयानि। येषु सरलया संक्षिप्तया च पाठ्ययोजनया संस्कृतस्नेहिनो बालाः प्रौढाश्च स्वल्पेनैव समयेन संस्कृतं वक्तुं ज्ञातुं च शिक्षिताः क्रियेरन्। कार्येऽस्मिन् शिक्षकवर्गैः प्रौढच्छात्रैश्च सोत्साहः सहयोगः करणीयः। एवं करणेन प्रतिवर्षं प्रवर्धमानैः संस्कृतज्ञैः एकस्य महतः संस्कृतसमाजस्य रचना भविष्यति। यस्मिन् संस्कृतस्य लेखक-पाठकानां वक्तृ-श्रोतॄणां च न जातु नैयून्यं स्थास्यति। तदा च संभवत्स्वपि संस्कृति-संस्कृतद्वेषिषु न कस्याऽपि स्यात् साहसं, यत् स सुरगिरः कृते मृतभाषेति पदं प्रयुञ्जीत।

७—ततश्चाऽयम्, यत्-'सर्वारम्भास्तन्दुलप्रस्थमूलाः' अर्थस्य साम्राज्यमयेऽस्मिन् भौतिकतायाः समये यदा अर्थ एव साधारण्येन योग्यतायाः प्रतिष्ठायाश्च प्रमापकः परिगण्यते, तदा संस्कृतज्ञैरपि स्वकीयाया आर्थिकदशायां उपेक्षा कथमपि कर्तुं न युक्ता। संस्कृतज्ञानामार्थिकदशा, कांश्चिदपवादान् परित्यज्य; कियती क्षीणा, इति विदितमेव समेषामपि विदुषाम्। तेष्वपि च संस्कृतशिक्षकाणामार्थिकदशा तु अतीव क्षीणा। अतः संघटनेनाऽस्माकं संस्कृतशिक्षकाणामार्थिकदशाविषये प्रथममवधेयम्; ततोऽन्येषाम्। तेषां कृते शिक्षाधिकारिणो बोधनीयाः यत्—ते संस्कृतशिक्षकाणां समुचितवेतनमानवर्धनं विदध्युः। यतः-संस्कृतस्य अध्यापकोऽपि सुबहून् वत्सरान् परिश्राम्यन्नेव विविधपाठ्यजातं चाऽधीत्यैव अध्यापकपदमध्यारूढो वर्तते, शालासु च इतराध्यापकवत् सर्वदैव कार्यसंलग्न एव तिष्ठति; न कदाचिदपि कार्यशून्यो भवति। यदा सोऽपि च इतरशिक्षकजनवत् सर्वा अपि सांसारिकीः समस्याः स्वेन सम्बध्नाति; तदा कथमिव नाऽर्हति सोऽपि स्वपरिश्रमस्य समुचितं मूल्यमधिगन्तुम्?

आसीत् सोऽप्येकः समयः, यदा कुटिलकूटनीतिक-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



लार्ड-मेकालेकृतनिर्देशानुसारेण भारतीयां संस्कृतिं सभ्यतां च उन्मूलयितुं भृशं प्रयत्यते स्म, सुधा-स्रोतांसि शतशत्मुखैः समुद्वहन्तीं सुरसरस्वतीं च समुच्छेत्तुं आपादशिखं प्रस्वेदप्रवाह एकीक्रियते स्म। अतस्तदानीन्तनाः संस्कृतशिक्षकान् द्वारीकृत्य सुर-भारत्या उपरि क्रियमाणाः प्रहाराः कञ्चिदर्थं रक्षन्ति स्म। किन्तु भारतीयानां सौभाग्येन आङ्ग्लानाम-न्धकारमयः स पैशाचः समयः समतिक्रान्तः, विद्योतते च सम्प्रति भारतीयवसुन्धरावलये स्वातन्त्र्यदिवाकरः। अत आङ्ग्लानुयायित्वमोहनि-द्रयाऽपि भारतादपेतव्यमेव । भारतीयराष्ट्रस्य अभ्युदयाय जागरूकैर्महाभागैश्च इदानीं सम्यग् द्रष्टव्यम् यत्-भारतस्य सर्वथा श्रेयः,राष्ट्रियं संघटनम्, राष्ट्रभाषायाः संवर्धनम्, विदेशेषु प्ररूढस्य गौरवस्य च संरक्षणं भारतीयसंस्कृत्यामेव सन्निधीयते। भारतीयसंस्कृतिश्च स्वस्याः समवस्थानाय सुप्रसाराय च सुरसरस्वतीमेव सर्वथा समालम्बते। अतः सुर-सरस्वतीवाहनानां संस्कृतसुधीहंसानां समुचित-पारिश्रमिकपयःप्रदानेन प्रोत्साहनं भारतीय-राष्ट्रस्य कल्याणायैव भविष्यति । अतस्तेषामुपेक्षा कथमपि न कर्तव्या।

८—ततश्चाऽयम्, यत्-उपाध्याय-शास्त्र्यादि-परीक्षो-त्तीर्णानां संस्कृतविदुषां हाईस्कूले कालेजे च संस्कृता-ध्यापनस्याऽधिकारः सम्प्रति सम्प्रतिषिद्धः। अतः सोऽयमपि नूनं सुरसरस्वत्या उपरि प्रहार एव साम्प्रतिको राजकीयाधिकारिणाम्। यतः प्राधान्येन संस्कृतमादायाऽधीतवतां संस्कृतविदुषां यावती शक्तिर्भवति सम्यक् संस्कृतमध्यापयितुम्, तावती नाऽन्येषां भवितुमर्हति । अतः संघटनेनाऽस्माकं तच्चिकित्साया अपि यतनीयम् ।

९—ततश्चाऽयम्, यत्-अस्माकं संघटनं संस्कृत-लेखकानां प्रोत्साहनायाऽपि प्रयतेत । संस्कृते लिखितानाम् उपयोगिपुस्तकानां प्रकाशनाय तल्लेखकानां च यथायोग्यपुरस्काराय सम्मेलनेनैव प्रबन्धो विधेयः।

१०-ततश्चाऽयम्, यत्-संस्कृतजगति सुव्यवस्थया संचलतां पत्राणां पत्रिकाणां च अभाव एव वर्तते। तेनाऽप्यस्माकं संघटने संस्कृतप्रचारे च महती क्षतिर्भवति। संस्कृतपरीक्षाणां पाठ्यक्रमोऽपि नैकविधः, तेनाऽपि समये समये महत्योऽसुविधा अनुभूयन्ते। एतादृशेषु विषयेषु अस्माकं महासंघटनं सम्मेलनमेवाऽवधातुं किंचित् कर्तुं च प्रभवति। अतस्तादृशानां महतां कार्याणां सम्पादनाय समेलन-मेवाऽग्रेसरीभवेत्, वयं च तत्सहयोगाय वदादेशवशं-वदा भूत्वा तदनुसारिणो भवेम। इत्येव सुरभारत्या मृतभाषात्वरूपकलङ्कापनोदनाय साम्प्रतमस्माभिरास्थेयः उपायः। एतेषां च तत्तद्रूपेण अविलम्बेनाऽवलम्बन-मेव अस्माकं कर्तव्यम् ।

परमदयालवः कोविदवरेण्याः ! विदितवेदित-व्यानामपि श्रीमतां पुरस्तात् परिस्थितिप्राप्तया अधीरतया यदेतद् विदितविनिवेदनाय प्रागल्भ्यमा-लम्बितम्, तत् क्षममाणास्तत्रभवन्तः संस्कृतसमाज-स्योपरि परित आपतन्तीनामापदां परिहाराय सत्वरमेव सन्नद्धा भविष्यन्तीत्याशासानो विरमामि विस्तरात्।

---

अन्तर्लापिका—

को निर्दग्धस्त्रिपुरजयिना ? कश्च कर्णस्य हन्ता ?
नद्याः कूलं विघटयति कः ? कः परस्त्रीरतश्च ।
कः संनद्धो भवति समरे ? भूषणं किं कुचानां ?
किं दुःसह्याद् भवति महतां "मानपूजापहारः"



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# प्रतिशोधः

[ भट्ट—श्रीमथुरानाथशास्त्री कविशिरोमणिः, जयपुरम् ]

देशस्य दुर्भिक्षेण दारुणदुर्दशाऽभूत् । ग्रामाः खर्वटाश्चोच्छिन्ना अभूवन् । दिनकरेण द्योतमानमपि दिनं तामसी रात्रिरिव भूरितमं भयमजनयत् । दीनाः धान्यकणानां कृते दूरदूरमधावन्, क्षुधया व्यलोठन् धरणौ, व्यक्रीणत कतिपयपणानां कृते देहमप्यात्मीयम् । हा हन्त, दुर्दैवस्य कीदृश आसीत्परिहासः, कालस्य कीदृशोऽभूद् दुर्विलासः । नेत्रे कोटरग्रस्ते, हस्तपदं निःसहम्, शरीरं च सर्वतोऽपि निर्बलमलोक्यत जनानाम् ।

ग्रामवृद्धा अकथयन्—ईश्वरस्य कोपोऽस्ति । वर्षा व्योम विलोकयतां व्यत्यगुः, शिशिरः शीतेन वेपमानानां व्यत्यगात्, संप्रति निदाघश्चण्डरश्मेर्ज्वलनज्वालया व्यत्येति । हन्त ! कीदृशी भयङ्करी कालस्य क्रीडास्ति । सत्यं सत्यमयमकालः । भूमिः शून्यमञ्चलं प्रसार्य विषण्णा व्यतिष्ठत । गोपग्रामो दीर्घनिश्वासानिव गृह्णाति स्म । भगवान्निशाकरः पर्णकुटीनां तासां मन्दतमं प्रकाशमचोरयत्[1] । चन्द्रज्योत्स्ना निजस्योत्सङ्गे संस्थाप्य तासां दीनकुटीनां दैन्यपूर्णां कथामिव शृणोति स्म । दूरे शृगालानां, ग्रामे शुनां शब्दो निस्तब्धतामभिनत् । अन्यथा सर्वत्र व्याप्तासीन्निस्तब्धता । रजनी निभृतमपश्यत्ताण्डवनृत्यम् ।

दैन्येन सर्वथा मन्दो नन्दो विषण्णायामेकस्यां पर्णकुट्यां कन्थोपरि पतितः शोचति स्म निजदिनानि । जाग्रत एव तस्य सा रात्रिर्नेत्रयोर्व्यत्यगात् । हन्त, ग्रामपतये कृषिशुल्कं शोधनीयमस्ति । अन्यथा कृषिक्षेत्रं हस्तान्निस्सरेत्, गृहमुच्छिन्नं भवेत्, सर्वस्वमपह्रियेत । आसीन्नन्दोऽतिदीनः, सर्वेषामाज्ञावहो भृत्यः । मन्दभाग्यः पामरः ।

महिषीछाग्यो वृषभाश्च ऋणपूरणे निःशेषा अभवन् । अवशिष्टमासीत् केवलं क्षेत्रम् । नानोपायैस्तस्य रक्षणचेष्टायामपि नाभूत्सफलता । क्षेत्रमिदं नन्दस्याधिकाराद्विच्युतमभूत् । नन्दस्य समीपे साम्प्रतमेका 'श्यामा' (गौः )अवशिष्यत । नन्दस्तस्यामत्यन्तमस्निह्यत् । क्षेत्रे कर्षणं कुर्वाणो यदा स नन्दः समाह्वयत् 'श्यामे !' तदैव सा धावन्ती तत्राऽगात् । पालितः सारमेय इव सा गौर्नन्दस्य पश्चात् पश्चादभ्राम्यत् । यदा सा नवमासानां वत्सतरी आसीत्तदारभ्यैव नन्दस्तामपालयत् । अत एवासीन्नन्दस्य तस्यामतिप्रणयः ।

पत्नीं गङ्गां पितृगृहे प्रापय्य मोहमयीनगरं नन्दो गच्छेत्, तत्रैव भृतिकार्यं कुर्यात्, द्रव्यमर्जयेत्, निरन्नमरणादात्मानं रक्षेत् । धूमयानाऽऽरोहणाय त्रिकट[2]स्य कृते नासीत्तस्य निकटे द्रव्यम् । संप्रति नन्दः श्यामां विक्रीणीत । गङ्गा भृशमनुरोधमकार्षीत् यत् श्यामां नासौ विक्रीणीत, किन्तु सर्वथा किंकर्तव्यमन्दो नन्दो विवश आसीत् । मोहमयीं गन्तुं रूप्यकाण्यपेक्षितानि, तानि च न नन्दस्य निकटे । अत एव श्यामाया विक्रय एवैकमात्रोपायः । रात्रिंदिवमत्याचारान् सहमानस्य नन्दस्य हृदयमभूच्छनैः कठिनम् । स कदाचिदपि श्यामां न व्यक्रेष्यत,

१ अर्थात् चन्द्रप्रकाशस्याग्रे स लुप्तोऽभवत् ।

२ त्रिकट', त्रिषु स्थानेषु कट्यते व्रियते (वाञ्छ्यते, दृश्यते) इति त्रिकटम् । 'कटे' वर्षावरणयोः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



निजशरीरं कामं स व्यक्रेष्यत। किन्तु सहनशीलताया अप्यस्ति काचित्सीमा। निरन्तरपातिभिर्दुःखैस्तस्य साम्प्रतमन्तःकरणं पाषाणायितम्।

गङ्गायाः पिता द्वितीये ग्रामे आसीद् यामिकः। कृषये भूमिरप्यासीत्तस्य निकटे। अत एव गङ्गा निजपतिं तत्रैव गत्वा निवस्तुमददान्मन्त्रणाम्। गङ्गायाः पितापि भूयांसमनुरोधमकार्षीत्। किन्तु श्वशुरगृहे उदरपूरणं नाभ्यस्येष्यत नन्दाय। दीनोऽप्ययं नन्दो निसर्गादमन्दो मनस्वी।

गङ्गां पितृगृहे प्रापय्य परावर्तिष्ट निजगृहं नन्दः। स्वामिनो विसर्जनसमये संस्मृतदुःखानुषङ्गा गङ्गा वाष्पमवमुञ्चती प्रावोचत्—प्रेषयिष्यसि शीघ्रं शीघ्रमात्मनः संवादम्। यावत्सम्भवं वर्षाभ्यन्तर एव परावर्तेथाः।

नन्दः—यथा परमेश्वरस्येच्छा।

मेघमिव जलपूर्णं हृदयमादाय परावृत्तवान् गेहं नन्दः। नन्दस्य गृहे नारायण-तिवारिणो भूयान्संमानः। आसीदपि सोयमतिसरलो ब्राह्मणः। नायं ग्रामवासिनां कस्मिन्नपि प्रपञ्चे पर्यपतत्। नन्दस्य श्यामा नारायणस्यासीदतिप्रिया। मार्गे यदा कदाचिदपि साऽमिलत् तस्याः पृष्ठं करेण परामृशन पुचुत्कारेण तामस्निह्यत्। नन्दो जानाति स्म यन्नारायणस्य गृहे श्यामा सुखिनी भवेत्। अत एव श्यामामादाय नन्दो नारायणस्य द्वारमुपागच्छत्। सबहुमानं प्राणमत्।

तिवारी पर्यपृच्छत्—'कथं भो नन्द! कुतः सिद्धेरिच्छा'।

'महाराज, सर्वमप्यपगतम्, इदानीमहमपि मोहमयीं गच्छामि।' सविषादमुत्तरमदान्नन्दः।

तिवारी—सत्यमेव, किं त्वं कुर्याः? दिनानां परिवर्तनमिदं दुर्लङ्घ्यम्। भूस्वामी चायं नितरां निष्ठुरः। ग्रामे सुतरामप्रबन्धोऽस्य। कर्मचारी यथा वाञ्छति तथैव सर्वैर्व्यवहरति। भूस्वामिनश्च विलास-विभ्रमेभ्य एव नाऽवकाशः।

उक्त्वैव चेदं, स हि सस्नेहदृष्ट्या पर्यपश्यत् श्यामाम्।

'भाग्ये यदासील्लिखितं संघटितं तत्। संप्रति भवादृशानामाशीर्वादं गृहीत्वा प्रयामि। किन्तु मार्गव्ययार्थं न मत्सविधे किञ्चित्। विंशतिरूप्यकाणि वाञ्छामि। श्यामा भवत्सविधे स्थास्यति।' महत्या निराशया प्रावोचदिद नन्दः।

तिवारी—(किंचिद्विचार्य) हन्त, नाऽभूत्तवोपरि लेशतोऽपि दया ग्रामाधीशस्य? सर्वनाशं कृत्वैव पर्यतुष्यत्। कदा ते प्रस्थानम्?

गृहाभ्यन्तरादानीय समार्पिपद् विंशतिमुद्रास्तिवारी। किन्तु नन्दो रूप्यकाणि हस्ते गृहीत्वा सविषादां दृष्टिं पर्यपातयत् श्यामाया उपरि। साऽपि तं दीनभावेन ददर्श। अतिकरुणं दृश्यमासीत्तत्। नन्दः श्यामायाः कन्धरायां हस्तमासज्ज्य करुणभावेन चुचुम्ब निःशब्दं नतमस्तको जगाम च।

किञ्चिद्दूरं प्रयाणे शुश्राव स 'बाँ, बाँ' इति हृदयद्रावकं शब्दम्। उरसि शिलामिव वहन् विचिचिन्त नन्दो यत् दीनतममाह्वयति श्यामा। किन्तु दृढीकृतहृदयस्तदिदं जल्पन् जगाम गेहं नन्दः—श्यामे! यदि तव भाग्येनाऽहं समर्थोऽभविष्यम् तर्हि .....'

हन्त, निःशेषीकृतनिखिलो नन्दः। कोऽस्य भाग्यं जानीयात्?

[ २ ]

मोहमयीमवाप्नोन्नन्दः। राजमार्गानभिवीक्ष्यैव स भ्रान्तचित्तोऽभूत। यतः पश्यति तत एव तस्य



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



दृष्टिः पर्यबध्यत। स कर्तव्यं विस्मृत्य इतस्ततो निरुद्देश्यं प्रवाहितोऽभूत्। ग्रामजातो दीनः सोयं न केनचिदासीत्परिचितः। मरुत्तरस्य भों भों रवेण, घोटकशकटीनां च दूरापसारणस्वरेण स नितान्तमुत्त्रस्तोऽभूत्। 'कुत्र गच्छामि, किं करोमि, भृतिकार्यं कुत्र लप्स्ये इत्येव प्रश्नाः पुनः पुनरुदतिष्ठन्नन्तःकरणे तस्य। व्यतीयुः कतिचिद्दिनानि। न वराकस्यास्य समुदैत्साहसं केनचित्सह संलापं कर्तुम्।

संन्यधीयत सन्ध्या। न्यलीयत भगवान्मार्तण्डः पश्चिमगगनकोणे। लक्षलक्षजनकलकलादुद्विग्न इव नन्दो नगराद्दूरमपासरत्। वेतनकार्यस्यान्वेषणे न वराकस्याभूद्विदितं यत्कियद्दूरमुपगतोऽस्मि। किन्तु जठरे ज्वलन्ती क्षुधाज्वाला कथंकारं विस्मर्येत? अभूदधुना निकामं क्षुत्क्षामः, एकत्र स्थितः पर्यपातयत् परितो दृष्टिम्। आसीन्महाविशालं बाटकम्[1]। तत्रैव बहुतरा महिष्यो गावश्चासन् निबद्धाः। स्वसदृशा मलिनवस्त्रधारिणः कर्मकरा न्यपतँस्तस्य दृष्टौ सेवाकार्यं कुर्वाणाः। किञ्चिदाश्वस्त इव भूत्वा समभ्यसरत्तान्। समभूत्संलापः। पर्यबध्यत परिचयः। नन्दः प्रकटीचकार स्वाभिप्रायम्। अभूत्सहानुभूतिस्तेषां तेन सह। तस्मिन्नेव दिने निजस्वामिनः संनिधावनीयत नन्दः। अभूद्दुग्धशालायां कर्मचारी नन्दः।

आसीद्वैदेशिकस्य धनपतेरियं विशाला दुग्धशाला (डेरी)। अभूद् दुग्धस्य व्यवसायो महति परिमाणेऽस्याम्। नन्देनालभ्यत तत्र कार्यं गवादीनां दोहनस्य। निपुणोऽप्यासीन्नन्दोऽस्मिन् कार्ये। प्रत्यक्षं परीक्षितोऽसौ कार्यालयाध्यक्षेण। पर्यतुष्यत्तस्य कार्येण स्वामी। व्यतीयुर्दिनादनन्तरं दिनानि। स हि महता परिश्रमेण पर्यपूरयन्निजनियोगम्।

[1] वाडा 'आहाता'

स्वाभाविकेन विनयेनाऽभूत्सर्वजनप्रियो नन्दः। शालाध्यक्षो धनपतिः परमं प्रासीदत्तेन। उत्तरोत्तरं पर्यवर्द्धत विश्वासो नन्देऽमुष्य।

प्राप्यत गङ्गया लेखितं पत्रं नन्देन। नन्दस्य कुशलवृत्तादिकमपृच्छ्यत तस्मिन्। नित्यनिर्वाहार्थं प्रार्थितान्यभूवन् रूप्यकाणि। कदा च निजदेशं परावर्तिष्यते इत्यपि तस्मिन् पृष्टमासीत्।

प्रैषयद् रूप्यकाणि नन्दो गङ्गायै। प्राहिणोच्च प्रत्युत्तरम्—'साम्प्रतमहं पूर्णसुखी। स्वामिनः समीपे वेतनरूप्यकाणि संचिनोमि। प्रान्तेऽस्मिन् भूयान् लाभो दुग्धव्यवसाये। एतद्व्यापारविषये संजातो मे भूयाननुभवः। कंचित्कालं भृतिकार्यं कृत्वा द्रव्यं राशीकरिष्यामि। ततः स्वयमहमिमं व्यवसायं परिचालयिष्यामि। निश्चितं महती लाभसंभावना। भवतीमपि तदैवाऽऽनायिष्यामि।'

[ ३ ]

व्यत्यगाद् वर्षद्वयम्—

नन्दो देहलीतो गा महिषीश्चानाययत्। त्वरितमेवाऽस्य भाग्यतारा समदीप्यत सफलतागगने। शनैरभूद् घनिष्ठता सफलतया सह। निजकार्यालये दुग्धं नवनीतं घृतं च व्यक्रीणीताऽसौ। उन्मीलिते अभूतां व्यवसायनेत्रे एतस्य। धान्यकणानां कृते वितृष्यन्नन्दः साम्प्रतं धनराशेरुपरि धनराशिं समचिनोत्।

एकं बान्धवं सह नीत्वा गङ्गापि समागान्मोहमयीम्। प्रबन्धविषये नाभूत्कष्टं नन्दस्य। इदानीं सर्वोऽपि गृहप्रबन्धो निर्व्यूढोऽभूद् गङ्गया। महता सुखसौभाग्येन व्यवसतां दम्पती। नन्दो दिवानिशं निजे व्यवसायकार्ये संलग्नोऽभूत्। न प्रतीयते स्म व्यतीयमानोऽपि कालस्तस्य। किन्तु नाऽभ्यरोचत



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नागरिकजीवनं गङ्गायै । केवलं प्रभूतपरिमाणेन समुपागच्छतो धनस्य लोभेन संतुष्टचित्तासौ समयं व्यत्यगमयत् ।

❀ ❀ ❀

व्यतीयुर्दश वर्षाणि—

दुग्धशालाध्यक्षो निजदेशं परावर्तिष्ट । नन्दस्तस्य दुग्धशालामिमामक्रीणान्निजधनेन । पर्यगण्यताऽसौ महाव्यवसायिषु साम्प्रतम् । स हि सम्प्रति नन्दा-न्नन्दरामः संवृत्तः । किन्तु मोहमय्या जलवायुभ्यां प्रत्यहमस्वस्थोऽयमस्थात् ।

समगादीद् गङ्गा ह्येकस्मिन्दिने—'पश्याम्यहं, भवान् दिनं प्रतिदिनं देहेनाऽपचीयते । बहोः कालादत्र मनोऽपि नौ विषण्णं तिष्ठति । प्रचुरं धनं दत्तवान्परमेश्वरः । संप्रति निजदेशं परावर्तावहे, तत्रैव कृषिव्यवसायेन निर्वह्यावहे । अत्रत्यजीवने सम्प्रति न प्रतीयते सुखम् ।'

गङ्गायाः कथनोपर्यचिन्तयन्नन्दोऽपि समये समये । तस्यापि मनसि कृतपदाऽभवत्सेयं वार्ता । एकदा सोऽप्यभाषिष्ट—'चलावो निजग्रामं संप्रति । नेदानीमत्र स्थास्यावः । अतिपरिमाणस्य धनस्य संग्रहेण किं नः कर्तव्यम् ? अहह, तानि नौ दिनानि कीदृशान्यासन् सुखपूर्णानि यदा हि समस्तं दिनं क्षेत्रे कार्यं कृत्वा सायं निजकुटीरं परावर्तिष्वहि । अहह, सर्वमिदं स्वप्नायितमभूत् ।'

कियतः कालस्य पश्चान्नन्दरामः स्वव्यवसाय-मुपसमहार्षीत् । एकस्य श्रेष्ठिनो हस्ते सर्वं विक्रीय धनं राशीचकार ।

गङ्गया पृष्टम्—'संहृत्य सर्वं कियत् ?'

'लक्षद्वयात्किञ्चिदधिकम्' ।

हर्षविस्मयाभ्यां जडीकृताङ्गा गङ्गा पाञ्चलिकेव प्रमोदाऽमन्दं पर्यवैक्षत नन्दम् । तस्मिन्नेव दिने प्रातिष्ठेतां निजदेशं द्वावपि ।

[ ४ ]

सर्वभावैरवन्ध्याऽभूत्सा सन्ध्या । एकयुगतोऽप्यधिकं कालं बहिर्व्यतिगमय्य निजगृहं परावर्तिष्ट नन्दः । तस्य जीर्णकुटीरोपरि महाविशालः प्रासादोऽभून्निर्मीयमाणः महद्भूतपरिवर्तनम् । दुर्लङ्घ्यो भगवत्या लक्ष्म्याः प्रभावः । ग्रामस्य प्रतिष्ठिता अपि पुरुषाः संप्रति नन्दरामस्यालिन्दे सानन्दमवातिष्ठन्त । स हि निजस्य वृत्तान्तमश्रावयत्सर्वानमायिकभावेन । ग्रामवासिनां संलापेनैव विदितं नन्दरामेण यद् ग्रामाधिपतिर्भूस्वामी साम्प्रतं पतनस्य सीमानमुपागतः ।

श्यामामवलोक्य नितरां खिन्नोऽभवन्नन्दः । अभूत्सा जरती । नाभूत्तस्या दुग्धमपि । अस्थिपञ्जरमदृश्यत तस्याः । नन्दरामः प्रचुरेण धनेन परितोष्य वृद्धब्राह्मणमिमं तस्मिन्नेव दिने समानैषीच्छ्यामामिमाम् ।

अद्याऽऽसीद् ग्रामस्य विक्रयदिनम् । ग्रामाधीशस्य राजहर्म्ये समताड्यत विक्रयसूचिका ढक्का । महा-महान्तो व्यापारिणो भूस्वामिनश्चासन् समवेतास्तत्क्रयणाय । विलासिताऽवगुण्ठने निलीनो भूस्वामी निजदशाया नग्नं दृश्यमपश्यत्साम्प्रतम् । नन्दरामोऽध्यगच्छत्संवादमिमम् । नितरां व्यषीदन्नन्दः । शुल्कपत्राणां महापुटकं संबध्य बहिरभूदसौ गेहात् । गङ्गा समतर्कयन्निजमनसि यन्नन्दरामो ग्रामोपरि स्थापयेन्निजाधिकारम् । ग्रामवासिनोऽन्येऽपि भूयस्तरामिदमेवाऽनुमानमकुर्वन् ।

अह ह नन्दरामो ग्रामविक्रयस्याऽश्रौषीद् भीषणां घोषणाम् । हन्त, पूर्वकालस्य भयानकानि दिनानि समनृत्यन्नेत्राभ्यन्तरे तस्य । अकम्पिष्ट करुणाशीलस्य



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## श्रीमहात्मा तुलसीदासः

[लेखकः—विद्याविनोदः, सिद्धान्तवागीशः, महामहोपाध्यायः पं० दशरथशास्त्री, सूकरक्षेत्रम् (सोरों जि० एटा)]

श्रुतिस्मृतिपुराणा–द्यः कलौ देवगिरां हरः ।
जनता–सुख–बोधाय "तुलसी गिरिजापतिः ॥
सूक्ति-पादोदकोत्तुङ्ग – तरङ्गैः क्षालितान्तरः ।
कलिजानां नृणामासी "तुलसी" तुलसी–प्रियः ॥
कलावल्प–वयोधीभ्यो निगमागम–शिक्षकः ।
स्व-भाषयाभवच्छ्रीमां "स्तुलसी" कमलासनः ॥
नानासुम–रसास्वाद–लुब्ध–विन्मक्षिकागणे ।
धन्यो रामपदाम्भोज–रसिकः श्रीतुलस्"यलिः ॥
प्रसाद – मधुरव्यङ्ग्य–रस – रीति–निनादिते ।
भाषर्षि-पङ्क्ति–रङ्गे "श्रीतुलसी" कोकिलः कविः ॥
शब्दा–नुमिति–मानादि–दृढयुक्ति–नखायुधैः ।
वादीभ–कुम्भ–विध्वंसी "तुलसी" केशरी बली ॥
अहर्निश–मति–प्रीत्या प्रसन्नमुख–पङ्कजः ।
जिज्ञासु–शासने शान्त-चेताः "श्रीतुलसी" गुरुः ॥
सम्भक्तावुद्धवो, योगे दत्तो, ज्ञाने शुकोऽभवत् ।
विधौ कात्यायनः, कान्तौ ग्लौरन्य "स्तुलसी" लसी ॥
पद्याष्टकमिदं प्रोक्तं तुलसीवर्णनात्मकम् ।
बुधा दशरथाख्येन पापघ्नं कामदं नृणाम् ॥

## भूदान-चतुश्लोकी-गीता

(ले० शंकर-नत्थू-शुक्लः, बड़वाहा (म.भा.)

१

कुटुम्ब – संरक्षण – पुष्कला मही
भूदान – सत्रेऽर्पय शीघ्रमेव ।
नो चेद् गमिष्यत्यचिरेण सा भू—
श्चलास्ति लक्ष्मीः प्रचला धरित्री ।

२

स्वार्थता न जलकर्षणे रवे—
स्त्याग एव प्रतिभाति भूतले ।
भूमिदान - सुमखे - तथाऽधुना
सर्व-मानव-हितं हि वर्तते ॥

३

विरम्यतां वाक्यमिदं तु भारवे—
"लभ्या धरित्री तव विक्रमेण" ।
गान्धी-विनोबाऽऽचरितेन ज्ञायते
लभ्यास्ति भूमिः खलु विक्रमाद् ऋते ॥

४

नदीषु गङ्गाऽस्ति हि सर्वश्रेष्ठा
नरेषु चासीद् यदुवंशनन्दजः ।
तथाऽधुना चास्ति महीयसां मते
सर्वेषु दानेषु महीप्रदानम् ॥

---

तस्य हृदयम् । अतीव विषण्णो मृतप्राय इव जडीकृतनेत्रः संमुखेऽवातिष्ठत दीनो भूस्वामी । परानुकम्पया नितराममन्दो नन्दो नात्मानमवस्थापयितुमशकत् । ग्रामाधीशस्य दीनदशां विलोक्याद्रवद् हृदयं तस्य । स हि तत्कालं शुल्कपत्राणां पुटकं तस्य संमुखेऽवस्थाप्य दीनमगदत्—'स्वामिन्! अहमिदं दुःखमनुभूतवानस्मि पूर्वम् । न कुर्याद् भगवान् यत्कश्चिदिदं दारुणदिनं द्रष्टुं बाध्यो भवेत् । गृहीत धनराशिमेनम् । अनेन हि संरक्षत निजं ग्रामम् । भवता कृतेनाऽप्यपकारेण मे समभून्महानुपकारः । सोयं धनसंग्रहो भवत्कारणात्, अत एवास्त्यधिकारो भवतः ।'

हर्षविस्मयलज्जानुतापैरनीशो ग्रामाधीशो मूर्च्छित इव तदभिमुखं पश्यन्नेवातिष्ठत् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अस्मदीया "एलोरा" यात्रा

[ लेखक :--श्रीजगपालसिंहः शास्त्री, हिन्दीप्रभाकरः, जनता-हाईस्कूल, रोहतक ]

जूनमासस्य चतुर्थे दिवसे दिल्लीतः प्रस्थिता वयं पञ्चमे दिवसे प्राप्तवन्त औरङ्गाबादनगरम्। प्रथमो दिवसस्तु नगरभ्रमणादिकार्येणातिवाहितोऽस्माभिः। द्वितीयेऽह्नि प्रातरेव प्रस्थिता वयमेलोरां प्रति निरीक्षितुं तत्रत्यानि विविधकौशलमयानि स्थानानि। यद्यपि चिरकालसञ्चितदिदृक्षाप्राबल्येन न वयं स्थायि स्थैर्यं धारयितुं प्राभवाम तथापि नियतसमयात्पूर्वं प्राप्य तत् स्थलं, प्रतीक्षालम्बनं व्यदधाम एव।

नववादनसमये समुद्घाटिताः सर्वा गुहाः। विहितसंक्रमणानां पथिप्रदर्शक एक आसीदग्रभागे चलन्नस्माकम्। स हि समकेतयत् नूतनस्थलमार्गान्, सुस्पष्टञ्चावर्णयत् तं तं विषयमधिकृत्य। गुहानिर्माणं महता परिश्रमेण, संतक्ष्य प्रस्तरखण्डभागान्, विविधशैलीस्वीकरणपुरःसरं समूर्त्तिकलाकौशलप्रदर्शनं कृतमासीद् विज्ञैः कलाविद्भिः। एकसंख्याकातो गुहातो दशसंख्याकां गुहां यावदासन् बौद्धधर्मपरिचायिका मूर्त्तयः। एतासां दशमी चैत्यविहारनामा गुहा विशेषतो महत्त्वपूर्णा। अस्या मध्यभागे हीनयान-महायानसंज्ञं बौद्धधर्मस्य सम्प्रदायद्वयं संयोजयन्निव स्तूप एको महान्निर्मितोऽस्ति। मूर्त्तिनिर्माणकौशले ब्रह्मदेशीयकलाप्रतिबिम्बं स्पष्टं संलक्ष्यते। गुहा एता द्वादशशतसंवत्सरेभ्योऽधिकाः पुरातन्यःसन्ति।

इतोऽन्यभागे सन्त्यपरा निर्मिता हिन्दूधर्मसम्बन्धिन्यः षोडश गुहाः। एतासां षोडशी गुहा कैलासमन्दिराभिधेया विराजते। सा किल सर्वाभ्यो विशिष्टा वर्तते। अस्यां गुहायां, समुत्थापित–गौरीशङ्कराधिष्ठितकैलासपर्वतस्य दशाननस्य चरितं मूर्त्तरूपेण समुपस्थापितमास्ते। एतद्गुहास्थमूर्त्तिकृतिः सजीवतामिवोद्भावयति मूर्त्ते दर्शकगणस्य चेतसि। अतोऽन्यासु गुहासु हिन्दूधर्मस्यान्यदेवतानां बह्व्यो भव्याकृतयो मूर्तयो विराजन्ते। दृश्यस्यैतस्य सम्यक् समवलोकनेनानुमीयते कलाकर्तृत्वं प्राचीनकालस्य मूर्तिवैभवप्रसृतिश्च।

इतोऽन्यप्रान्ते पञ्चषा गुहा जैनधर्मं द्योतयन्त्यस्तिष्ठन्ति। आसां मध्ये विभिन्नतीर्थङ्कराणां मूर्त्तयो रचिताः सन्ति। एतासु मूर्तिषु वैशिष्ट्ययुता न काचिच्छैली प्रतिभाति प्रभावोत्पादिका च। स्थानमेतत् त्रयाणामपि धर्माणां संस्कृतेः केन्द्रभूतं विद्यते। अपि चैतत्त्रिवेणीतुल्यं भाति, धर्मत्रयस्य भावनासंस्कृतिविशेषतानामेकत्र संमेलनात्। तदानीन्तनी मूर्तिकला भारतवर्षस्य कलागौरवं ख्यापयन्ती ग्राह्या विद्य उदाहरणत्वेन। महतः पर्वतशिखरान् संभेद्य, निर्मितं विस्तृतं रमणीयमेकं सद्म विद्यते तासां मध्ये, यत्र मानवानां पञ्च सहस्राणि ससुखं समुपविश्य भाषितं श्रोतुं शक्नुवन्त्युच्चघोषणयन्त्रं विना।

सौन्दर्ये चिरस्थायित्वे चाद्यतनी अपि मूर्तिकला [Picture art) न तस्य साम्यमधिरोहति। होरात्रयं यावत् 'एलोरा'यात्रां विधाय हृष्टैर्विस्मितैश्च चेतोभिर्वयं प्रतिनिवृत्ता निजावासम्।

.........



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# जगतः कर्ता परमात्मा

[ ले० साहित्यरत्न–प० छगनशास्त्री, श्रीरघुनाथसंस्कृतविद्यालयः, सीकर [राजस्थान]

असारेऽस्मिन् संसारे विविधमतमन्तॄणां नास्तिकास्तिकादिवादप्रवराणां विद्वद्वराणां वादग्रस्तविविधवागाडम्बरं बहुशः श्रुतम्। किन्तु प्राक्तनसंस्कारैर्विना महाघभारभङ्गुराम इलाम् ईश्वरमन्तराऽन्यो निर्भरां कर्तुं न प्रभवतीति निर्णयं गच्छामः।

अखिलेऽप्यस्मिन् जगति यावन्तः प्राणिनः सन्ति तेषां कर्ता,भर्ता,हर्ता च परमात्मा एवास्ति। परमात्मानमन्तरा नास्त्यन्यः कश्चित् जगतः कर्तेति सर्वैरपि निःसन्देहमवगन्तव्यम्।

कस्मिंश्चित् पत्तने धनाढ्यः कश्चिदाँग्लभाषापारगः प्रधानन्यायाधीशो बाबूमहोदय आसीत्। जगदिदं परमाणु-द्व्यणुक-त्र्यणुकादिभिः प्रकृतिसिद्धैरुपायैः स्वयमेव सृज्यते परिपाल्यते विसृज्यते चेति' तस्य हृत्पटलेऽमिटान्यक्षराणि समुल्लिखितान्यासन्। गेहे च तस्यैवौरसस्तनुजः महेन्द्रनामा प्राक्तनसंस्कारैर्मातृगुणाधिक्येन वा परमात्मनः परमभक्त आसीत्। कालेजे च स बी.ए परीक्षायां पठन्नासीत्। प्रत्यहं प्रत्यूषे परमात्मनः पूजां कालेज-गमनात्प्रागेव करोतिस्म। कारणेनानेनैव प्रतिदिनं कालेजे तस्यानुपस्थिति र्भवति स्म। मासपूर्तौ कालेजीयः कश्चित्पत्रवाहकभृत्यः (चपरासी) अनुपस्थितिदण्डाङ्कितपत्रं(फाइनबिल)समादायागतः प्रोवाच च बाबूमहोदयम्, 'श्रीमन्! महेन्द्रस्यानुपस्थितिदण्डं वाञ्छन्ति प्रिंसिपलमहोदयाः पत्रमिदं च प्राहुः।' बाबूमहोदयोऽपि वाचयित्वा पत्रं बालं चाहूयाकथयत्।

बाबूमहोदयः—भो बाल! गृहे सर्वसाधनेषु समुपस्थितेष्वपि कथं त्वं कालेजेऽनुपस्थितो भवसि?

महेन्द्रः—पितः! प्रत्यहं प्रत्यूषे परमात्मनो ध्यानं पूजां च करोमि, कारणतोऽतः सपादघटिकां यावदनुपस्थितो भवामि। नास्ति कारणान्तरं किंचित्।

बालकवाक्यं समाकर्ण्य बाबूमहोदयस्य चेतसि सीमातीतं महत्कौतूहलं समभवत्, कथमयं बालः असंभाव्यां कल्पनां करोति! पाश्चात्त्यशिक्षादीक्षितेऽस्मिन् मदीये गेहे परमात्मनः कल्पना कथम्? अद्यावधि मस्तिष्कतोऽस्य भ्रान्तिकीटाणवो न निःसृताः। केनायमकर्मणि निरतेन दैवपक्षपातिना जगतः कर्ता परमात्मेति भ्रान्तमतिना शिक्षितो बालः! अस्तु नाम, पृच्छाम्येनम्।

बाबू—रे बाल! कोऽसौ परमात्मा? क च स वसति? कीदृशी मूर्तिस्तस्य? वर्णश्च कीदृशः? किं त्वं जानासि तम्?

महेन्द्रः–पितः! नाहं जानामि प्रकृत्याऽऽकृत्या वर्णेन वा तम्। परन्तु श्रूयते कर्णपरम्परया यदस्माकं निर्माता परमात्मा; स एव प्राणिमात्राय भोजनं वस्त्राणि च यथासमयं प्रयच्छति। नास्ति तस्मादन्योऽस्माकं परिपालकः।

बाबू—वत्स! शिक्षितोऽपि त्वमशिक्षितः, पठितोऽप्यपठितः। प्रत्यहं साइंसे किं न पठसि, यत् सर्वेषां वस्तूनां परमाणवः सर्वदा सर्वत्राव्यक्तरूपेण वर्तमानाः सन्ति। तेषामेव सम्मेलनेनेदं जगत् जायते पृथिव्यादिमहद्रूपेण। नास्त्यस्य कर्ता भर्ता हर्ता वाऽन्य इत्यवगच्छ। नैवं चेन्मन्यसे तर्हि प्रत्यहमनुभवसि– तुभ्यं भोजनं वस्त्राणि च को ददाति? परमात्मा किं ददाति? अथवा मह्यमपि पौरुषमन्तरा परमात्मा स्वयं गृहे समागत्य ददाति किम्? अन्यं वा कमपि किञ्चिद् वस्तु



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रयच्छति परमात्मेति किंचित् प्रमाणय।

महेन्द्रः—पितः ! यद्यपि परमात्मा प्रत्यक्षं कस्मै किञ्चिदपि न ददाति परन्तु सर्वेषां प्राणिनां भाग्य-विधाता स एवास्ति, तमन्तरा जगतः किमपि कार्यमणु-मात्रमपि न भवति।

बाबू–रे अपकर्मन्ते ! विज्ञानविमुखेभ्योऽज्ञातया-तथ्येभ्यः पण्डितम्मन्यभ्यः श्रुत्वैव त्वदीया मतिर्भ्रान्ता। न त्वं प्रत्यक्षं पश्यसि? यदहं प्रयच्छामि यथावसरं त्वां भोजनवस्त्राणीति। मत्तो नास्त्यन्यस्त्वत्पालकः। गेहेऽपि यावन्ति वस्तूनि समायान्ति तानि मत्पौरुषेणैव, नान्यतः कस्मात्। एवमेव सर्वेषां प्राणिनां व्यवहारा जायन्ते। न कश्चित् परमात्मा नान्यो वा जगत्कर्ता। जगदिदं तु स्वयं सृज्यते विसृज्यते च। मूर्ख ! कश्चिद-व्यक्तोऽपि समाहर्तुं शक्नोति किञ्चिद् वस्तुजातम् ?

नाहमद्य दण्डयामि त्वां परन्तु अद्यारभ्य न त्वयैवं वाच्यं कालेजे च यथासमयं गन्तव्यम्। भीतो बालः 'ओम्' इत्यवोचत्, परन्तु मनसि तस्य महती चिन्ता संजाता। अहो ! कथमयं मम जनको जानन्नपि पर-मात्मनो विभूतिं धनदुर्मदान्धः उपेक्षते परमात्मानम् ? कथमहं पितरं परमात्मसाक्षात्कारं कारयामि ? परमा-त्मानं प्रति मदीया भ्रान्तधारणा पितुर्वेति कथं प्रत्यक्षं करोमि ? इति चिन्ताचक्रारूढोऽवसरं प्रतीक्षमाण आस्ते।

गच्छत्सु कतिपयेषु दिवसेषु बालोऽसावेकदा सुन्दरतमं चित्रमेकं निर्माय बाबूमहोदयस्य स्थेयस्थाने (कमरा) डेक्शोपरि निधाय, चित्रनिर्माणयन्त्रपेटिकां (ड्राइङ्गबॉक्स) समीपस्थे वातायने संस्थाप्य च क्वापि गतः।

यदा अपराह्ने कार्यालयतो बाबूमहोदयः समागच्छत् वस्त्राण्यवतार्य नागदन्ते च निधाय डेकशम्प्रति दृष्टिं प्रस्तारितवान् तदा तच्चित्रं सुन्दरतमं दृष्टिपथमायातम्। अहो ! ईदृग्विधं मनोमोदकरं सुन्दरमिदं चित्रं केन निर्मितम् ? वाचं गतिञ्चान्तरा नास्ति भेदः प्रत्यक्षतः। अस्त्वाह्वयामि महेन्द्रं पृच्छामि च केन निर्मितमिति। अथवा तज्जननीं प्रागाह्वयामि। भो महेन्द्रजननि ! समागत्यात्र पश्य केनेदं मनोहरं चित्रं चित्रितम्। नून-मयं पारितोषिकार्हः। धन्यः स निर्माता येनेदं स प्राणान् विना शरीरीव चित्रं चित्रितम्। किं त्वया ज्ञायते केनेदं निर्मितमिति ?

जननी—कान्त ! नाहं जानामि केन निर्मितमिति। महेन्द्रेण निर्मितं, तद्भगिन्या चन्द्रकलया निर्मितं, अन्येन वा केनचिन्निर्मितम् ? प्राक् चन्द्रकलामाह्व-यामि तया निर्मितं वा भवेत्। चन्द्रकले ! समागच्छेः, जनकोऽयं तव पृच्छति केनेदं चित्रं चित्रितम् ? किं त्वया निर्मितम् ?

चन्द्रकला–मातः ! मया तु अदृष्टपूर्वमिदं चित्रम्। केनेदं निर्मितमिति तु न जानामि। भ्रात्रा महेन्द्रेण निर्मितं किं वा तद्वयस्येन केनचिन् निर्मितं भवेत्। भ्रातरं महेन्द्रमाह्वयामि। भ्रातः ! महेन्द्र ! पिता त्वामाकारयति।

महेन्द्रः (समागत्य) पितः, समुपस्थितोऽस्मि, आज्ञापय काज्ञा ?

बाबू—अभिमुखं मे स्थितं चित्रमिदं पश्यसि ? केनेदं चित्रितमिति विज्ञातुमिच्छामि।

महेन्द्रः—पितः ! नाहं जानामि केन निर्मित-मिति।

बाबू—(सकोपः) कथं कोऽपि न जानाति केनेदं निर्मितमिति। गृहे तिष्ठन्ति भवन्तोऽरण्ये वा ? भवतो विहाय न कोऽपि प्रविशति मद्गेहमन्यस्तर्हि कथं न जानीथ यूयं केन निर्मितमिति। ज्ञायते भवता



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कतमेन निर्मितमथवा कुतोऽप्यानीतं निःसंदेहम्।
महेन्द्रः—पितः ! केनेदं निर्मितमिति न ज्ञायते न च कुतोऽप्यानीतमस्माभिः। ( किंचित्स्थित्वा ) आम्, ज्ञातं कारणम् मदीया चित्रपेटिका समीपस्थवातायने स्थिताऽस्ति । अतो वायुवशादिदं चित्रं स्वयमेव निर्मितं भवेदित्याशङ्के ।

बाबू—रे धूर्तबाल ! किं मां प्रतारयसि ? ईदृग्विधमतीव सुन्दरं सहृदयहृदयाकर्षकं चित्रं प्रत्यक्षं शरीरीव निर्मातारं विनापि वायुवशात्स्वयं भवितुमर्हति ? अवश्यं केनापि पटुतमेन कर्त्रा कृतमस्ति।

महेन्द्रः—(बद्धाञ्जलिः) भो पितः ! यदीदं स्वल्पतरं चित्रं कर्त्रा विना भवितुं नार्हति, तर्हि किं महज्जगदिदं कर्त्रा विनैव संजातम् । सर्वे समुद्राः स्वमर्यादां नोल्लङ्घयन्ति। सूर्याचन्द्रमसौ नियतसमय उदयास्तं यातः। ऋतवश्च सर्वे स्व-स्व-समये यान्ति आयान्ति च। स्वप्रमाणतोऽधिकं वायुर्न वाति, पर्जन्यः समय एव वर्षति। एतेषां सर्वेषां नियन्ता कोऽपि नास्ति ? पितः ! महतीयमज्ञानपरम्परा यया जगदिदं स्वयं सृज्यते, चित्रमिदञ्च कर्त्रा विना भवितुं नार्हति— इति मन्यते । यथाऽस्य चित्रस्य कश्चित् कर्तावश्यं तथैव जगतोऽप्यवश्यं कश्चित् कर्ता, स एव परमात्मा। तस्य कृपाकटाक्षेण वयं ससुखं जीवामः । यथा स्वतनयं मातापितरौ मुहूर्तमपि नोपेक्षेते तथैव परमात्मापि अस्मान् क्षणमपि नोपेक्षते । तस्यैव परमात्मनः सेवाऽस्माभिरवहितैः कर्तव्या, मानव–धर्मोऽप्ययं सनातनो–यत्परमात्मा कर्मणा मनसा वचसा च सेव्यः ।

---

## मधुकणः—

"यथा हि पाषाणे अप्सु च वर्ततेऽन्तर्लीनो वह्निः, तथैव मानवहृदयेऽपि, कामं तत् कीदृशमपि क्रूरं कठोरं च भवेत्; उत्कृष्टाः कोमलाश्च भावा वर्तन्ते एवान्तर्हिताः।"

# संस्कृत-समाचाराः

इन्द्रप्रस्थप्रान्ते अजयमेरुप्रान्ते च गतमासे राष्ट्रपतेरयमुदारादेशः कार्यान्वितोऽभवत् यत् प्रान्तयोरेतयोः ये शास्त्रिपरीक्षोत्तीर्णाः विद्वांसः पञ्चदशवर्षेभ्योऽन्यूनात् समयात् राजसेवायां सन्ति नियताः, तेषां मासिकवेतनम् ८०–१०–२०० भवेत्। महर्घतानिमित्तं पञ्चाशद् रूप्यकाणि इतः पृथगेवद्। तदर्थं धन्यवादार्हो राष्ट्रपतिः । आशास्महे–भारतीयसर्वप्रान्तेषु ईदृशा आदेशाः भवेयुः संप्रेषिताः। येन संस्कृतज्ञानामपि जीवनस्तरः किञ्चिदुन्नमेत्। वैमातृत्वं च संस्कृतं प्रति राज्यानां राज्यकर्मचारिणां च नश्येत।

### भारतीयव्यवस्थापकस्य अजयमेरु-प्रान्तयात्रा

पं० श्रीगिरिराजशास्त्री मासेस्मिन् अजयमेरु-(अजमेर) व्यावरादिस्थानेषु भारतीप्रचाराय गतवान्। अजयमेरु-प्रधानमन्त्रिणा श्रीहरिभाऊपाध्यायेन महता स्नेहेन होरापर्यन्तं संस्कृतोन्नतिविषये स्वकीया अमूल्या विचाराः प्रकटिताः। स्वीयो लिखित एकः संदेशोपि दत्तः, यो हि अग्रिमाङ्के प्रकाशमेष्यति । स्वीयप्रान्ते भारतीपत्रस्य मान्यताप्रदानायापि आश्वासनं प्रत्तं तेन। व्यावरनगरे संस्कृतपरिषदध्यक्षेण प०भगवतानन्देन तन्मन्त्रिणा श्रीरघुवरदत्तेन संस्कृतविद्यालयाध्यक्षेण च परिषदोऽधिवेशने निर्णीतं यद् यावच्छक्यं सुरभारतीसेवां लक्ष्यीकृत्य परिषदियं भारतीप्रचारं विधास्यतीति। तत्रत्य-विधानसभासदस्येन प०जगन्नाथशर्मवाकीलकेन चार्थिक-सहायतायै समाश्वासितम्।

### भारती–पत्राय विशिष्टा सहायता—

जयपुरगवर्नमैंटायुर्वेद-कालेजोपाध्यक्षेण प्रसिद्धचिकित्सकेन श्रीस्वामिजयरामदासभिषगाचार्येण भारत्यै सार्धद्विशतीं २५०) रूप्यकाणां प्रदाय संस्कृतप्रचाराय महानुपकारो विहितः। अस्मिन्नेवाङ्के एतस्य संक्षिप्तं जीवनचरितं सचित्रं वर्तते मुद्रितम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# पत्रालोकः—

## राजस्थानप्रान्ते संस्कृतस्यावनतेः कारणम् ।

श्रीभारती-सम्पादकमहोदयाः !

वर्तमानसमये राजस्थानप्रदेशे कानिचित् कारणानि संस्कृतोन्नतिमार्गे अवरोधकानि सन्ति। तेषां निर्देशनम् आवश्यकमिति विचिन्त्य इमाः पङ्क्तयः संस्कृतज्ञानां विदुषां ध्यानमाकृष्य तद्दूरीकरणाय लिख्यन्ते—

(१) राजस्थान-प्रान्ते पूर्वं प्रवेशिकापरीक्षायां ईदृग् ग्रन्थ-समूहः नासीत् । तेन कोमलमतयोऽपि छात्रा परीक्षासूपतिष्ठन्ति स्म। किन्तु पाठ्य-काठिन्यात् सर्वथा छात्र-विरलतात्र संजाता । गतदिवसेषु संस्कृतकालेज-प्रवेशिकाफलं तथा परीक्षाप्रविष्टछात्र-संख्या च प्रकाशितासीत् । १२ छात्रेषु सप्त छात्रा उत्तीर्णाः, अन्ये असफला संजाताः। अयतः पूर्वं वर्ष-त्रयात् प्रवेशिकापरीक्षायां त्रिशतो चतुःशती वा छात्राणां उपतिष्ठति स्म। अतः वर्तमान-संस्कृत-परीक्षा-नियमावली पूर्णतः परिवर्तनीया ।

(२) भारते वाराणसेय-संस्कृत-कालेज-परीक्षाः सर्वासु संस्कृतपरीक्षासु विशिष्टाः। यासु प्रत्यब्दं पञ्च-दशसहस्र-च्छात्राः प्रवेशमाप्नुवन्ति। अतः जयपुर-सं०-कालेज-परीक्षा अपि पूर्णतः तथैवानुकरणीयाः ।

(३) प्रवेशिकापरीक्षा प्रथमावत् सरला कार्या। तथा राजस्थानविश्वविद्यालयस्य नवमकक्षायां प्रवेष्टुं प्रवेशिकापरीक्षोत्तीर्णेभ्यश्छात्रेभ्यः स्वीकृतिर्देया।

उपाध्याय-परीक्षायामपि वाराणसेयमध्यमपरीक्षा-वत् पूर्वोत्तरखण्डे विधाय पूर्वखण्डं मैट्रिकतुल्यं स्वीकार्यम् । उत्तरखण्डं च इण्टरपरीक्षासमं स्वीकार्यम् ।

(४) शास्त्रिपरीक्षायामपि यथानुकूलं परिवर्तं विधाय B.A. परीक्षासमा शास्त्रिपरीक्षा स्वीकर्तव्या। आशासे संस्कृत-कालेजपरीक्षापाठ्य-निर्धारणसमितिः अतिशीघ्रं विचार्य अवश्यमेव सुधारकार्यं करिष्यति।

यावत्कालं प्रवेशिकापरीक्षायाः ग्रन्थसमूहः प्रथमपरीक्षावत् न भविष्यति तावत्कदाचिदपि राज-स्थानप्रान्ते जयपुर-सं०-कालेजपरीक्षा प्रचारिता न भविष्यति । अतो विशेषरूपेण संस्कृतपाठशालानां निरीक्षकमहोदयैः संस्कृतकालेजविद्वद्भिश्च संगत्य परिवर्तनम् अवश्यमेव संपादनीयम्। नो चेत् कतिपयैः रेवाङ्कैः जयपुर-संस्कृत-परीक्षाणां नामाऽपि न लप्स्यते ।

(५) राजस्थानशासनस्यापि कर्तव्यमिदम् यत् सर्वेषु विभागेषु संस्कृतपरीक्षोत्तीर्णान् आवेदकानपि (Candidates) गृह्णीयात्, येनेयं गीर्वाणवाणी पुनः तथैव समृद्धा भवेत्। इति निवेदयति—

कन्हैयालालशर्मा सा० व्या० आचार्यः,
प्र०अ० सं० पा०, अमरसर ।

# सुभाषितानि

संग्रहकर्ता–छात्रः प्रभाकरशर्मा "दिनेशः" जयपुरम्

न कश्चिदपि जानाति किं कस्य श्वो भविष्यति ।
अतः श्वः करणीयानि कुर्यादद्यैव बुद्धिमान् ॥
क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति ।
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ॥
विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥
दिवा पश्यति नोलूकः काको नक्तं न पश्यति ।
विद्याविहीनो मूढस्तु दिवानक्तं न पश्यति ॥
इन्दुः कान्त्या यतिः शान्त्या नीत्या च वसुधाधिपः ।
रीत्या काव्यं वधूर्धृत्या कुरुते जन-रञ्जनम् ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# देशदर्शनम्—

**काश्मीराणां मुख्यो मन्त्री पदच्युतः—(६ अगस्त ५३)**

काश्मीरप्रान्तस्य मुख्यो मन्त्री शेख-अब्दुल्ला तत्रत्यराज्यप्रधानेन (सदर-ए-रियासत) श्रीकर्णसिंहेन स्वपदाद् बलाच्च्यावितः। तस्य मन्त्रिमण्डलमपि भग्नम्। नवीनं च तन्निर्मापितम्। तस्मिन्नेवाहनि पाकिस्ताने पलायमानः शेखो गुलमर्गस्थाने पुष्कल-सम्पत्त्या, अनुमानतः त्रिंशता मित्रैश्च सह बन्दीकृतः। कारणं चैतस्य वर्तते—देशद्रोहः, विदेशीयैः सह गुप्तसंबन्धस्थापनं, भ्रष्टाचारः, भारतस्याविभाज्याङ्गत्वेपि काश्मीराणां पृथक्कृत्य स्वतन्त्रतया स्थापनं चेति।

**भारत-स्वतन्त्रता-दिवसः (१५ अगस्त ५३)**

भारतवर्षस्य षष्ठेऽस्मिन् स्वाधीनतादिवसे सर्वत्र ससमारोहमुत्सवाः समजायन्त। सर्वेषु प्रान्तेषु ध्वजोत्तोलनं सार्वजनिकसभानामायोजनं चाभवत्। वर्षषट्कं व्यतिगतं, किन्तु नाद्यावधि बह्व्यः समस्याः निर्णयं प्रापन्निति तदर्थं सपरिकरं सर्वैः सन्नद्धैर्भाव्यमिति मुख्यमन्त्रिणो राज्यपालाश्च समगदन् तत्र।

**अखण्डभारतदिवसस्य आयोजनम्—(१५ अगस्त)**

अस्मिन्नेव स्वाधीनतादिवसे हिन्दूसभया दिल्ल्यामेका सार्वजनिकसभाऽऽयोजिता, यत्र योगिराज-श्रीमदरविन्दघोषस्य विचारानाधारीकृत्य समुद्घोषितम् यदियं स्वतन्त्रता तावदपरिपूर्णा यावन्न स्याद् भारतात् पृथक्कृतं खण्डं भारते विलीनम्। भौगोलिकदृष्ट्यापि नैषा बलात्कृता खण्डद्वयी समुचितेति।

**पाकिस्तानस्य प्रधानमन्त्री भारते—(१६ अगस्त ५३)**

भारतात् पृथग्भूतखण्डस्य पाकिस्तानस्य प्रधानो मन्त्री श्रीमोहम्मदलीमहोदयः सद्भावनया द्वयोर्देशयोः समस्यानिर्णयार्थं दिल्ल्यामागतोस्ति। तेन सा विदेशमन्त्री श्रीजफरुल्लापि समायातः। विश्वस्त सूत्रेणैतज्ज्ञायते यत् काश्मीरविषयमवलम्ब्य प्रचलित वार्ताधुना निर्णयसन्निकटेस्ति संप्राप्ता।

तस्य भारतेऽस्मिन् तादृशं भव्यं स्वागतमभू येन स स्वयमगदत् यत्। न ममैतादृशं स्वागतं जीव कदाचिदपि संजातं यादृशमत्राभूत्।

# विदेश-वार्ता—

**ब्रह्मदेशप्रधानमन्त्रिणोऽनशनम्—**

(१८ अगस्त ५३) ब्रह्मदेशस्य प्रधानमन्त्री श्रीमद्-ऊ-नू-महोदयः गोहत्यानिरोधमनुरुद्ध १८ अगस्ततः अनशनं प्रारब्धवान्। तस्यानशन मोहम्मदीयानाम् "ईद" दिवसे गोहत्या न भवेदेतदर्थम्। यदि अस्मिन् दिने गोहत्या न निरुद्ध्येत कदाचिदेतदनशनमामरणं क्रियेत तेनेति तत्रत्या बौद्ध भिक्षवः संगिरन्ते। नैतद् विस्मर्तव्यम्-यत् बौद्धान प्रधानो धर्मः अहिंसेति तदर्थं ते चिराय चेष्टन्ते।

**त्रिविष्टपसीमायां चीनसेना—**

(१८ अगस्त ५३) भारतेऽधुनैव समागतान यात्रिणां सूचनया ज्ञायते यद् भारत-नेपाल-सम्बद्धायां त्रिविष्टपसीमायां चीन-सेनायाः पञ्चसहस्र-सैनिका सन्ति सनद्धा युद्धाय।

**ईरानदेशे डा० मुसद्दिकशासनस्य समाप्तिः—**

(१६ अगस्त ५३) अद्य ईरानसम्राजो विश्वस्त-सैनिकैः टैङ्काख्ययन्त्राणां साहाय्येन रक्तरञ्जित-विद्रोहानन्तरं तत्रत्यप्रधानमन्त्रिणो मोहम्मद-मुसद्दिकस शासनं समाप्य स्वस्थानात् पलायमानः स बन्दीकृतः। अय हि चिरादासीत् तत्रत्यो मुख्यो नेता। येन हि स्वप्रभावेण जनतासहायतया च सम्राट् स्वपदात् च्यावित आसीत्; किन्तु एकतन्त्राश्रयणेन, देशद्रोहेण च स्थितिरियं तस्य समभूत्।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


## सम्पादकीयम्—

### काश्मीर-समस्या

गतमासे काश्मीरानुद्दिश्य किञ्चित् निवेदितमासीत् सेवायाम्। परमेश्वरानुकम्पया शीघ्रमेव तस्य किंचित् समाधानं सञ्जातमिति हर्षास्पदमेतत् किन्तु यावत्पर्यन्तं काश्मीर-समस्या पूर्ण-रूपेण न निर्णीयेत तावत् काश्मीरवासिभिः भारतीयैश्च विषयेस्मिन् सर्वथा-वहितैर्भाव्यम्। यतो हि स्वार्थसाधनाय बाह्या अनेकाः शक्तयः सन्ति संलग्नास्तत्रेति काश्मीराणां स्वातन्त्र्ये पराङ्गत्वे च विकलाङ्गं भारतं तूर्णमेव विपद्ग्रस्तं स्यादिति सर्वथा तत्संग्रहणे प्रयत्नो विधेय एव। आशास्महे-काश्मीरवासिनोपि मतसंग्रहावसरे स्वकीयौ हानि-लाभौ सम्यग् ज्ञात्वा भारतीयत्वमेव स्वकीयं साधयिष्यन्तीत्यलं प्रपञ्चितेन।

## पुस्तकालोकः—

### पाणिनीय-शब्दानुशासनम्—

ग्रन्थस्यास्य अध्यायत्रयात्मकः प्रथमो भागो (१८६२ शकाब्दे मुद्रितः) ऽस्माभिरुपलब्धः समालोचनाय अवधानेनावलोकितश्च। व्याकरणशास्त्रे प्रविविक्षूणां कोमलमतीनां बालानां कृते सरलसरलैः पद्यैर्लिखितोऽयं ग्रन्थः स्वकीयां मौलिकतां स्पष्टमावहतीति मन्ये न वक्तव्यम्। अस्य प्रथमेऽस्मिन् भागे प्रथमाध्याये संज्ञापरिभाषम्, द्वितीये-सन्धिप्रकरणम्, तृतीये च षड्लिङ्गप्रकरणं प्रदर्शितम्। षड् लिङ्गप्रकरणं हि पर्याप्तं विस्तृतम्। तत्र समुदाहृतशब्दानां पूर्णानि रूपाणि सन्ति प्रदर्शितानि। सहैव कारकज्ञानार्थं तत्प्रकरणमपि तत्रैवाध्याये रचितम्, स्त्रीत्वद्योतनाय स्त्रीप्रत्यय-प्रकरणं च। लिङ्गानुशासनं चापि दिङ्मात्रेण प्रदर्शितमत्रैवेति सर्वाङ्गीणमेतज्जातम्। बालाः प्रायेण पद्यान्यनायासेन जिह्वाग्रे कर्त्तुं पारयन्ति, सूत्रापेक्षया-र्थावबोधेपि च पद्येषु सारल्यमिति सोऽयं परिश्रमो ग्रन्थकारस्य गीर्वाणवाणीज्ञानाय प्रयतमानानां कृते सर्वथा समुचितः श्लाघ्यश्चेति छात्रैरवश्यं संग्राह्योऽयं ग्रन्थः। ग्रन्थकर्तास्य—"महाराष्ट्रियः" प्रकाशकः—पाटणकरोपाह्वो नारायणतनूजो रामकृष्णशर्मा, राजापुरम् (रत्नागिरिः) मूल्यं चास्य रूप्यकत्रयम्।

### श्रीदुर्गायण—

मार्कण्डेयपुराणान्तर्गता 'सप्तशती' देव्या उपासकेषु सर्वत्र प्रसिद्धा। तस्याः सप्तशत्याः हिन्दी-पद्यैरनुवादात्मकोऽयं ग्रन्थः प०भद्रदत्तशास्त्रिवैद्य-भूषणेन, व्रजभाषायां रामचरितमानसपद्धत्या रचितः प्रसादगुणयुक्तश्च। संस्कृतानभिज्ञदेव्युपासकानां कृते संग्राह्योऽयम्। प्राप्तिस्थानम्—कैलासनाथशर्मा बी०ए०विशारद, बडीहोली, कासगंज। मूल्यम् न किञ्चित्। केवलं मार्गव्ययार्थमाणकषट्कं प्रेषणीयम्।

### संस्कृतप्रवेशिका—

सुकुमारमतीनां बालानामनायासेन संस्कृतावबोधाय सोऽयं परिश्रमः ग्रन्थकारस्य श्लाघ्यः। पुस्तकेस्मिन् २० पाठाः सन्ति। प्रारम्भे सन्धिरहिताः सन्ति पाठाः; ततः सन्धियुक्ताश्च। अन्ते व्याकरण-ज्ञानार्थमपि पर्याप्तं चेष्टितम् विदुषा ग्रन्थकारेणेति संग्राह्यमेतत्। लेखकः—प०सदाशिवसीतारामशास्त्री; मुसलगांवकरः। प्राप्तिस्थानम्—वी०आचार्यः, सन्मार्ग-प्रतिनिधिकार्यालयः, बक्सी का गोठ, लश्कर, ग्वालियर। मूल्यम् रूप्यकमेकम्।

### स्मृतिसन्दर्भः—

भागत्रये मुद्रितोऽयं ग्रन्थः स्वनाम्नैव माहात्म्यं प्रकटयति। अत्र समुपलब्धानां प्रायशः सर्वासां स्मृतीनां सुन्दरमस्ति मुद्रणम्। भारतीयसंस्कृतेः संस्कृतस्य चानुरागी नवलगढवास्तव्यः समृद्धः श्रेष्ठी श्रीमनसुखरायो मोरः स्वीयव्ययेन प्रकाशितवानेनम्। महर्षि-श्रीयास्कप्रणीतं निरुक्तमप्युपलब्धं तदीयद्रव्येणैव मुद्रितम्। अतः धन्यवादार्होऽयं श्रेष्ठी। आशासे अन्येष्वपि संस्कृतकार्येषु अयं मुक्तहस्तः साहाय्यं विधास्यति येन देशे चिरादवरुद्धः संस्कृतप्रचारः तूर्णमेव बलं लभेतेति।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सरल-संस्कृत-शिक्षणोपायः

प. श्रीदुर्गादत्तशर्मा मैथिलः, जयपुरम्

## इकारान्तः स्त्रीलिङ्गः मतिशब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै, मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी | मत्याः, मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः, मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्, मतौ | मत्योः | मतिषु |
| सम्बोधनम् | हे मते | हे मती | हे मतयः |

बुद्धि, रुचि (इच्छा) गति, भित्ति, सरणि (रास्ता) शक्ति, +कृषि (खेती) गीति. आर्ति (पीडा) मूर्ति इत्यादीनाम् इकारान्त-स्त्रीलिङ्ग-शब्दानां रूपाणि मतिशब्दतुल्यानि एव भवन्ति।

+इस शब्द के रूप लेने में षष्ठी में न की जगह ण बोलना चाहिये।

### व्रज (जाना)

(विधिलिङ्-आज्ञा-प्रश्न-प्रार्थनासु)

| | | |
|---|---|---|
| व्रजेत् | व्रजेताम् | व्रजेयुः |
| व्रजेः | व्रजेतम् | व्रजेत |
| व्रजेयम् | व्रजेव | व्रजेम |

एवमेव वद, हस, पठ, क्रीड, रक्ष, चल, लिख, पत, त्यज, पच इत्यादि-धातूनां रूपाणि ज्ञेयानि

### उदाहरणार्थः पाठः

छात्राः पठनाय पाठशालायां व्रजेयुः। बालाः सूक्तीनामर्थं वदेयुः। किमहं हसेयम्? स्वरुच्या शास्त्राणि पठेत्। उद्याने सरणिं (मार्ग) विहाय कन्दुकं क्रीडेम। कृषकाः मूषकेभ्यः कृषिं रक्षेयुः। यूयं प्रातः स्वशक्त्यावश्यं चलेत। चित्रकारः भित्तौ गणेश-मूर्तिं लिखेत्। वर्षासु धावन्तो बालाः पतेयुः। देवदत्तः कुबुद्धिं त्यजेत्। पाचकः सूपं (दाल) पचेत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# श्रीस्वामिजयरामदासवैद्यमहोदयानां संक्षिप्तः परिचयः

व्यत्यगाद् वर्षाणां चतुःशती, अस्मिन्नेव प्रान्ते प्रायेण कृत-वसतिः, महात्मा श्रीदादूदयालुः समभूत्। शतशः शिष्यास्तस्य गुरुत्वमङ्गीचकार। तदीयशिष्य-परम्परायामेव विद्यावैदुष्यविख्यातः, पं. यूषपाणिः, सुप्रसिद्धचिकित्सकः श्रीलक्ष्मीरामस्वामी समभवत्। येन हि सहस्रेषु छात्रेषु आयुर्वेदविद्यां वितीर्य चिरादनवधानेन शैथिल्यं प्राप्तस्यायुर्वेदप्रासादस्य विहितो विशिष्ट-जीर्णोद्धारः। एतस्यैव चरणयोः सुचिरमुपविश्य प्राप्तायुर्वेदविद्योऽस्माकं चरितनायकः लब्धवान् भिषगाचार्यपदम्। चिकित्सापाटवमप्यनेन तत्पार्श्व एवाधिगतम्। महाशयस्यास्य गुणैरुदारैरनुरक्तेन श्रीलक्ष्मीरामस्वामिनाऽयं भीवानीस्थप्रतिष्ठितस्थाने नियुक्तोऽपि स्वोत्तराधिकारीकृतः।

अस्य हि जनिरभूत् १९६२ विक्रमाब्दे। बाल्ये स्वस्थाने भीवानीनगर एव शिक्षां प्राप्य विशिष्ट-संस्कृतज्ञानाय वाराणसीमयं प्राप्तः। तत्र संस्कृतं सम्यगधीत्यायुर्वेदज्ञानाय जयपुरमगात्। बाल्यादेव निसर्गतः साधुजनोचितोऽस्य प्रेमा योगविद्यायामपि।

भिषगाचार्यत्वं प्राप्य चिकित्साकर्मणि नियुक्तोऽयं द्वाविंशतिवर्षेभ्यो विशुद्धायुर्वेददिशा सफल चिकित्समानः सहस्रेभ्यो रोगिभ्यो नैरुज्यं वितरन्नास्ते। सर्वथा नैराश्यमागतेष्वपि पाश्चात्यचिकित्सोयद्विग्नेष्वपि च रोगिष्वस्य नैकशस्तादृशं साफल्यं दृष्टं यादृशं न सामान्यतोऽवलोक्यते। नवनीतसमस्य कोमलं हृदयमकिञ्चनान् रोगिणो दृष्ट्वा वस्तुतो द्रवते। अतः शतशो रोगिणो निःशुल्कं चिकित्सयौषधवितरणेन च नैरुज्यमितो लभन्ते। त्रिंशद्भ्यः वर्षेभ्य आयं जयपुर-राजकीयायुर्वेदमहाविद्यालये प्राध्यापकपदे विनियुक्तश्छात्रान् संतोषयन्नायुर्वेदं हृदयेन सेवते। चिकित्सायामध्यापन-कार्ये च संलग्नत्वाद् निरवकाशोऽप्ययमायुर्वेदोद्धारकसमस्तकार्येषु समनोयोगं चेष्टते। सर्वेषु प्रायोऽखिलभारतीयायुर्वेदसम्मेलनेषु सक्रियं भागं गृह्णात्ययम्। राजस्थानीयप्रान्तस्य तु उदयपुरीयाधिवेशनस्यायं सफलं सभापतिरप्यभूत्। न केवलमायुर्वेदाधिवेशनेष्वेवायं सक्रियं यतते अपितु भारतीयसंस्कृतिसमुद्धाराय देववाण्या वा प्रचाराय महत्कष्टमनुभूयापि चिकित्साव्यवसायं परित्यज्यापि सर्वत्रोत्साहप्रदानाय संमेलनेषु गच्छति, स्वीयान् विचारांश्च प्रकटयति। अन्येष्वपि च सार्वजनिककार्येष्वयं सक्रियं गृह्णाति भागम्। जयपुरे महता समारोहेण निष्पन्नस्याखिलभारतीय-हिन्दी-साहित्य-सम्मेलनस्य पृष्ठभूमिकायामयमेवासीन् महाभागः। यद्ययं नायतिष्यत प्राणपणेन नूनं सम्मेलनं नाभविष्यदत्र तादृशम्।

जयपुरीयाखिल-भारतीय-संस्कृतसम्मेलनसफलतायै अपि सुबहु प्रयतितमनेन। अस्यैव सहयोगेन तादृशं साफल्यमवाप्तं संमेलनेनात्र यादृशं न कुत्राप्यवलोक्यते।

संपन्नेनानेनार्थिकः सहयोगोऽपि पर्याप्तं प्रदीयते सर्वत्र। भारती-पत्रप्रकाशनेपि भृशमुत्साहिताः संस्कृतज्ञाः विशिष्टार्थिक-सहायता चापि प्रत्ता अनेन। समये समये चायं स्वकीया अमूल्याः संमतीः प्रादायास्मानुपकरोतीति महानुभावोऽयं सुरगिरः समुद्धाराय सुचिरं जीव्यादिति।

प्रकाशकः—जयबहादुरसिंह। पता—भारती भवन, गोपालजी का रास्ता, जयपुर।
रामेश्वरलाल वंशीधर शर्मा द्वारा नेशनल प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

संस्कृतस्य प्रमुखं मासिकं पत्रम्

युद्धाद् विरतं पार्थं समुपदिशन्

**भगवान् कृष्णः**

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥

भग० गी० अ० ३ श्लो० ३५

संवत् २०१० | वर्षः ३ | एकादशोऽङ्कः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# —: विषय-सूची :—


| क्रमः | लेख-नामानि | लेखक-नामानि | पृष्ठ संख्या |
|---|---|---|---|
| १ | अयि सरस्वति राजताम् | श्रीदेवकीनन्दनशर्मा शास्त्री, शाहपुरा | २०५ |
| २ | केचन उपदेशाः | श्रीशान्तिस्वरूप-यतिः, जयपुरम् | २०७ |
| ३ | यत्र नार्यस्तु पूज्यन्ते० | वैद्य-श्रीमदनकुमार शर्मा भिषगाचार्यः, सीकर | २०६ |
| ४ | कोकिलाष्टकम् | श्रीजोखनझा, वलवाबाजार, बिहार | २१२ |
| ५ | स्वधर्मः परिपाल्यताम् | श्रीनारायणशास्त्री काङ्करः, जयपुरम् | २१३ |
| ६ | आधुनिकस्य मानवस्य कर्तव्यम् | श्रीमनसुखराय-मोरः, नवलगढः | २१५ |
| ७ | भारती-पत्र-प्रशस्तिः | श्रीचन्द्रशेखर-ताम्बे, नागपुरम् | २१५ |
| ८ | अध्यक्षीयं भाषणम् | श्रीमदन्तशयनमायङ्गरः, देहली | २१७ |
| ९ | राजस्थानीय-सं०सा०संमेलनस्य प्रस्तावाः | श्रीसुरजनदासस्वामी, कोटा | २१६ |
| १० | प्रहसनानि | सम्पादकः | २२० |
| ११ | किं कस्य मण्डनम् | ,, | ,, |
| १२ | संस्कृतसमाचाराः | ,, | २२१ |
| १३ | राज० सं० छात्रसंघ-सभापतेः भाषणम् | श्रीरामोत्साहमिश्रः, बीकानेर | २२२ |
| १४ | किं भवन्तो जानन्ति ? | सम्पादकः | ,, |
| १५ | मधुकणः | ,, | ,, |
| १६ | शुभसमाचारः | ,, | ,, |
| १७ | पुस्तकालोकः | ,, | २२३ |
| १८ | सुभाषितानि | श्रीमांगीलालमिश्रः, नेछवा (सीकर) | ,, |
| १९ | देशदर्शनम् | सम्पादकः | २२४ |
| २० | अजयमेरु-प्रान्तस्य मुख्यमन्त्रिणः संदेशः | श्रीहरिभाऊ उपाध्यायः | |
| २१ | बालस्तम्भः | श्रीदुर्गादत्तशर्मा, जयपुरम् | |


## — "भारती" पत्रस्य उद्देश्यानि नियमाश्च —

१ संस्कृतभाषायाः प्रचारः सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचारपरिपोषिकायाः सामग्र्याश्च समर्पणम् अस्य पत्रस्योद्देश्यानि ।

२ 'भारती' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम् ।

३ मासिकपत्रमिदं प्रतिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात् ।

४ एकस्याङ्कस्य मूल्यम् ।=) आणकषट्कम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादक :—
श्रीवृद्धिचन्द्रशर्मा शास्त्री
व्याकरण-धर्मशास्त्राचार्यः
महाराज-संस्कृत-महाविद्यालयः
जयपुरम्

# भारती

मूल्यम्
वार्षिकं रूप्यकत्रयम्
३) रू०
एकस्याङ्कस्य मूल्यम्
आणकषट्कम्

वर्ष ३ | भाद्रपद-पूर्णिमा, सं० २०१० | अङ्क ११

## अयि सरस्वति राजताम् ।

ले० प० देवकीनन्दनशर्मा शास्त्री प्रश्नवरः, प्रधानाध्यापकः राजकीय-संस्कृतविद्यालयः, शाहपुरा ।

अयि सरस्वति ! राजतां
पुनरद्य भारत – भूतलेऽस्मिन्
ब्रह्मलोकनिवासिनी यदि शारदा भुवि आगता त्वम् ।
भारते चिरवासिनी कथमद्य तत्समुपेक्षसे त्वम् ॥
आगमिष्यसि भारते यदि भारतीति प्रसिद्धिमेष्यसि ।
नागमिष्यसि भारते तु हि भारतीति कथं भविष्यसि ॥
भारतीय नरेशगाथाऽभ्यासिनी रसना त्वदीया ।
भव्य-भारत -सेवकानां कुरु कथामिति वाङ् मदीया ॥
धन्यध्वनिभिः साकमधुना
लप्स्यसे परमां प्रतिष्ठाम् ॥
भवतु पुनरपि ते निवासो
भारते धरणीतलेऽस्मिन् ॥
अयि सरस्वति ! राजतां
पुनरद्य भारत–भूतलेऽस्मिन् ॥
मधुरनवभङ्कृतियुतैर्वीणानिनादैर्वार्यताम् ।
हा गतेति प्रवाद उच्चैर्ज्ञानतोप्यपनीयताम् ॥
चरणनखवरकिरणजालैर्भुवनमेति प्रकाशमाशु ।
त्यज सुदुर्बलभारतोपरि शारदे ! तव कोपमाशु ॥
हंसवाहिनि ! कुरु कृपां धृतिमेतु सम्प्रति नवस्वतन्त्रम् ।
भारतं कुरु तस्य शुभदे ! किञ्च मानसमपरतन्त्रम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



दीनतामज्ञानतां बल—
हीनतामपसारय त्वम् ॥
नादिते मणिनूपुरैः कवि—
रेष ते चरणे गतोऽस्मिन् ॥
अयि सरस्वति ! राजतां
पुनरद्य भारत-भूतलेऽस्मिन् ॥

आस्थिता कमलासने स्फटिकाक्षमालाधारिणी त्वम् ।
भव सचित्रसुवर्णमुद्रितभव्यपुस्तकधारिणी त्वम् ॥
मधुरमधुरैः कोमलैर्वीणास्वरैः परिबोधमेतु ।
भारतं निद्रालसं हृदि तमस्तस्य विनाशमेतु ॥
कविहृद्‌यतन्त्रीं निनादय यतो वीणावादिनी त्वम् ।
हृदयतन्त्रीमपि प्रचालय हंसशोभनवाहिनी त्वम् ॥
पाद्‌योः पतितं नतं परि—
पाहि भारतमिह स्वतन्त्रम् ॥
अयि दयवति ! दयां
नवभारते शरणागतेऽस्मिन् ॥
अयि सरस्वति ! राजतां
पुनरद्य भारतभूतलेऽस्मिन् ॥

शुद्धशुभ्रपरावृते ! अयि देवि ! वरदे ! सिद्धिदे !
गर्वहारिणि ! मानवर्द्धिनि ! ज्ञानदे ! हे बुद्धिदे !
देहि भक्तिं देहि रूपं बलञ्चापि प्रदेहि मे ।
सर्वशक्तिसमन्विते ! विद्यावरं ननु देहि मे ।
दीनदीनान् भारतीयान् जननि ! पालय देवि हे !
आदिविद्ये ! सौख्यकारिणि ! विजयतां परिपाहि हे ॥
तव चरणयोः पतित एष
कविस्त्वया परिपाल्यताम् ॥
जायतां नवसुप्रभातं
भारते तमसऽस्मिन् ॥
अयि स[illegible] राजतां
पुनरद्य भारतभूतलेऽस्मिन् ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# केचन - उपदेशाः

श्रीशान्तिस्वरूपयतिः शास्त्री, दादूमहाविद्यालयः, जयपुरम्

यः स्वकीयसम्पूर्णेन्द्रियाणि मनो बुद्धिश्च भगवत्कार्ये संयोजयन् तिष्ठति, स एव बुद्धिमान् नरः। श्रवणाभ्यां भगवद्गुणान् शृणुत, नयनाभ्यां सतः पश्यत, जिह्वया भगवद्गुणान् गायत, हस्ताभ्यां भगवत्सेवां कुरुत, पादाभ्यां भगवत्स्थानं गच्छत, मनसा भगवन्तं स्मरत, बुद्ध्या च भगवद्-विचारं कुरुत। एतेन युस्माकं जीवनं पवित्रं भगवन्मयञ्च संभविष्यति।

सङ्गेनैव मनुष्यः श्रेष्ठो दुष्टश्च संजायते। सङ्गः न केवलं मनुष्यस्य, अपितु इन्द्रियाणां विषयमात्रस्य, श्रेष्ठो दुष्टश्च जायते। श्रेष्ठसंगं सेवध्वम्, दुष्टसंगं सदा त्यजत। श्रवणाभ्यां घृणितवार्तां मा शृणुत, नेत्राभ्यां दुष्टदृश्यानि मा पश्यत, वाचा दुष्टवार्तां मा कथयत, हस्ताभ्यां दुष्टकर्म मा कुरुत, पादाभ्यां मा गच्छत घृणितस्थानम्, मा कुरुत दुष्टचिन्तनम्, बुद्ध्या च मा कुरुत दुष्टविचारम्। इत्थं करणेन यूयं सर्वावगुणेभ्यः स्वयमेव भविष्यथ मुक्ताः।

मा पठत कदापीदृक् पुस्तकं, येन वर्धेत विषयेषु लालसा, संलग्नं भवेत् मनश्च पापे; कामं तस्य नाम शास्त्रमेव किन्न स्यात्। विषयेभ्यः मनोनिग्राहकाणि पापाच्च निवारणस्य शिक्षादायीनि पठत पुस्तकानि, शृणुत ईदृशीरेव वार्ताः, निवसत च ईदृशेष्वेव स्थानेषु।

अस्ति विषय-चिन्तनं सर्वनाशस्य मूलम्, विद्यते च दुःखमोचनार्थं भगवच्चिन्तनं मूलमन्त्रः। महासावधानतया वर्तध्वं दूरीकुर्वाणा मनसो विषयचिन्तनम्, निरन्तरं च कुरुत भगवच्चिन्तनम्। यथा यथा विषयचिन्तनं शिथिलीभूय, भगवच्चिन्तनं वर्द्धिष्यते; तथा तथैव यूयं शान्ति सुखं चोपगमिष्यथ। विषयचिन्तनेन सदाचारी अपि पापपङ्के निक्षिप्यते, भगवच्चिन्तनेन चात्यन्तं दुराचारी अपि तूर्णमेव साधुभक्तो विधीयते।

विद्येते अत्र द्वे केन्द्रे। एकं दुःखस्य द्वितीयं च सुखस्य। तत्र प्रथमे उपविश्य, यथाकामं यद्यपि सुखस्य वार्ताः कुर्यात, तथापि कदापि सुखं प्राप्तुं न शक्यथ। प्राप्य च सुखकेन्द्रं, नाप्यते दुःखमन्विष्यमाणमपि। अस्ति विषयाश्रयः केन्द्रं दुःखस्य तथा च भगवदाश्रयः केन्द्रं सुखस्य। कामं, कश्चन कियतीरपि गम्भीरा भावपूर्णाश्च वार्ताः कुर्यात्, यावत् पर्यन्तं विषयाश्रयेण सुखप्राप्तीच्छा वर्तते, तावत् स तथैव सुखी भवितुं नार्हति यथा प्रज्वलिताग्नौ पतितो मनुष्यः केवलं सुभाषितैः न प्राप्तुं शक्नोति शीतलताम्। अतएव जगदाश्रयं परित्यज्य भगवदाश्रयो ग्रहीतव्यः। तस्मिन् सुखकेन्द्रे अवस्थाय, तदनन्तरं कामं दुखालयसंसारस्य वार्तामपि कुरुत, नहि तथैव संस्प्रष्टुं शक्यन्ते भवन्तो दुःखेन, यथा न हि स्प्रष्टुं शक्यते हिमालये हिमासीनः पुरुषः घर्मेण।

'वसति सर्वेषु परमात्मा' इति मत्वा सम्मान्याः सर्वेपि, नापमानं कुरुत कस्यापि। विहाय स्वकीयमानं, यदि करिष्यथ सर्वेषां सम्मानम्, युष्माकं कोऽपि आचारो यदि इतरेषां सम्मानने न स्थास्यति प्रतिबन्धकत्वेन, तर्हि स्वयमेव भविष्यथ सर्वप्रिया यूयम्। तदभिलषिष्यन्ति हृदयेन युष्मान् सर्वेऽपि, विधातुं च शक्ष्यन्ते बहवो युष्माभिः सन्मार्गगामिनः इच्छानुसारम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वदत सस्नेहं स्वकीयां परहितकरीं वार्तां प्रति इतरान्, किन्तु न कार्योऽयमभिनिवेशो यत्, वर्तते मन्तव्यैव युष्मद्वार्ता। मा भर्त्सयत अमन्यमानं, दुष्टोऽयमित्यपि च मनसा न ध्येयं कदापि। स्ववार्तामाननाय निवेदनमेव कर्तव्यं न तु आग्रहः। भवेद् यदि कदाचित् स्वत्रुटिस्तर्हि मानभङ्गभयात् न कार्यः कदापि दुराग्रहः। न हि भवति हानिः कदापि स्वत्रुटिस्वीकारे; अपितु उचितमार्गस्वीकरणेनावश्यं भवति महान् लाभः। साकमितरैर्न कुरुत कदापीदृशं दुर्व्यवहारं, यादृशो न रोचते युष्मभ्यं स्वविषये। यदि यूयमितरेभ्यो दया–सेवासत्कारोपकार–सहायता–मैत्री–प्रेमादीनामाशां कुरुथ, तर्हि प्रथमम् अन्यैः सहैवं सर्वमेव व्यवहर्तव्यं युष्माभिः।

अन्ये स्ववार्तायाः समर्थनं कुर्युरिति बुद्ध्यैव न वाञ्छनीया इतरेषां सम्मतिः किन्तु आत्मनस्त्रुटीः स्खलनानि च श्रावयितुमेव तेषामनुमतिः प्रष्टव्या। यदि च बोधयेत् कश्चित् त्रुटिं तर्हि तदनुचितममत्वा तां संशोध्य, तस्योपकारं च मन्यध्वम्। यदि बोधयेत् कश्चिदीदृशीं त्रुटिं, या न स्यादात्मनि, तथापि तस्य मनोवृत्तौ न कर्तव्या कापि विचिकित्सा;भूयोऽत्यवधानेन स्वहृदयं स्वाचरणानि च संपश्यत। यत्र कुत्रचन निलीना त्रुटिरायास्यति दृष्टिगोचरताम्। यदि कदाचन नाप्यभ्यागच्छेत् दृष्टिगोचरतां,त्रुटिश्रावयिताचापि भवेत् स्खलितस्तथापि कृपालुत्वेनाङ्गीकार्यः सः। यतो, तेन युष्मत्त्रुटिबोधनस्वरूपलघुकार्यं स्वीकृतं, तथैतत्कार्ये च स्वमनः समयश्च नियोजितौ।

नानुचलेत् यदि कश्चित् भवत्सम्मतिं, तर्हि मावगच्छन्तु तत्प्रतिकूलं, नापि कार्या घृणा तस्मिन्। अपितु युष्मदनुमत्यनुसारं कार्याकरणे यदि स हानिभाग् भवेत्, स च पुनः कदाचित् मिलेत्, तर्हि तं प्रति इदं कदापि न कथनीयं यत् "ममानुमत्यस्वीकारस्य लब्धं फलं त्वयेति"। तेन सार्धं प्रेम्णा व्यवहरत, तस्मै समये पुनः स्वसाधुसम्मतिं ददत, साधुमार्गे च तं चालयितुं कर्तव्या चेष्टा।

दृष्ट्वा कस्मिंश्चिद् कञ्चन दोषं, तद्विषये मनसि न कार्योऽयं निश्चयो यत् स दुष्ट एवेति। सम्भवतः, दोषदर्शने युष्माकं स्खलनं संजातं भवेत्, अथवा कस्यांचन परिस्थितौ पतित्वा मनोनिग्रहाभावेनापि तेन विहितः स्यात् स दोषः। श्रेष्ठ-दुष्ट-गुणा भवन्ति सर्वेषु, दृष्ट्वा श्रेष्ठगुणान् तस्य, कुरुत प्रेमाणं तस्मिन्। दृष्टेपि वास्तविकदोषे मापमानं कुरुत कस्यचनापि। अथवा संक्रुध्य तस्मै तद्दोषप्रकटनस्य न कार्या चेष्टा। यदा कदा युष्माकमपमानेन क्रोधेन वा दोषिमनुष्यस्य दूषिता वृत्तिर्भविष्यति शिथिला; किन्तु नैव नशिष्यति। अपितु युष्माभिः कृतोऽपमानोऽथवा क्रोधस्तत्स्वान्ते शूलीभविष्यन् स्थास्यति। यदि च स भवेत् विवेकहीनस्तर्हि स्वदोषायाविधाय पश्चात्तापं युष्माभिः कृतस्यापमानस्य क्रोधस्य वा प्रतिकारे तत्परो भविष्यति। अनेन जनिष्यन्ते तस्मिन् अपि नूतनदोषाः, तस्य च दोषयुक्तचेष्टया युष्माभिरपि उत्तेजितैर्भूत्वातिशयक्रोधिभिर्हि सर्कैश्चैव भविष्यते। यदि कस्यचन दोषाणामामूलात् निःसारणस्येच्छा स्यात्तर्हि तस्य प्रिया भूत्वा विदेधीय (पुनः पुनरतिशयेन वा विधाय) च तत्सेवां जायन्तां तस्य मनसि कृताधिकाराः पुनश्च तानवबोधयन्ताम्।

संभवतः एवं सफलता केनचित् विलम्बेन प्राप्ता स्यात्, किन्तु प्राप्स्यतेऽवश्यं स्थायिनी च। इदं स्मर्तव्यं यत् राज्यसमाजव्यक्तिभिर्दण्डं दत्वा दत्वापराधिनां कृता संख्यावृद्धिः। ये स्वयं कुर्वन्ति दोषान्, तथा च



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः

[ लेखक :-वैद्य-प० श्रीमदनकुमारः शर्मा शास्त्री भिषगाचार्यः, सीकर (राजस्थानम्) ]

मनुष्येण हि सामाजिकेन प्राणिना समाजमन्तरा अक्लेशेन न जातुचिदपि जीवनयात्रा निर्वोढुं पार्यते। समाजो हि नाम अव्यापन्नाभिः स्थूणाभिः सम्प्रधारितमव्यापन्नमागारमिव स्त्रीपुरुषरूपस्थूणाद्वयेन, स्वस्वकर्तव्यदृढिम्नोपशोभितेन सुष्ठु निर्जरायते। अनयोरेकतरस्यापि विधेये विषये शैथिल्यप्राप्त्या घुणाक्रान्तमिव दुष्प्रधर्षमपि समाजकाष्ठं विनाशमुपयात्येव । सांख्यशास्त्रानुसारमपि-परिदृश्यमान-स्थूलसूक्ष्मजगन्निर्माणकार्यं यथा-नैकया प्रकृत्या न चाप्येकलेन पुरुषेण सम्भवति, सम्भूय चोभौ व्याप्रियेते। यदुक्तं सांख्यशास्त्रे-"एका तु प्रकृतिरचेतना त्रिगुणा बीजधर्मिणी, प्रसवधर्मिण्यमध्यस्थधर्मिणी चेति"। किञ्च—"निर्गुणः प्रकृतेर्योगात् कुरुते सगुणं जगत्" इति। तथैवाव्यतिरिच्य स्त्रीपुरुषयोर्न सामाजिकमणुर्महदपि वा किञ्चित् कार्यं निष्पद्यते । सांख्यशास्त्रोक्तौ प्रकृतिपुरुषौ यथोभावप्यनाद्यनन्तौ स्तः तथैव स्त्रीपुरुषावपि आसंसृतेः प्रलयपर्यन्तं, पुनश्च नवसर्गेऽप्येवमेवानवच्छिन्नसन्तानपरम्परया कालगतिरिवापरिज्ञातावसानौ, सततं प्रवर्तमानौ दृश्येते।

गृहस्थो ह्याश्रमः सर्वाश्रमवर्ति-जनानामाश्रयप्रदातृत्वेन सुविपुलं प्रशस्यते सर्वाश्रमेषु । तत्र गृहस्थस्य गृहं मूलं गृहञ्च गृहिणीमूलमिति तन्मूलमूलकतयान्वयव्यतिरेकानुविधायित्वेन च, गृहलक्ष्मीरेवातितरां प्रशस्यते सहृदयैः। अथोच्यते-"न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते" इति। नारीजातेरीदृगुच्चपदाभिषेचनमनन्यसदृशीमपूर्वां तस्या उत्सृष्टिं किं न परिचाययत्यस्मान्? सदृशं हि खल्वेतन्नारीजातेः। स्वकीयगृहनिर्माणहेतवे यां तनुजन्मदौ पितरौ, प्रियतमान् बन्धुबान्धवान् वा परित्यक्तुं नेषदपि विमृशति, मातृत्वभावाभिपन्ना सशरीरमिव वात्सल्यमभिपोषयति! एकत्र-शिववीरं प्रखरतरबलावलेपि-शत्रुजनसम्मर्दने, दुर्विजेयतमतद्दुर्गलुण्ठने चोत्साहयति, अन्यत्र हर्षकविं-चिन्तामणिमन्त्रदीक्षया स्वकीयपितृपराभवकर्तृपण्डितम्मन्यस्याखर्वगर्वभिदुरं सम्पादयति, इतरत्र-पुनर्मदालसाभिधानवती मदीयगर्भापन्नसत्वानां भूयो गर्भवासदुःखं मा भूदिति "शुद्धोऽसि बुद्धोऽसि निरञ्जनोऽसि,संसारमाया परिवर्जितोऽसी"त्येवं प्रकारिकाभिरध्यात्मवचनावलिभिर्जठरस्थशिशूनभिशिक्षयन्ती निवृत्तिपथमभिप्रेरयति । पूर्वं प्राप्तप्रचुरवनवासक्लेशयापि भर्त्रा भगवता रामेण जनापवादभयेन परित्यक्तया भगवत्या सीतया महर्षिवाल्मिकेराश्रमवसतिं सम्प्राप्य लवकुशाभिधेयं पुत्रद्वयं प्रसूय अशेषयास्त्रविद्यया चोपपन्नौ तौ तत्रस्थयैव विधाय किन्नास्थापितः नारीलोकस्य महोज्वलः आदर्शः । दुष्यन्तविमुक्तया चैवमेव शकुन्तलया भगवतो मरीचेराश्रमस्थया, केसरिकिशोरक्रीडाकुशलः किन्नाध्यापितः

रागद्वेषयोर्वशीभूय न पारयन्ति, यथार्थदोषान् निर्णेतुं, न विद्यते तेषामधिकारः परदोषदर्शने, इतरेषां दण्डने च।

[अग्रे समाप्याः]



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



स्वपुत्रो भरतस्तथा यथा भारतभूरियमद्यापि भूम्ना निजमतीतं गौरवं बिभर्ति । सृष्टेरारभ्यानादिकालतोऽद्यावधि इतश्च– निर्मर्यादसमयपर्यन्तमसंख्यमहापुरुषाणां जनयित्र्यस्ता एव नार्योऽभूवन्, सन्ति, वोभविष्यन्ति च । सीमातिगेन स्वार्थपरित्यागेन नार्यो मातरोऽतिक्रम्य देवता वर्तन्त इति तावन्निर्विवादं वाच्यम् । अपत्यपरिपोषणे किन्नाम स्वार्थं निहितमस्ति नार्याः, येन हि सा अर्भकस्याल्पीयस्यामप्यापदि, स्वस्य प्रियतमानसूनपि विक्रेतुं नाल्पमप्याशङ्कते प्रतीक्षते च। हेतुरहितम् अनवद्यञ्च यादृक् स्नेहं पुत्रे मातुर्दृश्यते न तादृक् ततश्च न्यूनतरमपि वा कुत्रचित् पितुः पुत्रे प्रेमावलोक्यते । हृदय-प्रधाना हि नारी भवति, प्रेम च परा हि खलु हार्दिकी वात्सल्यरसनिश्च्योतिनी फलनिर्वृतिः मातृजनहृदयोद्भूता शिशुजनान् सम्प्रीणाति । पिता तु केवलं शरीरधात्विन्द्रियबलानामुपशोषके जरोपरोधकालेऽयमस्मानवलम्बयिष्यतीत्येतावन्तमेव केवलं हेतुमभिसन्धाय पुत्रपालने संसज्जते । क्वचित्तु प्रीणनासमर्थं दुर्विनीतमर्भकं, शरीरवैकल्यापादकत्वादवयवैकदेशभूतमपि, निःशेषतश्च्छेदनीयं व्रणितं गात्रमिव गृहाद् बहिर्विधातुं न स्वल्पमपि सन्त्रासमावहति । मातृहृदयं नैतादृक् कठिनं भवति । नेत्रमिव निमेषेण व्यग्रचित्तया ययोत्सङ्गे, कदाचित् स्कन्धे हृदयसर्मणि वा संस्थाप्यालौकिकेनाहेतुकेन च प्रेम्णा सुचिरमभिसंरक्षितोऽभिवर्द्धितोऽनुपालितश्च बालस्तथैव वराक्या हृदयमर्मैकखण्डं, द्वितीयमिव तारामण्डलं नेत्रस्य तमुत्स्रष्टुं कथमभिधास्यते । सत्यमुच्यते कविजनेन- "कुपुत्रो जायेत क्वचिदपि कुमाता न भवति" । मातुः कृतापराधः सुबहु भर्त्सितस्ताडितश्चापि बालः रुदित्वापि किञ्चित् समयं क्षणादेव पुनस्तामेवाधिश्रयति । अतुलस्य तस्याः स्नेहस्याणवीमपि तुलां पितुः स्नेहं नावहति । सा नारी, एष पुमान्, उभयोरेतयोः रचनायामेवास्ति महान् सैद्धान्तिको विपर्ययः ।

नारी-लक्ष्म्यवमानापराधाद्यद् दुःखविषफलमनल्पं भुक्तं पुरुषेण समाजेन च, तत् किन्नाविदितमस्ति प्रेक्षावताम् । मातुर्द्रौपद्या एकस्याः कृतेन दुर्विपहेण दुःश्रवेण चापराधेन सम्प्रवृत्तं, भारतीयाखिलयोद्धृकर्णदुःशासनप्रभृतिवीरजनसंक्षयकरं, परश्शताक्षौहिणीसैन्यसेनानायकविध्वंसनं महाभारतं युद्धमत्र-प्रसङ्गे किमिति विस्मर्यते । ततः प्रभृति-कालादेव मन्येऽनवरतमबलाजनावमानसम्प्रेक्षणसञ्जातगाढ वैराग्या निर्विण्णा च सेयम्-भारतीया साम्राज्य-लक्ष्मीः क्रमशोऽस्तंगिरिशिखराधिरूढिमेवोपगता ।

अतिमहती मूर्तिमत्युत्सृष्टिरेव नारी विद्यत इति-सुप्रपञ्चितमेव । उत्सर्ग एव तस्या वास्तविकं स्वरूपं निश्चीयते । आदेहधारणान्मरणं यावदुत्सर्गमयमेवास्ति चास्या जीवनम् । पाणिग्रहादनन्तरं पत्युर्गृहमुपव्रज्य आशैशवादभ्यस्तं त्यागमेवैषा प्रयोगरूपेण परिशीलयति । जडान्धवृद्धबधिराय क्रोधिनेऽसूयकाय अतो विपरीतं नीरुजे सौहित्यपरायणाय वा यादृशे पत्येऽस्याः बान्धवाः समर्पयन्ति, तमेवेयमप्रमत्तचित्ता सेवते, मरणादनन्तरमपि च तमेवानुगच्छतीत्यहो महिमा भारतीयनारीजनत्यागपरम्परायाः । एवं विधेन तस्यास्त्यागेन मृत्युरपि बिभेति । मृत्योः सकाशादप्यतिप्रकृष्टत्यागबलेनैव सावित्र्याः स्वपतिः सत्यवान् मोचितः ।

परिवर्तनस्वभाववद्धि जगदनवरुद्धं चक्रमिवाविश्रान्तगत्या सततं परिवर्तमानमेवाभिलक्ष्यते । एतन्नियमानुसारं कृत्स्नं जागतिकं वस्तुजातं समाजः सामाजिकाः प्राणिनस्तेषां स्वभावरुच्यादयश्चापि नैकदैकस्यामवस्थायामवतिष्ठन्ते । कालक्रमादस्मा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


## देश-दर्शनम्

शिक्षकसम्मेलनम्— अक्टूबरमासस्य २, ३, ४ तारिकासु अखिलभारतीयशिक्षकसम्मेलनं देहल्यां संपत्स्यते। तत्र भारतीयसमस्तराज्यानां शिक्षकप्रतिनिधयः भागं ग्रहीष्यन्ति। एतस्मिन्नवसरे प्रचुरमात्रायां संस्कृतशिक्षकैः अपि समवेतैः भूत्वा स्वीयाः समस्याः सम्मेलनेऽत्र रक्षणीयाः—यत् ८०००० अध्यापकानां नियुक्तिः अग्रिमे वर्षद्वये स्यात्, तत्र यथानुपातं संस्कृताध्यापकानामपि अवश्यं प्रवेशः स्यादिति। तदवसरेऽत्र अ०भा० संस्कृतशिक्षकसंघोऽपि स्थाप्येत। समस्ते भारते कति संस्कृतज्ञाः सन्ति वृत्तिकर्षिताः? एषां संख्या प्रतिप्रान्तात् संग्राह्य तत्रत्यैः प्रतिनिधिभिः सस्कृतशिक्षकसंघसविधे प्रेषणीया। यदि संघः न स्थापितः भवेत्, भारती-कार्यालये एव प्रेषणीया, येन तदर्थं प्रयत्नः प्रचलेत्।

मध्यप्रदेशशासने आङ्ग्लभाषा-बहिष्कारः— मध्यप्रदेशप्रधानमन्त्रिणा श्रीरविशंकरशुक्लमहोदयेन १ सितम्बरतः सवमपि शासनीयं कार्यं प्रादेशिकभाषायां कर्तुम आदिष्टम्। एतदर्थं नागपुर-रायपुर-जबलपुरामरावतीषु चतुर्षु नगरेषु लघुलेखनस्य टङ्कलेखनस्य च अध्यापनं प्रारब्धम्। कार्येस्मिन् अयुताधिकैकलक्षरूप्यकाणां व्ययं कर्तुं तेन निश्चितम्।

अद्भुतः बालकः—सौराष्ट्रे भुवनारग्रामे चन्द्रमौलीश्वरनामा द्वादशवर्षवयस्को बालकः निवसति। अनेन बालकेन हिन्दीसंस्कृतभाषयोः असाधारणं नैपुण्यं अधिगतम्, तद् दृष्ट्वा राष्ट्रपतिना श्रीराजेन्द्रेण तथा प्रधानमन्त्रिणा श्रीजवाहरलालेन च तस्मै प्रशस्तिपत्रं समर्पितम्। भगवद्गीतामधिकृत्य विशिष्टम् अयं प्रवक्ति।

माध्यमिक-शिक्षा कीदृशी भवेत्—माध्यमिकशिक्षायाः कीदृशी स्थितिः अधुनास्ति, भविष्यति च सा कीदृशी अपेक्ष्यते इत्यर्थं भारतशासनेन नियुक्तः आयोगः स्वविवरणं प्रकाशितवान्। तत्र-प्रारम्भिकशिक्षा मातृभाषया प्रदेया; माध्यमिकशिक्षायां च अनिवार्यरूपेण एका विदेश-भाषा, अपरा च स्वदेश-राज-भाषा रक्षणीया—इति प्रदर्शितम्। एतन्मतेन प्रारम्भिकशिक्षणानन्तरं वर्षसप्तकेन सा पूर्तिम् एष्यति। अग्रे च वर्षत्रयेण प्रथमोपाधिपरीक्षा पूर्येत। वत्सरे न्यूनान्न्यूनं २०० दिनानि अध्ययनं प्रचलेत्। प्रत्येकम् अध्यापकः सप्ताहे २७ होराः पाठयेत्।

लखनऊ-विश्वविद्यालये छात्राधिकारिणोः सङ्घर्षः—विश्वविद्यालयविधानम् उद्दिश्य सप्ताम्बरमासस्य प्रारम्भत एव प्रचलितोऽयं संघर्षः नाद्यावधि समाप्तिमगात्। छात्राणाम् अनशनं प्रचलति। सर्वमपि विश्वविद्यालयाध्यापनं स्थगितमास्ते।

वर्तमान-शिक्षाप्रणाली दूषिता—[नई दिल्ली १२ सितम्बर] भारतीयविश्वविद्यालयेषु प्रचलितं निरोधं लक्ष्यीकृत्य भारतप्रधानमन्त्रिणा श्रीजवाहरलालनेहरूमहोदयेन उक्तम्—"अस्माकं वर्तमानशिक्षाप्रणाली वर्तते दूषिता। तस्या एव परिणामोऽयम् अस्माकं संमुखे। प्रणाल्याः अस्याः आमूलचूडं परिवर्तनं विधेयम्। एतदर्थं सन्नद्धैः भाव्यम्। अग्रे प्रोक्तं तेन—आधुनिकशिक्षया चरित्रस्य अनुशासनस्य संघटनस्य ज्ञानस्य च स्तरः पतनोन्मुख आस्ते। अस्य उपेक्षा न साधीयसी। शीघ्रमेव विषयेऽस्मिन् प्रयत्नो विधेयः।"

१ अक्टूबरतः आन्ध्रराज्यस्थापना—पूर्व-निर्णयानुसारम् अग्रिमप्रथमतारिकातः आन्ध्रराज्यस्य पृथक् स्थापना भविष्यति। अस्य राजधानी कुरनूलः अस्थायिरूपेण निश्चितः। सप्तात्र मन्त्रिणः मन्त्रिमण्डले भवितारः। प्रधानमन्त्री कदाचित् श्री-टीप्रकाशम् भविता, सर्वदलानाम् ऐकमत्येन।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


## पुस्तकालोकः—

**भक्तविजयकाव्यम्**— इदं हि काव्यं श्रीनरहरिविरचितया विजयाटीकया विराजितं, नयपालकविललितावल्लभविरचितं, वाराणसी-निवासिना श्रीद्विप्रानाथयतीन्द्रेण मुद्रापितम्, अष्टोत्तरशतपद्यात्मकं, गोरक्षमालायाः सप्तविंशति-पुष्परूपम् अस्माभिरवलोकितम्। काव्यस्यास्य नायकः श्रीपृथ्वीनारायणः नयपालस्थो नृपमणिः। कवितास्य प्रौढा माधुर्ययुक्ता च। अन्त्यानुप्रासलालित्यं हि कविकौशलं सर्वत्र ग्रन्थे अत्र विराजते। अर्थालङ्कार-विच्छित्तिश्चापि। यथा हि—

येऽन्तर्विलीनाः कृतभूरिपापाः
स्तेनाः सदोदीपितलोकतापाः।
छित्वा सकोशं कलुषाणि तेषां
शीघ्रं स मुक्तिं कृतवान् परेषाम्।

कविता-रसिकैः द्रष्टव्योऽयं ग्रन्थः केवलम् आण-काष्टकेन लभ्यः। प्राप्तिस्थानम्—काशी, गोरखटिल्ला—योगप्रचारिणी—नेपालमृगस्थली, गोरक्षपीठ, बनारस।

**विश्वरूपदर्शन**—श्रीमद्भगवद्गीतायाः एकादशोऽध्यायः इन्द्रप्रस्थस्थ-प०श्रीप्रभुदत्तशास्त्रिणा निर्मितया व्यङ्ग्यमन्दाकिन्या हिन्दी-टीकया समलङ्कृतः दृष्टः। विदुषा अत्र गीतायाः प्रसिद्धेभ्यः अर्थेभ्यः भिन्नः कश्चिद् विलक्षण एव प्रदर्शितः अर्थ,ः यो हि संस्कृतभाषायाः विलक्षणतां प्रकाशयन् शास्त्रिमहोदयस्यापि प्रतिभाप्रागल्भ्यं प्रकटयति। यथा—प्रथमे एव पद्ये—'यत् त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम।' अत्र-हे स्तेन ! यत् त्वया वचः उक्तम् 'मोहोऽयं मम विगतः।' अत्र भगवतः स्नेहेन स्तेनत्वं साधितम्। मुद्रणं सुन्दरम्। पुस्तकस्य मूल्यं नात्र अङ्कितं, प्राप्तिस्थानमपि च नोट्टङ्कितम्। कदाचित् देहल्यां शास्त्रिणां स्थाने एव लभ्यमिदम्।

## सुभाषितानि

*[संग्रहकर्त्ता:—वि. आर. सी. माँगीलाल-मिश्रः, नेछवा]*

१—कुग्रामवासः कुलहीनसेवा,
कुभोजनं क्रोधमुखी च भार्या।
पुत्रश्च मूर्खो विधवा च कन्या,
विनाग्निना षट् प्रदहन्ति कायम्॥

२—यथा चतुर्भिः कनकं परीक्ष्यते,
निघर्षणच्छेदन-ताप-ताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते,
त्यागेन शीलेन गुणेन कर्मणा॥

३—आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुसंकटे।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः॥

४—कष्टं च खलु मूर्खत्वं कष्टं च खलु यौवनम्।
कष्टात्कष्टतरं चैव परगेहनिवासनम्॥

५—लालनाद् बहवो दोषास्ताड़नाद् बहवो गुणाः।
तस्मात्पुत्रं च शिष्यं च ताडयेन्न तु लालयेत्॥

**गृह्यताम् गृह्यताम् त्वर्यताम्—**

यस्य महाग्रन्थस्य प्रतीक्षायां धार्मिक-संसारः चिरादासीत्, स महाग्रन्थः "श्री-सनातनधर्मालोकः" ग्रन्थमालारूपेण प्रकाशयितुम् आरब्धः। तस्य त्रीणि पुष्पाणि विकसितानि। अत्र 'नमस्ते' इत्यस्य एक-निपातविषये 'यथेमां वाचं कल्याणीम्' इत्यस्यार्थविषये च विचारितम्। ऐतरेय-महिदासः ऐलूषकवषः, कक्षीवान्, वाल्मीकिः, शबरी, वसिष्ठः, पराशरः, व्यासः,—एते ब्राह्मणा आसन् अब्राह्मणा वा—इति विषये सप्रमाणोपपत्ति विवेचितम्। एतत्पुस्तकस्य अध्ययनेन भवतां धार्मिक-शङ्का दूरी-भविष्यति। मूल्यं केवलं ३) रु०। प्राप्तिस्थानम्—*श्री-दीनानाथशास्त्री सारस्वतः,*
*रामदल, दरीबाकलां, देहली ६*



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



### श्रीराजस्थानीयसंस्कृतच्छात्रसम्मेलने

## सभापतेः भाषणम्

उपस्थित-महानुभावाः ! अद्य महान् हर्षस्य विषयः यत् चिरकालात् घोरनिद्रायां निद्रायमाणाः संस्कृतज्ञाः इदानीं विबुध्यमानाः दृश्यन्ते ।

यद्यपि भवन्तः सर्वे संस्कृतभाषां पठन्तः तदुन्नत्यै च कटिबद्धाः सन्ति, पूर्वजाचरितानपि मार्गान् जानन्ति अनुतिष्ठन्ति च । तथापि अल्पीयः वृद्धवाक्यमपि आकर्णयन्तु भवन्तः ।

आभ्यन्तरबलाऽभावः उन्नतेः प्रतिबन्धकः, स च नियमेन निवर्हणीयः सर्वैः । आभ्यन्तरबलञ्च ईश्वराराधनेन, गुरुजनसेवया, विनयेन, शास्त्रविहितकर्मणामनुष्ठानेन च भवति । तस्मात् ब्राह्मे मुहूर्ते उत्थाय, नित्यक्रियातो निवृत्य, नित्यकर्म कृत्वा, सावधानमनसा गायत्रीं जपित्वा, गुरुजनान् अभिवाद्य ततः केषुचित् कर्मसु प्रवर्त्तितव्यम्, येन भवन्तः आयुः विद्यां यशः बलञ्च लभेरन् । यथाह भगवान् मनुः—

**अभिवादनशीलस्य, नित्यं वृद्धोपसेविनः ।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥**

संस्कृतज्ञा अपि आधुनिकाश्छात्राः पाश्चात्त्यशिक्षाप्रभाविताः, तेषां बाह्याडम्बरेण प्रतारिताः, स्वीयाम् ऋषिजनप्रणीतां सरणीमपहाय पाश्चात्त्यानेवानुकर्तुं वाञ्छन्ति. कृत्वा प्रसीदन्ति च । तन्न शोभनम् । अस्माकं पूर्वपुरुषाणां प्रणीता मार्गा एवंविधाः सन्ति, याननुसृत्य गन्तारो भूमण्डले पूज्याः अभूवन्, भवन्ति, भविष्यन्ति च । परन्तु इयं तु ईदृशी दशा जाता यथा कस्तूरी मृगनाभावेव तिष्ठति, मृगश्च तदर्थमितस्ततो धावति । उन्नतेः नाना-पन्थानः श्रीमतां गेहे एव सुरक्षिताः सन्ति, परन्तु भवन्तः अन्याननुकर्त्तुम् इच्छन्ति, तन्न सुचारु । पश्यन्तु भवन्तो निजशास्त्रम्, पालयन्तु च कर्त्तव्यानुष्ठानम्; येन स्वकार्ये सफलमनोरथा भविष्यथ । अस्माभिरपि परमात्मा प्राार्थ्यते यदयं छात्रसंघः स्वोद्देश्ये फलवान् भवतु—इति

श्रीरामोत्साहमिश्रः, ज्यौतिषाचार्यः



## किं भवन्तो जानन्ति ?

१—सरघाः (मधु-मक्षिकाः) प्रस्थपरिमाण- (सेर-भर) मधुसञ्चयने लक्षषट्कस्य पुष्पाणां रसं संगृह्णन्ति ।

२—संसारे सर्वतोऽधिकं गभीरः कूपः शर्मण्यदेशे (जर्मन) अपरसाईलेसियायामस्ति; यो हि २७१५ हस्तप्रमाणं (४०७३ फुट) गभीरः ।

३—संसारेऽस्मिन् सर्वतः समुन्नतं भवनं 'सोवियत-पैलेस' नामकम् अस्ति, यस्य हि औन्नत्यं ८७७ हस्तपरिमितं (१३१५ फुट) वर्तते ।

४—गतवर्षे भारते धूम्रपानरसिकैः २८ कोटिरूप्यकपरिमितं धनं धूम्रपानव्यसने व्ययितम् । तत्र २२ कोटिरूप्यकाणि परदेशे प्रेषितानि । अवशिष्टं च धनं भारतस्य कोषे परदेशवस्तुकररूपेण संप्राप्तम् ।

५—सन् १९५२–५३ ईशवीये एकस्मिन् वर्षे भारते ६५८ कोटिरूप्यकाणां वस्तूनि विदेशेभ्यः समागतानि । तेषु २७ प्रतिशतम् अमेरिकातः एव आयातानि ।

## मधु–कण :—

### [ धर्म–व्याख्या ]

यैः कर्तव्य-जातैः कस्यापि अन्यस्य राष्ट्रस्य, जातेः व्यक्तेर्वा परिणामे न किमपि भवेद् अहितम्, समाजस्य सुश्रृङ्खल–व्यवस्थायां न कापि उपतिष्ठेत बाधा; स्वस्य जीवनमपि पवित्रम्, स्फटिकवच्च भवेत् सुस्फीतम्; एतादृशानि आर्यसिद्धान्तभित्तिषु रागद्वेषशून्य–महर्षिभिः चित्रितानि विभिन्न–विभिन्नव्यक्तीनां विभिन्न-विभिन्नानि कर्तव्यान्येव धर्मपदवाच्यानि भवन्ति ।

"मानवताया आशा जनतायाः मानसिक-रोगेभ्यो निवारणे, नैतिकपतनाद् रक्षणे च वर्तते ।"

---

**शुभसमाचारः —** शारदीयावकाशेऽस्मिन् राजस्थानीयसंस्कृताध्यापकानां शिक्षण-कला-ज्ञानाय राजस्थान-शिक्षाविभागेन समायोजितः शिक्षण-शिविरः जयपुरे भविता अस्य हि प्रेरकःडा० श्रीमथुरालालशर्ममहोदयः, एतदर्थं राजस्थानीयशिक्षाविभागः स च धन्यवादपात्रम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृत-समाचाराः-

## भारती-प्रचारार्थं प्रबन्ध-सम्पादकस्य परिभ्रमणम्

**नवलगढे**-अत्र प्रसिद्धव्यवसायिना आढ्येन श्रीमनसुखराय-मोरमहोदयेन सह चिरम् अस्य वार्तालापो जातः भारती-विषये। श्रेष्ठी अयं भारतीय-संस्कृतेः पूर्णः पक्षपाती भारतीय-शास्त्राणाम् अध्ययनशीलश्च। आर्यधर्मप्रचाराय अनेन लक्षशः रूप्यकाणां व्ययः कृतः क्रियते च। श्रेष्ठिना अनेन भारत्यां प्रकाशनाय राष्ट्रभाषायां लिखितः एकः स्वलेखोऽपि दत्तः। अनूदितः स अस्मिन्नेव अङ्के मुद्रितो जनैः द्रष्टव्यः।

**इन्द्रप्रस्थे (देहली)**-अत्र आसन्नषष्टि-ग्राहकाः नूतनाः संजाताः भारत्याः। संस्कृताध्यापकसङ्घस्य प्रचारमन्त्रिणा श्रीयशोदानन्देन शास्त्रिणा पर्याप्तं सहयोगः प्रदत्तः। तत्रत्य-ख्यात-विदुषः श्रीचूडामणि-शास्त्रिणोऽपि पूर्णः सहयोगः प्राप्तः। अनेन सार्द्धमेव श्रीमद्भिः आयङ्गरमहोदयैः श्रीहरिहरस्वरूपादिभिश्च सह परिचयः अभवत्। आयङ्गरमहोदयस्य तु संस्कृतानुरागः सर्वत्र देशे सुप्रसिद्ध एव। अनेन हि भारत्यै केन्द्रात् सहायता-दानायापि प्रतिज्ञातम्। संस्कृतोन्नति-विषये सुचिरं परामर्शश्च प्रदत्तः। 'हिन्दुस्थान-टाइम्स' पत्रस्य संचालकः श्रीदेवदासगांधीमहोदयोपि भृश सस्कृतानुरागी वर्तते। अस्यैव प्रेरणया विश्वसंस्कृत-परिषदि संस्कृतस्य कथाप्रतियोगिता प्रविष्टा। भारतीं प्रशंसता अनेन अस्याः समुन्नतिकामना कृता।

श्रीराष्ट्रपतिनापि 'भारत्यै शुभसंदेशः प्रदापितः। विश्वविद्यालये संस्कृतप्राध्यापकेन श्रीनरेन्द्रनाथ-चौधरीमहोदयेनापि भारत्याः प्रचारे पूर्णः सहयोगः प्रदत्तः। तत्र संस्कृतसङ्घेनायोजितायाम् एकस्याम् सभायां भारत्याः प्रबन्धसम्पादकस्य भाषणमपि संजातम्।

## अखिल-भारतीय-रेडियो-(आकाशवाणी)

अस्य रुच्यनुसन्धानविभागतः एकं मुद्रितं पत्रं उपलब्धम्, यत्र संस्कृतकार्यक्रमस्य विषये श्रोतृणां मन्तव्य-ज्ञानाय प्रश्नावलिः समुट्टङ्किताऽस्ति। भूमिकायां लिखितमस्ति-भारतीयरे-डियोद्वारा प्रसारितः संस्कृतस्य कार्यक्रमः कीदृशः रुचिकरोस्ति कर्तुं शक्यते वा? अस्यान्वेषणाय भवतां मतं ज्ञातव्यम् आस्ते। निम्नाङ्कितप्रश्नानाम् उत्तरदानेन समनुग्राह्योऽयं कार्यालयः इति।

प्रश्नावली आङ्ग्लभाषायां हिन्द्यां च मुद्रितास्ति स्वसौकर्यमनुरुध्य उपयोगं कुर्युः। यदि स्वयम् उत्तरदाने नावकाशः भवतां तदा कश्चिदपि वयस्कः भवतां पारिवारिकः समुत्तरेत्। नास्ति अस्य निवेदनस्य आवश्यकता यत श्रोतृणां रुचिं ज्ञात्वैव रेडियो-विभागः कार्यक्रमं भवताम् अनुकूलं समुपयुक्तं च रचितुं समर्थः। तस्मात् रेडियो-शुश्रूषवः संस्कृतज्ञाः पत्रस्यास्य कोष्ठं प्रपूर्य अवश्यं संप्रेषयन्तु येन संस्कृतकार्यक्रमोऽपि पर्याप्तं रचितः भवेत् तत्र। अनेन हि संस्कृतप्रचारः सिद्ध्येत्।

## जोधपुरनगरे गीताप्रचारः—

नगरेऽस्मिन् गीता-प्रचार-मण्डलस्य स्थापना २००५ वैक्रमेऽब्दे संजाता। अद्यावधि मानवानां पञ्चशती सदस्यतां स्वीकृत्य गीतापाठेऽस्ति संलग्ना। २००७ तमे वर्षे गीतापरीक्षापि प्रारब्धा। तस्यां परीक्षायां द्वि-त्रवर्षेष्वेव बहु-प्रचारः संजातः। शतशः छात्राः समुदतरन् परीक्षामिमाम्। संस्कृतभाषाज्ञान-मन्तरा वास्तविकं गीताप्रचारो न संभवीति स्वाध्याय-मण्डल-(सूरत) द्वारा संचालिता संस्कृतभाषा-परीक्षापि प्रारब्धाऽत्र। तत्रापि आसन्नविंशाः छात्रा वर्षेऽस्मिन् उत्तीर्णाः अभवन्। अस्य व्यवस्थापकोस्ति "जानकी-वल्लभो माथुरः"।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



समाजोऽपीदानीमसह्यं क्रोधदुःखमनुभवति । समयानुसारं समाजरचनाव्यतिक्रमोऽपि स्वीक्रियत एव सामयिकैः सामाजिकैः । अतएव नूतनसमाजनिर्माण-प्रश्नोऽपि विचारशीलानामुत्पद्यत एव हृदयेषु । मध्ययुगे पारतन्त्र्यवशादन्यैर्वाविस्थिकैस्तैस्तैर्हेतुभिः भारतीयानां रुद्धप्रसरा तेषु तेषु सर्वेष्वपि क्षेत्रेषु प्रगतिर्बभूव । नारीणां गौरवमपि चिराय विस्मृतं भारतीयैः । यवन-हतकानां राज्यकालेऽधुनापि च पाकिस्थाननिर्माणावसरे नारीणां गौरवसंरक्षणे न प्राभूवन् भारतीयाः । परमधुना स्वातन्त्र्यसुखमनुभवामः । नवनिर्माणस्याय-मवसरः । नारीष्वनिशं प्रवर्तमानां पुरुषसमाजस्या-त्याचारपरम्परां, निर्व्यलीकेन चेतसाद्याति-लघुविचारणीयामनुभवन्ति विशेषतोऽव्यग्रधियो विमर्श-कुतूहलिनः सुधिय इति महानयं प्रमोदस्य विषयः । एवं तावदनतिशैथिल्येन विचार्यमाणेऽमुष्मिन् गम्भीर-तरविषयेऽप्यनतिमहता कालेनैव विचारकगणः समा-सादयिष्यत्येव कञ्चित् प्रशस्ततरं पन्थानम् । एतन्नव-समाजनिर्माणकार्यं न तादृक् सुकरमस्ति यादृग् विचार्यते। त्रिकालज्ञैर्महर्षिभिस्त्रिकालाबाधितेन विज्ञानचक्षुषा सम्यगवलोक्यास्मद्धितायास्मदीयसमाजनियमाः पूर्वं वैशद्येनाभिनिर्दिष्टाः । दुर्दान्तकालप्रहारेणास्मदीय-भागधेयस्याधन्यतया वा तेऽस्माभिर्विस्मृताः, ते पुन-रधुनास्माभिरप्रमत्तेन चेतसा सामयिकं किञ्चित् परिवर्तनमप्यवलम्ब्यानुपालयितव्याः । एष एव समी-चीनः पन्थाः। समाजनिर्मातारोऽत्र नोत्क्रोश्याः। यथेदानीं हिन्दूकोड कुठारेणोत्कर्तनापकर्तनप्रकारेण सुबद्धमूल-मपि समस्तं समाजवृक्षमामूलशाखापल्लवमुच्छिन्दता सुधियाप्यसमीक्ष्यकारिणा स्वतन्त्रभारतीयाधिकारिवर्गेण ते भृशमुत्क्रोश्यन्ते । वासनाप्रधानाङ्गलनारीजनचाक-चिक्यभृशनिरीक्षणविस्मृतात्मस्वरूपाः वराकास्तेऽ-धिकारिणः पाश्चात्त्यसंस्कृतिमेव बहु मन्वतेऽनुकुर्वते च मिथ्याग्रहग्रहिलास्तामेव ।

त्यागभूमिर्हि नाम भारतं वर्षम् । पूज्याश्चास्यार्यावर्त-देशस्यार्यललनाः ? कथं नाम ताः नारीस्वरूपाधिगतं स्वकीयमातृभावमनभिसमीक्ष्य सहसैव परित्यजेयुः केवलं स्ववासनापूर्तये एव विभ्रान्तोचितमार्गेणैवं कुर्वता पुरुषेण पूज्याः नार्यः किन्नाधुना प्रतार्यन्ते ? नार्यपमानापराधाल्लब्धप्रचुरदुःखोऽपि पुरुषस्तेनैवाप्रशस्तेनोन्मार्गेण गन्तुमुत्सहत इति महत् कष्टम् ।

विवाहकाल एव यदा नारीं मित्रमिवापरं बहु मन्वानः पुरुषस्तस्यास्त्यागेन प्रसह्य हार्दं निजं सिंहासन-मस्यै प्रयच्छति, तदासाऽपि स्वामिनस्तादृग्गौदार्य-परिगृहीतचित्ता, मित्रभावान्नीचतरमपि दास्यभावं स्वयमेवाङ्गीकुरुते । पत्युर्निजस्य हृदयसाम्राज्य-सिंहासनाधीश्वरत्वमुपलभ्य सा नान्यदपरं किञ्चित् स्वातन्त्र्यं प्रार्थयते । पुरुषस्तु तद्दत्तमपि दास्यं यदा स्वाधिकारार्जितमिति मत्वा दुरुपयुङ्क्ते तदैव समाजे वैषम्यं समायाति । चातुर्वर्गिकञ्चास्य मनोरथं नश्यति । श्रेयोमार्गेणासौ भ्रश्यति श्रिया परिहीयते । तावच्चायं महद्दुःखतप्ततैलकटाहे आकण्ठं मग्नः पच्यमानोऽव-सीदति न यावदबलाजनावमानागः परिमार्जयितुं पश्चात्तापपुरःसरं पुनरुद्युङ्क्ते । सौहित्यपरायणश्च न यावन्नारीणामुपचितिं कर्तव्यप्रसूनेनाभिसम्पाद-यतीति सत्यमुच्यते—

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।

इति मनुना—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# कोकिलाष्टकम्

[ प० श्रीजोखन-झा व्याकरणसाहित्याचार्यः, बलुआ-बाज़ार, (बिहार)

पूर्वं कोकिल ! मन्दरेण गिरिणा देवैस्तथा दानवैः
सार्द्धं क्षीरनिधिं प्रमथ्य सहसा निष्कास्य दोर्भ्यां सुधाम् ।
पङ्क्तौ निर्ज्जरसां निवेश्य कृपया त्वापाययत्तां हरि—
स्तस्मात्त्वद्वचसः प्रवर्षति सुधेत्याहुश्च सर्वे जनाः ॥१॥

ये देवा अपिबन् सुधां कृतयुगे ह्यर्यङ्घ्रिपद्माश्रिता—
स्ते सर्वे त्ववतीर्य्य कोकिल ! कलौ पीयूषवाग्वादिनः ।
तां दौर्बल्यजरार्तिमृत्युहरणां त्यक्त्वा, सुरां येऽपिबन्
भूत्वा ते भुवि मानवाः कटुगिरः क्रूराः खलाः पापिनः ॥२॥

पिकेमं ते वर्णं सकृदपि समुच्चार्य विपदां—
पदं हित्वा गच्छत्यपि हरिपदं पाप्यपि महान् ।
न चेत्तेऽयं वर्णोऽभिलषति युवानं न युवति—
स्तदा सर्वे त्वन्धाः प्रलयमपि गच्छन्त्यसमये ॥३॥

पूर्वं किं सुकृतं कृतं सुकृतिना लब्धा सुधावाक् त्वया
यामाश्रित्य पुमांसमत्र वनिता कृत्वा वशं तिष्ठति ।
निर्ज्जीवाऽपि च वल्लकी परिषदं ब्रूमोऽत्र किं प्राणिनां—
धन्यास्ते प्रवदन्ति येऽमृतमयीं वाचं पिक ! त्वत्समाम् ॥४॥

बिम्बोष्ठी शुकनासिका मृगदृशी पूर्णेन्दुपेशानना
हेमाभा मृगराजसुन्दरकटिर्बिल्वस्तनी कोकिल !
रत्नाभूषणभूषिताऽखिलतनुर्नारी सुवासो विना—
नो भातीह पुमान् विना प्रियवचो भूष्योऽपि भूषाम्बरैः॥५॥

किं भातीह करं विना खलु करी, चद्रं विना शर्वरी
चन्द्रो भाति कलां विना न वनिता सिन्दूरबिन्दुं विना ।
भूपो भाति कविं विना नहि तथा भूपं विना नो कविः—
पीयूषार्द्र वचोविहीनमनुजो नो भाति गोष्ठ्यां पिक ! ॥६॥

संसारेऽस्मिन् सुमतिकुमती पुण्यपापे अपि द्वे
विद्याविद्ये अमृतगरले कीर्त्त्यकीर्त्त्यावपि स्तः ।
युग्मे युग्मे परमसुकृती स्वेच्छया पूर्वपूर्वं
गृह्णात्यत्रोत्तरपदगतं दुष्कृती स्वानुकूलम् ॥७॥

शिक्षे नृभ्य इमे ददासि पिकराड् ! ब्रूहि प्रियं मत्समं
मादृङ्मानमवाप्नुहि प्रथमतो मादृक्सपक्षो भव ।
वृक्षस्योपरि संस्थितं सुमधुरं प्राप्नोति पक्षी फलं
दृष्ट्वा सीदति केसरी तरुतले जिह्वोदकं पातयन् ॥८॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# स्वधर्मः परिपाल्यताम्

— ले० नारायणशास्त्री काङ्करः, जयपुरम् —

[जयपुर-महाराजसंस्कृतकालेजस्य छात्रसंघद्वारा समायोजिते जन्माष्टमी महोत्सवे पठितो लेखः]

इमं जन्माष्टमी-महोत्सवं वयं प्रतिवर्षं ससमारोहं सम्पादयामः । बहुशः विद्वांसोऽत्र समवेता भवन्ति, अहमहमिकया च भगवतः श्रीकृष्णस्य जीवनोपरि स्वीयं सारगर्भितम् अन्वेषणात्मकं प्रकाशं पातयन्ति । अद्यापि मे पूर्वं कतिभिः कोविदैः भाषितं, भाषिष्यते च अग्रे । किन्तु दुःखमेतदेव यद् वयं भगवतो जीवनात् न काञ्चन प्रेरणां शिक्षां च लभामहे । यथा चित्र-पटोऽस्माभिः केवलं मनोरञ्जन-साधनत्वेन परिगण्यते, तथैवायम् उत्सवोऽपि । यद्येवं नाऽभविष्यत् तर्हि कतिपय-वर्षेभ्यः समारोहं सम्पादयत्सु अस्मासु काचन नवीनता, स्फूर्तिः, उत्साहः, जागर्तिः, कार्यकुशलता च अवश्यमेव आगमिष्यत् ।

भगवता श्रीकृष्णेन केवलमेकः अर्जुन एव गीता-द्वारा किमुपदिष्टः ? जगति वर्तमानाः सर्वे एव मानवाः सदुपदिष्टाः । असौ कथयति—

"स्वधर्मे निधनं श्रेयः परधर्मो भयावहः" इति ।

परं वयं तु तद्वचसि अश्रद्दधानाः यथारुचि आचरामः व्यवहरामश्च । अस्माकम् यो धर्मः—यत् कर्म वर्तते, तत् परित्यज्य अन्यान् अनुकुर्मः, तदीयकर्मसु एव च सौख्यं पश्यामः । हन्त ! कीदृशी विचित्रा भ्रान्तिः ? पशु-पक्षिणोऽपि स्वधर्मविरुद्धं न आचरन्ति । यत् खाद्यं तदेव खादन्ति, यत् पेयं तदेव पिबन्ति, यत् कर्म तदेव कुर्वन्ति । किन्तु अस्मासु इतः सव विपरीतम् । संस्कृतज्ञानां कर्म, कर्म एव हि किम्, परमो धर्मः विद्यते—यया विद्यया, यया भाषया, स्वोदरं पोष्यते, तद्विद्यायाः तद्भाषायाश्च प्राणपणेनापि संरक्षणम् इति । साम्प्रतं प्रायः सर्वे एव संस्कृतज्ञा विधर्मिणः अकर्मण्याश्च सञ्जाताः सन्ति । न ते स्वधर्मं पाल-यन्ति । स्वयं कृपणां वृत्तिं धारयन्तः यथाकथञ्चित् संस्कृतविद्यया उपार्जितं द्रव्यं एकत्रीकृत्य स्वीयान् बालान् आङ्ग्लपाठशालासु पाठयन्ति, परिचित-जनताया बालकांश्च संस्कृतमध्येतुं प्रवर्तयन्ति । परं किमेतत् प्रतारणा-कार्येण संस्कृतशालासु छात्र-बाहुल्यं भवितुं शक्नोति ? संस्कृताध्येतॄणां न्यूनतायां प्रत्यक्षमयं प्रबलः हेतुः ।

अद्य यदि कस्याश्चिद् भाषाया दुर्दशा दृश्यते, तर्हि केवलं "संस्कृतभाषायाः—सहैव तज्ज्ञातॄणाम् । इयं प्राचीनकाले कीदृशी समुन्नता आसीत्—इति तु आस्तां तावत् स्तवनेन । मनीषिभिः प्राचीनगौरवम् अनाख्याप्य वर्तमानदशायामेव ध्यानं प्रदेयं सुधारश्च विधेयः । संस्कृतम् अद्य न सर्वकारः पृच्छति, न च जनता । सामयिकमेवैतत् । आम्, सर्वकारः याः याः पाठशालाः सञ्चालयति, तास्तु केवलं धर्मदान-रूपे एव । यद्येवं न अभविष्यत् तर्हि संस्कृतपरीक्षा-सञ्चालने इयन्तं व्ययं कृत्वापि स तासु उत्तीर्णानां समुचितप्रतिष्ठया उपयोगम् अकरिष्यदेव । अत्र सर्वकारस्यापि को दोषः ? वयमेव यत् मिलति, तदेव पर्याप्तम्— इति सन्तोषमाश्रित्य तूष्णीमुपविशामः । एतज्जानन्तोऽपि, यत् भारतीयसंस्कृतेः आधारशिला संस्कृतमेव अस्ति, न तत्प्रचारं कुर्मः, न स्वाधिकारार्थं युद्ध्यामहे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पाश्चात्य-शिक्षा-दीक्षितः सर्वकारस्तु शनैः शनैः कृतं छिन्न-मूलं चरीकर्त्तुम् अन्तर् एव गूढं षड्-माचरत्येव। संस्कृत-परीक्षाणां कठिनपाठ्यक्रम-र्णम्, विविधशुल्कग्रहणेन शिक्षायां महार्घता-ादनम्, पूर्वं दीयमानच्छात्रवृत्तीनां न्यूनीकरणं, कथञ्चित् एतादृश्यामपि परिस्थितौ उपाध्याय-मध्य-ीक्षोत्तीर्णस्नातकानां वेतनस्य अष्टमकक्षोत्तीर्ण-डेलोपाधिधारिभिः समानं निर्धारणम्-इत्यादीनि त बहुशः ज्वलद्दृष्टान्तानि। परं वयमपि कर्णे निपात्य निःशब्दं शेमहे। न किञ्चिद् विरोधम् वरामः – न प्रतिवादं विदध्मः। विचारयामश्चैवम् दे किञ्चिद् वक्ष्यामः तर्हि या कीदृश्यपि वृत्तिः ुज्यते सर्वकारीया – ततोऽपि हस्तौ प्रक्षालनीयौ ष्यतः।' अहो ! कीदृशी घृणास्पदा कुक्कुर-तः ! एकेऽस्माकं भ्रातरः, ये भृतिशून्याः साहाय्या-ाषुकाः सन्तः इतस्ततः पर्यटन्ति, एके च वयं विडालात् मूषक इव बिभ्यतः गृहे आत्मानं संगोप्य ठामः – प्रत्यक्षं न आगच्छामः। उपर्युपरि वाचा ानुभूतिप्रकाशने एव आत्मानं धन्यं सन्यामहे।

अस्माकमपेक्षया तु काकवृत्तिमाश्रित्य संघटनेन र्यं कुर्वाणा अन्ये एव बहवो जनाः ससुखं निव-न्ति। सुखेन मम आशयोऽस्ति-स्वोद्देश्यपूर्त्या सह ाप्तिम् अन्नं वस्त्रं च प्राप्य लोके प्रतिष्ठया वनयापनम् - इति। आम्, सन्ति संस्कृतज्ञानामपि वन संघाः। परं ते नाम्नैव कीर्तनीयाः। वयं तेष्वपि मनसा सम्मिलामः। मिलिताश्चेत् सर्वदा ान्यस्योत्कर्षं दर्शं दर्शं ज्वलामः, ईर्ष्यामः, द्रुह्या-च। सति सम्भवे उन्नतम् अधश्च्यावनादपि न ामहे। अयमस्ति अस्माकं पाण्डित्यपराक्रमः ! ावता श्रीकृष्णेनापि तु व्रजगोपालानां संघटनं विधाय शत्रौ विजयः प्राप्त आसीत्। परं कुत्र वयं तस्मात् शिक्षामहे ? यदि कार्यरूपे स्वजीवने सात्विक-संघटनेन वर्त्तामहे, तदा तु साधनशून्यानां वित्त-हीनानामपि अस्माकं नौः पारे लगेदेव। प्रतिदिनं काक-कूर्मसृगाखुकथाः बालान् पाठयामः। किन्तु न स्वस्मिन् ताः संघटयामः-इत्येव विचारं विचारं दोदूयते नश्चेतः।

वयं स्वस्य उत्तरदायित्वमपि न सम्यक् पालयामः-न च कृतां प्रतिज्ञामेव निर्वहामः। अयमपि गर्हणीयो दोषोऽस्मासु कस्माच्चन कालात् समागतोस्ति; योऽस्ति अन्यतमः सिद्धिबाधकः। सर्वथा परिहे-योऽसौ। समयानुसारं विचक्षणमनीषिणा सर्वविधैव नीतिः अनुसरणीया। सर्वकारस्तु यादृशो—वर्तते तादृशः वर्तते एव। व्यर्था तस्य आलोचना। संस्कृतज्ञैः आत्मना अपि तु स्वधर्मः पालनीयः। परान् तु उप-दिशन्ति—'संस्कृतभाषां स्वबालकान् पाठयन्तु, संघ-टनं कुर्वन्तु, ईर्ष्याद्वेषभावं परित्यजन्तु, लेखान् लिखन्तु, संस्कृतपत्राणां ग्राहका भवन्तु, सर्वदा संस्कृते वदन्तु' इत्यादीनि। किन्तु स्वयं ते एतस्मात् सर्वथा विपरीतमाचरन्ति। कथं पुनः संस्कृतोन्नतिः भवेत् ? सर्वत्र परोपदेशे पाण्डित्यं विजृम्भते। एतादृशपण्डित-ब्रुवाणामेव कारणात् संस्कृतमधोऽधः रसातलं गच्छति।

भोः भोः ! संस्कृतेन जीवनं निर्वहन्तो महाभागाः! उत्थीयताम्। जागर्यताम्। साम्प्रतमपि समयोऽस्ति। चिरं प्रतारितः आत्मा। अलमलं विलम्ब्य। किंचित् चेक्रियतां स्वभाषायै। यूयमेव स्थ भारतीयसंस्कृतेः स्तम्भाः। क्वचिदेवं न स्यात्—युष्माकम् उदासीनतया संस्कृतमेव नश्येत्—तेनैव तदाश्रिता संस्कृतिरपि। नो चेत् आगामिन्यः सन्ततयो धिक् करिष्यन्ति युष्मान्। किमधिकं विशेषज्ञेषु ?



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# आधुनिकस्य मानवस्य कर्तव्यम्

[ ले० श्रीमनसुखराय मोरः, नवलगढ ]

ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ।
शुक्ल-यजुर्वेद-सं० अध्याय ४० म० १

ईश्वरस्य इदं कथनम् यत् सृष्टेः सर्वे एव ...णिनः मम एव आत्मस्वरूपं वर्तन्ते । प्राणिमात्रस्य ...णस्य चिन्तां कृत्वा प्रकृतिदत्तान् भोगान् भुञ्जी-...म् । कस्यचिदपि ...सा सर्वथा गर्ह-...या । सर्वेऽपि ...णिनः सृष्टेः परिच-...यां पूर्णतःसहायकाः ...न्ति । कस्यापि ...णिनः शक्तेः ...दुग्धस्य) हरणस्य ...वनाऽपि चित्ते ...गच्छेत् । अयमेव ...स्तः कल्याणकरश्च ...र्गो वर्तते । 'अथ ...त्रिविध-दुःखात्यन्त-निवृत्तिरत्यन्तः पुरु-...षार्थः' इति परमात्मनः ...आदेशस्य पालनेनैव ...त्रिविधदुःखानां निवृत्तिर्भविष्यति । अस्मिन्नेव ...मानवजीवनस्य सार्थकता, साफल्यम्, कल्याणञ्च ...निहितम् । उपर्युक्तः मन्त्रः समस्त-मन्त्राणां सारः ...वर्तते 'तस्मात् शास्त्रं प्रमाणम्' ।

**...सृष्टेः प्रलयावस्था—**

सम्पूर्णं विश्वं प्रलयकाले जलमयमेव भवति । यावत् पर्यन्तं स्थूलो वायुः चलति, यावत् च मेघानां स्थितिः अस्ति तावत् सर्वं जलमयमेव संजायते । तस्मिन् समये सूर्याचन्द्रमसोः तारकाणां च प्रकाशः सूक्ष्मवायोः मध्ये लीनो भवति । केवलं सूक्ष्मो वायुरेव विद्यमानः सन् प्राणः, चेतनः, सर्वगतः इत्यादि-नामभिः उद्घोष्यते । स सर्वनियन्तृ-मुखेन येन केनाऽपि नाम्ना व्यवह्रियेत किन्तु, सम्पूर्ण-भूमण्डले स एव निवासं करोति ।

**प्रलयान्तं सृष्टेः क्रमिकविकासः—**

प्रलयकालीनावस्थायाः अनन्तरं सृष्टेः आरम्भ-कालः समागच्छति । सूक्ष्म-वायोः प्रभावेण तस्मिन् समये जले क्रमशः गत्यारम्भो भवति । शनैः शनैश्च स स्थूलवायवे स्थानं ददाति । अनेन जलस्य मध्ये शैवालानां प्रादुर्भावो भवति । तेन जलीय-प्राणिनाम् मत्स्य-सर्पादीनां विषाक्तजन्तूनां समुत्पत्तिः भवति । जलमध्ये विषाक्त-जन्तूनां समुत्पत्तेः उष्मा व्याप्तो भवति । प्रकृतौ अपि दृश्यते, यत् यदा शरीरे शैथिल्यं समागच्छति, तदा वैद्याः विषमिश्रितानां औषधीनां तस्मिन् शरीरे प्रयोगं कुर्वन्ति । तेन च

## 'भारती'–पत्र–प्रशस्तिः

ले०—चन्द्रशेखर-ताम्बे, नागपुरम्

प्राप्यैतद् 'भारती'–पत्रं प्रतिमासं समुच्छ्रितम् ।
सम्पद्यते मे मनसः प्रसादोऽतितरां खलु ॥१॥
अस्याः प्रचारणेनाहमवगच्छामि निश्चितम् ।
समुन्नतं भारतं स्यादल्पैरेव च वत्सरैः ॥२॥
भा-हतं 'भा-रतं' कर्तुं शक्नुयाद् भारती पुनः ।
निःसंशयं भारतीज्ञा ! इत्यद्याहमुदीरये ॥३॥
गद्यपद्यसुसंयुक्तमज्ञानस्य विनाशनम् ।
वन्देऽहं 'भारती'पत्रं संस्कृतोन्नतिकारकम् ॥४॥
समुल्लसत्संस्कृतपत्रमेतत्
कदा समायास्यति मे गृहं पुनः ।
मुहुर्मुहुश्चाहमदः स्मरामि
तृप्तिं यतो नैति मनो मदीयम् ॥५॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



चैतन्यम् उष्णता च समागच्छति। एषः तेषां जन्तूनां सृष्टौ पूर्णोपयोगः वर्तते। एवम् उष्णतया जलीयांशस्य शनैः शनैः शुष्कतया जलीयस्थानस्य केन्द्राणि समुद्रादीनि-यथापूर्वं स्वकार्यं मर्यादानुसारं प्रारभन्ते।

अस्मिन्नेव समये सूर्य-चन्द्र-तारागणेषु प्रकाशः व्याप्नोति, स्थूलो वायुश्च पूर्ववत् स्वक्रिया-निरतो भवति। मृत्तिकायाः भागः स्वतः एव बहिः आगच्छति। तस्योपरि मृत्तिकायां जन्तवः कीटपतङ्गादयः उत्पद्यन्ते। तदनन्तरं च तृणानि उत्पद्यन्ते। तत्पश्चात् च तृणजीविनः पशवः मृगाः हस्तिनः गावः वृषभादयश्च जायन्ते। वेदेप्युक्तम्:—

अग्निश्च म आपश्च मे विरुधश्च म ओषधयश्च मे कृष्टपच्याश्च मे ग्रामाश्च मे पशवआरण्याश्च मे वित्तञ्च मे वित्तिश्च मे भूतञ्च मे भूतिश्च मे यज्ञेन कल्पन्ताम् (शुक्ल-यजुर्वेदः १८ अ० १७ म०)

अग्निः पृथिवीस्थो वह्निः। आपोऽन्तरिक्षस्थानि जलानि। वीरुधः गुल्माः। ओषधयः फलपाकान्ताः, कृष्टपच्याः कृष्टेन पचयन्ते इति कृष्टपच्याः राजसूयसूर्येत्यादिना (पा० ३,१,११४ क्यबन्तो निपातः। भूमिकर्षणवीजवपादिकर्मनिष्पाद्या ओषधयः, तद्विपरीताः अकृष्टपच्याः स्वयमेवोत्पद्यमानाः नीवारगवेधुकादयः। ग्राम्याः ग्रामे भवाः पशवः गोऽश्वमहिषाजाविगर्दभोष्ट्रादयः। आरण्या अरण्ये भवाः पशवः हस्तिसिंहशरभमृगगवयमर्कटादयः। वित्तं पूर्वलब्धम्, वित्तिः भाविलाभः, भूतं जातपुत्रादिकम्, भूतिः ऐश्वर्यम्-स्वाजितम् एतानि यज्ञेन मम सम्पद्यन्ताम्।

सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या
वृक्षान् सरीसृपपशून् खगदंशमत्स्यान्।
तैस्तैरतुष्टहृदयः पुरुषं विधाय
ब्रह्मावलोकधिषणं मुदमाप देवः॥
भाग० स्कन्धः ११ अ० ६

अधुना वनस्पतीनां अन्नमय्यः शक्तयः यथैव वृद्धिंगता अभूवन्, अकृष्टपच्यान्नस्य च व्यापकता संजाता तदा तदाश्रितायाः ज्ञानस्य पुत्तलिकायाः प्राणिश्रेष्ठायाः मानवजातेः सर्वेषामनन्तरम् उत्पत्तिरभूत्। स एष निजस्य ज्ञानशक्त्या प्रभोःविराट्सृष्टेः जलचराणां, स्थलचराणां, नभोचराणां च प्राणिनां एकमात्रं स्वामी बभूव। पिपीलिकाया (चींटी) आरभ्य हस्तिपर्यन्तं प्रथमोत्पन्नाः प्राणिनः सन्ति। ते अङ्गस्वरूपिणः वर्तन्ते। मानवश्च यः सर्वेषाम् अनन्तरं प्रादुरभूत् स एव सृष्टेः प्राणस्वरूपमस्ति। तस्यैव च हस्ते सृष्टेः परिपालनं पूर्णतया रक्षितं वर्तते। इदं सम्यकतया अवगम्य वय विलोकयामः यत् संस्कृतभाषायाम् एका उक्तिः वर्तते 'यत्पिण्डे तद् ब्रह्माण्डे' यत्पिण्डे वर्तते तद् ब्रह्माण्डेऽपि वर्तते। पश्यत मातुः गर्भे रजोवीर्ययोः संयोगानन्तरं समयानुसारं प्रथमं बालकस्य अङ्गप्रत्यङ्गानां निर्माणं भवति। तदनन्तरं चैतन्यस्य आत्मनः अभिव्यक्तिर्भवति। जीवस्य अधीनम् एव शरीरं भवति। यदि ज्ञानेन विवेकेन च, आत्मा शरीरं प्रकृत्याः नियमानुसारं चालयति तर्हि स पूर्णायुष्यं भुङ्क्ते। यदि अज्ञानेन चालयति तर्हि तत् शरीरम् अल्पायुष्यं भवति। अयमेवास्ति सृष्टेः क्रमः। एतत् सृष्टिमध्ये सर्वे एव प्राणिनः मानवस्य अविभाज्यानि अङ्गानि सन्ति। सर्वेषामेव रचना सृष्टेः परिचर्यार्थम् आवश्यकी। तेषां वृद्धेः रक्षणस्य च भारः ज्ञानेन विज्ञानेन सम्पन्नस्य मानवस्य स्कन्धयोरुपरि वर्तते। वस्तुतः शरीररूपायां सृष्टौ अङ्गप्रत्यङ्गरूपस्य जीवमात्रस्य सत्तायां प्राणिरूपः मानवः एव प्रधानः वर्तते। एषः एव प्रभोः सृष्टेः रक्षको मर्यादायाश्च पालको विराट् महामहिमशाली चास्ते। इत्थं मानवज्ञानद्वारा प्रकृतेः नियमानुसारम् ईश्वरनिर्मितायाः सृष्टेः मर्यादारक्षणेन प्राणिमात्रस्य वृद्धिः भविष्यति। मर्यादायाः विनाशेन जीवमात्रस्य ह्रासो भविष्यति। तस्मात् सर्वदा मर्यादायां वर्तितव्यं जनैः। (क्रमशः)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## संस्कृतदिवससमारोहस्य सभापतेः

# श्रीमदनन्तशयनम् आयंगरमहोदयस्य अध्यक्षीयं भाषणम्।

[ गुरुपूर्णिमा, रविवासरः २६ जुलाई १९५३, दीवानभवनम्, दिल्ली ]

[ यद्यपि भाषणमिदम् आकाशवाणी-विभागेन सर्वत्र प्रसारितं पत्रान्तरेषु प्रकाशितञ्चास्ते; तथापि भारतीयविधानसभायाः उपाध्यक्षाणां विचाराः संस्कृतं प्रति कीदृशाः सन्ति उदाराः इति लक्ष्यीकृत्य तत्प्रहितं भाषणमिदम् अविकलं प्रकाश्यते विदुषां परितोषाय इति— सम्पादकः ]

उपस्थिताः विद्वन्महाभागाः, श्रोतारः, अभ्यागताश्च! स्वकीयं महत्सौभाग्यं मन्येऽहं यत् सत्स्वपि विद्वद्वर्येषु संस्कृतविद्यासागरेषु भवद्भिर्महत् सम्मानं मह्यं प्रदत्तम्। सभापतिपदं स्वीकुर्वति मयि महाकविकालिदासस्यायं श्लोकश्चरितार्थो भवति—

तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥

तथापि, गुरोराज्ञाऽनुल्लङ्घनीया इति स्वीकृत्य संस्कृतसेवां स्वीकुर्वाणो निजविचारान् प्रस्तौमि—

विश्वस्य पुरातनतमा भाषा संस्कृतम्। अस्याध्ययनस्य प्रचारस्य च कालोऽयमागतः। इयं भाषा अद्यापि भारते व्यवह्रियते, यद्यपि पुरातनस्वरूपाद् भिन्नं स्वरूपमस्य वर्त्तते अद्यत्वे। अस्यां भाषायां भारतीयसंस्कृतेः स्वरूपं निहितम्। उत्तरीयभारतस्य भाषाणामध्ययनाय संस्कृतस्य ज्ञानं परमावश्यकम्, दक्षिणभारतीयभाषासु च संस्कृतशब्दानां प्राबल्यं दरीदृश्यते एव।

पुरा, संस्कृतं भारतस्य सांस्कृतिकी भाषा आसीत्। अद्यापि इयमेव भाषा अस्मिन् पदेऽधिष्ठातुं समर्था। अस्य साहित्यं विशालं सर्वव्यापि च। वेद-पुराणोपनिषद्-इतिहासशास्त्रनाटकादीनां सर्वेषामङ्गानां प्रचुरं साहित्यमस्मिन्नेव निहितम्। इयमस्मद्देशस्य वर्त्तते सांस्कृतिकी भाषा, अस्माकं संस्कृतिश्च केवलं संस्कृतेनैव ज्ञातुं शक्या। अनेनैवास्माकं पुण्यभूमेः महत्सम्मानं पुराऽऽसीत्। अद्यापि चास्माकं देशोऽनेनैव सम्मानभाजनं वर्त्तते। आङ्ग्लीयैः, जर्मनैस्तथाऽपरेषां महाद्वीपानां पण्डितैरस्याः भाषायाः ज्ञानमधिगतम्। संस्कृतभाषायाः माहात्म्यं तु भारतीयविधानेऽपि नीतिविद्भिः स्वीकृतम्। अतः संस्कृतस्याध्ययनाय, अस्य पुनरुत्थानाय च द्रुतमेवास्माभिः प्रयत्नो विधेयः। इमां भाषां च सांस्कृतिकीं भाषां वयं विदधाम। बह्वो विद्वांसोऽस्मिन् प्रयत्ने संलग्नाः वर्त्तन्ते। द्विवर्षपूर्वं सोमनाथे एका संस्कृतविश्वपरिषद् स्थापिता, अस्याः परिषदोऽन्तिमसम्मेलनस्य सभापतिपदं भारतस्य राष्ट्रपतिना माननीय-श्रीराजेन्द्रप्रसादमहाभागेन सुशोभितमासीत्। अस्मिन् सम्मेलने द्विसहस्रपण्डिताः समवेताः। उत्तरप्रदेशस्य शिक्षामन्त्रिमहोदयोऽपि वाराणस्यामेकं संस्कृतविश्वविद्यालयं स्थापयितुमीहते। शासनेनापि संस्कृताध्ययनस्य विकासाय सहयोगिना भाव्यम्। उत्तरीयभारतस्य छात्रैस्तु संस्कृतमवश्यमेवाध्येतव्यं, यतो हि संस्कृतमेवोत्तरीयभारतस्य भाषाणां मूलम्। दक्षिणेऽपि विद्यालयेषु महाविद्यालयेषु च सुविधा प्रदातव्या।

एकः अखिलभारतीयसंस्कृतपुस्तकालयः स्थापनीयो येन सर्वेषां संस्कृत-पुस्तकालयानां सम्बन्धः स्यात्। अनेकेषु पुस्तकालयेषु कतिपयाः संस्कृतभाषाया



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अमूल्या ग्रन्थाः सन्ति । एतादृशा एव कतिपया ग्रन्था लन्दनस्थे "इण्डिया-लाईब्रेरी" नाम्नि पुस्तकालयेऽपि विद्यन्ते । अस्माभिरेवं प्रयत्नो विधेयो यत् एषां बहुमूल्यग्रन्थानां प्रत्याकृतिचित्राणि निर्मातव्यानि तदनन्तरं च तानि भारतीय-पुस्तकालये सुरक्षितं स्थापनीयानि, विदेशेभ्यो देशेभ्यश्च अप्रकाशितानां संस्कृतग्रन्थानां पाण्डुलिपयः संग्रहीतव्याः प्रकाशितव्याश्च ।

पुस्तकालयानां पुस्तकानुक्रमणिकानामपि अनुक्रमणिका एका प्रकाशनीया, येन सर्वाण्यपि पुस्तकानि सर्वत्र सुलभानि भवेयुः । अस्यां दिशायां मद्रास-विश्वविद्यालयस्य संस्कृतोपाध्यायः श्रीमान् राघवन्-महोदयः प्रयत्नशीलो विद्यते । अस्मिन् विषये तु न केवलं मद्रासनाम्नि नगरे, प्रत्युत सर्वत्र एव समानया क्रियया भवितव्यम् ।

संस्कृताध्यापनाय भारतस्य सर्वेष्वपि प्रदेशेषु महाविद्यालयाः स्थापनीयाः, येषु विभिन्नविद्यालयेषु विभिन्नविषयाणां विशेषाः शाखाः स्युः । येन विदेशीया अपि विद्यार्थिनः भारतवर्षमागत्य संस्कृतभाषां भारतीयसंस्कृतिं चाधिगच्छेयुः । अस्माकं देशस्तु पुराऽपि भूमण्डलस्य गुरुरासीत् । यथा हि प्राह भगवान् मनुः—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

इदं महदाह्लादकारकं यत् संस्कृतस्य प्रचाराय अखिलभारतीयसंस्कृतप्रचारकमण्डलेन गुरुपूर्णिमायाः दिवसः निश्चितः । अहं तु वच्मि, न केवलमेकेन दिवसेन कार्यं सिद्धिं गमिष्यति, संस्कृतप्रचाराय तु सप्ताहमयः कार्यक्रमो निश्चेतव्यः ।

निखिलेऽपि देशे अनुसन्धानशालाः अपि स्थापनीयाः, यासु आधुनिकेन वैज्ञानिकरूपेणानुसन्धानकार्यस्य सर्वा अपि सुविधा सुलभा स्यात् । नालन्दा-तक्षशिलादिविश्वविद्यालयानां गौरवम् अस्माभिर्न इयत् शीघ्रं विस्मरणीयम् । संस्कृतिरस्माकं सेवायाः बलिदानस्य च द्योतिका, ययोः समाजो मानवता च आश्रिता ।

संस्कृतभाषायामेव सा शक्तिः, यत्सा वैदिकीं संस्कृतिं पुनरुज्जीवयितुं क्षमा । वैदिकी संस्कृतिरेव हि विश्वस्मिन् विश्वे पुनः शान्तिं स्थापयितुं समर्था । वेदान्, शास्त्राणि, उपनिषदः, महाभारतं, रामायणम्, अन्यानपि धार्मिकान् सांस्कृतिकांश्च ग्रन्थान् सम्यगधिगन्तुं संस्कृतभाषा नितान्तमावश्यकी ।

आशासेऽहं, येऽपि विद्वन्महोदयाः इन्द्रप्रस्थनगरीमुपस्थिताः ते संस्कृतप्रचारं निजधार्मिककृत्यं स्वीकरिष्यन्ति, गृहे गृहे संस्कृतप्रचाराय च पूर्णं प्रयतिष्यन्ते, येनास्माकं पुनीता संस्कृतभाषा विश्वस्य समक्षे भूयोऽपि गौरवास्पदं प्राप्नुयात् ।

ममाभिप्रायो भवद्भिः शान्त्या आकर्णितः अतोऽहं हृदयतो धन्यवादान् सर्वेभ्यो ददामि, आशासे च युष्मासु प्रत्येकमपि सज्जनो निजसांस्कृतिकभाषायाः निजे निजे गृहे पूर्णमादरं विधास्यति ।

प्रवर्ततां प्रकृतिहिताय पार्थिवः,
सरस्वती श्रुतिमहती, महीयताम् ।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः ॥

सुरभारती विजयतेतराम् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# राजस्थानीय-संस्कृतसाहित्य-सम्मेलनस्य

## कार्यकारिण्या विशेषाधिवेशनम् [ १ अगस्त ५३ ]

अगस्तमासस्य प्रथमे दिवसे शनिवासरे रा० सं० सा०सम्मेलनस्याध्यक्षाणां डा० श्रीमथुरालालशर्मणां साभापत्ये सम्मेलनकार्यकारिण्याः आवश्यकमधिवेशनं संजातम्।

तत्र च निम्नसदस्यानां उपस्थितिः आसीत्—

१ डा० श्रीमथुरालालशर्मा
२ श्रीरामप्यारी देवी शास्त्रिणी
३ वैद्य-श्रीजयरामदासः स्वामी
४ श्रीवृद्धिचन्द्रशर्मा शास्त्री
५ श्रीनारायणशास्त्रिकाङ्करः
६ श्रीमण्डनमिश्रः
७ श्रीसुरजनदासः स्वामी

तत्र च निम्नाङ्किताः प्रस्तावाः स्वीकृताः प्रेषिताश्च सम्बद्धाधिकारिणां सविधे।

१ रा०सं०सा० सम्मेलनमिदं राजपूताना-वि०वि० अधिकारिणः प्रार्थयते यत्ते यथा पञ्चनदविश्वविद्यालयेन असत्यपि संस्कृतमहाविद्यालयानां सम्बन्धे संस्कृतपरीक्षाः संचाल्यन्ते तथैव रा० विश्वविद्यालयेनापि केवलं संस्कृतपरीक्षाणां सचालनं विधेयम्। एवं सति संस्कृतपरीक्षाणां मान्यतायां राजस्थानप्रान्ते विप्रकीर्णा अव्यवस्थिता च संस्कृतशिक्षाप्रणाली सुव्यवस्थिता एकसूत्रग्रथिता च स्यात्। न च विश्वविद्यालयस्य आर्थिकी क्षतिरपि स्यात्। राजस्थानसदृशे सांस्कृतिकप्रान्तीयविश्वविद्यालये संस्कृतपरीक्षाणां संचालनं न केवलम् आवश्यकम् अपितु गौरवास्पदम् एव।

२ रा० सं० सा० सम्मेलनमिदं रा० वि० विद्यालयाधिकारिणः सादरमनुरुणद्धि—यत् विश्वविद्यालयेन संचाल्यमानासु मेट्रिक—इन्टर-बी० ए—परीक्षासु वैकल्पिकरूपेण हिन्दींविषयं ग्रहीतृभ्यः संस्कृतस्यैकं पत्रम् अनिवार्यं विधेयम्। एतेन विद्यार्थिनां हिन्दी—सम्बधिनी योग्यता शब्दसंपत्तिश्चापि वृद्धिमेष्यति। अपिच हिन्दीभाषायाः प्रान्तीयभाषाभिः सहापि नेदिष्ठः संबन्धो भविष्यति। यतोहि संस्कृतमेव सर्वासां प्रान्तीयभाषाणां जननी। प्रान्तीयासु भाषासु च संस्कृतशब्दानां एव बाहुल्यम्। हिन्दीभाषायाः प्रान्तीय भाषाभिरेवं संजातेन सम्बन्धेन स्नातकेषु राष्ट्रियभावनायाः जागरणमपि स्यात्।

३ रा० सं० सा० सम्मेलनमिदं राजपूताना—विश्वविद्यालयस्य प्रकाशितायां नवीननियमावल्याम्—मेट्रिक, इण्टर, बी० ए०, आदिपरीक्षासु केवलम् अङ्गलभाषामादाय प्रविविक्तॄणां कृते स्वीकृतासु योग्यतासु राजस्थानीयानाम् उपाध्यायादिपरीक्षाणामनुपलब्धिमवलोक्य भृशं विषीदति; सानुरोधं च निवेदयते यत्तेऽतिशीघ्रम् संशोधनम् विदध्युः, उपर्युक्तपरीक्षाणां च योग्यतासूच्याम् समावेशम् कुर्युः। न केवलं समावेश एव अपितु ताभ्यः परीक्षाभ्यः प्राथमिकताऽपि प्रदेया। यद्यासां परीक्षाणां राजस्थाने एव प्राथमिकता न स्वीक्रियेत, तर्हि अन्यप्रान्तेषु तु प्राथमिकतायाः वार्तैव का? आशास्यते, विश्वविद्यालयाधिकारिणः शीघ्रमुचितम् संशोधनम् विधास्यन्ति। सूचयिष्यन्ति च रा० स० सा० सम्मेलनम्।

४ रा० सं० साहित्य—सम्मेलनमिदं राजस्थान—शिक्षाविभागाधिकारिणः साग्रहमनुरुणद्धि।

(क) यत्ते राजस्थान-सं० परीक्षाणां प्रचलितायाम् नियमावल्याम् आवश्यकं संशोधनमतिशीघ्रं विदध्युः वर्तमाननियमावल्याम् बहवः ग्रन्थाः दुर्लभाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अनुपयुक्ताः असंगताश्चापि । एषा नियमावली राजस्थाने संस्कृत-प्रचारे महती बाधा सिद्धा ।

(ख) अपि च संस्कृतपरीक्षाणां संचालनार्थं रजिस्ट्रार-परामर्शदात्री समितिरपि तैर्निर्मेया। येन संस्कृतपत्रेषु दृष्टमशुद्धिबाहुल्यं संस्कृतपरीक्षासु प्रचलिताऽव्यवस्था च भविष्यति न स्यात् । ❀

५–अग्रे चास्माभिः सम्मेलनसदस्यैः करणीयम् कार्यम् अधोलिखितम् :—

१—संस्कृतप्रचाराय सर्वत्र सम्मेलनस्य शाखासभाः स्थापनीयाः ।

२—कवीनां महापुरुषाणां जयन्त्युत्सवाः पर्वोत्सवाश्च (रक्षाबन्धन—जन्माष्टमीप्रभृतयः) आयोज्याः । तत्र च संस्कृत-प्रचाराय विधेयः साधीयान् प्रयासः ।

३—प्रौढानाम् आङ्ग्लाध्यापकानाम् अन्येषां च कर्मकारिणां संस्कृत-शिक्षणाय रात्रि-पाठशालाः स्थानीयैर्विद्वद्भिः निःशुल्कमायोज्याः ।

४—संस्कृतज्ञाः संस्कृतानुरागिणश्च सम्मेलनसदस्याः विधेयाः ।

५—समाचारपत्रेषु संस्कृतप्रचारार्थम् लेखाः प्रेषणीयाः । अन्यदपि यथामति संस्कृतप्रचाराय यथेच्छं प्रयतनीयम् । संस्कृतप्रचारार्थं विहितकार्याणां सूचनाऽत्रावश्यं प्रेषणीया इति विनिवेदयति—

**सुरजनदासः स्वामी**
मन्त्री-रा०सं०सा० सम्मेलनस्य,
कोटा ।

---

❀ उपर्युक्तानां प्रस्तावानां हिन्दीभाषानुवादः अधिकारिभ्यः प्रेषितः यतो हि न ते संस्कृतज्ञाः ।

# प्रहसनानि

१

एकस्य धनिकस्य गृहाद् द्रव्य-पेटिका नष्टा। तदा स सर्वान् सेवकान् आहूय समपृच्छत्—भोः ! मम पेटिकायाः अनुसन्धानमस्ति किं भवताम् ? केन नीताऽसौ ?

एकः सेवकः अग्रे समागत्य न्यगदत्-आम् , निवेदयामि स्वामिन् ! ( श्रुत्वैतद् उत्कर्णस्य स्वामिनः श्रोत्रसविधे मुखं नीत्वा शनैः ) एतत्कार्यं तु निःसन्देहं कस्यापि चौरस्यैव वर्तते ।

२

मार्गे गच्छतोः द्वयोः कयोश्चिदन्धयोः परस्परं संघषः समभवत् । तयोः एकः आक्रोशन् अवदत्—न दृश्यते किं सार्द्धहस्तत्रयपरिमितोऽपि मनुजः , येन शिरसि एव समापतितः ?

अपरः ( स्वशिरः परामृशन् ) ततोऽपि उच्चस्वरेण न्यगादीत् , न दृश्यते तदैव एषा वार्ता । अहं तु अन्धः, किन्तु किमरे ! तवापि चक्षुषी नष्टे ?

३

मोहनः—( क्रोधेन कनिष्ठभ्रातरं प्रति ) किमरे, त्वया मम पूरिकाः कथं भक्षिताः ?

सोहनः—भ्रातः ! अलमलं कोपेन, न मया तव पूरिकाः भक्षिताः। अहं तु भक्षितवान् गोधूमपिष्टस्य।

★ ★ ★

# किं कस्य मण्डनम्

नीतिर्भूमिभुजां, नतिर्गुणवतां, ह्रीरङ्गनानां, धृतिर्दम्पत्योः, शिशवो गृहस्य, कविता बुद्धेः,प्रसादो गिराम्, लावण्यं वपुषः, श्रुतिः सुमनसां, शान्तिर्द्विजस्य, क्षमा शक्तस्य, द्रविणं गृहाश्रमवतां, स्वास्थ्यं सदा मण्डनम्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## श्रीगोलवेलकर-महाभागानां राजस्थान-यात्रा

ऐषमः संघकार्यकर्तॄणाम् अखिलराजस्थानीय-सम्मेलनं जोधपुरे आसीत् २१ सितम्बरतः दिनत्रयम्। तत्र सम्मिलितः श्रीगोलवलकरमहोदयः सार्वजनिकसभायाम् अपि भाषणं दत्तवान्, तत्रभाषमाणेन उत्तम अनेन यत्-पाश्चात्त्य-वेषभूषायाः पाश्चात्त्य-भाषायाश्च स्वतन्त्रेऽस्मिन् देशे सर्वथा त्याग एव वरम्। स्वकीया वेशभूषा धारणीया स्वीया च भाषा भाषणीया। संघोऽयं राष्ट्रोन्नतेः विशुद्धभावनया भारतीयहिन्दूनां संघटनाय सर्वदा समुद्यतोऽस्ति। न कस्यापि समाजस्य विरोध-भावनया। भारतीयसंस्कृतेः समुन्नतिरेव अस्य लक्ष्यम्। अतः प्रत्येकम् आर्यसंस्कृति-प्रणयिनः कर्त्तव्यम् वर्तते यत् सः सघेऽस्मिन् मिलित्वा राष्ट्रोन्नतिं कुर्यात्-इति।

॥ श्रीः ॥

### अजयमेरु-प्रान्तस्य प्रधानमन्त्रिणां श्रीमतां हरिभाऊ-पाध्यायानां भारतीं प्रति शुभ-सन्देशः—

"संस्कृत-भाषा, यां वयं देवगिरं मन्यामहे, यस्याश्च साहित्यस्य न केवलं भारतीयेषु प्रत्युत समस्त-सांसारिकेषु वर्तन्ते अनन्ताः उपकाराः, तस्याः महत्त्वसम्बन्धे न कस्यापि मतद्वयं भवितुम् अर्हति। अतो यदि संस्कृत-भाषायाः काचित् पत्रिका प्रकाशमेति, अथवा संस्कृत-साहित्यस्य सेवायै समभिवृद्ध्यै च किमपि आयोजनं भवति, तदा सर्वप्रकारेण तत् प्रोत्साहनीयं समादरणीयं च।

भौतिकजगतः या विविधता, (अनेकता) सा भगवतः विशेषमर्थं साधयन्ती अपि क्षणभङ्गुराऽस्ति। तस्यां या चैतन्यसत्तास्ति ओतप्रोता, सा स्थायिनो एका च।

एवम् अनेकतायां भ्रमताम् एकतायां प्रवेशनस्य या प्रवृत्तिः सा प्राणिमात्रस्य कृते सहजा, नित्या, सत्या च। अस्माकं सर्वे प्रयत्नाः एतदर्थमेव भवेयुः। भारती-पत्रस्य सम्पादनं संचालनं वा अनया दृष्ट्या क्रियते चेत् मन्ये न केवलं तत् संस्कृत-भाषाया अपितु समस्त-भारतीयसमाजस्य वास्तविकीं सेवां विदधाति। अस्मिन् एकतायाः पुण्यमार्गे प्रचलन्तो भारती इयं सबला भूत्वा भारतस्य भारती (भाषा) सिद्ध्येत् इति भगवन्तं प्रार्थये।

अहं भृशम् आशासे यत् भारतीय-शिक्षितजनता एनां निश्छलेन सत्येन च हृदयेन स्वीकरिष्यति; यतो हि अस्याः भाषा सरला, विषयाणां निर्वाचनमपि च वर्तते समयोपयोगि। इति—

हरिभाऊ उपाध्यायः

## राजस्थानसंस्कृतछात्रसम्मेलनम्—बीकानेर।

श्रीशार्दूलसंस्कृतविद्यापीठे – ऋषिपञ्चम्यां [illegible]-९-५३ दिनाङ्के शिक्षाविभागाध्यक्षैः श्रीप० [illegible]किशोरामसहोदयैः, सहायकशिक्षाविभागाध्यक्षैः श्रीप०रामचन्द्र-वामनकुम्भारे महोदयैश्च समुद्घाटिते, श्रीप०रामोत्साहमिश्राणां साभापत्ये सम्पन्ने संस्कृत-छात्रसम्मेलने निम्नलिखिताः प्रस्तावाः स्वीकृताः।

(१) सर्वासामपि राजस्थान—संस्कृत-छात्रसमितीनां छात्र-सम्मेलने एकीकरणम्। (२) पञ्चवर्षीय-योजनायां संस्कृत-शिक्षाव्यवस्था। (३) ग्रामशिक्षा-प्रौढशिक्षादिप्रसारे संस्कृत-छात्राः सहयोगः। सर्वेष्वपि महिला-विद्यालयेषु संस्कृत-पाठ्यक्रमाध्यापनस्य अनिवार्यता। (५) देवस्थानसम्पत्तिद्वारा संस्कृतविद्यालयानां सञ्चालनं छात्रवृत्ति-प्रबन्धश्च (६) संस्कृतस्नातकानां कृते सर्वसमानवेतन—स्तरादिप्रबन्धः। प्रतिस्पर्धिपरीक्षासु प्रवेशाय पूर्णोऽधिकारश्च। (७) संस्कृतनाट्यपरिषद्-स्थापना (८) शास्त्रीयसंगीतशिक्षणम् (९) पत्रिका-प्रकाशनम् (१०) हिन्दीसंस्कृतविद्यार्थिनोरुभयोः-सर्वत्र पारस्परिकः सहयोगः पारस्परिकसाहित्यानु-शीलनञ्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



बालस्तम्भः—

# सरलः संस्कृत-शिक्षणोपायः

प० श्रीदुर्गादत्तशर्मा मैथिलः, जयपुरम्

## इकारान्तः नपुंसकलिङ्गः दधिशब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | दधि | दधिनी | दधीनि |
| द्वितीया | दधि | दधिनी | दधीनि |
| तृतीया | दध्ना | दधिभ्याम् | दधिभिः |
| चतुर्थी | दध्ने | दधिभ्याम् | दधिभ्यः |
| पञ्चमी | दध्नः | दधिभ्याम् | दधिभ्यः |
| षष्ठी | दध्नः | दध्नोः | दध्नाम् |
| सप्तमी | दध्नि, दधनि | दध्नोः | दधिषु |
| संबोधनम् | हे दधे, हे दधि | हे दधिनी | हे दधीनि |

एवम् अक्षि (आंख) अस्थि (हड्डी) सक्थि (जांघ) शब्दानां रूपाणि ज्ञेयानि।

### त्वर्यताम्—

संस्कृत-कथा-स्पर्द्धार्थं ३०-६-५३ पर्यन्तं कथाः नगपुरे 'भवितव्यम्' संपादकस्य सविधे प्रेष्यन्ताम्। प्रेष्यमाण-कथानाम् आवृत्तित्रयम् आवश्यकम्। सर्वोत्कृष्ट-लेखकेभ्यः क्रमशः ५००) ४००) ३००) रूप्यकाणां पारितोषकाणि प्रदास्यन्ते।

### पठ (पढना)

(क्रियातिपत्तौ लृङ्)

| | एक-व० | द्वि-व० | बहु-व० |
|---|---|---|---|
| प्र० पु० | अपठिष्यत् | अपठिष्यताम् | अपठिष्यन् |
| म० पु० | अपठिष्यः | अपठिष्यतम् | अपठिष्यत |
| उ० पु० | अपठिष्यम् | अपठिष्याव | अपठिष्याम |

एवं व्रज, वद, हस, क्रीड, रक्ष, चल, लिख, पत, भू (भव) भक्ष, गम-धातूनां रूपाणि भवन्ति।

### उदाहरणार्थः पाठः

यदि देवदत्तः गुरुगृहमव्रजिष्यत् तर्हि रामायणमपठिष्यत्। यदि त्वं पठनसमयेऽहसिष्यः तर्हि गुरुस्त्वामवाच्यमवदिष्यत्। यदि त्वमुद्यानमगमिष्यः तर्हि कन्दुकमक्रीडिष्यः। यदि ब्राह्मणाः स्वधर्ममरक्षिष्यन् तर्हि लोकदृष्ट्या नापतिष्यन्। यदि रामः लवपुरात्पत्रमलिखिष्यत्तर्हि अहमपठिष्यम्। यदि बालकाः नाहसिष्यन् तर्हि मोदकान् अभक्षिष्यन्। सुवृष्टिश्चेद् अभविष्यत्तदा सुभिक्षमभविष्यत्। यदि यूयं मया सहाचलिष्यत तदा दधि अभक्षिष्यत। तस्य अक्षिणि किमपतत्? तस्य सक्थि दृढं सुन्दरञ्च अस्ति।

प्रकाशक-जयबहादुरसिंह। पता-भारती भवन, जयपुर। मुद्रक-नेशनल प्रेस, जयपुर में रामेश्वर द्वारा मुद्रित।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

पुस्तकालय गुरुकुल कांगड़ी




संवत् २०१० } वर्षः ३ { द्वादशाऽङ्कः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# विषय-सूची


| क्रमः | लेखनामानि | लेखकनामानि | पृष्ठसंख्या |
|---|---|---|---|
| १. | रे पान्थ ! प्रचल सोल्लासम् | श्रीमद् ओंकारशास्त्री, सोनीपत | २२५ |
| २. | केचन उपदेशाः | श्रीशान्तिस्वरूपयतिः, जयपुरम् | २२६ |
| ३. | कृष्णो भक्तश्च भगवान्० | श्रीरघुनाथपाटणकरः, राजापुरम् | २२८ |
| ४. | ऐक्यम् | श्रीकालीकुमारमिश्रः, रानीपुर वृन्दावन ( बिहार ) | २३० |
| ५. | महर्षिः पाणिनिः | श्रीविश्वेश्वरदयालः, पिलानी ( राजस्थान ) | २३१ |
| ६. | मार्जनम् | श्रीदीनानाथशास्त्री, देहली | २३२ |
| ७. | काकाष्टकम् | श्रीजोखन-झा, बलुआबाजार ( बिहार ) | २३३ |
| ८. | चलच्चित्रपटे समुद्रगर्भस्य दृश्यानि | भट्ट श्रीमथुरानाथशास्त्री, जयपुरम् | २३४ |
| ९. | समस्यापूर्तयः | अनेक कवयः | २३५ |
| १०. | कूटसाक्षित्वफलम् | श्रीशिवप्रसादशास्त्री, किशनगढ़ | २३६ |
| ११. | राष्ट्रपतेः सन्देशः | ... ... | २३६ |
| १२. | सुपुत्रस्य परिचयः | श्रीगिरिराजशर्मा शास्त्री, जयपुरम् | २३८ |
| १३. | सुभाषितानि | श्रीप्रभाकरशर्मा 'दिनेशः' जयपुरम् | २३९ |
| १४. | आधुनिकस्य मानवस्य कर्तव्यम् | श्रीमनसुखराय-मोरः, नवलगढ़ | २४० |
| १५. | मधुकणाः | सम्पादकः | २४१ |
| १६. | संस्कृत समाचाराः | " | २४२ |
| १७. | पत्रालोकः | वि० सुब्बरावः, मूडबिद्री | २४३ |
| १८. | प्रहसनानि | सम्पादकः | २४४ |
| १९. | किं भवन्तो जानन्ति | " | " |
| २०. | अनुकरणीयः संस्कृतानुरागः | " | " |
| २१. | सम्पादकीयम् | " | " |
| २२. | देशदर्शनम्-विदेशवार्ता | " | " |
| २३. | सरल-संस्कृत-शिक्षणोपायाः | " | " |


## *Education Department*

*Memorandum No. 37720-E-Edn., D. 3rd. Oct, 1953.*

Books and Publications—Sanskrit Journal entitled "**BHARATI**"
Use in Public Libraries and Colleges-orders passed.
*Ref :*—From the Director of Public Libraries
RC. No. 821-N 53. dated 29-9-53.

The Director of Public Libraries, Madras, is requested to issue a circular bringing the Sanskrit Journal entitled "**Bharati**" published by the Bharati Bhawan, Jaipur, to the notice of all Public Libraries and Colleges in the State.

J. SIVANANDAM,
*Secretary to Government.*

*To.*
The Director of Public Libraries, Madras, (with enclosor). Copy to the Bharati Bhawan Gopalji ka Rasta, Jaipur. *Forwarded/ By order.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः-
श्रीवृद्धिचन्द्रशर्मा शास्त्री
व्याकरण-धर्मशास्त्राचार्यः
महाराज-संस्कृत-महाविद्यालयः
जयपुरम्

# भारती

मूल्यम्—
वार्षिकं रूप्यकत्रयम्
३) रू०
एकस्याङ्कस्य मूल्यम्
आणकषट्कम्

वर्ष ३ | आश्विन-पूर्णिमा, सं० २०१० | अङ्क १२

## "रे पान्थ ! प्रचल सोल्लासम्"

कवयिता—ठाकुर ओंप्रकाशः शास्त्री, रजतपदक-विजेता,
हिन्दी-प्रभाकरः, विद्याभूषणः, हरयाना-हाईस्कूल, सोनीपत

रे पान्थ! प्रचल सोल्लासम् ।

पन्थास्ते सुमहान् पुरतोऽयं बहुविधकण्टकजालवृतोऽयम् ।
धृतिधारं यदि चलसि निजे पथि द्रक्ष्यसि कष्टविनाशम् ।
रे पान्थ..................

नैशतमः प्रसरत्यनुवेलं श्वापदशब्दो भीषयतेऽलम् ।
साहसार्चिसा प्रचल प्रयुक्तो धृत्वाऽधरस्मितहासम् ।
रे पान्थ..................

दीपय धैर्योत्साह-प्रदीपं लक्ष्यं प्रतिक्षणमेति समीपम् ।
निक्षिप पदं पुरतश्चेदिच्छास्त्यानेतुं मधुमासम् ।
रे पान्थ..................

स्मर शिववीर-पवित्रचरित्रं विपदम्भोधि-तरणसुवहित्रम् ।
भीरुभीतिवनच्छेदलवित्रं प्रसराग्रे निजशत्रुनिरासम् ।
रे पान्थ..................

विहरत्येको गगने भानुः ज्वलयति वनमेको हि कृशानुः ।
मा भैषीरेकाकी त्वं रे ! कर्तुमलं निजकार्यविलासम् ।
रे पान्थ..................

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# केचन उपदेशाः

[ पूर्वानुवृत्ताः ]

( लेखकः—श्रीशान्तिस्वरूपयतिः शास्त्री, दादूमहाविद्यालयः, जयपुरम् )

सदा स्मर्तव्यमिदं यत् स्वपुत्रभ्रातृसेवकानां अथवा कस्यचन स्वस्मात् निम्नश्रेणिस्थस्यापि अन्यसमक्षं मा कुरुत कदाप्यपमानम्।

नेच्छति सोढुं कश्चिदपि स्वापमानम्। अपमानितो मनुष्यः कामं वक्तुं न शक्नुयात्, परन्तु तस्य स्वान्ते भूयते महादुःखेन, तथा च तन्मनसि स्वापमन्तारं प्रति अवश्यमुद्भूयते अशुभभावनया। अत एव यदि भवेत् वक्तव्यं किंचित् कंचन सावधानं कर्तुं तर्हि एकान्त एव कथयत। तदपि च यथासंभवं सहानुभूतिमय्यां प्रेममय्यां च भाषायाम्।

यदि पश्येत, कञ्चन युष्मत्समक्षं दोषं कुर्वन्तं, तस्य दोषो दृष्टो युष्माभिरिति चावगच्छेत् सः, पुनस्तर्हि तस्मै अन्यत् मा कथयत किमपि। वर्तते स स्वयमेव लज्जमानः। भर्त्सयित्वा, तस्य संकोचं भङ्क्त्वा च मा विदधीत तं धृष्टम्।

यथा स्वहानिलाभाय दीयते युष्माभिर्ध्यानम्, तथैव इतरेषां हानिलाभायापि ध्यानं देयम्। कस्माच्चन जनाद् याचित्वा नीतं वस्तु विकृतं न स्यात्, तथा कार्ये समाप्त एव तदन्तिकं सावधानतया प्राप्तं स्यात्। इदं विशेषेण ध्येयं यत् तथाऽसति दुःखी भवति सः। अनेन नैव दास्यति लोको याचितवस्तूनि, येन नङ्क्ष्यति सुविधाऽन्येषां परमुखापेक्षिणां दीनानाम्।

यथा चेतरेभ्यो वस्तूनि याचित्वा गृह्णीत तथैव यूयमपि इतरेभ्यो दाने संकोचं मा कुरुत। यावत् संभवेत्, तावदितरेषां साहाय्यमनपेक्ष्यैव विधातव्यं स्वकार्यम्। याचित्वा न स्वयं संकोचे निमज्जत, न च कञ्चन इतरं संकोचे निमज्जयत।

दुःखि-निर्धन-भ्रातृभगिनीभिः सह विशेषप्रेम्णा सरलतया च व्यवहर्तव्यम्। तेषां सेवाकरणे, न तु ध्येयमीदृशं, न च कदाचिदिदं प्रकटनीयं यत् यूयं स्थ महान्तः समर्थाश्च, एतावता तेषामुपकारं कुर्वाणाः स्थ अथवा स्वमहत्त्वाटोपमुद्रां मुद्रयन्तः स्थ।

यदि भवेत् युष्माभिर्निर्धनभ्रातृभगिनीनां सेवा तर्हि प्रमादेनापि तान् तत्तु कदापि न स्मारयत अपि तु मनसि तेषामुपकारं मन्यध्वं यत् स्वीकृता तैर्युष्मत्सेवा। परन्तु इमां कृतज्ञतामपि स्वस्वान्त एव स्थापयत। तेष्विदं प्रकाशनीयमपि न। अन्यथा संभवतस्ते ज्ञास्यन्ति यत् यूयं स्वोपकारं तान् स्मारयन्तः स्थ, अनेन संकुचिष्यन्ति स्वनिर्धनतां च स्मारं स्मारं भविष्यन्ति दुखिनः।

यः ख्यातिं प्राप्तुं करोति कस्यचन सहायतां, स तु तं परितापयितुमग्निमुद्दीपयति, न तु तस्य तापनिवारणार्थम्।

दीनदुःखिगृहस्थानां सहायतां सेवां वा यदि कर्तुं मनसः सन्ति भवन्तस्तर्हि अत्यन्तमेव गुप्तरूपेण



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



-कुर्वन्तु। यदि संभवेत् तर्हि तेऽपि इदं ज्ञातुं न प्रभवेयुरिति प्रयतनीयम्। कृत्वा च सेवां, विस्मरन्तु सर्वथा भवद्भिः कदापि किंचित् कृतमेव नेत्येव मन्यताम्।

यथा यूयं कुरुथ स्वसमयस्य ध्यानम्, तथैवेतरेषां समयसंरक्षणेऽपि ध्येयम्। कस्यचनापि सज्जनस्य अन्तिके मा उपविशत निष्प्रयोजनम्। शिष्टाचारेण कस्यचन कार्यवशाद् वा यदि स्याद् गमनं तर्हि दृष्ट्वा तस्य सुविधां गच्छत, तथा च स्वकार्यसमाप्त्यनन्तरमेवोत्तिष्ठत तस्मात् स्थानात्। उपविष्टानावश्यकं तं मा संकोचयत। यदि स्युरुपविष्टास्तत्रान्यपुरुषास्तर्हि समापयत तूर्णं स्ववार्तालापं, येन प्राप्नुयुरितरेऽप्यालापावसरम्।

यदि भवेतां द्वौ जनौ वार्तालापं कुर्वाणौ परस्परं तर्हि न कर्तव्या तच्छ्रवणस्य चेष्टा। अपि तु यदि संकुचेतां तौ युष्माकं कारणात, दूरीभवितव्यं तर्हि तत्स्थानात्। पश्चाच्चापि मा पृच्छत तौ वारंवारम्।

यदि भवेत तयोः काचन गुप्तवार्ता तर्हि संकुचिष्यतोऽत्यन्तं युष्मदाग्रहेण तौ, अथवा चेष्टिष्येते वक्तुमनृतं तद्गोपनार्थम। येन परिणामे भविष्यन्ति ततोऽप्यधिका हानयः।

विपत्तिसमये कस्यचित् सहायता यदि भवेदपेक्षिता, स च दद्यात् प्रसन्नतया, तर्हि कृतज्ञेन भूत्वा स्वीकर्तव्या सा, किन्तु तस्मान् न साध्योऽनुचितो लाभः। वर्तते कश्चिद् यदि दयालुः विहिता च तेन युष्मत्सेवा, पुनस्तर्हि वारंवारं तस्मै श्रावयित्वा स्वदुःखानि मा विदधीत तं दुःखिनम्।

केनचनालापसमये प्रथमं श्रोतव्या तस्य वार्ता। दुःखस्य वार्ता तु ततोऽपि विशेषेण। युष्मद्दृष्टया कामं तद्दुःखं लघु स्यात्, परन्त्वस्ति तद्दृष्टौ तु तदेव महत्। तं सान्त्वयत, अवगमयत, यदि संभवेत् तर्हि सहायतामपि कुरुत। परन्तु न व्यवहर्तव्यं रौद्रयेण। विशेषतः दीनस्य वार्ताश्रवणे तु प्रमादेनापि कदापि न कार्यमौदासीन्यम्। साकं तेन तथा व्यवहर्तव्यं यथा स त्यक्त्वा भयसंकोचौ यथासंभवं स्वदुःखं त्वनायासेन श्रावयेत् युष्मांश्च ज्ञातुमारभेत स्वस्नेहिनः।

सहान्यैः सम्भाषणसमये, मा कथयत स्वकथा मा च कुरुत स्वस्य स्वसंबन्धिनां बान्धवानां च महत्त्वप्रदर्शनम्। युष्मदीयवार्ताश्रवणं तथा न रोचतेऽन्येभ्यो यथा स्वकीयवार्ताश्रावणम्। यूयं शृणुत तेषां वचः, साकं च तैस्तत्सम्बन्धिनीमीदृशीं कुरुत वार्ता येन प्राप्नुयुस्ते सुखं, तथा तेषां हृदये युष्मान् प्रति प्रेम सौहार्दं चोद्भवेत्। यथा मातुः समक्षं तस्याः बालस्य वार्ताकरणेन साप्नोति सुखं विकसति च तस्या हृदयम्।

संभाषणतत्परेषु मध्ये उक्त्वा मा त्रोटयत तेषां वार्तानां परम्पराम्। मा छिन्त कस्यचन वार्ताप्रसङ्गम्। वदनमन्तरेणैव यदि सिध्येत् कार्यं तर्हि विद्यते तदत्यन्तं वरम्। यदि विद्येत खण्डनमावश्यकं तर्हि पश्चात शान्त्यादरेण च सार्धं नम्रतापूर्वकं वदत स्वाभिमतम्।

चेष्टध्वम् इन्द्रियाणि मनश्च विजेतुम्। भवितव्यं सावधानेन स्वच्छिद्रेषु। धैर्येण परमात्मनि विश्वस्य दूषितविषयासक्तेन्द्रियाणि संयच्छत। प्रभुचिन्तने सच्चिन्तने वा संयोज्य मनो दूरीभवत च कुविषयेभ्यः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# कृष्णो भक्तश्च भगवान् श्रीकृष्णो भक्तवत्सलः

( कवयिता—श्रीकृष्णात्मज-प० रघुनाथपाटणकरः, राजापुरम् )

कैलासशिखरे रम्ये शिवेन सह पार्वती ॥
भगवद्भक्तविषये वार्तालापं करोति वै ॥ १ ॥
भगवद्भक्तमाहात्म्यं शंकरः प्रोक्तवान्मुहुः ॥
संजातकुतुका गौरी भक्तं जातु दिदृक्षति ॥ २ ॥
प्रसंगेन कदाचित् सा पर्यपृच्छन्महेश्वरम् ॥
प्रेष्ठ ! माहात्म्यमेतावन्नित्यं यद्वर्ण्यते मुदा ॥ ३ ॥
तेषामन्यतमं भक्तं कृपया दर्शय प्रभो ॥
शृण्वन्त्या भक्तमाहात्म्यं मुखात्ते जगदीश्वर ॥ ४ ॥
प्रसन्नमन्तःकरणं भक्तसंदर्शनोत्सुकम् ॥
त्वर्यतां त्वर्यतां नाथ ! भक्तराजः प्रदर्श्यताम् ॥ ५ ॥
भवेयं येन धन्याऽहं दर्शनेन महामते ॥
श्रुत्वा पत्न्याः प्रियं वाक्यमिन्द्रप्रस्थं च प्रस्थितः ॥ ६ ॥
पत्न्या सह महादेवो भक्तानामभयंकरः ॥
इन्द्रप्रस्थं प्राप्य शिवो गतः सोऽर्जुनमन्दिरम् ॥ ७ ॥
द्वाःस्थितं परिपप्रच्छ 'क्वास्ते साम्प्रतमर्जुनः' ॥
प्रत्युवाच द्वारपालः—'शेते शयनमन्दिरे' ॥ ८ ॥
श्रुत्वैतद् द्वारपालस्य वाक्यं तद्दर्शनोत्सुका ॥
पार्वती परिपप्रच्छ कदा स्याज्जिष्णुदर्शनम् ॥ ६ ॥
( पार्वती परिपप्रच्छ त्वरया दर्शनं कदा ॥
सव्यसाचिन एतर्हि कुन्तीपुत्रस्य धीमतः ॥ )
अधीरतां प्रियायास्तां विलोक्य भगवाञ्छिवः ॥१०॥
प्रत्युवाच महादेवः कालस्तावदवेद्यताम् ॥
यावत्तदिष्टकृष्णस्य द्वारा तद्बोध इष्यते ॥
( यावद्द्वारेण कृष्णस्य स बोधयितुमिष्यते । )
तथा प्रिये ! मया यत्नो यथामति विधीयते ॥११॥
तदनूमापतिः साक्षात्समाधिं परमास्थितः ॥
प्रेम्णाऽऽकर्षति गोविन्दं भगवन्तमधोक्षजम् ॥१२॥
संगम्य कृष्णं प्रोवाच 'सव्यसाची प्रबोध्यताम्' ॥
प्रिया मे भगवन् ! भक्तं फाल्गुनं द्रष्टुमिच्छति ॥१३॥
विज्ञापनामुरीकृत्य शूलिनः श्यामसुन्दरः ॥
उद्धवेन सहाऽगच्छद्रुक्मिण्या श्यामसुन्दरः ॥१४॥
शयनीये स्वभक्तस्य यावत्पश्यति चार्जुनम् ॥
श्रान्तं सुषुप्तिसंप्राप्तं, सुभद्राम् अर्जुनप्रियाम् ॥१५॥

---

मा स्खलत; मा भूत ससम्भ्रमाः, त्यजत क्रोधवेगं, शृणुत सधैर्यं, स्वानृतनिन्दामप्याकर्णयताकलय्य मौनं तदनन्तरं च किमर्थंन्तेन निन्द्योऽहमिति विचारयत शान्तस्वान्तेन ।

प्राप्स्यथ अवश्यं किञ्चन कारणमधिकांशतस्तु आयास्यति काचन स्वत्रुटिरेव दृष्टिगोचरतां तां च दूरीकुरुत मन्यध्वं च निन्दकस्योपकारम् ।

मा प्रफुल्लत मा स्यात च हर्षविह्वलाः श्रुत्वा च स्वमहत्त्ववार्ताम्, मा विस्मरत स्वत्रुटीः न चोपेक्षितव्याः । स्वं च मत्वा महत्त्वबीजं न कार्योऽभिमानः । मन्तव्या च भगवत्कृपा यया प्रेरिता यूयं महत्त्वप्रापककार्ये । मन्यध्वं प्रशंसकानामुपकारं किन्तु प्रार्थनीयः परमात्मा यत् न दद्यात् स प्रशंसाम् । प्रशंसां नालिङ्गत, अस्ति सातिमधुरच्छुरिका, विद्यते मधुरपानमलौकिकहलाहलस्य । दूरीभवत सदा प्रशंसायाः । कुरुत श्रेष्ठं कार्यं कर्तव्यत्वेन न तु प्रशंसायै ।

शैवोयमुपदेशोऽवधेयः, स्मरणीयश्च । कृतं यदि पालनमस्य युष्माभिस्तर्हि भविष्यथ शिक्षिता इति निर्विचिकित्सम् । इयमेवास्ति वास्तविकी शिक्षा ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



व्यजनेनाऽऽवीजयन्तीं स्वेदक्लिन्नशिरोरुहान् ॥
शुष्कीकर्तुं स्वप्रियस्य ह्युपविष्टां समीपतः ॥१६॥
आगतं बन्धुमालोक्य सुभद्रा त्वरयोत्थिता ॥
यावदङ्गीकृतं स्थानं तस्या वै सत्यभामया ॥१७॥
तथा गृहीत्वा व्यजनं वीजयामास नाद्भुतम् ॥
ग्रीष्मप्रभावमालक्ष्य कृष्णप्रेरणयोद्धवः ॥१८॥
फाल्गुनं वीजयामास गृहीत्वा व्यजनान्तरम् ॥
सहसा विस्मिता देवी सत्यभामा तथोद्धवः ॥१९॥
वीक्ष्यावस्थां तयोश्चेमां भगवान् देवकीसुतः ॥
पप्रच्छ तौ 'को विचारो भवदीये हि मानसे' ॥२०॥
प्रत्युवाच-महाराजो ह्यन्तर्यामी च सर्ववित् ॥
हेतुना केन भगवानावां पृच्छति मूढवत् ॥२१॥
उवाच रुक्मिणी देवी पादसंवाहने स्थिता ॥
कथ्यतां तत्स्वमुखेन स्वीयविस्मयकारणम् ॥२२॥
इत्युक्ते कृष्णप्रियया भगवद्वचने स्थितः ॥
"प्रत्युवाचोद्धवस्तात ! कृष्ण कृष्णेति वै ध्वनिः ॥२३॥
लोम्नि लोम्नि फाल्गुनस्य श्रूयते मधुरः प्रभो ॥
पदोरपि ध्वनिरसौ श्रूयते भगवन् ! स्फुटम्" ॥२४॥
तदुद्धववचः श्रुत्वा समीपं भगवान् स्वयम् ॥
गतस्तावत् प्रतिलोम जय कृष्णेति निस्वनः ॥२५॥
श्रुतोऽपि स क्षणं ध्यात्वा शुश्राव ध्वनिसन्ततिम् ॥
(शृण्वन् भक्तोदितं वाक्यं गतः फाल्गुनसंनिधौ॥
स्फुटं शुश्राव मधुरं कृष्ण कृष्णेति सुस्वनम् ॥
रोम्णो रोम्णो विनिष्क्रान्तं स्वभक्तस्य किरीटिनः)
अत्रान्तरे विस्मृतवान् कृष्णः कृष्णप्रबोधनम् ॥२६॥
स्वयं प्रभुः प्रेमपाशबद्धः संवाहनं पदोः ॥
कृष्णः प्रचक्रे कृष्णस्य स्वकराभ्यां शनैः शनैः ॥२७॥
करस्पर्शाद् भगवतः सुप्तिर्गाढा किरीटिनः ॥
बहिः शूली च गौरी च कुर्वन्तौ श्रीमतीक्षणम् ॥२८॥
बहुकालममन्येतां 'कुतो नायाति केशवः' ॥
कार्यं विधाय संप्राप्तो विलम्बो दरिदृश्यते ॥२९॥
निद्रया विश्वमोहिन्या परिणीतोऽथवा प्रभुः ॥
अथ ब्रह्मा समाहूतश्चाज्ञप्तो विष्णुबोधने ॥३०॥
शूलिना स गतो यावत्प्रासादे सव्यसाचिनः ॥
तावच्छुश्राव मधुरं कृष्ण कृष्णेति निस्वनम् ॥३१॥
दृष्ट्वा जगत्प्रभुं कृष्णं भक्तसंवाहने रतम् ॥
प्रेमावेशस्य संवेगं संधारयितुमक्षमः ॥३२॥
ब्रह्माऽपि स्वैर्वेदवक्त्रै-र्वेदवाचाऽस्तुवीत्स्वयम् ॥
कालं प्रतीक्ष्य ब्रह्माणं नारदं पार्वतीपतिः ॥३३॥
संप्रेषयामास तदा श्वेतवाहप्रबोधने ॥
देवर्षिर्नारदो मानी प्रबोधाय हि प्रस्थितः ॥३४॥
कृत्वा प्रतिज्ञां सुदृढां शयनालयमागतः ॥
दृष्ट्वा तत्राद्भुतं दिव्यं शिवकार्यस्मृतिं जहौ ॥३५॥
प्रपीड्य महतीकर्णान् वादयामास मञ्जुलम् ॥
भक्तस्य भजनं प्रेम्णा श्रीकृष्णस्य तथा जगे ॥३६॥
हरिकीर्तनलीनस्य नारदस्योच्चनिःस्वनम् ॥
श्रुत्वोमया सह शिवो ययावर्जुनमन्दिरम् ॥३७॥
शीघ्रं प्रतीक्षां संत्यज्य समुत्को विष्णुदर्शने ॥
तनूरुहेष्वर्जुनस्य कृष्ण कृष्णेति निःस्वनम् ॥३८॥
शुश्राव स विचित्रं च दृश्यं तत्रभवं समम् ॥
नेत्रत्रयेण स्वीयेन ददर्श भगवान् हरः ॥३९॥
सोऽपि प्रेमसमुद्रस्योत्तालभङ्गेषु मज्जितः ॥
प्रेमप्लुतो हरिकथां गायन्नृत्यति ताण्डवम् ॥४०॥
एवं समाजस्तत्रत्यः समस्तः प्रेमसागरे ॥
नो जानाति निजं वर्ष्म नो वा स्वीयं मनस्तथा ॥४१॥
इत्थं भक्तजनश्रेष्ठफाल्गुनस्य महामतेः ॥
प्रेमोदधितरङ्गेषु निमग्ना निखिला जनाः ॥४२॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ऐक्यम्

( लेखकः—श्रीकालीकुमारमिश्रः, विशारदः, अध्यापकः आधार-( Basic ) पाठशाला रानीपुर, वृन्दावन ( बिहार )
प्र० मन्त्री, श्रीदेवकीदेवी-स्मारकपुस्तकालयस्य )

ऐक्यं स्नेहामृतार्द्रं, प्रीतेर्मूलम्, उन्नतेर्मूलमन्त्रः, ...र्मस्यायनमास्ते। ऐक्ये अनेकाः शक्तयः, सुखानि ...नानि च सङ्ग्रथितानि विद्यन्ते। ऐक्यं शान्तिनि-...तनस्य मूलं, सुखशान्तिप्रवर्षको मेघश्च विद्यते। ...क्यं 'समाजस्य अभिभावकः आस्ते। ऐक्यं ...वप्रभावान्वितमत्यन्तं शुभ्रं तथाऽऽलोकमयं वस्तु ...विद्यते। यथा बीजे विटपाः, पुष्पे परागाः, रसाले ...ञ्जुमञ्जर्यः, साधुषु सौजन्यं, साहित्ये सारस्यम्, ...ाण्डित्ये गाम्भीर्यम् विवेकित्वञ्च तिष्ठन्ति ...थैव ऐक्ये सर्वसुखसाधनानि निवसन्ति। ...त्रैक्यं भवति तत्रानैक्यं, मतभेदो, वैमनस्यं प्रपञ्च-...चेमानि विस्मृत्यापि न व्रजन्ति। किन्तु समयस्याद्भुतः ...भावः विद्यते। वेला बलवती भवति। समयं प्राप्य ...भृत्यो नरेशोपरि, कपोतः श्येनोपरि, शृगालो मृगराज-...योपरि आक्रमणं करोति। अनेकेभ्यो वर्षेभ्यो हि ऐक्यस्य ...तीक्ष्णप्रकाशे शैथिल्यमागतम्। ऐक्यस्याभावेनैव कनक-...कान्तिमयी लङ्कापुरी भस्मीभूता, महापराक्रमशाली ...रावणः समूलं विनष्टः। अनैक्यादेव सर्वान्तकारी ...महाभारत-समरो जातः। अनैक्यादेव भव्यभारतभूमौ ...जयचन्द्रद्वारा यवनाः प्रविश्य अनादिकालात् प्रवृत्ते ...सनातनधर्म्मे कुठाराघातं चक्रुः। सम्प्रति कोपि ग्रामः, ...केमपि नगरं, कापि संस्था वा एतादृशानि न विद्यन्ते ...यत्र भेदो न स्यात्। अस्माकम् अखण्डो भारतः अनैक्या-...देव साम्प्रतं खण्डितः। चेद् वयमद्यापि ऐक्यस्य सूत्रे आबद्धाः परस्परं प्रेम पालयेम तर्हि पुनर्भारतो मम नूनम् अखण्ड एव भवेत्। परमधुना तु गेहे गेहे पिता-पुत्रयोः, भ्रातृ-भगिन्योः, क्रूरकलहस्यावासो विद्यते। कलहस्य रूपमत्यन्तं भयदमर्थनाशकमस्ति। अधुना ईर्ष्या-कपट-राग-द्वेषाद्यैः साकं दुर्मतिः नृत्यति। अनैक्यस्य प्राबल्येन देशः अधोमुखो भवति। यस्मिन् गेहे अनैक्यं प्रविष्टं तं गेहम्मूलतो विनाशयति। न वक्तव्यं यत् शरीरसंगठनमपि ऐक्यस्योपरि अवलम्बितमास्ते। यदि शरीरस्य सर्वे अवयवाः परस्परमसहयोगं कुर्युः तर्हि तु शरीरं कथमपि स्थिरं न स्थातुं शक्नोति। संसारे सर्वेभ्योऽधिकमैक्यस्य प्राबल्यमास्ते। अतः वयं सर्वे एकस्वरेणैक्यस्तवनं कुर्याम, ऐक्यस्योपासकाः भवेम, ऐक्यस्य परमाः भक्ताः भवेम। विरोधेर्ष्याकपट-प्रपञ्च-पक्षपातादीन् दुर्गुणान् अर्धचन्द्रेण बहिष्कृत्य तस्मिन् स्थाने ऐक्य-सौमनस्यौदार्य्यस्याचलं साम्राज्यं स्थापयेम। ऐक्यस्याभावेनैव अस्य जनपदस्येयं चिन्तनीया दशाऽभूत्। चेदद्यापि वयं परस्परमैक्यस्य सूत्रे आबद्धाः भवेम तर्हि अस्माकं सैव सुदशा भवेत्, यादृशी पूर्वमासीत्। स्वतन्त्रताप्राप्त्यै यथा ऐक्यमावश्यकं तथैव स्वतन्त्रतारक्षार्थमपि। उक्तं च—

'अल्पानामपि वस्तूनां संहतिः कार्यसाधिका'।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥ इति-

अतः ऐक्ये किञ्चित् प्रयत्नो विधेयः।

———



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# महर्षिः पाणिनिः

## [ जीवनचरितम् ]

लेखकः—श्रीविश्वेश्वरदयाल "सिन्दोलिया" पिलानी

अस्य महापुरुषस्य नाम केनापि संस्कृतज्ञेनाविदितं नास्ति । विद्वत्समाजेऽस्याभिधेयं सादरं स्मृतिपथं नीयते । विशेषतः संस्कृतस्य प्रतिनिधित्वेन गण्यते । एतादृशो महात्मनो जीवनविषयेऽज्ञानं भृशं दुःखोत्पादकं प्रतीयते । जीवनसौख्यमपरिगणयताम् अध्यात्मवादिनां भारतीयमहर्षीणां स्वजीवनचरित्रलेखनपद्धतिः प्राचीनकालतो नास्ति । अतएव पाणिनिनापि स्वविषये क्वापि किमपि न लिखितम् । अतः परवर्तिग्रन्थकाराणाम् अन्येषां वा सूक्तिकाराणां लेखान् आश्रित्यास्मिन् विषये किञ्चिल्लिखितुं शक्यते । महाभाष्यकारेण पतञ्जलिना पाणिनेः विषये "दाक्षीपुत्र" 'शालातुरीय' शब्दयोः प्रयोगौ विहितौ । यथा—

'सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः'

(महाभाष्यम् १/१/१६)

अनेन सिद्ध्यति यत्पाणिनेः मातुर्नाम "दाक्षी" अस्ति । प्राचीनकाले पितुरपेक्षया मातृ-नामोल्लेखोऽधिकं भवतिस्म । दाक्ष्याः गर्भादुत्पन्नोऽयं महर्षिः शलातुरनगरं समलञ्चकार । तस्य स्थितिः गान्धारदेशे आसीत् । तच्च संप्रति 'लाहुर' इत्याख्यं विद्यते । साम्प्रतिकाः पुरातत्त्वविदो विद्वांसः अनेकप्रबलप्रमाणैः पाणिनि-जन्मस्थानं पेशावरस्य समीपस्थं "लाहुर" नामाख्यं लघुग्रामं मन्यन्ते । अष्टाध्याय्याम् उत्तरभारतस्य विशेषतः अफगानस्थानस्य तथा सीमान्तप्रदेशस्य भौगोलिकोल्लेखैरनुमीयते यत् खलु पाणिनेः जन्म भारतस्योत्तरपश्चमप्रदेशेऽभूत् । तत्रैव पाणिनेः विद्याध्ययनं जातम् । एतदेव स्थानं बौद्धकाले "तक्षशिला" नाम्ना विख्यातमभूत् । भट्टसोमेश्वरमतानुसारेण तु महर्षिः पाणिनिः पाटलीपुत्रनिवासिनः उपाध्यायवर्षस्यान्तेवासित्वे विद्याध्ययनं चकार । अन्येनापि राजशेखरोद्धृतेन प्रमाणेन पाणिनेः विद्याध्ययनं पाटलीपुत्रे (पटना) अभूत् इति प्रतीयते । तद्यथा—

श्रूयते च पाटलीपुत्रे शास्त्रकारपरीक्षा—

अत्रोपवर्षवर्षाविह पाणिनिपिङ्गलाविह व्याडिः ।
वररुचिपतञ्जली परीक्षिताः ख्यातिमुपजग्मुः ॥

(काव्यमीमांसा १० मोऽध्यायः)

पाणिनेः पाटलीपुत्रे परीक्षानन्तरमेव देशे ख्यातिरभूत् । +अनेन निर्विवादं पाणिनेः पाटलीपुत्रेऽध्ययनं सिद्ध्यति । श्रूयते आरम्भकाले पाणिनिः अतीव जडमतिरासीत् । सततम् अभ्यस्यमानोऽपि कश्चिद्विषयो बुद्धिगतो नाभूत् एतस्य । अन्येषां वररुचिप्रभृतीनां सहपाठिनां प्रगतिं विलोक्य सः मानसिकव्यथया पीड़ितः सन् हिमालयप्रदेशे गत्वा सशरीरतापम् अखण्डं तपश्चक्रे । भगवतः आशुतोषस्य च प्रसादात् श्रेष्ठां बुद्धिं लब्ध्वा परिश्रमेणाल्पसमय एव समस्तविद्याज्ञानं लेभे । शास्त्रार्थे वररुचिप्रभृतयश्च तेन परास्ताः । ततः व्याकरणनिर्माणात्पूर्वं समस्तं देशं परिभ्रम्य देशव्यापिशब्दानां ज्ञानं चक्रे । अतएवाष्टाध्याय्यां समस्तदेशव्यापिनः शब्दाः दरीदृश्यन्ते । व्याकरणनिर्माणानन्तरम् 'आदौ व्याकरणं काव्यमनु-

+ 'पाटलीपुत्रे परीक्षिताः' इत्यनेन तत्रैषाम् अध्ययनं न सिद्ध्यति—इति —संपादकः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# मार्जनम्

श्रीदीनानाथशर्मा शास्त्री, सारस्वतः, विद्यावागीशः, विद्याभूषणः, विद्यानिधिः
[ प्रिन्सिपल, सं० हि० महाविद्यालयः रामदल, दरीबा, देहली ]

सन्ध्यायां मार्जनं सुप्रसिद्धम्। मार्जने शोधनस्य अद्भुता क्षमता वर्वर्त्ति। यदा कारणविशेषेण रागादिना वा स्नानं कर्तुं न शक्यते, तत्र स्नान-प्रतिनिधिभूतं मार्जनमुपयुज्यते। मार्जनेन शरीरगतसूक्ष्म-दोषा निवर्तन्ते। प्रायो दोषास्तेजसि, रक्ते, शुक्रे च निवसन्ति। एतत्त्रिविधदोषनिवृत्त्यर्थं कुशानाम् अपामार्गस्य दूर्वायाश्च मार्जनमुपयुज्यते। कुशेन तेजोगता दोषाः, अपामार्गेण विशिष्टतया रक्तगतदोषाः, दूर्वया च शुक्रगता दोषा दूरीक्रियन्ते। कुशेषु विसर्प-दाह रक्त-मूत्राशय-नेत्ररोगांश्च शमयितुं क्षमतास्ति। अपामार्गे कफवायुदाहार्शः-कण्डूजठररोग – रक्तपित्तविषदोषान् द्रवयितुं शक्तिरस्ति। दूर्वायां च रक्तपित्त-कफ-दाह-पिपासाक्षयान् दूरीकर्तुं योग्यतास्ति।

मार्जनद्वारा यदा शुद्धाभिमन्त्रितजलबिन्दवः शरीरे पतन्ति, तत आकर्षणशक्तिप्रभावेण अशुद्ध ऊष्मा बहिर्निर्गच्छति बाह्यः शुद्धवायुः सूर्यकिरणाश्च अभ्यन्तरं गत्वा अवशिष्टाशुद्धपरमाणूनपि निर्गमयन्ति। शीतकाले तु मार्जनेन स्नानादिना वा अशुद्धोष्मणो बहिर्निर्गमनं प्रत्यक्षं भवति; परं ग्रीष्मकाले वायुमण्डलस्य रूक्षतया औष्ण्येन च बाह्यमतिसूक्ष्मरूपं भूत्वा उड्डीयते। अतएव अदृश्यं भवति।

कस्यचिद् अक्षि ग्रीष्मे दाहयुक्तं भवेत्, तस्मिन् कुशद्वारा दिनस्य द्विर्जलमार्जनेन अक्षिदाहः शाम्यति। यदि कश्चिद् वृश्चिकेन दष्टः स्यात् तत् स स्नात्वा श्रद्धया अपामार्गेण आत्मानं मार्जयेत्, ततो वृश्चिकविषं दूरीभवति। एवं दूर्वा-द्वारा मार्जनेन दाहो व्याकुलता वा ध्वस्यते। आर्यसमाजप्रवर्तकेन श्रीदयानन्दस्वामिना मार्जनविषये स्वकीयो नव्यानुभूताविष्कारः प्रकाशितः स्वप्रसिद्धग्रन्थे "सत्यार्थप्रकाशे" यत्-तेन सन्ध्यायामाजिगमिषन्ती निद्रा व्यपैति। इति।

---

जाम्बवतीजयम्'-अनुसारेण "जाम्बवतीजय"महाकाव्यमपि विरचितम्। अस्याविर्भावविषये तु बहवो मतभेदाः वर्तन्ते। यूरोपीयाः विद्वांसः ईशाशताब्दीतो वर्षशतचतुष्टयपूर्वम् इमं महापुरुषमुत्पन्नं मन्यन्ते। किञ्च भाण्डारकरप्रभृतयो भारतीया विद्वांसस्तु बुद्धात् पूर्वमेव ईशायाः सप्तशताब्दीतः पूर्वं निश्चिन्वन्ति।

यदाकदाप्युत्पन्नोऽयं महर्षिः निःसन्देहम् अस्माकं महापुरुष एव न, किन्तु महान् वैज्ञानिकोऽपि। अस्य व्याकरणविज्ञानं समस्तं विश्वं मोहयति। ईदृशी, समग्रभाषायाः सारं निष्कास्य लघुकायग्रन्थे उपस्थापनरूपा, व्याकरणप्रणाली नूनम् अपूर्वा, अद्यापि न क्वापि आविर्भूता। एवं हि तेन महर्षिणा व्याकरणशास्त्र-काव्यनिर्माणे एव प्रायशः स्वजीवनं यापितम्। 'महात्मनां हि विलक्षणं मृत्युर्भवति' इति नियमेन महर्षेः पाणिनेरपि सिद्धासनस्य वने सिंहेन मृत्युरभूदिति पञ्चतन्त्रस्य 'सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः।' इत्यादिकथाप्रसङ्गादुपलभ्यते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# काकाष्टकम्

[ रचयिता—पं० जोखन-झा, व्याकरण-साहित्याचार्यः, बलुआबाजार, बिहार ]

प्रेम्णा पालयतः सुतानिव मृगान् व्याघ्रस्य राज्ञो महान्-
हंसो यो भवता पुराऽत्र सचिवो दृष्टः स गेहं गतः।
काकः स्वोदरपूरकः कुटिलधीस्तत्स्थान एवागत-
स्तस्माद् गच्छ गृहं सखे! नहि भवेद्दुष्टः स्वपित्रोरपि ॥१॥

कीदृक् त्वं परदुःखदोऽस्यवगुणी त्वद्वाङ् नृणां कर्णभित्-
काकेनापि भुशुण्डिना गुणवता मा काक! गर्वं कुरु।
चत्वारो वनजा वदन्ति किमहो मद्वंशजोऽभूद्धरि-
स्तस्मात् पूज्यतमा वयं हि मनुजैर्भूमौ मदन्योऽस्ति कः ॥२॥

भक्ष्याभक्ष्यविचार एव न च ते या धर्म्ममूलं दया-
तल्लेशोऽस्ति? शिशोः करादपि बलात्त्वं नात्सि किं लड्डुकम्।
यज्ञे वायस! पितृकर्म्मणि बलेर्दोषो न मांसाशने—
चञ्च्वोत्कृत्य हठेन जीवितपशोरप्यत्सि मांसं शठ! ॥३॥

काक! प्राण्युपकारिणां सुमनसां सृष्टिः कृता वेधसा
तस्मै तत्र सुरर्षिदेवमनुजैर्दत्ता प्रतिष्ठोत्तमा।
सर्वप्राण्यपकारिणां प्रथम हे! सृष्टौ पुनस्त्वादृशां—
तैर्दत्ता च कुपूर्विका समुचिता सा तत्र सर्वाधम! ॥४॥

अज्ञस्त्वं स्वयमेव वायस! महान् नो वेत्स्यपत्यं यतः—
सर्वत्रैव महात्मनः सममतिस्त्वय्यस्ति सा किं वद?
गृध्रस्त्वत्ति मृतस्य मांसमनिशं त्वं जीवितस्यापि च
त्वत्तः श्रेष्ठतमः शताधिकगुणैर्गृध्रोऽस्ति रे क्रूरवाक्! ॥५॥

भ्रष्टाचार-विचार! काक! कुटिल! स्वप्नेऽप्रियं निर्दयं-
त्वां द्रष्टुं कुत्रचश्च कश्चिदपि ते श्रोतुं सकृन्नार्हति।
कः कर्णौ शतधाकरोति हृदयं ज्ञानालयं च प्रियं-
दुःखानामगदोऽस्ति शास्त्रकथितस्त्वद्वाग्विदीर्णस्य नो ॥६॥

वाजी नृत्यति, यं विलोक्य चकितो बालो रुदन् यद्भयाद्-
गेहं तूर्णमुपेति, काक! बहवो यच्चञ्चुभग्नाक्षिणः।
गोहस्त्यश्वमृगास्त्यजन्ति चपलं प्राणान्प्रियान्दुस्त्यजान्-
स त्वं जीवसि निन्दितः कथमहो मृत्युर्वरं निन्दया ॥७॥

दुष्टानामग्रगण्यः परसुखहरणे दक्ष एव त्वमेकः-
सिंहव्याघ्रादिहिंस्रा जनरहितवने सर्वदा वै वसन्ति।
त्वन्तु ग्रामादिमध्ये वससि खलु नृणां काक! कर्णान्भिनत्सि
स्रष्टा कैश्चिन्न दृश्यो भवति, यदि भवेत्किं भवेत् तन्न विद्मः ॥८॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# चलच्चित्रपटे समुद्रगर्भस्य दृश्यानि

कविशिरोमणि—भट्ट-श्रीमथुरानाथशास्त्रिणः, जयपुरम्

चित्रपटेषु लोकानां रुचिरुत्तरोत्तरं शतमुखीव प्रवर्द्धत इति प्रत्यक्षमेव। यदा हि प्रथमप्रथमं चित्रपटानामाविष्कारोऽभूत्तदा विस्मितानां लोकानां हृदये विश्वास एव नाभवद् यत्ते वास्तव एव चेष्टमानानि चित्राणि पश्यन्तीति। यदा तु तानि चित्राणि चेष्टाभिः सह संलापमप्यकुर्वन् तदा तु लोकानामाश्चर्यस्य परिसीमैव नाभवत्। परमिदं चित्राणां परस्परं संलापकौतुकमपि शनैः शनैः पर्युषितमभूत्। इतोऽप्यद्‌भुतस्य कौतुकदर्शनस्य लालसा जनानां हृदये पुनरुदभूत्। एतत्पूर्तये महाभयङ्कराणाम् अफ्रिकादिवन्यजन्तूनां रोमाञ्चकारकाणि युद्धादिदृश्यानि चित्रपटेषु समगृह्यन्त, येषु छायाचित्रसंग्राहकाणां चित्रशिल्पिनां जीवनं संकटापन्नमेवाभवत।

परं शनैःशनैर्भूतलदृश्यानि लोकानां साधारणानीवाभवन्, अत एव नवीनकौतुकवृद्धये चित्रपटकारैर्गगनगतानां दृश्यानामाविष्कारोऽक्रियत। वायुयानानां परस्परं युद्धम्, तेषां परस्परमभिघातः, उड्डीयमानेषु तेषु सहसैवाग्निप्रकोपः, एवमादीनि भयङ्करदृश्यानि चित्रपटेषूपादीयन्त। किन्तु लोकानां कौतुकतृष्णाया न परिसीमा। गगनगतानि दृश्यान्यपि मन्दीकृत्य नवीनकौतुकदर्शनार्थं पुनर्जनता प्रोत्कण्ठिताभवत। एतदर्थं चित्रपटाधिकारिणः पाताललोकं प्रत्याक्रमणमकुर्वन्। जलगर्भे प्रथमाऽऽक्रमणस्य फलस्थानीयास्ति 'समराङ्ग' नाम्नी चित्रमाला। अस्या आविष्कर्ता 'वार्डविङ्ग' महाशयः।

'समराङ्ग' चित्रमालायाः परमाश्चर्यजनकः सोयमेव विशेषोऽस्ति यदस्यां समुद्रगर्भस्य रोमाञ्चकारिण्यो युद्धघटनाः प्रत्यक्षं संगृहीताः सन्ति। इतिहासे सेयं प्रथमप्रथमा घटनास्ति यद् भयङ्करस्य जलव्याघ्रस्य ( Shark ) कालरूपस्य जलमातङ्गस्य ( Octopus ) च परस्परं युद्धं जनतायाश्चक्षुषोरग्रेऽभिनीतं भवति। आविष्कर्त्रा वार्डविङ्गमहोदयेन भौतिकविज्ञानस्य बलेन काचस्यैका जलनिमज्जिनी नौका निर्मिता यां परितो लौहस्य पत्रिकाः संकीलिता आसन्। परितो मुद्रितमुखायां जलनिमज्जिन्यां छायाचित्रशिल्पिनं संस्थाप्य सेयं नौरगाधे सागरगर्भे निमज्जिताऽभूत्। तस्यां नौकायां चित्रशिल्पिनः कृते प्राणदायकस्य आक्सिजनवायोः प्रबन्धो 'रबर' नालिकाभिर्व्यधीयत। सहैव च आपत्तिकाले प्राणरक्षाया अपि प्रबन्धो यथासंभवमक्रियत।

दीर्घायां लौहतन्त्र्यां निबध्यैको मांसखण्डः सागरगर्भेऽवनामितोऽभूत। यथैव स मांसखण्डः सागरगर्भं प्राप्नोत् तथैव महाभयानकौ विशालौ द्वौ जलजन्तू तं खण्डमादातुं द्वाभ्यां दिग्भ्यां सरभसमधावताम्। तयोर्मध्ये एकोऽभूज्जलव्याघ्रः (Shark) द्वितीयश्चासीज्जलमातङ्गः ( Octopus )। सोऽयं 'शार्क'नामको जलनक्रः स्थलचरस्य व्याघ्रस्यापेक्षयाऽधिकं भयानको हिंस्रश्च। दीर्घाः सुतीक्ष्णाश्च तस्य दन्ताः कस्मिन्नपि स्थाने सक्तन्निविश्य पुनः परावर्तनं न जानन्ति। 'आक्टोपस'नामकस्य जलहस्तिनोपि मातङ्गस्येव अष्टौ शुण्डा भवन्ति। दीर्घा अतिप्रबलाश्च ताः शुण्डा निजमाखेटं तथा निर्दयं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



निबध्नन्ति यथा करालः साक्षात्काल एव मुमूर्षुं मुखे मुद्रयति । अनयोर्भयङ्करजन्त्वोः पूर्वं मिथः संघर्षः ततश्च घोरतमं युद्धं चित्रशिल्पिनः पूर्वोक्ताया नौकायाः साक्षात्संमुखेऽतिनिकट एवाभवत् ।

इदं युद्धं तादृशमासीद् यद्धि मानुषस्य नेत्राभ्यामितः पूर्वं न कदाचिदवालोक्यत । अर्द्धघण्टापर्यन्तं सोयं प्राणान्तकरः समरः समभवत् । अस्य समरस्यैकैकं दृश्यं चित्रयन्त्रस्य नेत्रयोर्मध्येऽङ्कितमभूत् । जलव्याघ्रस्तत्सजातीया अन्ये वा जलजन्तवो न कदापि संमुखमाक्रामन्ति । किञ्च जलव्याघ्रस्य मुखं दीर्घाया घोणाया अधस्ताद् भवति । अतएव मुखेनाऽऽक्रमणं सुसंभवमपि नास्ति । अस्तु, व्याघ्रो विद्युद्वेगेन शत्रुमाक्रामत् । सुदीर्घान् निशिताग्रांश्च निजदन्तान् वैरिणः शरीरे सबलं न्यखनत् । इतो जलमातङ्गोऽपि विशालाभिर्निजशुण्डाभिः शत्रुमावेष्ट्य निर्दयनिष्पीडनस्य प्राणपणेन चेष्टामकरोत् किन्तु जलव्याघ्रस्य चर्म खड्गिवत् सुदृढं चिक्कणं च भवति । अतस्तदुपरि जलहस्तिनः शुण्डानां संदंशो न यथावदभवत् ।

अन्ते जलमातङ्गः शनैः शनैर्निश्चेष्टो भवितुमारभत ।

अस्मिन्वारे एकस्मिन्नेवाऽभिघाते जलहस्ती निष्प्राणोऽभवत् । विजयगर्वेणोन्मत्तो जलव्याघ्रो निजशत्रुमाकृष्य अतलजलगर्भावस्थिते निजगृहेऽनयत् । तत्र हि तन्मांसेन निर्विशङ्कं भोज्यगोष्ठीं निरवर्तयत् ।

एवंविधा रोमाञ्चकारिण्यो घटनाः समुद्रगर्भेऽतिसाधारण्यः । किन्तु मानुषे लोके मनुष्यनेत्रगोचरीकरणस्यावसरः सर्वतः पूर्वमनेन चित्रपटाविष्कारेणैव प्राप्तोऽस्ति । आश्चर्यकारकेऽस्मिन्नाविष्कारयुगे

# समस्या-पूर्तयः

[ जयपुरीय-संस्कृतवाग्-विवर्द्धिन्याः परिषदः षष्ठवार्षिकाधिवेशने कविसंम्मेलने पठिताः काश्चन प्रसिद्ध-कवीनां समस्यापूर्तयः पाठकानां मनोरञ्जनाय प्रकाश्यन्त इति— संपादकः ]

## समस्या—'विषमा-समस्या'

शिक्षाधिकारि-पुरुषा निजलाभलग्नाः
ये पण्डिताः सपदि भान्ति बहिर्मुखास्ते
क्षीणा तु संस्कृत-गवी निभृतोपचर्या
पूर्या बुधैः कथमियं विषमा समस्या

कविशिरोमणिः भट्ट-श्रीमथुरानाथशास्त्री, जयपुरम्

स्वतन्त्रता-आजित-भारतेऽस्मिन्
प्राणान् परित्रातुमशक्नुवाना ।
आपत्पयोधौ ननु पण्डितालि-
र्निमज्जतीयं विषमा समस्या ।

कवि-पण्डित-श्री-एस०सुब्रह्मण्यदीक्षितः, पुंगनुरु

लोकोऽद्य नेतृत्वविवादपूर्णो
वक्त्येव नित्यं न शृणोति किञ्चित् ।
शिष्यो न कश्चिद्, गुरवो हि सर्वे
किमत्र वाच्यं विषमा समस्या ।

पण्डित-श्रीविद्याधरशास्त्री, एम०ए०, बीकानेर

ये सज्जनाः संस्कृतभाषयैव
निजोदरं निर्भयमाभरन्ति ।
तां रक्षितुं तेऽपि न हा ! यतन्ते
सैषा सखे ! मे विषमा समस्या ।

पण्डितनारायणशास्त्री काङ्करः, जयपुरम्

उत्तरोत्तरं वर्द्धमाना लोकानां कौतुकतृष्णा, भविष्यति किं किं दर्शयेदिति साम्प्रतं द्रष्टव्यमस्ति ।

उद्योगिनो मनुष्यस्य मत्या किं ननु दुर्घटम् ।
आकाशमथ पातालमेकीकुर्यात् कदाचन ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# कूटसाक्षित्वफलम्

लेखकः—प० शिवप्रसादशास्त्री, संस्कृताध्यापकः, राजकीय-इन्टर-कालेज, किशनगढ़ ( राजस्थान )

अस्ति एकः प्रतीच्यां दिशि नानाविटपविराजितः मूलासराभिधानः ग्रामः । तत्र चैकदा गतोऽहं महिषीमेकां क्रेतुं सायङ्काले चैकस्मिन् सदने गत्त्वा विश्राममकरवम् । गृहे च तस्मिन् जरठैका योषित् संविष्टासीत् । तां प्रणम्याहं रात्रौ तत्रापृच्छम—'मातः ! कथमेकाकिनी सदनेऽस्मिन् दृश्यसे, क्व गतास्तव कुटुम्बिनः"–इति श्रुत्वैव सा वृद्धा वक्तुमुपाक्रमत ।

आसीत् पुरा अस्मिन् गृहे वित्तवानेको विप्रवरः स्वभार्यया सार्धं सुखेन कालं यापयन् ग्राम्यजनानां पूज्यत्वं मुख्यताञ्च संप्राप्तो वित्तेन नानाविधानि कर्माणि कुर्वन्, नाम गृह्णन् परमेश्वरस्य जगन्नियन्तुः, स्वयशसो विस्ताराय नैकान् साधुजनान् भोजयन् स बहूनि हायनानि क्षपयामास । इत्थं व्यतीतेऽपि तस्य यौवने, प्राप्ते पञ्चाशद्वर्षदेशीये चायुषि स पुत्ररत्नं नाम कुलज्योतिर्नालभत । अनेन च दुःखेन पीडितः स संसारमेतं दुःखभाजनं मन्यमानः केनापि प्रकारेण शान्तिं न लेभे ।

सहसैकदा साधुरेकः समायातस्तस्मिन्ग्रामे । कति वर्षाणि चोषित्त्वा तत्र स ग्राम्यजनानेवं समभाषत । "अस्ति मे सन्निधौ सहस्ररूप्यकात्मकं वित्तम् । तेनाहं श्वगुरोः भाण्डारं (श्राद्धं) कर्तुं कामः साधून् यावदाहूयागच्छेयम् तावन्मे धनं कोपि रक्षेत् तदा शोभनं भवेत् ।" इति निशम्य जनाः ग्राममुख्यस्य विप्रस्य पार्श्वे गत्वोक्तवन्तः "यदस्य साधोर्धनं भवान् स्वसन्निधौ रक्षतु । यतोहि ग्रामेऽस्मिन् नास्त्यन्यः कोपि भवादृशो वित्तवान् विश्वस्तश्च । तूर्णमेवायं महात्माऽऽगत्य स्वधनं प्राप्स्यति । न कापि विचारणा विधेयात्र विषये भवता" । इति निशम्य जनोक्तिं विप्रवरस्तथेति स्वीकृत्य तेषां वचनं वित्तराशिं तस्य महात्मनो निजपार्श्वे ररक्ष ।

अथ गते च कियति काले स साधुः पुनराजगाम तत्र परं नानयत् स्ववित्तं; यतोहि कार्यं तत्तस्य पूर्णतां न गतम् । विप्रस्यैतावत्पर्यन्तं मतिः कश्मलशून्या निर्मला चासीत् परं—"कस्य मनो न चलति निशाम्य निधिमग्रतः" इत्यतः स ग्राममुख्यो स्वमनसि विचारयामास यदेतद् धनं कथमहं पचेयम् ? सहसैव तस्य मतिरजायत यदेषा जरठा कुम्भकारभार्या विद्यते

## राष्ट्रपतेः सन्देशः

२२५१/५३ — राष्ट्रपति-भवन
नई-दिल्ली
४ सितम्बर १९५३

प्रियमहोदय,

भवदीयं २-९-५३ दिनाङ्काङ्कितं पत्रं 'भारती' नामिका संस्कृत-पत्रिका च राष्ट्रपति-नाम्ना प्रेषिते समुपलब्धे । एतदर्थं मद्वचनात् तदीयो धन्यवादो वाच्यः । भवतः प्रयासः सफलो भवेदिति कामना ।

पत्रिका अत्र संप्रेषणीया । भवदीयः

वाल्मीकि चौधरी
(राष्ट्रपतेः निज-सचिवः)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मम गेहसमीपे, दत्त्वा तस्यै दशरूप्यकाणि तां साक्षिणीं विधाय धनमेतत् साधवे न दास्यामि । अथ स महात्मा निजवित्तमानेतुं समाजगाम परं पूर्वविचारानुसारं विप्रवरोऽभाषत—मुहुर्मुहुर्धनं दत्त्वाहं कथं शक्ष्यामीमं मुख्यतां निर्वोढुम्। पूर्वमागत्य त्वया नीतं धनं, साम्प्रतं लोभवशात पुनरपि समागतोऽसि । धिक् त्वामीदृशं कर्म कुर्वाणम्। तेन साधुना च ग्राम्यजनानां समक्षे कथितं वृत्तमेतद्यदा तदा ते जनाः समागम्य गृहं तस्य कथयामासुर्यद् भो ब्रह्मन् ! दीयतां वराकस्यास्य धनं यत् त्वया पूर्वं रक्षितम्। सहसैव कोपाध्मातो भूत्वा विप्रवरो जगाद–रे दुरात्मन् ! न मया दृष्टपूर्वस्त्वत्समो नराधमः। एकवारमत्सकाशान्नीतं वित्तं पुनरपि याचमानो न लज्जसे हीनं कर्मैतत कुर्वन्। चेदहं जानीयां पूर्वं यदेष पापात्मा पुनरपि लोभपीडितो वित्तमिदं नेतुमागमिष्यति तदा ग्राम्यजनानां समक्ष एवादास्यम्, परं नासीन्मम मनसि पापस्यावतारः । तत्क्रमानेतुमागता जरठा सा कुम्भकारी समुपस्थितासीत् । तां पृष्ट्वाऽद्यैव निश्चिनोमि यस्त्वं दुष्टो वाऽहं पापमतिः। तत्क्षणमेव चाहूता कुम्भकारी। हस्ते यष्टिकां समादाय तदाश्रयेणैव च प्रचलन्ती वृद्धत्वाद् वेपमाना संप्राप्ता कुम्भकारी स्वकरं समुत्थाप्याब्रवीत् :—पुण्यात्मायं ब्राह्मणः कदापि परस्य धनं भोक्तुं नाकरोत् दुष्टां मतिं कथं पुनरस्य धनं स्ववशे कुर्यात्। मम समक्षे गृहीतमनेन स्वधनम्। केवलं लिङ्गधारी साधुजनानां विद्यतेऽयं, न खलु वस्तुतो महात्मा। कथमन्यथा पापपूर्णमेतत् कर्म कर्तुं द्विवारं धनञ्च नेतुं काङ्क्षति दुष्टाशयः। इति श्रुत्वैव मुष्टिकाभिस्ताडयामासुस्तं जनाः। वराकोऽसौ तत्क्षणेन पञ्चत्वं गतोऽनशनेन ।

न कोपि ज्ञातुं शक्तः कर्मणां गतिं विचित्राम्। संवत्सराभ्यन्तर एव विप्रवरस्य तस्य गृहे पुत्रो जन्म लेभे। अनेकधा हर्षमयो जातः सकलो ग्राम्यजनः। सर्वैरेवैकस्वरेणोक्तं यत् सुकर्मवशात् प्रीतोऽसौ जगदीश्वरः । सर्वसौख्यमयस्य विप्रवरस्य गेहे एषैका न्यूनता पूर्णत्वं नीता परमेश्वरेणेत्यतोऽसौ न्यायी दयालुश्चेति सर्वतः सिद्धम् । कालक्रमेण च पञ्चदशवर्षदेशीयो जातो बालकः। अस्माकं भारतीयानां बालकाः शिक्षां लभेरन् न वा परं तेषां विवाहस्तु यौवनात्प्रागेव भवेदिति सर्वसम्मतम्। अतएव विप्रवरेण स्वसुतस्योद्विवाहार्थमनेकशो ब्राह्मणकन्याः दृष्टिपथं नीताः परं एकापि नारोचत तस्मै । अन्ततोगत्वा एकया ब्राह्मणदुहित्रा सह तस्य विप्रतनयस्योद्वाहो जातः। विवाहेपि हर्षानन्दमयो जातोऽखिलो ग्राम्यजनः। विवाहस्य चतुर्थेऽहनि देवपूजानन्तरं सहसैव शिरःपीडयाक्रान्तो ब्राह्मणकुमारो मृतिं लेभे। सर्वत्र हर्षस्थाने क्रन्दनं प्रसृतम् । वृद्धो ब्राह्मणः "हा हतोस्मि! कस्य दुष्कर्मणः फलमेतत प्राप्तं मया। रे दुर्दैव! वराक्यानया विप्रकन्यया किं दुराचरितं येनासह्यमेतद् वैधव्यदुःखं प्राप्तेति भृशं विललाप।" तस्यातीव करुणोत्पादकं विलापं श्रुत्वा स मृतिं गतो विप्रतनयः सहसैवोत्थायाब्रवीत् "शृणुत भो जनाः! गृहीतं येनानेन यस्य धनं सोऽहं साधुः स्वधनस्य सर्वंसंशं भोक्तुं पुत्ररूपेण हर्ष-शोकविवर्धनो भूत्वाधुना यथाप्राप्तां गतिं गच्छामि। इयञ्च मे वधूः सास्ति यया कुम्भकार्या कूटसाक्षित्वं दत्तमासीत्। स्वस्य कर्मणः फलं भुञ्जाना सहमाना च वैधव्यदुःखं चिरञ्जीविष्यतीति ब्रुवन्नेव स पुनरचेतनतां गतः क्रन्दनं प्रसारितवान्।

एवं कथयन्ती सा वृद्धा मां सोत्कम्पं जगाद यत्-भो



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सुपुत्रस्य परिचयः

लेखकः—प० गिरिराजशर्मा शास्त्री, जयपुरम्

एकस्मिन् ग्रामे एकस्य कूपस्योपरि तिस्रः स्त्रियः जलाहरणार्थमागताः । तत्रैव पार्श्वे स्थितः एको वृद्धजनः सक्तुभक्षणे मग्न आसीत् । ताः सर्वाः स्त्रियः घटान् भूमौ निक्षिप्य उपाविशन् । वृद्धोऽपि यथा शृणुयात् तथा उच्चस्वरेण परस्परं वार्तालापं कर्तुम् आरभन्त—

एका स्त्री अपराम् अवदत् 'भगिनि ! पण्डित-मोक्ष-रामस्य शिष्यः मम पुत्रः यदा शास्त्री भूत्वा गृहम् आगतः तदा महान् उत्सवः समजनि । समस्तग्रामे तस्य कृते "धन्योयं धन्योयम्" इति ध्वनिरुदभूत् । ईदृक् स शकुनज्ञः येन तत्क्षणं लाभो भवति । श्रूयताम् अन्यदपि यत् स आकाशस्य तारकाणां गणनां कृत्वा तासां नामानि अपि कथयति । परलोकस्य सर्वान् वृत्तान्तान् स जानाति । यमराजस्य न्यायालये कथं निर्णयो भवति इत्यपि स सम्यक्तया वेत्ति । भैरवस्य गणानां, यमदूतानां, सर्वेषां नरकाणां च नामानि तस्य कण्ठस्याग्रे वर्तन्ते । न जाने कथं स भगवतः सर्वाः लीलाः विजानाति । विवाहादिषु शास्त्रार्थं कुर्वन् विरोधिपण्डितानां मुखमर्दनं करोति । अहम् ईदृशं पण्डितं जन्म प्रदाय स्वां धन्यां मन्ये । सर्वोऽपि ग्राम्यो जनः माम् अङ्गुल्या निर्दिश्य आगतान् अन्यान् कथयति यत्-पश्य, पश्य, इयं शास्त्रिमहोदयस्य माताऽस्ति या जलमानेतुं गच्छति ।

तस्याः वृत्तान्तं श्रुत्वा अन्या स्त्री उवाच-अयि सहचरि ! ममापि पुत्रस्य वृत्तान्तं शृणु । तादृशो मल्लः पञ्चदश-ग्रामेष्वपि न वर्तते । स पञ्चशतीं दण्डान् (दण्ड) पञ्चशतानि उपवेशनानि (बैठकें) प्रातःकाले सायंकालेऽपि च करोति । मल्लयुद्धागारे स ऊरुघातं कृत्वा सुप्रसिद्धमल्लैः सह युद्धयति । हे भगिनि ! सत्यं मानय, मल्लविद्यायां तेन ईदृशी प्रसिद्धिः प्राप्ता यादृशी न कोऽपि अन्यः प्राप्तुं समर्थः । अहं तस्मै यथेच्छं संयावम् (हलवा) अपूपांश्च, निर्माय प्रतिदिनं भोजनार्थं ददामि । भोजनं कृत्वा स गजेन्द्रवत् मन्दगत्या यदा भ्रमणार्थं गच्छति तदा अहम् अत्यन्तं प्रफुल्लिता भवामि । अधुना मां जलाहरणार्थम् आगच्छन्तीं दृष्ट्वा मार्गे एकः कृषकः मां निर्दिश्य स्वपुत्रम् अवदत् वत्स पश्य, एषा एव तस्य मल्लस्य माताऽस्ति, यः ह्यः कल्लूनामकं मल्लं पूर्णतः धराशायिनम् अकरोत् । सत्यं कथयामि भगिनि, अहं पुत्रस्य प्रशंसां श्रुत्वा भृशं प्रफुल्लिता संजाता ।

तयोः द्वयोः वार्तां श्रुत्वाऽपि तृतीया तूष्णीमेव स्थिता । अनन्तरं तासु एका अवदत् । त्वं कथं मौनम् आलम्बसे ? इत्थं ज्ञायते यत् तव पुत्रः योग्यः नास्ति । तृतीया स्त्री अवदत्–भगिन्यौ ! यादृशोऽपि अस्ति मम पुत्रः स ममार्थं तु श्रेष्ठः वर्तते । स यशःप्राप्तये लालायितः । स तु सरलस्वभावस्य पुरुषोऽस्ति

---

अतिथे ! सा वैधव्यदुःखंप्राप्ता कन्याहमेवास्मि । विप्रवरश्च मे श्वशुर आसीत् । मम श्वशुरः श्वश्रूश्च मृतौ कालक्रमेण, परमहं कूटसाक्षित्वस्य फलमेतदिति शिक्षयन्ती जनान् यापयामि कथमपि स्वजीवनम् । इत्थं वृद्धामुखात् सर्वमेकाकिन्या निवासकारणमहं श्रुत्वा, प्रातः कृत्वा स्वकार्यस्य पूर्णतां, समागतः स्वगेहम् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यावद्दिनं क्षेत्रे कार्यं करोति सन्ध्यासमये च गृहम् आगत्य जलमानयति। अवकाशमपि न प्राप्नोति यशःप्राप्त्यर्थम्। अद्य स मम अत्यधिकम् आग्रहेण उत्सवं (मेला) द्रष्टुम् अगमत्। अतएव अहं जलमानेतुम् आगताऽस्मि। माम् अद्य जलमानेतुम् आगतां दृष्ट्वा जनाः आश्चर्यचकिता भूत्वा अपश्यन् मनसि च अचिन्तयन् यत् कथम् एषा अद्य जलमानेतुम् आगता?

ताः तिस्रः स्ववार्ताः समाप्य शीघ्रमेव निज २ घटान् जलेन प्रपूर्य तस्मात् स्थानात् चलिता अभूवन्। स वृद्धः पथिकोऽपि तासाम् अनुगमनम् अकरोत्। किञ्चिद् दूरं गत्वा एकतः स त्रीन् युवकान् तेषां समीपम् आगच्छतः अवलोकयति। ते तासां स्त्रीणां पुत्राः आसन्। त्रयोऽपि जनसम्मेलनात् प्रतिनिवृत्ताः आसन्। तेभ्यः एकः एकां स्त्रीं प्रति आगत्य अवदत् मातः! अहं शुभशकुनेन गृहं प्रतिनिवृत्तोऽस्मि। मार्गे एवं भरितघटस्य आगमनं शुभं वर्तते। इत्थं कथयित्वा स शीघ्रमेव स्वगृहं प्रति अगमत्।

द्वितीयो द्वितीयां स्त्रीम् अवदत्—मातः! अहं-मल्लयुद्धप्रतियोगितासु विजयी भूत्वा प्रतिनिवृत्तोऽस्मि। शीघ्रमेव गृहम् आगम्यताम्, अहं क्षुधार्तोऽस्मि। इत्थं कथयन् सोऽपि गृहं प्रति अगमत्।

तृतीयो युवकः तृतीयां स्त्रीं प्रति आगत्य स्व-हस्तेन तस्याः जलघटं च गृहीत्वा अवदत्-मातः! किमर्थं त्वं जलमानेतुम् आगता? अहं तु आगत एव। एवं घटं गृहीत्वा स गृहं प्रति अगमत्। तदा निज-निज-पुत्रान् प्रति अङ्गुलिनिर्देशं कृत्वा ताः स्त्रियः तं वृद्धपथिकम् अवदन्। महाभाग! किमपि कथयसि अस्माकं पुत्राणां सम्बन्धे त्वम्?

## —: सुभाषितानि :—

संग्रहकर्ता:—छात्र-प्रभाकरशर्मा "दिनेशः" जयपुरम्

विद्या-विनय-वासांसि वयो वचनचातुरी॥
वकारैः पञ्चभिर्युक्तो नरो नायाति लाघवम्॥१॥

राजमान्यो धनाढ्यश्च तपस्वी पण्डितोऽपि च॥
रणे शूरश्च दाता च कनिष्ठो ज्येष्ठ उच्यते॥२॥

निर्दयत्वमहंकारस्तृष्णा कर्कश-भाषणम्॥
नीचपात्रप्रियत्वं च पञ्च श्री-सहचारिणः॥३॥

बन्धनानि किल सन्ति बहूनि,
प्रेमरज्जुकृतबन्धनमन्यत्॥
दारुभेदनिपुणोऽपि षडङ्घ्रि-
र्निश्चलो भवति पङ्कजबद्धः॥४॥

ग्रामे वासो नायको निर्विवेकः,
कौटिल्यानामेकपात्रं कलत्रम्॥
नित्यं रोगः पारवश्यं च पुंसाम्,
एतत् सर्वं जीवितामेव मृत्युः॥५॥

---

स वृद्धः पथिकः स्व-श्मश्रु स्पर्शन् अवदत्। यूयं स्व-स्व-पुत्रान् प्रति किमपि कथयत, मम सम्मतौ तु एषु एक एव ईदृक् वर्तते यं सुपुत्रं वक्तुं शक्नुमः। प्रथमौ द्वौ तु निजमातुः उदरात् बहिरागत्य तस्याः अतिदूरम् अभवताम्, तृतीयस्तु तस्याः शरीरतः दूरमपि भूत्वा मातरं हृदयान्न दूरं विदधाति। यस्मिन् पूज्येषु श्रद्धाऽस्ति तम् एव अहं सत्पुत्रं जानामि।

द्वयोः स्त्रियोः मुखे मलिने अभूताम्। तृतीयायाश्च मुखं पूर्णिमाचन्द्रवत् कान्तिमत् जनैरवलोकितम्।

——



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# आधुनिकस्य मानवस्य कर्तव्यम्

[ पूर्वतोऽनुवृत्तम् ]

लेखकः—श्रीमनसुखरायमोरः, नवलगढ़

इदानीं वयं सृष्टेः सार्वभौमगुणेषु दृष्टिपातं कुर्मः। अस्यां सृष्टौ त्रयाणामेव गुणानां सत्ता वर्तते। ते च सन्ति सत्वम्, रजस्, तमस् इति नामभिः प्रख्याताः। यथा यामलेऽपि निर्दिष्टम्—

सत्वं रजस्तम इति गुणत्रयमुदाहृतम्।
साम्यावस्थितिमेतेषामवस्थां प्रकृतिं विदुः॥
सैव मूलप्रकृतिः स्यात्प्रधानं पुरुषोऽपि च।

सत्वं-रजस्-तमस् इत्येषां साम्यावस्था एव प्रकृतिः। अस्या एव नामान्तरं मूल-प्रकृतिः, अस्याश्च प्रकृत्याः नियन्ता ? पुरुषसंज्ञकत्वेन उदाहृतः। यथा—

सत्वं रजस्तम इति गुणानां त्रितयं प्रिये।
यदा सा परमा शक्तिर्गुणाधिष्ठानमाचरेत्॥
प्रकृतित्वं भवेत्तस्याः पुरुषः स्यात्सदाशिवः।

परमया शक्त्या यदा सत्व-रजस्-तमसाम् अधिष्ठानं क्रियते तदा सा प्रकृतिः इति नाम्ना व्यवह्रियते सदाशिवश्च प्रधानपुरुषत्वेन अभिव्यक्तो भवति। प्रकृतिपुरुषयोः इच्छानुसारमेव सदैव चलति अस्याः त्रिगुणात्मिकायाः सृष्टेः क्रमः। अनेन क्रमेण सत्वगुणात् मानवः, रजोगुणात् पशुपक्षिगणः, तमोगुणा च कीटपतङ्गादयः उत्पद्यन्ते।

अत्र सत्वस्याभिप्रायो वर्तते ज्ञानाधिक्यम्। यश्च मानत्वेन व्यवह्रियते। यतो हि प्रकृत्यनुसारेण मर्यादानुसारेण च स्वजीवनं यापयन् मनुजः अत्यधिक-नियमानुवर्तितया, आत्माभिव्यक्त्या विवेकशीलत्वेन च सर्वाधिककलासम्पन्नो भवितुमर्हति। स निजहस्ते सम्पूर्णसृष्टेः वृद्ध्या रक्षणेन च सह सार्वदेशिक निजोत्थानस्य सामर्थ्यं रक्षति। अत एव सृष्टे उत्थानपतनयोः हानिलाभयोः पापपुण्ययोश्च दायित्वं तस्मिन्नेव निहितमास्ते। रजसः अर्थो वर्तते भोग येन पशुपक्षिणः अभिप्रेताः सन्ति। अस्य पर्यवसानं विनाशमयं वर्तते। किन्तु भोगोऽपि सृष्टेः परिचर्यायै पूर्णोपयोगी वर्तते। एते भोगेषु लिप्ताः प्राणिन अज्ञानात् प्रकृतेः प्रेरणया अस्मिन् रताः सन्ति एतैः भोगलिप्तैः प्राणिभिः यानि भोगमयानि कर्माणि क्रियन्ते तैः एषामुपरि पापस्य भारो नाधिकं वर्धते अज्ञानं तेषां शरणम्। पापं तु ज्ञानिनामुपरि ए वर्धते। अज्ञानिनस्तु तेन अलिप्ता एव निवसन्ति।

तमसः अभिप्रायोस्ति विनाशः। यः कीटपतङ्गा दीनां हिंसकजन्तूनां च बोधकोस्ति। एतद्धि प्रकृते नियमानुसारं परिवृद्धायाः सृष्टेः, या हि आवश्यकता अधिकास्ति, उपसंहारे तस्याः संतुलनं करोति एवम् अस्याः सृष्टेः उत्पत्ति-स्थिति-संहाराणां क्रम सत्व-रजस्-तमोगुणैः सह परम्परानुबद्धो वर्तते।

प्रकृतेः सत्तया एतस्यैव गुणत्रयस्य आधारे प्राणिनाम् आहारस्यापि विधानं कृतम्। वसुन्धरा प्रथमं वनस्पतिः उत्पादिता तस्याश्च पुष्पफलादीनि तदनन्तरं च अन्नादीनि समुत्पादितानि, यानि मानवैः गृहीतानि यैश्च मानववंशस्य वृद्धिः समभूत



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



विलोकनीयास्ति अन्नस्य शक्तिः । अन्नमस्ति कीदृक् पौष्टिकम्, अपरिमितशक्तेः स्फूर्तेश्च प्रदातृ, बल-बुद्धिवर्धकञ्च । अस्य सेवनेन मानवस्य या चरमोन्नति संजाता तया सकलमपि विश्वं सुपरिचितमास्ते । अस्यैव प्रभावेण भीमादिषु सहस्रगजानां शक्तिः संजाता, सूक्ष्मदेहेन हनुमदादिना पर्वतादीनि स्वहस्ते धारितानि, तथा एकेनैव बाणेन सम्पूर्णा पृथिवी कम्पमाना कृता । अन्नस्य अपरिमितां शक्तिं विस्मृत्यैव अद्य ज्ञानरहितो मानवः दुर्दैवस्य अशक्ततायाश्च वशीभूतः समभूत् । अनेनैव कारणेन अद्य मानवः दानवरूपो भूत्वा निजशक्तेः दुरुपयोगं कुर्वन् प्रलयंकारिणीषु विनाशस्य ज्वालासु सपरिवारम् आत्मानं भस्मसात् कर्तुम् इच्छति । अन्नमेवास्ति ज्ञानोत्पत्तेः मूलकारणम् । अनेनैव मानवः पराक्रमं कौशलं बुद्धिबलञ्च प्राप्नोति, यानि सन्ति मानवस्य परम्परया प्राप्तानि निधिरूपाणि । अध अस्ति अस्माकं परमावश्यकं कर्तव्यम् यद् वयं स्वजीवनस्य एकैकं क्षणं प्राणिमात्रस्य रक्षायां तस्य अभिवृद्धौ च व्ययीकृत्य सृष्टेः महिमानं वर्धयेम ।

मोक्षपदं तु अन्नाधारेण जीवतो मानवस्य अन्तिमं लक्ष्यं वर्तते । मानवाद्धि इदम् अपेक्षितं यत् स अमरतायाः पूजको भूत्वा अन्नसदृशस्य सारपदार्थस्य ग्रहणं कृत्वा अहिंसायाः पृष्ठभूमौ समस्तजगतः वातावरणं पवित्रं कुर्यात्, येन च शान्तिः, भ्रातृभावः, सर्वभूतहितेरतिः, तथा ऐक्यम् इत्यादीनि सारभूतानि तत्त्वानि तस्मिन् समाविष्टानि भवेयुः । तेन च स स्वात्मानं नारायणरूपेण प्रकटयन् भूमण्डले 'जीवेम शरदः शतम्, अन्ये च जीवन्तु' (जीवो और जीने दो) इति अमरसिद्धान्तं मूर्तरूपे विश्वस्य सम्मुखं प्रकटयेत् । हा ! यदि अद्य मानवः स्वस्य चिरात् परित्यक्तस्य सात्विकमार्गस्य अनुगामी अभविष्यत् तर्हि स सम्पूर्ण-प्राणिनाम् उद्धारको, रक्षकः, पालकश्चाभविष्यत् ।

अन्नस्य निःसत्वांशरूपाणि तृणादीनि त
फलानां स्थूलांशरूपाणि त्वगादीनि (छिलके)
पशुभिः गृहीतानि । कर्दमादिभ्यश्च कीटपतङ्गाना
उत्पत्तिः अभूत् । मानवार्थं, पशुपक्षिभ्यः तथा की
पतङ्गादिभ्यश्च प्रकृत्या निर्दिष्टः योसौ आहा
उपरि दर्शितः, तत्रैव निर्भरत्वेन समस्तप्राणिनां सृष्टे
हितं रक्षणं च निहितम् । मत्कुणस्य मशकस्य
उत्पत्तिः मलाद् भवति । तेषु सर्वेषु बलवान् निर्ब
भक्षयति, इति क्रमः प्रचलितो वर्तते । अन्ततो गत्व
च मलस्य शक्तिः सिंहपर्यन्तम् अगच्छत्, यस्य
परिणामोऽभवत् विनाशः; किन्तु एषोपि अस्ति सृष्टे
परिचालनार्थम् अत्यन्तमुपयोगी । इदानीं तावत् तृणस्
शक्तेरुपरि विचारः करणीयः । अस्योपरि निर्भर
अजायाः आरभ्य हस्तिपर्यन्तं सन्ति ये पशवः तेष
सर्वेषां शरीराणि क्रमेण स्थूलानि भवन्ति । गजस्
शक्तेः स्रोतः रजोमयं वर्तते । येन स प्राणी भोग
प्रधानः सिद्धयति, किन्तु अयमपि अस्ति सृष्टे
परिचालनार्थं पूर्णतः सहयोगी ।

[ क्रमशः

## मधु-कणः—

"आध्यात्मिकसूर्यस्य प्रकाशमन्तरा केवलेन भौतिकेन विद्युदादिप्रकाशेन मानव-जीवनस्य अस्थिरताऽशान्त्यादितमः न कदापि दूरीभवितुं शक्नोति ।"

• • •

"भारतीयाचारशास्त्रे न कश्चिद् एकोऽपि एतादृशः नियमः, यो न भवेत् विज्ञानाश्रितः, तथा यस्मिन् शारीरिकविकासेन सह आध्यात्मिकविकासस्यापि न स्यात् सुतरां समावेशः । किन्तु आधुनिकाः वैज्ञानिकाः तस्य स्थूलदृष्ट्या केवलम् एकमेवाङ्गम् (आधिभौतिकं) पश्यन्ति ।"

-:ꕥꕥ:-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृत-समाचाराः

[श्रीमद्-अनन्तशयनम्-आयङ्गरमहोदयस्य देहली-थविद्वद्द्वय्याः सविधे प्रेषितस्यैकस्य आङ्गलभाषायां लिखितस्य पत्रस्यानुवादः भारतीपाठकानां सेवायाम् उपस्थाप्यते, येन तेऽपि यथारुचि विषयेऽस्मिन् प्रवर्तेरन् इति—सम्पादकः]

भारतीय-लोकसभा-कार्यालयः,
नव-देहली.
१२ अप्रेल १९५२

प्रियौ गोवर्द्धन-यशोदानन्दनशास्त्रिणौ,

भवन्तौ सम्यग् जानाते यत् संस्कृतस्य सांस्कृतिकस्य अध्ययनस्य च शोधकार्ये समुन्नतौ च रुचिशीलाः विद्वांसः ऐषमः एव 'कान्स्टीट्यूशन-क्लबे'ऽत्र समवेता आसन् । तैः संभूय संस्कृतस्य भारतीयसांस्कृतिकस्याध्ययनाय एका संस्थापितास्ति संस्थाऽपि । संस्थायाः नियमावली निर्मीयते, येन शीघ्रमेव तस्या राजेष्टिकरणं संपद्येत । अत्रान्तरे वयं देहलीस्थानाम् अन्यत्र स्थितानां वा संस्कृत-विदुषां परिचयाय प्रयतामहे, येन तेषां रुच्यनुसारम् अध्ययनस्य शोधकार्यस्य च सामूहिकं पृथक् पृथक् प्रतिष्ठापनं कर्तुं शक्येत ।

संस्थायाः द्वितीयम् उद्देश्यं राष्ट्रिय-संस्कृत-पुस्तकालयस्य संघनम् अस्ति, यस्य शाखाः संपूर्णेऽपि भारते भविष्यन्ति, यत्र च समस्तविषयाणां संस्कृत-पुस्तकानि हस्तलिखितग्रन्थाश्चापि संगृह्येरन् । वयम् अभिलषामः, संस्कृतस्य मुद्रितानां हस्तलिखितानां च समस्त-ग्रन्थानाम् एकं बृहत् सूचीपत्रम् इतः पूर्वमेव प्रकाशितं भवेत् ।

अन्या च एका अभिलाषाऽस्ति मदीया-यत् संस्कृतस्य सर्वासु शाखासु स्नातकोत्तरं शोधनकार्याय विद्वद्भ्यः अवश्यं प्रदेयोऽवसरः तथा संस्कृतस्य व्यापकरूपेण प्रचाराय विभिन्नमार्गाणां ग्राह्यः समाश्रयः ।

अस्मदीयं लक्ष्यं वर्तते-भारतस्य समुचिते प्रमुख-स्थाने संस्कृतस्य प्राच्य-शिक्षायाः एकस्य विश्वविद्यालयस्य स्थापनम्, येन समग्रविश्वस्य संस्कृतशिक्षायाः प्रधानम् एकं केन्द्रं भवेन् निर्मितम् ।

उपर्युक्तकार्येभ्यः द्रव्यापेक्षा कार्यकर्तॄणाम् एव अधिकं महत्त्वम् । अतः प्रार्थये यद् भवन्तौ देहल्याः समस्तविद्वद्भिः सह संपर्कं विधाय निवेदयेतां यत् ते उपर्युक्तायाः संस्थायाः सदस्यत्वमङ्गीकुर्युः । तेषां विदुषां योग्यतायाः तद्रुच्यनुकूलानां विषयाणां च पूर्णं विवरणं संगृह्णीयातां भवन्तौ येषु तैः किमपि अन्वेषितम् अन्वेषणीयञ्च । वयम् अनेनैव प्रकारेण भारतस्य अन्येभ्यः भागेभ्यः सूचनां लब्ध्वा संस्कृत-विदुषाम्, विद्यालयानाम्, कालेजानाम्, संस्थानाम्, पुस्तकालयानां चाखिलभारतीयविवरणं संकलयिष्यामः ।

यथैव अत्रत्यानां विदुषां सूची पूर्णतया संकलिता भवेत् तथैव वयम् एकत्रीभूय अग्रिमं कार्यक्रमं निर्धारयिष्यामः । अस्मिन्नेव मासे वयम् एकत्रिता भवेम तथा प्रयतेमहि ।

भवदीयः
अनन्तशयनम्-आयंगरः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## पत्रालोकः—

प्रियसंपादकमहोदयाः,

स्वस्ति, वन्दे। भारती-पत्रिकायाः माघपूर्णिमाङ्के प्रकाशितः स्वामिलक्ष्मणशास्त्रिणा संकलितः 'संस्कृत-भाषायाः प्रचारोपायाः' इति-शीर्षको लेखः मया दृष्टः। तस्य कार्यरूपागमने मन्ये राज्यसहायता आवश्यकी। अथवा दरभंगा-काशी-महाराजादयः, संस्कृतभक्ताः अन्ये वा धनेश्वराः स्वौदार्येण कार्यमेतत् परिपूरयन्तु।

श्रीकाशीस्थसंस्कृताचार्येषु केवलं पण्डितानाम् एकशती यदि कार्येऽस्मिन् नियुक्ता भवेत् तर्हि प्रति-दिनम् अष्टहोराश्रमेण एकेन वत्सरेण संस्कृत-भाषायाः बृहच्-शब्दकोषः परिपूर्णो भवेदिति दृढो मे विश्वासः। अस्मिन् कार्ये सहयोगाय सोत्साहाः सन्ति अनेके पण्डिताः सन्नद्धाः समग्रेऽपि भारते, तेषाम् अशन-वसतिसौकर्यं चेद् भवेत्। एतदर्थं धनसंचयाय 'काशी-संस्कृत-प्रचार-समिति' द्वारा यद्यभ्यर्थ्येत, नात्र संदेहः, तर्हि राज्येभ्यः धनेश्वरेभ्यश्चावश्यं धनं लभ्येत।

न केवलमेतदेव, अस्मिन् भारते अशीति-सहस्र-संख्यातोपि अधिकाः सन्ति धार्मिकाः मठाः। एतेषां मठाधिपतयश्च निःसंशयं संस्कृत-राष्ट्रभाषा-पक्ष-पातिनः। विश्वकोष-निर्माणाय यदि ते अभ्यर्थ्येरन् तदाऽवश्यं कुर्युरेते सर्वविध-साहाय्यम्।

यदि कोषोऽयं व्यावहारिकशब्दान् संस्कृताङ्गल-भाषाद्वारा संकलितः स्यात्, तदाऽखिलजगतः सर्व-विश्वविद्यालयेषु उपयोक्तुमर्हः स्यात्। संस्कृतभाषा च विश्वव्यापिनी भवेत्।

इदानीं 'कन्नड-कन्नड-बृहत्कोष'—निर्माणाय मोहमयी-मद्रास-अन्नामलय- महीशूर-द्रावनकोर-हैदराबादादिविश्वविद्यालयाधिकारिणः यथा प्रय-तन्ते तथैव संस्कृतकोषनिर्माणेऽपि भारतीयसर्व-विश्वविद्यालयाधिकारिणश्चेद् उद्युञ्जीरन्, 'आङ्ग्ल-चेम्बरकोष' वत् संस्कृत-बृहत्-कोषोपि संगृहीतो भवेत्, समग्रभुवने आदृतश्च स्यात्। पूर्णेऽस्मिन् कार्ये न्यूनातिन्यूनं दशसहस्रप्रतयः अस्य मुद्र्येरन्। न्यून-मुद्रणे न लाभः। सर्वेषु संसार-प्रसिद्ध-पुस्तकालयेषु अस्य प्रतिरेका अवश्यं गच्छेत्।

एतदर्थम् अत्रत्यानां मठाधिपतीनां श्रीमतां संस्कृतज्ञानां वा विलासः ( Address:) चेदपेक्ष्यते, प्रेषयितुमहमुत्सहे।

येन केनापि प्रकारेण संस्कृतस्य सर्वाङ्गीणः कोषः एकः अवश्यं संग्राह्यः। मन्ये भाषाप्रचारेऽयं महान् सहायकः स्यात्; तेन शान्तेः, संपदः प्रसारश्चापि भवेत्—इति ममाभिप्रायः।

मान्याः ! एष मम विनम्रोपन्यासः भवदीय-पत्रिकायां प्रकाशयितव्य इति प्रार्थयते—

वि० सुब्बराव, थियोसोफिस्ट

२ मुंडविद्री (द० कर्नाटक)

श्रीमन्तः संपादकमहोदयाः,

राजस्थान-संस्कृत-साहित्य-सम्मेलने योधपुरे भवतां दर्शनं लब्धम्। सम्मेलनस्य कार्यकारिणी-सदस्यत्वेन स्वीकृतोऽहम्, परम् अद्यावधि एकमपि कार्यकारिण्या अधिवेशनं न जातम्। ( मम पार्श्वे सूचना नागता अतो मम मते तु नैव जातम्)। किमहं ज्ञातुं प्रभवामि, मासनवके कथमेकमपि अधिवेशनं न संजातं कार्यकारिण्याः ? जातं चेत् कथं मया सूचना नोपलब्धेति। भवद्भिः कृपया विषयेऽस्मिन् भारत्यां प्रकाशो विधेयः।

भवदनुग्रही—

शिवप्रसादशास्त्री, किशनगढ़



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## प्रहसनानि

एकदा एकस्य वैश्यस्य गृहे समागताः केचित् प्राघुणिकाः। तेषां कृते कतिचिद् भोजनपात्राणि तेन प्रतिवेशिनः सकाशात् आनीतानि। निष्पन्ने कार्ये द्व्यधिकानि तानि परावर्तितानि च।

प्रतिवेशिना उक्तम्—एते द्वे पात्रे अधिके, न मम।

वैश्येन प्रोक्तम्—महाशय, तवैव एते अपि पात्रे। यतो हि-तेषां तव पात्राणां प्रसूतिः संजाता मद्गृहे।

किञ्चिद्दिनानन्तरं पुनः आवश्यकता जाता वैश्यस्य गृहे पात्राणाम्। प्रतिवेशिना वृद्धिलोभेन आवश्यकतातः अपि अधिकानि विशिष्टानि च प्रदत्तानि पात्राणि तस्मै। वैश्येन न पुनः तानि परावर्तितानि। एकस्मिन् दिने प्रतिवेशिना पृष्टः असौ वैश्यः भोः! अद्यापि त्वया मम पात्राणि कथं न परावर्तितानि?

वैश्येन सखेदं निवेदितम्—भ्रातः! तानि तु सर्वाणि एव हन्त! युगपदेव पञ्चत्वं प्राप्तानि। सूचनादानं परं मया विस्मृतम्। क्षन्तव्यो मेऽपराधः।

● ● ●

उदारता-दयादिकान् गुणान् छात्रेभ्यः शिक्षयन् प्राध्यापकः पृच्छति—

यदि त्वम् एकं गर्दभं केनापि पुरुषेण ताड्यमानं मोचयेः तर्हि अनेन तव कर्मणा को भावः समुदाहृतो भवेत्?

छात्रः—भ्रातृभावः।

● ● ●

न्यायाधीशः—(चौरमुद्दिश्य) याहि, त्वाम् अहं मोचयामि।

चौरः—किमहो! सत्यमहं निर्मुक्तो भवता?

न्यायाधीशः—आम्, यतो हि घटिका-स्तेयस्य अभियोगः न त्वयि सिद्धः।

चौरः—धन्यवादः। परमहं ज्ञातुमिच्छामि—यद् इयं घटिका तु इदानीं ममैव संजाता न?

## किं भवन्तो जानन्ति?

१—संसारे गुरुतमं पुस्तकं "ब्रिटिश-म्यूजियम" नाम्नि इङ्गलैंडदेशीये अद्भुतवस्तुसंग्रहालये वर्तते। तस्य पुस्तकस्य भारः मणचतुष्टयपरिमितः अस्ति।

२—अखिलेऽस्मिन् संसारे षष्टिलक्षाधिकाः सन्ति अन्धमानवाः। तेषु विंशतिलक्षाधिकाः भारतीया एव।

३—संसारे सर्वतो बृहत्तमं नगरं न्यूयार्कं (अमेरिकायाम्) वर्तते। अस्य हि जनसंख्या ८० लक्षपरिमिता। अस्य वसतिः अतिघना। अत्र हि प्रायेण चत्वारिंशत्खण्डयुतानि सन्ति भवनानि।

इतः पूर्वं लन्दननगरम् आसीत् संसारे बृहत्तमम्।

४—कैरो-नाम्नि इजिप्तदेशीये नगरे गर्दभाः बहु संमानं लभन्ते। तत्रत्याः श्रीमन्तः गर्दभम् आरुह्य सायंकाले परिभ्रमणं कुर्वन्ति।

### अनुकरणीयः संस्कृतानुरागः

नवलगढ-शेखावाटी-स्थः रायसाहब-श्रीपूरणमल-जयपुरियामहोदयः सूचयति—"यदहं वाञ्छामि संस्कृतस्य प्रचारम्। अतीव प्रसन्नोऽहं 'भारती' पत्रिकामवलोक्य। सर्वासु संस्कृतपाठशालासु इयमवश्यं गच्छेत्-इति मे कामना। याः पाठशालाः ये वा जीविकाकर्पिताः विद्वांसः मूल्यं प्रदाय न ग्रहीतुं शक्नुवन्ति पत्रमेतत्, तेभ्यः 'भारती' पत्रं संग्रहीतुं मूल्यमहं दास्यामि।" इति। अतो यदि पाठशालायाः प्रधानाध्यापकः-अन्यो वा विद्वान् पत्रमेकं भारती-कार्यालये प्रेषयेत्-यद् अहं पत्रमेतद् संग्रहीतुं न समर्थोऽस्मीति श्रीपूरणमल-जयपुरिया-प्रदत्तकोषेण भवदीयं पत्रम् अस्मत्सविधे प्रेषणीयम्-इति। 'भारती' तेषां सविधे वर्षपर्यन्तमवश्यमागच्छेत्।

## सम्पादकीयम्—

मुद्राकरकराघातकातरा यदि भारती।
कृपाकराम्बुजस्पर्शैः सुधियः साधयन्तु ताम्॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## देश–दर्शनम्

### पूना-विश्वविद्यालयस्य दीक्षान्त-समारोहः—

( २४ सितम्बर ५३ )—अयं हि समारोहः सर्वेषां विश्वविद्यालयानां कृते अनुकरणार्हः। यतो हि अस्मिन् भारतीयपरम्पराणामनुगमनं जातम्। अपरं च-अस्मिन् सर्वमपि कार्यजातं संस्कृतभाषयैव निष्पन्नम्। आधुनिकेषु भारतीयविश्वविद्यालयेषु सोऽयमपूर्व एवावसरः आसीत् शतेषु वर्षेषु, यत्रेदृशी प्रणाली समादृता। मङ्गलाचरणानन्तरम् सर्वप्रथमं श्रीमते र० प० पराञ्जपेमहोदयाय 'वाङ्मय-विशिष्टाचार्य'- D. Litt) त्युपाधिं प्रददता प्रारब्धोऽयमुपाधिवितरणोत्सवः। पश्चात् अन्येभ्यः छात्रेभ्यः विविध उपाधयः प्रदत्ताः। ततः उपनिषद्वाक्यैः श्री० सीपी० रामस्वामिनः अय्यरस्य उपदेशः समजनि।

वर्तते अस्य विश्वविद्यालयस्योपकुलपतिः श्रीजयकरः। उपाधीनाम् आङ्गलनामानि गीर्वाणवाण्याम् परावर्तितानि; किन्तु एम० ए०, बी० ए०, उपाधीनामपि भारतीकरणमपेक्ष्यते, यद्विना सर्वमेतद् अर्द्धजरतीयमेव।

### २५०) रूप्यकाणां शतं छात्रवृत्तयः—

(नई-दिल्ली २६ सितम्बर )—शिक्षामन्त्रालयतः प्रकाशितविज्ञप्त्यनुसारेण ज्ञायते यत् २५०) रूप्यकाणां १०० सांस्कृतिक-छात्रवृत्तीः भारतसर्वकारः प्रदास्यति। येषाम् असाधारणी भवेद् योग्यता पूर्वमेव तान् संगीत-नृत्य नाटकादिललितकलाः शिक्षयितुं प्रदीयते एषा छात्रवृत्तिः; किन्तु छात्रस्यायुः ३५ वर्षतः अधिकं न भवेत्।

### भारतस्य प्रमुख-नगरेषु सांस्कृतिकगतिविधिवर्द्धनस्यावश्यकता—

( मुम्बई २८ सितम्बर ) भारतराज्यस्य सूचनामन्त्री डा० बालकृष्णकेसकरः स्वमतं प्रकटयति यत् भारतस्य प्रतिनगरे सांस्कृतिकसंस्थाः अवश्यं भवेयुः स्थापिताः। यतो हि मानवस्य कृते यादृशी आवश्यकता शरीरस्वास्थ्याय व्यायामशालानां तादृशी एव मानसिकस्वास्थ्याय सांस्कृतिक-शालानामपि।

### श्रीव्यासस्यापि मते शिक्षा परिवर्तनीया—

( २६ सितम्बर ५३ )—राजस्थानप्रान्तस्य प्रधानमन्त्री श्रीजयनारायणव्यसमहोदयोपि फतेहपुरे बालसेवासदने भाषमाणः "प्रचलितसम्पूर्ण-शिक्षाप्रणाल्याम् आमूलचूडं परिवर्तनम् आवश्यकम्" इति स्वमतं प्रकटितवान्। केन्द्रीयशिक्षामन्त्रिणा आजादमहोदयेनापि ३० सितम्बरदिने आकाशवाण्या प्रकटितमेतत्। मन्ये, शीघ्रमेव विषयेऽस्मिन् राज्यस्य शिक्षाधिकारिणाम् अवधानं भवेत्।

### संस्कृत-साहित्यपरिषदः ३७तमः वार्षिकोत्सवः—

कालिकातायां प्रसिद्धायाः संस्कृत-साहित्य-परिषदः वार्षिकोत्सवः महता समारोहेण सम्पन्नः, यत्र श्रीविष्णुशर्मणा नाट्यरूपमानीतं "कपालकुण्डला"-काव्यम् अभिनीतं विद्वद्भिः।

## विदेश–वार्ता

### श्रीचर्चिलाय योग्यता-पुरस्कारः

[ स्टाकहोम, १४ अक्टूबर ] ऐषमः साहित्य-योग्यता-पुरस्कारः ब्रिटिश-प्रधानमन्त्रिणे श्रीचर्चिलाय प्रदास्यते-इति योग्यतापुरस्कार-प्रदात्र्या स्वीडिश-एकेडेमी-संस्थया निश्चितम्।

### अमेरिका-सुन्दर्याः भारतप्रेम

[ २५ सितम्बर ५३ ] पेनसिलयानियाप्रदेशस्य कुमारी पवलिनफे दिनद्वयात्पूर्वमेव अमेरिकायाः (१६५३) सर्वोत्कृष्टा सुन्दरी घोषितोऽभवत्। तव का इच्छास्तीति पृष्टा साऽब्रवीत्-मम एकमात्रमिच्छास्ति भारते निवस्तुम्। यतो हि मे भारते अत्यधिकं प्रेम। किंच-अहं मदीययान्त्रिकज्ञानेन भारतं लाभान्वितमपि कर्तुमिच्छामि!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



बालस्तम्भः—

# सरलः संस्कृत-शिक्षणोपायः

## उकारान्तः पुंल्लिङ्गः गुरु-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गुरुः | गुरू | गुरवः |
| द्वितीया | गुरुम् | गुरू | गुरून् |
| तृतीया | गुरुणा | गुरुभ्याम् | गुरुभिः |
| चतुर्थी | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| पञ्चमी | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| षष्ठी | गुरोः | गुर्वोः | गुरूणाम् |
| सप्तमी | गुरौ | गुर्वोः | गुरुषु |
| सम्बोधनम् | हे गुरो | हे गुरू | हे गुरवः |

एवम् इषु (बाण) भानु, शिशु, विधु (चन्द्रः), पशु, विष्णु, शम्भु, तरु, ऊरु (जङ्घा), साधु, वायु, बाहु, बिन्दु, ऋतु, शत्रु, रघु, यदु, बन्धु-इत्यादि-शब्दानां रूपाणि गुरुशब्दस्य सदृशानि ज्ञेयानि।

## 'श्रु' (सुनना)

(वर्तमाने लट्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | शृणोति | शृणुतः | शृण्वन्ति |
| मध्यमपुरुषः | शृणोषि | शृणुथः | शृणुथ |
| उत्तमपुरुषः | शृणोमि | शृणुवः, शृण्वः | शृणुमः, शृण्मः |

## उदाहरणार्थं पाठः

१. गुरुः छात्रस्य पाठं शृणोति। २. गुरू छात्राभ्यां गीतार्थं शृणुतः। ३. गुरवः छात्रेभ्यः पाठान् शृण्वन्ति। ४. किं त्वं गुरोः उपदेशं शृणोषि? ५. किं युवां सुरेशस्य भाषणं शृणुथः? ६. यूयं तु अतिसन्निकटतया तस्य भाषणं स्पष्टतया शृणुथ। ७. अहं गुरोः व्याख्यानं सावधानतया शृणोमि। ८. आवां तस्य ध्वनिवर्धकयन्त्रस्य शब्दान् स्पष्टतया न शृणुवः। ९. वयं तु दत्तावधानतया तस्य यन्त्रस्य च किञ्चित् सन्निकटतया तान् शब्दान् शृणुमः। १०. रामः इषुणा रावणं जघान। ११. एषु दिवसेषु भानुः प्रातः सार्धषड्वादनावसरे उदेति। १२. इयम् अस्य शिशोः माता अस्ति। १३. रात्रौ विधुः जनान् आह्लादयति। १४. पशवः तृणानि चरन्ति। १५. शम्भवे नमः। १६. वसन्तसमये तरुषु पुष्पोद्गमः भवति। १७. भीमः दुर्योधनस्य ऊर्वोः गदाप्रहारम् अकरोत् तेन स भूमौ पपात।

प्रकाशक—जयबहादुरसिंह। पता—भारती भवन, गोपालजी का रास्ता, जयपुर।

राजस्थान प्रिंटिङ्ग वर्क्स, हनुमानजी का रास्ता, जयपुर में मुद्रित।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

सदा सन्निधिं विदधती भरि भारती पातु ।
महितमहालक्ष्मीमु रे [illegible]पदं ददातु ॥

संवत् २०१० } वर्षम् ४ { प्रथमोऽङ्कः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# विषय-सूची


| क्रमः | लेखाः | लेखकनामानि | पृष्ठसंख्या |
|---|---|---|---|
| १. | भजे कृष्णचन्द्रं जितामन्दचन्द्रम | श्रीप्रह्लादचन्द्रशास्त्री डीडवाना | १ |
| २. | नवीनवर्षारम्भः | सम्पादकः | २ |
| ३. | संस्कृतस्य रक्षणं दृढीकरणं च अत्यावश्यकम् | श्रीगोविन्दवल्लभपन्तः मुख्यमन्त्री उत्तरप्रदेशस्य | ४ |
| ४. | मामकीना श्रीजगदीशयात्रा | श्रीघनश्यामचन्द्रशास्त्री लक्ष्मणगढ | ५ |
| ५. | गोमूत्रे गङ्गानिवासः गोमये लक्ष्मीनिवासः | 'वैजयन्ती' | ८ |
| ६. | न्यायार्जितस्य द्रव्यस्यापि महाफलम् | श्रीहजारीलालशर्मा शास्त्री नवलगढ | ६ |
| ७. | आधुनिकस्य मानवस्य कर्तव्यम् | श्रीमनसुखरायमोरः नवलगढ | ११ |
| ८. | संस्कृतं राष्ट्रभाषा भवितुमर्हति न वा | श्रीमांगीलालमिश्रः नेछवास सीकर | १२ |
| ६. | दीपावली | सम्पादकः | १५ |
| १०. | बाणस्यावर्णनीयं गद्यनिर्माणनैपुण्यम् | श्रीचन्द्रशेखरताम्बे, नागपुरम् | १६ |
| ११. | सम्पादकीयम् | | १७ |
| १२. | योगिवर्याणां माधवानन्दस्वामिमहाभागानां शुभसंदेशः | | १८ |
| १३. | विनोदवाटिका | देवर्षिकलानाथशास्त्री | १६ |
| १४. | किं भवन्तो जानन्ति ? | " | |
| १५. | पुस्तकालोकः | व्याकरण—धर्मशास्त्राचार्य श्रीवृद्धिचन्द्रशास्त्री | |
| १६. | सस्कृतसमाचाराः | | २० |
| १७. | देशदर्शनम्-विदेशवार्ता च | | २१ |
| १८. | द्रुतं संस्कृतं शिक्ष्यतां 'भारती'तः | "देवर्षिः किसलयः" | २२ |


(मुखपृष्ठचित्र 'अमरज्योति' पत्रस्य सौजन्यात्प्राप्तम्)

## —: "भारती" पत्रस्य उद्देश्यानि नियमाश्च :—

१ संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचारपरिपोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि ।

२ 'भारती' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम् ।

३ मासिकपत्रमिदं प्रतिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात् ।

४ एकस्याङ्कस्य मूल्यम् ।≈) आणकषट्कम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र सर्वकारैः स्वीकृता—

सम्पादकः—
कविशिरोमणि-
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

मूल्यम्—
वार्षिकं रूप्यकत्रयम्
३) रू०
एकस्याङ्कस्य मूल्यम्
आणकषट्कम्

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षम् ४ | कार्तिकपूर्णिमा, सं० २०१० | अङ्कः १

## भजे कृष्णचन्द्रं जितामन्दचन्द्रम्

रचयिता :—प्रल्हादचन्द्रः शास्त्री, डीडवाना ( राजस्थान )

[ भुजङ्गप्रयातच्छन्दसि ]

सदा हर्षदं मञ्जुमाराभिरामं
महामोहचौरं जनैर्गीतकीर्तिम् ।
मनोहारिवंशीनिनादे प्रवीणं
भजे कृष्णचन्द्रं········ ॥१॥

प्रदत्तो जनेभ्यो नवस्फूर्तिकारः
सुनीतिप्रदो येन गीतोपदेशः ।
मुनीनां मनोमोहकं मोहनं तं
भजे कृष्णचन्द्रं········ ॥२॥

पयोदासितं कायवर्णं हि यस्य,
सुमूर्ध्नि स्थितं मेचकं केशपाशम् ।
दृशा निर्जिताम्भोजरम्यश्रियं तं
भजे कृष्णचन्द्रं········ ॥३॥

अजं जायमानं जनैर्गीयमानं
विभुं भावुकैर्भाव्यमानं विभान्तम् ।
मुदा मोदितं मानिनीमानमोषं
भजे कृष्णचन्द्रं········ ॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# नवीनवर्षारम्भः

संस्कृतसेवायां सानुरागाः पाठकमहाभागाः !!

सकलमङ्गलदायकस्य भगवतश्चराचरनायकस्य प्रकम्पयाऽनुकम्पया, अनुग्राहकमहाभागानां परिपूर्णेन सहयोगेन च प्रत्यहं प्रभावती सेयं "भारती" तृतीयं वत्सरं परिसमाप्य संप्रति चतुर्थे वर्षे पदं निदधातीति प्रत्यक्षं प्रतिभावताम्। अहह निरन्तरमुत् क्रान्तिमयः सोयं समयः केवलं भारतवर्ष एव न, अपितु समग्रेऽपि भूखण्डे कीदृशेन उद्वेगेन सह व्यतीत इति कस्य वा सहृदयस्य न विदितम्? विशेषतश्च भारतवर्षमिदं सीमाप्रदेशेषु प्रवर्तमानं विविधं विवादम्, जनसमाजे प्रसरन्तं नानाविधं कलहं प्रत्यहं यथाकथंचिन् मर्षयति। ततोऽपि प्रतिदिनं प्रवर्द्धमानया महर्घतया कीदृशं संकटं प्रतिपदमनुभवतीति को वा न जानाति? ईदृशेऽस्मिन् उद्वेगमये समये भारतीयस्य संस्कृतसाहित्यस्य, शिक्षाप्रचारस्य च कीदृशी परिस्थितिर्भवेदिति स्वयमेव भवद्भिः संप्रधार्यं नूनम्।

समग्रेऽपि भारते संस्कृतविद्याप्रचारस्य कृते प्रमुखतया प्रकाशीभवत् काशीक्षेत्रमेव तावद् गृह्यताम्। इह हि नवीनसाहित्यस्य जन्मनः का कथा? पूर्वतः प्रचरन्ती प्राचीनप्रभावती न दृश्यते सा 'अमरभारती'। न विलोक्यते 'ज्योतिष्मती'। न खेलत्युच्छृङ्खलम्। हन्त संस्कृतसेविनां 'सुप्रभात' मपि संप्रति भाग्यलभ्यम्। इतः प्रहितः संस्कृतरत्नाकरोऽपि कदाचिदेव दर्शनं ददाति। अत एव हि 'सारस्वती सुषमा'पि कदाचिदेव समुपलभ्या। किं बहुना, संप्रति संस्कृतमात्राऽवलम्बिनां तादृशः 'सूर्योदयोपि' ऐतिहासिकी कथेव समभवत्।

एवं हि परितः प्रवृत्ते युगसंघर्षे कस्मादाशास्यतां सा 'मधुरवाणी'। अहह पाकस्थानीये शासनकलहे परितो जाज्वल्यमाने क्वाऽधुना सा काश्मीराणां 'श्रीः'। संस्कृतसेविनां कृपावर्षामेव केवलं प्रतीक्षमाणो 'मालवमयूरोऽपि' मध्यदेशाद् विलीनः। किमन्यत्, डिण्डिमघोषेण सर्वतः संघोष्यते संप्रति भारतप्रदेशोऽयं सर्वथा स्वतन्त्रः। प्रकटं प्रख्यायते भारतीयजनतन्त्रस्य संप्रति साम्राज्यम्। आकण्ठं विनिन्द्यते पुरातनराजानां शासनम्। परम्, स्वराज्यशासनमयेऽपि अस्मिन् समये संस्कृतभारती सेयं शनैः शनैर्विरलप्रचारा प्रभवतीति प्रत्यक्षमीक्ष्यतां श्रीमद्भिः। वैदेशिकानां शासनकालेऽपि विद्यालयादिषु यावान् प्रसारः संस्कृतसरस्वत्याः समभूत् सोऽपि शनैः शनैः संकुचतीति केन वा न विलोक्यते ज्ञानचक्षुष्मता? अस्तु, विरमतु दीर्घा सेयमप्रियकथा। सर्वतः संकटसहस्रमयेऽस्मिन् समये संस्कृतसेविनां पूर्णकृपावती सेयं 'भारती' भारतीये समग्रेऽपि प्रान्ते, प्रत्येकप्रदेशे, प्रत्येकनगरे, किं बहुना, ग्रामे ग्रामेऽपि यत्समादरं लेभे तत्र किल ग्राहकमहाभागानां कृपासहयोग एव कारणमिति निर्विशङ्कं ब्रूमः।

भारत्याः प्रबन्धका अपि सर्वविधमहर्घतामयेऽपि समये पत्रस्याऽस्य सुन्दरलेखसामग्रीसंघटनाय, मुद्रणसौन्दर्यसंवर्द्धनाय, समये प्रकाशनाय च यथाशक्ति परमं प्रयत्नं चक्रुः, भविष्यति च यथासमयं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



करिष्यन्तीति हृदयेन सोत्साहं संनद्धाः। किन्तु वर्तमान-युगे कीदृशमपि पत्रं धनिकानां शासकानां च सहायतां लब्ध्वाऽपि ग्राहकमहाभागानां कृपासहयोगं विना न कथंचित् प्रचारसमर्थं भवतीति सर्वजनविदितम्। अतएव भारत्या ग्राहकमहाभागा अपि संस्कृतसेविषु निजेषु मित्रेषु, संबन्धिषु च एतस्याः प्रचारं प्रचुरं प्रवर्द्धयिष्यन्तीति प्रबन्धकाः प्रणयतः प्रार्थयन्ते। प्रत्येकमहाभागः द्वौ द्वौ एकमेकं वा ग्राहकं संपादयेत् तर्हि सरलतया भारत्या ग्राहकसंख्यावृद्धिर्भवेत्। येन हि प्रबन्धका अपि उत्तरोत्तरमेतस्याः सौन्दर्यसंवर्द्धनाय सोत्साहा भवेयुः।

आशास्यते–उदारहृदयाः पाठकमहोदयाः प्रार्थनामिमां हृदयतः स्वीकृत्य संस्कृतभारतीसेवां सहजमेव संपादयेयुः। वयमपि समयानुसारं रोचकसामग्री समाहरणाय प्रमोदप्रवर्द्धनाय च प्रकामं प्रयतिष्यामहे, इति भवेद् विदितं समये संप्राप्ते एव।

'भारती' पत्रस्य समुज्ज्वलं कलेवरम्, सरलं संस्कृतम्, सारगर्भितां लेखसामग्रीम्, तथापि च स्वल्पतमं मूल्यं विलोक्य राजस्थान-मध्यप्रदेश-सौराष्ट्र मद्रास-प्रान्तीयैः सर्वकारैः निजनिजप्रान्तीयेषु स्कूल-कालेज-पुस्तकालयादिषु भारत्या एतस्याः संमान्यता स्वीकृतेति कृतज्ञतापुरस्सरं धन्यवादान् वितरामः। आशास्महे—अस्मिन्वर्षे अन्यान्यप्रान्तीयाः शासका अपि निजनिजप्रदेशे भारतवर्षीय-संस्कृतिप्राणभूतायाः संस्कृतभाषायाः प्रचारे एतेषामनुकरणमवश्यं क्रियासुरिति।

भारतीमिमां विगतवर्षेषु सत्परामर्शदानेन, सक्रियसहयोगेन, स्थानस्थानेषु प्रचारकरणेन च ये महाभागाः सुतरामनुगृहीतवन्तस्तेषां सेवायां हृदयतः कृतज्ञतां प्रकाशयन्ति प्रबन्धसम्पादकाः। सुदृढो विश्वासोऽस्ति–अग्रेऽपि निजोदारतया भारतीमिमामनुग्रहीष्यन्ति महाभागा इमे। यैर्लेखकमहाभागैरद्यावधि सारगर्भितान् निजनिबन्धान् संप्रेष्य भारती सेयं सुशोभिता तेषामुपकारसंभारं हृदयेनाऽभिनन्दामः। लेखनसमर्थान् अन्यान् महाभागान्, उदीयमानान् नवयुवकांश्चाऽपि सप्रश्रयं प्रार्थयन्ते भारत्याः प्रबन्धसंपादकाः प्रबन्धप्रेषणाय। येन हि देशे संस्कृतसेवकानां सुयोग्यलेखकानां परम्परा निष्प्रतिरोधं प्रचरन्ती प्रभवेत्।

भारत्याः संस्कृतसरस्वतीसेवने प्रचुरं परिश्रमम्, नियमितरूपेण प्रकाशनम्, निःसीममहर्घतायुगेऽपि केवलं मुद्रात्रयम् ३) वार्षिकमूल्यं च विलोकयन्तो देशविश्रुता बहवो माननीयमहाभागा हृदयतः प्रसन्नतां प्राकाशयन्। अतएव कार्येष्वेवंविधेषु निजस्यापि सहयोगं प्रदर्शयन्तस्ते स्वीयमाशीर्वादं, शुभसंदेशं च संप्रेष्य कृपाविशेषम् प्रकाशयामासुः। तेषु प्रमुखप्रकीर्तनीयाः कतिपये यथा—

माननीय श्रीराष्ट्रपतिमहाभागाः। माननीयाः श्रीउपराष्ट्रपतिमहोदयाः। मा० चिन्तामणि द्वारकानाथदेशमुखमहोदयाः। मा० पतञ्जलिशास्त्रिणः (सर्वोच्चन्यायालयस्य प्रमुखन्यायाधीशाः)। मा० गोविन्दवल्लभपन्तमहोदयाः। मा० हरिभाऊ उपाध्यायाः। परमादरणीयाः पूज्यश्रीकृष्णबोधाश्रम महाभागाः (बदरिकाश्रमस्थजगद्गुरुश्रीशङ्कराचार्यपादाः)। देशमान्ययोगिवर्यश्रीमाधवानन्दस्वामिमहाभागाः, मा० डा० श्रीभगवान्दासमहोदयाः। एतदादयः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृतस्य रक्षणं दृढीकरणं च अत्यावश्यकम्

लेखकः—श्रीगोविन्दवल्लभपन्तः मुख्यमन्त्री उत्तरप्रदेशस्य

संस्कृतवाङ्मयमस्माकमतीतेन सह सम्बन्धं दृढयति। प्राचीने काले भारतस्य मातृभाषा संस्कृतम् एवासीत्। न केवलं भारतस्यैव अपितु देशान्तराणामपि मातृभाषा आसीत्। अद्यापि लङ्काब्रह्मदेशाद्याः संस्कृतेनैव बलं प्राप्नुवन्ति। यदा नूतनानां शब्दानामावश्यकता जायते तदा संस्कृतभाषाया अक्षयकोषादेव तेऽपि शब्दान् सञ्चिन्वते।

वयं धर्मार्थकाममोक्षाणां ज्ञानं संस्कृतेनैव प्राप्तवन्तः। कतिचिज्जना एवं बुध्यन्ते यत् संस्कृतभाषायां केवलं धर्मार्थदर्शनयोरेव विचाराः समुपलभ्यन्ते, परन्त्विदं ज्ञानं तेषां न सम्यग्। तैः स्मर्तव्यं यत् संस्कृतभाषायां मानवजीवनस्य सर्वेषामङ्गानां आदर्शा नूतना नूतना विद्यन्ते। राजनीतेरर्थशास्त्रस्य आयुर्वेदस्य अन्यासाञ्चापि कलानां मौलिकानि तत्वानि वयं संस्कृतभाषाया एव विज्ञातुं शक्नुमः। संस्कृतवाङ्मयस्यावलोकनेनैव ज्ञायते यत् प्राचीने काले भारतीय संस्कृतिः कियतीमुच्चतमां काष्ठामवगाहते स्म। सर्वासां कलानां भारते प्रचार आसीत्। प्राचीने काले समुन्नतविचारशीलाः मनुष्या ज्ञानोपार्जनं कृतवन्तः। शान्तिव्यवस्था च तेषां मुख्यं ध्येयमासीत्। ते मनुष्या न केवलं स्वदेशे अपितु निखिलस्य विश्वस्य कृते शान्तिसन्देशं प्रापयन्त आसन्।

यद्यपि साम्प्रतं विदेशेषु विज्ञानस्योन्नतिरवलोक्यते परन्तु नहि तत्र शान्तिलेशोऽपि। एकं राष्ट्रमप

---

पर्याप्तां ग्राहकसंख्यावृद्धिमनवलोकयद्भिर्यैः महाभागैर्भारतीप्रचाराय धनसाहाय्यं प्रदत्तं तेषां निम्ननिर्दिष्टानि नामानि सधन्यवादं प्रकाश्यन्ते—

माननीयाः महाराव श्रीभीमसिंहमहोदयाः (कोटानरेशा उपराजप्रमुखाः) ५०१)

भिषगाचार्यश्रीजयरामदासस्वामिमहाभागाः(आयुर्वेदिककालेजस्य उपाध्यक्षाः २५१)

श्रीयोगेन्द्रजी गोयलमहोदयाः, बरेली १०१)

श्रेष्ठिश्रीमोतीलालजी चोखानीमहोदयाः, नवलगढ ५१)

प्रबन्धकर्तारो विश्वसन्ति यद् देशस्य अन्यान्येऽपि गण्यमान्या धनिका विद्वांसो नेतारश्च मासिकपत्ररूपेण प्रकाश्यमानायाः संस्कृतसरस्वतीसेविकाया भारत्याश्चिरजीवितासंपादने समपेक्षितं साहाय्यं सुतरां समर्पयिष्यन्तीति।

संप्रति भारतीसंपादनस्य भारः पुरातनस्याऽकिञ्चित्करस्य एकस्य जीर्णयोः स्कन्धयोरुपरि विन्यस्तः। किन्तु संकटबहुलेषु गतेषु वर्षेषु यैर्महाभागैरेतस्याः संपादनकार्यं सुचारुरूपेण सपादितं तान्प्रति साशीर्वाद मावेदयामि कृतज्ञताम्। अग्रे रोचकतासंवर्द्धनाय नवीननवीनसामग्रीसंघटनाय, प्राचीनप्रचलित व्याकरणनियमनिर्बन्धं शिथिलीकृत्यापि संस्कृते सार ल्यसंपादनाय, यथाशक्ति प्रयतिष्यते। भगवान् भार्ग वीजानिः पूरयतादस्माकं भारतीसेवासंपादनमनो थम्, अनुग्राहकाणां ग्राहकमहाभागानां च हृद्गता नखिलानप्यभिलाषानिति—

संपादकरेणु



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# "मामकीना-श्रीजगदीशयात्रा"

लेखकः—श्रीपं० घनश्यामचन्द्रशास्त्री "विद्यामार्तण्डः" विद्यारत्नम्
प्रधानाचार्यः श्रीऋषिकुल ब्र० आ० सं० कालेज, लक्ष्मणगढ़ ( सीकर )

प्रेष्ठाः पाठकमहाभागाः ? मनागत्र ध्यानं दत्त्वा प्रेम्णा विचिन्तनीयं यद्वयं किमर्थमत्र संसारे समागताः, किमर्थञ्च जगन्नियन्त्रा जगदीश्वरेण पशुपक्षिकीटपतङ्गाद्यनेकयोनिभ्यः पृथक्कृत्य दुर्लभां मनुष्ययोनिमस्मभ्यं प्रदाय महती दया प्रदर्शिता । अस्मिन भूमण्डले प्राप्तायाञ्च मनुजयोनौ, अस्माकमात्मोद्धारस्य किं साधनम् ! आत्मसाक्षात्कारः (परमात्मप्राप्तिः) केन प्रकारेण भवितुं शक्यते च ! अत्र विषये बहुशश्चिन्तितेऽपि सांसारिकानेककार्यसंलग्ना नानाविध विलासवैभवमत्ता महान्तः सत्ताधारिणोऽपि मनुजाः प्रायः स्वार्थपरायणा उदासीना इव दरीदृश्यन्ते किमत्र पुण्यपवित्रभारतभूमौ धृतजन्मनां सनातनहिन्दुवैदिकधर्मावलंबिनामस्माकं कृते–उदासीनतेर हास्यस्थली नास्ति ? विषयेऽत्र धैर्येण भूयोऽपि विचिन्तयन्तु भवन्तः । वस्तुतोऽमूल्यस्य मनुष्यजन्मन इदमेव मुख्यं पारमार्थिकप्रयोजनमस्ति यतो व्यवहार सत्तायां वर्णाश्रमधर्ममर्यादामनुसृत्यानिन्दितं कार कुर्वन् आत्मसाक्षात्काराय निरन्तरं साधनं कुर्यादिति

मनुष्ययोन्यतिरिक्तयोनिषु कोट्युपायेषु विहितेष्वपि नित्यानित्यवस्तुविवेकादिसत्साधनाभावादात्म साक्षात्कारः कथमपि न भवितुमर्हति । आत्मन कामायैव सर्वं प्रियं भवति, इत्युक्त्वा "आत्मा व अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति बृहदारण्यकोपनिषदि चतुर्थाध्यायस्थचतुर्थब्राह्मणपञ्चमकण्डिकायां प्रोक्तम् । स चात्मसाक्षात्कारः यज्ञदानतपस्तीर्थयात्रादिसत्साधनैश्चित्तशुद्ध्यादिद्वारा साधितः सन्नात्मनोऽपरोक्षज्ञानेन गम्योऽस्तीति विषयस्तत्त्वज्ञानेच्छूनां कल्याणपथिकानां साधकानामति

---

राष्ट्रं न विश्वसिति । अतीते काले भारतीयसभ्यतायाः संस्कृतेश्चैतादृशी समुन्नतिरासीद् यज्जनाः सर्वासु कलासु निष्णाता अपि शान्तिप्रधाना आसन् । पुनरद्य वयं स्वतन्त्राः स्मः इति तस्याः स्वसंस्कृतेः पुनर्निर्माणमस्माकं कर्तव्यं वर्तते । अस्मदीयायाः सभ्यतायाः संस्कृतेश्चायं विशेषो वर्तते यदतीतकालादारभ्याद्यावधि कुत्रचिदपि संकीर्णतायाः स्थानं नह्यासीन्न च वर्तते । सत्यपि धर्मभेदे नहि कुत्रचित् कस्यचिदुपरि अत्याचारो दृश्यते, नहि कुत्रचिद् भेदभावनया कलहलेशोऽवलोक्यते । अत्र तु नास्तिकेभ्योऽपि स्थानं दत्तमासीत् । अत्र बुद्ध्या विवेकेन च मौलिकानां जटिलप्रश्नानां परस्परं समाधानमासीत् । वर्तते चेदमेवास्माकीनायाः सभ्यतायाः संस्कृतेश्च वैशिष्ट्यम् । अयमेव चास्माकं निधिः । इदञ्चास्माकीनायाः सभ्यतायाः संस्कृतेश्च प्रतीकमस्ति । अस्य निधेः सुरक्षा कर्तव्या । अद्य संसारस्य कृतीनामुपरि सम्यग् दृष्टिपातं विधाय स्वकीयान् सिद्धान्ताँश्च स्वसम्मुखे उपस्थाप्य शिक्षायामपि समुचितं परिवर्तनं कर्तव्यमस्माकम् । न केवलमद्य संस्कृतस्य जीवनरक्षणमेव कार्यमस्माकमपितु अस्य दृढीकरणमप्यावश्यकम् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



रोहितोऽस्ति। चित्तशुद्धये क्रियमाणेषूक्तसाधनेषु भक्तिपूर्वं विहिता तीर्थयात्रापि प्रधानं साधनम्। "यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम्। प्रतिग्रहादपावृत्तः स तीर्थफलमश्नुते" इति धर्मशास्त्रप्रमाणेन नियमपूर्वकं विहिता सर्वापि भारतीयतीर्थयात्रा, अभ्युदयकारिणी, किन्तु परमपवित्रस्य सात्त्विकभावसम्पन्नस्य श्रीसाक्षिगोपालभुवनेश्वरसहितस्य पुरुषोत्तमक्षेत्रापर नाम्नः श्रीजगदीशधाम्नो यात्रा तु अत्यन्तमभ्युदयसाधिका निरतिशयकल्याणदायिनी चेत्यत्र स्वल्पोऽपि सन्देहो नास्ति। श्रीपुरुषोत्तमक्षेत्रापरपर्यायं श्रीजगदीशधाम केवलं भारतीयप्रसिद्धचतुर्षु धामस्वेवान्यतमं प्रसिद्धं नास्ति किन्तु समस्तभूमंडलस्यापि प्रधानभूतं दक्षिणोदधितीरे उत्कलदेशे पुरुषोत्तमक्षेत्रे सुभद्रा-कृष्ण-संकर्षणाख्य मूर्तित्रयविराजितमक्षयवटमण्डितं सागरकल्लोलसमुद्भासितं–परमरमणीयं स्थानमस्ति। यत्र गमनेन दर्शनेन च वृजिनव्यूहनिवृत्तिपूर्वकं मनः शुद्धिमेति, ततः क्रमेण मनस एकाग्रतया परमानन्दममन्दमाप्नोति साधको जनः।

नक्षत्राणां यथा सोमः सरसां सागरो यथा।
तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम्॥

इति-बृहन्नारदीयपुराणे, उत्तरखंडे अ० ५२ श्लो० १३–प्रोक्तम्। तत्र बहूनि पुण्यतीर्थानि सन्ति, तेषु इन्द्रद्युम्नसरो-मार्कण्डेयह्रद-बिन्दुसरःप्रभृतीनि प्रसिद्धानि वेविद्यन्ते—

इन्द्रद्युम्नसरो नाम तीर्थं यज्ञाज्यसंभवम्।
यत्र स्नात्वा सकृल्लोकः शक्रलोकमवाप्स्यति॥

बृहन्नारदीय उ०खं०अ० ५४ श्लो० १००

मार्कण्डेयह्रदे स्नानं सर्वकालं प्रशस्यते।
तद्वत् स्नानं समुद्रस्य सर्वकालं प्रशस्यते॥

बृ० ना० उ० खं० अ० ५६ श्लो० २:

अत्र पावने क्षेत्रे बहूनां सिद्धिलाभोऽभूत्। तेषु सुभद्रा-कृष्ण-संकर्षणाराधनेन नूतनभवननिर्माणादिना च इन्द्रद्युम्ननृपतेर्भगवत्पदावाप्तिः सुप्रसिद्धा इत्थं परमपवित्रस्यानेकनदी-नदसमुद्रालंकृतस्य जगन्नाथतीर्थस्य यात्रा मनुष्यजन्मनः साफल्यकामुकैरवश्यं कार्येति मे सविनयं सर्वेषु विशेषतः संस्कृत-'भारती' सेवकेषु प्रार्थना—

सांप्रतमहं श्रीमहादेव्यनुकंपया मामकश्रीजगदीशयात्राविवरणं संक्षेपतः पाठकसेवायामुपायनीकरोमि। आशासे मदीयां धृष्टतां मर्षित्वा पाठका अनेन यात्रापरिचयं जानन्तो मोदिष्यन्ते, इति।

श्रीमन्तमन्तरायहन्तारं श्रीगणपतिं सकलसुरवन्दितामिष्टदेवतां श्रीदुर्गाभगवतीं च प्रेम्णा प्रणम्य तद्दिव्यप्रेरणया श्रीजगदीशयात्रां चिकीर्षुरहं–विक्रमसंवति २०१० मिते द्वि० वैशाखशुक्लनवम्यां भृगुवासरे तदनुसृत्य २२–५–५३ दिनांके रात्रौ धूमयानपथेन सहचरसहितः प्रस्थितोऽभूवम्। द्वितीयेऽह्नि दशवादनवेलायां रींगसस्थाने स्नानसन्ध्यादि नित्यकर्म समाप्य कृतभोजनो रात्रावष्टवादनसमये-इन्द्रप्रस्थनगरं समागतवान्। वैशाखसितैकादश्यां प्रातर्देहल्यामेव स्नानसंन्ध्यादिकं विधाय बाष्पयानमध्ये भोजनं प्रस्रावादिकं च कदाप्यकुर्वता व्रतिना मया धूमशकटीमारुह्य तद्दिने रात्रौ नागवादनसमये प्रयागगमनेच्छा कृता। मध्येमार्गम् अलीगढ़बाष्पयान



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



स्थितिस्थाने-अवतीर्य मूत्रोत्सर्गं विधाय पाणिपादं प्रक्षाल्य सार्द्धरुद्रवादनसमये दुग्धान्वेषणार्थं पर्यटितवान्। पयस्तु तदानीं मध्याह्ने न मिलितं गंत्री च स्वस्थानाच्चलितेति श्रुत्वा तूर्णं धावित्वातिशीघ्रगामिनि तस्मिन् वाष्पयानेऽतिषष्टिरप्यहं श्रीमातुः कृपया सोत्साहं-सानन्दं च प्राविशम्। (तत्क्षणे श्रीदिव्यदेवीचमत्कारो मयकानुभूतः)।

ततः प्रयागं गत्वा श्रीलक्ष्मीनारायणगुप्तप्रम्णा तदागारे कृतवसती रात्रौ फलाहारं विधाय—प्रत्यहं समस्तश्रीभगवद्गीतापाठनियमत्वात्--मार्ग एव कृतसमस्तगीतापाठो रात्रौ सुप्तवान्। प्रातस्तेनैव गुप्तेनानुगम्यमानो गङ्गां गत्वा तत्रैव नौकया विद्वद्भक्तजनैः सार्द्धं श्रीहरिकीर्तनं शृण्वन् गृणंश्च त्रिवेणीं गत्वा समन्त्रं स्नात्वा सन्ध्योपासनादिकं च विधाय परमानन्दमाप्तवान्। दृष्टानि तत्रत्यानि दृश्यानि, तत्र भारद्वाजाश्रमदर्शनं प्राचीनपरिपोटीं प्रदर्शयति। हिन्दी-साहित्य-सम्मेलन-कार्यकलापदर्शनं तत्रत्ये पुस्तकालये स्वनिर्मितापूर्वविनोदसमर्पणं संग्रहालयदर्शनं पत्रालयावलोकनं गंगातीरवर्तिशयानश्रीहनुमद्दर्शनञ्च विहितम्। ततस्त्रयोदश्यां सायं श्रीविश्वनाथपुरीं काशीं व्रजित्वा तत्र प्रसिद्धश्रीरामप्रतापश्रेष्ठिना प्रेम्णा सत्कृतेन रात्रौ विश्रम्य प्रातर्मानघट्टे भागीरथ्यां समंत्रं स्नात्वा सन्ध्यादिकं च निष्पाद्य गङ्गोदकेन श्रीमन्तं-विश्वनाथं सम्पूज्यान्नपूर्णां दुण्ढिविनायकं च दृष्ट्वा संस्तूय च महानानन्दोऽनुभूतः।

तत्रैवोक्तश्रेष्ठिभवने समागतेन पं० धारादत्तशास्त्रिवेदान्ताचार्येण मन्निर्मितमपूर्वविनोदं साधु विलोक्य प्रास्तावि—"यदिदं पुस्तकं काशी-गवर्नमेन्ट-संस्कृत-कालेज-परीक्षापाठनपुस्तकेषु प्रथमायां निर्द्धारितं चेत्स्यात् धर्मभक्तिवर्द्धनेन छात्राणामुपकारः स्यादहमस्मि पाठननिर्द्धारणसमितिसदस्येष्वन्यतमोऽतः प्रयतिष्ये। श्रीमद्भिः परीक्षाध्यक्षायेदमवश्यं देयमिति,"। ततो मया तदीयकृतज्ञतामभिनन्द्य पुस्तकमेकं श्रीभारतधर्म-महामंडल-संचालिकायै श्रीविद्यादेव्यै समर्प्य तत्रत्यां व्यवस्थामवलोक्य वाराणसेयराजकीयसं० महाविद्यालयपरीक्षाध्यक्षाय श्रीकुबेरनाथशुक्ल एम० ए० व्याकरणाचार्यमहोदयायापि पुस्तकं वितीर्णम्। तेनापि परीक्षासमितिसन्निधौ यथावसरं पुस्तकंनिर्द्धारणार्थमनुज्ञातम्—साध्वाचारश्च प्रदर्शितः। ततो व्यायामशालाध्यक्ष—श्रीवेणीप्रसादपुरोहितेन सार्द्धं श्रीमदनमोहनमालवीयकीर्तिस्तम्भभूतः श्रीहिन्दुविश्वविद्यालयोऽपि परितो दृष्टः। आगमनवेलायां परिचितपूर्वेण मुमुक्षुभवनप्रधानपरिव्राजा श्रीघनश्यामानन्दमहोदयेन साकं निर्जरवाच्येव वदता मया श्रीमन्नारायणस्मरणपूर्वकं संम्मेलनं विधायानन्दोऽन्वभावि। श्रीराजपदभाजा विहितवाराणसीवासेन पूर्वपरिचितेन श्रीश्रेष्ठिवरबलदेवदासविरलामहोदयेन समं तदीयोद्याने शास्त्रचर्चां कृत्वा तन्मंतव्यं च श्रुत्वा तेन सादरं सत्कृतोऽतिवार्द्धकेऽपि तदीयोत्साहमालोक्य प्रासीदमहम्। इत्थं प्रत्यहं दशाश्वमेधमणिकर्णिकादिघट्टेषु स्नानं कुर्वन् विद्वद्देवदर्शनञ्च विदधद्दिनचतुष्टयमुषित्वा श्रीकालीक्षेत्रमागतवान्।

तत्र च लक्ष्मणदुर्गप्रधानश्रेष्ठिश्रीरामनिवासब्रह्मदत्तझूंझनूंवालामहोदयेन सादरं सप्रेम च सत्कृतस्तदीये रम्यहर्म्ये एव कृतनिवासः श्रीमतीं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



जगदम्बां कालीं दृष्ट्वा संम्पूज्य स्तवनमकार्षम्। कालीक्षेत्रे कालीघट्टे श्रीकालीमातुर्मन्दिरं परमरम्यं सिद्धिकरं वङ्गशिरोरत्नभूतमिति न विस्मर्तव्यम्। तत उत्कलदेशालंकारभूतं श्रीजगन्नाथक्षेत्रमागत्य सविधि समुद्रे स्नात्वा कृतसन्ध्यादिक्रियेण विश्वकर्म-निर्मिते नानाशिल्पकलामण्डिते परमरम्ये प्रधानमन्दिरे विराजमानं सुभद्रासंकर्षणसमन्वितं श्रीजगन्नाथकृष्णं दृष्ट्वा प्रणम्य च यादृश्यानन्दततिर्मयानुभूता सा तु मूकास्वादनवत् वागविषया। ततो विश्रामशाला-मागत्य महाप्रसादं लब्ध्वा मार्कण्डेयह्रद-इन्द्रद्युम्न-सरो-जनकपुराक्षयबटप्रभृतिस्थानानि दृष्ट्वाऽऽद्य-शंकराचार्यगोवर्द्धनपीठं चावलोक्य श्रद्धास्पदं पूर्णविरि-चितं तत्रत्यं शंकराचार्यं श्रीभारतीकृष्णतीर्थं चान्यत्र-गमनादिनाऽनवलोक्य तदीयप्रधानशिष्येण देववा-च्येव संवादं विधाय समुद्रतीर्थश्रियं पश्यन् दिनत्रयं जगदीशपुर्यामुषित्वा प्रस्थाय च श्रीसाक्षिगोपालतीर्थं भुवनेश्वरतीर्थं चागत्य बिन्दुसरसि स्नात्वा हरिहर-स्वरूपं महोन्नते मन्दिरे विराजमानं श्रीभुवनेश्वरं दृष्ट्वा संम्पूज्य च परममोदिषम्।

ततो मार्गे कटकसंनिधौ वारांगस्थाने श्रेष्ठि श्री-देवकरण झूंझनूं वालामहोदयप्रेमवशात् तेनाभिन-न्दितो व्याप्तविशालभूभागं काचनिर्माण-कार्यालयं परितो दृष्ट्वा लक्ष्मणदुर्गीयवैश्यव्यवसायकौशलं प्रशंसन् ज्येष्ठशुक्लद्वितीयायां श्रीकालीक्षेत्रं पुनरा-गत्य पूर्वोक्तस्थान एव सानन्दं न्यवात्सम्। अत्र कलि-कत्तास्थितानि दृष्टानि बहूनि दिव्यस्थानानि, यथा-संभवं वैदिकसनातनधर्मप्रचारोऽपि विहितः। अत्र निवसतो मे पं० विश्वम्भरलालपूजकेन या सप्रेमसेवा विहिता सा तु नैव विस्मर्तव्या।

ततो मदात्मजेन चि० श्रीरामेश्वरप्रसादशास्त्रि-साहित्याचार्येण करिष्यमाणे ज्येष्ठशुक्ल १५ पूर्णि-मायां श्रीसत्यनारायणव्रतोद्यापने मामकीमुपस्थिति-मावश्यकीं ज्ञात्वा श्रीश्रेष्ठिवरशर्मनिवासादिभिः सश्रद्धं सत्कृतः सन् ज्येष्ठशुक्लत्रयोदश्यां श्रीकाली-क्षेत्रात् प्रस्थाय ज्येष्ठशुक्ल १५ पौर्णमास्यां प्रातरेव श्रीभगवत्यनुकम्पया निजावासं लक्ष्मणदुर्गं सानन्दं प्राप्तवान्।

अधुनाहं धर्मज्ञान् विशेषतश्च संस्कृतभारती-सेवकान् भूयोऽपि प्रार्थये यद् भवद्भिरपि देहगेह-वित्तादिकं क्षणिकं मत्वा सत्यवसरे मनःशुद्धयै तीर्थ-यात्रावश्यं विधेया। यतो देशाटनादिकौतुकं विशिष्ट-ज्ञानावाप्तिश्च-संभवेदिति शम्।

---

## गोमूत्रे गङ्गानिवासः

सनातनधर्मसंसारे प्रसिद्धमेतत् यद् 'गंगा वसति गोमूत्रे'। अत्र अर्वाञ्चो विप्रतिपद्यन्ते। तत्र रहस्यम् एतद्, यद् डॉ० हौकिन्सिनेन यदा गङ्गायाः परीक्षा कृता तदा तेन ज्ञातं यद् 'गङ्गोदकं विसूचिकाकीटाणून् विध्वं-सयति, उदररोगांश्च द्रवयति, स्वास्थ्यं च कन्दलयति, इत्यादि। गोमूत्रेऽपि त एव गुणाः निभाल्यन्ते। वैद्याः एतेन विविधव्याधीन्, उदररोगांश्च द्रवयन्ति। तदेतद् उपपद्यत एव यद् 'गोमूत्रे विद्यते गङ्गा'। तत एव विविधप्रायश्चित्तेषु पापदूरीकरणार्थं प्राञ्चो गोमूत्र-गोमयाद्युपयोगं चक्रुः।

## गोमये लक्ष्मीनिवासः

महाभारते दानधर्मपर्वणि लक्ष्मीं प्रति गवां वाक्यं प्रसिद्धं 'अवश्यं मानना कार्या तवास्माभिर्यशस्विनि'। शकृन्मूत्रे वस त्वं भो ! पुण्यमेतद्धि नः शुभे' तत्र लक्ष्मीरुवाच—

"दिष्ट्या प्रसादो युष्माभिः कृतो मेऽनुग्रहात्मकः। एवं भवतु भद्रं वः पूजिताऽस्मि सुखप्रदा" इति। सना-तनधर्मे इदं नाम वैशिष्ट्यं यत् तदीयेषु मन्तव्येषु यत्र अदृष्टफलकता तत्र दृष्टफलकताऽपि वर्तते। अदृष्ट-रूपेण तत्र लक्ष्म्यभिमानिनी देवता निवसति, दृष्टरूपेण तत्र लक्ष्मीरपि वसति।

—वैजयन्ती



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# न्यायार्जितस्य द्रव्यस्यापि महाफलम्

लेखक :—श्रीहजारीलालशर्मा शास्त्री, अध्यक्षः संस्कृतमहाविद्यालय, नवलगढ़

ब्रह्माण्डेऽस्मिन् सर्वो लोकः सुखमधिगन्तुमभिवाञ्छति। तदर्थं बहुप्रयत्नमप्यनुतिष्ठति। प्रयत्नेषु कश्चित्सत्योपबृंहितः कश्चिच्च असत्ययुक्तः। तत्र सर्वसुखसाधनं द्रव्यमेव मन्यते मानवः। यद्यपि स्त्री-पुत्र-भृत्य-महाधनित्वं पुरुषस्य वास्तविकं सुखं न, तस्याल्पकालस्थायित्वात्, तथापि मायामोहाऽज्ञानावृतो मानवो मृगमरीचिकायां जलमिव स्त्रीपुत्रधनादिषु सत्यं सुखं मन्वान इतस्ततो भ्रमन् अवास्तविकं सुखं वास्तविकं वेत्ति। तदर्थञ्च विविधपापकार्याणि संचिनोति। तत्र सर्वेषु धनसंग्रहो मुख्यः। "सर्वे गुणाः काञ्चनमाश्रयन्ति", 'सर्वं सुखं द्रव्यसमाश्रितं हि' इति स्मारं स्मारं अन्यायेन न्यायेन वा अधर्मेण धर्मेण वा प्रेम्णा द्वेषेण वा कथमपि धनार्जनमेव जीवनैकसुखलक्ष्यं मन्यते दिवानिशं स्वपन् जाग्रद् वा तिष्ठन् गच्छन् वा।

अन्यायार्जितस्य द्रव्यस्य फलं परिणामेऽनिष्टं भवति, इति न निभृतं कृतफलभोक्तृणां प्राणिनाम्। 'अन्यायोपार्जितं द्रव्यं दशवर्षाणि तिष्ठति' इत्यपि सडिण्डिमघोषं घोषयन्ति शास्त्राणि। अन्यायार्जितं धनं हि व्याधिपीडितेन चिकित्सकेभ्यो राजकीयाभियोगभोगिदष्टेन राजपुरुषेभ्यश्च दीयते। अन्यायधनिनः सहसैव क्वचित्कूपे पातः, कदाचिन्महारोगोद्भवः, क्वचिच्च चौरजनसम्पर्कः, क्वचिच्च लुण्ठकसंदोहसंघर्ष एवमादिभिः विविधप्रकारैरनर्थागमः सर्वदैव पुरःस्फुरन् प्रतिभाति। न्यायार्जनधनिनस्तु पूर्वोक्तं सर्वं विपरीतं जायते।

न च तस्य महारोगः न च व्यर्थव्ययावसरः समुपतिष्ठते। अत्यल्पमपि द्रव्यं तस्य महाकार्यसाधकम् अनन्ततृप्तिप्रदं शान्तिदायकं सौख्याधायकञ्च जायते। अत्र काचिद्गाथाऽधो निर्दिश्यते—येन पाठकमहाभागा न्यायार्जितस्यात्यल्पस्यापि द्रव्यस्य महाफलप्रदत्वं भोत्स्यन्ते।

उज्जयिनीनगरे हरिदत्ताभिधेयो द्विजवरः भगवतः परमभक्तः किन्तु दारिद्र्यदीनोऽवसत्। साध्वी पतिव्रता तत्पत्नी लीलावती हीनां दीनां स्वगेहदशां स्मरन्ती पतिमेकदा बद्धाञ्जलिरुवाच—स्वामिन्! गेहेऽन्नाभावं वस्त्राभावमनुभवन्तो बालाः पीडिता बुभुक्षिताः प्रत्यहं सीदन्ति। भवांश्चैषां दशामेतां विलोकयन्नपि न चिन्तयति भोजनकार्यव्यवस्थां विधातुम्। अधीतसर्वशास्त्रस्य भगवदाराधनपूतात्मनो भवतः किमलभ्यं भुवीति नाहं वेद। परमस्मिन्नौदास्यमेवास्माकीनदीनदशायाः कारणम् भावत्कम्।

साधुमत्याः सत्या भार्याया वच आकर्ण्य जातदयोभाविमहोदयो विप्रः सत्वरमेव वदान्यवरं कान्यकुब्जाधिपतिं सोमनाथं भूमिनाथमाप। आसनाभ्युत्थानादिसत्कृतो द्विजो राज्ञाऽऽगमनकारणं पृष्टोऽपि वृत्त्यर्थमागमनमिति ह्रिया वक्तुं न शशाक। प्रणतिप्रदः सोमनाथाह्वः पृथिवीपतिः पुनरपि साग्रहमागमनहेतुं पप्रच्छ। द्विजोत्तमस्तं महीनाथं सर्वसम्पत्सनाथं वदान्यं मन्वानः मनसि धनाशामाधाय प्रावोचत्—

'दीननाथ! महामहिमन्! राजन्! स्वाधीतं किमप्युपदेशरूपं श्रीमन्तं श्रावयितुकामः समुपास्थाम्। अनेहा ईहा चात्र भवेद्भवतस्तर्हि श्रावयामि।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चाप्यदण्डयन् ।
अयशो महदाप्नोति नरकं चाभिगच्छति ॥

इति मानवीं नीतिमनुवर्तमान उदारधिया न्यायेनाखिलराज्यं शासत्न्यायार्जितविभव आरानितभवः भगवद्भक्तः सत्कर्मसाधनसक्तो भूपवरोऽपि स्वभाग्योदयं मन्यमानः श्रीमद्भागवतकथां कथयितुमभ्यर्थनामकार्षीत्। तदर्थं घटिकात्रयं प्रत्यहं कथाश्रवणवेलां दातुं नतोऽभवत् । गेहदारिद्र्यदशाभुजगदष्टः 'स्पष्टमभिधातुमधुनानुचितम्' इति महान्तं कथासमाप्तिकालमसहमानोऽपि द्विजः राजोक्तिं स्वीकृत्य प्रत्यहं कथां कथयितुमारेभे। गेहस्वामिनीञ्च पत्रप्रेषणेनाबोधयत्स्वकीयकथाश्रवणादिवृत्तम् चिराय प्रत्यागमनञ्च। सापि राजसम्पर्कं पत्युरतिलाभप्रदं चिन्तयन्ती महान्तमपि कालं सानन्दं यथाकथं सबालात्यवाहयत्।

एकवर्षान्ते श्रीभागवतपारायणमगात्समाप्तिम्। प्रसन्नः स सकलबन्धुराजमन्त्रिभृत्यः समापितकृत्यः धरणिधवः कथामाधुर्यसन्तुष्टमना रूप्यकस्यैकपादिकां दक्षिणां पुस्तकेऽस्थापयत्। तद्भृत्यकलत्रामात्यादयोऽपि एकैकं ताम्रखण्डं भक्त्यार्पयामासुः। ब्राह्मणोऽपि विस्तृतवसुधाधिपस्य सर्वसम्पद्रत्नाकरस्य राज्ञः सविधे कस्य न्यूनता। परन्तु "कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम्" इतिभर्तृहरिवचः स्मरन् सन्तुष्टः तद्गृहीत्वा राज्ञाज्ञप्तः राजभवनान्निरगात् अचिन्तयच्च चित्ते। पूर्णो हायनो यापितः, किमपि न लब्धम्, पत्न्यै किं दास्यामि, कथञ्च तोषमुत्पादयिष्यामि सवत्सायास्तस्याः इति साम्रेडितं विचारयन् पण्यवीथिकापथमाप । व्यचारयच्च-लब्धद्रव्येणान्नवस्त्रक्रयणकार्यन्तु न सेत्स्यति, बालकेभ्यो दातुं कानिचित्फलान्येव क्रीणीयेति विचिन्त्य आणकचतुष्टयेन जम्बीरफलान्यक्रीणात्. स्वग्रामटिकापथमवलम्ब्य चचाल च। मार्गपरिश्रमश्रान्तो बुभुक्षितः पिपासितः घुणाक्षरन्यायेनापतितां कस्यचिद्राज्ञो विशालपुरीमाससाद। कस्यचिद्वटतरोस्तले छायायां विश्रामं लेभे।

तदैव विशालाधिपतेः स्वर्णसिंहस्य तनयो 'जिह्वाकृष्टि' महाव्याधिबाधित उच्चैः श्वसन् मृत्युमुखग्रासीभवितुमासन्नमृत्युरासीत् । तदर्थमौषधानुपानाय जम्बीररसान्वेषणाय आदिष्टा राजपुरुषास्तथा चिकित्सका इतस्तत आहिण्डयमाना अपि क्वापि जम्बीरमेकं न प्राप्नुवन्तः । सडिण्डिमघोषमघोषयन्नरपतिः 'यद् यदि कश्चिज्जम्बीरमेकं यथाकथं केनापि यत्नेनानीय दास्यति तस्मै लक्षमेकं दास्ये द्रव्यस्य' इति नरपतेर्घोषणामाकर्ण्य नृपभृत्या अन्ये नागरिकाश्च सर्वतोऽगच्छन् । वटवृक्षशीतलच्छायायां शयानं ब्राह्मणमेको राजपुरुषोऽप्राक्षीत्—'को भवान्? कुत आयातः, किमिदं पोटलिकायामिति,' पृष्टो द्विजोऽवोचत्—'भूसुरोऽहम्, कान्यकुब्जतः समागमम्। पोटलिकायाञ्च जम्बीरफलानि।' श्रुत्वैव राजपुरुषः मृत आगतप्राण इव प्रसन्नः साग्रहं सानुनयं ससत्कारञ्च भूसुरवरं प्रासादमभिनिन्ये। जम्बीरफलमस्यान्तिकेऽस्तीति राज्ञेऽजिज्ञपत्। महामहिमवान् महीपतिरपि स्वभाग्योदयं मन्यमानो विप्रवराज्जम्बीरफलमादाय चिकित्सकानुमतस्तनयमौषधमपाययत् । राजकुमारोऽपि ग्रहमुक्त इवाशु स्वस्थतां लेभे। प्रसन्नो महीपवरो द्विजोत्तमाय महतीं धनराशिं प्रादात्, स्यन्दनाधिरूढं विधाय मानपुरस्सरं तदीयदेशञ्च प्राहिणोत्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# आधुनिकस्य मानवस्य कर्तव्यम्

## [ पूर्वतोऽनुवृत्तम् ]

लेखक :—मनसुखरायमोरः, नवलगढ़

एवम् अस्मिन् संसारे कोऽपि प्राणी अनुपयोगी नास्ति। तेषां हननस्य विचारोऽपि ज्ञानिनः कृते नास्ति समीचीनः। एष तु अज्ञानपूर्णः, इष्टरहितः ध्येयविमुखश्च वर्तते। आम्, स्वयं प्रकृत्यैव केचन ईदृशा नियमाः निर्मिताः येन वृद्धिङ्गतप्राणिनां संख्या स्वयमेव ह्रसते। यथा बृहन्मत्स्यानां लघुमत्स्याः जलजन्तवः आहारः तथा हिंसकपशूनाम् अन्ये पशवः। अतः मानवस्यास्ति इदं कर्तव्यम् यत् स प्राणिमात्राय निजोत्कर्षस्य अवसरं प्रदाय आत्मनः (मानवस्य) सर्वाङ्गीणाम् उन्नतिं कुर्यात्। तदर्थमेव तेन जागरूकेण भूत्वा यतनीयम्। मानवस्य प्रादुर्भावः सृष्टेः संरक्षणार्थं शक्तेः वृद्ध्यर्थं च समभूत्। प्राणिमात्रमस्ति ईश्वरस्यात्मा। यदि वयं कस्यापि प्राणिन हिंसाम् अथवा तस्य शक्तेः विनाशं कुर्मः तर्हि एषोऽस्ति स्वशक्तेरेव ह्रासः, यस्याः शक्तेः पूर्णतः तेनैव ईश्वरेण संम्बन्धः। यदि वयं संक्षेपेण कथयामः तर्हि प्राणिमात्रमेव तस्य विराट्-पुरुषस्य जगदीश्वरस्य सन्ति अविच्छिन्नानि अङ्गानि।

'ममैवांशो जीव-लोके जीवभूतः सनातनः।' इति प्राणिमात्रं तस्य जगदाधारस्य अंशः वर्तते। परमेश्वरमयोऽयं संसारः, प्रभुरत्र सर्वत्र व्याप्तोऽस्ति यथा—

'मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जयः'

अतः अस्मिन् संसारे मानवस्य ज्ञानपूर्वकं सम्पूर्ण पदार्थानाम् उपयोग एव श्रेयस्करः। यतो हि सात्विक वृत्त्या स्वजीवनं यापयन् स स्वात्मानं तस्मिन् परम तत्त्वे विलीनं कृत्वा निजचरमलक्ष्यं प्राप्तुम् अर्हति

मानवजीवने उच्चलक्ष्यप्राप्त्यर्थं ज्ञान–कर्म-उपासना इति त्रीणि साधनानि सन्ति। मानवः कर्मकाण्डद्वारा बाह्यान्तरयोः शुद्धिं कृत्वा शनैः शनैः स्वस्य उच्चस्तरे प्रगतिं कुर्वाणो ज्ञानद्वारा आत्मसाक्षात्कारं कृत्वा ब्राह्मीं तनुं प्राप्नोति। शब्दान्तरैः इदमपि कथयितुं शक्यते यत् अज्ञानस्य मार्गः स्थूल-प्रवृत्तियुतो भवति तेन च मानवस्य स्थूलगतिर्भवति।

---

अवनिसुरोऽपि कान्यकुब्जाधिपं नरपतिं बहुकृते अल्पप्रदं मन्यमानः, विशालाधिराजं महाराजं स्वर्णसिंहञ्च वदान्यवरं महोदारं अत्यल्पकृते बहुप्रदातारं प्रशंसन् स्वग्राममाजगाम। प्रियायै भार्यायै राजद्वयप्रदत्तं सर्वमशंसत्। साधुचरिता विप्रपत्नी लीलावत्यपि सोमनाथे महीपतौ भ्रान्तधारणां स्वप्राणनाथमभिदधे—स्वामिन्! श्रीसोमनाथनृपतिप्रदत्तरूप्यकपादिकामहाप्रभावेण जम्बीरमिषेण महाधनराशिमधिगतवान् भवान्। तदेव न्यायार्जितं द्रव्यं रूप्यकैकपादभागरूपम् अनन्तफलप्रदमभवदिति। ब्राह्मणोऽपि तदनुध्यायन् सत्यं मेने। न्यायार्जितात्यल्पधनस्यापि महाफलप्रदत्वं भूरिभूरि प्रशंसन् सुतकलत्रादिसहितः सर्वहितः चिरं भोगान् अभुनक्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# "संस्कृतं राष्ट्रभाषा भवितुमर्हति न वा"

श्रीमांगीलालमिश्रः, संस्कृतमहाविद्यालयः, नेछवा, (सीकर)

स्वतंत्रेऽस्मिन् बृहत्तरे भारते वर्षेऽन्यासां समस्यानामिव देशे एकताविधायिन्याः भाषाया अपि समस्या स्वतन्त्राणां भारतवासिनां समक्षे साम्प्रतमपि जटिलत्वेनैव वर्तते। यद्यपि सर्वकारेण वैधानिकरूपेणाप्युद्घोषितमिदम् "यद् भारतस्य राष्ट्रभाषा हिन्दी"। परं केचनेदृशा अपि प्रदेशाः सन्ति ये नाङ्गीकुर्वन्ति राष्ट्रभाषात्वेन हिन्दीम्। किन्तु संस्कृतस्य राष्ट्रभाषात्वे ते प्रसन्नाननाः। भारते बह्वयो भाषाः सन्ति, "तासु राष्ट्रभाषायै का योग्या" इतिविचार्यते साम्प्रतम्।

विहाय हिन्दीं संस्कृतं च न विद्यन्तेऽन्या भाषा या भारतस्य राष्ट्रभाषात्वप्राप्तये भवेयुः योग्याः। तासा-

---

ज्ञानस्य च मार्गः अहिंसात्मकः सात्विकः शान्तिपूर्णश्च भवति येन प्राणिनः सूक्ष्मगतिं प्राप्नुवन्ति।

ये जनाः हिंसाम् आश्रित्य अज्ञानद्वारा विषयोपभोगकरणार्थम् अतिकठिनां तपश्चर्यां कृत्वा निजं शरीरशोषणं कुर्वाणाः चिन्तायुक्ताः भवन्ति ते स्वार्थमूलिकायाः प्रवृत्तेः उपासकाः सन्ति। ते च मृत्योः अनन्तरं धूमिलेन दक्षिणमार्गेण रात्रिपक्षे दक्षिणायने च गच्छन्ति। किन्तु यदा तेषां कर्मणः क्षयो भवति तदा ते पुनः इमं लोकं औषधरूपे अन्नमयस्वरूपे च वृष्टयनन्तरं उत्पद्यन्ते।

'धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते।'

एषः अज्ञानमूलको हिंसामूलकश्च गन्तव्यमार्गो वर्तते। दक्षिणार्चिर्मार्गः पुनरावर्तनं च अस्यास्ति सहजफलम्। अधुना अतीव प्रोज्वलः शुक्लमार्गः विलोकनीयः। ये मानवा अज्ञानं परित्यज्य ईश्वरार्पण बुद्धया वेदोक्तमार्गस्यानुसरणं कुर्वन्ति ते उत्तरोत्तरं परमसत्यस्य साक्षात्कारं कृत्वा परमप्राप्तिं लभन्ते।

'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते'

ईदृशः मनुष्या अर्चीरूपे प्रतिदिनं प्रतिपक्षं उद्गमनं कुर्वन्तः देवलोकम्, आदित्यलोकं वैद्युतलोकं मानसलोकं तथा च अनेनैव शरीरेण ब्रह्मलोकं प्राप्नुवन्ति। ये च प्राप्य पुनः गमनागमनस्य चक्रे न पतन्ति।

'शुल्ककृष्णे गती ह्येते जगतः शाश्वते मते।
एकया यात्यनावृत्तिमन्यया वर्तते पुनः।'

अत्र अहिंसया ज्ञानेन च प्राणिहिते संलग्नस्य ज्ञानिजनस्य सूक्ष्मगत्या उत्तरोत्तरं उच्चात्युच्चभूमौ गमनेन सः अन्ततोगत्वा भगवत्प्राप्तिरूपं ब्रह्मलोकं प्राप्नोति। ये मानवाः अज्ञानजन्यं हिंसामार्गं अनुसरन्ति तेषां स्थूलगतिरेव भवति। तेन तेषां गमनागमनस्य चक्रं न समाप्यते। यश्च हिंसामार्गः तेषां लक्ष्यप्राप्त्यर्थम् अतीव विघ्नस्वरूपो वर्तते।

अतः प्राणिमात्रस्य येन केनापि रूपेण हिंसाद्वारा शक्तिः क्षीणा न स्यात् अयमेवास्ति चरमोन्नतेः सफलोपायः, इदमेव प्राप्य वयं स्वजीवनं सफलीकर्तुं शक्नुमः।

'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते'

(समाप्त)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मपूर्णत्वात्। साम्प्रतम् हिन्दूयाः विरोध उत्कटरूपेण वर्तते, अतः परं संस्कृतमेव। भारतसदृशस्य कस्यापि बृहत्तरदेशस्य यस्मिन् विविधभाषाभाषिणो निवसन्ति जनाः, सैव भाषा राष्ट्रभाषायोग्या, यस्याः साहित्यं विशालतरं व्यापकं च स्यात् पुनश्च या शुद्धा भिरामा महत्ववती च स्यात्, स्याच्च यस्या देशे पक्षपातः। साहित्यमेव भाषायाः गुणदोषपरिचायकम्। उपर्युक्ताः गुणाः संस्कृतं विहाय न विद्यन्तेऽन्यासु भाषासु। शुद्धत्वं तु संस्कृतस्य नाम्नैव ज्ञायते यत् सम्यक् रूपेण कृतं विहितं संस्कृतम्। सम्यक् कृते कार्ये दोषाऽभाव एव दृश्यते। अभिरामत्वं त्वस्याः वर्णनयोग्यं नापितु अनुभवनीयमेव। सकृदेव कृतेऽस्या रसास्वादे न त्यक्तुं वाञ्छति मनस्तत् साहित्यम्।

अस्याः काव्यानां कोमला कान्ता पदावली सहृदयहृदयेषु अमन्दानन्दोत्पादिनी। महत्वदृष्ट्याऽवलोक्यते चेदियं तर्ह्यस्याः महत्वं द्विगुणीभूतं दृश्यते। प्राचीना भारतीया सामाजिकी आर्थिकी राजनीतिसम्बन्धिनी सकला व्यवस्थाऽस्या एव भाषायाः साहित्ये प्राप्यते। विनेमां न ज्ञायतेऽस्माभिर्यत् कीदृशा अस्मत्पूर्वजा रति, कीदृशं पुरातनस्य भारतस्य स्वरूपमिति च। प्राचीनस्य भारतस्य प्राणरूपेयं भाषा। विश्वस्य सकलासु भाषासु प्राचीनतरं साहित्यमस्याः। संस्कृतं तत्प्रसूतिस्थानं, यतः विश्वस्य सकलाः भाषाः प्रादुर्भूताः।

अधुना भारतीयसमाजे पाश्चात्यानामनुकरणेन योच्छृङ्खलता संप्राप्ता साऽस्या उपेक्षणादेव। सांप्रतं भारतीयाः केचनेत्थं कथयन्ति यत् संस्कृतभाषा 'मृतभाषा'। ते न विचारयन्ति मूढाः यत् यां वयं मृतेति कथयामः तस्या उपेक्षणादेव वयं मृतप्रायाः संजाताः सांप्रतम्। पुनश्च या देववाणी सा कथं मृता देवानाममरत्वात्। सत्यमेव गदितं केनापि कविना—

"न वेत्ति यो यस्य गुणप्रकर्षं स तं सदा निन्दति नात्र चित्रम्।
यथा किराती करिकुंभजातां मुक्तां परित्यज्य बिभर्त्ति गुंजाम्"॥

कस्मिंश्चित् समयेऽन्यबहुभाषाविज्ञोऽपि यदि संस्कृतविहीन आसीत् तदा तस्य गणना मूर्खेष्वेव भवतीति निम्नाङ्कितोक्त्या ज्ञायते यथा—

अङ्गीकृताः कोटिमिताश्च भाषाः नाङ्गीकृता देवगिरा च येन।
न शोभते तस्य मुखारविन्दं सिन्दूरबिन्दुर्विधवाललाटे॥

कश्चिच्छृगालः यदा मृत्युना प्रेरितो भवति तर्हि स कुक्कुरयुतं ग्रामामिमुखं गन्तुमिच्छुको भवति सा शृगालदशैव सांप्रतं संस्कृतविहीनस्य भारतस्य संजाता। संस्कृतविद्यार्थिनोऽधुनापि गुरुजनं तथैव मन्यन्ते यथापूर्वम्। अन्यभाषाविद्यार्थिनः तादृशा न। संस्कृतच्छात्रेषु यन्नम्रताऽनुशासनादिगुणाः संप्राप्यन्ते तदस्या एव महत्ता। ये केचनास्य कथनस्यापवादरूपाः, ते विरोधिवातावरणसेविनः।

संसारेऽस्मिन् सर्वप्राचीना अस्मद्भारतीयानामभिमानस्वरूपाः भगवन्तो वेदाः अस्यामेव गीर्वाणवाण्यां परमपूजनीयैः ऋषिचरणैरीश्वरस्येच्छया प्रकटीकृताः। अस्मद्विधानरूपं धर्मशास्त्रमपि मनुयाज्ञवल्क्यादिभिरादरणीयमुनिवरैः स्मृतिरूपेण संस्कृते एव संपादितम्। सृष्टितः आरभ्य प्रलयपर्यन्तस्य इतिवृत्तस्य प्रकटीकारकाः पुराणा अपि अस्यामेव सन्ति। संक्षेपे—"लौकिकाभ्युदयस्य पारलौकिकनिःश्रेयसः सिद्धिसाधकानि यावन्ति साधनानि कर्मकाण्डशास्त्रपुराणप्रभृतीनि विद्यन्ते तेषां ज्ञानकार-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यित्री एषा भाषैव। अतएव आस्माकीना संस्कृतभाषा सर्वादरणीया माननीया च।

सांस्कृतिकदृष्ट्या प्रभूततरमस्याः महत्त्वम्। भारतीयाः स्वकीयं धर्मं सभ्यतां संस्कृतिं चान्येषु देशेषु व्याप्तकरणाय यत्नशीलाः सन्ति स्म इति ज्ञायते इतिवृत्ततः। भारतीयैरुपनिवेशरूपेणाधिकृताः यावा, सुमात्रा, इन्डोचीनादिदेशाः साम्प्रतमपि प्रकटयन्ति यत् "कस्मिंश्चित्समये संस्कृतभाषा तत्र राष्ट्रभाषासीदिति।" कंबोजे मनोः धार्मिकव्यवस्थानुसारं तत्रत्यः राज्यप्रन्ध आसीत्। अत्रत्याः भाषाः संस्कृतादेव प्रादुर्भूता इति साम्प्रतमपि तासु भाषासु स्थिताः विकृताः संस्कृतशब्दाः सूचयन्ति। तेषु प्रदेशेषु अशोकराज्यकाले बौद्धधर्मप्रभावो बभूव। यावादेशस्य कविभाषायां रामायणस्य महाभारतस्य च वार्ताशाः सन्ति। भारत इव तत्रापि "रामलीला अर्जुनलीलादिनाटकानि नाट्यन्ते। वैदिकाः मन्त्राः सन्ध्यावन्दनादयोऽधुनापि तत्र विकृतरूपेण प्रयोगे व्यवह्रियन्ते हिडिम्बावधादिनाटकानि तत्र प्रधानरूपेण चित्तविनोदकारकाणि।

पुनश्च कलादृष्ट्यापि महत्त्वमस्याः तथैव। भारतीयं संगीतं संसारेऽन्यसंगीतेषु प्रधानतमम्। आदिकाव्यं रामायणमादिकविवाल्मीकिनाऽस्यामेव संपादितम्। यस्यां भाषायां कालिदाससदृशाः कवयः समुत्पन्नाः, यस्योपमाऽङ्लैः स्वकीयेन श्रेष्ठतरेण कविना शेक्सपीयरेण दीयते, भवभूतिसदृशाश्च नाटककाराः प्रादुर्भूताः, बाणभट्टसदृशाः गद्यलेखकाः यस्य विषये 'गद्यं कवीनां निकषं वदन्ति" इत्युक्तिर्वस्तुतः चरितार्था भवति, जयदेवसमानाः गीतिकाव्यरचयितारः, श्रीहर्षसदृशाः दार्शनिकाः, माघसदृशाः महाकाव्यकारकाः येन कृते महाकाव्ये माघे "नवसर्गगते माघे नवशब्दो न विद्यते"। दण्डिसदृशाः कवयः, यस्य विषये प्रकटीभूय वागित्थं जगाद, यत्—"कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः', तस्याः भाषाया माहात्म्यवर्णनं सूर्यसम्मुखे दीपकदर्शनमिव।

आस्माकीना संस्कृतभाषा सर्वाङ्गसुन्दरी, यस्याः रूपमवलोक्य दर्पोन्नताः विदेशीया अपि मुग्धाः संजाताः। "क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः" इव स्वरूपमस्याः। किन्तु हन्त! साम्प्र सोपेक्षिता। आधुनिकाः भारतीयाः कृत्रिमं सौन्द मेवावलोकयन्ति, विमुखाः संजाताः स्वकीयात् संस्कृतेः संस्कृताच्च। किमागमिष्यति कालो हि यस्मिन्नासीत् भारतो जगद्गुरुः?

कस्या अपि भाषाया उन्नतिरवनतिश्च प्रा सर्वेकारमवलम्बते। यस्मिन् काले आर्याणां प्रभुत्व मासीत् तदा सर्वसाधारणैः व्यवहृतासीत् संस्कृतभा पुनश्च दैववशात् यदा तेषां प्रभुत्वं नष्टप्रायं संजा संजातं च भारते विदेशीयम्लेच्छानां प्रभुत्वं तदा भारतेन सहैव तस्य गौरवरूपायाः संस्कृतभाषा अपि गौरवं नष्टप्रायं कृतम्। साम्प्रतं संजातेऽ भारते भारतीयाणामधिपत्ये-भारतीय संस्कृतेः संस्कृ भाषायाश्च गौरवं न तथा संजातम्, यथा भवि मर्हति। भारतीयाः साम्प्रतं स्वकीयत्वं विस्मृता विश्वोऽधुनापि; भारतमुखमवलोकयति। कि भारतीयाः स्वकीयं पुरातनंगौरवमननुभवन्तः कुं कर्णनिद्रया सुप्ताः दृश्यन्ते। ये केचन जागरूकास्ते द्वैविध्ये भ्रान्ताः सन्ति।

जाग्रत भोः भोः ऋषिपुत्राः! अवलोकयन्तु ऋषी संपत्तेः हीनां दशाम्। उद्योगमीदृग्विधं कुरुत, देववाणी स्वकीयं गौरवं पुनः प्राप्नुयात् भूयाच्च राष्ट्र भारतस्य भाषा। हताशाः मा भवत, नैपोलियनश "संसारे असंभवं किमपि न। ईश्वरो ममाशां पूर यतः —

"विलासमेतु संस्कृतं समस्तदिव्यभूतले।"

———



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

# दीपावली

## श्रीमहालक्ष्मीः

कवित्त ( घनाक्षरी )

यस्याः करुणालवेन जगति जघन्यो जनो लोके धन्यधन्यो भाति, परितः परीक्षताम्
किं बहुना, दैत्यदलनाय देवनायकोऽपि यत्कृपां प्रतीच्छतीति सपदि समीक्ष्यताम् ॥
सर्वविधसौख्य — सर्वसंपत्समवापनाय, सपदि समीपागता दीपाली प्रतीक्ष्यताम्
[1]क्लेशनिकुरम्बादिह संबाधेत किं वा भयं, लक्ष्मीर्जगदम्बा [2]कृपाऽऽलम्बात्क्षणमीक्षताम् ॥१॥

## दीपावल्याः सायंकाले जयपुरशोभा

हर्म्यमौलि-मन्दिर-गवाक्ष-गेह-गोपुरेषु, देवशिखरेषु दीपपद्धतिरुदीक्ष्यताम्
आपणेषु दर्शितनिवेशनैपुणेषु भृशं, पित्तलादिपात्रभूरिवैभवं परीक्ष्यताम् ॥
मञ्जुनाथ [3]सिंहदुर्गदीपद्युतिरेषा किमु दृश्यते सुरेशादिकनगरे ? समीक्ष्यताम् ।
[4]राजमार्गपालीभासिविद्युद्दीप्रदीपालीयं, जयपुरनगर-दुर्ग-दीपाली निरीक्ष्यताम् ॥२॥

---

१—क्लेशसमूहकारणात् भयं किमिति पीडयेदित्याशयः । २—कृपामाश्रित्य क्षणार्थं श्रीमहालक्ष्मीं पश्यतु इत्याशयः । ३—नाहरगढ़स्था दीपपङ्क्तिः । ४—राजमार्गपङ्क्त्याम् भामिनी विद्युद्दीपानां पंक्तिर्यस्यां सा ।

Digitized by Arya Samaj Foundation Chennai and eGangotri



# बाणस्यावर्णनीयं गद्यनिर्माणनैपुण्यम्

लेखक :—श्रीचन्द्रशेखरताम्बे, नागपुरम्

कः खलु संस्कृतसाहित्यज्ञः कविताकाननकेसरिणः, कविताकामिनीकामस्य, वाग्देव्याः पुरुषावतारस्य, संस्कृतसाहित्यसागरसमुज्ज्वलद्रत्नस्य, सकलकविप्राग्रहरस्य श्रीमतो 'बाणस्य' नाम न जानाति ? सर्वोत्कृष्टगद्यनिर्मातृत्वेनासौ मनीषिभिः 'कविकेसरी'-ति निगद्यते। बाणा इव यस्य वाक्यरचनाः पाठकानां हृदयं भिन्दन्ति, यद्गद्याभावात्संस्कृतकविता विधवेव वनिता न विद्योतते, यस्मिंश्च सति गीर्वाणगिरो वाङ्मयस्यात्युत्तमो भागो निर्गच्छति तस्य हि बाणस्य विषये प्रत्येकं साहित्यविदुषा विज्ञातमेव स्यात्। तथापि तद्गद्यमधिकृत्य किञ्चिद्वर्णयामि :—

सर्वोत्कृष्टगद्यकारत्वेन प्रख्यातिं प्राप्तवतोऽस्य जीवनकालादिनिर्धारणे तादृशी भ्रान्तिर्न यादृशी दृश्यते भासकालिदासादिकविजनानां विषये। सम्राजः श्रीहर्षस्य समकालिकत्वेनास्य जीवनकालः सर्वैरेवेतिहासकृद्भिः सप्तमशताब्द्यां पूर्वार्धे ( ईसातः ७०० वर्षानन्तरम् ) मन्यते। सम्राजा हर्षेणात्मनः समीपमागतो बाणः प्रथममवज्ञापात्रतामनीयत, पश्चात्तं बहुभिर्गुणैर्युक्तमवलोक्यानुगृहीतः। बाणो हर्षस्य राजसभायां दीर्घकालपर्यन्तं सुप्रतिष्ठितः कविरभूत्। सम्राजो महत्याः प्रीतेर्भाजनमभूत्सः। तत्र च सुखेन कालं गमयामास।

हर्षाश्रये निवसतानेन 'हर्षचरित' नाम्नी व्यरच्यतैकाख्यायिका। किन्तु तामसमाप्यैव पञ्चत्वमाजगाम। 'कादम्बरी' नाम कथापि प्रणीयतानेन। किन्तु साप्यपूर्णा तत्पुत्रेण पूर्णमनुष्ठिता। एतद्गद्यकाव्यद्वयमेव तस्यातिमहत्याः कीर्त्तेः कारणं वर्त्तते। अनयोर्ग्रन्थयोर्गीर्वाणवाणीवाङ्मये भूयिष्ठं वर्तते महत्त्वम्। अनयोर्बाणस्याद्भुतं गद्यविरचनचातुर्यं दृष्टिगोचरतामुपयाति।

बाणः सामान्यमपि वस्तु कल्पनायाः साहाय्येन तथा प्रकटीकरोति यथा तत्पाठकचित्ताहरणेऽतीव सफलं भवति। कस्यापि वस्तुनो वर्णनार्थं बहूनि द्वित्राणि पञ्चषाणि वा पृष्ठानि ग्रन्थस्यावश्यं व्ययीकृतवान्। कथाविस्तारे तथा कौशलं न दृश्यते यथा कल्पनासाहाय्येन वस्तुवर्णने। श्लेषैर्वक्रोक्तिभिः समासैर्विलम्बवाक्यैश्चायं गद्ये नैपुण्यं प्रदर्शयामास। अनेन प्रयोज्यमाना शैली 'पाञ्चाली'तिनाम्ना प्रसिद्धा यस्यां शब्दार्थयोः समो गुम्फो वर्त्तते।

बाणः प्रसिद्धः शिवोपासको बभूव यतो ग्रन्थारम्भे तमेव स्तौति स्म। परं नासीत्सोऽन्यधर्मविरोधी। यद्यसौ विधर्मिणां शत्रुरभविष्यत्तर्हि 'हर्षचरिते' बौद्धसंन्यासिनो 'दिवाकरमित्रस्य' तस्याश्रमस्य च तादृशमुदारं वर्णनं नाकरिष्यत्।

अद्वितीयो हि संस्कृतसाहित्यसंसारे महाकविर्बाणो योऽतिविश्रुतपार्थिवस्य हर्षस्य समकालिको भूत्वा तस्य जीवनवृत्तान्तं गद्ये लिखितवान्। न कश्चिदपरः कविः प्राप्तवानेतादृशं योगम्। अस्य कवेः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

शिक्षावृत्तस्य नवीनं फलम्—पाश्चात्यानां शासनकाले भारतीयशिक्षायां यत्परिवर्तनमभूत्, तस्य संप्रति शनैःशनैरद्भुतं फल दृश्यते इति प्रत्यक्षमनुभू-

संस्कृतगद्योपरि महानधिकार आसीत्। लेखनी सन्ततमलिखदस्य। आश्रयदातुर्हर्षस्यानेन हर्षचरितमें महिमा वर्णितः। हर्षचरितस्य प्रथमेषु त्रिपूच्छ्वासेषु चात्मनोऽपि जीवनवृत्तान्तं लिलेख। 'ओजः समासभूयस्त्वमेतद्गद्यस्य जीवितम्' एतदनुसारतो बाणस्य लेखनी क्वापि विषये शैथिल्यं न बभार। अत्र लेखे हर्षचरितादेव वाक्यद्वयं पाठकानां नयनयोरग्रतः स्थापयामि—(अस्तं गच्छतः सूर्यस्योद्यमानस्य चन्द्रस्य च वर्णनं) "स च प्रत्यग्रत्वष्टृटङ्कतष्टतनुरिव वहद्वहलरुधिररसमांसच्छविरपरपारावारपयसि ममज्ज मञ्जिष्ठारुणोऽरुणसारथिः। प्रकटकलङ्कमुदयमानं विशङ्कटविषाणोत्कीर्णपङ्कसंकर-शङ्करशकुरशक्करककुदकूटसंकाशमकाशताकाशे शशाङ्कमण्डलम्"।

अस्मिन्नेव वाक्यद्वये कविरयं प्रकटयामास समस्तं कौशलम्। इह हि गद्यस्य जीवितम्—ओजः समासभूयस्त्वं च दृश्यते, अनुप्रासोत्प्रेक्षाश्लेषालङ्काराणां समवायोऽवलोक्यते। उत्कृष्टकल्पनायाः स्वरूपञ्चापि निरीक्ष्यते। सर्वे शब्दा नृत्यन्त इव नेत्रयोः पुरस्तात्समागच्छन्ति। सम्यगेव निगदितं कैश्चित्सूरिभिः—"बाणोच्छिष्टं जगत्सर्वं, वाणी बाणो बभूव, पञ्चाणन्तु बाणः, बाणस्तु पञ्चाननः" इत्यादि। 'गद्यं कवीनां निकषं वदन्ति' इति लोकोक्तेरनुसारतो बाणस्य नामाङ्गुलिगणनीयेषु संस्कृतगद्यकारेषु प्रथममेवापतति।

इत्थं वर्णयित्वा बाणस्य गद्यविषये लेखोऽयमुपसंह्रियते मया।

यताम्। पश्चिमदेशीयैः प्रचारिता शिक्षा प्रारम्भादेव धार्मिकभावेभ्यः क्रोशान् दूरे प्रचरति स्म। अतएव तादृशशिक्षया उन्नतिं मता भारतस्य नेतारो भारतीयं शासनं धर्मभावाद्दूरंगतं, सर्वतः स्वतन्त्रं देशे प्रचारयन्ति। एवं परिस्थितौ हृदये उप्तस्य शिक्षाबीजस्य सकाशात् कीदृश्यः शाखाः प्रशाखाः निर्गच्छेयुरिति विचारशीलैः किञ्चिन्मर्मणि समीक्ष्यताम्।

संप्रति शिक्षायां द्वौ क्रमौ—एकतो राष्ट्रीयकार्यक्रमेषु डा० राधाकृष्णन् उपराष्ट्रपतिमहोदयः, मौलानाआज़ादप्रभृतयो विशिष्टपुरुषाः परस्परं विचारयन्ति यत् 'भारते शिक्षाया भविष्यत् कीदृशं भवेत्' अन्यतो लखनऊविद्यालयस्य द्वौ विद्यार्थिनौ 'छात्रसंघस्य संविधाने संशोधनार्थम् अस्माकमधिकारो भवेत्'—एतदर्थम् अनशनपूर्वकमसहयोगं (भूखहड़ताल) कुरुतः। आरक्षिपुरुषाः (पुलिस) निजनिरीक्षणे यदा तौ छात्रौ ग्रहीतुमिच्छतस्तदा अन्ये विद्यार्थिनोऽपि असहयोगं कुर्वन्तः, नानाविधान् आक्रोशशब्दान् ('नारे') घोषयन्तः, नगरे प्रदर्शनं कुर्वन्ति। नगरे विद्यार्थिनां सभासंयोजनार्थम् आसीद् राजकीयः प्रतिबन्धः। विद्यार्थिन इमे बलात् तमपि उल्लङ्घयन्ति।

रक्षापुरुषैर्निवारिता इमे तेष्वपि आक्रमणं कुर्वन्ति। अधिकारिणः क्षत-विक्षता भवन्ति। अतएव विवशास्ते गुलिकास्त्रप्रयोगं मुहुर्मुहुः कुर्वन्ति। शासका बहिर्निस्सरणप्रतिबन्धनियमम् (कर्फ्यू) प्रचारयन्ति। किमन्यत्, चतुर्दिनपर्यन्तमविरतं सोयं प्रतिबन्धो नगरे प्रचलति। एतेनापि न तुष्यन्तो विद्यार्थिनः नेतृणाम्, मुख्यमन्त्रिणः, शिक्षामन्त्रिणः, आचार्यनरेन्द्रदेवप्रभृतीनां च मूर्तीः परिकल्प्य तासां सवि-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



रस्कारं दाहं कुर्वन्ति । नवीनशिक्षाबीजस्य इमं प्राथमिकं परिणाम पश्यन् भारतस्य प्रधानमन्त्री श्रीमान् नेहरूमहोदयोऽपि बलादिदं वक्तुं बाध्यो भवति यत् "हन्त ! एवंविधमनुशासनं पश्यामि ! एतस्य परिवर्ते इदमेवोचितं निर्धारयिष्यामि यद् भारतस्य सर्वेऽपि विश्वविद्यालयाः युगपत प्रतिबद्धाः क्रियेरन्" अपि भवेत् वर्तमानशिक्षाधिकारिणां साम्प्रतमपि कर्तव्यविचारः ? किन्तु क्षेत्रे बीजं परिषिच्य केवलमाक्रोशेन किं परिसिध्येत् ?

अस्मिन् कलहे रक्षापुरुषाणां गुलिकास्त्रेण (रिवाल्वर) मैडिकलकालेजस्य उदीयमानश्छात्रः श्री जे० एल० गेंडरः भृशमाहतोऽभवत्। अतियत्ने कृतेऽपि एतस्य आतुरालये मृत्युरभूत्। एतस्य जीवनरक्षार्थम् अक्षिजनस्य(ऑक्सिजन) कृत्रिमः श्वासोऽपि प्रदत्तोऽभूत्। पञ्चभिश्छात्रैर्निजशरीरात् रक्तमपि प्रादीयत, किन्तु न कोऽपि लाभोभवत्। चिकित्सालये गेंडरस्य पुत्रविरहाऽऽकुला माता करुणं विलपन्ती यदा मृतसंतानस्य समीपाद् बहिरागच्छत् तदा संपूर्णस्याऽप्यातुरालयस्य दृश्यमतीव करुणाजनकमभूत्। संप्रति बन्दीकृतेषु बहवः पुरुषा अधिकारिभिर्विमुक्ताः कृताः ।

विश्वविश्रुतकीर्तीनां योगिराजश्रीमाधवानन्द स्वामिमहाभागानां "भारती" पत्राय

### शुभाशीर्वादः

जयपुरम् दि० २७-१०-५३

अवलोकितं मया भारतीपत्रम् । ततोऽप्येतत्प्रबन्धसम्पादकमालोक्य सुतरामाकृष्टः समभूवम् । सुयोग्यं परोपकारिणं च सम्पादकमेनमालोकयतो विदितमभूत यदेतत् पत्रमस्माकं देशे विशेषतः अग्रगण्यं भवेत्। मम आशीर्वादः सहानुभूतिश्च पत्रेणानेन सह सर्वदा सहचरे स्याताम् । धनिकानां विदुषां च कर्तव्यं यदनेन सह पूर्णं सहयोगं स्थापयेयुः । सम्प्रति देशोऽस्माकं स्वतन्त्रः सञ्जातः । अतएव प्रत्येकभारतीयेन तन्वा मनसा धनेन च साहाय्यमेतस्य सर्वथा सम्पादनीयम् इति हृदयतः कामये ।

**स्वामी माधवानन्दः**

## आर्याणां गोसंरक्षणम्

भारतवर्षे गोः संमानमनादिकालादेव प्रचलितम् । वेदेषु स्मृतिषु, पुराणेषु गोः पूज्यतासम्ब अनेके उल्लेखाः, अनेकान्युपाख्यानानि च प्रसिद्धानि आर्याणां प्रत्येककार्येषु गोरुपयोगः प्राप्यते । बहुना, वेदैः प्रोक्तेषु, स्मृतिभिरुपदिष्टेषु, पुरा प्रतिपादितेषु, प्रत्येककर्मसु पञ्चगव्यप्राशनं विना शुद्धिः सम्भवति। सुव रजतादीनामनेकविधा बहुमूल्यानि दानानि प्रोक्तानि । किन्तु सर्वे नानामपेक्षया गोदान महान् महिमा । गोदा मिदम्, आर्याणां शु अशुभेषु सर्वेष्वेव का प्रधानतया कर्तव्यम्। किल धर्मभावेन ग पूज्यता तु अनादिका देव आर्येषु प्रचलिते परं गोभिर्लौकिकलाभ भारते चिरात्प्रचलित गोघृतेन, दुग्धेन, द च मनुष्याणामनेके रो प्रशाम्यन्ति । मस्तिष्क साध्यानि कार्याणि कु न्तः प्राचीना ऋषय ग्रन्थलेखकाः विद्वांस अन्यदुग्धानामपेक्षया गो दुग्धमेव सेवन्ते स गोघृतेनैव च सर्वा कार्याणि संपादयामासुः ।

किमधिकम्, गोमयेन गोमूत्रेणापि च वैद्यानां ह न्यौषधानि संपद्यन्ते । गोमूत्रे बहुकालं भाविता ह तकी महौषधिरूपा । बहुना विस्तरेण किम्, गोमू णैव वैद्याना 'संजीवनी' निष्पद्यते, यया हि भारती



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## ❀ विनोद-वाटिका ❀

( देवर्षि-कलानाथ शास्त्री )

इंगलैंडदेशस्यैकः प्रसिद्धो लेखकः प्रातः भ्रमणार्थं निर्गतोऽभूत् । मध्येमार्गमेव एकस्य उच्चाधिकारिणः प्रासादः दृष्टः तेन । अधिकारी सोऽयमासी त्तस्य मित्रम् । अत एव स तेनैव वेषेण उच्चाधिकारिणस्तस्य प्रासादे प्राविशत् । होराद्वयं यावत् बहुविधं संलापं कृत्वा सोऽयं स्वगृहं परावर्त्तिष्ट । सहसैव तस्य पत्न्या पृष्टम्—"अयि भोः कुत्रासीद्भवान् एतावन्तं कालम् ?"

"एकस्योच्चाधिकारिणो गृहे संलापं कर्त्तुं गतोऽभुवम् !"

पत्नी—"उच्चाधिकारिणो गृहे ! अनेन वेषेण ? हन्त ! कण्ठवेष्टनं ( कालर ) कण्ठकौपीन ( टाई ) च विना उच्चाधिकारिणा सह संलापं कृत्वा सभ्यताया विरुद्धमाचरद्भवान् !!"

एतत् श्रुत्वा लेखकोऽपि विषण्णवदनः समजायत । वस्तुतः भावनामग्नेन तेनेदमपि न दृष्टमासीद्यत् भ्रमण-वेषेण, कण्ठकौपीनं विना कथमहं उच्चाधिकारिणा सह मिलिष्यामि" इति ।

भावनामग्नेनैवानेन एकं कण्ठवेष्टनम् एकं कण्ठकौपीन च उच्चाधिकारिणस्तस्य संकेते प्रषणया (By Post) प्रेषितम्-सहैव चैकस्मिन् पत्रे लिखितम् ।

"प्रियमहोदय !

अहमतीव दुःखमनुभवामि यदहं भवता स कण्ठवेष्टन कण्ठकौपीनं च विनैव होराद्वयं याव संलापं अकरवम् । अधुना द्वे अपि इमे प्रेषिते स्तः कृपया भवान् होराद्वयं यावत् इमे द्वे अपि सम्मु स्थापयतु ।" इति ।

---

संजीवन्ति । गोभिः प्रसूता वृषभा आर्याणां क्षेत्रेषु कृषिकार्यं संपादयन्ति, येन हि सर्वस्यापि भारतवर्षस्य जीवनरक्षा भवति । ततश्च गोवंशोयं भारतीयानाम-वलम्बनभूतः इति को वा न जानति । अतएव एतस्य संरक्षणं परिवर्द्धनं च प्रत्येकभारतीयस्य सर्वथा कर्त्तव्यम् । आर्याणां संस्कृतिरक्षापक्षपातिभिर्देशे गोसंरक्षणार्थं प्रचुरः प्रयत्नो विधेय इति साग्रहं प्रार्थयामहे ।

## किं भवन्तो जानन्ति ?

यत् अमेरिकायाः संयुक्तराष्ट्रेषु त्रिंशत्-सहस्रसंख्यका महिलाः पत्रकारकार्यं कुर्वन्ति, एकादशसहस्रसंख्यकाः डाक्तरकर्म, सप्तसहस्रसंख्याकाः एंजिनीयरकर्मम्, षट्सहस्रसंख्याकाश्च वाक्कील ( Pleader ) कर्म कुर्वन्ति । द्विकोटिपरिमिताः स्त्रियः व्यापारसंचे सन्ति, द्वादश च केवलं विधानमण्डलसदस्याः ।

यत् चित्रपटजगति सर्वप्रथमस्य सवाक्चित्रपटस्य नाम "आलम आरा" इत्यासीत् ।

यत् भारतं विश्वस्मिन् सर्वाभ्यधिकं शर्करायाः उत्पादनं करोति ।

यत् बैंगलोरे एका "धनलक्ष्मी" नाम्नी १७ वर्षीया किशोरी वर्तते या न खादति, न पिबति, न हदते, न च मूत्रयति—तथापि सा सुस्वस्थाऽस्ति ॥

## पुस्तकालोकः—

जैनशास्त्रमालाकार्यालयः, जैन-उपाश्रयः, लुधियानातः "जैनागम-न्यायसंग्रहः" इत्याख्यम् एकं मुद्रितं पुस्तकम् अस्मत्कार्यालये संप्राप्तम् । पुस्तकेऽस्मिन् जैनागमन्यायशास्त्रीयाः सिद्धान्ताः सरलया भाषया तथा वर्णिताः यथा जैनागमे प्रविविक्षवः छात्राः अनायासेन जानीयुः । लेखकोऽस्य जैनशास्त्रविशेषज्ञ आचार्यः श्रीमद्-आत्मारामहाभागः जैनजगति सुप्रसिद्धः । अस्मिन् लघुपुस्तके-अनुयोगद्वारसूत्र-नन्दीसूत्र-ठाणाङ्गसूत्र-भगवतीसूत्र-प्रज्ञापनसूत्रोत्तराध्ययनसूत्राणि सम्यगालोडितानि तथा आत्मवादेऽपि किञ्चित् परिचालिता लेखनी । पुस्तिकमिदं जैनदर्शनजिज्ञासूनां कृते सर्वथा संग्राह्यम् । मूल्यं केवलम् एकरूप्यकम् । प्राप्तिस्थानम्-उपरिनिर्दिष्टमेव ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## संस्कृत-समाचाराः—

### संस्कृतं राष्ट्रभाषा भवेत्—

एर्नाकुलम् २ नवम्बर—केन्द्रीय-सर्वकारस्य गृहमन्त्रिणे डा० कैलाशनाथकाटजूमहोदयाय केरल-संस्कृत-परिषदः प्रतिनिधयः शिक्षाक्रमे संस्कृतस्य अनिवार्यतायाः प्रस्तावमकुर्वन्। एतदनन्तरं माननीय गृहमन्त्रिणा निम्नलिखिता उद्गाराः प्रकटिताः—

'मदीये मते संस्कृतमेव भारतस्य राष्ट्रभाषा भवितुमुचिता। यद्यपि अहं पूर्णरूपेण संस्कृतं न जानामि तथापि इदं मम निश्चितं मतम्। केवलं कठिनता सेयमेवास्ति यत् संस्कृतस्य अध्ययनपद्धतेः कार्यान्वितीकरणे किञ्चित् असुविधा वर्तते।

### संस्कृतं राष्ट्रभाषा—

चिदम्बरनगरस्थिते अन्नामलैविश्वविद्यालये दीक्षान्तभाषणं प्रकुर्वता तदुपकुलपतिना सर सी०पी० रामस्वाम्यय्यरमहोदयेनोक्तम्—

अहं भवद्भ्यः केवलं गीतायाः सन्देशं दित्सामि सोऽयम्—भवन्तो यत्कार्यं कर्तुमिच्छेयुस्तस्मिन्नेव सर्वात्मशक्तेर्विनियोगं कुर्युः। गीताध्ययनं संस्कृताध्ययनसाध्यम्।

संस्कृतमेकस्मिन् समये विश्वं व्याप्नोति स्म। कालान्तरे भारतस्यैव भाषणभाषात्वेनातिष्ठत्। एतस्य व्याकरणमवश्यं कठिनं परं नायमस्यार्थो यत्तस्य लोके प्रचाराय व्याकरणं सरलं न कर्तुं शक्यते। 'संस्कृतं राष्ट्रभाषा भवेत्' इत्यत्राहं सहमतः। संघटनमावश्यकम्। एतस्मिन् कार्ये तमिलभाषाया अपि शब्दराशिः साहाय्यं कर्तुं शक्नोति, भाषान्तराणामपि। संस्कृते भाषान्तरशब्दानां प्रवेशः सारल्येन कर्तुं शक्यते। पुरापि संस्कृते विभिन्नभाषाणां शब्दाः समामिलन्, अद्यापि सम्मेल्यन्ते। नायं प्रवाहोऽवरोद्धुं शक्यते। तानि दिनानि भारतस्य शुभानि मंस्यन्ते येषु संस्कृतं राष्ट्रभाषोत राजभाषा भविष्यति। हिन्दीति नाम्नी न काचित् स्वतन्त्रा भाषा। सा संस्कृत-प्राकृतारबीफारसीणामेकः सङ्गमो यस्य विश्लेषणात् हिन्द्याः किमपि मूलं स्वरूपं न तिष्ठति इति।'

### संस्कृतराष्ट्रभाषासमितिः—

गतेषु दिनेषु बम्बय्यामेका समितिर्निर्मिता यस्या नाम 'संस्कृतराष्ट्रभाषासमिति'रिति। एतस्या अध्यक्षः श्रीमाधवाचार्यशास्त्रीयस्तत्रत्ये सिद्धार्थकालेजे प्राध्यापकः। मन्त्री च श्री एम० एल० चक्रदेवः। समितेः संविधानमपि निर्मितम्। इत्थं संस्कृतस्य राष्ट्रभाषात्वाय भारते प्रयत्नं युद्धमारब्धम्।

### संस्कृतप्रचारसमितिः—

मध्यप्रदेशस्य दुर्गनगरे डा० रामशरणत्रिपाठिनः संयोजकत्वेन संस्कृतप्रचारसमितेः स्थापनं तदङ्गभूत-संस्कृतपाठशालानिर्माणञ्च निर्णीतम्।

### संस्कृतमण्डलम्—

नागपुरस्य धनवटेमहाविद्यालयच्छात्रैः संस्कृतमण्डलं समस्थापि। एतस्मिन् भाषमाणेन मध्यप्रदेशीयशासनस्य भाषाविभागसञ्चालकेन डा० वासुदेवनारायणेनोक्तम् — 'विज्ञानसामर्थ्यसंवर्द्धनकार्यबद्धपरिकरा विविधराष्ट्रधुरीणाः सुखं शान्तिञ्च कामयन्ते परमध्यात्मज्ञानमन्तरा तयोर्लाभोऽसम्भवः। अध्यात्मज्ञानञ्च संस्कृताध्ययनमात्रसाध्यमतो विश्वशान्त्यै संस्कृतभाषाप्रचारः परमावश्यक' इति।

### संस्कृतभाषणम्

दुर्गापूजावसरे विदर्भप्रान्तस्य खामगांवनगरे संस्कृतेन भाषमाणः श्रीधरभास्कर वर्णेकर उक्तवान् 'भाषाधारेण प्रान्तानां रचनया विभिन्नभाषिषु भारतीयेषु पृथगात्मताऽवश्यम्भाविनी। एतस्या अपाकरणाय संस्कृतभाषाया व्यापकेन प्रचारेण भवितव्यमेव, यत इयमेव राष्ट्रैक्यविध्वंसकं हालाहलं शमयितुं शक्ता' इति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## देश-दर्शनम्

लखनऊकाण्डः—नवम्बरमासस्यारम्भात्पूर्वमेव ३१ अक्टूबरदिने लखनऊनगरे महान् कलकलः अभूत्। छात्रसंघभवनाद्य द्वा आरक्षिणः, द्वौ अनशन-कारिणौ छात्रौ स्वरक्षायां अनयन्, तदा तद्विरोधे छात्रैः प्रदर्शनं कुर्वद्भिः आरक्षिपुरुषाः आहताः कृताः। कति-यानि 'बस'यानानि दग्धानि, टेलीफूनताराश्च त्रोटिताः। 'मंकी ब्रिज' स्थाने यदा छात्रैः महान् आघातकाण्डः समुपस्थापितः तदा तेषामुपरि नलिकास्त्र-प्रहारः कार्योऽभवत्। छात्रेषु बालिका अप्यासन्। बहुत्र अश्रुवाष्पप्रयोगोऽपि कार्योऽभवत्। छात्रैः शिक्षाधिका-रिणां मूर्त्तयः शवयात्राप्रदर्शनपूर्वकं दग्धाः, प्रदेशकांग्रे-सस्य मन्त्री श्रीशास्त्रिमहोदयश्चापि सकोलाहलमावृतः। तेषां सहानुभूत्यर्थं प्रयागाद् विश्वविद्यालयविद्यार्थि-नोऽपि अनध्यायमकुर्वन्, प्रदर्शनानि च कृतवन्तः। कानपुरेऽपि हडतालः अभवत्। लखनऊनगरे पञ्चदि-नावधि "कर्फ्यू"आदेशः आसीत्।

श्रूयते यत् चत्वारो जनाः मृताः। ये ४३८ जनाः अभियोगे वन्दीकृताः आसन्, ते सर्वेऽपि नवम्बरमा-सस्य सप्ततारिकायां न्यायाधीशेन मोचिताः। केवलं [illegible]सक्रकर्मणामभियुक्ताः सन्ति बन्दिनः।

अधुना नागरिकाणां मध्यस्थतायाः कारणात् नगरे शान्तिरस्ति। अखिलानन्दः विद्याकुमारश्चेति द्वावप्य-नशनकारिणौ छात्रौ ५ तारिकायां ७ तारिकायां चानशनं [illegible]नाम्। वसयानानि यथावस्थितं प्रचलन्ति। [illegible] विषयोऽस्ति यत् ११ तारिकातः विश्वविद्यालये [illegible] यथावस्थितं अध्ययनम् प्रारब्धम्। नगरे शान्तिरस्ति।

चण्डीगढस्योद्घाटनम्—६ नवम्बरतारिकायां प्रधानमन्त्री नेहरूः पंजाबनगरस्य नवीनराजधान्याः चण्डीगढस्योद्घाटनमकरोत्। एतस्मात् पूर्वं ७ तारिकाया-[illegible] नवखण्डमितस्य सचिवालयभवनस्य शिलान्यास-[illegible]करोत्। नगरमिदं नवीनसरण्या निर्मीयते यत्र [illegible]नां, निर्धनानाम्, शिक्षितानामशिक्षितानाम्—अधिकारिणां प्रजाजनानां च सहस्रशः भवनानि सहैव निर्मितानि भविष्यन्ति। परन्तु कुत्रचित् भृत्यानां कृते लघुलघूनि प्रकोष्ठकानि पृथक् निर्मितानि तेषां हीनतां सूचयन्तीति निर्माणकुशलानां मतम्।

उद्घाटनभाषणं ददता प्रधानमन्त्रिणा कथितं यत् देशात् निर्धनताया निष्कासनम्—महामहतां रचना-त्मककार्याणां सम्पादनम्—साम्प्रदायिकसंकुचितविचा-राणां च बहिर्भावः अद्य अस्माकं कर्तव्यम्।

## विदेश-वार्ता

**विदेशेषु दीपावली**—भारते यथा दीपावलीमहो-त्सवो महता समारोहेण सम्मान्यते, तथैव विदेशेष्वपि सोयं प्रवासिभारतीयैः सस्नेहं समारोहितः।

भारतीयोच्चायुक्तेन (हाई कमीशनर) श्री बी० जी० खेरमहोदयेन समारोहस्यैकस्य आयोजनं कृतं यत्र सर्वैः राजदूतैः भागो गृहीतः। "इंडिया" हाउसे भारती-यनर्त्तकेन रामगोपालमहोदयेन नृत्यप्रदर्शनं कृतम्। रेखादेव्या अपि नृत्यमुद्राः प्रदर्शिताः। विश्वकवेः रवीन्द्रनाथस्य नाटकं "चित्रा"ख्य अभिनीतं, तदतीव हृदयग्राहि समभूत्। समग्रमपि भारतभवनं दीपैः सुसज्जितमासीत्। मिष्टवस्तुभोजनमपि सञ्जातम्।

एतदतिरिक्तम् ३१ पोलीगनरोडे हिन्दूएसोसियेश-नाख्यसंस्थायाः तत्त्वावधाने महोत्सवः समायोजितो-ऽभूत—यस्य निमन्त्रणं 'भारती' पत्रायापि प्रहितमा-सीत्। श्रीढाकोरेमहाशयो यो हि एसोसियेशनस्याध्यक्षः, भारती-पत्रस्य ग्राहकः अस्ति।

महोत्सवेऽस्मिन् अल्पाहारः वेदमन्त्रगानम्, व्याख्यानानि, भारतीयं संगीतं चेति' कार्यक्रमः आसीत्।

कोरियास्थितैः अस्माकं सैनिकैरपि महोत्सवो यथा-वस्थितं सम्भावितः। भारते एतेषां महोत्सवसंमानननाय धनराशिः एकत्रीकृतः आसीत्। अयम् प्रायः लक्षत्रया-धिकोऽभवत्। एतेन धनेन 'हिन्दनगर'स्थैः 'शान्तिन-गरस्थै'श्च अस्माकं सैनिकैः दीपप्रज्वालनपूर्वकं, मिष्ट भोजनपूर्वकं च महोत्सवः साय सम्मानितः। भारतीय-रेडक्राससंस्थयाऽपि सैनिकानामेतेषां कृते [illegible]तिपय-सहस्ररूप्यकाणां मिष्टवस्तूनि प्रहितानि [illegible]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## "द्रुतं संस्कृतं शिक्ष्यतां "भारती:"तः" :—

दीपावली भारतवर्षस्य प्रमुखः उत्सवः अस्ति। अस्मिन् उत्सवे दीपकाः प्रज्वाल्यन्ते अग्निक्रीडनकानि चाल्यन्ते—सर्वेषां गृहाणां संमार्जनं सुधया लेपश्च क्रियते। एतेन चातुर्मास्ये संचितः सर्वोऽपि अवकरः, अस्वास्थ्य च दूरीभवति। सायं लक्ष्मीपूजा क्रियते। जागरणं च विधीयते। एतस्मिन् दिने दयानन्दजयन्ती अस्ति। झाँसीराज्ञी लक्ष्मीबाई चाप्यस्मिन्नेव दिने समुद्भूता। रामतीर्थस्वामी अपि अस्मिन्नेव दिने स्वर्गगामी अभूत्। अतएव दिनस्यास्य महत्त्वम् अत्यन्तं वृद्धिं प्राप्तम्। गुर्जरदेशे दीपावली अत्यन्तम् उत्साहेन सम्मान्यते। तत्र दीपावलीतः एव नवीनो वर्षः आरभ्यते।

दीपावली भारत का मुख्य त्यौहार है। इस त्यौ[हार] पर दिए जलाए जाते हैं, पटाखे छोडे जाते हैं औ[र] सब घरों की सफाई व पुताई की जाती है। इस[से] चौमासे में इकट्ठा हुआ सारा कूडा और अस्वा[स्थ्य] दूर हो जाता है। शाम को लक्ष्मीपूजा की जाती [है] और जागरण किया जाता है। इस दिन दयान[न्द] जयन्ती भी है। झाँसी की रानी लक्ष्मीबाई भी इ[सी] दिन पैदा हुई थी। स्वामी रामतीर्थ भी इसी दि[न] स्वर्गगामी हुए थे। इसलिए इस दिन का महत्व औ[र] भी बढ़ जाता है। गुजरात में दीवाली बड़े उत्साह [से] मनाई जाती है। वहाँ दीवाली से ही नया साल [शुरु] होता है।

—"देवर्षिः किसल[य]"

### धातुप्रयोगपारिजात :—

गम्लृ ( गम् ) गतौ (जाना, To go) भ्वादिः। सकर्मकः। अनिट्। परस्मै०। गच्छति। गच्छ[तु।] जगाम, जग्मतुः, जग्मुः जगन्थ, जग्मिव। गन्ता। गमिष्यति। गम्यात्, गम्यास्ताम्। लुङि-अगमत्। लृङि[-] अगमिष्यत्। सम् + सङ्गच्छते, ( मिलति-मिलना To meet ) अनु × अनुगच्छति ( अनुसरति, T[o] follow ) उत् + उद्गच्छति ( उदेति, आविर्भवति, पैदा होना To grow, To germinate ) "फल[...] सहकारस्य पुष्पोद्गम इव प्रजाः। " रघुवंशः। आ+आगच्छति (आना, To come )। अप + अपगच्छ[ति] ( दूरे गच्छति, दूर जाना To go away )। अव + गच्छति ( जानाति, जानना, To understand) अधि + अधिगच्छति। ( प्राप्नोति पाना To get ) अति + अतिगच्छति ( अतिक्रमते उलाँघना, T[o] surpass ) निर् + निर्गच्छति ( निःसरति, निकलना. To depart )

कर्मणि Passive Voice—गम्यते। अगामि। णिचि-( प्रेरणार्थक Causal ) गमयति, [...] अजीगमत्-त। सनि-( इच्छार्थे Desiderative ) जिगमिषति। कृदन्ते-गन्तव्यम्। गम्यम्। क्त-[...] गतः। गतवान्। शतृ गच्छन्। गच्छन्ती। क्त्वा-गत्वा, संगम्य, संगत्य। गत्वरः, क्वरप्। गामुक[...] उकञ्। सर्वत्रगः, पन्नगः, उरगः। विहङ्गमः। जगत्-। गङ्गा। गन्तुः। निगमः।

प्रकाशक—जयबहादुरसिंह। पता—भारती भवन, गोपालजी का रास्ता, जयपुर।
राजस्थान प्रिंटिङ्ग वर्क्स, हनुमानजी का रास्ता, जयपुर में मुद्रित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान मद्रास-मध्यप्रदेश-सौराष्ट्र-सर्वकारैः स्वीकृता—

सम्पादकः—
कविशिरोमणि-
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्मा शास्त्री

गुरुकुल कांगड़ी

येन पश्चिमदेशेपि ज्ञानमार्ग प्रकाशितम् ।
धन्यो वाग्मिषु मूर्द्धन्यो विवेकानन्दकोविदः ॥

वर्षम् ४
...ाम् ॥३॥
तृतीयोऽङ्कः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## "द्रुतं संस्कृतं शिक्ष्यतां "भारतीः"तः" :—

दीपावली भारतवर्षस्य प्रमुखः उत्सवः अस्ति। अस्मिन् उत्सवे दीपकाः प्रज्वाल्यन्ते अग्निक्रीडनकानि चाल्यन्ते–सर्वेषां गृहाणां संमार्जनं सुधया लेपश्च क्रियते। एतेन चातुर्मास्ये संचितः सर्वोऽपि अवकरः, [illegible] दूरीभवति। सायं लक्ष्मीपजा क्रियते।

दीपावली भारत का मुख्य त्यौहार है। इस त्यौ[हार] पर दिए जलाए जाते हैं, पटाखे छोडे जाते हैं [और] सब घरों की सफाई व पुताई की जाती है। इस[से] चौमासे में इकट्ठा हुआ सारा कूडा और अस्वा[स्थ्य] दूर हो जाता है। शाम को लक्ष्मीपूजा की जाती [है।]


| | | | |
|---|---|---|---|
| ४. | कृषिमहायज्ञः | पं० श्रीमनसुखरायमौरः | ५० |
| ५. | हेमन्त ! | पं० श्रीलक्ष्मीनारायणपुरोहितः उदयपुरम् | ५२ |
| ६. | मालाया मणयः १०८ संख्यायां कथम् ? | पं० श्रीदीनानाथशास्त्री देहली | ५३ |
| ७. | विनोदवाटिका | सौ० माधुरी देवर्षि कानपुरम् | ५५ |
| ८. | भारतीयदर्शनसन्देशः | पं० चन्द्रदेवशर्मा, चम्पारन बिहार | ५६ |
| ९. | लेखान् कथं लिखेम ? | पं० कलानाथशास्त्री, जयपुरम् | ५७ |
| १०. | भारते भातु भारती | पं० श्रीधन्नालालशर्मा, जयपुरम् | ५९ |
| ११. | सम्पादकीयम् | सम्पादकः | ६१ |
| १२. | संस्कृतसमाचाराः | दे० कलानाथशास्त्री, जयपुरम् | ६४ |
| १३. | देशदर्शनम् | ,, ,, | ६५ |
| १४. | विदेशवार्त्ता | ,, ,, | ६५ |
| १५. | द्रुतं संस्कृतं शिक्ष्यतां "भारती"तः | ,, ,, | पृष्ठतः |
| १६. | धातुप्रयोगपारिजातः | ,, ,, | ,, |


## —: "भारती" पत्रस्य उद्देश्यानि नियमाश्च :—

- संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचारपरिपोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि।
- 'भारती' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम्।
- मासिकपत्रमिदं प्रतिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात्।
- एकस्याङ्कस्य मूल्यम् ।=) आणकषट्कम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान मद्रास-मध्यप्रदेश-सौराष्ट्र-सर्वकारैः स्वीकृता—

सम्पादकः—
कविशिरोमणि-
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्मा शास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षम् ४ | पौषपूर्णिमा, सं० २०१० | अङ्कः ३

## वन्दे सुरभारतीम् !

[ श्री गणेशरामशर्मा, विद्याभूषणः, हिन्दी-संस्कृताध्यापकः,
श्रीराजेन्द्र-इन्टर-कॉलेज, झालावाड़, राजस्थान ]

### [ घनाक्षरी ]

वन्दे वर्णशब्दवाक्यछन्दोबद्धसत्प्रबन्ध—गद्यगीतिकाव्यामृतश्रृङ्गारप्रभावतीम्,
शैलीगुणगुम्फितामलङ्कृतिचमत्कृतिकां गम्भीरार्थगौरवस्फुरन्तीं प्रतिभावतीम् ।
कल्याणीमनल्पकल्पनातरङ्गकल्लोलिनीं कविकुलकीर्तिलतां ललितकलावतीम्,
भव्यभद्रभावरसानन्दघनकादम्बिनीं वन्दे विश्ववन्द्यामिष्टदेवीं सुरभारतीम् ॥१॥

सानन्दं सताललयं वीणामुपवीणयन्तीं स्वैरं श्रुतिमण्डलेषु गायन्तीं विभावतीम्,
ज्ञानसविज्ञान-कला-कौशलपटीयसीं च यन्त्र-मन्त्र-तन्त्र-प्रक्रियां च सभ्यसंस्कृतिम् ।
विदुषां मनस्सु शास्त्रसिद्धिं परमात्मतत्व- साक्षात्कारविद्यां सतामाध्यात्मिकतारतिम्,
स्फारं स्फुरयन्तीं दिक्षु जयवैजयन्तीध्वजं भावरङ्गमञ्चे नटीं वन्दे सुरभारतीम् ॥२॥

नन्दननिकुञ्ज-लतापुष्पपुञ्जवीथी-पथे निर्जरवधूटीवृन्दमध्ये मञ्जु भास्वतीम्,
सिद्धा मुनिगन्धर्वाश्च विद्याधराश्चाप्सरसो वाञ्छन्ति च देवा यत्पदाब्जशरणागतिम् ।
यच्छन्तीं कृपाकटाक्षकोणैर्भवभूतीः सतां हृद्यां तत्वविद्यां भुक्तिमुक्ती मुदं शाश्वतीम्,
विद्वत्कविमानसे लसन्तीं राजहंसीं शिवां वागीश्वरीं वन्दे सर्वशुक्लां सुरभारतीम् ॥३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# राजकुमारः कुणालः

ले० प० शिवप्रसादशास्त्री, सहायक निरीक्षकः राजस्थान संस्कृत पाठशालानाम् जयपुरम् (राजस्थान)

कुणालो बौद्धकालसम्राजोऽशोकस्य तनय आसीत्। तस्य प्रत्यङ्गे विधातुर्मतिप्रकर्षो ज्ञायतेस्म। सुन्दरतरः स राज्ञः प्रियतरो बभूव। अशोकस्य कालोऽतिशयेन कुणालेन सहैवोपवनेषु व्यतीयाय। एकदा राजा स्वयात्रायां कुणालवदतिसुन्दरीं कन्यामेकां प्राप्तवान्। कुणालः कञ्चना च स्वविनोदेन प्रासादं स्वर्गसमम् अकुरुताम्। उभौ परस्परं क्रीडन्तौ महत्प्रेमारचताम्। एवं कियति काले व्यतीते द्वयोर्विवाहो जातः।

केनापि कारणेन कुणालस्य विमाता तिष्यरक्षिता कुपिता बभूव। तदैव तक्षशिलायाः शासकस्य पत्रं समायातं यस्मिन् लिपिकृतमासीत् यत् यवनास्तूर्णमेवाक्रमणं विधास्यन्ति प्रजायाश्च विद्रोहसम्भावना विद्यते। अशोकः स्वप्रियतनयं कुणालं विद्रोहदमनाय सैनिकैः प्रैषयत्। कञ्चनापि गता। कुणालः स्वनीतिकौशलेन विद्रोहमसान्त्वयत् तत्रैव च निवसन् स काञ्चनदेशं शास्तिस्म। इतश्च महाराजोऽशोको रोगाक्रान्तो बभूव। उदरशूलेन नितान्तं पीडितस्य शिरःपीडापि विह्वलतां वर्धयामास। उदरात् केचन कीटा बहिरागच्छन्। कीटानां नाशनमन्तरा न कोप्युपायो विद्यतेस्म नीरोगतां विधातुम्। सर्वे च चिकित्सका निराशतां गताः। अशोको जीवने अस्मिन् न कदाप्येतादृशीमवस्थामन्वभवदतो ऽद् मृत्युं समीपस्थं मेने। तिष्यरक्षिता महाराज्ञी महाराजं सेवतेस्म। सा राज्याधिकारिवर्गमाज्ञापयामास यत् कुत्रापि कोपि रोगेणानेन पीडितो लभ्येत तदा शीघ्रमानीयताम्। सर्वत्रादेशानुसारमन्वेषणं विधीयतेस्म। व्यतीते समये कुम्भकार एकोनेन रोगेणाक्रान्तो मिलितः। महाराज्ञी तस्य कुम्भकारस्योदरं विदार्य कीटराशिं नानौषधवर्गेऽक्षिपत् परन्ते न मृताः। अन्ते च लशुनार्के पातितास्तूर्णं मृताः। अनेनाविष्कारेण तिष्यरक्षिता नितरां हर्षोत्फुल्ला भूत्वा राज्ञः सन्निधौ गत्वा चोवाच। महीपते! यदि भवन्तमहं नीरोगं विदध्यान्तर्हि कं पुरस्कारं लभेय। महीपतिः स्वानन्तं स्नेहं प्रकटीकुर्वन् जगाद—अहमेव तवाधीनोस्मि। सर्वञ्च साम्राज्यं तव वर्तते। कोऽसौ पुरस्कारो यस्यावश्यकता ते विद्यते। तिष्यरक्षिता कथितवती साधु। नाहं किमपि याचे। केवलमेकमहो राज्यमुद्रां याचे।

अशोको विहस्योवाच। कोयं पुरस्कारः राज्यमुद्रापि तवैव यदाहं राज्यमुद्राधिकारी तव वशे वर्ते। यस्मिन्नहनि तवेच्छा स्यात्तदैव राज्यमुद्रां गृहाण। एवं श्रुत्वातिहर्षान्विता जाता तिष्यरक्षिता। यतोहि चिरकालादिष्टं तस्या मनोरथं पूर्यतेस्म। सा लशुनार्कैणाल्पैरेवाहोभिर्नृपतिं नीरोगं विदधौ। अशोकस्योदरकीटाः सर्वे निःशेषतां गताः। उदरस्य शिरसश्च पीडापि विलीना। महीपतेः शरीरस्य दौर्बल्यमपि विनष्टम्। अस्मिन्नवसरे तिष्यरक्षिता तक्षशिलायाः शासकं पत्रं प्रैषयत्—एषाज्ञा पत्रे लिखिता यत्कुणालमन्धं विधाय राज्यान्निष्कास्यताम्। तिष्यरक्षिता स्वापमानस्य प्रतिशोधं चकार। पुरात्र देशे बाष्पशकटीप्रभृतीनि यानानि नासन्नतोऽश्वप्रभृतियानैरेव यात्रा विधीयतेस्म। पाटलिपुत्रादेष



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



आदेशस्तक्षशिलाशासक सन्निधौकैश्चिद्दिनैर्गतः । कुणालस्तदा तत्र सन्निहितो नाभूत् । स्वेन सह काञ्चनामादाय स मृगयायै दूरं गत आसीत् ।

तमादेशं लब्ध्वा शासकः शुशोच—महाराजः स्वस्य प्राणेभ्योऽपि प्रियस्य सुतस्य कृते एतादृशीमाज्ञां कथं प्रेषयेत् । मन्ये दम्भपूर्णं पत्रमिदम् । स स्वसंदेह-नाशाय पत्रमलिखत् । पत्रे लिखिते सति तेन विचा-रितं यदेकदा कुणालपार्श्वेऽपि मयास्य समाचारस्य चर्चा विधेया । मृगयाया निवृत्ते कुणाले शासकस्तं पत्रमदर्शयत् स्वपत्र लेखनञ्चाकथयत् । कुणालस्तत् पत्रं सम्यक् दृष्ट्वा राजमुद्राञ्चाभिज्ञाय निर्भयो भूत्वावदत् शासकम्—शीघ्रमेव भवता राजादेशः पालनीयः । शासकोऽब्रवीत्—'राजकुमार ! इममादेशं पालयितुमहं सर्वथाऽसमर्थः ।' इति श्रुत्वा राजकुमारेण जगदे—'त्वमस्याधिकारस्यायोग्यः प्रतिभासि मे । राजादेशः सर्वथा रक्षणीयो भवति । राजमुद्राया अपमानमहं न सहेय । स्वजनकस्य महीपतेश्चाज्ञा मया शिरोधार्या । त्वमपि स्वस्वामिन आज्ञां पालयित्वा राजमुद्रां शिरसा प्रणम्य स्वामिभक्तिमाविष्कुरु ।

अन्ते च कुणालोऽन्धो विहितः । काञ्चना मृगयाया निवृत्ता स्वशयनागारे सुप्ता । अहोरात्रे व्यतीते सा कुणालपार्श्वे समागत्यान्धञ्च तं निशाम्य मूर्च्छां लेभे । अथ संज्ञां लब्ध्वा सा पतिमालिङ्ग्य रुरोद । कुणालोऽपि तामाश्वास्यावदत् प्रिये ! पितुराज्ञापालनं सुतस्य धर्मः । अधुना द्वितीयाज्ञा पालनाय संनद्धा भव । काञ्चनया ज्ञातं यद् द्वितीयाज्ञापालनेऽहम् अन्धा विधेया अतः सोवाच-अहमुद्यतास्मि । शीघ्रम्मे नयने स्फोटनीये । स्वपतिमहमन्धं न पश्येयम् । कुणालः प्रत्यब्रवीत्—प्रिये ! नास्त्येष आदेशः । अहं राज्याद् बहिर्निष्कासनीय इति वर्तते राजाज्ञा । अहन्त्वां प्रतीक्षमाणोऽद्यावधि न गतः । अद्याहं गच्छामि । कञ्चना जगाद । अहञ्च क्व वत्स्यामि । कुणालो ब्रवीत्-त्वत्कृते न कोऽप्यादेशः । त्वं मया सार्धं किमर्थं कष्टं भोक्ष्यसि । त्वमद्य गत्वा पाटलिपुत्रं पितुर्मे सेवां कुरुष्व । कञ्चनात्यन्तं मर्माहताभाषत—अहं त्वद्वियोगं क्षणमपि सोढुं न शक्ता । मरणमन्तरा मां भवत्तः पृथक् कर्तुन्न कोऽपि शक्नुयात् । शीघ्रमेवावां राज्यादस्मात् पापमयाद् बहिर्भवेव ।

उभौ तौ राजप्रासादाद् वहिरागत्य राजमार्गे पादाभ्यां गच्छन्तौ दृष्टौ तक्षशिलावासिभिः । कञ्चना स्वपत्युः करं गृहीत्वा गच्छन्ती दृष्टा । शासकश्चादेश-पालनस्य समाचारं प्रैषयत् । तिष्यरक्षिता तां सूचनां गोपयित्वा महीपतिः किमपि न जानीयादिति प्रबन्धं चकार । व्यतीतेषु दिवसेषु राज्ये सर्वत्रैष समाचारः प्रसारितो यत्कुणालः -- काञ्चना चोभौ विरक्तौ भूत्वा भिक्षुकौ जातौ । अनेन समाचारेण महीपतिश्चिन्तान्तु विदधौ, पर धार्मिकत्वात्तेनान्ते स्वमनसि धैर्यं धृतम् । कुणालः कञ्चनया सह ग्रामे ग्रामे नगरे नगरे भ्रान्त्वा स्वजीवनं यापयामास । सङ्गीतविद्यायामुभौ प्रवीणा-वास्ताम् । यत्र यत्रोपस्थितौ तौ तत्र तत्र जनता दर्शनायोत्कण्ठिता बभूव । राजोचितं लक्षणं दृष्ट्वा तयोर्दर्शकाः साश्चर्या बभूवुर्यदेतावस्मिन् वेशे कथं तिष्ठतः ? तयोः परिचयं प्राप्तुं लोको यतते स्म परन्तौ न केनापि ज्ञातौ ।

समयस्तावद् वायुवेगेन गच्छति । नद्याः प्रवाह इव कालोऽस्थिरोऽस्ति । शनैः शनैः पञ्चदशहायनानि व्यतीतानि । दक्षिणदेशस्य पर्यटनेन स्वजीवन



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यापयन्तौ तौ वस्तुतो विरक्तौ संसारात् परमेश्वरनाम-ग्रहण एव स्वसमयं यापयामासतुः। एवं भ्रमन्तौ तौ वंगदेशं प्राप्तौ। तत्रोषित्वा कतिचिद् हायनानि दिवस एकस्मिन् सन्ध्याकाले पाटलिपुत्रे समायातौ। वयसो दीर्घत्वाद् वेषस्य च प्रातिकूल्यात्तयोराकृतेः परिवर्तनेन न कोपि राजधान्यां परिचेतुं शशाक। संगीतविद्यया जनान् मोहयन्तौ नगरे भ्रान्त्वा भिक्षमाणौ परमेश-भजनेन स्वजन्मतः साफल्यं कुर्वाणौ चिरमवसताम्। एकदा गजशालायाः प्रधानो गानविद्यया समाकृष्टः स्ववासस्थाने नीत्वा तौ संगीतं शुश्राव। भिक्षां गृहीत्वा च रात्रौ तत्रैव सुप्तः कुणालः।

गजशालायाः समीप एव सम्राजोऽशोकस्य प्रासाद आसीत्। तस्मिन् प्रासादे महीपतिः विश्राम-मकरोत्। कुणालश्च ब्राह्मे मुहूर्ते समुत्थाय भैरवी रागे संगीतं प्रारभत। महाराजोपि तदा जागर्तिस्म। संगीतस्वरं श्रुत्वा स सहसा सस्मार यत्कुणालोपी-दृगेव गायतिस्म। द्वारपालं समाहूयाज्ञापयामास महीपतिः-प्रातःकाले गायकमिमं जनं राजसभाया-मुपस्थाप्यताम्। प्रातःकाले जाते गन्तुं प्रवृत्ते कुणाले द्वारपालः समागत्य राजसभायामुपस्थातुं महीपते-राज्ञां श्रावयामास।

महीपतेराज्ञां को न मन्येत। तौ राजसभाया-मुपस्थितौ। राज्ञा च गातुं कथितम्। मनोहरेण स्वरेण तयोः सम्मिलितं गानं श्रुत्वा सभ्याः सर्वे मोहं गताः। समाप्ते च संगीतेऽशोकेन परिचयस्तयोः पृष्टः। कुणालोब्रवीत्। राजन्! भिक्षूणां कः परिचयः। जनान् गानं श्रावयित्वा भिक्षां याचावहे। भिक्षया च कथमपि जीवनं यापयावः। महाराजोपृच्छद्-भूयोपि भिक्षुवेषात्पूर्वस्य परिचयं देहि। कस्य पुत्रः कश्च ते देशः इति ज्ञातुं महती वाञ्छा मे वर्तते। क्षणं निभृतं स्थित्वा कुणालस्य मुखात् सहसा निःसृतं यदहं पूर्वं सम्राजोऽशोकस्य पुत्र आसम्। अतिविस्मितो भूत्वा राजाकथयत्—कुणालस्त्वम्? कुणालोवदत्-बाढम्। पितुश्चरणौ नमामि। सहसा महीपतिः सिंहासने मोहं गतः। अधिकारिणो महीपतिं चेतनस्थं कर्तुं विविधैरुपायैर्यतन्तेस्म। संज्ञां लब्ध्वा महीपतिः सिंहासनादुत्तीर्य कुणालं दृढमालिङ्गय कञ्चनायाः शिरसि हस्तं ररक्ष। राज्ञो नयनाभ्यामश्रुधारा प्रावहत्। सर्वत्र राजसभायां कारुण्यं प्रससार।

शान्तेऽश्रुप्रवाहे महाराजः कुणालमपृच्छत् यत्त्वमन्धः कथं जातः? कुणालेनादितः सर्वं वृत्तं श्रावितम्। कुणालस्य पितृभक्तिं राजभक्तिञ्च विज्ञाय महीपतिः स्नेहविह्वलो जातः। तत्क्षण एव च स चुकोप। राज्ञो नयने रक्ते अभवताम्। प्रधानामात्यं समाहूय सोपृच्छत्। आज्ञापत्रलेखकस्य नाम ब्रूहि। अमात्येनास्मिन् विषये सर्वथानभिज्ञता प्रकटिता। राज्ञा चान्वेषणं प्रारब्धम्। एवं प्रारब्धेऽन्वेषणे राजा सस्मार। एकस्मै दिवसाय तिष्यरक्षिता राजमुद्रां शासनञ्च पुरस्कारत्वेन जग्राह। तिष्यरक्षिता तत्क्षणं समाहूता। पृष्टा च सा स्वापराधं स्वीचकार।

महाराजः समादिदेश—'अद्यैव तिष्यरक्षिताऽन्धा विधेया। तदनन्तरञ्च तस्याः प्रत्यङ्गं छित्त्वा काकेभ्यो वितीर्यताम्।' इत्याज्ञां दत्वा स कुणालमवदत्—प्रिय सुत! साम्प्रतमहं राज्यशासनं तुभ्यं दत्वा वने च गत्वा शेषमायुर्भगवद्भजने योक्ष्यामि। यस्मिन् संसारे तिष्यरक्षितासमाः पापमूर्तयो वर्तमानाः सन्ति तदिदं जगन्नरकादप्यशुभंवर्तते। अहमद्यात्रोषितुम-नेच्छामि।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भारती-सन्देशः

[ रचयिता—रामचन्द्रशर्मा साहित्याचार्यः प्राध्यापकः महाराजसंस्कृतकालेजः, जयपुरम् ]

(राजस्थानप्रान्तीयसंस्कृतसाहित्यसम्मेलने अलवरनगरे पठिता सेयं कविता । —सम्पादकः)

सुता मदीया अयि भारतीयाः ! सम्प्राप्य स्वातन्त्र्यमपि प्रसुप्ताः ।
दैवीं गिरं मामनुपासमानाः, स्वसंस्कृतिं प्राप्स्यथ किं कदाचित् ॥ १ ॥
कालोऽस्ति नायं शयनस्य मान्याः विबुध्य लोकानपि बोधयध्वम् ।
धर्मं स्वकीयं समुपाश्रयन्तः स्वदेशभूमिं सुसमुन्नयध्वम् ॥ २ ॥
चारित्र्यसिंहेन विनाश्य मोह-क्रोधादिनागाँस्त्वरितं यतध्वम् ।
विवेकभानोः प्रभया दिगन्तान् पुनः समापूर्य यशो लभध्वम् ॥ ३ ॥
वेदार्थरक्षां परितो विधाय स्वान्ते मुदं ब्रह्मण आतनुध्वम् ।
विदेशभाषामथ वेषभूषामस्मात्स्वदेशाच्च निराकुरुध्वम् ॥ ४ ॥
अधीत्य ग्रन्थान्समनोनियोगं छात्राः ! स्वकीयां जड़तां हरध्वम् ।
पदानि चोच्चैः समवाप्य नम्रा मन्मानसं मोदमयं विदध्वम् ॥ ५ ॥
पाठ्यस्य भारं वहतोऽतिखिन्नान् विलोक्य बालानपि किं सहध्वम् ।
सुपाठ्यनिर्धारणमाकलय्य शिक्षोन्नतिं प्राक् सुधियः कुरुध्वम् ॥ ६ ॥
मयाऽतिसंक्षिप्ततया प्रदिष्टानित्यादिकर्तव्यपथान् श्रयध्वम् ।
ज्ञानाङ्कुशेनाशु निहत्य दोषानात्मस्थितानात्मनि संरमध्वम् ॥ ७ ॥

अशोकस्याज्ञया तिष्यरक्षिता गृहीत्वा पुरः समानीता । वधिकस्तस्या अक्षिणी स्फोटयितुमङ्गानि पच्छेत्तुं शस्त्रं गृहीत्वा समुद्यतः । यदा राज्ञः संकेतेन वधिकः स्वकर्म प्रारब्धुं समुद्यतस्तदा मध्य एव कुणालः स्वजनकमुवाच हस्तौ संयोज्य—किञ्चिद् वक्तुम्मे गरीयसी वाञ्छा विद्यते । ब्रूहीति राज्ञा कथिते कुणाल इत्थं जगाद —राजन् ! मातुर्मेऽपराधं क्षमस्व । नास्ति दोषो मातुः । कर्मफलं भुञ्जानाः सर्वे एव प्राणिनोऽत्र जगति शुभाशुभं लभन्ते । निमित्तमात्रञ्जाता जननी मे सर्वथैव क्षमार्हा विद्यते ।

एवं कथिते सति कुणालेनैकोऽद्भुतश्चमत्कारो दृष्टस्तत्र राजसभायाम् । कुणालस्योभे नयने यथापूर्वमभवताम् । स पूर्ववत् जगदिदं द्रष्टुं समर्थो बभूव सर्वे चोपस्थिता जनाः साश्चर्या अभवन् । महाराजस्य विस्मयं कुणाल इत्थं दूरीचकार यत् संसारेऽहिंसा समं किमपि वस्तु न विद्यते । मनसा वाचा कर्मणा कस्यापि प्राणिनोऽनिष्टाचिन्तनेनैव मानवोऽखिललोकबन्धुर्भूत्वा लोकेऽस्मिन् परत्रापि च सुखं लभते अतएव मे नयनयोर्दृष्टिः समागता । इति श्रुत्वा महीपतिरशोको विरक्तो भूत्वा स्वतनये कुणाले राज्यभारं धृत्वा वनं जगाम । कुणालश्च प्रजां पुत्रवत् पालयन् जगति यशो लब्ध्वा भौतिकशरीरं परित्यज्य कीर्तिकायेनाद्यापि जीवति ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# कृषि महायज्ञः

[ ले० मनसुखरायमोरः ]

परमात्मना इदं मनुष्यजीवनं पुरुषार्थाय ज्ञानवर्धनाय सृष्टेः प्राणिमात्रस्य रक्षणाय तेषां वर्धनाय पालनाय च निर्मितम्। मनुष्यजातेः स्थितिः, प्राणिमात्रस्य च जीवनाधारः अन्नमेवास्ति। 'अन्नम्प्राणो बलञ्चान्नमन्न जीवितमुच्यते'। अन्नम् च भूमिकर्षणात् जायते। कृषियज्ञस्य विधानं च शास्त्रकारैः सर्वेभ्यो वर्णेभ्यश्च निर्दिष्टम्। 'कृषिस्तु सर्ववर्णानां सामान्यो धर्म उच्यते'। कृषिः भरणपोषणं पशुपालनं च सर्वेभ्यो विहितम्, 'कृषिर्भृतिः पाशुपाल्यं सर्वेषां न निषिध्यते'। सर्वेषु प्राणिषु मानवः श्रेष्ठः, तेषु च ज्ञानवतः पुरुषस्य स्थानम् उन्नततरं वर्तते। यदि ज्ञानिनः यथेच्छमात्रायां भूकर्षणं कृत्वा अस्य यज्ञस्य प्रचारं कुर्युः तर्हि संसारस्य कल्याणं सुनिश्चितम्। 'ब्राह्मणस्तु कृषिं कुर्वन्वाहयेदिच्छया धराम्।

कृषेरन्यतमो धर्मो न लभेत्कृषितोऽन्यथा
सुखं न कृषितोऽन्यत्र यदि धर्मेण कर्षति
अवस्त्रत्वं निरन्नत्वं कृषितो नैव जायते॥

बृहत्पा० ५ अ० १८५ श्लो० ८७१

अनेन सिद्धं यत् भूकर्षणेन राष्ट्रस्य सर्वतोमुखी समुन्नतिरपि सुनिश्चिता।

षट्कर्माणि कृषिं ये तु कुर्युर्ज्ञानविधिं द्विजाः।
तेसुरादित्रप्राप्ताः स्वर्गलोकमवाप्नुयुः॥

बृ०त्पा० ५ अ० १६४२१ श्लो०

लोकोपकारार्थं संजातानि सम्पूर्णानि क्रियमाणानि योग्यकर्माणि 'यज्ञ' इति नाम्ना मनुनादिष्टानि। अतः प्राणिमात्रस्य हितसम्पादिका अन्नोत्पादनस्य साधनभूता कृषिः विशिष्टयज्ञत्वेन सिद्ध्यति इति तु सुस्पष्टमेव।

'कण्डनी पेषणी चुल्ली उदकुम्भोऽथ मार्जनी
पञ्च सूना गृहस्थस्य अहन्यहनि वर्तते।
वृक्षाञ्छित्वा महीं हत्वा हत्वा तु मृगकीटकान्।
कर्षकः खलयज्ञेन सर्वपापैः प्रमुच्यते'॥

यथा कण्डनी (ओखली) पेषणी (चक्की) चुल्ली (चुल्हा) उदकुम्भो (जल रखने का स्थान) मार्जनी इत्यादिस्थानेषु दैनन्दिनं संजातायाः हिंसाया दूषणं सद्गृहस्थेन लोकहिताय अनुष्ठितेन पञ्चमहायज्ञेन शान्तं भवति। तथैव वृक्षच्छेदनमहीखनन मृगकीटकादिहननजन्या या हिंसा सापि कर्षकेण विहितस्य खलयज्ञस्य अनुष्ठानेन परिशान्ता जायते। गीतायां वर्णितस्य यज्ञशिष्टाशिनः पुरोधसः कृषकगृहस्थः एको ज्वलदुदाहरणम्।

अस्मिन् कृषिकर्मणि एव एतत् वैशिष्ट्यं वर्ततेयत् यावदधिके अन्नसम्पादने मानवः संलग्नो भवेत् तावदेव अधिकपरिमाणेन सुन्दरं पौष्टिकं सुस्वादु च अन्नं आत्मार्थं संसारस्य प्राणिनां रक्षार्थं प्राप्स्यति।

कृषियज्ञेन ज्ञानपूर्वकम् उत्पादितान्नस्य शक्तिरेव इयदधिकं व्याप्तास्ति यत् तस्यामेव सम्पूर्णं विश्वं पूर्णतः व्याप्तं वर्तते। संक्षेपेण सम्पूर्णविश्वस्याधारः अन्नमेव अस्ति।

अन्नेनाप्यायते सर्वं त्रैलोक्यं सचराचरम्।
अग्निर्ज्वलति चान्नार्थं वाति चान्नाय मारुतः॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



गृह्णाति चाम्भसां सूर्यो रसानन्नाय रश्मिभिः ।
अन्नस्प्राणो बलञ्चान्नमन्नं जीवितमुच्यते ॥
अन्नञ्च जगदाधारं सर्वमन्ने प्रतिष्ठितम् ॥
'मांसमेदोस्थिमज्जानां सम्भवस्त्वन्नमेव हि ।'

(वृद्धगौतमस्मृतिः)

उपरि ज्ञानिजनैः भूकर्षणस्य कर्म तत्तत्शास्त्रेषु वर्णितम् । तस्य अभिप्रायः अयं वर्तते यत् ज्ञानिजनः भूमेः उर्वराशक्तिम् अवलोक्य तस्मिन् अन्नं वपति । वपनात्पूर्वमेव तस्याः भूमेः परिपूर्णा शक्तिः उत्पद्यमानम् अन्नं प्राप्नुयात् इत्येव सम्यक्तया हलेन कर्षणं कृत्वा तां उत्पादनशक्तिसम्पन्नां (शिथिलां=पोली) कुर्वन्ति । ते तस्यां स्वार्थवशात् लोभवशात् च कृत्रिममवकरं अवस्करं (विष्ठामलमूत्रादीनि) कदापि न निक्षिपन्ति । कृत्रिमस्य अवस्करस्य परिणामास्तु अस्मद् समक्षमेव सन्ति ।

अवकरस्य ऊष्मणा प्रत्येकं क्षुपा (वनस्पति) अन्नं शीघ्रमेव पाचयन्ति । पृथिव्यां निहिता प्रच्छन्ना च सप्तधातूनां जलीयषड्रसस्य च शक्तिः अन्नस्य क्षुपं (वनस्पतिं) सम्यक् न प्राप्नोति । अनेन वयं आस्वादरहितं, हतवीर्यम् अपुष्टिकरं च अन्नं प्राप्नुमः । लोभवशात् शीघ्रमेवोत्पादितम् अन्नं पोषणतत्त्वरहितं बलहीनं माधुर्यहीनं तथा शून्यं च भवति । अस्य प्रत्यक्षं प्रमाणं इदं वर्तते यत् विण्मूत्र द्वारा उत्पादितस्यान्नस्य तृणानि अपरिपक्वानि कटूनि च भवन्ति तानि तृणानि पशुरपि काठिन्येन स्वरसात् करोति । यदि वयं सारभूतमन्नं कृत्रिम विण्मूत्राणाम् साहाय्येन उत्पादयामः तर्हि सम्पूर्णा सृष्टिः निर्वीर्या साररहिता पराक्रमशून्या च भविष्यति ।

शास्त्रीयविधिना उत्पादितम् अन्नं शुद्धं बलवीर्यवर्धकम् सुस्वादु रुचिकरं तृप्तिकरं च भवति । कारणं चात्र इदं वर्तते यत् एतत् समये समये जलवर्षणेन जलीयतत्वानि प्राप्नोति, भूमेः सप्तधातूनां सत्वानि च सदव उचितमात्रायां गृह्णाति । ततः पौष्टिकान्नात् सृष्टेः वृद्धिः पोषणं च भवति ।

केचित् महानुभावाः एवं शंकन्ते यत् अन्नोत्पादनानन्तरं भूमेः उर्वराशक्तिः न्यूना संजायते, तस्यां च पोषकतत्वानां क्षाराणां च समावेशस्य आवश्यकता भवति । तेषां समक्षं मम इदं निवेदनं वर्तते यत् भूमेः उर्वराशक्तिः तस्या मध्ये एव प्रच्छन्ना भूत्वा निवसति । भवान् यावताधिकां भूमिं हलकर्षणेन खनिष्यति तावदेव अधिका भूमिः सुफलदा भविष्यति । परिणामतः शुद्धं सात्विकं च अन्नं वयं प्राप्स्यामः । एष एव अस्य प्रशस्तो मार्गः ।

'अभिप्रवन्तः समानेव योषाः कल्याण्य स्वयं मानसो अग्निम् । घृतस्य धाराः समिधो नसन्त ताजुषाणो हर्यति जातवेदाः ।' ऋ० सं० ३, ८, ११, ३

अतः विण्मूत्राणां अवकरद्वारा उत्पन्नेन निःसत्वान्नात् संसारं विनाशाद् रक्षन्तो वयं योग्योपायं कुर्मः । वयं शास्त्राणां इदं वचनं न विस्मरेम ।

नोषरां वाहयेद् भूमिं न चाश्मशर्करावृताम् ।
न गोचरां न प्रदत्तां न नदीपुलिनां तथा ॥
यद्यसौ वाहयेल्लोभाद्द्वेषाद्वाऽपिहि मानवः ।
क्षीयतेऽसौ चिरात् पापात्सपुत्रपशुबान्धवः ॥

आगम्यतां वयं भूमेः उर्वराशक्तिं चिरस्थायिनीं कुर्वन्तो तां पर्याप्तं खनन्तः अन्नस्य सारभूतांशं पर्याप्तं प्राप्नुमः । अस्यामेव राष्ट्रस्य भाविनः ओजस्विसंतानस्य भविष्यत् आधारितम् अस्ति ।

संगच्छध्वम् संवदध्वम् सं वो मनांसि जानताम् ।
'कामये दुःखतप्तानां प्राणिनां आर्तिनाशनम्'



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# हेमन्त !

[ ले० कविकलानिधिः, पं० श्रीलक्ष्मीनारायणपुरोहितः, साहित्याचार्यः,
महाराणासंस्कृतकालेज-साहित्यप्राध्यापकः, उदयपुरम् , राजस्थानम् ]

हेमन्त ! ऋतुराज हेमन्त !! तव स्वागतम् !

\+ \+ \+

अहो, न किमप्युत्तरं वितरत्ययम् । किमयं मूकः स्यात् ? किन्तु नैतत् सम्यक् प्रतिभाति । अतः मूकोऽपि संज्ञयैव किमप्युत्तरं सूचयितुं तु शक्तो भवत्येव । अस्मिंस्तु तथा अपि न किमप्यवलोक्यते । किं पुनः स्यादत्र कारणम् ?

\+ \+ \+

आम् , ज्ञातम् । अयं मूको नाऽस्ति, किन्तु जडः, महान् जडश्च ।

किन्तु एतदपि कथं संभवेत् ? यस्य खलु ग्रामेषु नगरेषु, वनेषु उपवनेषु, वापीषु तडागेषु, नदीषु नदेषु, शैलेषु, समुद्रेषु च सर्वत्राऽपि अखण्डं साम्राज्यम्, अप्रतिहतं शासन, अप्रधर्ष्यश्च प्रतापः स्वीक्रियेत, सोऽपि जडः, महान् जडश्च ? महत् असामञ्जस्यम् !

\+ \+ \+

अये, स्मृतं तत्वमिदानीम् ! अस्य खलु सर्वमपि संभवति । यतः, जडस्याऽप्यस्य मुख्यसचिवोऽतीव तरस्वी, समर्थः स्वामिभक्तश्च । तेनैवाऽसौ विजयते, सर्वत्राऽप्यलङ्घ्यशासनः, प्रखरप्रतापश्च परिगण्यते । तस्य नामान्तराणि च सन्ति 'समीरण' इति । असौ खलुस्वामि सेवापरायणतया स्वस्मिन् जाड्यमावेशय-न्नपि पाटवातिशयेन स्वाधिकारं सामस्त्येन निर्वहति । तेन प्रभाविता मानवा अपि निर्बलाः सबलाश्च एतस्य जाड्यमुररीकुर्वन्तोऽपि प्रबुद्धमात्रा एवैनं स्मरन्ति । उदितेऽपि लोकबन्धौ एतस्य जाड्याद् भिया न केचिदपि गेहं प्रहरात् पूर्वं परित्यजन्ति । पश्चाद् गृहेभ्यो निर्गता अपि, एतस्य जाड्यप्रभावादेव च गिडगिडायन्ते । धीरा वसुन्धरा, महनीयमहिमानो महीधराः, विपुला-शया जलाशयास्तु एतस्य जाड्यं स्वस्मिन्नप्यधिरोपयन्ति, स्वयमेव प्रतिनिधित्वमिव चैतस्य प्रकुर्वन्तोऽवलोक्यन्ते। सोऽयं प्रभावः हेमन्तसचिवस्य समीरणवीरस्यैव ।

समीरणस्य कौशलं किमिव कथ्येत ! असौ खलु चरणशून्योऽपि विचरणविचक्षणः, सर्वत्र सदागतिः आशुगश्च वर्तते । तथैव चाऽसौ कररहितोऽपि, सर्वदा गन्धवहः, स्पर्शनः प्रकम्पनश्चाऽस्ति । एतादृग् यस्य सचिवः स्यात् , स जडोऽपि कथं न विजयताम् , कथं नाऽप्रतिहतशासनो वर्तताम्, कथं च तस्य प्रखरः प्रतापः परितो न प्रवर्धताम् ? सर्वमपि खलु संभवति एतस्य ।

× × ×

हन्त, एवं सत्यपि नाऽत्र सतां निर्वाहोऽवलोक्यते। यतः, साधव एवाऽत्र बाध्यन्ते, नाऽसाधवः । यथा हि-लोकप्रसादनं दिनमेव दैनन्दिनं क्षीयते, सरसीरुह-मित्रं मित्र एव प्रत्यहं प्रशाम्यद्-द्युतिः सम्पद्यते, सहृदयहृदयहारिण्यः पद्मिन्य एव च प्रतिदिनं म्लान-मुखमण्डला बोभूयन्ते । एवमेव चाऽत्र असन्त एव परिपोष्यन्ते; न सन्तः । यथा हि—रजनीचरोल्लास-दायिनी तमस्विन्येव प्रत्यहं प्रवर्धते, निखिलानर्थमूलं जाड्यमेव सर्वत्राऽपि समन्ततः संप्रसरदेवाऽवलोक्यते, उज्ज्वलवेषाः कपट-पटवो बकभक्ता एव च सर्वतः प्रसीदन्तो परिभ्रमन्ति ।

× × ×

एवंविधायां परिस्थितौ मयाऽपि तावत् किं कर्त-व्यम् ?……इतश्चलितव्यम् ?……किन्तु समाक्रान्त-निखिललोकात् सार्वत्रिकादस्य साम्राज्यात् अहं कथ-मपसरेयम् ?

× × ×

आम्, स्मृतम् ! बलवतामपि निखिलभयहारकम्बलं कृष्णं समाश्रित्य तिष्ठेयमत्रैव । तदा कदाचिन्न स्यात् काऽपि बाधेति ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# मालाया मणयो जपनं च १०८ संख्यायां कथम् ?

[श्रीदीनानाथशर्मा शास्त्री सारस्वतः, विद्यावागीशः, विद्यानिधिः,
प्रिन्सिपल सं० हि० महाविद्यालय रामदल, दरीबा, देहली]

अस्माकं प्रतिपलं ६ श्वासा निर्गच्छन्ति । सार्द्ध-द्वयपलात्मके 'एकमिनटे' च १५ श्वासा निर्गच्छन्ति । एकहोरायां ६०० श्वासा जायन्ते । १२ घण्टासु च १०,८०० श्वासा भवन्ति। अहोरात्रे २४ होरासु २१,६०० मिताः श्वासा भवन्ति आस्माकीनाः; अतएव 'योगचूडा-मण्युपनिषदि प्रोक्तम्—'षट् शतानि दिवारात्रौ सहस्राण्येकविंशतिः । एतत्संख्यान्वितं मन्त्रं जीवो जपति सर्वदा ॥ (३२)

एतेषु अहोरात्रश्वासेषु अर्धभागे यदि शयनभोजनान्यसांसारिककृत्यकृते स्थाप्येत; अवशिष्टोऽर्धः समयश्च परमार्थसाधनायाः स्थिरीक्रियेत; तर्हि एकदिवसस्य १०,८०० एतावच्छ्वासेषु अस्माभिरिष्टदेवोपि एतावत्कृत्वः + स्मर्तव्यः । परन्तु लोकयात्रायां नैतत् सम्भवि नाम । तदा १०८,०० संख्यायाः पाश्चात्त्यं शून्यद्वयमपसार्य १०८ वारमिष्टदेवस्य जपः क्रियते । यद्यपि दिनं कदाचिद् १०॥ घण्टानां कदाचिच्च १३॥ घण्टानां भवति; तथापि तस्य मध्यभागः १२ घण्टानामस्ति। रात्रेश्च विश्रान्त्यर्थत्वान् तमोमयत्वाच्च दिनस्य घण्टा एव इष्टदेवस्मरणाय मताः । दिनश्वासाश्च १०८०० उक्ताः । तत्पूर्त्यै १०८ मणिमती माला एव उपायः ।

'जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः' (मनुस्मृतौ २।८७) 'यज्ञानां जपयज्ञोस्मि' (भगवद्गीता १०।२५) 'विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः । उपांशुः स्याच्छतगुणः, साहस्रो मानसः स्मृतः' ॥ (मनु० २।८५) इति जपमहिमा । तद् मालाया मणयः १०८ भवन्ति । तद्द्वारा उपांशुमन्त्रजपने शतगुणं फलं जायते । तत १०८×१०० = १०८०० संख्या पूर्णा जायते । अतएव मालाया मणयः १०८ संख्याका एव प्रयोजनीया भवन्ति ।

अथवा अत्र एतज्ज्ञेयं यद् मायायाः ८ अङ्को भवति, ब्रह्मणश्च ९ अङ्कः । मायायां परिवर्तनं, परिवर्धनं वा भवति, ब्रह्मणि न। ब्रह्मणोऽङ्कः ९ भवति; तत्र किमपि परिवर्तनं न भवति । दृश्यताम्-९ × १ = ९,९×२=१८, ९×३ = २७ इत्यादौ १ + ८, २+७ प्रभृतीनामङ्कानां योजने ९ एव भवति । ८×१ = ८, ८×२ =१६ (१+६ = ७), ८ × ३=२४ (२+४ = ६) इत्यष्टाङ्के उत्तरोत्तरं न्यूनता भवति । ८ × ५=४० (४+० = ४) अत्र ४ अवशिष्यते । ८×६ = ४८ (४+८=१२, १ + २=३) अत्र ३ अवशिष्यते । ८×७=५६ (५+६=११, १+१=२) अत्र २ अवशिष्यते । ८ × ८=६४ (६ + ४=१०) अत्र १ अवशिष्यते ब्रह्मैव । ब्रह्माङ्के तु विकारो न भवति इति ९×८=७२ (७ + २=९) प्रभृतौ प्रत्यक्षमेव ।

हिन्दुजातिः प्रारम्भादेव सूर्यभक्ता स्थिता; अत एव तत्सन्ध्यायां सूर्यायार्घ्यं दीयते । सवितुरेव गायत्रीमन्त्ररूपे जपनं भवति । सविता च सूर्यः । जपने साधनं मालाऽस्ति, तदीया १०८ मणयो भवन्ति । तत्र कारण



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मेतद् यत्-सूर्यस्य १२ भेदा भवन्ति; तदीया द्वादशो भेदोस्ति विष्णुः। इतः सूर्यस्य १२ राशयो भवन्ति। स सूर्यो ब्रह्मरूपोस्ति 'तदेवाग्निस्तदादित्यस्तद् वायुस्तदु चन्द्रमाः। तदेव शुक्रं तद् ब्रह्म' (यजुर्वेद वा० सं० ३२।१) ब्रह्मणोऽङ्कश्च ९ वर्तते। तद् १२ अङ्कवतः सूर्यस्य ९ अङ्कवता ब्रह्मणा सह गुणनात् १०८ संख्या भवति। तत् सूर्यात्मकविष्णोर्जपोपि १०८ वारं भवति। १०८ अङ्के १+८ अङ्कौ मिलित्वा ९ अङ्को भवति। ९ अङ्को ब्रह्मणः प्रतीकरूपो भवतीत्युक्तमेव। अत एव ब्रह्मविदां संन्यासिप्रभृतीनां नाम्ना सहापि 'ब्रह्मविद् ब्रह्मैव भवति' इति न्यायेन ब्रह्मणः प्रतिनिधेः 'श्री १०८' इत्यङ्कस्य लेखनशैली वर्तते।

इतश्च 'ब्रह्म' अक्षरानुसारमपि १०८ संख्याया भवति। क कारतो मकारपर्यन्तं २५ वर्णाः, ४ संख्याका य-र-ल-वाः, ४ संख्याकाश्च श-ष-स-हाः। एवं सर्वव्यञ्जनसंख्या ३३ वर्तते। स्वराश्च 'अ'कारतः 'अः' पर्यन्तं १६ भवन्ति। तदीयः क्रमः—अ १, आ २, इ ३ ई ४, उ ५, ऊ ६, ए ७, ऐ ८, ओ ९, औ १०, ऋ ११, ॠ १२, लृ १३, ॡ (प्लु०) १४, अं १५, अः १६। 'ए ऐ, ओ औ' इत्यनयोः इ-उ इत्येताभ्यां सह सम्बन्धवशादेव उक्तवर्णयोस्तत्सध्रीचीनतया न्यासः। प्रसिद्धः क्रमश्च अ १ आ २ इ ३ ई ४ उ ५ ऊ ६, ऋ ७ ॠ ८, लृ ९, ॡ १०, ए ऐ ११-१२, ओ १३ औ १४, अं १५ अः १६' इति।

'ब्रह्म' शब्दे 'व, र, ह, म' वर्णा भवन्ति। तत्र 'व' २३ संख्याकः, 'र' संख्या २७, 'ह' संख्या ३३, 'म' संख्या २५। २३+२७+३३+२५ संख्यायोजनेन १०८ संख्या भवति; ततो ब्रह्मप्रतिपादकस्य सूर्यस्यापि १०८ वारं जपनं युक्तम्। 'संसार' शब्दे 'स अं-स-आ-र' इमे वर्णाः; तत्र 'स' इत्यत्र ३२+अं १५+, स - ३२ + आ - २ + र - २७ इमे वर्णाः सम्भूय १०८संख्या भवति। तदा १०८ संख्याकसंसारापसारणायापि १०८ वारम् १०८ संख्याकब्रह्मजपः कर्तव्यः।

'सीतारामोपि ब्रह्म। अत्र स - ३२+ई—४+त-१६+आ२र—२७+आ- २ + म - २५= एषामङ्कानां योगेपि १०८ संख्या निष्पद्यते। एवं 'रामकृष्ण' शब्दोपि ब्रह्म। र—२७+आ—२+म-२५+कृ—१+७+(प्रसिद्धक्रमेण) ष—३१+ण—१५=एषां वर्णानां संकलनेपि १०८ संख्या सम्पद्यते। एवं 'राधाकृष्णो'पि ब्रह्म—र—२७+आ—२+ध—१९+आ—२+कृ-१+११+(पूर्वोक्तेन विशिष्टक्रमेण) ष्—३१+ण-१५=एवमत्रापि १०८ संख्या भवति। एवं 'कैलाशनाथो'पि ब्रह्म—क—१+ऐ ८ (पूर्वोक्तेन विशिष्टक्रमेण) +ल—२८+आ—२+श—३०+न २०+आ २+थ-१७ =एषामपि वर्णानां संख्या १०८ दृष्टा।

एवं मालामणीनाम् १०८ संख्याया ब्रह्मविचारसम्बद्धता सिद्धा। १०८ अत्र १+८ इत्यङ्कद्वयं योजयित्वा ९ भवति। ९ अङ्कश्च ब्रह्मणः-इति उक्तपूर्वम्। एतस्या १०८, १८, ९ संख्याया ब्रह्मसम्बन्धवशाद् अक्षयत्वेनैव आस्माकीनैः पूर्वजैः शास्त्राणि लिखितानि। यथा च—श्रीव्यासेन १८ पुराणानि लिखितानि। महाभारतस्य पर्वाण्यपि १८, उपपुराणान्यपि १८, औपपुराणान्यपि १८। महाभारते अक्षौहिणीसंख्यापि १८ आसीत्। गीतायां श्रीकृष्णपरब्रह्मण उपदेशा अपि १८ अध्याये राशीकृताः। श्रीमद्भागवतपुराणस्य श्लोका अपि १८ सहस्रं निर्मिताः। गोस्वा-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मितुलसीदासेन श्रीरामसेनायामपि १८ पद्मवानराः प्रोक्ताः ।

१८ इत्यस्य योगः १+८=९ इत्यस्ति । एतच्च ब्रह्मरूपम् इति पूर्वमुक्तमेव । युगानां संख्यापि ईदृश्येव । सत्ययुगस्य संख्या १७२८००० वर्षाणि, १+७+२+८ योगे कृते १८, एतद्योगे च १+८=९ संख्या फलति । त्रेतायुगस्य संख्या १२९६००० वर्षाणि । एषां योगः १+२+९+६=१८ । ततः १+८ अनयोर्योगः ९ फलति । द्वापरयुगस्य वर्षसंख्या ८६४००० । एषां योगेपि ८+६ +४=१८, १+८=९ संख्या निष्पद्यते । कलियुगस्य वर्षसंख्या ४३२००० । अत्रापि ४+३+२=९ संख्या जायते । चतुर्युगसमुच्चयः ४३,२०,००० अत्रापि योगः ९ एव । एककल्पस्य वर्षाणि ४,३२,००,००,००० मितानि । एषामपि संकलनेन ९ अंको निष्पद्यते ।

अयं नवांकश्च अक्षयः; अतएव सत्ययुगस्य प्रारम्भोपि अक्षयनवमीतो मन्यते । अद्यापि कार्तिक-शुक्ला नवमी 'अक्षयनवमी' कथ्यते । अस्य नवांकस्य ब्रह्मणोऽङ्कत्वाद् महत्त्वं नवदुर्गाः प्रकीर्त्यन्ते । नवार्णमन्त्रस्य वर्णा अपि नव, ग्रहा अपि नव, नक्षत्राण्यपि २७ (२+७=९) नवगुणितानि, नवाङ्कत्वादेव 'न क्षरतीति नक्षत्रम्' इति नक्षत्रस्य अक्षयत्वम् । राशीनां पादा अपि नवतिसृभिर्व्याहृतिभिः सह गायत्री मन्त्रस्य वर्णा अपि २७ (२+७=९) अत एव तज्जपनस्यापि अक्षयि फलम् । महाभारतयुद्धे मरणाद् अवशिष्टा अपि जना नव (पञ्च पाण्डवाः, श्रीकृष्णः, अश्वत्थामा, कृपाचार्यः, कृतवर्मा) । अस्माकं शरीरे छिद्राण्यपि नव । अङ्का अपि नवैव । एवं नवगुणितानां दीर्घदीर्घाणामपि अङ्कानां योगो नवैव भवति, यथा १०८×९=९७२ (९+७+२=१८, १+८=९) १९४८×९ =१७५३२ (१+७+५+३+२=१८, १+८=९) एवम् अङ्कानां गुणनफलशुद्धतायां द्रष्टव्यायामपि 'नौकटी' कल्पनया नवाङ्क एव आवश्यको भवति । एवं सर्वसंसारस्यापि ब्रह्मता सिद्धा ।

एवं नक्षत्राणि २७ भवन्ति. प्रत्येकनक्षत्रस्य 'चूचेचोला अश्विनी' इत्यादिरूपेण चत्वारः पादा भवन्ति । एवं गुणनफलम् १०८ । एवं नक्षत्राणां मालायाः १०८ संख्यात्वाज्जपमालाया मणीनामपि १०८ संख्या भवति । नक्षत्रमालाया यत्र उभयतः सम्मेलनं भवति, स सुमेरुपर्वतो भवति । एवं जपमालाया अपि संयोजनस्थानं 'सुमेरुः' कथ्यते । एवम् १०८+१८+९ अङ्कानां रहस्यपूर्णता सिद्धा ।

## विनोद— वाटिका

( माधुरी देवर्षिः, वानपुरम् )

'अहो ! पण्डितमहाशस्य कथा अतीव मधुरा !" कथावाचकस्य कथां शृण्वन् एकः प्रावोचत् । "आम; अतएव तु तदुपरि मक्षिका भिनभिनायन्ते;" अपरस्मिन्नेव क्षणे द्वितीयो जगाद !!

× × ×

रामः श्यामश्च द्वावपि सुहृदौ आस्ताम् । परन्तु द्वौ अपि उच्चं शृणुतः स्म । (किञ्चिद् बधिरौ आस्ताम्) एकदा राजमार्गस्य मध्ये द्वौ अपि अमिलताम् ।

रामः अपृच्छत्—अहो ! श्याम ! कुत्र गच्छसि चित्रपट दर्शनाय गच्छसि किम् ?

श्यामः—नैव, नैव । अहं तु चित्रपट दर्शन गच्छामि अद्य ।

रामः—आः ज्ञातम् । मया विचारितमासीत् य भवान् चित्रपट दर्शनाय गच्छति । इति—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भारतीयदर्शनसन्देशः

ले० पं० चन्द्रदेवशर्मा, धर्मशास्त्राचार्यः बेतिया चम्पारन, बिहार

[पूर्वानुवृत्तम्]

स्पर्शस्य शब्दस्य रसस्य चैवं गन्धस्य भूतोद्भवविक्रियाणाम्।
प्रतिक्षणं प्राप्तविपर्ययाणां दृष्टिभ्रमाद्विभ्रम एव लोकः ॥ १६ ॥

दृष्टिभ्रमोद्भासितविभ्रमेषु प्रसक्तिरेवानुगता प्रसूतिः।
कामादिषड्वर्गविजृम्भणस्य लोको यतोऽनर्थपरम्परौकः ॥ १७ ॥

प्रतिक्षणं धावति विश्वधात्री ध्रुवावभासा धरणी सुधूम्ना।
स्वाङ्गेन गन्धेन गुणेन साकं समेतुमद्धा सलिलं विशालम् ॥ १८ ॥

रसान्वितं सर्पति तत्सलीलं होतुं स्वमग्नौ सलिलं समिद्धे।
अग्निः पुनर्गच्छति वेगविद्धो वायुं सरूपस्तु तदात्मतायै ॥ १९ ॥
वायुः पुनः स्पर्शगुणेन साकं विलीयतेऽसौ नभसा निपीतः।
नभः स्वशब्देन गुणेन नद्धं विगाहतेऽहं पुनरात्ममूलम् ॥ २० ॥
अहं स्वयोनौ पुनरेत्यनल्पं महत्तराव्यक्तगतौ प्रकामम्।
अव्यक्ततत्त्वं स्वगुणैरुपेतं निपीय सद्ब्रह्म विराजतेऽन्ते ॥ २१ ॥
पुनः सतोऽव्यक्तमहं ततश्च नभस्तु तस्मात्पवनस्ततश्च।
तस्मादुदेत्यग्निरनल्पतेजास्तस्माज्जलं क्षोणिरुदेति तस्मात् ॥ २२ ॥
एवं तिरोधानसमुद्भवाभ्यां विश्वम्भरेऽस्मिन् विधृतं हि विश्वम्।
विश्वम्भराभान्यदवेयमानं भद्रात्मनां भद्रभवाय भूयात् ॥ २३ ॥
जाग्रज्जगत्यामनुभूयमानाः स्थूलात्मना रूपरसादिभावाः।
स्वप्ने भवन्त्येव मनःप्रलीनास्तत्तत्स्वकीयेन्द्रियसार्थलीनाः ॥ २४ ॥
मनोऽपि सम्यक् स्वविभूतिविद्धं सन्धीयतेऽव्यक्तपदे प्रलीनम्।
सुषुप्तिकाले, समवैति भूयोऽव्यक्तं सदात्मन्यथ सर्वथा तत् ॥ २५ ॥
सदात्मनोऽव्यक्तमुदेति भूयस्ततो मनस्तत्करणानि तस्मात्।
तेभ्यः पुनस्तद् विषयप्रकाशा जन्तोः पुनस्सद्विमतौ विमर्दः ॥ २६ ॥
समाधिभाजामपि सत्समाधौ क्रमोऽयमुन्नीयत एव सद्यः।
सद्भिः सदैतन्निजबुद्धिवृत्तौ वृतं विभाव्येत सदुद्गमाय ॥ २७ ॥
एवं तिरोधानसमुद्भवाभ्यां सर्वं सदात्मन्यवधार्यमानम्।
सदात्मनोऽन्यन्नभविभाव्यमानं सतां सुभद्रावगमाय भूयात् ॥ २८ ॥
व्यष्टौ सदात्मा सततं विभाव्यो विश्वम्भरोऽसौ सतत समष्टौ।
सम्बन्धमेतस्य च तस्य भूयः सन्तः स्वबुद्धावथ भावयन्तु ॥ २९ ॥

(क्रमशः)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# लेखान् कथं लिखेम ?

ले० देवर्षिकलानाथशास्त्री साहित्याचार्यः, जयपुरम्

अद्य संस्कृतजगति नवीना क्रान्तिरपेद्यते । संस्कृतपण्डितेषु, संस्कृतपत्रेषु संस्कृतसम्मेलनेषु च सर्वत्रातिप्रत्नानां पद्धतीनां स्थानं नवीनाः प्रथाः गृह्णीयुः इत्यद्य युगस्य वाञ्छा । सर्वभाषाणां जननी सेयं संस्कृतभाषा सकृत् पुनरपि सर्वमूर्द्धन्यं स्थानं ग्रहीतुं समर्था, यदि अस्याः सेवका अधिकारिणश्च परिवर्तनस्य विरोधं न कुर्युः । इदमेव के० एम्० मुंशी-महोदयेन अधुनैव झांसीनगरे उक्तमासीत् । पुनरद्य संस्कृते नवीना चेतना जागृयात् एतदर्थमस्याभियत्नः कार्यः । भगवत्कृपया एवंविधा क्रान्तिः चेतना च शनैः शनैः संस्कृतपण्डितेषु छात्रेषु च समागच्छति संस्कृतपत्रेष्वप्यद्य तथाविधैव क्रान्तिरपेद्यते । तान्येव जनतायाः सम्मुखे भाषाया अस्या वास्तविकं स्वरूपं निदधति । तेष्वद्य पुराणपद्धतेः बहिष्कार एव कार्यः स्यात् । सकृत् अस्माभिरिदमपि दर्शनीयं यद्वयं कथ-मेवंविधां क्रान्तिमानेष्यामः ?

अद्य बहवः पण्डिताः पत्रसम्पादकानेतदर्थमाक्रो-शन्ति यत्तैस्तेषां लेखः पत्रे न प्रकाशितः । कतिपये तु पत्रस्य ग्राहकत्वमपि त्यजन्ति यत्तेषां लेखा न प्रका-श्यन्ते । किन्तु ते तदिदं क्षणायापि न विचारयन्ति यत्ते कीदृशं लेखं लिखन्ति? अद्य च जगत् कीदृशानां विचाराणां वाञ्छां कुरुते । पण्डितानां बहुधा सेयं प्रवृत्तिर्भवति यत्ते गणेशस्तुतिं, सरस्वतीस्तुतिं च जीर्णप्रायेषु पत्रेषु अवाच्यैरक्षरैर्लिखित्वा पत्रसम्पाद-कानां सविधे प्रेषयन्ति । उत्सवसमये मन्दिरादिषु पठनाय च पण्डितैर्या रचना स्तुतिर्वा निर्मिता भवति तामेव ते प्रेषयन्ति यत आलस्यभुग्नास्ते पत्राणां कृते किमपि लिखितुं न प्रयतन्ते । घुणाक्षरन्यायेन यत्किमपि लिखितं तदेव ते स्वनाम्ना पत्रे प्रकाशितं द्रष्टुमिच्छन्ति—न प्रकाशितं चेदग्निशर्माणो भवन्ति । अद्य हि युगं यया गत्याऽग्रेसरमस्ति तां गतिं वीक्ष्य वयं चकिता भवामः । यया गत्या ध्वनिर्गच्छति तयैव गत्याऽद्य वायुयानानि प्रचलन्ति । एकं शब्दमुच्चार्य भवानमेरिकातः भारतं प्रति वायुयानेन प्रचलतु, तेन शब्देन सहैव भवानत्रागमिष्यति, तं शब्दं च श्रोतुं शक्ष्यति । इयत्या तीव्रगत्याऽद्य समयः युगं च प्रचलति !! वयं तु पिपीलकगत्या चलन्तः अद्यापि अष्टादश-शताब्द्यां वर्त्तामहे । वयं मन्दिरेषु स्तुतीः पठामः, स्तोत्राण्युद्घोषयामः, किन्तु संसारस्य सम्मुखे किमपि नवीनं वस्तु न विदध्मः । अद्य पत्रिकासु स्तोत्राणां शोभा नास्ति । चित्रकाव्यानि न पठ्यन्ते । कमल-बन्धाः, हारबन्धाश्च नाद्रियन्ते । सभङ्गाभङ्गश्लेषा न बोद्धुं पार्यन्ते । शास्त्रार्थस्य युगं गतम् । शाब्दबोधानां न कोऽप्युपयोगः । फक्किकापाण्डित्यं कोणे गतम् । युगमेवंविधानि वस्तूनि न वाञ्छति ।

सर्वमिदं जानन्तोऽपि वयं न जानीमः । पत्रिकासु प्रकाशनाय प्राचीनं स्तोत्रकाव्यं सम्पादकाय प्रेषयामः तदपि एतावद्दीर्घं भवति यत्समग्रस्य प्रकाशनाय सर्वस्या अपि पत्रिकायाः कलेवरमेव पूर्येत । तथाऽ-प्यन्ते लिखामः—'क्रमशः' इति । वराकः सम्पादकः सकृन्मूर्च्छितो भवति । कदाचन वयं पुराणधर्मान् विवेचयामः, कदाचन वेदार्थमुद्घोषयामः, शास्त्रार्थ-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मुद्घोषयामः । यदाकदा चावच्छेदकावच्छिन्नपद-गुम्फितां शब्दाडम्बरशैलीं विलिख्य पातयामः पत्र-कूपिकायाम् । न जाने पुरातनपरिपाटीगवेषणे पतितास्माकं दृष्टिः पृष्ठत एवानुधावति, नाग्रे गन्तु-मीहते । यदा वयं लेखान् लिखामस्तदा शौचगमनस्य समये, विद्यालये रिक्तान्तरेषु वा त्रुटितया लेखन्या लिखामः—जीर्णेषु पत्रेषु । कथं च लिखामः ? पाणिनेस्त्वगुद्घाटनं कुर्मः । यङन्तानां यङ्लुगन्तानां चाख्यातानां भृशं प्रयोगं कुर्मः । 'वर्वर्ति' 'दरीदृष्यते' सन्धिः, समासः, प्रक्रिया सर्वमपि सहैव सन्निविष्टं भवति । एकां सिद्धान्तकौमुदीप्रतिं पार्श्वे रक्षामः कठिनानां प्रयोगाणां गवेषणाय । लेखस्यार्थः खलु—'अहं वेद्मि शुको वेत्ति संजयो वेत्ति वा न वा" भवति । लेखकः स्वयमर्थं वेत्ति, पाणिनिर्वेत्ति, सम्पादको वेत्ति वा न वेति सन्देह एव भवति । इयं तु भाषायाः कथा । लिपेरपि श्रूयताम् । शास्त्रार्थ-विदुषामस्माकं त्रुटिता लेखनी जीर्णेषु पत्रेषु यथा-विधमक्षरगुम्फं विलिखति; तं दृष्ट्वाऽशोकस्य शिलालेखानां भ्रमो भवति—सन्दर्भस्तु लम्बलम्बाय-मानो भवत्येव—पत्रस्य कोणः कोणोऽपि मसीलिप्तो भवति सहैव—

"वाचयति नान्य लिखितं—तेन च लिखितं न वाचयत्यन्यः । सखि मम भर्ता विद्वान्—स्वयमपि लिखितं स्वयं न वाचयति" ।

सोयं श्लोकोऽपि स्मृतिपथमुपारोहति । तदनन्तरं वयस्माकं पाण्डित्यस्योपरि घमण्डमुद्रामेकां निर्माय लेखं प्रेषयामः ।

अधुना विचार्यतां यत् पाण्डित्यमय्या भाषायाः प्रयोगं पठित्वा सम्पादकस्तु निश्चितमेवाऽस्माकं पाण्डित्यस्य प्रशंसको जायते—परं तादृशीं भाषां को वा पाठको बुद्ध्येत ? तादृशान्यक्षराणि कथं वा अक्षरसंयोजकः ( कम्पोज़िटर ) पठेत् ? स हि शास्त्री आचार्यो वा न भवति । यत्र स्वयमपि स्वाक्षराणां वाचने सन्देहस्तदा कथं वाऽन्यस्तेषां वाचनस्य साहसं कुर्यान्नूनम् ? अतएव वराकः सम्पादको मासस्यारम्भे 'प्रेस' कृते यदा लेखसामग्रीं दातुं प्रकाशकेन आदि-श्यते तदा लेखान् शिरसि संस्फोट्य रोदिति । पत्र-प्रचालने अर्थस्याभावे पूर्वमेव संकटा दशा—अधुना लेखानामियं स्थितिः । ईश्वर एव सहायस्तस्य । तदुपर्यपि पण्डितपुङ्गवस्याक्रोशो यन्मम लेखः किमिति न मुद्रितः ?

अधुना श्रीमद्भिर्ज्ञातं स्यात् यदस्माकं लेखाः किमिति न प्रकाश्यन्ते ? अद्य कविताया युगं नास्ति । शास्त्राणां चावश्यकता नास्ति । सरलया भाषया-सरलेन छन्दसा च लिखितां रचनां कामं पठन्तु पाठकाः, किन्तु कठिनभाषाघटितां श्लिष्टां च कवितां न कोऽपि पठितुमुत्सहते । चित्रकाव्यानि स्तोत्राणि च न रुचेः सामग्री । न कार्यः श्रमस्तदर्थम् । कविता संक्षिप्ता भवेत्—मनोरञ्जिका सरला च भवेत् । शिक्षितानामयमाक्षेपो यत्संस्कृते हास्यरसस्य साहित्यं नास्ति । एतदर्थं हास्यरसस्य कवितानां नितरामपेक्षा । अहमेवंविधकवितानां गद्यकाव्यानां च कृते लेखकान् प्रार्थयामि । एवमेवाद्य संस्कृते लघु-कथानां ( Short Story ) महती अपेक्षा । यासां महत्त्वमद्य प्रत्येकं साहित्यं वेत्ति । संस्कृतपण्डिताः यदि शास्त्रार्थान् विहाय कथा लिखेयुस्तर्हि महदुपकृतं स्यात् । हिन्द्यां, वङ्गभाषायामन्यासु वा भाषासु

(अवशिष्ट ६१ पृष्टे)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भारते भातु भारती

ले० वर्णमालाचार्यः कथाभट्ट श्रीधन्नालालशर्मा दधिमथः जयपुरम्

पाश्चात्यस्याधिकाराद्भो भारताद् भारती गता ।
अत्रत्यभूपतो धन्या भारते भातु भारती ॥१॥

मुखपृष्ठे प्रस्तुत 'भारतीपत्रे'–भारते भातु भारती' ति शुभाकांक्षा हठात् दृक्पथमाकर्षति । अज्ञानान्धकारनिपतिताः स्थूलदृष्टयो यथा न जानन्ति मायानुपहितं ब्रह्म तथैव पद्यांशस्यापि गूढाशयं नहि सर्वो विजानातीति मनसिकृत्य अत्रत्यं भारतीयं गूढं रहस्यं प्रकटयितुं तत्र भवतां मनांसि आन्दोलयामि ।

अयमाशयः—पाश्चात्यानां भारते अधिकात् अस्माकं भारती अस्ताचलं समाश्रितेव, सम्प्रति स्वातन्त्र्ये लब्धे सति स्वजनप्रयासेन सा गौरवमयी उत्तमा भारती । अथ च वर्णमालाचार्यकथाभट्ट-धन्नालालकृत-अक्षराभ्यास-हिन्दी-शिक्षापाठ्यक्रम-व्युत्क्रमोपरि प्रश्नोत्तरीरूपा भारती पुनरपि भारते भातु-प्रतिष्ठां लभतां नामेति ।

भारत्या महत्वप्रदर्शनाय प्रश्नोत्तररूपं प्रथमप्रश्नस्योत्तरं प्रदीयते— अक्षराभ्यासशिक्षाया निर्माणे किं प्रयोजनम्—

ओं चक्रसमयज्ञार्थं विश्वरक्षाकरं धन !
प्रथमं वहते वायुः द्वितीयश्च तथानलः ।
तृतीयं वहते भूमिश्चतुर्थं वरुणस्तथा ।
पञ्चमं च तथाकाशः क्रम एष स्वरोदितः ॥१॥

अत्र हि ओंकारस्य विश्लेषणम्—अ + उ + म इतिच्छेदाः भवन्ति । तत्र स्वरोदयक्रमोदितानि तत्वानि तत्वाक्षराणि वा एवं समन्वेतव्यानि—हकारः व्योमरूपः सहि अकारेण गृह्यते । यकारः वायुरूपः सहि इकाराकृतिरूपः । हकारश्चात्र अइउण् इति सूत्रे प्रत्याहारवत् अन्तश्छन्न इव मन्यते । स हि कार्यकाले प्रत्याहारवर्ण इव गृहीतः । तेन यकारः, तस्माद्विकारो वायुरूपो गृह्यते । उकारः तेन तद्विकृतरूपः वकारो जलरूपेण गृह्यते । ह य व इति वर्णत्रयं समन्वीयते । अतः परञ्च प्रणवस्य मकाररूपा मात्रा व्यंजनरूपावशिष्यते । तथा च ऋ लृ इति वर्णद्वयं गृह्यते । ऋकारस्य विकृतिरूपो रेफः लृकारस्य विकृति स्वरूपो लकारश्चापि स्वीक्रियते । हकारः स्वरवत् ग्राह्यः । ऋ लृ वर्जितः स्वरो ग्राह्यः इति स्वसूत्रभाष्ये निर्णीतत्वात् । एवं पञ्चापि तत्वानि वर्णरूपतः ओंकारे समन्वयन्ते । तेन ओंकारश्चक्ररूपेण निरूप्यते ।

बिन्दुरूपः समयः पंचभूतात्मकः उत्पत्तिस्थितिलयात्मकत्वात् । य र ल व ह एतैर्बिन्दुर्निरूप्यते । आकाशाद् वायुरुत्पन्नः य र ल व ह एते समयं निर्दिशन्ति ।

यकारस्य विंशतिपलानि (८ मिनट) समयः । उच्चाटनकर्ता च । रेफस्य चत्रिंशत्पलानि, (१२ मिनट) मृत्युकर्ता । लकारस्य पंचाशत् पलानि (२० मिनट) समयः, स्तम्भनकर्ता । वकारस्य चत्वारिंशत पलानि, (१६ मिनट) शान्तिकर्ता । बिन्दुरूपहकारस्य दशपलानि (४ मिनट) । स हि शून्यरूपः ।

पृथिव्याः पंचाशत् पलानीति चत्वारिंशत् तथा–म्भस इत्यादिप्रमाणत्वात् । तत्समयानुसारं कार्यक्रमो निरूप्यते तत्समयानुकूलं विश्वस्य जीवस्वरूपस्य रक्षां करोति विश्वस्वरूपं अत्र वर्ण्यते—पृथिव्यापस्तथा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



तेजो वायुराकाशमेव च । पंचभूतात्मकं विश्वं यो जानाति स पूजितः ।

ओंकारस्य त्रिमात्रत्वात् त्र्यम्बकत्वम्, त्र्यम्बक-यजनात् मृत्युञ्जयो भवति, त्र्यम्बकं यजामहे इति प्रमाणत्वात् ।

ओंकारचक्रसमयज्ञानार्थस्य व्याख्यारूपा इमे श्लोकाः

ऊर्ध्वं मृत्युरधः शान्तिः तिर्यगुच्चाटनं तथा ।
मध्ये स्तम्भं विजानीयान्नभः सर्वत्र मध्यमम् ॥
अक्षराभ्यासशिक्षाया निर्माणे किं प्रयोजनम् ।
स्वप्रत्ययात्मरक्षार्थं पाठलेखकृतं धन ! ॥

ओंकारस्य सर्वकर्मत्वबोधने—ॐकारस्य ब्रह्मा ऋषिर्गायत्रीच्छन्दः, अग्निर्देवता शुक्लो वर्णः सर्वकर्मारम्भे विनियोगः इति मन्त्रेण सुस्पष्टम् ।

समयचक्रम्—योगशास्त्रदृष्टया । सं—सकार-रूपं स्वरप्रदेशरूपिणं गतिविशेषं अयते—प्रति प्राप्नोति ।अत्र प्रत्यागमनेन पूर्वं निर्गमो हकाररूपेण घ्राणस्य प्रतीयते । स एव सकारेण पुनः प्रविशति नासायाः क्रमात् दक्षिणं दक्षिणात्पुनः वामं, चक्ररूपेण च मध्यस्थायां सुषुम्नायां कुम्भकरूपेणावस्थानं प्राप्य पुनः संप्रविशति । चक्रभ्रमिवत् उद्गत्य स्थित्वा उत्तरति इत्येवंरूपं चक्रं बोद्धव्यम् ।

समयस्य चक्रमपि—कालस्य वृत्तमपि एवं भ्राम्यति । तदिदं स्पष्टीक्रियते—हकारेण बहिर्याति सकारेण विशेत्पुनः इति नियमानुसारं हंपदं बहिर्भवनस्य संपदं प्रवेशस्य एवं हंस, हंस इति ध्वनयन् प्राणचक्रं चलति । विलोमदृष्ट्या सोऽहं इति अजपा-मन्त्रत्वेन वेदान्तयोगादिषु मन्यते ।

अस्मद्वर्णमालायाः परिभाषायां—य र ल वेति व्युत्क्रमं ह य र ल वेति वर्णाः, तस्यानुगत्या 'हं' स इति पदद्वयमध्ये हचक्राकारेण भ्राम्यति । तस्मादेव समयचक्रं कथ्यते । हकारेण सह य र ल वा संप्रविशन्ति । हंवर्णेन आकाशो गृह्यते, तदस्मिन् आकाशे सर्वे वर्णास्तत्र तत्त्व-वाय्वग्निजलपृथ्वीरूपाः क्रमशः स्वस्वकालं व्यवहारयित्वा सं अयन्ते प्रविशन्ति इति सर्वसारम् ।

एवं ओंकारचक्रज्ञानेन समयचक्रज्ञानेन च अक्षराभ्यासशिक्षाजन्यं ज्ञानं विश्वरक्षाकरं भवति। विश्वं पञ्चतत्त्वात्मकं शरीरं जीवरूपं, तस्य रक्षाकरं भवति, जीवं रक्ष जीवं रक्ष जीवो जपति सर्वदा इति प्रमाणत्वात् ।

धन ! इति स्वात्मसम्बोधनं ग्रन्थकर्तुर्बोध्यम् जीवरक्षासाधनप्रकारबोधकोऽयं श्लोकः—

चन्द्रं पिबति सूर्यश्च, सूर्यं पिबति चन्द्रमाः ।
अन्योन्यकालभावेन जीवेदाचन्द्रतारकम् ॥

इति शिवस्वरोदयः ।

जीवरक्षाप्रकारोऽत्र वर्ण्यते—यस्यां नासिकायां श्वाससंचारो भवति सा पूर्णनासिका कथ्यते । तदितरा च शून्यनासिका । शून्यनासिकाभागे शत्रुशस्त्रादिघातकानां स्थितिः कार्या । यथोक्तम्—

न कालो विविधं घोरं न शस्त्रं न च पन्नगाः ।
न शत्रुसर्पचौराद्या शून्यस्था नासितुं क्षमा ॥

इति शम् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

### राजस्थानप्रान्तीयसंस्कृतसाहित्यसम्मेलनम्

दसम्बरमासस्य २७-२८ तारिकयोः राजस्थानप्रान्तीयस्य संस्कृतसाहित्यसंमेलनस्य चतुर्थमधिवेशनम् अलवरनगरे समभूत्। नगराद् बहिः सुरम्ये संस्कृतमहाविद्यालयस्य छात्रावासे प्रतिनिधीनां स्थानव्यवस्था कृताभूत्। तत्संमुखे एव विशाले प्राङ्गणे सुविस्तीर्णस्य सभामण्डपस्य निर्माणमक्रियत। प्रथमे दिने प्रातर्विषयनिर्धारिण्याः समितेरधिवेशनमभूत्। ततो मध्याह्ने केन्द्रीयसर्वकारस्य गृहमन्त्री श्री कैलासनाथकाटजूमहोदयः अधिवेशनस्योद्घाटनसमारोहार्थं सभाभवने समागच्छत्। ततः सभाकार्ये प्रारब्धे संस्कृतश्लोकमङ्गलगीतिरगीयत। ततः संस्कृतकालेजस्याध्यक्षः श्रीमान् शम्भुदत्तशास्त्रिमहाभागः समागतानां महतां स्वागतमकरोत्। प्रोक्तं महाभागेनानेन यत् गृहसचिवमहाभागस्यागमनं संस्कृतसेविनां संप्रति सौभाग्यावहम्। संस्कृतभाषा सेयमार्याणां सर्वथा गौरवसूचिका। परन्तु गौरवमिदं मध्यकाले नानाविघ्नैरभिभूतमिव। एतत्पुनरवाप्तुमस्माभिर्यतितव्यम्। अस्माकमेतदर्थं यः प्रयत्नो भावी, तदर्थं गृहमन्त्रिमहाभागस्य सहयोगः साहाय्यं च महते उपकाराय भवेत्।

एतदनन्तर पतञ्जलिमहोदयः समागतानां विदुषां स्वागतगीतिं सुमधुरेण स्वरेणाऽगायत्। ततः श्रीमान् काटजूमहोदयो हिन्दीभाषाया निजभाषणमारभत—

"अहं संस्कृतभाषां नाममात्रतो जानामि। लाहोरनगरे अष्टमासान् मया संस्कृतमधीतम्। ततः स्वातन्त्र्ययुद्धे कारागारवासे—श्रीपुरुषोत्तमदासटंडनमहोदयो गुरुः कलितः। अतएव संस्कृतमिदं बोद्धुं पारयामि। अहं पुरा राजस्थाने बहु न्यवसम्। तत्र प्राचीनसंस्कृतेर्बाहुल्यमासीत्। स्थाने स्थाने संस्कृतकालेजा आसन्।

---

स्वल्पाकारा याः कथाः प्रकाश्यन्ते तासामनुवाद एव करणीयः। वयं त्वद्य संस्कृते आधुनिकसाहित्यस्य वृद्धिं वाञ्छामः। लघूनां व्यङ्ग्यचित्राणां, विचित्रघटनानां च सरलया भाषया निबन्धनं परमावश्यकम्। अद्य जगति राजनीतिक्षेत्रे, विज्ञानक्षेत्रे वा यत् कार्यं भवति तस्य परिचय आवश्यकः। तदर्थं समाचारपत्रेभ्यः लेखानाम् अनुवादं कृत्वा मौलिकानां लेखानां वा प्रेषणमद्यातीवावश्यकम्। पञ्चवर्षीययोजनायां किमस्ति? अमेरिकायां निर्वाचनानि कथं भवन्ति? चन्द्रलोकस्य यात्रार्थं कथमेका समितिः स्थापिता, कथं मङ्गलग्रहे वृक्षा दृश्यन्ते—इत्यादयो विषया अतीव मोहका आङ्गलभाषायाः पत्रेषु प्रकाश्यन्ते—परमेकोऽपि संस्कृतलेखकस्तथाविधान् लेखान्न प्रेषयति। वयं केवलं काव्येषु शास्त्रेषु च विचरामः, एतद्बहिर्विषयं लेखस्य सामग्रीमेव न पश्यामः!! मनोरञ्जनमाधारीकृत्य विनोदसामग्रीं संस्कृते पुरस्कर्तुं मया लेखकाः प्रार्थ्यन्ते। सहैव सुन्दराक्षराणां लेखनम्—प्रघट्टकानां पृथक्करणम्-पत्रस्यैकस्मिन्नेव पृष्ठे लेखनम्—आयुषः (Margin) परित्याग इत्यादीनामपि ध्यानमावश्यकम्। एतानि खलु लेखस्य शीघ्रमुद्रणे सहायकानि भवन्ति यतस्तेषामक्षरसंयोजकमुद्रणकर्मचारिणां सौकर्यं भवति। लेखेषु पदच्छेदे स्पष्टताया आवश्यकताऽस्ति। एतत्सर्वं यदि वयं सकृत् परीक्षामहे तर्हि अस्माकमाक्रोशो यत् "मम लेखो न प्रकाशितः" सुतरामसंभव एव भवेत्।

एतदुपरि सर्वेषां लेखकानां विशेषतः छात्राणां विशेषावधानं वाञ्छामि। अत्र हि नोपेक्षा कार्या संस्कृतजनन्याः कलेवरवृद्धिः लोकोपयोगितासम्पादनं चास्माकं कर्त्तव्यम्। ऋणमिदस्माकम्। एतस्य परिशोधः कार्यः स्यात्। जागृतव्यमेव स्यादस्माभिः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



त ...व्यवहारेऽपि प्रायुञ्जत। दिल्ली-नगरे लघुरेको बालकः संस्कृतं सम्यगभाषत। स हि महाराष्ट्रबालकोऽभूत्। मम विचारे संस्कृतशिक्षणं न कठिनम्। लोका इमां मृतभाषां कथयन्ति, किन्तु ये स्वयं मृतास्ते एव तथा कथयन्ति। पुरा सेयं ब्राह्मणानां भाषासीत्। साम्प्रतमपि सेयं प्रेम्णा जनैरधीता।

एकापि भाषा देशभेदाद् भिद्यते। अंग्रेजीभाषा आङ्गलप्रदेशस्य पश्चिमे दक्षिणे च भागे भिन्ना भिन्ना। वङ्गभाषापि व्यवहारस्यान्या, साहित्यलेखनस्यान्या। तत एव व्यावहारिकी संस्कृतभाषा सर्वबोध्या संपाद्या। व्याकरणानां नियमा अतिविरलाः प्रयोज्याः। बालकानां प्रौढानां च शिक्षाप्रणाली परिवर्तनीया। इयं शिक्षा प्रौढेभ्यः सायंविद्यालयेषु सरलतया दीयताम्। एतद्-भाषायाः प्रचारस्य अत्यावश्यकता। मम विचारे राष्ट्र-भाषा सैव भवेत् या संपूर्णेऽपि राष्ट्रे प्रचरेत्। संस्कृतं मद्रास,गुजरात, पञ्जाम्बुप्रभृतिसर्वेष्वेव देशेषु प्रवृत्तम्। साधारणजनताया भाषायामेकस्य रूपस्य संपादनं संस्कृतभाषयैव कृतम्। मम विचारे सर्वैरेव अस्माभिः संस्कृतमध्येतव्यम् येन हि प्राचीनसाहित्यस्य परिचयो भवेत्।

लिपेरपि प्रश्नो महत्वपूर्णः। सर्वा अपि भाषा देवनागरलिप्यां लिख्येरन्। प्राचीनशास्त्राणि सर्वाणि नागरलिप्यामेव लभ्यन्ते। संप्रति सर्वस्मिन्नपि देशे स्वतन्त्रताया हर्षः। किन्तु तस्या रक्षा संप्रति कर्तव्या। वयं दरिद्राः क्षुधिताश्च, किन्तु स्वतन्त्राः। एतदर्थं संस्कृतभाषा महती सहायिका। संस्कृतस्य शृङ्खला अस्मान् पूर्वजैः सह संयोजयति। अतएव बालवृद्धाः सर्वे एव संस्कृतं जानीयुः। प्रौढानपि संस्कृतं पाठयेयु-रिति पण्डितेभ्यः प्रार्थना। सर्वा भाषा देवनागरलिप्यां लिख्येरन्। एकतायाः स्फूर्तिर्भवेत्।"

ततः सम्मेलनस्यास्य सभापतेर्निर्वाचनप्रस्तावः चलत्। 'भारती' पत्रस्यास्य संपादकः समुत्थाय संस्कृतभाषया महत्त्वम्, एतत्सम्मेलनस्य कृते श्रीमतो ...त्तमलालजोशीमहोदयस्य सभापतित्वं प्रास्तावीत्। बीकानेरस्थः श्रीमान् विद्याधरशास्त्रिमहाभागः समर्थनमकरोत्। ततः सभापतिर्मुद्रितं निजभाषणं प्रकाश्य सम्मेलनेऽपठत्। विस्तृतस्यास्य सारभागो यथावसरं पाठकेभ्यः समये समयेऽग्रेपि उपाह्रियेत। अयं संप्रति संक्षिप्तः सारः—

"अस्माकं संस्कृतभाषा विश्वसाहित्येऽपि सर्वादिमा। वेदोपनिषत्स्मृति, सूत्र, पुराण, ज्योतिषायुर्वेदादि-संबद्ध वाङ्मयमस्यामेवास्ति यद्भूमण्डलेऽपि सुप्र-सिद्धम्। आहिमालयात् कुमारिकापर्यन्तं भेदेऽपि यत् अभेदो दृश्यते, वैचित्र्यजनकेषु देशकालवर्णजातिधर्म-संप्रदायादिषु सत्सु अपि भारतीयसंस्कृतेर्यत् अपार्थ-क्यमुपलभ्यते तत्र केवलं निदानं वन्द्या सुरभारती तद्ग्रन्थाश्च। किन्तु निवृत्तेऽपि वैदेशिकशासने दैशिक-दास्यमस्माकं निवृत्तम्, किन्तु तद्भावभाषाभरितं मानसिकदास्यं तु अद्यापि अस्माकं महत्तरेष्वपि दृश्यते एव। तदिदं संस्कृतभाषैव दूरीकर्तुं शक्नुयात्। संप्रति स्वतन्त्रता उच्छृंखलता चेति अनर्थान्तरमिव मन्यते जनैः। अध्यापकेषु छात्रेषु व्यापारिसंघे राजवर्गे सर्वत्रापि नैतिकत्वाभावः अक्षिगोचरो भवति। एतद्दो-षदूरीकरणाय संस्कृतभाषायां सर्वत्रोपलभ्यमाना अहिंसासत्यास्तेयादिसामान्यधर्मा नैतिकोपदेशाश्च पाठ्यक्रमे संनिवेशनीयाः।

संस्कृतभाषा कदापि लोकभाषा नाभूत् इति केषां-चित्कथनम् असत्। वैदिककालादारभ्य महाराजहर्ष-वर्द्धनराज्यपर्यन्तं मोहम्मदीयानामाक्रमणात्पूर्वं संस्कृत-मेव निरन्तरं राष्ट्रभाषाऽसीत्। पूर्वं संस्कृतायाः 'भाषा' इति नामासीत्, निरुक्ते पाणिनेः सूत्रेषु च तथैव नामोपलभ्यते। परमयं कालो विचित्रः। अधुना अर्थ एव परमो धर्मः! गौराङ्गाणां कूटनीत्या भारतीयाः स्वीयां संस्कृतिं गीर्वाणवाणीं च मुक्तकण्ठमधिक्षिपन्ति। अस्मिन् समये यदि संस्कृतभारती पुनर्यथास्थानं न स्थाप्येत तर्हि संस्कृतगोष्ठीं गायतां त्रिदुषामकर्मण्यता यात्। इदमान्दोलनयुगम्। 'संघे शक्तिः कलौ युगे' इति नियमानुसारं संघसमयोयम्। सुरभारत्या रक्षणार्थं स्थाने स्थाने सघाः स्थापनीयाः। यत्र प्रतिसप्ता



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रत्यहं वा संस्कृतचर्चा भवेत् । संस्कृतपत्र-पत्रिकाणां वाचनं वर्तेत । एतादृशानां ग्राम-नगरसङ्घानामेकः प्रान्तीयो महासंघः स्यात् । सर्वेषां च प्रान्तीयसंघानामेको निखिलभारतीयः परमसंघो भवेत् । एव भारतव्यापि संघटनं संस्कृतोन्नत्यै करणीयम् ।

संप्रति संस्कृतनिष्ठा हिन्दी राष्ट्रभाषा । संस्कृतविद्भिर्विशिष्टाः संस्कृतग्रन्थाः हिन्दीभाषायामनुवादनीयाः, येन भूयसी जनता तानधीत्य संस्कृतासक्तचित्ता भवेत् । शास्त्रविशेषज्ञाः स्वशास्त्रसिद्धान्तान् इतिहासभूगोलपरिचायकग्रन्थांश्च सुबोध्यदेववाण्यां रचयेयुः । पुराणेतिहासवार्ता पशुपक्षिदन्तकथा जीवनगाथाश्च अतिसरलसंस्कृते लेखनीया येन सामान्यजनानां विनोदः स्यात् । सर्वेषु विश्वविद्यालयेषु मैट्रिकपर्यन्तं संस्कृतभाषा अनिवार्यविषयवर्गे निवेशनीया येन राष्ट्रभाग्यविधायिनश्छात्राः तुलनात्मकदृष्ट्या तन्माहात्म्यं जानीयुः । इण्टर-बी. ए. परीक्षयोर्हिन्दीभाषामादानाश्छात्राः संस्कृतमनिवार्यविषयत्वेन गृह्णीयुः । संस्कृतपरीक्षाणामाङ्गलपरीक्षाभिः साम्यमुद्घोष्य सर्वैरपि राज्यैः संस्कृतपरीक्षोत्तीर्णाश्छात्राः राजसेवास्वन्यत्र वा नियोक्तव्याः, येन आर्थिकसमस्या समाहिता स्यात् । विशेषज्ञैः संस्कृतविद्भिः आङ्गलजर्मनादिभाषामधीत्य तत्रत्यं संस्कृतसम्बन्धि साहित्यं विज्ञेयं ततश्चोत्तमांशं संगृह्य विवेचनपुरस्सरं संस्कृतभाषायां प्रकाशनीयम्, येन केवलसंस्कृतज्ञा अपि स्वसाहित्यविषये परविचारान् जानीयुः ।

बालिकानां पाठ्यक्रमे तु संस्कृतं सर्वावस्थासु अपि अनिवार्यत्वेन पाठनीयम् । यतस्ताः प्रायेण धनोपार्जनधिया न पठन्ति । तत्संस्कृताध्ययनेन अस्माकीना संस्कृतिरक्षापि सुकरा । ता एव गेहस्वामिन्यः नवजीवनविधायिन्यश्च ।

विज्ञान-अर्थशास्त्र-राजनीतिप्रभृतिविषयकाः शब्दकोषाः संस्कृतविद्भिः सम्पादनीया येन आङ्गलभाषाऽऽधिपत्यं विलुप्तं स्यात् । संस्कृतपण्डितैः केन्द्रीयमन्त्रिमण्डलात् तत्तत्प्रान्तीयमन्त्रिमण्डलाच्च संस्कृतप्रचाराय द्रव्यसाह्यमादातुं यतितव्यम् । राष्ट्रियमन्ताराष्ट्रियं चैतत्साधुकर्म न कदाचिदपि साम्प्रदायिकमिति डिण्डिमघोषं घोषयितुं शक्यते ।"

एतदग्रे संस्कृतद्वेषिणां विषये सान्त्वनाय प्रोक्तमासीद् यत् पूर्वमपि एवंविधा अपचयकाला आगताः गताश्च । तत्प्रसङ्गे लार्डमैकालेशासनस्य सामयिको गवर्नरजनरलवेन्टिकवृत्तान्तः कलिकात्तास्थसंस्कृतकालेजस्य विलोपविषयकः सुरम्यः श्राव्यश्च । अतएव अग्रिमसंचिकायां प्रकाशयितुं प्रयतिष्यते ।

ततो द्वितीयदिने ( २८ तारिकायाम् ) प्रातर्नववादनावसरे विषयनिर्वाचिन्या अधिवेशनमघटत । तदवसरे एव समुपस्थितो राजस्थानशिक्षासचिवः श्रीभोलानाथ महोदयः स्वीयान् विचारानेतद्विषये हिन्दीभाषायां प्राकाशयन् । तस्य संक्षिप्तः सारः—

"संस्कृतज्ञाः संस्कृतभाषाया निधिसंरक्षकाः ( कस्टोडियन् ) । अतएव साधारणादारभ्य महापुरुषपर्यन्तं सर्वेषामेव हृदये एतान्प्रति महानादरः । कठिनदिनेष्वपि एतस्य धनस्य रक्षा यदा कृता तदा त्वद्य वयं स्वतन्त्राः । अस्माकं भविष्यत् उज्ज्वलम् । संप्रति परिवर्तनशीलेऽस्मिन् समये प्रचारस्य नवीनप्रकारान् वयमनुसरेम । अद्य वयं तादृग् वातावरणं विदध्याम येन हि भवेत्प्रगतिः । संप्रति निधिरक्षकत्वस्य न समयः । अधुना वयं संस्कृतनिधिं जनतापर्यन्तं प्रापयामः, एतदेव कर्तव्यम् । तस्य प्रकारान् अस्मिन् सम्मेलने वयं विचारयामः ।

अद्य प्रचारस्य युगम् । जनाः शीघ्रातिशीघ्रमग्रेसरा भवितुं कामयन्ते । येषां हृदये दृढोऽध्यवसायः, संस्कृतसमुन्नतये प्रचाराय च येषां दृढः प्रेमा, ते एव अन्यानपि तादृशान् कर्तुं शक्नुवन्ति । अयं समयः संस्कृतभाषायां समयोपयोगिसाहित्यनिर्माणस्य, न पुनः कटुआलोचनायाः । सम्प्रति संस्कृतभाषा समस्य संघर्षे स्थिता । अस्यां नवीनशब्दनिर्माणस्य (मोटर, रेडियो आदीनां पारिभाषिकशब्दानाम्) आवश्यकता । एवंविधप्रकाशनाय नानासंघा भवेयुः ! द्रव्यसंग्रहोऽपि प्रयत्नसापेक्षः । सर्वजगत् अस्मदनुकूलं भवेत्, तादृक्प्रयत्नशीलस्य जनस्यावश्यकता ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## संस्कृतसमाचाराः—

**भव्या संस्कृत-प्रदर्शनी**—त्रिवेणीसङ्गमोपरि प्रयागतीर्थे भवति कुम्भमहामेलके श्रीमतां चिरपरिचितया 'भारती'पत्रिकया एका संस्कृतप्रदर्शिनी समायोजितेति सूचिता एव स्युः पाठकमहाभागाः। प्रदर्शिन्यामस्यां विविधवर्णैरचितैः चित्रपटैः वैदिकसाहित्यस्य पुराणानां, दर्शनानां, अलङ्कारशास्त्रस्य, काव्यनाटककथादीनां च मनोरञ्जनसामग्रीरूपेण सचित्रः परिचयः प्रदत्तोऽस्ति। त्रिवेणीसङ्गमोपरि विशालायाः गोप्रदर्शिन्याः सविधे संस्कृतप्रदर्शिनी सेयं समग्रेऽपि मेलकस्यावसरे कस्मिन्नपि समये दर्शकमहोदयैः द्रष्टुं शक्यते। 'भारती'कार्यालयात् कार्यकर्तॄणां गमनागमने, चित्रपटनिर्माणे च यो व्ययो भविष्यति तदर्थं प्रार्थिता आसन् देशस्य मान्या धनिनः आर्थिकसाहाय्याय। यैर्महानुभावैरस्मिन् प्रशस्यकर्मणि अर्थसाहाय्यं विहितं तेषां नामानि प्रकाश्यन्ते अधस्तात्—श्रीमनसुखराय मोरमहाभागाः १०१) श्रीठा० कुशलसिंहजी गीजगढेशः ५१) श्रीवद्यरामनारायणशर्माणः पटना ५०) श्रीरावलसंग्रामसिंहमहाभागाः सामोद २५) श्रीभोगीलालपण्ड्यामहाभागाः २५) श्रीगोविन्दनारायणतिवाडिमहाभागाः २१) श्रीमक्खनलालमहाभागाः, अलवर ५) श्रीकाशीनाथ ज्वेलर्स, बरेली ५) श्रीप्रभुदयाल मोदी अलवर २) श्रीजेठानन्द जयपुर ११) अन्येऽपि देवगिरानुरागिणः सज्जनाः आर्थिकसाहाय्यार्थं प्रार्थ्यन्ते भारतीपरिवारेण।

**राजस्थानसंस्कृतसाहित्यसम्मेलनस्य चतुर्थाधिवेशनम्**—अलवरनगरे दिसम्बर (१९५३) स्य २७–२८ तारिकयोः समपद्यत। अधिवेशनसभापतेः श्रीनरोत्तमलालजोषिनः, उद्घाटनकर्तुः माननीयश्रीकैलाशनाथकाटजुमहाभागस्य, राजस्थानप्रदेशीयशिक्षामन्त्रिणः श्रीभोलानाथमहाशयस्य च भाषणसारांशः सम्पादकीयलेखे द्रष्टुं शक्यः पाठकमहाभागैः।

सम्मेलनस्य द्वितीयदिवसे (ता० २८-१२-५३) अपराह्णत्रिवादनादारभ्य प्रकाश्याधिवेशनं समघटत। पूर्वम् छात्रप्रतिनिधीनां भाषणान्यभवन्। ततो भारतमान्यानां राष्ट्रपतिप्रमुखानां महानुभावानां सन्देशा अश्राव्यन्त। तदनन्तरं सभापतिना प्रस्तुते जाबालिनरेशस्य स्वर्गमनोपरि शोकप्रस्तावे समनुष्ठिते, विद्याधरशास्त्रिणा एकः प्रस्तावः समुपास्थाप्यत-यस्मिन् देवगिरः प्रचारार्थैकस्याः प्रचारसमितेः निर्माणं प्रस्तुतमासीत्। समितेरस्याः संयोजकः श्रीकलानाथशास्त्री, स्थायिसदस्याश्च श्रीमुरलीधरशास्त्रिणः वैराठ, श्रीमणिशङ्करद्विवेदिनः जोधपुरम्, श्रीनारायणलालकाङ्करमहाभागाः जयपुरम्, श्रीरामेश्वरशास्त्रिणः नौहर, अन्यौ च द्वौ सन्ति। अपरः प्रस्तावः कोटावास्तव्यया श्रीनीहारबालया प्रस्तुतः यस्मिन् बालिकानां पाठ्यक्रमे संस्कृतभाषाया अनिवार्यता समुत्सूचिताऽऽसीत्। प्रस्तावोऽयमुचितसमर्थनानन्तरं पारितः। अन्येषु पारितेषु प्रस्तावेषु मुख्यतयोल्लेख्यौ द्वौ प्रस्तावौ आस्ताम्। एकस्मिन् राजस्थानशिक्षाविभागीयसंस्कृतपरीक्षाणां पाठ्यक्रमस्य संशोधनार्थं एकस्याः पाठ्यक्रमसमितेः स्थापनं प्रस्तुतमासीत् यस्यां देशस्य गण्यमान्या विद्वांसः सन्ति। अपरस्मिन् शास्त्रि-आचार्यपरीक्षोत्तीर्णानां कृते (प्रशिक्षण) (ट्रेनिङ्ग) व्यवस्थायाः आवश्यकत्वं श्रीरघुवीरशास्त्रिणा प्रस्तुतमासीत्। प्रस्तावानां विवरणं पाठ्यक्रमसमितिसदस्यानां नामादिकं च स्थानान्तरे प्रकाशयिष्यते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## देश-दर्शनम्—

शिक्षा च शिक्षकश्च—३ जनवर्यां मद्रासनगरे
राष्ट्रपतिः डा० राधाकृष्णन् अवोचत यत् शिक्षायाः
सर्वोत्तमं साधनं शिक्षक एव। अतः राष्ट्रस्य कर्त्तव्य-
मस्ति यत् शिक्षकाय सर्वविधसाधनानि, श्रद्धा, अधि-
काराश्च प्रदीयेरन्। तेन सह समुचितो व्यवहारः
क्रियेत, स च चिन्तामुक्तः स्यादित्येतदर्थमस्माभिः
प्रयतितव्यम्।

भारतस्य प्राड्विवाकः—अस्य वर्षस्य जनवरी
मासात् भारतीयसर्वोच्चन्यायालयस्य प्राड्विवाकपदे
श्रीपतञ्जलिशास्त्रिणः स्थाने श्रीमेहरचन्द्रमहाजन-
महोदयः न्यायं करिष्यति। महोदयायास्मै राष्ट्रपतिना
शपथो ग्राहितः। श्रीपतञ्जलिरधुनाऽवकाशं जग्राह।

कुम्भमेलके करवृद्धिः—राष्ट्रपतेर्विशेषादेशानुसारं
कुम्भमेलकस्य यात्रिणां कृते करेषु वृद्धिः समजनि।
जनवरीतः गमनागमनयोरुपरि करो लगिष्यति।
तृतीयश्रेण्या यात्रिभ्यः पञ्चविंशतिक्रोशानां कृते
...आणकाः, एतस्मादधिकक्रोशयात्रिभ्यश्च अष्टाणकाः
...रूपेण ग्रहीष्यन्ते।

नेहरोर्घोषणा—नागपुरे ४ जनवरी दिने श्री-
नेहरुः अवदत् यत् यद्यपि भारतं कमपि देशं
आक्रमितुं नेच्छति न वा कंचन देशं कस्यचन देशस्य
विरोधे उत्तेजयितुमिच्छति तथापि यदि भारतस्योपरि
कस्या अपि वैदेशिकशक्तेरातङ्कः समागमिष्यति तर्हि
तस्य विरोधः सम्पूर्णया शक्त्या करिष्यते। एतत्कृते
...ऽहं सुतरां सन्नद्धं स्यात्।

## विदेशवार्ता—

खानस्य मुक्तिः— पेशावर ५ जनवरी। पाकिस्तानस्योत्तरपश्चिमसीमाप्रान्तसर्वकारेण कथितं यत् "सीमान्तगांधी"ति प्रसिद्धः खानाब्दुलगफ्फार-खानः श्वः कारामुक्तः करिष्यते। ६६ अन्ये बन्दिनोऽपि मोच्यन्ते। सीमान्तगांधी विगतवर्षषट्काद्बन्द्यासीत्।

पाकामेरिकयोः सैन्यसन्धिः— वाशिंगटने ५ जनवरी दिने कांग्रेसीयसूत्रद्वारा ज्ञातं यदमेरिका-राष्ट्रपतिः श्रीआइजनहावरः पाकिस्तानाय सैन्यसहायतां दातुं सहर्षं सम्मनुते। अयं भारतीयविरोधस्य न कामपि चिन्तां कुरुते। इतः पाकिस्तानस्य प्रधान-मन्त्रिणा श्रीमुहम्मदअलीमहोदयेनापि स्वीकृतं यत् पाकिस्तानं अमेरिकातः कतिपयसैन्यपोतान्, कतिपय सेनासंनिवेशांश्च सहायतारूपेण ग्रहीष्यति। एतद-नुसारं जगति एकस्य जुगुप्सितस्य वातावरणस्य निर्माणं जातम्—यत् मानवतायाः शान्तेश्च कृते अतीव हानेरास्पदम्।

बेरिया मृत्युदण्डभाक्—रूसस्य सर्वोच्चन्याया-लयद्वारा तत्रत्यगृहमन्त्री, विश्वस्तारक्षाविभागस्या-ध्यक्षश्च श्री लाव्रेन्ती बेरियामहाशयः राष्ट्रद्रोहस्या-पराधे मृत्युदण्डभागी घोषितः। १९५३ वर्षस्य समाप्त्या सहैव बेरियामहोदयस्यापि समाप्तिरभवत्। रूसदेशे निरङ्कुशशासनस्य या पद्धतिः प्रचलिताऽस्ति सा स्वार्थपटस्यान्तर्भूत्वा स्वकीयकण्टकशोधनस्योपाया-न् चरति सर्वदा। स्तलिनस्य पट्टशिष्यो बेरिया मलेन्कोवेन तथैव घातितो यथा प्राक् लेनिनस्य दक्षिणहस्तायितः ट्राटस्की स्तलिनेन घातितोऽभूत्। अतः ह्यस्तना देशभक्ता अद्यतना देशद्रोहिण इति संघोष्य कदा तेषामन्तः कार्येत इति को वा वक्तुं पारयेत? रूसस्य विचारस्वातन्त्र्यस्य सेयं लोकातीता नीतिरिति स्थानीयपत्राणामालोचना।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## द्रुतं संस्कृतं शिक्ष्यतां 'भारती'तः—

प्रयागे स्नात्वा मानवः सर्वथा शुद्धीभवति। गङ्गायमुनयोः सङ्गमस्थानं 'वेणी' नाम्ना प्रसिद्धम्। तत्रापि माघमासे घटिकाद्वयस्य स्नानं देवानामपि दुर्लभम्। पृथिव्यां यावन्ति तीर्थानि, यावत्यश्च पुण्यपुर्यः सन्ति तानि मकरस्थे सूर्ये माघमासे वेण्यां स्नातुं समागच्छन्ति। ब्रह्मविष्णुमहेशाः आदित्याः तथा ब्रह्माणी, पार्वती, लक्ष्मीः इत्यादयः समस्तदेवपत्न्यः समस्ताः पितरश्च माघे त्रिवेण्यां स्नातुमायान्ति कलावेते प्रच्छन्नरूपेण समागच्छन्ति। पापिनां सङ्गदोषेण कृष्णीभूतानि समग्रतीर्थानि प्रयागे माघस्नानं कृत्वा श्वेतवर्णाः संजायन्ते।

"मकरस्थे रवौ माघे गोविन्दाच्युतमाधव।
स्नानेनानेन मे देव यथोक्तफलदो भव"॥

(नारद० उत्तर० ६३/१४)

इति मन्त्रमुच्चार्य मौनभावेन स्नानं कुर्यात्

प्रयाग में स्नान करके मानव सर्वथा शुद्ध हो जाता है। गङ्गा और यमुना के संगम का स्थान वेणी के नाम से प्रसिद्ध है। जिसमें माघमास में दो घड़ी का स्नान देवताओं के लिए भी दुर्लभ है। सती पृथ्वी पर जितने तीर्थ तथा जितनी पुण्य पुरियां हैं वे मकर राशि पर सूर्य के रहते हुए माघ मास में वेणी में स्नान करने के लिए आती हैं। ब्रह्मा विष्णु महादेव आदित्य तथा ब्रह्माणी पार्वती लक्ष्मी आदि समस्त देवपत्नियाँ तथा समस्त पितृगण माघ मास में त्रिवेणी स्नान के लिए आते हैं। कलियुग में ये छिपे रूप में आते हैं। पापियों के संगदोष से काले पड़े हुए सम्पूर्ण तीर्थ प्रयाग में माघस्नान करके श्वेतवर्ण के हो जाते हैं। "गोविन्द अच्युत, माधवदेव मकर राशि पर सूर्य के रहते हुए माघ मास में त्रिवेणी के जल में किये हुए मेरे स्नान से सन्तुष्ट हो आप शास्त्रोक्त फल देने वाले हो। इस मन्त्र का उच्चारण करके मौन भाव से स्नान करे।

## धातुप्रयोगपारिजातः—

अर्च पूजायाम्। भ्वादिः। सकर्मकः। सेट्। परस्मैपदी। अर्चति। आनर्च। अर्चिता। अर्चिष्यति। अर्चतु। आर्चत्। अर्चेत्। अर्च्यात्। आर्चीत्। आर्चिष्टाम्। आर्चिष्यत्। णिचि—अर्चयति—ते। आर्चिचत्। सनि—अर्चिचिषति। कर्मणि—अर्च्यते। आर्चि। कृदन्ते—अर्चित्वा। अर्चितुम्। क्ते-अर्चितः अर्चितव्यः, अर्चनीयः अर्च्यः। शतृ—अर्चन्। ल्युट्—अर्चनम्। अर्कः—अर्च्यते असौ, कर्मणि घञ्। चजोः इति कुत्वम्।

प्रकाशक—जयबहादुरसिंह। पता—भारती भवन, गोपालजी का रास्ता, जयपुर।
राजस्थान प्रिंटिंग वर्क्स, हनुमानजी का रास्ता, जयपुर में मुद्रित।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादक :—
कविशिरोमणि-
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

प्रबन्ध-सम्पादक:—
गिरिराजशर्मा शास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षम् ४ | माघपूर्णिमा, सं० २०१० | अङ्कः ४

## वीणापाणिचतुष्पदी

(ले० पं० देवकीनन्दनशर्मा शास्त्री 'प्रश्नवरः प्रधानाध्यापकः' राजकीय सं० पा० शाहपुरा )

अये सुवाणि ! वाणि देवि ! शारदे ! शुभानने !
नमामि ते पदाम्बुजं प्रयातु मोहजं तमः ।
विबोधमेतु विश्वमेतदादिदेववन्दिते !
सिताम्बरे ! स्मितानने ! पुनर्विभाहि भारते

मुहुर्मुहुर्झणत्कृताः सुवीणया यदा स्वराः
पतन्ति कर्णयोरहं तदा परे सुखे रमे ।
मुधाभिमानमानिनं विलुप्तज्ञानगौरवं
निजं जनं नतं विधेहि चापि बोधभास्करम् ॥

अहो बुधा न किं भजन्ति भारते निवासिनो
मुधैव भारतीमिमां त्यजन्ति शोकहारिणीम् ।
सुधाकरांशुसन्निभैः शुभैः पटैरलङ्कृतां
नमामि शं विधेहि देवि ! मोदमानमानसे !

तिरस्करी जनस्य काऽपि कामकोपकारिणो
यशस्करी धृतिक्षमादयादिधर्मधारिणः ।
विनाशकारिणी खलस्य, पालिनी मनस्विनो
विराजतां मनीषिणां मनोज्ञमानसासने ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# धन्यवादस्यात्मचरितम्

लेखकः—श्रीगणेशरामशर्मा, हिन्दीसंस्कृताध्यापकः श्रीराजेन्द्र-इन्टर-कॉलिज, झालवाड़ ( राजस्थान )

अस्मिन् धरणीतले स्वनामधन्यानाम् धुरि कीर्तनीयचरितश्लाघाजुषां विद्वन्मूर्द्धन्यानाम् शिरोधार्योऽहं धन्यवादः ! यद्यपि संसारेऽस्मिन् अद्वैतवाद-द्वैतवाद-द्वैताद्वैतवाद-विशिष्टाद्वैतवाद-शुद्धाद्वैतवाद-ज्ञानकर्मोपासनावाद-पुनर्जन्मवाद-अवतारवाद-विकाशवाद-सापेक्षवाद-राष्ट्रवाद-धनपुञ्जीवाद-साम्यवाद-समाजवाद-हिंसाहिंसावाद-रसध्वनिवाद-रहस्यवाद-छायावाद-हालावाद-प्रगतिवादादयो नानावादाः प्रादुरभूवन् परन्तु ते सर्वे देशकालपरिस्थितिवातावरणप्रभावैर्जराजीर्णतां गताः पर्यन्ते करालकालकवलिता बभूवुर्भवन्ति भविष्यन्ति च। अहं त्विदानीं सद्योजातो वादवंशानुयातोऽपि शाश्वतो दीर्घजीवी चिरं जीविष्यामीति मद्विषये दैवज्ञाः फलमादिशन्ति ! निस्सन्देहं मे भविष्यत् अत्युज्ज्वलं प्रतिभाति, यतः सत्त्वसम्पन्नतयाहं बाल्यादेव जगति सार्वभौमं प्रचारपथं प्राप्तः स्वास्थ्यं सुखं च निर्विशन् दिने-दिने वाञ्छनीयं विकाशक्रमं समनुव्रजन् साधीयसीमुन्नतिसरणिमनुवर्ते !

यद्यप्यहं स्वयंसिद्धो निर्विवादो वादस्तथापि विज्ञान-राजनीति-अर्थ-प्रधानेऽस्मिन् समये स्वात्मख्यातिरवश्यं विधेया जनेनाभ्युदयकामेनेति कृत्वाद्यात्मनो विषये किंचिद्व्यक्तिगतं वक्तुमुद्यतोऽस्मि। तदत्रभवन्तो भवन्तो मनीषिणो मान्या मज्जीवनविषयिणीं वार्तामिमां सावधानेन मनसा नूनं श्रोष्यन्तीत्याशास्यते।

धन्यानां प्रतिष्ठिते वंशे लब्धजन्माहं कुलीनत्वे किलार्यः। वैज्ञानिका दार्शनिका विद्वांसः कवयो नेतारो विजेतारः सर्वेऽपि मयि स्निह्यन्ति, सर्वसा… रणस्याहं वात्सल्यभाजनं चास्मि ! निखिलमपि … णीतलं मे क्रीडाप्राङ्गणम् ! सर्वतन्त्रस्वतन्त्रं स्वच्छ… च जीवनमतिवाहयन्नप्यहं सभ्योचितमनुशास… समनुरुन्धानः शिक्षितो दीक्षितो गृहीतविद्यो … श्चारुचरित्रनिर्माणे स्वात्मनः सततं चेष्टे। अल्पवय… बाल्येऽप्यहं राष्ट्रेषु, समाजेषु, सभ्यतासंस्थानेषु, सं… तिसदाचारपरिष्कारपरिषत्सु, विधानतन्त्रेषु, राज… सत्सु, लोकसभासु, मन्त्रिमण्डलेषु, साहित्यसम्मेल… कविगोष्ठीषु, सुहृन्मित्रमण्डलीषु, राजनीतिरङ्गम… प्रेक्षागृहेषु, शिक्षाशालासु, यत्र तत्र सर्वत्र जनैः सत्… माणो गुणैश्च तैस्तैराद्रियमाणो निर्विशङ्कं क्रीडा… विचरामि, खेलामि, भूयसीं परिपुष्टिं, प्रख्यातिं, की… यशः, श्रियं च परिपोषयामि।

दार्शनिकानां वादेष्वधिकारो भवति परं … सर्वप्रियेऽपि न कस्याप्यधिकारो वाङ्कुशो … तार्किकाणां कर्कशतर्कशतयुक्तिजालोहापोहो न … मनागपि बाधितुं प्रभवति। व्यक्ताव्यक्तरूपः स… निर्गुणो बुधैर्मीमांस्यमानोऽप्यहमप्रमेयः। केचित्… क्षरब्रह्मपदमामनन्ति ! 'यतो वाचो निवर्तन्ते' … मे स्वरूपं प्रत्यक्षं भवति। न केवलं वैयाकरणा… मे प्रकृतिप्रत्ययं सम्यक् परिचिन्वन्ति, प्रत्युत सर्वे… मयि बहु श्रद्दधते, यतो नाहं कदापि कस्मै … क्रुध्यामि, द्रुह्यामि, ईर्ष्यामि, अभ्यसूयामि … सर्वेषां मयि परमो विश्वासः। 'पुण्यैर्यशो … इत्युक्तिरियं मत्पक्षे सर्वांशतो घटते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



इत्थंभूतगुणोऽप्यहं विरलविरलैर्गुणग्राहकैरुदारचेतोभिरेव कैश्चिद्वेद्यः संवेद्यः साक्षात्कृत्यश्च । सूक्ष्माध्यात्मिकीं मे प्रवृत्तिं निवृत्तिं च केचिदेव साक्षात्कृतधर्माणो धृतिधुरन्धरा धीमन्तो जना जानन्ति । 'मनुष्याणां सहस्रेषु' कश्चिदेवाथ मे गुणकर्मस्वभावशीलं तत्त्वतः परिचिनोति !

यद्यपि मत्स्वरूपनिर्धारणे बहुशो बहवो जना मुह्यन्ति तथापि मद्विषये यथामति सर्वेऽपि कामपि धारणां वा सम्मतिं वाऽऽस्थां निष्ठां वा प्रकटयन्त्ये वे त्यहो मे स्वरूपरमणीयत्वं व्यापकत्वं च !

वादविवादहेतुयुक्तिप्रयोक्तारो बुद्धिमात्रशरणास्तर्कवितर्कप्रहतरलतुरङ्गारूढाः संख्यावन्तो दार्शनिकास्तु मां वादत्वेन सम्यक् परिचिन्वन्त्येव परमनुभूतिप्रवणा अनल्पकल्पनापटवः सरसहृदयाः कवयो भावुकाः कलाकाराश्चापि मां मधुरमधुरेण कोमलकान्तेन वात्सल्यमनोहरेण भावेनोपलालयन्ति । मनोविज्ञानविशारदा वदन्ति यन्मन्नामोच्चारणादेव बुद्धेः स्वास्थ्यं कायस्वास्थ्यं च वर्द्धते, नैतावदेवापरं च वक्ता श्रोता चानिर्वचनीयमानन्दातिरेकं सद्योऽनुभवति । नृवंशशास्त्रविदः शिक्षाचार्याः पुरातत्त्ववेतिवृत्तवेत्तारो भाषावैज्ञानिका अवतारतत्त्ववेदिनो विचक्षणाः साहित्यशास्त्रिणश्च मे जन्मान्तराणि स्वरूपान्तराणि च दिव्यानि नामान्तराणि सनातनानि चारुचरितानि शाश्वतिकानि कर्माणि चाप्यथ समन्वयव्यतिरेकाभ्यां संश्लेषणविश्लेषणाभ्यां स्वीकुर्वते । तथाहि क्वचिदहं साधुवादरूपेण कुत्रचिदाभाररूपेण क्वचन कृतज्ञताकृत्याऽन्यत्राशीर्वादरूपेणापरत्र शिष्टाचारात्मना । क्वचनानुनयविनयानुरोधादर्शशिक्षारूपा कुत्रचिज्जयघोषनादस्वरेण कचिच्च पुनः 'शुक्रिया' 'एहसान' 'महरबानी' 'दुआ' अनुकम्पा-कृपा-आशीर्वादानुरोधाग्रहविग्रहेण मदस्तित्वं प्रादुर्भावं चावगच्छन्ति जनाश्चक्षुष्मन्तः । धन्यवादस्तु मेऽभिधानस्याधुनिकतरं राष्ट्रियं संस्करणं स्वसत्त्वसम्पन्नतया विश्रुतम् । 'थैंक' Thank इति तु ममान्ताराष्ट्रियं सर्वतोऽधिकं प्रचलितं सुविख्यातं नाम ।

पाठकमहाभागाः ! "निजगुणगरिमा सुखाकरो न स्वयमनुवर्णयतां सतां न तावत्" इत्यहं जाने, तथापि स्वोपयोगविषये किमपि वक्तुं मे महतीच्छा, ततः किंचिदुच्यते—

यो हि जनो मद्गुणान् जानाति प्राप्तकालं च मामाश्रित्य लोकव्यवहारेषु प्रवर्तते स खलु महतीष्वपि परिस्थितिषु जातुचिन्न मुह्यति । निजपरकार्यसाधने किलाहमनुत्तमं साधनं प्रसिद्धयामि, यदा नास्ति धनं न सहायः, नानुकूलता, न सौकर्यं तदाहं निराशस्य, पराजितस्य, पुरुषार्थहीनस्य दुर्भाग्यघातप्रतिघातसङ्घर्षशतहतस्य दरिद्रस्य मूर्खस्यापि च जनस्य हृदये प्रेरणामुत्साहमुद्योगं च जनयामि, तत्तत्कर्मयोगसिद्धये चावलम्बं ददामि ।

शब्दार्थशास्त्रिणो मे किमप्यपरं महत्त्वम् मन्यन्ते । ते मामव्ययं विचारभावविनिमयमुद्रामाध्यममसूल्यं परिकल्पयन्ति । धनलोलुपा अर्थपिशाचाः कदर्याः काणां कपर्दिकामप्येकां प्राणेभ्योऽपि गरीयसीं मन्यमाना मामसाधारणेनोत्साहेन व्ययन्ति मुक्तहस्तं, न च व्ययक्लेशदुःखलवलेशमप्यनुभवन्तीत्यपरं मे प्रियत्वं प्रथतेऽस्मिँल्लोके । इत्थमार्थिकेऽस्मिन् युगेऽहं किमप्यसाधारणं प्रभविष्णु लोकातिशायि व्यक्तित्वं दधे !

राजनीत्यां त्वहं सर्वविधप्रसङ्गेषु सर्वत्राव्याहतप्रवेशः पत्रप्रतिनिधिरिवान्ताराष्ट्रियराजदूत इव स्वयं-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सिद्धो नेता विवदमानानां लोकानां न्यायनिर्णयाय माध्यस्थ्यमवलम्बे। मां हि परोपकारिणं, पक्षपातरहितं, न्यायनिःष्ठं, स्पष्टवक्तारं च मत्वा परस्परं द्रुह्यन्तोऽपि राष्ट्राधिनायकाः सदासर्वदा सर्वत्र मां प्रयुञ्जन्ति। वादविवादरणप्राङ्गणेष्वपि चाहमवध्यत्वाद्व्याहतक्रममन्तर्बहिः सर्वत्र संचरामीतस्ततः। स्वच्छन्दोऽपि किलात्मवश्यत्वाद्राजशासनान्तर्वर्तिनीं गूढामपि नीतिप्रवृत्तिं दुर्बोध्यामपि चेदमित्थं तत्त्वतोऽवगच्छामि। न कस्यचिदपि विश्वासघातं करोमि, न च रहस्यभेदं करोमि, न जातुचित्स्वात्मनो मतं विचारधारां वा प्रकटयामि। इयं मे कुलीनता शालीनता च। विद्यमानेष्वपि मतभेदशतेषु, जायमानेष्वपि कूटनीतिप्रपंञ्चषड्यन्त्रेष्वहं प्रच्छन्नस्वरूपो निर्लेपनारायणो जगज्जालमेतत्स्वलीलया जायमानं परिपश्यन् नितरां मोदे! वस्तुतो मयि धन्यवादे सर्वेषामपि लोकानां प्रेमातिशयो वर्तते। नास्त्येव मदुपयोगितायां कस्यापि विसम्वादः। आबालवृद्धं सर्वे मां दृष्ट्वा श्रुत्वा च प्रसीदन्ति।

अद्यत्वे सभ्यसंसारे मद्विना न कस्या अपि समितेः, सभायाः समाजस्य, परिषदः, सम्मेलनस्य च कार्यक्रमो निर्विघ्नं समाप्तिं गतो गण्यते। ग्रन्थनिर्मातारो लेखकाश्चापि मया विनोपोद्घातमुपसंहारं वा कर्तुं पारयन्ति। मामग्रे कृत्वा सर्वकार्यारम्भाः सफलतां नेतुं शक्यन्ते। यदि कोऽपि मां मोहात्समये न स्मरति तदासौ मूर्खोऽसभ्यश्च परिगण्यते! सभापतेर्भाषणानन्तरं तु सर्वविधास्वपि परिषत्सु मदीयोपस्थितिः साधिकारमावश्यकी जायते।

अवसरवादिनो नागरिकाः, शिक्षाभिमानिनो, विधानशास्त्रिणो जनास्तु मे सत्कारसपर्यां न कदापि विस्मरन्ति, यतोऽहमपि तेषां कृते सभ्यतासंस्कृतिसदाचारनागरिकत्वप्रतीकत्वमात्मनि दधानो न कदाप्यनुपस्थितो भवामि सर्वविधसभासमाजेषु। नव्यशिक्षादीक्षासम्पन्नानां विश्वविद्यालयरङ्गभूमे विचरितप्रेमविवाहस्वयम्वराणां प्रणयिप्रेयसीनां प्रेमपत्रव्यवहारे साक्षात्समागमे चाहं प्रणयसूत्रं निर्बाधं साधयामि। तेषां संयोगवियोगसंकथास्व सख्यं दौत्यं चावलम्बे! विदुषामहं वाणीभूषणं विद्यार्थिषु शिक्षोन्नतिप्रतीकम्, वीराणामाभरणम् भीरूणां संरक्षणकवचम्, सुहृन्मित्रेषु प्रेमचिह्नम् सज्जनेषु श्रद्धाविश्वासार्जवौदार्यस्नेहातिशयोऽहमेव परिणमामि।

न केवलमहं साधुरेवास्मि निर्विषो भुजग इव समर्थः सदा दैन्यमावहामि विवशतयापि तु सत्याव श्यके मायाविषु जनेष्वहं "शठे शाठ्यमिति" निष्ठुर नीतिं चापि प्रयुञ्जे! मन्महत्त्वमजानन् कोऽप्यभिमानी सभासु वृथाडम्बरघटाटोपं नाटयति, तदाहं तं मूर्खं सभासञ्चालकं स्वमायया वंचयित्वा तूष्णीं दूरं प्रपलाये, तत्रोपस्थितोऽपि मिषान्मौनमवलम्बे। यदाहमात्मनः स्वरूपं प्रच्छादयामि तदा सा समितिः, तत् सम्मेलनाधिवेशनं, सा परिषत्, स सङ्घो वा नष्टो भ्रष्टो मूर्छितो विकृतः कोलाहलबधिरीकृतोऽसफलो जात एवेति मन्यताम्! अतस्तत्त्वविदो विदग्धा मां न कदापि विमानयन्ति। यत्रोत्कोचग्रहणम्, यत्र कृष्णापण्यव्यापारो यत्र कलहो, नैराश्यम्, मनोमालिन्यम्, ईर्ष्या, द्वेषः, क्रोधः, कदाचारो, वञ्चना, छलस्तत्र नाहं कदाचिदपि गच्छामि न च मोदे, इति मे निश्चला प्रतिज्ञा। मत्तामस स्वरूपं विवेचयताऽकब्बरेण महाकविना प्रयागवासिना साधूक्तम्—

"कोठी में जमा है न डिपॉज़िट है बैंक्स् में।
कल्लाश कर दिया है, दो–चार थैंक्स् में ॥१॥"

अन्ते मच्चारुचरितं शृण्वद्भ्यः पठद्भ्यश्च पाठकेभ्यो रसिकेभ्यो मनोविनोदप्रियेभ्यो मार्मिकेभ्यः साधुवादान्नितरामप्यहं धन्यवादः! पुनश्चात्र मामवगणयद्भ्य एकोनविंशतितमं व्यञ्जनमक्षरं समर्पयन्विरमामि!



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# मेखला

श्रीदीनानाथशर्मा शास्त्री सारस्वतः, विद्यावागीशः, प्रिन्सिपल, रामदल, दरीबा, देहली

उपनयनसमये ब्रह्मचारी मुञ्जमेखलामध्यारोपयति कटितटे। पाश्चात्त्यदीक्षादीक्षिता अत्र उपहसन्ति, परमत्र गाढ-तत्त्वानि सम्भृतानि। मेखला मुञ्जनिर्मिता भवति। मुञ्जे विशिष्टगुणोऽयमस्ति यत् तेन विसर्प-दाह-रक्त-मूत्राशयसम्बन्धिरोगा नेत्ररोगाश्च दूरीक्रियन्ते। तत इमां मौञ्जीं मेखलां कटौ आसज्य स्नानध्यानादिना तेजः समस्तदेहे संश्रियते। एतेन ब्रह्मचारिणो बलं वर्धते, प्राणापानयोश्च शक्तिः प्राप्नोति।

इयं मौञ्जी मेखला विद्युच्छक्तिं परावर्तयति, तथैव च तां स्थानान्तरितां करोति। यथा—'वैटरी' योजिता वृत्ताकारा तन्त्रीर्विद्युतं परावर्तयति स्थानान्तरितां च करोति। मेखलाबन्धनात् कटिप्रदेशस्य शक्तिर्वर्धते। अद्यत्वे यौवने एव नवयुवकानां कटिर्यद् नैर्बल्यं वहति तत्र मेखलाया अधारणमेव कारणम्। आङ्गलाः सैनिकाश्च यत्खलु कटिबन्धं (वेल्ट) बध्नन्ति; बालाः स्त्रियश्च यत् कट्यां नीवीयुक्तमधोवसनं (पायजामा, सलवार) परिदधति; तदपि मेखलाया अनुकरणं नाम; परं तस्मिन् कटिबन्धे स गुणो नास्ति यो मौञ्ज्याम्। मौञ्ज्यां मेखलायां न व्ययः, गुणाश्च बहवः। वृद्धावस्थायां यद् अन्त्रवृद्धिकारणाद् बस्त्यधःस्थलं परिवृद्धिमेति, यदीयनमनाय कुण्डलिसदृशश्चर्मपट्टः परिधेयो भवति कट्यधःप्रदेशे; तत्र कारणं बाल्ये मौञ्ज्या अपरिधानम्।

एतत्तु सर्वविदितं यत् सङ्कटावसरे उपस्थिते कार्यकर्त्ता उत्साहयितुं कथ्यते यद् बद्धकटिः सन् सज्जीभवेति। ततो बद्धकटित्वे निर्बलस्यापि साहसं प्रवर्धते। वैधमेखलां धारयितुर्लाभानां का गणना?। 'पारस्करगृह्यसूत्रे' प्रोक्तम्—'इयं दुरुक्तं परिबाधमाना, वर्णं पवित्रं पुनती म आगात्। प्राणापानाभ्यां बलमादधाना, स्वसा देवी सुभगा मेखलेयम्' २।२।८, मन्त्रब्राह्मण १।१।२७)।

इयं मेखला वायुं शमयित्वा कामसंयमे साहाय्यमादधाति, अन्त्रवृद्धिं च निरुध्य पुंस्त्वं प्रवर्तयति, प्राणापानयोर्बलं सम्पादयति। स्फूर्तिं च निष्पादयति, तन्द्रां द्रवयति। २५ वर्षाणि अदसीयप्रयोगे तदीयलाभाः सर्वायुःकृते शरीरे व्याप्नुवन्ति। भिन्नभिन्नवर्णानां भिन्नभिन्ना मेखला वर्णभेदं निरूपयति, यथा सैनिकेषु भिन्नभिन्न-विभागीयानां भिन्नभिन्नानि लिङ्गानि भवन्ति।

—

# संयुक्त-राष्ट्रसंघः

लेखकः—पं० मांगीलालमिश्रः, नेछवा, सीकर

साम्प्रतं तस्याः संस्थायाः वर्णनं क्रियते, या विश्वस्य शान्तिसंस्था, व्यवहारे यस्याः नाम "संयुक्त राष्ट्रसंघोऽ"स्ति।

## उत्पत्तिः

द्वितीयविश्वयुद्धस्य ज्वालैः जाज्वल्यमानेन विश्वस्य राष्ट्रसमूहेन भविष्ये युद्धनिवृत्त्यर्थमेकामीदृशीं संस्थां



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



निर्मातुं यतितं या सर्वानेवाऽन्ताराष्ट्रीयकलहान् शान्त्या सान्त्वयेत्। १ नवम्बर १९५३ मिते ईशवीये वत्सरे रूसस्य भाग्यविधात्रा स्टालिनमहोदयेन अमेरिकायाः प्रभुणा रूज़वेल्टेन, एवं ब्रिटेनस्य चाराक्येन चर्चिलेन, च स्वकीये संयुक्तवक्तव्येऽन्ताराष्ट्रीय सुरक्षायै शान्त्यर्थं चैकस्याः संस्थायाः निर्माणस्यावश्यकता स्वीकृता। १९४५ ईशवीयवत्सरस्याप्रैल मासे "सैनफ्रांसिस्को" नगरे पञ्चाशद्राष्ट्राणामेका समितिराहूता। बहुशो वादविवादानन्तरमेकं विधानपत्रं रचितम्, तस्मिन् पत्रे यदाऽधिकांशराष्ट्रैः स्वीकृतयः प्रदत्ताः, तदा संयुक्तराष्ट्रसंघस्य वस्तुतः जन्म जातम्।

## उद्देश्यम्

विश्वस्मिन् शान्तेः सुरक्षायाश्च व्यवस्थाकरणमस्याः प्रमुखोद्देश्यम्। राष्ट्रेषु मित्रत्ववर्धनं, विश्वशान्तेः सुदृढतार्थमन्येषां प्रयत्नानामवलंबनम्, जातिभाषा धर्मेण सह स्त्रीपुरुषयोः समानाधिकाराणां प्रतिष्ठार्थमन्ताराष्ट्रीयसहयोगप्राप्तिरस्याः उद्देश्येषु समागता च। सकलान्येव सदस्यराष्ट्राणि उपर्युक्तोद्देश्यपूर्त्यर्थं सहायकानि भवन्ति।

## विभागः

सुचारुरूपेण कार्यसंचालनार्थमस्याः षड्भागाः विहिताः। ते यथा—(१) साधारणसभा। (२) सुरक्षा परिषद्। (३) आर्थिकी सामाजिकी च परिषद्। (४) संरक्षणपरिषद्। (५) अन्ताराष्ट्रीयन्यायालयः। (६) सचिवालयश्च।

## अधिकाराः

संयुक्तराष्ट्रसंघस्य सकलाः सदस्याः साधारणसभायाः सदस्याः भवन्ति। साधारणसभायाः अधिवेशनेषु सकलाः देशाः पञ्चपञ्चप्रतिनिधीनां प्रेषणे समर्थाः। किन्तु मताधिकारे राष्ट्रस्यैकमेव मतं गृह्यते, न तु पञ्च। अन्ताराष्ट्रीयन्यायाधीशस्य निर्णयेऽपि महत्वमस्याः सभायाः।

अन्ताराष्ट्रीयसुरक्षायाः शान्तेश्च सर्वाधिकमुत्तरदायित्वं सुरक्षापरिषदि। चीनः, फ्रांसः, रूसः, इंगलैंडः अमेरिका चास्याः सभायाः स्थायिनः सदस्याः। कार्यक्रमे निर्णयसम्बन्धे च सप्तसदस्यानामेकमतमपेक्षितम्। परिषदियं राष्ट्राणां मिथोविवादं संघर्षकारिणीः परिस्थितीश्च निरीक्षितुं शक्ता। सुरक्षापरिषद् शान्तिस्थापनार्थं शान्तिमयैः प्रयत्नैः कार्यं करोति। आवश्यकता चेत्–सेनाप्रयोगमपि कर्तुं समर्था।

आर्थिकी सामाजिकी च परिषद्—अन्ताराष्ट्रीयसामाजिकार्थिकसांस्कृतिकशिक्षासम्बन्धिनो विषयानध्येति। अधीत्य च स्वकीयान् विचारान् साधारणसभायां प्रेषयति, तदनुकूलकार्यकरणार्थं च प्रेरयति।

सुरक्षापरिषदः मुख्योद्देश्यं परतन्त्रराष्ट्राणां राजनैतिकार्थिकशिक्षणसम्बन्धि व्यवस्थाकरणं, स्वायत्तशासनस्य विकासकरणं तथा अन्ताराष्ट्रीय शान्तिस्थापनं च भवति। परिषदियं स्वकीयं कार्यं साधारणसभायाः तत्वावधाने सम्पादयति।

अन्ताराष्ट्रीयन्यायालयस्य विंशतिसदस्याः भवन्ति। एषु पञ्च सदस्यान् सुरक्षापरिषद् तथा पञ्चदश सदस्यान् साधारणसभा प्रेषयति। प्रत्येकसदस्यराष्ट्रमस्य निर्णयस्य स्वीकारे वचनबद्धम्। सचिवालयस्य कार्यं प्रत्येकविभागेन निर्दिष्टकार्यक्रमस्य व्यवस्थाकरणमस्ति।

## उपसंहारः

साम्प्रतं संयुक्तराष्ट्रसंघः स्वकीयं कार्यं तत्परतया संपादयति। ततोऽपि तस्मिन् त्रुटयोऽपूर्णताश्च वर्तन्ते। मिथः दोषारोपणं, भिन्नभिन्नरूपेण स्वकीय समूहकरणं तस्य दोषः, किन्तु विश्वस्य कतिपय महाशक्तयः यदि स्वकीयं स्वार्थं त्यक्त्वा, व्यर्थं वाग्जालं परिहाय च विश्वस्य शान्तिव्यवस्थायां वस्तुतः तत्पराः स्युस्तर्हि मानवतायाः महद् कल्याणं भवेत्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# क्षेपक-विमर्शः

लेखकः—स्वामी लक्ष्मणशास्त्री, संस्कृतविद्यालयाध्यक्षः नागौर ( मारवाड )

यन्निर्मात्रात्मना न निर्मीयते, किन्तु केनचिद् हेतुना परेणैव विदुषा यत् किञ्चित् स्वमनीषया शास्त्रेषु पुरातनेषु बलाद् हठाद्वा निवेश्यते, तद् बहुना कालेन सूक्ष्मार्थगवेषकैर्विक्षिप्तशब्देन क्षेपकशब्देन वा व्यपदिश्यते। अतिचिरन्तनेषु शास्त्रेषु विशेषतः पुराणेषु यत्रतत्र विक्षिप्तविषया निक्षिप्ता वर्त्तन्ते। नातिचिरन्तने श्रीतुलसीकृतरामायणेऽपि बहुषु प्रसङ्गेषु प्रक्षिप्ताः कथा दृश्यन्ते।

किञ्च समेषां वस्तूनां परिवर्तनैकस्वभावाद् बहुना कालेनास्मद्धर्मशास्त्राणां विशेषतः पुराणानां बहुषु विषयेषु, पद्यांशेषु चोच्चावचीभावः स्वाभाविकः एव खलु। सर्वदा कस्यचनापि वस्तुनः समानस्वरूपावस्थितिः दुर्घटा। कालेनोच्चावचीभावमीयुषां शास्त्राणां पुराणानाञ्च धर्ममर्यादायाश्च समये समये समीकरणं संशोधनञ्च केवलमाप्तानामेव विदुषां कर्त्तव्यमस्ति। आप्तानाप्तभेदेन विद्वांसो द्विविधा भवन्ति। स्वजन्मारभ्यामरणान्तं ये सार्वजनीनं हितमेव विधातुं कृतसङ्कल्पास्त एवाप्तास्तदितरे तु सर्वेप्यनाप्ता एव। आप्तैर्यदुपदिश्यते, तद्विरचितशास्त्रेषु च यदुच्यते, तत्सर्वैर्जनैर्निर्विकल्पमनुष्ठेयम्। अन्येषामुपदेशास्तद्विनिर्मितशास्त्रोक्तयश्च स्वहिताहिते विमृश्यैव जनैर्विधेयाः। प्रक्षिप्ता अंशास्तु विशेषतः कल्पितप्राया एव भवन्ति। यद्यपि साधारणदृष्ट्या प्रक्षिप्ता अंशा अकिञ्चित्कराः। तदपि सूक्ष्मविचारदृष्ट्या प्रक्षिप्ता अंशा महत्याः क्षतेः प्रदायकाः सन्ति, यतः प्रक्षिप्तैरंशैस्तच्छास्त्रस्य तच्छास्त्रनिर्मातुश्चाभिप्रायस्तत्क्लेशेन दुग्धस्येव सर्वथा विकृत एव प्रतीयते, मेघपटलै रविबिम्बमिव तस्य शास्त्रस्य तत्कर्त्तुश्चाभिप्रेतोऽर्थः सहसैव तिरोभवति। अस्तु। साम्प्रतं शास्त्रेषु पुराणेषु च प्रक्षिप्ता अंशा बह्वो दृश्यन्ते।

मयाद्यत्वे श्रीवाल्मीकीयरामायणान्तर्गतानां प्रक्षिप्तानामंशानां केषाञ्चनानाम् विमर्शो विधीयते।

श्रीमद्वाल्मीकीयरामायणस्योत्तरकाण्डे, एकोनषष्टितमात्सर्गादग्रिमाः सारमेयोलूकगृध्राख्यानवर्णनात्मकाः, सप्तत्रिंशत्तमात्सर्गादग्रिमम् बालिसुग्रीवोत्पत्तिवर्णनात्मकं तदग्रिमं सर्गपञ्चकं च, एवमेकत्रीकृत्येमे त्रयोदशसर्गाः, कतकतीर्थतिलककारादिभिर्व्याख्याकृद्भिरप्येषां प्रक्षिप्तत्वेन स्वीकृतत्वात्, एषां सर्गाणां च सर्वसर्गसङ्ख्यायाः पृथक् कृतत्वाच्च निर्विवादमेव प्रक्षिप्ता इति विद्वांसोऽनायासेनैव विज्ञातुम्प्रभवन्ति परन्तु श्रीमद्वाल्मीकिरामायणस्य किष्किन्धाकाण्डे एकोनषष्टितमात् सर्गादारभ्य त्रिषष्टितमसर्गान्तं यावत सम्पातेः स्वपूर्णवृत्तान्ताख्यानवर्णनरूपं सर्गपञ्चकमपि प्रक्षिप्तमेवेत्यत्र नास्ति कोऽपि सन्देहावसरः सूक्ष्मधिय विदुषाम्। यद्यपि पूर्वोक्तव्याख्याकृद्भिरेतत्सर्गपञ्चकविषये विशिष्य किमपि नोक्तम्, तदपि श्रीरामानुजसम्प्रदायविश्रुतया श्रीगोविन्दराजीयव्याख्ययास्य सर्गपञ्चकस्य प्रक्षिप्तत्वं विज्ञायते। तत्र प्रथमोहेतुस्त्वयम्, यद् अष्टपञ्चाशत्तमसर्गस्यान्दिमं पद्यमिदम् 'तम्पुनः प्रापयित्वा तु तं देशं पतगेश्वरम्। बभूवुर्वानरा हृष्टाः प्रवृत्तिमुपलभ्य ते, इति,' चतुःषष्टितमसर्गस्यादिमम्पद्यमिदम् आख्याता गृध्रराजेन समुत्प्लुत्य बलीमुखाः सङ्गताः प्रीतिसंयुक्ता विनेदुः सिंहविक्रमाः, इति



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


पूर्वोक्तसर्गान्तिमपद्येनाऽस्य सर्गादिमपद्यस्यैव सङ्गतिर्युज्यते। अनयोर्मध्यगतायाः पञ्चसर्गोक्तायाः कथाया असाङ्गत्यं प्रतीयते। किञ्च, अष्टपञ्चाशत्तमे सर्गे वानरेभ्यः सम्पातिनोक्तम्—'पुरा वृत्रवधे समाप्ते जयेच्छयाहं मद्भ्राता जटायुश्च सूर्यलोकं गन्तुमुद्यतौ। मध्येमार्गं यदा सूर्यतेजसा जटायुर्व्याकुलो जातस्तदाहं तं भ्रातृप्रेम्णा स्वपक्षाभ्यामावृणवम्। दुराग्रहगृहीतोऽहं पुनरपि व्योम्नि सुदूरमुड्डयमानोऽतितीव्रेण रविकिरणैर्निर्दग्धपक्षोऽत्र विन्ध्यपर्वतशिखरे निपतितः। मदीयपक्षाभ्यां च गुप्तो जटायुर्न प्रदग्धः, किन्तु मम निपतनात्पूर्वमेव स भूमौ कुत्रचिन्निपतितः। ततः प्रभृति मयाद्ययावत्तस्य प्रवृत्तिर्नाकर्णिता। केवलमधुनैव भवतां मुखेन तत्प्रवृत्तिः श्रुता। भवतां मुखेन रावणेन निहतं जटायुषं श्रुत्वाहं रावणं हत्वा भ्रातुर्वैरनिर्यातनं कर्त्तुमिच्छामि। किन्तु 'वृद्धभावादपक्षत्वाच्छृणुध्वंस्तदपि मर्षये। नहि मे शक्तिरस्त्यद्य भ्रातुर्वैरविमोक्षणे।' इति सम्पातिनोक्तम्। अग्रे प्रक्षिप्तसर्गेषु पुनरुच्यते। 'तस्य त्वेवं ब्रुवाणस्य सम्पातेर्वानरैः सह। उत्पेततुस्तदा पक्षौ समक्षं वनचारिणाम्।' 'यौवने वर्त्तमानस्य ममासीद्यः पराक्रमः। तमेवाद्यावगच्छामि बलं पौरुषमेव च।' एवं सम्पातिना पूर्वमुक्तम्—वृद्धभावात्पक्षरहितत्वाच्च भवतां मुखेन रावणनिहतं भ्रातरं श्रुत्वापि न किञ्चिदहं कर्तुं शक्तोऽस्मि, इति। अग्रे तूच्यते 'तस्य सम्पातेः श्रीरामकृपया पक्षौ पुनरुत्पन्नौ। यौवने च यादृशं बलं पौरुषमभवत्, तादृशं बलं पौरुषं च पुनस्तस्याजायत। इत्थं पूर्वकथनेनाग्रिमकथनस्य सङ्गतिर्न घटते। यदा पुनरपि तस्य पक्षौ जातौ, बलं पौरुषं च यौवनावस्थासदृशं जातम् तदासौ पूर्वकथनमनुसृत्य स्वभ्रातृहन्तारं रावणं हन्तुम्; श्रीसीतायाश्चान्वेषणे वानरेभ्यः साहाय्यं दातुं कुतो नोद्युक्तोऽभूत्?

अपरो हेतुरयम्, यत्सूक्ष्मदृष्ट्या दृष्टे सर्गपञ्चात्मकस्यास्य क्षेपकस्य पद्यरचनाशैल्यपि ग्रन्थकर्त्तुः पद्यरचनाशैल्या समानतां न भजते।

तृतीयो हेतुरसौ, यत्, श्रीवाल्मीकिमहर्षिणा स्वरामायणे सर्वत्र श्रीरामस्य मनुष्यलीलयैव चरित्रं वर्णितम्। इयं घटना तु दैवी भवितुमर्हति। प्रतीयतेऽयं विषयः श्रीरामस्य दिव्यमैश्वर्यं प्रदर्शयितुमेव केनचिदर्वाचीनेन विदुषा स्वमत्या निर्मायात्र निवेशितः, न तात्त्विक इति।

एवमस्य सर्गपञ्चकस्य प्रक्षिप्तत्वे सिद्धेऽपि प्रक्षिप्तस्यास्येतरेभ्यः प्रक्षिप्तेभ्योऽतिप्राचीनत्वमवश्यं विद्यते। यतोऽसौ प्रक्षिप्तविषयस्तात्विककृत्येत्थं संश्लिष्टोऽभूत्सम्प्रति यद् असौ तदभिन्न एव विज्ञायते।

पुनः—युद्धकाण्डे 'आदित्यस्तव'वर्णनात्मकः पञ्चोत्तरशततमोऽपि सर्गः प्रक्षिप्त एव। यत एतत्सर्गस्य पूर्वापरसम्बन्धानुसन्धानेन साङ्गत्यं न घटते। संसारे श्रीसूर्यमहिमानं प्रथयितुं केनचित्सूर्यभक्तेन विदुषा स्वमत्या निर्मायायं सर्गोऽत्र निवेशितः इति प्रतीयते। युद्धे प्रवर्त्तमानेऽकस्मादेवात्रागस्त्यमुनेरागमनम्, तेन च श्रीरामाय श्रीसूर्यस्तवजापोपदेशनम्, तेन च श्रीरामस्य विजयप्राप्तिरेतद् युक्तं न घटते। यद् देवदेवेन श्रीरामेण स्वविजयावाप्तयेऽगस्त्यमुनेरुपदेशेन श्रीसूर्यस्तवो व्यधायि, तत्स्तवजापातितुष्टेन सूर्येण वरः प्रदत्तस्तेन तस्याभूद्विजय इति श्रीरामस्यानन्यभक्तानामसह्यमश्रद्धेयं च खलु।

अस्यादित्यस्तववर्णनात्मस्य सर्गस्य पद्यरचनाशैल्यपि पूर्ववत् ग्रन्थकर्तुः पद्यरचनाशैल्या समानतां न भजते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



एवमेवायोध्याकाण्डे चित्रकूटपर्वते जयन्ताख्यस्य काकस्याख्यानमपि प्रक्षिप्तमेवास्ति ।

अपरञ्च श्रीमद्भागवतस्य दशमस्कन्धगतपूर्वार्द्धे द्वादशाध्यायमारभ्य चतुर्दशाध्यायपर्यन्तोऽध्यायत्रयात्मको ब्रह्मगर्वापहरणरूपोऽशेषो विषयः पूर्वापरकथानुसन्धानेन श्लोकनिर्माणशैल्या च नूनं प्रक्षिप्त एव, न तात्विक इति सूक्ष्मदृष्ट्या प्रतीयते । यद्यपि श्रीमद्भागवतस्य व्याख्याकृद्भिः श्रीधराद्यैर्बहुभिर्विद्वद्भिरेतस्याध्यायत्रयस्य प्रक्षिप्तत्वं न प्रदर्शितम्, तदपि विजयध्वजेन व्याख्याकृतास्याध्यायत्रयस्य प्रक्षिप्तत्वं स्पष्टम्प्रदर्शितम् । किञ्च 'इतीरेशेऽतर्क्ये निजमहिमनि स्वप्रमितिके । परत्राजातोऽतन्निरसनमुखब्रह्मकमितौ,' इत्यादिपद्येषु कठिनतमानामप्रचलितशब्दानां समावेशोऽयं पूर्वापरपद्यनिर्माणशैल्या सामञ्जस्यं न भजते ।

किम्बहुना ! एवं शास्त्रेषु पुराणेषु च यत्रतत्रानेकस्थलेषु प्रक्षिप्तविषया निहिताः सन्ति । मध्यकाले मुद्रणयन्त्राणामभावात् सर्वेषु देशेषु पुस्तकानाम्प्राप्तेर्दौर्लभ्यान्महतां शास्त्राणां केवलं विरलेषु विद्वद्वरालयेषु द्रष्टुं लभ्यत्वात्, शास्त्रेषु राज्ञां विद्वत्समितेश्च नियन्त्रणाभावाच्च बहुभिः स्वतन्त्रैर्विद्वद्भिर्यं कमपि हेतुमुद्दिश्य शास्त्रेषु पुराणेषु च बहवः प्रक्षिप्ता अंशा यत्र तत्र निक्षिप्तास्ते यथाशक्यं विचारविदग्धैर्विद्वद्भिर्विमृश्यावश्यम्प्रकाशनीयाः । यतः साधारणजना अप्यवगता भवेयुरित्यलं विशिष्य कथनेन ।

एवमन्येऽपि नैके प्रक्षिप्तविषयास्तत्र तत्र श्रीवाल्मीकीयरामायणे निक्षिप्ता दृश्यन्ते ।

युद्धकाण्डे पुनः सेतुबन्धनसमये श्रीरामेण स्वविजयस्य प्राप्तये श्रीरामेश्वरमूर्त्यवस्थापनं कृतम् । तद्विषयाख्यानवर्णनं केषुचन कोशेषु प्रक्षिप्तत्वेन निक्षिप्तं समुपलभ्यते । इदं श्रीरामेश्वरतीर्थाख्यानन्तु सर्वथा प्रक्षिप्तमेवेति निश्चीयते ।

केनचित्, शिवभक्तेन विदुषा श्रीरामेश्वरतीर्थस्थानस्य महिमानं संसारे विस्तारयितुं पुराणान्तरेपूपलभ्यमानमिदमाख्यानं स्वमत्या निर्मायात्र निवेशितमित्युत्प्रेक्ष्यते ।

किञ्च श्रीरामस्य कुलानुक्रमतोऽपि स्वकुलदैवतं श्रीविष्णुमपहाय तदितरदेवतोपासकत्वं सर्वथा निर्मूलमेव । अयोध्याकाण्डे स्वस्य भाविनि यौवराज्यावाप्त्यवसरे 'सह पत्न्या विशालाक्ष्या नारायणमुपागमत । श्रीमत्यायतने विष्णोः शिश्ये नरवरात्मजः । तुष्टाव प्रणतश्चैव शिरसा मधुसूदनम्,' इत्यादिवचनैः श्रीरामस्य श्रीविष्णव्यतिरिक्तानां श्रीशिवसूर्यादिदेवानामुपासकत्वं सर्वथा विचारविकलम्प्रतिभाति ।

## वसन्तः सोऽयम्

कवयिता—देवर्षिकलानाथशास्त्री, जयपुरम्

छप्पय—

अलिकुलगुञ्जनमञ्जुशिञ्जिनी मृदु झाङ्कुरुते—
कुसुमेषो ! तव तरुनिवहो रणसज्जां कुरुते ।
नवनिर्गतसहकारमञ्जरीः कञ्चुकयन्ते—
किसलयकवचावृता भटाः पथिकान् मृगयन्ते ।
प्रचलति दिगन्तजैत्रे पिकैर्मन्त्रितमङ्गलपद्धतौ—

आर्या—

इह सन्ततमञ्चति रणरसं तव वसन्तसेनापतौ । ❀
कलिताखिलविपदन्तः सन्ततपिककूजितानन्तः ।
कुसुमितसकलदिगन्तः सरसवसन्तः समन्ततो जयति ॥

❀ अनङ्गनृपस्य सेनापतिर्वसन्तः पथिकान् (विरहिणः) आक्रामति । तस्य सुभटास्तरवः, तरूणां मञ्जर्यः कञ्चुकानि, किसलयानि कवचाः, अलिकुलगुञ्जनमेव शिञ्जिनीध्वनिः, पिकाः बन्दिनः इति सेनापतिरूपकं वसन्तस्य ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भारतीय-दर्शन-सन्देशः

[ गताङ्कतोऽनुवृत्तः ]

( रचयिता—पं० चन्द्रदेवशर्मा, पुराणतीर्थः साहित्यरत्नम् प्रधानाध्यापकः "राजसंस्कृत विद्यालये" बेतिया चम्पारन)

अंशांशिभावाभिनिविष्टभावाः, सन्तः कियन्तोऽनुसृतस्वभावाः।
अनन्यभावेन भजन्ति विष्णुं पश्यन्ति सर्वत्र ततं तमेव ॥
तादात्म्यमेकेऽनुभवन्ति पूर्णम् निरस्तसर्वावरणा महान्तः ॥
सर्वं सदाऽऽत्मन्यवलोकयन्ते सर्वत्र चात्मानमपास्तभेदाः ॥३१॥
बिन्दुः समुद्रेऽस्तमुपेत्य किं स्यादिति प्रजानातु तदा स एव ॥
किन्त्वात्मशुद्ध्यै गुणतस्तु तेन सर्वात्मना सिन्धुरुपास्य एव ॥३२॥
शमं दमं कान्तिगतिं मतिञ्च धर्मं धृतिं वृद्धिमथो विशुद्धिम् ॥
विभूतिमिद्धाञ्च स एव देवः स्वांशैः समन्तादिह संबिभर्ति ॥३३॥
सम्पर्कशून्योपि गुणैः स सर्वैर्गुणाननन्तान् प्रकटीकरोति ॥
जगन्ति भूयो गतिमन्ति कुर्वन् स्वयं स आस्ते गतिभिर्विहीनः ॥३४॥
त्यक्तं जगत्तेन विलीयमानमनुगृहीतं समुदीयमानम् ॥
उदेत्य तस्मात् स्थितिमेति तस्मिन् निलीयते तत्र यथाप्सु बिन्दुः ॥३५॥
कान्तिः शशांके ज्वलने सुतेजः प्रभा पतङ्गे भगणे विभा च ॥
स्पर्शः समीरे सलिले रसोऽपि गन्धो धरायाम् नभसि ध्वनिश्च ॥३६॥
अज्ञानविज्ञानविजृम्भणानि प्रज्ञानसंज्ञानविबृंहणानि ॥
आकृतिरूतिर्विविधा विभूतिर्धर्मा मनश्चित्तधियां प्रसूतिः ॥३७॥
भावा विभिन्ना भवभावनास्ते विश्वात्मनो विश्वगतस्य विष्णोः ॥
विश्वैरलिप्तस्य नभोनिभस्य स्फुरन्ति शश्वत् किल सत्तयैव ॥३८॥
एवं धिया भूरि विभाव्यमाने आस्थीयमाने च दृढ प्रयत्नात् ॥
अवेयते यत्किल विश्वमूलम् लोके नराणामयनं तदेव ॥३९॥
गर्तं गतानामिह जीवभावादसत्सु नित्यं भ्रमतां मुधैव ॥
सुखार्थमेकोऽस्त्ययनं नराणां नारायणं तेन तमाहुरार्याः ॥४०॥
घ्राणेन गन्धं श्रवणेन शब्दं रसं समश्नन् रसनेन्द्रियेण ॥
स्पर्शं त्वचाऽक्ष्णा करणेन रूपं गृह्णन्नरो दुःखसुखान्यवैति ॥४१॥
क्षणावसानस्य सुखस्य हेतोर्दुःखान्तपाकस्य नरा नितान्तम् ॥
कर्मेन्द्रियैर्व्यस्तसमस्तयोगैः सञ्चिन्वते भौतिकवस्तुजालम् ॥४२॥
तदर्थमन्तःसुनिषक्तकामाः सदा समुत्सिक्तमनःप्रतानाः ॥
अन्योन्यवैराः परितः प्रलुब्धाः पतन्त्यपारे तमसि प्रगाढे ॥४३॥
मनोमयान्याहुरथेन्द्रियाणि मनःप्ररूढानि मनोगतानि ॥
तस्मात्तदर्थेन्द्रियसम्प्रयोगैर्नूनं मनो नर्तयते हि विश्वम् ॥४४॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# प्रणवीरमहाराणाप्रतापः

[ जन्मदिनम्—७ मई सन् १५४० ई०, मरणदिनम्—२६ जनवरी सन् १५६७ ]

लेखकः—नारायणशास्त्री काङ्करः, जयपुरम्

भारतीयविभूतिषु प्रतापोऽप्येकतमः स्वातन्त्र्यशक्तेः प्रतीक—इति नाविदितं कस्यचित् पुरातत्व-विदः। स्वभावेनायं प्रातः स्मरणीयो हिन्दूपतिः प्रतापः स्वदेशाभिमानी, स्वातन्त्र्य-व्रती, स्वार्थ-त्यागी, सत्यप्रतिज्ञः, महोदार-चेताश्च समजायत। राजपुत्राणामितिहासे यादृशमनेन नीतिविदार्जितं यशः, न तादृशमन्येन केनचन। यदाऽसौ प्रतापी प्रताप उदियाय— तदा न केवलं चित्तौड़भूमिरेव, प्रत्युत तत्समा प्रायः समस्तभारत-भूमिरपि यवनाधिपत्येऽवर्तत। मेवाड़स्य महान्तः सामन्तास्तु विगतसंग्रामेषु दिवङ्गता एवासन्। एतादृश्यां परिस्थितौ भारत-सम्राडकबरः स्वातन्त्र्याकाशे विचरन्तं प्रतापं निह्नोतुं मेघमाला-मिषेणात्मनः साम्राज्यस्य बुद्धिबलं बाहुबलं धनबलञ्च निःशेषतां प्रापयत्। तदानीन्तनाः कियन्तो राजपुत्रा अपि सम्राजोऽकबरस्यैव प्रभुत्वं स्वीकृत्य प्रताप-विपरीतमाचरन्तिस्म। यदि प्रतापोऽकामयिष्यत तर्हि असावपि इतर-नृपतीनिवात्मनो वंश-पुत्रीमकबराय समर्प्य तत्साम्राज्ये प्रतिष्ठित-पदमेकं निर्द्वन्द्वमभजिष्यत। परमासीत्तस्यायमटलसिद्धान्तो यद् "बापारावलस्य वंशजो न कस्यचित् पुर आत्मनः शिरो नमयिष्यतीति"। एतदभिप्रेत्यैवायं प्रणवीरः केवलं केभ्यश्चित् स्वदेश-भक्त-कर्तव्य-परायण-राजपुत्रेभ्यो भिल्लेभ्यश्च सहायतामवाप्य स्वदेशस्य स्वातन्त्र्य-रक्षायै तूर्णं कटिबद्धः समजायत। आसीत्तस्य मरण-शय्यायामपि स्वदेशस्य स्वातन्त्र्य-रक्षा-ध्यानम्। अतएवासौ यदात्मजोऽमरसिंहः स्वयं स्वातन्त्र्य-रक्षण-भारमात्मनः स्कन्धोपरि जग्राह तदैव शान्तिपूर्वकममर-लोकमियाय।

तदीया वीरता, रण-कुशलता, कष्टसहिष्णुता नीतिमत्ता चात्यन्तमेव प्रशंसनीयाऽनुकरणीया। अतएवैतं प्रतापम्, अकब्बरः यस्तत्समयस्य सर्व-शक्ति-सम्पन्न ऐश्वर्यशाली च सम्राडगण्यत, कृत्वापि बहु प्रयत्नम्, न खलु वशंवदं विधातुं शशाक। कदिवारमात्मनः सुयोग्यान् सेनापतीन् तमाक्रमितुं प्रेषयामास, स्वयमप्येकदा समाययौ परं मनोरथपूर्तिं नाविन्दत। राणाप्रतापस्तु तद्विपरीतं, न सम्राजोऽग्रे शिर एवानमयत्, न च तं सम्राजमेवाचकथत्, अपितु तदानीं मेवाड़स्योत्पादकप्रदेशान् कृषिञ्च विनाश्य सम्राट्-सेनाया रसद-व्यापारयोः मार्गमवरुद्ध्यात्मनो नीतिज्ञ-ताया अद्भुतं परिचयं ददौ। अयमेव हेतुर्यत्-स्वयं गुणग्राही सम्राड्अकब्बरोऽपि हृदयेन प्रतापं प्रशशंस। किमधिकम्, प्रतापस्य मृत्यु-समाचारं श्रुत्वा तु स्तब्ध एव सञ्जातः सः। तदन्तिकमुपस्थितो "दुरसा आढ़ा" नामकश्चारणस्तदा छप्पयमेकं विरचय्य सम्राजमश्रावयत् पुरस्कृतश्चाभवत्—

"अस लेगो अणदाग, पाघ लेगो अणनामी।
गौ आडा गवडाय, जिको बहतो धुरवामी।
नव रोजे नह गयो, न गौर आतसां गवल्ली।
न गौर झरोखां हेठ, जेठ दुनियाण दहल्ली।
गहलोत राणा जीति गयो, दसण मूंद रसणा।
नीसास मूक भरिया नयण तो मृतशाह प्रताप सी।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सम्पादकीयम्

**शिक्षा च भारतं च**—शिक्षितैर्विदितं भवेद् यत् 'राजपूतानाविश्वविद्यालयस्य' दीक्षान्तभाषणे (६।१२।५३) मिर्जा इस्माइलमहोदयः प्रावदत्—"यत् वर्तमाना शिक्षा नितरां सारहीना। विद्यार्थिनां संख्या-वृद्धिर्न संतोषाय। सम्प्रति शिक्षितास्तादृशा न निष्पद्यन्ते यादृशानामावश्यकता। अस्यैव परिणामो यद् विद्यालयेषु समुचिता अध्यापकाः परिगणिता एव लभ्यन्ते। गान्धिमहात्मना परिचालितां बेसिकशिक्षां नाहमनुमोदयामि। शिक्षयाऽनया श्रमजीविनो निष्पद्येरन्, न गम्भीराध्ययनशीलाः। अनेन तदिदमपि प्रोक्तं यत्—उपकुलपतेः (वाइसचान्सलर) कार्यकालस्य अवधिनियमो नोचितः। स हि यावज्जीवम् आत्मनः पदे कार्यं कर्तुमर्हति, इत्यादि।'

परं श्रीमन्नारायणअग्रवालप्रभृतिभिरेतस्य खण्डनमकारि। यतो हि शिक्षाशास्त्रिणो बेसिक (साधार) शिक्षां सर्वथा उपादेयामादरणीयां च

---

अर्थात्—अयि गुहिलोत प्रताप! तव मृत्युना सम्राडकब्बरो न दशनमध्ये रसनां पीडयामास न च सनिःश्वासमश्रूणि स्रावयामास। यतो हि त्वमात्मनो घोटकं घातादरक्षयः, मस्तकोष्णीषिकां न कस्यचिदग्रेऽनमयः, अखण्डकीर्तिमार्जयः। राज्यभारं स्वस्कन्धयोरवाहयः, अन्तःपुरं सम्राजः शिबिरञ्च नोऽगमयः, न च कदाचित् सम्राजो गवाक्षादध एवातिष्ठः, तव प्रतापं च सर्वोऽपि लोकोऽमन्यत, अतः सर्वविधिना त्वमेव विजयी वर्तसे - नास्त्यत्र कश्चित् सन्देह इति।

महाराणो न केवलं पराक्रमी सांयुगीनश्चैवासीत् प्रत्युतैक आदर्शवादी महापुरुषो बभूव। केवलमाखेटाय परिमितराजपुरुषैः समायान्तं मानसिंहं छलेन नाक्रम्य अमरसिंहद्वारा गृहीतयवन-पत्नीश्च यथास्थानं ससम्मानं परावर्त्यात्मनो विशाल-हृदयतां परिचाययामास। प्रलोभनं प्रदाय क्षत्रियनृपतीन् सामन्तांश्च सेवकनिर्मात्र्या अकब्बरस्य कूटनीतेर्यदि कश्चिदुत्तरदाता आसीत्तर्हि केवलं महाराणा प्रताप एव।

अप्रतिहततेजसः प्रणवीरमहाराणाप्रतापस्य कार्यकलापोऽद्यापि मेवाडस्यैकैकस्यामुपत्यकायां साम्प्रतिकतुल्यं प्रतीयते। अद्यापि तस्य वीर-गाथाः प्रत्येकं राजपुत्रहृदयेषूत्तेजनामुत्पादयन्ति। न केवलं प्रतापो राजपूतानाप्रान्ते एव, अपितु समस्तेऽपि भारते ससम्मानं संस्मर्यते जनैः। आंग्लभाषा तथा भारतस्य प्रायः समस्ता अपि भाषाः प्रतापस्यातुलवीरत्वमखण्डकीर्तिं च गायं गायमात्मनः कृतकृत्यं मन्वते। हर्षस्यायं विषयो यदितरमहापुरुषाणामिव प्रतापजयन्तीमपि सम्पादयन्ति केभ्यश्चिद्वर्षेभ्यो भारतीयाः। सुवर्णे सुगन्धः स्याद्-यदि सर्वकारो जनता च सीसोदिया-वंशावतंस-प्रतापस्य दुर्लभं स्मारकं निर्माय सुलभं तं विदध्यात्। किमपि भवेन्नाम, यावत् संसारो वीर-पूजां करिष्यति—प्रतापं न कदापि विस्मरिष्यति। सोऽयं जन्म-दिवसोपलक्ष्ये प्रतिवर्षं सम्पाद्यमान ऐषमः ४१२ तमः प्रतापजयन्ती-महोत्सवस्तस्यैव प्रतापस्य अतुलितं त्यागं, अदम्यमुत्साहम्, अनुपमां नीतिज्ञताम्, अपूर्वां देश-भक्तिञ्च स्मारयन् अस्मानपि तदनुकरणाय प्रेरयतीति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मन्यन्ते। कियत्कालात्पूर्वम् आकाशवाणी ( रेडियो ) द्वारापि शिक्षासम्बन्धे एवंविधानि भाषणानि संवृत्तानि येषां सारो 'भारती'पत्रे पुरा प्रादायि मया। सूचनाविभागस्य मन्त्री डा० केसकरमहोदयः ६।१।५४ तिथौ रेडियोद्वाराऽभाषत—यत् वर्तमानशिक्षा परिवर्तनार्हा। सम्प्रति य इतिहासः पाठ्यते, स हि आङ्ग्लानां शासनकालस्य। वर्तमानयुगस्याऽऽवश्यकतानुसारमितिहासे न केवलं परिवर्तनमेव आवश्यकम्। अपितु सर्वाण्येव पुस्तकानि पुनर्नवीनरूपेण लेखनीयानि संवृत्तानि। शिक्षायां विद्यार्थिनो जीवनोपरि विशेषेणाऽवधातव्यं भवेत्, इत्यादि।

किन्तु डा॰ अमरनाथझामहोदयस्य १३।१।५४ दिने यद् भाषणमभूत तद्धि परममार्मिकम्। पूर्वोक्तमहोदयानां मतमालोचयता तेन प्रोक्तं—"शिक्षार्थिनः प्रारम्भिकजीवने प्रारम्भिकशिक्षायामितिहासभूगोलविज्ञानादि सर्वमपि यथेच्छं पाठयितुं शक्यते। किन्तु सर्वत्रापि तस्य आहार-विहारनिरीक्षणं सुतरामावश्यकम्। अहं नेदमुचितं प्रतर्कयामि यत्प्रत्येकविद्यार्थी हस्तकौशलं शिक्षेत। शारीरिकपरिश्रमं परिशीलयेत्। कृषिं वा कुर्यात्, इति। किन्तु स यदि ख्यातनामा ऐतिहासिको वैज्ञानिको वा निष्पद्यते तर्हि किं तदिदमादरणीयं नास्ति? यतो हि शिक्षायां सर्वेषां समानाधिकारः। किन्तु प्राथमिकशिक्षां परिसमाप्य शिक्षार्थी किं पठेदिति हि शिक्षार्थिनः स्वाभाविकीं रुचिं परीक्ष्य शिक्षाशास्त्रिभिर्निर्धारयितुमुचितम्। यदि गम्भीरो विद्वान् न भवितुमर्हति तर्हि जीवनोपयोगिव्यापारादिशिक्षां प्रदाय तत्रैव तस्य मनोयोगो व्यासज्यताम्। अन्यथा तु समुचितं विज्ञानादिकमधीत्य सम्माङ्कितः स विद्वान् भवेत्। द्वावपि मार्गौ शिक्षायामनावृतौ भवेताम्—कामं स विद्वान् भवेत्, अथवा जीविकोपार्जकः।

वर्तमानमध्ययनक्रमं दृष्ट्वा मार्मिकस्येदमेव प्रतीतं भवति यत् सोयं शिक्षाक्रमो वैदेशिकानां केषांचिदस्तीति। सम्प्रति शिक्षाक्रमस्तादृश आवश्यको यं दृष्ट्वैव सर्वस्य प्रतीतं भवेद् 'यदनेन भारतीयाः पाठ्यन्ते'। भारतीयैर्निजसंस्कृतिः पूर्णरूपेण शिक्षणीया। चरित्रनिर्माणमत्यन्तमावश्यकम्। वर्तमाने चरित्रं प्रत्यहं हीयते। अतएव प्राचीनसंस्कृतेः शिक्षा नवीनं शिक्षाप्रकारमवलम्ब्य अविलम्बं दातव्या। तत्रापि चरित्रशिक्षा सुतरामावश्यकी। इदमेव लक्ष्यं स्थिरीकृत्य माध्यमिकशिक्षायां सम्प्रति परिवर्तनं कर्तव्यं भवेत्। माध्यमिकशिक्षकाः सांप्रतमत्यन्तं हीनाः। अतिस्वल्पं वेतनं तस्य। वराकः स प्रतिपदं भावयति यत् अध्यापकस्य व्यवसायोऽत्यन्तं हीनः। हन्त सेयं भावना अविलम्बं परिहेया सम्प्रति। मास्टरपदवाच्यानां निरन्नं जीवनं व्यतिगच्छेदित्यस्य प्रथमः सोपानः सम्प्रति। किन्तु एतदर्थं विश्वविद्यालयस्य शिक्षायां परिवर्तनस्य नाऽऽवश्यकता, किन्तु तत्र परिवर्द्धनस्यापेक्षा।

यतो हि जनसंख्यावृद्ध्या सह शिक्षार्थिनां प्रत्यहं वृद्धिः। एतेषां पाठनाय अध्यापकानां संख्या न्यूना। शिक्षाया माध्यमं साम्प्रतमंग्रेजीभाषाऽस्ति, तदिदमस्वाभाविकम्। सर्वेऽपि भारतीया वराका विचारयन्ति हिन्दीभाषायाम्, बुध्यन्ते च तयैव भाषया। किन्तु पठन्ति अंग्रेजीभाषया? इयमप्राकृतलीला किमर्थम्?

अद्य समुचिता अध्यापकाः सुदुर्लभाः संवृत्ताः। कारणमत्र अध्यापकानां ज्ञानदौर्बल्यम्। एतदर्थमयमेव प्रत्युपायो यद् ग्रीष्मावकाशे परीक्षोत्तीर्णा अध्यापनस्य



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कार्यमपि शिक्षेरन्। यदि ते तत्र सफलाः सिध्येयुस्तर्हि तेभ्यस्तत्तत् परीक्षोत्तीर्णतायाः पदकं प्रदीयेते। अन्यथा न।"

भ्रामहोदयस्य भाषणं भारतीयानां कृते वस्तुतो हितावहम्। को वा विचारशीलो न वदेद् यद् वर्तमानकाले आङ्गलभाषाया माध्यममुपहासास्पदमेव। भारते चरित्रशिक्षणमपि सुतरामावश्यकम्। वक्तुं संकुचामि यद् वर्तमानकाले उच्चोच्चपदारूढा अपि चरित्रे नितरां हीनाः। भारतीयसंस्कृतेर्विषये ते सुतरां शून्याः। प्रतिपदं 'संस्कृतिः, संस्कृतिः' इति उद्घोषमात्रं वयमाकर्णयामः। किन्तु संस्कृतेः का दशा साम्प्रतमिति प्रतिपदं प्रत्यक्षानुभवस्य विषयः। न किल मुखेन वक्तुं समुचितम्। अपि एवंविधभाषणानि कर्णयोर्धारयन्त्यस्माकं शिक्षाकर्णधाराः ?

सम्प्रति शिक्षाविषये कं परिष्कारं ते कुर्वन्तीति वयं प्रत्यहं प्रतीक्षामहे।

**डा० पट्टाभिसीतारामय्यामहाभागस्य संस्कृत-समादरः**—मध्यप्रदेशराज्यपालेन डा० सीतारामय्यामहाभागेन नागपुरविश्वविद्यालयस्य दीक्षान्तभाषणे संस्कृतभाषयैव सर्वं कार्यं संपादयता संस्कृतस्य सुमहानादरः प्रदर्शितः। तेन हि प्रोक्तं "यत् अतीतवर्षादेव संस्कृतभाषायां मम भाषणं विलोकयतां भवेत्कदाचिद्विस्मयः, किन्तु जगति सर्वत्र सेयमेव रीतिर्यत् यस्य देशस्य या या सुसंस्कृता भाषा तस्यामेव सर्वेषु संस्कारेषु, महोत्सवेषु च व्यवहारो भवति। ऑक्सफोर्ड-केंब्रिज विश्वविद्यालयेषु स्नातकेभ्य उपाधिवितरणमहोत्सवे ये मन्त्राः पठ्यन्ते ते सर्वे लैटिनभाषामया एव। सर्वैः कदाचित् श्रुतमेव भवेद् यत् कतिपयदिनेभ्यः प्राक् कैम्ब्रिजविश्वविद्यालयेन भारतदेशस्योपाध्यक्षाय डा० राधाकृष्णमहोभागाय 'विद्यापारीण' इति परममर्हणीयमुपाधिं समर्प्य यः परमादरः प्रदर्शितस्तस्मिन् समये सर्वेऽपि मन्त्रा लैटिनभाषायामेव पठिता आसन्। ततश्च युरोपीयाणां यादृशः संबन्धो लैटिनभाषया, प्रादेशिकभाषाभिः सह संस्कृतभाषाया अपि तादृश एव संबन्धः।

अतीते संवत्सरे पुण्यपत्तन (पूना) विश्वविद्यालयेनाऽपि समावर्तन-उपाधिवितरणप्रसङ्गे सर्वोऽपि कार्यक्रमः संस्कृतभाषयैव संपादितः। सर्वेषामिदं विदितमेव यद् हिन्दुजातीयानां सर्वेषां भारतेऽस्मिन् ईश्वराराधनं संस्कृतभाषायाम्, महम्मदीयानां च अरबभाषायां भवति। एवमेव विवाहविधिप्रतिज्ञासु वार्षिकोत्सवेषु, अन्तिमसंस्कारेषु च संस्कृतभाषाया प्रयोगस्य तदिदं प्रयोजनं यत्पूज्यानामासां भाषाणां प्रयोगेण अपूर्वं किमपि तेजः, अपूर्वा काचिद् दैवी शक्तिः समुत्पद्येत, इति। नेदं गौरवं सामाजिकधार्मिकविधिष्वेव प्राचीनभाषाणाम्। अपि तु युरोपीयाणाम् ऐलोपैथिकभैषज्यशास्त्रानुसारेण दीयमानेषु औषधयोगेषु (प्रिसक्रिप्शन, नुसखे) अपि सं[illegible] समादरो विलोक्यते। अत्र हि प्रारम्भः, उपसंहारश्च "प्रतिदिनं त्रिवारं ग्राह्यस्य औषधस्य संमिश्रणं कुरु" इति रूपेण प्राचीनभाषयैव पर्यवसानं दृश्यते।

अयं महान् दैवदुर्विलासः, सर्वेषु सर्वमूर्धन्या यत् सेयं देववाणी या अस्माकं राष्ट्रस्य प्रधान[illegible] भाषा, सैव तस्याः स्वनिकेतनीभूते भारते इत्थं[illegible]मुपेक्षिता भवति। भारतमिदं तादृशो देशो [illegible] धार्मिकग्रन्थाः, विविधशास्त्राणि, इतिहासाः, पुराणानि, नाटकानि, गणित-वैद्यक-शिल्पादिशास्त्राणि



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



संस्कृतभाषायामेव विलिखितानि। नायं समादरः संस्कृतस्य भारते एव। अपि तु युरोपखण्डे तत्रत्यैः विद्वद्भिः संस्कृतभाषाविषये यद् यत् कृतं तस्य विहंगमावलोकनं करिष्यामः। शार्मण्य(जर्मन) देशे पञ्चविंशतिः प्राच्यविद्याधीतिनः, आंग्लदेशे त्रिचतुराः। प्रथममहायुद्धात्प्राक् शार्मण्यदेशे तेषु तेषु विद्यालयेषु संस्कृताध्यापनार्थमेव विंशतिरध्यापकपदान्यासन्।

संस्कृतभाषा—एतद् भारते बहुवारं श्रूयते यत्संस्कृतं 'मृतभाषा', आधुनिके युगे अस्या अध्ययनेन को लाभः' इति। अत्र ब्रूमः—प्रचलितभाषाणामध्ययनं नितरामबोधोऽपि बालकः शक्नोति कर्तुम्। तद्धि यान्त्रिकं (मशीनरी) कार्यमिव। परन्तु प्राचीनभाषायां प्रभुत्वसपादनं बुद्धिवर्धनाय। कैश्चिदप्येतत्समुदीर्यते यद्—'वय यान्त्रिककलायाः तथा भौतिकशास्त्रोपचयस्य युगे निवसामः। अतो नास्माकं मानवशास्त्राणामध्ययनेन प्रयोजनम्। एतानि शास्त्राणि औद्योगिकीं तथा वाणिज्यसंबन्धिनीं संस्कृतिमुपकर्तुं न प्रभवन्ति' इति। एतन्न समीचीनम्। यद्यस्माभिर्मनुजचर्योपयुक्तस्य धर्मप्रदीपस्य अखण्ड-निर्बाधज्वलनं वाञ्छ्यते, तर्हि संस्कृतिबोधकानि सामाजिकशास्त्राण्यध्येतव्यान्येव भविष्यन्ति। एतदेव हि भारतीयसभ्यतायाः भारतीयमानवजातेश्च अन्याऽपेक्षया वैशिष्ट्यम्। अस्माकं राष्ट्रस्य नैतिकदृढताया एव तदिदमपूर्वं महत्त्वं यत् अनेकशतसंवत्सरपर्यन्तं परकीये राज्ये सत्यपि तस्य स्वकीयमलौकिकं व्यक्तित्वं न किञ्चिदपि परिहीणम्। एतादृशमसाधारणं व्यक्तित्वं राष्ट्रस्य भौतिकसाधनसामग्र्यां न किल निर्भरम्। येन गुणेन एतादृशमलौकिकं व्यक्तित्वं विन्दते, स तु राष्ट्रस्य तत्त्वज्ञानम्, आध्यात्मिकं ज्ञानमेव। तथा तत्र कारणं राष्ट्रस्य प्राचीनपरम्परैव, तस्य राष्ट्रस्य सर्वोच्चतमा मानवी संस्कृतिरेव।

परदेशेषु संस्कृतप्रतिष्ठा—इदानीम् इटलीदेशतो हालैण्डदेशं प्रति गच्छामः। तस्मिन् राष्ट्रे पञ्चविश्वविद्यालयानां मध्ये चतुर्षु संस्कृतविद्याया महतोत्कर्षेणाऽध्ययनं प्रचलति। भारत-युरोपीय भाषासु ग्रीकभाषावत् संस्कृतभारत्यै तत्राऽत्युच्चस्थानं दीयते। अस्माकं दौर्भाग्यमेतत्त यद् आङ्गलदेशीयैर्भारतदेशे तथा स्वदेशेऽपि अस्याः प्राचीनभाषाया महती उपेक्षा कृता। आंगलानामपेक्षया फ्रांसदेशीयैः संस्कृताध्ययने अधिक आदरः संदर्शितः। शार्मण्यदेशीयैर्हालैण्डदेशीयैश्चापि सर्वस्मादधिकतरः प्रदर्शितः समुत्साहः एतस्या अध्ययने। लीडनविश्वविद्यालयस्थैर्विद्वद्भिः एतावत्कालपर्यन्तं सर्वेभ्योऽप्यधिकतरं बौद्धसाहित्ये पुराणसाहित्ये च चित्तं संयोजितम्। इण्डोनेशियादेशीयानां मुद्रितानां संस्कृतग्रन्थानां महान् संग्रहो नागपुरस्थ-श्री डा०रघुवीरमहोदयैः संस्थापितायां "इण्टर नेशनल ऐकेडेमी ऑफ इण्डियन कल्चर" इति नाम्न्यां संस्थायामुपायनीकृतः। सोयं संग्रहो हालण्डदेशीयानां संस्कृतभाषायामस्यां विद्यमानस्य समादरस्य प्रत्यक्षं निदर्शनमेव। लीडन्नगरे प्राध्यापक चॉशसदृशा बहवो भारतविद्यानिपुणाः सञ्जाताः तेषां 'हिरण्यगर्भ' नामा कश्चिद् ग्रन्थो विद्यते यस्मिन् इण्डोनेशियादेशस्य तथा भारतस्य च शिल्पकलाया बहवो विशेषा उदाहृता दृश्यन्ते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



हालेण्डदेशे उट्रैक्टविद्यालये संस्कृतं पठद्भिर्विद्यार्थिभिः विशिष्टाद्वैतस्य, भगवद्गीतायाः, तथाऽन्येषां वैदिकानां राजसूय-देवा-सुरादिविषयाणां तथा विष्णुधर्मोत्तरे कालिकापुराणे च वर्णितानां विविधानां श्रौतस्मार्तविधीनामध्ययने महानुत्साहः परमा श्रद्धा च प्रदर्श्यते। चतुर्षु विश्वविद्यालयेषु चरमो यो ग्रानिङ्गनविश्वविद्यालयः स किल विशेषतः स्मरणीयः। अस्मिन् बहूनां संस्कृतग्रन्थानामनुवादाः प्रसिद्धिं नीयन्ते। विशेषतः संस्कृतनाटकानाम्, येषु शाकुन्तल-मृच्छकटिक सहितानामष्टानां डचभाषायामनुवादः कृतो विद्यते। एते द्वे रूपके हालैण्डदेशे अभिनीय प्रदर्शिते इति शुश्रुम। विदेशेषु संस्कृतभाषाया अध्ययने अन्वेषणे च यद् अवधानं दीयमानं दृश्यते तदवलोक्याऽस्माकं चेतसि कृतज्ञतायाः प्रमोदस्य च कल्लोला उत्तिष्ठन्ति।' इत्यादि।

भारते ये किल शिक्षाकर्णधाराः सन्ति तैः कर्णौ विस्फार्य भाषणमिदं श्रुतं विचारितं च भवेत्। यैः पाश्चात्यैः सह सुदूरे निवसतामस्माकं न कोपि सम्बन्धः प्रत्युत कश्चिद्विरोधभाव एव तेपि संस्कृतभाषाया अस्या मानवतासंपादने अपूर्वमसामान्यं च गुणं विलोकयन्तः स्वदेशे इमां प्रेम्णा प्रचारयन्ति, एतदीयगुणैर्मानवतां संपादयन्ति। किं बहुना, अस्माकं संनिहितः प्रतिवेशी अफ़गानप्रदेशोऽपि निजविद्यालयेषु संस्कृताध्ययनमनिवार्यं विधाय तस्या भाषाया महान्तं समादरं प्रदर्शयति। हन्त डा० सीतारामय्यामहाभागस्य शब्दैरहमपि निजाभिप्रायं प्रकटयामि—"यत् एतदतीव दुःखावहम् उत्साहभञ्जकं च यद् भारतदेशे संस्कृताध्ययने अतीवाऽल्पमवधानं दीयमानं दृश्यते। न केवलमेतदेव। किन्तु यत्किञ्चिदवधानमेतावत्कालं दीयमानमदृश्यत, तदपि विश्वविद्यालयेषु उत्तरोत्तरम् अपचीयमानमिव दृश्यते। भगवानचिरमेव देयात्सुबुद्धिं शिक्षाकर्णधारेभ्यः।

---


पश्चिमोत्तरभारत की प्रमुख हिन्दी मासिक पत्रिका

**विश्वज्योति**

सम्पादक—
**श्री विश्वबन्धुशास्त्री**
**श्री सन्तराम,** बी. ए.

संचालक—
**श्री विश्वेश्वरानन्द**

विश्वहित की साधना के लिए

[क] शुद्ध सांस्कृतिक साहित्य का सृजन,
[ख] प्राचीन और नवीन ज्ञान-विज्ञान का समन्वय,
[ग] बौद्धिक क्रांति और नई चेतना का जागरण,
[घ] अन्यायपूर्ण सामाजिक विषमताओं का दूरीकरण,
[ङ] सभी प्रकार के विचारों का निष्पक्ष अध्ययन और आलोचन।

वार्षिक चन्दा ८) रुपए

१०)रु० वार्षिक चन्दा देकर विश्वेश्वरानन्द वैदिक संस्थान के सदस्य बन जाने पर भेंट के रूप में मुफ्त

पत्र-व्यवहार का पता:—
व्यवस्थापक, 'विश्व ज्योति' साधु आश्रम
होश्यारपुर, (पंजाब)




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# कुम्भ-समाचाराः

## कुम्भमहापर्वणि महान् जनसमारोहः—

ज्योतिःशास्त्रानुसारं मकरराशिगे सूर्ये, वृषराशिस्थे च बृहस्पतौ कुम्भनामको महान् पुण्ययोगः संपद्यते। यत्र हि प्रयागस्नानेन महतः पुण्यफलस्याप्तिरिति प्रतिद्वादशवर्षं प्रयागे कुम्भसंमेलनं भवति। अत्र हि भारतस्य सर्वेपि सन्तो महान्तश्च ससमारोहमुपागच्छन्ति। अस्मिन् वारे १२०० वर्षाणामनन्तरं सोयं समायोगः संजात इति पञ्चाशल्लक्षजनानामेकत्र संघटनं नाम जगति अपूर्वो महामेलकः। श्रूयते कुम्भावसर एव भगवान् शङ्कराचार्यो बौद्धप्रतीकारायाऽभ्युत्थानमकरोत्। अस्मिन् वर्षे बहोः कालादनन्तरं सोयं योगः समायात इति दूरदूरप्रान्तेभ्यो धर्माचार्याः, मण्डलेश्वराः, सन्तो, महान्तः, धर्मप्राणजनाश्च प्रचुरातिप्रचुरसंख्यायां समवेताः समभूवन्। षष्टिलक्षजनानामयं समारोहः समभूदिति बहवो वदन्ति। अस्तु यत्किञ्चित्। किन्तु अस्मिन्नवसरे नानादिग्देशेभ्यः समागतानां भारतीयानां नानाविधानि सभा-संमेलनानि समभवन्निति विदितमेव संवादपत्रपाठकानाम्।

## अखिलभारतीय संस्कृतसाहित्यसंमेलनम्—

गङ्गातटस्थिते 'बाबा कालीकमलीवाले'महाभागस्य शिविरे, उत्सवार्थं निर्मिते महामहति सभामण्डपे, ससमारोहं समघटत। संमेलनस्य सभापतित्वं महामण्डलेश्वरस्वामिश्रीमहेश्वरानन्द (गङ्गेश्वरानन्द) महाभागैरधिकृतम्। अत्र हि भारतप्रसिद्ध म०म०पं० श्रीगिरिधरशर्मचतुर्वेद-पं०ज्ञानप्रस्थी, स्वामिश्रीजयरामदास, नाभिरामजोशीप्रभृतीनां संस्कृतस्य वर्तमानपरिस्थितेः तदुन्नतेश्चोपरि सारगर्भितानि भाषणानि समभूवन्। प्रारम्भे संमेलनस्य प्रधानमन्त्री पं० श्रीकेदारनाथसारस्वतमहाभागः संमेलनस्येतिहासं सूचयन् संस्कृतस्योपयोगितां महत्तां चाऽवर्णयत्। अत्र हि संस्कृतसाहित्यस्य वर्तमानदयनीयदशायाः कारणम् आधुनिकशिक्षाप्रणाल्येवास्तीति समुदटङ्क्यत। प्रधानमन्त्रिणा तदिदमपि सूचितं यत्संमेलनं शीघ्रमेव दिल्लीराजधान्यामादर्शसंस्कृतविश्वविद्यापीठं स्थापयिष्यति। एतस्य सर्वापि योजना अस्मिन्नधिवेशने स्वीकृता भवेत्।

सभापतिमहाभागेन निजपदात्समर्थितं यत् स्वतन्त्रताप्राप्तेरनन्तरं संस्कृतभाषाया विशेषतो ह्रासः समभूत्। एतस्योत्तरदायित्वं वर्तमानशासनाधिकारिणामुपरि विशिष्याऽस्तीति न विस्मर्तव्यम्। पूर्वशासकैराङ्गलैर्यथा निजभाषा अंग्रेजी सर्वभावेन प्रचारिता, तथा राष्ट्रियसर्वकारस्य सर्वतोऽग्रिम कर्तव्यं यत्स संस्कृतं, देशभाषां हिन्दीं च सर्वभावेन परिपोषयेत्। साहित्याचार्य पं० पुरुषोत्तमचतुर्वेदि-श्रीदत्तशर्मप्रभृतिभिरपि संस्कृतस्योपयोगिता वर्तमानदशा च सम्यग्रूपेण परिसूचिता। 'भारती'पत्रस्य प्रबन्धप्रकाशकः पं० गिरिराजशास्त्री अपि संस्कृतोन्नतये राज्यशासकानां जनतायाश्चापि प्रधानं कर्तव्यमसूचयद् यत् संस्कृतज्ञेभ्यः आङ्गलभाषाविद्भिः समानमेव पदं वेतनं च प्रदातव्यमिति। संस्कृतज्ञजनतायाः संप्रति प्रधानमिदं कर्तव्यं यत्प्राचीनकाले यथा संस्कृतज्ञैर्निजभाषासमुन्नतये तनु-मनो-धनैः प्रयतितं तथा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



साम्प्रतमपि तस्याः स्वोचितसिंहासने समारोहणार्थं तैः सर्वभावेन प्रयतितव्यम्।

**गोप्रदर्शिनी गोहत्याविरोधसम्मेलनं च—**

२३ जनवरीदिने भूँसीस्थाने गोप्रदर्शिन्याः शुभव्य-मायोजनं समभूत्, यत्र पञ्चशतानुमितानि गोसम्ब-न्धिचित्राणि प्रादर्श्यन्त। यैर्हि गो-मातुः पौराणिकम्, ऐतिहासिकम्, धार्मिकं च महत्त्वं सुस्पष्टमभूत। एत-दपि तत्र सप्रमाणं प्रादर्श्यत यत् स्वतन्त्रभारतेस्मिन् गो-मांसस्य गोचर्मणश्च विदेशेषु प्रेषणस्य परिमाणं कियत्सख्यायां परिवृद्धम्। विंशतिदिनेषु सेयं प्रदर्शिनी पञ्च-सप्तलक्षजनानां दृष्टिगोचराऽभवत्। यां दृष्ट्वा सर्वेऽपि सहृदया गोमातुर्महत्त्वं, गोमांस-चर्मादि विक्रेतॄणां प्रबन्धकानां वज्रहृदयत्वं भारतीयधर्मोल्लं-घनं च सुस्पष्टमबुध्यन्त।

४–५ फर्वरीदिने गोहत्यानिरोधसंमेलनमभूत्, यत्र श्रीपुरुषोत्तमदासटण्डनमहोदयस्य, राष्ट्रियस्वयंसेव-कसंघस्य प्रधानसंचालकश्रीगुरोः, लालाहरदेवसहा-यस्य, अनेकेषां महामण्डलेश्वराणां च भाषणान्य-भूवन्। सर्वसंमत्या एकः प्रस्तावो भारतराज्यतन्त्रस्य सविधे सोयमक्रियत यत् जन्माष्टमीपर्यन्तं संपूर्ण-रूपेण भारते गोहत्या सर्वथा निरुद्धा भवेदिति। संमेलनेस्मिन् प्रायः सर्वेऽपि सन्तो महान्तः आग-न्तुका धार्मिकाश्च सममिलन्। प्रतिपद्दिने संपूर्ण-दिनमुपवासमवलम्ब्य धार्मिकजनतया ईश्वरप्रार्थना कृता यत् अविलम्बमेव भारते धर्मविघातिनी सेयं गोहत्या सर्वथा निरुद्धा भवेदिति।

**के०एम०मुंशीमहोदयस्य संस्कृतानुरागः—** श्रौतमुनिनिवासशिविरे महामण्डलेश्वरश्रीगङ्गेश्वरा-नन्दमहोदयानामध्यक्षतायामेका प्रकाण्डसभा कुम्भ-समये समभवत्। यत्र संस्कृतमहत्त्वं भाषमाणेन श्रीकन्हैयालालमाणिक्यलालमुंशीमहोदयेन साग्रहं समर्थितं "यद्वर्तमानकाले संस्कृतभाषाप्रचारस्य नितान्तमावश्यकता। संस्कृतमेव तावदीदृशं सूत्रं यस्याधारेण देशस्याऽखण्डतायाः साम्प्रतं रक्षा कर्त्तुं शक्या। अद्य भारते विभिन्नप्रान्तेषु प्रान्तीयभाषाणामाधारेण प्रान्तानां निर्माणस्य या भयङ्करी समस्या समुपस्थिता सा हि संस्कृतभाषाप्रचारेणैव समाधातुं शक्या। संस्कृतभाषाया लिपिर्देवनागरी। अतएव विभिन्नेष्वपि प्रान्तेषु प्रान्तीयभाषाणां विभिन्नतायामपि सर्वे किल संस्कृतं देवनागर्यैव लिप्या लिखन्ति। संपूर्णेऽपि देशे धर्मं च संस्कृतिं च प्रति यद्यनुरागः सन्नद्धयितुं काम्यते तर्हि तस्यापि साधनं सेयं संस्कृतभाषैव। अतएव जनतया, समस्तैः 'सन्त'महोदयैश्च संस्कृत-प्रचारस्य पूर्णशक्त्या प्रयत्नः कार्यः। शासनतन्त्रेण सोमनाथतीर्थे विश्वसंस्कृतपरिषदः स्थापनां कृत्वा एतस्यां दिशि निजस्य सहकारः प्रकटितः। एतस्याः परिषदो विगतमधिवेशनं समभूत् वाराणस्याम्, आगामि च नागपुरे संभवेत्।" अस्यां सभायां सर्वैरेव मण्डलेश्वरैः संस्कृतप्रचारस्याश्वासनं दत्तम्।

**अखिलभारतीयं मित्रमण्डलम्—** ७ फर्वरीदिने मित्रमण्डलस्यास्य अन्तःप्रान्तीयमधिवेशनं पटना-शिबिरे समभवत्। प्रथमं श्रीसूर्यदत्तशास्त्रिणा मित्र-मण्डलस्योद्देश्यप्रकाशकं निजभाषणं दत्तम्। तदनन्तरं 'भारत्याः' प्रबन्धसम्पादकेन श्रीगिरिराजशास्त्रिणा 'कृण्वन्तो विश्वमार्यम्' इत्यादि समुद्घोषयता प्रोक्तं यद् 'मातृवत् परदारेषु परद्रव्येषु लोष्टवत्। आत्मवत्सर्वभूतेषु०' इत्यादि निजलक्ष्यं सम्मुखे कृत्वा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



आर्यैरेव मित्रमण्डलस्य वास्तवोऽर्थः सर्वत्र विस्तारितः। अद्य संसारस्य विभिन्नराष्ट्राणां संघर्षे मित्रतायाः, त्यागस्य चाधारे एव वयं स्वीयं राष्ट्रं ससम्मानं स्थापयितुं प्रभविष्यामः।'

भव्या संस्कृतप्रदर्शिनी—जयपुरात्प्रकाश्यमानस्य 'भारती' पत्रस्याऽस्य प्रबन्धकेन श्रीगिरिराजशास्त्रिणा 'तुलसीदासमार्गोपरि सुभव्यायाः शोभनायाश्चैकस्याः संस्कृतप्रदर्शिन्या आयोजनमक्रियत। अत्र हि शताधिकानि नानावर्णानि विशालानि चित्राणि भित्तौ लम्बितानि। येषु प्रारम्भे वैदिककालस्य चित्राणि, यत्र ऋग्-यजुः-साम-अथर्वेति चतुर्णामेव वेदानां सम्बन्धीनि नानाविषयाणि भव्यानि चित्राण्यालोक्येरन्। ततः पौराणिकचित्रपटाः, येषु श्रीशिवस्य चरित्रं चित्रं, टिप्पणीप्रदेशे पौराणिकाः श्लोकाः अंकिताः। येषां महिम्ना शैवकालिकः समग्रोपीतिहासश्चक्षुषोरग्रे समुपतिष्ठति। ततो गीतायाश्चित्रपटाः, येषु अनासक्तियोगः, विराट्स्वरूपदर्शनम्, परा गतिः, भक्तियोग-ज्ञानयोग-कर्मयोग-प्रभृतीनां प्रदर्शनं कृतं, येन गीतायाः समग्रः सारः सम्मुखोपस्थितो भवति।

एतदनन्तरं सांख्य-योग-न्यायादीनां चित्रपटाः। ततो भारतवर्षस्य ८-१० चित्रेषु कल्पद्रुमाणामधस्तात् ब्रह्म-विष्णु-महेशानारभ्य नारद-पाराशर-पुण्डरीक-व्यास-अम्बरीष-शुक-शौनक-प्रभृतीनामृषीणां चित्रप्रदर्शनम्। तदनन्तरं नानक-गुरुगोविन्दसिंह-शिवाजी-महाराणाप्रताप-प्रभृतीनां वीरपुरुषाणाम्। चैतन्य-तुलसीदास-सूरदास-तुकारामप्रभृतीनां पुण्यपुरुषाणाम्। ततः तिलक-रवीन्द्र-रामतीर्थ-दयानन्द-विवेकानन्द प्रभृतीनामभूतपूर्वमनीषिणां चित्रपटाः, येषां सहायतया क्रमिक इतिहासः सम्मुखमुपस्थितो भवति। पटानामधः स्थले प्रातः स्मरणोचिताः श्लोकाः सन्ति, यैः सत्य-द्वापर-त्रेता-कलियुगानां क्रमिक इतिहासो मस्तिष्के समाविशति।

तत आदिकवेर्वाल्मीकेश्चित्रं प्रदाय रामायणस्य सम्पूर्णानि चित्राणि दत्तानि। येषामधस्ताद्वाल्मीकि-रामायणस्य श्लोकानुद्धृत्य सम्पूर्णा रामायणकथा दृग्गोचरीकृता। एतदनन्तर षोडशचित्रपटेषु महाभारतस्य श्रीमद्भागवतस्य चापि सुन्दर प्रदर्शनमस्ति। ततो मध्ययुगकालिकस्य महाकविकालिदासस्य चित्रं प्रदाय नानाचित्रैरभिज्ञानशाकुन्तल-मेघदूतादीनां विषयः प्रदर्शितः। ततो भारवि-माघ-भवभूति-विशाखदत्तादीनामपि चित्रपटैः प्रदर्शनं कृतम्। एतदग्रे पञ्चतन्त्रस्य निदर्शन-रूपेण चतस्रः कथाश्चित्रैः प्रदर्शिताः। ततो भित्तिषु लम्बितानि चित्राक्षरैरंकितानि राष्ट्रपति-श्रीगोविन्दवल्लभ-पन्तसम्पूर्णानन्दमहोदयानां वाक्यान्युद्धृतानि, यानि वाराणसीनगरे विश्वसंस्कृतपरिषदि तैर्निजभाषणे भाषितानि, संस्कृतस्याभ्युत्थाननिमित्तम्।

सर्वस्यान्ते—संस्कृतस्य वर्णमालायाश्चित्रपटाः प्रदर्शिताः। येषु अ, आ, क, ख, ग, आदीनामक्षराणामग्रे तदनुसारं—अहिः, आम्रः, कपोतः, खरः, गजः इत्यङ्कयित्वा सहैव तेषां चित्राण्यपि दत्तानि। यैर्हि बालकानां मनोरञ्जनेन साकं सरलतया अक्षरादीनां बोधो भवेत्।

प्रदर्शिनीमिमां दृष्ट्वा संस्कृतभाषायाः क्रमिक इतिहासः, भारते संस्कृतप्रचारयुगम्, सर्वेषामपि दर्शकानां हृदये प्रतिभातं भवेदिति सर्वात्मना प्रयतितम्। येन हि संस्कृतभाषाया महत्त्वमुपयोगित्वं चानुमाय भारतीयानां संस्कृतभाषां प्रति श्रद्धाया अनुरागस्य चोदयो भवेत्। एतस्याः प्रदर्शिन्याः सर्वैरेव मण्डलेश्वरैः सद्भिर्महद्भिश्च मुक्तकण्ठं प्रशंसा कृता यत्—एवंविधैः प्रयत्नैर्जनताया अनायासमेव संस्कृतं प्रत्याकर्षणं भवेत्। येन तदध्ययनस्योत्कण्ठा तेषां हृदि जागृयात् इत्यादि। अस्तु, स्वमुखेन स्वप्रशंसा नोचितेति किं विस्तरेण।

———



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## संस्कृतसमाचाराः—

**संस्कृतोत्सवाः**—देशस्य विभिन्नप्रान्तेषु संस्कृत-भाषासेविनां प्रयत्नेनानुष्ठितानाम् उत्सवानां सूचना भारतीकार्यालये प्राप्ता। अवकाशाभावात्तेषां सूचना संक्षिप्यात्र समुद्ध्रियते—

१०।१।५४ दिनाङ्के स्थानीयसंस्कृतवाग्विवर्द्धिन्याः परिषदः शाखासभायाः (ब्रह्मपुरीस्थायाः) वार्षिकोत्सवः श्रीगङ्गाधरद्विवेदिमहोदयस्याध्यक्षये सम्पन्नः। उत्सवेऽस्मिन् मनोरञ्जकं प्रहसनद्वयमभिनीतम्।

३१।१।५४ दिनाङ्के अम्बाजोगाई(मोमिनाबाद)-स्थ-संस्कृत-भाषाप्रचारिणीसभया मराठवाडा-संस्कृत-स्नेह-सम्मेलनमामन्त्रितम्। सम्मेलनाध्यक्षाः श्रीयज्ञेश्वरशास्त्री-कस्तुरेमहाभागाः, वक्तारश्च भवितव्य-सम्पादकाः श्रीधरभास्करवर्णेकरप्रभृतयो विद्वांस आसन्। सम्मेलनसूचना श्री दे० बा० धर्माधिकारिभिः (कार्यवाहैः) प्रहिता कार्यालयेऽस्मिन्।

माघकृष्णसप्तम्यां पञ्चाम्बुप्रान्ते श्रीदरबार-पिण्डोरीधाम्नि जगद्गुरुरामानन्दाचार्याणामभिनन्दनमक्रियत धार्मिकजनतया। वसन्तपंचमीदिने देहलीस्थसंस्कृतप्रचारपरिषदा संस्कृतोत्सवः समायोजित इति समाचारपत्रेभ्यः प्रतीतम्। योधपुरेऽपि संस्कृतच्छात्रैः वसन्तोत्सवः ससमारोहं सम्मानित इति सूचना प्राप्ताऽस्ति।

**जयपुरे संस्कृतच्छात्रसङ्घः**—अत्र अखिलराजस्थानीयसंस्कृतच्छात्रसङ्घः स्थापितोऽस्ति। एतस्योद्देश्यं समग्रेऽपि राजस्थाने संमिलितरूपेण संस्कृतप्रचारान्दोलनं, संस्कृतच्छात्राणां प्रगतिश्चास्ति। एतस्य मन्त्री बीकानेरस्थः अम्बिकादत्तगोस्वामी वर्त्तते। प्रत्येकं विभागे (डिवीजन) एतस्योपमान्त्रणो भविष्यन्ति ये प्रचारकर्मणः साहाय्यं विधास्यन्तीति सूचना कार्यालये प्राप्ताऽस्ति।

**संस्कृतप्रदर्शिन्यै आर्थिकसहायता**—प्रयागे प्रदर्शिताया अस्याः कृते यैर्महानुभावैरार्थिकसहायता प्रदत्ता तेषां नामानि प्रकाशितान्यासन् पूर्वाङ्के।

तत्र हि मुद्रणकर्मचारिणां प्रमादादशुद्धयः संवृत्ताः। पाठकानां सूचनार्थं तत्संशुद्धिर्दीयते।

| | |
|---|---|
| श्रीमनसुखरायमोरमहाभागाः | ५०१) |
| वैद्यश्रीजयरामदासस्वामि ,, | १०१) |
| श्रीवैद्यमनीरामशर्माणः, रतनगढ | ५१) |

**भारतीप्रबन्धकस्य 'विहार' यात्रा**—

पत्रस्यास्य प्रबन्धसम्पादकः पं० गिरिराजशास्त्री कुम्भपर्वणि प्रयागे प्रदर्शिन्यादिकार्यं परिसमाप्य भारतीप्रचारार्थं विहारे यात्रामकरोत्। तस्य निम्नाङ्कितो यात्राक्रमः—

फरवरी मासस्य १५, १६, १७ तारिकासु पटना-नगरमगच्छत्। १८ तारिकायां गयां विलोक्य १६, २० दिने देवघरं प्रापत्। ततः २१ दिने भागलपुरं, २२ मुङ्गेरम्, २३ बेगूसराय, २४, २५ दिने दरभङ्गानगरम्। ततः २६. २७, २८ तारिकासु लोहा[illegible] मुजफ्फरपुर-बेतिया-नगराणि प्रापत्। एतदनन्तरं १ तारिकायां छपरानगरमालोक्य २-३ मार्चदिने लखनऊनगरमाप्स्यति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

अस्मिन्नङ्के पठ्यताम्—

* संस्कृतसाहित्ये हास्यरसः
* नपुंसकलिङ्गस्य मोक्षप्राप्तिः
* विनोद वाटिका
* वसन्तोपहारः
* नेहरूमहोदयस्य संस्कृतसमादरः

पञ्चमोऽङ्कः

मूल्यम्
वार्षिकम् ३)
एक प्रति ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

## कार्यालय शिक्षा संचालक, उत्तरप्रदेश, लखनऊ

संख्या पुस्तक ५५३७ । १८, ४ (३६) ५३,५४, दिनाङ्क लखनऊ फरवरी १६ १६५४ ई०

# प्रकाशकों को सूचना

| क्रम सं० | पुस्तक तथा लेखक का नाम | प्रकाशक | मूल्य | उद्देश्य जिसके लिए स्वीकृति प्रदान की गई है। |
|---|---|---|---|---|
| १ | 'भारती' संस्कृत मासिक-पत्रिका प्र० सम्पादक गिरिराज शर्मा शास्त्री | जयबहादुरसिंह भारती-भवन जयपुर | ३ रु० वार्षिक ६ आ० एक प्रति | उच्चतर माध्यमिक विद्यालय दीक्षा विद्यालय तथा प्रशिक्षण महा विद्यालय सचल तथा भ्रमणशील पुस्तकालयों तथा अध्यापकों के उपयोग के लिए स्वीकृति दी जाती है। |

(ह० ) रा० पन्त
१६-२-५४
( रामदत्त पन्त )
सहायक विशेष पदाधिकारी पाठ्य-पुस्तक
कृते शिक्षा संचालक, उत्तर प्रदेश।

# विषय-सूची


| क्रमः | लेखाः | लेखकाः |
|---|---|---|
| १. | याचना | श्री शिवशरण झा झांसी |
| २. | पथिकः | श्री लक्ष्मीनारायणपुरोहितः उदयपुर |
| ३. | संस्कृतसाहित्ये हास्यरसः | श्री सत्यव्रत शास्त्री पंजाब |
| ४. | श्रीविष्णुस्तव षोडशी | श्री लक्ष्मणशास्त्री नागौर |
| ५. | नपुंसकलिंगस्य मोक्षप्राप्तिः | श्री सत्यव्रतशास्त्री |
| ६. | ईशावास्यमिदं सर्वम् | म० म० जौहरीलालशर्मा, देहली |
| ७. | भास्कराचार्यस्यौदार्यम् | श्री बलदेवमिश्रः ज्यौ० आ० पटना |
| ८. | बिहारप्रांते 'भारती' प्रचारः | श्री गिरिराज शर्मा जयपुरम् |
| ६. | विनोद वाटिका | सम्पादकः |
| १०. | सम्पादकीयम् | ,, |
| ११. | वसन्तोपहारः | श्री विनोदी |
| १२. | संस्कृतसमाचाराः | सम्पादकः |
| १३. | द्रुतं संस्कृत शिक्ष्यतां 'भारती' तः | श्रीकलानाथशास्त्री जयपुरम |


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि-
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी।
भागीरथीव भावाढ्या भारते भातु भारती॥

प्रबन्ध-सम्पादकः—
गिरिराजशर्मा शास्त्री

वर्षम् ४ | फाल्गुनपूर्णिमा, सं० २०१० | अङ्कः ५

## याचना

(लेखकः—श्रीशिवशरणझा, झाँसी)

कृपा-निधे, मयि कृपा विधेया।
संजाता त्वयि चेदासक्तिः
शक्त्या विधीयतेऽपि च भक्तिः
ततः कदाचिद् निज-जन-मानस-ताप-हारिणी दृष्टिर्देया॥ १॥
अपि जानामि त्वदनवकाशम्
त्वं जानीषे ममाभिलाषम्
परं प्रतीक्षायां बहु-कालो गच्छति, पीडा ममानुमेया॥ २॥
अस्मिन् मार्गे भवत्युपेक्षा
सकलेभ्यः कठिनेयं दीक्षा
कृपा-कटाक्षेणालोकय मां, संजाता मम दशाऽवगेया॥ ३॥
अयि, विपुलस्तव करुणा-कोषः
अतो भवति चेतसि सन्तोषः
चिरात् प्रतीक्षे दृष्टि-प्रसादं, त्वाम्विहाय का गतिराश्रेया॥ ४॥
कतिचन तव गाते गुण-गानम्
प्रीतादाप्नुवते वर-दानम्
ध्यानमिहापि विधाय कदाचिदन्तःस्था मम व्यथाऽपनेया॥ ५॥
करुणा-लव-लाभे मम सत्ता
विज्ञायेत तवापि महत्ता
इति बहुहेतोर्नैषा व्यक्तिः करुणा-सिन्धो, प्रत्याख्येया॥ ६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# पथिक !

लेखकः—कविकलानिधिः पं० श्रीलक्ष्मीनारायणपुरोहितः, सा०आ०, श्रीमहाराणासंस्कृतकालेज-साहित्यप्राध्यापकः, उदयपुरम्

पथिक ! त्वं कुत्र अवलोकयसि ?

यदा त्वं एकाकी वर्तसे, एकाकिनैव त्वया स्वकीयः पन्थाः पारणीयः, एकाकिनैव च प्रेष्ठपदं प्रापणीयम्; तदा त्वं कुत्राऽवलोकयसि ?

न जाने कतिकति युगानि निर्गतानि, कतिकति मन्वन्तराणि व्यतीतानि, किन्तु यतस्त्व चलितुमलगः ततश्चलन्नेव वर्तसे। अगणिता दिवसरात्रा व्यतीताः, असंख्याश्च शीतातपवर्षा व्यतिगताः, किन्तु त्वं स्थितो नाऽभूः, इदानीमपि चलन्नेव वर्तसे। अगणनीयानि अरण्यानि अतिक्रान्तानि, असंख्येया नद्यो नदाश्च लङ्घिताः, अपरिमेयाश्च पर्वताः पारावाराश्च पारिताः, किन्तु त्वं स्थितो नाऽभूः, इदानीमपि चलन्नेव वर्तसे। कियत्यो वेषभूषाः स्वीकृताः, रहनसहनानि परिवर्तितानि, किन्तु त्वं विरतो नाऽभूः, इदानीमपि चलन्नेव वर्तसे। तव न कोऽपि सहायकः सहचरो वा भवति, न च कोऽपि सुहृद् सुखदुःखयोः सहानुभवी वा वर्तते, किन्तु अस्य तव अपेक्षैव नास्ति, त्वं चलन्नेव वर्तसे। यतस्त्वया स्वकीयः पन्था एकाकिनैव पारणीयोऽस्ति न ?···किन्तु इदानीं त्व कुत्र अवलोकयसि ?

पथिक ! त्वं यात्राया अन्तरायाणां पराभवने व्यस्तो माभूः। पश्य, त्वं यदि एतेषां पराभवन एव व्यस्तो भविष्यसि, तदा तव दृष्टिः कदाचिद् लक्ष्यबिन्दोरपि च्युता भवेत्, त्वं च कदाचिद् गन्तव्यंदेशमपि विस्मरेः। तवोपरि अपशब्दानामासारपातो भवन्नेव तिष्ठतु, किन्तु तस्मिन् त्वम् अपेक्षामेव माकार्षीः। तवोपरि धूलयः, कर्दमाः, प्रस्तराश्च प्रक्षिप्येरन्, किन्तु तेषु त्वम् अवधानमपि मादाः। मुष्टियष्टिभिरपि मार्गात् तव दूरीकरणे प्रयत्नाः क्रियेरन्, तथाऽपि त्वं विक्षुब्धो माभूः, चलन्नेव च वर्तस्व। स्मरणं रक्ष, वराकाणामन्तरायाणामेषाम् अस्तित्वमेव कियत्, यत एते त्वां स्वपथात् दूरीकर्तुं प्रभवेयुः, तव यात्रायाम् अवरोधं वा कर्तुं शक्नुयुः। एतेऽपि तस्यैव अनन्तशक्तेः—यस्याऽभिमुखं त्वं स्वयं चलितोऽसि, काष्ठपुत्रिका इव सन्ति, ये तव समीपे परीक्षानिकषत्वेन उपस्थिता वर्तन्ते। एतैस्त्वं विचलितो माभूः, प्रत्युत शारदीनसरोवर इव प्रसन्नः महीरुह इव सहिष्णुः, अचल इव अचला धरेव धीरः, भागीरथीप्रवाह इव च प्रगतिमान् एव तिष्ठ, स्वागतं चैषां कुरु। एषु विशुद्धत्वेन उत्तर तव कर्तव्यम्।

पथिक ! सम्प्रति त्वं राजमार्गस्य, प्रेष्ठपदाभिमुखमेव गच्छतो राजमार्गस्य पथिकोऽसि। यदि त्वमन्तरायाणामेषां पराभवने व्यस्तो जातः, कदाचित् च त्वं अस्माद् राजमार्गात् प्रच्युतोऽपि जातः तर्हि स्मर्तव्यम् पुनस्त्वमस्य राजमार्गस्य पथिको भवितुं न शक्ष्यसि। पुनस्तु तान्येव दुर्गमाणि कान्ताराणि, त एव दुरारोह महीधराः त एव दुस्तरा नदनद्यः, त एव च अगाधा उदधयः तव सम्मुखमापतिष्यन्ति, येषां पारणं त्वया विविधासु यातनासु सतीष्वपि कर्तव्यमेव भविष्यति। अतस्त्वमस्य दुरधिगमस्य राजमार्गस्य मूल्यमवधेहि अस्याश्च परिमितमात्राया महार्घाय स्वर्णावसराय त्वं स्वहस्तान्निर्गमनं मा दाः।

विश्वसिमि, अतः परं त्वम् अन्तरायान् परीक्षानिकषानेव मन्वानः स्थास्यसि, तेभ्यश्च विशुद्ध एव उत्तीर्णः 'श्रीपते'-रपि अभिनन्दनीयः सेत्स्यति।

वा त्वय्याजीवनमनुरागः
अस्तु चेतसोऽन्यत्र विरागः
इत्याशिषाऽपि निज-जन-पंक्तौ मृदु-मूर्ते, मम गणना ज्ञेया ॥ ७ ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृतसाहित्ये हास्यरसः

लेखकः—सत्यव्रतशास्त्री व्याकरणाचार्यः एम० ए० एम० ओ० एल०

काव्यशास्त्रे परिगणितेषु रसेषु हास्यमप्येको रसः। यद्यपि संस्कृतसाहित्ये हास्यरसविरलताऽच्छिशूलता-मुपैति प्रत्येकस्यापि सुरभारतीसाहितीजुषस्तथापि सर्वथात्र हास्यरसाभाव इति न सुशकं वक्तुम्। यदा वयं नाटकादीन् परिशीलयामो भाणप्रहसनादीन्वा समालोचनालोचनविषयीकुर्मस्तदा न सुरगिरि सर्वथा हास्यरसाभावप्रतियोगिताभाव इति वक्तुं पारयामः। इदन्त्वभ्युपेमो विशालेऽस्मिन् न्याय, वेदान्त, साङ्ख्य कल्लोललोले वेदशास्त्रादिनैकनक्राकुले सुरगवी-पारावारे हास्यस्य विरल एवोपलम्भ इति। मन्यामहे गम्भीरास्वाध्यात्मिकीषु चर्चासु कृतोद्यमाः पूर्वे सूरयो न हास्यं बहुमेनिरे। साहित्ये च गम्भीर एव विषयः प्रतिपाद्यस्तेन प्राकृतवद्धास्यादिकं परिगृह्णाना सा लोक-स्य तिरस्कृतिभाजनं भूमेति चाभ्युपजग्मिरे। अयमे-वात्र हेतुरुतान्य इति न सम्यगुन्नेतुं पारयामः। परं हास्यस्य विरल उपलम्भ इति नात्र कस्यापि विसंवादः।

हास्यस्याधिकतर उपलम्भो नाटकेष्वेव दृश्यते। तत्रापि विदूषको विटशकारादिर्वा प्राधान्येन हास्यं जन-यति। विदूषको हि संस्कृतनाटकेषु विकृतेनाङ्गेन वचसा वेषेण च हास्यमुत्पादयति। तथा चाहुः—

'विकृताङ्गवचोवेषैर्हास्यकारी विदूषकः।'

विदूषको हि यत्र तत्र नाटकेषु महाब्राह्मण इति व्यवह्रियते। ऐहिकेषु विषयभोगेषु च सुतरां प्रसित-मना दृष्टिपथमवतरति। तथा च स्वप्नवासवदत्ते पद्मावतीप्रासादे निवसतो यथेच्छस्नानाभ्यवहरणादि जनितानन्द-निर्भरचेतसो विदूषकस्योक्तिः—

"इदानीं राजप्रासादेषूष्यते। अन्तःपुरदीर्घिकासु स्नायते। मधुरमधुराणि सुकुमाराणि च मोदकखाद्या-नि खाद्यन्ते। यत्सत्यमनप्सरःसंवास उत्तरकुरुवासो मयानुभूयत इति।"

भोजनप्रियत्व हि विदूषकस्य यत्र तत्र वर्ण्यमानं भूयो हास्यमुत्पादयति। (तथा च शाकुन्तले माढव्य-स्योक्तिः-अहं बुभुक्षया खादयितव्य इव)। उदरम्भरि-रसौ महाब्राह्मणो बह्वश्नाति न च तदशितं जीर्यतीति तस्य भोजनभक्तत्वं विनोदयतितमां श्रोतॄन् द्रष्टॄंश्च। तथा च स्वप्ननाटके चेटीं प्रति नाहं भोक्ष्य इत्यत्र हेतू-पन्यासात्मकं विदूषकवचः—

"अधन्यस्य मे कोकिलाक्षिपरिवर्त इव कुक्षिपरि-वर्तः संवृत्तः।"

विकृतेन वचसाऽपि विदूषको हास्यं जनयतीति नाविदितं कस्यापि। अस्ति ब्रह्मदत्तं नाम नगर काम्पिल्यो नाम राजेति तस्य विपरीतवचः स्मेराननान् विदधाति सर्वानपि। चतुरैर्हास्यगर्भैरालापैश्च स सुतरां विनोदयति। तथा चाविमारके विदूषकस्यान्यस्य चानुचरस्य संवादः—

अनुचरः—आर्य अयं क्षपणको मम मोदकमल्लकं गृहीत्वा न ददाति।

विदूषकः—निर्यातय भो निर्यातय मोदकानि कर्पूरिका-मोदनिर्भराणि दुग्धफेनपाण्डुराणि। मा ते खादितानि क्षयमुत्पादयन्तु।

अन्यत्राप्यविमारके नायिकां रुदतीमालोक्य सोऽपि रोदितुमिच्छति—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



"अथवाऽहमपि रोदिमि । मम नयनाद्बाष्पं न निर्गच्छति । यदा मे पितोपरतस्तदापि महताऽरम्भेण रोदितुमारब्धः । मम नयनाद्बाष्पं न निर्गच्छति ।" अत्र सन्दर्भे रोदितुकामोऽपि विदूषकों बाष्पाभावान्न रोदितुं शक्नोतीत्यस्य पितृनिधनस्य चोल्लेखः सुतरां हास्यकारी । एवमेव मृच्छकटिकेऽपि प्रतिचेटस्य विदूषकस्य च संवादः—

चेटः—(प्रविश्य) आर्य वन्दे !

विदूषकः—कुत्र त्वमीदृशे दुर्दिने अन्धकारे आगतः ?

चेटः—अरे ! एषा सा ।

विदू०—का एषा सा ?

चेटः—एषा सा ।

विदू०—किमिदानीं दास्याः पुत्र दुर्भिक्षकाले वृद्धकरङ्क इव श्वासायसे एषा सा सेति ।

चेटः—अरे त्वमपि इदानीमिन्द्रमखकामुक इव सुष्ठु किं काकायसे काकेति ।

—

चेटः—(स्व०) भवतु, एवं भणिष्यामि । अरे ! प्रश्नं ते दास्यामि ।

विदू०—अहं ते मुण्डे पादं दास्यामि ।

चेटः—अरे जानीहि तावत् कस्मिन् काले चूताः मुकुलयन्ति ।

विदू०—अरे ! दास्याः पुत्र ग्रीष्मे ।

चेटः—अरे ! नहि नहि ।

अत्र विदूषकश्चारुदत्तं पृच्छति कस्मिन्काले प्रसूनागम इति । स च वसन्तऋतुं निर्दिशति । एवमेवापरस्य चेटप्रश्नस्योत्तरं सेनेति । तदनन्तरवर्ती संलाप उद्ध्रियते—

चेटः—अरे ! द्वे अपि एकस्मिन्कृत्वा शीघ्रं भण ।

विदू०—से ना वसन्ते ।

चेटः—ननु परिवर्त्य भण ।

विदू०—(कायेन परिवृत्य) से ना वसन्ते ।

चेटः—अरे मूर्ख ! पदे परिवर्तय ।

विदू०—(पादौ परिवर्त्य) सेना वसन्ते ।

चेटः—अरे मूर्ख ! अक्षरपदे परिवर्तय ।

विदू०—(विचिन्त्य) वसन्तसेना ।

चेटः—एषा सा आगता ।

अत्रेद विविच्यते—सन्ति कानिचिन्नाटकानि यत्र हास्यकारी विदूषको न दृग्गोचरतामुपैति । न हि तत्रो-पलभ्यते विदूषकं नाम पात्रम् । तत्र भवभूतिनाटकानि निदर्शनम् । एतेन तत्कर्तरि न हास आस्पदं चकार सर्वथा हास्यरसशून्यतां स्वकीयां गोपायितुकामः स तत्स्थाने रौद्र, वीर, बीभत्सादीन् रसान्वर्णयामासेति केचित् । तदेतन्न विचारसहम् । भवभूतौ सर्वथा हास्यरसाभाव इति यदुच्यते तत्साहसमेव । प्रथमेऽङ्के चित्रदर्शनकाले चित्रारोपितानि पुराणानि वृत्तान्तानु-पदर्शयन्तं लक्ष्मणं प्रति देव्याः सीताया उक्तिर्भवभूतेर्हास्यप्रियत्वं सुतरामुद्घोषयति । रामादीनां बधूर्निर्दिशन् स यदा स्वभार्याम् उर्मिलामुपप्लुत्य श्रुतकीर्तिं दर्शयति तदा देवी सीता कृतमन्दस्मिता अङ्गुल्या ऊर्मिलां निर्दिशन्ती लक्ष्मणं मधुरमुपहसति—"वत्स इयमपि अपरा का ?" एवमेव षष्ठेऽङ्के उपस्थितेषु जनकादिषु वृद्धजनेषु बालस्य लवस्य चन्द्रकेतुविपदि बालसुलभा सरला सुभगा चोक्तिरीषद्धासं जनयति कोऽयं चन्द्रकेतुरिति कुतूहलाकुलचेतसो लवस्य जिज्ञासामुपशमयितुं द्वितीयस्य रामायणकथापुरुषस्य लक्ष्मणस्यायमपत्यमिति राजर्षिजनकस्य वच उपश्रुत्य लवस्तत्कालमेव वक्ति—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



"ऊर्मिलापुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्रः ।"

लवस्यैव सम्बन्धाभिधाने द्राविडप्राणायामः सर्वानुपस्थितान् विनोदयति । तथा चाह राजर्षिः—

"जनकः (सस्मितम्)—आविष्कृतं कथाप्रावीण्यं कुमारेण ।"

एवमेव विदूषकाभाववति मुद्राराक्षसेऽपि हासगर्भाणि वचांसि विरलान्यपि न सर्वथा तदभावप्रतियोगिताभाववन्ति । तथा हि पञ्चमेऽङ्के विहितमार्गादेशकुशलशकुनः करेण पत्रं गृह्णानः सिद्धार्थकः क्षपणकमालोक्य दिनस्य शुभाशुभत्वं पृच्छति—

सिद्धार्थकः—तस्मात् कथयतु भदन्तः कीदृशोऽद्य दिवस इति ।

क्षपणकः—श्रावक! मुण्डितमुण्डो नक्षत्राणि पृच्छसि?

एवं मालतीमाधवप्रबोधचन्द्रोदयादिषु कृतिषु हास्यरसाभाव इति त्वरितं वचः ।

यद्यपि नाटकादिषु विदूषक एव प्रमुखतया हासमुपजनयति तथापि पात्राणां गूढानि नर्मवचांसि विनोदयन्ति सहृदयहृदयानीति न भूयसीनां गिरामवकाशः । तथा च स्वप्नवासवदत्ते आसन्नपरिणयामुद्याने कन्दुकक्रीडनेनारक्तकान्ति पद्मावतीं प्रति वासवदत्ताया उपहासगर्भं वचः—

वासवदत्ता—हला ! कन्दुकेन क्रीडन्त्याऽधिकसमुपरागौ परकीयाविव ते हस्तौ संवृत्तौ ।

पद्मावती—अपेहि मा मामुपहस !

एवमेवोत्तरे रामचरिते शिष्याणां परस्परालाप उपहासं जनयति—

भाण्डायनः—अरुन्धतीसहायो भगवान् वसिष्ठः सम्प्राप्तः ।

सौधातकिः—मया पुनर्ज्ञातं व्याघ्रो वा वृको वा एष इति ।

भाण्डायनः—धिङ्मूर्ख ! किम्प्रलपसि ।

सौधातकिः—तेन परापतितेनैव वराकिका कल्याणिका मड़मड़ायिता ।

तथैव च स्वप्ननाटके चतुर्थेऽङ्के राज्ञ उदयनस्य वसन्तकस्य च हासजनकः संवादः—

राजा—किं बलात्कारेण ज्ञास्यसि

वसन्तकः—आम् ।

राजा—पश्यामस्तावत् ।

(विदूषकः) वसन्तकः—प्रसीदतु प्रसीदतु महाराजः ।

क्वचिन्नाटकेषु ग्रामीणानां ग्रामसुलभा उक्तयोपि स्मितिमुत्पादयन्ति । तथा च पञ्चरात्रे गवामपहरणाय सम्प्राप्तान्कौरवानित्थं वर्णयति ग्रामवृद्धः—

भो भोः ! एते केचिद्दधिपिण्डपाण्डरैश्छत्रै रश्वशकटैरुह्यमानाः······अत्र छत्राणां दधिपिण्डोपमानत्वं रथानां चाश्वशकटेति वर्णनं कल्पते भूयसे हासाय नागरिकस्य जनस्य । एवं चारुदत्ते शकारस्य "दह्यते मे हृदयं यथा चर्मखण्ड"मिति वचोऽनल्पं हासमुपजनयति । हृदयदहनं चर्मखण्डदहनानुरूपमिति शकारानुकूलमेव वचः ।

न केवलं विकृताङ्गवचोवेषाणामेव हास्यस्य समुत्थापकताऽपि तु विविधाभिः घटनाभिरप्यस्य जन्यजनकभावः सम्बन्धः । तथा चाविमारके अप्रत्याशितघटनाचक्रकृतसंमोहो राजा कुन्तिभोजो यदा नारदसकाशात्कुन्तिभोजेति नाम्ना व्यपदिश्यमानं राजानं शृणोति अहमेव कुन्तिभोजो नारदेनाभिप्रेयत इत्यसंविदानश्च पृच्छति मुने ! कोऽयं कुन्तिभोज इति । तदा स नारदेन सस्मितमुपहस्यते······

पिता कुरङ्ग्या भूपालो वैरन्त्यनगरेश्वरः ।
दुर्योधनस्य तनयः कुन्तिभोजो भवान्ननु ॥ (क्रमशः)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# श्रीविष्णुस्तवषोडशी

## ( चित्रकाव्यम् )

लेखकः—स्वामी लक्ष्मणशास्त्री संस्कृतविद्यालयाध्यक्षः नागौर ( मारवाड )

विविधवाग्रचनाभिरलङ्कृता, कृतिरपीह महाकविना कृता।
भवति विष्णुकथारहिता वृथा, प्रतिपदापठनं पठतां यथा॥ १॥
संसारतापहरणे कथिता द्वितीया, विष्णुस्मृतिः सकलसज्जनसेवनीया।
इत्थं स्वडिण्डिमरवेण विघोषयन्ति, शास्त्राणि सर्वनिगमागमसारवन्ति॥ २॥
स्त्रीता नृता वास्य न युक्तियुक्ता, नास्मै तृतीया प्रकृतिः प्रयुक्ता।
देवो न दैत्यो न नरो न सिद्धः, किन्त्वेष सर्वार्थमयः प्रसिद्धः॥ ३॥
नत्यै चतुर्थीव मता विभक्तिः, सर्वार्थसिद्ध्यै कथितास्य भक्तिः।
प्रमाणलक्षं न मिलेत् किमत्र, शास्त्रेषु सर्वेष्वपि तत्र तत्र॥ ४॥
पूर्णा हरेः स्मरणतो न भवेन्नराणां, किं पञ्चमीव तिथिषु स्वमलान्तराणाम्।
इच्छा मनोरथशतैरपि दूरदृष्टा, विष्णुप्रसादपवना-तिबलाभिकृष्टा॥ ५॥
सम्बन्धयोगेन हरेः कृपायाः, प्रापुः श्रियं स्वां च सुताः पृथायाः।
षष्ठी यथा व्याकरणे विभक्तिः, सम्बन्धमाश्राद्य जितान्यशक्तिः॥ ६॥
विष्णुर्मतोऽधिकरणाख्यपदेऽखिलानां, यत् प्राणिनां सुमतिभिः स्थिरजङ्गमानाम्।
तत् सप्तमीमनुकरोति विभक्तिमुक्तां, शब्दैकशास्त्रनिपुणैर्विविधार्थयुक्ताम्॥ ७॥
भूत्वा हरिर्यद् वसुदेवगेहे, विधर्मवृद्धिं न पुरा विषेहे।
यस्यां तिथौ सा हृतभक्तभीति रस्ति श्रुता नो किमु अष्टमीति॥ ८॥
यन्नामहीना कवितास्ति रिक्ता, कामं च सा काव्यकिलाभिषिक्ता।
तिथिर्यथोक्ता नवमीति सूक्तं, परीक्षिते व्यासभुवा खलूक्तम्। ९॥
लङ्कापतिं रघुपतिर्हतवानकस्माद्, यस्मिन् दिने स्वविजयं विदधे च तस्माद्।
ख्याता बभूव विजया दशमी नरेषु, श्रीरामचन्द्रचरणार्चनतत्परेषु॥१०॥
दत्तं भवेत्सत्फलदं यदस्यां, व्रतोपवासादि कृतं च यस्याम्।
एकादशी सा प्रथितातिमान्या, विष्णुप्रिया तत् तिथिरस्ति कान्या॥११॥
भूत्वा हरिः कश्यपतो ह्यदित्यां, महीमयाचिष्ट बलेः समित्याम्।
यस्यां तिथौ सर्वगुणान्वितायां, सा द्वादशीति प्रथिता रसायाम्॥१२॥
हरौ रतिः सर्वसुखानि दत्ते, तथातिदुःखोपशमं विधत्ते।
त्रयोदशीवास्ति तिथिप्रधाना, शुभक्रियारम्भकृतातिमाना॥१३॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



लघुरूपकम्—

# नपुंसकलिंगस्य मोक्षप्राप्तिः

लेखकः—सत्यव्रतशास्त्री

[ एकस्मिन् गृहे किञ्चित्खिन्नमनाः संस्कृतभाषा पुंलिङ्गस्त्रीलिङ्गाभ्यां कृत्तद्धिताभ्यां च स्वसहायकाभ्यां परिवारित' तूष्णीं तिष्ठति । तां तूष्णीकामवलोक्य चिन्तितं पुंलिङ्गमेवं भणति —]

पुंलिङ्गम्—देवि सुरभारति ! अद्य होलिकावसरेऽपि किमिति विवर्णेव लक्ष्यसे । अस्माभिः समेतापि न जल्पसि, न हससि न वा प्रसीदसि । कोयमस्थाने शोकोदयः ?

संस्कृतभाषा-भ्रातः ! पुंलिङ्ग अद्य चिराय लोकेन परित्यक्ताया मम कीदृशं सुखम् ? आसीत् सोपि कालो यदा सकलोऽपि लोको मामेवाश्रयत् ! सर्वस्मिन्नपि च कार्ये ममैव प्राधान्यमभूत्। परमद्य तु मम स्थानं भाषान्तरैर्हीतमिति भृशं परितप्यामि । हीना च दीना चाहं कथं जल्पेय कथ वा हसेयम् ।

स्त्री (लिङ्गम्)—सत्यं दुःखितेयं वराकी तेनैव विवर्णवदना लक्ष्यते ।

पुंलिङ्गम्—सत्यम् । (स्वगतम् किन्तु खल्वेतस्या लोकापरागकारण भवेत् । भवतु, पृच्छाम्येनाम् ) प्रकाशम्—देवि, कथय कुतस्त्वय्यपरक्तो लोकः ?

संस्कृतभाषा—बहूनि तत्र कारणानि । आद्यस्तावत् त्वयि च त्वत्प्रतिद्वन्द्विनि नपुंसके च लोकस्यानिश्चयः, ततश्च बहुलो व्यत्यासः । भाषान्तरेषु च स्त्रीपुंसयोरेव सद्भावात्सौकर्यमनुभवति लोकः । द्वितीयस्तावत् ।……

पुंलिङ्गम्—आः ! मयि स्थिते केयं दास्याः पुत्रस्य नपुंसकस्य चर्चा । अहं च स्त्रीलिङ्गं चाचिरेणैव तं कवलीकरिष्यावः ।

[ नेपथ्ये ]

नपुंसकलिङ्गम्—कोयं भोः ! क एष साहसिक-

---

हिरण्यपूर्वः कशिपुर्विहासितः, पुरा नृसिंहेन यतः सुराहितः ।
चतुर्दशी सर्वजनैश्च संस्तुता, तिथिस्ततोऽभूद् भुवनैकविश्रुता ॥१४॥
यथा बीजं सूप्तं भवति जलतो नैकगुणितं, सुपात्रे दानं वा वितरति सुखं चित्तविहितम् ।
अमावस्यावन्नो कृतसुकृतलेशोऽपि विमलं, स्मृतिर्विष्णोः पुंसां फलति किमनन्तं शुभफलम् ॥१५॥
हरिं स्मरेद्योऽचलभक्तिभावतः, सम्मानिताशेषधृतैकसद्व्रतः ।
पुंसो ध्रुवं तस्य गताखिलव्यथा, पूर्णा स्पृहा स्यात् तिथिपूर्णिमा यथा ॥१६॥
नागौरशाखानगरस्थितेन, विनिर्मिता लक्ष्मणशास्त्रिणा या ।
शाके शराद्र्यष्टहिमांशुसङ्ख्ये, माघाद्यपक्षस्य तिथौ चतुर्थ्याम् । १७॥
पद्यैः षडिन्दुप्रमितैर्निबद्धा, क्रमात् तिथीनामभिधानयुक्तैः ।
पादान्तसस्थैर्यमकैस्तु रम्या, हरेः स्तुतिः स्तात् विदुषां मुदे सा ॥१८॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



धुरन्धरो मां कवलीकर्तुमीहते। पश्यामस्तावत् भो भोः! आत्मनेपदादयः सखायः उच्यतां लिट्लुट्लेट्प्रभृतिभ्यः सुहृद्भ्यो यच्शीघ्रमेव स्वभार्याभिर्यङ्लुगन्तप्रक्रियादिभिः समेता इहोपतिष्ठतेति। अयं पुंलिङ्गो नाम मुमूर्षुर्मामपवदतीति।

सर्वेपि समवेताः—इह स्मः। प्रतिष्ठतां दावदार्यः।
(सर्वेऽपि तत्रागच्छन्ति यत्र पुंलिङ्गादयस्तिष्ठन्ति)

नपुंसकम्—(सबाहुक्षेपम्)

अभूत्पुरा वीरवरः शिखण्डी
जघान भीष्मं निशितैः शरैर्यः।
तस्यैव वीरस्य कुले प्रजातो
नपुंसकोऽहं समुपस्थितोऽस्मि।

पुंलिङ्गम्—(किञ्चिद्विहस्य) साधु वीरशिरोमणे साधु। सत्यं वाचि शूरोऽसि।

नपुंसकम्—कथं वाचि शूरः, शस्त्रशूरोप्यस्मि। पश्य, इदानीमेव स्वकीयया सेनया त्वामितो द्रावयिष्यामि।

पुंलिङ्गम्—अलं विकत्थनेन। किं त्वादृशा नपुंसकाः करिष्यन्ति। वीरत्वं हि पुंसां धर्मो न नपुंसकानाम्। किञ्च लोके द्वे एव लिङ्गे श्रूयेते स्त्री च पुमांश्च, पुरुषश्च प्रकृतिश्च। त्वं पुनः कुत आगतोसि। तत्र भवता भगवता भाष्यकारेणापि संस्त्यानप्रसवौ लिङ्गमिति वदता "आविर्भावरूपः पुमान्, तिरोभावरूपा च स्त्री" तिलक्षणस्वीकारान्मम च स्त्रियाश्चैवास्ति त्वं स्वीकृतम्। वाक्पदीयटीकाकारो हेलाराजोऽप्येवमाह—"तथा चाविर्भावतिरोभावयोर्व्यापिकत्वात् सर्वत्र स्त्रीपुंलिङ्गयोगः। एवं कोऽवसरो यन्नपुंसकः स्यात्" (३.१३.१६)

नपुंसकम्—रे पुंलिङ्ग, किमन्धोऽसि न मां पश्यसि त्वत्पुरतः स्थितम्। रे रे फक्किकादयः सखायः लोडादयश्च सहायकाः किन्नमां पश्यथ। (आत्मनोऽङ्गानि स्पृशन् सरुदितस्वरम्) किं ममास्तित्वमेव नास्ति।

(सर्वेऽपि नपुंसकसहायकाः सस्वरं वदन्ति)

कथं नास्तित्वं श्रीमतः? श्रीमान् हि स्त्रीपुंसयोरुभयोरपि गुणैर्विभूषित इति शास्त्रकारैरपि स्वीकृतम्। तथा चोक्तम्—

स्तनकेशवती नारी लोमशः पुरुषः स्मृतः।
उभयोरन्तरं यत्तु तदभावे नपुंसकम्॥

पुंलिङ्गम्—(विहस्य) तद् भवानुभयोर्मध्ये स्थितस्त्रिशङ्कुवत्। वरं स्थीयतामन्तरैव। न पुनरेषा वराकी संस्कृतभाषा स्वेन च स्वकीयैर्बीभत्सतरैर्विः सहायकैश्च कदाचित्पीडनीया। यूयं शीघ्रमेव मुञ्चतैनां पिण्डम्। मास्मेयं वराकी भवादृशानामनुकम्पाभाजनभूता शीघ्रतरं मड्मड़ायेत्।

नपुंसकलिङ्गम्—कथं त्रिशङ्कुरिति। मम शक्तिं नैव जानासि दुर्बुद्धे। तव तु नामैव खलु मम माहात्म्यस्य प्रत्यक्षमुदाहरणम्। पुंलिङ्गमिति नपुंसकलिङ्ग शब्दः। किञ्च मम माहात्म्यं मुनिना पाणिनिना स्वीकृतम्। अतएव स आह-नपुंसकमनपुंसकेनैक च्चास्यान्यतरस्याम्, नपुंसकानपुंसकयोर्नपुंसकम व्यत इति। तव च मम च सङ्घर्षे ममैव विज हो हो हो ..

'पुंलिङ्गः'—पुंलिङ्गमिति रूढिवशाल्लोकाः कथ यन्ति। वस्तुतस्त्वहं पुंलिगोस्मि पुंसोलिङ्गमस्ये



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ईशावास्यमिदं सर्वम्

महामहोपाध्यायजौहरीलालशर्मा, देहली

भासा यस्य विभान्ति वासरमणिः सोमाग्निविद्युत्प्रभाः
ज्योतिर्ज्योतिरगोचरस्सुमनसामानन्दसच्चिन्मयः ।
भूमात्मा परमेश्वरोऽमितमहो यो वै त्रिपादूर्ध्व ओम्
यस्यांशेन समेधते जगदिदं तस्मै नमो भास्वते ।

"स पर्यगाच्छुक्रमकायमव्रणमस्नाविरंशुद्धमपापविद्धम् । कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः" (शुक्लयजुर्वेदः ४०, ८)

मन्त्रेऽस्मिन्खलु पुंनपुंसकभिदा वर्वृत्यतेऽसंशयम्
भेदो ब्रह्मपरेशयोः समुचितोश्चाकास्यते सन्निव ।

...लत्तेः । यत्तु पाणिनिमुनिवचनमुदाहरस्तत्र त्विदमेव ...वच्मि यत्—त्वादृशानां सृष्टिं कुर्वता तव पाणि...ना यादृशोऽनर्थः कृतो न तादृशोऽन्येन केनापि । ...णिनिमुनिविषये तु सत्यमेवोच्यते कविवरैः—

नपुंसकमिति ज्ञात्वा प्रियायै प्रेषितं मनः ।
तत्तु तत्रैव रमते हताः पाणिनिना वयम् ॥

किञ्चविचारवान् पाणिनिरेकसूत्रे श्वानं युवानं मघ...नमाह । पाणिनेर्बुद्धि वैभवं त्वनेनैव स्पष्टं भवति यत्स...भवतीत्यस्य स्थाने बोभवीतीति द्रविडप्राणायामं ...ति, त्वं गृहीतवानित्यस्य स्थाने अजर्घा इति कर्णक...नेकविधानि च बहूनि कटुविकटानि रूपाणि ...यति ।'

नपुंसकम्—धिङ्मूर्ख ! शब्दशास्त्रस्य प्रणेतारं ...नं पाणिनिमप्यपवदसि ।

पुंलिङ्गः—अथ किम् । अयमेव पाणिनिर्येन त्वादृशानां ब्रह्मरक्षसां सृष्टिं कुर्वता संस्कृतभाषा दीनामवस्थां प्रापिता ।

नपुंसकम्—अलं रे अलम् । एतावत्ते साहसं यन्मां ब्रह्मराक्षसं वदसि । तिष्ठ, इदानीमेव त्वां चूर्णयामि ।

पुंलिङ्गः—अलं चापलेन । नो चेत् पश्चात्तप्स्यसि ।

( मुष्टिं बद्ध्वा तमपि द्रवति संस्कृतभाषा भयं नाटयति )

पुंलिङ्गः—( सवेगं नपुंसकलिङ्गं कण्ठे गृहीत्वा ) जाल्म दास्याः पुत्र बहुनाम वल्गसे । इदानीमेव त्वां ससहायं राक्षस्या होलिकया सममेव निर्दहामि ।

( सर्वानपि वह्नौ पातयति )

संस्कृतभाषा स्त्रीपुंसाभ्यां च कृत्तद्धिताभ्यां भूयोभूयो वर्धाप्यते । तदनन्तरं सर्वेऽपि सम्भूयोच्चारयन्ति—

* उभयी प्रकृतिः कामे भवेदिति मुनेर्मतम् ।
अपवर्गे तृतीयेति क्लीबो मोक्षमवाप्नुयात् ॥

सर्वेऽपि स्वं स्वं स्थानं प्रतिष्ठन्ते ।

पटाक्षेपः

* नैषधकारस्य श्रीहर्षस्यास्मिन् श्लोके परिवर्तितश्चतुर्थश्चरणः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भिन्ना मन्त्रपदेभ्य उक्तविषया बाह्या अनेके परे
मन्त्रार्थं विशदीविधातुमनसा शब्दा इतो योजिताः ॥
रूपं निर्गुणमीरितं च सगुणं वेदे परब्रह्मणः
एतद्धि द्विविधं मतं पुनरिहाऽव्यक्तं तथा व्यक्तिमत् ।
शब्दैरुक्तमदो निषेधपरकैस्सत्तार्थबोधैरिदम्
पूर्वं प्रोक्तसकायमादिसुपदैः शुक्रादिभिश्चोत्तरम् ॥

अव्यक्तनिर्गुणम्

मायातीतमकायमव्रणमजं ह्यस्नाविरं निर्जरम्
निष्पापं निरुपाधिकं निरुपमं नोपुंसकं निर्गुणम् ॥

व्यक्तं निर्गुणम्

शुक्रं ब्रह्म विशुद्धधर्मो विभु परं ह्यानन्दचिद्विग्रहम्
सत्यं ज्ञानमृतं च शुक्रमुदितं शान्तं शिवं केवलम् ॥

निर्गुण-निर्वचनम्

अर्थोऽस्त्यस्य गुणस्य सूक्ष्मतमता नास्तेरभावः क्वचित्
अस्पृष्टं रजसा ससत्वतमसा लक्ष्यैर्गुणैः प्राकृतैः ।
श्रुत्याऽनिर्वचनीयमित्यभिहितं नो वाङ्मनोगोचरम्
श्रौतस्मार्त्तवचांसि तत्र शरणं ※ नासद्यसूक्तं यथा ॥
आनन्दस्य चितेः सतो भगवतो नित्यं स्वरूपे स्थितिः
शान्तं निर्गुणमद्वयं तदु शिवं प्रध्यायते योगिभिः ।
एवं निर्गुणमर्चनीयमहिम ब्रह्मैव सृष्टीहया
मायोपाहितदिव्यरूपमहितो मायेश्वरो माधवः ॥

अव्यक्तः सगुणः ( ईशः )

अव्यक्तः सगुणः स्वभूश्च परिभूर्धाता मनीषी कविः
सर्वेशः पुरुषोत्तमोऽखिलगुरुः संसारभारापहः ।
धर्मैश्वर्यविरागबोधयशसांमाख्या भगः सश्रियाम्
सम्पन्नः सततं हि तेन भगवान् सर्वज्ञ इष्टः सताम् ॥
विष्णुः सर्वगुहाशयः परतरो ब्रह्माण्डकोटीश्वरः
ब्रह्मेशादिकरूपधृक् सृजति यः पात्यत्ति सर्वं जगत् ।

※ ऋग्वेदः १०,१२९



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ब्रह्मात्रिप्रभृतीन्नियोज्य रचनाकार्ये समा-नायकान्
धाताऽसौ व्यदधात्पदार्थनिवहानाकाशमायोद्भवान् ॥

### व्यक्तः सगुणः ( हिरण्यगर्भः )

श्रीशो लोकसिसृक्षया समभवद् ब्रह्मा प्रजानां पतिः
वेदास्यो हि हिरण्यगर्भ इति यः ख्यातोऽब्जनाभात्मजः।
सुव्यक्तः सगुणोऽधिपः सुखरो ब्रह्माण्डनाथो विधिः
वेदानामृगथर्वसामयजुषां धाता विधाताऽऽत्मभूः ॥

### विराट्-सृष्टिः ( स्थूला सृष्टिः )

सर्गे योजयति स्म यान् शतधृतिः क्रत्वादिसर्गाधिपान्
तेऽस्माच्चुर्विविधाः प्रजास्त्रिगुणतो नीचोच्चभावं गताः।
अन्तश्चेतनदिव्यधामलसितास्त्रैगुण्यतन्वो बहिः
तस्माच्चैव विराडजायत विधेर्वैविध्यमाप्तान्मुदा ॥
सूर्याचन्द्रमसौ मही च विपुला स्वर्गादिलोकत्रयम्
गंगाद्याः सरितः प्रसन्नसलिलाः सैकाश्च षट् सागराः।
तुंगा मेरुहिमालयादिगिरयो भावा अनन्ताः परे
नीता येन महात्मना समुदयं वन्द्यः स सर्वेश्वरः ॥
यावन्नाधिगतं भवेन्निजहृदि ब्रह्माक्षरं निर्गुणम्
तावद् ध्येयमनारतं सुकृतिना पादाम्बुजं श्रीहरेः।
यः प्रीत्या नुत ईप्सितं हि भजतां पोपूर्यते वत्सलः
भव्यं भावयतीह जीवनभृतां भक्तिप्रियो माधवः ॥

### जीव-समुदायः

यस्यांशं पुरुषं हि प्राकृतगुणा बध्नन्ति देहेऽव्ययम्
सोऽयं जीव इतीश्वरः प्रकृतिजान्भोगांश्च बोभुज्यते।
उत्कृष्टास्वितरासु कर्मवशतो बम्भ्रम्यते योनिषु
आनन्दादिक-पंचकोशपिहितज्ञानप्रकाशोऽल्पधीः ॥
कुर्वन्नेव हि नित्यकर्म विहितं शम्भुप्रियं श्रद्धया
स्मारं स्मारमथो यदीयसुयशो यन्नाम संकीर्त्तयन्।
योगस्थो मनुजो वशीकृतमनाः सर्वोपकारे रतः
भक्त्या यस्य विमुच्यते भवभयात्स श्रीयतां श्रीपतिः ॥
सन्ध्या स्नानपुरस्कृता मनुजपो होमश्च देवार्चनम्
स्वाध्यायः श्रुतिशास्त्रयोरुपकृतिः शौचं च दीने दया।
मान्यानां हि समर्हणं सविदुषां भक्त्या सपर्या गुरोः
इत्थं कर्मकलाप आर्च उदितस्तन्त्रे प्रभोः प्रीतये ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भास्कराचार्यस्यौदार्यम्

लेखकः—बलदेवमिश्रो ज्यौतिषाचार्यः पटना

ज्यौतिषशास्त्रे पौरुषाणां येषां ज्यौतिषाचार्याणां कर्तृत्वं तेष्वन्यतमः मुनीश्वरमतेऽयमपरो भास्करः साक्षात्सूर्य एवाविर्भूत इति मुनीश्वरः स्वीये सिद्धान्त-सार्वभौमनाम्नि ग्रन्थे लिखति। तादृशस्य भास्करस्य केवलमुदारताया एवात्र प्रबन्धे चर्चा क्रियते। भास्क-राचार्यस्य मुख्यो ग्रन्थः सिद्धान्तशिरोमणिः। अस्य चत्वारो विभागाः लीलावती (पाटीगणितम्), बीजग-णितम्, गणिताध्यायः, गोलाध्यायः। अस्य जन्म १०३६ शके। ग्रन्थनिर्माणञ्च १०७२ शके। भास्कराचार्यात् पूर्वं बहवः आर्यभट, लल्लब्रह्मगुप्त, वराहमिहिर, श्रीधरपद्म-नाभादयो ज्यौतिषग्रन्थकारा अभवन् येषां बहूनां ग्रन्थाः विलुप्ताः। ते प्रसिद्धा ग्रन्थकारा आसन्। इदं ज्ञानं लोके नातिष्ठद्यदि भास्करग्रन्थे तेषां स्मरणं नाभूत्। भास्करः तेषामादरेण नामोल्लेखं विधाय तत्र यथामति समा-लोचनां च विधाय यत्तेषां कीर्तनं कृतं तदेव तस्य प्रथमोदारता। तत्र प्रथमं बीजगणितं येषामुपकर्तृत्वं तेन स्वीकृतं तेषामेव विचारः क्रियते। बीजगणितस्यो-पसंहारे ब्रह्मगुप्तश्रीधरपद्मनाभानां बीजगणितस्य सार-मादाय बीजगणितं लिखितमिति कथ्यते। यतस्तेषां बीजमतिविस्तृतम्। ग्रन्थमध्ये एकवर्णमध्यमाहरणाध्याये स्वमतपोषणाय श्रीधररीतेः पद्मनाभरीतेश्चोद्धरणं क्रियते। तेन स्पष्टं लिखितम् अत्र श्रीधराचार्यसूत्रम्-

> "चतुराहतवर्गसमै रूपैः पक्षद्वयं गुणयेत्।
> अव्यक्तवर्गरूपैर्युक्तौ पक्षौ ततो मूलम्॥

अनया केवलया रीत्यैव श्रीधराचार्यः प्रसि[द्धः] श्रीधराचार्यस्य बीजगणिते कर्तृत्वञ्च प्रसिद्धं भवति श्रीधराचार्यस्य त्रिशतिका नाम्नी पाटी प्रसिद्धा मुद्रि[ता] चास्ति। फलितज्यौतिषे जातकपद्धतिलेखकः केश[व] इष्टकष्टकर्मगणिते श्रीधराचार्यस्य चर्चां करोति तेना[पि] सिद्धं नहि भवति यद्बीजगणितलेखकः श्रीधर आसी[त्] इदानीं यान्याङ्गलबीजगणितपुस्तकानि मुद्रितानि दृश्य[न्ते] सर्वत्र श्रीधररीतेश्चर्चा न कुत्रापि भास्करस्य, पा[...] श्रीधररीतेः प्रवर्तको भास्कराचार्य एव भास्करबीजग[णिते] श्रीधररीतेश्चर्चा एव श्रीधरप्रसिद्धेः कारणम्। अ[...] भास्करस्येयमुदारता यया श्रीधराचार्यः प्रसिद्धः। प[द्म]नाभबीजस्य चर्चां भास्करः स्वमतपोषणाय तथा पद्म[ना]भरीतेः खण्डनाय करोति। अत्र भास्करः "द्विति[...] च्छाया चतुर्दशभ्यो न्यूनाऽतोऽनुपपन्नत्वान्न [...] उक्तं द्विविधं क्वचिदिति। अत्र पद्मनाभबीजे—

> व्यक्तपक्षस्य चेन्मूलमन्यपक्षर्णरूपतः।
> अल्पं धनर्णगं कृत्वा द्विविधोत्पद्यते मितिः॥

इति, यत्परिभाषितं तस्य व्यभिचारोऽयम्। एकव[र्ण]मध्यमाहरणे अर्थाद्वर्गसमीकरणगणिते अव्यक्त[...]

१—गूढं स्थूलं स्वसिद्धान्तं मुक्त्वा यस्तच्छिरोमणिम्। कृतवान् मनुजव्याजादसौ जयति भास्करः॥

२—रसगुणपूर्णमही १०३६ समशकन्टपसमयेऽभवन्ममोत्पत्तिः। रसगुण ३६ वर्षेण मया सिद्धान्तशिरोमणी रचितः॥

३—ब्रह्माह्वयश्रीधरपद्मनाभबीजानि यस्मादतिविस्तृतानि। आदाय तत्सारमकारि नूनं सच्छिष्य तुष्ट्यै लघु भास्करेण॥

४—अव्यक्तमूलर्णगरूपतोऽल्पं व्यक्तस्य पक्षस्य पदं यदि स्यात्। ऋणं धनं तच्च विधाय साध्यमव्यक्तमानं द्विविधं क्वचित्तत्॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



शेर्मानं द्विविधं भवति। द्विविधमपि मानं सत्यमेव। अतोऽत्र पद्मनाभकथने न कश्चिद्दोषः। भास्करमते धनमुपपन्नमेव मानं ग्राह्यं नानुपपन्नं, न च ऋणं मानं ग्राह्यम्, तेन यत्रानुपपन्नता तत्र धनमानसत्त्वेऽपि भास्करस्तन्मानं न गृह्णति अतएव पद्मनाभकथनं खण्डयति। खण्डनदृष्ट्यापि पद्मनाभचर्चा पद्मनाभबीजं स्मारयति। अतोऽत्रापि भास्करः धन्यवादार्ह,एव येन पद्मनाभ इदानीं स्मृतौ तिष्ठति, अन्यथा पद्मनाभस्य कस्या अपि कृतेरप्राप्यत्वात् पद्मनाभः विस्मृत एव भवेत्।

भास्करस्य बीजे "अत्राद्यपरिभाषा" "अथाद्योदाहरणम्" एवं रूपेणान्येषामप्याचार्याणां चर्चास्ति परन्तु तेषां नामानि न सन्ति। तेन ज्ञायते यद्भास्करसमयेऽपि तेषां नामोल्लेखो न कृतस्तेन। एवं गणिताध्याये गोलाध्याये च बहूनामाचार्याणां बह्वीनां कृतीनां चोल्लेखो दृश्यते येन हेतुना त आचार्याः ताः कृतयश्च आसन्निति ज्ञायते। अतएवेदं भास्करस्यौदार्यं येनैते विश्रुता अभवन्।

अथान्योदारता दृश्यतां भास्करस्य। भास्करः बहूनां मतं खण्डयन्नपि तत्र खण्डने कारणं ददाति—

परोक्तेरन्यथा न्न याद्यः परान्न प्रदूषयेत्।
तस्यैव दूषणं तद्धि न दोषोऽतोऽन्यदूषणे॥

तथा खण्डनं साधुभावेन विधायापि क्षमापनार्थं तान् परमविनयेन स्तौति च—

ये वृद्धा लघवोऽपि सन्ति गणका बद्धाञ्जलिं वच्मितान्
क्षन्तव्यं मम तैर्मया यदधुना पूर्वोक्तयो दूषिताः।

कर्त्तव्ये स्फुटवासनाप्रकरणे पूर्वोक्तिविश्वासिनां
तत्तद्दूषणमन्तरेण नितरां नास्ति प्रतीतिर्यतः।
गणितस्कन्धसंदर्भोऽदभ्रगर्भाग्रधीमतः।
उचितोऽनुचितो यन्मे धाष्ट्यं तत्क्षम्यतां विदः॥

एवं पृथ्वी समेति पुराणे निगदितास्ति। वस्तुत पृथिव्याः गोलस्वरूपं संस्थाप्य तथा पुराणे चन्द्रः सूर्याद्दूरतरः वस्तुतः चन्द्रादतिदूरगः सूर्य इति साधयित्वापि तथा चन्द्रस्य ग्रहणे भूभा छादिका सूर्यग्रहणे पृथिवी छादिकेति युक्त्या संसाध्यापि एतानि मतानि संहितावेदपुराणबाह्यानीति हेतोस्तेषां मण्डनमेव करोति—

राहुः कुभामण्डलगः शशाङ्कं
शशाङ्कगश्छादयतीनबिम्बम्।
तमोमयः शंभुवरप्रसादा—
दित्यागमानामविरुद्धमेतत्॥

अर्थाच्छंभुवरप्रसादाद्राहुः कुभामण्डलं प्राप्य शशाङ्कं छादयति तथा शशाङ्कमण्डले गत्वा सूर्यबिम्बं छादयतीति कथनेनागमानामपि मतं सुरक्षितं तिष्ठति। एतत्कथनमपि भास्करस्यौदार्यमेव येन सर्वेषां मतानां समाधानं भवति।

---



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# विहारप्रान्ते 'भारती' प्रचारः

[प्रबन्धसम्पादको गिरिराजशास्त्री माघशुक्लमारभ्य फाल्गुनकृष्णपक्षं यावत् विहारप्रान्ते भारती-प्रचारार्थं यात्रामरोत्। तत्प्रदेशीयैः संस्कृतपण्डितैः, विद्यानुरागिधनिकैश्च सोत्साहं भारत्याः स्वीकृता ग्राहकता, संपादितं चावश्यकं साहाय्यमिति यात्राविवरणे पश्येयुः पाठकमहाभागाः। —संपादकः]

विंशतिदिनानि यावत् प्रयागनगरे कुम्भसम्मेलनावसरे संस्कृतप्रदर्शिनी प्रतिष्ठापिता। शतसंख्यकान् चित्रपटान् अवलम्ब्य संस्कृतसाहित्यस्य क्रमिक-विकासस्येतिहासः प्रदर्शितोभूत्। १२ फरवरीतः त्रिभिः सहयोगिभिः सह प्रयागनगरं गतवान्। कुम्भसम्मेलने गङ्गापारे समस्तदेशस्थमहामण्डलेश्वराः मण्डलेश्वरा तथा अन्येऽपि सर्वे विरक्त-वैरागी-नागा-अकाली-निर्मल-रामानुज-वैष्णव-शैव-निम्बार्क-दादू-कबीरेत्यादि-सम्प्रदायानुयायिनः सन्तः साधवः, तथा तेषाम् आचार्याः कल्पवासार्थं न्यवसन्। तत्रैव तुलसीदास-कबीर-गौतम-सूर-प्रभृतीना प्रसिद्धानां महात्मनां नामनिर्देशेन निर्दिष्टेषु मार्गेषु सर्वदा जनसमाजः त्रिवेणीस्नानार्थं सदुपदेशपानार्थं च गमनागमने कुर्वन् दृग्गोचरो भवति स्म। अत्रैव तुलसीदासमार्गे मयापि इयं संस्कृत-प्रदर्शिनी गोप्रदर्शिन्याः समीपे प्रतिष्ठापिता। अत्र एषु विंशतिदिवसेषु लक्षशः जनता तत्रागत्य इमान् चित्रपटान् दृष्ट्वा संस्कृत-साहित्यस्य अनेकवारं प्रशंसां कृतवती। अनेके संस्कृतविद्वांसस्तु निजसम्मतिं लेखरूपेणापि दत्तवन्तः, यासु काश्चन अवलोकनार्थं निम्नाङ्किताः क्रियन्ते।

मयाऽद्य दृष्टा तीर्थराजप्रयागे कुम्भावसरे संस्कृत-प्रदर्शिनी। एवंविधायाः प्रदर्शिन्याः सर्वथैवावश्यकता-विद्यते।

श्रीहरगोविन्दशास्त्री केसठ ( आरा )

संस्कृतप्रदर्शनीप्रयोगं नवीनमपूर्वञ्च दृष्ट्वा मोमुदीति चेतो नितराम्। गौरवञ्च विशेषेणानुभवामः।

भागीरथशास्त्री न्यायाचार्यः

( प्राध्यापक संस्कृतकालेज, इन्दौर)

इयं संस्कृतप्रदर्शिनी विदुषामुत्साहवर्द्धिनी।

गिरिजाशंकरशास्त्री कानपुर

'भारती संस्कृतमासिकेन' नियोजिता प्रदर्शिनी मया अवलोकिता। गणतन्त्रभारते अहं संस्कृतस्य प्रचुरप्रचारं कामये।

दुर्गादास बनर्जी बी० ए० कलकत्ता

प्रबन्धसम्पादकेन गिरिराजशर्मणा नियोजितां संस्कृतप्रदर्शनीं दृष्ट्वाऽहं भृशं प्रसीदामि।

पी० एन० राय, बी० एच० यूनिवर्सिटी

अद्य कुम्भमेलायां संस्कृतप्रदर्शिनीं दृष्ट्वा अतीव आनन्दितः संजातः। शासकाः, अस्माकं नेतारः, यद्यपि संस्कृतशिक्षायाः आवश्यकताम् अनुभवन्ति परन्तु ते कार्यरूपे परिणतम् किमपि न कुर्वन्ति। इयं संस्कृत-प्रदर्शिनी नवीना। आशास्ति प्रदर्शनीम् दृष्ट्वा सर्वे संस्कृतस्य उद्धारार्थं प्रयत्नं करिष्यन्ति।

सतीशचन्द्र शर्मा

प्रधानमन्त्री लोकमान्यसमिति छपरा ( बिहार )



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सुरभारत्याः इयं प्रदर्शिनी समस्ते भारते आवश्यिका। यया अबोधा भारतीयाः देवभाषायाः महत्त्वं ज्ञास्यन्ति।

श्रीब्रह्मदेवशास्त्री

प्रधानमन्त्री अ० भा० विद्वत्समितेः

गुरुवर्याः महामहोपाध्यायाः श्रीगिरिधरशर्ममहाभागा अपि स्वयमागत्य प्रदर्शनीं सम्यक्तया विलोक्य अत्यधिकं प्रफुल्लिताः संजाताः। सम्मत्यर्थं प्रार्थनायां कृतायां तैः इदं निर्दिष्टं यत् इयं प्रदर्शिनी अस्माकं गृहस्यैव वर्तते। अतः स्वयमेव स्वं किं प्रशंसेयम्। प्रदर्शिन्या अस्या नारायणपुरवास्तव्यैः श्रीमौनिस्वामिमहाभागैः उद्घाटनं कृतम्। यः अस्ति हिम्मतसिंहमाहेश्वरी (भूतपूर्वं राजस्वमन्त्री राजस्थान) प्रभृत्यनेकेप्रख्यातपुरुषाणां गुरुः। अधिकांशतः महात्मानः मण्डलेश्वरा अपि इमां मुक्तकण्ठेन प्रसंशितवन्तः।

१४ फरवरी दिनाङ्के प्रयागतः प्रस्थाय अहं 'भारती' प्रचारार्थं पाटलिपुत्रनगरं ( पटना ) प्राप्तवान्। तत्र सर्वतः प्रथमं बिहारप्रान्तस्य शिक्षामन्त्रिणां आचार्यबदरीनाथमहाभागानां सचिवालये गत्वा निजोद्देश्यं निवेदितवान्। स महाभागः संस्कृतगिरायाः अनन्यानुरागी भक्तश्च वर्तते। 'भारती'पत्रस्य निरन्तरं प्रकाशनं सरलां संस्कृतभाषां उपादेयलेखसामग्रीं तथा उत्कृष्टकलेवरवतीमपि रूप्यकत्रयमात्रेणैव वर्षं यावत् सुलभां इमां मासिकपत्रिकां विलोक्य अतिप्रसन्नः प्रभावितश्चावर्तत। तेन महाभागेन संस्कृतभाषायामेव निजसम्मतिं दत्वा इदम् आश्वासितं यत् आगामिनि मासाभ्यन्तरे एव अहं राजस्थान-सौराष्ट्र-मद्रास-मध्यप्रदेश-उत्तरप्रदेश-सर्वकारवत् बिहारप्रान्तेऽपि 'भारती'-मासिकपत्रस्य विद्यालय-पुस्तकालयार्थं स्वीकृतिप्रदानं करिष्यामि। तेन महाभागेन तस्मिन्नेव क्षणे आवेदनं गृहीत्वा तस्योपरि निजसंमतिं लिखित्वा च सर्वकारीयपद्धत्या स्वीयकार्यालयाधिकारिसमीपे प्रेषिता।

पाटलीपुत्रस्य 'सर्चलाइट'-'प्रदीप'-'आर्यावर्त' प्रभृतिसमस्तदैनिकपत्राणां सम्पादकैः देववाण्याः प्रचारस्य प्रसारस्य च अस्मिन् कार्ये पूर्णसहयोगो दत्तः। तैः मम बिहारप्रान्ते भ्रमणस्य समस्तं कार्यवृत्तं शिक्षामन्त्रिणा सह वार्तालापस्य वृत्तजातं निजपत्रेषु प्रकाशितम्। एतदर्थं धन्यवादार्हास्ते महाभागाः। बिहारसंस्कृतसम्मेलनस्य प्रधानेन श्रीवीरमणिउपाध्यायेन, बलदेवमिश्रेण तथा आर्यावर्तस्य सहसम्पादकेन श्रीअभिरामशास्त्रिमहाभागेन सह संस्कृतवाण्याः प्रचारप्रसारयोः सम्बन्धिनीं वार्तां कृत्वा अहं १८ फरवरीदिने गयानगरं प्रति प्रस्थितः।

गया १९। २। ५४

अत्र श्रीकपिलदेवपाठकमहाभागेन सह मया व्रजभूषणसंस्कृतविद्यालयस्थानां सम्पूर्णप्राध्यापकानां स्नातकानां च 'भारती' मासिकस्य परिचयं कारयित्वा नगरस्थसमस्तविद्यालयेषु संस्कृताध्यापकानां महाविद्यालयस्य ( कालेजस्य ) संस्कृतप्रधानस्य श्रीजगदीशनारायणदीक्षितस्यापि 'भारती' परिचयः कारितः। यावद्दिनं भ्रमणेन पर्याप्तसंख्यायां 'भारती' ग्राहकाः समभवन्।

देवघरः ( वैद्यनाथधाम )

१९, २० तारिकयोः देवघरं प्राप्य श्रीकृष्णजीगोखलेमहोदयेन सह अत्रस्थगुरुकुले अहम् गतवान्। अत्रत्यः प्राध्यापकः श्री उमाशंकरः 'भारतीं' दृष्ट्वा प्रफुल्लितः प्रसन्नचेताश्च मम परिचयं अधिष्ठातृमहा-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ागेन आचार्यमहोदयेन च कारितवान्। अधिष्ठातुः ाग्रहेण रात्रौ तत्रैव मया निवासं कृत्वा प्रातः समस्त-रुकुलछात्राणां समक्षं 'आदर्शो विद्यार्थी कः' इति ायम् अवलम्ब्य किञ्चित् निवेदितम्। गुरुकुले बहवः द्यार्थिनः तथा अनेके शिक्षकाः 'भारती'-मासिकस्य ाहकत्वं स्वीचक्रुः। अत्रत्यहिन्दी-महाविद्यालयस्य ध्यक्षः श्रीरामदहिनपाण्डेमहाभागः भारत्या ्यमाणं संस्कृतप्रचारम् अवलोक्य अतीव संतुष्टः। ाहकत्वं स्वीकृत्य तेन महाभागेन लेखादिनापि ाहाय्यप्रदानं स्वीकृतम्। अत्र बालानन्द-संस्कृत ्यालये तथा विभिन्नाङ्गलविद्यालयेष्वपि बहवः ाहकाः सञ्जाताः।

भागलपुर २१।२।५४

अत्र आयुर्वेदविद्यालये वृद्धेश्वर-बूढानाथ-राधा-ाणसंस्कृतविद्यालयेषु अनेके छात्राः अस्य मासिकस्य ांसां कृत्वा ग्राहकत्वं स्वीचक्रुः।

सुलतानगञ्ज २२।२।५४

अत्र विक्रमशिलावैदिकसं०विद्यालये तथा भिन्नविद्यालयेषु संस्कृतज्ञाः इमां पत्रिकां विलोक्य ाहकाः सञ्जाताः। अत्रत्यप्रसिद्धो भूमिहरः सुरगिरा-ागी राजाबहादुरः श्रीकृष्ण नन्दसिंहः 'भारतीं' लोक्य तत्क्षणमेव ग्राहकत्वं स्वीचकार।

मुंगेर २२।२।५४

अत्र श्रीजगन्नाथप्रसादमहाभागेन सह नगरे ्रम्य श्रीकृपाशंकर-अवस्थी-महाभागं तथा अन्या-ा कांश्चित् संस्कृतज्ञपण्डितान् वाकीलकान् च लोक्य 'भारती' परिचायिता। तेषु केचित् ग्राहका ्ये सञ्जाताः। किन्तु इदं नगरं श्रमिकवर्गबहुलं वर्तते ः अत्र संस्कृतज्ञाः अल्पीयांस एव।

बेगूसरायः २३।२।५४

अत्र वाक्कीलकस्य श्रीआनन्दीप्रसाद-मोख्तार-महाशयस्य गृहे एव अनेकेषां संस्कृतज्ञानां सभा सञ्जाता। ते मासिकस्य परिचयं प्राप्य देशे देववाणी-प्रसारकं इदं पत्रं मुक्तकण्ठं प्रशंसितवन्तः। आंग्ल-महाविद्यालयस्य सुयोग्यः संस्कृताध्यापकः श्रीरतिकांत-पाठकः ग्राहको भूत्वा भविष्यति लेखादिना पूर्णसाहा-य्यस्य वचनमदात्।

राजनगरम् ( मिथिलाप्रदेशे )

२४, २५ फरवरीदिनयोः श्रीमनोहरडोंगरे-महोदयेन सह राजनगर, मधुबनी, नवानी, लोहना इत्यादिग्रामेषु अवस्थितेषु संस्कृतमहाविद्यालयेषु मया गतम्। तत्रत्याः अध्यक्षाः प्राध्यापकाः स्नातकाश्च न केवल 'भारतीं' मासिकं मुक्तकण्ठं प्रशंसितवन्तः किन्तु तेषु बहवः ग्राहकत्वमपि स्वीचक्रुः। दरभंगा-नगरे एकम् अतिविशालं दरभंगामहाराजेन सञ्चालितं मिथिलासंस्कृतविद्यापीठं ( मिथिला संस्कृत रिसर्च इन्स्टीट्यूट ) वर्तते। अत्रत्या अध्यक्षाः ( डाइरेक्टर महोदयाः ) भारतीम् अवलोक्य अस्या उपादेयतां स्वीकृतवन्तः। नगरस्थानां अनेकेषां विद्वज्जनानां नामानि निर्दिश्य ते महाभागाः स्वयमपि ग्राहकत्वं स्वीचक्रुः। विद्यापीठस्य अनेकसंस्कृतज्ञविदुषां नामान्यपि निर्दिष्टानि। दरभंगा-महाराजस्य प्रधान-व्यवस्थापकेन श्रीदुर्गानन्दझामहाभागेनाऽपि महारा-जस्य सकाशात् किञ्चित् साहाय्यप्रदानार्थं आश्वा-सितम्।

मुजफ्फरपुरम् २७।२।५४

अत्र वर्तते एको धर्म-समाजसंस्कृतविद्यालयः। अत्रत्योः प्रायशः समस्ताध्यापकाः अध्यक्षेण सहिता



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



**विनोदवाटिका—**

अंग्रेजीशिक्षकः—यदा त्वं ग्रामादायातस्तदा त्वतीव शिष्टः सरलश्चाऽऽसीः। किन्तु इदानीमधीयानस्याऽपि ते प्रत्यहं स्वभावविकृतिम्, उद्दण्डतां च पश्यामि।

विद्यार्थी—नूनं संभवतीदम्। अनुल्लङ्घनीयः किल संगतेः प्रभावः।

+ + +

दण्डविभागीयः कर्मचारी-(अभियुक्तं विटं प्रति) यदि किञ्चिदितोऽपि वितरसि तर्हि ते त्वरितमुपस्थापयामि निर्णयपत्रम्।

[ विटः अनाकर्णितकेन दण्डाध्यक्षसमीपमुपसपति ]

दण्डाध्यक्षः—(अभियुक्तं विटं प्रति) त्वया अभियोक्तुः शिरसि चरणत्रेण प्रहृतमिति सार्द्धं मुद्राद्वयं ते दण्डः।

विटः—(उत्कोचयाचकस्य कर्मचारिणः शिरसि उपानहा प्रहृत्य—दण्डाध्यक्षं प्रति) श्रीमन्! काऽधुनाऽहं पञ्चमुद्रामूल्यं शुल्कपत्रभिदं भञ्जयिष्यामि। ततः सार्द्धमुद्राद्वयमिदमपि मे दण्डो दीनस्याऽस्तु। समर्प्यते चेदं पञ्चरूप्यकमूल्यं शुल्कपत्रम् (करेंसी नोट)।

---

'भारती' पत्रस्य ग्राहकाः समभवन्। श्री नीतिप्रसादसिंहेन 'भारती' सम्यक्तया विलोक्य बिहारप्रान्तस्य पुस्तकालयेषु अस्या ग्राहकत्वस्वीकारार्थं आश्वसितम्। अत्रत्या अनेके वैद्या अपि ग्राहकत्वं स्वीकृतवन्तः।

बेतिया २८। २। ५४

अत्रत्यराजकीयसंस्कृतमहाविद्यालयस्य प्रधानाध्यक्षः श्री चन्द्रदेवशास्त्री महाभागः, यः अस्ति 'भारती'पत्रस्य पुरातनः लेखकः ग्राहकश्च, यावत् दिनं प्रयत्नपूर्वकं अनेकान् ग्राहकत्वार्थं प्रेरितवान्। बेतियानगरे चम्पारणमण्डले अस्य महाभागस्य सुप्रयत्नेन बहवः ग्राहकाः सञ्जाताः।

छपरा १। ३। ५४

अत्रत्यश्रीशिवकुमारद्विवेदिवाकीलमहोदयस्य मन्महाभागेन तथा श्रीअक्षयवटतिवारीमहोदयस्य प्रयत्नेन अनेके ग्राहकत्वं स्वीचक्रुः। अत्रैव प्रसिद्ध संस्कृतसेविना श्रीकपिलदेवशास्त्रिमहाभागेन सह साक्षात्कारोऽभूत्। अयं महाभागः निजसम्पूर्णजीवनमेव संस्कृतप्रचारार्थं समर्पितवान्। अधुना एष सौराष्ट्रे संस्कृतप्रचारार्थं कार्यरतो वर्तते। निजभ्रातुः विकृतस्वास्थ्यत्वात् एष अधुना छपरानगरे वर्तमान आसीत्। तेनाऽपि बहुकालपर्यन्तं देववाणीप्रचारप्रसारविषयको वार्तालापो विहितः। अनेनाऽपि भविष्ये पूर्णरूपेण 'भारती'-प्रचारस्य आश्वासनं दत्तम्।

लखनऊ २। ३। ५४

अत्र मान्येन श्रीसम्पूर्णानन्द (गृहमन्त्री उत्तरप्रदेशे) महाभागेन सह 'भारती' विषयको वार्तालापः अभवत्। प्रान्तीय आय-व्यय-कार्ये अत्यधिकं व्यस्तत्वात् तैर्महाभागैः अप्रेलमासे 'भारती' पत्रं सम्यक् विलोक्य अस्य सहायार्थं आश्वासनम् अदायि। लखनऊविश्वविद्यालये श्रीकेदारनाथशास्त्रिमहाभागेनापि 'भारती'पत्रे लेखप्रेषणार्थं ग्राहकत्वाभिवृद्धयर्थम् आश्वसितम्। अखिलभारतीयरेडियोविभागस्थकर्मचारिणा, संस्कृतस्य अनन्यउपासकेन श्रीकमलापतिमिश्रेणापि रेडियोविभागे 'भारती' प्रचारार्थम् अधिकसंस्कृतप्रचारार्थमपि कथितम्। ३ फरवरीदिनांक आगरानगरे श्रीवैद्यमनोमोहनशास्त्रिमहाभागैः तथा रामेश्वरझा शास्त्रि (अध्यक्ष विद्याविवर्द्धिनी संस्कृत विद्यालय) इत्यादिविद्वद्भिः 'भारती'प्रचारार्थं वार्तालापं कृत्वा ४ मार्च दिनांके जयपुरनगरे परावृत्तवान्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सम्पादकीयम्

**नेहरूमहोदयस्यसंस्कृतसमादरः**—संवादपत्र-पाठकैरवगतमेव भवेत् यत् फर्वरीमासस्यान्तिमसप्ताहे नवदिल्ल्यां समभूत्संस्कृतसंमेनलम्। अत्र हि नाना-प्रान्तेभ्यः शतमिताः प्राच्यपाश्चात्योभयभाषाविदो विद्वांसः समभिलन्। दिल्लीस्थाः संसत्सदस्याः, राजकीयोच्चकर्मचारिणः, उच्चोच्चविद्यालयाध्यक्षा-श्चापि सर्वे समभूवन् समुपस्थिताः। एवंविधं महत् संमेलनं नैषु दिनेषु सपन्नमिति लोकानामाशयः। अत्र भारतप्रधानमन्त्रिणा श्रीनेहरूमहोदयेन संस्कृतविषये यदुक्तं न ततः पूर्वं तेन कदाचिद् भाषितम्, जनैश्चाकर्णितम्। बहवः किल मन्यन्तेस्म—यत् "संस्कृत-बहुलामुन्नतां हिन्दीमपि नाभिरोचयति प्रधानमन्त्रिमहाभागः, का कथा शुद्धसंस्कृतभाषायाः"। तेषां प्रमोदनाय प्रबोधनाय च नेहरूमहाभागस्य भाषणं सारतः संक्षिप्य निम्ने समुद्ध्रियते—

"उपस्थिता संप्रति तादृशी परिस्थितिर्यद् भारत-देशस्य हिताय संस्कृतभाषाया व्यापकमध्ययनं प्रचार्येत। भारतीयसंस्कृतेर्मूलशिला संस्कृतवाङ्मयमेवास्ति। संस्कृतस्याऽभावे भारतीया संस्कृतिर्न भवेत्। संस्कृते-रभावे च भारतमेव स्वस्वरूपे न तिष्ठेत् ततो हृदये-नाऽहं कामये संस्कृतप्रचारम् संस्कृते एव सा निगूढा शक्तिर्निहिता या समस्तमपि भारत राष्ट्रमेकसूत्रे निबध्नीयात्। एतावत्कालमपि संस्कृतभाषैव राष्ट्रमिदमेकं चाक्षुण्णं च ररक्षेति शक्यते वक्तुम्।

समस्तेषु भारतीयेषु विद्यालयेषु अनिवार्यविषय-त्वेन स्थापनादेव संस्कृतप्रचारो देशे भवेदित्यत्र यद्यपि मनसि शङ्का समुदेति यत्—ब्रिटेने लैटिन-प्रचारवत् अत्रापि देशे वृथैव विवादस्योदयो भवेत्। किन्तु तत्वतो विचारे न तस्या भीतेरवसरः। नास्ति भारते ब्रिटेनस्येव परिस्थितिः। अत्र हि संस्कृतमति-प्राचीनकालादेव देशे प्रसृतम्। किं बहुना, भारतीयं प्राक्कालिकं विज्ञानमप्यस्यामेव भाषायां निहितम्। भीतिः केवलमियमेव यत् अनिवार्यत्वेन स्वीकृतं संस्कृतं कदाचिद् भाररूपं न भवेदिति।

मम तावदिदं वक्तव्यं यत्संस्कृतस्य पूर्णं गम्भीरं चाऽध्ययनं कर्तव्यत्वेनापतति। यतो हि संस्कृतभाषा-गता विषयाः सातिशयं गम्भीराः। अहं तेषां विदुषां मतमभिरोचयामि ये ह्यस्माकं विज्ञानस्य रक्षणाय प्राग्विद्यापरिशीलनस्य प्राधान्यं स्वीकुर्वन्ति। संस्कृत-भाषा ज्ञानविषये कियती समृद्धेति न मया वक्तव्यम्। १० वर्षपूर्वमेकस्मिन् महति सम्मेलने मया ज्ञातं यत् संस्कृतभाषायां पञ्चाशत्सहस्रं मौलिकग्रन्थाः सन्ति। इयं कथा समस्तसंसारस्य विस्मयोत्पादिनी। एतावद् ग्रन्थसम्पत्तिरेकस्मिन् यदि पुस्तकालये सम्भवेत्तर्हि भवेद् महते उपकाराय। किन्तु नेदं दृश्यते सहसा सम्भवि। यतो हीमे ग्रन्थाः संसारस्य अनेकेषु पुस्तकालयेषु विकीर्णा विद्यन्ते। अथापि तेषां चित्राणि, प्रतिकृतयश्च स्थापयितुं शक्यन्ते।" इति

**संमेलनाध्यक्षस्य अय्यङ्गारमहोदयस्याभिप्रायः**—एतदनन्तरं संमेलनाध्यक्षः श्रीअनन्तशयनमय्यङ्गारमहाभागः समभाषत—शासकतन्त्रस्य साहाय्यमन्तरा भारते यथावत्संस्कृतप्रचारो न सम्भवी। शासकतन्त्रस्य अधिकारनियुक्तिर्भवेत्, यत् भारतस्य सर्वेष्वपि विश्व-विद्यालयेषु संस्कृतभाषायाः कृते एका आसन्दी



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



(स्थानम्) पृथग् रक्षिता भवेत्। किञ्च हस्तलिखितपुस्तकानां संरक्षणाय भारते एको राष्ट्रियपुस्तकालयः शीघ्रातिशीघ्रं स्थापनीयः। भारतसर्वकारो ब्रिटिशसर्वकारे बलमर्पयेत् यत्स भारतदेशस्य तान् हस्तलिखितग्रन्थान् लघु प्रत्यर्पयेत् ये भारताद् गताः तस्मिन्देशे च वर्तन्ते। बहूनां ग्रन्थानामेका प्रतिरेव वर्तते। अतएव ते सुदुर्लभाः साम्प्रतम्। एवमेव योरपस्य विभिन्नपुस्तकालयेषु ये संस्कृतग्रन्था हस्तलिखिता विद्यन्ते तेषां भारतसर्वकारः क्रयणं कुर्यात्। यदि ते क्रयणेन न लभ्येरन् तर्हि तेषां ग्रन्थानां प्रतिलिपिः, चित्राणि वा तेषां संग्राह्याणि। निम्नलिखिताः प्रस्तावाः संमेलने स्वीकृताः—

१—राज्यानां सरकाराः प्रार्थ्यन्ते मैट्रिकपर्यन्तं संस्कृतशिक्षणमनिवार्य कर्तुम्।

२—भारतसरकारः संस्कृतग्रन्थानां गवेषणागारं स्थापयितुं प्रार्थ्यते साग्रहम्, यत्राऽऽहूता भारतस्य विशेषज्ञा विदेशीया भारतेतिहास-संस्कृति-धर्म-दर्शन-ज्योतिषादिविषकं वैज्ञानिकमनुसंधानं कुर्युः।

३—असंख्या अत्यावश्यक ग्रन्थाः संस्कृतभाषाया अद्याऽवध्यप्रकाशिताः सन्ति। सरकार एतेषां प्रकाशनमात्मदायित्वेनाङ्गीकुर्यादिति।

**अमेरिकायाः पाकस्थानसाहाय्यम्**— राजनैतिकैः शनैः शनैरिदं निश्चितं यत् भारतस्य प्रबलविरोधेऽपि अमेरिकाराष्ट्रेण पाकस्थानाय सैनिकसाहाय्यप्रदानं निश्चितरूपेणाङ्गीकृतम्। अतएव हि शिष्टमण्डलमेकं वाशिङ्गटनात्कराँचीप्रदेशमागमिष्यति, सैनिकसाहाय्यसम्बन्धे च सर्वं विस्तृतरूपेण गवेषयिष्यति। तदनन्तरम् आइजनहोवराय, अलीसर्वकाराय च आवश्यकं परामर्शं दास्यति।

अनेन हि राजनैतिकक्षेत्रेस्पष्टं सिध्यति यत् रूसराष्ट्रस्य विरुद्धां परिवेष्टनयोजनामग्रसरीकर्तुं यथा अमेरिका संनद्धा, तथा अमेरिकातः शस्त्रास्त्रसज्जां समुपलभ्य पाकस्थानमपि भारतं भर्त्सयितुं बद्धपरिकरम्। एवं परिस्थितौ निजां सैनिकशक्तिं सुदृढां सुविकसितां च कुर्यादिति भारतस्य कृतेऽपि ननु समयप्राप्तम्। बह्वोः कालाद् यदा पाकचरित्रमेवमाकलयामस्तदा संदेहस्य न मनागप्यवसर इति को वा न जानीयात्? राष्ट्रस्य सुरक्षा, स्वतन्त्रतायाः संमानः, स्वाभिमानस्य संरक्षणम्, स्वत्वस्य समवधानमिति सर्वोऽप्ययमावश्यकः प्रश्नः। नात्र कर्णधारैरुपेक्षा कर्तव्येति किं विस्तरेण?

**काश्मीरो भारतेन सम्बद्धः स्थास्यति**— षट्-सप्तवर्षेभ्यस्तदिदं नानाविधशङ्कानां स्थलमासीद् यत् काश्मीरो भारते संमिलितो भवेत्पाकस्थाने वा? अहोस्विन् स्वतन्त्रस्तिष्ठेत्? किन्तु साम्प्रतं काश्मीरस्य विधानसभया तुमुलकरतलध्वनीनां मध्ये सहर्षमिदं निर्णीतं यत् काश्मीरो भारतेन सहैव संबद्धस्तिष्ठेत्। यतो हि द्वयोरपि संबन्धश्चिरादभिन्नः, अद्यावधि अविच्छिन्नश्चाऽभूत्। विधानसभायामेतन्निर्णयोत्तरं जनमतसंग्रहस्याऽपि प्रश्नः स्वयं समाहितो भवति। यतो हि सेयं विधानसभा जनताद्वारा निर्वाचितानां सदस्यानामेव प्रतिनिधिसभा। विधानसभायामेतन्निर्णयावसरे एव काश्मीरमुख्यमन्त्रिणः बख्शी गुलाममोहम्मदस्य भाषणमपि भारतकाश्मीरयोरेकात्मतासंबन्धं दृढी करोति। तत्र हि स्पष्टमनेन चिरात् काश्मीरस्य भारतेन सह सर्वात्मना संबन्धः समर्थितः। अस्तु यत्किञ्चित्, काश्मीरविधानसभायाश्चिरादपेक्षितं चिरस्मरणीयं चिराभिनन्दनीयं च निर्णयमिमं सर्वात्मना समभिनन्दामः। काश्मीरस्य मुख्यमन्त्रिणं बख्शीमहाभागमपि सादरं संवर्द्धयामः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❀ वसन्तोपहारः ❀

लेखकः—श्रीविनोदी उदयपुम्

( १ )

अ० भा० सं० सा० सम्मेलनं किं कुरुते ?

काश्यां सरयूपारीणपण्डितमल्लानां सारस्वतविद्वत्प्रवीराणां च मध्ये सामञ्जस्यस्थापनाय प्रयतते।

( २ )

'रत्नाकरः' कथं न प्रकाशते ?

वाराणस्यां पण्डितपुङ्गवानां हस्तलाघवं दृष्ट्वा स्तम्भितः खलु जातः स्यात्। अथवा तेषां विवादेन विनिर्विण्णो विकटवीथिकायां प्रविष्टो विश्वेश्वरं सेवमानः स्यात्। आहोस्वित् प्रणयलीलायां प्रतीपं प्रसरन्तीं जाह्नवीमनुनयन् प्रकाशे आगमनं विस्मृतवान् स्यात्।

( ३ )

रा० सं० सा० सम्मेलनमिव तत्कार्यसमितिरपि प्रस्तावानेव प्रसारयति, कांचित् समितिमेवच नियुज्य कृतकृत्या भवति।

अयि महाभाग! तत्तु समुचितमेव, 'यथा राजा तथा प्रजाः'।

एवमस्ति ?······तर्हि जगति नवीनमिदमाश्चर्यमपि प्रवर्तताम्, यत् 'सतीव योषित् प्रकृतिस्तु निश्चला पुमांसमभ्येति भवान्तरेष्वपि' इति पद्धतिरपि परिवर्तिताऽजायत। प्रवर्धतां च संस्कृतस्य सौभाग्यम्।

( ४ )

सर्वकारेण संस्कृतपरीक्षाभ्यो मान्यता न दीयते।

महाभाग! सर्वकारस्याऽस्मिन् को दोषः?··· यदा हि मान्यतायाः कोष एव सम्प्रतिरिक्तो वर्तते। यतो हि मान्यता सर्वाऽपि इतरपरीक्षाभ्योऽदीयत।

( ५ )

संस्कृतस्य छात्राणां कृते छात्रवृत्तिर्न प्राप्यते।

अयि भोः संस्कृतस्य पठनमेव तावत् निरर्थकम्। संस्कृतं पठितवतां यदा राजकीयविभागेषु प्रवेशस्य अवसर एव नाऽऽयाति, तर्हि किं करिष्यन्ति छात्राः संस्कृतं पठित्वा ? त्यज्यतां संस्कृतस्य पठनं पाठनं च।

( ६ )

सर्वकारेण कतिचित् संस्कृतकालेजा उन्नतिं प्रापिताः।

एँ, किमेतत् जातम्?···मम तु न जायतेऽस्यां वार्तायां मनागपि विश्वासः। यतः, अद्यावधि कस्याऽपि संस्कृतकालेजस्य एकोऽपिच्छात्रः प्रगतिं कुर्वन् न कम्यूनिष्टतां प्राप्तः, न नास्तिकतां गतः, न वा उच्छृङ्खलततामपि यातः।

( ७ )

अस्माकं केन्द्रियसरकारस्य गृहमन्त्री काटजुमहोदयः च नेतार उद्घोषयन्ति, यत् 'राष्ट्रभाषात्वस्य योग्यता संस्कृत एव वर्तते' इति।

वर्ततां नाम! किन्तु संस्कृतं राष्ट्रभाषा नैव भवितुमर्हति। यदि भवेत्, तर्हि दैनदिनं दृश्यमानाः छात्राणामुत्पाताः, श्रमिकदलानां संघर्षाः, धनिकानां शोषणानि च कथमत्र स्थास्यन्ति ?

( ८ )

अस्माकं राष्ट्रपतिरितरे च नेतारो भूयोभूय उद्घोषयन्ति, यत्—"संस्कृतसाहित्यस्य पुरातनं महार्घं च निधिं संरक्षतां संस्कृतविदुषां द्रव्यसाहाय्यप्रदानेन प्रोत्साहनं खलु सरकारैः कर्तव्यम्।

एतत् खलु अनावश्यकम्! यतः संस्कृतविदुषां कृते मन्यते, यत्–प्रायेण एकाशनशीलानां जयन्त्येकादश्यादिषु च उपोषणपराणां तेषां राशनव्ययो नाऽधिको भवेत्। तथा उपासनापरायणतया ते भूतिं ललाटादिषु धारयन्तः शनैः शनैः सकलेऽपि कलेवरे धारयितुं लगिष्यन्ति, अतो वस्त्रार्थं व्ययोऽपि तेषां नाऽधिको भवेत्। तथा च 'ब्रह्म सत्यं जगन्मिथ्या' वादिनस्ते असारादस्मात् संसाराद् विरता भवन्तो भोजनाच्छादनादिविषयकान् स्त्रीबालानामाक्रोशानपि नाऽपेक्षेरन्, तर्हि कः स्यादुपयोगस्तेभ्यो दत्ते साहाय्ये द्रव्यस्य।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## संस्कृतसमाचाराः—

### संस्कृतविश्वपरिषदोऽधिवेशनम्—

नागपुरे संस्कृतविश्वपरिषदस्तृतीयमधिवेशनमप्रेलमासस्य अन्तिमसप्ताहे नागपुरनगरे संभवेदिति दक्षिणप्रदेशीयैः पत्रैः सूचितम्। अधिवेशनेऽस्मिन् अध्यक्षो राष्ट्रपतिः श्रीराजेन्द्रप्रसादमहाभागो नागपुरमलंकरिष्यतीति तत एव सूच्यते। अधिवेशने बहूनामावश्यकानां प्रश्नानां विचारः करिष्यते। प्रारम्भिक-माध्यमिक-विश्वविद्यालयसंबन्धिनीषु परिस्थितिषु संस्कृतस्य स्थानम्, संस्कृतप्रचारे प्रान्तीयशासकैः केन्द्रीयशासकैश्च के के उपकाराः कर्तव्याः, संस्कृतमधीतवतां कृते शासनसंबन्धिनाम्, अर्थशास्त्रसंबन्धिनां चोद्योगानां वितरणम्, संस्कृतविषये नानागवेषणानां संवर्द्धनम्, संस्कृतविश्वविद्यालयस्य स्थापनमित्यादिषु विषयेषु भवेदस्मिन् सफलो विचार इति हि सर्वतस्तैः सूच्यते। अस्मिन्नधिवेशने संस्कृतप्रचारकसंस्थाभिः सर्वाभिरेव स्वे स्वे प्रतिनिधयः प्रेषणीया इति परिषदः प्रमुखमन्त्री श्रीजयन्तकृष्ण-हरिकृष्णदवेमहाभागो निवेदनपत्रद्वारा प्रार्थयते।

**परीक्षापाठ्यक्रमसमितिः**— राजस्थानीयसंस्कृतसम्मेलनेन आयोजितायाः परीक्षापाठ्यक्रमसमिते रेकमधिवेशनं 'भारती' सम्पादकस्य 'मञ्जुनिकुञ्जे' समभूत् विगतमासे। यस्मिन् पं०विद्याधरशास्त्री, रा० वा० कुम्भारेमहोदयः (शिक्षाविभागस्योपाध्यक्षः) पं० वृद्धिचन्द्रशास्त्री, भारतीसम्पादकश्चेत्यादयः समुपातिष्ठन्। पाठ्यक्रमसम्बन्धे भूयान् विचारः समभवत्। ततो मार्चमासस्य षष्ठे दिने पुनः समितिरधिविष्टा। स्थान राजस्थानविधानसभाध्यक्षस्य श्रीनरोत्तमलालजोषिम होदयस्य भवनम्। पाठ्यविषये समभूद् गंभीरतय विचार-विमर्शः।

**ज्ञानविज्ञानपरिषद्**—मार्चस्य पञ्चमतिथौ राज कीयसंस्कृतकालेजे उपरिसूचितायाः परिषदः समभूदे कमधिवेशनम्। एतस्याः संयोजकः कथाभट्ट श्रीजगदी शचन्द्रमहोदयः। तद्दिनेऽध्यक्षोऽभूद् विधानसभाध्यक्ष जोशिमहोदयः। कथाभट्टमहाभागेन प्राचीनदर्शनोप प्रकटिते प्रकाशे-विद्याधरशास्त्रिमहोदयः समर्थयते स्म यन् प्राक्तनं विज्ञानं वर्तमानसमयस्योन्नतोन्नतविज्ञाना पेक्षया अत्युन्नतकोटिकम्। किन्तु वर्तमानसंस्कृतज्ञैस्त द्विज्ञानं जनतायाः संमुखे समानेतव्यम्।

ततो जोशिमहाभागः सोत्साहमसूचयत्-यत् संस्कृ तज्ञानां प्रत्येकप्रार्थनां सर्वकारः पूरयिष्यतीति असंशय हृदये कर्तव्यम्। किन्तु संस्कृतपण्डितैः सेयं संस्कृत भाषा समयोपयोगिनी सरला च संपादनीया। अस्मिन कर्मणि तैः श्रमः स्वीकार्यः स्यात्। सभायामस्यां श्रीकु म्भारेमहोदयः पं० वृद्धिचन्द्रशास्त्री, दुर्गादत्तव्याकर णाचार्यः गङ्गाधरद्विवेदिप्रभृतयः समुपातिष्ठन्।

**बीकानेरसंस्कृतकालेजे वर्षाविज्ञानाऽनुसंधानम्**—कियतश्चित्कालाद् बीकानेरस्य विद्वद्भिर्ज्यौति षयोगानां ग्रहचारस्यानुसारं च 'पुण्यपत्तनीय (पूना) वर्षानुसन्धानानुसन्धानानुसारं वैज्ञानिकमन्वेषणमार ब्धम्। सहैव भड्डुलिदोहानां शकुनानां चापि परीक्ष णमुपक्रान्तम्। शनैः शनैरत्र साफल्यमवाप्येतेति विश्व सिमः।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# "द्रुतं संस्कृतं शिक्ष्यतां "भारती" तः—

कस्यचन राज्ञो द्वौ मन्त्रिणावास्ताम्। तयोरेकः परमविवेकी, अपरश्च मन्दधीरभूत्! विवेकिनो नाम बुद्धिसागरः, अपरस्य च नाम शकटबुद्धिरित्यासीत्। राजा बुद्धिसागरे एव भृशमस्निह्यत्। शकटबुद्धिः तदुपरि राज्ञः स्नेहं दृष्ट्वा अत्यन्तम् ईर्ष्याकुलः तिष्ठति स्म। एकदा शकटबुद्धिः बुद्धिसागरस्य असफलताप्रकटनाय तम् असाध्यकार्ये प्रेरयितुं विनोदशतैः राजानमनुकूलं चकार। अनेन प्रबोधितो राजा बुद्धिसागरमादिशत्—"ईदृशं वस्तु समानय यत् प्रमोदे विषादं, विषादे च प्रमोदं कुर्यात्।" तथेति भूपतेः सविधे स्वीकृत्यापि मन्त्री नैतत् आनेतुं समर्थो बभूव।

एकदा रजन्यामकस्मात्तस्य चित्ते तदिदं प्रास्फुरत् स हि प्रातः सुवर्णेनैकमङ्गुलीयकं निर्मातुं स्वर्णकारमादिदेश, यस्मिन् "नेदं स्थास्यति" इत्युत्कीर्णं भवेत्। तामेतां मुद्रिकां राज्ञे सहर्षमुपायनं ददौ। प्रहर्षसमये "इदं हर्षदिनं" न स्थास्यति इत्यवगम्य राजा विषादं जगाम। एवं विषादावसरे 'इदं दुःखदिनं न स्थास्यति' इत्यनुचिन्त्य धैर्यमुपगतो राजा प्रमोदमन्वभवत्। प्रसन्नो नरपतिर्मन्त्रिणे दन्तिनमेकं द्वौ वाजिनौ प्रभूतं च धनमदात्।

किसी राजा के दो मन्त्री थे। उनमें एक बहुत समझदार और दूसरा ठस बुद्धि था। अक्लमन्द का नाम बुद्धिसागर और ठस बुद्धि वाले का नाम शकटबुद्धि था। राजा बुद्धिसागर पर बहुत प्रेम रखता था। पर शकटबुद्धि उस पर राजा का प्रेम देखकर बहुत जलता था। एक बार शकटबुद्धि ने बुद्धिसागर को नीचा दिखाने के लिए, उसे किसी बड़े कठिन काम में लगाने के लिए, चापलूसी करके राजा को प्रसन्न कर लिया। उसके सिखलाने से राजा ने बुद्धिसागर को कहा कि ऐसी चीज लाओ कि जो खुशी में दुःख और दुःख में खुशी पैदा करे। 'अच्छा' राजा के सामने हां करके भी मन्त्री ऐसी चीज न ला सका।

एक बार रात को अचानक उसके दिमाग में एक बात आई। उसने सवेरे ही सुनार को एक ऐसी अंगूठी बनाने को दी जिस पर—"यह नहीं रहेगा" यह खुदा हो। इस अँगूठी को उसने राजा को खुशी से भेंट की। खुशी के समय—'यह खुशी का दिन नहीं रहेगा" यह जानकर राजा को बड़ा दुःख हुआ। इसी तरह दुःख के समय "यह दुःख का दिन नहीं रहेगा" यह जानकर राजा को धीरज हुआ और खुशी महसूस हुई। राजा ने इस पर खुश होकर उसे एक हाथी, दो घोड़े और बहुत सा धन दिया।

## धातुप्रयोगपारिजातः—

धृञ् धारणे, (रखना, पहिनना, to put) भ्वादिः। सकर्मकः। अनिट्। उभयपदी। परस्मैपदिनो रूपाणि। धरति। दधार, दध्रतुः, दधर्थ, दध्रुव। धर्ता। धरिष्यति। धरतु। अधरत्। धरेत्। ध्रियात् ध्रियास्ताम् अधार्षीत्, अधार्ष्टाम्। अधरिष्यत्।

कर्मणि—ध्रियते। णिचि—धारयति, ते। अदीधरत्—त। सनि—दिधीर्षति, ते। कृदन्ते—धर्तव्यः धार्यः। धरणीयः। क्त—धृतः। धृतवान्। शतृ—धरन्। शानच्—धरमाणः। क्त्वा—धृत्वा संधृत्य। तुमुन्—धर्तुम्। बहु [illegible] वहुलवचन (अच्, ह्रस्वः, मुम् गमश्च) धारा (अङ्, गुणः, दीर्घः) धर्मः—(मन्) धर्मं चरति धार्मिकः (ठक्) धर्मादनपेतं धर्म्यम्—(यत्) निर् + निर्धारयति = निश्चिनोति। 'धारेरुत्तमर्णः' यस्मादृणं गृह्यते स [illegible] धारेः सम्प्रदानं स्यात्—यज्ञदत्तः देवदत्ताय शतं धारयति।

प्रकाशकः—जयबहादुरसिंहः　　　　पता—भारती भवन, गोपालजी का रास्ता, जयपुर।
मुद्रकः—राजस्थान प्रिंटिंग वर्क्स, हनुमान का रास्ता जयपुर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

राजकुमार

पुस्तकालय गुरुकुल कांगड़ी

शकारि० विक्रमादित्यः

वर्षम् ४

षष्ठाऽङ्कः

मूल्यम्
वार्षिकम् ३) रु०
एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान मद्रास-मध्यप्रदेश-सौराष्ट्र उत्तर प्रदेश सर्वकारैः स्वीकृताः—

# विषय-सूची


| क्रमः | लेखाः | लेखकाः |
| --- | --- | --- |
| १. | व्रजवनिता | श्री लक्ष्मीनारायण पुरोहितः उदयपुरम् |
| २. | वैद्यकौस्तुभाख्यम् चित्रकाव्यम् | पं० श्री भद्रदत्त शर्मा शास्त्री कासगंज |
| ३. | द्वौ धूर्तौ | श्री पं० दीनानाथ त्रिवेदी जयपुरम् |
| ४. | पद्मिनी देवी | श्री पं० वासुदेव शास्त्री, शोलापुरम् |
| ५. | भारतीय दर्शन संदेशः | श्री पं० चन्द्रदेव शर्मा बिहार |
| ६. | भारतीया क्रान्तिः क्रान्ति कारिणश्चः | श्री गणेशराम शर्मा झालावाड़ |
| ७. | ज्योतिष शास्त्रस्य चमत्कारः | श्री लक्ष्मीनारायण शास्त्री नागोर |
| ८. | सम्पादकीयम् | श्री सम्पादकः |
| ९. | संस्कृत समाचाराः | " |
| १०. | पुस्तकालोकः | " |
| ११. | देशविदेश वार्ता | " |
| १२. | द्रुतं संस्कृत शिक्ष्यतां 'भारती' तः | " |


## —: "भारती" पत्रस्य उद्देश्यानि नियमाश्च :—

१. संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिक विचार पोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि।

२. 'भारतीय' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम्।

३. मासिक पत्रमिदं प्रतिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात्।

४. एकस्यांकस्य मूल्यम ।≈) आणकषट्कम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि-
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्मा शास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षम् ४ | चैत्रपूर्णिमा, सं० २०११ | अङ्कः ६

## व्रजवनिताः

कविकलानिधिः पण्डितश्रीलक्ष्मीनारायणपुरोहितः साहित्याचार्यः, श्रीमहाराणासंस्कृतकालेजसाहित्यप्राध्यापकः
उदयपुरम् ( राजस्थानम् )

अहो नु कुशला गोपिका, याभिर्धृतः सुखेन ।
कृष्णो लोकत्रयधरोऽप्यञ्जनवन्नयनेन ॥ १ ॥

स्नेहगुणो व्रजयोषितामपर एव भवतिस्म ।
निर्गुणोऽपि कृष्णो न यं, भोक्तुं शक्नोतिस्म ॥ २ ॥

मानसशिखावलोऽपि, धन्यो व्रजहरिणीदृशाम् ।
नाऽमोदत च कुतोऽपि, यो हि कृष्णमेघं विना ॥ ३ ॥

श्रुतिकलशौ व्रजयोषितां, कृष्णकथारस एव ।
विशतिस्माऽन्यो पूरितः, कथमपि नाऽविशदेव ॥ ४ ॥

व्रजवनितानामेव, रसकुशला रसनाऽपि, या ।
कृष्णनामरसमेव, रसमपरं त्यक्त्वाऽभजत् ॥ ५ ॥

हृदयं गोकुलयोषितां, रक्तं यद् भवतिस्म ।
तत् कृष्णं धृत्वाऽप्यहो, रागं न त्यजतिस्म ॥ ६ ॥

*शुभ्रं कुमुदमिवाऽऽति, हृदयमहो व्रजयोषिताम् ।
पूर्वमिव स्माऽऽभाति, प्रविश्याऽपि कृष्णं कमपि ॥ ७ ॥

चक्षूरागो व्रजभुवां, स्त्रीणामपर इवैव ।
विश्वं ताः समलोकयन, कृष्णं येन सदैव ॥ ८ ॥

* काजरी की कोठरी में पैठि हैं जो एक बार, काजरी की रेख एक लागि हैं पै लागि है—एतद्विरुद्धमिदम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# वैद्यकौस्तुभाख्यम् चित्रकाव्यम्

## ( नवोपलब्धस्य चित्रकाव्यस्य परिचयः )

लेखकः-पं० भद्रदत्तशर्मा शास्त्री, वै० भू० कासगंज

श्रीभागीरथी-दक्षिणतटे (एटा-मण्डले) प्राचीनतमं तीर्थं 'सूकरक्षेत्रम्' (सोरमं नाम नगरम्) भारते प्रसिद्धम्। यत्र वराहरूपेण भगवता जगदीश्वरेण पृथिव्युद्धरणं कृतम्।

यत्राऽर्बुदगिरेः समागत्योग्रवीर्येण महीभुजा श्रीहारीतदेवेन (माण्डव्येन) गङ्गातीरे बहूनि दिनानि केवलं चुलुकमात्रं जान्हवीजलं पीत्वा तप्तं तपः। तेन भगवतो ब्रह्मणः सकाशाद्वरं 'चौलुक्य' पदञ्च प्राप्तम्। स एव नृपतिः प्रथमश्चालुक्योऽभूदग्नि-वंशीयः। चौलुक्यसन्ततिरेव सोरम-निवासहेतुनाऽन्येषु प्रदेशेषु नृभाषायां 'सोरमकी' सोरंकी सोलंकीति ख्यातिं गता। पुनः सा गङ्गातटस्थ—'बघेला' ग्राम-निवासात् 'बघेला' वा बाघेल' नाम्ना प्रसिद्धा जाता। आद्यचौलुक्यहारीतदेवस्याद्यापि सूकरक्षेत्रस्य दक्षिणदिग्विभागे प्रसिद्धां चुलुका (चुलुकिया) नाम्ना तपोभूमिः। सूकरक्षेत्रस्योत्तरे गङ्गातीरे प्रथितो 'बघेला' नामको ग्रामः। चौलुक्याः (चालुक्याः सोरंक्यः क्षत्रियाः भारतस्य सर्वेषु भागेषु विद्यन्ते

श्रीहारीतदेवचौलुक्य—पुत्रेण श्रीवेनचक्रवर्ति भूपेन सूकरक्षेत्रे ( सोरमे ) दृढाश्म दुर्गं स्थापि विशालम्। दृश्यन्तेऽद्यापि तस्य भग्नावशे प्राकारश्च।

तदीशानकोणे शिलाखण्डनिर्मितश्चित्रचित्रि मतिसुन्दरं श्रीसीतारामममन्दिरम्। तच्छिलालेखे ङ्कितमेवम् "बदायूँ-मण्डलान्तर्गतकौन्तहाग्रा वासिना गौडविप्रकुलोद्भूतेन श्रीगाङ्गेयसूनु कोल्हूकेन पञ्चवेदहंसैर्मिते १२४५ विक्रमवत्स कृतस्तस्योपचारः (जीर्णोद्धारः)।

सिकन्दरलोदी—शासनकाले यवनैः खण्डि श्रीसीताराममन्दिरं श्रीमद्वराहमन्दिरञ्च। सीताराममन्दिरे वसुराम ३८ परिमिताः सं प्राचीनाः शिलालेखाः। प्राचीनरणक्षेत्रेषु कु

---

चित्रं गोकुलकन्यका-मुखतामरसविभाऽपि।
प्रीता प्रकटे व्रजविधौ, भीता पिहिते चाऽपि ॥ ९ ॥
अहो, कृष्णविरहाब्धि रधि--व्रजवनितं पर एव।
प्रकटे शुष्यति व्रजविधौ, पिहिते पुष्यत्येव ॥ १० ॥
जयन्ति हरिणीदृशो व्रजभुवो धृतेर्मूर्तयो—
दुरर्घपतिपुत्रकस्वजनगेहमोहत्यजः ।
पयोदसुभगच्छवावनिशमेव यासामभून्
मुनीन्द्रगणसंस्तुतो मुररिपौ प्रधानो रसः ॥ ११ ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



तुल्या सूकरक्षेत्रस्यापि गणना। श्रीमद्वाराहपुराणे वर्णितमस्य माहात्म्यम् । कथितमिदम् काशीव मुक्तिधाम।

अत्र वहवो दिग्विजयिनो राजानस्तथानेके विविधविद्यापारंगता विद्वान्सः श्रीगोस्वामितुलसीदास-नन्ददास-पद्मनाभ--चतुर्वेद-मुरलीधरकृष्णदास प्रभृतयो महाकवयः कवयश्चाप्यभूवन् ।

तच्छूकरक्षेत्र—वासिना सनाढ्यवंशोद्भवेन भिषगाचार्येण रामभक्तेन महाकविना श्रीमेवाराम मिश्रेण "वैद्यकौस्तुभ" नामाऽयं ग्रन्थो विरचित इति ग्रन्थसमाप्तौ ८७—८८ श्लोकाभ्यामवगम्यते ।यथा—

"श्रीमेवाराममिश्रेण शूकरक्षेत्रवासिना ।
सतां प्रीत्यै चित्रकाव्यः कृतोऽयं वैद्यकौस्तुभः ॥८७॥
श्रीवैद्यकौस्तुभमनेकविधैः सुपद्यैः
शृंगारकाव्यरसराजिविराजितैश्च ।
वृद्धत्रयीमतयुतैर्ग्रथितं विचित्रं
काव्यं पठन्तु सुधियः परमादरेण ॥ ८८॥

अस्मिन् ग्रन्थे षोडशसर्गेषु ज्वरादिरोगाणां निदानं चिकित्सा च संक्षेपतः प्रायशः स्वल्पायाससाध्यैरनुभूतप्रायैश्च प्रयोगैर्वर्णिता । अस्य मुख्यं वैशिष्ट्यं वैचित्र्यं तु नानाविधशब्दालङ्कारालंकृतेषु विविधवृत्तोपनिबद्धेषु ललितपदावलीमनोहरेषु पद्येषु विद्यते । अतएव ग्रन्थकर्त्रा प्रयुक्तं चित्रकाव्यमिति एतद्ग्रन्थविशेषणं संगच्छते । अस्य निर्माणं प्रायेण शतत्रयवर्षेभ्यः पूर्वमेव आसीत् इति कतिपयादर्शपुस्तकानां जीर्णदशावलोकनेनाऽनुमीयते । काव्येऽस्मिन्महीनवनयनेन्दु १२९१ परिमितानि सन्ति पद्यानि । अस्यैव कतिपयपद्यानि दिग्दृष्ट्याऽधः प्रदर्श्यन्ते ।

## इष्टदेव-वन्दना

लक्ष्मीपतिं कलितहासविलासलीलं सीतां प्रति प्रतिदिनं प्रमदोत्तमाङ्गीम् ।
नत्वा करोमि चरकादिमुनीश्वराणां श्रीवैद्यकौस्तुभमनेकविधीन्विदित्वा ॥ १ ॥

## गुरुवन्दना ( बहिर्लापिका )

हस्ते वयो [1]ज्ञानकरं किमस्ति रूपं लकारस्य लिटः [2]किमाद्यम् ।
[3]कस्मै ददौ दैत्यपतिश्च भूमिमाचक्ष्व कस्मै[4] गुरवे नमोऽस्तु ॥ २ ॥

## अन्तर्लापिका

आमन्त्रयोरगमहिश्च दधाति कं वा विश्वौषधिं कथय किं रचयन्ति मल्लाः ।
एतद्विमृश्य वद वारिजचारुवक्त्रे किं श्लेष्महारि मदकारि च नागरङ्गम ॥ ३ ॥

---

१. वयोज्ञानकरम् 'लक्ष्म' चिन्हं लक्ष्म च लक्षणम इत्यमरः । २. लिटः किमाद्यम् 'णल्', परस्मैपदानां णलतुसुस्थलथुसणल्वमाः । ३. कस्मै ददौ 'आय' वासुदेवाय, वामनाय । अकारो वासुदेवः स्यात इत्येकाक्षरीकोशः । दैत्यपतिः 'बलिः' ४. कस्मै गुरवे 'लक्ष्मणाय गुरवे'।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## रोगाऽरोगलक्षणम्

यदा बलमतीवाऽस्ति स्यात्तदाऽरोगलक्षणम् ।
यदाऽबलमतीवाऽस्ति स्यात्तदा रोगलक्षणम् ॥

## वैद्यलक्षणम्

वैद्यो निदानादिनिघण्टुवेत्ता क्रियापरो धीरधरो यशस्वी ।
विचक्षणो विष्णुपदारविन्दस्मृतिर्दयावाननघः सुशीलः ॥
द्रव्यसाद्रोगिणं कुर्याल्ललने स भिषग्वरः ।
वशीकरोति भर्तारं स्वाधीनपतिका यथा ॥

## वातज्वरे

चन्द्रांशुद्युतिरदनच्छदप्रकाशे ह्रीमन्दस्मितकृतयूथिकाविकाशे ।
सौवर्णस्थलविलसद्विशालभाले कालिङ्गं शृतमनिलज्वरापहं स्यात् ॥

## पित्तज्वरे

अयि पित्तभवं हरते शिशिरः सहिमो[1] जलजानि यथा शिशिरः[2] ।
हरिणेव मधोर्निरणाशि शिरः क्वथितो जलरेणुयुतः शिशिरः[3] ।
अयि पर्पटकः क्वथितः सजलः[4] शृणु पित्तजमाशु हरेत् सजलः[5] ।
वसुधानलमत्ति यथा सजलः[6] प्रमदे यदि वा सहिमः सजलः[7] ॥

## षडङ्गक्वाथः

शिशिरौषधिवारिदरेणुकृतो ज्वरदाहविलापतृपापहरः ।
प्रमदे रविपादपमत्ति यथा सजलः सजलः सजलः सजलः ॥

## कामज्वरे

अयि जलैर्जलजैर्व्यजनैर्जनैर्जहि वयः प्रमितैरतनुज्वरम् ।
अलिरवैः शुककोकिलकूजितैः शशिकरैर्मधुरैः सकलैः कलैः ॥
शशिकला च शशी शिशिरः शुभा प्रियतमा नलिनी वनकेलयः ।
अपनयन्त्यनलं नलदादयः समलया मलयाचलमारुतः ॥

## कमलबद्ध, हारबद्ध, कपाटबद्ध, गोमूत्रिकाश्वगतिः

न मानसं नयानघे नदीं नवीनमानदे—
न कं न केन किं न वा नभेन भानलानदन् ॥

---

१. सचन्दनमुशीरमित्यर्थः । २. शिशिर ऋतुः । ३. शीतलः । ४. सुगन्धवालासहितः । ५. सोशीरः । ६. वर्षाकालः । ७. सतोयः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



एकाक्षरपादः—भा भा भोभी भभो भू भू, शशीशांशोऽशिशुः शिशुः ।
ने ना नां ननु ना नू नो, मामिमं मामिमामिमैः ॥

द्व्यक्षर पद्यम्—किलकोककलाकेलि, कलिके केकिकालके ।
कोलाल्लोलेऽलिकल्लोले,, लालालुक्कोकिलाकले ॥
बलाबलाबलालंबै बलालम्बि बलावलिः ।
बालेऽबलेऽलिबाले वा बाले बालेऽवलेऽवले ॥

त्र्यक्षरं (कामलायां)—कमलकोमलमल्लिकमालिका लकललामकुलालिकुलाकुले ।
मुकुलिकाकालिकामिकमूलिके कमिककामलिके कमलामलम् ॥

अर्थद्वयवाची—बलकान्तिकरी स्वच्छा सुवर्णकुसुमप्रभा ।
शुभस्थानात्समायाता सुरसेयं नवाबला ॥
लक्ष्मणासक्तमनस ऋद्धिवृद्धिप्रवर्तिनः ।
न केचिद्बलवन्तस्यू रामादशनसेविनः ॥

अर्थत्रयवाची—दुरालभाया सपयोधराया सुधाधिका लोकशिवादिकायाः ।
मध्वर्चिताया भजनं मृगाक्षि निहन्ति बाले विषमेषुपीडाम् ॥

अर्थचतुष्कवाची—विधिना सह देविका पदं दधति प्रेयसि ये तु मौलिना ।
विषमेषुभवापदां पदं न भवन्त्येव कदाचन प्रिये ॥
सेविता दृढभक्तेन प्रसन्नाम्बुदलोचने ।
भ्रमप्रदायिनं पुंसा कामं हरति माधवी ॥

द्विचरणं पद्यम्—पीतद्युते श्रीशुकनाशिकाया माध्व्योप्रया विश्वमुदो मुमोह ।
पीतद्युते श्री शुकनाशिकाया मध्व्योप्रया विश्वमुदो मुमोह ॥

त्रिचरणम्—पूर्वं यथा स्याज्जलजस्तनद्वे लज्जावती श्री प्रमदारजोभिः ।
तथातिसारः कमलाम्बुवत्सैः लज्जावती श्री प्रमदारजोभिः ॥

हरिहरात्मको द्व्यर्थकः—अहीनमुकुटालम्बी भवानीकरसंवहन् ।
विग्रहापनतानङ्गः स देवो ज्वरनाशकः ॥

सिंहावलोकनम्—प्रभञ्जनं पौष्करजं चलेक्षणे क्षणेन हन्त्यत्र शृतं सुधाकले ।
कलेवरश्रीजितलोलवैद्युतिः द्युतिप्रकाशे च कफप्रभञ्जनम् ॥

चतुःपादयमकः—बलाबला पयः खण्डं शिशिरं शिशिरं पयः ।
बलाबला पयः खण्डं शिशिरं शिशिरं पयः ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



चन्द्रमाश्चन्द्रमोकान्ते कामं कामं ददाति वै ।
कोकिला कोकिलाबम्ब शिशिरं शिशिरस्तथा ॥
कान्तेवरी वरीवर्ति मुशल्यतिबलाबला ।
सक्षुरं गोक्षुरं क्षीरं बाले बालेऽबलेऽबले ॥

गोमूत्रिककाबद्धः—हीयते न कलंभासां वासिनां पाकसाचिनाम् ।
क्षीयते न बलं पुसां ससितापायसाशिनाम् ॥

(अर्थद्वयवाची)—ये नराश्च श्रिया हीना मदाघूर्णितलोचने ।
ते भजन्त्वचिरं कामं वाराहीं बलकान्तिदाम् ॥

प्रश्नोत्तरम्—काबला कुरुते रोगं केनाजीर्णं प्रशाम्यति ।
को मलः पच्यते शीघ्रं त्रिदोषे कस्य लुण्ठनम् ॥

लोमानुलोमपादः—क्षीराशीववशीराक्षी राजतेस्यस्य ते जरा ।
शीतेतेररतेतेशी वस्यरस्वस्त्ररस्य वः ॥

लोमप्रतिलोमेन श्लोकद्वयम्—तव नामसुधीनाना भ्रूसुताललितानघ ।
भास्वतासिवयं तात नते तेनु भजामहे ॥
हेमजाभनुते तेन तंतायंवसितास्वभा ।
घनताललितासुभ्रू नानाधीसुमनावत ॥

राजयक्ष्माधिकारे (प्रार्थना)—यत्पादपद्ममकरन्दसुधाधिपानात् सर्वे क्षयाः परिभवन्त्यरिवन्मुरारेः ।
शोषोऽपि शुष्यति हि तुष्यति चित्तवृत्तिः स्याद्वा उरःक्षत उरःक्षत ईशमीडे ॥

अतीसाराधिकारे— भो भो भजन्तु पुरुषा भवभीतिभीताः श्रीरामचन्द्रचरणाम्बुरुहे अघघ्ने ।
यद्वा रुजा परिभवीकृतचारुदेहारतेनैव सागरभवेन कृतौषधानि ॥

तृतीयकज्वरे त्रिचरणम्—असमयं जयतीन्द्र इव प्रिये घनसुधाहिमवारिसुधान्यकैः ।
समधु विश्वसितैर्हि तृतीयकं घनसुधाहिमवारि सुधान्यकैः ॥

रक्तातिसारे— किमर्थं नरोऽयं नरीनर्त्ति भद्रे चलाक्षि प्रलापं चरीकर्ति किं वा ।
जरीहर्ति रक्तातिसारं सदुग्धं वरीवल्ककल्कं वरीवर्ति यत्र ॥

सितोपलादि चूर्णम्— सत्सितावंशजाता कणैलात्वचा मर्द्ध मर्द्ध तदर्द्धं तदर्द्धं क्रमात् ।
तत्कृत पूर्णचूर्णं तु तूर्णं जयेत् क्षीणरेतः क्षतक्षुद्रयक्ष्मोद्भवम् ॥

रसाधिकारे त्रिचरणम्— भवाम्बुधितितीर्षूणां हरिरेव तु पारदः ।
रोगग्रस्त-शरीराणां हरिरेव तु पारदः ॥

---

❀ शास्त्रिमहोदयेन पद्यानामेषामर्थो न सूचितष्टिप्पण्याम् । प्रकाशक महोदयानुरोधाद्वयमपि विवर प्रकाशयामः । क्षम्यतां विद्वद्भिः ।
—सम्पादक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# — द्वौ धूर्तौ —

ले० श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरम् ।

प्रथमो धूर्तः—द्वितीयस्य धूर्तस्य हस्ते स्थितं रूप्यकं सपरिहासमग्रहीत् ।

द्वितीयो धूर्तः—तदा प्रथममवादीत्—रे मम रूप्यकं त्वमादाय किमर्थं स्वकरे धारयसीति ।

प्रथमः— यद्यहं 'विद्यमानमपि रूप्यकमिदं मम हस्ते नास्ती'ति साधयेयं तर्हि रूप्यकमिदं मामकमेव भवेत् ।

द्वितीयः— स्वीकृतं मया तावद् भवद्वचः । परमेतत्कथं भवितुमर्हति—यत्प्रत्यक्षं तव करे रूप्यकं मम वर्तत एव ?

प्रथमः— ( तद्रूप्यकं स्वस्य दक्षिणे हस्ते कृत्वा ) पश्य, मम वामः करो रिक्तोऽस्ति न वा ?

द्वितीयः— आम्, वामस्ते हस्तो रिक्त एव विद्यते ।

प्रथमः— (पुना रूप्यकं स्वस्य वामे हस्ते कृत्वा ) विलोकय, मम दक्षिणः करो रिक्तोऽस्ति न वा ?

द्वितीयः— ओम्, दक्षिणोऽपि तव पाणिर्नूनं रिक्त एव ।

प्रथमः— यद्येवं 'मम वामो दक्षिणश्च उभावपि हस्तौ रिक्तौ वर्तेते' तर्हि भवन्मुखेनैवेदं सिद्धं यत् रूप्यकं मम हस्ते नास्तीति । अतश्चेदं रूप्यकं ममैव जातम् ।

द्वितीयः— ( ध्यानमुद्रया क्षणं विचिन्त्य ) रे महाशय ! एतत्तु अहमपि कर्तुं शक्नोमि । नात्र बुद्धिवैभवस्य कापि वर्तते आवश्यकता । प्रयच्छ मे रूप्यम् । यथा त्वं साधितवानसि तथाहमपि साधयामि ।

प्रथमः— रूप्यकं दत्वा—साधय तावदित्युक्तवान् । यथा पूर्वं प्रथमधूर्तेनानुष्ठितं तथैवायं द्वितीयोऽपि कर्तुं प्रावर्तत । तथा हि—

द्वितीयः— पश्य, (रूप्यकं तत् स्वस्य दक्षिणे हस्ते कृत्वा) मम वामः करो रिक्तोस्ति न वा ?

प्रथमः— रिक्त एव तव वामो हस्तः ।

द्वितीयः— ( पुना रूप्यकं वामे हस्ते कृत्वा ) मम दक्षिणो हस्तो रिक्तोऽस्ति न वा ?

प्रथमः— रिक्तोऽस्ति तव दक्षिणः पाणिः ।

द्वितीयः— एवं चेन्मम उभावपि हस्तौ रिक्तौ वर्तेते तर्हि मम द्वयोरपि करयो रूप्यकं नास्तीति सिद्धमेव ।

प्रथमः— ओम्, समीचीनं भणसि—इत्युक्त्वैव सहसा द्वितीयस्य धूर्तस्य करे स्थितं तद्रूप्यकं पुनरपहृतवान् सः ।

द्वितीयः— भो भोः किमेवं कर्तुं प्रवृत्तोऽसि ! मम रूप्यकं किमादत्तवानसि ।

प्रथमः— इदानीमेव त्वया चैतत्साधितं यन्ममोभावपि करौ रिक्तौ स्तः । तदा रिक्ताभ्यां तव हस्ताभ्यां मया वा अन्येन केनापि किं ग्रहीतुं शक्यते—इत्यभिधाय तद्रूप्यकं न परावर्तितवान् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# ★ पद्मिनी देवी ★

( ले० महोपाध्याय पं०वासुदेवशास्त्री बागेवाडीकर, साहित्याचार्यः,काव्य-वेद-तर्क-तीर्थ सोलापुर )

पुरा खलु सिंहलद्वीपे चोहानकुलसंभवो हम्मीराख्यो वीरपुङ्गवो बभूव । तस्याशेषलक्षणसम्पन्ना भुवि दिवि चापि दुर्लभलावण्या सकललोकाभिनन्दित सौन्दर्या पद्मिनी नामान्दर्थनाम्नी नन्दिनी समजायत । उदयपुराधिपानां स्वदेशाभिमानिनामग्रणीनां मत्ते-भरिपुकेसरिणां शिसोदियानां कुले दिव्ये लब्धजन्मना महाराजेन क्षत्रियशार्दूलेन समं तस्याः परिणयो जातः। तदा मरुदेशस्य राजसिंहासने भीमसिंहस्य भ्रातृव्यो बालराजो लक्ष्मणसिंहोऽधिष्ठितवान् । सकललोकाति-शायिना सौन्दर्येण गुणगणेन च प्रसिद्धिमापन्नया तया पद्मिन्या धर्मपत्न्या समागमेन निशया निशाकर इव समधिकतरं शुशुभे भीमः । अस्मिन्नेव मरुप्रदेशे चित्रैः कूटैः शोभितो वनराजिभिर्विराजितो विशालो दुर्गश्चित्रदुर्ग असीत् । तस्याधित्यकायामभेद्यैः प्राकारैः परिवेष्टितं नैकसहस्रवीराधिष्ठितं रमणीयं नगरमवर्तत । इदमेवाधिवसन् भीमसिंहो बालराजतया निखिलं मरुदेशं स्वभुजबलेन नयेन शशास ।

अथ अशेषस्य भारतस्य स्वातन्त्र्यापहरणे प्रथममेव बद्धपरिकरो देहलीनगराधिपतिर्महाभिनिवेशी यवन-पतिरनेनाश्रुतपूर्वेण दिव्यतमेनानुपमलावण्येन पद्मिन्याः समाकृष्टचेताः शूरभूयिष्ठं मरुदेशं विजिगीषुः सम-द्यतो बभूव । अल्लाहोदीनस्य विशाला सेना चित्रदुर्गं सर्वतोऽरुणत् । अनेकैरप्यहोभिर्यदा स स्वाभिलाष-परिपूर्तिं लेशतोऽपि नापश्यत् तदा स एवमुद्घोषयत्— नाहं दुर्गाभिलाषी । परं केवलं पद्मिनीं कामये । सा हस्तगता भविष्यति चेत् सपद्येव स्वनगरं मया प्रतिनिवर्तिष्यते" इति । 'एकस्या राजाङ्गनायाः कृते एतावान् महावीरसंक्षयो न श्रेयान्' इति विचारेण तेषु प्रतियोधेषु नूनमुपजापो भवेत् । तेन हि स्वकार्यं सुकरं स्यादिति तस्यास्मिन् समुद्घोषणे मतिरासीत् । परं 'समरे वरं मरणं न तु कस्या अपि कुलाङ्गनायाः शत्रवे समर्पणम्" इति । निश्चित्यानेनावमानवचनेन समधिकतरोषजातक्षोभाः सर्वे ते क्षत्रियशार्दूलाः सिंहो जम्बूकजातमिव महता क्रोधावेशेन तत्सेनासमूह-मभिपेतुः । अस्मिन्नभियोगे बहवो यवनवीरा यमालय-मभिगताः । यवनसेनानायकोऽपि जीवितसंशये निपतितः । "भारतीयाः सरलस्वभावाः कपटेन वञ्चयितुं सुशकाः । अतः अस्मिन् संग्रामे कपटेन विना केवलेन वीर्येण स्वकार्यसिद्धिर्नैव सम्पद्यते" इति मनसि विचार्य कूटरचनां चायोज्य स दुष्टाशयः "एकवारं यदि पद्मिनीदेव्याः सन्दर्शनं स्यात् ततः ससैन्यः प्रतिनिवर्तेय" इति सन्देशं राज्ञे भीमसिंहाय प्राहिणोत् । अनेन सन्देशेनापि राजपूतवीरा भृशं प्रक्षुब्धतां गताः । परं भीमसिंहः पद्मिनीदेवी चापि स्वयं तान् सान्त्वयामासतुः । 'येन वीराणां महतां प्राण-हानिः परिहर्तुं शक्या स्यात् स उपायोऽवश्यं प्रथमं चिन्तनीयः' । इति । अन्ततः सर्वेषां विचारानुरोधात् 'प्रत्यक्षतया पद्मिनीदेव्याः सन्दर्शनं सुतरामशक्यम्। तथापि दर्पणे देव्याः प्रतिबिम्बं प्रत्यक्षी करोतु भवान्' इति तस्मै वाचिकं विसृष्टम् । इदं सन्देशवचनं वञ्च-नापटुरल्लाहोदीनः सानंदमनुमेने । तदनु केसरिनिकुञ्जे जम्बूक इवायं यवनोऽतिथिर्भूत्वा कतिपयैः सेवकैः सह निःशङ्कं निःशस्त्रश्चित्रदुर्गं प्रविष्टः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



'मानधनानां राजपूतानां राज्यश्रियं जीवितसर्वस्वं च श्रीरत्नं जिहीर्षुरल्लाउद्दीनः शत्रूणामपि विश्वास-भङ्गं महापापं तर्क मन्यमानानां भारतानां क्षात्रकुलावतं-सानामातिथ्यं सप्रेमकृतं स्वीकृत्य नाम मुकुरे पद्मिनी देव्याः प्रतिभानं विलोकयामास । तेनाद्वितीयेनादृष्ट-पूर्वेण निरतिशयसौन्दर्यदर्शनेन स क्षणमिव विलक्षो बभूव । गृहीतातिथिसत्कारः सम्पादितपद्मिनीप्रति-मादर्शनो विवृद्धकामः स यवननृपतिस्ततः प्रतस्थे । राजा भीमोऽपि तमभ्यागतं संमानयितुं दुर्गद्वारमनु-गतः । तदा स म्लेच्छः संग्रामनिमित्तं स्वात्मानं सापराधं तस्मै निवेदयामास भूयो भूयः क्षमां च ययाचे । अनेन प्रश्रयेण वञ्चितः सुस्वभावो भीमो दुर्गद्वाराद् बहिः किञ्चिदन्तरं यावद् याति तावद् ग्राहितसंज्ञैः प्रच्छन्नैः शस्त्रधारिभिर्यवनसैनिकैः सहसाऽऽविर्भूतैः स भीमो निरुद्धः । ततोऽशस्त्रः स सानुचरो निगृहीतो यवनाधिपसेनसन्निवेशं प्रापितः ।

'अथ मम हस्तगतायामेव पद्मिन्यां भीमो मोक्ष्यते' इति तेन घोषयाञ्चक्रे । एतन्निशम्य सर्वेऽपि क्षत्रियवीराः क्रोधोद्धतहृदयाः स्वदेहदानेनापि स्वाधिपं मोचयितुम-हमहमिकया प्रवृत्ताः । तदा विदितवृत्तान्ता देवी क्षात्र-कुलजा पद्मिन्युद्घोषयामास—"अहं महाराजं भीम-विक्रमं भीमसिंहं मोचयितुं स्वयमेव यवनसेनासन्नि-वेशं प्रवेष्टुमागच्छामि" इति । एतेन सर्वे राजपूताः विस्मयापन्नाः । हा धिक् कष्टम् । इति चोचुः । ततः सा स्वपितृव्येन गोरवीरेण कनीयसा भ्रात्रा यूना वीरेण बादलेन च रहसि मन्त्रयाञ्चक्रे । यवनपतये च संदेशं विससर्ज । "राजन्, अहं राजपूतानां राज्ञी पद्मिनी स्वपतिमोचनाय समयपूर्वं त्वया सन्धातुकामा । तथा-प्यभिजनवती शतशः स्वदासीजनैः सखीजनैश्चान्दो-लिकाधिष्ठितैस्त्वां स्वयमेवोपतिष्ठामि । सैनिकजनो-पद्रवादेता अबला बिभ्यति खलु । तत्प्रत्ययार्थं चित्र-दुर्गमुपरुन्धाना सेना सुदूरं प्रतिसंह्रियताम् । मम सखीषु समागतासु काश्चिन्मां तव सन्निवेशं प्रापय्य प्रतिनिवर्तयिष्यन्ते । इतराश्च मया सह तव राजधानीं प्रस्थास्यन्ते । तत्र प्रविष्टाऽहं प्रथमं स्वभर्तुश्चरमदर्शनं गृहीत्वा ततस्तव शिविरं प्रवेक्ष्यामि । तथा च तव पुरुषास्तथा निरोद्धव्याः यथा न केऽपि मां मम सखीजनं च उपरोद्धुं त्रासयितुं च प्रवर्तेरन् । यद्येतत् सर्वं तेऽनुमतं ततः सुखेन मयाऽनुष्ठीयते" इति ।

अनेन प्रेष्ठेनाशक्येनापि शक्यतां प्राप्तेन संदेशेन श्रवणसरणिमागतेन प्रमोदसागरे मज्जनोन्मज्जनमनु-बभूव स दुर्मतिः । स्वार्थोपहतविवेकः स मन्दधीर्नै-तच्चिन्तयामास यद् भारतकुलाङ्गना अङ्गारं सुखं प्रवि-शन्ति, पतिं, पुत्रं सर्वस्वमपि सहजं परित्यजन्ति, न तु पातिव्रत्यम् । कामान्धेन तेनानुमते तस्मिन् सर्वस्मि-न्नपि समये, तथा चानुष्ठिते, निश्चिते दिवसे दुर्गमात् दुर्गात् तस्मात् सप्तशतं शिबिका अवरुरुहुः, यवन-सेनासन्निवेशं विविशुः । ततः पद्मिनीदेव्या राज्ञो भीमसिंहस्य च पश्चिमं सन्दर्शनमनुजज्ञे यवनपतिना । तदनुरोधात् तयोर्दर्शनार्थं निश्चितं पटमण्डपं सा प्रविष्टाऽवगुण्ठनवती । बद्धमुक्तो भीमोऽपि तत्र प्रवे-शितः । तं परितः समवतीर्णा आन्दोलिका आसन् । राजपुरुषास्तु सुदूरं स्थिताः । केनचित्कालेन काश्चिद् दास्य आन्दोलिकाभिर्दुर्गमार्गं प्रतिनिवृत्ताः । न कोऽपि ताः प्रतिरुरोध । समीपस्थायामेवोपकार्यायां यवननृपः पद्मिन्या आगमनं प्रतीक्षमाणोऽतिष्ठत् । सुचिरेणापि कालेन यदा पद्मिनी न समागता तदा स प्रबलं संशय-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सधिरूढः। यथा यथा कालोऽतिक्रमते तथा तथा सोऽधिकतरोपजातसंशयः क्रोधाविष्टः सञ्जातः। अन्ततः स्वनिलयान्निर्ययौ। अत्रान्तरे निर्गतास्वान्दोलिकास्वेव केनाप्यलक्षितो भीमसिंहो पद्मिन्या देव्या सह सुदूरं निर्गत्य पूर्वनियोजितं सज्जं जवनशीलं वाजिनमारुह्य दुर्गं प्रविष्टः।

आन्दोलिकासु न काऽपि दासी न चापि सखी आसीत्। सर्वेऽप्येते वीरोत्तमा राजपूताः। शिविकाश्चापि शस्त्रपूर्णाः उपकार्यातो निर्गतमात्रं राजानं राजपुरुषांश्च सर्वेऽप्येते सहसाऽभ्यपतन्। अचिरादेव रिपुसेनाऽपि तत्र समुपस्थिता। तत्रोभयोः पक्षयोस्तुमुलं जन्यं सञ्जज्ञे। तस्मिन्नाजौ वीराणां राजपूतानां सहस्राणि देहपातं यावद् युयुधिरे। अनया वञ्चनया वञ्चितः परवञ्चनापटुः स दुर्मेधा मदान्धया स्वसेनया राजपूतशूरान् संहरन् दुर्गद्वारं प्राप्तः। तत्र गोरबादलौ पितृव्यभ्रातृव्यौ स्वदेशरक्षणार्थम् अगणितस्वप्राणत्राणौ अधिकबलेनापि यवनबलेन चिरं प्रयुध्य प्रतिचक्रतुः। एतयोर्द्वयोः शूरयोर्बलेन हतावशिष्टया सेनया सह विषण्णमना यवनाधिपो यथागतो निववृते। परमस्मिन् घस्मरे संगरे वीरश्रेष्ठो गोरो हेतिहतिभिर्हतः स्वर्लोकं प्रविष्टः। तस्य देवी वीराङ्गनाऽऽत्मनः पत्युः प्रज्वलितां चितां प्रविश्य सस्मितं तेनैव सह दिवं प्रविवेश।

अस्मिन् रणप्रसङ्गे विजयिनोऽपि राजपूता विनष्टप्रबलयोधा आसन्। प्रतिनिवृत्तोऽपि यवनाधिपो न चित्रदुर्गस्य न वापि पद्मिन्या अभिलाषां जहौ। अचिरेणैव अल्लाउद्दीनो बलिष्ठया सेनया पुनश्चित्रदुर्गमभीयाय। स च समीपवर्तिनं गिरिप्रदेशमात्मसात्कृत्वा परिखावलयेन वेष्टितं विधाय भूयश्चित्रदुर्गं न्यरुणत्। प्रबला अपि अल्पबलाः वीरपुङ्गवा राजपूताः परित्यक्तविग्रहाभिलाषा विग्रहाभिलाषिणः साग्रहाः स्वदेशधर्मरक्षणार्थं परदेशधर्मविध्वंसकेनापि अधिकबलेन रिपुणा सुचिरं युयुधिरे। यदा च ते जयाशामशक्याममन्यन्त तदा सर्वात्मनाऽभियोक्तुं निरचिन्वन्। स्वजातिधर्ममनुसृत्य ललनाहवनाय प्रववृतिरे। तत्रैवान्तःपुरस्याधस्ताद् गहनं वर्तमानं गह्वरं शालेन्धनैः परिपूर्य वह्निना प्रज्वाल्य तत्रत्याः सर्वा आबालवृद्धा वीराङ्गनाः पद्मिनीदेव्यधिष्ठिताः समेत्य परस्परं सौभाग्यवायनादीनि वितीर्य संपूज्य चाग्निं सकलं बान्धववर्गं सपुत्रपतिमामन्त्र्य मुखेन च वीरगीतं गायन्त्यः प्रज्वलिते तस्मिन् सर्वेषां पश्यतां सोत्साहं सानन्दं विविशुः। ममत्वं विषयाभिलाषः जीवनाशा च एतेषामेकैकमपि जन्तूनां जीवनप्रवृत्तये कल्पते किमुत समवायः। अस्मिन् दिव्यकर्मणि पातिव्रत्य देशभीतिः स्वातन्त्र्यनिष्ठा स्वधर्मनिरता च दुर्जयानपि देहरिपून् विजयन्ते। सकलान् स्वार्थान् तृणाय मन्यन्ते। पर्वतप्रायानपि सङ्कटान् लघूकुर्वते। इदं वीराङ्गनाहवनस्थानमद्यापि वह्निज्वालामुद्गिरति इत्याहुः। इदानीमपि न कोऽपि साहसिकस्तद् गह्वरं प्रवेष्टुं शक्नोति।

ततस्त्यक्तसर्वस्वापेक्षा जीवितनिरपेक्षा रणधुरंधरा धीरवीरा स्वासिधाराभिः सहस्रशोऽरीन् प्रेतपुरीं प्रवेशयन्तः स्वयं वीरनिधानं निधनमन्वभवन्। अमरावतीसमामसमां स्वां समृद्धिं शवसहस्रैश्छिन्नविच्छिन्नैर्विपरीतामिव दर्शयन्तीं विच्छिन्नामुच्छिन्नां शून्यां तां दग्धपुरीं प्रविश्य अल्लाउद्दीनः सर्वतः पद्मिनीं विलोकयितुं बभ्राम। परं तत्र न केवलं पद्मिनीं न कामपि क्षत्रियं न वापि वीरं जीवन्तं ददर्श। अहो भारतीयानां शीलापेक्षता !! सेयं भारतसंस्कृतिर्जगत्यतिशेते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भारतीयदर्शनसन्देशः

ले० पं० चन्द्रदेवशर्मा, रा० सं० वि० बेतिया, चम्पारन, बिहारः

[ अनुवृत्तम् ]

शमादिसम्पत्तिमुपेत्य सम्यग् ब्राह्मण्यमायाति मनस्तदेव ।।
शौर्यादिना क्षत्रियतामथापि कृष्यादिरुच्या किल वैश्यताञ्च ।।४५।।
शूद्रत्वमुद्भावयते तदेव भूयो जगत्यां परिचारसक्तम् ।।
विकासमासाद्य भवत्यभीरु संकुच्य भीरुत्वमुपैति भूयः ।।४६।।
सत्वं समापद्य सुरत्वमेति रजःप्रसक्त्या च मनुष्यतां तत ।।
तिर्यक्त्वमायाति तमः प्रसक्तं वैविध्यमेवं बिभृते तदेवम् ।।४७।।
कामादिदोषैरुपसंवृतं तद् दौरात्म्यमाविष्कुरुते जगत्याम् ।।
अपास्य तानेव गुणैरुपेतम् सौजन्ययोगं कुरुते हि लोकम् ।।४८।।
बोभूयते भुवि भवाय सुभव्यभावैः सम्भावितं भरति भूतिभिरद्भुतञ्च ।
भूतानि भूरिभिरभव्यगणैर्विभूय भूयोऽभवाय भवदत्यशुभैर्बिभर्ति ।।४९।।
विधातुमेवं जगतो भवाभवम् मनोहृषीकं समुदीरयत्यलम् ।।
लोकस्य यन्त्रं सततं हरिस्ततो गतो हृषीकेशपदाभिधेयताम् ।।५०।।
स्वांशं समावेश्य स सर्वसाक्षी भूतानि सञ्जीवयतेऽखिलान्हि ।।
ईष्टे प्रपञ्चं परितः स्वशक्त्या न तं विना किञ्चिदिहोज्जिहीत ।।५१।।
समग्रमैश्वर्यमुदीयमानं यदस्ति केलीषु निभाल्यमानम् ।।
सर्वं तदालम्बमवेयतेऽलम् तन्मूलमीशित्वमिहेश्वरेषु ।।५२।।
महेश्वरत्व च धनेश्वरत्वं सुरेश्वरत्वं च गणेश्वरत्वम् ।।
स एव नित्यं भरते विना त सर्वेश्वरोऽनीश्वरतामुपेयात् ।।५३।।
वीर्यं विवृद्धं विभवैकबीजम् ऋध्नोति येनाशु जनो जगत्याम् ।।
ग्लायत्यपूर्णं विधुरञ्च येन तदप्यलं वैष्णवमेति तेजः ।।५४।।
यशोनिधीनां परमावदातं यशो दिगन्तप्रसृतं महीयः ।।
यदस्ति तद्बीजगुणायनत्वात्स एव विष्णुर्यशसां निधानम् ।।५५।।
श्रीर्या समुद्भासितसर्वलोका कल्पेत यस्या जगती विशोका ।।
प्रेक्षालवेनाशु नितान्तमेव सापि स्वसत्तां धरते हि विष्णौ ।।५६।।

( क्रमशः )



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भारतीया क्रान्तिः क्रान्तिकारिणश्च

लेखकः—विद्याभूषणः पं० श्रीगणेशरामशर्मा ज्योतिषोपाध्यायः, विशारदः
हिन्दीसंस्कृताध्यापकः, श्रीराजेन्द्र-इन्टरमीजियट-कालेज, झालावाड़ (राजस्थान)

कासौ क्रान्तिः ? किं च तद्बीजमिति जिज्ञासायां प्रचलितराज्यशासनव्यवस्था-धर्मव्यवस्था-समाजव्यवस्थागतदोषपूर्णनियमानामामूलचूलम् युगपत्परिवर्तनं विधाय तत्स्थाने देशकालोपयोगिनां नवीनानां नियमानां प्रसह्य प्रवर्तनं नाम क्रान्तिरिति परिभाषितुमुचितं स्यात्। यद्यपि व्याकरणगतव्युत्पत्तिदृष्ट्या क्रांतिशब्दो गत्यर्थकात्क्रमुधातोर्भावे क्तिन्प्रत्यययोगाद्गमनपरिवर्तनार्थसूचकः प्रसिद्ध्यति परमाधुनिके जगति यूरोपादिराष्ट्रेषु जनानां सङ्घबद्धानां संघटितान्दोलनार्थे रूढिं गतस्तदर्थमेव प्रयुक्तो व्यवहृतश्चोपलभ्यते। पाश्चात्यदेशेषु Revolve इति गतिपरिवर्तनार्थकाद्धातोर्निष्पन्ना Revolution, Revolt, Move, Agitation इत्याद्याः शब्दाः क्रान्तिशब्दस्य पर्यायवाचकाः प्रयुज्यन्ते। अन्ताराष्ट्रियसम्पर्काद्भाषाविज्ञानगतकारणसमवायाचास्मद्देशेऽत्र भारतवर्षेऽप्ययं क्रान्तिशब्दो हिन्दीसंस्कृतबंगीयगुर्जरीमहाराष्ट्रियादिषु भाषासु नूनं सङ्घबद्धान्दोलनद्वारा परिवर्तनप्रगत्यर्थे रूढः। तदस्माभिरप्यत्र प्रकरणे क्रांतिशब्दो जनानां संघटितप्रयत्नै राजधर्मसमाजान्तर्भुक्तानामनुपयोगिनां नियमानां युगपत्परिवर्तनोद्योगान्दोलनार्थे प्रयुज्यते। अस्तु।

यदा च लोके परम्पराक्रमात् प्रचलिते धर्मे, समाजे, राजनीत्यां, साहित्ये च तदन्तर्गतनियमाः केवलं रूढिवादरूपमासाद्य जर्जरतां व्रजन्ति, यदा च ते गड्डरिकाप्रवाहन्यायाद्गतानुगतिकामनुव्रजन्तोऽन्धानुकरणाल्लोकजीवनव्यवस्थामक्षुण्णां रक्षितुं न पारयन्ति, यदा च ते सर्वसाधारणानां प्रजाजनानाम् राजशासनव्यवस्थां, धर्ममर्यादां, समाजस्थितिं च संरक्षितुं न प्रभवन्ति प्रत्युत सर्वथा दोषदुष्टा निरुपयोगिनश्च निरूप्यन्ते तदा तेषां परिवर्तनं नितरामावश्यकं जायते मानवसमुदायस्य श्रेयोऽभिरक्षणाय निःश्रेयसायाऽभ्युदाय योगक्षेमाय च। देशकालपात्रपरिस्थित्यनुरोधादेकपदे तीव्रगत्या सहसा परिवर्तनमगत्या कर्तुं या विवशताऽऽपतति तदेव क्रान्तेर्बीजम्। लोकसंघानां विराण्मनोमन्थनोत्थं क्रान्तेर्भात्रबीजमेव हि किलान्दोलनसङ्घर्षपरिवर्तनसृष्टिं विधत्ते।

समसामयिकानां प्रचलितानां धर्मसम्प्रदायगतानामनुपयोगिनां विधिनिषेधनियमसिद्धान्तानां संस्काराणामाचारविचाराणां धार्मिककर्मकाण्डक्रियाकलापसम्पादनपद्धतीनां च तत्कालं परिवर्तनाय लोकाः सुसङ्घटितैः प्रबलैः प्रयत्नैरुद्योगमान्दोलनं च यदा कुर्वन्ति तदासौ धर्मक्रान्तिर्निगद्यते। अथ च समाजे व्यक्तीनां चारित्र्यदौर्बल्य, द्वयक्तिवादप्राबल्यात्समापतितानां दोषाणां दूरीकरणाय, तत्स्थाने नव्यभव्योपकारकनियमसंस्थापनाय च समाजसदस्यैः क्रियमाणः परिवर्तनोद्योगः समाजक्रान्तिरित्यभिधीयते। लोकतन्त्रसंरक्षणेऽक्षमाणां राजशासनगतानां न्यायाधिकरणान्तर्भुक्तानां च निकृष्टानां नियमानां युगपत्परिवर्तनाय प्रवृत्ता या लोकप्रवृत्तिर्विरोधप्रदर्शनान्दोलनरूपा, सा राजक्रन्तिरित्युच्यते। राष्ट्रे प्रजाजनानां



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



स्वदेशीयभौतिकार्थसम्पत्तेः समानविभागाय वाणिज्यव्यवसायाधिकाराणां संरक्षणाय तत्तुल्यविभागाय चार्थतन्त्रनियमानां परिष्काराय वा कृतो यः सार्वजनीनोद्यमः, स एवार्थक्रान्तिः परिभाष्यते। एवमेव साहित्ये, दर्शने, विज्ञाने चापि तदन्तरापतितान् दोषान्निस्सार्य नवीनकाव्यकल्पनासृष्टिविचारप्रौढिप्रयोगोपयुक्तानां तत्तत्तत्वानां प्राणप्रतिष्ठार्थं कृतो मुद्यमः साहित्यक्रान्तिः, दर्शनक्रान्तिः (शास्त्रार्थक्रान्तिः) विज्ञानक्रान्तिश्चेति कथ्यते।

यद्यपि सत्यं त्रिकालाबाधितं शाश्वतिकं तत्वम् परं तत्प्राप्तिसाधनानि देशकालापेक्षया व्यक्तीनां रुचिभेदात्सिद्धान्ताश्रयभेदाच्च भिद्यन्ते। साधनानां विविधता न साध्यमुद्देश्यं मनागपि बाधते। शास्त्रेषु सत्यतत्वाप्तिसिद्धान्तनिरूपणप्रसङ्गेषु देशकालसङ्कीर्तनं कुलाचारगोत्राचारव्यवहरणं नामाचार्याः क्रान्तदर्शिनो मनीषिणो यदाहुस्तत्सर्वं साधनभेदेषु विद्यमानेष्वपि सत्सु माभूत्साध्ये सत्येऽन्यथाबोधो व्यक्तीनामिति हृदयात्ते "रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां, नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥" इति प्रतिपादयन्ति। सत्यप्येवं ते साध्यसिद्धौ साधनानां ग्रहणं वा त्यागं वा विधिनिषेधाभ्यामामनन्ति।

क्रान्तिवादिनो जनास्तत्कालं सहसाऽऽमूलचूलं युगपत्परिवर्तनं कामयन्ते, शांतिप्रियास्तावत्क्रमशो जायमानं परिवर्तनमभिवाञ्छन्ति। अयमेव हि दृष्टिभेदो मुख्यतः प्राचामर्वाचां च जगद्धितैषिणां नियमपरिवर्तने जागर्ति। वस्तुतस्तु परिवर्तनं नाम प्रकृतेर्निसर्गसिद्धः स्वभाव एव। यो हि जगदुत्पत्तिस्थितिलयक्रमापरपर्यायः।

यतः क्रान्तिवादिनो जना एकपद एव परिवर्तनोद्योगान्दोलनमाश्रयन्ति, ततस्ते क्रान्तियज्ञानुष्ठाने तद्गतिं निर्निरुद्धामव्याहतामतितीव्रजवां व्यापकक्षेत्रप्रगतिशीलां जायमानां कामयन्ते। यदा ते प्रजानामन्यायेनोत्पीडनं पश्यन्ति, तदा राजक्रान्तिमाचरन्ति। धर्मे दम्भाडम्बरमिथ्याचारकैतवमालोकन्ते तदा धर्मक्रान्तिं, समाजे यदा भौतिकसुखोपयोगिवस्तुविनिमये मुद्रास्फीतिविषये वा केनापि कृतं पक्षपातं, भेदभावं व्यवस्थावैषम्यं चानुभवन्ति तदा समाजक्रान्तिं कुर्वन्ति। एवमेव विचारसङ्कीर्णतामाकलय्य दर्शनसिद्धान्तक्रांतिं साहित्येऽपि चाभिनवभावानल्पकल्पनाकाव्यसृष्टेरवरोधं पश्यन्ति तदा साहित्यक्रान्तिमारभन्ते।

क्रान्तदर्शिनां त्यागैकव्रतवृत्तीनां धैर्यशौर्यादिगुणगणविशेषाणां जगद्धितैषिणां चमत्कारच्छटाविस्फूर्जितप्रतिभाप्रभाववतां विचक्षणानां सक्षमाणामपि सर्वसहानां सर्वतन्त्रस्वतन्त्राणां महानेतॄणां नेतृत्वे सत्यसिद्धान्तस्थापनाय समयोपयोगिधर्मशासनसमाजव्यवस्थाप्रतिष्ठापनाय च निर्व्याजं निःस्वार्थं प्रबलतम संघटनद्वारा सानुशासनं क्रियमाणा क्रान्तिर्बहुजनहिताय बहुजनसुखाय नूनमेव साफल्यमावहति।

अतो विपरीतमन्यथाप्रकारेण योग्यनेतुरभावे प्रवर्तमाना विद्रोहापरनाम्नी क्रान्तिर्मोघा निष्फला च पर्यवस्यति। तत्परिणतिश्चाराजकताऽव्यवस्थाऽशांतिर्जनधनशक्तीनां विनाशो ह्रासश्च जायते। अतः क्रांतिर्नाम भीषणरमणीयमतितीव्रतममस्त्रं युगधाराप्रवाहपरिवर्तनायेति न विस्मरणीयं क्रान्तितत्त्वोपनिषत्सिद्धान्तरहस्यसर्वस्वजिज्ञासुभिः। क्रान्तिजन्यांदोलनस्य प्रगतिः स्फूर्जत्स्फुलिङ्गधूमरतोमलोलाग्निज्वालामालेव प्रखरधाराऽदम्याऽनुपशाम्या निर्निरोध्या च भवति। अनुपयुक्तदेशे काले चापरिणामदर्शिभिः कुपात्रैः सहसारब्धा क्रान्तिर्देशद्रोहाद्राष्ट्रविप्लवात् सर्वनाशादप्यतिरिच्यते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ज्योतिषशास्त्रस्य चमत्कारः

## विचित्र आविष्कारः

### ( जन्मसमयाद् गर्भाधानसमयज्ञानम् )

लेखकः—स्वामी लक्ष्मणशास्त्री, संस्कृतविद्यालयाध्यक्षः नागौर ( राजस्थान )

अस्माकीनेयं संस्कृतभाषा वयसा माधुर्यादि गुणैश्चापराः सर्वा भाषा अतिशेते, नात्रकोऽपि विसंवादः। अस्यां भाषायां सर्वविधेषु विषयेषु विस्मयावहानि शास्त्राणि विचित्रतमाश्चाविष्काराः समुपलभ्यन्ते। यानि समवलोक्य साम्प्रतिका विज्ञानविदोऽपि विस्मयन्ते, मुक्तकण्ठं च प्रशंसन्ति तत्प्रणेतॄणां बुद्धिवैदग्ध्यम्।

मया साम्प्रतं, तेष्वेको ज्योतिःशास्त्रविषयकश्चमत्कारो विदुषां पुरतस्समुपस्थाप्यते। अनेन विधिना जन्मसमयतो गर्भस्थितेः समयो जन्मसमयस्य पूर्णाविशुद्धिश्च स्फुटं निश्चीयते। अयं विधिः सुतरां सुगमोऽस्ति। स्वल्पेनैव प्रयासेन यः कोऽपि विज्ञातुं प्रभवति विधिनानेन विषयममुम्।

जननसमयान्निषेकसमयं विज्ञातुं निषेकसमयाच्च जन्मसमयं विशुद्धं विधातुं पद्यचतुष्टयमधो निर्दिश्यते-

श्रुतीन्दुभिः स्वाङ्गधरांशयुक्ता,
विलग्नशीतांशुलवा विभक्ताः।
लब्धैर्युताः षट्चतुरब्धिघस्त्रा,
निषेकघस्त्रो जनुषो हि पूर्वम्।१।

तत्प्रातरर्कस्य च सायनस्य,
भोग्यं जनुः सायनचन्द्रभुक्तम्।
योज्यं द्वयं मध्यगभोदयाढ्यं
शून्याङ्गभक्तं च तदिष्टकालः।२।

तत्कालचन्द्रोद्भवलग्नयोर्यत्,
पलान्तरं स्वोदयमाननिघ्नम्।
त्रिंशद्विभक्तं च पलादि लब्धं
युक्तं च हीनं क्रमतो विधेयम्।३।

जन्मेष्टकाले जननस्य लग्नात्
निषेकचन्द्रे ह्यधिके च हीने।
एवं जनीष्टस्फुटता च साम्यं
निषेकचन्द्रोद्भवलग्नयोः स्यात्।४।

एतत्पद्यचतुष्टयार्थः स्फुट एव। विस्तृतिभिया च तल्लेखनमनुपपन्नमप्यस्ति। केवलमिमं विधिं विशदयितुं पुरातनमेकमुदाहरणम्प्रदर्श्यते।

वि० सं० १७९० शाके १६५५ आश्विनकृष्णामावस्यायाम् तिथौ बुधे घ० ५२।५१ हस्तभे घ० ४६।५१ वैधृतियोगे घ० ४१।४६ सूर्योदयाद्गतेष्टघटी ४२।५ समये कस्यापि नरस्य जन्माभूत्। तस्येष्टसमयः संशोध्योऽस्ति। जन्मसूर्यः ५।२४।२३।२६ गतिः ५९ ३१ चन्द्रः ५।२२।२०।४७ गतिः ७४३।१५ लग्नम् २।२०।२।५६।

चन्द्राल्लग्नं हीनं जातं ३।२।१७४६ अस्यांशाः ६२।१७।४८ द्विधा ६२।१७।४८ षोडशभक्ते लब्धम् ५।४६।६ उपरिष्टाद्युक्ते ६८।३।५४ चतुर्दशभक्ते लब्धम् ७०।१६ इदं सार्वकालिकाहर्गण २४६ मध्ये योज्यम्। जातम्, २५३ ०।१६ जन्मत एतावदहर्गणे सूर्ये



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

### भारतप्रधानमन्त्रिणो जयपुरे समागमनम्—

भारतप्रधानमन्त्रिणो जयपुरे समागमनम्— महामहानुत्सवः त्रिंशन्मार्चदिवसे जयपुरराजधान्यां समभूत्। एतस्य कृते कतिपयमासेभ्यः समभूत्संभारः, अद्य यस्मिन् हि परोक्षमुद्राणामासीद् व्ययः। अद्य (३०।३।५४) प्रातः सचिवालयस्य विशाले प्राङ्गणे भारतप्रधानमन्त्री श्रीनेहरूमहोदयः रक्षकसेनायाः (पुलिस) संनाहम् (परेड) समवालोकयत्। सैनिकानां प्रणामग्रहणोत्तरं नेहरूमहोदयस्तेभ्यो नवीनं ध्वजं समार्पयत्। समारोहेऽस्मिन् पञ्चाशत्सहस्रमिता नागरिकाः समभिलन्। नगररक्षक सैनिकानामासीत् पर्याप्तः प्रबन्धः। किन्तु प्रधानमन्त्रिणः समागमनसमये जनताया उपरि नियन्त्रणं समभूत्कठिनम्। जना मर्यादा-वृत्तिमुल्लङ्घ्य अग्रे निरगच्छन्। अस्यामव्यवस्थायां तत्रोपस्थिता विधानसभायाः (एसेम्बली) सदस्या अपि निजं स्थानं परित्यज्य समभूवन्नुत्थिताः।

नव-वादनसमये प्रधानमन्त्री श्रीश्रीमता राजप्रमुखेन सह उत्सवसमारोहे समागच्छत्। रक्षकसेना मन्त्रिमहाभागाय राष्ट्रियं प्रणामं न्यवेदयत्। ततः स सैनिकानां संनाहं समवालोकयत्। हिन्दू-इस्लाम-ईसाई संप्रदायानां त्रिभिर्धर्मगुरुभिः राष्ट्रियं ध्वजं पवित्रीकृत्य नेहरूमहोदयाय समार्प्यत। नेहरूमहोदयश्च ध्वजमिमं रक्षकसैनायै समार्पयत्। साक्षादस्मिन्नेव समये त्रीणि वायुयानानि अतिनिम्ने समवतीर्य प्रणामं पुष्पवर्षां चाऽकुर्वन्। येन हि संपूर्णजनता विस्मिता प्रमुदिता चाऽभूत्।

### सांस्कृतिकदृश्यानि

एतदनन्तरं राजस्थानीयसंस्कृतेः कानिचित् दृश्यानि नेहरूमहाभागस्य संमुखे समुपास्थाप्यन्त तानि यथा—

सुप्रसिद्धभगवद्भक्ता श्रीमीराबाई मेडताराज्यस्य श्रीकृष्णमन्दिरे भगवन्मूर्तेः संमुखे नृत्यन्ती प्रादर्श्यत एवं मेवाडस्य राजभक्तः प्रधानमन्त्री भामाशाहः स्वीयां समस्तां संपत्तिं स्वतन्त्रतासमाराधकस्य श्रीमहाराणाप्रतापस्य चरणे समर्पयन् प्रदर्शितोऽभूत्। दृश्यमिदमतीव स्वाभाविकं जनताश्चर्यकरं चाऽभूत।

---

निषेकः। जन्माहर्गणात् हीने कृते सं० १७८६ माघशुक्लद्वादश्यां भौमवासरे निषेकवासरो निर्णीतः।

अथ निषेकसमयो निर्णीयते—

निषेकदिने प्रातः सूर्यः ६।१७।३३।५६ अयनांश १६।४३।४८ युतः १०।७।१७।४७ अस्य भोग्यम् १८६।५७ जन्मचन्द्रः ५।२२।२०।४७ अयनांश १६।४३।४८ युतः ६।१२।४।३५ अस्य भुक्तम् १३६।३ सूर्यभोग्यस्य चन्द्रभुक्तस्य च योगः ३२६।० अयं सूर्यचन्द्रान्तरराशिपलेषु २०२८ मितेषु युक्तो जातः २३४४।० षष्ट्याभक्ते लब्धं-घट्यादि ३६।४ निषेकदिनेष्टकालो विज्ञेयः (अस्मिन्समये गर्भाधानमभूत्)

अथ निषेकसमयाज्जन्मेष्टकालविशुद्धिर्विधीयते।

निषेकसमयसूर्यः ६।१८।१७।४४ चन्द्रः २।१६।३७।१० जन्मलग्नम् २।२०।२।५६ निषेकचन्द्रस्य जन्मलग्नस्य चान्तरे अंशादिकम् ०।२५।४६ सायनलग्नपलैर्गुणिताः १४७३५।७ त्रिंशद्विभक्ते लब्धं घट्यादि ०।४।५५। अत्र चन्द्रो जन्मलग्नाद्धीनः 'तस्माज्जन्मेष्टसमयाद्धीनं पूर्वागतं फलं कार्यं जातः शुद्धोजन्मेष्टसमयः ४२।०।५।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



गणगौर्याश्चित्राङ्कने राजस्थानीययुवतयः सदूर्वान् पूजाकलशान् शिरसि निधाय गौरीपूजनाय गच्छन्त्यः प्रादर्श्यन्त। एवमेव दक्षिणराजस्थानीयभिल्लानां नृत्यमपि भूयस्तरां हृदयग्राहि समभवत्।

## उत्सवोपलक्ष्ये 'पोलो क्रीडा'

अद्य एतदुत्सवोपलक्ष्ये स्थानीयपोलोभूमौ अपराह्णे राजस्थानीय 'केवेलरी' संघयोर्मध्ये पोलोक्रीडनमभूत्। अत्रहि राजस्थानीयसंघो विजयी अभूत्। क्रीडादर्शनाय भारतप्रधानमन्त्री, भारतस्थितः पाकस्थानाधिकारी गजनफरअली, केन्द्रस्योपसंवादवहनमन्त्री, राजबहादुरः, राजस्थानमन्त्री, तथा अन्यान्ये शासनाधिकारिणः समभिलन्। नागरिकाणामपि संख्या प्रभूताऽभूत्। नेहरूमहोदयो यथैव क्रीडाभूमौ पदं न्यधात् तथव बैण्डवाद्येन राष्ट्रीधध्वनौ तत्स्वागतमक्रियत। ततः श्रीमान् राजप्रमुखो भारतमन्त्रिणः सम्मुखे क्रीडकानां परिचयमदात्। अवसरेस्मिन् श्रीराजप्रमुखमहाभागेन सर्वेभ्यः प्रीतिभोजनस्याऽप्यायोजनमक्रियत।

## सायं सार्वजनिकं भाषणम्

सायं भारतप्रधानमन्त्री नेहरूमहाभागो रामनिवासोद्याने 'एलबर्ट-भवनस्य, गवाक्षे स्थितो महोत्सवोपलक्ष्ये भाषणमकरोत्। अस्मिन्समये उद्यानेऽस्मिन् द्विलक्षाधिकनागराणां महामहान् समवायः समभूत्। यस्य प्रबन्धकरणमपि कठिनमासीत्।

नेहरूमहोदयः समभाषत—राजस्थानमिदं न किल नवीतम्। अतितमां प्राचीनं प्रतिष्ठितं च। किन्तु स्वतन्त्रताप्राप्तेरनन्तरं राजस्थानस्य यन्नवीनं रूपं निष्पन्नम्, एतस्य व्यतीतानि चत्वारि वर्षाणि। अस्मिन्नवकाशे समभूवन्नानावृत्तान्ताः। भिन्नभिन्नानि राज्यानि संघटितान्यभूवन्। आसीदेतत्समयप्राप्तमेव यद्वयं सर्वेपि देशस्थाः संघटिताः सन्तः अन्यान्यदेशीयैः संगत्य अग्रगामिनो भवेम। भारतमिदं महामहान् देशः। अस्मिन् परः सहस्रेभ्यो वर्षेभ्यस्तादृश्यो वार्ताः समभूवन् याभिरयं देशः सर्वथा एकीभूत इवाऽदृश्यत। किन्तु सन्ति विभेदकारणान्यपि कानिचित्-यथा भिन्नभिन्नजलवायु-वेषभूषा-भोजनादीनि। मिथोभेदं न हानिकारकं मन्ये, यदि स देशस्य दुर्बलताकारको न भवेत्। देशस्य विशालता अवश्यमभिवन्दनीया, किन्तु तदैव, यदा देशे सुप्रबन्धो भवेत्। नियमपूर्वकं च शासनकार्यं प्रचलेत्। प्रबन्धो न केवलं शासकानामेवाऽऽयत्तः, अपितु जनताया अपि तत्कर्तव्यम्। स्वराज्यप्राप्तिरस्माकं स्वत्वं यद्धि प्राप्तमेवास्माभिः। किन्तु तस्योत्तरदायित्वरूपेण निर्वाहः सुतरामावश्यकः, येन विना प्रत्यहं वयं दुर्बला भविष्यामः।

**राजस्थानस्य रंगाः**—नेहरूमहोदयः समभाषत यद् यदायदाऽहं राजस्थानस्य प्राचीनेषु नगरेषु परिभ्रमामि तदा तदा नानाविचारा मे हृदये परिभ्राम्यन्ति। अत्रत्य एकैकः पाषाणः प्राचीनां प्रथां कलाश्च सन्ति या अन्यत्र नाऽवलोक्यन्ते। अत्र समागतस्य मनः प्रमोदते नानाविधान् रङ्गान्* दृष्ट्वा एव तु सर्वेपि रङ्गाः सन्ति सर्वस्मिन्नपि भारते एव। किन्तु राजस्थानस्य रङ्गाः मनो रञ्जयन्ति, चेतः प्रसा-

* रागान् वर्णान्। वैयाकरणा अत्र 'रङ्ग' पदं नाऽभिरोचयिष्यन्ति, किन्तु वर्तमानसमये बोधसौकर्यार्थं तत्प्रयुक्तमिदम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...दृश्यन्ति। अहं वाञ्छामि भवन्तोऽन्यान्यलोकानामनु-करणं न कुर्युः एतान् मनःप्रसादकान् रङ्गान् ये पुरुषाणामुष्णीषे, स्त्रीणां परिधानीयेषु च दृश्यन्ते, भवन्तः सुस्थिररूपेण स्थापयेयुः।

राजस्थानस्य प्राचीनप्रथासु बह्व्यः प्रशंसनीयाः, ...काम भवेयुः काश्चन परिवर्तनीया अपि। अन्येषां कृते यो व्ययः क्रियते नासौ अपव्ययः। किन्तु विवाहादिषु यदि भवन्तो व्ययाधिक्यं कुर्युस्तर्हि सेयमन्या कथा। प्रधानमन्त्री महोदयः प्रावोचत्-जयपुरात्साम्प्रतमेवैकं पत्रमेकव्यक्तेः प्राप्तं यत्र लिखितं यत् राजस्थान दिवसोपरि भूयान् धनस्याऽपव्ययः क्रियमाणोऽस्ति। इद सत्यं यत् व्यर्थो व्ययः अनुचितः। परम् एवंविध दिनेषु व्ययो नाऽसंगतः। सर्वदा निरुत्सवं जीवनमनु-चितम्। प्रमोदस्य समये प्रमोदानुभवः स्थाने।

## भारतस्य वास्तविकं रूपम्

भारते बहवः प्रान्ताः, अनेका जातयः, अनेके धर्माः। अधिकतरा हिन्दवः। परं बौद्ध-जैन सिक्खा-दयोऽपि भारतीया एव। एतदतिरिक्ता अन्येऽपि सन्ति ये भारते नोत्पन्नाः। परं सहस्राधिकेभ्यो वर्षेभ्यस्ते भारते सन्ति। भारतीयास्ते संवृत्ताः। ख्रिष्टधर्मः १८०० वर्षेभ्यः पूर्वं दक्षिणभारते समागच्छत्। अयं संप्रति भारतीय एव बोद्धव्यः।

ततः आर्थिकोन्नतिविषये समभाषत—प्रोक्तं श्रीमता यत् साम्प्रतमस्माकं संमुखे सर्वप्रधानं कार्यमा-र्थिकोन्नतेः करणम्। अस्माकं देशो दीनः परिगण्यते। एष धनी भवेत्। व्यवसायो वृद्धिं गच्छेत्। अकर्म-ण्यता दूरे यायात्। एवंविधाः प्रश्नाः संप्रति पूरणीयाः।

एतत्कृते जनताया एकता, परिश्रमः, शान्तिपूर्णाः प्रकारा आवश्यकाः। वयमेकतामवलम्ब्य अग्रेसरा भवामः, उच्चनीचभावः संप्रति समापनीयः। सामन्त-प्रथाया राजस्थाने शान्तिपूर्णं निर्वाहं बहुतरमभ्य-नन्दन्नेहरूमहोदयः। अन्ते पञ्चवर्षीययोजना-सामुदा-यिकयोजनाविषये समवोचत्। ततो ध्वनिविस्तारक-यन्त्रस्य विकृतौ जातायां सभासमाप्तौ मुख्यमन्त्री श्रीजयनारायणव्यासमहोदयः सर्वेभ्यः क्षमामयाचत्।

## प्रधानमन्त्रिमहाभागस्य सदुपदेशाः

श्रूयते—राजस्थानविधानसभायाः सदस्यैः सह अनौपचारिकरूपेण वार्तालापं कुर्वन् प्रधानमन्त्रिमहो-दयः उत्तमस्य शासनतन्त्रस्योपरि महद् बलमदात्। श्रीमता समर्थितं यत् नीतेः सिद्धान्तस्य सुरक्षा उत्त-मेन शासनतन्त्रेणैव भवितुमर्हति। सम्प्रति स्वार्थसा-धनस्य दृष्टिः सर्वथा परिहेया। अनुशासनरक्षायामव-धानस्य भूयसीमावश्यकतामसूचयन्नेहरूमहोदयः। श्रीमता सूचितं यत् विधानसभाया अधिवेशने अध्यक्षस्य संमानम्, अनुशासनस्य पालनं च सर्वदा संस्मरेयुः सर्वेऽपि सदस्याः। एकस्मिन् सदस्ये भाष-माणे अन्यस्य भाषणमनुचितम्। यस्मिन्समये अध्यक्षः स्वयं भाषमाणो भवेत्तदा तु कस्यापि सदस्यस्य समुत्थाय भाषणमत्यन्तानुचितम्।

मुख्यमन्त्रिणः श्रीव्यासमहोदयस्य निवासस्थाने आयोजिते कार्यकर्तॄणां महति संमेलने (यस्मिन् राज्यस्य मन्त्रिगणाः, कांग्रेसविधानसभासदस्याः, प्रान्तीयाः प्रमुखकार्यकर्तारः, प्रमुखाः सामन्ताश्च केचिदासन्) समभाषत नेहरूमहोदयः—'कांग्रेसजने-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृतसमाचाराः—

## संस्कृतविश्वपरिषत्—

संस्कृतविश्वपरिषदस्तृतीयाऽधिवेशनं वर्तमान मासस्य (अप्रेल) २४, २५ तारिकयोर्नागपुरे संभवेदिति स्थिरीकृतम्। एतस्याऽध्यक्षः श्रीमान् राष्ट्रपतिः श्रीराजेन्द्रप्रसादमहाभागो निर्धारितः। नाग... एतस्य स्वागतसमितिः संग्रथिता, यस्या अध्यक्षः ... रविशंकरशुक्लः निर्वाचितोभूऽत्। नागपुरीयाऽधि... शनस्य कार्यालयः— "शिष्टनिवेशविभागे (सिवि... लाइन्स) विधानसभाया विश्राम-गृहे" निश्चित... अधिवेशनस्य स्वागतसमितिसदस्यताशुल्कं ...

---

नैतिकः स्तरः साम्प्रतमुन्नतीकरणीयः। सेयं संस्था यथा समुन्नता तथा एतस्या उत्तरदायित्वमपि बहु समुन्नतम्। अतः कांग्रेसीयैर्जनैः सर्वथा अनुकरणीयैर्भवितव्यमित्येव मे निगूढा सूचना।

कांग्रेसस्य संघटनायां, कांग्रेसीयशासनतन्त्रस्य विचारेषु च मिथः समन्वयः समुचितः। कांग्रेससंघटने यः कार्यक्रमो निर्धारितो भवेत्तस्य परिपालनं शासनतन्त्राणां कर्तव्यम्। राष्ट्रनिर्माणकार्यं परिश्रमेण साध्यम् न केवलं घोषणाभिः (नारे)। पञ्चवर्षीययोजनासु, सामुदायिकयोजनासु यानि कार्याणि निर्धारितानि, तैः सप्तसु वर्षेष्वेव देशस्य जनपदानां च स्वरूपमन्यादृशमेव भवेत्, वयस्माकं निर्माणस्य प्रवृत्तिं समुचितां कुर्याम। न केवलं राजधानीनिर्माणेनैव नगराणां भवेद्विकासः। स हि व्यापार-वाणिज्यादीनां वर्द्धनेन संभवेत्। अस्पृश्यताया भेदभावः संप्रति दूरे करणीयः·········इत्यादि।

"या जातयः, ये धर्माश्च भारते आयास्ते भारतीया एव संवृत्ताः, इति मन्तव्यम्" भारतप्रधानमन्त्रिमहाभागस्य कथनमिदं सर्वथा समुचितम्। किन्तु ते भारतीयाः संवृत्ता न वा, ते आत्मानं भारतीयम्, भारतं च आत्मीयं मन्यन्ते न वा।' इत्यादि किञ्चिद् विचारणीयम्। यदि ते सहस्राधिकेभ्यो वर्षेभ्यः अत्र समागत्यापि आत्मानं आत्मीयं (अर्थाद् भार... पृथक्, बाह्यम्); भारतं च परकीयं मन्येरन् ... द्वयोरयं समागमः किं सर्वदा निर्वाहाऽनुकूलः भ... वेत्? अन्ते हितावहो वा संसिध्येत्?

## संवत्सरारम्भः

चैत्रशुक्लतो भारतेऽस्मिन् नवीनः संवत्... प्रविशति। पुरा कदाचिदासीन्मार्गशीर्षमासे वत्स... रम्भः, किन्तु संप्रति चैत्रशुक्लारम्भादेव नवीनव... रम्भः। गतेऽस्मिन् वर्षे देशवासिभिर्यत् किलाऽनु... तस्य चर्चया वर्तमानकाले न किञ्चित्फलम्। परं ... र्तमानोऽयं संवत्सरः सर्वभावेन देशवासिनां ... शुभावहश्च प्रमोदावहश्च कार्यपरम्परानिर्वाह... भवेदिति भूयोभूयोऽभ्यर्थयामहे। 'भारती' परि... पाठकमहाभागानामनामयं चाऽभ्युदयं च संपत्तिं ... चाऽविरतमाशासानः प्रार्थयते सर्वाभीष्टदायकं ... चरनायकम्—

दर्शितकार्योत्कर्षे कर्षे[1] धान्यादिवर्षः[2] स्यात्।
सुसमयमुपनतवर्षे[3] वर्षे हर्षप्रकर्षः स्यात्॥

---

१—कर्षणे, कृषिकार्ये। २—धान्य, तृणादीनां वर्षा (... घञ्)। ३—वृष्टि।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



रूप्यकाणि। विद्यार्थिनां कृते १) एका मुद्रा। नागपुरस्थानां तथा नागपुरसमीपनगरस्थानां कृते एव एतत् सदस्यत्वं स्वीकृतम्। अन्यैस्तु सर्वैर्विश्वपरिषदः केन्द्रीयकार्यालयं प्रति (भारतीय विद्या-भवन, बंबई) पत्रं संप्रेष्य प्रतिनिधित्वं स्वीकर्तव्यम्, इति हि सूचयन्ति नागपुरपत्राणि।

**अखिलभारतीयं संस्कृतसाहित्यसंमेलनम्**— आगामिमासस्य (मई) ७, ८, ६ तारिकासु अखिलभारतीयसंस्कृतसाहित्यसम्मेलनस्य एकविंशमधिवेशनं पञ्चनदप्रान्तीये जालन्धरनगरे ससमारोहं संपद्येत। एतस्याऽध्यक्षो भूतपूर्वः केन्द्रीयमन्त्री तथा भारतीयसंसत्सदस्यो माननीयनरहरिविष्णुगाडगीलमहोदयो निर्वाचितः। एतस्मिन्नवसरे—संस्कृतशिक्षासंसत्—महिलासंस्कृतसंसत्—संस्कृत-कविसंमेलनान्यपि भविष्यन्ति। येषामुद्घाटनार्थं भारतीयसंसदुपाध्यक्षः श्री एम० अनन्तशयनमायङ्गर महोदयः, म० म० पं० गिरिधरशर्मचतुर्वेदमहोदयः, तथा पञ्चनदराज्यशिक्षामन्त्रि-श्रीजगन्नारायण-महाशयश्चामन्त्रिताः। अस्मिन्नेवाऽवसरे पञ्चनदप्रान्तीयं संस्कृत-संमेलनमप्यधिविष्टं भवेत्। इति हि दिल्लीस्थ-संमेलन कार्यालयतः प्राप्ता सूचना भारतीपाठकेभ्योऽपि सूच्यते।

**संस्कृतभाषयैव व्यवहरिष्यामः**—गतस्य मार्चमासस्य द्वितीयसप्ताहे मलाबारप्रान्तस्य कोट्टकले यत्किल अखिलभारतीयं वैद्यसंमेलनमधिविष्टमभूत् तत्र सर्वसम्मत्या निर्णीतमभूत् यत्संमेलनेऽस्मिन् सर्वेऽपि वैद्याः संस्कृतभाषयैव मिथो व्यवहारं कुर्युः। इति हि प्रस्तावरूपेण संमेलनेऽस्मिन् सर्वसंमत्या निर्धारितमभूत्। एतदनुसारम् अनेके वैद्या अपि प्रसन्नाः प्रतिज्ञां प्रचक्रुर्यत् परस्परं मिलितेषु वैद्येषु संस्कृत भाषयैव मिथो व्यवहरिष्यामः। इति हि सूचयति श्री सीतारामद्विवेदिमहोदयः।

**शोकसंवादः**—संस्कृतपण्डितसमाजे सोयं संवादो विषादरेखां प्रवर्तयेद् यत्—काशिकगवर्नमैन्टसंस्कृत कालेजस्य प्रधानाचार्यः श्रीत्रिभुवनप्रसादोपाध्यायमहोदयो मार्चमासस्य २५ तारिकायामकस्मात् हृदयगतेरवरोधात्सर्वदार्थं काशीवासमवापत्। महाभागस्यास्य वयः ५२ वर्षात्मकमासीत्साम्प्रतम्। असमये महाभागस्यास्य स्वर्गारोहणेन विषादो भवेद्विवेकिनाम्। महाभागस्यास्य शाश्वतिकं शान्तिम्, कौटुम्बिकानां धैर्यावलम्बनस्य दृढतां च चराचरनायकादभ्यर्थयामहे।

नागपुरविश्वविद्यालयस्य कुलपतिः श्रीमान् डा० पट्टाभिसीतारामय्यामहाभागो विश्वविद्यालयस्य दीक्षान्तसमारोहे समभिनन्दनीयेनोत्साहेनाऽवहत्—"यत् सोयं महान् खेदस्य विषयो यद्भारतीयेषु विश्वविद्यालये (यूनिवर्सिटी) संस्कृतस्य सुस्पष्टमुपेक्षा क्रियते। एतावत् कालं नानाविधैः प्ररोचनावाक्यैः लोकान्संतोषयन्तोऽपि शिक्षाकर्णधाराः व्यवहारविषये संस्कृतं न समाद्रियन्ते इति सुस्पष्टं वक्तव्यं भवेत्।" स्वयमयं महाभागः संस्कृते नैव समभाषत, अन्यांश्च तथा कर्तुमुपादिशच्च।

एवमेव हैदराबादस्य उस्मानियाविश्वविद्यालयस्य 'एकेडमी' समुद्घाटनसमारोहे श्री० के० एम० मुंशी महोदयः साभिनिवेशमभाषत—'यत् संस्कृतं समस्तस्यापि संसारस्याऽध्ययनीयं नूनम्। यतो हि संस्कृतसाहित्यस्य तुलनायां नान्यत् किञ्चित्साहित्यं यस्याऽध्ययनेन मानवः सत्पथपथिको भवेत्। 'मानुषस्य मस्तिष्कं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## पुस्तकालोकः —

**लीलालहरी**—पण्डितराजकृतेषु स्तुतिकाव्येषु पुरा प्रयुक्तो 'लहरी'शब्दः शिखरिणीच्छन्दोभिर्निबद्धां स्तुतिसंकथां साम्प्रतमपि जनेषु सूचयतीति नियतमिव नूनम्। तदनुसारमेव शताधिकाभिः शिखरिणीभिर्निर्गुम्फितं तदिदमेकमीश्वरस्तुतिकाव्यम्। एतस्य निबन्धा संस्कृतानुरागिणां सुपरिचितो बीकानेरस्थ डूंगर-कालेजप्राध्यापकः श्रीमान् पं० विद्याधरशास्त्री एम० ए० महोदयः। अखिलभारतीयसंस्कृत-साहित्यसंमेलन-राजस्थानप्रान्तीयसंमेलनादि नानाकार्येषु व्यासक्तः कालेजाध्यापननिषक्तोऽपि महाभागः सोयं काव्यनिर्माणस्याप्यवसरं लेभे, लभते चेति बहूनां कृते आदर्शायितमिदम्। पद्यरचना सेयं सुप्रसन्ना रुचिराक्षरैर्निबद्धा चेति भवेदेव विदितं रचनामार्मिकाणां पाठकानाम्।

साधारणतया स्तुतिरचनासु पुराणादिप्रसिद्ध रूपवर्णना– प्राक्तनभक्तोद्धारादिसंकथा – लोकेऽस्मिन् विहारलीला वा बाहुल्येन वर्णनीया भवन्ति। किन्तु शास्त्रिमहाभागेन लहर्यामस्यां भक्तहृदयस्य आ... त्मिकाः सामयिका विचारा भगवतः संमुखे निवे... मानाश्चित्रिता इति विशेषोऽस्या लहर्याः। दार्शनि... चर्चायां स्थानेस्थाने महिम्नः स्तोत्रमारोहति स्मृतिपथ... रचनाशैली स्फीता, नवीनं प्रार्थनाप्रकारं च दृशो... मुखमुपस्थापयतीति प्रसीदेद्धृदयं विवेकिनाम्। शिख... रिणी वृत्तं सुमधुरस्वरमागीयमानं स्वस्य, श्रोतॄ... च हृदयमावर्जयतीति कस्य न विदितम्। अतएव भारतीयसमाजे समभूदन्यापेक्षया सरुचि संग्रहणमेत... वृत्तस्य।

आम्, पादान्तलघोर्गुरुत्वं छन्दःशास्त्रे प्रायो... मतमेव प्रसिद्धं च तत्। किन्तु—एवंविधेषु छन्द... च्छेदस्याऽऽधिक्यं परिह्रियेत तर्हि सुभगं स्यादि... सुमन्त्रणारूपेण सूचयामि, न पौरोभाग्येन। ... चतुर्थं छन्दः—

'धरा धन्या सेयं यदुपरि वसन्तो वयमिह
पिबामः कामं त्वत् स्मरणसुखपीयूषमनि...
जगत्यामानन्दः सम इह परस्तेन ननु कः
यमेत्यायं प्राणी स्मरति हि निजात्मानमपि...

पद्येऽस्मिन् प्रथम-चतुर्थ चरणयोरन्तलघुः ... संगीतप्रकारं संपादयतीति भवेदितम्।

हृदयाऽऽवर्जिका सेयं लहरी—"हरनाम संस्... विद्यालय जौंहरीसागर, चूरूँ (राजस्थान)' तोऽ... संग्राह्येति प्रार्थये। अमूल्याया एतस्या मूल्यं पुस्त... निर्दिष्टमिति जाने।

★

---

भौतिकवादाद्विरतं कर्तव्यम्। सत्ताया लोभाद् रक्षणीयम्। मानवस्य मानवेन सह निकटता स्थापनीया।' इति सर्वदेशीया विद्वांसः संप्रति संप्रवदन्ति। किन्तु कार्यमेतत्संस्कृतभाषया यथा भवेत्तथा न कस्यचिद्देशस्य भाषया। अतएव भारतस्य प्रत्येकविश्वविद्यालये एकेडमीनां स्थापनमावश्यकं याभ्यो न केवलं संस्कृतग्रन्था एव प्रकाश्येरन् प्रत्युत संस्कृतस्य प्रचारो भाषणस्य प्रसारस्तथा वादविवादा अपि स्युः। इति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## देशदर्शनम् विदेशवार्ता च—

**प्रलयोन्मुखमभिधावति-भारतीयैः भौतिकविज्ञानं**

प्राचीनैः ऋषिभिः संसाराय विश्व कल्याणस्य मार्गो दर्शितः। एते हि स्वस्य समुन्नतिं कुर्वन्तोऽपि अन्येषां सर्वनाशस्येच्छामपि न कदाचक्रुः। किन्तु भौतिकविज्ञाने प्रवृत्तानां पश्चिमराष्ट्राणां मस्तिष्के रात्रिन्दिवं परेषामुन्मूलनस्यैव विचाराः साम्प्रतं परिभ्रमन्ति। गते महायुद्धे अणुविस्फोटकस्य (बम) प्रयोगोऽभूत्। तेन हि 'बम' द्वयस्य प्रयोगेणैव जयप्राण (जापान) देशः स्वात्मसमर्पणाय विवशो भवत्। हिरोशिमा तथा नागासाकीप्रदेशस्य भग्नवशेषा अद्यापि तस्य भयंकरतां संसारे समुद्घोषयन्ति। किन्तु स्वार्थपूरणपिशाची नैतावतापि तृप्यति। सम्प्रतं पाश्चात्यविज्ञानेन 'उद्‌जन' नामकस्य तादृशस्य विस्फोटकस्याऽऽविष्कारः कृतो यस्याग्रे 'अणुबमः' शिशूनां क्रीडेव।

अमेरिकया १ मार्चदिवसे नवीनाविष्कृतस्य विस्फोटकस्य परीक्षणं विकनी नामके प्रदेशे कृतं यस्य घातक परिमाणं यन्त्रादिभिर्नाद्यापि सन्यक्तयाऽनुमितम्? श्रूयते—अस्य विस्फोटकस्य शक्तिर्हिरोशिमाप्रदेशे प्रयुक्तस्य अणुबमापेक्षया ७५० गुणाधिका। एतस्य विनाशकशक्तिः षट्क्रोशान् परितः सपूर्णं प्रदेशं चूर्णयितुं समर्था। अनया हि क्वाजिलद्वीपस्य गृहाः, १०६ मीलानां विप्रकर्षे आसन्, मूलतः प्राकम्प्यन्त एतस्य प्रयोगोत्तरम् अणुसमूहस्य मेघा इव गगने प्रासरन्त, ये १७ मीलमिता उन्नताः, २८ मीलान् यावच्च विस्तीर्णा व्याप्ताः। परीक्षणक्षेत्रात् शताधिकमीलानां विप्रकर्षेऽपि तादृशो घातकः प्रभावः प्रासरत् येन नौकाऽऽरूढाः त्रयोविंशतिनाविकाः (जापाने) रुग्णा अभवन् येषां चिकित्सा साम्प्रतमपि प्रचलति।

[न्यूयार्कटाइम्सप्रकाशितविवरणानुसारम्]

जापानप्रदेशीययन्त्रैः सूचितं यत् द्वौ पोतौ (जहाज) ८०० मीलानां दूरेऽपि एतत्प्रभावाक्रान्तावभूताम्। तथा मिश्रो नौकाः १००० मीलानां विप्रकर्षेऽपि घातकप्रभावेण चिह्निता अभूवन्। बाल्मूरप्रदेशस्य एको वैज्ञानिकस्तु कथयति "यदि 'ट्रीटियम' नानकः पदार्थः पर्याप्तमात्रायामुपलब्धो भवेत्तर्हि संपूर्णस्य विश्वस्य विनाशाय एकमात्रोऽपि उद्‌जन-बमः पर्याप्तो भवेत्।" हन्त: अब्रह्मण्यमब्रह्मण्यम्!!

एतेषां बमानां परीक्षणेन सुस्पष्टमिदं सिद्धं यत् भाविनां महायुद्धानां प्रभावः केवलं तेष्वेव देशेषु न प्रसरेद् येषु युद्धानामारम्भः। तटस्थदेशा अपि तत् प्रभाववञ्चिता न स्युः। जापानीयैर्मत्स्यभोजने सांप्रतं बमप्रभावशङ्का प्रकाशिता।

तुलयन्तु सज्जनाः साम्प्रतं प्राचीनान् आर्यान्, पाश्चात्यवैज्ञानिकांश्च!

**फ्रांसाधिकृता उपनिवेशाः शीघ्रतरं भारते एव विलीयेरन्**--नवीनदिल्ली, ६ अप्रेलदिनम्—भारते स्थितानां फ्रांसाऽधिकृतस्थानानां विषये लोकसभायां भाषमाणेन भारतप्रधानमन्त्रिणा फ्रांसराजतन्त्राय पुनः सूचितं यत् इमे उपनिवेशा भारते एव यथार्थरूपे विलीनाः क्रियेरन्। विधानानुसारं विलीनीकरणं परस्ताद्भवेत्।

इहत्या देशसेवका अपि पश्यन्ति यत् वैदेशिका इमे उपनिवेशा राष्ट्रपुरुषस्य शरीरे कुष्ठचिह्नानीव प्रतीयन्ते, येषां विलयनं साम्प्रतमावश्यकमेव। अस्मिन् विषये जनमतसंग्रहस्य प्रश्नोपि केषांचिदनावश्यक एव। यतो हि यस्मिन् समये इमे प्रदेशाः परतन्त्रीकृतास्तस्मिन् समयेऽपि जनमत नासीद् गृहीतम्। एतेषां वैदेशिकस्थानानां कारणाद् भारते कोटितोऽधिकानां कर (टैक्स, चुङ्गी) रूप्यकाणामपि हानिः समये समये सह्या भवति। यतो हि चौर्यविक्रयेण वस्तूनां बहिर्निस्सारणस्याऽभियोगाः प्रत्येक वर्षे बहवो दृग्गोचरा भवन्ति। एतदतिरिक्तं भारताद् विरुद्धानि राष्ट्राणि एवंविधान् विदेशाधिकृतावुपनिवेशान् निजस्य सामरिक केन्द्राणि निर्मान्ति, येन हि भारतस्य स्वाधीनता प्रति समयं संशयारूढा भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## द्रुतं संस्कृत शिक्ष्यतां "भारती"तः—

ईरान देशस्य समीपे इराक देशो वर्तते । एतस्य पर्व-तीय प्रदेशेषु अतिप्राचीनसभ्यतायाः अवशेषाः प्राप्ताः सन्ति । एतस्यैव देशस्य पुरातनं नाम मेसोपोटामिया आसीत । देशस्यास्य सभ्यता पञ्चसहस्रवर्षेभ्यः पुरातनी अस्ति । सुमेरियन-सभ्यताऽपि अस्मिन्नेव देशे परिपोषमलभत् । श्रूयते यत् सुमेरियनैरेव लेखनकला आविष्कृता आसीत् । परन्तु विचारोऽयं वस्तुतो भ्रममूलकः । सिन्धुसभ्यताऽपि सुमेरियन-सभ्यतायाः समकालीनाऽसीत् । सिन्धुनदस्य घाटी-प्रदेशे ब्राह्मीलिप्यामङ्कितानि मृत्पात्राणि समुपलब्धानि । कतिपयेषां पुरातत्वविदां मतमस्ति यत् वेदानां निर्माण-मपि फारेशोपसागरतटस्थितेषु मेसोपोटामियादिदेशेषु अक्रियत: । दिनेष्वेषु ईराने अफगानिस्ताने च संस्कृता-ध्ययनस्याधिकं प्रचारः अस्त्येव, परमधुनैव विश्वस्त-सूत्र द्वारा परिज्ञातमस्ति यत् ईराक-देशोऽपि संस्कृत-स्याध्ययनं प्रति महत्वपूर्णया दृष्ट्या वीक्ष्यते । ईराक-सर्वकारः स्वकीयेन व्ययेन ईराकविश्वविद्यालये संस्कृत विभागं स्थापयिस्यति, एतदर्थं च भारतात् संस्कृतस्यैकं प्राध्यापकमह्वोष्यति ।

ईराक ईरान के समीप में एक देश है । इस पर्वतीय प्रदेशों में बहुत पुरानी सभ्यता के अवशेष पाये गये हैं । मेसोपोटेमिया इसी देश का पुराना नाम था । इस देश की सभ्यता पाँच हजार वर्ष पुरानी है । सुमेरियन सभ्यता भी इसी देश में फली फूली है । सुनते हैं कि लेखनकला का आविष्कार सुमेरियन लोगों ने ही किया था । पर यह विचार वास्तव में भ्रममूलक है । सुमेरियन सभ्यता की समकालीन सिन्धुघाटी की सभ्यता मानी जाती है । सिन्धुघाटी में ब्राह्मी लिपि में लिखे हुए मिट्टी के वर्तन पाये गये हैं । कई पुरातत्ववेत्ताओं के मन में वेदों का निर्माण भी फारस की खाड़ी के किनारे वाले मेसोपोटेमिया तथा अन्य प्रदेशों में हुआ था । आजकल ईरान और अफगानिस्तान में तो संस्कृत के अध्ययन का अधि-काधिक प्रचार हो ही रहा है-पर अभी हाल ही में विश्वस्तसूत्रों से ज्ञात हुआ है कि ईराक में भी संस्कृत के अध्ययन को महत्व दिया जा रहा है । ईराक सरकार अपने खर्चे से ईराक विश्वविद्यालय में संस्कृत की चेयर स्थापित करेगी तथा भारतवर्ष से प्रोफेसर को बुलायेगी ।

## धातुप्रयोगपारिजातः

पा-पाने [ पीना To drink ] भ्वादिः, सकर्मकः, अनिट, परस्मै०, पिबति । पपौ पपतुः, पपुः । पपाथ, पपिव । पाता । पास्यति । पिबतु । अपिबत् । पिबेत् । आशि० पेयात्, पेयास्ताम् । (सा० भू०) अपात् अपाताम् अपुः । लृङ — अपास्यत् ।

कर्मणि-पीयते, पपे, अपायि, अपायिषाताम् । णिचि-पाययते । लुङि-अपीप्यत, अपीप्यन्त । सनि-पिपासति । कृदन्ते-पातव्यम्, पानीयम्, पेयम् । निष्ठायां क्ते-पीतः । क्तवतु-पीतवान् । शतृ-पिबन् पिबन्ती (स्त्री) । तुम्-पातुम् । त्वा -पीत्वा, प्रपाय । क्तिन्-प्रपीतिः । क्षीरस्यपानम्-क्षीरपानम्, क्षीरपाः । सपीतिः ( सहपीतिः पानम् ) । पायुः गुदम् ( उण् ) । पापम् (पत्नी-याभ्यः पः) । पाथः ( जलम्, ... पयः ( असुन् ) । पाकः ( अर्भकः ) कन् । पात्रम् ( ष्ट्रन् ) । पञ्चानां पात्राणां समाहारः पञ्चपात्रम्, पञ्चपात्री ।

प्रकाशकः—जयबहादुरसिंहः पता—भारती भवन, गोपालजी का रास्ता, जयपुर

मुद्रकः—राजस्थान प्रिंटिंग वर्क्स, हनुमान का रास्ता, जयपुर ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

राजकुमार

अहिंसा–सत्य–सिद्धान्तं मानवेषु प्रचारयन् ।
सिद्धार्थो बुद्धभगवान् बुद्धिं बोधयताद्भुवि ॥

वर्षम् ४

सप्तमाङ्कः

मूल्यम्
वार्षिकम् ३)
एक...

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# विषय-सूची


| क्रम | लेखा | लेखकाः | पृष्ठसंख्या |
|---|---|---|---|
| १. | अयि बुधाः ! | पं० श्रीदेवकीनन्दनशास्त्री शाहपुरा | १३७ |
| २. | भारतीया क्रान्तिः क्रान्तिकापिणश्च | श्रीगणेशरामशर्मा झालावाड़ | १३८ |
| ३. | नृपामात्यौ ( कोऽयमीश्वरः ? ) | श्रीशिवप्रसादशास्त्री, जयपुरम् | १४१ |
| ४. | मातृभूमिभक्तिः | श्रीकात्यायनीदत्तशाण्डिल्य, B. A. | १४४ |
| ५. | पाक अमेरिकयोः सैन्यसन्धिः | श्रीमाँगीलालमिश्रः, नेछवा, सीकर | १४७ |
| ६. | दीपकः | श्रीब्रह्मानन्दशास्त्री, कासगंज | १४९ |
| ७. | मालाकारः | श्रीमदनमोहनझाः, मुजफ्फरपुरम् | १५० |
| ८. | सम्पादकीयम् | सम्पादकः | १५२ |
| | —संस्कृतविश्वपरिषदस्तृतीयमधिवेशनम् | | १५५ |
| | —अ० भा० संस्कृतसाहित्यसम्मेलनम् | | १५६ |
| ९. | संस्कृतसमाचाराः | पं० श्रीकलानाथशास्त्री, जयपुरम् | पृष्ठान्ते |
| | —अ० भा० संस्कृतपरिषद्, लखनऊ | | |
| | —इन्द्रप्रस्थसंस्कृतपरिषद् | | |
| | —सं० वाग्विवर्द्धिन्या वार्षिकोत्सवः | | |


## —: "भारती" पत्रस्य उद्देश्यानि नियमाश्च :—

१. संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिक विचारपरिपोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि ।

२. 'भारतीय' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम् ।

३. मासिक पत्रमिदं प्रतिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात् ।

४. एकस्यांकस्य मूल्यम् ।≈) आणकषट्कम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि-
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी।
भागीरथीव भावाढ्या भारते भातु भारती॥

प्रबन्ध-सम्पादकः—
गिरिराजशर्मा शास्त्री

वर्षम् ४ | वैशाखपूर्णिमा, सं० २०११ | अङ्कः ७

## अयि बुधाः !

( ले० पं० देवकीनन्दनशर्मा शास्त्री प्रश्नवरः )
( प्रधानाध्यापकः राजकीयसंस्कृतविद्यालय शाहपुरा )

अयि बुधा ! वदताधुना-
मृतवर्षिणीं सुरभारतीम्

या हि वैदेशिकमनांस्यपि
तर्पयन्ती राजते
ययेदं शिर उन्नतं
ननु भारतस्य विराजते

कालिदासकवेः सुवाणी
पीयते धरणीतलेऽस्मिन्
नीयते हृदि वेददीपो
मानवैस्तमसावृतेऽस्मिन्

आगमैर्निगमैः पुराणै
विजयिनीं सुरभारतीम्

पूर्वजैः परिवर्धितां
गौरवमयीं वाणीमिमां

प्राप्य मुखमण्डलमिदं तव
किमिह नहि विभ्राजते

हा विमुच्य हतप्रभा
दीना वयं ननु भारतेऽस्मिन्

भारतीचरणानुगा
विद्वांसो ननु निर्जरा
इति श्रुतिं श्रुत्वा कथं
मौना वदन्ति न भारतीम्
अयि बुधा वदताधुना
मृतवर्षिणीं सुरभारतीम्

के वयम् क्व धनानि नूनं
हा बुधाः कुधियः कथं
ननु पिबन्तु सुधामिमां
मा त्यजत भारतभारतीम्
अयि बुधा वदताधुना-
मृतवर्षिणीं सुरभारतीम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भारतीया क्रान्तिः, क्रान्तिकारिणश्च

विद्याभूषण—पं० श्रीगणेशरामशर्मा राजेन्द्र इण्टर कॉलेज, झालावाड

[ पूर्वतोनुवृत्तः ]

भारतेऽस्माकं देशे क्रान्तेरितिवृत्तं क्रमविकाश-परम्परा च प्राचीनकालादारभ्याद्यावधि नानारूप-मुपलभ्यते। तथा हि—देवा असुरशक्ति विरुद्धं युद्धैरनेकैर्भूयो भूयः क्रान्तिमाचेरुः। महर्षयस्तपोबला-द्धर्मक्रान्तिमनार्यकृताऽधर्मोच्छेदाय मुहुर्मुहुर्विदधिरे। आर्यसम्राजोऽनार्यजनितान्यायात्याचारविरुद्धं महान्तं पुरुषार्थमवलम्ब्य विश्वशान्तेर्निमित्तं रामराज्य विस्ताराय सार्वभौमैकच्छत्रचक्रवर्तित्वं प्रतिष्ठापयितुं चानेकवारं संग्रामसङ्घर्षपूर्वकं क्रान्तिं चक्रुः। सर्व-साधारणाः प्रजाजनाश्चापि कियतोऽत्याचारिणो राज सिंहासनात्प्रच्याव्य क्रान्तिभावपरिचयं ददुः। दार्शनिका विद्वांसो गभीरतत्वचिन्तनैर्जीवसृष्टिपरमा त्मशक्तिसम्बन्धिनः सत्यसिद्धान्तान् प्रचारयि बुद्धिबलोत्कर्षजुष्टां समन्वयव्यतिरेकशैल्या तत् प्रधानया विचारक्रांतिमातेनुः। कवयः काव्यकल्पना भावसौन्दर्यचरित्रचित्रणपूर्वकं भावनाक्रान्तिं चक्रिरे

---

ननु स्वतन्त्रे भारतेऽपि म
या यथामति गीयते
लोभमण्डित — पण्डितैः
प्रतिदिनमधोऽधो नीयते
महामुनिपाणिनिकृतैः
सूत्रै रहो वृक्षैर्यथा
मण्डिता बहुमार्गगा
सरिदिव कविभिरुपमीयते
किं न पश्यथ मातरं
हितवादिनीं सुखकारिणीम
किं वदन्ति न कोमलां
भवतापहां निजभारतीम्
अयि बुधा वदताऽधुनाऽ-
मृतवर्षिणीं सुरभारतीम्

शास्त्रसिंहनिनाद उच्चैः
श्राव्यतां धीरस्वरेण
धार्यतां हृदि सर्वसुखदं
ब्रह्मचर्यमनातुरेण
वेदघोषैः शास्त्रनादैः
कविसुधावचनैस्तथा
मण्डिता सुखदा कदा वै
द्रक्ष्यते तृष्णातुरेण
जय जय ध्वनिरागतो
ननु त्वर्यतां सुधिया द्रुतं
शृणुत पुनरपि पिबत नूनं
भजत भारतभारतीम्
अयि बुधा वदताऽधुनाऽ-
मृतवर्षिणीं सुरभारतीम्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



समाजसुधारकाः रूढिगतसमाजदोषनिरासाय पुनः पुनः समाजक्रान्तिमकार्षुः। नेतारश्च राष्ट्रे राजनीतिगतशासनसत्तायाः स्वदेशीकरणाय स्वराज्यसिद्धये च क्रान्तिं भेजिरे।

भदन्तो भगवान् बुद्धदेवो यज्ञेषु भ्रष्टवैदिकैः समर्थ्यमानां पशुहिंसां निरोद्धुं दयाधर्मसिद्धान्तडिण्डिमघोषेण महतीमेव क्रान्तिमाचचार। शङ्कराचार्यरामानुजमध्ववल्लभनिम्बार्कादयो महादार्शनिकाः सनातनवर्णाश्रमधर्मप्रतिष्ठायै, वैदिककर्मकाण्डसंस्काराचाराणां पुनरुज्जीवनाय, लोकमानसे भक्तिभावमन्दाकिनीधारामजस्रं प्रवाहयितुं च ज्ञानकर्मोपासनासमन्वयात्मिकां क्रान्तिं विदधिरे। चन्द्रगुप्ताशोकपृथ्वीराजसंग्रामसिंहप्रतापशिवराजरणजित्सिंहादयो वीराः क्षत्रियप्रवरा देशे यवनदस्यूनां शासनोच्छेदाय प्राचीनार्यराजमर्यादामभिरक्षितुं धर्मगुप्तये, सतीत्वसंरक्षणाय क्षात्रतेजोऽभिमानगौरवोत्कर्षं रक्षितुं च युद्धप्रोद्धतां क्रान्तिं चक्रिरे। इत्थं भारतेऽत्र क्रान्तिशृङ्खलासूत्रमितिवृत्तान्तर्गतमुपलभ्यते।

परन्त्वस्माकं भारतराष्ट्रजीवने गौराङ्गशासनविरुद्धं तदुच्छेदाय स्वराज्यसंस्थापनाय च याभिनवा राजक्रान्तिः, समाजक्रान्तिश्च प्रावर्तत सा किलातीवोग्रा दुर्द्धर्षा, दुर्दमनीया च प्रचचाल पर्यन्ते साफल्यं प्रवव्राज। अतएवास्याः क्रान्तेः क्रमविकाशः शताब्दीं यावद्यथा समपद्यत स खलु शुभोदर्कोऽपि रोमहर्षको रमणीयोऽप्यतिभीषण इति कृत्वा तद्विषये सिंहावलोकनक्रमेण किञ्चिदत्र प्रसङ्गोपात्तमुच्यते—

यवनराज्यविभ्रंशाल्लब्धावकाशा विदेशीया गौराङ्गाश्च सूचीप्रवेशे मुसलप्रवेश इति न्यायादात्मनः साम्राज्यविस्तारमभीप्सवः स्वस्य शासनस्य सूत्रपातमभ्यवाञ्छन्। सर्वादौ व्यापारच्छलादत्र वसतिमात्मनश्चकल्पिरे। परस्परं द्रुह्यमानानामीर्ष्याद्वेषानैक्यादिदोषैः क्षीणबलानां भारतीयप्रजानामस्माकं प्रवञ्चनं सुकरं मत्वा ते कूटकपटभेदनीत्या व्यापारविस्तारे सन्धिविग्रहात्मके शासनविस्तारोपाये मनो दधुः। स्वसैन्यशक्तिं गौरीं प्रबलामकार्षुः। गृहयुद्धान्याचरन्तीनां भारतान्तर्वर्तिनीनां वर्गगतराजशक्तीनां कूटनीत्या विघटनं स्वशक्तेः संतोलनपूर्वकं धर्मजुगुप्सां वाणिज्यव्यवसायाधिकारवञ्चनं सम्पदपहरणं रङ्गभेदघृणामयकौशलात्प्रजानामुत्पीडनं शोषणमन्यायं च कर्तुं प्रारेभिरे।

अनैक्यपराजिता मिथोद्रोहविक्लवा विघटिताश्चाप्यथ भारतीया जनाः शताब्दीयावद्यवनशक्तिविरुद्धं सङ्घर्षाननेकान् कुर्वाणास्तज्जन्येन कटुनानुभवेन कथमप्येकतामहत्त्वं, गौराङ्गाणामत्र साम्राज्यविस्तारदुस्तृषमात्मनः पारतन्त्र्यदुर्दशां बुबुधुः। "पारतन्त्र्यं महद्दुखम्, स्वातन्त्र्यं परमं सुखम्।" इति पूर्वजानां तपःप्रतापपुण्योपचयैर्देशात्मबोधचेतनां राष्ट्रस्याभ्युदयाय स्वकर्तव्यभावनां राष्ट्रभक्तेरुन्मेषमीषत्पुनर्जागरणोद्बोधं च प्रापुः। परिणामतः १८५७ तमे ईषवीयेऽब्दे भारतीयस्वराज्यक्रान्तेर्महान् विस्फोटो ह्याधुनिकस्वरूपोऽकस्माद्बभूव।

यद्यपि तत्कालीना गौराङ्गी शासनशक्तिर्भारतेऽत्र नवाभ्युदितामिमां स्वराज्यक्रान्तिधारां शस्त्रास्त्रबलेनापकौशलेन च निरोद्धुं बहु प्रायतत परन्त्वन्तस्तेजोभास्वरा एतत्क्रान्तिवह्निविस्फुलिङ्गा नात्यन्ताभावमुपशेमुः। प्रत्युत भस्मचयाच्छादितोऽग्निरिव क्रान्तिधारा-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यास्तत्प्रवाहस्तनीयानपि प्रजानामन्तर्हृदि प्रच्छन्नमविच्छिन्नं प्रोवाह नूनम्। गौराङ्गशासनमेकपदेऽपाकृत्य भारते स्वदेशीयं शासनतन्त्रं स्थापयितुमनेके देशभक्ता वीराः सत्यसङ्कल्पाः क्रान्त्यग्रदूतत्वं कुर्वाणाः प्राणपणं प्रयेतिरे।

प्रोक्तेष्वथ क्रान्तिकारिषु वीरेषु द्विविधा नरपुङ्गवा आसन्। केचिद्धिंसात्मिकां विद्रोहाद्विध्वंसवादिनीं नीतिं समर्थयमाना बभूवुरन्ये प्राचीनां धर्मजुष्टामहिंसाश्रयिणीं विधिविधाननियमानुरोधिनीं बुद्धिवादप्रधानां नीतिप्रणालीं प्रयुञ्जाना आसन्। द्विविधानामपि देशोद्धाराय संततं प्रवर्तमानानां स्वराज्यप्राप्तये सिद्धान्ततो लक्ष्ये किलैकस्मिन्नपि सति केवलं साधनप्रयोगनीत्या मतान्तरमासीत्। ये शान्तिपूर्वकं विधानानुमोदितं स्वराज्यान्दोलनं गतिशीलं कर्तुमभ्यवाञ्छन् ते पाश्चात्यप्रजातन्त्रन्यायनीतिनियमानत्र देशे व्यवहरन्तो विधानवादानुकूलं संस्थाः, प्रतिष्ठानानि, परिषदः, संसदः, सभाः, समितीः, समाजान् वा संस्थाप्यान्दोलनमारेभिरे। फलतो राष्ट्रियमहासभाऽत्र देशे महती संस्था सङ्घटनशक्तिप्रतीकमिव मूर्तिमद्बभूव। यस्या दादाभाई नौरोजिः, फिरोजशाह मेहता, गोपालकृष्णगोखले, बालगंगाधरतिलकः, चित्तरञ्जनदासः, मोतीलालनेहरुः, लाजपतिराय प्रभृतयो नेतारोऽनुयातारः सदस्याः कार्यसंचालका बभूवुर्येषु सर्वश्रेष्ठो महात्मा गान्धिरहिंसानीतिप्रयोगप्रवीणो जगद्वन्द्यो विश्वविदितचरितोऽद्भुतप्रतिभाप्रभः सुधीरभूत्।

अतो भिन्नमनेके वीरा देशभक्ता एवंविधाश्चापि बभूवुर्ये "सर्वं बलवतां पथ्यम्।" 'वीरभोग्या वसुन्धरा।" "विषस्य विषमौषधम्।" "शठे शाठ्यं समाचरेत्।" "आर्जवं हि कुटिलेषु न नीतिः।" "व्रजन्ति ते मूढधियः पराभवं, भवन्ति मायाविषु ये न मायिनः।" "नये च शौर्ये च वसन्ति सम्पदः।" इत्यादिवद्धिंसात्मिकां विग्रहवतीं नीतिमाश्रयन्। इमे देशभक्ता वीराः क्रान्तिकारिण इत्यभ्यधीयन्त। एते हि क्रान्तिकारिणो देशेऽत्र गौराङ्गशक्तेर्मूलादुच्छेदं कृत्वा मातृभूमेर्भारतवर्षस्य पारतन्त्र्यनिगडबन्धनान्मुक्तिं कामयमानाः, "अर्थं साधयामि वा देहं पातयामि वा" इति धनानि, दारान्, पुत्रान्, प्राणान्, किं बहुना, सर्वस्वमपि च स्वातन्त्र्ययुद्ध-लिवेदिप्राङ्गणे निष्कामं समुत्ससृजुः। इत्थंविधेषु हुतात्मसु सहस्रशो लक्षशो वा महानुभावा ज्ञाताऽज्ञातनामानोऽजायन्त येषां त्यागेनोत्साहाद्बुद्धिबलेनोग्रेण हिंसावादसिद्धान्तप्रचारेण, सरहस्यकूटनीतिप्रयोगापकौशलेन, चारित्र्येणाद्भुतेन, पराक्रमेण, बंविस्फोटादिविध्वंसलीलाभिः च भीता त्रस्ता किलाङ्गलसाम्राज्यवादशक्तिरुत्खातमूला विच्छिन्नतन्त्राऽपभ्रष्टप्र किंकर्तव्यविमूढा कान्दिशीका च भूत्वान्ते देशादस्मात्पयोधेः पारं पलायनं चक्रे।

यद्यपि क्रान्तिवादिनः शांतिवादिन उभयेऽपि राष्ट्रभक्ता मातृभूमेः प्रेयांसः पुत्राः स्वराजसिद्धिमाप्तुं स्वश्रद्धाविश्वासनिष्ठानुरूपं सत्यसङ्कल्पादान्दोलनमकार्षुः। उभयोरथ दलयोः शौर्यप्रभावात्तपस्त्यागाभ्यां देशोऽयं स्वतन्त्रो बभूव। परन्तु क्रान्तिकारिणां महामनसां वीराणां धैर्यधनानां चरितानि लोमहर्षणानि, कार्याणि चात्यद्भुतानि, महान्तः पुरुषार्थाः, प्राणपणप्रयत्नाः, भेदनीतिशस्त्रास्त्रप्रयोगाः, षड्यन्त्राणां रहस्य



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



गर्भं भीषणं स्वरूपम्, अनल्पकल्पनाकदर्थिन्यो योजनाः, साहसिकत्वम्, निर्भीकता, मृत्योर्मुखदंष्ट्राङ्कुराग्रेषु सततमस्खलितं नीतिरणरङ्गताण्डवम्, कष्टसहिष्णुता, मनोबलममोघम्, दुर्दमनीयोत्साहः, त्यागस्य पराकाष्ठा, निर्ममत्वं जीविते, विदेशीयदुश्शासनकालविषधरफणास्फालनोद्योगेषु महागारुडिकत्वम् देशभक्त्युद्रेकान्मातृभूमेः सम्मानगौरवरक्षणाय मृत्योरप्यालिङ्गनम्, प्रतिज्ञापालनम्, रहस्यगुप्तियोग्यता, समयानुवर्तनम्, अनुशासनवशवर्तित्वम्, क्षुत्तृड्सहनसक्षमत्वं, स्थितप्रज्ञता, दूरदर्शिता, विध्वंसाभिचारयोजनाप्रावीण्यम्, प्रणिधिकर्मकौशलम्, प्रचारपाण्डित्यप्रागल्भ्यम्, विघ्नबाधासहस्रेष्वप्यचलचित्तता, प्रत्यूहपर्वतारोहणम्, वेदनानदीप्रवाहसंतरणम्, सावधानता, सतर्कता, जागरूकता, सूक्ष्मातिसूक्ष्मं प्रकृतिपर्यवेक्षणम्, स्थितिगाम्भीर्यज्ञानम्, भावसंगोपनकला बहुदेशवेशविन्यासभाषाप्रावीण्यमित्याद्या अनेके लोकोत्तरा गुणाश्चमत्कुर्वन्ति चेतांसि सचेतसां गतचेतसामपीति कृत्वा केषांचित्क्रान्तिकारिणां वीराणामत्र नामोल्लेखनमात्रं कृत्वा तान् प्रति सम्मानभावाञ्जलिं समर्प्य च संक्षिप्यते लेखः।

भारतीयराजक्रान्तेः सूत्रपातो झाँसीराज्यमण्डलाधिष्ठात्र्या महाराज्ञ्या श्रीलक्ष्मीदेव्या ईषवीयसन् १८५७ वर्षेऽकारि। तत्रानेके राष्ट्रभक्ता वीराः स्वदेशमिमं स्वतन्त्रं कर्तुं सर्वस्वमपि समर्पयन्तः प्राणपणं बहु प्रयेतिरे, परन्तु, कतिचन देशद्रोहिणां कृतघ्नानां विश्वासघातात्स्वार्थान्धतयाऽनैक्याच्च प्रज्वलिताऽपीयं क्रान्त्यग्निज्वाला बहिस्त उपशान्तेवालक्ष्यत, परं तत्त्वतस्तु दमनप्रधानेन गौराङ्गदस्यूनां दुश्शासनेन तात्कालिकेन सा लोकानामन्तर्हृदि सूक्ष्मरूपं सततं

प्रजज्वाल। तत एव शतशः सहस्रशो वा भारतीय
प्रजाजनाः प्रच्छन्नं क्रान्तिं चक्रुः। केचित् प्रत्य
मप्यथ गौराङ्गविद्रोहं विदधिरे।

प्रत्यक्षमेव गौराङ्गशासनतन्त्रविरुद्धं विद्रोहम
चरत्सु कूकाविद्रोहकाण्डे गुरू रामसिंहः, पूनान
बमविस्फोटकाण्डे श्रीदामोदरश्चापेकरबन्धुः, ब
प्रान्ते चन्द्रनगरविप्लवे श्रीकन्हाईलाल दत्तः, मुजफ
रनगरे हत्याकाण्डप्रकरणे श्रीसत्येन्द्रनाथो वन्
किंगसफर्ड बमकाण्डे खुदीरामबोसः, इङ्गलेण्डे ब
विस्फोटनाभियोगे श्रीमदनलाल ढीङ्गरा इत्याद
महानुभावाः क्रान्तियज्ञबलिवेद्यामात्मनः प्राणब
मर्पयामासुः। अतोऽग्रे चामीचन्द्रावधविहारिब
मुकुन्दबसन्तोकुमारविश्वास भागसिंह वतनसिंहमे
सिंह काशिराम गन्धासिंह कर्तारसिंह बी०जी० पि
जगतसिंह बलवन्तसिंह हेंगासिंह वीरसिंहोत्तमसिं
रूडसिंह बाबू हरिनामसिंह सोहनलाल पाठकस
अम्बाप्रसाद रामसिंह भानसिंह यतीन्द्रनाथमुखर
नलिनी वाक्च्य ऊधमसिंह पण्डितगेंदालाल दी
खुशीराम गोपीमोहन बोमेलीयुद्धस्य चत्वारो वीराश
त्मनो बलिं समर्पयामासुः। तदनु धन्नासिंह बन्ता
धामियांबरियामसिंहधुग्गा किशनसिंहगर्गज्जस
सिंह दिलीपसिंहनन्दसिंहकर्मसिंह ठाकुरकेशरी
कुँवरप्रतापसिंहरामप्रसादबिस्मिलफूलसिंह सुख
शिवराम राजगुरुचन्द्रशेखरआजाद हरिकि
पं० जगतरामहरियानवीदिनेशचन्द्र गुप्तसरदारभ
सिंहप्रमुखा वीराः क्रान्तिकारिणी राष्ट्रादर
गौराङ्गशासनोच्छेदाय स्वराज्यप्रतिष्ठाप
चात्मोत्सर्गं चक्रुः। अन्ते सुभाषचन्द्रो व
हाभागो महात्माऽजादहिन्दफौजामिधानेन म



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



न्यसंघटनेनाभूतपूर्वां क्रान्तिं कृत्वा स्वतन्त्रभारतस्य राऽग्रक्रान्तियज्ञानुष्ठानस्य पूर्णाहुतिं प्रदायान्वर्द्धे ।

न केवलमेते सुगृहीतनामधेयाः स्वाभिधानधन्याः न्तिविधातार एव, अपि त्वन्येऽपि संख्यावन्तो त्मानो ज्ञाताज्ञातनामानोऽत्र क्रान्तियज्ञे प्राणबलिं र्ये गौराङ्गशासनाधिकारिभिर्निष्ठुरं निष्करुणं र्ममान्तर्वेदनादारुणं चापीड्यन्त कारागारेषु, न्ते शूलारोपणेन तत्प्राणानपि जहुः। परन्त्वेते र्यैःसहा देशभक्ताः गौराङ्गसाम्राज्यवादपशुबलदम-य भारतजनन्याः पराधीनतापाशोन्मोचाय तदुत्क-ाधनाय स्वराज्यसिद्धये चामोघं पुरुषार्थमाचरन्तः फल्यं वव्रजुः, स्वलक्ष्यं च बिभिदुः। न केवलं ांस एवापि तु काश्चिद्बाला ललनाश्चापि क्रान्त्यस्त्रं ृज्ञाना देशोद्धाराय स्वात्मबलिदानमर्पयन्।

क्रान्तिसिद्धान्ततत्त्वं याथार्थ्यादजानन्तः केचिज्जना ययेऽत्रेत्थमवधारयन्ति, बतान्यथाबोधं चाश्रयन्ति द्व क्रान्तिकारिणो देशभक्ता हिंसारसप्रणयिनो र्दया निष्करुणा वर्बराः पशुप्रायाः हिंस्रकवृत्तिदुर्मदाः नहिंसापरायणा निर्निमित्तं रक्तपातमाचरन्तो द्रोहार्थमेव प्रोद्धतं किलाऽकाण्डरणरङ्गताण्डवं न्तः स्वार्थसिद्धये अराजकतां कामयमाना विधि-त्वनियमव्यवहारविवेकशून्या यत्किञ्चनताग्र-णां विप्लववादिनो घोराश्च भवन्तीति। परन्त्विय रणा नास्ति सत्या तथ्या चाप्यंशतः। यतः क्रान्तिकरा ा महात्मानो विरक्ताः स्थितप्रज्ञा मातृभूमिस्नेह-ग्धहृदया मनुष्यताविदो देशोन्नतिकामाः सत्याश्रया मानवाः सिद्धान्तवादिनश्च भवन्ति। ते दयादा-ययशीलसौजन्यादिसात्त्विकान् भावानन्तर्हृदि धारयन्तोऽप्यथ स्वसिद्धान्तविरोधितत्त्वेभ्यः क्रोध-घृणादींस्तामसान् भावानपि मनसि दधते। सति च प्रयोजनेऽत्यावश्यके ते "अर्थं साधयामि वा देहं पातयामि वा" इतिवत् अनिवार्यपरिस्थित्यनुरोधात् स्वप्राणार्पणमपि कुर्वते। विरोधिनां जीवितापहारं धनापहारं सर्वस्वापहारं मानमर्दनमपि च विदधति। तेजस्वितया क्रान्तिकारिणो वीरा न कस्यापि प्रतिप-क्षिपामरस्य मनागपि कुटिलभ्रूभङ्गमात्रावमानं सहन्ते। स्वशौर्यवीर्यदृढतोदात्तमनस्वितादिगुणै-स्तैस्तैरेते स्वाभिमानधना भवन्ति। चारित्र्यं चामीषां संयमनियमसदाचारगुम्फयुक्तं पवित्रं चापि। प्रतिभाऽनुभवपराक्रमाश्चैतेषां महामानवानां काचि-द्विलक्षणां विचित्रामनन्यसाधारणीं नयनैपुणीं लोको-त्तरां दधति। साधूक्तम्—

"वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति॥"

नाऽस्माभिरेतद्विस्मर्तव्यं यद्भारतीया जनाः स्वरा-ज्यसिद्धिं केवलं महात्मनां गान्धिप्रमुखानां देशनेतृ-णामहिंसावादिनां प्रयासैरेवासादयन् प्रत्युत हिंसात्मि-कक्रान्त्याऽहिंसात्मकविधानवादान्दोलनैश्चोभयथा प्रय-त्नैर्देशोऽयमस्माकं स्वातन्त्र्यं लेभे।

धन्या इमे द्विविधा अपि हिंसाऽहिंसावादिन उभयविधा देशभक्ता राष्ट्रसेवका वीरा ये मातृभूमेः पारतन्त्र्यनिगडबन्धनान्मुक्तये राष्ट्रोद्धाराय स्वराज्य-स्थापनाय च मनसा वाचा कर्मणा प्रयत्नकोटिभिरा-जीवनं प्राणपणं बहु प्रयेतिरे। सर्वस्वमपि च राष्ट्र-स्वातन्त्र्यक्रान्तिवेद्यां बलिरूपमर्पयामासुः

एवंविधानां त्यागैकव्रतानां धैर्यधनानां प्रथित-यशसां स्वाभिमानिनां महतां मनीषिणां क्रान्तिका-रिणां देशबन्धूनां चरणकमलेषु सश्रद्धं सादरं सविन-यबहुमानं श्रद्धासुमनोऽञ्जलीननेकान्वयं मुहुर्मुहुर-र्पयामः कृतज्ञताभारपुरस्सरं च तान् सततं स्मरामः!!!



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★ नृपामात्यौ ★

## [ कोयमीश्वरः ? ]

ले० शिवप्रसादशास्त्री, उपनिरीक्षकः संस्कृतपाठशालानाम्, राजस्थान जयपुरम्

एकदा कश्चिन्नृपः स्वामात्याय राज्यभारं समर्प्य स्वयं प्रजायाः किमपि कृत्यं नावगतवान्। राजानञ्च राज्यकार्य-बहिर्मुखं ज्ञात्वा सचिवोऽसौ प्रजां रञ्ज-यन्नपि नाचेष्टत राज्यं स्वीकर्तुम्। यतोऽसौ बालत्वादेव सत्यपरः परसाहाय्यकर्ता चासीत्। एवं व्यतीते समये स राजानं समुपागत्यैकदा प्रोवाच :—भो नृपते ! न ह्मद्य राज्यकार्यं विधातुं शक्नोस्मि। संसारेऽस्मिन् न किमपि तथ्यमस्त्यतोहं वृथैव स्वजीवनं किमर्थं नाशयेयम्। अद्यप्रभृत्यहं वनं गत्वा परमेश्वरस्य प्रार्थनां विधाय जन्म-मरणदुःखं त्यक्तुं यतिष्ये। नृपतिरुच्चैर्हास्यं कृत्वा प्रोवाच—"कोयमीश्वरोस्ति यस्य भवान् स्तुतिं कर्तुं समुद्यतोस्ति।" एवं श्रुत्वा सचिववरोऽकथयत्—

चेद्वयं परमेश्वरं प्रत्यक्षं न पश्यामस्तर्हि स नास्ति किम्। चेद्दिवा तारागणा नावलोक्यन्ते तर्हि तारागणा न भवन्ति किम्। तेषामदर्शने सूर्यस्य प्रकाशः कारणम्। यामिन्यां श्वेतपीतादिरूपाणि न दृश्यन्तेऽतो रूपाणि न भवन्ति किम्। रूपाणि तु विद्यन्त एव परं तमस्तेषामदर्शने हेतुः। एवमेव विद्यमानस्यापीश्वरस्यादर्शने मोहोऽहंकारो वा कारणं विद्यते। निर्मोहस्य निरहङ्कारस्य च जीवस्येश्वरः प्रत्यक्ष एवेति निश्चितम्। संसारेस्मिन् सर्व एव भावाः प्रत्यक्षा न भवन्ति प्रत्युत अप्रत्यक्षा अपि केचन भावाः सत्यत्वेन स्वीक्रियन्ते। यथा हि पीड़ितस्य जीवस्य पीड़ायाः किं रूपं क आकार इति प्रत्यक्षं न कोपि करोति न च स पीड़ितो जनः स्वपीड़ाया आकारं परस्य कारयितुं प्रभवति किन्तु स्वयमनुभवति पीड़ायाः स्वरूपम्। एवमेवेश्वरोपि स्वानुभववेद्य एव।

अनुभविनां तन्मयत्वेन, उपदेशेन लोकसंन्यसनेन च निश्चीयते यदीश्वरोस्तीति। क्षीरे नवनीतं विद्यत एव परं न हि कोपि प्रत्यक्षं पश्यति, यदा क्षीरं मथ्यते तदा समुदेति नवनीतम्। सर्वत्र व्याप्तोपीश्वर एवं योगेन भक्त्या च प्रादुर्भवति। एवं श्रुत्वा स नृपतिः पुनरपृच्छत् यत् पूर्वमहं परमेश्वरं नामन्ये परमधुना भवत्कथनेन विश्वसिमि यदस्ति परमेश्वरस्तथापि स नररूपं कथं गृह्णातीति मे संशयं छिन्द्धि।

सचिवोऽब्रवीत् :—राजन् श्रूयतां सावधानचेतसा भगवान् भक्तवत्सलः सगुणो निर्गुणश्चेति गीयते त्रिगुणात्मके महति ब्रह्माण्डपिण्डे लोकशरीरेषु चराचरव्याप्तश्चैतन्यरूपो जगन्नियन्ता-निरञ्जनो-निराकारो ब्रह्मपदभाक् निर्गुणपदवाच्योस्ति यतोस्य जगतः स एव निमित्तकारणं स एवोपादानकारणम्। यस्य पृथिवी शरीरं, यस्यापः शरीरं, यस्याग्निः शरीरं, पादोस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि।

भक्तमनोरंजनो लीलाशरीरी च सगुणः। अदिति कश्यपयोरनेकसहस्रवार्षिकेणात्युग्रतरेणैव तपसापीतः परमेश्वरः प्रादुर्बभूव। पुराणप्रसिद्धेषु राम-कृष्ण वामनाभिधानेषु त्रिषु लीलाशरीरेषु पुत्रत्वमंगीकृत्य तयोरभिलाषं पूरयामास। को न जानाति ध्रुव-प्रह्लाद



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



दीनामनन्यसाधारणं तपस्तत्प्राप्तिश्च, यदि तादृशेष्वपि तपःसुचरितेषु कारुणिको भगवान्न प्रसीदेन्न वा भक्ताभिलाषं पूरयेत् को नाम तर्हि विश्वेशसत्तायां विश्वसीत। जगदारंभकालादेव नास्तिकतमः स्यात् सर्वोपिलोकः। अथचेश्वरपरलोकयोर्विश्वासमन्तरा विप्लवेत निखिलं भुवनम्।

अथ नृपतिरुवाच—भवत्कथनेन न तृप्यामि भो! मदीयान्या भ्रांतिरपि मूलतो विनाश्या। केचन जनाः दर्शनेषु परमेश्वरपदभाजो विषयेति वर्णितमेति गदन्ति परं मम मतौ विद्यतेऽयंविचारो यत्कथं संभवत्येतत्। कति दर्शनानि सन्ति। के च तेषां निर्मातारः? पुरुषाणां कथनं कथं प्रामाणिकं मन्येत। इति श्रुत्वा राजोक्तिं मन्त्री वक्तुमुपाक्रमत्:— अस्माकं भारतवर्षे नानामुनयो-ब्रह्मर्षयो-राजर्षयश्च समुद्भूता यैश्चिन्तितं न कदापि मिथ्या भवितुं शक्नुयात। तैरेव निर्मितानि दर्शनानि षट्संख्यकानि विद्यन्ते। तेषु दर्शनेषु महर्षिपतंजलिना योगदर्शनं निर्मितम्। तत्र च निरतिशयं सर्वज्ञताबीजमिति सूत्रं विद्यते। जीवानां ज्ञानमेकतोऽपरस्याधिकं भवति तथा च परम्परया ज्ञानाधिक्यमेव सर्वेषामल्पज्ञत्वं सूचयति। जानाति योधिकान् ज्ञेयपदार्थान् सोधिकज्ञानवन् संपद्यते। एवं पराकाष्ठा ज्ञानस्य यत्र विश्राम्यति, यस्मात् ज्ञानातिशयो न कुत्रापि विद्यते स सर्वज्ञ ईश्वर एव।

तथा चैश्वर्येष्वपि क्रमः परम्परा च विद्यते। यः सर्वाधिक ऐश्वर्यवान् स परमेश्वरः। यथा जीवेषु सिंहः सर्पो नक्रः सम्राट् च सर्वाधिकाबलवन्तोपि मृत्योर्बिभ्यति अतो मृत्युस्तेषु बलवान् मृत्यौ यमस्यैश्वर्यं यमे च विधातुः विधातरि च यस्यैश्वर्यं स एव परमेश्वरः।

वैशेषिकदर्शने च प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि विद्यन्ते। तत्र चानुमानेन परमेश्वरः सिद्ध्यति। यथा जगत् सकर्तृकं कार्यत्वात् घटवत्। तथा च जगतियानि सावयवानि परिवर्तनशीलानि वस्तून्युपलभ्यन्ते तेषां कार्यरूपाणां कर्तारोऽवश्यं भवन्ति। कर्तारमन्तरा कार्यासिद्धेः। सावयवं प्रागभावप्रतियोगित्वित्यङ्कुरादिकमकर्तृकं कथं प्रादुर्भवेदस्मादृशास्तु जीवास्तादृशकार्याणि विधातुं नितरामसमर्थाः। अतोऽस्मदतिरिक्तो जगत्कर्ता परमेश्वरः।

न्यायदर्शने च महर्षिणा गौतमेन "ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्" इति सूत्रं निर्माय समुद्घोषितं यदस्ति परमेश्वरः। यथा-जगति सर्वोपि प्राणिवर्गो दुःखंकर्मणां विफलताञ्च न वांछति, सुखाय साफल्यायैव च कर्म करोति परं दुःखं विफलतामपि च लभते। यदि जीवः स्वतंत्रः स्यात्तर्हि कर्म कुर्वाणोपि न जातु दुःखं लभेत। अनभिलषितत्वाच्च कर्मणि वैफल्यं न कदापि प्राप्नुयात। अतो यदधीनो जीवस्तत्कर्माणि च स एव परमेश्वरः। यदि वर्तमानामपि वटबीजेऽन्तः शक्तिं नान्यो जनो पश्यति तथैव सर्वत्रव्याप्तमपीश्वरं न केत् कोऽपि पश्यति तर्हि कस्य दोषः। नैष स्थाणोरपराधो यदेनमन्धो न पश्यति पुरुषापराधः स भवति। अपि च राजन्!—केचन स्थूलमतयो विकासवादिन इत्थं वर्णयन्ति यत् नैसर्गिकोयं संसारो निसर्गत एवोदेति परिवर्तते च। न पुनरस्य कश्चिदपरः कर्ता विद्यते। परमाणुपुञ्ज एव स्वयं भावेषु परिवर्तन्तेऽवलोक्यन्ते च। जडेभ्यश्चेतनाश्चेतनेभ्यो जडाश्च सम्पद्यन्ते। तेषामिदं मतं भ्रान्तिपूर्णम्। यतो हि परमाणवो जडाः, जडेषु च नियामकता वस्तुस्वभावनिर्धारणशक्तिश्च क्व दृष्टा श्रुता वा? नहि दण्डो दण्डिनमन्तरा दण्डयितुं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# पाक-अमेरिकयोः सैन्य-सन्धिः

लेखकः—विद्यार्थी श्रीमांगीलालमिश्रः नेछवा, सीकर राजस्थान

## सन्धेः स्वरूपम्

पाकिस्तानेन सह अमेरिकादेशः सैन्यसंधिं विधातुमुत्सुकोऽस्ति यद्यपि तेन स्पष्टतः ईदृशी घोषणा न कृता, परं पूर्वीयातलान्तकनौविभागस्य प्रमुखेन एडमिरलेन रिचार्डेन कृतं पाकिस्तानीयवायुयान-क्षेत्राणामवलोकनमस्य प्रमाणम्। अन्यथा किं प्रयोजनं निरीक्षणेन, किं वा महत्त्वम्। तुर्कीदेशस्य राष्ट्रपतिः, ईराकनरेशश्च पाकिस्ताने आगन्तुकामः। स्वयं पाकिस्तानस्याधिकारिभिरिदं स्वीकृतं, यत्—"स्वकीयां वाहिनीं दृढां विधातुं वयं अमेरिकातः शस्त्रास्त्राणि ग्रहीष्यामः, परमस्य कृते वायुयानक्षेत्राणां प्रदानमस्माभिः न स्वीकृतम्"। किन्तु यदा सकलो हि देशः सैन्यक्षेत्रम् विधीयते तर्हि एक-द्वि-त्रिवायुयान-क्षेत्राणां प्रदानस्य का वार्ता। आश्चर्यमिदं यत् पाकिस्तानसम्मुखे ईदृशो हि को हेतुः समायातः; यस्य वशात् सोयममेरिकाहस्ते गन्तुमिच्छुकः?

## अस्य आवश्यकता, अमेरिकाया औत्कण्ठ्यं च

साम्प्रतं विश्वस्मिन् शीतयुद्धमिव प्रचलति। द्वौ भागौ विश्वराजनैतिकदलानाम्। एकस्य नेता अमेरिका, द्वितीयस्य रूसः। पश्चिमयूरोपः अमेरिकया सह वर्तते, तर्हि पूर्वीययूरोपः रूसेन सह। पश्चिम-यूरोपे रूसस्य प्रभावविनाशार्थं तत्रत्यैः चतुर्दशराष्ट्रैरेका योजना निर्मिता या "उत्तरीय-अटलाण्टिक संरक्षणायोजने"ति कथ्यते। यद्यपि इटली-ग्रीकः तुर्कीदेशश्च न अटलाण्टिकाः, परं ते अमेरिकातः सैन्यसाहाय्यं गृह्णन्ति, अतोऽस्यां योजनायां तेऽपि सम्मिलितीकृताः। इत्थमयं रूसस्य प्रथमो विरोधी भागः।

द्वितीयश्च दक्षिणकोरिया जापानश्चाऽस्ति। ततः फार्मोसा-हिन्दचीनपर्यन्तममेरिकायाः सुरक्षाश्रेणिः। अस्याः श्रेण्या एव सहायिका श्रेणिरेका हांगकांगः, मलाया, थाइलैण्ड, सिंगापुरश्चास्ति। अनयोः भागयोः मध्येऽमेरिका-प्रभावो न। इत्थं तत्र अमेरिका-सुरक्षा-श्रेणिरपि न। अस्यैव पूर्त्यर्थं अमेरिकया "मध्यपूर्वसुरक्षायोजना" नाम्नी एका अन्या योजना निर्मिता। अस्यामास्ट्रेलियान्यूजीलैण्डेऽपि सम्मिलिते स्तः परं योजनेयं पूर्णा न संजाता। यतोऽस्याः योजनाया आधारभूतेन मिश्रदेशेन जनरलनजीबस्य नेतृत्वे घोषितमिदं यत् "यावत् मिश्रस्य स्वेजनहर प्रदेशो ब्रिटिशसैनिकैः रहितो न क्रियते, तावद्देशोऽयं

---

शरीरधनबुद्धिबलेन सेवां महात्मनो गान्धिनो लोका मन्यन्ते। शरीरेण तेन 'बोअर' युद्धावसरे आहतसैनिकानां महती सेवा कृता। स्वाश्रमस्थितानां रोगिणां (कुष्ठरोगिणामपि) सेवा तस्य प्रसिद्धा। धनेन तस्य सेवेदृशी यत्तेन यत्किञ्चिदपि धनं लोकेभ्य उपहाररूपेण प्राप्तं तत्सर्वं लोकसेवार्थं प्रदत्तम्। न गृहीतं किञ्चिदपि। बुद्धिबलेन देशसेवा तु तस्य सर्वजनीनैव यद्विना युद्धेन भारतभूमिराङ्ग्लिकहस्तेभ्यो मोचिता। सर्वभावेन तेन मातृभूमेः सेवा विहिता। अतः सर्वस्मिन् संसारे तस्य कीर्तिकौमुदी प्रकाशमाना भूता। सर्वभावेन येषां हृदये मातृभूमिभक्तिर्वर्तते, ते जना एव धन्यतमा धन्यतमञ्च तेषां जीवनम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



योजनायां सम्मिलितुं अशक्तः ।" फलतः अस्य पूर्तिकरस्य अन्यस्य देशस्याऽन्वेषणा यूरोपीयराष्ट्रैः कृता ।

किंचित्कालानन्तरं संसारेणेत्थं श्रुतं यत् पाकिस्तानो हि मध्यपूर्वसुरक्षायोजनायां सम्मिलितुमुत्सुकः । नाजीमुद्दीनस्य स्थाने मुहम्मदअलिनि प्रधानामात्ये संजाते वार्त्तेयं वृद्धिं गता । पाकिस्तानस्य प्रधान-सेनापतिना अयूबखानेन तुर्की, ब्रिटेनामेरिका-राष्ट्राणां परिभ्रमणं कृतम् । तत्रत्यानां सैनिकस्थलानामवलोकनं च विहितम् । तदधिकारिभिः सह वार्ता अपि विहिता। पुनः पाकिस्तानस्य गवर्नरजनरलेन गुलाममुहम्मदेन "हज" यात्राया आवरणेऽमेरिका यात्रा कृता । इत्थं सैन्य-सन्धिरयं पूर्तिं नीतः । परं प्रश्नोऽयं यत् पाकिस्तानेन भारतस्य;तटस्थं पन्थानं विहाय किमर्थमिदमाचरितम् ?

## पाकिस्तानस्य सैन्यसन्धौ प्रमुखो हेतुः तस्य नेतृत्व-वांछा

पाकिस्तानो हि यवनराष्ट्रम् । स इस्लामस्य प्रचारकः । स एशिया-देशीयः । तेन एशियां त्यक्त्वा यूरोपेण सह ग्रन्थि-बन्धनं कृतम् । तस्य इच्छेयं-यत्- 'स मुस्लिम-राष्ट्राणां नेता भवेत्" एतदर्थमेव तेन करांची नगर्यां "विश्व-मुस्लिम-कांफ्रेस" करणं विचारितम्, परमरबराष्ट्राणि नेच्छन्ति यत पाकिस्तानः मुस्लिम-राष्ट्राणां नेता स्यादिति । जनरलनजीबेन घोषणा कृता यत् मिश्रः जिन्नापथस्यानुचरो न, परं गांधि-पथस्य । फलतः हताशः पाकिस्तानः अमेरिकासाहाय्येन मध्यपूर्वस्य नेतृत्वमभिलषति ।

## भारतस्य कृते अस्य फलम्

सांप्रतं भारतं तटस्थराष्ट्रम् । अमेरिकायाः कथनमिदं यत् 'ये तटस्थाः, ते तस्य शत्रवः"। अतो भाविनि युद्धे तटस्थानि राष्ट्राणि योधयितुं स प्रयत्नशीलः । डा० मुसद्दिकस्य पतनात् ईरानोऽमेरिकायाः मित्रराष्ट्रम्। पूर्वे पश्चिमे च पाकिस्तानस्य विभजनात् हिन्दमहासागरे अमेरिकायाः पूर्णं प्रभुत्वम् । अदनः सिंगापुरश्च पूर्वमेव ब्रिटेनाधीनौ । इत्थं युद्धकाले भारतीयाऽऽयात-निर्यात व्यापारोप्याङ्गलदेश-अमेरिकाधीनः । फलतः भारतमार्थिकदृष्ट्या पंगुं विधाय युद्धार्थं बाध्यं कृत्वा शान्तिक्षेत्रस्थाने रणक्षेत्रकरणस्य प्रयत्नः । अस्य द्वितीयो हेतुः—भारतस्य विशाला जनशक्तिः, यस्याः प्रतिद्वन्द्वी संसारे केवलं चीन एव ।

पाकिस्तानः काश्मीरेच्छुकः । अद्यावधि काश्मीरे संपादितानि पाक-कुचक्राणि साफल्यं न प्राप्तानि। इत्थं मर्दितसर्पवत् पाकः अमेरिकासाहाय्येन काश्मीरमधिकर्तुमिच्छति । इत्थं भारतस्य कृते महोपद्रवकारको हि सैन्यसंधिरयम् । पार्श्ववर्तिनः जाज्वल्यमानं गृहमवलोक्य तस्य सावधानीकरणं मानवतासिद्धान्तः। पाकिस्तानं कुमार्गगामिनमवलोक्य तत्कृते सद्बुद्धि प्रदानं भारतस्य धर्मः । यतो हि सोऽस्माकं पार्श्वराष्ट्रम्। यदि स मन्येत तर्हि सर्वेषां एशियाई-राष्ट्राणां कृते हितावहम्, नो चेत्तस्य नाशो निश्चित एव । दुर्जनः स्वयं दुःखमापद्यमानः परेषां कृतेऽपि कष्टप्रदो भवतीति निश्चप्रचम् ।

अमेरिका दिनेष्वेषु विश्वस्मिन् प्रभुतमं राष्ट्रम्। स यं कमपि स्पृशति, स तु नष्टप्राय एव । कोरिया अस्माकं सम्मुखे उदाहरणम् । किं पाकिस्तानोऽपि तामेवावस्थां लब्धुकामः ! पाकप्रजाः शान्तीच्छुकाः। तदधिकारिणश्च स्वार्थवशात् संघर्षप्रियाः । अस्यामवस्थायां तत्रत्याः जनाः यदि देशविभाजनस्य त्रुटिमनुभवन्तः, संयुक्तभारतस्य निर्माणे सहायकाः स्युस्तर्हि किमाश्चर्यम् । किमखिलेश आश्चर्यमिदं पूर्णीकरिष्यति!

सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग्भवेत्"॥

———



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# दीपकः

लेखकः—श्रीब्रह्मानन्दशास्त्री साहित्याचार्यः संस्कृतलेकचरर एस्० जी० कॉलिज कासगंज, एटा

दीप! त्वमेव धरणीतलमध्यवर्ती,
लोकोत्तरं सुविमलं व्रतमादधासि ।
यच्चन्द्रसूर्यविरहेऽपि महान्धकारं,
दूरीकरोषि जगतश्च परार्थदृष्ट्या ॥१॥

लोके भवन्ति मनुजा हि परार्थकामाः,
स्वार्थाऽविरोधमुपलक्ष्य समाचरन्ति ।
श्लाघ्यः परं त्वमसि चात्र समस्तभूमौ,
स्वाङ्गं विदाह्य कुरुषेऽन्यमहोपकारम् ॥२॥

यावांश्च भूतनिवहोऽखिलविश्वमध्ये,
स्नेहं कदापि वपुषा न जहाति शश्वत् ।
मन्ये च क्वापि भवतोऽस्ति फलाभिकांक्षा,
यत्प्राप्तिलोभवशगः सकलं जुहोषि ॥३॥

पुण्यं तवोच्चचरितं यदचेतनस्य,
व्रीडां परां समवलोक्य न याति लोकः ।
यः शिक्षितोऽपि भवता कुरुतेऽपकारम्,
स्वार्थं विहाय सुकृतौ न मनो विधत्ते ॥४॥

शेते यदा च ससुखं भुवि जीवलोकः,
दीप्तस्त्वमेव सततं प्रहरीव नित्यम् ।
जाग्रत्समस्तरजनीं नयसे तथैव,
सिद्धो यथा तपति कोऽपि वने तपस्वी ॥५॥

वायुः स्वभावचपलः कुरुतेऽथ बाधाम्,
व्यक्तं विधूय च शिरः प्रकटीकरोषि ।
धर्मान्न मां विचलितं कुरु भो! नभस्वन्,
श्रेयस्करी च भवतीह सुधर्मनिष्ठा ॥६॥

किं वर्णयामि च सखे! तव भव्यभावान्,
त्वत्तः परो न भुवनेषु विभाति कोऽपि ।
निष्कामकर्मनिरतः सहसा सहर्षं,
योऽसो तनुं परहिताय तृणीकरोषि ॥७॥

साधुस्तथा खलजनो धनिको दरिद्रो,
रङ्कस्तथा नरपतिः कृपणो ह्युदारः ।
नैको जनोऽनुपकृतश्च वसुन्धरायां,
यः पक्षपातरहितो न भवेत् कृतज्ञः ॥८॥

इष्ट्वा क्रतून्युगशतानि तपश्च कृत्वा,
वांछन्ति मोक्षपदवीमृषयो महान्तः ।
निर्वाणता च भवता सहसा सुलभ्या,
कृत्यं शुभं विफलतां न कदापि याति ॥९॥

यच्चाङ्गदाहसमयेऽग्निकणाः क्षरन्ति,
क्षिप्तानि देवकुसुमानि, न ते स्फुलिङ्गाः ।
कृत्यं विलोक्य तदपूर्वमतीव हृष्टाः,
कुर्वन्ति निर्जरगणाः खलु पुष्पवृष्टिम् ॥१०॥

तेनैव लोकविदिता कुसुमाख्यसंज्ञा,
नेमान् कृशानुकणकान् भुवि व्याहरन्ति ।
भो! दीप! सर्वभुवने बहुपुण्यशाली,
शुभ्रं यशो दिविषदस्तव कीर्तयन्ति ॥११॥

आयान्ति चाञ्जनविधौ तव सन्निधिं ये,
तेषामुदात्तसुगुणैस्तनुते महत्त्वम् ।
वंशे यथोन्नतजनं कुलदीपकञ्च,
ब्रूते तथाखिलजनो भुवनप्रदीपम् ॥१२॥

यत्कृष्णवर्णमनिशञ्च मलं प्रसूषे,
तत्कज्जलञ्च तव पुण्यतपःप्रसादः ।
यन्नेत्रयोस्तिमिरतामपनीय सम्यक्,
ज्योतिःप्रदानमधिकं कुरुते जनानाम् ॥१३॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# मालाकारः

पं० श्री मदनमोहनझाः व्या. न्या. सां. आचार्यः । मुजफ्फरपुरस्थराजकीयसंस्कृतमहाविद्यालयसाहित्यप्रधानाध्यापकः

[ १ ]

अद्यत्वे काशीराजस्यान्तःपुरोद्याने एकोऽभिनवो मालाकारः समागतोऽस्ति । 'वसन्त' इति स स्वकीयन्नाम प्रकटयति । वस्तुतः स रूपगुणयोः ऋतुराजाद्वसन्तान्न्यूनो नास्ति ।

वसन्तर्तोः प्रभातेऽपरिचित एकस्तरुणो राजसभायां जीविकेच्छया यदा समुपस्थितोऽभूत्, तदा तमालोक्य सभासदामीर्ष्याकुटिलान्यपि मनांसि प्रीतिरसैरभिषिक्तान्यभूवन्. वयोवृद्धस्य मन्त्रिणः सन्दिग्धमथ च गम्भीरं चेतः स्नेहस्पर्शेन चञ्चलमभून राज्ञो नयने प्रशंसापुलकेन विस्फारिते समभूताम् अपि च रमणीयतिरस्करणीव्यवहितानां युवतीनां चलानि चक्षूंषि स्थिराण्यभूवन् ।

राज्ञा सभायां सादरमुपवेश्य स पृष्ट-युवक ! कस्त्वमसि ? कस्मिन् देशे कम् परिवारं त्वमात्मजन्मना सुखिनमकरोः ? तव शरीरं कुसुममिव कोमलं कमनीयञ्चास्ते, त्वं किं कार्यं करिष्यसि ? त्वया किमपि न कर्तव्यं भवेत्, त्वन्निरन्तरम्मदीयां राजसभामेवानन्दय ।

'वसन्तः' मूर्तिमान् विनय इव मस्तकं नमयित्वा सधैर्यदार्ढ्यमकथयत्-महाराज यस्य सविधे किमपि कार्यं न तिष्ठति तस्य क्लेशो निस्सीमो भवति, कृपया मां तस्मात्कष्टाद्रक्षतु भवान्-मम साधारणीं शक्तिं कस्याञ्चित् स्वसेवायामेवोपयुङ्क्ताम् ।

राजा प्रसन्नः सन्नुवाच-युवक ! कथय-कीदृशं कार्यं तुभ्यं रोचते ? मन्त्री, सभाकविः सेनापतिः अन्योऽपि वा त्वादृशं सहकारिणमासाद्य प्रसीदे[...] बोधय-किं कार्यं त्वमभिलषसि ?

'वसन्तः' अञ्जलिं बद्ध्वाऽवोचत्-महारा[ज] अहमसमर्थोऽस्मि, कस्यापि महतः कार्यस्य भारं [...] न शक्नोमि, अत इच्छाम्यहं-महाराजस्यासाधा[रण]द्याने मालाकारो भवितुम ।

सर्वैरवगतम्—यदस्य रूपं तु मनोहरमास्ते, [...] मयमुन्मत्तोऽस्ति । राजा दययोन्मत्तस्य प्रार्थनाम[ङ्गी]चकार । स 'वसन्तः' तद्दिवसादारभ्य राज्ञोऽस[...]रणोद्याने मालाकारः समभवत् ।

[ २ ]

उद्यानस्यैकस्मिन् कोणे 'वसन्तस्य' कुटीरम[...] तत्कुटीरं वल्लरीभिरावेष्टितम, पल्लवैश्चाच्छादितमा[...] तस्यान्तःप्रदेशे सदा पुष्पशय्या कल्पिता ति[...] तत्रत्या मूका तरुश्रेणी मनोहरेण पुष्पदर्शनेन वाच[...] भूत्वा कोकिलकण्ठेन परस्परं वार्तालापमाच[...] 'वसन्तः' सायं प्रातः वीणास्वरेण स्वरं मेलयित्वा [...] मधुरं गायति, तदा तस्य स्वरेणोन्मत्तोऽनिलः [...] प्रासादस्य प्रतिप्रकोष्ठं गत्वाऽऽनन्दस्य स्रोतः प्र[...]यति । प्रभाते नानाविधानि पुष्पाणि स[...] 'वसन्तो' यानि मनोहराणि माल्यानि निर्मिमीते, [...] हृदयं पुलकयन्ति, दम्पतीनां सम्मेलनं मधुर[...] अपि चाविवाहितानां युवतीनां प्राणान् अपरि[...] प्रणयवेदनाभिः पीडयन्ति, विरहव्यथाभिर्व्याकुल[...] च ।

उषसि नवीनस्य मालाकारस्य भक्तिपूर्णमुप[...]



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रहीतुम् यदा राजकुमार्यः पाटलालवालेषु, बकुलवीथिषु, मणिशिलासु च स्वकीयानरुणान् चरणान् न्यस्यन्त्यः मालाकारकुटीरपरिसरे समवेता भवन्ति, तदा समप्रमुद्यानं प्रसन्नमभिजायते। तस्मिन् काले 'वसन्तः' हरितहरितेषु पल्लवपुटकेषु हिमार्द्रनवकुसुममाल्योपहारमानीय स्वसेवावृत्तिं सार्थकयति।

'वसन्तः' कुमारीणां रूपगुणानुरूपमेव तत्तन्माल्यनिर्माणाय पुष्पाणां निर्वाचनं कुरुते। 'इन्दिरायै' समुज्वलेन्दीवराणाम्, शुक्लायै विकाशितपाटलानां, 'आनन्दितायै' अनिन्दितमल्लिकानाञ्च माल्यान्यर्पयति।

आसां पश्चात् एकाऽपरापि युवतिः प्रतिदिनमायाति। सा काली कुरूपा चासीत् अपि च तदनुरूपमेव तस्या राजकन्यायाः नामापि यमुनेत्यासीत्। सर्वे जानन्ति यमुनाया जलं कालं वर्तते।

'यमुना' स्वयमपि जानाति—यदहं कुरूपास्मि। अतः पाटलावर्णस्य वस्त्रस्याञ्चलेन स्वमुखं गोपयन्ती दर्शकदृष्टिपरिहारार्थमिव सर्वतः पश्चात् तिष्ठति।

तस्या नेत्राणि सदा सलज्जानि चरणानि च कुण्ठितानि तिष्ठन्ति। कण्ठस्तस्याः कोमलो हृदयञ्च भीरु आसीत्। विधिना तदङ्गेषु दुर्निवारः पराभवोऽङ्कितः। तं निह्नोतुं तस्यां सामर्थ्यन्नासीत्। अन्या राजकुमार्यः स्वसौन्दर्यगर्वैरुन्मत्ता भूत्वा हसन्ति गायन्ति, नृत्यन्ति च। तासां गतिरकुण्ठिता व्यवहारश्च स्वाधीनोऽवर्तत। ता 'वसन्तस्य' सम्मुखे हसन्त्यो विविधमवदन्. माल्यानि पर्यदधत, पुष्पाण्युदक्षिपन् मिथो हस्ताहस्ति कृतककलहञ्चाकुर्वन्। 'वसन्तः' प्रसन्नेन चेतसा तासां चरणेषु पुष्पाञ्जलिमुपाहरत्, वीणया तासां रूपमस्तौत्, यदा तेषामेवं विनोदः प्रक्रमते, तदा 'यमुना' किं कुरुते? तस्मिन् समये सा लज्जया भयेन च क्वचनैकस्मिन् भागे मूका स्थित्वा आत्मानं गोपयति, कोऽपि भ्रमेणापि तां नेक्षते।

एवमवहेलिताऽपि सा प्रतिदिनं तत्र याति, कुतः? यतो 'वसन्तं' प्रति तस्याः सत्यमाकर्षणमासीत्। यद्यपि 'वसन्त' स्तां द्रष्टुमपि नेच्छति, तस्य नेत्रे अन्यराजकुमारीसौन्दर्यसमुद्र एव मग्ने तिष्ठतः, तथापि 'यमुना' 'वसन्त' मालोक्य स्वनयनपिपासामुपशमयति। सहजोऽनुरागः प्रत्यनुरागं नापेक्षते। अन्यास्तरुण्यो 'वसन्तस्य' सेवां, स्तुतिं, मालाञ्चोपलब्धुमागच्छन्ति परन्तु 'यमुना' आगच्छति यमुनावच्छयामलयोः सजलयोरुज्वलयोश्च स्वनेत्रयोर्भक्तिं भृत्वा 'वसन्तस्य' रूपम् पूजयितुम्।

यद्यपि तां रूपहीनां, दीनां, वाक्पाटवरहितां द्रष्टुं 'वसन्तः' उत्सुको नासीत्, तथापि सा 'वसंतस्य' दृष्टिपथगता बभूव, यतः अन्याभिर्युवतिभिः सार्धम् स्वजीवनतन्त्रीं वादयितुं सा न शक्नोति। अर्थात् एतत् वैषम्यमेव 'वसन्तस्य' तस्यां दृष्टिनिक्षेपहेतुः। अन्यथा 'वसन्तो' रूपपिपासिते निजनेत्रे कुरूपायास्तस्या उपरि कथं पातयेत्! तस्मिन् समये यौवनेन तप्तं तस्य रक्तं रूपमदे मूर्च्छितमासीत्।

रूपहीनामपि 'यमुनां' तस्मात् रूपहट्टात् निष्काशयितुमुपायो नासीत् अतो 'वसन्तः' केवलं सभ्यतानियमं पालयितुम् अन्याभ्यो राजकुमारिकाभ्यो माल्यानि निर्माय तदवशिष्टै र्गन्धहीनैः पुष्पैर्निर्मितामेकां मालां 'यमुनायै' तथा ददातिस्म, यथा राज्ञां द्वारेषु भिक्षुकाय भिक्षा दीयते। परन्तु 'यमुना' तामपि मालां देवप्रसादमिव महत्या श्रद्धया परिदधाति स्म।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यस्मिन् दिवसे ताः सुन्दर्यः ततः परावर्तनसमये एकवारमपि परावृत्य हसन्त्यो 'वसन्तो'परि कुटिलं कटाक्षं निक्षिपन्तिस्म स दिवसो 'वसन्तस्य' कृते महोत्सवमयो बभूव, अपि च तस्याः प्रसन्नतायाः एष परिणामो भवन्नासीत् यत्तदग्रिमे दिवसे 'वसन्तः' 'यमुनायाः' कृतेऽपि कियदुत्तमां मालां ग्रथ्नातिस्म। तस्मिन् दिने 'यमुनायाः' मन आनन्दमन्थरं भूत्वा आवश्यकमपि कृत्यं व्यस्मार्षीत्।

एवंप्रकारेण दिनानन्तरं सन्ध्या, सन्ध्यानन्तरं रात्रिः, रात्रेरनन्तरं प्रभातम् मन्दं मन्दं सुखस्रोत इव प्रवहमानानि व्यत्यगच्छन्। तेषु दिवसेषु तास्तरुण्यो 'वसन्तं' परिवेष्टितवत्य आनन्दमग्नाः प्रणयोन्मत्ताश्चातिष्ठन्। 'वसन्तः' पुष्परसेन तासां वस्त्राणि, 'मेंहदी' पत्रद्रवैश्च करचरणान् रञ्जयित्वा मधुरेण हास्येन, प्रियैर्वचनैः साभिलाषविलोकनैश्च हृदयान्यपि रञ्जयितुमचेष्टत। तासां हृदयानि तै रक्तानि भवन्तिस्म न वेति को जानाति ? परन्तु अत्र न सन्देहः, यत्तासां युवतीनां किसलयवदुपरक्तैरधरोष्ठैः, दाडिमकुसुमकल्पैः कपोलैः, कुसुम्भद्रवरक्तैर्वस्त्रैश्च एवं समस्तं रागं सञ्चित्य 'वसन्तस्य' हृदयं रक्तीकृतम्। तास्तरुण्यो यावन्तमन्तरङ्गभावं वर्धयन्ति, तावदधिकमेव शून्यत्वं स्वहृदये 'वसन्तो'ऽनुभवति, अपि च क्रमशः तच्छून्यत्वं पूरयितुं कामपि सुन्दरीं स्वजीवनमन्दिरे प्रतिष्ठापयितुं विकलोऽभवत्।

एकस्मिन् वासरे यदा सन्ध्यायां तरुषु पुष्पलक्ष्मी उपहसन्ती आसीत्, दक्षिणानिलो विरहिजनोच्छ्वास इव विश्रम्य विश्रम्य कुसुमकाननेषु कम्पमुत्पादयन्नतिष्ठत्, पुष्पपरिमलप्रमत्ताः कोकिलाः कलप्रलापं न्वाना अवर्तन्त, तदा 'वसन्तस्य' प्रीतिगीतिं रुद्ध्वा राजकन्या इन्दिरा साक्षादिन्दिरेव तत्कुटीरद्वारि समागता। 'वसन्तः' ससम्भ्रममुत्थाय पुष्पपूर्णमेकं पुटकं तच्चरणयोर्निक्षिप्याचचक्षे—इन्दिरे ! त्वम् बहिः पुष्पाणि तु नित्यन्नयसि, मदीयमान्तरमतुलनीयं पुष्पं किं तव चरणयोः स्थानं नासादयेत् ? इदं पुष्पवनमावयोर्विवाहोत्सवेन किमधिकं प्रफुल्लितं न भवेत् ?

'इन्दिरा' भ्रुवौ विनत्य पुष्पाणि घृणया चरणप्रहारैरुपमर्द्य चपलेव चमत्कृत्यावोचत्—एकस्य नीचस्य मालिनः इयत् साहसम् ?

किं रे ! अनुग्रहमपि त्वं प्रणयं वेत्सि ? एकां राजकन्यां स्वकुटीरे रक्षितुं सौखिकत्वं त्वय्युत्पन्नम् ! किं त्वन्न जानासि यन्मम पाणिग्रहणाय 'कर्णाट' नरेशो याचकोऽस्ति ? तव सर्वमेवंविधं साहसं स्वस्तस्मिन् क्षणे नश्येत्, यदा राजादेशेन त्वं शूले समारोपितः स्याः।

'वसन्तस्य' हृदये एतेनापमानेन या वेदना समजायत, सा शूलाघातात्कथमपि न्यूना नासीत्। यस्यां इन्दिरायाश्चरणयोः स स्वहृदयाकरस्य श्रेष्ठाच्छ्रेष्ठं बहुमूल्यमर्घ्यमेकैकशोऽर्पयित्वा रिक्तः सम्पन्नोऽस्ति, अद्य सैव तं तुच्छात्तुच्छं विज्ञाय पदुभ्यामवहेलितवती, संसारे प्रेमभक्त्योः प्रतिकारः किमेवमेव कर्तव्यः ?

'वसन्तः' इन्दिरायाश्चरणयोर्निपत्यालपत्—त्वं मां शूलमारोपयितुमिच्छसि चेदारोपय नाहं रुणध्मि, परमिन्दिरे ! विचार्य पश्य—बहिर्दीनोऽपि नाहमभ्यन्तरे दीनः यदैश्वर्यम्मया त्वच्चरणयोरर्पितम्, तत्कस्यापि महाराजस्य भाण्डागारेऽन्विष्य नोपलब्धुं शक्यम्। मां सर्वथाऽऽकिञ्चनं कृत्वा मा मारय।

'इन्दिराउच्चैरहसत, तस्या असावुपहासपरम्परा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



तीक्ष्णच्छुरिकेव 'वसन्तस्य' हृदयं विदारयन्ती शनै-रन्तरधात ।

'वसन्तः' सविनयमुवाच-इयतामह्नां निष्फलायाः पूजाया उपहारस्वरूपं ममान्तिममेकमनुरोधं स्वीकुरु । श्वः प्रातःकालात प्राक् कस्याप्यग्रे स्वमेनं प्रसंगं न प्रकाशय । अहं वारमेकं 'शुक्लया' तथाऽऽ'नन्दितया' साकमपि स्वभाग्यं परीक्षितुमिच्छामि ।

'इन्दिरा' सगर्वमूचे अस्तु, स्वीकृतेयं तव प्रार्थना । स्वयमहं ते राजकन्ये समाह्वयामि । परन्तु इदमपि कथयामि यदिदं तव दुराशामात्रम् । विश्वसिहि कापि राजकन्या मलिनो गले प्रणयमाल्यं नार्पयेत् । अन्यासां कथैव का ? कुरूपा यमुनापि त्वान्नेच्छेत् । माली सुन्दरतमोऽपि भवतु, किन्तु राजकुमार्यस्तं प्रणयिनं विधातुं न शक्नुवन्ति ।

'इन्दिरा' गत्वा 'शुक्लां' प्राहिणोत्, सापि तथैव 'वसन्तस्य' प्रणययाचनां तिरस्कृत्य परावर्तत । तदनु-गताऽऽ 'नन्दिता' । अपिच सापि व्यथाविकलं मालाकारं वाग्बाणैरुपविध्य न्यवर्तिष्ट । 'आनन्दिता' विहस्य 'यमुना'मवदत्--अयि ! यमुने !! गच्छ, त्वां 'वसन्तः' समाह्वयति ।

'वसन्तः' समाह्वयति ? माम् ? आनन्देन, उल्लासेन, लज्जया, संकोचेन, आशया, आशङ्कया च 'यमुनायाः' हृदयं समुच्छलितम् । सा स्वभगिनीनां नयनैर्नयने मेलयितुं न शशाक । तया 'आनन्दि-तायाः' क्रूरे परिहासे ध्यानं न दत्तम् । सा तीर्थयात्री भक्त इव परमानन्देन, प्रथममिलनभीता नवोढेव कम्पितहृदयेन, मन्दं मन्दं 'वसन्त'-सम्मुखे समुपस्थाय नतमस्तकाऽतिष्ठत् ।

'वसन्त'स्तस्मिन् समये भूलुठितो रुदन्नासीत् । तेन दृष्टिरपि यमुनाभिमुखी न कृता ।

'वसन्तं' रुदन्तमवलोक्य 'यमुना' वेदना-विकला बभूव । तया ज्ञातुं नापारि यन्मम भगिन्यो 'वसन्ताय' कां दारुणीं व्यथां दत्त्वा जग्मुः । 'यमुना' व्यथा-विह्वलं तं बन्धुं दयार्द्र तद्दशां पश्यन्ती कम्पमानेन कण्ठेन सान्त्वयितुमुवाच-'वसन्त' ।

'वसन्तो' जगर्ज—दूरमपेहि, गत्वा वधिकमानय । सः अधुनैव 'मां' शूलमारोपयतु ।

लज्जिता, व्यथिता, अपिच मितभाषिणी 'यमुना' सजलाभ्यां नयनाभ्यामवलोकयन्ती मन्द-मन्दं ततोऽगमत् । 'वसन्तस्य' वेदना 'वसन्ता'दपि द्विगुणतरं तामव्यथयत् । सा यदि स्वसकलसुख-सौभाग्यविनिमयेनापि 'वसन्तस्य' हृदये सान्त्वनां दातुं प्राभविष्यत् तदा तथा कर्तुं तराऽऽस्थास्यत्, परन्तु तस्याः क्वापि सम्मानन्नासीत् । सा कुरूपा यदासीत् । सा स्वासामर्थ्येन स्वयमेव पीड्यमाना स्थिता ।

सुन्दरीभिः राजकन्याभिर्विहस्य सा पृष्टा-यमुने ! मालिना किं त्वमभिहिता ?

अस्य प्रश्नस्योत्तरं सा रूपहीना किं ददातु ? नत-मस्तका केवलमेतावदवोचत्-'किमपि न ।'

ततस्ताः सुन्दर्यः स्वकीयेनाट्टहासेन तरुकुलाय-लीनान् विहगान् भाययन्त्योऽगदिषुः—सौखिकाय मालिने कुरूपा यमुना नारोचत । यमुने ! अस्या वार्ताया विचारेण वयं लज्जिता भवामः यत्त्वम् अस्माकं भगिनी वर्तसे, अपि च साधारणो माला-कारोऽपि त्वान्नेच्छति । अस्माकं पश्चात् छायेव लग्ना त्वं कुतो न लज्जसे ?



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

**संस्कृतविश्वपरिषदस्तृतीयमधिवेशनम्**—अप्रेलमासस्य २४ तारिकायां नागपुरे 'संस्कृतविश्वपरिषदस्तृतीयमधिवेशन'मभूद्। यस्याध्यक्षः उत्तरप्रदेश-राज्यपालः श्री के० एम्० मुन्शीमहोदयः समभूत्। समारोहस्यास्योद्घाटनं भारतराष्ट्रपति डा० राजेन्द्रप्रसादमहाभागेनाऽकारि। तदुद्घाटनभाषणे प्रोक्तं राष्ट्रपतिना 'संस्कृतभाषायाः प्रचारः, एतत्पठन-पाठनयोः प्रोत्साहनदानं च राष्ट्रियमहत्त्वस्य कार्यम्।' संस्कृतस्याध्ययनं सर्वेषामेव कृते लाभजनकम्, किन्तु भारतस्याऽस्य कृते संस्कृताध्ययनं सर्वथाऽनिवार्यं च। यस्य हि प्राचीनसाहित्यम्, विज्ञानैकव्रतानामृषिमुनीनां परम्परागता धार्मिकी नैतिकी सामाजिकी च सर्वाऽपि विचारधारा संस्कृते एवोपलभ्या। संस्कृतविश्वपरिषदस्तदिदमुद्देश्यं नास्ति यत् कस्या अपि प्रचलितभाषायाः स्थाने सैषा स्थाप्येत। किन्तु भारतस्य बौद्धिकजीवने संस्कृतस्याऽसाधारणं स्थानम्। संस्कृतस्य हि तद् युगमतिक्रान्तं यस्मिन् संस्कृतभाषोपरि पूर्णाधिकार एव बौद्धिकविकासस्य सूचकोऽभूत्। किन्तु सांप्रतमपि भारतदेशवासिनां कृते प्रेरणायाः, श्रद्धायाश्च यानि स्रोतांसि सन्ति तेषां सर्वेषामेव संबन्धस्तैर्मूलग्रन्थैः साकमस्ति ये ग्रन्थाः संस्कृतभाषया निर्मिताः सन्ति।

ततश्चेदं स्वाभाविकमेवास्ति यत् न केवलं पण्डितानामेव, अपि तु जनसाधारणस्यापि सार्वजनिककार्येषु, विशेषतो धार्मिकशिक्षासंबन्धि-सामाजिककार्येषु च विशेषप्रेरणालाभार्थं संस्कृतस्यैवाऽऽश्रयणं हितावहम्। अस्माकं कृते तदिदं स्वाभाविकं यत् प्रत्येकमहत्त्वपूर्णकार्ये, महोत्सवे च संस्कृतश्लोकैरेव वयं तस्यारम्भं कुर्मः। भारतीयप्राचीनसाहित्योपरि दृष्टौ दत्तायां स्पष्टमिदं प्रतीयते यत्—याः प्रवृत्तयः सार्वदेशिक्यः, किं वा अखिलभारतीया इति प्रसिद्धास्तासु सर्वास्वेव प्रथम-प्रथमं संस्कृतभाषायामेव साहित्यसृष्टिरभूत्। सा सृष्टिर्भारतीये कस्मिंश्चिदेकस्मि-

---

इदमपमानं 'यमुनां' नास्प्राक्षीत्, यत—ईदृशमपमानं सा प्रतिदिनं सहमानाऽऽसीत्। परन्तु तस्या भगिन्यो 'वसन्तस्य' दुःखे यद् विहसन्ति, अपि च तस्मै यां पीडां प्रदातुं ताः परामर्शं कुर्वन्ति, तेन 'यमुनाया' मानसे सहस्रसूचीवेधवत् पीड़ा भवति स्म। सा तासाममानुषिकमानन्दमवलोक्य जीवनान्मरणमेव वरं मनुते स्म। 'यमुना' यदि अश्रुसिक्तेन हृदयेन 'वसन्त'माच्छाद्यास्मान्महतो व्यसनाद्रक्षितुमशक्नोत्, तर्हि नूनमरक्षिष्यत्, परन्तु सा किं करोतु, असमर्थाऽऽसीत्।

तस्य पुष्पोद्यानस्य मन्देनापि मारुतेन 'यमुनाया' हृदयसरोवरेऽद्ययो महान् तरङ्गः उत्तिष्ठति सः अतिदुःखमयोऽस्ति। अद्यास्योद्यानस्य जीवातुभूतस्य मालाकारस्य महतीं वेदनां विलोक्यापि सुमनसां विकासः पतत्रिणां कलरवः, मधुपानां गुञ्जनं चन्द्रिकायाश्चमत्कारः, अपि च पवनस्य पल्लवैः सह क्रीडा-'यमुनायै' नारोचन्त। यमुना यदि पुष्पवाटिकाया एवं निर्लज्जं व्यवहारमन्धकारस्य श्यामलं वितानं वितत्याच्छादयितुमशक्ष्यत्, तदाऽऽवश्यमेवाच्छादयिष्यत्। सा प्रत्येति यदिदं समग्रमुद्यानम्मम भगिनीनां कुचक्रेषु सम्मिलितमस्ति इति।

—क्रमशः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...स्थ भागे नाऽऽसीत्। अपि तु काश्मीर-पञ्चाम्बु-राजस्थान-बिहार-वङ्ग-मध्यप्रदेश-सौराष्ट्र-महाराष्ट्र-उत्तरादिषु सर्वेष्वेव प्रदेशेषु समभूत्। प्राचीनसाहित्ये एव वयं सत्यां भारतीयतां, देशव्यापिनं सहयोग-प्रयासं च द्रष्टुमुपलभामहे। अद्यावध्यपि अस्माकं देशे संस्कृतं विहाय न काचिदपि साहित्यस्य भाषा सर्वात्मना समभवत्। अग्रे एतदासने हिन्दी भाषा तिष्ठेदिति बहुतरमाशास्यते। 'संस्कृतभाषाप्रचारो राष्ट्रियमहत्त्वस्य कार्यमिति' प्रोक्तवानस्मि। अतएव परिषदा यत्कार्यं प्रारब्धं तत् सामयिकमत्यावश्यकं च। साम्प्रतमिदमत्यावश्यकं यत्सेयं परिषत् 'क्रियाशील-जीवितसंस्था' रूपे सर्वस्मिन्नपि भारते प्रचारकार्यं कुर्यात्।

आवश्यकतायां सत्यां नवीनस्य पाठ्यक्रमस्य निर्धारणमपि क्रियेत। साम्प्रतमन्यान्यभाषासु यथा नवीनानि पुस्तकानि निर्माप्यन्ते तथा संस्कृतेऽपि नवीनपाठ्यपुस्तकनिर्माणं कार्येत। भारतस्य सर्वेऽपि विश्वविद्यालया एतस्मिन्कार्ये परिषदस्साहाय्यं कुर्युरिति समयप्राप्तम्। राष्ट्रपतिमहोदयेन प्रोक्तं यत्—संस्कृतस्याऽध्ययनाऽध्यापनयोस्तदिदं महत् प्रतिबंधकमस्ति यत् संस्कृताध्यापकेभ्यो वर्तमानकाले तत् सम्मानमादरश्च न दीयते यो हि प्राचीनकालात्तेषां कृते नियत आसीत्। यस्य च ते वास्तवे अधिकारिणोऽपि। अहं जाने, अन्येऽपि विवेकिनः स्वीकरिष्यन्ति यत्—संस्कृताध्यापकेभ्यः अन्यभाषाध्यापकैः समानमेव वेतनदानमावश्यकम्।

संस्कृताध्यापकान् प्रत्यपि द्वौ शब्दौ वक्तुमिच्छामि-संस्कृतपण्डितैः संस्कृतभाषया सह अन्यास्वपि परिशीलनीयं येन हि समाजे तेषामुपादेयता वर्द्धेत। साधारणतया प्रसिद्धमस्ति यत्संस्कृताध्यापका आत्मानं दीन-हीनं बुध्यन्ते। सरलस्वभावता अन्यद्वस्तु, किन्तु आत्मनो हीनत्वभावना द्वितीया कथा। पण्डितमहोदयैरात्मोपरि गर्वस्याऽनुभवः कर्तव्यो यत्तैः संस्कृतरूपस्यामृतस्य पानं कृतम्। अन्यान्येभ्यः सेयं भाषा सरलस्वभावेन तैः संप्रदीयते, इति। अन्ते राष्ट्रपतिना प्रोक्तं यत् भारतीया नरनार्यः संस्कृतं प्रति न केवलमाकृष्टा एव भवेयुः, अपि तु संस्कृताध्ययनमात्रेण ते संतुष्टा न भूत्वा एतत्साहित्यस्य श्रीवृद्धिमपि ते क्रियासुरिति हृदयेनाशासे।

## स्वागताध्यक्षस्य पं० शुक्लमहोदयस्य भाषणम्—

संस्कृतवाङ्मयं न केवलं भारतस्य कृते, अपि तु सर्वस्या अपि मनुष्यजातेः कृते अमूल्यनिधिः। एतस्याः प्राचीनता, व्यापकता, मधुरता, सुन्दरतादयस्तथाविधाः सन्ति याभिरद्यावधिजातायाः संस्कृतेरितिहास एव केवलं ज्योतिर्मयो न संवृत्तः, अपि तु मानवमात्रस्य हृदयमेव ज्योतिर्मयं सम्भवति। विश्वपरिषदस्तदिदमधिवेशनं मध्यप्रदेशे भवति। ततस्तदिदं विचारणीयं सामयिकमस्ति यत्संस्कृतभाषायै तत्साहित्याय च मध्यप्रदेशेन किं दत्तम्? संस्कृतसाहित्ये प्रधानतया याः शैल्यः परिगणिताः सन्ति तासु 'वैदर्भी' सर्वतः प्रमुखा, सर्वगुणसंपन्ना च। एतस्याः शैल्याः जन्मदातृत्वस्य गौरवमस्मै प्रदेशाय प्राप्तमस्ति। एतस्याः शैल्याः सोयमेव विशेषो यदस्यां माधुर्यमोजः प्रसाद इति त्रयोऽपि गुणाः संनिविशन्ति। संस्कृतस्य सर्वश्रेष्ठो विश्वविश्रुतः कविः कालिदासः अनयैव शैल्या निजकाव्यानि नाटकानि च निर्ममौ। अत्रत्याः कथयन्ति यत् कालिदासेन अस्मिन्प्रदेशे स्थितस्य 'रामगिरेः' आधारेणैव मेघदूतस्य रचना कृता। यस्य



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रादेशिकं नाम 'रामटेक' इति। एतज् ज्ञात्वा संस्कृतज्ञानां हर्षो भवेत् यदेतस्य स्मृतिं चिरस्थायिनीं कर्तुमस्मिन् स्थले एकस्य 'स्मारकस्तम्भस्य' निर्माणं निर्धारितम्।

एतत्प्रदेशीये पद्मपुरे गृहीतजन्मना श्रीभवभूति-महाकविना दण्डकारण्यादेः प्राकृतिकं चित्रणं कृतं यत्र हि कारुण्याप्लुतस्य पाषाणस्यापि रोदनं साहित्ये सुप्रसिद्धमभूत्। नागार्जुनसदृशो दार्शनिकोऽप्यत्रैव जन्म लेभे। अस्तु, भारतस्य वर्तमानयुगे समादरः संस्कृते निर्मितस्य प्राचीननिधेः कारणादेवाऽस्ति। शैव-वैष्णव-बौद्धादीनां ग्रन्थद्वारेण संस्कृतसाहित्यस्य विचारधारा भारतात्सुदूरदूरदेशेष्वपि प्रासरत्। लङ्का-ब्रह्मदेश-कंबोडिया-मलाया-जावा-सुमात्रा-बाली-तिब्बत चीन-मंगोलिया-जापानादिप्रदेशेषु अद्यापि संस्कृत-विचारधारायाश्चिह्नानि वर्तमानानि। अन्यान्यदेशीया यथा स्वसंस्कृतेः प्रचाराय प्रचुरं धनव्ययं कुर्वन्ति तथा संस्कृतप्रेमिभिरपि नानासंघान्निर्माय भारताद् बाह्य-प्रदेशेषु संस्कृतिप्रचाराय प्रयतितव्यम्। यदि सर्वत्र नेदं संभवेत्तर्हि राजदूतावासेषु संस्कृतप्रचाराय एकैको विभागो भारतराजतन्त्रेणाऽवश्यं स्थापयितव्यो येन तत्प्रदेशीयसंस्कृतप्रेमिणां कृते संस्कृताध्ययनस्य सुविधा संभवेत्।

जनसाधारणस्य भाषा कामं हिन्दी भवतु, किन्तु भारतस्य संस्कृतेर्भाषा संस्कृतमेव भविष्यति। समग्रेऽपि भारते एकतानिर्माणस्य महत्कार्यं संस्कृतभाषयैव अद्यावधि कृतम्। संप्रति सर्वास्वपि भाषासु व्यावहारिक-पारिभाषिकशब्दनिर्माणमत्यावश्यकं संवृत्तम्। एतस्य कार्यस्य कृते संस्कृतभाषायाः शब्दभाण्डागारमेव मनोरथपूरकं भवेत्। श्रीमतां भवेद्विदितं यत् त्रिपञ्चाशत्तम (५३) खिष्टीयवत्सरात् मध्यप्रदेशस्य समस्तं कार्यं हिन्दीभाषया महाराष्ट्रभाषया च प्रवर्तितमस्माभिः। अस्मिन्कार्ये परश्शतानां शब्दानां निर्माणमावश्यकमभूत्। एतस्य कृते संस्कृतभाषायाः समाश्रय एव हितावहः। श्रूयते रायपुरे संस्कृतमहाविद्यालयः शीघ्रमेव समुद्घाट्येत। आशास्यते एतत्कार्योत्तरं मध्यप्रदेशस्य संस्कृतसंबन्धीनि बहूनि कार्याणि सिध्येयुः। राष्ट्रस्यैव किम्, समग्रस्यापि विश्वस्य सत्या सुरक्षा सैन्यबलेन न संभविनी। अपि तु सत्पथाऽऽरूढतायामेवास्ति। अनादिकालादेव संस्कृतस्याऽऽसीत्सेयं घोषणा—

'समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति॥'

## अखिलभारतीयसंस्कृतसाहित्यसंमेलनस्य एकविंशमधिवेशनम्

पञ्चाम्बुप्रान्तीयजालन्धरनगरे—मईमासस्य ७म तारिकायां प्रातः सार्द्धनववादने अधिवेशनस्याध्यक्षः श्रीमान् नरहरिविष्णुगाडगिलमहोदयो राष्ट्रियध्वजारोहणं कृत्वा अध्यक्षीयं भाषणं प्रारभत। मुद्रितस्यास्य भाषणस्य संक्षिप्तः सारांशो यथावकाशमग्रे प्रदीयेत। एतदनन्तरममृतसरोनगरस्य सुप्रसिद्धवैद्यराज पं० श्रीमायाधरशास्त्रिमहोदयः संस्कृतप्रदर्शिन्या उद्घाटनमकरोत्। सेयं प्रदर्शिनी सामयिकी, आवश्यकतानुसारमुपयुक्तैः साधनैः संघटिताऽऽसीत्। श्रीगाडगिलमहोदयः, राजा मयूरभञ्जदेवः [भारतीयधारासभासदस्यः] श्रीमती सीतादेवी



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



(विधानसभासदस्या), श्रीजगतनारायणशास्त्री, श्री विश्वनाथशास्त्री, म. म. पं. श्रीपरमेश्वरानन्दशास्त्री, पं. मायाधारिशास्त्री-प्रमुखैर्दर्शकैः सेयं मुक्तकण्ठं प्राशस्यत, यत्—अमरभारतीं प्रति श्रद्धोत्पादनाय एवं-विधानां प्रदर्शिनीनां भृशमावश्यकतेति ।

मध्याह्नोत्तरं पं. परशुराममहाभागस्य भाषणमभूत यत्र संस्कृतमेव भारतस्य राष्ट्रभाषा भवेदित्यस्य समर्थनमक्रियत । ततः शिक्षासंमेलनमध्यविशद् यस्योद्घाटनभाषणं कुर्वता श्रीरघुनन्दनशास्त्रिणा संस्कृतभाषामहत्त्वमास्थाप्य चत्वार इमे विषयाः समर्थिताः— १. प्रारम्भिकशिक्षायां भाषाज्ञानस्यानन्तरं व्याकरणपाठनं प्रारभ्यताम् । २. सर्वस्मिन्नपि विश्वे प्रचरिता या भाषा सा कथमपि 'मृतभाषा' व्यपदेशं नार्हेत् । ३. कामं भवतु हिन्दी भाषा । किन्तु तस्या अपि समुन्नतिः संस्कृतं विना न भवेत्कथंचिदपि । ४. अस्माकं देशे प्रचरितानां मतमतान्तराणां संप्रदायानां नानावादानां च पूर्णतया ज्ञानं संस्कृत-भाषाज्ञानं विना न कथमपि साध्यम् ।

ततः शिक्षासंमेलनस्यास्याध्यक्षो मयूरभञ्जदेवः सामगानेन मङ्गलमाचर्य पद्यप्रचुरे स्वीयभाषणे—संस्कृतशिक्षासंपत्तये चतुर्णां विषयाणां समर्थनमकरोत्—१-शिक्षार्थं छात्राणां गोष्ठीपरम्पराः प्राचुर्येण प्रवर्तेरन् । २-अवकाशे हितोपदेशस्य पञ्चतन्त्रस्य चोपयोगिन्यः कथाः श्राव्येरन् । ३-संगीते गीतगोविन्दस्य मनोहरैर्गानैर्जनानभिमुखीकृत्य संस्कृतं प्रति तेषां रुचिः समाकृष्येत । ४-केन्द्रे संस्कृत-विश्वविद्यालयस्य स्थापनमेतदर्थमत्यावश्यकं भवेत् ।

ततः श्रीकेदारनाथसारस्वतमहाभागेन निज-भाषणे साधितं यत्—एकसहस्रवर्षपर्यन्तं दासतामनुभवतो भारतवर्षस्याऽस्य संस्कृतशिक्षाक्रमः सर्वथा छिन्न-विच्छिन्नोऽभवत् । वर्तमानसमये सेयं भाषा घोषणपण्डितानां भाषा व्यपदिश्यते । संप्रति पाठ्य-क्रमे समुचितं परिवर्तनं विधाय सोयं कलङ्को विमोचनीयोऽस्माभिः । तदनन्तरं श्रीब्रह्मदत्तजिज्ञासु महोदयेन समर्थितं यत्—संस्कृतशिक्षायै सामूहिक-रूपप्रदानमेव सामयिकं भवेत् । समग्रस्याऽपि भारतस्य संस्कृतशिक्षायां योगो येनकेनापि प्रकारेण संपादनीयः साम्प्रतम् । अतीते समये हिन्दवो यदा 'उर्दू' भाषां बलादपठन्, तदा वर्तमानसमये मौलानामहोदयः संस्कृतपठने किमिति मुखविकारं प्रदर्शयेत् ? सोयं समयो मतप्रदानस्य (वोट) अधीनः । अस्माभिर्मन्त्री तादृश एव निर्वाचनीयः स्यात् यः संस्कृतशिक्षापक्ष-पाती भवेत् । जिज्ञासुमहोदयः साधयामास यत् वर्तमानकाले अष्टाध्यायीक्रमेण व्याकरणशिक्षा समुचिता भवेत् । त्रिचतुरैर्मासैः संस्कृतज्ञानं साधारण-तया संपद्यते । अनेन निदर्शितं यत् दिल्लीनगरस्थेऽस्मदीये संस्कृतशिक्षाकेन्द्रे १३० संख्यकाः प्रौढवयस्काः अपि प्रत्यहं प्रेम्णा संस्कृतं शिक्षन्ते ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अद्यैव रात्रौ संस्कृतकविसंमेलनं समपद्यत । यस्यासीदध्यक्षः श्रीपुरुषोत्तमचतुर्वेदमहोदयः साहित्याचार्यः । अश्रूयन्त तत्र बहवः संस्कृतकविताः।

८।५।५४ दिवसे प्रातर्गीतासंमेलनमभूत् । यत्र श्री परमानन्दशास्त्रि—चारुदेवशास्त्रिप्रभृतीनां भाषणमभूत् । पञ्चाम्बुप्रान्तीयप्रख्यात 'सन्त' श्री निर्मलानन्द महाभागस्य गीतायाः 'आत्मतत्त्व'विषये मार्मिकी वक्तृता समपद्यत । ततो ज्यौतिषसंमेलनमभूद् यद्द्वितीयदिनपर्यन्तं प्राचलत् । मध्यान्होत्तरं विषय-

निर्वाचनी समध्यविशत् यत्राग्रे प्रस्तूयमानाः प्रस्तावा निरणीयन्त । अद्य म. म. पं. गिरिधरशर्मचतुर्वेदमहाभागेन संमेलनस्यास्येतिवृत्तं परिबोध्य--'शलाकापरीक्षायाः' वैशिष्ट्यमसूच्यत । मध्य हे गतसंमेलनस्याध्यक्षः श्रीहरगोविन्दमिश्रमहोदयो गीतगोविन्दस्य मङ्गलाचरणं विधाय भारताद् बहिर्देशेषु संस्कृतस्य कियानादर इत्यबोधयत् । होशियारपुरस्थ वैदिकशोधसंस्थानस्याचार्येण श्रीविश्वबन्धुमहोदयेन संस्कृतस्य महत्त्वं परिबोध्य निजाधिकृतस्य शोधसंस्थानस्य परिचयः प्रत्तः ।

९।५।५४ दिवसे प्रातर्म. म. पं. श्रीगिरिधरशर्मचतुर्वेद—श्रीकालीप्रसादशास्त्रि— श्रीब्रह्मदत्तजिज्ञासुमहोदयानां परीक्षकत्वे 'शलाकापरीक्षा' समवर्तिष्ट। यत्र द्वयोः परीक्षार्थिनोर्मध्ये व्याकरणाचार्यश्रीरामप्रसादत्रिपाठी प्रथमो निरणीयत, यस्मै सायं पञ्चाम्बुप्रान्तीयमुख्यमन्त्रिणा श्रीभीमसेनसच्चरमहाभागेन जयदयालुगोयनकाप्रदत्त एकसहस्ररूप्यकात्मकः पुरस्कारः सादरं समर्पितोऽभूत् ।

मध्याह्नोत्तरं श्री अनन्तशयनमय्यङ्गारमहोदय-पञ्चाम्बुप्रान्तीयप्रधानमन्त्रि— श्रीभीमसेनसच्चरमहोदययोर्भाषणमभूत् । आयंगरमहोदयेन समर्थितं यत्संस्कृतभाषा सेयमार्यसंस्कृतेः, आध्यात्मिकज्ञानस्य च विश्वस्मिन्प्रचारिका । अतएव सेयं प्रत्येकभारतीयनागरिकस्याध्येतव्या। सेयं भाषा पुरा सुमात्रा-जावा-चीन-जापानादिप्रदेशेषु निरर्गलमासीत्प्रचरिता। साम्प्रतमपि संस्कृतःनिष्णाता विदेशीयभाषाज्ञानं संपाद्य बहिर्देशेषु संस्कृतभाषाप्रचारं कुर्युः ।'महाभागोऽयं भारतीय-शासनतन्त्रद्वारा देहलीराजधान्यामेकस्य संस्कृतविश्वविद्यालयस्य स्थापनं प्रास्तावीत् । इदमपि च तेन समार्थ्यत यत् भारतशासनतन्त्रेण भारतस्य प्रत्येक प्रान्ते ये किल संस्कृतस्य विशिष्टा विद्वांसः सन्ति ते प्रतिवर्षं संमाननीयाः। संस्कृतपण्डिता अपि निरालस्यमन्यभाषाज्ञानसंपादने प्रयत्नं कुर्युः

सच्चरमहोदयः समभाषत—'अस्माकं' प्रान्तो बहोः कालात्सैनिकतामवहत् । अतएव संस्कृतभाषायामभूत्पश्चात्पदः। किन्तु संस्कृतौ श्रद्धाऽस्माकमविच्छिन्ना। आशास्यते यदग्रे तादृशोऽपि कालः समायायाद् यत्र प्रायः सर्वेऽपि संस्कृतज्ञाः संमिलेयुः । महोदयेनानेन



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## संस्कृतसमाचाराः—

**खिलभारतीयसंस्कृतपरिषत्**—मईमासस्य २ रिकायां लखनऊनगरेऽखिलभारतीयसंस्कृतपरि- र्षिकाधिवेशनं समभवत्। अधिवेशनस्याध्यक्ष रप्रदेशमुख्यमन्त्री श्रीगोविन्दवल्लभपन्त आसीत्। धिवेशने मुख्यं भाषणं राज्यपुनर्घटनायोगसदस्यस्य के० एम्० पणिक्करस्याभूत्। अयमभाषत यत् संस्कृतसेविनां कृते विविधवृत्तिव्यवस्थां कृत्वा संस्कृते युगीय-निबन्ध-लघुकथा-काव्य-नाटक–प्रहसनादि- हित्यसृष्टेः सुविधाप्रदानमावश्यकम। अयमचक- —यत्संस्कृतज्ञानां विपक्षे बहुधेदं कथ्यते यत्ते रातनपरिपाटी–विचक्षणाः किमपि परिवर्तनं न हन्ते, परन्तु तदिदं पूर्णतस्तथ्यं नास्ति। यथा संस्कृते चीनरूढिवादितायाः प्रमाणानि, स्मृतिश्लोकाश्चो- भ्यन्ते, तथैव तत्र परिवर्तनवादीनि प्रमाणान्युक्त- पि सुलभाः। संस्कृतस्याध्ययनं केवलं विलास- व सामग्री न, अपि तु आवश्यकतान्तर्भूतम्। संस्कृतं केवलं हिन्दूनामेव सम्पन्नास्ति–परं जैनानां यानपथिनां चापि धर्मभाषा–अतः सेयं नाना- स्कृतिप्रतिनिधिः। सेयमेव भाषा भारतीयां स्कृतिं राष्ट्रभाषां च जीवयति, भाषामिमां विना संस्कृतिः हिन्दी च मृतप्राये भविष्यत इत्यत्र नास्ति सन्देहलेशः। प्राथमिकशिक्षायां व्याकरणस्य सरली- करणं, सरलनियमाधारेण च "बेसिक संस्कृतपाठ्य- क्रम" रूपेण सरलव्याकरणस्य, अत्युपयोगिशब्दकोषस्य च प्रसारः प्रचाराय परमावश्यकः। कामं हिन्दी भवतु अद्यतनी व्यवहारभाषा, परन्तु भारतीय–सभ्यताया एकताकारिणी सेयमेव भाषा वर्तते। एतां विना भारतमेकराष्ट्रत्वस्याभिमानं वोढुं नार्हेत्।

स बभाषे—यदाधुनिकानां पण्डितानामिदमेव कर्त्तव्यम् यत्ते संस्कृते गतशताब्द्यां जातस्य मानव- मस्तिष्कविकासस्य सर्वमपि साहित्यं संस्कृते सृजेयुः, यतो हि संस्कृतं निश्चप्रचमेव राष्ट्रिय-भाषा। ( राष्ट्रभाषा !! ) इदं तदैव संभवति यदा भारते एकः संस्कृतविश्वविद्यालयः स्थाप्येत। यदि राष्ट्रभाषा- हिन्द्यां लोकप्रियताधानमभीष्टं तर्हि संस्कृतं हिन्दी च द्वे अपि सहैव साहित्यसृष्टेर्दिशि चलेतामित्यावश्य- कम्। अन्ते श्रीमता पणिक्करेणोक्तं यद्वयं केवलं पुरातनेतिवृत्तवशादेव संस्कृतं स्तुम इति अवांछनीयम्। भाषाया अस्या महत्त्वं तदैव भवेद्यदा सेयमस्माकं व्यावहारिकजीवनेऽपि कार्यं दद्यात्। एतस्याः कार्य- क्षमताया आधानमद्य संस्कृतविदुषां कर्तव्यम्।

अध्यक्षीयभाषणे पं० पन्तः अवोचत् यत्संस्कृतं भारतस्यात्मा—भूते, वर्तमाने भविष्यति च। इदमेव भारतीयसंस्कृतिं हिन्दूकुशपर्यन्तं फिलिप्पीनद्वीपावधि च प्राचारयत्। इयं भारतीयभाषावदेव उर्दूभाषाया अपि जननी। संस्कृते अणु-उदजनबम्बादीनां ज्ञानं केवलमस्मात् कारणान्नास्ति यदेते विषया अवि- ज्ञान्तर्गताः। स ईशावास्य-बृहदारण्यकादिभ्य उप- निषद्भ्यो बहूनि वचनान्युदधार।

---

सुसंवादः सर्वाग्रे प्रकटितो यत् पञ्चाम्बुसर्वकारः त्रैव विशालस्यैकस्य संस्कृतविश्वविद्यालयस्य नं निर्माति। अन्ते सर्वेभ्यो धन्यवादप्रदानपूर्वकं गतमन्त्रिणा संमेलनस्यास्य सानन्दं विसर्जनमङ्गल- क्रियत।

—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



परिषदो वार्षिक-सभापतिः श्री के० ए० एस्० ऐयरः अकथयत्–स्वतन्त्रताप्राप्तेरनन्तरमपि संस्कृतज्ञानमन्तरा शिक्षिता भारतीयरीति-संस्कृतिभ्यामपरिचिता भवन्ति । संस्कृतमेव संस्कृतीनां प्रतिनिधिभाषा । इयमेवाध्यात्मज्ञानस्य निधिः ।

**इन्द्रप्रस्थ–संस्कृत–परिषत्**—२ मई रविवासरे देहलीनगर्यां लोकसभासदस्यश्रीनरहरिविष्णुगाडगिलमहोदयस्य सभापतित्वे इन्द्रप्रस्थ-संस्कृतपरिषदः पञ्चमवार्षिकाधिवेशनं समायोजितमभूत् । अवसरेऽस्मिन् भाषमाणेन लोकसभाया उपाध्यक्षेण श्रीअनन्तशयनम् अय्यङ्गारेण प्रोक्तं यत्संस्कृतस्य सकाशे अतीव प्रकाशमानं महिमशालि, समादरणीयं विशालं च वाङ्मयं विद्यते यस्य आदरः अध्ययनं च पुरा जगति भवतिस्म । अधुना अस्यै भाषायै एतद्योग्यं स्थानं दीयताम् । स उवाच—यदहं एकां योजनां निर्मातुमिच्छामि यदनुसारं भारतीयाः सर्वा अपि संस्कृतसंस्था एकस्याः केन्द्रीयसंघसंस्थाया अन्तर्गताः तदुपसूत्रणानुसारं विविधेषु प्रान्तेषु सुरगिरः प्रचारं कुर्युः इति । न्यायाधीशः श्री टी० एल्० वेङ्कटराम ऐयरः अकथयद् यत् बिना संस्कृतं भारतीयसंस्कृतेश्चर्चाऽपि असम्भवा । यदि संस्कृतम् उपेक्षिष्यते तर्हि भारतम्, तन्महत्वं चाप्युपेक्षितं भविष्यतीति । परिषदा ये प्रस्तावाः पारिताः तेषु इन्द्रप्रस्थे संस्कृतविश्वविद्यालयं स्थापयितुं भारतसरकारीय-शिक्षामन्त्रालयं प्रति प्रार्थनायाः प्रस्ताव उल्लेखनीयः समभूत् । परि... सर्वे संस्कृतानुरागिणः २७ अक्टूबर-दिवसं का... दासजयन्तीत्वेन सम्मानयितुं प्रार्थिताः । एकस्मि... परप्रस्तावे परिषदा देहलीसर्वकार आलोचितः... संस्कृतमैच्छिकविषयत्वेन पाठ्यक्रमे स्थापि... प्रस्तावे संस्कृतसदृश्या विश्वशान्तिसमर्थिकाया, भा... तीयसंस्कृतिजीवातुभूतायाश्च भाषाया अनिवार्य... सर्वविद्यालयेषु समर्थितम् ।

**संस्कृतवाग्विवर्द्धिन्या वार्षिकोत्सवः**—अप्रै... मासस्य ३०दिवसे स्थानीयसंस्कृतवाग्विवर्द्धिनीपरि... वार्षिकोत्सवः ससमारोहं संमानितः । अस्मिन्नव... अध्यक्षपदात् भाषमाणेन डा० श्रीमथुरालालशर्म... संस्कृतोपजीविनः पंडितान् प्रति सहयोगभावनया... सम्पादनस्य तथाऽन्येषां विषयाणां भाषाणां च अ... पकानामिव मनसा वाचा कर्मणा पूर्णया निष्ठया... सह संस्कृताध्यापनाय अभ्यर्थनाः विहिता । परि... मन्त्रिणा कथितं यदत्रोद्घाटयिष्यमाणे रात्रिसंस्कृ... विद्यालये सर्वैर्विद्वद्भिर्निःशुल्काध्यापनेन सहयो... देयः । अवसरेऽस्मिन् बृहत्कविसम्मेलनं भा... 'मध्यमव्यायोग' भिनयश्च रोचकावभूताम् । अग्रि... वर्षकृते पं० गोपीनाथः शास्त्री M. A, LL.B... सभापतिः, पं० दीनानाथत्रिवेदी मधुपश्च म... निर्वाचितौ ।

---

प्रकाशकः—जयबहादुरसिंहः  पता—भारती भवन, गोपालजी का रास्ता, जयपुर

मुद्रकः—राजस्थान प्रिंटिंग वर्क्स, हनुमान का रास्ता, जयपुर ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

आर्यसंस्कृतिसर्वस्वसंरक्षणविचक्षणः ।
विधर्मिम्लेच्छविच्छायीकारको हिन्दुछत्रभृत् ॥

वर्षम् ४
अष्टमाऽङ्कः
मूल्यम्—
वार्षिकम् ३)
एकस्याङ्कस्य ।=

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान मद्रास-मध्यप्रदेश-सौराष्ट्र उत्तर प्रदेश सर्वकारैः स्वीकृता--

# ❀ विषय-सूची ❀


| क्रमः | लेखाः | लेखकाः |
|---|---|---|
| १. | धन्यवादोऽहम् | श्रीगणेशरामशर्मा झालावाड |
| २. | अस्माकं देशाय सर्वोत्तमा शिक्षाप्रणाली | श्रीदेवकीनन्दनशर्मा शाहपुरा |
| ३. | उत्तरध्रुवः | महोपाध्यायपं०वासुदेवशास्त्री, शोलापुर |
| ४. | मालाकारः | श्रीमदनमोहनझा मुजफ्फरपुरम् |
| ५. | पञ्चनदप्रान्ते संस्कृतपरिस्थितिः | गिरिराजशर्मा, जयपुरम् |
| ६. | ब्राह्मण ! उत्तिष्ठ !! | श्रीगिरिजाशंकरशास्त्री बाराबंकी |
| ७. | आङ्ग्लदैनिकस्य दृशि संस्कृतम् | श्रीकलानाथशास्त्री, जयपुरम् |
| ८. | प्रसीदन्तु संस्कृतसेवकाः | भट्ट श्रीमथुरानाथशास्त्री, जयपुरम् |
| ९. | सम्पादकीयम् | सम्पादकः |
| १०. | देशदर्शनम् | पं० श्रीकलानाथशास्त्री, जयपुरम् |
| ११. | विदेशवार्ता | ,, |
| १२. | संस्कृतसमाचाराः | ,, |
| १३. | द्रुतं संस्कृतं शिक्ष्यतां 'भारती'तः | ,, |


## —: "भारती" पत्रस्य उद्देश्यानि नियमाश्च :—

१. संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचार पोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि।

२. 'भारती' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम्।

३. मासिकपत्रमिदं प्रतिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात्।

४. एकस्यांकस्य मूल्यम् ।=) आणकषट्कम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


सम्पादकः :—
कविशिरोमणि-
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्मा शास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षम् ४ | ज्येष्ठपूर्णिमा, सं० २०११ | अङ्कः ७


## धन्यवादोऽहम् !

( गजलगीतिः )

लेखकः—विद्याभूषणः पं० श्रीगणेशरामशर्मा, ज्योतिषोपाध्यायः, विशारदः संस्कृताध्यापकः,
श्रीराजेन्द्र-इण्टर-कॉलिज, झालावाड़ ( राजस्थान )

अहो ! नव्ये युगेऽस्मिल्लब्धजन्मा धन्यवादोहम् ।
स विश्वं सर्वतः ख्यातिं गतो भाग्यप्रसादोऽहम् ॥ १ ॥

स्वयंसिद्धोऽस्म्यहं तर्कैर्मतैः किं वा प्रमाणैर्मे ?
शिरोधार्यो बुधानामास्तिकानां पूज्यपादोऽहम् ॥ २ ॥

न शास्त्रार्थैरहं लभ्यो न वेद्यो दर्शनाचार्यैः ।
स्वभक्तान्तर्हृदि स्फारं स्फुरज्ज्योतिर्निनादोऽहम् ॥ ३ ॥

क्षयं याता मदीया भ्रातरोऽन्येऽद्वैतवादाद्याः ।
समुज्जृम्भेऽधुना सर्वत्र लोके निर्विवादोऽहम् ॥ ४ ॥

पुरोधाः कर्मकाण्डाडम्बरेष्वारम्भशूराणाम् ।
प्रचाराचार्यदिग्विजयप्रयाणे शंखनादोऽहम् ॥ ५ ॥

शुभारम्भेषु नित्यं मे प्रवृत्तिर्भाति निष्कामम् ।
व्यवस्थानाटिकानां सूत्रधारश्चाप्रमादोऽहम् ॥ ६ ॥

स्थितप्रज्ञोऽस्म्यहं नेता घटाटोपेऽप्यविद्यायाः ।
बहिश्चान्तर्विधिज्ञो निर्निषेधो निर्विषादोऽहम् ॥ ७ ॥

प्रजातन्त्रे मदीयां व्याप्तिमेतां को न जानीते ?
बहौ वाल्पे मते स्त्रीत्वे च पुंस्त्वे साम्यवादोऽहम् ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अस्माकं देशाय सर्वोत्तमा शिक्षणप्रणाली

लेखकः—पं० देवकीनन्दनशर्मा शास्त्री प्रश्नवरः, प्रधानाध्यापकः राजकीयसंस्कृतविद्यालयः शाहपुरा

मान्याः ! मानवेषु मानवतायाः पूर्णो विकास एव शिक्षाया मुख्यमुद्देश्यम्। या शिक्षा, मानवनिहिताः सुप्ता एवं मूकाः शक्तीर्न जागरयति न च मुखरयति, सा शिक्षा कदापि शिक्षापदवाच्या न भवितुमर्हति। अद्यत्वे या शिक्षाऽस्माकं देशे प्रचलिता सा किञ्चित् परिष्करणीयैव नास्ति, अपितु, आमूलचूडं परिवर्तनीयेति निःशङ्कं ब्रूमः। "अस्माकं देशाय सर्वोत्तमा शिक्षाप्रणाली" विषयोऽयं चिन्तनशीलानां शिक्षाशास्त्रिणां चिन्ताया विषयः संजातः। प्रकृतलेखेऽपि उक्तविषये एव विचारविमर्शः क्रियते।

यद्यपि मानवनिहितविविधाऽविकसितानां शक्तीनां विकासाः सम्पेद्यन्ते शिक्षया, तथापि प्राधान्यतः धनशक्तिर्बलशक्तिर्ज्ञानशक्तिश्चेति शक्तित्रितयं विशेषतयाऽपेक्ष्यते—यासु प्रायः समस्तानां शक्तीनामन्तर्भावो निहितोऽस्ति। शिक्षा समुपस्थितपदार्थस्य विकासमात्रं करोति, अनुपस्थितपदार्थ-

---

सभानां रङ्गमञ्चप्राङ्गणे सिद्धासनासीनो—
विराजे भद्रपीठाचार्यमन्त्रस्यानुवादोऽहम् ॥ ९ ॥

मदीयां मञ्जुमुद्रां जानते शब्दार्थशास्त्रज्ञाः।
यतोऽमूल्यं मनुष्येभ्यः प्रयच्छन्साधुवादोऽहम् ॥ १० ॥

"यतो वाचो निवर्तन्ते" ततः प्रादुर्भवन्नात्मा।
समाप्तौ सर्वकार्याणां शुभो घण्टानिनादोऽहम् ॥ ११ ॥

प्रशंसावादमात्रेणोत्सहन्ते प्रेरणोन्मादम् ।
मुधा मुग्धान्तराणां पिण्डखर्जूरीप्रसादोऽहम् ॥ १२ ॥

अविद्याच्छादने मध्येसभं मे तद्दयालत्वम्।
स्खलद्वाचां गलत्प्रतिभावतां क्षान्तापराधोऽहम् ॥ १३ ॥

सभाक्षोभेऽप्यहं मोदे सदा सच्चिद्घनानन्दो—।
मनोमालिन्यशून्यत्वान्निरस्ताशेषबाधोऽहम् ॥ १४ ॥

प्रपद्ये व्यङ्ग्यरूपं धृष्टताधूर्तोऽथ दिग्वासाः।
कुपात्रे दम्भघोषैरुद्ध्वनद्धिक्कारवादोऽहम् ॥ १५ ॥

प्रतीकं सभ्यतायाः संस्कृतेर्धर्मस्य लोकानाम्।
विराजे देशरागे सुस्वरो नूनं निषादोऽहम् ॥ १६ ॥

कवीनां काव्यसिद्धेः सत्फलं कीर्तिध्वजो वक्तुः।
पुरस्कारः कलाकारस्य साधोर्धन्यवादोऽहम् ॥ १४ ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सद्वस्तुनोऽभावोऽसद्वस्तुन ...त्पादयितुं न समर्था। ...त्तात्कत्वं नियमविरुद्धम्। "नासतो विद्यते भावो ...भावो विद्यते सतः" इति गीतायां श्रीकृष्णद्वैपायन-...वेदव्यासवचनम्। यद् वचनं सर्वं एव मार्मिका ...विद्रका माननीयं मन्यन्ते। उक्तसिद्धान्तस्य मान्य-...तया शिक्षा, धनशक्तिविकासिनी, बलशक्तिविकासिनी, ...ज्ञानशक्तिविकासिनी च भवितुं योग्या। वर्तमान-...शिक्षा पूर्वोक्तत्रिशक्तिनिकषे परीक्षणीया यत् साम्प्रतं ...प्रचलिता शिक्षा शिक्षोद्देश्यानि पूरयति न वा।

...इन्द्रियनिग्रहादिविविधयोगाङ्गेषु पूर्णश्रद्धावति ...परमपवित्रदर्शनिकविचारवत्यस्मिन्भारतवर्षे धर्मा-...शून्या व्ययपरायणाऽभारतीया शिक्षा भारतीया-...नामधिकस्तरं समुन्नतमकृत्वा प्रतिदिनमधः ...यातीति। आहारविहारवेषभूषाद्याः सर्वा एव क्रिया ...नव्यशिक्षादीक्षितानां व्ययसाध्या इति प्रत्यक्षं ...पश्यामः। "मानो हि महतां धनमिति" मानधनमपि ...साम्प्रतं नव्यशिक्षकाणां ललाटपट्टे न लिखितं ...विधात्रा किमु?

अहो अद्यत्वे शिक्षक एको हतभाग्यः प्राणी। ...जनताया न संमानार्हः। छात्राणां नोपास्यः। जन-...साधारणैर्नादरणीयश्च। किमधिकं कथयामो यदिदानीं ...अनुशासनहीनतादिविविधाऽसह्यदुःखानि दृश्यन्ते ...शिक्षकाणां, नाश्रूयन्त पुराकाले ईदृशानि ...वृत्तानि। विलोक्यतां स्वकीयः प्राक्तनो भारतेतिहासः। ...निरीक्ष्यते जनतायाः संमान एकलव्यस्य गुरु-...भक्तिरध्यापकानां छात्रप्रियता गुरूणां त्यागशीलता ...। तस्माद् वर्तमानकाले प्रचलिता शिक्षा नार्थकरी ...प्रत्युतानर्थकरीति वक्तुं शक्यत इति वक्तव्यं ससिद्धं ...भवति।

शिक्षा-बलविकासिनी भवेदिति द्वितीयमुद्दे-श्यम्। वर्तमानशिक्षा बलविकासेऽपि नाभिरुचिं विशेषां दर्शयति। सामूहिकरूपेण पादकन्दुककरकन्दुकादिक्रीडननाटकस्य परीक्षणं प्रत्येकछात्रस्य बलपरीक्षायां सफलं वक्तुं न शक्यते। पूर्वकाले बलाभ्युदयायाऽनेके प्रयत्नाः समक्रियन्त। चरित्रबलं-यतसकलबलानां जन्मदातृ कथ्यते तद् ब्रह्मचर्याधीनम्। पुरा स्नातकानां ब्रह्मचर्यरक्षायै तदुपयुक्तवातावरणोत्पादनार्थं प्रादर्श्यत पर्याप्ता तत्परता। दुर्भाग्यमेतदस्माकं यदिदानीं ब्रह्मचर्याय समयोऽपि प्रतिकूल एव। चलचित्राणि ब्रह्मचर्यविघातकान्येव सिद्धानि। यद्यपि शिक्षायै निर्मितानि कानिचित् चलचित्राणि भवेयुः किञ्चित्शिक्षासहायकानि, परन्तु चलचित्राणां ब्रह्मचर्यविघातकोंऽशोऽबोधमतीनां बालानां सर्वनाशमेव करोतीति प्रत्यक्षं प्रेक्षावताम्। "यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे" किशोराणां किशोरीणां च महाविद्यालये सहशिक्षाप्रणाली ब्रह्मचर्यरक्षायां कियत् सहायिका इति स्वयं विचारणीयं विचारशीलैः।

यन्मुख्यमुद्देश्यं शिक्षाया ज्ञानविकासस्तस्य यादृशी दुर्दशा दृश्यते वर्तमानकाले साऽश्रुतपूर्वा। एकस्मिन्वर्षे कियतो दिवसान् विद्यालया महाविद्यालया वा भवन्ति पाठनकार्यलग्नाः। पाठनदिनेष्वपि दिवसस्य कियान् भागो व्ययीक्रियते पाठनकार्ये। सर्वमेतत्सुविचार्य स्थिरीक्रियते—यद् ज्ञानविकासाय न किञ्चिदपि प्रयतते वर्तमानकालिकी दूषिता शिक्षा-परिपाटीति।

शिक्षाया एकमप्युद्देश्यं न साधयति वर्तमानकाल-प्रचलिता शिक्षाऽतस्त्याज्या संस्थाप्या च तत्स्थाने काचनान्या शिक्षापद्धतिरिति परस्परं विवदमानाः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रतिसमं परिभाषन्ते महामहान्तो विचारकाः शिक्षाशास्त्रिण इति नाविदितचरं समाचारपत्रपाठकानाम्।

अस्माकं देशाय सर्वोत्तमा शिक्षणप्रणाली कीदृशी? इति प्रश्नावसरे, प्राचीना गुरुकुलपद्धतिरेव श्रेष्ठेति मदीयमुत्तरम्। महत्त्वपूर्णेऽस्मिन् विषयेऽप्यवधातव्यं यद् भारतीयानां संस्कृतौदासीन्यं स्वतन्त्रे भारते लज्जास्पम्। अस्माकं नेतारोऽस्मान् संस्कृतमध्येतुं प्रतिदिनं प्रेरयन्ति। कतिपयानि स्वल्पान्येव दिनानि व्यतीतानि यदुत्तरप्रदेशस्य मुख्यमन्त्री श्रीकन्हैयालालमाणिक्यलालमुंशीमहोदयः प्रावोचत् सिकन्दराबादे उस्मानिया विश्वविद्यालयस्य संस्कृतसंस्थां (एकेडेमी) समुद्घाटयन् यत् "भारतस्य सर्वे एव विश्वविद्यालयाः संस्कृतसंस्थां स्थापयेयुरन्यथा तेऽभारतीया भविष्यन्तीति"। अलवरे राजस्थानसंस्कृसाहित्यसम्मेलनमुद्घाटयन् डा० श्रीकैलाशनाथकाटजूमहानुभावः प्राब्रवीत् यत् संस्कृतभाषा सा सशक्ता शृङ्खलाऽस्ति या वर्तमानं वैभवशालिनाऽतीतकालेन सह संयोजयति। संस्कृतगवी मृतभाषा इत्युक्त्वा तस्याः प्रचारस्य विरोधः स्वयमेव नश्यति यतोहि अद्यत्वेऽपि धार्मिकेषु सामाजिकेषु च कार्येषु संस्कृतस्य प्रमुखं स्थानमिति" स्यादेतत्।

न च गुरुकुलप्रणाली कीदृशी? इतिवाच्यं साम्प्रतमपि हरिद्वारादिषु तस्याः प्रतिबिम्बस्य विद्यमानत्वात्। गुरुकुलप्रणाली मितव्ययताऽस्वादाऽपरिग्रहादीन् सद्गुणान् न केवलं शिक्षयन्ती, अपितु कार्यान्वितान् विदधती धनविकासिनी ब्रह्मचर्यप्रतिष्ठात्वेन बलविकासिनी सकलेऽपि वर्षेऽवकाशाभावत्वेन ज्ञानविकासिनी बिराजते सर्वोपरि।

प्रणाल्यामस्यां संस्कृतस्य गंभीरेणाध्ययनेन सह विश्वस्याऽस्यैहलौकिकं पारलौकिकञ्च सकलमपि ज्ञा... न भवेत्तिरोहितं गुरुकुलस्नातकैरीदृशः सुप्रबन्धो वि... तव्यः। ऐहलौकिकेन मम तात्पर्यं विश्वस्य भौगोलि... समाजशास्त्रार्थशास्त्रराजनीतिविज्ञानादितोऽस्ति। रा... नीतिसमाजशास्त्रार्थशास्त्राणां तुलनात्मकमध्ययनं... द्यते। संस्कृते सर्वमपि जीवनोपयोगि साहित्यं व... इति नाप्रत्यक्षं तत्र भवताम्। पुरा विज्ञाने... समुन्नता आसन् भारतीयाः। रामायणेन स्पष्टं प्रती... यद् विमानविद्यायां पूर्णाः परिचिताः भारतनिवासि... स्तथापि दर्शनशास्त्रेषु विशेषाभिरुचिरासीद् भारती... नामिति। भारतीयदर्शनशास्त्रमस्माकं कृते गौरवास्पद... पारलौकिकज्ञाने न किमपि शिक्षणीयमस्ति अस्मा... तथापि विभिन्नदेशानां धार्मिकविश्वासेषु सुपरिचि... भवेयुः स्नातका इत्थं यत्नो विधेय इति।'

सैनिकशिक्षाऽप्यनिवार्या भवेत्। भारतीयसैनि... शिक्षया सह वर्तमानशस्त्रास्त्राणां संचालनस्य चाभ्या... कारयितव्यः। साम्प्रतं द्विविधा विद्याऽपेक्ष्यते, भा... वर्षे शस्त्रविद्या शास्त्रविद्या च। निष्कर्षमेतद्... गुरुकुलप्रणाल्या मानवतायाः पूर्णो विकासः स्या... सा मानवता, या पाकामेरिकयोः सैनिकसन्धि... दानवतां समूलं विनाशयेत्, देवत्वस्याग्रे नतमस्त... च भवेत्। वाञ्छामो भारतीया वयं यदस्माकं न... युवानोऽधिकाधिवा धनवन्तोऽधिकाधिका बलवन्तो... ऽधिकाधिका ज्ञानवन्तश्च भवेयुरिति।

"अग्रतस्तु चतुर्वेदाः पृष्ठतः सशर धनुः।
इदं ब्राह्ममिदं क्षात्रं शापादपि शरादपि॥"

इति 'गुरुश्रीद्रोणाचार्यस्य सत्योक्तिवत् व... कर्तुं च शक्ताः स्युरिति।

स्त्रीशिक्षाऽपि विचारणीया। इयं भारताधेमा... समस्या। सत्स्वपि शिक्षितेषु पितृषु यद्यपि...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# उत्तरध्रुवः

लेखकः—महोपाध्याय पं० वासुदेवशास्त्री बागेवाडीकर साहित्याचार्यः, काव्य-वेद-तर्क-तीर्थः शोलापुर

पुरा अयं विचारः सुतरां विचारविषयः अभूत् यत् भारतीयाः कुत्याः ? अत्रत्याः वा बहिःस्था वा इति । आर्याः ध्रुवमत्स्यतः ( उत्तरध्रुवतः ) अत्र समागताः इति तिलकमहाभागैः प्रतिपादितम् । तथापि केचित् अद्यापि नानुमन्यन्ते तत् । "आर्याः अत्रैव न्यवसन् भूततः । इयमेव तेषां मूलनिवासभूमिः" इति आहुः । उभौ अपि स्वं स्वं मतं सप्रमाणं प्रतिपादयन्ति । परं सम्प्रति अयं ध्रुवः अध्रुवः इति संशयः समुत्पन्नः । यतः स स्थलान्तरं भजते इति तज्ज्ञाः वदन्ति ।

## संशोधनम्

कश्चिद् भूस्तरवेदी पुरा प्राहः—उत्तरध्रुवः अध्रुवः। सः पश्चिमतः उत्तरां दिशं उत्तरतः गतागतं कुर्वन् भुजगत्या साम्प्रतं स्थानं सम्प्राप्तः । एकदा स तु हिमगिरेः पादमवस्थितः । परं तदा तस्य एतन्मतं न केनापि अनुमोदितम् । तेन हि तस्य अयं क्लेशः व्यर्थतामिव अभजत । ततश्च भूगोलस्य अक्षाः स्थलान्तरं प्रप्नुवन्तीति प्रतीतेः आन्तरराष्ट्रियभूगोलमण्डलं साग्रहं विषयमिमं समुद्दिश्य संशोधनं प्रावर्तत ।

## वेधशालाः

तदनुरोधात् चतुर्षु राष्ट्रेषु प्रवर्तमानाः पञ्च वेधशालाः अस्मिन् कर्मणि नियुक्ताः । तासु द्वे अमरिकादेशे अन्याः पासिफिकमहासागरात् अनन्तरे होण्डद्वीपे, अपरा अफगानस्य उत्तरप्रदेशे रशियाङ्कित-तुर्कदेशे, अन्तिमा च साडिनिरादेशस्य नैर्ऋत्ये दिग्भागे सनपिक्ट्रोद्वीपे । एताः सर्वाः समानांशस्थाः । तस्मात् अत्रत्यानां सर्वेषां शास्त्रज्ञानां ग्रहविषयकप्रतीतिः न विसंवदेत । अत्र प्रतिनक्तं शास्त्रज्ञाः ग्रहविशेषाणां वेधान् गृह्णन्ति लिखन्ति च । यता भूः स्वाक्षं परितः परिवर्तनकाले सततमास्फालयति । तदनु अंशानां परिवर्तनं जायते । ते तु अवश्यं परीक्षणीयाः ।

## ध्रुवस्य स्थलान्तरम्

चण्डलेरनामा विख्यातः शास्त्रज्ञ आसीत् । तेन चतुर्दशानां मासानां ग्रहवेधाः गृहीताः । चतुर्दशभिर्मासैः उत्तरध्रुवस्थः पृथिव्या अक्षः प्रायशः षष्टिं पदानि यावत् स्थलान्तरं कुरुते" इति तेन प्रत्यायितम् । अतः "उत्तरध्रुवः अध्रुवः" इति निश्चेतुं शक्यते ।

---

भारतस्तर्हि तस्य दुष्परिणामो भाविन्यपत्यवर्गे निपतिष्यति अतः कन्या अपि शिक्षणीयाः । कन्यानामपि पृथग् गुरुकुलानि विधातव्यानि । स्त्रीप्रकृतिपुरुषप्रकृत्योर्भिन्नते परमेश्वरप्रदत्ते । तस्मात्तत्प्रकृतेरनुकूलं गृहस्थ्योपयोगि च सकलमपि साहित्यं शिक्षणीयं विदुषीभ्यः कन्याभ्यः । यदि कस्यापि विशिष्टस्य विषयस्य न मिलत्यध्यापिका तर्हि पुरुषाध्यापकः ... चरित्रवान् पाठयितुं ग्राह्य एव । परन्तु कन्यानां ...नाञ्च सहशिक्षा नोचिता । तस्या अभारतीयत्वात् । ... अपि समयोपयोगिनीं सैनिकशिक्षां लभेरन् ।

माननीया विपश्चितः ! शिक्षाविषये स्वल्पमति... मदीया विचारास्तत्र भवतां महामहविदुषां समुपस्थाप्यन्ते प्रार्थ्यन्ते च भवन्तोऽपि स्वविचारान् प्रकाशयन्त्विति । यथा दधिमन्थनैरायुरारोग्य... देवभोग्यं नवनीतं निःसरति तथा परस्परानुपम विचारमन्थनैर्निसृतो निर्णयो भारतस्य शान्तिकर्ता तुष्टिकर्ता पुष्टिकर्ताऽभयकर्ता हितकर्ता च भवेदिति ... मे मतिरित्युक्त्वा विरमामीति शम् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# मालाकारः

लेखकः—श्रीमदनमोहनझा न्यायव्याकरणसाहित्याचार्यः, मुजफ्फरपुरस्थ राजकीयसंस्कृतमहाविद्यालयाध्यापकः

[ ४ ]

अग्रिमे दिवसे प्रातरेव राजकुमार्यौ राज्ञोऽन्तिके वसन्तस्यावज्ञामयं दुस्साहसं वर्णयित्वा-निवेदयामासुर्यदयमसभ्यो मालाकारः शूलमारोपणीयः। राजकन्याश्चिरकालान्तरहत्यायाः दृश्यं द्रष्टुं व्यग्रा आसन्।

नृपतेरादेशेन 'वसन्तो' राजसदसि बध्वाऽऽनीतः। तेन विनैव वाग्जालं स्वापराधः स्वीकृतः। यदि स मिथ्या निगद्यापि स्वापराधस्य स्वीकारन्नाकरिष्यत, तदा राजसभासुखमेवान्वभविष्यत्। परन्तु तथा नाभूत्, 'वसन्तः' एतस्मान्निराशामयाज्जीवनान्मरणं साधु मन्यमान आसीत्। अतस्तेन केनापि प्रकारेण स्वापराधस्याऽस्वीकारो न कृतः। 'वसन्तं' दृष्ट्वा-कठोरकवचधारिणां प्रहारिणामपि नेत्रेषु अश्रुबिन्दवः समायाताः। आः! कीदृशं रमणीयं रूपमस्ति, किमनेन नयनानन्दकरेण 'वसन्तेन' शूलमारुह्य प्राणा दातव्याः ?

राजा राजकन्याः सानुनयमन्वरुधत, कन्यकाः! अयमुन्मत्तोऽस्ति, एनं राजधानीतो निष्काशयत, तावतैव सर्वोऽप्युपद्रवः शान्तो भवेत्।

किन्तु राजकुमार्यौ निजप्रतिज्ञातो न चलिताः सेवकस्य रक्तेन ताः स्वनेत्रेषु सुखाञ्जनमवश्यमेव करिष्यन्ति। 'वसन्तस्य' हृदयं दलितं विधाय स्वचरणरञ्जनमन्तरा ता न मन्येरन्।

अन्ते राजा महता कष्टेनादिदेश-यद् 'वसन्तो' यावज्जीवनं कारागारे रक्षणीयः।

कुमारिका ऊचुः—अस्तु, यदि कारागारस्यैव देशो भवति, तदाऽऽन्तःपुरस्य कारागारेऽयं स्थापनीयः। तत्र स्थापने एनमाधारीकृत्य वयं मनो विनोदयिष्यामः।

राजोवाच—तथास्तु।

दयामयीनामन्तःपुरिकाणां येषु कोपो भवति तेषां दुर्दैवोपहतानां कृतेऽन्तः पुरे एकः कारागारो निर्मित आसीत्। अयं कारागारो निजलौहकपाटदन्तान् मेलयित्वा यं कवलयति तं जीर्णं सत्वहीनं अविधाय बहिर्न निस्सारयत्, एषु कपाटेषु कुत्र लघ्वपि छिद्रन्नासीत, यद्द्वारा लघीयानपि वाह्यः प्रकाशः श्रमेणापि अन्तः प्रविशेत्। केवलमल्पानिलप्रवेशाय छदिभित्त्योः सन्धिस्थले द्वित्राणि लघुछिद्राण्यासन्, अपि च भोजनदानायैकपात्रप्रवेशयोग्यो लघुरूप एकोऽवकाश आसीत्। अयं सौविध्यलेशोऽपि रोगिणे (? बन्दिने) सुखदानाय नासीत्, अपितु शीघ्रमृत्युनिरोधाय। अस्मिन् कारागारे यो भाग्यहीनो गच्छतिस्म, तेन सधैर्यम्मृत्योः प्रतीक्षैव कर्तव्याऽऽभूत्। भोजनदानावरमियदुन्नतस्थाने आसीत्, येन पथा बाह्या मनुष्या अन्तःस्थितम् अन्तःस्थिता वा बाह्यान् द्रष्टुं नाशक्नुवन्। हस्तेन भोजनादानप्रदाने केवलं समभूताम्। भोजनपात्रस्याकके स्थापनाय व्यवस्था कृताऽऽसीत्। यदा भोजनपात्रं रिक्तं नाभवत्, तदा लोको जानाति यदद्य बन्दिः पीडितोऽस्ति।

यदि दिनसप्तकं यावन्निरन्तरमरिक्तमेव भोजन...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



…त्रमतिष्ठत्, तदा वन्दैर्भवयन्त्रणामोक्षो विज्ञातो भवतिस्म।

…वसन्तोऽस्मिन्नेव कारागारे स्थापितोऽभूत्। तस्य …सकलानां मनोरथानां जननी धरित्री, प्रेमास्पदानि तानि …नि मुखानि, सूर्याचन्द्रमसोः प्रकाशः, आकाशः, अर्थात् सर्वे प्रियाः पदार्थाः चिराय लौहकपाटव्यवधाने …प्ता अभूवन्। बाह्यो हर्षसूचकः कोलाहलस्तस्य कर्णौ …रातिस्म, परन्तु स निष्फलप्रणयः शोके तथा मग्नोऽतिष्ठत्, येन विषयान्तरेषु ध्यानमेव तस्य नागच्छत।

सुन्दर्यो राजकन्याः कारागारस्य भं जनदानच्छि- …समीपे गत्वा हसन्त्यो जगदुः–वरमहाशय! श्वशुरा- …ये कीदृशं सुखं भवति? रसिक! मालाकार! वयं …दर्थं वरणमाल्यमादाय समुपस्थिताः स्मः गृहाणेदं माल्यम्, एवमुक्त्वा कण्टकनिर्मितं माल्यं वसन्तस्य पुरो निक्षिप्य ता उच्चैरहसन्। कण्टकादपि तीक्ष्णं वत्तासां …हास्यं पश्चात् स्थिताया यमुनाया हृदये शूलमि- वाहन्ति।

परन्तु राजकुमारीणामयं दुर्व्यवहारो 'वसन्तस्य' …येऽधिकां पीडां दातुं नार्हति, यतस्तासां प्रथम एव …व्यवहारस्तथा मर्म अभिनत्, यथा पश्चात्कालिक- …नाया अनुभव एव 'वसन्तस्य' नाभूत्।

'वसन्तो' महान्तमनुनयं विधाय कारागारे …णीमपि सहानीतवानासीत्। यदा स तस्मि- …नुप्रविश्य स्वकीयामेकमात्रप्रणयिनीं वीणां हृदये- …ऽङ्गाय तस्यास्तन्त्रीभिः स्वकीयामन्तर्व्यथां …व्यनक्ति तदा सम्पूर्णा राजपुरी विषादसागरे मग्ना …भवति। तस्मिन् राजप्रासादे ता राजकुमार्य एव तथा- विधा आसन्, यास्तस्मिन् काले विहस्य कथयन्ति, यत्पश्यत-वरमहाराजोऽपि श्वशुरालये गायति।

राजकन्यानामानन्दः उत्साहश्च दिनद्वयेनैव श्रान्तो बभूव। 'वसन्तेन' सहैकविधादामोदात् तासां मनांसि समुद्विग्नानि। अधुना ताभिर्नूतनामोदानु- सन्धानाय कर्णाटकलिङ्गादिदेशानां भूपालेषु स्वकीया चित्तवृत्तिः परिवर्तिता।

( ५ )

अतः परं राजकुमारीणामनागमनेन 'वसन्तः' कियतीं प्रसन्नतामनुभवन्नवर्तिष्ट। तेन-दृष्टं-यदद्यत्वे राजकुमार्यो नागच्छन्ति। परन्तु भोजनपात्रं द्वयोः संध्ययोः नियमितरूपेणाक्के समुपस्थितं तिष्ठति। या तदर्थमहारमानयति, तस्याः करौ कोमलौ स्तः। सा काचित् करुणामयी रमणी विद्यते। अद्यत्वे सा कटोरकपरिमितान् सक्तून् आनयति, अपिच पयसा पाटलाजलेन च स्निग्धीकृतानां सक्तूनामधो नानाविधानि व्यञ्जनानि गोपितानि तिष्ठन्ति। कटोरकञ्च तत् सुगन्धिना माल्येन परिवेष्टितं तिष्ठति। अनेनाचरणविशेषेण 'वसन्तो' ज्ञातवान्, यदस्मिन् पाषाणमये प्रासादेऽपि काचित् कोमलहृदया वर्तते। परन्तु सा करुणामयी कास्तीति जिज्ञासा 'वसन्तं' व्याकुलं कर्तुमारेभे।

क्रमशो 'वसन्तस्य' हृदयं ता करुणामयीं प्रति आकृष्टमभूत्। 'वसन्तो' भोजनपात्रमाधातुमागमिष्यन्तौ तस्याः करुणावरुणालयायाः कोमलौ करौ द्रष्टुं भोजनागमनमार्गे सततं नेत्रे स्थिरीकृते अरक्षत्। चिरं पश्यतो 'वसन्तस्य' हस्तदर्शनसमयो निश्चितप्रायो जातः। यदाऽऽक्कमुखे भित्तेश्छाया



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कियत्क्षीणा पततिस्म, गृहस्थान्धकारः आंशिकीं लघुतामासादयतिस्म, एवं पवनागमनमार्गेभ्यो भास्करस्य प्रभा लघु लघु कारागृहान्तः प्रविशतिस्म, तदैव तस्याः करुणामूर्तेराविर्भावो भवन्नासीत्। तस्मिन् बहिर्वायोः संसरणशब्दः, पत्राणां मर्मररवः गतागतकारिणां पदनिक्षेपध्वनिश्च वसन्तमाकुलं चक्रिरे। तदा स सकलं स्वमनोयोगं श्रवणयोर्नेत्रयोश्च केन्द्रीकृत्योपाविशत्। तदनु यदा सा अन्नपूर्णा अक्के भोजनकटोरकं स्थापयित्वा मधुरेण कण्ठेन समाह्वयत वसन्त! तदा 'वसन्तः' समुत्फुल्लः सत्वरमुत्प्लुत्य द्वाभ्यां कराभ्यां तत्कटोरकमगृह्णात् किन्तु अपरिचितस्यादृष्टपूर्वस्य तस्य स्वप्रणयिनो हस्ताभ्यां कटोरकग्रहणे 'वसन्तस्य' महान् कालोऽलगत्।

तौ हस्तौ 'वसन्तस्य' जीवनसर्वस्वभूतावास्ताम्। तौ हस्तौ स स्वकीयसकलाशाकांक्षाणामवलम्बनमज्ञासीत्, अतस्तौ साभिलाषदृशाऽद्राक्षीत्। तयोः करयोर्विशिष्टमाकारमङ्गुलीनां विशिष्टां भङ्गीं, नखानां विशिष्टं संस्थानम्, हस्तरेखाणां रचनां, तथा दक्षिणहस्तस्य मणिबन्धे स्थितं लघुतिलं निरन्तरं पश्यन् स तथा पर्यचिनोत्, यथा स करसहस्रेष्वपि तौ करौ गवेष्य(?) निस्सारयितुं प्रभवेत्। तयोर्हस्तयोः स्पर्शमात्रेण यादृशो रसरोमाञ्चो वसन्तशरीरे समुद्भवतिस्म, स स्पष्टमसूचयत् यद्यस्या इमा अङ्गुलयः सन्ति, सा लज्जावती दयावती चास्तीति। 'वसन्तो' विचारयन्नवर्तत-यत्-इमौ करौ यत्कायमलंकुरुतः, एतन्मनो यदङ्गलतिकां सञ्चालयति, अयं दयार्द्रकण्ठस्वरो यस्य शरीरस्य शृङ्गारभूतोऽस्ति, तच्छरीरं कीदृशं सुन्दरं, दिव्यं प्रशंसनीयञ्च भवेत्।

एकदा संयमपालनेऽसमर्थेन 'वसन्तेन' तत्करयुगलं दृढं गृहीत्वा कथितम् देवि! ममोपरि अयम् भारः कया वर्ध्यते? त्वं कासि? या बद्धमेनं प्राणैः बन्धनैर्निगडयसि, किमहमधमर्ण एव भवन्स्थास्यामि अत्र तु तदृणशोधनस्य कोऽप्युपायो नावलोक्यते।

सा युवतिः स्नेहपूर्णैः स्वरैरुवाच-मालाकार त्वम् बिभिहि। या तव महता ऋणेन भाराक्रान्तास्मि सैवेदानीं स्वकृतज्ञताया अंशमात्रं प्रकाशयितुं चेष्टे

'वसन्तः' सविस्मयमपृच्छत्-मम ऋणेन भाराक्रान्ताऽसि? का त्वम्?

तरुणी कथयामास-सुभद्रेति मम नामधेयमस्ति

'वसन्तो' नम्रस्वरैरूचे-भद्रे! त्वं कासीति न विज्ञायते, परन्तु तव दयां दृष्ट्वा पुनरहमधुना लोके स्थातुमिच्छामि।

तरुणी कांतरतामभिव्यञ्जयन्ती जगाद-यत् स्वप्राणानपि दत्वा त्वां मोचयितुं प्राभविष्यम्, तथाकरणे अग्रपश्चाद्भावं नावालम्बयिष्यम्।

तरुण्या वाक्यमिदमश्रुसिक्तमासीत्। 'वसन्तो' निजहृदये तस्यार्द्रं कम्पमानञ्च स्पर्शमकरोत्। समु सन् अकथयत्-राजकुमार्यः किमेनं भाग्यहीनं क न स्मरन्ति?

वसन्त! न तास्त्वां कदापि स्मरन्ति। ईदृशानां विषयाणां विचाराय तासामवकाश एव ना 'इन्दिरा, शुक्ला, आनन्दिता' च क्रमशः कलिङ्ग-मद्रदेशानां सिंहासनान्यलंकर्तुम् चिन्तिताः तिष्ठन्ति।

अपि च राजकुमारी यमुना? 'वसन्तेन' पृष्टम्

दीना सा साहसहीना, शक्तिहीना, हृदयं चास्ति, तस्या बहिरङ्गं विधाता, स्वयञ्चान्तरङ्गं च्छादयत्। पुनस्तस्याः कुत एवंविधं भाग्यं भ



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



तत्र कामपि चिन्तां सा कुर्यात्। अपि च यस्मिन् अन्तःपुरे निरपराधः एकः पुरुषः प्रतिपलं मृत्योरभिमुखं गच्छति, तदपहाय सा क्वापि गन्तुमेव न शक्नोति। तयो भगिन्यो यत्पापमकार्षुः तस्य प्रायश्चित्तं तया कर्तव्यम्।

'वसन्तो' विस्मितः सन्नचकथत्—तत्किं यमुना मां स्मरति?

वसन्त! सा स्मरत्येव नहि रात्रिंदिवं तवनाम्नं एव मालां जपति। त्वया इयन्ति दिनानि पुष्पमाला उपहृत्य, गानं श्रावयित्वा, प्रतिपाठं पाठयित्वा या सन्तोषिता, सैवाद्य त्वामापन्मुखे पातयित्वा किं विस्मर्तुं शक्नोति? इयद् दुस्साहसं तत्साध्यन्नास्ति।

'वसन्तो' लज्जामनुभवन्नवादीत्—मया तु सा कदापि न तोषिता, सदा गन्धहीनकुसुमानामेक-मरमणीयं माल्य निर्माय तस्यै निरादरमर्पितम्।

सुभद्रा सविनयकण्ठेनाकथयत्—सा तु तदेवार-मणीयं माल्यं परमादरेण मूर्ध्ना जग्राह। सा स्वजीवने कदापि किमपि विशिष्टं नालभत, अतस्त्वया दत्तं तत्समपि बहुमन्यत।

'यद्येवं, तर्हि तया मम प्रणयदानं कुतो नाङ्गीकृतम्?'

यतः सा हतभाग्या वर्तते। यस्मिन् काले सा ...ः समीपे गतासीत्, तदा भवान् तां किमपि नाक-...। केवलं स्वव्यथया तामपि व्यथितां विधाय ...वर्तयत्।

'वसन्तस्य' मनः सुखदुःखयोर्मज्जनोन्मज्जने कर्तुं-...। स उत्तेजित इवावोचत्—तर्हि सा अधुना मां ... कुतो नायाता?

सुभद्रा किञ्चिदुच्चैरुत्थाय स्वच्छां स्वदृष्टिं विवरा-दन्तः प्रवेशयन्ती कथितवती—सा त्वामवलोकयितु-न्नित्यमायाति परन्तु सा स्वभावतो लज्जालुरस्ति, अतस्त्वत्समक्षे नात्मानं प्रकाशयितुं प्रभवति। अहं तस्या एवेच्छया भवन्तं सेवे।

'वसन्तः' प्रफुल्लमानसः सन् सुभद्रायाः करौ गाढमालिङ्ग्यालपत्—भद्रे! तव वार्तां श्रुत्वा पुनरि-दानीं मयि जीवनलालसा जागर्ति। यतो जगति 'इन्दिरा' शुक्ला, आनन्दिता एव न सन्ति, तस्मिन् 'यमुना-सुभद्रे' अपि विद्येते। भद्रे! 'यमुना' मम दृष्टिपथातिथिरवश्यमभूत्, परन्तु सा एवम्मधुरस्व-भावास्तीति नाज्ञासिषम्। त्वां कदापि नाद्राक्षम्, तथापि तवान्तरङ्गं कियद् रमणीयमस्तीति निपुण-मवेदिषम्। 'यमुनां' कुरूपां दृष्ट्वा तस्या यदनादर मकार्षम्, तेनाद्य नितान्तं लज्जितोऽस्मि। त्वयाऽस्य रूपलोलुपस्याविनयं क्षन्तुं सा प्रार्थनीया, अपिच यदि त्वं मां गृह्णीयास्तर्हि अस्मात् कारागृहाद् बहिरागन्तुं यतेय।

सुभद्राऽऽवादीत्-अहमपि यमुनेव कुरूपा श्रीहीना चास्मि।

'वसन्तः' उत्तेजनयाऽऽचष्ट-भवतु तव रूपं श्यामं शोभारहितञ्च, तथापि मम कृते तन्नयनाभिरामं भवेत्। यस्याः करौ एवं दुःखापहारिणौ स्तः, हृदयमेवं सदयमास्ते, कण्ठश्चैवं मधुरो विनयविनम्रश्च विद्यते, तस्याः सौन्दर्यस्य सीमा नास्ति। तस्यास्तुलना समस्ते-ऽपि संसारे नासादयितुं शक्या।

सुभद्रयोक्तम्-त्वं मम परिचयं न पृष्टवान्।

'वसन्तो'ऽवादीत्-अहमिदानीं त्वदीयं कमपि परिचयं प्राप्तुं नेच्छामि। सकृदहं बाह्य-परिचयप्रपञ्चे



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पतित्वा 'यमुनाया' अपराधी सम्वृत्तः। त्वदीयोऽन्तरङ्ग एव परिचयो मदर्थं पर्याप्तः। केवलमेतावतैव बोधेनालम् यत्त्वं सुभद्रासि, मह्यं स्पृहयसि, तुभ्यं चाहं स्पृहयामि। अयमन्तिमः परिचयः केवलं त्वया देयः यदितो निष्क्रान्ते मयि त्वं राजकुमारीणां सङ्गं, राजप्रासादस्याकर्षकमैश्वर्यञ्च विहाय मम कुटीरे जीवनं यापयितुं गन्तुं शक्नोषि? साधारणस्यैकस्य मालिनः करग्रहं विधातुमर्हसि?

सुभद्राऽऽनेन प्रसङ्गेन त्रपामाप। सा स्वमुखेन कथं कथयतु यदहं प्राणपणेनापि त्वामिच्छामि। तस्या हृदयं बहिरागत्य वक्तुमिच्छति यदिदमेवम्, त्वयि मम सातिशया प्रीतिः, सर्वं विसृज्य तव कुटीरे सुखेनाहं स्थास्यामि, तुभ्यं सुखदानमेव मम प्रथमश्चरमश्चाभिलाष इति किन्तु लज्जा वक्तुं न ददौ। साधुनावधि यद् वार्तां कुर्वत्यासीत्, तत्र तयोर्भित्तिव्यवधानम् वसन्तस्यापरिचयश्च हेतुरभूत्। परन्तु व्यवहिताऽपरिचिताऽपि सा स्वमुखेन प्रणयनिवेदनं कर्तुं न शशाक।

उत्तरमनासाद्य 'वसन्तः' पुनरवोचत्–कथय सुभद्रे! कथय, अस्य हतभाग्यस्य सुखदुःखे जीवनमरणे, तवैवोत्तरे निर्भरे। किं त्वं सामान्यमेनं मालिनं ग्रहीतुं शक्नोषि?

त्रपासंकुचिता सुभद्रा महता काठिन्येन मन्दमुवाच-वसन्त! त्वं यदि सामान्योऽसि, तदाऽऽहमपि असामान्या नास्मि, त्वं यदि मां कालीं कुरूपाञ्च ज्ञात्वापि ग्रहीष्यसि, तदा तव कुटीरमेव मम दृष्ट्या प्रासादीयेत्।

एतानि वाक्यान्युक्त्वा 'सुभद्रा' स्वयं मृतेवलज्जया।

'वसन्त'स्तस्या हस्तौ निपीड्य जगाद-सुभ... जीवेयमहम्, त्वदर्थं जीवेयम्। अतः परं लेखसा... त्वम् मदर्थमानय, येनाहं स्वमोक्षस्योपायं करवाणि।

अद्य वन्देरानन्दरागिणी-झंकारेण सम... राजप्रासादः सहसा चकितः स्तब्धश्च समभूत्। ... भुवनमोहिना ध्वनिना सर्वे श्रोतारोऽननुभूतपूर्वं सु... मन्वभवन्। परन्तु "न जानामि कुतो" 'यमुना' ... गत्वा रोदनं प्रारभत।

'वसन्तस्य' हृदयमद्य प्रेम्णः प्रतिदानेन आन... मन्थरं भवति। प्रियायाः कोमलेन करस्पर्शेन ... सम्पूर्णं शरीरं पुलकितमकारि। स व्याकुलतया र... प्रतीक्षते। स मनसि प्रत्येति यदस्यान्धकारागा... लौहमयानि कठोराणि कपाटानि सर्वथोद्घाटित... सन्ति। अहञ्च चन्द्रमसश्चमत्कृतायां चन्द्रिकायां पु... शय्यासीनः पुष्पाभरणैः सुभद्रां सज्जयामि।

एवं चिरप्रतीक्षणानन्तरं कारागारस्यान्धकारम... घनं कुर्वती रजनिरायाता। वसन्तस्य कर्णौ सुभ... शब्दं श्रोतुं व्यग्रौ बभूवतुः। तावदेव 'सुभद्रा... 'वसन्त' इति सम्बोधनपदं मन्दमुच्चारितमश्रूयत।

'वसन्तः' श्रुतपूर्वस्यापि वसन्तेति स्वनामा... मुदयस्याद्य श्रवणेन रोमाञ्चितः सन्नवदत्–सुभ...

'सुभद्रा' लेखसाधनानि (कर्गदं लेखनीं मसीपा... भोजनदानमार्गादग्रेकृत्वाऽऽवदत्–एतानि गृहा...

आनन्दितो 'वसन्तो'ऽल्पेऽपि प्रकाशे यथा... ञ्चित् पत्रमेकं लिखित्वा सुभद्रायै प्रायच्छत्, ... थयच्च—भद्रे! प्रतिजानीहि यदेनत् पत्रं त्वम्... यिष्यसि, न वा यमुनां दर्शयिष्यसि, यदि स्वया ...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# पञ्चनदप्रान्ते संस्कृतपरिस्थितिः

## 'भारती'प्रचारकमुखेन

मईमासस्य ७, ८, ६ तारिकासु अखिलभारतीय-संस्कृतसाहित्यसम्मेलनस्य एकत्रिंशमधिवेशनं जालं-धरनगरे संवृत्तमिति प्रसंगेन पञ्चाम्बुप्रान्ते संस्कृत-प्रचारस्य का परिस्थितिरिति संक्षेपतः समीक्ष्यते तत्र। जालन्धरमिदं पञ्चाम्बुप्रान्तस्य प्रधानं नग-रम्। अत्र हि पञ्चाम्बुविश्वविद्यालयस्य प्राच्यविभा-गीयः (ओरिएण्टल) कालेजः, दयानन्दकालेज-दोआबाकालेज-प्रभृतयो विद्यालयास्तेषु सनातनधर्म-साईदास-रविदास-गवर्नमैण्टप्रभृतीनां मध्यम-विद्यालयेषु च संस्कृतज्ञशास्त्रिणां प्रभूता संख्या। अत एवास्मिन्नगरे संमेलनस्य सोयं महोत्सवो निमन्त्रित आहूयते। संमेलनेऽस्मिन् स्वागतसमित्या, तथा 'भारती' संस्कृतमासिकपत्रिकया च संस्कृतप्रदर्शिन्याः आयोजनोऽभूत्समभिनन्दनीयः समारोहः। यस्याऽवलोकनेन समागताः सर्वेऽपि प्रान्तीयाः प्रतिनिधियो, नागरिकाः, अधिकारश्च भूरिभूरि प्राशंसन्, एतस्या उपयोगितां च सम्यक्समवर्णयन्। पञ्चाम्बुप्रान्तीयविधानसभायाः सदस्या श्रीमती सीतादेवी तु अभिज्ञानशाकुन्तल-नाटकस्य क्रमबद्धं समग्रमपि कथानकं चतुर्दशचित्रे-ष्वङ्कितमवलोक्य निजहृदयभावं प्राकाशयत्— 'विद्यार्थिजीवने पठितं शाकुन्तलं चित्रैरेभिः पुनर्मे हृदये नवीकृतम्।'

संमेलनाध्यक्षश्रीनरहरिविष्णुगाडगिल (लोक सभा-सदस्य)-श्रीअनन्तशयनमायङ्गार (केन्द्रीय धारासभोपाध्यक्ष)-श्रीभीमसेनसच्चर (पञ्चाम्बु प्रान्तीयमुख्यमन्त्रि) राजा मयूरभञ्जदेव (उडीसा) प्रभृतीनां भाषणानि, "भारते देववाण्याः प्रचारेण पुनरपि तस्याः पूर्ववन्मान्यताप्राप्तिः स्यात्" एतद्-विषये संजातान्येव, किन्तु पं० विश्वनाथशास्त्री खन्ना, रघुनन्दनशास्त्री (जालन्धर), जगन्नारायणशास्त्री (होशियारपुर), म० म० पं० गिरिधरशर्मा चतुर्वेदी, आचार्यविश्वबन्धुशास्त्री, कालीप्रसादशास्त्री (वाराणसी), विद्याधरशास्त्री (बीकानेर) एतत्-प्रभृतीनां भाषणानि—'संस्कृतसाहित्यस्याऽभ्युदयो भवेत्, प्रचारार्थं के उपायाः, राजतन्त्रेण एतदर्थं सुतरामवधानं देयम्,' एतद्विषये मार्मिकाणि संवृत्तानि। संमेलने शलाकापरीक्षा वर्तमानसमये नवीनताप्रद-र्शिनी। तस्यां हि—सर्वप्राथम्येन पुरस्कृतस्य रामप्रसाद-शास्त्रिणो निरविच्छिन्नं व्याकरणे होराद्वयपर्यन्तं प्रत्युत्तर-क्रमम्, तदुपरि-एकसहस्रमुद्रापुरस्कारं चाऽवलोक्य आङ्गलभाषापारंगताः प्रभाविता अभवन्। 'व्याकरणसदृशे शुष्कविषये एवंविधः श्रमः अस्मदा-दीनां कृते सुतरामसंभवः' इति संमतिं प्राकाशयन्। संमेलने प्रबन्धस्य व्यवस्था आसीदवश्यंशोचनीया। जालन्धरे सर्वेष्वेव विद्यालयेषु 'भारती'पत्रस्य प्रशंसा शास्त्रिणां मुखादश्रूयत, सर्वैरेव च पत्रस्य ग्राहकतां स्वीकृत्य उत्तरोत्तरमस्या अभिवृद्धेः कामनाऽकारि।

---

...नत् अवन्तिराजमन्त्रिणः पार्श्वे प्रहेष्यते, तदाऽ-...सेनैवाहमस्मात्कारागारान्मुक्तो भवितास्मि।

सुभद्रया कथितम्—शपथमहं करोमि यदत्तरश-...आदेशस्य पालनमहं करिष्यामि।

तस्यामेव रात्रौ एको दूतः पत्रमादाय अवन्तीं ...ये।

—क्रमशः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



**होशियारपुरम्**—'काँगडा' मार्गस्य मध्यगतमिदं संस्कृतप्रचारार्थं परिगणनीयमेव। अस्त्यत्रैकः संस्कृत-विद्यालयो यस्य हि श्रीजगन्नारायणशास्त्री अध्यक्षः। त्रिचतुरा अध्यापकाः उपपञ्चाशद् विद्यार्थिनश्च। अत्रैव 'विश्वेश्वरानन्द-वैदिक-शोधसंस्थानम्', यत्र आचार्यश्रीविश्वबन्धुमहोदयद्वारा संस्कृतसाहित्य-दर्शन-इतिहास-विज्ञान-कला-प्रभृतीनां शोधकार्यं चारुरूपेण परिचलति। सेयं संस्था संस्कृतभाषायाः कृते संजीवनरूपा। अत्रापि प्रायो बहूनां विद्यालयानां शास्त्रिभिः 'भारती' अभिनन्दिता, सर्वप्रकारैः प्रचारिता च।

**काँगडा**—पर्वतक्षेत्रमिदं रमणीयम्। अत्र हि 'हाई स्कूलस्य' शास्त्रिभिः 'भारती' अभिनन्दिता, स्वीकृता च।

**धर्मशाला**—स्थानमिदं पर्वतस्योच्चे प्रदेशेऽस्ति यद्धि शिमलावत् शीतं रमणीयं च। अत्रापि त्रिचतुराः संस्कृतप्रेमिणः प्राप्ता यैर्भारती प्रशंसिता स्वीकृता च।

**पठानकोट**—स्थानमिदं पञ्चनदस्य काश्मीरस्य च सीमाप्रदेशेऽवस्थितम्। अत्रापि-'आर्यस्कूलेषु' 'सनातनधर्मविद्यालयेषु' च ये पण्डिताः प्राप्तास्तेषां देववाणीं प्रति भृशमनुरागः प्रेक्षितः। सर्वेऽप्यमी संस्कृतपत्रस्य प्रचारे प्रकामं प्राकाशयन् श्रद्धाम्।

**जम्मू**—'रावी' नदीमुल्लङ्घ्य नगरमिदमध्य-गच्छम्। श्रीरघुनाथमन्दिरे राजकीयसंस्कृतविद्यालये, महिलाविद्यापीठस्य माध्यमिकविद्यालये, अन्येष्वपि च विद्यास्थानेषु संस्कृताध्यापनस्य व्यवस्थामालोक्य समभवत्संतोषः। काश्मीराः संस्कृतविद्यायाः प्रधान-पीठम्, तत्र हि साम्प्रतमपि देववाण्याः स्रोतो नि रुद्धं प्रवहतीति समनुभूय कस्य वा न हृषा भ अत्रापि 'भारती' अधिकांशतः शास्त्रिभिः आ स्वीकृता च। हन्त! द्वारपर्यन्तं गत्वापि धुरन्धर जन्मदात्रीं, काव्यकलायाः केलिभूमिं काश्मीरसमु नाहं गन्तुं प्राभवं, धनाभावादिनानाकारणक

**गुरुदासपुरम्-बटाला** च—स्थानयो संस्कृतभाषायाः स्वतन्त्रविद्यालया यद्यपि न सं तथापि आर्य-सामाजिकसंस्थानेषु संस्कृतस्य प्र प्रचारादत्रापि शास्त्रिवर्गेण 'भारती' सहर्षं स्वीकृ 'बटाला' पञ्चाम्बुप्रान्तस्य ईसाईधार्मिकाणां प्र केन्द्रमिति मया तत्रानुभूतम्।

**अमृतसरः**—नगरमिदं पंचनदप्रदेशे सर्वतो कजनसंख्यावत्, सर्वतोऽधिकं सुन्दरं, सर्वतो व्यवसाय-वाणिज्ययुक्तं च। हिन्दुस्थान-पाकस्थान सीमोपर्यवस्थितं सर्वदैव जनानां यातायाताद् मिदम्। सिक्खसंप्रदायस्य सुवर्णमन्दिरम्, जि वाला उद्यानं चात्र पारदेशिकैर्जनैर्दर्शनीयम्। यत् प्रथमं स्थानमितिहासदृष्ट्या, द्वितीयं च आङ्ग निर्दयाऽत्याचारस्य स्मारकरूपेण दर्शनीयं य स्वल्पैरेव क्षणैः परःशता जना गोलिकास्त्रेण न्यहन्यन्त। अत्रापि अन्यान्यनगरवत् आङ्गल संस्कृतभाषा प्रायशः प्रचलिता। गागरमल-छ विद्यालय--दुर्गाणा--संस्कृतविद्यालयप्रभृतयः संस्कृतविद्यालया अत्र विलोक्येरन्। सुप्रसिद्धैः श्रीमायाधारिशास्त्रिभिः सह वि परिचयोऽभवत्, यैः संस्कृतप्रदर्शिन्याश्चित्राणां कारयित्वा पुस्तकरूपेण सर्वतः प्रचारस्योत्साह रितः। 'भारती' कृते भूयसी सहायता प्रदत्ता।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



**लुधियाना**—नगरमिदं गृहोद्योगकारणादत्य- धिकं प्रसिध्यति । 'जापान' वत् प्रतिगृहमत्रापि कर- घैः (करघा) वस्त्रं निर्मीयते, निर्मितवस्त्राणि ...षु निबध्य बहिः प्रेष्यन्ते । अत्रापि विद्यालयेषु संस्कृतस्य प्रायशश्चर्चा श्रूयते । 'भारती' बहुशः स्वीकृताऽभवत् ।

**मोगा-फीरोजपुर-फाजिलका-अबोहरादिमण्डल** ... यथासंभवमवालोक्यत । चतुर्ष्वपि स्थाने- षु संस्कृतस्य स्वल्पाल्पाः सन्ति विद्यालयाः येषु संस्कृताध्ययनस्य यथासंभवं सुविधा । फाजिलकानगरे संस्कृतानुरागिणां संख्या अन्यापेक्षयाऽधिका । अत- स्तत्र 'भारती' प्रचुरसंख्यायां स्वीकृताऽभवत् ।

**भटिण्डा-पटियाला**—प्रान्तमवलोक्य मनसि ...निश्चितमभूत् यदस्मिन्प्रान्ते मुस्लिमबाहुल्यात् उर्दू- भाषायाः प्राचुर्येणास्ति प्रचारः । यस्य हि मुद्रा प्रत्येकं ...स्थले प्राप्यते । सप्ताष्टवर्षेभ्यः पूर्वं हिन्दी स्त्रीणां भाषा ...मन्यत । पेप्सूराज्यस्य शिक्षामन्त्रिणा श्रीवृषभानु- महोदयेन समभूत्समागमः । महाभागेनानेन राजकीय- ...षु 'भारती'स्वीकारस्य दत्तमभूदाश्वासनम् । प्रान्तेऽ- स्मिन् संस्कृतस्य प्रचारः साधारण एव समवाप्यत ।

**अम्बाला**—प्रान्तोयं जनसंख्याऽधिक्यवान् । ...द्वयोर्भागयोर्विभक्तः । एकत्र सैनिकानामावासः (...छावनी), अन्यत्र नागरिकाणाम् । सैनिकावासे ...अधिकी जनसंख्या । द्वयोरपि भागयोः संस्कृतविद्या- लयाः सन्ति । वैदिक-सनातनधर्मविद्यालयेषु संस्कृत- ...स्य समुचितः प्रबन्धः । डी० ए० वी० कालेजस्य ...प्राध्यापकः श्रीचारुदत्तशास्त्रिमहाभागो 'भार- तीम्' अभ्यनन्दत्, सर्वात्मना एतत्प्रचारे सहयोगं दातुमभिवचनमदात् ।

**यमुनानगर, जगाधरी-रोपड़**—प्रान्तमप्यलोक- यम् । जगाधरीनगरे संस्कृतप्रचारः प्रचुरः प्रालोक्यत । इदमेव नगरं बीकानेरकालेजे संस्कृतविभागाध्यक्षस्य श्रीविद्याधरशास्त्रि एम०ए० महाभागस्य अभिजनभूतम् । यो हि महाभागो राजस्थानप्रान्तस्य प्रसिद्धः संस्कृत- सेवी, सम्मेलनस्य समर्थः सहायकश्च । ग्रीष्मावकाश- वशादत्रैव स्थाने शास्त्रिमहोदयस्य दर्शनसौभाग्यमप्य- भूत् । पित्तलपात्राणां कृते भारतेऽपि सुप्रसिद्धमिदं नगरम् ।

**चण्डीगढम्**—अम्बालारोपडयोर्मध्ये पञ्चनदप्र- देशस्य प्रसिद्धमिदं नगरमावासितं नवीनयैव रीत्या । एतस्य भवनावली अमेरिकनपद्धत्या निर्मितेति प्रसिद्धिः । नगरस्योद्यानानि, भवनानि, मार्गांश्चावलोक्य भार- तान्तर्गतमिदमिति न प्रतीयते सहसा । अत्र हि शिक्षामन्त्रिणा श्रीजगत्नारायणमहाभागेन पञ्चाम्बु- प्रान्तीयेषु विद्यालय-पुस्तकालयेषु 'भारती' प्रचारार्थ- मावेदनपत्रं गृहीत्वा तत्स्वीकृतेः सुदृढमाश्वासनं पत्र- द्वारेण प्रेषितम् ।

**करनाल-रोहतक-हिसार-भिवानी**—प्रदेशमवा- लोकयम् । राजस्थानस्य समीपवर्ती सोयं प्रान्तो वेष- भूषादिषु शेखावाटी-बीकनेरप्रदेशमनुहरते । कुरुक्षेत्रे भिवानीनगरे च संस्कृतस्य साधीयान्प्रचारः । भिवानी- नगरे संस्कृतविद्यालयाध्यक्षः श्री पं०छज्जूरामशास्त्रि- महोदयः समगच्छत, यो हि व्याकरण-साहित्ययोः सुप्रसिद्धो विद्वान् । महाभागेनानेन भिवानीप्रान्ते



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ब्राह्मण ! उत्तिष्ठ !!

पं॰गिरिजाशंकरशास्त्री मिश्रः; फतेहपुर, बाराबंकी

पूर्वं वने निवसता महता श्रमेण
या वैदिकी विरचिता भवता व्यवस्था ।
सा स्वार्थ-साधनपराऽद्य भुवि प्रसिद्धा
तद्योग्यतामथ समर्थय सत्प्रमाणैः ॥१॥

या संस्कृतिस्तव जगत्प्रथित-प्रभावा
आध्यात्म-सीमनि परं सुखमातनोति ।
साऽद्योदरस्य भरणेऽक्षमतामुपैति
एतन्नु सत्यमथवा भ्रममात्रमेतत् ॥२॥

तस्मान्निजाऽप्रतिमशास्त्रविलोडनोत्थैः
तर्कैश्च युक्तिसहितैः सबलैः प्रमाणैः ।
इत्थं समाचार महीसुर ! येन तेऽद्य
भूयोऽपि विश्वजनता पदयोर्नता स्यात् ॥३॥

किञ्च स्वशास्त्रमधिकृत्य तदौचितीं त्व
सम्यक् विचारय सखे ! पुनरेकवारम् ।
आवश्यकं यदि तदा जगदेकवन्द्यं
नव्य-स्मृति-प्रणयनं पुनरद्य कुर्याः ॥४॥

तद् रक्ष साम्प्रतमातिक्षतमार्यधर्मं
वर्णाश्रमस्य मुखमुज्ज्वलमद्य कुर्याः ।
येनेह भारतभुवं विरहय्य याता-
स्माकीन-विश्वगुरुता पुनरागता स्यात् ॥५॥

———

'भारती' प्रचारस्य सर्वात्मना साहाय्यं दातुमभिवचनमदायि ।

एवं किल प्रायः समस्तेऽपि पञ्चनदप्रान्ते अनुमानतः २६-२७ नगरेषु संस्कृतस्य भारत्याश्च प्रचारार्थमभ्रमम् । भारतीपत्रस्योपयोगितामवलोक्य त्रिशतानुमिता नवीना ग्राहकाः समभूवन् । अनेकैश्च समीपवर्तिनगर–नागरिकेषु तत्प्रचारस्य सुदृढमभिवचनमदायि । अन्यप्रान्तीयभाषासु यथा संस्कृतभाषाया अपभ्रंशतत संमिश्रणमवाप्यते, तथा पञ्चाम्बुप्रदेशीयभाषायामपि संस्कृतशब्दानां बाहुल्यमनुभूतम् । यथा-

| | | | |
|---|---|---|---|
| कीता | कृतः | देस्रा | दास्ये |
| सुत्ता | सुप्तः | करेसा | करिष्ये |
| लद्धा | लब्धः | घिन | गृहाण |
| दिट्ठा | दृष्टः | अख | अक्षि |
| मिट्ठा | मिष्टः | कना | कर्ण |
| दित्ता | दत्तः | हत्थ | हस्त |
| गिद्धा | गृहीतः | दन्द | दन्त |
| | | | इत्यादि |

———



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# आङ्ग्लदैनिकस्य दृशि संस्कृतम्

देवर्षिकलानाथशास्त्री साहित्याचार्यः जयपुरम्

दिनेष्वेषु भारतस्य कोणात्कोणं पुनः सुरगिरः दुन्दुघोषः आकर्णितः। पञ्चषाणां संस्कृतसंस्थानाम- धिवेशनानि, मान्यताप्राप्तानामुच्चाधिकारिणां संस्कृ- तानुविषयाणि भाषणानि च पुनर्लोकानामवधानं समाकृष्टवन्तः। एतेषु संस्कृतविश्वपरिषदस्तृतीयमधिवे- शनम्, अखिलभारतीयसंस्कृतसाहित्यसम्मेलनस्य ...नम्, अखिलभारतीयसंस्कृतपरिषदः ...विंशमधिवेशनम्, इन्द्रप्रस्थसंस्कृतपरिषदः पञ्चमवा- र्षिकमधिवेशनम् ...कमधिवेशनं चोल्लेख्यान्यभवन्। संस्कृतपण्डितैरस- ...सप्रष्टाधायं संस्कृतमहत्त्वं स्मारिताऽपि परफूत्कार- ...दिनी भारतस्य आंग्लभाषाशिक्षिता जनता न ...तसंस्कृतं प्रत्युत्कर्णा भवति यावत् कश्चन राजाधि- ...री शासको वा न तां स्तौति। अतएव राष्ट्रपतिना, ...नमन्त्रिणाऽन्यैश्च मन्त्रिभिर्यदा संस्कृतस्य चर्चा ...ता तदा बहुभिः पत्रैः, बहुभिश्च नवशिक्षितैः "...मस्ति संस्कृतम्?" इत्यादिकाः प्रश्नाः, स्तुतयश्च ...ताः।

...भारते सर्वाधिकं प्रचारमाप्तस्य सर्वतोऽग्रगण्यस्य ...तपत्रस्य हिन्दुस्तानटाइम्सदैनिकस्यापि दृक् ...योपरि पतिता। पत्रस्यास्य नीतिः त्रिवर्षपूर्वं ...ं संस्कृतप्रचारमकामयत। किन्त्वधुना पत्रेण ...योपरि सम्पादकीयं लिखित्वा सुरगिरो भविष्यत ...आशावादिनी दृष्टिः पातिता। ५ मई बुधवारस्य ...ङ्के Revival of Sanskrit नामके सम्पा- ...के पत्रेणानेन सुरगीर्विषये स्वकीया विचारा ...ताः। पत्रेणास्मिन् गतकतिपयदिवसेषु जायमा- ...संस्कृतसम्बन्धिनो देशव्यापिनः समारोहस्योल्लेखं कृत्वाऽखिलभारतीयसंस्कृतपरिषदोऽध्यक्षपदाद् भाषमा- णस्य पणिक्करमहोदयस्य चर्चा कृता। अयमकथयद् यदन्यैः संस्कृतपण्डितैरिवानेन संस्कृतस्य राष्ट्रभाषात्व- मपि न समर्थितम्, न च पुराणपथानुजीवनमेव श्रेयस्करं निर्धारितम्। अयं वैदुष्यपूर्वकं भारते संस्कृतस्य स्थानं प्रस्तूय—संस्कृते विज्ञान-समाजशास्त्र-प्रभृतीना- माधुनिकविषयाणां, नवयुगचेतनाप्रदातुरभिनवसाहि- त्यस्य च प्रकामं समावेशं कृत्वा भाषायां जीवितसंस्कृतेः प्रातिनिध्यं संस्थापयितुं पण्डितान् मन्त्रयामास। एवमेतेषु दिनेषु भवन्तं संस्कृतकोलाहलं समीक्ष्य सम्पा- दकः प्रातिस्विकानपि विचारान् प्रकाशयामास। अयं कथयति यदेतेष्वेव दिवसेषु अस्माभिरेकमन्यं प्रयोगं विधाय निश्चितं यत्संस्कृते अद्यापि नवयुगीयसभ्यता- नुरूपसाहित्यसृष्टेः, मनोरञ्जनस्य जीवनस्य चापूर्वा शक्तिर्विद्यते। अधुनैव "हिन्दुस्तानटाइम्स" पत्रस्य तत्त्वावधाने भारतीयभाषासु या विश्वकथाप्रतियोगिता समायोजिता, तत्र संस्कृतकथास्पर्द्धाऽपि आसीन्निर्धारिता। अस्यां प्रतियोगितायां सार्द्धशताधिकाः कथा भारतस्य कोणात्कोणात्समायाता, यासां संख्या आशाऽतीता अभूत्। प्रतियोगितायामागताः कथा एतदपि सूच- यन्ति यत्प्रायः सर्वेऽपि संस्कृतपण्डिता हठधार्मिकाः पुराणपथानुयायिनश्च न सन्ति। सर्वेऽपि संस्कृते आधुनिकतमानां विचाराणां प्रातिनिध्यं कर्त्तुमर्हन्ति, यदि तेभ्योऽनुरूपसमयसुविधाः प्रदीयेरन्। संस्कृत- स्योत्थानेनैव राष्ट्रभाषाया हिन्द्याः प्रशस्यतमं श्रेयः। इति। आंग्लभाषीयदैनिकस्यास्य तदेतद्विचारव्यञ्जनं संस्कृतमहत्त्वानभिज्ञानां कृते प्रकाशस्तम्भायेतेति विचारेण तद्विमर्शमभिनन्दामः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# प्रसीदन्तु संस्कृतसेवकाः

भट्टश्रीमथुरानाथशास्त्री, जयपुरम्

सुरभारत्याः सर्वतः प्रचाराय प्रयतन्ते संस्कृत-सेविनः। सर्वेष्वेव प्रान्तेषु सभासम्मेलनादिषु मिथः संलापादिषु च श्रूयते संस्कृतप्रचारविषयिणी चर्चा। प्रार्थ्यन्ते च शासनाधिकारिणः संस्कृतगतेः सीमानं विस्तारयितुम्। किन्तु संतुष्येयुरनेन संवादेन संस्कृतज्ञा यत्संस्कृतसरस्वत्याः समादरः स्वतःसम्भवी। न केवलं प्रजाजनेष्वेव, अपि तु शासनकार्येष्वपि लब्धस्तावत्संप्रवेशः साम्प्रतमेवाऽस्माकमाराध्यया सुरभारत्या। विनोदरूपेणाकर्ण्यतां संवादः।

अप्रेलमासस्य त्रयोविंशे दिवसे पूगफल (सुपारी)-स्योपरि या करवृद्धिर्जायमानाऽऽसीत्तस्या विरोधं कुर्वन् श्रीनरहरि-विष्णुगाडगीलमहाभागो लोकसभायाम् अर्थमन्त्रिणं श्रीदेशमुखं संमुखं विलोक्याऽपठत्प्रार्थनारूपेण निम्नपद्यानि—

श्रमिणां दुर्बलानां च क्षणं सन्तोषदायकम्।
मध्यवित्तजनानां च स्वागतार्थं सहायकम्॥

निर्धनानां च नारीणामेकमेवाश्रयं महत्।
पूगीफलम्, न चैवान्यत् फलं जगति विद्यते॥

नाऽधुना क्रयशक्तिश्च कठिनं जनजीवनम्।
पूगीफलप्रसादोऽपि महर्घो दुर्लभोऽभवत्॥

कृपया करुणां कृत्वा मुक्तं पूगीफलं कुरु।
वित्ताधिप महाभाग! इति संप्रार्थयाम्यहम्॥

सरस्वतीनिदेशमुखः श्रीदेशमुखस्तत्रैव स्थि... पत्रे विलिख्य पद्यमयमुत्तरमश्रावयत् तत्कालम्—

अभ्यर्थना या भवता व्यधायि
पूगीफलाऽऽयातकरप्रसङ्गे।
नाहं तु तां पूरयितुं क्षमोऽस्मि
क्षमस्व मोघोऽनुनयोऽपि सूरे॥
यथावकाशं द्रविणेश्वरेभ्यो
विकासकार्याय कराऽभिलाषः।
दरिद्रनारायणतोऽपि देशे
कराऽवलम्बोऽपरिहार्यकल्पः॥

संवादोऽयं प्रकाशितः संस्कृतपत्रेषु। किन्तु न... पुरात् प्रकाशमानं 'भवितव्यं' पद्यप्रेषणस्य श्रे... 'विक्रम' पत्रसम्पादकाय श्रीसूर्यनारायणव्यास... दयाय दातुमभिलष्यति 'यत्पद्यानीमानि व्यास... भागेन देशमुखाय प्रेषितानीति।' किन्तु 'सं... पत्रे—"लोकसभायां गाडगीलमहाशयेन निर्मि... पद्यानि श्रुत्वा तत्कालमेव तदुत्तरं देशमुखमहो... पद्यैरदात्" इति पश्यामः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

### भूस्वामिसंघस्य सभा

'राजस्थान' प्रान्ते विशिष्टा विशिष्टा ये भूस्वामिन- चिरकालाद् राजस्थानीयनरेशानां शासनेऽद्यावधि सामन्तरूपेणाऽनुवृत्ता आसन् तेषां भूसम्पत्तिं राजस्था- नीयशासनमुक्तां कृत्वा तद्विनिमये तेभ्यो द्रव्यराशे- र्व्यवस्था क्रियेत, इत्यासीद् वर्तमानशासकानां विचारः। तदनुसारं प्राचलद् बहोः कालाद् नानाव्यवस्था, अवधिश्च। किन्तु यस्मिन् विधाने एतेषां भूसंपत्ते र्ग्रह- णस्यादेशः प्रादीयत तत्रैव तदिदमप्यादिष्टमासीद् यत् यस्या भूसम्पत्ते र्वार्षिक आयः पञ्चसहस्रतोऽधिको भवेत् सा भूसम्पत्तिरेव शासकैर्गृह्येत। पञ्चसहस्रतो न्यूनायां भूसम्पत्तौ नाऽयं नियमः परिलग्नो भवेत्। एवं पुण्यविभागीया [ दान-देवमन्दिरादिसम्बन्धिनी ] भूसम्पत्तिश्चापि नियमदस्माद्विमुक्ता भवेत्। नाऽस्यां भूसम्पत्तौ शासकानां हस्तक्षेपो भवेत्।' अयमादेशो 'राजशासन' (गजट) पत्रे प्रकाश्यरूपेण प्रसेधितोऽ- भवत्।

किन्तु इदानीं श्रूयते–पञ्चसहस्रतो न्यूनायामपि भूसम्पत्तौ शासनाधिकारो भवेत्। अवश्यं "दाने- षु च विनियुक्ता भूमिरेभिर्न गृह्यते।' इत्याकर्णयामः। पञ्चसहस्रतो न्यूनया भूसम्पत्त्या राजस्थानीयप्रान्तीया लघवो भूम्यधिकारिणः क्षत्रियाः ( भोमियां ) अपि कृष्यादिव्यवसायेन जीवन्ति। इयत्स्वल्पायामपि भूसम्पत्तौ गृहीतायां परःसहस्राः परिवारा निराधारा भविष्यन्ति। एषु निराधारेषु सत्सु नानाविधानामुपप्लवानां सम्भावना। तदेव सम्मुखगतमिवाऽभवत्। 'क्षत्रिय- महासभायाः' कैश्चित्सदस्यैः भूसम्पत्तिग्रहणाधिकारिभ्यः केन्द्रस्थितेभ्यः संगत्य सूचितं यत् 'पञ्चसहस्रतो न्यूना- यामपि भूसम्पत्तौ शासनाधिकारिभिर्गृहीतायां सर्वेऽप्य- नुमता एव।'

एतदुपरि—जूनमासस्य सप्तदशतारिकायां सायं- काले बृहच्चतुष्पथस्य मध्यभागे ('चौपड, मानकचौक') 'राजस्थानीयभूस्वामिसंघेन' एका सर्वसाधारणसभा आयोजिता। संघस्य संयुक्तमन्त्रिणा श्रीभागीरथसिंहेन समर्थितं यत्—"क्षत्रियमहासभाया यत्प्रतिनिधिमण्डलं श्रीगोविन्दवल्लभपन्तमहोदयेन सह समगच्छत, यश्च निर्णयस्तेन तत्राकारि, तेन सह भूम्यधिकारिसंघस्य न काऽपि सहमतिः। तस्मै शिष्टमण्डलाय भूस्वामिसंघेन प्रातिनिध्यमेव कदा समर्पितमासीत ?"

वक्तृषु सर्वश्रीमदनसिंहो ( दांतासंस्थानाधिपतिः ) श्रीधौकलसिंहः ( एडवोकेट ) म० म० पं० श्रीगिरिधर- शर्मचतुर्वेदमहोदयप्रभृतयोऽभूवन्। सभायां पञ्च प्रस्तावाः सर्वसम्मत्या स्वीकृता अभूवन्। तेषु भूसंपत्ति- सम्बन्धे क्षत्रियमहासभाया विरोधः, राजस्थानीय- भूस्वामिसंघे विश्वासः, राजस्थानीयभाषायै प्रान्तीय- भाषात्वेन स्वीकृतिः. गोवध-मद्यनिषेधयोर्विषये सभायां प्रचुराऽऽसीज्जनसंख्या। वक्तृभिः स्ववक्तव्य- विषयो हृदयेन समार्थ्यत। अतएव संघस्य सर्वे सदस्याः सोत्साहं सहयोगमकुर्वन्। जनता च कार्य- कलापेन प्रभाविता समभूत।

अस्तु, सर्वाणि राज्यानि संघीकृत्य राजस्थानप्रदेशो निर्मितः। तेषां शासनप्रथा परिवर्तिता। स्थानस्थानेभ्यः परिवर्तनं विधाय नित्यनवीनाः शासनाधिकारिणो निर्मीयन्ते। ते तु राजस्थानीयानां प्रजानां हृदयं, तत्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सुखदुःखे च वेदितुं प्रभवन्ति न वा, इति न कदाचिच्चेष्टयते बोद्धुम्। राज्यशासनस्यैको विभागः आम्बेरे स्थाप्यते तर्हि द्वितीयः साम्भरे, तृतीयो माधवपुरे, चतुर्थो मालपुरे इत्येवंरूपेण न्यायं याचमानानां कृते क्रोशक्रोशान्तरिता निर्मिता अभियोगयात्रा। अस्तु, सम्प्रति भूसम्पदैव चिरकालाज्जीवनयात्रां निर्वाहयतां जनानां भूसम्पत्तिरपि चेदधिक्रियते तर्हि स्वतन्त्रशासनेऽस्मिन् को निरोद्धा ?

किन्तु युक्तप्रदेशे अन्यत्र वा, भूम्यधिकारिणामन्यविधा परिस्थितिः, किन्तु अस्मिन् राजस्थाने, विशेषतो जयपुरीयग्रामाञ्चलेषु भूमेः कृषिकर्मणैव जीवतां भूम्यधिकारिणां चान्यविधा स्थितिः। ये च गुणिनां परिवाराः दूरदूरदेशेभ्यः समानीय जयपुरादिराजस्थानेष्वावासिताः; तैः पूर्वशासकदत्तया भूसम्पत्त्यैव-एतावत्कालं स्वपरिस्थितिरवस्थापिता। अप्येषामान्तरिकी परिस्थितिर्न विचारणीया शासकतन्त्रेण ? या च ग्रामादिभूमिर्ज्योतिषादिपरिशोधिते राज-प्रजयोः सर्वदा मङ्गलावहे, चिरकालं यावत्प्रजाजनानां सकलशुभावहे, कस्मिंश्चित्तान्त्रिकसमये प्रदत्ता सा किं हिन्दुत्वाऽभिमानिभिरप्येकवारं दत्त्वा पुनः परावर्तनीया ? या प्रजा एभिः शास्यते तस्याः कल्याणं प्रति शासकैरेभिः किं दृष्टिर्न देया ?

## पाकस्थाने लोकतन्त्रस्य रमानः

यस्मिन्नवसरे पाकामेरिकयोः सैनिकग्रन्थिबन्धः प्रारब्धोऽभूत्तस्मिन्नेव समये राजनैतिकैर्दूरदर्शिभिः भविष्यद्वाणी प्रकाशिताऽभूत् यत्त्वरितमेव पाकस्थानमनुचितं पादप्रसारं करिष्यतीति। तदेव सम्मुखगतमाभाति। पाकाऽमेरिकयोः सैनिकः सम्बन्धः १६मई दिवसेऽभवत्। एतस्मादनन्तरं द्वादशे दिवसे (३१ मई) विरुद्धघटनायाः सांमुख्यमभूत्। पूर्ववङ्गस्य संयुक्तसीमनि ये नेतारः पूर्वतः कार्यकर्तारोऽभवन्-कराचीस्थितस्य अमेरिकाराजदूतस्य इङ्गितानुसारं ते नेतारः पदच्युता अक्रियन्त। पूर्ववङ्गस्य मुख्यमन्त्री मियाँफजलुलहकं देशद्रोहिणमुद्घोष्य, तस्य मन्त्रिमण्डलं पदच्युतमकारि। तत्स्थाने राज्यपाल-शासनं प्रावर्त्यत। राज्यपालशासनेऽपि-पुरातनं राज्यपालं खलीकुज्जमां निर्वास्य तत्स्थाने पाकस्थानस्य सुरक्षासचिवो जनरलसिकन्दरमिर्जा स्थापितोऽभवत्। मिर्जामहाशयस्य पाकामेरिकासैनिकसम्बन्धे विशेषरूपेणाऽऽसीत्सम्बन्धः।

इतो मिर्जामहोदयेनाऽपि राज्यपालपदस्य शपथग्रहणसमये एव 'पूर्व-वङ्गदेशं कराँचीचरणयोरवलोठयिष्यामि' इत्यपि मन्ये शपथो गृहीतोऽभवत्। अतएव लोकतन्त्रानुमतस्य मन्त्रिमण्डलस्य बहिष्कारं विधाय तत्सम्बद्धानामनेकासां व्यक्तीनां कारावन्धः बहूनां च दृष्टिनिगडः (नजरबन्दी) तत्कालमादिष्टोऽभवत्। मुख्यमन्त्री मि० फजलुलहको निजगृहे एव निगडितः कृतः। गृहस्य चतुर्दिक्षु सैनिकानां कठिनः प्रबन्धः स्थापितोऽभवत्। जनताया उपरि सशस्त्र-सैनिकानां घोरातङ्कः प्रतिक्षणं प्रचालितोऽभवत्।

सर्वस्य सारः सोयं यत् बलस्य दमनस्य च पैशाचिकप्रभावेण सोयं पूर्ववङ्गः करांचीप्रदेशस्य उपनिवेशरूपेण तिष्ठेदेवंविधः सैनिकः कार्यक्रमो हठात् परिचाल्यते। प्रकाश्यरूपेण करांचीस्थिताः राजनैतिका लोकमतं लोकतन्त्रं च पदाऽऽक्रम्य चूर्णयितुं चेष्टन्ते। किन्तु स्वीयां स्वतन्त्रतां, स्वबुद्धि



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## देशदर्शनम्—

संसदि विशेषविवाहविधेयकम्— भारतवर्षस्य प्रजातान्त्रिकः सर्वकारः सर्वविधसमाजस्वतन्त्रतायै १९४८ ई० त आरभ्य "हिन्दू लॉ" मध्ये क्रान्तिकाराणां परिवर्त्तनानां भूयसीं चेष्टां विदधाति। संसदः अस्मिन् वसन्ताधिवेशने पुनः "विशेष-विवाह-विधेयक" नाम्ना एकं बिलं कृतम् यदुपरि भूयसी विवादसरणिः प्रवृत्ता। एतस्मिन् बिले मुख्यतमान्यङ्गान्येतान्यासन्-विवाहस्य एकम् आयुः स्थिरीक्रियेत, यतः पूर्वं पश्चाच्च कोऽपि कापि च विवाहकरणे प्रवृत्तौ न स्याताम्। एतद्विषये वैधानिकं नियन्त्रणं स्यात, आवश्यकतायां च दण्डादिव्यवस्थापि क्रियेत। किं च पुरुषस्य स्त्रियाश्चेच्छायां विवाहविच्छेदोऽपि कर्तुं शक्येत। ८ मई तारिकायां भारतीयराज्यपरिषदा विधेयकमिदं बहुसम्मत्या पारितम्। एतदनुसारं विवाहस्य न्यूनान्न्यूनमायुः एकविंशतिवर्षाणि (नरनार्योः कृते) नियतम्, स्त्रीपुरुषयोः विवाहविच्छेदस्य च वैधानिको नियमः कृतः।

---

अपि अमेरिकाचरणयोः समर्प्य तद्विनिमये प्राप्तं सैनिकसाहाय्यं कदाचित्प्रतिकूलं न सिध्येत्?

### भारते फ्रेंचादिवसतीनां समस्या

पाण्डीचेरी, गोआ, डमन, ड्यू, प्रभृतयो भारतेऽस्मिन् फ्रांसस्य पुर्तगालस्य च वसतयः सन्तीति जानन्त्येव सर्वेपि। यस्मिन् समये भारते ब्रिटिशशासनं प्राचलत् तस्मिन् समये गौराङ्गाणां सन्धिसूत्रेण वसतय एताः स्वीयं स्वीयं निवासं स्वातन्त्र्येण पर्यवसायन्। सर्वतः पूर्वं सप्तदशशताब्द्यां पुर्तगालवासिनामत्र पदार्पणमभूत्, येन हि ते शनैः शनैरत्र स्वीयं साम्राज्यमस्थापयन्। आङ्गलानां शासनकाले स्वीयं अत्रनिवासं परिस्थाप्य किञ्चिद्वृद्धेश्चेष्टामकुर्वन्। किन्तु वर्तमानकाले त्रयाणां लघूनामुपनिवेशानां रूपे सत्ता समवाप्यते, येषां जनसंख्या अनुमानतः सपादलक्षानुमिता।

फ्रांसनिवासिनां भारतभूभागे १६६६ तमे ख्रिष्टाब्दे प्रवासोऽभवत्। एतेपि शनैः शनैरत्र प्रकामं विस्तारमकल्पयन्। किन्तु वर्तमानसमये एतेषामधिकारे केवलं पञ्चोपनिवेशाः सन्ति येषां जनसंख्या सपादत्रिलक्षाऽनुमिता। आसीदिदमुचितं यत् यस्मिन् समये गौराङ्गा भारतं परित्यज्य निजाभिजनं जग्मुस्तस्मिन्नेव समये इमेऽपि निजदेशमगमिष्यन्। किन्तु तथा नाऽभूत्। तत्र सोयं प्रश्नः प्रजासु मुहुर्मुहुरुत्तिष्ठति, यत्तत्रत्याः प्रजाः स्वतन्त्राः स्युः, सोऽयं चोपनिवेशो भारते विलीनः स्यात्। किन्तु वार्तयाऽनया फ्रांसपुर्तगालाद्यधिकारिणो विरुध्यन्ते। ते प्रजासु दमनचेष्टामारभन्ते। एते हि जनताद्वारा निर्वाचितान् प्रतिनिधीन् पदच्युतानेव न कुर्वन्ति, अपि तु तान् दण्डयन्त्यपि, दृष्टिनिगडे स्थापयन्ति। समये सत्येव फ्रांसाद्यधिकारिभिः सावधानैर्भाव्यम्।

एते उपनिवेशाः स्वतन्त्रे भारते संप्रति कलङ्कसंकाशाः। भारतीयानां स्वाभिमाने निभृतमाघातं कुर्वन्ति। बहुष्ववसरेषु एतेषु निवसन्तो वैदेशिका भारतस्य नैतिकीमार्थिकीं चापि हानिमुत्पादयन्ति। भारतशासकैस्त्वरितमस्य प्रतीकारः कर्तव्यः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



किन्तु लोकसभायां यदा तदिदमागतम्, तदा माननीयश्रीनेहरोः, माननीयश्रीकाटजोश्च व्यक्तिगतप्रभावे पातितेऽपि तदिदमग्रिममधिवेशनं यावत् स्थगितम्। यैः सदस्यैः लोकसभायां विधेयकस्य विरोधं कुर्वद्भिः उक्तम्—यत् विवाहयोग्यं न्यूनतममायुः १८ वर्षाणि किमिति न मन्येत ? तेषां मन्त्रिमहोदयैरुपहासः कृतः। यदा बहुषु प्रयत्नेषु कृतेष्वपि बिलमिदं न स्वीकृतमिति दृष्टं प्रधानमन्त्रिणा, तदा क्रोधशोकमिश्रेण स्वरेण एकस्मिन् भाषणे श्रीमतोदीरितम्—"अद्य अहं पश्यामि यत् यद्यपि विवाहविच्छेदसम्बन्धिनः अन्ये च "हिन्दू ला" सम्बन्धिनो विषयाः १८७२ ई० तः विधानसभासु विचार्यन्ते तथापि अधुनापर्यन्तमेकोऽपि नियमो न स्वीकृतो भवति। विशेषतो "हिन्दूकोड बिलं" यदा मदीयनिरन्तराश्वासनेषु प्रयत्नेषु च कृतेष्वपि नाधुनापि पार्यते-अतः सम्भावयामि यद् देशे हिन्दुषु क्रान्तेश्चेतना लुप्ता। एवंविधानां बिलानां तु स्वागतं कर्त्तव्यमासीत्" इत्यादि।

**हिन्दीभवनम्**—१५ वर्षैः हिन्दी आंग्लभाषायाः स्थानं गृह्णीयात् इति विधाननिर्माणस्य समये घोषितमासीत्। अधुना १५ वर्षाणि १० वर्षाणि अवशिष्टानि। अतएव हिन्द्याः प्रगतये प्रयत्यते सोद्वेगम्। अधुनैव केन्द्रीयशिक्षामन्त्रिणा आश्वासनं दत्तमस्ति यदग्रिमं वत्सरमारभ्य सर्वत्र केन्द्रीयमन्त्रालयेषु हिन्दी-अंग्रेजी च सहैव प्रचलिष्यतः इति। पं० बनारसीदासचतुर्वेदी यो हिन्द्याः सुप्रसिद्धः सेवकः, देहल्यां एकं विशालं "हिन्दीभवनं" चालयितुं वाञ्छति यत्र हिन्द्याः अन्यासां च प्रान्तीयभाषाणां प्रकोष्ठानि स्युः। अनेन हिन्दीसम्बन्धिनामुत्सवानां मार्गे अवकाशाभावजनिता ये विघ्नाः पतन्ति, ते निरस्ता भविष्यन्ति। पं० चतुर्वेदी लिखति यद्वर्षस्य विषये ऽस्ति यदधुना हिन्दीभवनस्य कार्यं प्रारब्धम्। भवनमिदं ६ संस्थानां परिश्रमस्य फलम्। एतस्य भाटकम् १८१) प्रतिमासमस्ति।

**'निराला' लीला**—हिन्द्या महाकविर्निराला बहुवर्षेभ्यः अर्द्धविक्षिप्त इवास्तीति जानन्ति शिक्षिताः। महाशयेऽस्मिन् अनिवार्या दानस्य औदार्यस्य च भावना। एतत् कृते, कवेः स्वास्थ्यरक्षायै च भारतसर्वकारः, उत्तरप्रदेशसर्वकारः भूयसीं सहायतां प्रतिमासं ५दत्तः। अधुना पं० दृष्टं यद्बहवो हिन्दीसेवका आलोचयन्ति यद्यपि सहायता सेयं पर्याप्ता निरालामहाशयाय, परन्तु तथाऽपि तदवस्थायां नातिसुधारस्य कारणमिदं यत् "साहित्यकार संसत्" प्रभृतयः कतिपयसंस्थाः स्वतत्वावधाने 'निराला' सहायतां प्रतिज्ञाय तद्द्रव्यं 'निराला' कृते अदत्वा स्वार्थसाधाने उपयुञ्जते इति भगवानेव जानाति सहायतायाः, तद्द्रव्यस्य च किमिति रहस्यमिति।

## विदेशवार्त्ता —

**फ्रांसमन्त्री शान्तिप्रयत्नश्च**—जून मासस्य तारिकायां श्री पियरे मेंडीस फ्रांस महाशयः फ्रांसदेशस्य प्रधानमन्त्रिणमात्मानमघोषयत्, स्वकीयं मन्त्रिमण्डलं च निर्ममौ। स स्वयमेव विदेशमन्त्री अप्यस्ति। इदं विदितं, यदयं महाशयो जेनेवानगरे अधिविशत. विश्वशान्तिसम्मेलनस्य हिन्दचीनविषयिण्यां वार्तायां सम्मिलितुं शीघ्रमागमिष्यति। एतेन हिन्दचीनविषयकवार्त्तानां साफल्यस्य पुनर्नवा आशा जागृता। इदं न विस्मर्तव्यं यदस्मिन् सम्मेलने कोरियाविषयकसमस्यायाः न कोऽपि निर्णयः अभूत्। अन्ते समस्या सेयं पुनः संयुक्तराष्ट्रसंघं प्रहिता।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## संस्कृत-समाचाराः

**आन्ध्रादिदक्षिणप्रदेशेषु संस्कृतपरिस्थितिः—**

आन्ध्रादिदक्षिणप्रदेशेषु आह्वानसंघकार्यालयः, अरुण्डलपेट, गुण्टूर-स्थानात् गर्तपुरीस्थसंस्कृतसम्मेलनस्याध्यक्षः अवधानिशिरोमणिः महोपाध्यायः मध्वश्रीकाशीकृष्णाचार्यः कार्यदर्शिनौ श्रीनेतिसुब्बरायशास्त्री-जमिलि नम्मालवारमहाभागौ च सूचयन्ति यत्—भारतजातीयविकासस्य मूलभूता संस्कृतभाषा विश्वजनीना व्यवहारभाषा भवितुं योग्या। सर्वैरपि भारतीयैः संस्कृतभाषा अध्येतव्या। संस्कृतसाहित्यादेव भारतीयत्वं प्रपञ्चे विख्यातं भवति। एषा भाषा इतोऽपि सुलभया पद्धत्या अध्यापनीया इति च अभिप्रायेण 'संस्कृतभाषाप्रचारिणी सभा' चित्त रुपत्तने नववर्षेभ्यः प्राक् संस्थापिता।

अस्याः सभायाः आन्ध्रप्रदेशे पञ्चचत्वारिंशत्, द्राविडदेशे पञ्चदश, कर्णाटके त्रीणि केन्द्राणि, नव अनुबन्धसभाश्च संस्थापिताः। संस्कृतभाषाप्रचारिणीसभायाः पक्षे आन्ध्रद्राविडकर्णाटकदेशेषु बह्व्यः संस्कृतपाठशालाः सन्ति। एतासु परिचय, अभिज्ञ, विचक्षण, समर्थकोविदकक्ष्याश्च संस्थापिताः।

चतुर्भ्यः संवत्सरेभ्यः प्राक् अस्याः सभायाः एका मण्डलिकशाखा गर्तपुर्यां संस्थापिता। अस्याः शाखायाः पक्षे संस्कृतप्रचारः क्रियते। गर्तपुर्यामेतत्पर्यन्तं चतस्रः पाठशालाश्च संस्थापिताः, यासु एतावत्पर्यन्तं पूर्वोक्तासु परिचयादिकक्ष्यासु १४६ बालबालिकाः समुत्तीर्णाः।

आन्ध्रदेशे संस्कृतस्य बहुलप्रचारार्थं संस्कृतभाषाप्रचारिणीसभायाः नियमानुरोधेन गर्तपुर्यां आषाढमासे (जुलैमासे प्रथमसप्ताहे) संस्कृतसम्मेलनं करणीयमिति सुनिश्चितमासीत्। अस्य सम्मेलनस्य कृते आह्वानसङ्घश्च सङ्घटितः।

भारतदेशे विविधेषु प्रदेशेषु संस्कृतभाषायाः प्रचारार्थं ये ये प्रयत्नाः क्रियन्ते तेषां सर्वेषां ऐकरस्यं सम्पादनीयम्। समुचितानि भाषाप्रचारकसाधनानि अन्वेष्टव्यानि, तानि च आचरितव्यानि इति च अस्य सम्मेलनस्य आशयः। अपि च गर्तपुर्यां समुन्नता संस्कृतकलाशाला संस्थापनीयेति च एतस्य सम्मेलनस्य प्रधान आशयः।

इदं च सम्मेलनं दिनत्रयं प्रचालयितुं संकल्पोऽस्ति सुप्रसिद्धानां पण्डितवराणां महोपन्यासाः, वक्तृत्वे व्यासरचनायां च बालिकानां स्पर्धापरीक्षाः, संस्कृतनाटकप्रहसनप्रदर्शनानि च कार्यक्रमांशाः भवेयुः।

पण्डितवराः, संस्कृतभाषाभिमानिनः, सर्वाः प्रजाश्च सर्वैर्विधैः अस्य सम्मेलनस्य सफलतासम्पादनाय सहायाः भवन्तु इति प्रार्थयामहे।

### हा हन्त दुर्दैवम् !!

जयपुरीय 'आयुर्वेदककालेज'स्याध्यक्षः, राजस्थानीयस्यायुर्वेदविभागस्य सर्वप्रधानाधिपतिः, राजवैद्य श्रीनन्दकिशोरभिषगाचार्यः अस्मिन्नेव मासे सहसैव स्वर्गवासी समभवदिति। आयुर्वेद जनता तु परमं विषीदत्येव। किन्तु राजस्थानवासिनो, विशिष्य जयपुरप्रान्तीया विद्वांसोऽपि, परमं विषादमनुभवन्ति अस्मिन्नेव वयसि सर्वप्रकारैः वैद्यविद्यासंबन्धिनीमितकशास्त्रसबद्धां च व्युत्पत्तिमधिगत्य भारते परमां ख्यातिमधिगतवानसौ महाभागः। अस्मिन्नेव वत्सरे 'कोट्टकले'(साउथमलाबार)ऽधिनिष्ठस्य अ० भा० वैद्यसम्मेलनस्याध्यक्षपदममण्डयन्महोदयोऽसौ। राजस्थान प्रान्ते आपस्यायुर्वेदस्य सेयं महती हानिः समजनीति को वा न विषीदेत्। वितीर्याद्स्मै भगवान शाश्वती शान्तिमित्यर्थयामहे। यावच्चक्यमग्रे जीवनवृत्तमेतस्य प्रकाशयितुमिच्छामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## इदं संस्कृतं क्रियतां भारतीतः—

कस्मिंश्चिद् ग्रामे द्वौ वैश्यपुत्रौ, परस्परं मित्रतामापन्नौ निवसतः। तौ धनार्जनाय किञ्चित् मूलधनं ग्रन्थौ बद्ध्वा विदेशं अगमताम्। तत्र हि समर्घाण्यावश्यकानि च वस्तूनि विचित्य विचित्य स्वल्पमूल्येन तेषां क्रयम् अकुरुताम्। तदपेक्षया अधिकेन मूल्येन च तेषां विक्रयम् अकुरुताम्। स्वल्प एव कालः व्यतीतः। शनैः शनैः तौ बहु-धनस्य संग्रहम् अकुरुताम्। धनं संगृह्य तौ पुनः स्वं देशं परावर्त्तेताम्। परावर्त्तमानयोस्तयोः एको लोभवशात् अन्यं निद्रितावस्थायां मार्गे रज्ज्वा बबन्ध। तस्य मस्तकं छेत्तुं खड्गं च उत्थापयामास। एतस्मिन्नेव समये स निद्राम् अत्यजत्। तं च मारयितुं सन्नद्धम् अपश्यत्। एतस्य प्रतीकारे अशक्तः सः मृत्योः अबिभेत्। स तस्मै स्वकीयम् अर्द्धं धनं दातुं वचनं ददौ। निजप्राणानां भिक्षां च अयाचत। धनलाभेन सोऽपि तं तत्याज। सत्यमुक्तम् —

"सर्वनाशे समुत्पन्ने, अर्द्धं त्यजति पण्डितः।
अर्द्धेन कुरुते कार्यं, सर्वनाशो हि दुः सहः।"

किसी गाँव में दो बनिये के लड़के आपस में दोस्ती करके रहते थे। वे दोनों धन कमाने के लिए कुछ पूंजी गाँठ में बांधकर परदेश गये। वहां सस्ती और जरूरी चीजों को ढूँढ-ढूँढकर उन्हें सस्ते दामों पर खरीदते थे। उसकी बजाय ज्यादा दामों पर बेचते थे। थाड़ा ही समय बीता था कि उन दोनों ने बहुत से धन का संग्रह कर लिया। धन इकट्ठा करके वे दोनों फिर अपने देश को लौटे। लौटती बार एक ने लालच में आकर दूसरे को निद्रित अवस्था में ही रास्ते में रस्सी से बाँध लिया और उसका सिर काटने को तलवार उठाने लगा। इसी समय उसकी नींद टूटी और उसने उसे अपने को मारने को तैयार देखा। अपने को बचाव में असमर्थ पाकर वह मृत्यु से डर गया। उसने उसे अपना आधा धन देने का वचन दिया, और अपनी जान की भीख माँगी। धन के लालच से उसने भी उसे छोड दिया। ठीक ही कहा है—

"सर्वनाश के आ पड़ने पर समझदार आदमी आधा छोड़ देता है। आधे से अपना काम चलाता है-क्योंकि सर्वनाश तो बहुत ही दु:सह है।"

## धातुप्रयोगपारिजातः—

चर गतिभक्षणयोः (To go, To eat) भ्वादिः। गतौ अकर्मकः। सेट्। परस्मै०। चरति। चचार, चेरतुः, चेरिथ। चरिता। चरिष्यति। चरतु। अचरत्। चरेत्! चर्यात्। अचारीत्। अचरिष्यत्। उत्+उच्चरति=उल्लङ्घ्य गच्छतीत्यर्थः। "उदश्चरः सकर्मकात्" आत्मनेपदम्। सम्+संचरते रथेन। समसृतीवायुकात्। कर्मणि—चर्यते। णिचि—चारयति, ते। सनि—चिचरिषति। यङि—चञ्चूर्यते।

कृदन्ते—चरितव्यम्, चर्यम्। सञ्चार्यम्, ण्यत्। आचर्यः, आचार्यः; यत् (गुरुभिन्ने अर्थे) ण्यत् (गुर्वर्थे)। क्ते – चरितः। शतृ—चरन्। क्त्वा—चरित्वा, संचर्य। चराचरः ("चरिचलि०" इति वा द्वित्वम् आक् च) चरिष्णुः, इष्णुच्। अतिचारी, अपचारी; घिनुण्। सब्रह्मचारी=समानो ब्रह्मचारी, समानस्य सभावः। चरित्रम्—(इत्रः) चारित्रम् (स्वार्थे अण्)। गोचरः (घञन्तो निपात्यते)। संचरः मार्गः। चर्मन्। चारु सुन्दरम् (ञुण्)। चरुः—हव्य द्रव्यम्।

प्रकाशकः—जयबहादुरसिंह पता—भारती भवन, गोपालजी का रास्ता, जयपुर।
मुद्रकः—राजस्थान प्रिंटिंग वर्क्स, हनुमान का रास्ता, जयपुर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

श्री कृष्णद्वैपायनो व्यासः

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥
अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुर्भगवान् बादरायणः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

नवमोऽङ्कः

मूल्यम्
वार्षिकम् ३) रु०

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❀ विषय-सूची ❀


| क्रमः | लेखाः | लेखकाः | पृष्ठसंख्या |
|---|---|---|---|
| १. | भारत धरित्रीयम् | सम्पादकः | १८७ |
| २. | वाण्याश्चरणयोः | श्री गिरजाशंकर शास्त्री फतहपुर (बाराबंकी) | १८७ |
| ३. | स्यमन्तकमणिः | श्री वासुदेवशास्त्री वागेवाडीकर शोलापुर | १८८ |
| ४. | संस्कृतशिक्षा | श्री लक्ष्मीनारायणपुरोहितः साहित्याचार्य उदयपुरम् | १९० |
| ५. | ब्राह्म मुहूर्ते उत्थापनम् | श्री दीनानाथशास्त्री सारस्वतः, देहली | १९४ |
| ६. | श्रीमद्-भिषग्रत्न राजवैद्य नन्दकिशोराचार्याः | श्री प्रभुदत्तशास्त्रीभिषगाचार्यः सीकर | १९५ |
| ७. | उत्थान पतनयोः कारणम् कर्म | श्री मनसुखराय मोर, कलकत्ता | १९७ |
| ८. | मालाकारः | श्री मदनमोहन झा मुजफ्फरपुरम् | २०० |
| ९. | उपनयन रहस्यम् | श्री दीनानाथशास्त्री देहली | २०३ |
| १०. | सम्पादकीयम् | सम्पादकः | २०४ |
| ११. | द्रुतं संस्कृतं शिक्ष्यतां 'भारती'तः | ,, | पृष्ठान्ते |


सूचना :—सर्वे ग्राहका सूच्यन्ते यत् पत्रव्यवहारावसरे निज ग्राहक संख्यां स्वस्मिन् पत्रे अवश्यं दर्शयेयुः। अन्यथा पत्रोत्तरे बाधाः समुत्पद्यन्ते।

## —: "भारती" पत्रस्य उद्देश्यानि नियमाश्च :—

१. संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचारपरिपोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि।

२. 'भारती' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम्।

३. मासिकपत्रमिदं प्रतिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात्।

४. एकस्यांकस्य मूल्यम् ।≈) आणकषट्कम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि-
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्मा शास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षम् ४ | आषाढपूर्णिमा, सं० २०११ | अङ्कः ६

## 'भारतधरित्रीयम्'

[ घनाक्षरी ]

मानवसमाजे सभ्यतायाः साधयित्री सेय—
मतुलमगाधज्ञानराशिजनयित्रीयम्
विश्वमण्डलेऽस्मिन्नखिलेऽपि प्रभवित्री बभौ
भरत-भगीरथादिभूपोद्भावयित्रीयम् ।
श्रीमद्राम-कृष्ण-पदपङ्कजैः पवित्रीकृता
भीष्मप्रमुखानां धर्मधीराणां धरित्रीयम्
वीराणां वरित्री चिन्तनीयचरितानां चारु—
चेतसि चरित्री भाति भारतधारित्रीयम् ॥ १ ॥

—श्रीसंपादकः

## —: वाण्याश्चरणयोः :—

[ पं० गिरिजाशंकरशास्त्री, मिश्रः फतेहपुर, बाराबङ्की ]

भारति ! प्रसीद करबद्धमर्थयामो वय—
मीषदवधानमस्मदर्थनासु दीयताम्
वितर सुबोधमन्तेवासिषु, तदीयामथ
जडतामलसतामशेषामपनीय ताम् ।
शङ्कर-विवेकानन्दसदृशमनीषिवृन्द—
पावनपरम्परेह पुनरुपचीयताम्
भूयोऽपि घनाऽन्धकारपटलनिलीनमम्ब !
भारतसमज्ञा-सूर्यमण्डलमुदीयताम् ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# स्यमन्तकमणिः

लेखकः—म०पं०वसुदेवशास्त्री बागेवाडीकर साहित्याचार्य, काव्य-वेद-तर्क-तीर्थ, शोलापुर

पुरा किल सत्राजिन्नामा यदुकुलवीरो द्वारकामध्यवसत्। स खलु बहूनि वर्षाणि सूर्यमुपास्त। तस्योग्रेण तपसा सन्तुष्टो रविस्तस्मै स्यमन्तकमणिमददात्। भृशं भ्राजमानः स प्रतिदिनं भारद्वयं सुवर्णं ददाति। ईदृशं मणिरत्नं संग्रहीतुं द्वारकाधीशः एवार्हति इति विचार्य भगवान् श्रीकृष्णस्तं तं मणिमायाचत। परं सा याचना विफलतां गता। एवंविधं हि राजस्वं सुखं को दद्यात्?

अथैकदा सत्राजितो भ्राता प्रसेनः स्यमन्तकमणिं कण्ठे बध्नन् मृगयायै वनमयात्। तत्र तं कश्चन सिंहोऽहन्। तं च मणिमगृह्णात्। तं मृगेन्द्रं जाम्बवान् नाम ऋक्षराजोऽहिंसत्। तं च स्यमन्तकं गृहीत्वा स्वपुत्रस्य कण्ठेऽबध्नात्। स्यमन्तकमणिना सह स्वसहोदरं विनष्टं विलोक्य 'कृष्णेनैव स्वानुजं निहत्य मणिरपहृतः।" इति सत्राजिदाशङ्कते स्म। यदा याचमानोऽपि स मणिं न लब्धवान् तदा सत्राजिन्मध्येसभं प्राह—"स्यमन्तकमणिलोभात् कृष्णेनैव मे बन्धुर्व्यापादित इति।' एतन्निशम्य श्रीकृष्णो भृशमखिद्यत। सपदि सभां त्यक्त्वा तस्यान्वेषणार्थं वनमयात्।

ततः स ऋक्षवतोऽचलस्य वनप्रदेशे प्रसेनमन्विष्यन्नितस्ततो भ्रमन् तस्य शवं प्राप्नोत्। तं सिंहेन हतं विजज्ञिवांस्तत्पदव्यनुरोधाद् यावत् स्तोकमन्तरं प्रयाति तावन्मृतं सिंहं व्यलोकयत्। तत्रापि मणिमनवलोक्येतस्ततो जिज्ञासा समारब्धा। भल्लूको मृगपतिं व्यापादितवानिति विदित्वा स तस्य पदपङ्क्तिमनुसरञ्जांबवतो गुहाद्वारभूमिमनुगतः। स्वानुयायिनस्तत्रैव प्रस्थाप्य स्वयमेकाकी तां गुहां प्राविशत्। प्रविष्टमात्र एव स तं मणिं जाम्बवतः पुत्रस्य कण्ठे प्रैक्षत। सविनयं प्रार्थितोऽपि जाम्बवान् यदा तस्मै तं मणिं दातुं नैच्छत् तदा श्रीकृष्ण एकविंशतिदिनानि तेनायुध्यत। तस्मिन्नजेयो जाम्बवान् भगवता नन्दनन्दनेन पराजितः। तं महापुराणपुरुषं विष्णुमेव विदित्वा जाम्बवांस्तं शरणमव्रजत्। महत्या च प्रीत्या तेन तस्मै मणिना समं स्वकन्यां जाम्बवतीमार्पयत्।

अथ भगवान् श्रीकृष्णः स्यमन्तकमणिना स्वपत्न्या तया जाम्बवत्या सार्धं द्वारकां नगरीं प्राप्तः ततः संसदि सर्वेषां यादवानां पुरतः सत्राजिते सर्वमुदन्तजातमाख्याय तं मणिं प्राददात्। अनेन भगवति वासुदेवे स्वयंकृतादलीकदोषारोपाद् विलज्जितः सत्राजित् स्वव्यलीकापमार्जनचिकीर्षया तेन चारुगात्र्याः स्वकन्यायाः सत्यभामायायाः पाणिमग्राहयत्। तं च मणिं यौतकमिव कृत्वा तस्मै दातुमैच्छत। परं भगवान् सत्यभामाजानिः प्राप्तलोकापवादं तं मणिं प्रत्याख्यात्। तदनु स मणिः सत्राजिता भूभृता स्वसन्निधावेव सन्निधापितः।

एतावता एतस्य स्यमन्तकमणेः कथा न परिसमाप्ता। तल्लोभाकृष्टेन श्रीकृष्णेन तं सभाजिद् याचितः ततः समुत्पन्नाऽनर्थपरम्परा वृद्धिं गता! शतधन्वा नाम कश्चिद् युवा वीरः प्रथममेव सत्यभामां सत्राजितस्तरमयाचत। अवधूतदुहितृप्रार्थनेन तेनावमानितोऽहमिति विचार्य शतधन्वा तं निर्भरनिद्रं एव व्यापाद्य तस्मात् तद्रत्नं निष्क्रष्टुमना अभवत्। अक्रूरकृतवर्माणौ चास्मिन् कर्मणि साहाय्यप्रदानपरौ बभवताम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रासन्, तद्दैव तेऽत्र भारतीयसंस्कृतिमेव स्वसाम्राज्य-
संस्थापने सुदृढमन्तरायमपश्यन् । अतएव भारतीय
संस्कृत्याः, तन्मूलभूताया विविधविद्याकलास्रोत-
स्विन्याः संस्कृतसरस्वत्याः तच्छिक्षकाणां च तपस्विनां
ब्राह्मणानां विध्वंसनायैव प्राक् भारतस्य शिक्षा-
व्यवस्था तैः स्वहस्ते कृता । ईदृशी शिक्षा योजना च
तैरत्र परिचालिता, यस्यां भारतीयसंस्कृतेः शिक्षण-
प्रबन्धस्तु सुदूरमतिष्ठत्, प्रत्युत तत्परिपन्थिनां विचा-
राणां प्राचुर्यमस्थाप्यत, भौतिकप्रायमर्थकामपरायणं
च शिक्षणं प्रारभ्यत । तच्छिक्षया शिक्षितानां च
पाश्चात्यदैवतानामनात्मज्ञानां भारतीयानामुच्चैः च-
पदारोपणादिना तैर्महन्मूल्यमक्रियत । आंग्लभाषायाः
प्रचारे यावान् तैर्व्ययो व्यवस्थापितः, तच्छतांशोऽपि
व्ययः पूर्वतः प्रसृतायाः संस्कृतभाषायाः कृते नाऽस्था-
प्यत, सर्वत्र स्थापयितुं शक्या अपि नाऽस्थाप्यन्त
संस्कृतपाठशालाः । आम्, तैः कतिचित् संस्कृत-
महाविद्यालया नाममात्राय संस्थापिताः किन्तु तत्-
संस्थापनस्योद्देश्यमपि भारतीयसंस्कृत्याः संस्कृतस्य,
संस्कृतमहाविदुषां च रक्षणं कदापि नासीत्, अपि तु
तेषां समेषां समूलमुन्मूलनमेव उद्देश्यमासीत् । अपरं च
ये भारतीयशिक्षया शिक्षिताः प्रतिभाशालिनः प्रभा-
वन्तो महामहान्तो विद्वांस आसन् तेषां माभूत्
विद्रोहः, माभूच्च तेषां राष्ट्रहितकारिणीषु प्रवृत्तिषु
दृष्टिपातः, तथा तेषां संग्रहणं नियन्त्रणं चाऽपि
भवेदिति तस्योद्देश्यमासीत् । एतदनुसारेणैव स्थापितः-
नामपि संस्कृतमहाविद्यालयानामध्यक्षाः स्वविश्वास-
पात्रभूताः आंग्ला एव तैर्न्ययुज्यन्त, तेषामेवस्वाधीनतायां
संस्कृतस्य महामहापण्डिता अन्विष्यास्थाप्यन्त ।
तेषां पाठ्ययोजनाऽपि तथाविधा तैर्निरधार्यत, येन
आजीवनमधीयानोऽपि जनो बहूनां शास्त्राणां मध्ये
किमपि एकमेव शास्त्रं गृह्णन् तिष्ठेत्, अपरं किमपि
शास्त्रं स्प्रष्टुमपि न शक्नुयात् । तया पाठ्ययोजनया
धार्मिकस्य, व्यावहारिकस्य आर्थिकस्य च ज्ञानस्य
गन्धोऽपि नाऽरक्ष्यत । एवं कूटनीतिकैरांग्लैः तदा-
नीन्तनाः संस्कृतपण्डिताः धार्मिकसांस्कृतिकशिक्षण
कार्याद् विश्लेषिताः, शासनक्षेत्रादपसारिताः, लोको-
पयोगिकार्यादपि च दूरीकृताः । पाठ्ययोजनाया:
परिणामतोऽर्वाक्तनाः पण्डिता यदि स्वतन्त्रमध्ययनं
नाऽकुर्वन्, तर्हि कतिचित् केवलवैयाकरणाः, अपरे
शुष्कतार्किकाः, अन्ये विशुद्धवेदान्तिनः, एवमादय
इतरविषयमस्पृशन्त एकैकविषयग्राहिण एव सम-
जायन्त, व्यावहारिकविषयस्य तु पाठ्येऽनिवेशित-
त्वात् तज्ज्ञानस्य तु कथाऽपि सुदूरमपास्ता । अत्राऽऽ-
गत्य तु आंग्लकूटनीत्या इयत् फलितम्, यत्—इदा-
नीन्तनाः संस्कृतज्ञा अपि यदि स्वकीयविविध-
विषयकज्ञानवर्धनाय स्वातन्त्र्येण नोद्युञ्जते, नियत-
पाठ्याध्ययनप्राप्तज्ञानावलम्बिन एव तिष्ठन्ति, तर्हि
स्वोत्तीर्णराजकीयपरीक्षाणामपि राज्यैरसम्मानित-
त्वात् तेषां कुत्राऽपि राजकीयविभागेषु स्थानं नास्ति,
व्यावहारिकज्ञानस्याऽनायत्तीकृतत्वात् लोकविभा-
गेष्वपि तेषां प्रवेशसम्पर्कौ भवितुं न शक्नोति,
शेखरस्य, सामान्यनिरुक्तेः, खण्डनखण्डखाद्यस्य वा
या फक्किकास्तैः रटिता आजीवनं भाविताश्च तासां
श्रवणस्याऽद्य कस्याऽपि रुचिरपि नोदेति, पौराणिक-
कथासु धार्मिकप्रवचनेषु च तेषामद्य पाश्चात्यचाक-
चिक्यदासीकृतप्रायस्य लोकस्य श्रद्धैव नास्ति, अतः
सर्वतो विच्छिन्नसम्पर्काः सर्वथा जीविकोपायहीनाः
संस्कृतज्ञाः समयेऽस्मिन् केवलं म्रियन्ताम् । नान्यः
पन्था विद्यतेऽयनाय । आंग्लशालास्वपि संस्कृताध्या-
पनं नाममात्राय किंचित् तदर्थं प्रयतमानानां भारती-
यानां मुखमुद्रणाय तैः स्थापितम्, किन्तु तद्भाषा
ज्ञानप्राप्तिदृष्ट्याऽप्यपर्याप्तम्, भारतीयसंस्कृते
रङ्गोपाङ्गानां संरक्षणाय तु सर्वथैवाऽकिंचित्करम् ।
एवं भारतीयसंस्कृतेः, तन्मूलभूतायाः सुरसरस्वत्याः,
तद्वाहनानां च संस्कृतसुधीहंसानां समूलोन्मूलनाय दुर-
भिसन्धाय प्रयतमानेष्वपि आंग्लधूर्तेषु भारतेऽद्य भार-
तीया संस्कृतिरपि जीवति, संस्कृतभाषाऽपि वर्तते, सं-
स्कृतसेविनः सुधीधौरेया अपि न मृताः, विद्यन्ते सम्प्रति ।
प्रत्युत सर्वान् दुरभिसन्धीन् हृदयेन दधतस्ते कालद्रयाः
कालिताः प्रतिकूलेन कालेन देशादस्माकम् ।—क्रमशः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# ब्राह्ममुहूर्ते उत्थानम्

श्रीदीनानाथशर्मा शास्त्री सारस्वतः, विद्यावागीशः, विद्याभूषणः, विद्यानिधिः
प्रिन्सिपल सं० हि० महाविद्यालयः, रामदल, दरीबाकलां, देहली

हिन्दुधर्मे ब्राह्ममुहूर्ते (प्रातः ४ वादनसमये) शय्यात्यागस्य आज्ञाऽस्ति। एतत्कालिकं वातावरणं शान्तं, जीवनप्रदं, स्वास्थ्यदायकं च भवति। एतर्हि एव वृक्षा अशुद्धवायुमात्मसात् कुर्वन्ति, शुद्धवायुं (आक्सिजन गैस च अस्मभ्यं समर्पयन्ति। कमलानि अस्मिन्नेव काले विकसन्ति, नादेयं जलं सम्पूर्णरात्रेस्तारामण्डलस्य चन्द्रमसश्च अमृतमयं प्रभावमात्मसात्कृत्वा अस्मिन्नेव समये तं व्यनक्ति। एतत्संसर्गेणैव सुरभितः, उदेष्यद्भास्करकरनिकरप्रभावेण पूतश्च वायुरास्माकीनमात्मिकं मानसिकं च लाभं करोति।

सूर्य एव समस्तक्रियाणां तथा विद्युच्छक्तिप्रभृतिसमस्तशक्तीनां च आकरो भवति। सर्वे धातवः, सर्वे जीवाः, सर्वे मनुष्या अस्यैव शक्तिमुपजीवन्ति। ब्राह्ममुहूर्ते जागरणे अस्माकं साधारणी शक्तिः सूर्यशक्तेरवलम्बाद् अतिशयितसबला जाजायते। तत्प्रभावाद् आस्माकीनमनोबुद्धी आलोकिते भवतः। रात्रिमूलकस्तमोगुणस्तन्मूलिका जडता च अपसरति। यदि अस्मिन् सुन्दरे समयेपि वयं निद्रादेव्याम् आसजेम, तद् वयं स्वजीवनं स्वयमेव ह्रासयन्तो निष्पद्येमहि, यतो हि-निद्रायां तन्मूलकदौर्बल्यवशात् स वायुरस्मान् लाभस्थाने हानिमपि लम्भयितुं शक्नोति-'दैवो दुर्बलघातकः'।

तथा सति आलस्यं वर्धते, स्फूर्तिर्नश्यति। तदानीम् उत्थानाद् निद्रामूलकं दौर्बल्यं नश्यति, अस्मासु बलं च उत्पद्यते। ततः स एव वायुरस्माकं लाभदायकः सिध्यति-'सभी सहायक सबल के' इति न्यायात्। ब्राह्ममुहूर्ते उत्थापनस्य प्रकृतेर्नैसर्गिकघटीयन्त्रं (टाइम्पीस घड़ी) ताम्रचूडो भवति।

एतर्हि सकलदिवसस्य श्रान्तिश्चिन्तादिश्च निशाशयनाद् दूरीभवति, आस्माकीनं मस्तिष्कं च शुद्धं, शान्तं, नवशक्तिमच्च जाजायते। मुखस्य कान्ती रक्तिमा च चमत्कृतिं धत्ते। मनः प्रफुल्लं जायते। शरीरं नीरोगं तिष्ठति। कालोऽयं शुद्धमेधाया भवति। इदानीमेव मनःप्रसत्तिवशात् प्रतिभाया उदयो जायते। चित्तं सात्त्विकतया पुण्यकर्मणि प्रवर्तते। सुन्दराणां प्रभावोत्पादकानां च ग्रन्थानां निर्माणमपि अस्मिन्नेव काले सम्भवति। शरीरेपि एतर्हि एव सर्वमालस्यादिकमपसृत्य स्फूर्तिरुत्पद्यते। एतत्कालस्य उत्कृष्टकार्ये प्रयोगः स्वकीयायुर्वृद्धि-मनोबलात्मिकबल-शारीरिकबलेभ्यो निमन्त्रणदानमस्ति।

यथा कल्पस्य आरम्भो ब्रह्मणो दिवसस्य आरम्भोऽस्ति, तदानीं ब्रह्मणो दीर्घनिद्रायां विश्रान्तायाः सृष्टेर्निर्माणस्य उत्थापनस्य च कालो भवति, अयमपि कालस्तादृश एव भवति। अयं ब्राह्ममुहूर्तकालो ब्राह्मदिनस्य संक्षिप्तसंस्करणं भवति। अयमपि सृष्टिनिर्माणप्रतिनिधित्वात् सृष्टेः सत्यं निर्माणमेव करोति। स्व-निर्माणकार्ये अस्य ब्राह्ममुहूर्तस्य उपयोगग्रहणम् आस्माकीनमेकमावश्यककर्तव्यं जज्ञन्यते। अदसीयेन उपयोगेन अस्माकम् ऐहलौकिकाभ्युदयः पारलौकिकं च निःश्रेयसं प्राप्यते, सर्वाङ्गीणधर्मलाभश्च सम्भवति। एतदादिकं ज्ञातुमस्मत्प्रकाशितायाः 'श्रीसनातनधर्मालोक' ग्रन्थमालायाः स्थायिग्राहका भवन्तु।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...विद्यापीठ.ध्यक्षाः—

# श्रीमद्-भिषग्रत्न-राजवैद्यनन्दकिशोराचार्याः

वैद्यरत्नश्रीप्रभुदत्तशास्त्रिभिषगाचार्यायुर्वेदाचार्यः सीकरस्थः

[ भिषग्रत्नराजवैद्यश्रीनन्दकिशोरभिषगाचार्यस्याकाले स्वर्गवासिनः पूर्वसूचनानुसारं जीवनवृत्त-...ं प्रकश्यते। वृत्तमिदं सीकरवास्तव्यश्रीप्रभुदत्तशास्त्रिभिषगाचार्यलिखितं पत्रिकायाः कार्यानुसारं संक्षिप्य ...टितम्।

हन्त स्वल्पः कालो व्यतीतो यदाऽयं महाभागो वैद्यसम्मेलनस्य माननीयोऽध्यक्षो भूत्वा मद्रासप्रा-...न्ते कोट्टक्कलनगरे प्रावसत्। तत आगत्यैव शरीरस्योत्तरोत्तरमस्वास्थ्यं भजन्, महामहद्भिर्द्राक्तरैर्वैद्यैश्च ...सुणं चिकित्स्यमानोऽपि नोल्लाघोऽभवत्। राजस्थानस्यायुर्वैदिकविज्ञानस्य प्रतिनिधिभूतः सोयं महाभागो ...युक्तपष्ठ्यामकाण्ड एव परलोकपथिकोऽभूदिति विजानन्त्येव पाठकमहोदयाः। —सम्पादकः ]

...जयपत्तनावसतेर्वर्षशतपूर्वं श्रीमद्वंशधराणां अत्र-...महात्मनां शेखावाटीप्रदेशस्य खाटू (स्यामजी) ...ने पारम्परिकावासोऽभवत्। खाण्डलविप्रकुले ...टोलियाऽवटङ्कजामदग्न्य-गोत्र-त्रिप्रवर-शुक्लयजुर्वे-...माध्यन्दिनीशाखाध्यायिनो पितृ-पितामह-प्रपिता-...महादयोऽपि पूर्वं वैद्यव्यवसायानुवर्तनेनैव निर्वाहम-...र्युः। खाटूग्रामतश्चौमूंग्रामप्रवासिताः पुनश्च ...नराज्याश्रया जयपुरे निवासं कृतवन्तः।

बाल्यकालिकीं शिक्षामेते स्वदीक्षागुरुभ्यो गङ्गा-...शास्त्रिभ्यः प्रच्छन्नयोगसाधकेभ्यो ऽधिगत्यानन्तरं ...करणसाहित्यदर्शनादियोग्यतां सम्यगधिगतवन्तः। ...वेदान्तमीमांसादिशास्त्राणामध्ययनार्थमेते विद्यावा-...स्पति स्व० मधुसूदनसरस्वती-वीरेश्वरशास्त्रि-महा-...महोपाध्यायपण्डितगिरिधरशर्मप्रभृति विदुषामन्तेवा-...सित्वमङ्गीचक्रुः। कुलक्रमागतायाः स्वभवने बोभूयमा-...ना आयुर्वेदचिकित्साया भारं दित्सुभिः स्वपितृभि-...रादिष्टा एते जयपुरीयसंस्कृतविद्यालय आयुर्वेदा-...ध्ययनं प्रारब्धवन्तः। वर्षद्वयेन च "सिद्धभेषजमणि-माला" प्रभृत्यनेकग्रंथरत्ननिर्मातॄणां भट्टश्रीकृष्णराम कविवर्याणामात्मजानां निखिलभारतवर्षीयद्वितीयप-नवेलसम्मेलनस्य सभापतीनामायुर्वेदविद्यानिधीनां काव्यकलाकुशलानां शास्त्रार्थमहारथिनां श्रीगङ्गाधर-भट्टशर्मणामन्तेवासित्वावसरे – आयुर्वेदोपाध्यायपरी-क्षामुत्तीर्णवन्तः। अनन्तरं प्रत्यक्षकर्माभ्यासपुरःसर-मुच्चशिक्षां ग्रहीतुमनसः श्रीमतां पूज्यपादानां भारत-विख्यातवैभवानाम् सुगृहीतनामधेयानामायुर्वेदमार्त-ण्डानां स्व० लक्ष्मीरामस्वामिनां सेवां विदधाना यथा-नियमं क्रमशो भिषग्वर–भिषगाचार्यपरीक्षे सबहुमान-मुदतरन्। किञ्च भेषजनिर्माणरोगिदर्शनादि-विशिष्ट प्रायोगिककार्यमपि श्रीस्वामिनां कृपातो गृहे-चिकि-त्सालये च स्वभ्यस्तवन्तः। एवमेते तेष्वेव दिवसेषु भिषग्वरपरीक्षोत्तीर्णा अपि प्रायोगिकक्रिया कुशलाः सुप्रतिष्ठितविद्वत्समाजे बहुशः समादृता अभवन्। अध्ययनसमाप्त्या साकमेवैतेषां योग्यतामुग्धाः महा-मनसः स्वर्गीयाः पण्डितमदनमोहनमालवीयाः स्वकीये हिन्दूविश्वविद्यालये वाराणस्यामायुर्वेदप्राध्यापकत्वेन



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


नियुक्तवन्त एनान् । तत्र चैभिः कियान् कालः स्वर्गीय धर्मदासाचार्याणामध्यक्षतायां प्रभुदत्ताग्निहोत्राणां समक्षं चिकित्सितपटून् चरक-सुश्रुतरसरत्नसमुच्चयादिग्रन्थानध्यापयद्भिर्व्यतिगमितः । स्वल्पेनैव कालेन गृहे चिकित्साभारं दित्सुभिः स्वपितृभिरेते ततः पुनराहूताः मालवीयमहोदयानामाशीर्वादपत्रकमादाय गृहागमनानन्तरं तदादर्शानुरूपं सुविशाले स्वचिकित्सालय एव रोगिनैरोग्यसम्पादने प्रावीण्यं प्राप्तवन्तः ।

अथ च १९८१ विक्रमाब्दे जयपुरीयसंस्कृतमहाविद्यालयीयायुर्वेदविभागे द्वितीयाध्यापकपदे नियोजिता अभवन् । तत्र च वर्षनवकपर्यन्तमध्यापयन्तो १९९० विक्रमाब्दे लक्ष्मीरामस्वामिनामध्यापनकृत्यतो विरामग्रहणानन्तरमेते विशिष्टयोग्यतया तेषां स्थाने आयुर्वेदप्रधानाध्यापका नियुक्ता अभवन् । तदानीमपि राजस्थानीयवैद्यानां मध्ये चिकित्साकर्मणि सुप्रतिष्ठिता उच्चनागरिकाणां मूर्द्धन्या राज्ञां सामन्तश्रेष्ठिवर्गस्य च गृहे चिकित्साप्रसरमादधाना आसन् । तथाऽपि स्वभावतः सरलाः, दयालवोऽनुत्सेकिनो नम्रातिशयाः शिष्यवत्सलाश्च सन्तीत्येते महानुभावा धन्या मान्या आयुर्वेदस्य शिर उन्नमयितारः सुप्रसिद्धाः सन्तोऽपि विज्ञापनप्रचारविरहिता इदानीं यावत् महासम्मेलन-विद्यापीठाध्यक्षपदं स्वतो ज्येष्ठानां कृते परित्यज्य रचनात्मककार्येषु संलग्ना अस्वीचक्रुरिति महदाश्चर्यम् ।

तथाऽप्येते सन्मित्रानुयायिनामनुरोधात्-द्विवारं राजपुत्रप्रान्तीयवैद्यसम्मेलनाध्यक्षत्वं जयपुरराज्यप्रथमवैद्याधिवेशनसाभापत्यं, खाण्डलविप्रमहासभाया अखिलभारतीयमनेकवारं प्रधानासनं, हिन्दीसाहित्यसम्मेलनस्य द्वात्रिंशज्जयपुरीयाधिवेशने विज्ञानपरिषदो वैज्ञानिकं स्वागताध्यक्षपदं, किञ्च न केवलं नीरसवैज्ञानिकत्वमपितु सरससाहित्यिकत्वं परिपाल्याखिलभारतीयसंस्कृतसाहित्यसम्मेलनावसरे जयपुरे तदीयसफलतायै स्वागताध्यक्षरूपत्वमप्यङ्गीचक्रुः । बहुशोऽभिनन्दनानि च प्रापुः ।

आयुर्वेदविषये किञ्च विषयान्तरेषु यदा श्रीमन्तो लिखन्ति समितिषु स्वकीयं पक्षं समुपस्थापयन्ति च, तन्महदूर्जस्करं सम्पद्यते । चरकसंहिताया श्चिकित्सास्थानस्य वैज्ञानिकीसंस्कृतटीकायाः श्रीगणेशः श्रीमद्भिर्वर्षेभ्यः पूर्वमेव विहितः । परिस्थितिवशादिदानीमप्रकाशिता सा तूर्णमेवालोकपथमाव्रजिष्यति विदुषाम् । सुश्रुतसंहितायाः सूत्रस्थानस्य, चक्रपाणिविरचितभानुमतीव्याख्यासमवेतस्य स्व. लक्ष्मीरामनिधिद्वारा प्रकाशितस्य परिशोधनमेतैः सम्पादितम् । स्वे भवने बहुलानां ग्रंथरत्नानां संग्रहोऽस्ति, हस्तलिखितान्यपि ग्रंथानि तत्र सन्ति । संग्रहालयेऽस्मिन् राजमहाराजानां नेतृवर्याणाञ्च शतशः पत्राणि चिकित्साचातुर्यपरिचायकानि मयाऽवलोकितान्यपि विस्तारभीत्या नैवात्रोट्ङ्कितानि । नवनूतनपरिपाट्या चिकित्सोपयोगिनां शिक्षोपयोगिनाञ्चायुर्वेदग्रंथानां संस्कृतभाषायामेव सम्पादनं संकलनञ्चैत उपादेयमामनन्ति ।

१९४६ ऐशवीयाब्दे संस्कृतविद्यालयात् पृथग्भूय आयुर्वेदविभागो "गवर्नमेन्ट आयुर्वैदिक कालेज" नाम्ना नूतनमहाविद्यालयस्वरूपेण राज्यद्वारा संस्थापितस्तत्र च प्रधानाचार्यपदमिमे अलंकृतवन्तः । सोऽयं विद्यालयः श्रीमतामधिकृतौ शुक्लपक्षीयचन्द्र इवोत्तरोत्तरमेधमानः इदानीं राजस्थानप्रान्तीयविद्यालयेषु आदर्शरूपतां गृह्णातीति श्रीमतामेव प्रभावस्तत्र कारणम् । यदसौ माधवविलासनाम्नि राजप्रासादे सम्विराजते-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# उत्थानपतनयोः कारणम्

## [ कर्म ]

ले० परमश्रेष्ठी श्रीमनसुखरायमोर, कलकत्ता

संसारे प्राणिनां गतिविधिं दृष्ट्वा वयं जानीमो यन्मानुष्यस्य सत्याः सहचराः कर्माण्येव । "कर्मानुगो गच्छति जीव एकः ।" मनुष्यस्य उत्तमान्यधमानि च कर्माण्येव मनुष्यं उच्चं नीचं च निर्मान्ति । कथितं हिन्दीकविना-"कर्म प्रधान विश्व रचि राखा । जो जस करहिं सो तस फल चाखा ।" कर्मप्रधानमिदं विश्वम् । यो यथाऽऽचरति स तथा भुङ्क्ते फलम् । कर्मभूमावस्मिन् यत् यथा उप्यते तत् तथैव फलं ददाति । अतः स्पष्टमिदं यत् कर्माण्येव मनुष्यस्य सहगामीनि । यदि जनः सत्कर्माण्याचरति तर्हि उच्चं लक्ष्यं प्राप्य मनुष्यो देववत् भवति । यदि च कुकर्माण्याचरति तर्हि तान्येव कर्माणि तस्याधःपतनं जन-

---

राम् । विद्यालयस्य पाठ्यक्रमनिर्माणाय समितिरेका नियोजिता सर्वकारेण, तस्या अध्यक्षत्वेन भवद्भिर्यथा शिक्षाक्रमो निर्धारितः स इदानीमपि प्रान्तीयेषु समस्त-विद्यालयेषु प्रचलन्नास्ते । विद्यालयेन सह प्रयोगशाला-रसरसायनशाला शवच्छेद-औषधालय-शतशय्यासम-न्वित-रुग्णान्तरागाराण्यपि संस्थितानि सन्ति । जय-पुर-राज्यावसरे चिकित्सकपञ्जीकरणसमितेः ग्राम्यौष-धालयादिसंचालनकार्यस्य च अवैतनिकसञ्चालका (ऑनरेरी डायरेक्टर) एत एवासन् । सार्द्धसहस्रा भिषजस्तदानीं पञ्जीकृता यथायथं कार्यमधिवहन्ति । तदेवं सुविज्ञातं पाठकैर्यदेक एव महारथी चिकित्सायां प्रवृद्धः प्राध्यापने च विनियुक्तः समनोयोगं कार्यं कुर्वन् स्वकीयेषु दैनन्दिनविधिविधानेषु निरवकाशो-ऽपि आयुर्वेदसमुद्धारकार्येषु कीदृक् प्रयत्नवान्-प्रचेष्टते ?

प्रान्तेऽस्मिन् द्वौ राजकीयविद्यालयौ—जयपुर—उद-यपुरस्थितौ, अन्येच बीकानेर, सीकर, रामगढ़, रतन-गढ़ादिस्थानस्थाः पञ्चशो विद्यालयाः, पञ्च राजकीयभे-षजनिर्माणशालाः, चतुःशतावधयो ग्राम्यौषधालयाः, पञ्जीकरणविभागाद्यश्च सर्वेऽपि श्रीमतामधिकृतिस्थाः सन्तीति-इतरप्रान्तेभ्यो वैशिष्ट्यमेतद्राजस्थानस्य ।

एतस्मिन् वर्षेऽपि राजस्थानराजकीयस्वास्थ्यमन्त्रा-लयद्वारा लक्षैकरौप्यमुद्राणां स्वीकृतिः आयुर्वेदकार्य-परिवृद्ध्यर्थं सम्प्राप्ता एभिः । तदनुसारं ३० त्रिंशन्नू-तनौषधालयाः स्थापयिष्यन्ते प्रान्तेऽस्मिन् । किञ्च शिक्षणालयानामभिवृद्ध्यै सविशेषां व्यवस्थां सम्पाद-यिष्यन्ति । कियदवधिपूर्वं श्रीमद्भिः "गाडगील-अर्थ-नियोजनोपसमितेः" समक्षं भारतवर्षीयपञ्चवर्षीययो-जनायां राजस्थानप्रान्ते-आयुर्वेदविधीनां विस्ताराय स्वकीयसुविचारपरिपूतः प्रस्ताव उपस्थापितः । वैयक्ति-करूपेणाऽपि श्रीगाडगिलमहोदयायुर्वेदोत्कर्षार्थं बहुशो विनिवेदितम् ।

महाभागानां ज्येष्ठतनयाः श्रीरामदयालुशास्त्रि-भिषगाचार्याः पितृपादाननुसृत्य जयपुरीयविद्वत्सु प्रतिभासमन्विताः सिद्धहस्तचिकित्सकाश्च श्रीनवजी-वनचिकित्सालयाख्यं कर्ममन्दिरं शुद्धायुर्वेदप्रणाल्या संचारयन्ति । वास्तुकलाकुशला महानुभावाः स्वकीये "नवजीवनोपवनाख्ये" नगर बहिरुद्याने सुविशालै रमणीयैर्भवनैः सुशोभितमारोग्याश्रमं निर्माय तत्र देशदेशान्तरेभ्यः समागतानां रोगिजनानामारोग्यं साधयन्ति ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यन्ति। महाभारतस्यानुशासनपर्वणि षष्ठेऽध्याये कर्म-विवेचनं प्रदत्तमस्ति यत्पठनयोग्यमस्ति—

लेखकः

"नाबीजं जायते किंचिन्न
बीजेन बिना फलम्
बीजाद् बीजं प्रभवति
बीजादेव फलं स्मृतम्
यादृशं वपते बीजं
क्षेत्रमासाद्य कर्षकः
सुकृते दुष्कृते वापि
तादृशं लभते फलम्
यथा बीजं विना क्षेत्र-
मुप्तं भवति निष्फलम्
तथा पुरुषकारेण
विना दैवं न सिद्ध्यति
शुभेन कर्मणा सौख्यं
दुःखं पापेन कर्मणा
कृतं फलति सर्वत्र
नाकृतं भुज्यते क्वचित्"

कुकर्मणां साधनानि संसारे बहूनि सम्भवन्ति। तथापि आपात एतानि निम्नलिखितानि स्युः असत्यभाषणम्, अतिलोभः, पा... मनम्, प्रकृतिविरुद्धं दु... गरिष्ठं च भोजनम्, चित्रपटा... उच्छृङ्खलता च। अद्य संसारे असत्यस्य साम्राज्यमिवास्ति। मनुष्यः स्वार्थवशगो भूत्वा असत्यमपि सत्यं कर्तुं चेष्टते। सत्यस्य मार्गः सर्वदा स्तुत्य। सत्यस्य आश्रये प्रयोगे च कृते सत्येव सृष्टेः कल्याणं भवितुमर्हति। सत्यस्य कियान् महिमा अस्ति—

"आत्महेतोः परार्थे वा नर्म हास्याश्रयात्तथा। ये मृषा न वदन्तीह, ते नराः स्वर्गगामिनः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वृत्त्यर्थं धर्महेतोर्वा कामकारात्तथैव च
अनृतं ये न भाषन्ते ते नराः स्वर्गगामिनः ।
श्लक्ष्णां वाणीं निराबाधां मधुरां पापवर्जिताम्
स्वागतेनाभिभाषन्ते ते नराः स्वर्गगामिनः ।
सत्यधर्मरताः सन्तः सर्वलिङ्गविवर्जिताः ।
धर्मलब्धार्थभोक्तारस्ते नराः स्वर्गगामिनः ।
एष वाणीकृतो देवि धर्मः सत्यः सदा नरैः ।
शुभः सत्यगुणो नित्यं वर्जनीयो मृषा बुधः ।

इदं वाण्याः सत्यपालनं कथ्यते । सत्यं सर्वथा आदरणीयं, असत्यं च सर्वदा त्याज्यमिति स्मृतयः ।

एवमेव अतिलोभोऽपि मानवविनाशस्य कारणम्

"अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्मतः ।
नरापचारान्नियतमुपसर्गः प्रवर्त्तते ।
अतिलोभो मानवस्याधःपतने साधनम् ।"

अर्थ-काम-प्रधानेऽस्मिन् अतीव जघन्ये युगे जनाः अप्राकृतिकेन गरिष्ठेन च भोजनेन, अपेयानां पानेन च स्वकीयां चिन्तां दूरीकर्तुं वाञ्छन्ति । परं सर्वमिदं मृषा । विफलेयं चेष्टा । एतद्द्वारा प्रत्युत अधःपतनमेव भवति ।

अद्यतने विज्ञानयुगे यदा सर्वतो दूषितमेव वातावरणं दृश्यते तदा सिनेमा थियेटर इत्यादिकानां रङ्गमञ्चोपरि क्षुद्रजनताया नीचमनोरञ्जनकारिकाः चित्रतारिकाः, तासां नग्ननृत्यानि, शृङ्गारचेष्टाश्च मानवजातिं चारित्रिकपतनस्य गहने गर्ते पातयितुं समर्थाः । यदा असत्यभाषणं, अतिलोभः अखाद्य-भोजनम् अपेयपानं चारभ्य चित्रपटादीन् यावत् पतनस्य परम्परा आगता, तदा उच्छृङ्खलता-रूप-जनतायां परदारगमनात् मनुष्याः कथं मुक्ता भवितुं शक्नुयुः ? यत्र खलु दृष्टिः पात्यते तत्रैव असत्कर्मणां प्रोत्साहकानि साधनानि सन्नद्धानि दृश्यन्ते तदा आकर्षणप्रियाया मानवप्रकृतेः का वा शक्तिर्यदेतेषां शमं कुर्यात् ? परं शास्त्राणि अनुशासति—

"अस्वर्ग्यं लोकविद्विष्टं परदाराभिमर्शनम्"

परस्त्रीगमनात् मनुष्यः सदा आत्मानं रक्षेत्—यतो हि इदं स्वर्गात् पतनकारकं जनताया नैतिकबलं भावनां च विहन्ति । अस्य महादोषस्य कारणादेव मनुष्याणां दैवानि पित्र्याणि च कर्माणि असफलानि तिष्ठन्ति । अतएव आधुनिके घृणिते वातावरणे परस्त्रीगमनसदृशेभ्यः कुकर्मभ्यः रक्षा व एकमात्रमुपायोऽस्ति—"धर्मपत्नी" । नान्यत् । अतएव तस्या नाम धर्मरक्षिका इति सार्थकम् । यतो हि परस्त्रीभ्यः आत्मानं दूरे रक्षन् नरः समर्थः इत्युक्तः । हिन्द्यां प्रसिद्धम्—

तुलसी या संसार में सोऊ भये समरत्थ ।
इक कंचन, इक कुचन को जिन न पसार्यो हत्थ ।

अतएव काञ्चनलोभात्कुचलोभाच्च दूरीभूयैव वयं समर्था भवितुं शक्नुमः, यदा वयं स्वधर्मपत्न्या सह धर्मानुमोदितमाचरणं कुर्मः । उक्तं शास्त्रेषु—

अन्यक्षेत्रे बीज उप्ते कोटिपूजा विनश्यति ,
अतिव्यवायान्मेहमेदोवृद्धिः शिथिलता तनोः ।

एवं पतनस्य सर्वाधिकं साधनमस्माकं सम्मुखे परदाराभिमर्शनमस्ति । परदारगमनस्यास्य दुष्कर्मणः भीषणे अभिशापे ये ये ऽनर्थाः दृष्टाः, विचार्यन्तां ते । महामहान्ति राज्यानि धराशायीनि दृष्टानि, महान्तो गौरवशालिनो नरेशाः पदच्युता जायमाना दृष्टाः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# मालाकारः

पं० श्रीमदनमोहनझा व्या० न्या० सा० आचार्यः, मुजफ्फरपुरस्थ संस्कृतमहाविद्यालयं साहित्यप्राधानाध्यापकः।

दूतस्यावन्तीतः परावृत्यागमने यावन्ति दिनानि समपेक्षितानि, तेषामनुमानं विधाय तस्मिन् कारागारे "यत्रान्धकारबाहुल्येन दिवसस्य रात्रेश्च भेदो न लक्षितो भवति स्म" छदिच्छिद्राद् आगच्छतां सूर्यकिरणानामाधारेण दिनानि गणयन्नतिष्ठत्।

एकदा सुभद्रा समागत्य जगाद-वसन्त! समागतोऽद्य सेनासहितोऽवन्तीराजमन्त्री, किन्तु स तव मोक्षस्य कमप्युपायं नाचरति।

'वसन्तो' विहस्याप्राक्षीत्-तर्हि केनाभिप्रायेण स समागतः?

---

अधुना पतनादस्माद्रक्षाया उपायान् लिखित्वा वयं लेखं समापयिष्यामः।

सत्कर्म खलु मर्यादाया महामन्त्रः। अनेन मानवस्य 'स्वम्' वर्द्धते तथा तस्योन्नतिर्भवति। सत्कर्मकरणेन गमिता श्रीरपि पुनर्लभ्यते। उच्यते राजस्थान प्रान्ते—

सत मत छोड़ो साइयां, सत छोड्यां पत जाय।
सत की बांधी लच्छमी फेर मिलेगी आय॥ इत्यादि

एवं वयं पश्यामो यत् सद्व्यवहारेण, सत्यभाषणेन, अलोभेन, अक्रोधेन, सद्गुरुसद्ग्रन्थसेवनाभ्याम्, स्त्रीपुरुषयोः आत्मकल्याणार्थं सम्बन्धेन, स्त्रियश्चरित्ररक्षिकात्वाधिकारेण, लघुभोजनेन इन्द्रियसंयमेन, चित्रपट परित्यागेन च एकस्यैकेन पूरकेण मानवस्य चरमोन्नतिः साधयितुं शक्या। एतानि साधनानि परस्परं पूरकाणि। यद्येतेष्वेकोऽप्यनुपस्थितः, तदाऽन्ये सर्वे विकलाङ्गा, अक्षमाश्च। अत एते सर्वेऽपि संभूयैव सत्कर्मसाधनानि। इदं हि ध्रुवं सत्यम्। यद्येतेषामेकोऽपि हीनस्तर्हि मानवस्य पतनमवश्यम् भावि। कर्मणो गहनागतिः। तथापि यानि खलूत्थान साधनानि तानि जनः सेवते। अतएव कर्मणः "सुकृतस्याहुः सात्त्विकं निर्मलं फलम्।" इति गीता। सुकृतैः शास्त्रधारिणामपेक्षयाऽधिकारक्षा जनस्य भवति।

"अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्य
जीवत्यनाथो विपिनेऽप्यरक्षितः कृतप्रयत्नोऽपि गृ
न जीवति।

पूर्वजन्मार्जित कर्माण्येव दैवम्। एतान्येव र काणि, भक्षकाणि च। अतः मनोवाक्कायकर्मि सुकृताचरणे, विश्वकल्याणप्रयत्नश्च कार्यः। एतद् महर्षेर्व्यासस्योपदेशप्रदानि वचनानि सर्वदा संस्म वयं अग्रेसरा भवामः—

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्,
परोपकारः पुण्याय पापाय परपीडनम्

संसारे प्रियाः, स्वजनाः, सम्बन्धिनः कोऽपि स चरा न सन्ति। यानि कर्माणि वयमाचरामस्ता सहचराण्यस्माकम्। तान्येव मृत्योः परमस्मान् अ सरन्ति। दुष्कर्माणि सुकर्माण्येव च सहचराणि प्रयत्नेन सुकर्मण्यवधानवान् स्यात्। सुकर्मणो मन्त्रश्च-परोपकारः पुण्यायेत्यास्ति। अस्मिन्नेव जन्म सार्थकता, मानवस्यकल्याणं च।

"कामये दुःखतप्तानां प्राणिनामार्त्तिनाशनम्।"

——



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



'स तु विवाहसम्बन्धं योजयितुं समायातोऽस्ति ।"

"कस्य" ?

"राजकन्यया 'यमुनया' सहावन्तीनरेशभ्रातुस्तथा

...महाराजेन सह"—

'सुभद्रा' इतोऽग्रे किमपि वक्तुं नाशक्नोत् ।

...या मुखे समागता वार्ताऽधरोष्ठयोरुपरुद्धा ।

सुभद्रां लज्जा-मुद्रित-मुखीमालोक्य 'वसन्तो' विहस्य

...—कथय अवन्तीनरपतिना कस्याः ?

सुभद्राया आननं लज्जयाऽरुणिमानमाश्रयत् ।

...शिरो नमयित्वा मन्दमूचे—"सुभद्रायाः" ।

'वसन्तः' उत्साहमभिनीयाभ्यधात्—एवम् ? महा-

...रयेयं वार्ता ।

सुभद्रा वसन्तस्योत्साहाभिनयेन खिन्ना प्रत्युवाच—

...न्त ! नेयं सुखकरी वार्ता ।

'वसन्तो' विस्मितः सन् न्यगदत्—कुतः ? अवन्ती-

...शः सार्वभौमोऽस्ति, तथापि कथं न सुखसमाचाराः ?

'सुभद्रा' दृढतापूर्वकमाह स्म—अवन्तीराजः सार्वभौ-

...ऽस्ति, सर्वमानसस्तु नास्ति ।

...दा सम्राजः प्रार्थना किं विफला भवेत् ?

विफला तु भवेदेव यदि सम्राजो भ्राता स्वयं

...नां पश्येत्, अपि च 'सुभद्रा'ऽऽस्मिन् राजप्रासादे

...तुच्छास्ति, यथा केऽपि तां न परिचिन्वन्ति ।

...: कश्चिदतिचतुरोऽपि गुप्तचरस्तामन्विष्य नानेतुं

...ति । परन्तु अत्र राजलोलुपानां राजकुमारीणा-

...शो नास्ति, ताः राज्ञः प्रार्थनां वृथात्वाद्गन्ति-

...न्ति ।

'वसन्तः' स्मितं कुर्वन् कथयामास—सुभद्रे ! मम

... सत्वरमेव भविष्यति । अद्यास्मिन्नन्धकारे

आवयोरिदमन्तिमं मिलनम् । श्वो रमणीसहस्रे तव यौ हस्तौ दृष्ट्वा त्वाम् परिचेष्यामि, ताभ्यां हस्ताभ्यामद्य बहिरागमनाय मह्यं निमन्त्रणं दत्वा याहि । 'सुभद्रा' कम्पमानौ स्वकरौ अक्कादग्रे वर्धयामास । 'वसन्त'स्तौ करौ स्वकीयेनाकुलेन करयुगलेन दृढं जग्राह । परन्तु तस्याकुलमोष्ठं तावद्दूरे गन्तुं न प्राभवत् ।

अग्रिमे दिने प्रातरेव 'वसन्तस्य' निश्चितां निद्रां व्याहत्य कारागारस्य कपाटानि आर्तनादं कुर्वन्ति उद्घाटितानि । स्वयं काशिराजोऽवन्तीमन्त्रिणा सह कारागारं प्राविशत् ।

काशिराजो 'वसन्तस्य' चरणयोर्निपत्य प्रार्थयामास—महाराज ! अज्ञानेन कृतान् ममापराधान् मर्षयतु भवान् ।

मन्त्री साभिवादं राज्ञो जयकारमघोषयत् ।

'वसन्तः' काशिराजायाभयं दत्वा कारागाराद् बहिरागत्य लघु विलम्बेनैव स्नानादि विधाय वस्त्राभूषणैः सुसज्जितोऽभवत् ।

काशिराजेन भयभीता लज्जिताश्च स्वकन्यकाः वसन्तसम्मुखे आनायिताः । ताः एकैकशः समायाताः । आगत्य च दूरादेव राजानं प्रणेमुः । प्रणत्यनन्तरं शिरो नमयित्वा एकस्मिन् भागेऽवतस्थिरे । सर्वतः पश्चात् 'यमुना' समागता । तया लज्जया संकुचन्त्या समीपमागत्य प्रणामः कृतः । सद्यः स्नातायास्तस्याः केशराशिः विस्तृत्य 'वसन्तस्य' चरणौ समाच्छादयामास । कोमलानां केशानामार्द्रता वसन्तस्य हृदयमप्यार्द्रं चकार ।

काशिराजेनोक्तम्—महाराज ! भवता आसामज्ञानोपहतानां बालिकानामपराधः—क्षन्तव्यो भवेत् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वसन्तेनाभिहितम्—अरया उपेक्षिताया भवत्कन्यकाया गुणैः प्रसीदता मया क्षान्तोऽपराद्धामपराधः। परमियं स्वयं मया क्षमां याचनीया !

एवमुक्त्वा 'वसन्तो'ऽन्या राजकुमारीरपश्यन् केवलं 'यमुना'मभिलक्ष्याचचक्षे-यमुने। त्वम्मम प्राक् कृतानपराधान् क्षमस्व।

'यमुना' नतानैव नखैर्भुवं विलिखन्ती स्थिता।

तस्मिन्काले सर्वैः वार्तालापमाचरतोऽपि 'वसन्तस्य' नयने अन्तःपुरस्य चतसृषु दिक्षु किमपि अन्विष्यन्ती व्याकुले समभूताम्। तस्य 'सुभद्रा' क्वास्ति ? तस्य सेविका कुत्र वर्तते ? तस्य प्रिया क्व विद्यते ? स तस्या मुखं तु नैव परिचिनोति, परिचिनोति तस्याः कोमलौ करौ, मधुरं कण्ठस्वरम्, सदयं हृदयम्।

स्वयाचनाया उत्तरमप्राप्य 'वसन्तस्य' नेत्रे 'यमुनायामेव' प्रत्यावृत्ते। 'यमुनायाः' करौ विलोक्य तस्याश्चर्यस्य सीमा नासीत्। इमौ तावेव करौ, यौ 'वसन्तस्य' वन्दिजीवने प्राणधारकावास्ताम्। ता एव अङ्गुलयः, तदेव करतलम्, स एव च तिललालितो मणिबन्धः, सर्वं तदेवास्ति।

'वसन्तस्य' मुखमानन्देन विकासितमभूत्। प्रणयकृतज्ञताया मोहनेन स्पर्शेन 'यमुनाया' मूर्तिरधिवसन्तदृष्ट्यतुलनीया सुन्दरी समलक्ष्यत।

तस्मिन् समये 'वसन्तः' काशिराजाभिमुखो भूत्वाऽवोचत्-भवन्तमहमेकां भिक्षां याचे।

"भिक्षां याचते ? भवान् ? माम् ? नैवं वक्तव्यम्, नापराधिनोऽपराधोऽधिकं वर्धनीयः, मह्यं तु आदेशो देयो भवता।"

'अस्तु, भवता मम योऽपराधो विहितस्तस्य दण्डे भवतो भाण्डागारादेकं बहुमूल्यं रत्नमहं नेतुमिच्छामि।"

"इयं भवतः कृपा, मम च सौभाग्यम्। कथयतु कोषाध्यक्षो भवदीयमादेशं प्रतीक्षते।"

विहस्य 'वसन्तेनो'क्तम्—यद्रत्नमहमिच्छामि, तन्न भवतः कोषाध्यक्षः परिचेतुमर्हेत्। अहमतिश्रमेण तस्य रत्नस्य गवेषणामकार्षम्। तद्दूरेऽपि नास्ति। पश्यतु-इदं तद्रत्नम्—

एवमुक्त्वा 'वसन्तः' कियदग्रे गत्वा 'यमुनाया' हस्तयुगलं गृहीतवान्, अपिच लोकानां विस्मयमुपेक्ष्य तां विहसन्नुवाच-सुभद्रे ! यमुने !! एकेन चक्रवर्तिना नृपेण साकमीदृशी वञ्चकता ? तिष्ठ, तुभ्यमहमस्यापराधस्य दण्डं ददामि। काशीतोऽवन्तीराजप्रासादे तव निर्वासनं विधीयते। किमेष दण्डः स्वीकृतोऽस्ति ! प्रत्येमि नाद्य अवन्त्याः प्रार्थना विफला भवेत्। यदि अवन्त्या राजप्रासादस्तुभ्यं न रोचेत, तर्हि तत्र पुष्पोद्यानस्याप्यभावो नास्ति, अपि च अवन्त्या महाराजाय तस्यैव 'वसन्तस्य' स्थानं दीयेत, तदा तु प्रसन्ना स्थास्यसि ? तस्य वीणा तव विरुदं गास्यति, अपि च स तव गले रक्तकुसुमानां माल्यं परिधापयेत्, तवानुमतिमन्तरा स बहिर्गमनस्याप्यवकाशं नासादयेत्।

अस्मिन् समये 'यमुनाया' दशा विलक्षणाऽऽसीत्। तस्या हृदये आनन्दलज्जयोर्द्वन्द्वयुद्धं प्रक्रान्तमभूत्। लज्जाया बलाधिक्येन आनन्दः स्वेन सह शरीरमप्यादाय निपतितुं वाञ्छति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# उपनयन-रहस्यम्

श्रीदीनानाथशर्मा शास्त्री, सारस्वतः विद्यावागीशः, विद्याभूषणः प्रिन्सिपल, सं० हि० महाविद्यालय, रामदल, देहली

काशिराजोऽविश्वसनीययाऽऽनया घटनया विस्मितो भूत्वा न्यगदत-महाराज ! ममैताः सर्वाः सुन्दरतमाः कन्या अधुनाऽविवाहिता एव सन्ति। 'वसन्तः' स्वहास्येन ताः समस्ताः सुन्दरीः ह्रेपयन् ऊचे-राजन्! मया तु श्रुतम् यदाभिः कर्णाटककलिङ्गादिदेशानां सिंहासनानि समलंकरिष्यन्ते।

"महाराज! यदि भवान् स्वचरणपरिसरे स्थानं दास्यति, तदैताः सुखेन तानि सिंहासनानि त्यक्तुं प्रस्तुताः सन्ति।'

वसन्तः सस्मितमवोचत्—काशिराज! सम्प्रति मम रूपमदोऽवतीर्णोऽस्ति, "राज्ञां प्रासादेषु हृदयं क्रीत्वा प्राप्तुं शक्यं, न जित्वा।" इदं जानन्नपि अहं दानवेषं धृत्वा हृदय जेतुं निरसरम्। परन्तु अत्रैकं तादृशं हृदयं मयोपलब्धम्, यद् हृदयस्य प्रणयि विद्यते न राज्यस्य। एवं जेतुमागतोऽहं स्वयमेव विजितोऽस्मि।

ममेयं काली वधूरेव मदीयं राज्यमुज्ज्वलयेत्। इदं को न जानाति-यद्यमुना (नदी) काली वर्तते, अत एव तस्या हृदयं गम्भीरं शीतलञ्चास्ते। यामिनी काली विद्यते, अतएव तस्याः शरीरे अगणिततारागणस्य माल्यं चमत्कुरुते; एवमेव कालस्येङ्गालस्यान्तः प्रकाशमानं हीरकं गुप्तं तिष्ठति।

यमुने! प्राङ्मया तव कियाननादरः कृतः? परन्तु तव गुणाज्ञानं तत्र हेतुरासीत्। अद्य पुनस्तव गुणान् ज्ञात्वा जानामि यत्त्वं कियदादरणीयासि इति।

एके संशेरते यद् वयं शतशो रूप्यकाणि व्ययीकृत्य त्रिसूत्रात्मकं नवतन्त्वात्मकं वा यज्ञोपवीतं कथं धारयामः? तस्य गायत्र्या सह को नाम सम्बन्धः? वयं तत् सातत्येन कथं धारयाम इति? ये एतद्विषये सर्वाङ्गीणं ज्ञानमभिलषन्ति;ते अस्मत्प्रकाश्यमानायाः 'श्रीसनातनधर्मालोक' ग्रन्थमालायाः स्थायिग्राहका भवेयुः। 'भारती'पत्रिकायामपि संक्षिप्य तद् उल्लिखामः।

यज्ञोपवीतं तादृशं प्रमाणपत्रमिव यथा मरुत्तरनियन्त्रा (मोटरड्राइवर) स्वप्रमाणपत्रं स्वपार्श्वे सततं स्थाप्यते तद्हीनो मरुत्तरं चालयन्+ सनिग्रहीतुं शक्यते इति। एतद्रहस्यज्ञानाय प्राग्यज्ञोपवीतस्य रचनायां प्रणिधेयं भवति। इदं संहितदक्षिणहस्ताङ्गुलिचतुष्टयोपरि षण्णवतिसंख्यया आवेष्ट्यते। पुनस्तत् त्रिगुणीकृत्य वामकरतले संस्थाप्य दक्षिणकरतलेन ऊर्ध्वं नीयते। भूयस्तत् त्रिगुणं कृत्वा ऊर्ध्वं नीयते। एवमेतद् ऊर्ध्ववृत्तमधोवृत्तं च भवति।

अत्र एके कारणमाचक्षते यद् गायत्र्याः २४ अक्षराणि भवन्ति। सा च वेदचतुष्टयसंहितास्वस्ति। अतएव वेदसूत्रमपि २४ × ४ = ९६ वारमावेष्ट्यते। अथवात्र एतज्ज्ञेयं यत् ११३१ संहितात्मके वेदे कर्मकाण्डम्, उपासनाकाण्डं, ज्ञानकाण्डमिति त्रयो भागा भवन्ति। तत्र एकलक्षमिताः सर्वे मन्त्रा भवन्ति। अत्र स्थूल गणनया कर्मकाण्डस्य ८० सहस्रं मन्त्रा भवन्ति,

+ निग्रहीतुम्। अत्र सम्प्रसारणप्राप्तिर्नास्ति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



उपासनाकाण्डस्य १६ सहस्रं मन्त्रा भवन्ति; अवशिष्टाः ४ सहस्रं ज्ञानकाण्डस्य भवन्ति । एवमेकलक्षपूर्तिर्भवति । तद् यद् यज्ञोपवीतं ९६वारमावेष्ट्यते तदेतेन ९६ सहस्रसंख्यकानां पूर्वोक्तकर्मकाण्डोपासनाकाण्डमन्त्राणामधिकारपट्टोऽयं द्विजकृते 'चपरास' वद्—इति सूच्यते । × सोऽवधिरपि ७५ वर्षपर्यन्तं वानप्रस्थाश्रमं यावत् । ततः संन्यासाश्रमे ज्ञानकाण्डप्राप्त्या उक्त ९६ वारमावेष्टितस्य यज्ञोपवीतसूत्रस्यापि जले प्रवाहः क्रियते ।

यत् खलु सूत्रं चतसृषु अङ्गुलिषु षण्णवतिकृत्वो* वेष्टयित्वा तत् त्रिगुणीकृत्य वामत ऊर्ध्वं नीत्वा वेष्ट्यते, एतेनात्र ब्राह्मणक्षत्रियवैश्येति वर्णत्रयस्य अधिकारः सूच्यते । ततः पुनर्यत् त्रिगुणीकृत्य अधो नीत्वा वेष्ट्यते, तदेतेन ब्रह्मचर्यगृहस्थवानप्रस्थेत्याश्रमत्रयमत्र अधिकृतमिति सूच्यते। इतश्च ऋग्यजुःसामेति त्रिविधा मन्त्राः, ब्रह्मविष्णुमहेशरूपा गार्हपत्यदाक्षिणात्याहवनीयाऽस्त्रयोऽग्नयः, धर्मार्थकामेति त्रिवर्गा एतदीयो विषयः, एतैश्च मलावरणविक्षेपा इति त्रयो दोषा दूरीक्रियन्ते इत्यपि सूच्यते ।

एवं नवतन्त्वात्मकं सूत्रं निष्पद्यते । प्रत्येकतन्तोश्च देवता भवति । तदीयो गुणोऽपि ब्रह्मचारिणा धारणीयो भवति । तत्र १ ओङ्कारस्य गुणो ब्रह्मज्ञानं, २ अग्नेस्तेजस्वित्वम्, ३ अनन्तनागस्य धैर्यधारणम्, भारधारणं च, ४ चन्द्रस्य सर्वजनमनःप्रह्लादनम्, ५ पितृगणस्य स्नेहशीलता स्वकीयानां संरक्षणं च, ६ प्रजापतेः प्रजापालनम्, ७ वायोर्बलशालित्वम्, ८ यमस्य दुष्टदण्डनम्, अथवा सूर्यस्य प्रकाशधारणम्, ९ विश्वेदेवानां दिव्यगुणधारणम्—इत्येते गुणा यज्ञोपवीतधारणाद् धारणीयाः इति सूच्यते।

पुनरेतद् नवतन्त्वात्मकं सूत्रमित्थं त्रिगुणीक्रियते यत्–त्रयाणां सूत्राणां योजना शिरसि एका भवेत्। इयं त्रिगुणता ऋषिऋणं, देवऋणं, पितृऋणम् इति ऋणत्रयं पिशुनयति । अतएव देव-पितृ ऋषितर्पणे यज्ञोपवीतसूत्रमपि क्रमशः सव्यापसव्यानीतिरूपेण क्रियते । ततो ग्रन्थित्रयेण 'अहमिदमधिकृतं क[illegible] करिष्ये, करिष्ये, करिष्ये—इति त्रिः प्रतिज्ञा च सूच्यते ।

यज्ञोपवीतं यज्ञस्य सूत्रम्, तद् वेदाधिकारप्राप्त्यै परिधीयते । तद् यज्ञोपवीत सूत्रे प्राप्ते वेदाधिकारोऽपि प्राप्तः, परं तत्र षडङ्गाऽध्ययनाभावात् वेदाध्ययनं कथं भवेत् ? अतएव तदा वेदसारस्वरूपा सावित्री (गायत्री) उपदिश्यते आचार्येण । सावित्र्या वेदसारस्वरूपत्वं मनुस्मृतावपि प्रोक्ता । तथा च 'अकारं चाप्युकारं च मकारं च प्रजापतिः । वेदत्रयान्निरदुहद् भूर्भुवः स्वरितीति च' ( २।७६ ) त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् । ७७) एतदक्षरमेतां च जपन् व्याहृतिपूर्विकाम् । सन्ध्ययोर्वेदविद् विप्रो वेदपुण्येन युज्यते ( २।७८ ) अत्र ओङ्कारव्याहृतियुक्तायाः सावित्र्याः (गायत्र्याः) वेदत उद्धारः, तद् ग्रहणेन च वेदाध्ययनपुण्योपलब्धयश्च सूचितः । अतएव भगवता 'गायत्री छन्दसा (वेदान्त) महम् (गीता १०।३५) इति गायत्री वेदसारस्वरूपा प्रोक्ता ।

सावित्र्यां च बुद्धिप्रार्थना । बुद्ध्यैव वेदप्राप्तिः तयैव सर्वव्यवहारसामर्थ्यं प्रवर्तते । अत एवोक्तम्—'सावित्र्यास्तु परं नास्ति' ( २।८३ ) । मन्त्रद्वारा बुद्धिप्राप्तिः स्याद्-एतदर्थं सावित्रीमन्त्रः, तदधिकारप्राप्त्यर्थं च आचार्यतो यज्ञोपवीतसूत्रं गृह्यते—इत्येव उपनयनरहस्यम् ।

---

× सोवधिः । अवधिः । पुंसि । * षण्णवतिकृत्वः । अत्र कृत्वसुच् प्रत्ययः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

### संस्कृतभाषा च तद्गतविज्ञानं च

वर्तमानसमये संस्कृतभाषायाः प्रचारविषयमादाय भारतस्य सर्वेष्वपि भागेषु स्वल्पाऽल्पाः सोत्साहसमुद्घोषाः श्रूयन्ते। अवश्यमस्मिन्नपि विषये राजस्थानस्य स्थानं सर्वतः पृष्ठगतमालोक्येत। प्राचीनाः संस्कृतसेविनः संघीभूय सर्वानप्यधिकारिणो मुहुर्मुहुर्जागरयन्ति, किन्तु अधिकृताः पुरुषा मौखिकं संतोषं विहाय कार्यरूपे किं वा संपादयिष्यन्तीति संस्कृतसेविनां केवलं प्रतीक्षैव। किन्तु अन्यान्यप्रान्तेषु उच्चोच्चा अधिकारिणोऽपि संस्कृतप्रचारस्य घोषणां कुर्वन्ति। स्वयं राष्ट्रपतिमहाभागः संस्कृतप्रचारे उत्साहसंवर्द्धनार्थं संस्कृतक्षेत्रेष्ववतरति, पण्डितांश्च प्ररोचनाभिः प्रोत्साहयति। के० एम्० मुंशीमहाभागस्य संस्कृतानुरागः संस्कृतक्षेत्रेषु प्रचरणं च सर्वविदितम्। काटजूमहोदयस्तु बहोः कालात्संस्कृतस्य राष्ट्रभाषात्वमप्युद्घोषयति। एवं पणिक्कर-गाडगिलमहोदयावपि संस्कृतभाषां प्रति प्रकाममनुरागिणौ संस्कृतसेविनां भूयस्तरां प्रोत्साहकौ च। टंडनमहोदयोऽपि संस्कृतविषये नितरामुदारविचारः प्रचारपक्षपाती च। शासनाधिकारिषु संस्कृतप्रचारविषये शिथिलता पश्चात्पदता च यदि क्वचिद् दृश्यते तर्हि स प्रदेशो राजस्थानमेव। येषां ...ां शासननिरोधः संसानसंहरणस्य श्रेयःसंपादनं ...र्तमानशासकैः कृतम्, तैः प्राचीनै राजभिः ...स्य संस्कृतेश्च कृते निजस्य प्राणा अपि संकटे ...निताः, राजसौख्यान्यपि दूरतः परिहृतानीति दारयति ...मितिहास एव।

भारते वैदेशिकानां विधर्मिणां च शासनं दूरीकृत्य ... स्वदेशीयं शासनमेव प्रवृत्तमित्येव न अपितु जनतन्त्रस्य सर्वाधिकारः संप्रति संप्रतिष्ठितः संप्रति भारतं सर्वतन्त्रस्वतन्त्रमित्याख्यायते। एवंविधे बहुकालात्प्रतीक्षितेऽप्यवसरे—येषु प्रदेशेषु संस्कृतस्य भारतीयसंस्कृतेश्च प्रचारः पूर्वतः प्राचरत् तेष्वपि प्रदेशेषु संस्कृतस्य तत्सम्बद्धायाः संस्कृतेश्च दशा यद्युत्तरोत्तरं, हीना स्यात्तर्हि ततोऽधिकं किं वा शोचनीयम्? राजस्थानप्रान्तस्तत्रापि तदिदं जयपुरराज्यं संस्कृतविषये भूयस्तरामग्रगण्यम् इदं हि द्वितीया काशीति परितः प्रसिध्यति स्म। एवंविधप्रदेशस्य शासनसूत्रं हस्ते गृहीत्वाऽपि यदि अत्रत्याः शासनाधिकारिणः संस्कृतविषये युरोपीयानाँ शासनकालतोऽपि पश्चात्पदा भवेयुस्तर्हि तदिदं देशस्य दौर्भाग्यसूचकमेव, किमितोऽधिकमस्माद्दौराक्रुश्यताम्?

मुहुर्मुहुः शिष्टमण्डलेनोद्बोधिता राजस्थानीयाः शासनाधिकारिणः संस्कृतोद्धारविषये समुचितं कर्तव्यं सांप्रतमवश्यमङ्गीकरिष्यन्तीति निश्चितमाशास्यम्। एतस्योपरि सुदृढं विश्वासमास्थाप्य—ततोऽग्रे वर्द्धितुमिच्छामो यत्—

भारतस्याऽन्याऽन्यप्रदेशेषु ये महाभागाः संस्कृतभाषायाः प्रचारे सोत्साहं प्रवर्तन्ते तेषां सेवायामिदमग्रिमं कर्तव्यं सूचयामो यत्तैः संस्कृतसंबद्धानां विद्यानां समादरोऽपि न विस्मरणीयः स्यात्। यतो हि संस्कृतनिष्ठानां विद्यानां सर्वतः प्रचारो भारतस्य हितावहो भवेत्, न केवलं भाषा। संस्कृतभाषाया महत्त्वमेतन्निष्ठानां विद्यानां कारणादेव। आर्षं विज्ञानम्, दर्शन—गणितायुर्वेद—साहित्यादिशास्त्राणि च भारतस्यैव संपत्तिर्यस्य कारणात् भूमण्डलस्य गुरुपदं भारतेनाऽऽसादितम्। उपनिषदां धर्मशास्त्राणां चोपदेशैर्मुग्धा मुग्धानल (मेगूडानल) श्क्रेजलप्रभृतयो



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वैदेशिका हृदयस्यान्तस्तलेन प्रशशंसुर्यत्—'संस्कृत भाषायां तद्भाषाभाषिणामृषीणां विश्वमात्रमात्मीयं भावयतामस्मायिकं हृदयं सुस्पष्टं प्रतिबिम्बितमिव"।

अद्यत्वे काटजू—के० एम्० मुंशी-बिनोवाभावे-प्रभृतयो भारतीयानां विद्यार्थिनां नागरिकाणां च, चरित्रभ्रष्टतामुच्छृङ्खलतामकर्मण्यतां च शतमुख-मनुशोचन्ति। किन्तु यदि भारतीयानां विद्यानां प्रचारो जनतायां पुनः प्रसरेत्तर्हि सेयं दुरवस्था दूरे प्रवसेत्। भारतस्य स्वरूपमेवाऽन्यादृश भवेत्। अद्यना नाविधैरन्वेषणैर्निन्त्रणैर्दण्डैश्च उत्कोचग्रहणं भ्रष्टचारित्र्यं च निरोद्धुं प्रयतन्ते शासनाधिकारिणः। किन्तु राजशासनेन एतस्य नियन्त्रणं कियत् कुत्र कुत्र वा क्रियताम्? पर भारतीयविद्यानां प्रचारः पुनरस्मिन् देशे स्यात्तर्हि शासकैर्नाऽस्मिन् विषये परिश्रमः कर्तव्यो भवेत्। भारतीयां संस्कृतिमनुशीलयतां विद्या-र्थिनां चरित्रं स्वत एव तादृशं भवेद् येन तेषां कृते दण्डस्य नियन्त्रणस्य वा आवश्यकतैव नाऽऽपतेत्। नैतत्किल संस्कृतसेविनामेव वक्तव्यम्, अपितु लोक-मान्यतिलक—गोखले—गान्धिमहाभागादयोऽपि भार-तीयविद्यासु समुपदिष्टाया भारतीयसंस्कृतेः प्रचारस्य घोषणां पुरा हृदयेनाकुर्वन्। तस्याप्यासीत्कारण-मिदमेव।

कथमस्य श्रीगणेशः कर्तव्य इति चेत्तर्हि श्रूयताम्? वर्तमानसमये विशुद्धस्य संस्कृतपाठ्यक्रमस्य प्रचारः पाश्चात्यगौराङ्गाणामनन्यभक्तेषु वर्तमानशासकेषु न कथंचित्सुस्थिरो भवेत। अतएव वर्तमानपाठ्यक्रमेण सह किञ्चित्किञ्चित् प्राचीनविद्यानामपि मिश्रणं क्रियेत, येन 'मेकाले'महोदयस्य नीतिपाटवात्पाश्चिमाभि-मुखानां वर्तमानकालिकविद्यार्थिनां नैकान्तमरुन्तुदं प्रतीयेत। यथा—वर्तमानकाले अर्थशास्त्रस्य पठनम-निवार्यं नूनम्। किन्तु संप्रति आङ्गलभाषीयैरर्थशास्त्र-पुस्तकैः सह कौटिलीयस्यार्थशास्त्रस्य शुक्रनीति-काम-न्दकीयानामपि च पाठ्यक्रमे भवेत्संनिवेशो येन शनैः शनैर्यत्किञ्चिद्ज्ञानं भारतीयसंस्कृतेरपि भवेत्तेषाम्। अवश्यमत्र—तत्समर्थानामध्यापकानां प्रकाममावश्य-कता। चेदध्यापकः शास्त्रमार्मिको भवेत्तदैव स्वल्पैः पुस्तकैर्निगूढे विषये पठतामधिकारः संभवेत्।

एतस्य कृते बहूनां महाभागानामियमपि योजना श्रुता यत्पाठ्य विषयो यादृशस्तादृशोऽपि भवेत्किन्तु वर्तमानशिक्षाप्रणाल्याः स्थाने प्राचीना ऋषिकुल प्रणाली चेत्प्रचाल्यते तर्हि तेषां चरित्रं पठनकाल[illegible] दिनचर्या चाऽन्यैव संभवेत्। येन हि प्राचीना विद्या-र्थिनः स्वस्वविषयस्य मार्मिका यथा गुरुकुलान्निर्गच्छ-न्ति स्म तथा साम्प्रतमपि मर्मस्पर्शिनः प्रतिभाशालिनश्च स्नातकाः कालेजादिषु निष्पद्येरन्निति तेषामाशयः। अस्तु, साम्प्रतिकाः शिक्षानेतारः समतीनामासां तत्त्वविमर्शं कृत्वा देशे प्रचलितायाः शिक्षाया अभीष्ट फलमवश्य संपादयेयुरिति निजहार्दमावेदयामः। सम-यान्तरे एतद्विषये यथावकाशमन्यदपि समसूच्येत ते[illegible] सेवायामित्यलं विस्तरेण।

## भांकरामहाकुल्याया उद्घाटनम्

जुलाईमासस्य ८ तारिकायां भारतप्रधानमन्त्री श्रीनेहरूमहोदयो 'नागल—जलविद्युतः' 'भांकरा कुल्यायाश्चोद्घाटनसमारोहं सोत्साहं निरवर्तयन्। नेहरूमहाभागस्तस्मिन्दिने प्रातर्देहलीतो वायुयानेन प्रातिष्ठत। ततो नांगलनिवेशान प्राप्य विश्राम[illegible] विश्रम्य दिवा द्वादशवादनावसरे सोयं समारोहम[illegible] संपादयामास। स्वागतसमित्या सर्वोऽपि प्रबन्धः पूर्वतः कृतोऽभूत्। यथैव सोयं समयः समुपस्थितोऽ-भूत्तथैव नेहरूमहोदयो विद्युद्ग्रन्थिम् ('बटन') करेण निष्पीडयामास। एतत्समकालमेव कुल्यायामेतस्य सलिलप्रवाहस्य महती धारा महता वेगेन प्रावहत्। [illegible] हर्षेण साकं जनताया महान् विस्मयः समभूत्। [illegible] जलधारा प्रावहत् तथैव भारतीयवायुसेनाया व्योम[illegible] नैराकाशात् प्रचुरसंख्यायां 'प्रकटपत्राणि' प्राक्षिप्य-न्त, येषु भांकरानागलयोजनाश्चित्राण्यङ्कितान्यासन्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अयं जलबन्धो भारतस्य प्रधान-प्रधानयोजनासु, ...प्रधानफलरूपः। अयं किल विश्वस्य जलबन्धेषु सर्वप्रधानभूतो बन्धो दीर्घतायाम्। तथा गुरुत्वा-कर्षणस्य आधारोपरि निर्मितेषु बन्धेषु सर्वस्मिन्नपि विश्वे ...नं द्वितीय इत्याख्यायते। अस्य निर्माणे यावत् ...जनकार्यमक्रियत, यावांश्च पाषाणादिव्ययः समभव-...न दिल्लीमारभ्य अमेरिकाया न्यूयार्कनगर पर्यन्तं ...विस्तृतायतं संसरणमेकं (सड़क) निर्मातुं शक्येत। ...दिल्ली-न्यूयार्कयोर्मध्यान्तरं ६,२०० क्रोशार्द्ध परिमित-...ति न विस्मर्तव्यम्। शिल्पिभिर्विनोदविधया ...चित यत्—अस्याः प्रधानकुल्यायाः (नहर) निर्माणे ...कोटिमिता इष्टकाः (टाइल्स्) अलगन्। तथा ...निर्माणे विंशतिकोटिमिता इष्टकाः समगृह्यन्त। ...सर्वा अपि इष्टका यदि एकस्यां अग्रे एका, इति ...निधीयन्ते तर्हि भूमध्यरेखाया उपरि संपूर्णाया ...पृथिव्याः सप्त परिक्रमाः पूर्णाः स्युः। एततूखलु ...सर्वस्मिन्नपि भूमण्डले चिराय संस्मरणीयं संवृत्त-...ति सातः संवोध्यम्।

उद्घाटनसमयस्य भाषणे नेहरूमहाभागः सोत्साह ...वदत् 'यदहं भांकरा-नागलयोजनामिमां विशेषज्ञानां ...जीविनां च प्रशिक्षणाय एकं विश्वविद्यालयं मन्ये। ...मनस्येवं विधा योजना धार्मिककार्येभ्यो मन्दिरे-...भ्योऽपि महत्वपूर्णाः। यदाहमेवंविधं निर्माणकार्यं ...पश्यामि तदाहि मम हृदये धार्मिकभावना-...सा जाग्रति। सेयं योजना राष्ट्रस्य प्रवर्द्धमान शक्ते-...श्रयस्य जीवितमेकमुदाहरणम्। पाकस्थानीयाः ...एतस्या विषये संप्रति विरुद्धं भाषन्ते। ...वयं पाकस्थानस्य सर्वदा हितचिन्तकाः सहायकाः ...वयं वांछामो यत्पाकस्थानं कुल्याया विषयिणीं ...प्रणाली परिशोधयेत्। येन हि वर्तमानसमये ...यावान् लाभस्तस्य भवति, अग्रे ततोप्यधिकस्त-...भवेत्, किन्तु वर्तमानकालिकीं तस्य प्रणालीं वयं ...दामः, अनया हि न तस्य कश्चन लाभो, न ...सह तस्य संव्यवहारोऽपि संसिध्यति।

अस्तु, सोऽयं महासमारोहो राष्ट्रस्य हितावहो भवेत्। विशेषतस्तु राजस्थानप्रान्ते विपुलां जलकुल्यां प्रवाह्य प्रजानां कष्टनिवारकः संसिध्येदिति भगवन्तम-र्थयामहे।

## गोवधनिरोधः

धार्मिकदृष्ट्या, उपकारदृष्ट्या च भारते गोवंशः सर्वथा समादरणीयः पूज्यश्च। किन्तु जनतन्त्रराज्ये-भारतस्य स्वराज्येऽप्येतस्मिन् गोवधस्य निरोधः संपूर्ण-प्रजाया विरोधकरणेऽपि न संजातः। संप्रति मथुरायां श्रीप्रभुदत्तब्रह्मचारिमहाभागस्य सभापतित्वे एका सार्वजनिकसभा समघटत, यत्र हरदेवसहायप्रभृति-भिर्बहुभिः प्रसिद्धपुरुषैः सक्रियो भागो गृहीतः। सभया निश्चितीकृतं यत् "बहोः कालाद्विनीतप्रार्थनेऽपि यदि शासका गोवधनिरोधेऽवधानं न दास्यन्ति तर्हि कृष्णजन्माष्टमीमारभ्य कृष्णस्य गोपालनभूमावस्यां वयं सत्याग्रहान्दोलनं परिचालमयिष्यामः"।

नागपुरेऽपि राष्ट्रीयस्वयंसेवकसंघस्य कार्यकारि-मण्डलेन एकः प्रस्तावः पारितो यद्वारं वारं शासक-तन्त्रस्य संमुखे गोवधनिरोधार्थं भारतीयप्रजया प्रार्थना कृता, किन्तु न तत्समादरोऽद्याधि दृश्यते। जनमतं क्षुब्धं भवेदेतस्मात्पूर्वमेव शासकैरेतस्य प्रतीकारः कर्तव्यः।

एतत्संबन्धे भारतीयसंसत्सदस्येन सेठश्रीगोवि-न्ददासमहोदयेनाऽपि एकं विधेयकमुपस्थापितं किन्तु महान् खेदो यत् शासकानामवधानं न जायते। आव-श्यककर्तव्यार्थं प्रजामतस्य विक्षोभजननं न किल राजनैतिकानां कर्तव्यमिति किं वाधिकं सूचयामस्तेभ्यः?

## शोक समाचारः

इदानीं दिनद्वयात् पूर्वं राष्ट्रियस्वयंसेवकसंघस्य सर संघचालकमहोदयानां (श्री गुरुजीति नाम्ना प्रख्यातानाम्) पितुः अशीतिवर्षदेशीयस्य श्री सदा शिवराव महोदयस्य परलोकगमनं संजातम्। ये स्वर्गीयं तं जानन्ति स्म तेषां कृते तु कथैव का, किन्तु सर्व-साधारणास्तु एकस्य अद्वितीयमहापुरुषस्य जनयितृ रूपेण चिरकालं तं स्मारिष्यन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## द्रुतं संस्कृतं शिक्ष्यतां भारतीतः—

### संस्कृते

१७ जुलाईदिवसे 'भारती' (मासिकपत्र) कार्यालयेन (जयपुरे) गुरुपूर्णिमामहोत्सवोपलक्ष्ये संस्कृत प्रदर्शिन्याः, पण्डितसभायाश्चाऽऽयोजनमकारि। प्रदर्शिन्या उद्घाटनं कुर्वता राजस्थानस्य शिक्षामन्त्रिणा श्रीभोलानाथमहाभागेन प्रोक्तम्—"भारते संस्कृतस्यैतावती प्रतिष्ठास्ति यत्संस्कृतज्ञानां संमुखे जनताया मस्तकं स्वत एव नम्रीभवति। देववाण्याः सेयं प्रतिष्ठा वर्तमानयुगे सतर्कं संरक्षणीया। प्राचीनगुरुप्रणाल्या सह वर्तमानशिक्षाप्रणाल्यास्तुलनां कुर्वता श्रीमता प्रोक्तं यत्पुरा शिक्षार्थिनो लालसाऽऽसीदन्तर्ज्ञानप्राप्तेः, किन्तु वर्तमानः शिक्षार्थी द्रव्योपार्जनयोग्यतां कामयते।

देशस्य राष्ट्रपति-प्रधानमन्त्रिप्रभृतयः एतत्कृते भृशं जागरूकाः। अन्ते प्रदर्शिन्या आयोजनार्थे 'भारतीं' प्रशंसता श्रीमता प्रोक्तं यत् प्रदर्शिनीसदृशान्यन्यान्यपि साधनानि संस्कृतप्रचारार्थं प्रभुज्यन्ताम्। संस्कृतस्य अनवरता साहित्यधारा पुनः प्रवाहिता भवतु, इति साग्रहमुक्तं श्रीमता।

प्रदर्शिनीतः पूर्वमायोजितायां पण्डितसभायां राजगुरुश्रीगोपीनाथद्राविड़महोदयस्य, स्वामि श्रीजयरामदास—श्रीवृद्धिचन्द्रशास्त्रिप्रभृतीनां च संस्कृते भाषणान्यजायन्त। संस्कृत प्रदर्शिन्यां वैदिककालमारभ्य वर्तमानयुगपर्यन्तस्य संस्कृतस्य—क्रमिकविकासस्य दिग्दर्शनं रुचिरप्रकारेण संपादितमासीत्।

### हिन्दी भाषायाम्

१७ जुलाई को 'भारती' मासिक पत्र के कार्यालय द्वारा जयपुर में गुरुपूर्णिमा के महोत्सव पर संस्कृत प्रदर्शिनी तथा पण्डित सभा का आयोजन किया गया। प्रदर्शिनी का उद्घाटन करते हुए राजस्थान के शिक्षा मन्त्री श्री भोलानाथ जी ने कहा 'भारत में संस्कृत की ही इतनी प्रतिष्ठा है के संस्कृतज्ञों के सामने जनता का मस्तक स्वतः ही नम्र होजाता है। देववाणी की यह प्रतिष्ठा वर्तमान युग में सतर्कता के साथ रक्षणीय है। प्राचीन गुरु प्रणाली के साथ वर्तमान शिक्षा प्रणाली की तुलना करते हुए उन्होंने कहा के पहले शिक्षार्थियों की लालसा आन्तरिक ज्ञान प्राप्त करने की रहती थी किन्तु आजके शिक्षार्थी धन कमाने की योग्यता की इच्छा रखते है'।

देश के राष्ट्रपति तथा प्रधानमन्त्री इसके लिए अत्यन्त जागरूक हैं। अन्त में प्रदर्शिनी के आयोजन के लिए 'भारती' की प्रशंसा करते हुए उन्होंने कहा के प्रदर्शिनी की तरह के अन्यान्य साधनों को भी संस्कृत प्रचार के लिए प्रयोग में लाने चाहिए। संस्कृत की अखण्ड साहित्य-धारा पुनः प्रवाहित हों, यह ही अन्त में आग्रह के साथ मैं उन्होंने कहा।

प्रदर्शिनी के पहले आयोजित पण्डितसभा में राजगुरु श्रीगोपीनाथजी द्रविड़, स्वामीश्रीजयरामदासजी, श्री वृद्धिचन्द्रजी शास्त्री इत्यादि के संस्कृत में भाषण हुए। संस्कृतप्रदर्शिनी में वैदिककाल से लेकर वर्तमान युगपर्यन्त संस्कृतके क्रमिकविकास का दिग्दर्शन मनोहरपद्धति से सम्पादित किया गया था।

प्रकाशकः—जयबहादुरसिंह        पता—भारती भवन, गोपालजी का रास्ता, जयपुर।

मुद्रकः—राजस्थान प्रिंटिंग वर्क्स, हनुमान का रास्ता, जयपुर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती



स्वराज्यस्थापना वीरः सन्महाराष्ट्रकेसरी ।
लोकमान्येषु तिलकास्तिलकोऽयं प्रणम्यताम् ॥

वर्षम् ४

दशमोऽङ्कः

मूल्यम्—
वार्षिकम् ३) रु०
एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान मद्रास–मध्यप्रदेश-सौराष्ट्र उत्तर प्रदेश सर्वकारैः स्वीकृताः–

# ❀ विषय–सूची ❀


| क्रमः | लेखाः | लेखकाः |
|---|---|---|
| १. | मातृसंदेशः | विद्यार्थी गणेशप्रसादगौतमः नेपालः |
| २. | संस्कृत-शिक्षा | श्रीलक्ष्मीनारायण पुरोहितः, उदयपुरम् |
| ३. | पन्नाधात्री | श्रीवासुदेवशास्त्री वागेवाडीकरः, शोलापुरम् |
| ४. | उद्बोधनम् | श्रीकेदारनाथ मिश्रः, लखनऊ |
| ५. | सङ्घफलम् | श्रीस्वामीलक्ष्मणशास्त्री नागौर ( राजस्थान ) |
| ६. | वर्तमानसमयः (कविता) | सम्पादकः |
| ७. | श्रमिकपक्षवादः | प्रो० सत्यदेव वर्मा अमृतसर |
| ८. | मृगमरीचिका | श्री प्रेमशंकरमिश्रः इटारसी |
| ९. | विचित्रो विच्छेदः | श्री कलानाथशास्त्री जयपुरम् |
| १०. | सम्पादकीयम् | सम्पादकः |
| ११. | देश-विदेशवार्ता | ,, |
| १२. | संस्कृतसमाचाराः | ,, |
| १३. | द्रुतं संस्कृतं शिक्षयतां 'भारती'तः | ,, |


## —: "भारती" पत्रस्य उद्देश्यानि नियमाश्च :—

१. संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचार पोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि ।

२. 'भारती' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम् ।

३. मासिकपत्रमिदं प्रतिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात् ।

४. एकस्यांकस्य मूल्यम् ।≈) आणकषट्कम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि-
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी।
भागीरथीव भावाढ्या भारते भातु भारती॥

प्रबन्ध-सम्पादकः—
गिरिराजशर्मा शास्त्री

वर्षम् ४ | श्रावणपूर्णिमा, सं० २०११ | अङ्कः १०

## मातृ-सन्देशः (ग)

विद्यार्थी—गणेशप्रसादगौतमः, संस्कृत-महाविद्यालयः, नेपालः

बोधयन्ति सरसैरुपचारैः, योजयन्ति सफलैरुपकारैः।
× तान् अहो! श्रमिवरा बत! निम्बः, तिक्त एव मधुनाऽपि च सिक्तः ॥१॥'

मृत्युना कवलितः किमुवेत्ति? स्वीयजीवनहिताहितमार्गम्।
हन्त! साधनशतैरपि रुद्धः, किं न याति? दहनाय पतङ्गः ॥२॥

दीन-जीवन-विभूति-सगर्वो, रक्त-लोलुप-शृगाल-सवर्गः।
दुःसहोऽतिकृपणो धनिवर्गो 'वन्हितोऽपि खर आयसभर्गः ॥३॥'

को न मानयति सद्गुणवन्तम्, आर्तजीवभरणे रसवन्तम्।
किन्तु सर्पति? गुणाश्रयवन्तं, पल्लवायिततरुर्न वसन्तम् ॥४॥

आर्त-सङ्घ-सफलायित-पूर्तिः, विश्वपालनमहेश्वर-मूर्तिः।
कालकूटमिव हा! धनिगर्वं, पीयतां तव पवित्र-चरित्रैः ॥५॥

विश्वशान्ति-विधि-चिन्तन-चर्चा, मन्त्र-पाठ-मख-देवसमर्चा।
ओः! इतोऽन्यदधिकं किमु पुण्यम्? एवमेव कुरु जीवन-पण्यम् ॥६॥

धर्म-मर्म हृदयं गमयस्व, सत्य-धौत-हृदयं च जुषस्व।
अन्धदर्शित-दिशा च न गच्छ, स्वीयबुद्धिनयनेन च पश्य ॥७॥

अस्तमिच्छुरिव जीवन-चन्द्रः, दुष्टनीरदनिवारितकेन्द्रः।
देश आयतिशुभै रहिताङ्गः, केन वत्स! निवसेत् कृतसङ्गः ॥८॥

× तान् इतिपदेन पूर्वप्रकरणतः कृपणधनिनो गृह्यन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृत-शिक्षा

लेखकः—पं०श्रीलक्ष्मीनारायणपुरोहितः, साहित्याचार्यः, कविकलानिधिः, महाराणासंस्कृतकालेज-साहित्यप्राध्यापकः, उदयपुरम्

पूर्वाऽनुवृत्तः

[ निबन्धोयम् अ०भा० संस्कृतसाहित्यसम्मेलने सर्वोत्तमत्वेन पुरस्कृतः —सम्पादकः ]

## स्वतन्त्रभारते पुनः सुस्थतायाः सदाशा

सम्प्रति भारतीयानां सौभाग्येन भारतं पारतन्त्र्य-पाशादुन्मुक्तं सत् स्वातन्त्र्यं सेवमानं वर्तते। इदानीं नाऽस्ति कस्यांऽपि शक्तिः, यत् स भारतं स्वस्य सुव्यवस्थायै, समृद्धये, शान्तये, सुखाय चाऽग्रेसरीभवितुं प्रतिबध्नीयात्। अस्माकं देशस्य कर्णधाराः शिखा-स्थानीया नेतारो राष्ट्रपतिराजेन्द्रप्रसाद-प्रधानमन्त्रिपण्डितजवाहरलालनेहरू-गृहमन्त्रिकैलाशनाथकाटजूमुंश्यायङ्गरप्रभृतय एतज्ज्ञातवन्तः सन्ति, यत्-भारतस्य सुव्यवस्थायै,, समृद्धये, शान्तये, सुखाय च भारतीया संस्कृतिरेव प्रभुः, भारतीयसंस्कृतेः संरक्षणाय संप्रसारणाय च संस्कृतभाषैव सर्वथा समर्था। अतएव यत्र तत्र सत्स्ववसरेषु ते महामनस्विनः संस्कृतस्य पुरः पुनरपि भारते प्रतिष्ठापनमत्यावश्यकरूपे प्रथयन्ति, सत्वरप्रसाराय च तस्य विविधानुपायान् विचारयन्ति, इति सन्तोषस्य विषयः। एतादृशानां महापुरुषाणां विचारा अवन्ध्या एव भूत्वा कार्यरूपे परिणंस्यन्त्येवेति दृढं विश्वसिमः। इतः संस्कृतसमाजस्य मूर्धन्या मनीषिणोऽपि संस्कृतस्य प्रसाराय समुन्नतये च विविधान् कार्यकलापानाकलयन्तो दिवस-रात्रानेकीकर्तुं प्रवृत्ताः सन्ति। एवं नचिरात् संस्कृतसूर्यो भारतान्तरिक्षमण्डले स्वकीया आलोकमालाः सम्प्रसारयन्

यत्र हर्ष-रस-धौततरङ्गं, 'चुप्पचुप्प' मधुरायितमङ्गम् ।
बाल्य-जीवनरसं समनैषीः, हन्त! हा ! ! तदवने न मतिश्चेत् ?॥९॥

यत्र जन्म-विधिना सुत ! तुष्टः, यस्तदङ्ग-पयसा परिपुष्टः ।
तन्मुदे रसकषायितकण्ठः, कोकिलोऽपि किल कूजति हन्त ? ॥१०॥

वत्स ! ते मनसि किं परितापः, नोदभूत् ? प्रतिदिनं पलितेयम् ।
व्याकरोति खरमेव, न कान्तापाङ्ग-जङ्घ-कुचकुंभ-नितम्बम् ॥११॥

विश्व-बान्धवविशालविचारो वर्णयेत सुकविः क इदानीम् ।
यौवनोन्नत-पयोधरकुंभम्, यौवनोन्नत-विशाल-नितम्बम् ॥१२॥

राष्ट्रियत्वमखिलं प्रतिगेहं, बोधय त्वममलं प्रतिदेहम् ।
मानसस्थिति-समुन्नतिसारां, दर्शयार्थिक नयोन्नतिधाराम् ॥१३॥

'सूय्य सूय्य' किमु निःश्वसिषि त्वं, स्वेद-बिन्दुरजनिष्ट न सिन्धुः ।
अम्बुनः पिपतिषा च निराला, दूर एव वरुणालय-माला ॥१४॥

क्रान्तिवीर ! तत आगतवत्यां वक्रनक्रबहुलैः सह तस्याम् ।
वीरबान्धवमहारव-पोत-माश्रयेर्यदि भवेत् तितरीषा ॥१५॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भारतीयसंस्कृतिकमलिनीं चोल्लासयन् भारतीयानां हृदयकमलानि विकास्य तेषां सद्भावसौरभैः समस्तमपि जगत् पूरयिष्यत्येवेति बाढमाशासितुं प्रवर्तामहे ।

## बाधास्तन्निराकरणस्य चोपायाः

एवं भारतीयराष्ट्रस्य नेतृवर्गेण मनीषिमण्डलेन च संस्कृतसत्वरप्रसाररूपमहासत्राय स्वीकृते विपुल विचारारणिमन्थने विविधक्रियाकलापे च ममाऽपि संस्कृतजगति वर्तमानस्य यदि स्यादात्मसमं चेष्टितम्, तर्हि तत्राऽस्थाने भवेत् । अतोऽत्र यथाशक्ति तानेव विचारलाजाञ्जलीन् उमायनीकरोमि, येषु द्रक्ष्यन्ति विचारधुरन्धराः सुधीधौरेयाः, यत्—संस्कृतशिक्षायां सम्प्रति वर्तमानाः कास्का बाधाः सहृदयहृदयानि व्यथयितुं प्रभवन्त्यः सन्ति, के च तन्निराकरणोपाया भवितुं शक्नुवन्ति, ये मन्मतावुपारूढा वर्तन्ते । मन्ये, उपायानामेषां कृतेऽवलम्बने दूरीभविष्यन्त्येव संस्कृत शिक्षायामागताः समा अपि बाधाः । अस्तु ।

### (१) संस्कृतशिक्षार्थिनामभावः

संस्कृतशिक्षायां प्रथमा बाधा तावदियम् यत्—अस्यां शिक्षार्थिनां प्रायेणाऽभाव एव वर्तते । संस्कृत-शिक्षाक्षेत्रे वर्तमानस्य शिक्षार्थिनामभावस्य यदा कारणमन्विष्यते, तदाऽस्माभिरेष एव निष्कर्षः प्राप्यते, यत्—सम्प्रति शिक्षाया उद्देश्यमेव लोकैरेतत् स्वीकृतमस्ति, यत् — विविधोपभोगसाधनानामभिवृद्धये धनार्जनस्य सामर्थ्यं प्राप्येत । तच्च संस्कृतशिक्षापेक्षया इतरशिक्षाभिरिदानीमनायासेन स्वल्पायासेन वा भवितुं शक्नोति, संस्कृतशिक्षया प्रत्युत तस्मिन् कस्मिंश्चित् वैफल्यमपि प्राप्तं दृश्यते । एवं चेत्, तर्हि संस्कृतं पठित्वा जनाः किमर्थमात्मनः कृते दारिद्र्यं वृणुयुः । अतो दारिद्र्याद् भीता जना न केऽपि संस्कृतं पठितुमिच्छन्ति । यदि शिक्षाया उद्देश्यमेवैतद् रच्यते, यत्—शिक्षां प्राप्य सर्वे जनाः सदाचारिणः, देशधर्मानुरागिणः, सर्वलोककल्याणाभिलाषिणो भवेयुः, तर्हि शिक्षायामनिवार्यत्वेन संस्कृतस्य प्रवेशः कार्यः । न केवलं प्राथमिककक्षास्वेषु अपि तु उच्चोच्चकक्षास्वपि संस्कृतस्य द्वे द्वे पत्रे सर्वविभागेष्वनिवार्यत्वेन स्थापनीये । ययोरेकं व्याकरणसाहित्यस्य, द्वितीयं च गीतोपनिषत्पुराणरामायणमहाभारतादीनां भवेत् । कक्षाणां स्तरानुसारेण तयोः पाठ्यपुस्तकेष्वपि विषयाणां संकलनं भवेत् । परीक्षोत्तरणमपि तयोरनिवार्यं स्यात् । ये प्राथमिककक्षास्वेव संस्कृतं पठन्त उच्चोच्चकक्षासु गमिष्यन्ति, तेषां कृते संस्कृतं कदापि अरुचिकरं भारभूतं च न स्थास्यति । उच्चोच्चकक्षापर्यन्तं देववाणीं पठित्वा छात्रा धूर्ता उपद्रवप्रिया मिथ्याभाषिण उत्कोचग्राहिणो निर्दयाः क्रूरा देशद्रोहिणश्च कदाऽपि न भविष्यन्ति, अपितु सरला मृदवः कारुणिकाः सत्पक्षपातिनः प्राणपणेनापि परोपकारिणो राष्ट्रहिताय सर्वस्वत्यागिनश्च सिध्यन्तो देवतुल्या एव भविष्यन्ति, अपितु प्रशासकमण्डलं सर्वमेवैतद् हृदयेकृत्वा स्कूलकालेजानां सर्वास्वपि कक्षासु संस्कृतशिक्षाया अनिवार्यत्वं यथा कुर्यात्, तथा प्रयत्येत चेत् संस्कृतशिक्षार्थिनामभावो दूरीभवेत् ।

### (२) संस्कृतच्छात्राणामनुत्साहः ।

द्वितीया बाधा संस्कृतशिक्षायामियम्, यत्—संस्कृतच्छात्राणां स्वभविष्यद्विषये निराशत्वं तथोत्साहहीनत्वम् । संस्कृतच्छात्राणां स्वभविष्यद्विषये निराशतायाः उत्साहहीनतायाश्च यदा निदानं विमृश्यते, तदैतद्मन्तव्यं भवति, यत् छात्राणां संस्कृतं प्रति



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



स्नेहे रुचावासक्तौ वा मनागपि नैपुण्यस्याऽभावेऽपि यदा वैदेशिकप्रशासकपरम्पराप्राप्तां संस्कृतपरीक्षाणाममान्यतां स्वतन्त्रभारतस्य प्रशासकीयविविधविभागेष्वपि ते पश्यन्ति, तदा तेषां हृदयेषु जीविकोपायानामभावः शूलायितुं प्रारभते । बहून् वत्सरान् विविधविषयेषु कौशलमाकलय्याऽपि यदि छात्राः स्वजीवनोपायान् न प्राप्नुयुः, तर्हि तेषां निराशता, उत्साहशून्यता च स्वाभाविक्येव । एतस्य परिणामोऽयं भवति, यत् संस्कृतस्याऽध्ययनं मध्य एव त्यक्त्वा उत्तीर्णसंस्कृतपरीक्षाभिर्गतार्थानामपि मैट्रिकादिक्षुद्रपरीक्षाणामुत्तरणाय प्रयस्यन्तस्ते एवमेव स्वकीयममूल्यं समयं क्षपयितुं लगन्ति, संस्कृतस्य प्रौढगम्भीराध्ययनाच्च विच्छिन्ना भवन्ति । संस्कृतपरीक्षास्वपि सम्प्रति हिन्द गणितभूगोलेतिहासराजनीत्यर्थशास्त्रादि व्यावहारिकविषयाणां निवेशो वर्तत एव, अतस्ता उत्तीर्णाः सर्वविधकार्यालयेषु कार्याणि कर्तुं ते सर्वथा समर्था भवन्त्येव, इत्येव न, अपि तु संस्कृताध्ययनपरिष्कृतमस्तिष्कशालितया ते कदाचिदितरपरीक्षोत्तीर्णच्छात्रेभ्योऽपि विशिष्याऽपि कार्येषु सफला भवन्तो दृश्यन्ते । एवं सत्यपि यदि संस्कृतपरीक्षाणां मान्यता न स्वीक्रियेत, तर्हि नेदं न्याय्यम् । वैदेशिकशासका यदि संस्कृतपरीक्षाणां मान्यतां न स्वीचक्रुः, संस्कृतज्ञांश्च न प्रोत्साहयामासुः, तत् तेषां कृते संगतमासीत् । किन्तु साम्प्रतं तु भारतीया एव भारतस्य शासकाः, ते च भारते सर्वथा सुव्यवस्थां, समृद्धिं शान्तिं, सुखं च सुस्थापितानि वाञ्छन्त्येव । सर्वं च तत् भारतीयसंस्कृत्यैव भारते सम्भवम्, तन्मूलं च संस्कृतं स्वीक्रियत एवाऽस्माकं नेतृवर्गेण, तदा किमिति संस्कृतपरीक्षाणां मान्यतायाः स्वीकारे विलम्बोऽङ्गीक्रियते जनतायाः प्रतिनिधिभूतेन सर्वकारीयाधिकारिमण्डलेन । संस्कृतच्छात्राणां प्रोत्साहनाय सर्वकारेण संस्कृतपरी[क्षाणां] मान्यता सत्वरमेव समुद्घोषणीया । अध्ययन[द]... मपि तेषां वृत्त्यभावेन जीवननिर्वाहक्लेशा मा खलु भू[वन्] एतदर्थं सर्वकारेण छात्रावासाश्छात्रवृत्तयश्च प[र्याप्ताः] स्थापनीयाः । प्रतिभावन्तश्छात्राश्च विशेषवृत्तिभि[र्वि]शेषतः प्रोत्साहनीयाः ।

## (३) संस्कृतशिक्षकत्वायाऽयोग्यानां वरणम्

संस्कृतशिक्षायां तृतीया बाधा चेयम्, यत् संस्कृत]शिक्षकत्वायाऽयोग्यानां वरणं योग्यानां च परिहारः । ये खलु संस्कृतं सम्यग् ज्ञातुं वक्तुं लेखितुमध्यापयितुं च प्रभवन्ति, ते संस्कृतस्य गाढगाढा विद्वांसः शास्त्रिण आचार्याश्चाऽद्यत्वे संस्कृशिक्षकत्वाय अयोग्यत्वेन गण्यमाना द्वेष्या इवावहेल्यन्ते ये च संस्कृतं सम्यग् ज्ञातुमपि न प्रभवन्ति, लेखनभाषणयोस्तु ता[वद्] दूरे तिष्ठतु कथाऽपि, ते संस्कृतमादाय B. A. M. A., परीक्षोत्तीर्णाः संस्कृतशिक्षकत्वाय योग्या गण्यमानाः सादरं स्वीक्रियन्ते शिक्षाधिकारिभिः । फलतः संस्कृत—ज्ञानपरिपाकहीना अर्धविदग्धाः संस्कृतशिक्षका यदा छात्रेषु संस्कृतं मना[गपि] भाषितुमप्रभवन्तस्तान् प्रभावयितुमसमर्थास्तेषु सं[स्कृ]तविषयिणीं रुचिं नोत्पादयितुं शक्नुवन्ति, [त]दा छात्राणां संस्कृतं प्रति न हृदयमाकृष्यते, न च ते कथंचित् पाठ्यमानमपि तत् सरुचि शृण्वन्ति, [तस्य] ग्रहणधारणयोस्तु वार्तैव दूरे स्थिता । एवं शिक्षका[णा]मयोग्यत्वात् संस्कृतं कठिनं मत्वा तस्मादुद्विजमाना[ः]श्छात्राः पलायितुं प्रक्रमन्ते, अतएव येषां हाईस्कूल-कालेजानां परीक्षाः शिक्षाधिकारिणां नितरां मान[नीयाः] सन्ति, तेष्वपि संस्कृतपाठिनां संख्या न गण्या प्रति[दिनं] हीयमाना च विलोक्यते । यदा च ते अयोग्या अ...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...पाटवमप्रथयन्तो न मनागपि ...पि संस्कृताध्यापने ...तो लब्धुं पारयन्ति, तदा "राम ! लिख । श्याम ! पठ । मोहन ! सीता हसति । मनोहर ! गङ्गा वहति" एतादृशं हिन्दीकल्पं संस्कृतं पाठयन्तोऽपि ते 'संस्कृतमतिकठिनं, संस्कृतमतिकठिनम्' इत्यादि घोषयन्तः संस्कृतं मिथ्यैव कलङ्कयितुं प्रारभन्ते । यत्र दर्शनादिषु विषयसूक्ष्मत्व-गाम्भीर्यकृतं संस्कृतस्य दर्शनोचितभाषानिबद्धत्वात् काठिन्यम्, तत्तु शास्त्रस्य भूषणभूतमपरिहार्यं रसिकैर्विद्वद्भिर्हृदयेनाऽभिनन्द्य स्वीकृतम् । संस्कृतकाठिन्य-विषयको लोके प्रसृतोऽतिमात्रो घोरघोषो न दार्श-निकसंस्कृतकाठिन्यविषयकः, अपितु प्रारम्भिक-कक्षासु पाठ्यमानस्य उपरिदर्शितप्रकारस्य हिन्दी-कल्पस्य संस्कृतस्य मिथ्याकाठिन्यविषयकः । स च प्रशासनिकशिक्षाधिकारिणां नितरां माननीयैः B.A. M.A. पदवीधारिभिरयोग्यैः संस्कृतशिक्षकै-रेव स्वकीयाऽयोग्यताप्रच्छादनाय प्रचारितः सर्वथा न श्रद्धेय एव । अस्मत्पार्श्ववर्तिहाइस्कूलस्यैकेन शुद्ध-हृदयेन B. A. संस्कृतशिक्षकेण तु शिक्षाधिकारिणां समीपं स्वयं गत्वा सुस्फुटं प्रकटीकृतम्, यत्-'अन्ये B. A. संस्कृतशिक्षका लज्जया जीविकाभयेन वा माऽब्रोचन्, किन्तु अहं स्पष्टं ब्रवीमि, यत्-हाईस्कूलस्य संस्कृतं B. A. शिक्षकः कदाऽपि पाठयितुं न शक्नोति, अहं तु नैव पाठयितुं शक्नोमि, तत्कार्यं कश्चित् शास्त्री एव कर्तुं शक्नोति ।' तत्कथनोपरि-अवकाशप्राप्तोऽपि प्राक्तनतत्रत्यशास्त्रिशिक्षक एव सेवाकालं वर्धयित्वा पुनरपि तत्स्थाने न्ययुज्यत । नाऽतिप्राचीनमेतदुदाहरणं B. A. परीक्षोत्तीर्ण-संस्कृतशिक्षकाणां योग्यतानिदर्शकम् । M. A. परी-क्षोत्तीर्णस्याप्युदाहरणं गृह्यताम् । उदयपुरमण्डल-संस्कृतसाहित्यसमितेरधिवेशने यदाऽयं प्रस्ताव उपा-स्थाप्यत, यत्-'सर्वोऽपि संस्कृतज्ञः संस्कृतज्ञेन स्व-सम्बन्धिना संस्कृतेनैव व्यवहारं कुर्यात्' तदा संस्कृतस्य M. A. परीक्षां प्रथमश्रेण्यामुत्तीर्णः आंग्लकालेजस्य संस्कृतविभागे प्रतिष्ठितपदमधिष्ठित एकः सज्जनः सविनयस्मितं हिन्द्यामभाषत, यत् 'प्रस्तावोऽयमस्मा-दृशानां कृते तु अव्यावहारिकः, साम्प्रतं परिस्थित्य-नुसारेण यदि किंचिदस्मिन् नियन्त्रणं शिथलीक्रियेत, तर्हि समीचीनं स्यात् ।' तदुपरि एवपदस्थाने यथा-शक्तिपदस्य प्रस्तावे निवेशं कृत्वा कार्यस्य निर्वाहोऽ-क्रियत । अपरञ्च—परारि योधपुरनगरे सम्पन्ने राजस्थानसंस्कृतसाहित्यसम्मेलने बहुभिरेतद् दृष्टम्, यत्—जयपुरीयः कश्चिदांग्लकालेजीयसंस्कृतप्राध्या-पकः संस्कृतभाषणाय साहसं कृत्वोत्थितो मुहुः स्खल-न्नपि मिनिटद्वयमपि संस्कृते भाषितुं नाऽशक्नोत्, न च स स्ववक्तव्यमपि स्फुटं प्रकटयितुमपारयत् । अलं बहुना । संस्कृतशिक्षाक्षेत्रे वर्तमानाया महत्या बा-धाया अस्या निराकरणं प्रशासनाधिकारिभिरेव कर्तुं शक्यते । यदा हि संस्कृतप्रसारस्य ते सर्वत्रैवाऽऽव-श्यकतां मन्यन्त एव, तदा संस्कृतशिक्षाक्षेत्रे शिक्षक-त्वाय सर्वथायोग्यानां शास्त्र्याचार्याणां स्वीकरणं तैः सत्वरमाज्ञापनीयमेव । हाईस्कूलकालेजेषु शास्त्र्या-चार्याः संस्कृताध्यापनं तथा करिष्यन्ति यथा छात्राणां संस्कृते काठिन्यमरुचिकरत्वं च न मनागपि भासि-ष्यते । एतस्मिन् विश्वासाय प्रमाणमेतत् पर्याप्तं स्यात्, यत्-ये शास्त्र्याचार्या हाईस्कूलकालेजेषु संस्कृतमध्यापयन्त आसन् साम्प्रतमपि च सन्ति, ते तत्र सुयश एव लभमाना अतिष्ठन् तिष्ठन्ति च । ये महोदयाः B.A, M.A, परीक्षामुत्तीर्याऽपि योग्यता प्राप्तये विशिष्याऽपि प्रयस्यन्ति, ते संस्कृतशिक्षणस्य कार्यं योग्यतया कर्तुं शक्नुवन्ति, कुर्वन्त्येव च, तान्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सादरमभिनन्दामः तेषु नाऽस्ति नो मनागप्याक्षेपः कुर्वन्तु ते संस्कृतसेवां शरदां शतम्। किन्तु परीक्षोत्तरणस्य लक्ष्यमेवेदानीं सेवकत्वप्राप्तिर्गण्यते, न तु योग्यताप्राप्तिः, परीक्षोत्तरणं च तत्कलाकुशलानां न दुष्करमिति प्रसिद्धमेव। परीक्षोत्तरणानन्तरमेव सेवकत्वप्राप्तिरपि भवत्येव। तत्प्राप्तौ सत्यां कार्ये साफल्यं भवतु मा वाभूत्; किन्तु समयं यथा कथंचित् यापयन्त्येव। एतादृश्यां परिस्थितौ परीक्षोत्तरणानन्तरमपि सर्वे B.A, M.A, पदवीधारिणः संस्कृशिक्षकत्वयोग्यताप्राप्तये विशिष्य प्रयस्यन्तः संस्कृतस्य सफलाध्यापका भवेयुरित्यस्य संभावनैव वृथा। अत आंग्लकालेजेषु संस्कृतविशेषज्ञनिर्माणाय नियतमपि तत्पर्याप्तं संस्कृतस्य पाठ्यमधीत्य B.A, M.A, परीक्षोत्तीर्णानां संस्कृतशिक्षकत्वाय स्वीकारोऽपि निरोद्धव्यः प्रशासनाधिकारारिभिः। एवं आंग्लकालेजेषु संस्कृतविशेषज्ञशिक्षणनिर्माणाय स्थापितमपि संस्कृतपाठ्यं तदर्थमपर्याप्तमकिंचित्करं चाऽस्ति, तेन संस्कृतविशेषज्ञोऽध्यापकः कदाचिदपि न निर्मातुं शक्यते, शक्यते च। अतः संस्कृतविशेषज्ञशिक्षकनिर्माणाय स्थापितं संस्कृतविशेषाध्यापनकार्यमपि आंङ्ग्लकालेजेभ्यः पृथक् कृत्वा संस्कृतकालेजानामेवाऽधीनीकरणीयं संस्कृतहितैषिभिः प्रशासनाधिकारिभिः। आम्, संस्कृतस्य साधारणमध्यापनं तेषां सर्वेष्वपि विभागेषु उच्चोच्चकक्षापर्यन्तं स्थीयेतेति पूर्वमुक्तमेव। ननु आंग्लकालेजेषु स्थितस्य संस्कृतविशेषाध्यापनस्यैव पर्याप्तता किमर्थं न साध्येत, किं तस्य ततः पृथक्करणेन ? इति वक्तुं शक्यते, किन्तु तत्पर्याप्ततासाधनाय संस्कृतकालेजीयपाठ्यक्रमस्यैवाऽनुसरणं कर्तुमावश्यकं भविष्यति, तद्विना संस्कृतविशेषज्ञता कस्यापि साधयितुं न शक्यते, एवं चेत् तर्हि प्राच्यविविधविद्यानां विशेषाध्यापनाय स्थापिताः संस्कृतकालेजाः कार्यं कुर्वन्त एव वर्तन्ते तैश्च संस्कृतविशेषज्ञाः सिद्ध्यन्त्येव, ते च संस्कृतविशेषज्ञाः सन्तो हिन्दीगणितभूगोलेतिहासादि व्यावहारिकविषयविज्ञा अपि क्रियन्त एव, तदा तेष्वेव स्थितं संस्कृतविशेषज्ञ निर्माणकार्यं किमर्थं नाऽभिनन्द्येत? संस्कृतस्य सुयोग्याः कुशलाश्च अध्यापका. संस्कृतकालेजैरेव निष्पादयितुं शक्यन्ते, निष्पाद्यन्ते च। अतः संस्कृतविशेषज्ञ शिक्षकनिर्माणाय स्थितं संस्कृतविशेषाध्यापनकार्यं शीघ्रमेव आङ्लकालेजेभ्यः पृथक्करणीयं सर्वत्र संस्कृतसत्वरप्रसाराभिलाषिभिः प्रशासनाधिकारिभिः। सहैव संस्कृतस्य सुयोग्याः शिक्षका अपि प्राचुर्येण प्रादुर्भवितुं लगेयुः तदर्थं स्थाने स्थाने संस्कृतकालेजाः स्थापनीयाः, स्थापिता वर्तमानाश्च ते विविधसाधनैः सम्पन्नाः करणीयाः। तेषां व्यवस्थापनार्थं च विश्वविद्यालयेषु संस्कृतस्य विभागः (faculties) उद्घाटनीयः—सर्वकारेण। एवं जाते सति संस्कृतशिक्षायां वर्तमाना एका महती बाधा निराकृता स्यात्। प्राप्तेषु च सुयोग्येषु शिक्षकेषु न कदापि संस्कृतस्य मिथ्या काठिन्यं बालानां हृदयमारोक्ष्यति न च ते कदाऽपि अरुचिं प्रकटयन्तः संस्कृताद् दूरं भविष्यन्ति, प्रत्युत ते तत् सरुचि साग्रहं च ग्रहीष्यन्ति।

क्रमशः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# पन्नाधात्री

लेखकः—महोपाध्यायपं० वासुदेवशास्त्री बागेवाडीकर साहित्याचार्यः काव्य-वेद-तर्क-तीर्थः शोलापुरम्

"ना विष्णुः पृथिवीपतिः" इति वचनं प्रमाणीकृत्य भारतीया राजाज्ञामुल्लघयितुं न कदापि मनसापि मन्वते। तदुल्लंघनमिह परत्रापि च श्रेयः प्रतिबध्नाति इति तेषां निश्चिता मतिः। "सापवादा हि नियमाः" इति न्यायेनेतिहासे कानिचिदन्यथोदाहरणान्यपि दृश्यन्ते। दुराचाररताः प्रजापीडनपराः केचिद् वेननृपसमा राजानः स्वधर्मनिरतानां प्रजानां पीडनजेन कोपाग्निना दग्धाः। क्वचित् सद्गुणशालिनामपि चित्तं दुर्गुणाः प्रविशन्ति। सुधियोऽपि कदाचिद् दुर्धीत्वं प्राप्नुवन्ति। अभिजनवन्तोऽप्यनभिजनाचारैराकुलीभवन्ति। महोदाराणामपि मनांस्यनुदारतां भजन्ते। विवेकिनोऽप्यविवेकिनो भवन्ति। अद्वितीयेन धर्माभिमानेनालौकिकेन देशप्रेम्णाऽसाधारणेन शौर्यगुणेन स्वधर्मं स्वदेशं स्वकुलं च विभूषयमाणा नैकेऽभिजाता यत्र कुले सञ्जातास्तत्रैव धर्मद्रोहिणो देशविध्वंसकाः कुलकलङ्का अनभिजाता जायन्ते।

एवमेव सुगृहीतनाम्नि शिसोदीयकुले धन्यतमे संग्रामसिंहस्य क्षात्रकुलावतंसस्य पुत्रो विक्रमजित् समुत्पन्नः। स चानेकानि दुःखान्यनुभूय सिंहासनमधिष्ठितः। परमचिरेणैव स स्वच्छन्दचारी निर्दयो विवेकहीनो मदान्धश्च भवत्। स भृशं प्रजाः पीडयाञ्चक्रे। भूयिष्ठान् सत्यवादिनोऽवजज्ञे। हितवादिनोऽपमानितवानभेने। भूयशः सामान्तान् वीरांश्चाधिचिक्षेप। एकदा स राजसभायां पितुर्मित्रं हितमतिमुपदिशन्तं करमचन्दनामानं न्यक्कारपूर्वकं परुषतरं वचनमुक्त्वा हन्तुमुपाधावत्। अनेन सभोपस्थायिनः सर्वेऽपि शूरधीराः क्षत्रियकेसरिणः सामन्ताः वीरपुरुषाश्च प्रतिकर्तुं सावेगमुत्तस्थुः। ततः कर्णसिंहो नाम सामन्तस्तान् वीरान् सावेगान् कथमपि सन्नियम्य प्रोच्चैरब्रूत—"भो भोः क्षत्रियोत्तमा वीराः, अद्ययावदस्माभिर्यच्छ्रुतं दृष्टं तदधुना स्वयमनुभूतम्। इदानीं सोढुमसमर्थाः। तन्नूनमस्य प्रतिकारोपायं पर्यालोचयामः" इति वदन्नेव निखिलैः शूरैः समं सभाया झटिति निर्गतः।

अथ रायमल्लस्य महाराजस्य पृथ्वीराजो नाम कुमार आसीत्। तस्योपपत्न्यां वनवीरो नाम सुतो जातः। राजसिंहासनाधिष्ठितं मदान्धं विवेकशून्यमन्यायवर्तिनं बिक्रमजितं राजसिंहासनाद् भ्रंशयित्वा तस्य वनवीरस्य राज्ये प्रस्थापनंससामन्ताः प्रजा निरूपयामासुः। तदनु वनवीरं गत्वा स्वाभिप्रायं तस्मै निवेदयामासुः। राजसिंहासनाधिष्ठितं राजानं राजपदाच्च्यावयित्वा तत्रात्मनोऽधिष्ठानमनर्हमिति मत्वा स प्रथमं तन्नानुमेने। परं ताः प्रजाः सांप्रतं संग्रामसिंहस्य द्वितीयकुमारस्य यौवनान्तं राजसिंहासनमेतदङ्गीकर्तुं ते नासाम्प्रतमिति प्रत्यायितवत्यस्तदा स पश्चात्तदन्वमंस्त। ततो वनवीरो राजसिंहासनमधिष्ठितो विक्रमजिच्च कारागारम्।

महाराजस्य संग्रामसिंहस्य द्वितीयकुमार उदयसिंहस्तदा शिशुरासीत्। वनवीरस्य सिंहासनाधिष्ठानं तद्यौवनावधि। पूर्वं पापभीरुर्वनवीरो राज्याधिगमानन्तरं राज्यं शाश्वतिकमभिलष्य बालकुमारमुदयसिंहं बन्दिनं च विक्रमजितं हत्वा निष्कण्टकं राज्यं विधा-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



तुमैच्छत्। स्वाभिलाषवशाद् विहितायोजनः स कुमति-विक्रमजितं कारागारनिवासिनं निहत्यानागसं भाविनं बालनृपमुदयसिंहं निषूदयितुमन्तः पुरमभ्यागमत्।

अथ स्वामिनिष्ठा धात्री पन्ना कुमारं भोजयित्वा मृदुलायां शय्यायां शाययन्ती शयनगीतं गायन्ती प्रेम्णा-तं चानुनयन्ती आसीत्। अत्रान्तरेऽवरोधजनानामाक्रोशध्वनिस्तस्याः श्रवणसरणिमापन्नः। तेन क्रन्दन-ध्वनिना समुपजातकुतूहलायास्तस्याः पुरतो राजकुमार-स्याङ्गसेवकः संभ्रान्तचित्तः ससंभ्रमं समुपस्थितोऽब्र-वीत्—"हा धिक् कष्टम्। महाननर्थः समुपस्थितः। शाश्वतं राजपदं काङ्क्षमाणो महाराजो वनवीरो महा-राजं कारावासिन विक्रमजितं यमालयमभिगमय्य राजकुमारं हन्तुमित एवागच्छति। का गतिः। किमधुना विधेयम्। परित्रायतां परित्रायतां बाल-राजस्य जीवितम्" इत्युचै राक्रोशत्।

एवमुक्त्वा विरतवचसि तस्मिन् स्वामिनिष्ठा स्वधर्मपालनपरा राष्ट्रोद्धारणपरायणा सा धात्री राज-कुमारमुत्थाप्य तस्य वसनानि प्रवराणि भूषणानि च तदङ्गादवतार्य तानि समानवयसं स्वसुतं पर्यधापयत्। बालराजं च विस्तीर्णे पर्णस्तीर्णे फलपुष्पकरण्डके शाययित्वा निगूढं निगूढवर्त्मना तेनैव परिचारकेण साकं राजमन्दिरात् सुदूरं निरसारयत्।

निर्गतमात्र एव तस्मिन् सेवके कुमारं जिघांस-मानो दुर्मतिर्वनवीरस्तदागारं प्राविशत्। राजमञ्चके तया शिशुगीतं गायन्त्या मातृकया शाययमानं तत्-कुमारं राजकुमारं मन्यमानः सदाशयाया असदाशयः साश्रुनयनं निवारयन्त्यास्तस्याः स तं निशितेन खड्गेन वक्षसि प्राहरत् पञ्चत्वं च प्रापयत्। "नीचो हि श्लाघ्यपदं नार्हति" इत्येतदभियुक्तवचनं सर्वथा-वितथम्। अनेन सर्वमप्यन्तःपुरं महति शोकसा-रेऽमज्जत्। इत्थं साऽङ्कपाली प्रेष्ठान् स्वसुतप्राणान्- यित्वा राजपुत्रस्यासूनपात्। सुतवात्सल्याद्धि स्वामि-भक्तिर्गरीयसी। स्वनन्दननिधनं स्वीकृत्य स्वामि-नन्दनो जीवितसंशयान्मोचित इत्यनन्दत् सा। धन्याः खलु ते स्वामिभक्ताः सेवका ये महान्तमपि दुःखभार-मुररीकृत्य सुखं राजानं सेवन्ते। सा दुःखस्य परां काष्ठां सोढवती। न कयाऽपीदृग् दुःखमनुभूत-स्वेच्छया। विगत जीवितंतं कुमारकायमग्निसात्कृत्य साऽऽशु ततः प्रतस्थे। तस्मिन्नेव घनान्धकारे निशि एकाकिनी सा दुर्गमं वन प्रविश्य सङ्केतितस्थलं ज-पवनसमेन प्रापत्। तत्र च सुकुमारं कुमारं सुरक्षित-मसुरक्षितं विलोक्य सुतरामहृष्यत्।

ततोऽसुसंशयं निःसंशयं तं बालराजं वीरस्य पुत्रः सिंहराजोऽपायात् पायादिति संभाव्य सा प्राप्य सर्वमुदन्तजातमाख्याय तस्मै, तं च कुमार-प्राणत्राणमयाचत। सिंहराजो वनवीरजन्म-भीतभीतः स्वप्राणसंशयं शङ्कमानः कुमाररक्षणेऽस-सञ्जातः। अबलाऽपि सबला सा प्रबलया स्वा-भक्त्या सेवकद्वितीया तदनन्तरं तं कुमारं गृहीत्वा रावलकुलजं यशःकर्णं समागमत्। सोऽपि यशः-आकर्णनमात्र एव भयोद्विग्नमनाः कुमाररक्षण-क्षणं मेने। सा सती असम्पन्नमनोरथा स्वं संप्रति मनोरथं कथञ्चिदपि त्यक्तुं मनसाऽपि नाकरोत्। एवं कुमाररक्षणं याचमाना तत्र तत्र भ्रमन्ती मार्गेऽरातिभयं शङ्कमाना शिसोदीयकुलस्य सम्मा-मरुदेशस्य च रक्षणार्थं नैकशः नैकविधं सा-कृतवतो मरुस्थलनिवासिनः पुलिन्दवर्गस्य सा-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...वती। अन्ते तेनैव सहायभूतेन निबिडेन दुर्गमार्गेण सञ्चरमाणा कमलमेरं नाम दुर्गं प्राप। तस्य दुर्गस्याधिपतिर्जिनानुयायी राजपूत आशाशाहः संदानार्थं तया याचितः। तेनानुज्ञाता सा राजमन्दिरं प्रविष्टमात्रैवाशाशाहस्योत्सङ्गे राजकुमारं निधाय निवेद्य च स्वोदन्तं सकलं तमुक्तवती "वीर, एनं कुमारं स्वकुमारमिवावेक्षस्व।" इति। श्रुतमात्र एवाशाशाहो भयाक्रान्तस्तं स्वाङ्कादवतारयितुं यावत् प्रवृत्तस्तावत् स्वजनन्या सावेगमेवं प्रतिषिद्धः। "जात, राष्ट्रहितैषिणः पुरुषाः सङ्कटभयान्न कदापि स्वकर्तव्याद् विचलन्ति। दिवंगतस्य महाराजस्य समरसिंहस्य बालः पुत्रोऽयं भाव्यस्मद्राष्ट्रस्वामी। स चाधुनाऽऽश्रयार्थी। भजमानमेनं बालमनुगृह्य भगवत्कृपापात्रं भव। क्षत्रिया भजमानान् रिपूनप्यनुगृह्णन्ति। कर्तव्यच्युतिर्नूनं श्रेयः प्रतिबध्नाति' इति। एवं मात्रोपदिष्टः स सपदि तस्यै राजकुमाररक्षणं प्रत्यशृणोत्। अनेन प्रतिश्रवेण निश्चिन्ता साऽऽत्मनस्तत्रावस्थानं स्वकार्यविघातकं मत्वा तेनैव सेवकेन समं निर्ययौ।

अथ नवागतोऽयं कुमार आशाशाहस्य भ्रातृव्य इति सर्वत्र लोके सञ्चारितः प्रवादः। एवं प्रारतोऽन्यतया धन्यतमः कुमारो निगूढस्तत्र ववृधे। कालेनाहितशिक्षः स सर्वासु विद्यासु नैपुण्यं प्राप। आत्मनो नैसर्गिकेण गुणजातेन सोऽचिरादेव सर्वेषां ...ः श्रेष्ठश्च जातः। ये ये मान्यवराः सामन्तप्रमुखा अतिथयस्तत्र संप्राप्तास्ते ते तस्य कुमारस्य रूपेणापरेण सर्वातिशायिना गुणसमूहेन च सविस्मयाः साशङ्काश्च बभूवुः। "वीरशार्दूलस्य संग्रामसिंहमहाराजस्य जीवितसंशयान्मुक्तोऽयं राजकुमारः स्यान्न आशाशाहस्य भ्रातृव्यः" इति सकलाः ससामन्ता राजपूतवीराः बलवच्छङ्कन्ते स्म। चण्डवंशजः शालुम्बाधिपः, कैलवाडाधीशः अन्ये च चन्दावतचोहानपमारादिकुलजा बहवः सामन्ताः क्षत्रियोत्तमाश्चैतया शङ्कया प्रमुदिताश्चेतसि केनापि निमित्तेन कमलमेरं संप्राप्ताः। तत्र च महती राजसभा प्रावर्तत। तस्यां राजसभायां निवेदितसकलवृत्तान्त आशाशाहः पूर्वमेव विदितवृत्तान्ताय ज्येष्ठाय चोहानाधिपतये तराजकुमारं समर्पितवान्। अत्रान्तरे राजकुमारस्योदयसिंहस्य संरक्षकदेवतेव पन्नाधात्री सहसा तस्यां राजसभायां समुपस्थिता। स्वपुत्रस्य प्राणप्रदानेन रक्षितराजकुमारप्राणां तां रोमहर्षणां तस्याः कथां श्रुत्वा सा सभा प्रथममेवाहितादरा संप्रति सविशेषादरा तां धन्यतमां धात्रीमभिवादयाञ्चक्रे। विनष्टं राजकुमारं प्राप्य सर्वेऽप्याबालवृद्धाः सस्त्रीका जनाः सञ्जहृषुः। "विजयतां श्रीमानुदयसिंहो मरुदेशाधिपतिर्महाराजः" इति सानन्दमुद्घोषयामासुः। तस्य च भालप्रदेशे राजतिलकं समर्पयामासुः। ततोऽचिरेणैव कालेन शोनदुर्गाधिपतेः राजकन्यया समं कुमारस्य परिणयोऽपि महता संभारेण संपादितः।

अनेन निखिलेनोदन्तेन भीतोऽपि वनवीरो राज्यलोभं न जहौ। तदनुरोधात् सः अनुकूलवर्तित्वं प्रदर्शयन्तमेकतमं मन्त्रिणं युद्धसन्नाहमादिदेश। तेनैव व्याजेन स मन्त्री तस्मिन् दुर्गे सहस्रं वीरोत्तमान् राजनिष्ठान् सैनिकान् संयोजयामास। प्रविष्टमात्रास्ते सर्वप्रथमं वनवीरस्यानुकूलान् रक्षापुरुषान् निजगृहुः। ततश्चारिहिंसां विनापि सपरिवार उदयसिंहो दुर्गं प्रविष्टः। तदनु वनवीरस्य पश्यतोऽपि तत्र दुर्गे तस्य च विजयपताकाऽऽरोपिता जयदुन्दुभिश्चाहतः।

अथ चित्रदुर्गं उदयसिंहभानोरुदयेन निखिला जनाः प्रमुदिताः। यस्याः स्वपुत्रवात्सल्यातिशायिना कुमारवात्सल्येनायमुदयस्योदयो दृष्टः सा सामान्याप्यसामान्या धात्री महाराजं महत्याऽऽशिषाऽनुजग्राह। क्रोडे धृत्वा चाश्रुभिः प्रेम्णा स्नपयामास।

——



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# उद्बोधनम्

लेखकः—केदारनाथमिश्रः, लखनऊ

त्रायस्व ह्रासमुपयान्तमिमं स्वधर्मं,
मातुर्निजस्य मुखमुज्ज्वलयाशु भूयः।
विद्वन्! यशांसि समुदञ्चय चार्यजातेः,
देशस्य चास्य गतगौरवमानयस्व॥

यदि वयं नवमिमं भारतं स्वसंस्कृति-सभ्यता-सरणौ सञ्चालयितुकामास्तदा नूनमेवाऽस्माभिः नवयुगीयव्यवहारे पदार्पणं विधाय, अभ्यसनीय इतिहासः स्वसंस्कृतेः संस्कृतस्य च। वर्द्धनीयाऽस्माकं भाषणशक्तिः लेखनशक्तिश्च, समद्ध'नीयं स्वशास्त्रज्ञानमिति किन्तु पठामो वयं केवलं प्राचीनं शास्त्रं, घोषयामो वयं शुष्कव्याकरणफक्किकाम् न वयं जानीमो युगधर्ममाधुनिकं, न वयं पतितो द्दष्टि-दानचतुराः। केवलम् रथसंलग्नतुरङ्गा इव स्वसरणावेवैकदृष्टिपातिनः इति दृष्ट्वा हन्त! सन्ततमपि नितान्तमेव खिद्यते—अशान्तं भूत्वा मामकीनं स्वान्तम्।

न जाने कुत्र कोणे निलीनाः सन्ति साम्प्रतमस्माकं धर्माचार्याः, धर्मगुरवः, धर्मनेतारो, विद्वान्सश्च। साम्प्रतमापत्तिकाले भारतीयैः पण्डितैः राजनीतिसूत्रं स्वमतेन सञ्चालयद्भिः संरक्षणीया विविधि-वादव्याकुला, अन्तःशत्रुभिः स्वार्थसाधनपरायणैः रक्षकैरेव भक्षिता, किंकर्तव्यविमूढा भारतीया जनता, भारतीया संस्कृतिः। भारतीयं गौरवं वैभवं च संरक्षणीयमिति।

चाणक्य! कथं नाद्य समुत्पद्यसे? सायण! माधव! अवतर। मातः! समुत्पादय द्रोणसदृशान् संस्कृतपण्डितान्।

अयि विद्वान्सः! त्यजत शुष्क-वादेषु रक्त-शोषणम्। दूरीकुरुत प्रौढ़-पाण्डित्य-लोभम्। पठत राजनीति-शास्त्रम्। धारयत धर्मधुराम्। भारतस्य नवनिर्माणे पाण्डित्यं प्रकटीकुरुत। हिंदूनाम् संग्रन्थने च बुद्धिव्ययं कुरुत। भारतशत्रूणामनार्याणां निर्मूलने बुद्धि-वैभवं प्रदर्शयत। विशालभारतस्य पुनः प्रा... प्रयत्नमाचरत।

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः"॥

इति मनोराज्ञां निखिलेऽपि भूमण्डले प्रचारयन्तो निश्शङ्का भूत्वा विदेशेषु भारतीयां विजयवैजयन्तीम् आन्दोलयत।

अयि संस्कृत-शिक्षार्थिनः। साम्प्रतमपि-समयो वशिष्यते भवतां कृते। अधुनापि पैत्रिकं नेतृत्वं परिगृह्य, संकोचम, आलस्यम्, विषादम, अनौदार्यं परित्यज्य भारतीय संस्कृतेः हिन्दूजातेः, आर्यधर्मस्य च, न केवलं संरक्षणाय प्रत्युत निखिलेऽपि भूमण्डले पुनः प्रचाराय प्रयताः भवत! सन्नह्यत! उत्तिष्ठत! आगच्छन्तु बहिः। स्वागतं कर्तुं प्रतीक्षते लोको भवतः।

साम्प्रतं केवलं विरोधेन, निन्दया व्यर्थवाग्वादेन गालिप्रदानेन (शासकादिभ्यो) वा किमपि कार्यं न सेत्स्यति। अधुना तु स्वीयं महल्लक्ष्यं निर्धार्य, कार्य-क्षेत्रे सोत्साहं समवतीर्य, किमपि क्रियात्मकं गतिशीलं च कार्यस्वरूपं निर्द्धारणीयम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संगफलम्

ले॰ स्वामी लक्ष्मणशास्त्री, संस्कृतविद्यालयाध्यक्षः, नागौर ( राजस्थान )

माता चैका पिता चैक, एके स्वजनबान्धवाः ।
अहं तु मुनिना नीतः, स च नीतो गवाशिना ।१।

एतत्पद्यविषये श्रूयते, यत् पुरा बभूव विष्णुदत्तो नाम कोऽपि मुनिः। स वने कृतवसतिस्तपः कुरुते स्म। तस्य कदाचित् तीर्थयात्रां कर्तुमिच्छा जाता। स स्वाश्रमात् प्रस्थाय तीर्थेषु पर्यटन्, एकदा कस्मिंश्चिन्निर्जने वने, आससादैकं स्थानम्। स्थानेऽस्मिन् न कोऽपि जनस्तदानीमासीत्। केवलं तत्रैकः शुक एव पञ्जराभ्यन्तर्गतोऽभूत्।

आश्रमस्याभ्यन्तरे समुपायान्तं तं मुनिं निरीक्ष्य कोपेन भर्त्सयन्निव चिरचिरशब्दं कुर्वाणः स शुकोऽवदत्—

'अरे कोऽसि त्वम्? कुतस्त्वं शून्येऽस्मिन् स्थाने निर्विशङ्कं प्रविशसि? व्यक्तं त्वं तस्करोऽसि? त्वरितमितोऽपसर। न चेदहं त्वां ताडयिष्ये। नूनं त्वं धृष्टो बधिरो वासि। यतस्त्वं वर्जितोऽपि, अशृण्वन्निव समुपसर्पसि।'

इति भृशं तिरस्कृतः स मुनिस्त्वरितं तत्स्थानान्निष्क्रम्य नातिदूरवर्त्तिनं अन्यं कमपि रम्यमाश्रमं प्राविशत्। स आश्रमोऽपि तदानीं शून्य एवासीत्। तत्रापि केवलं, एकः शुक एव पञ्जराभ्यन्तर्गत आसीत्। आश्रमे समुपायान्तमतिथिवरं तं मुनिं दृष्ट्वा स शुको दूरादेव स्वदक्षिणचरणेन प्रणतिं कुर्वाणो मधुरवाण्याभणत्—

'भगवन्तः! भवतां स्वागतम्। आस्तृतेऽस्मिन् वृष्यासने सुखं समुपविश्यताम्! इदं मधुरं शीतलं च जलं पीयताम्। इमानि सुमधुराणि फलमूलानि यथेष्टमास्वाद्यन्ताम्! मार्गश्रमेण नूनं भवन्तः परिश्रान्ता अनुमीयन्ते। क्षणं विश्रम्यताम्। सूर्यस्तीव्रतरं तपति। समयश्चेत् किञ्चित् निद्रासुखमप्यनुभूयताम्। भवद्भिरत्रागत्यायमाश्रमः पवित्रीकृतः। धन्या वयम्। यद् भवतां दर्शनमधिगतम्। कुत्रास्ति भवतामाश्रमः? भवतामाश्रमे सर्वे कुशलिनः कच्चित्? भवन्तः साम्प्रतं नीरुजः सन्ति स्वित्? वयमाशास्महे जगदीश्वरो

---

कालोऽस्ति नायं शयनस्य मान्या!
विबुध्य लोकानपि बोधयध्वम्।
धर्मं स्वकीयं समुपासयन्तः!
स्वां देशभूमिं सुसमुन्नयध्वम् ॥

अस्तु। अद्य चिरादासतापाशबद्धं विशृङ्खलसमाजम्, वैदेशिकैश्छिन्नबन्धनम शिथिलतरं-जीर्णशीर्णं च भारतम्, दैववशाद्वा कूटनीतिविलासाद्वा, देशसेवकानाम् कठिनतरतपश्चर्यया वा युद्धोत्तरकालीनशैथिल्येन वा, अन्तर्राष्ट्रीयपरिस्थित्या वा, भारतीयानां भाग्येन वा, दुर्दान्तांग्लशासनाद्विगलितां स्वाधीनतां प्राप्तं, स्वतन्त्रराष्ट्राणां पङ्क्तौ समुपस्थितं च पश्यामः। वयमाशास्महे यदस्माकं प्रसुप्ता प्रतिभा प्रबुध्य प्राचीनगौरवानुरूपं जगतः सर्वतोमुखं ज्ञानभाण्डारं पुनः पूरयिष्यति इति।

किमधिकं बुद्धिमद्वर्य्येषु?



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भवतां सततमनामयं विधेयात्। किञ्च भवन्तो यद्-र्थमत्रागताः, गुह्यं न चेत्तत्कार्यं ब्रूत, यथाशक्यं वयं तत्कार्यं कर्त्तुम्प्रयतिष्यामहे।'

एवं तस्य शुकस्य सत्कृतिपूर्विकां मधुरतरां वाणीं निशम्य पूर्वदृष्टस्थाने तु तत्सदृशस्यैव शुकस्य कर्ण-कठोरां वाणीं तिरस्कृतिं च संस्मृत्य विस्मितश्चकितश्च स मुनिस्तं शुकं बभाषे—

'शुक! किं कारणम्? भवान् मेऽदृष्टपूर्वां सत्कृतिं कृतवान्। पूर्वस्थाने स्थितस्त्वया सदृश एवैकः शुको मम बहुधापमानं विदधे। एतद् रहस्यं विदितं चेन्मह्यं ब्रूहि। जात्या वर्णेन आकृत्यादिभिश्च समानयो-र्युवयोः स्वभावे वृत्तौ चाकाशपातालयोरिव महत्तम-मिदमन्तरं कुतोऽस्ति? मम चेतसि विषयेऽस्मिन्-महत् कौतूहलं वरिवर्त्ति।'

एवं तस्य मुनेर्वचनं श्रुत्वा स शुकस्तं मुनिं प्रत्य-वोचत्—

भगवन्! श्रूयताम्! भवद्भिः पूर्वस्थाने दृष्टः शुकोऽहं च सहजौ भ्रातरौ स्वः। आवयोर्मातापितरौ वनेऽस्मिन्नेवैकस्य न्यग्रोधपादपस्य शाखायां चिरा-न्निवसतः स्म। दुर्दैवयोगाज्जातमात्रयोरेवावयोर्माता-पितरौ मृतौ। एतावताप्यसन्तुष्टो विधिरावयोः सह-वासमनिच्छन्निवाऽऽवां परस्परं वियुक्तौ चक्रे।

इतस्ततो भ्राम्यन्नहमेतदाश्रमाधिपतिना दयालुना मुनिना गृहीत्वा स्वाश्रमे समानीतः। पञ्जरे निवेश्य पुत्रनिर्विशेषं पालितः शिक्षितश्चास्मि। महात्मनां मुनीनामनवरतं सङ्गतिकरणादहं सुस्वभावः समा-गतानामतिथिजनानां च सत्कृत्यादिकरणे प्रवीणोऽ-भवम्।

यो भवद्भिः पूर्वस्थाने दृष्टः स मदीयः सहजः भ्राता तु केनचित् तत्स्थाननिवासिना गवाशिना (गोमांसभक्षकेण चाण्डालेन) निगृहीतः। स्वस्थाने नीत्वा पालितश्च। दुरात्मनां गवाशिनां सततं सङ्गतिकरणादतिनृशंसस्वभावः स्वस्थाने समागत-जनानां च तिरस्कृत्यादिकरणेऽतिनिपुणोऽभवत्सः।

आवयोः पिताप्येकः। माताप्येका। स्वजनश्चान्य-वाश्चैक एव। आवयोः स्वभावे वृत्तौ च यन्महद् वैषम्यं समापतितम्। तत् केवलं सङ्गतेरेव फलम्। सङ्गप्रभावोऽति बलीयान्। सङ्गप्रभावेण पक्षिणः पशवश्चापि नचिराद् विकृतप्रकृतयो भवन्ति, किमु पुनर्मानवाः।

इदं नात्यद्भुतम्, यद् दुष्टसङ्गत्या सुजनो दुर्जनो जायते। दुर्जनोऽपि सततं सत्सङ्गत्या सुजनो भवत्येव।

एवं तस्य शुकस्य वचनं निशम्य निरस्तसर्व-संशयः स मुनिः तं शुकमनुमन्य तस्मादाश्रमा-न्निष्क्रम्य च यथेष्टं प्रययौ।

## वर्तमानसमयः

सर्वत्रोद्गतकन्दला वसुमती वृद्धिर्जलानां परा
जातं निष्कमलं जगत्सुमलिनैर्लब्धा घनैरुन्नतिः।
सर्पन्ति प्रतिमन्दिरं द्विरसनाः संत्यक्तमार्गो जनो
वर्षाणां च कलेश्च संप्रति जगत्येकैव राज्यस्थितिः॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# श्रमिक-पक्षवादः

ले० प्रो० सत्यदेव वर्मा, अमृतसर

अयं श्रेष्ठिबन्धो ! श्रमस्यापमानः,
समक्षं वताद्दणोः श्रमी तप्यमानः,
श्रमाजीविनो हा हृतः स्वाभिमानः,
प्रबुद्धा दया न श्रमी तप्यमानः ।

मनोवाक्क्रियाभिर्न किं सेवते त्वाम्,
प्रविस्मृत्य शान्ति तु काम्यामयं स्वाम्,
ततोऽप्यस्ति नो हा समवृत्तिदानः ।। समक्षं० ।।

स्थिरा न व्यवस्था तु वासस्य यावत्,
कथं वीतचिन्तो हि तिष्ठेत्तु तावत्,
हिमग्रीष्मवर्षासु दोदूयमानः ।। समक्षं० ।।

न निर्वाहयोग्यापि वा दक्षिणाऽस्य,
सदाऽभावकीलैधते दुःखितस्य,
न पर्याप्तमन्नं च वासो वसानः ।। समक्षं० ।।

रुजा रुग्ण एषोऽस्य कौटुम्बिका वा,
लभेरन् चिकित्सासु सौख्यं कुतो हा,
रुजाऽऽवर्त्तनैरेति कष्टैकगानः ।। समक्षं० ।।

सुशिक्षां शिशुभ्यो न दातुं समर्थः,
यतोऽज्ञ ननाशनमेषोऽप्यनर्थः,
ततश्चिन्तयाऽप्यति विमनायमानः ।। समक्षं० ।।

न दानस्य ते भोः सुयोग्ये नियोगः,
पतत्रिश्वधूर्त्तैर्हि तस्योपभोगः,
न पापार्जनः स्या नरत्वाऽवधानः ।। समक्षं० ।।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# मृग-मरीचिका

ले० प्रेमशंकरमिश्रः, साहित्य-शास्त्री, विशारदः

जगत्प्रसिद्धो धारानरेशः विक्रमादित्यस्याग्रजो भर्तृहरिरेकदा सभामण्डपमध्यास्ते स्म, तदानीमेव द्वारपालेनागत्य निवेदितं—देव ! पाण्डुजटाधरो वल्कलपरिधान एकस्तपस्वी द्वारदेशमध्यास्ते देवदर्शनोत्सुकः, तदत्र देवः प्रमाणम् ।

सत्वरमेव तं प्रवेशयेति नरपतिनादिष्टो द्वारपालो मुनिं सभायां प्रापयत् । स च समागत्य शुभाशिषा नरपतिमभ्यर्च्य निजगाद—"राजन् ! त्वद्देशनिवासी विप्रोऽहं महता तपसा देवद्वारा फलमेकं प्राप्तवानस्मि यत्प्रभावतो विगतजरामृत्युर्भवति जनो, न च निरीहस्य मे आयुषा प्रयोजनम् । भवता चिरं प्रजाः पालिता भविष्यन्तीत्येव मेऽन्तःकरणसौख्यम् । तथा सकलवस्तुरत्नानां भवान् रत्नाकर इव समाश्रयः । तदेतत्फलग्रहणेन मच्चित्तं विशल्यं विधेहि ।

राजापि विहितयथोचितपूजाकार्यः शिरसा प्रणम्य फलं प्रतिजग्राह समचिन्तयच्च मनसि-"विजितजरामृत्युनापि मया प्रियायां दुःखितायां, सौख्यं दुरवापं तदेतत्फलं स्वप्राणेश्वर्या हस्तगतं करोमि ।'

यथाहि कर्पूरो दग्धो धत्ते प्रभावातिशयं तथा शिवलोचनेन भस्मावशेषोऽपि पुष्पधन्वा प्रभावाधिक्यमाप्तः, यत्प्रभावप्रभावितो महानपि निमील्य चक्षुषी निःशङ्कमकार्ये प्रवर्तते । राजपत्न्या अपि जाराभिलाषित्वं कः संभावयति नाम, परन्तु न किमपि पारे सामर्थ्यं तत्रभवतः कुसुमायुधस्य । नृपप्रिया स्वजारस्य अक्षययौवनजीवनाभिलाषिणी तत्फलं जाराय दत्तवती ।

गोपबालकहस्तगतो मणिः प्रस्तरखण्डमि[...] रिच्यते यदमरताऽक्षययौवनप्रदंफलं लब्ध्वापि जार[...] फलं वेश्यायै ददौ । यद्वा स्नेहोऽत्रापराध्यति न विवे[...] कथनस्येदं तात्पर्यं यत्तत्फलं वेश्याहस्ते समागत[...] वारनारी तत्फलं समवाप्य चिन्तितवती, यदनेन फ[...] राजानं संभावयामि । मदनुरागपात्रं नरपतिः प्रचुर[...] राज्यासने स्थित्वा धर्मयुक्तेन मार्गेण प्रजाः पा[...] ष्यतीतः परं मद्धृदयसौख्यदं किं भवेत् । तद्युक्त[...] फलस्य मत्कृतोपभोगः । एवं विचार्य सा रूपाजी[...] तत्फलं गृहीत्वा राज्ञे निवेदितवती ।

तत्फलं दृष्ट्वा राजा चिन्तितवान्यदेतादृशं[...] फलमनतिचिरकालात्पूर्वं मया तपस्विविप्रतो लब्धम[...] सीत् । तत्किं तदेवैतत्फलं द्वितीयं वा । नूनं तदेव [...] यतो नहीदृशानां रत्नानां सर्वत्र पदेपदे लाभः संभव[...] परन्तु प्रियायै दत्तं फलं कथमत्रागच्छेत् ।

राजा तत्फलं प्रतिगृह्य सचिन्तोऽधिभवनं ग[...] प्रियां पृष्टवान् कुत्र तन्मत्प्रदत्तममरफलम् ? सा न[...] विवर्णवदना भयकम्पवेपिताङ्गी स्विन्नदेहा कि[...] वक्तुं नापारयत् । तदवस्थां तामवलोक्य राजा प्रभू[...] चिन्ताभरः फलस्य स्वसमीपागमनं विचारितवा[...] समाहूय वेश्यां फलं कथं त्वया समवाप्तमिति पृ[...] वान् । तन्मुखतो फलप्राप्तिवृत्तं श्रुत्वा तथा विचा[...] विधाय राजा स्वप्रियायाश्चारित्र्यदूषणं निश्चिकाय [...] तदा नरपतिर्वेपमानहृदयः स्वकीयान्तरे विचार[...] मास—अखण्डानन्दज्ञानसत्तावतोऽविद्याकल्पितावर[...] रणोऽपि जीवः सर्वदा भौतिकसुखाय यतते, न [...]



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नवयुगसाहित्यम्—

# "विचित्रो विच्छेदः"

ले० देवर्षिभट्टकलानाथशास्त्री, साहित्याचार्यः, B. A.

## मिश्रदेशसम्राजः शाहकारूकस्य मस्तिष्कमातङ्कितम्

धर्मप्राणे अस्माकं भारतवर्षेऽपि विवाहविच्छेद- (तलाक) स्य वैधानिकं समर्थनं स्यादिति शासनाधिकारिणः, अस्माभिर्निर्वाचिता अस्माकं प्रतिनिधयश्च वाञ्छन्ति। अतएव गृहमन्त्रिणः श्रीकाटजोर्विशेषेणाग्रहेण संसदि 'विशेषविवाहविधेयकम्" (स्पेशल मैरिज-बिल) स्थाप्यते पार्यते च। भगवतो वैश्वानरस्य साक्षित्वे जायमानस्य स्त्रीपुरुषयोः शाश्वतसम्बन्धस्य (यस्य विधानं जन्मजन्मान्तरजनितसंस्कारपरवशमस्माभिः भारतीयैः मन्यते) विच्छेदः साधारणे दम्पतिकलहे सति शीघ्रमेव स्यादित्यधुना विधानान्तर्गतं भविष्यति! पाश्चात्येषु देशेषु यत्र विवाहविच्छेदः विधानेनानुमतः, यत्र न्यायालयेषु विवाहो भवति, न्यायालय एव च विच्छिद्यते—यत्र महिला स्वजीवने मया कति विवाहाः कृता इत्यपि न स्मरति, तत्र विवाहस्य, दाम्पत्यस्य चाद्य किमपि महत्त्वं नावशिष्टम्। एकस्यामेरिकनलेखकस्य मते पत्नी धूमवर्तिकापुटकम् (सिगरेट टिन) अस्ति। यथा यदा सर्वा अपि धूमवर्तिकाः समाप्यन्ते, तदा वयं तत् पुटकं परिहृत्यापरं क्रीणामः, तथैव एकस्यां पत्न्यां यदा रुचिः समाप्यते तदा वयमपरां परिणयामः। अतस्तत्र विवाहाः वस्तुक्रयवद्वर्त्तन्ते। यदि पतिः पियानोवादनमभिरोचयति, पत्नी वायलिनवादनम्; पतिः रक्ताय रङ्गाय स्पृहयति, पत्नी नीलाय, तर्हि कारणानीमानि गृहीत्वा सुकरो विवाहविच्छेदः। तेषु देशेषु अनया सरण्या कियान् विक्षोभः, द्वेषः सुखशान्त्योरभावश्च प्रसारिताः, कथं च वैदेशिका अप्यधुना विच्छेदप्रथातः उद्विग्नाः; सश्रद्धं विवाहसम्बन्धं चिरस्थायिनं वाञ्छन्ति, इति कदाचित्पाठकेभ्यः पुनः उपहरिष्यामि। अधुनैव विच्छेदप्रथया अनया एकः कियान् औपन्यासिको विषयः पुरःस्थापित इति सर्वैः पठितं स्यात् समाचारपत्रेषु कतिपयमासपूर्वकम्।

× × × ×

मिश्रदेशे विवाहविच्छेदः सुभृशं प्रचलितः। तत्र अधुनैव शासनसूत्रस्य व्यत्यासः, जनरलनगिबसत्ताया हस्तसात्करणमित्याद्यभूदिति सर्वेऽपि जानन्त्येव।

---

कदापि विचारयति यत्सर्वेऽप्यानन्दाः परमानन्दस्वरूपिणस्तस्य मात्रामुपजीवन्ति। अहो मे मौढ्यं [illegible]मायानदीविस्तारितं संसारजालं तथ्य मत्वा तदन्तः सुखं कल्पयामि। मया दिवानिशं प्राणपणेनापीहिता [illegible]री मां परित्यज्य द्वितीयं जनं वाञ्छति। धिङ् [illegible]न यत्प्रभावमीलितस्य जनस्येदृशी प्रवृत्तिर्जायते। अथवा किं नाम वराको मदनो मामेव धिगस्तु योऽहं विज्ञाततत्त्वोपि मृगमरीचिकाग्रस्तोऽस्मि।

इत्येवं संप्रधार्य नरपतिस्त्यक्तैषणो धृतकाषा[illegible] ज्ञानन्नसारतामस्य संसारस्य संन्यासमग्रहीत्। स एव शतकत्रयनिर्माता भर्तृहरिः संस्कृतजगति [illegible]षितः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पूर्वं तत्र खलु एकतन्त्रं शासनमासीत् । शाहफारूकः मिश्रस्य सम्राडभूत् । १९५२ क्रिस्ताब्दपर्यन्तमयं मिश्रदेशं शशास । एतेन पूर्वं स्वयौवनदिनेषु "फरीदा" नाम्नी सुन्दरी परिणीता । यथासमयं मिश्रसम्राज्ञी फरीदा राजकुमारीद्वयमजनयत् । चिररात्राय शाहफारूकस्य सम्राजा दाम्पत्यसुखं समनुबभूव फरीदा । द्वयोरासीद् भूयान् प्रेमा । परन्तु १९४८ ख्रिस्ताब्दे सामान्येनैकेन कारणेन द्वयोः कलहः अभूत् । फरीदा न्यायालयं गत्वा स्वविवाहविच्छेदस्य प्रार्थनापत्रमदात् । सम्राडपि न्यायालये आकारितः । सम्राजा विच्छेदः अनुमतः अधुना कुमारीद्वयस्य प्रश्न उदतिष्ठत् । कुमारीद्वय कस्य सविधे तिष्ठतु । फरीदा, या हि अन्यं प्रेमिणं परिणेतुमैच्छत् सा किमिति भारमिमं वहेत्? अन्ते निर्णयानुसारं द्वे अपि राजकुमार्यौ सम्राजः समीपे त्यक्त्वा फरीदा विवाहं व्यच्छिनत । अधुना साम्राडन्यां कांचन सुन्दरीं परिणयायान्वेष्टुं प्रारभत । भगवत्कृपया एका सुन्दरी लब्धा । तस्या नामासीत् 'नैरिमेन', या हि विश्वस्य सर्वाधिकसुन्दरीष्वन्यतमा परिगण्यते । १९५१ वत्सरे मई–मासस्य ६ तारिकायां सम्राट् फारूकः नैरिमेनमहोदयां परिणिनाय । पुनर्द्वयोः सुखसमृद्धिरारब्धा । १९५२ वर्षे २६ जनवरीदिवसे प्रमोदसंभाराणां मध्ये नैरिमेनसम्राज्ञी पुत्रमेकं प्रासूत । राजधान्यां महान् उत्सवः अभूत् । पुत्रस्य नाम अहमद फुआद इति कृतम् । विधातुः गृहात् सुतोऽयं महान् भाग्यशाली प्रेषितः आसीत् । अतएव षण्मासाभ्यन्तर एवासौ साम्राज्यमलभत । एतस्य कारणं फारूकराजस्य मृत्युर्नासीत्, अपितु तस्य राजधानीतो बहिर्गमनम् । केनचन कारणेन फारूकसम्राट् राजधानीतः अनिश्चितकालार्थम् अनिश्चितदेशे जगाम । तदनुपस्थितौ षण्मासवयस्कः 'शशुः फुआदः सिंहासनोपरि आरोपितः । एकादशमासपर्यन्तमसौ सम्राट्पदे अस्थात् । तदनन्तरं १९५३ वर्षस्य जूनमासे जनरलनगिबेन कथं साम्राज्यसत्ता हस्तसात्कृता, कथं च सम्पूर्णेऽपि मिश्रदेशे उत्क्रान्तिरुपस्थिता इत्यादि सर्वं जानन्त्येव समाचारपत्रपाठकाः ।

अधुना खलु कथायाः चक्रं परिवर्तितम् । साम्राज्यान्निर्वासितः फारूकः इटलीनगरे तिष्ठति । यः सोऽयं साम्राडासीत्—महती जनशक्तिः, महती धनशक्तिः वैभवं च तस्य हस्ते अभूत् । धनस्य वैभवस्य च सेयं मृगतृष्णा नैरिमेनमहोदयां फारूकं परिणेतुं प्रेरितवती । को जानाति स्म यदेवंविधस्य महतो देशस्य सम्राट् विधेः भ्रुकुटीभङ्गेनैव इटलीदेशे निर्वासितस्येव जनस्य जीवन यापयितुं बाध्यो भविष्यति । हन्त ! तदेव दृश्यं सम्मुखमागात्—

अयं वारामेको निलय इति रत्नाकर इति,
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः ।
क एवं जानीते निजकरपुटीकोटरगतं,
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ॥

अस्तु, अधुना नैरिमेनमहोदया विंशतिवर्षीया अतिसुन्दरी चास्ति । अपि च बहुवर्षाणि सा सम्राज्ञी अतिष्ठत् । अधुना बहवः कोटिपतयः, वैभवशालिनः, सुन्दराश्च युवकास्तां परिणेतुं सन्नद्धाः । किमिति साऽधुना देशनिर्वासितस्य सम्राजः पत्नी तिष्ठेत् यदा विच्छेदः कर्तुं सुकरः ? मिश्रदेशस्य सुप्रसिद्धः अभिनेता 'फरीद अल अस्तराह' नामायो हि चतुस्त्रिंशद्वर्षदेशीयः, स्वस्थः, सुन्दरः, धनपतिश्चाप्यस्ति, तां स्निह्यति, तां परिणेतुं च सन्नद्धः । अतः अधुना नैरिमेनसुन्दरी तं परिणेतुं वाञ्छितवती । किन्तु फारूकेन सह विवाहस्य विच्छेदं विना कथं सा तं गृह्णातु, विना कारणं च कथं वा न्यायालयेन विवाहविच्छेदः समर्थ्येत इत्यासीन्महती विप्रतिपत्तिः । विवाहविच्छेदस्य नियमेषु एकः सोऽयमस्ति यद्यदि बहुकालं यावत् पत्नी पत्युर्वियोगे तिष्ठेत्तदापि विवाहविच्छेदः कर्तुं शक्यते । एतन्नियमानुसारं नैरिमेनसुन्दरी वराकं फारूकं त्यक्तुं कृतनिश्चया । यतो हि उत्क्रान्तेः, देशबहिर्गमनस्य, अन्यान्यैश्च राजनैतिककारणैः फारूकः नैरिमेनसुन्दर्या वियुक्तः अस्थात्, अतः एनमाधारीकृत्य सा विवाहविच्छेदं कर्तुं शक्नोति । १९५३ वर्षस्य मार्च-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...सात् द्वावपि वियुक्तौ स्तः। फारूकः इटलीदेशे तिष्ठति, नैरिमेनसुन्दरी च मिश्रदेशे स्वपित्रोर्निकटे। अधुना तया मिश्रदेशस्य सर्वोच्चन्यायालये प्रार्थनापत्रं प्रदत्तमस्ति यत् दीर्घवियोगस्य कारणादहं ...लकं त्यक्तुमिच्छामि। फरीद अल अस्तराहं च ...तुमिच्छामि। अहं वाञ्छामि यत् विवाहविच्छेदः ...क्षतिपूर्त्यै (मुआवजा) फारूको मह्यं पञ्चसहस्र... ...नानां वृत्तिं प्रतिमासं दद्यात्। अर्थात् अनुमानत ...षट्षष्टिसहस्ररूप्यकाणि प्रतिमासम्। कथनस्या... ...कता नास्ति यद्विवाहविच्छेदनियमेष्वेकः सोऽय... ...स्ति यद्यदि पत्नी वांछेत्तर्हि तद्योग्यतानुसारं पत्युः ...यात् कञ्चन अंशं पत्न्यै प्रतिमासं सर्वकारो दाप... ...तुं शक्नोति। सोऽयं पत्नीग्राह्योऽशः आंग्लभाषा... ...म् 'एलिमनी' (Alimony) कथ्यते।

× × ×

श्रीनरिमेनसुन्दर्या अस्य प्रार्थनापत्रस्योपरि भूयान् ...क्षोभः प्रवृत्त आसीत्। अनुमीयतां वराकस्य ...फारूकशाहस्य दशा। राज्यं गतम्, अवमानमनधिगतम् ...चमासादारभ्याद्यपर्यन्तं राजनीतिकंकुचक्रकारणा... ...राको विदेशमाश्रयितुं विवश आसीत्। अधुना यदा ...मनाक् शान्तिरधिगता विदेशे गत्वा, तदा पत्नी अपि ...ं वराकं त्यक्तुकामा। नेदमेव, अपितु मासिकीं ...वृत्तिमपि वाञ्छति। इदं तु सर्वं जातमेव। नात्र ...किमप्याश्चर्यम्। एवंविधा घटनास्तु प्रायशस्तेषु ... देशेषु भवन्त्येव। नेयं विशेषता। विशेषता ...त्वियमस्ति यत् नैरिमेन-सुन्दर्या स्वप्रार्थनापत्रे इदम... ...पि वांछितम् यन्मम पुत्रः अहमदफुआदनामा ...ऽधुना वत्सरद्वयवयस्कः, स विवाहविच्छेदानन्तर... ...पि मत्समीप एव तिष्ठेत्। इदमत्र ध्येयं यदयमहमद... ...फुआदो नास्ति साधारणः शिशुः। अयं खलु ...मासान् यावत् मिश्रस्य सम्राडभूत्। अतः ...अस्य ऐतिहासिकस्य भूतपूर्वसम्राजः शिशोः पालनाय ...पि स्पृहयतः। फारूकशाहोऽपि नैरिमेनसुन्दरी ...। वराकः फारूकः कथयति यत् मम पूर्वमहिष्याः ...कन्याद्वयं यदा मत्समीपे वर्त्तते, तदा सोऽयं पुत्रोऽपि मत्सविधे एव स्थातुमर्हति। स इमं समयं कर्तुम् अनुमन्यते यत् यदा नैरिमेनसुन्दरी वांछेत् सा स्वकीयं सुतं द्रष्टुं तेन मिलितुं च स्वतन्त्रा भवेत्। न्यायालयोऽप्यत्र सहमतः। परन्तु नैरिमेनसुन्दरी तदिदं न वांछति। सा 'सम्राट्चरं' शिशुं स्वसविधे स्थापयित्वा राजमातृगौरवमक्षुण्णं वांछति। फारूकसम्राट् तां त्यक्तुं, तस्यै भृतिं च दातुं नाधुना सहमतो यतः स वराकश्चिन्तयति यत्कदाचिदहमेकस्य देशस्य राजाधिराजोऽभूवम्। मदीया पत्नी विश्वस्मिन् सर्वाधिकसुन्दरीष्वेका, सम्राज्ञी चासीत्। अधुना सैव यदि स्थानच्युते मयि, एकमभिनेतारं परिणयति तर्हि लज्जास्पदमिदं मे।

नैरिमेनसुन्दर्याः पितरौ तां फरीद अलअस्तराह्याख्येन अभिनेत्रा सह गन्तुं, श्रृङ्गाररसं पोषयितुं च न सम्मन्येते। यतः सा, अन्ततोगत्वा, एका सम्राज्ञी आसीत्। यदि सम्राट् तस्या विवाहविच्छेदं नानुमनुते, तदा सा द्वाभ्यामपि वञ्चिता भविष्यति। न हि अभिनेता मिलिष्यति, न च सम्राट्!! सा शीघ्रं विच्छेदं, अभिनेत्रा सह परिणयं च वाञ्छति। वराकः अभिनेता मध्य एव त्रिशङ्कुवल्लम्बते। स विश्वसुन्दरीं नैरिमेनमहाशयां परिणेतुं वाञ्छति, किन्तु विना न्यायालयीयनिर्णयं कथं वा तदिदं सम्भवेत्। न्यायालये च 'राजकुमारः कस्य सकाशं तिष्ठेत्' 'कियती भृतिः नैरिमेनसुन्दर्यै दीयेत?' 'विच्छेदं फारूकसम्राट् अनुमन्यते न वा' इत्यादीनां समस्यानां सरलीकरणं विना कथं निर्णयः स्यात्? अतः अभिनेता, नैरिमेनसुन्दरी च द्वावपि पृथक् पृथक् स्थितौ वियोगस्य रात्रीः अतिवाहयतः, न्यायालयनिर्णयस्य च प्रतीक्षां कुरुतः। इतः शाहफारूको वराकः इटलीदेशे स्वभवने तिष्ठन् अतीतस्य घटनाः स्मरति। राजकुमारस्य फुआदस्य च जीवनमेवाऽनिश्चितम्—कुत्र खलु स निवसेत्? न्यायाधिकारिणोऽपि सतर्काः साशङ्काश्च। यतो विषयोयं न साधारणः। दुःसाध्या सेयं समस्या। एकतो भूतपूर्वः सम्राट्, अपरतश्च विश्वसुन्दरी। सर्वेऽपि विश्वजना निर्णयं सकुतूहलं प्रतीक्षन्ते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

### गोआप्रदेशे विरोधकाण्डम्

यस्मात्कालादारभ्य गौराङ्गशासका भारताद् बहिर्भूताः, भारतेन च स्वातन्त्र्यमुपलब्धम्, तत आरभ्यैव भारतान्तर्गतेषु वैदेशिकोपनिवेशेषु चन्द्रनगर, माहे, इत्यादिषु निवसन्तो जनाः स्वातन्त्र्योपलब्धये प्रयत्नमारब्धवन्तः। स्वाभाविकं किलैतत्। यदा हि प्रधानभूता वैदेशिकशासका देशाय स्वातन्त्र्यसुविधां प्रदाय स्वदेशं परावृत्तास्तदा तत्सहचरैरन्यैरपि वैदेशिकैर्भारतीयानां स्वातन्त्र्याधिकारो न कथंचिदपि निरोद्धव्यो नूनम्। एतदनुसारमेव फ्रांसादिराष्ट्रैः स्वाधिकृतेषु उपनिवेशेषु यथैव स्वातन्त्र्यप्राप्तये तन्निवासिभिः प्रार्थना चाऽऽन्दोलनं चारब्धं, तदैव प्रजाशक्तेः प्राबल्यमनुसंधाय नीतिनिपुणैस्तै राष्ट्रै रुपनिवेशेभ्यस्तेभ्यः स्वीयं शासनमुपसंहृतम्, ते चोपनिवेशाः भारतान्तर्भूताः समभवन्। भारतीपाठकैस्तदिदं वृत्तं गतायां संचिकायामवगतमेव।

किन्तु पुर्तगालराजतन्त्रेण उपनिवेशवासिनामभियोगमुपलक्ष्यापि 'गोआ' प्रदेशात्र स्वीया सत्ता समाहृता। गोआनिवासिभिरेतदर्थं वैधैरुपायैर्बहुधा प्रयतितमपि किन्तु पुर्तगालशासकाः साम्प्रतमपि अधिकारमोहं त्यक्तुं नेच्छन्ति। लोकमान्यतिलकस्य स्मारकतिथेरवसरे राजधान्यां देहल्यां विरोधप्रदर्शनस्यैकं महदायोजनमप्यासीद् यस्य नेतृत्वं पं० दीनदयालुरुपाध्यायः करोतिस्म। सोयं विरोधप्रदर्शनसमारोहः 'चांदनीचौक', 'जुमामस्जिदा'दिषु नगरस्य प्रधानस्थानेषु भूत्वा नवदेहल्यां भ्रमन्, पुर्तगालिदूतावासस्य संमुखे व्यश्राम्यत। तस्मिन् समये नाऽऽसीद् दूतावासे प्रामाणिकोऽधिकारी कश्चिदुपस्थितः। अपरा ये कर्मचारिण आसन् तेऽपि समारोहं विलोक्यैव गृहान्तर्निलीनाः समभूवन्। अतएव समारोहनेतृभिर्निजवक्तव्यमभिलिख्य दूतावासस्थितेभ्यः कर्मचारिभ्यः समर्पितं प्रधानाधिकारिभ्यो दातुम्।

दूतावासस्य संमुखे नगरस्य प्रधानप्रधानस्थानेषु च यात्रासमारोहेण—"गोआ अस्माकमस्ति" 'वैदेशिकैर्भारतं मोक्तव्यम्', 'स्वराज्यमस्माकं जन्मसिद्धोऽधिकारः,' एवमादयो नादाः सोच्चघोषमावर्तिताः स्थाने स्थाने। उपस्थितजनतायाः संमुखे नेतृभिरभिभाषितम्—'अस्यां तिथावेव लोकमान्यतिलकस्य स्वर्गवासोऽभवत्। तिलकमहोदयेनैव सबलमिदमाघोषितमासीद्—यत् 'स्वराज्यमस्माकं जन्मसिद्धोऽधिकारः।' अद्य पुण्यदिवसे वयं गोआनिवासिनां बन्धूनां प्रातिनिध्येन गोआशासकानां समीपे तस्मिन् स्वाधिकारं सूचयामः। 'गोआ' तथा अन्यान्या अपि वसतयो भारतस्याऽविभाज्यमङ्गम्। एतासु वसतिषु वास्तव्यानामधिकारोऽस्ति यद् राजनैतिकरूपेण निजमातृभूम्या सह संबद्धा भवेयुः। अधिकारस्यास्याऽपहरणं न केवलं स्वतन्त्रताया एवापमानः, अपि तु सोयं राष्ट्रियताया अपि स्पष्टस्तिरस्कारः।'

एवमेव पूना-मोहमयी-प्रदेशेष्वपि 'गोआ' विषयमादाय जनसंघस्य महान् संघर्षः। अगस्तमासस्य चतुर्दशतारिकायां भारतीयं पर्व 'रक्षाबन्धनम्'। अत एवाऽस्मिन्दिने सर्वेषामपि प्रदेशानां 'मुक्तिसेना' गोआ प्रदेशस्य करे 'रक्षा' बन्धनाय पूनाप्रदेशात् प्रस्थाप्यते। द्वितीयदिने (१५ अगस्तदिवसे) च सा अशोकचक्राङ्कितं राष्ट्रियध्वजमादाय गोआप्रदेशं प्रविशेदिति सभायामक्रियत निश्चितम्।

किन्तु वर्तमानकाले राजनैतिकं क्षेत्रमतीव संक्षुब्धम्। पार्श्ववर्तीनि सर्वाण्यपि राष्ट्राणि निजनिजस्वार्थं गृध्रदृष्ट्या विलोकयन्ति। येनकेनाप्युपायेन स्वार्थसाधनस्य निजवैरनिर्यातनस्य च प्रयत्नः सर्व-

---

सेयमौपन्यासिकी समस्या अद्य (१६५४, फरवरी मासे) अनेन विवाहविच्छेदेन स्थापिता। न जाने न्यायालयः कस्मै कं निर्णयं श्रावयति! विचित्रः कलेर्महिमा!! (रायटर समाचार कार्यालयः) २-२-५४



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...तोऽपि प्रचलितोस्ति। पाकस्थानमिदं भारतेन सह युद्धं बद्धवैरम्। अतएव भारतस्य प्रत्येककार्ये बाधामुपस्थापयितुं बद्धपरिकरं पाकस्थानम्। तत एव हि गोआप्रदेशस्य भारतेन सह संमेलनमपि नाऽभिरोचते पाकस्थानम्। तेन हि एतत्कार्यविरोधिभ्यः पुर्तगालशासकेभ्यः साहाय्यप्रदानमारब्धम्। साम्प्रतं पुर्तगालतो गोआप्रदेशमागन्तारः पोताः (जहाज) भारतीयेषु पोतविश्रमस्थानेषु (वन्दरगाह) न तिष्ठन्ति। अपि तु पाकस्थानसीमनि तेऽवतरन्ति। तत एव च कृष्णाङ्गार (कोयला) संग्रहमपि ते कुर्वन्ति। पाकस्थानकृतेन अनेन साहाय्येन पुर्तगालस्य कियान् लाभः स्यादिति तु विचारसापेक्षमेव। किन्तु पाकस्थानस्यानेन महती हानिः संभवेदिति तु सुनिश्चितम्। किं तु भारतीयजनता, अधिकारिणश्च पाकस्थानस्य शिष्टतामिमां शक्नुयुः कदाचिद् विस्मर्तुम्? बम्बई-नगरात्सांप्रतमेव संवादः प्राप्तो यत्—गोआराष्ट्रिय-कांग्रेसाध्यक्षः पीटरएलवेरस् सूचयति यत्—"गोआ-प्रदेशस्य मुक्तेरान्दोलनं रविवारात्प्रारभ्येत। यतस्तस्मिन्दिने भारतीयस्वतन्त्रताप्राप्तेरपि महामहोत्सव-समारम्भः। सत्याग्रहिणां दलं मजाली, बाँदाप्रदेश-मार्गेण गोआप्रदेशं प्रविशेत्। इदमपि सूचितं तेन यत् १३ सहस्रं भारतीयाः श्रमजीविनः (मजदूर) गोआप्रदेशात् पुर्तगालीयशासकैर्बलान्निर्वासिताः। हन्त! अपि सह्येत वर्तमानसमये सोयं निकारः प्रजाशक्त्या? भगवान् रक्षतु लोकसंहारतो भूमिमिमाम्।

## भारतं च हिन्दचीनीययुद्धं च

हिन्दचीने जायमानस्य युद्धस्य विरामाय कथं विश्वस्य शान्तिप्रिया देशाः कृतप्रयत्ना आसन्, कथं जेनेवानगरे राष्ट्राणां शान्तसम्मेलनमभूत्, फ्रांसस्य नवनिर्वाचितः प्रधानमन्त्री मेंडेसफ्रांसः कथं युद्धविरामाय बद्धसन्धः आसीदित्यादि सर्वं विदन्त्येव पाठकमहाभागाः। एतस्य जेनेवासम्मेलनस्य सफला समाप्तिः २५ जुलाई तारिकायामभूत्। सम्मेलन-निर्णयानुसारं हिन्दचीनीयं युद्धं समाप्तिमगात्। युद्धविरामानन्तरं विरामरेखानिर्धारणार्थं, तत्सम्बन्धि-निरीक्षणार्थं च युद्धक्षेत्रे महतः पर्यवेक्षणस्यावश्यकताऽऽसीत्। एतदर्थं खलु किं वा राष्ट्रं नियुज्येत तत्रेति समभूद्विचारः। तत्र तटस्थराष्ट्राणामेक आयोग एतदर्थे नियुज्येतेत्यासीन्निर्णयः। तटस्थराष्ट्रप्रत्या-वर्त्तनायोगद्वारा भारतेन कोरियायां युद्धबन्दिनां प्रत्यावर्त्तनविषये यादृशी सफलता लब्धा, यथा च तस्य सुयशः सर्वत्र प्रसृतमिति तु प्रसिद्धम्। जेनेवा-सम्मेलने यद्यपि भारतं नासीन्निमन्त्रितं, तथापि तस्यैकः प्रतिनिधिः प्रेक्षकत्वेनागमत्। अयमासीद्विश्वविदितप्रतिभः श्री वी० के० कृष्णमेननः। सम्मेलनेन तटस्थराष्ट्रेषु भारतं, पोलैण्डं कनाडा चेति राष्ट्रत्रयं युद्धविरामनिरीक्षणाद्यर्थं निर्वाचितम्। एतस्याध्य-क्षतार्थं च भारतं सर्वसम्मत्या स्वीकृतम्। अतो हिन्द-चीनप्रदेशे युद्धविरामप्रेक्षणाय य आयोगो गमिष्यति तस्याध्यक्षत्वं भारतेन करिष्यत इति निश्चितम्। भारतेन स्वकीयनेतृत्वसम्बन्धेन राष्ट्राणामेषा-मामन्त्रणं विहितम्। एतदनुसारं अगस्तस्य प्रथम-तारिकायां कनाडापोलैण्डयोः प्रतिनिधयः नईदेहल्यां अध्यक्षीयमादेशं ग्रहीतुं समागताः। एतदतिरिक्तं, वियतनाम, वियतमिन्ह, लाओस, कम्बोडिया, फ्रांस-इत्यादयो देशा अपि सम्मेलने भागं ग्रहीतुमागताः। हिन्दचीनसम्मेलनस्यास्योद्घाटनं भारतीयप्रधानमन्त्रि-श्रीनेहरुणा प्रातर्दशवादनसमये कृतम्। नेहरूमहोदयेन सम्मेलनस्योद्घाटनमेव केवलं न कृतमपि तु अध्यक्षीयादेशानां महता चातुर्येण प्रतिपादनमपि विहितम्। भारतस्यास्य राजनैतिकनेतृत्वस्य, नेहरो-र्विदेशनीतेश्च प्रशंसा विश्वस्य कोणे कोणे व्याप्ताः।

षड् दिनानि सम्मेलनमिदं सुचारुरूपेण विमर्श-मकरोत्। नेहरूमहोदयस्यानुपस्थितौ अध्यक्षता श्री० वी० के० कृष्णमेननेन निर्वाहिता। सम्मेलनस्यान्तिम-निर्णयानुसारं एकमग्रिमदलं निर्वाचितं यत् ११ अगस्तदिवसे युद्धक्षेत्राय प्रास्थित। तटस्थराष्ट्रत्रयं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## देशदर्शनम्—

उत्तरविहारे पूरोपप्लवः—प्रतिवर्षं विहारस्य कोसीनदी, शोणनदश्च अपारां धनजनक्षतिमानयत इति नापरोक्षं वृत्तज्ञानाम्। अस्मिन्नपि वर्षे कोसीनद्याः पूरोपप्लवकारणादपारा जनधनक्षतिर्विहिता। सहरसाप्रदेशे पूर्वमेव कृषिः अल्पतरायां भुवि आसीत्-तस्या अपि कृषेः महान् भागः पूरोप्लवकारणान्नष्टः। दरभङ्गाप्रान्तस्यापि भूयान् भागः पूरमग्नो वर्त्तते। लोकाः शीघ्रं स्वकीयं स्वमादाय सुरक्षितान् ग्रामान् प्रति पलायन्ते। केन्द्रीयसंचारमन्त्रिणा श्रीजगज्जीवनरामेण तु कथितं यदस्मिन् वर्षे उत्तरविहारेण यावती क्षतिः सोढा तावती १९३४ वर्षस्य भयङ्करभूकम्पादपि नाभूत्। पूरपीडितानां संख्या प्रायः चतुःषष्टिलक्षाधिकाऽस्ति। उत्तरविहारस्य पञ्चसहस्रवर्गक्रोशमिता भूमिर्जलमग्नाऽस्ति। जगज्जीवनरामेण ८० क्रोशपर्यन्तं विमानयात्राकृता पूरपीडितजनानामवलोकनाय। एतेन

---

निरीक्षणाय प्रतिनिधीन् प्रेषयिष्यति। अधिकसंख्या भारतप्रतिनिधीनां भविष्यति। एतेषां योग्यतावेतनादीनां निर्णयः नवदेहल्यां परस्ताद्भविष्यति। तावत् खलु आवश्यककार्यार्थं एस० के०, दत्तस्याध्यक्षे त्रयाणामपि राष्ट्राणां प्रतिनिधयः हिन्दचीनार्थं ११ अगस्त, शनिवासरे प्रस्थिताः।

राष्ट्रत्रयस्यास्य "अन्ताराष्ट्रिय — निरीक्षण नियन्त्रणायोगस्य" अध्यक्षत्वसम्बन्धेन भारतं प्रतिनिधीनां वेतनादिविषये जेनेवासम्मेलनस्याध्यक्षेण सह पत्रव्यवहारं करिष्यतीति अवगतम्।

———

एतेषां सहायतायाः आश्वासनमपि प्रदत्तम्, लोकान् प्रति तेषां सहायतायाः कृते अनुरोधोऽपि विहितः।

क्रिस्तीयधर्मप्रचारकमंडलानामाक्रामकः गतिविधिः—एषु दिनेषु क्रिस्तीयधर्मप्रचारकमण्डलानि भारतस्य विभिन्नप्रान्तेषु, विशेषतः सीमाप्रान्तेषु सातङ्कं स्वधर्मप्रचारं कुर्वन्तीति जानीयुर्विद्वांसः। एतेषां विधर्मीकरणस्यैव प्रवृत्तिः साम्प्रतमस्ति। अनेन प्रचारेण सर्वेऽपि शासका विक्षुब्धप्रायाः। प्रधानमन्त्री नेहरूमहोदयोऽपि पंजाबप्रान्ते डलहौजीनगर्याः कांग्रेससमितेरध्यक्षाणां कृते प्रेषितायां पत्रिकायां प्रवृत्तेरस्य निन्दां विहितवान्। अयं लिखति यद्यद्यपि भारते मण्डलैरेतैः प्रशस्यानि कानिचन कार्याणि कृतानि तथापि अनेन गतिविधिना भारतस्य क्रिस्तानुयायिषु आतङ्कः प्रसरति। अहं न वाञ्छामि यद्भारतस्य सीमाप्रान्तेषु प्रचारकनाम्ना किंचिदपि दलं कार्यं कुर्वत् विद्यमानं स्यात्। नीतेरस्या न काऽपि धर्मेण सम्बन्धः, परं राजनैतिककारणादहं तथा विचारयितुं व्यवसितोऽस्मि।

## संस्कृतसमाचाराः—

स्थानीयसंस्कृतवाग्विवर्द्धिन्यां विद्वद्गोष्ठी-काशीतः समुपागतानां साङ्गवेदविद्यालयाध्यक्ष-पण्डितराजश्रीराजेश्वरशास्त्रिद्राविड़महोदयानां संमाने संस्कृतवाग्विवर्द्धिन्यां 'विद्वद्गोष्ठी' समायोजिताऽऽसीत् दिनाङ्के २७।६।५४ सायम्। एतस्याः साभापत्यं म०म०पं०श्रीगिरिधरशर्मचतुर्वेदिमहाभागाः समैमण्डयन्। समारोहेऽस्मिन् मङ्गलाचरणोत्तरं परि-दक्षो राजगुरुः श्रीगोपीनाथशास्त्रिद्राविडमहाभा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



…गोष्ठीप्रधानानां पण्डितराजमहोदयानां परिचयमका-
…यद्। पण्डितराजो निजभाषणे समसाधयद् यत्—
प्राचीनभारतीया राजनीतिरेव मिथो व्यवहारसौ-
…र्याय समपेक्षितश्रीवृद्धये च सर्वतः समुपयुक्ता।'
पाश्चात्त्यनीतेर्भारतीयपद्धतेश्च समञ्जसैर्निदर्शनैरालो-
…नामकार्षीत्पण्डितराजः।

परिषदः संयुक्तमन्त्रिणा श्रीनारायणशास्त्रि…
…ङ्करेण परिषदः परिचये प्रदत्ते—श्रीनवलकिशोर-
…ङ्करः परिषदा समर्प्यमाणमभिनन्दनपत्रमश्रावयद्
…द्धि पण्डितराजाय तद्दिने समुपाह्रियत। श्री हरि…
…शास्त्री, परिषन्मन्त्री दीनानाथत्रिवेदी 'मधुपः',
…ध्यापक श्री नवलकिशोरकांकरश्च, पद्यपुष्पाञ्जलिं
…र्पयन् पण्डितराजाय।

सभापतिपदाच्चतुर्वेदिमहाभागः सुरुचिरं समर्थित-
…वान् यत्—पूर्वं भारते वैदेशिकानां शासन-
…मासीत्। अतएव स्वीयराजनीतेर्विधानस्य चानुसारं
…ः शासनकार्यं परिचालितम्। विजेता हि निजस्य
…मुत्तराधिकार्य संपादनार्थं विजितराष्ट्रे स्वीयामेव नीति-
…ङ्गीकरोतीति समञ्जसमेव। परमधुना भाग्यात्संप्राप्ते
…स्वातन्त्र्ये, विश्वमाननीयां निजां नीतिं, निखिला-
…नन्दितं भारतीय विधानं च परित्यज्य भारतीयैः
…सकैः साम्प्रतमपि वैदेशिकराजनीतेरेव शासनकार्ये
…करणं बहूकृतमिति को वा कृतमतिरभिनन्देत्।
…क्यस्य चन्द्रगुप्तस्य च प्राचीनं शासनं बहुष्वंशेषु
…मन्ति भारतीया नेतारः। ततश्च किं तयोः सम्राजोः
…न्ये वैदेशिकेन शासनेन भारतराजतन्त्रं परिचा-
…लनम्? हन्त यः किलाचार्यचाणक्यो वैदेशिकैर्गौराङ्गै…
…शासितः, यस्य चार्थशास्त्रं तैरपि संमानदृष्ट्या-
…नन्दितं तदिदं हितकरं परिहृत्य विजेतृकूटनीति-
मेव सम्प्रत्यपि प्रचालयितुमिच्छन्तीति भारतीयानां भागधेयमेव दर्शयति विप्रतीपमिदम्।

संस्कृतशिक्षिताः सामाजिकव्यवहारेभ्यः सुदूरं तिष्ठन्तीति तेषु सुप्रसिद्धः कलङ्कः। अतएव भारतीयैः शिक्षितैः स्वदेशीया राजनीतिरवश्यमध्येतव्या, तदैव विश्वशान्तिः संभाव्यते।

अस्तु, यस्या वैदेशिकनीतेः कारणाद्वर्तमानैः शासकैः पूर्वानुभूतं पारतन्त्र्यदुःखं सोढम्, यस्य च स्वीयशासनस्य कृते नानाविधानि कष्टान्यङ्गीकृतानि, विदेशीयानामितः प्रस्थाने स्वातन्त्र्ययुद्धे स्वीयो विजयश्च प्रख्याप्यते, संप्रति तस्यैव दुःसमयस्य राजनीतिरनुसर्तुं काम्यते इति को वा प्रशंसेत्?

गुरुपूर्णिमावसरे "भारती" परिवारेण सम्पादितायाः संस्कृतप्रदर्शिन्या उद्घाटनावसरे आयोजितायाः पण्डितसभायाश्चित्रम्।



अत्र सर्वश्री युगलकिशोरशास्त्री, जगदीशशास्त्री, स्वामीजयरामदासशास्त्री, मण्डनशास्त्री, भोलानाथ शिक्षामन्त्री, दीनानाथशास्त्री, भवदत्तशास्त्री, वृद्धिचन्द्रशास्त्री, गिरिराजशास्त्री, नन्दकुमारशास्त्री, रामचन्द्रशास्त्री, विन्ध्याचलशास्त्री, दुर्गादत्तशास्त्री, हरिनारायणशर्मा, प्रभाकर बटुकेत्यादयो महानुभावाः क्रमशः वामतः दृश्यन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## द्रुतं संस्कृतं शिक्ष्यतां 'भारती'तः—

काश्मीरराणां राज्यं भारतस्योत्तरप्रान्ते प्रसृतम् अस्ति। राज्ये मोहम्मदानां संख्या भूयसी वर्त्तते। सिन्धुनदी मानसरोवरादुद्भूय राज्येऽस्मिन् प्रवहति। तथाऽनया राज्यमिदं द्वयोः भागयोः विभक्तम्-एकतः काराकोरमपर्वतश्रेणिः अस्ति, अपरतश्च हिमाचलस्य। काराकोरमपर्वतश्रेणिः अधिकतरं पर्वतीयप्रदेशान्य'प्रा- अस्ति। अतः अस्यां वसतिः अल्पा एव। काराकोरमपर्वतश्रेण्यां गाडविनआस्टिनशिखरं उच्चतमं वर्त्तते। इदमेव शिखरं विश्वस्मिन् सर्वतोऽधिकमुन्नेतम्। काश्मीरेषु शीतमधिकं भवति। अत्र झेलमनद्यास्तीरप्रान्तः प्राकृतिकदृश्यैर्युक्तोऽस्ति। अयं भूस्वर्ग इत्याख्यायते। अस्यामेव तटभूमौ दाडिमम्, गोस्तन्यः, इत्यादीनि शीतप्रदेशोद्भवानि फलानि उत्पन्नानि भवन्ति। पद्मपुरे केसराणां कृषिर्भवति। अत्रत्यानि द्विशालकानि प्रसिद्धानि। श्रीनगरं काश्मीराणां राजधानी। इयं झेलमतीरप्रान्तेऽवस्थिता। झेलमसरितो जलेन अत्र एकः ह्रदः निर्मितोऽस्ति यः अमरसरोवरः इत्याख्यायते। अद्यश्वः काश्मीराणां प्रधानं युवराजः कर्णसिंहः मुख्यमन्त्री च बख्शी गुलाममुहम्मदः।

काश्मीर का राज्य भारत के उत्तरी भाग में फैला हुआ है। राज्य में मुसलमानों की संख्या ज्यादा है। सिन्धु नदी मानसरोवर से निकल कर इस राज्य में बहने लगती है। इस नदी ने राज्य को दो भागों में बाँटा है। एक ओर काराकोरम की पहाड़ियां हैं और दूसरी ओर हिमालय की। काराकोरम अधिक पहाड़ियों से घिरा हुआ है। इसमें बस्ती कम है। काराकोरम में माउंट गाडविन आस्टिन सबसे ऊंचा शिखर है। हिमालय में गौरीशङ्कर या माउंट एवरेस्ट सबसे ऊंचा है। इसी शिखर की विश्व में सबसे अधिक ऊंचाई है। काश्मीर में सर्दी अधिक पड़ती है। यहां झेलमनदी की घाटी प्राकृतिक दृश्यों से युक्त है। इसे भूस्वर्ग कहा करते हैं इस घाटी में सेब, अनार, अंगूर, अखरोट इत्यादि कई ठंडे देशों के फल होते हैं। पद्मपुर में केसर की खेती होती है। यहां के शाल दुसाले बहुत प्रसिद्ध हैं। श्रीनगर यहां की राजधानी है। यह झेलम घाटी पर बसी है। झेलम के जल से यहां एक झील बन गई है जिसे अमर झील कहते हैं। आजकल काश्मीर के सदरे रियासत युवराज कर्णसिंह हैं। यहां के मुख्यमन्त्री बख्शी गुलाम मुहम्मद हैं।

## धातुप्रयोगपारिजातः—

तप सन्तापे (गर्मी पहुँचाना) भ्वादिः, सकर्मकः, अनिट्। तपति। तताप तेपतुः, तेपिथ, ततप्थ तेपिव। तप्ता; तप्स्यति। आशी०—तप्यात्, तप्यास्ताम्। अताप्सीत् अताप्ताम्। अतपस्यत्।

कर्मणि—तप्यते। तेपे। अतापि (लुङ्)। अन्ववतप्त, च्लेः चिण् न, केवल अनुताप (पश्चात्ताप) स्यार्थे। पश्चात्तापभिन्नार्थे तु—उदतापि सुवर्णं सुवर्णकारेण। प्रेरणायाम्—तापयति—ते। अतीतपत्—त। सनि—तितप्सति। कृदन्ते—तप्तव्यम्, तप्यम्। क्ते—तप्तः। शतृ—तपन्। क्त्वा तप्त्वा, प्रतप्य। तुमुन्—तप्तुम्। उत्+तप्, उत्तपते, वि+तप्, वितपते—उद्विभ्यां तपः—आत्मनेपदम्। ललाटन्तप, सूर्य। ललाटोपपदान्मुम्। शत्रुन्तपः—शत्रूणां तापकः—खच्। तपः तपसी तपांसि—असुन्। तपश्चर तपस्यति—(क्यङ्) परस्मैपदे च। तापः, (घञ्)।

———

प्रकाशक—जयबहादुरसिंह। पता—भारती भवन गोपालजी का रास्ता, जयपुर।
राजस्थान प्रिंटिंग वर्क्स, हनुमानजी का रास्ता, जयपुर में मुद्रित।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती



...ान स्वैरं रावणं लोकरावणम् ।
...ामोऽस्तु स रामो भारतेऽधुना ॥

...र्षम् ४

द्वादशाङ्कः

मूल्यम्
वार्षिकम् ३)
एकस्य ऽङ्कस्य ।≈)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र-उत्तरप्रदेश-बिहार-सर्वकारैः स्वीकृता:-

# ❀ विषय-सूची ❀


| क्रमः | लेखाः | लेखकाः | पृष्ठसंख्या |
|---|---|---|---|
| १. | नमामि कृष्णं यदुवंशभूषणम् | श्रीपरशुरामशास्त्री डीडवाना (राजस्थान) | २४ |
| २. | प्रातर्भूमिवन्दनम्, ततो भूमौ पादस्थापनम् | श्रीदीनानाथशास्त्री, देहली | २४८ |
| ३. | संस्कृतशिक्षा | श्रीलक्ष्मीनारायण पुरोहितः उदयपुरम् | २५८ |
| ४. | विहारप्रान्तीयो जलप्लवः | श्रीमदनमोहनझा मुजफ्फरपुरम् | २६१ |
| ५. | विक्रमः सम्राट् | श्रीवासुदेवशास्त्री वागेवाड़ीकर शोलापुरम् | २६२ |
| ६. | पाश्चात्यदृशा आयुर्वेदस्वरूपम् | श्री वाल्टर हार्डिंग मोरर | २६ |
| ७. | रा० स्वं० सघस्य सरसंघचालकमहाभागानां भारतीपत्राय संदेशः | | २७३ |
| ८. | सम्पादकीयम् | | २७ |
| ९. | द्रुतं संस्कृतं शिक्ष्यतां 'भारती'तः | देवर्षि कलानाथशास्त्री B. A. | २७ |
| १०. | 'भारती' मासिकस्य पुरातनेष्वङ्केषु किं वर्तते | | पृष्ठ |


सूचना—१. सर्वे ग्राहका महानुभावाः सूच्यन्ते यत् पत्रव्यवहारावसरे निजग्राहकसंख्यां स्वस्मिन् … अवश्यं दर्शयेयुः । अन्यथा पत्रोत्तरे बाधाः समुत्पत्स्यन्ते ।

२. 'भारती' कार्यालये अनेके 'भारती' मासिकस्य पुरातना अङ्काः सन्ति येषु देशस्थानां … प्रख्यातविदुषां रुचिकराः समुपयोगिनः लेखा वर्तन्ते । ग्राहकानां सुविधार्थं प्रत्येक… पुरातनस्याङ्कस्य मूल्यम् आणकचतुष्टयमेव कृतम् । अतः यदि आवश्यकता स्यात् … त्वरितमेव 'भारती' कार्यालये लेखनीयम्

## —: "भारती" पत्रस्य उद्देश्यानि नियमाश्च :—

१. संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचारपरि- पोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि ।

'भारती' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम् ।

३. मासिकपत्रमिदं प्रतिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात् ।

४. एकस्यांकस्य मूल्यम् ।=) आणकषट्कम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि-
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्ध-सम्पादकः—
गिरिराजशर्मा शास्त्री

वर्षम् ४ | आश्विनपूर्णिमा, सं० २०११ | अङ्कः १२

## नमामि कृष्णं यदुवंशभूषणम्

लेखकः— परशुरामशास्त्री, श्रीरामानुजसंस्कृतविद्यालयः डीडवाना ( राजस्थान )

धराभरं राक्षसवृन्दवर्द्धितं, गणञ्च सद्धर्मविरोधिरक्षसाम् ।
समूलमुत्पाटयितुं समागतं, नमामि कृष्णं यदुवंशभूषणम् ॥१॥

करालकालाद्रिसुरेशवज्रकं, जगन्नियन्तारमपि प्रियम्वदम् ।
प्रभुं यशोदाङ्कगतं प्रसेदुषं, नमामि कृष्णं यदुवंशभूषणम् ॥२॥

स्वलीलया लोडित-विश्वसागरं, मनोहरं मोहनमिन्दिरापतिम् ।
पतिं गतिं पादतलावलम्बिनां, नमामि कृष्णं यदुवंशभूषणम् ॥३॥

सुवाससालंकृतचारुकन्धरं, लसच्छ्रुति कोमलगण्डलम्बिना ।
सुकुन्तलैः कुण्डलकेन शोभितं, नमामि कृष्णं यदुवंशभूषणम् ॥४॥

व्रजाङ्गनावृन्दविशेषवन्दितं, तदीयनेत्राम्बुजपूजितं प्रभुम् ।
दयाकरं तं गतसर्वदूषणं, नमामि कृष्णं यदुवंशभूषणम् ॥५॥

मुदा व्रजन्तं नवनीततस्करं, सबालगोपीजनचित्ततस्करम् ।
गवां गणेनावृतमिन्द्रसूदनं, नमामि कृष्णं यदुवंशभूषणम् ॥६॥

प्रचण्डदावानलतापभक्षकं, प्रसुप्तगोपालगणस्य रक्षकम् ।
जगत्त्रयोत्पादनरक्षणक्षमं, नमामि कृष्णं यदुवंशभूषणम् ॥७॥

इनात्मजा येन कृता सुनिर्मला, प्रसह्य पाञ्चालसुता च रक्षिता ।
तमीश्वरं कृत्रिमपूरुषं विभुं, नमामि कृष्णं यदुवंशभूषणम् ॥८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# प्रातर्भूमिवन्दनम्, ततो भूमौ पादस्थापनम्

श्रीदीनानाथशर्मा शास्त्री सारस्वतः, विद्यावागीशः, विद्याभूषणः, विद्यानिधिः
प्रिन्सिपल सं० हि० महाविद्यालय, रामदल, दरीबाकलाँ, देहली

प्रातरुत्थाने एव स्वाश्रयभूतपृथिव्या वन्दना श्रेयस्करी भवति। तत एव प्रोक्तम्—'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी'। अत एव वेदेनापि प्रोक्तम्—'शिला भूमिरश्मा पांसुः सा भूमिः सन्धृता धृता। तस्मै हिरण्यवक्षसे पृथिव्या अकरं नमः' (अथर्व० १२।१।२६) 'नमो मात्रे पृथिव्यै, नमो मात्रे पृथिव्यै' (यजुः सं० ६।२२) द्विः+पृथिवीमातरं वन्दित्वा वेदेन अस्मभ्यं तद्-वन्दनाया आदेशः प्रोक्तः। अतएव वेदानुसारिणा पुराणेनापि 'समुद्रवसने! देवि! पर्वतस्तनमण्डले! विष्णुपत्नि! नमस्तुभ्यं पादस्पर्शं क्षमस्व मे' इति तां नमस्कृत्य तस्यां पादस्थापनार्थं क्षमा प्रार्थिता।

उत्थाने एव पृथिव्यां युगपत् पादनिधानं लौकिकदृष्ट्यापि युक्तं नास्ति; यतो हि—सर्वां रात्रिं वयं खट्वायां स्वपिमः। तत्रापि शीतकाले नीशारेण (रजाई से) आत्मानमावृत्य स्वपिमः। अतोऽस्मदभ्यन्तरे उष्णता पर्याप्ता भवति, विशेषतः पादयोः, यतो हि—तदा पादौ प्राय आवृतौ भवतः, तदानीं शीतलपरमाणूपेतभूमौ सहसैव पादस्थापनं न स्थाने। इतरच्च भूमिरास्माकीना माताऽस्ति, वयं तदीयाः पुत्राः स्मः। यथा च अथर्ववेदशौनकसंहितायां-'माता भूमिः, पुत्रो अहं पृथिव्याः' (१२।१।१२)। भूमिर्देवतारूपाप्यस्ति; ततस्तस्यां पादन्यासो नोचितः प्रतिभाति। परमनिवार्यतया पादस्पर्शार्थं ततः क्षमाप्रार्थना उचितापि। तावत् शयनकालिकः* शारीरिक ऊष्मापि यथास्थितो जायते। ततः शौचार्थं बहिर्गत्वा वीरवायुसेवनं कृत्वा प्रातिक× तुषार (ओस) युक्ततृणप्रदेशे उपानहं विना भ्रमणं नेत्रकृते लाभकृद् जायते, यतोहि पादयोरधस्तनसानां नेत्रज्योतिषा विशिष्टः सम्बन्धो भवति। परन्तु भूमौ पादप्रहारस्तु न स्थाने; यतोहि पादतले आघातप्राप्त्या स्वकीयैव आभ्यन्तरिकी क्षतिरापद्यते। अतो भूमौ पादप्रहारः पापजनको मतः। एतदादिकं सर्वं ज्ञातुमस्माभिः 'श्रीसनातनधर्मालोक' ग्रन्थमाला प्रकाश्यते, जिज्ञासवस्तदीयाः स्थायिग्राहका भवन्तु।

+ द्विः-अत्र सुच्प्रत्ययः, वारद्वयमित्यर्थः। * कालिकः कालाट्ठञ्, ऊष्मा पुंसि। × प्रातिकः। अत्र 'अव्ययानां भमात्रे टिलोपः।'



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृत-शिक्षा

पं० लक्ष्मीनारायणपुरोहितः, उदयपुरम्

पूर्वाऽनुवृत्तः

[ निबन्धोयम् अ०भा० संस्कृतसाहित्यसम्मेलने सर्वोत्तमत्वेन पुरस्कृतः —सम्पादकः ]

## (७) परीक्षासंस्थानां मिथो मतभेदः

संस्कृतशिक्षायां सप्तमी बाधा चेयम्, यत्—संस्कृतपरीक्षासंस्थानां पाठ्येषु नियमेषु च मिथो मतभेदो वर्तते। संस्कृतपरीक्षाणां पाठ्येषु न्यूनाधिकत्वात् कस्याश्चित् परीक्षाया अधिकपाठ्यवत्त्वेन गौरवास्पदत्वं कस्याश्चिच्च न्यूनपाठ्यवत्त्वेन लाघवास्पदत्वं स्थितमेव। एवं स्थिते सति गौरवास्पदभूताया अपि दूरस्थपरीक्षाया निराकृतिस्तु तस्या दूरस्थत्वादेव सिद्धैव। किन्तु निकटस्थपरीक्षायां च यदि पाठ्यस्याऽपेक्षाकृतं न्यूनत्वम्, तदा लाघवास्पदत्वेन तस्या अपि निराकरणं संभवत्येव। तेन परीक्षोत्तरणायैव अधीयानानां संस्कृतशिक्षायां प्रगतिर्विच्छिद्यत एव। परीक्षार्थिनस्तु एवं परीक्षाणां गौरवलाघवयोर्विचारं कुर्वन्तः परीक्षाभ्यो दूरा भवन्त्येव, सहैव परीक्षासंस्था अपि स्वकीयैः संकुचितैर्नियमैः परीक्षार्थिनां संस्कृतशिक्षाविषयिणीं प्रगतिमवरुन्धन्त्येव। यदि कैश्चित् कदाचित् कुतश्चित् कारणात् दूरस्था न्यूनपाठ्यवती परीक्षा समुत्तीर्णा, तर्हि ते न निकटस्थ-गुरुपाठ्यवत्यां तदग्रिमपरीक्षायां प्रवेष्टुमनुमन्यन्ते। तेन संस्कृतशिक्षाविषये प्रगतिं कुर्वतामुत्साहहानिर्भवत्येव। अत एतदावश्यकम्, यत्—सर्वासामपि संस्कृतपरीक्षासंस्थानां पाठ्यनियमने नियमनिर्माणे च साम्यं भवेत्। येन सर्वा अपि संस्कृतपरीक्षाः सर्वत्र समानरूपेण माननीया भवेयुः।

## (८) व्यवस्थाया उपेक्षणम्

संस्कृतशिक्षायामष्टमी बाधा चेयम्—यत्—व्यवस्थाया उपेक्षणम्। आंग्लकालेजेषु एकस्य द्वयोस्त्रयाणां वा विषयाणां विद्वान् स्वानधिकृतान् विषयान् न पाठयितुमनुमन्यते। किन्तु संस्कृतशिक्षायां व्यवस्थाया अस्याः परिपालनं क्वचित् क्वचित् न जायते। कस्यचिद् विषयस्य परीक्षामुत्तीर्य प्रामाणिको विद्वान् भूत्वा स्वानधिकृतविषयमपि पाठयितुं प्रवृत्तो भवति, कदाचित्तु प्रधानपण्डिता अपि तथा कर्तुं लगन्ति, तन्नोचितम्। स्वानधिकृतविषयस्याऽनुचितमध्यापनं सर्वज्ञतादम्भादधिकारमदाद्वा कैश्चित् क्रियतां नाम! किन्तु तस्य परिणामो यः खलु भवति, सोऽनुभविनां न तिरोहितः। स्वानधिकृतविषयस्याऽध्यापने यदा केचित् प्रवृत्ता भवन्ति, तदा तादृशग्रन्थानां सुतरामनभ्यस्तत्वात् पाठ्यमानविषयस्य झटित्यस्फुरणेन पाठनसमये प्रकृतिपतितानप्रासङ्गिकान् 'एँ···एँ···', हूँ···हूँ···'इत्यादिकान् खान् कर्तुं लगन्ति, पुनः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पुनष्टीकापृष्ठानामावर्तनपरावर्तनानि वा कर्तुं प्रारभन्ते, येन उद्वेजिताश्छात्राः अध्यापकपरिवर्तनाय, पत्रपरिवर्तनाय, विषयपरिवर्तनाय वा प्रयतितुं प्रारभन्ते। तस्मिन् प्रयासे छात्राणामध्यापकैश्च वाद-विवादा अपि भवितुं लगन्ति। छात्रेषु अशान्तिरव्यवस्था चोत्पद्यते। एतदपि संस्कृतशिक्षालयेषु छात्रसंख्याया ह्रासस्याऽन्यतमं कारणम्। किन्तु संस्कृतपण्डिता आत्मनः सर्वज्ञतायास्त्रुटिप्रकाशनभिया सर्वमेतत् पश्यन्तोऽपि न पश्यन्ति; हन्त! 'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्' इत्यस्य नाऽयमभिप्रायः, यत्—काणादं पाणिनीयं च शास्त्रं पठितवान् विद्वान् सर्वज्ञो भवति, अपि तु तस्याऽयमेवाऽभिप्रायो यत्—तादृशो विद्वान् सर्वशास्त्रेषु प्रवेशस्य सुयोग्योऽधिकारी भवति। अतो यदि स्वानधिकृतविषयस्य पाठनचेष्टातो विरता भवन्तो व्यवस्थां पालयेयुः संस्कृतविद्वांसस्तर्हि महानुपकारः स्यात् संस्कृतशिक्षायाः।

## (९) व्यावहारिककार्यक्रमाणां नैयून्यम्

संस्कृतशिक्षायां नवमी बाधा चेयम्, यत्—तस्यां व्यावहारिककार्यक्रमाणां नैयून्यमस्ति। छात्रावस्थातो निर्गत्य व्यवहारक्षेत्रं प्रविष्टस्य जीवने कानि कानि कार्याणि न कर्तव्यानि भविष्यन्तीति केन वा वक्तुं शक्यते? अतो विद्यार्थिनः कृते एतदावश्यकम्, यत्—न केवलं पुस्तककीट इव पुस्तकेष्वेव सक्तो न वर्तेत, अपितु स विद्याभ्यसनेन सह लेखनभाषणयोरपि शक्तिं वर्धयेत्, वादविवादयोः प्रौढिमपि प्राप्नुयात्, पत्रपत्रिकाणां सम्पादनेऽपि कौशलमाकलयेत्, व्यवस्थापाटवमपि चाऽर्जयेत्। शरीरस्य दार्ढ्यसम्पादनाय खेलव्यायामादिष्वपि पर्याप्तं भागं गृह्णीयात्। चित्र-संगीत-वाद्य-विनोद-संघटनादिदक्षतामपि यथारुचि स्वीकुर्यात्। एतदर्थं संस्कृतविद्यालयेषु तादृशकार्यक्रमाणामनिवार्यतया सन्निवेशेन भवितव्यम्। संस्कृतविद्यालयैः प्राकृतिकदृष्ट्या ऐतिहासिकदृष्ट्या च महत्त्वपूर्णानां भिन्न-भिन्नबाह्यस्थानानां शिक्षाप्रदै रोचकैश्च कार्यक्रमैः परिपूर्णानि पर्यटनानि शिविराण्यपि च परिमितदिवसानां कृते संयोजनीयानि, येषु संलग्नाः सन्तश्छात्राः कष्टसहिष्णवः, कालोचितकर्तव्यस्फूर्तिशालिनः, स्वावलम्बिनश्च भवितुं शक्नुयुः। तादृशकार्यक्रमाणां योजनया छात्रेषु रुचेः, उत्साहस्य, तत्परतायाश्चाऽपि वृद्धिर्भवति, येन मुख्यविषयेष्वपि आयासमनाकलयन्तः सारल्यं चाऽनुभवन्तस्ते नितरां सफला भवन्ति। अतो व्यावहारिकाणां रोचककार्यक्रमाणां व्यवस्थाऽपि संस्कृतविद्यालयेषु पर्याप्तरूपेण भवेदित्यावश्यकम्।

एवं संस्कृतशिक्षायां वर्तमाना बाधास्तन्निराकरणोपायाश्च संक्षिप्य निरूपिताः। यद्यपि अनिवार्यकार्यान्तरव्यासक्ततया विस्तरभिया च नेतोऽधिकं किंचिल्लेखितुमशक्यत, किन्तु यत् किंचिदप्यत्र लघीयसि लेखे समुपस्थापयितुमपार्यत, तत् संस्कृतशिक्षासदृशस्य गम्भीरस्याऽपि विषयस्य दिग्दर्शनाय पर्याप्तमेव। यदि दर्शितोपायस्वीकरणद्वारा संस्कृतशिक्षायामागतानां बाधानां निराकरणं विधास्यते तर्हि संस्कृतशिक्षायां काठिन्यस्य स्थाने सारल्यम्, एकदेशित्वस्य च स्थाने व्यापकत्वमायास्यत्येव निःसंशयम्। तथा सति तस्याः सर्वोपयोगित्वेन सर्वव्यापित्वमपि पुरेव सेत्स्यत्येव, यद्धि भारतीयस्वातन्त्र्यसुवर्णमयेऽस्मिन् समये परमोचितम्। मन्ये, सेयं सुवर्णे सौरभसंक्रान्तिः संस्कृतस्नेहिनामस्माकं राष्ट्रनायकानां प्रयत्नैर्न चिरात् सम्पत्स्यत एवेति।

इति लघु लघु गुम्फितोऽपि गुम्फः,
प्रथितविचारसुचारुयुक्तियुक्तः।
रुचिरसुरगवीरतिप्रतीतः,
सृजतुतमां सुमनोमनोविनोदम्॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# विहार-प्रान्तीयो जलप्लवः

लेखकः—श्रीमदनमोहनझाः व्या०न्या०साहित्याचार्यः मुजफ्फरपुरस्थराजकीयसंस्कृतमहाविद्यालयस्य साहित्यप्रधानाध्यापकः

सुभग-सस्यसमृद्धि-सुशोभिता, कृषक-कोटि-परिश्रम-साक्षिणी ।
विधि-वशेन, कराल-जलप्लवैर्जलधितामगमत्सहसा क्षितिः ॥ १ ॥
कृत-जलप्लव-हीन-समुन्नत-स्थल-महावसतिर्जन-सन्ततिः ।
सतत-वृष्टि-विपन्नतया, तदा, मरणमेव वरं स्वममन्यत ॥ २ ॥
विविध-दुस्सह-कष्ट-शत-व्यथाविलुलिता, निरुपायतया पुनः ।
कतिपये, न, जले प्रचुरे स्थितान्यपि निजानि गृहाणि जिहासवः ॥ ३ ॥
निज-जनैरपि जातु न याः पुरा परिचिता भवनाङ्गण-गोचराः ।
अहह ! ता ललिताः कुलनायिकाः, प्रतिपथं पथिकैरपि वीक्षिताः ॥ ४ ॥
क्वन वारि निमज्ज्य महाद्रुमाः, क्वचिदश्व-वराह-मृगादयः ।
क्वचिदसीमबला वर-वारणा, अपि वहन्त इहैव विलोकिताः ॥ ५ ॥
कति गृहाण्यपतन्, कति शीर्णतामकलयन् पशवो. बहवो मृताः ।
कति निलीय, जले मनुजा गताः, प्रणयि-लोचन-नीरनिदानताम् ॥ ६ ॥
कति च सर्प-समूह-समाश्रितानपि तरून् तरुणास्तरलान्तराः ।
समधिरुह्य, भय-स्खलिताङ्घ्रयो, निपतिताः सलिले विलयं गताः ॥ ७ ॥
निजनिवास-विनाश-पलायिता, विषधरा भुजगा भुवि भीषणाः ।
विदधतो भ्रमणं व्यदधुर्बहून्, गुणिजनानपि हा ! स्मृति-गोचरान् ॥ ८ ॥
धृत-नवीन-विवाह-परिच्छदा, मधुर-भाव-विभावित-मानसाः ।
प्रचलिताः श्वशुरालयमुद्धुराः पथि निमज्ज्य मृता बहवो नराः ॥ ९ ॥
स्थितमदो जल-संप्लव-संभवं, विषम-दृश्यमदृश्यचरं चिरम् ।
यदुदिता धन-धान्य-जन-क्षतीः, शत-समा नहि पूरयितुं क्षमाः ॥ १० ॥
कतिजना युवका अपि निर्धना, वपुरहासुरपार-बुभुक्षया ।
क्षुधित-मातृ-पयो-विरहेण हा ! कति न चारु-रुचः शिशवो मृताः ॥ ११ ॥
अथ चिराद् विगते जल-संप्लवे, भवति रोगचयः प्रकटोदयः ।
गुरुतरो निज-कारणतोऽपि यो, विवश-मानव-संहरणे मतः ॥ १२ ॥
सपदि सा प्रसृता प्रलयङ्करी, ज्वर-सगोत्र-विकार-परम्परा ।
कवलिता विलयं बहवो गता, असमये शमन-प्रियया यया ॥ १३ ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# विक्रमः सम्राट्

लेखकः—महोपाध्यायपं० वासुदेवशास्त्री वागेवाडीकर साहित्याचार्यः, काव्य-वेद-तर्क-तीर्थः शोलापुरम्

## कालो हि सर्वभक्षकः

कालवशतो जगति जगदुद्धारका महात्मानः शूरधीरा दयापराः सहृदयाः, तेषां महान्ति कृत्यानि च विश्वोद्धारकाणि न केवलं दृष्टिपथातीतानि विस्मृतिपथं प्राप्तानि भवन्ति। स्मृतावपि न किञ्चिदवशिष्यते। अतएव "कालो हि सर्वभक्षकः" इत्युच्यते। तथा हि 'शालिवाहनशके' इति प्रत्यहं संकल्पप्रसंगे बहोः कालात् उच्चार्यमाणः शालिवाहनशकानां हन्ता वैदिकधर्मसंस्थापको वर्धमानप्रवर्तकः कदा क च सञ्जातः। किं वा वीरायितं तेन। तादृशः कश्चिद्राजा अभून्न वा। शकः कस्य नाम। स्वकीयोऽयं परकीयो वा। इत्येतद् यथार्थतया वक्तुं न सुशकम्। अनुमानप्रमाणबलादेव निश्चीयते। एवमेव संवत्सरस्य कर्ता सम्राड् विक्रमादित्योऽपि क्व कदा च जातः। कियद्वा तस्य राज्यम्। कियन्ति वा दिनानि स पृथ्वीमशात्। एवमादि आख्यानं विपर्यस्तात् पुरावृत्तादेव समाहृत्य चरित्रलेखनं संपादयितव्यम्।

सम्राजं विक्रमादित्यं समुद्दिश्य इतिहासविदां विदुषां नैकमत्यम्। उज्जयिन्या हर्ष एव विक्रमादित्यः इति, फर्ग्यूसननामा पण्डितः प्राह। तं च मोक्षमुल्लरोऽनुमोदते। तदनुरोधात कञ्चित् कालं तदेव मतमनुमन्यमाना भूयांसो विद्वांसः समभवन्। ... मधुना न कोऽपि तदनुमोदते।

## द्वितीयश्चन्द्रगुप्तः किं विक्रमादित्यः?

एकस्मिन् शिलालेखे "क्षितिमविजित्य सुचरि... दिवं जयति विक्रमादित्यः।" एवं लिखितं वर्त... अपरस्मिन् "नरेन्द्रचन्द्रः प्रथितश्रिया' दिवं, जय... जेयो भुवि सिंहविक्रमः॥"

एवं निगदितम्। केषुचित् सुवर्णनाणकेषु "पर... भागवतमहाराजाधिराजश्रीचन्द्रगुप्तः" इति वर्तते तेषामेव पृष्ठभागे "अजितविक्रमः" इति मुद्रि... वर्तते। अन्येषां रौप्यनाणकानामुपरि निर्दिष्टादपि "श्रीगुप्तकुलस्य महाराजाधिराज-श्रीचन्द्रगुप्त-विक्रमाङ्कस्य" इति विद्यते। एवं शिलालेखेभ्यो नाणकेभ्यः अपरस्मारकेभ्यः प्रथितयशाः विख्यातो महावीरो द्वितीयोऽद्वितीयश्चन्द्रगुप्त एव विक्रमादित्य इ... निश्चेतुं शक्यते इति विज्ञाय पाश्चात्यपौर्वात्य... पण्डितानां मनसि महान् हर्षः समुत्पन्नः। चिरेण ... संशोधनश्रमसाफल्यं प्राप्य कञ्चित् कालमात्मा... कृतकृत्यं मेनिरे। परमचिरेणैव कालेनैवं प्रतीतं ... गुप्तवंशीयेषु निखिलेषु शिलालेखेषु नाणकेषु ... गुप्तसंवत्सरस्योल्लेखो विद्यते न तु विक्रमसंवत्सरस्य...

---

आरुह्याकाश-यानं द्रुत-गति, कतिधा शासकैर्भारतस्य,
लोकानां शोक-दावानल-विकल-हृदाम्, दुर्दशा दृश्यते स्म।
साहाय्यं चाप्यदायि स्वजन-धिषणया, भोज्य-भैषज्य-वस्त्रैः,
यद्यप्येतन्न मिथ्या, परमिह जनता-दुर्गतेर्नास्ति शान्तिः॥१४॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अयं चन्द्रगुप्तोऽपि विक्रमादित्यपदं बिभर्ति स्म। न स तत्त्वतः संवत्सरस्य कर्ता विक्रमादित्यः। यदि स सत्यमेव संवत्सरस्थापको विक्रमादित्योऽभविष्यत् तत्तच्छिलालेखादिषु तस्यैव संवत्सरस्य निर्देशोऽभविष्यत्। तस्य पिता समुद्रगुप्तो व्याघ्रपराक्रम-पराक्रमाङ्क-इत्यादीनि तदीयवंशजाः स्कन्धगुप्तादयोऽपि विक्रमादित्यादीनि च पदानि अबिभरुः, इति इतिहासाज्ज्ञायते। एवं च द्वितीयश्चन्द्रगुप्तो न विक्रमादित्यो न वा संवत्सरस्य कर्ता।

## किं सातवाहनो विक्रमादित्यः ?

कश्चित् प्रथितकीर्तिर्भारतीय इतिहासज्ञः प्राह—"सातवाहनेनैव विक्रमादित्येन भवितव्यम्" इति। परमपरे तन्न सहन्ते। यतः क्रिस्ताब्दस्य सप्तदशशतके लिखिते प्रभावकचरिते नाम जैनग्रन्थे कालकाचार्यकथा वर्तते। तदनुरोधात् सातवाहनः शककर्ता संवत्सरस्य कर्ता विक्रमादित्य इत्येतत् यत् प्रतिपाद्यते तत् कथं वा प्रमाणकोटिमभ्यारोहति। इति निर्णेतुं सा कथाऽत्रावश्यमनुसन्धातव्या।

## कालकाचार्यकथा

पुरा धारानगर्यां वीरसिंहो नाम राजा बभूव। तस्य कालकनामा पुत्रः सरस्वतीनाम्नी च कन्यकाऽऽस्ताम्। केनचित् कालेनैतौ सूरिगुणाकरनाम्नो भिक्षोरुपदेशात् प्रव्रजितौ। गुणाकरस्यानन्तरं कालकस्तस्य मठस्याधिपतिरभूत्। एकदा स कालकाचार्यः स्वभगिन्या सह पर्यटन् उज्जयिनीं प्राप। तदा गर्दभिल्लो नाम भूपो विषयलोलुपः शशासोज्जयिनीम्। एकदा तत्र नगरे भिक्षार्थं पर्यटन्ती भिक्षुवेषधारिणी चारुगात्री सरस्वती कामासक्तस्य तस्य नयनाभिमुखी बभूव। तल्लावण्यापहृतचेताः स नृपस्तां विरक्तां विरक्तः सन् बलाज्जग्राह। कालकाचार्येण बहुशोऽनुनीतोऽपि स कामी सरस्वतीं यदा न कथञ्चिदपि त्यक्तुमना बभूव तदा कालकाचार्यः "इमं भूपतिं समूलमुत्सादयिष्यामि" इति प्रतिज्ञाय सिन्धुदेशं जगाम। तदा सिन्धून् षण्णवतिः शकसामन्ता अशासुः। तेषां सर्वेषामेकतमः शकः सम्राडासीत्। एकतमः सामन्तोऽचिरादेव कालकाचार्यस्य सख्यमुपगतः। ततः केनचित् कालेन स सामन्तः शकसम्राजोऽपरागतां प्राप्तः। सम्राजः सकाशात् अत्याहितमाशङ्कमानः स कालकप्रेरितः सौराष्ट्रान् प्रति निशायां निभृतं पलायामासे। तदनु अन्येऽपि शकसामन्ता बहवस्तत्र गताः। तत्र सौराष्ट्रेषु सर्वत्र ते सर्वेऽपि स्वं स्वं राज्यं स्थापयामासुः। अनन्तरं कालकाचार्येण प्रचोदितस्तस्य परमसुहृच्छक उज्जयिनीमभीयाय। कालकाचार्योपदिष्टमुपायमवलम्ब्य गर्दभिलं स पराजिग्ये। उज्जयिनीतोऽपक्रान्तो गर्दभिलो वने व्याघ्रेण भक्षितः। अनेन कालकाचार्यस्तस्माद् दुर्नृपात् स्वभगिनीं मोचितवान्। ततः स शक उज्जयिनीं शशास। अथ केनचित् कालेन विक्रमादित्यो नाम राजा तं पराजयत। अस्य विजयस्य स्मृतिचिन्हमिति स्वीयः संवत्सरः स्थापितः। तदनन्तरं पञ्चत्रिंशदधिकैकशते वर्षेषु गतेषु शकैर्विक्रमादित्यस्य वंशजान् विजित्य स्वीयं च राज्यं भूयोऽधिगतं स्वीया च कालगणना स्थापिता।

सप्तदशशतके निर्मितेऽप्यस्मिन् काव्ये ऐतिह्यं वर्णनं यथार्थतां भजत इत्यत्र नास्ति सन्देहः। क्रिस्ताब्दात् पूर्वं प्रथमे शतकार्धे शकाः सिन्धुदेश-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मशासुः । तस्मिन्नेव समये एते कञ्चित् कालमुज्जयिनीमप्यध्यासामासुरिति प्रतीयते । तेन हि क्रिस्ताब्दात् प्राक् सप्तपञ्चाशत्तमे (५७) वर्षे विक्रमादित्यः शकान् विजित्य संवत्सरं स्वीयं स्थापितवान् इति शक्यत आश्वासयितुम् ।

## विक्रमादित्य एव नासीत्

"विक्रमो नाम कश्चिद्राजा एव नाभवत् ।" विक्रमस्य कालो नाम युद्धस्य कालः । शरदि सर्वे राजानो युद्धाय यात्रां कुर्वन्ति स्म । शरत्काल एव विक्रमसंवत्सरस्य प्रारंभः । तेन न केनापि राज्ञाऽयं संवत्सरः स्थापितः ।" एवमादि किलहार्नादयः केचित् पण्डिताः प्रतिपादयन्ति स्म । परमेतत् तेषां केवलं तर्ककर्कशदुर्धीत्वम् । नान्यत् । यतो विक्रमादित्यपदं बिभ्राणा नैके राजान इतिहासे दरीदृश्यन्ते । अन्यच्च ऋतुनामतः संवत्सरस्य (वर्षगणनायाः) प्रवृत्तिर्जातेति न श्रद्धेयम् ।

अन्ये केचन प्रजल्पन्त्येवम्—"अयं विक्रमसंवत्सरः क्रिस्ताब्दात् पूर्वं सप्तपञ्चाशत्तमेऽब्दे केनापि प्रथितयशसा राज्ञा प्रवर्तितः । परं तदानीं न कोऽपि विक्रमादित्यो नाम भारतीयो भूपो भूतः समुपलभ्यते । तस्मात् तदा पञ्चनदप्रान्ते राजपदमलंकुर्वाणेन असेसनाम्ना पारसीकाधिपतिना विक्रमार्जितसत्वेन संवत्सरस्यास्य प्रवर्तकेन भवितव्यम् ।" असेसनृपेण तदेकः संवत्सरः प्रवर्तित इत्येतद् यद्यपि सत्यम् । तथापि स तस्यैव नाम्ना प्रचलित इति शिलालेखतो विदितं भवति । तथा च अस्य संवत्सरस्य प्रवर्तकः कुशानभूपः कनिष्कः स्यात्" इत्येतदपरेषां मतं प्रमाणविरहात् सर्वथोपेक्षणीयम् । यतः स भूपतिरष्टसप्ततितमे क्रिस्ताब्दे बभूव ।

## क्रान्तिकालः

विक्रमसंवत्सरस्यारम्भकालो भारते क्रान्तिपूर्ण आसीत् । तदा जना धर्माघातेन संक्षुब्धाः । परचक्रेण प्रमथिताः । भाषाविप्लवेनाकुलीभूताः । भूयो भूयो राज्यतन्त्रं सर्वमपि विक्लवीभूतम् । क्रान्तिस्त्रीदृशी वर्तते । एकदा सा कमपि विषयमनुप्रविष्टा ततो न चिरादेव सा सर्वानपि विषयान् समतिक्रामति । क्रिस्ताब्दात् प्राक् पञ्चशतकादारभ्य क्रिस्ताब्दस्य चतुर्दशशतकं यावत् भारतीया एतादृशैरुपप्लवैरुपप्लुता । एकस्मिन् पक्षे आन्ध्रशुंकण्वादयो वैदिकधर्मानुयायिनो राजानः, अन्यस्मिंश्च शककुशानप्रभृतयः परधर्मीयाः । अस्मिन् समरप्रसङ्गे क्वचित् प्रथमः पक्षः क्वचित् अपरः पक्षो विजयते स्म । प्रायशः पर एव प्रबलतरा आसन् । परेषामस्मिन् आक्रमणे प्रायेण भारतानां समृद्धतो एव कारणम् । क्वचिद् धर्मप्रसारोऽपि । एते आक्रमका यवना अथवा उत्तरदेशस्था मंगोलीवंशजा अभवन् । मंगोलीवंशजास्तु बौद्धा अवर्तन्त । शुङ्गाः सनातनवैदिकाः । तेषु भारतभुवं प्रशासत्सु बौद्धा अत्र बौद्धधर्मप्रसारायावकाशमपि नालभन्त । विशेषतस्तु पुष्यमित्राधिष्ठितायां भारतभूम्यां बौद्धानां विहारभिक्षुमठादयो निकृतिं गताः । अयं पुष्यमित्रो बौद्धग्रन्थे "मञ्जुश्रीमूलकल्पान्त" इत्येवं न्यक्कारपूर्वकं संबोधितः । इदं कुलं दुर्दैववशात् कुशानैरुत्सादितम् । एतैर्बौद्धधर्मं पुरस्कृत्य वेदोक्तधर्मः उत्सादितः । क्रिस्ताब्दस्य प्राक्तने शतके एकतो वैदिकधर्मः अन्यतो बौद्धधर्मः इति चिरं सुमहान् संघर्ष आसीत् । ग्रीकयवनादयोऽपि बौद्धधर्मं निमित्तीकृत्य भारतीयैर्वैदिकैः क्षत्रियैः समं सुचिरं युयुधिरे । एतस्मिन्नेव समये कालकाचार्यप्रेरिताः शका अपि कलहयाञ्चक्रिरे । सा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कथा प्रागेवोक्ता किल। यथा पानपतसमरप्रसङ्गे महाराष्ट्रियाणामुत्सादनाय महमदः अबदालिः आहूतस्तथैवैते शकाः। आस्तां नामैतत् तावत्।

## धर्मप्रचारः

बौद्ध-जैन-यवनाः परंपरागतान् सनातनान् वैदिकधर्माचारविचारान् परिवर्तयमानाः स्वं स्वं धर्मं प्रख्यापयन्तः सर्वात्मनाऽऽसन्। तदा वैदिकधर्माभिमानिनः सर्वे राजानो धर्माचार्याश्च एकचित्तीभूय धर्मनिकरं सनिकरं परावर्तयामासुः। जयनामा मूलग्रन्थो व्यासेन प्रणीतो वैशम्पायनेन भारतरूपेण कथितः सौतिना महाभारतनाम्ना प्रख्यापितोऽस्मिन्नेव काले। तस्मिन्नेव समये मनुस्मृतिरपि संस्कृता इति विदुषां मतम्। तदा धर्मप्रसाराङ्गमिति यथा धर्मसूत्रस्मृत्यादयो ग्रन्था निर्मितास्तथा येभ्यश्चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ते काव्यनाटकादयः सुललिता ग्रन्था अपि रचिताः। तदा जना अपि शूरा धर्मप्रवणा विलासप्रिया नाट्यनर्तनगायनचित्रकलाभिज्ञा वास्तुशास्त्रनिष्णाता भूयांसोऽभूवन्। मालविकाग्निमित्रविक्रमोर्वशीयशाकुन्तलनाटकानां कर्ता रघुवंशकुमारसंभवादिकाव्यानां रचयिता कविकुलगुरुः कालिदास एतस्मिन्नेव समये बभूव।

## जनभाषा

क्रिस्ताब्दात् पूर्वं पञ्चशतसंवत्सरादारभ्य क्रिस्ताब्दस्य पञ्चशतसंवत्सरान् यावत् लोकव्यवहारविषयीभूता भाषा का वाऽऽसीत् इति विचारोऽप्यस्य विषयोपकारको भवेत्। तदा जना न संस्कृतभाषया सर्वत्र व्यवहरन्ति स्म। अपि तु प्राकृतभाषाभिः। ततोऽपि प्राक् संस्कृतभाषाऽऽसीद् व्यवहारभाषा। तासु प्राकृतभाषास्वपि आख्यानाख्यायिकेतिहासादयः भूयांसो ग्रन्थाः केचिद् धर्मपरा अपि रचिता दृश्यन्ते। तासु गुणाढ्यस्यैको बृहत्कथानामकः पैशाचीभाषया लिखितो विद्यते स्म। बृहत्कथायां निखिलाः कथा विद्यन्ते। यद्यप्ययं ग्रन्थः संप्रति प्रत्यक्षतया नोपलभ्यते तथापि तस्यैवानुवादभूतौ क्षेमेन्द्रसोमदेवयोः संस्कृतग्रन्थौ उपलब्धिं गतौ वर्तेते। नैकसंस्कृतवाङ्मयानां तदुत्तरकालीनानामियं बृहत्कथा बहूपकरोति खलु। एषा पैशाच्यां नाम प्राकृतभाषायां लिखिता वर्तते। विक्रमसंवत्सरस्य प्रवर्तकः को वा तस्य च कथा का वा एतत् सर्वमस्माद् ग्रन्थात् तथा च तदनुवादभूतात् कथासरित्सागरात् समुपलभ्यते। अनेन नूनं प्रतीयत एतत् यद् विक्रमादित्यो नाम सम्राट् क्रिस्ताब्दात् पूर्वं बभूव स चैव संवत्सरस्य कर्ता।

## कृतमालवसम्वत्सरः

एवं स्थितेऽपि यथा-यथा पुरातनलेखा आपाततो विलोक्यन्ते तथा-तथा विक्रमादित्येनायं संवत्सरगणनारम्भः कृतः इति मतिः शनैः शनैः क्षीयते। विक्रमसंवत्सरस्य दशमशतकगतानां चतुस्त्रिंशतः लेखानां द्वात्रिंशति शिलालेखेषु विक्रमस्य अन्यस्य वा कस्यापि कालस्य निर्देशो नास्ति। विजयपुरे समुपलब्धस्य राष्ट्रकूटविदग्धराजस्य शिलालेखे "मालवकालाच्छरदां षट्त्रिंशत्संयुतेष्वतीतेषु" इति मालवकालस्येयं कालगणना संसूचिता।

नवमशतकान्तर्गतेषु समुपलब्धे दशसु लेखेषु एकतम एव लेखे विक्रमस्य नाम समुत्कीर्णम्। "वसुनवाष्टौ वर्षगतस्य विक्रमाख्यस्य" इति। इतरेषु केवलैवं कालगणना समुत्कीर्णा।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



क्रिस्ताब्दस्य सप्तमशतकात् प्राक्तना: शिलालेखा निरीक्षिताश्चेत् अन्यस्य कस्यचिदियं कालगणनेति प्रतीतं भवति। मन्दसौरस्थे समुपलब्धे लेखद्वय एवं समुत्कीर्णम्।

"मालवानां गणस्थित्या याते शतचतुष्टये।
त्रिनवत्यधिकेऽब्दानां ऋतौ सेव्यघनस्तने ॥१॥"

"मालवगणस्थितिवशात्
कालज्ञानाय लिखितेषु॥२॥"

अन्यच्च तत्रैव एवं वर्तते—

'श्रीमालवगणाम्नाते प्रशस्ते कृतसंज्ञिते।
एकषष्ट्यधिके प्राप्ते ऋतौ सेव्यधनस्तने॥'

एतैः शिलालेखैरियं मालवराज्यस्य कालगणना स्यादिति प्रतीतिर्भवति। तथा 'च-इतोऽपि पूर्वेषु शिलालेखेषु मतिः सञ्चारिता चेदियं कालगणना-कृताभिधाना निरूढाऽनुभूयते।

१. नागरीस्थः—"कृतेषु चतुर्षु वर्षशतेषु एकाशीत्युत्तरेषु अस्यां मालवपूर्वायाम्"।

२. गङ्गाधरस्थः—यातेषु चतुर्षु कृतेषु शतेषु-अशीत्युत्तारेषु"।

३. भरतपुरराज्यान्तर्गतविजयगडस्थो लेखः—"कृतेषु चतुर्षु वर्षशतेष्वष्टाविंशेषु।"

४. उदयपुरराज्यान्तर्गतनान्दसाग्रामस्थो यूपलेखः-'कृतयोर्द्वयोर्वर्षशतयोर्द्व्यशीतयोश्चैत्र पौर्णमास्याम्।'

एवं नैकशिलालेखैर्यूपलेखैः क्रिस्ताब्दस्य सप्तमशतकात् प्राचीनैरुपलब्धैर्विक्रमादित्यः संवत्सरस्य प्रवर्तक आसीदिति निश्चेतुं न शक्यते। प्रत्युत तैर्लेखैरेवं ज्ञायते या विक्रमगणनेति पश्चात् प्रसिद्धिं गता सैव तदा 'मालवगणना' 'कृतगणना' इति निर्दिश्यते स्म इति केषांचिदितिहासविदां पण्डितानामभिप्रायः। इति चेदुच्यते-संप्रति समुपलब्धैः प्रमाणैः क्रिस्ताब्दात् पूर्वं सप्तपञ्चाशत्तमे वर्षे विक्रमो-नाम सम्राड्बभूव। तेन संवत्सरगणना प्रवर्तिता। पश्चादियमेव कालगणना मालवकालगणनेति नाम्ना प्रसिद्धिं गता। तदा मालवानां राज्ये विक्रमगणनेयं विशेषतः प्रचलिताऽऽसीत्। अतो मालवैः स्वीकृत-कालगणनायाः स्थित्या नाम पद्धत्या इति शिलालेख-स्थस्य वर्णनस्याशयो वर्तते। तेन हि नेयं मालवैः प्रस्थापिता कालगणना। तथा च "कृतकालगणना" इत्यत्र कृतशब्दस्य कृतकइत्यर्थः कैश्चित् पण्डितैः प्रतिपादितः। तदनुरोधात् कृतका अविद्यमाना काल-गणनेयमिति तैर्यदुच्यते तत्सर्वथा विचारासहम्।

"कृतगणना" इत्यत्र अस्य कृतस्य नाम कस्यचिन्मालवगणराज्यस्य प्रमुखस्य, अथवा राज्ञो गणना" इत्यर्थतो विक्रमगणनैव मालवेषु कृतगणनेति प्रसिद्धाऽभवत्। इत्यपरस्यात्र समाधानम्।

इयमेव कालगना विश्रान्तदिगन्तकीर्तेः प्रथितविक्रमादित्यापरनाम्नो द्वितीयचन्द्रगुप्तस्य समये पुनर्विक्रम-संवत्सर इति नामान्तरं भेजे।

## जैन-ग्रन्थाः

जैनग्रन्थेषु विक्रमादित्यस्य वृत्तान्तो वर्णितः समुपलभ्यते। तत्र विक्रमसंवत्सरात्पूर्वमष्टचत्वारिंशदधिक-पञ्चशततमे वर्षे वीरनिर्वाणं जातमिति वर्णितम्। पर वीरनिर्वाणविषये श्वेताम्बरदिगम्बरयोर्नैकमत्यम्। अन्यच्च। [एते ग्रन्था न तथा प्राचीनाः। अतएव न ते प्रमाणकोटिमधिरोहन्ति। तथा च विक्रमादित्यस्यायुः क्रमोऽपि जैनगाथाकृद्भिर्वर्णितः।

तत्रानेन पञ्चदशवर्षानन्तरं जिनानुयायित्वं स्वीकृतमिति यन्निगदितं तत् सर्वथा वितथम्। यतः स ज्ञान-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# पाश्चात्यदृशा आयुर्वेदस्वरूपम्

वाल्टर हार्डिंग मौरर

[ मि० वाल्टर हार्डिङ्गमौररमहाशयः वाशिङ्गटनस्थित- 'लायब्रेरीआफ-कांग्रेस' संस्थाया भारतीयविभागे कार्यं करोति । अयं फुलब्राइटच्छात्रवृत्तिमादाय भारते संस्कृतभाषाया उच्चाध्ययनार्थमागतः सांप्रतं पूनायां पठति। अयं तस्य लेखः पुण्यपत्तनीय 'आयुर्विद्या' नाम्न्यां पत्रिकायां प्रकाशितः । तत एवेह वैदेशिकविदुषः सांस्कृतं ज्ञानं विज्ञापयितुं भारतीपाठकेभ्य उपह्रियते ।]

यदा सप्ताहत्रयात्प्रागहं पण्डितप्रवरैर्मार्तण्डदीक्षितैरादिष्टः आयुर्वेदमहाविद्यालयस्य विद्यार्थिनां कृते देवभाषायां भवता व्याख्यातव्यमिति, तदा सपद्यतीव सन्तुष्टः सन्त्रस्तश्चाऽहम । परन्तु अस्य सन्तोषसन्त्रासमिश्रीभावस्य किं कारणमिति सर्वे भवन्तः साश्चर्यां विचारयेयुः । तस्मादस्य चित्तवृत्तिद्वैतस्य कारणं मया स्पष्टीकर्तव्यम् । यद्यपि संस्कृतां भाषां कतिपयसंवत्सरान् पठितवानहम्, तथाऽपि वैदेशिको भवामि । मम देशे संस्कृता भाषा श्रोतुं कदाचिन्न शक्यते, नोपयुज्यते च । किन्तु तत्र विविधेषु विश्वविद्यालयेषु उत्कृष्टतम गुरूणां सन्निधौ सम्यगध्येतुं शक्या । तत्र च प्रभूत महान्तो ग्रन्थाल[illegible] सन्ति यत्र भारतवर्षस्येतिहास साहित्यादिप्रन्थानां विपुलाः संग्रहा विद्यन्ते । अ[illegible] अमेरिकादेशस्य महत्तमे ग्रन्थालये उद्यमं करोमि यस्मिन् चतुर्लक्षसंख्याकानि भारतवर्षसंस्कृतविषयाणि पुस्तकानि विद्यन्ते । आङ्ग्लभाषायामस्य ग्रन्थालयस्य नाम "लायब्रेरी ऑफ कांग्रेस" इति भवति । अयं महाग्रन्थालयः अष्टशताधिकसहस्रतमे (१८००) संवत्सरे स्थापितः । तदा अस्माकं राष्ट्रियपरिषदः सदस्यमात्रै रुपयोक्तव्य आसीत् । परन्तु गच्छता कालेन यथे प्रतिष्ठानमवर्धत तथा शनैःशनैः सर्वैः अमेरिकादेशी यजनैः प्रायः उपायुज्यत। तेन "लायब्रेरी ऑफ कांग्रेस इति अन्ताराष्ट्रीयपुस्तकालयः सम्भूतः । यदि कश्चि अमेरिकादेशवासी भारतीयसंस्कृतेः काञ्चित् शाखाम ध्येतुमिच्छति तर्हि तस्य तदतीव सुलभम् ।

परन्तु यथा पूर्वमुक्तं विदेशे संस्कृतां भाषां भाषितु न कोऽपि अवकाशः तस्मादहं संस्कृतभाषायाः वक्ता न भवामि । अतीतकाले एकवारमेव देवभाषायां व्याख्या तवानहम् । गणेशमहोत्सवप्रसंगे तिलकमहाराष्ट्रविद्या पीठे मेघदूतविषयकं भाषणं कृतवान् । तस्मात् कारणात् भवन्तः, हे सूक्ष्मबुद्धयः सुहृदः, मम भाषणे दोषा श्रुत्वाऽपि मम वैदेशिकत्वं स्मरन्तु करुणां च प्रदर्शयन्तु इदं मम सन्त्रासस्य कारणम् ।

---

एवं महान् विष्णुभक्त आसीत् इत्येतत् प्रमाणान्तरैः सिध्यते ।

पुरावृत्तविदः पुरा "विक्रमादित्यो नाम कश्चिद्राजाऽऽसीत् । तेनेयं कालगणना प्रवर्तिता ।" इत्येव स्वीकर्तुं नोत्सहन्ते स्म । परं तादृशी तेषां मतिः संप्रति न विद्यते । तेनेदानीमेवं स्थितम् । क्रिस्ताब्दात् पूर्वं सप्तपञ्चाशत्तमे वत्सरे संवत्सरस्य कर्ता शकानां संहर्ता वैदिकधर्मं पुनरुज्जीवयिता कश्चन सम्राड् बभूव नूनम् । स चोज्जयिन्या अधिपतिर्विक्रमादित्य एव । नात्र सन्देहलवोऽपि ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


अस्मिन् व्याख्याने मदीयस्य सन्तोषस्य किं कारणम् ? भारतीयवैद्यकशास्त्रस्य अध्ययनं मह्यम-तीव रोचते। यतः प्रभृति तानि आयुर्वेदबीजधारीणि अथर्ववेदसूक्तानि मया विश्वविद्यालये अधीतानि, ततः प्रभृति भारतीयचिकित्साविद्यायामासक्तोऽहम। येषु दिनेषु भारतवर्षे मद्गुरोरवस्थानवशात फिलडेल्फिया नगरे विद्यमानं फेन्सिलवेनियाविश्वविद्यालयं त्यक्त्वा तेषां सूक्तानां पठननिमित्तंप्रिन्स्तनविद्यालयो मया गन्तव्य आसीत्, तानि दिनानि कदाचिद् न विस्म-रिष्यामि। कौशिकसूत्राणि त्रिभागैर्युक्तानि त्रिभिः विद्यार्थिभिः साकमधीतानि। समागतानामस्माकं सन्तोषजनकाः ते संस्काराः विनष्टुं नाऽर्हन्ति। भारतीयचिकित्साविद्यायाः मूलभूतानां पुरातनतमा-नामथर्ववेदसूक्तानां पठनात् वैद्यकशास्त्रे कौतूहलं मे जातम्। तस्मात् आयुर्वेदमहाविद्यालये व्याख्यानं ददातु भवानिति संसूचनेन मम मनसि प्रभूतः संतोष उद्भूतः। परन्तु आयुर्वेदविषयः मया केवलं मनो-विनोदार्थमधीतः तेन अत्र भवतां पुरस्तात् भयेन शङ्कितेन च मनसा तिष्ठामि। सर्वे भवन्तः आयु-र्वेदविद्यार्थिनः वैद्या आयुर्वेदपारङ्गताश्च। अहं तु संस्कृतभाषासाहित्यस्य छात्रमात्रोऽस्मि। तेन—

प्रमाणसिद्धान्तविरुद्धमत्र
यत्किञ्चिदुक्तं मतिमान्द्यदोषात्।
मात्सर्यमुत्सार्य तदार्यचित्ताः
प्रसादमाधाय विशोधयन्तु ॥

इति हेमाचार्यविरचितवचांसि स्मरन्तु इति याचे। संवत्सरद्वयात् प्राक् अहं विल्यम्सवर्ग इति नामकं अमेरिकादेशस्थं नगरं गतः यत्र जेफर्सन्, वाशिंगटन इत्यादयः धीरोदात्ताः पुरुषाः अस्मदीयस्वतन्त्रता-निमित्तं नक्तंदिवं प्रायतन्त। यत्र च अमेरिकेतिहा-सस्य पुराणकाले अब्दशतद्वयात् पूर्वं निर्मितानि गृहाणि भवनानि तथा च ब्रिटिशराज्यपालहर्म्यंस्था-नीयया ऐतिहासिकपरिषदा पूर्वस्थितिं प्रापितं रक्षितं च। पुराणमूलशिलायां कृतं नापितस्य आपणं यदृच्छयाऽहं प्रविष्टवान् यत्र अमेरिकादेशीयस्य पुरातनमौण्डिकस्य सर्वेषामुपकरणानां सविस्मयं निरीक्षणं कृतवान्। भूतकाले नापिताश्च केवलं केशान् अच्छिन्दन् श्मश्रूं च अतुलन् ( यथा अधुना मम देशे ), परन्तु तैः कृत्रिमकेशाः संस्कृताः संचूर्णश्च क्रेतॄणां मुखोपकेशेषु व्यक्तम्। विशेषतश्च तैः रुग्णो-पचारनिमित्तं शस्त्रकर्माणि कृतानि। वैद्योपचारस्मर-णार्थं पाश्चात्यदेशेषु नापितापणानां पुरस्तादेकः स्तम्भः द्रष्टुं शक्यते यः श्वेतरक्तवर्णरेखाभिः पट्टशोणितस्था-नीयाभिः सम्पन्नः सर्वजनान् पुराकालीननापितस्य व्यापारं स्मारयति। विल्यम्सवर्गनगरस्थे नापितस्य आपणे तेषु शस्त्रकर्मसु प्रयुक्तानि उपकरणानि दृष्टवान्यथा आरात्सन्दंशकरपत्रसूचिशलाकादीनि तथैव च नानाप्रकारौषधगर्भभाजनखल्लभाण्डकाच-पात्रादीनि कतिपयांश्च कुम्भान् जलौकसधारणनिमि-त्तमुपयुक्तान् दृष्टवानहम्। एतान् कुम्भान् दृष्ट्वा सुश्रुतसंहितायां विद्यमानः जलौकावचारणीयपरि-च्छेदो मनसि उद्भूतः। तत्र सुश्रुतः शोणितावसे-चनार्थं जलौकसां प्रयोजनमुपदिशति। यथा—

"नृपाढ्यबालस्थविरभीरुदुर्बलनारीसुकुमाराणाम-नुग्रहार्थं परमसुकुमारोऽयं शोणितावसेचनोपायोऽभि-हितो जलौकसः" इति। सुश्रुत सू० १३। ३

द्वादशजलौकसः षट् सविषान् षट् निर्विषांश्च गणयित्वा तेषां प्रग्रहणं प्रयोजनं च यथा—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



तासां ग्रहणमार्द्रचर्मणा, अन्यैर्वा प्रयोगैर्गृह्णीयात्।
...तः नवे महति घटे सरस्तडागोदकपङ्कमावाप्य
...ष्यात भक्ष्यार्थे चासामुपहरेच्छैवालवल्लूरमौद-
...ंश्च कन्दान् चूर्णीकृत्य, शय्यार्थं तृणमौदकानि च
...ति' इत्यादि सु० सू० १३। १७
...शोणितावसेकार्थं सुश्रुतः गोश्रृङ्गस्य प्रयोगमपि
...ति । तत्राग्रे तनुवस्त्रपटलावनद्धेन श्रृङ्गेण
...तमवसेचयेत् । श्रृङ्गाणि जलौकसश्च सर्पकृतात्
...त् विषस्योद्धारणार्थं विशेषेणोपायुज्यन्त । किन्तु
...तः यवचूर्णपांशुपूर्णेन मुखेन दंशाचूषणं प्रशंसति
... कल्प० ५।५)
अधिकं तु कर्णमध्ये मलस्य कीटस्य वा अपहर-
निमित्तं श्रृङ्गस्य प्रयोजनं वर्णयति यथा—

"कर्णच्छिद्रे वर्तमानं
कीटं क्लेदमलादि वा ।
श्रृङ्गेणाऽपहरेद्धीमा—
नथवाऽपि शलाकया ॥ इति ॥

सु० उ० २१।५८

शलाका तन्निमित्तं विशेषेणोपयुज्यत । सुश्रुतस्य
...रस्य च वचनानुसारेण अलाबुनामकफलविशेषं
...तस्यावसेचनार्थे प्रयोक्तुं शक्यते । अस्य फल-
...क्षमपहृत्य एकं दीपनमन्तः निक्षिप्य आतुरस्य
...दे स्थापयेत् । तेन श्लेष्मारक्तं च अवसेचयितुं
...। सु० सू० १३।८
...नि औषधभाजनानि अमुष्मिन्नापितापणे मया
...तानि चरकसुश्रुतवर्णितपात्राणि मामस्मारयन्।

"चूर्णाञ्जनं कारयित्वा
भाजने मेषश्रृङ्गजे ।
संस्थाप्योभयतः काल—
मज्जयेत् सततं बुधः" ॥ इति ॥

सु० उ० १५, २७, २८

अन्यत्र च—

एतच्चूर्णाञ्जनं श्रेष्ठं
निहितं भाजने शुभे ।
दन्तस्फटिकवैदूर्य—
शंखशैलासनोद्भवे ॥
शातकुम्भेऽथ श्रृङ्गे वा
राजते वा सुसंस्कृते ॥ इति ॥

सु० उ० १८।६१, ६२

"शैलासने भाण्डे
मेषश्रृंगे च संस्थितिः" इति । —चरक ।

अमेरिकादेशे येषु पात्रेषु औषधानि निक्षिप्तानि तानि प्रायेण काचमयानि काष्ठमयानि च इति मन्ये। किन्तु प्राचीना भारतीया वैद्याः औषधीयानि चूर्णानि प्रायः पत्रमयेषु सम्पुटेषु निदधुः। श्रृङ्गाणि केवलमाग्नेयचूर्णनिधानाय प्रायुज्यन्त । विलयम्सबर्गनगरस्य नापिताः अष्टाङ्गहृदयसंहितायामुपदिष्टेन शस्त्रकोषेण सदृशे शस्त्रकोषे शस्त्रशलाकादीनि अस्थापयन्। वर्तमानकालेऽपि पाश्चात्यदेशीयवैद्याः सूक्ष्माणि उपकरणानि तादृशेषु कोशेषु धारयन्ति। शस्त्रकोषस्य वाग्भटवर्णनमतिस्पष्टं विस्तृतं च यथा—

स्यान्नवांगुलिविस्तारः, सुघनो द्वादशांगुलः ।
क्षौमपट्टोर्णकौषेय, – दुकूलमृदुचर्मजः ।
विन्यस्तपाशः सुस्यूतः, सान्तरोर्णास्थशस्त्रकः ।
शलाकापिहितास्यश्च, शस्त्रकोषः सुसंचयः ॥ इति

अ० हृ० सू० २६।३३,३४

शस्त्रचिकित्सावसरे वैद्यसन्निधौ तादृशाः एव शस्त्रकोषा मया असकृत् दृष्टाः येषु तीक्ष्णशस्त्राणि



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सव्यवधानानि कार्पासखण्डमध्ये क्रमशः विन्यस्तानि। मम गृहे भोजनोपकरणानि कार्पासवस्त्रनिर्मिते कोषे निहितानि भवन्ति। भक्षणस्यानन्तरं मम स्वसा स्वेषु-स्वेषु स्थानेषु तानि उपकरणानि व्यवस्थाप्य वस्त्रकोषमावर्त्य कृष्णसूत्रेण अग्रथ्नादिति स्पष्टं बाल्यात् प्रभृति स्मरामि। सुश्रुतस्य मतानुसारेण शस्त्राणि साधारण्येन आयसान्यभवन्। वदति हि 'तानि प्रायशो लौहानि भवन्ति" इति। किन्तु कदाचित् लौहशस्त्राणामभावं संभावयन्नुपदिशति "तत्प्रतिरूपकाणि वा तदलाभे" इति। सु० [सू० ७७

अन्यत्र विविधधातुमयानि उपकरणानि निरूपयति "ताम्रायसी शातकौम्भी शलाका स्यादनिन्दिता" इति। अपि च।

सौवर्णे राजते ताम्रे, कांस्ये मणिमये तथा।
पुष्पावतंसे भौमे वा सुगन्धि सलिलं पिबेत्। इति।

सु० सू० ४५।१३

उपकरणानि लोहकारेण कृतानि। उपदिशति हि-

शस्त्राण्येतानि मतिमान् शुद्धशैक्यायसानि तु।
कारयेत् करणैः प्राप्तं कर्मारं कर्मकोविदम्"॥ इति।

सु० सू० ८।१६

एकस्मिन्नवसरे सुश्रुतः सर्वेषु यन्त्रेषु शस्त्रेषु च हस्तस्यैव प्रधानतां निर्दिशति यथा—

'यन्त्रशतमेकोत्तरम्। अत्र हस्तमेव प्रधानतमं यन्त्राणामवगच्छ। किं कारणम्? यस्मात् हस्तात् ऋते यन्त्राणामप्रवृत्तिरेव तदधीनत्वाद्यन्त्रकर्मणाम्'। इति। सु० सू० ७ ३

प्राचीनभारतीयानामुपकरणानां मुखानि व्यालानां मृगपक्षिणां च मुखैः प्रायशः सदृशानि अभवन्। तेषां च नामानि आयुर्वेदीयासु कृतिपूकानि ... स्वरूपाणि लक्षयन्ति। यथा च सुश्रुतः उपदिशति—

'तत्र स्वस्तिकयन्त्राणि अष्टादशांगुलप्रमाणानि सिंहव्याघ्रवृकतरक्षुऋक्षद्वीपिमार्जारशृगालमृगैर्वारुक काककङ्ककुररचाषभासशशघात्युलूकचिल्लिश्येनगृध्र क्रौञ्चभृङ्गराजाञ्जलिकर्णावभञ्जननन्दिमुखानि मसूराकृ भिः कीलैरवबद्धानि मूलेऽङ्कुशवत् वरःङ्गाणि ... विनष्टशल्योद्धारणार्थमुपदिश्यन्ते।' इति।

सु० सू०

अधुनातने काले पाश्चात्यदेशेषु नानाप्रकारमु पेतानि यन्त्राणि ईषत्तत्सदृशानि उपयुज्य संस्कृतभाषायां यत् सिंहमुखयन्त्रमित्युच्यते तदेव भाषायां "Loin Forceps" इत्युच्यते ... लक्षणानि वर्णयित्वा सुश्रुतः निर्दिशति—

समाहितानि यन्त्राणि खरश्लक्ष्णमुखानि च।
सुदृढानि सुरूपाणि, सुग्रहाणि च कारयेत्॥

सु० सू०

त्रीणि विधानानि उपकरणानां दृढीकरणस्य मुक्तानि। एकस्य तु यन्त्रस्य प्रयोजनं विशेषेण लक्षयति।

तेषां (शस्त्राणां) पायना त्रिविधा क्षारोदक तत्र क्षारपायितं शरशल्यास्थिच्छेदनेषु। उद मांसच्छेदनभेदनपाटनेषु। तैलपायितं सिरा स्नायुच्छेदनेषु। सु० सू०

इति सुश्रुतवचनात्। तदुपदेशानुसारेण श मुष्णीकरणस्य अनन्तरं तानि शस्त्राणि तैलेषु निमज्जनीयानि। सुश्रुतोऽत्र अनुरूपतमं भाषिकशब्दम् "पायना" इति उपयुनक्ति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...नार्थं काचन श्लक्ष्णा शिला प्रायुज्यत। प्राची-
...नरोमकजनाः औषधीयानि शस्त्राणि तादृशैः
...ः अतेजयन्। यदा भारतीयो वैद्यः व्याधितस्य
...दादातुं ऐच्छत्तदा दन्तघातात् स्वांगुलीः रक्षितु-
...लित्राणकमिति यन्त्रं प्रयुक्तवान्।

...गुलित्राणकं दान्तं; वार्क्षं वा चतुरङ्गुलम्।
द्विच्छिद्रं गोस्तनाकारं, तद्वक्त्रविवृतौ सुखम् ॥
अ० हृ० सू० २५।२१

इति तत् वर्णितम्। तदुपयन्त्रम् साम्प्रतकालस्य-
...निकेन उपकरणेन तुल्यमेव। यथा प्राचीनयवन
...वैद्यैः तथा भारतीयवैद्यैरपि व्रणानां मांस-
...दानां च सीवननिमित्तं नानाप्रकारधातुसूच्यः
...त्राणि च प्रायुज्यन्त। सुश्रुतमतानुसारेण अश्व-
...भवाः केशाः प्रायेण सूत्रमिति प्रयुक्ताः। किन्तु
...त्राणि सूत्राणि अन्यैः द्रव्यैरपि संस्कृतानि।
...मानकाले सरलाः वक्राश्च सूच्यः भवन्ति। सुश्रुतः
...श्च धनुराकृतीः सूचीः "धनुर्वक्रा" इति नाम्ना
...पयति।

सु० सू० २५।२४

सूत्राणां स्थाने जीवन्त्यः कृष्णपिपीलिकाः
...प्रान्तयोः संयोजनार्थमुपयुक्ताः। ताभिर्व्रणं
...ततः तासां कायान् अपहरेत् शिरोवर्जम्, यासां
...नि छिद्रान्ते दृष्ट्वा आसते। अन्त्रे विद्यमानस्य
... सीवननिमित्तं तत्र संलग्नं शल्यमुद्धृत्य
...लिकानां प्रयोजनमुपदिशति।

सु० सू० २५।२४

शिरसि व्रणस्य प्रसंगे शरशल्यादिसायकेऽपहृते
...तत्र वालवर्तिं प्रावेशयद्यतः।

वालवर्त्यामदत्तायां, मस्तुलुङ्गव्रणात् स्रवेत्। इति
सु० चि० २।७०

व्रणे रोहति चैकैकं, शनैरपनयेत् कचम्।
इति वाग्भट्टेनोक्तम् (उ० २६. २८. २९.

चक्षुषि पतितस्य अयसः लेशस्यापहरणार्थं भार-
तीया वैद्या अयस्कान्तमुपयुक्तवन्तः। वर्तमानकालेऽप्य-
यमुपायः पाश्चात्यवैद्यै रभ्यस्यते। भिषजः शस्त्रकर्म-
जनितं दुःखं प्रशमयितुमातुरान् किंचिन्मद्यमपाययन्।
यथा—प्राक्शस्त्रकर्मणश्चेष्टं भोजयेदातुरं भिषक्।
मद्यपं पाचयेन्मद्यं तीक्ष्णं यो वेदनाऽसहः ॥
न मूर्च्छत्यन्नसंयोगान्मत्तः शस्त्रं न बुध्यते।
तस्मादवश्यं भोक्तव्यं रोगेषूक्तेषु कर्मणि इति।
सुश्रुत सू० १७ ११, १२

प्राचीनयवनरोमका वैद्या अपि रुग्णानां सुषुप्त्यवस्थां कैश्चन औषधैः जनयितुमशक्नुवन्। बल्लालसेनविरचितभोजप्रबन्धे भोजराजस्य शिरसि शस्त्रकर्म वर्णितम्। तत्प्रसङ्गे स्वप्नजनकचूर्णं धारा-निवासिभ्यां वैद्याभ्यामुपयुक्तम् यथा—

ततस्तावपि राजानं मोहचूर्णेन मोहयित्वा शिरः कपालमादाय तत् करोटिकापुटे स्थितं शफरकुलं गृहीत्वा कस्मिंश्चित् भाजने निक्षिप्य संधानकरणाय कपालं यथावदारचय्य संजीवन्या च तं जीवयित्वा तस्मै तद्दर्शयताम्। इति।

शस्त्रकर्मणः पश्चात् व्याधितस्यापवरकं विविध-द्रव्याणां दहनात् उत्पन्नेन धूमेन शयनासनवस्त्रादिषु सर्वविषेभ्यः विशोधयेत्। एतेन प्रकारेण पिशाचाः निशाचरा ज्वराश्चापहर्तुं शक्यन्ते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मयूरपिच्छं निम्बस्य, पत्राणि बृहतीफलम् ।
मरिचं हिंगुमांसी च बीजं कार्पाससम्भवम् ॥
छागरोमाहिनिर्मोकं विष्ठा बैडालिकी तथा ।
गजदन्तश्च तच्चूर्णं किंचिद् घृतविमिश्रितम् ॥
गेहेषु धूपनं दत्तं सर्वबालग्रहान् जयेत् ।
पिशाचान् राक्षसान् जित्वा सर्वज्वरहरो भवेत् ।

इति शार्ङ्गधरसंग्रहे उपदेशः । यदा भक्षणे कस्यचित् कण्ठे भोजनकणः मत्स्यास्थि वा आसज्यते तदा तस्य स्कंधे मुष्टिना ताडयेत् । यथा—

"ग्रासशल्ये तु कण्ठासक्ते निःशङ्कमनवबुद्धं स्कन्धे मुष्टिनाभिहन्यात् स्नेहं मद्यं पानीयं वा पाययेत्" इति शब्दैः क्रियां प्रशंसति सुश्रुतः । सुश्रुत सूत्रम् २७,११

प्राचीनपाश्चात्यचिकित्साविद्याया अभ्यासकः भारतीयवैद्यकशास्त्रे त्रिदोषदर्शनभावं विदित्वा महता विस्मयेनोपहतः स्यात् । यवनरोमचिकित्सायां विद्यमानैः पारिभाषिकशब्दैः सदृशा एव आयुर्वेदीयशब्दाः वायुः पित्तं श्लेष्मा चेति । लातिनभाषायां त्रिदोषाः (humor) इत्युच्यन्ते । अयं शब्दः संस्कृतभाषायां क्लेदाः इति वक्तुं शक्यते । यदा ते त्रयः क्लेदाः साम्यावस्थायां भवन्ति तदा तदर्थं अन्यः पारिभाषिक शब्दः "Complection" इति प्रयुज्यते । संस्कृतभाषायां समाश्लेषणमित्युच्यते । कतिपयशताब्दानि उभौ शब्दौ आंग्लभाषायां humor Complection इति रूपयोः प्रवेशितौ । अर्वाचीनकाले तयोः शब्दयोः अर्थौ विकृतौ । सांख्यदर्शने उपदिष्टैः सत्त्वरजस्तमोगुणैः सदृशा एव वायुपित्तकफश्लेष्माः वर्त्तन्ते । आयुर्विद्यायाममुं विषयं पठित्वा पौरस्त्यपाश्चात्यदर्शनयोः सारूप्यं कस्यचित् मनसि उद्भवति ।

आस्तां तावत् । मदीयव्याख्यानसमापनात् प्राक् सुश्रुतस्य प्रसिद्धं सुस्मरणीयमुपदेशं पठितुमिच्छामि—

"अधिगतसर्वशास्त्रार्थमपि शिष्यं योग्यां कारयेत् । छेद्यादिषु स्नेहादिषु च कर्मपथमुपदिशेत् । सुबहुश्रुतोपि अकृतयोग्यः कर्मसु अयोग्यो भवति । तत्र पुष्पफलालाबुकालिन्दकत्रपुषैर्वारुककर्कारुकप्रभृतिषु छेद्यविशेषान् दर्शयेत् । उत्कर्तनपरिकर्तनानि चोपदिशेत् । इति वस्तिप्रसेवकप्रभृतिषु उदकपङ्कपूर्णेषु भेद्ययोग्याम् । सरोम्णि चर्मणि आतते लेख्यस्य । मृतपशुसिरासु उत्पलनालेषु च वेध्यस्य । घुणोपहतकाष्ठवेणुनलानलीशुष्कालाबुमुखेषु एष्यस्य । पनसबिम्बीबिल्वफलमज्जमृतपशुदन्तेषु आहार्यस्य । मधूच्छिष्टोपलिप्ते शाल्मलीफलके विस्राव्यस्य । सूक्ष्मघनवस्त्रान्तयोः मृदुचर्मान्तयोश्च सीव्यस्य । पुस्तमयपुरुषाङ्गप्रत्यङ्गविशेषेपु बन्धयोग्याम् । मृदुषु पेशीषु उत्पलनालेषु च कर्मसन्धिबन्धयोग्याम् । मृदुषु मांसखण्डेषु अग्निक्षारयोग्याम् । उदकपूर्णघटपार्श्वस्रोतस्यलाबुमुखादिषु च नेत्रप्रणिधानवस्तिव्रणवस्तिपीडनयोग्यामिति ।" सु०सू० ९।३



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# "भारती" पत्राय शुभाशीर्वादम्

[ राष्ट्रीय स्वयंसेवकसंघस्य सरसंघचालकानां श्रीमाधवसदाशिवगोलवलकरमहाभागानां 'भारती'पत्राय प्रेषितः शुभाशीर्वादः ]

भारती पत्रिकायाः पञ्चमवार्षिकोत्सवः सम्प्राप्तः इति ज्ञात्वा महान् हर्षः मम मनसि संजातः। संस्कृतभाषायाः सार्वत्रिकप्रचारार्थं भारती-पत्रिकया विगतवर्षेषु यत् किमपि कार्यं कृतं तत् नितराम् अभिनन्दनीयम् अस्ति इत्यत्र न कोऽपि संदेहः। संस्कृतभाषायाः दुर्बोधत्वविषये आधुनिकसुशिक्षितेषु यः अकारणमेव भ्रमः विद्यते तस्य निराकरणं भारतीपत्रिकायां प्रकाशितानां सरलसुगमसंस्कृतलेखानां वाचनेन भवति। यो यो भारतीयः स्वकीयां प्रादेशिकीं भाषां सम्यक् जानाति स स स्वभावतः एव भारतीपत्रिकायां प्रकाशितान् संस्कृतलेखान् जानीयात् इत्यहं मन्ये। किं बहुना भारतीपत्रिकायां प्रकाशितान् संस्कृत-लेखान् यो न ज्ञातुं शक्नोति स खलु स्वकीयां प्रादेशिकीं भाषामेव न सम्यक् जानाति इति अवगन्तव्यम्। हिन्दीप्रभृतयः सर्वाः प्रादेशिक्यः भाषाः संस्कृतोद्भूताः सन्ति। परं साम्प्रतं विविधभाषाभाषिणां भारतीयानां स्वस्वभाषादुरभिमानः परां कोटिं गत इव अवलोक्यते। स्वस्वभाषादुरभिमानेन सर्वे परस्परपार्थक्यम् उद्घोषन्ति। एतस्य प्रादेशिकभाषामूलदुरभिमानस्य प्रशमनार्थं संस्कृतप्रचारसदृशं नान्यत् बलवत्तरं रसायनम्।

आंग्लशासनकाले भारतीयानां सर्वेऽपि व्यवहाराः परकीयाम् आंग्लभाषाम् आश्रित्य अभवन्। इदानीं स्वतन्त्रभारतस्य व्यवहारतः आंग्लभाषाया: निष्कासनं कृत्वा हिन्दी-प्रमुख-भारतीय-भाषाः उपयोक्तव्याः। परम् एतासु प्रादेशिकभाषासु राज्यव्यवहारार्थम् उच्चशिक्षणार्थं वा अपेक्ष्यमाणा शब्द-समृद्धिः नास्ति। अस्माकं भाग्येन अस्मत्पूर्वजैः सततं दृढभक्त्या संसेविता, आपत्काले महता परिश्रमेण त्यागेन च सरक्षिता ज्ञानामृतमयी भारतीयसंस्कृतिनिधानभूता सकल-



भारतीयभाषाणां प्राणशक्तिः इव इयं संस्कृतभाषा अद्यापि जीवति। न केवलं सा जीवति एव अपितु अन्याः सर्वाः प्रादेशिकभाषाः जीवयति, संवर्धयति च। संस्कृतभाषायाः एतत् सर्वभाषाव्यापित्वं सर्वभाषान्त-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

### वर्षान्तनिवेदनम्—

संस्कृतभाषासेविनः पाठकमहाभागाः! श्रीमतामनुग्रहमाददती सेयं 'भारती' संख्ययाऽनया चतुर्थं वर्षं सानन्दं परिपूरयतीति भवेदेव विदितम्। वत्सरेऽस्मिन् न केवलं भारतस्यैव, अपि तु समग्रस्यापि भूमण्डलस्य राजनैतिकी परिस्थितिः कीदृशी समभूदिति प्रत्यहं देशसमाचारान् वाचयतां पाठकमहोदयानां न नाम परोक्षं नूनम्। एतस्मिन् समये भारताद् बहिस्थं प्रत्येकराष्ट्रं, येन केनाऽप्युपायेन निजस्वार्थं साधयितुं निगूढवक्रं राजनीतिचक्रं परिचालयतीति प्रत्यक्षम्। प्रत्येकराष्ट्रे भेदमुत्पादयितुम्, द्वितीयं राष्ट्रं दुर्बलीकर्तुं नानाविधानि षड्यन्त्राणि समारभ्यन्ते। अनन्तानां प्राणिनां वधः, देशस्य चिराय उत्सादः कामं भवेत्, किन्तु मम स्वार्थसिद्धिर्भवेदिति प्रत्येकराष्ट्रस्याऽऽन्तरिकी इच्छा। अतएव विज्ञानेन लोकहितमसाधयित्वा लोकानां संहार एव समभिलष्यते। 'ऐटमबम', 'अणुबम'प्रभृतीनि नानाविधानि हिंसायन्त्राणि प्रत्यहं समुद्भवन्ति। एवंविधपरिस्थितौ समुपगतं भारतं किं वा परिचेष्टतामिति को वा नानुमिनुयात्?

भारतं हि साम्प्रतं स्वतन्त्रमित्याख्यायते। कामं तस्य दुर्दशा पूर्वतोऽप्यधिका भवेत् परं स्वातन्त्र्याभिमानस्तस्य संजात एव। यैः शासकैः सोयं देशो विवशतया, अतिकाठिन्येन बलात्परित्यक्तस्ते हि निगूढैरुपायैः पुनर्हस्तसंचालनमत्र कामयन्ते। संवादपत्रपाठकाः प्रकटं पश्यन्ति यत् पाश्चात्त्यानां शासने समाप्तेऽपि ख्रिस्तधर्मप्रचारो निगूढं वर्द्धते, न तु समाप्तिमेति। शिक्षाप्रचारनाम्ना, दीनानां सहायतामिषेण वा अत्र ख्रिस्तधर्मप्रचारकाः स्वीय जालं परितो विस्तारयन्ति। स्वभावतो मुग्धा भारतीयाः, विशेषतो दीनास्तेषां जाले निगूढं निपतन्तीति प्रतिपदमनुभूयते। कांग्रेसीयाः शासकमहाभागास्तेषामुपेक्षां ज्ञात्वा कुर्वन्ति अथवा अज्ञानवशादिदं संवटते इति न निश्चिन्वन्ति धार्मिका लोकाः। गोवधस्य निवारणं बहोः कालात् कोलाहले कृतेपि नाधुनाऽपि संवृत्तम्।

देशनायको महात्मा गान्धी प्रारम्भादेव गोहिंसाया विरोधी आसीत्। मुहुर्मुहुस्तेन सुदृढमाश्वासनं दत्तं यत्स्वतन्त्रशासने लब्धे गोवधस्य मूलमेव निराकरिष्यामीति। परं संप्रति स्वतन्त्रेपि भारते प्रत्यहं गोहिंसायाः परिवृद्धेरेव उपायाः क्रियन्ते, न निवारणस्य। वर्षद्वयादेतदर्थं देशदेशतः, प्रान्तप्रान्ततो जनतायाः प्रार्थना भवति किन्तु शासकचक्रमीदृशं सुदृढं यन्त्राद्यापि किञ्चित् पश्यति, न किञ्चित् शृणोति। केवलं प्रवञ्चनाभिः कालं हरति। भारतीयसंस्कृतेः सत्यः परिचालकः श्रीकरपात्रिमहोदयः एतदर्थं प्रार्थयमानः

---

यामित्वं च अज्ञात्वा कैश्चित् विवेकविधुरैः संस्कृतभाषा मृता इति जल्पितम्। संस्कृतभाषायाः एतत् अनुक्तसिद्धं सजीवत्वं, सर्वंकषं सामर्थ्यं च ज्ञात्वा सर्वैः राष्ट्रकल्याणकामैः संस्कृतभाषाध्ययनम् अवश्यमेव कर्तव्यम् इति मे सुस्पष्टं मतम्।

भारतीपत्रिकायाः वाचनं संस्कृतानभिज्ञेषु संस्कृताभिरुचिं जनयितुं साहाय्यप्रदं भवेत् इत्यत्र नास्ति स्तोकोऽपि संदेहः। राष्ट्रहिताय निःस्वार्थतया संचाल्यमानायाः अस्याः संस्कृतपत्रिकायाः विकासार्थं सर्वे संस्कृताभिमानिनः सज्जनाः सर्वविधं साहाय्यं स्वयंस्फूर्त्या दास्यन्ति इति दृढम् आशास्ते।

मा० स० गोलवलकरः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...र्यां निबद्धः। बहुबोधनेऽपि नासौ निर्मुच्यते। ...तमप्यसौ कारागारगतः। रामचन्द्रवीरः एतत्कृते ...नव्रतं जग्राह। किन्तु सोपि अनशनगत एव, न ...प्यपि शासकानां दृष्टिः। एतदेव किम्, प्रजापक्ष- ...बहवो धनिकगृहस्था अपि एतदर्थमग्रगता अभू- ...किन्तु तेऽपि निगडबद्धाः कृता नाद्यापि ते ...मुच्यन्ते।

...तो धार्मिकी जनता प्रत्यहं खिन्ना भवति। ...तीयसंस्कृतेरुपरि नानाप्रकारैराक्रमणं क्रियते। ...मिकभित्तेः शरीरे नानाविधानि 'बिलानि' ...नीयन्ते। मन्दिराणां मर्यादा निर्मूल्यते। विवाहादयः ...द्वारा आर्याणां समुदायान्निर्वास्यन्ते। रजोदर्शना- ...र्वं 'कन्यायाः' विवाहः संपादनीय इति ऋषिमार्गो ...नुगतः। कन्याविवाहकालश्चतुर्दशवर्षे निर्धारितोभूत् ...यम्, यस्य हि धार्मिको विरोधोऽप्यभूत्। पर संप्रति ...न्याया विवाहकालः अष्टादशवर्षात्मको धारासभायां ...र्यते। सहशिक्षायुगे, सह'सीनेमा'दर्शनयुगे, ...रि भवेदित्थं कौमार्यनिर्वाहो नारीणाम्? धार्मिकी ...संपत्तिर्निर्विचारमपह्रियते। अन्येन प्रजाहितमनु- ...य दत्ता जीविकाः, अन्यः साम्प्रतं निर्विचारमेव ...पहरतीति प्रत्यक्षं प्रेक्ष्यते।

...वं जीविकाद्यपहरणेऽपि न देशे समर्घताया ...। प्रत्यहं महर्घतापिशाची भयङ्कररूपेण भारती- ...दीनान् ग्रसते। लघुवेतनानां कर्मचारिणां ...नि (पदानि) न्यूनीक्रियन्ते। ते हि निर्वास्यन्ते ...नाद्दूरीक्रियन्ते। किन्तु इतः उच्चाधिकारिणाम् ...स्टर' प्रभृतीनां संख्या, रूप्यकसंख्यावृद्धिश्चाधि- ...कं वीक्ष्यते। द्विसहस्रमुद्राः प्रतिमासं संप्राप्य ...नानाविलासैर्भिनिस्टराः। परतो दीना उदर-पूर्तये अन्नमपि पर्याप्तं न लभन्ते। तथापि सोयं 'साम्यवादस्य' समयः संघोष्यते! धन्यं भागधेयं भारतीयानाम्!!

अस्तु, एवं परितः संकट-संघर्षमयं समयं यापयन्ती सेयं संस्कृतसेविका 'भारती' चतुर्थं वर्षं परिसमाप्य पञ्चमे वत्सरे पदं निधास्यतीति कस्य वा विचारशीलस्य न भवेत् प्रमोदः? एतस्मिन् समयान्तराले संस्कृतभाषायाः परिस्थितिर्वैदेशिकशासनापेक्षया अभिनन्दनीया सम-भूदथवा निन्दनीया समवर्तिष्ट, इति हि नाधुना वक्तुं स्थानम्। अवकाशमुपलभ्य परतस्तदिदं निवेद्येत पाठकमहाभागानां सेवायाम्।

किन्तु भारते यथा यथा प्राचीनपरिपाटी विलोप्यते, अदृष्टश्रद्धा निर्मूल्यते, ईश्वरभयं दूरीक्रियते, देवारा-धनमुपहस्यते, संस्कृतिर्विहन्यते, तथा तथा दैवस्यापि विपरीता प्रवृत्तिरालोक्यते। कृषिकर्मणः पूर्वापेक्षया सुतरां वर्द्धनेऽपि, कृषीवलानां पक्षं गृहीत्वा भूम्यधिका-रिणां स्वत्वापहरणेऽपि, न विलोक्यते साम्प्रतं कृषिसमु-त्थस्य धान्यस्य समर्घता। ऐषमश्चातुर्मास्ये वर्षाया एव विचित्रा परिस्थितिरासीत्। कुत्रचित्प्रान्ते अत्यधि-कवर्षया धन-जन-जीवनानां नाशो नितरां परिशोच-नीयोऽभवद् यत्र परोलक्षमुद्राणां साहाय्यदानेऽपि न जनतायां शान्तिः। अन्यस्मिन् प्रान्ते भगवानिन्द्रो बिन्दुमपि न ववर्ष। कुत्रचित्प्रदेशे समये वर्षा न भूत्वा असमये वर्षा कृपां चक्रे येन लाभस्यापेक्षया हानिमेव मन्यन्ते मानवाः। अस्तु संप्रति विश्वमङ्गलाय भगवन्तमभ्यर्थयामहे—

लोकाः सौख्यमवाप्नुवन्तु सुकृतालोकाद्विशोकाशयाः,
संभाव्यो भुवि वीर्य-विक्रम-गुणैः शान्त्यै सतां जायताम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

.Digitized by Arya Samaj Foundation Chennai and eGangotri



विद्या विद्युतिमाप्य लोकवलये संशीलयेत क्रियां,
सैषा मानवजातिरभ्युदयतां संप्राप्य शालीनताम् ॥

**शिक्षामन्त्रालये पुरस्कारप्रदानम्**—साम्प्रतमेव भारतसर्वकारस्य शिक्षामन्त्रालयेन प्रकाश्यघोषणा कृताऽभूद्-यद् हिन्दीभाषायाः प्रोत्साहनदानार्थं हिन्दी-भाषायां नवीननिर्मितानां मौलिकग्रन्थानां, तथाऽनूदितानां च ग्रन्थानां कृते क्रमशो द्विसहस्रमुद्राणां २०००) तथा एकसहस्रमुद्राणां १०००) पुरस्कारस्तन्निर्मातृभ्यः प्रदत्तोऽस्ति । तदनन्तरमेका विज्ञप्तिरन्याऽपि प्रकटीकृताभूत् यदनुसारं प्रौढशिक्षायामुपयुक्तानां पाठ्यपुस्तकानां निर्माणाय प्रचुरपुरस्कारस्य घोषणाऽभूत् । एवंविधानि प्रौढपाठ्यपुस्तकानि भारतस्य १३ त्रयोदशभाषासु निर्मापितानि । यास्त्रयोदश भाषाः शिक्षामन्त्रालयेन प्रौढानां पठनाय परिगृहीतास्तासु संस्कृतभाषायाः परिगणना न कथंचिदपि कृता । साम्प्रतिकशिक्षिता अपि कदाचिन्निजसम्मतिं प्रकाशयन्ति यत्—"सेयं भाषा जीविकासंकटयुगे नागरिकैः कदाचित् पठितुं न युज्यते चेत्—निर्वाहोपयुक्तजीविकासमुपार्जनोत्तरं भारतीयसंस्कृतिपरिज्ञानार्थं प्राचीनविज्ञानबोधार्थं ग्राम-निवासिभिः प्रौढावस्थायामवश्यमध्ययनीया ।"

---


## ❀ सफेद बाल काला ❀

खिजाब से नहीं। हमारे आयुर्वेदिक सुगन्धित (केश कल्याण) तेल के सेवन से बालों का पकना रुक कर सफेद बाल जड़ से काला हो जाता है। जिन्हें विश्वस न हो मूल्य वापसी की शर्त लिखा लें। मूल्य २), बाल अधिक पक गया हो तो ४) रु० का तेल मंगा लें।

पता—केश कल्याण भवन,
उपर बाजार राँची

## सच्चाई की गारन्टी

### ❊ श्वेत कुष्ट की अद्भुत दवा ❊

प्रिय सज्जनों! औरों की भांति मैं अधिक प्रशंसा नहीं चाहता। यदि इसके ३ दिन लेप से सफेदी के दाग जड़ से आराम न हो तो मूल्य वापस। शर्त लिखा लें। मूल्य ३), खाने वाली दवा का मूल्य ३॥। गलित कुष्ट (सोनबहरी) की अचूक दवा, खाने वाली का मूल्य ५), लगाने वाली का मूल्य २)

पता—पं० ईश्वरदयालजी
पो०—कतरीसराय (पटना)

## १००) रुपया इनाम

### (गवर्नमेंट से रजिस्टर्ड)

सिद्धवशीकरण यंत्र—इसके धारण करने से कठिन से कठिन कार्य सिद्ध होता है। उसमें आप जिसे चाहते हैं चाहे वह पत्थर-दिल क्यों न हो आपके बस हो जायगा। इससे भाग्योदय, नौकरी धन की प्राप्ति, मुकदमा और लाटरी में जीत तथा परीक्षा में पास होता है। मूल्य ताम्बा का २॥) चांदी का ३), सोने का १३), झूठा साबित करने पर १००) इनाम।

पं० पी० डी० ज्योतिषी
पो० कोरारी (पटना)




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

### ...तं संस्कृतं शिक्ष्यतां 'भारती'तः—

मध्ययुगे सोयं महावीरस्तादृशं शौर्यमदर्शयत् ...द्धि प्राचीनान् वीरपुरुषान् स्मारयति । एष हि ...जन्म वीरव्रतं पालयामास । धर्मविद्रोहिणश्च यवना- ...राङ्क खण्डयामास । शिवाजीमहाभागो देशस्यास्य ...सुप्तां शक्तिं तथा जागरयामास यथाऽस्याऽनुयायिनो ...राः प्राणानपि न किञ्चिदगणयन् । ऐतिहासिका ...र्णयन्ति यद् गुणग्राही वदान्यश्चायं भूषणकविप्रभृ- ...न् बहून् धनैरपूरयत् । निभृतं परिभ्रमन्नयं दीनान् ...जयामास । राजनीतिनिपुणस्यास्य सर्वतो भ्रमन्तो गुप्तचरा यथैव एनमसूयन् तथैवायं त्वरितमभितन् मोगलानां दलनं चकार । वृद्धाः कथयन्ति यत् एकैक- प्रहारे बहून् मोगलान् नाशयन् अयं संग्रामे भयानको- ऽभवत् । मध्यंदिनमारूढेऽपि मोगलानां प्रताप-सूर्ये ...यं महावीरो हिन्दुत्वगौरवं प्रतिष्ठितं चकार ।

बीच के समय में इस महावीर ने वह बहादुरी दिखाई जो पुराने वीरों की याद दिलाती है। इसने आजन्म वीरों का व्रत पालन किया था। शिवाजी महाभाग ने इस देश की सोती हुई शक्ति को इस तरह जगाया कि इसके अनुयायी महावीरों ने प्राणों को भी कुछ नहीं गिना। ऐतिहासिकलोग कहते हैं कि कदरदान और उदार इसने भूषणकवि जैसे बहुतों को धन से मालामाल कर दिया। गुप्त घूमते हुए यह गरीबों को भोजन देते थे। राजनीतिनिपुण इसके गुप्तचर सब तरफ से घूमते हुए जैसे ही इसको सूचित करते वैसे ही यह शीघ्रता से धावा करते हुए मुगलों का नाश करते थे। वृद्ध कहते हैं कि एक एक प्रहार में बहुत से मुगलों को काटते हुए यह संग्राम में बड़े भयंकर हो जाते थे। मुगलों का प्रताप सूर्य बीच आकाश में चढ़ रहा था तो भी इस महावीर ने हिन्दुत्व के गौरव को स्थापित किया।

### ...धातुप्रयोगपारिजातः—

स्मृ—चिन्तायाम्— याद करना, सोचना, To remember, To think of) भ्वादिः, सकर्मकः ...नट्। परस्मै० । स्मरति, सस्मार, सस्मरतुः, सस्मर्थ, सस्मरिव । स्मर्ता । स्मरिष्यति । स्मरतु । अस्मरत् । ...न्। आशी०—स्मर्यात्-स्मर्यास्ताम् । अस्मार्षीत् । अस्मार्ष्टाम् । अस्मरिष्यत् ।

कर्मणि—स्मर्यते । अस्मारि । णिचि—स्मारयति—ते । स्मारयाञ्चकार—चक्रे । असस्मरत्, ...स्मरत । स्मरणार्थे—मातुः स्मरति [अधीगर्थ० षष्ठी] सनि– सुस्मूर्षते—( ज्ञास्मृदृशामित्यात्मनेपदम् ) ...—स्मर्तव्यः, स्मार्यः स्मरणीयः । क्ते—स्मृतः, स्मृतवान् । क्तिन्—स्मृतिः । शतृ-स्मरन् । स्त्री—स्मरन्ती । ...—स्मर्ता, स्मर्तारौ । ण्वुल्—स्मारकः । क्त्वा—स्मृत्वा । ल्यप्—विस्मृत्य । तुमुन्—स्मर्तुम् । स्मरः कामः ...)। ल्युट्—स्मरणम् । वि + स्मृ–विस्मरति = (भूलना to forget)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

GURUKULA KANGRI ... NPUR 9—45 DELHI 2001



# भारतीमासिकस्य पुरातनेषु अङ्केषु किं वैशिष्ट्यं वर्तते

| पुरातनाङ्कस्य संकेतः लेखस्य शीर्षकम् | लेखकाः | पुरा० लेखकस्य शीर्षकम् | लेखकाः |
|---|---|---|---|
| १/४ (प्रथमवर्षस्य चतुर्थाङ्कः),तिब्बतवर्णनम्, | श्रीदुर्गादत्त० | २/४ साऊदी अरबदेशः | श्रीयमुनादासस्वामी |
| १/५ ईरानदेशः | श्रीरामप्रपन्नशर्मा | २/६ सीरिया लेबनानपरिचयः | श्रीरामानन्दः |
| १/७ बालीद्वीपम् | श्रीपद्माकरशर्मा | २/७ अफगानिस्थानदेशः | श्रीयमुनादासः |
| १/९ मारीशसद्वीपम् | श्रीभजनानन्दशास्त्री | २/८ अमेरिकादेशे वैदिकसाम्राज्यचिह्नानि | श्रीगङ्गाधरभट्ट एम०ए० |
| १/११ ट्रांसजोईन परिचयः | श्रीकेशवदासस्वामी | २/१० सिक्कमस्तद्देशीयाश्च | श्रीप्रकाशचन्द्रकथाभट्टः |
| १/१२ मिश्रदेशः | श्रीभजनानन्दशास्त्री | २/१२ पाण्डुचेरी | " |
| २/२ फ्रांसपरिचयः | श्रीदयानन्दशर्मा | | |
| २/३ ईराकवृत्तान्तः | श्री — | | |

**साहित्यिकलेखाः—** १/७ विश्वसाहित्ये संस्कृतसाहित्यस्य स्थानम्। १/८ महाकवेः कालिदासस्य काव्यरचना। २/१ ललितकलासु कवितायाः स्थानम्। २/३ भाषाविज्ञानस्य रूपरेखा। २/६ महाकविः श्रीमाघः। २/७ कालिदासस्य प्रकृतिवर्णनम्। ३/५ विशाखदत्तः ३/६ साहित्यस्यापि दर्शनत्वम्। ४/१ बाणस्य अनिर्वर्णनीयं गद्यनिर्माणनैपुण्यम्। ४/५ संस्कृतसाहित्ये हास्यरसः। ४/१० संस्कृतशिक्षा।

**ऐतिहासिकाः गवेषणापूर्णाश्च लेखाः—** १/६ भारतीयाः महोत्सवाः १/१० श्रावणीकर्म। १/११ संस्कृतपञ्जाबीभाषयोरन्योन्यसम्बन्ध.। २/२ देवी दुर्गावती। २/१ लंका-भारतयोः सांस्कृतिकसम्बन्धैक्यम्। २/४ साम्प्रतिक जयसलमेरनगरम् २/६ संस्कृतस्य नाटकानि १/१२ प्राचीन भारतवेशभूषा ३/१ राजस्थानपाकिस्थानसीमा। ३/५ शौचादौ कर्णे उपवीतनिधानं कथम् ३/४ ईशोपनिषदि निर्दिष्टानि राज्यशासनतत्वानि ३/८ प्राचीनभारते पोतनिर्माणकला ३/११ महर्षि पाणिनिः ३/४ राजकुमारः कुणालः इत्यादि—

'भारती' कार्यालये अनेके भारतीमासिकस्य पुरातना अङ्काः सन्ति येषु देशस्यानेकप्रख्यातविदुषां रुचिकराः समुपयोगिनः लेखा वर्तन्ते। ग्राहकाणां सुविधार्थं प्रत्येकस्य पुरातनस्याङ्कस्य मूल्यम् आणकचतुष्टयमेव कृतम्। अतः यदि आवश्यकता स्यात् तर्हि त्वरितमेव 'भारती' कार्यालये लेखनीयम्। —व्यवस्थापकः

## शोकसमाचाराः

अस्मिन् आश्विनमासे शृङ्गेरीमठस्य मठाधीशाः परममान्याः जगद्गुरुशंकराचार्य श्रीचन्द्रशेखरभारतीमहाभागा नश्वरशरीरं जलसमाधिना परित्यज्य निर्वाणपदवी प्राप्नुवन्।

अस्मिन्नेवाश्विनमासे कलकत्तानगरस्य अतीवप्रख्यातो ३५ वर्षवयस्को व्यवसायी श्रीकेशवदेवजालानमहाभागोऽपि निजभौतिकशरीरं परित्यज्य परलोकगमनं कृतवान्। एषः महाभागः अनेकानां प्रमुखव्यवसायप्रतिष्ठानानां अध्यक्षो महान् उद्योगपतिः तथा सुशिक्षितश्चासीत्। अस्य निधनेन देशस्य महाक्षतिरभूत्। 'भारती' परिवारः अस्य महाभागस्य परिवारस्य शान्त्यर्थं जगदीश्वरं प्रार्थयते।

प्रकाशक—जयबहादुरसिंह। पता:—भारती भवन गोपालजी का रास्ता, जयपुर।
राजस्थान प्रिंटिंग वर्क्स, हनुमानजी का रास्ता, जयपुर में मुद्रित।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

राजकुमार



विश्वशान्तेरधिष्ठाता त्राता स्वातन्त्र्य-संपदाम् ।
विदेशनीतेः संधाता नेहरूर्जयताच्चिरम् ॥

द्वितीयोऽङ्कः

मूल्यम्
वार्षिकम् ३) रू
एक[illegible]ाऽङ्कस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र-उत्तरप्रदेश-बिहार सर्वकारैः स्वीकृता—

# विषय-सूची


| क्रमः | लेखाः | लेखकाः | पृष्ठसंख्या |
|---|---|---|---|
| १. | आदर्शपत्नी | म०म० पं० दशरथशास्त्री, सोरों, एटा | २७ |
| २. | अभिनवभारते संस्कृतम् | राधारमणगुप्तः एम० ए० | २८ |
| ३. | घण्टागौरवम् | पं० गणेशरामशर्मा झालावाड़ | ३० |
| ४. | शिक्षकाः शिक्षार्थिनश्च | पं० देवकीनन्दनशर्मा शाहपुरा | ३२ |
| ५. | मरुस्थलनिरोधस्य योजना | सम्पादकः | ३५ |
| ६. | काव्येषु नाटकं रम्यम् | वि०भा० मुसलगांवकरः एम० ए०, गुना | ३८ |
| ७. | भारतस्य संसद्भवनम् | वि० माँगीलालमिश्रः, नेछवा सीकर | ४० |
| ८. | मुण्डस्याट्टहासः | अनु० प्रेमशङ्करमिश्रः, इटारसी | ४२ |
| ९. | अर्वाचीनाः संस्कृतसाहित्यकाराः | देवर्षिकलानाथशास्त्री, बी० ए० | ४३ |
| १०. | सम्पादकीयम् | सम्पादकः | ४५ |


## कलिकत्तामहानगरे संस्कृतप्रचारः

'भारती' पत्रिकायाः प्रबन्धसम्पादकः पं० गिरिराजशास्त्री विगतमासादेव कालिकात्तानगरीं संस्कृतपत्रिकायाः साहाय्यसंपादनार्थं गतोऽस्ति। तत्र हि पण्डितप्रवरश्रीब्रह्मदत्तत्रिवेदिमहोदय श्रीचिरञ्जीलालमिश्रमहाभाग, श्रीसीतारामशास्त्रिमहोदयादीनां सहयोगप्राप्त्या सुदृढा प्रत्याशाऽस्ति यद् 'भारती'पत्रे वर्तमानकाले द्रव्यकृता या किल त्रुटिरस्ति सा हि महानगर्याः संस्कृतप्रेमिणामुत्साहेन अवश्यमवश्यं दूरीक्रियेत। अतीव हर्षस्य विषयो यत् संस्कृतभाषाया अनन्यप्रेमी श्रीमनसुखरायमोरमहाभागो, यस्य हि नागरिकश्रेष्ठिमहोदयेषु महान् प्रभावः, सोऽपि भारतीप्रबन्धकमहोदयाय हृदयेन सहयोगं प्रददाति। अतएव सुभृशमाशास्महे यत् संस्कृतभाषासेविकायाः 'भारती'पत्रिकायाः संप्रति सर्वोऽप्यभावो दूरीभवेत्। श्रीमोरमहोदयद्वारा परिचालित 'गुरुमण्डल प्रकाशन' पुस्तकानां सूचीम् अग्रिमांके प्रकाशयितु प्रयत्येत। कलिकत्तावासिविद्वद्भ्यः श्रेष्ठिभ्यश्च विनीता प्रार्थना यत् ते 'भारती'प्रचारे साहाय्य संपाद्य संस्कृतसेवनजं पुण्यमर्जयेयुरिति·····

—'भारती' कार्यकर्ता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि-
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

वर्षम् ५ | मार्गशीर्षपूर्णिमा, सं० २०११ | अङ्कः २

## आदर्श-पत्नी

### ( गो० तुलसीदासपत्नी रत्नावली )

[ ले० म. म. पं. दशरथशास्त्री, सूकरक्षेत्रम् (सोरों, एटा) ]

गौरीरमावाङ्मनसा[1]नुसूयासीतासुकन्या[2]-सदृशा न सन्ति ।
वर्णाश्रमाचार-विनाशि-तिष्ये[3] नाथानुरक्ता ललनास्तथापि ॥ १ ॥

क्वचित्क्वचित्कापि तदंशभूता प्रसूयमानेक्ष्यत एव लोकैः ।
तथाहि वामा "तुलसीबुधस्य" पदाब्ज-सेवारत-मानसाऽभूत् ॥ २ ॥

उमैव नूनं कमलैव "रत्नावली" सुता श्रीबुधदीनबन्धोः ।
विष्णोः शिवाच्चाप्यधिकं विदित्वा सा कान्तमेवाश्रयत स्व-पूज्यम् ॥ ३ ॥

परं गुरुं खल्वभिवन्दनीयं चित्तेन वाचा वपुषा तमीजे ।
स्वप्नेऽपि विस्मृत्य कदाऽपि कञ्चिद्देवादिकं किं मनुजं न भूयः ॥ ४ ॥

आलोक्य लोका न्यगदन् वराङ्गीं यां दिव्यरूपां महिलाग्रगण्याम् ।
विद्या[4] ऽस्ति बोधे बुध-मण्डन-स्त्री श्रद्धोपदेशेऽत्रि-निवासलक्ष्मीः ॥ ५ ॥

सङ्गे स्व-भर्तुः किल राधिका सा, सीता वियोगे मनसा च भैमी[5] ।
तपःसु सा वेदवती 'सुकन्या' शर्यातिजा वा पति-दास्य-दक्षा ॥ ६ ॥

अरुन्धती तेजसि कुम्भयोनेः[6] पाञ्चालिका[7] स्वालय-कार्य-सिद्धा ।
सदा सदा-चार-परम्पराया धीरा धरित्रीव मनोहरा सा ॥ ७ ॥

---

[१. ...]कनाम्नी आस्तीकमाता । २. च्यवनपत्नी । ३. कलौ । ४. सरस्वती । ५. दमयन्ती । ६. वशिष्ठस्य । ७. द्रौपदी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अभिनवभारते संस्कृतम्

(ले० राधारमणगुप्तः एम. ए. (संस्कृतं तथा हिन्दी)

संस्कृतं मृतभाषास्तीतीदं प्रायेणोच्यते। 'अस्माभ्यमस्य किञ्चिदपि महत्त्वं नास्ति। अस्य शिक्षायां धनव्ययः निरर्थक एव। संस्कृतेन राष्ट्रभाषया भवितव्यमिति एवंवादिनः केवलं मूर्खाः धर्मान्धाश्च।" भारतस्य स्वातन्त्र्ये सत्यपि, आत्मानं देशभक्तं मन्यमानाः पुरुषा अपि संस्कृतस्य महत्त्वं न मन्यन्ते। ईदृशानां पुरुषाणां विषये इदमेव केवलं वक्तुं शक्यते यदस्मिन् संसारे मूर्खाणामभावो नास्ति।

तत्त्वतस्तु न किञ्चिदन्यदपि सत्यात् दूरतरम्। अद्यापि संस्कृतं ग्रीक-लेटिनादिभ्यः भाषाभ्यः जीवित-तरमस्ति। संस्कृतमस्माकं भारतीयानां जीवनमांगल-भाषायाः अधिकं स्पर्शयतितराम्। अद्यप्रभृति सहस्राब्दद्वयपूर्वं संस्कृतं देशस्य राष्ट्रभाषासीत्। रामायणे हनुमान् अशोकवाटिकायां सीतां प्रति संस्कृतमेव व्याहरति— "वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम्"। यास्केन संस्कृतं भाषेत्युक्तम्। पाणिनिरपि इदं 'लौकिकं' वदति। एभ्यः प्रमाणेभ्यः अन्येभ्यश्च इदं सिद्धं भवति यत्तस्मिन् काले संस्कृतं लोकव्यवहारस्य भाषासीत्। अद्यापि सा भाषास्माकं धर्मस्य भाषास्ति। उपनयनविवाहादयः सर्वे संस्काराः संस्कृते एव सम्पाद्यन्ते। अस्माकं सर्वं धर्मसाहित्यं संस्कृत एव वर्त्तते। वेदानाम्, उपनिषदां, रामायणस्य, महाभारतस्य, गीतायाश्चाद्यापि देशव्यापी प्रचारोऽस्ति। जैनानां बौद्धानाञ्चाधिकांशं साहित्यं संस्कृते एव वर्त्तते।

संस्कृतं न केवलं धर्मस्य भाषा। व्यावहारिके सामाजिके जीवने चाप्यस्याः भाषायाः प्रभूतः प्रभावः परिलक्ष्यते। हिन्दुव्यवस्थायाः (हिन्दू ला का) मूलाधाराः संस्कृते लिखिताः स्मृतयः सन्ति। आयुर्वेदज्योतिष-शास्त्रयोः ग्रन्थेभ्यो बहवो नराः स्वास्थ्यं जीविकां

---

एवं यथार्थं भुवि योषितासु "रत्नावली" रत्न-ललाम-भूता।
सुलेखिका श्रीतुलसीव सुज्ञा कुलद्वयोद्योत-विधौ चकास्ति ॥८॥
यया स्वकीये समये बहुज्ञाः कृतास्सुतास्सत्कुलजाः पुरन्ध्रयः।
सतीत्व--रक्षा--परमेश--चिन्ता--संसक्तया कान्त-धियाऽनु-सत्यः ॥९॥
वदन्ति सत्यं ननु बुद्धिमन्तो यादृक्ष—तादृक्ष--समान--योगम्।
अतो विधात्रा समशीलवन्तावयोजिषातां जगती-तले तौ ॥१०॥
या काऽपि रामा सुविचार्य वृत्तं तस्याः पदव्यां स्वपदं निदध्यात्।
आदर्श-भूता सुभगा च तादृग् वंश-द्वयोद्धार-करी सती स्यात् ॥११॥
श्री-दीन-बन्धोस्तनुजा-सतीत्व-ख्यात्यै कृता सल्लघु-पद्य-बद्धा।
एकादशीयं विदुषा रथेन दशादिना शूकर-तीर्थंजेन ॥१२॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्राप्नुवन्ति। सुश्रुतस्य चरकस्य च ग्रन्थाः यौरोपीय-वैद्यकशास्त्रस्याधारः सन्ति। अस्याः भाषायाः अनेकाः सूक्तयः प्रतिदिनं व्यवहारे प्रयुज्यन्ते।

सर्वासां प्रान्तीयानां भाषाणां संस्कृतमेवादिजननी। तेलगुतमिलादिभाषास्वपि अस्याः भाषायाः सर्वतः प्रभावः लक्ष्यते। अतः न केवलं संस्कृतं जीविता भाषा, अपि तु अन्येभ्यो जीवनं प्रदातुं शक्नोति।

यदि कस्यचिद्देशस्य साहित्यं तद्देशस्य संस्कृतेः द्योतकं भवति तर्हि संस्कृतं भारतीयायाः संस्कृतेः निर्मलो दर्पणोऽस्ति। अस्मिन् संस्कृते प्राचीनस्य भारत-देशस्य आध्यात्मिक-नैतिक-सामाजिक-व्यावहारिक-राजनैतिक-जीवनस्य उज्ज्वलचित्रणं वर्त्तते। अतएव भारतस्य प्राचीनेतिहासस्य सम्यक् पर्यालोचनं संस्कृत-साहित्यस्याध्ययनं विना कर्त्तुं न शक्यते। अन्वेषण-प्रवृत्त-विद्यार्थिभ्यस्तु संस्कृतस्याध्ययनं अनिवार्यं भवति।

संस्कृतसाहित्यं प्राचीनतममस्ति। इदं अत्यन्त-व्यापकं वर्त्तते। लौकिकानां पारलौकिकानाञ्च सर्व-विषयाणामस्मिन् सूक्ष्मं विस्तृतञ्च विवेचनं कृतम्। अस्य ग्रन्थानां संख्या पञ्चाशत्सहस्राधिका वर्त्तते। इयं संख्या लैटिन-ग्रीकभाषयोः मिलितायाः संख्यायाः अप्यधिकतरास्ति। वैदिकसाहित्यमपवार्यापि लौकिक-संस्कृतसाहित्य एव काव्यातिरिक्ताः बहवः व्याकरण-कोषालंकार-गणित-संगीत-ज्योतिष-दर्शनादि-ग्रन्थाः रचिताः। काव्यसाहित्येऽपि महाकाव्य-नाटक-गीतिकाव्यैतिहासिककाव्य--नीतिकाव्याख्यायिकादीनां सर्वाङ्गानाम ग्रन्थाः लिखिताः। "मधुमयभणितीनां मार्गदर्शिनः महर्षेः वाल्मीकेः रामायणीं कथां साधवः चकोरा इव चन्द्रिकामिव पिबन्ति। महाभारतस्य विषये तु सत्यमेव उक्तम्।

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्।

कालिदासस्तु विश्वस्य श्रेष्ठः महाकविः। अस्य सुन्दरभावव्यञ्जना, उदात्तकोमलकल्पना, ललित-पदन्यासः, सरसशृङ्गारः, संश्लिष्ट-बिम्बग्राहि-प्रकृति-चित्रणं, मधुर-प्रसादयुक्तशैली चेति सर्वमेवापूर्वम्। "क इह रघुकारे न रमते"। कालिदासस्योपमा तु प्रसिद्धैव। पश्यतु भवान्।

"दिनक्षपामध्यगतेव संध्या"

जगत्त्रयललामभूतायाः वल्कलवसनायाः शकुन्तलायाः पावनं दर्शनं करोतु,

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्

मेघदूते विरहिणः यक्षस्य दशायाः कथं करुण-चित्रणं वर्त्तते,

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः॥

अलकायाः शोभा दृश्यताम्,

या वः काले वहति सलिलोद्गारमुच्चैर्विमाना
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# घण्टागौरवम्

(ले० श्रीघण्टाशरणो गुरुर्घण्टाकर्णाचार्यस्वरूपः)

पूर्वाऽनुवृत्तः

मान्या बन्धवः ! कियद्वा कोऽपि घण्टामाहात्म्य-मनुवर्णयेन्मादृशो जनः ? अनन्तगुणगणगरीयो महतो महीयोऽणोरणीयश्च वर्तते घण्टागौरवम् !

यदि कोऽपि सचेताश्चक्षुष्मान् सहृदयो जनो गृध्रदृष्ट्या निपुणं विलोकेत तदा घण्टादेव्या व्यापकं प्रचारं जगति जायमानमनुभवेदेव । सर्वविधपरिषत्सु, न्यायालयेषु, व्याख्यानसंसत्सु, समाजगोष्ठीषु, साहित्यसम्मेलनेषु, कविसम्मेलनेषु, नाटकीयप्रेक्षा-गृहेषु, चित्रपटरङ्गमञ्चेषु, परीक्षाभवनेषु, वाणिज्य-व्यवसायसंघेषु, विश्रान्तिगृहेषु, धूमशकटीविश्राम-स्थलेषु, मेलकेषूत्सवेषु पर्यन्ते मोहान्तानां मठमारभ्य वारवधूविलासभवनपर्यन्तं यत्र तत्र सर्वत्र घण्टादेव्या आशातीतो व्यापकः प्रचारः प्रसारः प्रतिष्ठा च दृश्यते ।

सर्वविधसम्मेलनेषु सभापतिमहाभागो, न्याया-लयेषु न्यायाधीशो वा यदा वाग्मिनां व्याख्यान-वाचस्पतीनां, तार्किकशिरोमणीनां प्रकाण्डविदुषां धृष्टताधीराणां वावदूकानां वाक्कीलानां, वितण्डा-वादिनाम्, महामहोपदेशकानां, भावप्रवणानाम-नल्पकल्पनापटूनां कवितल्लजानां, राजनीतिदलगत-विरोधिमतवादिनां प्रचण्डनेतॄणां च प्रत्याख्या-नात्मानं प्रभविष्णुं समनुभवति, वेलातिक्रमं कालक्षेपं वा सोढुं न प्रभवति, सदानुशासनं स्था-पयितुं स्वस्य परेषां च सम्मानरक्षां विधातुं वा घण्टा-देवीमसौ शरणं व्रजति । घण्टाशरणो न्यायाधीशः सभापतिर्वानुशासनांकुशं प्रहृत्य शिरसि महामहिम-शालिनः प्रतिभाशालिनो विदुषो, महामूढमतेर्जल्प-शिरोमणेरतिप्रोद्दण्डस्यापि विवदमानस्य, प्रति-श्रयतोऽनर्गलं जल्पतो वाथवा वागीश्वरस्यापि यो-तामदं भाषणपटुतागर्वं चापाकर्तुं तत्कालमेव प्रभवति । एतत्सर्वं घण्टादेव्याः सार्वभौमं विजृम्भमाण-महतो महीयसः प्रभावस्यात्यद्भुतो महिमा पराक्रम-श्चास्ते यो हि सर्वानेव शास्ति प्रशास्त्यनुशास्ति च ।

यथा परब्रह्मणः परमेश्वरस्य महाशक्तेर्महामायाया सत्त्वरजस्तमोगुणभेदाद्रूपत्रयपरिकल्पना सनात-

---

अस्मिन् साहित्य एव भारवि-भट्टि-माघ-श्रीहर्षा-दयः महाकाव्यकाराः, अश्वघोष-भास-शूद्रक-हर्ष-करुणारसाचार्य भवभूतिविशाखादि-कुशलनाटककाराः, दण्डि-सुबन्धुबाणादिगद्यलेखकाः, हाल-भर्तृहरि-अम-रुक-जयदेवादिगीतिकारकाश्च बभूवुः । ईदृशस्य विशा-लस्य साहित्यस्य माहात्म्यं को न स्वीकरिष्यति ।

सर्वे पाश्चात्याः विद्वांसः अद्यास्य महत्त्वं स्वीकु-र्वन्ति । एकोनविंशताब्द्यां तु संस्कृतं आर्यजातेः आदि-भाषा मन्यतेस्म । अद्यापि समस्तभाषाविज्ञानस्य संस्कृतमेव आधारः । संस्कृतसाहित्यस्य विशालता आर्यजातेः बौद्धिकोत्कर्षस्य परिचायिकास्ति । भारतीय-प्रतिभायाः अयं परमरमणीयः परिणामः । अस्य महादेशस्य सहस्राणां वर्षाणां चिरसाधनायाः सर्वोत्कृष्टः सारः अस्मिन् साहित्य एव सञ्चितः ।

अतः संस्कृतं कदापि नोपेक्षणीयम् ।

'संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः'



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



त्रिगुणात्मिका, तथैवास्या घण्टादेव्या अपि व्यक्ताः सगुणाः साकारा गुणकर्मस्वरूपभेदा विराजन्तेतमाम्। तथाहि देवाराधनपूजापद्धतिविधौ, सामाजिक शिष्टाचारपालने, शिक्षाक्रमनिर्वाहे, रमणीनामाभूषण-शृङ्गारप्रसाधने, बालादीनां सस्नेहोपलालने घण्टा-दैवीयं मधुरमधुरं, सरसरमणीयं, निसर्गसुन्दरं, सात्विकं स्वरूपमाविष्कृतयात्मनो भक्तानमन्दानन्द-सन्दोहमग्नान्विदधाति। राजनीतिगतशासनतन्त्रे, कूटनीतिविज्ञानां नेतृत्वान्दोलनप्रपञ्चे, इत्थंविधेष्वन्येषु च प्रकरणेषु चेयं घण्टा भगवती सर्वशक्तिसम्पन्नं राजसरूपं दधाना लोकान् शास्ति चानुशास्ति च। युद्धारम्भे, सैनिकानां विजययात्राप्रयाणे, समुद्रे पोत-भङ्गावसरे, परमाणुबमविस्फोटकाण्डे, दुर्घटनाकाण्ड-ताण्डवेष्वन्येषु चैवंविधेष्वनिष्टभयशङ्कातङ्कावसरेषु सर्वनाशप्रसंगेषु घण्टा ( Warning Bell ) रण-रौद्रभीषणं तमोगुणप्रधानमाविर्भाव्य स्वरूपं प्रलयङ्करी साटोपं विराजते यद्धङ्कारध्वनिश्रवणसमकालमेव सर्वेऽपि प्राणिनो भयविक्लवा मुहुर्मुहुः प्रकम्पन्ते। एव-मेषा त्रिगुणात्मिका घण्टादेवी !!!

आस्तां तावदियं कथातीव पुराणी केषांचिन्मते श्रद्धाजडानां रूढिवादिनां गतानुगतिकानां गड्डरिका-प्रवाहे जागतिके पथि संचरतां भारतीयानां घण्टा-गौरवास्था-निष्ठाविषये। परन्त्वाधुनिके सर्वथा सभ्य-म्मन्येऽस्मिन् सुधारणासम्पन्ने विज्ञानचमत्कृतिचाक-चक्यालोकचञ्चले संसारेऽपि घण्टागौरवं दिग्दिगन्ता-वधि सर्वत्र प्रसृमरमालोक्यते। यूरोपीया गौराङ्गाः, चीनदेशीयाः पीतवर्णाः, अमरीकावासिनो रक्ताङ्गा रूसदेशीयाः, जापानजन्मानः, शर्मण्यदेशसम्भवाः, कृष्णवर्णा भारतीयाः, अर्द्धश्वेताः, वर्णसङ्कराश्चापि मानवा जातीयतावादं तिरस्कुर्वन्तो विश्वबन्धवो विभिन्नाचारविचारवेषभूषा भाषासंस्कारसभ्यतासंस्कृ-तिशिक्षादीक्षारुचिधर्ममतवादिनो भौतिकार्थसम्पदभि-वृद्धये स्वराष्ट्रप्रभुताविस्ताराय वर्गयुद्धोद्यताः परस्परं द्रुह्यन्तोऽप्यथ घण्टागौरवविषये समानमास्तिका वर्तन्त इत्यहो महत्त्वमस्याः। घण्टामहत्तामान्यतायां न कस्यापि राष्ट्रस्य, देशस्य, शासकस्य, राजतन्त्रस्य, प्रजातन्त्रस्य, वर्गविशेषस्य, जातेर्धर्मसम्प्रदायस्य, मानवस्य वा विसम्वाद इत्यस्या घण्टादेव्याः किमप्य-परमन्ताराष्ट्रियं महत्त्वमद्यत्वे विजृम्भतेतमाम् !!!

वस्तुतो घण्टादेवीयमद्यत्वे मानवजातेः सभ्यता-प्रतीकमिव मूर्तिमद्विलोक्यतेऽत्र भूलोके नः। यतो युगे युगे हीयमात्मनो नानारूपाण्याविर्भाव्य स्वाव-तारचरितैर्भक्तानानन्दयन्ती संतिष्ठते। क्वचिदियं घण्टादेवी स्वर्णविग्रहा, क्वचिद्रजतगात्री, क्वचिद्रत्न-शरीरिणी, कुहचित्कांस्यतनुरपरत्र ताम्रदेहान्यत्र लोहाङ्गी, काचकल्पिता, दारुमयी, रेणुरचिता, मृण्मयी, पाषाणोत्कीर्णा, सूर्यातपच्छायाकृतिर्वाह-नासीना, वैद्युती भूत्वा स्वावतारमहिम्ना व्यक्त-विग्रहेण पुनः पुनः पुनाति जनान् मुनीन् भावुकान् भक्तान् !

प्राचीने खलु समये तु महत्या तपश्चर्यया भूयोभि प्रयत्नैः पुनः पुनः प्रबलैश्च साधनशतैः कदाचि क्वचित् कश्चिदेव विरलो जनो घण्टासाक्षात्क कृत्वात्मानं तत्प्रसादेन कृतार्थयति स्म। परमधुना विश्वस्मिन् 'माभूल्लोकानां घण्टास्तिक्यवादे मे मतिविभ्रमः !' इति परित्राणाय साधूनामिति स्वभक्तानामास्तिक्यसंस्कारसंरक्षणाय स्वस्य वि-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नाशित्वं प्रमाणीकर्तु मात्मनोऽवताराणां नवीनानि संस्करणानि, समाविश्चकारात्रभवती घण्टादेवी परमकारुणिका। ततो हीयमद्यत्वे क्वचित् Clock, Time-piece; कुत्रचित् Pocket-watch, क्वचन Wrist-watch इत्यादीनि रूपाणि धृत्वा व्याप्नोति भुवनानि सर्वाणि वहति च योगक्षेमं सर्वलोकानाम्। अथ शरीरिणी व्यक्तविग्रहापीयं भगवती घण्टा नाग्निना दह्यते, नापोभिः क्लेद्यते, न चाघातप्रतिघातैर्विशीर्यते यतो हीयं सर्वतः स्वात्मनैव ( All Proof ) संरक्षिता विराजतेऽकुतोभयम्।

अथैतदपरं सर्वप्रियत्वं घण्टादेव्या यदद्यत्वे शिशवो, बालाः, किशोराः कुमाराः, कुमार्यो, युवानो, युवतयः, प्रौढा, वृद्धाः, ब्रह्मचारिणो, विवाहिताः, शिक्षिता, अशिक्षिताः, सभ्या, असभ्याः, स्वामिनः, सेवकाः, साक्षरा, निरक्षराः, सर्वसाधारणा अपि च जना घण्टादेवीमिमां देशकालवयोनिरपेक्षमनन्यभावेनोपासते। सर्वेऽपि स्वगृहेषु, हट्टेषु, कार्यालयेषु, घण्टामूर्तिं वर्तुलाकारां, चतुरस्रां, त्रिकोणां, षट्कोणामष्टकोणां वा प्रकल्प्य यथा विभवविस्तरं तां पूजयन्ति। यदि कोऽपि निर्धनत्वाद् घटिकाप्रतिमां धातुमयीं मूल्यवतीं स्वगृहे प्रतिष्ठापयितुमसमर्थो भवति तदा स खलु चित्रमयीमपि घण्टां सनातनधर्मबुद्ध्या पूजयेन्नाम नूनम्! ये च पुनरस्या अनन्यभक्ताः श्रद्धासम्पत्सम्पन्नास्ते तु घटिकामूर्तिं वेशवस्त्रान्तर्भागे, कप्रकोष्ठे वा सदा सर्वदा सततं धारयन्ति। केचित्तु तथाविधा अपि घण्टायोगिनो घण्टागुरवो घण्टाचार्या घण्टानन्दा वा निभाल्यन्ते ये घण्टागतिभिः साकमात्मनः प्राणोच्छ्वासप्रश्वासान् संसाध्य प्राणायामक्रमेणानाहतसंगीतमिवान्तर्हृदि शृण्वन्तो मोमुदन्ते; निर्विकल्पे समाधौ वर्तमाना इव तत्सामीप्यं, सायुज्यं, सारूप्यं वा कामयन्ते! एवंविधा अनन्यभक्तास्तु— "मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥१॥" इतिर्थाद्विरला एव केचिद्भवन्ति परन्त्वेतत्तु प्रसभं वक्तुं शक्यते यद्वर्तमाने जगति नास्त्येव कोऽपि तादृग्भूभागो, राष्ट्रं, देशः, प्रदेशः, प्रान्तो, नगरं, ग्रामो वा मानववसतिर्यत्र घण्टा न स्यात्। एतत्तु वयं सूर्यप्रकाशवत्सुस्पष्टं पश्यामः स्वदेशे चाप्यत्र भारते वर्षे यत् प्रासादेषु भवनेषु, गृहेष्वाश्रमेषु, कुटीषु चापि घण्टादेव्याः पूजास्थानं सुप्रकल्पितं सुप्रतिष्ठितं च वर्तते यत्र तत्र सर्वत्र॥

यदि कोऽपि मोहादाज्ञानाद्वा च घण्टास्तिक्यवादे संशेते श्रद्धाशैथिल्यं वा भजते तर्ह्यसौ मूर्खत्वाय सभ्यत्वाय च कल्पते। तस्माच्छ्रीमद्घण्टादिग्विजयाचार्यचरणानामेतत्सुनिश्चितं मतं यद्घण्टाराधनं यथाशक्ति सर्वैरपि कार्यमद्यत्व एष एव हि सनातनो धर्मः।

अथ घण्टाराधनतन्त्रे, तत्कर्मकाण्डप्रयोगे, पूजाविधिविधानपद्धतौ च नास्त्येव तत्त्वतः कोऽपि सिद्धान्तवादो विप्रतिपत्तिर्विकल्पजल्पवादो वा शास्त्रार्थघोषनिनादो भेदभावो वालवीयानप्यन्ततः। विचक्षणो विद्वान्, महामूर्खाधिराजो जडान्तश्चेतनः, सचेतन आस्तिको, नास्तिकः, सभ्योऽसभ्यो वा क्रान्तिकारी शान्तिप्रियो, नेतानुचरः, पुमान् योषिद्वा सर्वोऽपि जनोऽत्र घण्टासम्प्रदाये समानमाराधयति निष्ठया श्रीष्टदेवीमिमां घण्टाम् भगवतीम्! किं बहुनास्या इतिनात्यर्थम्? केवलमेतावतैव वयमस्या घण्टादेव्या महत्तामनुमातुं शक्नुमो, यदस्माकं राष्ट्रपिता महात्मा गान्धिर्यद्यपि सर्वानपि भौतिकान् परिग्रहानत्यजीत्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# शिक्षकाः शिक्षार्थिनश्च

(ले० पं० देवकीनन्दनशर्मा शास्त्री, प्रश्नवरः, प्रधानाध्यापकः राजकीयसंस्कृतविद्यालयस्य शाहपुरा)

"ऋते ज्ञानान्न मुक्तिः" "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्थाः विद्यतेऽयनाय" इत्यादिश्रुतिभिः स्पष्टं प्रतीयते—यन्मानवस्य यदा दुःखविमुक्तिर्भविष्यति तदा ज्ञानेनैव। ज्ञानं सुखविधायकं दुःखजनकमज्ञानमिति निर्विवादोऽयं राद्धान्तः। शिक्षका ज्ञानप्रदातारः, शिक्षार्थिनश्च ज्ञानपात्राणि। शिक्षकशिक्षार्थिना उभावपि यदा भवतः सुयोग्यौ भवतिदैवव समुन्नतिरिति को न समनुते ऋतेऽविवेकिनः। शिक्षकशिक्षार्थिनां गुणदोषविवेचनेन उभयोरपि सत्समालोचनया च निर्गच्छेत् कश्चन निष्कर्षः। प्राचीनार्वाचीन-

---

विदेशीयान् पदार्थास्त्वत्यन्तं तत्याज, परं घण्टामूर्तिं तु सदैवात्मनो देशकालनिर्देशकमाचार्यं गुरुमिव स्वसमीपे सततं संरक्षेत्यपरं माहात्म्यं घण्टायाः!

भुवनमोहिनीयं घण्टादेवी मठाधीशानां मोहान्धानां, सर्वस्वत्यागिनां देशभक्तानां, विद्यामहार्णवानां विद्वत्कुलशिरोमणीनामाचार्याणां, शास्त्रिवर्याणां, धनकुबेराणां वणिजां, गलास्फालनोद्घोषैकसाधनसम्पन्नानां महामतीनां नेतृप्रवराणां, किं बहुना, आबालवृद्धं सर्वेषामपि मानवानां मनः स्वरूपसौन्दर्येण, मनोहरेणाकारेण तैस्तैर्भावैः समाकर्षतीत्यस्या गुणशीलस्वभावसौन्दर्यस्य विचित्रमेव किमप्याकर्षणं देदीप्यतेतमाम्! एवंविधमभूतपूर्वं प्रचारमवलोक्य व्यापिताया मनसि परिभाव्य मन्ये, वैज्ञानिकप्रवरैस्तत्रस्या अनन्ता आकाराः प्रकारा रूपरेखा विग्रहभेदोपभेदाः कल्पिताः प्रकल्प्यन्ते च सदा नवनवाः श्रीमत्या घण्टादेव्याः!

यदि चेयं घण्टा भगवती कदाचित् कस्मैचित् कुप्यति, विमनायते, मनोमालिन्यं स्वीकरोति, क्रुध्यति, ईर्ष्यति, स्पर्धते वा तदा स्वस्य तामसं रूपमतिरौद्रभीमभीषणमाविर्भाव्यात्यन्तं भीषयति, भर्त्सयति, तिरस्करोत्यवमन्यते विभीषयति त्रासयति च। यावद् घण्टा किङ्किणी, घण्टिका, घण्टा, घटिकादिरूपेण तिष्ठति तावल्लोका अकुतोभयमस्या भजनं पूजनमर्चनमाराधनमुपयोगं, व्यवहारं, दर्शनं, स्पर्शनं, साक्षात्कारं वा कर्तुं शक्नुवन्ति, किन्तु यदासौ विकृतिं भजति, यदा पुंस्त्वमात्मनि धत्ते तदा घण्टो भूत्वा प्रलयङ्करीमप्रत्याशितामसह्यां विपत्परम्परां विडम्बनामुपस्थापयति। यदि कोऽपि मनुजः स्वकराङ्गुलीः सङ्कोच्याङ्गुष्ठमुत्थाप्य घण्टामुद्रां प्रदर्शयति तदा तद्द्रष्टा तत्कालमेव घण्टायास्तामसं रूपं बुध्यति प्रकुप्यति च। घटिकागणनापरा ज्योतिर्विदो यदा यम। घण्टयोगं पश्यन्ति पञ्चाङ्गे तदा ते मुहूर्तमात्रमपि पञ्चाङ्गशुद्धिं न परिपालयन्ति। यदि कश्चिन्मनुष्योऽतीव मायापटुः कूटनीतिज्ञो वा भवति तदा स लोकैर्हिन्दीभाषायां घण्टो महाघण्टो वा प्रोच्यते। विपद्ग्रस्तो जनो गले घण्टा समापततीति मत्वा ततो दूरं प्रपलायते। अतोऽभ्युदयं कुशलं योगक्षेमं च वाञ्छता जनेन न कदापि घण्टादेवी प्रकोपनीया प्रत्युत सा सादरं सविनयं श्रद्धाभक्तिपुरस्सरं सततं सम्मान्या समर्चनीयैवेत्यहो घण्टादेव्याः प्रतिष्ठा गौरवं महत्ता माहा[त्म्य]मुत्कर्षश्च लोके विराजते!



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



गुरुच्छात्रयोः पारस्परिकसम्बन्धेऽपि दृष्टिपात एव आवश्यकः प्रतीयते ।

यदा वयं प्राचीनविद्यालयेषु दृष्टिं पातयामस्तदा श्रद्धयाऽस्माकं शिरांसि नम्राणि भवन्ति । यत्र शिष्याः विनयशीलसौजन्यसदाचरणानां प्रत्यक्षा मूर्तयः—स्वगुरुभ्यः सर्वस्वं समर्पयितुं समुद्यता आसन्, तत्र गुरवोऽपि शिष्येषु पुत्रादप्यधिकं स्नेहमकुर्वन्, तेषां ज्ञानपिपासां शान्तामकुर्वन्, ज्ञानक्षुधञ्चाप्यपाहरन् । आधुनिककाले एतादृशाः छात्रा गुरवश्च कियन्तः ? ये प्राचीनादर्शं पालयन्ति । साम्प्रतं शिक्षकशिक्षार्थिनां बहुसंख्यकभागो विरुद्धां दिशमनुवर्तते, तेनास्य देशस्य यादृशी दशा सा न तिरोहिता केनापि विवेकवता । प्राचीनछात्राणां गुरुभक्तिर्गुरूणां छात्रप्रियता च उभे अपि प्रशंसनीये आस्ताम ।

अतिप्राचीनकाले आश्रमा आसन् । समये समये तेषु परिवर्तनान्यभूवन्—यानि स्वाभाविकान्यासन् । सभ्यताया विकाशेन सह पदार्थमात्रेषु परिवर्तनं भवति, तत्परिवर्तनं कोऽप्यवरोद्धुं न शक्नोति । विद्यालयानां नियमेषु उपनियमेषु स्थानादिनिर्माणेषु च कामं भवन्तु परिवर्तनानि, परन्तु शिक्षकाणां शिक्षार्थिनां यच्चरमं लक्ष्यम्—मुख्यमुद्देश्यम्—स्वस्व-कर्तव्यम्—यदा विरुद्धमापतति तत्र हिताबहम् ।

शिक्षका विचारयन्ति यदध्यापनव्यवसायोऽपि जघन्य एव यस्मिन् समुचिता वेतनवृद्धिरपि न भवति । जीवननिर्वाहोऽपि कष्टसाध्य एव समादरोऽपि नास्ति । नदृष्ट्या विलोक्यन्ते शिक्षकाः । किं करवाम क छाम ।

शिक्षार्थिनस्तेषां संरक्षकाश्च तु विजानन्ति, यदेते शिक्षका अस्माकं कृते सर्वकारेण स्थापिताः अस्माकं बालकान् पाठयन्ति, 'यतो हि वेतनभोगिनां न मनागपि हितकणलेशोऽस्माकं मस्तकोपरि एतेषाम् ।

वस्तुतस्तु अद्यत्वे कस्या अपि विद्यायाः स्वतन्त्रं न किमपि मूल्यम् । शिक्षार्थिनः स्वकीयां ज्ञानपिपासां शान्तां कर्तुं न समागच्छन्ति विद्यालयेषु, न च बालकानां संरक्षका ज्ञानोपार्जनार्थं प्रेषयन्ति बालकान् अपितु परीक्षोत्तीर्णान् कर्तुं, समुत्तीर्य च परीक्षां तत्सहाय्यतया भोजनाच्छादनाद्यर्जनसमर्थान् विधातुं प्रेषयन्ति । शिक्षकशिक्षार्थिनामियं भावनाऽहितकर्त्री दुःखदात्री च । दुर्भावनाया अस्या अन्त एव श्रेयान् ।

शिक्षका जानीयुः यदस्माकं पार्श्वे भाविभारतस्य महत्वपूर्णमुत्तरदायित्वयुतं कार्यमस्ति । देशस्योन्नतिरवनतिश्चास्माकमेव हस्तगताऽस्ति । अस्माभिः सतर्कैर्भाव्यम् । देशोन्नतये क्लेशोऽपि सोढव्य एव । शिक्षार्थिनश्च ज्ञानोपार्जनाय समागच्छेयुः—यज्ज्ञानं गुरुशुश्रूषया विना दुर्लभम् । न कोऽपि विनयं विना धनवद् ज्ञानं बलादपहर्तुं समर्थः स्यात् ।

वयं तं कालं प्रतीक्षामहे—यदास्माकं शिक्षकाः शिक्षार्थिनश्च प्राचीनादर्शं स्वीकरिष्यन्ति । छात्रा विनयवन्तः—किन्तु वीराः—मातृपितृगुरुसंपूजका अपि—शत्रुभयङ्कराः—सुयोग्यनागरिकाः—येषु कोऽपि देशो गर्वं कर्तुं शक्नुयात्—भविष्यन्ति । शिक्षकाणामधिकाधिकः समादरो भविष्यति । ईश्वरः सुसमयं दर्शयतु ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★ मरुस्थल-निरोधस्य योजना ★

राजपुत्रप्रान्ते मरुस्थलस्य विस्तारः अरावली-पर्वतमालायाः पश्चिमदिशि १०० शतक्रोश.ऽऽयतः, तं कच्छप्रदेशीयखातस्य (खाडी) उत्तरदिशि शतद्रु-(सतलज) नदीप्रमितो दीर्घः । अर्थात् २०० द्विशतक्रोशानुमितः सोयं लम्बः । वैज्ञानिकानां कथनमस्ति यत् मरुस्थलमिदं पुराकाले अरबसागरस्य वक्षःस्थले लीनमभूत् । किन्तु यथा यथा सागरः पश्चात्प्रसृतो-ऽभवत्तथा तथा रिक्तोऽयं भूभागः क्रमक्रमेण मरुस्थले परिणतोऽभूत् । आरम्भकाले मरुस्थलस्याऽस्य अनेकेषु भागेषु बहवो वृक्षा आसन्, अद्यत्वे यादृशः शुष्कः प्रदेशोयं विलोक्यते न तादृशः शुष्कः पुराऽभूत् । ख्रिष्टीय-संवत्सरप्रवृत्तेः त्रिशतवर्षेभ्यः (३००) पूर्वम् [यस्मिन् हि समये सिकन्दरस्याऽऽक्रमणं भारतेऽभूत्] सेयं सिन्धुनदी कच्छप्रदेशीये खाते (खाड़ी) न्यपतत्, किन्तु संप्रति कच्छप्रदेशीयात् खातात् शतक्रोशानुमित-पश्चिमदिशि, आरब्यसागरे मिलति । एवमेव शतद्रुरपि १०० शतक्रोशानुमितम् उत्तरदिशि अपसृता । सरस्वती नदी पुरा परमविस्तृता, गङ्गातोऽप्यधिका दीर्घाऽऽसीत् । तस्या महिमा वेदेषु गङ्गातोऽप्यधिको वर्णितः । वैदिककाले सरस्वत्या अग्रे गङ्गानदी नवीनप्रसृता बाल्यावस्थायामासीत् । किन्तु सेयं महाविशाला सरस्वती नदी मरुस्थलस्य शुष्कतावृद्ध्या सह भारते विलुप्ता-ऽभवत् ।

'मोहनजो दड़ो', 'हडप्पा' प्रदेशाविमौ पूर्वं कस्या अपि महत्या नद्यास्तटे वर्तमानौ आस्ताम् । सिकन्दरस्य सैनिकैभिः वर्तमानलाहौरस्य पार्श्वे पुरा सालवने विश्रामः कृतोऽभवत्, किन्तु वर्तमानकाले लाहोरेऽस्मिन् साल-वृक्षाणां का कथा, वृक्षशून्यं केवलं मरुस्थलं विलोक्यते । एवमेव रामायणे, महाभारते, पुराणेषु, शाकुन्तलादिषु कवीनां कृतिष्वपि वनानां महावनानां चातीव रोचकं वर्णनमुपलभ्यते । एतेन हि साधारणबुद्धिरपि मनुष्यो ज्ञातुं प्रभवेद् यत्प्राचीनकाले वनानां देशे कियान्विस्तारोऽभूदिति । वैज्ञानिकानां कथनमस्ति यद् वनानां विनाशेन नदीनां जलं न्यूनमभूत्, जल-वाय्वोः शुष्कता प्रासरत्, क्रमक्रमेण च हरितभरिताः प्रदेशाः मरुस्थलेऽस्मिन् परिणता अभवन् ।

वर्तमानविज्ञानद्वारा तदिदं पूर्णरूपेण स्थिरीकृतमभूद् यत् भारतस्य मरुस्थलमिदं शनैः शनैः वर्द्धमानमेवाऽस्ति । ग्रीष्मर्तौ दक्षिण-पश्चिमतः प्रसृतैः पवनैः बालुकास्तूपा अमी क्रमक्रमेण वृद्धिमेव प्राप्नुवन्ति । मरुस्थलस्य विकासः उत्तरप्रदेशात् तथा पञ्चाम्बुप्रान्तात् च भयानकगत्या इतः प्रसृतोऽस्ति । एतत्प्रतिरोधनस्योपायः अतिकठिनोऽस्ति । यदि साध्योऽपि भवेत्तदापि कार्येऽस्मिन् कियान् धनव्ययो भवेदेतस्य विचारोऽपि साधारणजनस्य कृते महाकठिनः । किन्तु ये किल भूभागस्य रक्षणाऽवेक्षणेऽधिकृताः, भूम्युत्थयोः आय-व्यययोर्नियमने नियुक्ताः, तेषामिदमावश्यकं भवति यत् धराया एतस्याः क्रमक्रमेण अपचयं गच्छन्ती उर्वरा-शक्तिः कठिनकठिनैरप्युपायैः पुनरपि रक्षितुं शक्येत इति । किञ्च रक्षणोपाया इमे अतिशीघ्रमारभ्येरन् ।

भगवता सेयं पृथ्वी निजजीवननिर्वाहार्थमस्मभ्यं प्रदत्ता । एतस्यां यावानस्माकमधिकारस्तावानेव

महेन्द्रप्रकाशस्य (राजस्थान-प्रान्तीयवनविभागाध्यक्षस्य) लेखमाधारीकृत्य



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भविष्यत्काले आगमिष्यन्त्या जनताया अप्यधिकारः। अस्माकमिदमावश्यकं कर्तव्यं यद् वयमीदृशं कार्यं न कुर्मो येन प्राकृतिकनियमानामेषामुल्लङ्घनं भवेत्। प्रत्युत तथाऽस्माभिः प्रयतितव्यं येन प्राकृतिकनियमाः अग्रे अग्रे सौकर्येण सर्वैर्निरुध्येरन्। भगवती सेयं वसुमती पश्यतामेवाऽस्माकमुत्तरोत्तरं फलनिष्पत्तौ न्यूनशक्तिर्जायमाना दृश्यते। अत्राऽस्माकमेव प्रज्ञाऽपराध इति विचारशीलानां बुद्धिः। भगवता यथा प्राकृतवस्तूनां विकारस्य साधनान्याविष्कृतानि, तथा तेषां प्रतिरोधोपाया अप्युत्पादिताः। वृक्षाणां हानिकारकाः कीटाः, ईतयः, शोषादयश्च विकारा यथा संपादितास्तथा तेषां निवारकाः प्रत्युपाया अपि सृष्टाः। पृथिव्या एतस्याः संरक्षणं विकारनिवारणं चाऽस्माभिः कष्टशतैरपि कर्तव्यमित्यस्माकं धर्मः। कर्तव्यम्।

वयमस्माकमद्ययावत्संचितेन अनुभवेन जानीमो यन्मरुस्थलमिदं शनैः शनैर्वर्द्धनोन्मुखमेवाऽस्ति। अत एव अस्माभिः शिक्षितेन विज्ञानेन मरुस्थलस्य उत्तरोत्तरवृद्धेः प्रतिरोधः, सस्योत्पादनशक्तेराविर्भावश्च सुतरां कर्तव्यः। भारतीयशासनतन्त्रेण 'पञ्चवर्षीययोजनायाम्' यथाऽन्यान्यानि कर्तव्यानि निर्धारितानि, तथा मरुस्थलस्यास्य विकासनिरोधोपि दृष्टौ आनीतः। एतदर्थं 'वैज्ञानिक-सहयोगप्रशासनम्' अपि सर्वकारेण संपादितम्, यस्य सकाशादस्मिन् विषये समुचिता सहायता समये संलभ्येतेति पूर्णा प्रत्याशा।

१९५२ तमे ख्रिष्टीयवत्सरे भारतीयशासनतन्त्रेण एतद्विषयविशेषज्ञानामेका समितिर्निर्धारिता। तथा हि मरुस्थलेऽस्मिन् भ्रमणं कृत्वा मरुस्थलस्य उत्तरोत्तरवृद्धेर्निरोधस्य कृते निम्नलिखितानि दिग्दर्शनानि सूचितानि—

(अ) योधपुरे 'मरुस्थलानुसन्धानकेन्द्रस्य' स्थाप... क्रियेत, यत्र निम्नविषयेष्ववधानं दीयेत—

१—मरुप्रदेशे प्राप्यमाणानां वृक्षाणां, क्षुप... घासादीनां च विषये अनुसंधानमध्ययनं तेषां वि... सश्च।

२—अन्येषु देशेषु प्राप्यमाणाः तथा नवीनोद्... ये वृक्षाः क्षुपाश्च मरुस्थले रोहणयोग्या लाभकारि... सिध्येयुस्तेषामन्वेषणम्, उपयोगश्च।

३—वर्षावाय्वोर्गतेः, तथा कूपेषु जलस्य नि... तायाश्च गणनाङ्कानाम् (आँकड़े) संग्रहः, तेषाम... गवेषणं च।

४—वायौ लवणस्य (क्षारस्य) प्रगतिः, तथा ... क्षारस्य नवीनोत्पन्नस्य मरुस्थलस्य भूमौ आर्द्रतो... तत्स्थिरीकरणे च शक्तेः परीक्षणम्।

ब—मरुस्थलस्य निरोधनाय निम्नलिखि... साधनानां प्रदर्शनम् उपयोगश्च—

१—वाष्पयान( रेल )विश्रमस्थानेषु (स्टेश... विद्यालयेषु, भूम्युत्थद्रव्यसंग्रहकार्यालयेषु (तह... दण्डविभागीयगुल्मेषु (पुलिस चौकी), सैनिकनिव... च वृक्षारोपणम्।

२—राजस्थानस्य पश्चिमसीमायां चतुःक्रोश... द्विशतक्रोशदीर्घा च वृक्षाणां पंक्तिरारोप्येत [कार्य... णामाशा यत्तदिदं कार्यं दशभिर्वर्षैः संपाद्येत] ए... बाष्पयानमार्गस्य उभयपार्श्वयोः, तथा संसर... (सड़क) समीपतो वृक्षपंक्तेरारोपणम्।

३—केन्द्रीयो वृक्ष-क्षुप-बीजसंग्रहालयः (न... विशालः क्रियेत, येन वृक्षादीनां सर्वतो वितरणं सं...

[एतत्कार्यालयस्य स्थापनं वर्षद्वयात्पूर्वं यो... नगरे संपन्नम्]।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



४—मरुस्थलवासिभ्यो ग्रामीणेभ्यः, कृषीवलेभ्यश्च निम्नविषयाणां प्रत्यक्षतयाऽवबोधनम्—

(क) पशूनां भोजनाय वृक्षाणां पत्राणि, शाखाश्च उचितेन प्रकारेण छिद्येरन्। (ख) क्षेत्राणां समन्तात् वृक्षाणामारोपणं येन प्रचण्डशीतात्, प्रबलवायोः, उष्णपवनाच्च कृषेः संरक्षणं भवेत्।

(ग) कृषेः समुचिताः प्रकाराः। यथा निम्नगायां (ढालू) हलः उपरितो निम्ने न परिचाल्येत। …ण या भूमिर्विशीर्यते तस्याः संरक्षणम् इत्यादयः।

५—पुराकालात् दृढीभूतभूतले, नवागतबालुकया निर्मिते च मरुस्थले, उभयत्रापि प्राप्यमाणेषु पार्वतिक- …शेषु सहस्रैकड़मितायां भूमौ वृक्षादिरोपणस्य प्रयोगः परीक्ष्येत।

ततो राजस्थानीयशासनतन्त्रात् प्रार्थना क्रियेत यत्—

१—वनानां मात्रा पूर्वतः संवर्ध्य प्रतिशतं पञ्चाशत् क्रियताम्। वर्तमानकाले राजस्थाने वनविभागस्य मात्रा प्रतिशतं केवलं ११।

२—'वनविभाग' द्वारा सर्वतो बीजानां वितरणस्य व्यवस्था भवेत्।

३—कृषेर्व्यवस्था तादृक्प्रकारेण भवेद्येन भूमेः संरक्षणं स्यात्। वृक्षाणां वृतिं विधाय क्षेत्रेषु प्रसरतो मरुस्थलस्य निरोधः सर्वैः कर्तव्यः।

४—संसरणानां (सड़क) बाष्पयानीयलोहलेखानां (रेलवे लाइन) च वृक्षपंक्तिद्वारा रक्षा क्रियेत।

मरुप्रदेशे अजाऽवीनाम्, उष्ट्राणां च भोजनव्यवस्था दुष्करा। एवमेव दृढस्य काष्ठस्यापि अत्र दुर्लभत्वम्। एवंविधां दुष्करसमस्यां लक्ष्यीकृत्य जयपुरराज्यान्तर्गतशेखावाटीप्रान्तस्य झूंझनूनगरे महेन्द्रप्रकाशमहोदयस्य (राजस्थानप्रान्तीयवनविभागाध्यक्षस्य) संरक्षणे पूर्वोक्तकार्यस्याऽऽरम्भोऽभवत्, यद्धि वर्तमानकालेऽपि प्रचलति।

अस्तु, मरु-निरोधस्य दीर्घकालिकयोजनासु धनव्ययस्याऽऽधिक्यम्, आयस्य तु नास्ति शीघ्रमेव संभावना। अतएव एवंविधयोजनासु राज्यतन्त्रस्योदासीनता विलोकिता। किन्तु मरुस्थलस्य वृद्धिरूपा पिशाची न केवलं भारतमेव, अपितु संसारस्यानेकान् प्रदेशान् निर्दयं निगलितुमग्रेसरा। दक्षिण-अफ्रिकाप्रदेशीयया 'मरुस्थलसमित्या' सभयकम्पं घोषणा कृता यत् 'मारु' प्रदेशस्य मरुस्थलं निजपूर्वदिक्स्थितान् हरित-भरितान् प्रदेशान् आत्मसात्कर्तुं भयंकरप्रगत्या वर्द्धमानमस्ति। तेषु प्रदेशेषु जल-वाय्वोर्मध्ये शुष्कता प्रचण्डरूपेण प्रवर्द्धते। वैज्ञानिकानां कथनमस्ति यत् 'सहारा' प्रदेशस्य मरुस्थलं प्रतिवर्षं पञ्चदशक्रोश (३० मील) व्यापिन्या गत्या प्रवर्धमानमस्ति। किमधिकनिवेदनेन, प्रगतवर्षे लन्दननगरीयायाः 'वृक्षप्रचारसंस्था'या एकस्मिन्नुत्सवे ३४ विभिन्नप्रदेशानां प्रतिनिधिभिः मरुस्थलवृद्धेः घोषणा कृता। किन्तु तैरतिसाहसपूर्वकं मरुस्थलपिशाचेन सह वीरतया योद्धुं परिकरो बद्धः।

अफ्रिकायां वृक्षारोपणार्थम्, धरित्रीरक्षणाय च नवाविष्कृता विद्यालयाः संस्थापिताः। स्वतन्त्रभारतस्य कैश्चित् सदस्यैरस्मिन् विषये गर्वपूर्णा घोषणा कृता यद् वयमपि संप्रति प्रगतेर्मार्गे वर्तामहे। अवश्यं वयं जानीमो यन् मरुस्थलस्य सुविषमां समस्यामिमां सरलीकर्तुं भारतस्य विचक्षणा विचक्षणाः पुरुषाः संप्रति संलग्नाः सन्ति। किन्तु यावत्कालं कश्चन फलोदयो न भवेत्तावत् राजनीतिदुर्व्यवस्थया खिन्नाः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# काव्येषु नाटकं रम्यम्

ले० वि० भा० मुसलगांवकर, एम. ए. प्रा० संस्कृत—गुना ( म० भा० )

नाट्यं भिन्नरुचेर्जनस्य बहुधाऽप्येकं समाराधनम्।
नाट्यकथाकाव्यादि ललितसाहित्यप्रकाराः सन्ति॥

एते सर्वे साहित्यप्रकाराः आह्लाददायिनः सन्ति खलु। किन्तु तेष्वपि नाट्यं सर्वश्रेष्ठम् इति कथ्यते। यतः काव्यकथालेखादि श्रव्यकाव्येषु अन्तर्भवन्ति। नाट्यं तु दृश्यकाव्यम्, नाट्यस्य दृश्यत्वमेव विशेषत्वम्। नानास्वभावचित्राणि काव्येष्वपि सन्ति। किन्तु काव्येषु नायकादीनां वर्णनपठनेन वयं तेषां विषये कल्पनामात्रं कुर्मः। नाट्ये तु वयं नायकादीन् (पात्राणि) प्रत्यक्षं दृष्ट्वा आह्लादं प्राप्नुमः। सहृदयः एव काव्यानंदं प्राप्नोति किन्तु सामान्यसामाजिकोऽपि नाट्यं दृष्ट्वा आह्लादं प्राप्नोति।

यद्यपि काव्येषु कविर्बहुविधपुरुषाणां चित्रणं करोति, ततश्च नायकवर्णनप्राबल्यात् विषयवर्णनप्राबल्यात् वा सः अप्रधानपात्राणां वर्णनम् उत्कृष्टरीत्या न करोति। रामायणे रामभद्रवर्णनप्राधान्यात् कविः इतरेषां वर्णनम् उत्कृष्टरीत्या कर्तुं न शक्नोति। कालिदासोऽपि कुमारसंभवे शंकरपार्वतीवर्णनबाहुल्यात् अन्यान् विषयान् अप्रधानं करोति।

नाटकं तु संसारस्य प्रतिबिम्बोऽस्ति। अस्माकं संसारस्य नाट्यं लघुचित्रं खलु। अस्मिन् संसारे बहुविधानि चित्राणि दृश्यन्ते। केचित् मूर्खाः, केचित् गुणवन्तः, केचित् धनाढ्याः, केचित् धनहीनाः, केचित् दुर्जनाः, केचित् सज्जनाः, केचित् सत्यनिष्ठाः केचित् सत्यपराङ्मुखाः सन्ति। स्त्रीबालवृद्धानां बहवः प्रकाराः दृश्यन्ते। नाट्ये एतस्य प्रत्यक्षं दर्शनं दृश्यते। नाट्यं दृष्ट्वा जनाः संसारस्य सुखम् अनुभवन्ति। कालिदासस्य शकुन्तलायां धीवरस्य चित्रमत्यन्तमुत्कृष्टम अस्ति। तथैव राजपुरुषाणां व्यवहारः नित्यं संसारे अनुभूयते। प्रथमं राजपुरुषः 'स्तुत्यः खलु ते आजीवनप्रकारः' इत्युक्त्वा तं दूषणं ददाति। तदनन्तरं यदा सः पारितोषिकं प्राप्नोति तदा स एव पुरुषः 'कादंबरीसाक्षिकमस्माकं प्रथमसौहृदमिष्यते' इत्युक्त्वा मद्यपानगृहे गच्छति। एतद् स्वभावचित्रं वयं नित्यं संसारे अनुभवामः। अतः वयमस्माकं संसारस्य सुखदुःखानि नाट्ये अनुभूय अत्यानन्दं प्राप्नुमः।

काव्यादिपठनेन सहृदय एव आनन्दं प्राप्तुं शक्नोति। किन्तु भिन्नरुचियुक्तः सामान्यजनः अज्ञोऽपि च नाट्यं दृष्ट्वा आनन्दं प्राप्तुं शक्नोति। नाट्ये पात्राणां वैचित्र्यम अतीव प्रकर्षेण वर्तते। अतः भिन्नरुचिर्हि जनः नाट्ये आत्मनः रुचिं लब्ध्वा आनन्दं प्राप्नोति। शकुन्तलानाटकं दृष्ट्वा सहृदयः दुष्यन्तस्य हृदयपावित्र्यं, कण्वमुनेः उदात्तं चरितं तथा शकुन्तलायाः सौजन्यं दृष्ट्वा तुष्यति। किन्तु सामान्ययुवकजनाः शकुन्तलायाः प्रेमालापं दुष्यन्तस्य प्रणयचेष्टां दृष्ट्वा प्रीयन्ते। अज्ञ…

---

साधारणजनाः कथं वा तत्र विश्वासमास्थापयेरन्? किन्तु कुशलास्ते कार्यकर्तारो यदि सत्यभावेनाऽस्मिन्ननुसंधाने प्रयत्नशीलास्तर्हि ते अवश्यावश्यं सफला भवेयुरित्यस्माकं विश्वासः। 'विधेयासुर्देवाः परमरमणीयां परिणतिम्।'



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



राजपुरुषाणां धीवरस्य मद्यपानगृहप्रवेशं दृष्ट्वा आत्मानं प्रीणयति। अतः भिन्नरुचेर्जनस्य नाट्यं एकमेव समाराधनम् अस्ति। काव्यं सहृदयस्यैव समाराधनम्। काव्येषु तत् तत् प्रसङ्गकथनाय, तत् तत् रसोत्पादनाय कविर्निसर्गवर्णने, राजगृहतपोवना-दिवर्णनेत्र बहुःकालं नयति। किन्तु नाट्ये प्रत्यक्षं तपोवनं दृष्ट्वा तपोवनप्रवेशम् अनुभवामः। प्रत्यक्ष-चित्रमधिकं प्रभावं करोति। माघस्य शिशुपालवधे द्वारकावर्णनमथवा नैषधकाव्ये दमयन्त्याः राजप्रासाद-वर्णनं अल्पाः सज्जनाः तत् ज्ञातुं शक्नुवन्ति। तेष्वपि अतीव अल्पाः आह्लादं प्राप्नुवन्ति। किन्तु नाट्ये सुन्दरं राजप्रासादं दृष्ट्वा अज्ञोऽपि प्रत्येकं जनः आह्लादं प्राप्नोति। अतः नाट्यमेव प्रत्येकस्य आह्लादसाधनं भवति।

नाट्ये पात्रवैचित्र्येण सह अभिनयवैचित्र्य-मस्ति। अभिनयकौशल्यात् रसनिष्पत्तिः शीघ्रमेव भवति। रघुवंशे अजविलापं, रतिविलापं वर्णयितुं कालिदासः श्लोकसमूहान् लिखति। किन्तु नाट्ये तु असहायायाः शकुन्तलायाः चित्रं दृष्ट्वा सामाजिकः दुःखमनुभवति, अश्रु पातयति च।

नाट्ये संसारस्य केवलं सुखदुःखे एव न भवतः। किन्तु सर्वेषां मनोरञ्जनाय विदूषकः अपि तत्र भवति। विदूषकः सुखेषु दुःखेष्वपि सदा प्रसन्नः दृश्यते। सः सदा भोजनप्रियः कदा कदा असंबद्धं प्रलापं कृत्वा सामाजिकान् आह्लादयति। विदूषकः नाट्येषु एव दृश्यते। विदूषकः बहुधा अज्ञजनान् आनन्दयति। नृत्यमपरं रञ्जनसाधनं सामाजिकानां नाट्येषु एव दृश्यते। केचित् जनाः नृत्यं द्रष्टुमेव नाट्यमवलोकयन्ति। नाट्ये गीतसंगीतादि अनुरञ्ज-नार्थमेव युज्यते। अतः नृत्यसंगीतप्रेमिजना अपि आत्मानमनुरञ्जयन्ति नाट्येषु। अतः काव्येषु नाटकमत्यन्तं रमणीयं भवति।

नाट्ये संसारस्य छायाचित्रं जनाः पश्यन्ति। तस्मिन्नेव समये ते आदर्शजीवनमपि पश्यन्ति। संसारचित्रं दृष्ट्वा सुखदुःखानि अनुभूय ते सत्य-ज्ञानमपि बोधन्ति। नाट्यं न केवलं संसारस्य प्रत्यक्षं चित्रमपि तु नाट्ये अदृष्टदर्शनमपि भवति। अननु-भूतभावनाः अपि अनुभूयन्ते। अतएव नाट्यं जनान् समाराधयति। यदि सामाजिकः तदेव कष्टदुःखयुक्त-जीवनं पश्येत् तर्हि न सः आनन्दं प्राप्तुं शक्नोति। किन्तु सः आत्मनः संसारस्य चित्रं पश्यन्नपि क्वचित् अदृष्टं जगत् पश्यति च। क्वचित् अनुभूत-भावनामनुभवति च। शकुन्तलायाः शोकविह्वलां मुद्रां प्रेक्षकः पश्यति। ततः तस्याः मेनकया सह स्वर्गगम-नमपि सः पश्यति। भरतबालकस्य सिंहेन सह बाल-क्रीडां दृष्ट्वा प्रत्येकं वात्सल्यभावेन आत्मानं विस्मरति।

अतः नाट्यं संसारस्य रम्यं प्रतिबिम्बम्, न तु प्रत्यक्षं चित्रमस्ति। प्रत्येकं जनः आत्मनो रुचिं नाट्ये आस्वादयति। जीवनस्य प्रत्येकोंऽशः नाट्ये वर्णितः। सुखदुःखादिकाः सर्वे भावाः नाट्येषु अनुभूयन्ते। आबालवृद्धादयः सर्वे जनाः आत्मनो रुचिस्थानं नाट्ये प्राप्नुवन्ति।

नाट्यप्रियाः सामाजिकाः नाट्यभक्ताः काव्यभ-क्तापेक्षया बहवः सन्ति। प्राचीने कालेऽपि नाट्य-प्रियजनानां संख्या बहु वर्धते स्म। भरतमुनिः एतदेव दृष्ट्वा भिन्नरुचेर्जनस्य समाराधनाय नाट्यशास्त्रं प्रणीतवान्। भवभूतेः उत्तररामचरितेऽपि नाटकस्य



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भारतस्य संसद्भवनम्

श्रीमाँगीलालमिश्रः, नेछवा ( सीकर )

प्रतिदिनं देशविदेशतो बहवो दर्शका दिल्लीदर्शनार्थं समायान्ति। नूतनदिल्लीनगर्यां राष्ट्रपतिभवनं, संसद् भवनं, सेक्रेटेरियटस्य भव्यं विशालं च भवनमवलोक्य, तेषां निर्माणचातुर्यं च दृष्ट्वा ते मुग्धाः संजायन्ते। वस्तुतः भवनानीमानि सर्वोत्कृष्टकलांशाः। गोलाकारं हि संसद्भवनम्। प्रतिदिनं सहस्रं नरनार्यः संसद् भवनस्य समीपत आयान्ति गच्छन्ति च। परं कतिसंख्यकाः व्यक्तय ईदृग्विधाः याभिरस्य गोलाकारस्य विषये विचारणा कृता।

नवदिल्ल्याः स्वरूपं "आर्कीटेक्ट सर एडविन लुटिन्सेन" निर्मितम्। सर्वैरेव गोलाकारभवनं समर्थितम्। यतो हि गोलाकारं वस्तु चिरस्थायि मन्यते। भूरपि गोलाकारा। सूर्योऽपि गोलः। चन्द्रोऽपि गोलः। पुनः गोलाकारं वस्तु-अनन्तताद्योतकम्। गोलभवनस्य विभिन्नभागानां निवासिनः समाना एव मन्यन्ते। अनेनैकत्वभावो वर्द्धते। इत्थं विचार्य ब्रिटिशभारतस्य शासकैः जनसेवाविभागः(P.W.D.) भवननिर्माणार्थं समादिष्टः। तेन षड्वर्षेषु भवनं निर्मितम्।

अद्यतनस्य संसद्भवनस्य शिलान्यासः "ड्यूक ऑफ कनाटेन" १२ फरवरी १९२१ मिते खिष्टाब्दे सम्पादितः। उद्घाटनं च भारतस्य तात्कालिकसम्राट् प्रतिनिधिना ( वाइसरायेन ) "लार्ड इरविनेन" १८ जनवरी १९२७ मिते खिष्टाब्दे कृतम्। अवसरेऽस्मिन् "सम्राजा पंचमजार्जेनापि" स्वकीयः सन्देशः प्रेषितः।

भवनमिदं ६ एकडभूमौ विस्तृतम्। परिधिरस्य ५६० फुटपरिमितः परितोऽस्य "बरामदा" विद्यते। मध्ये-एको विस्तृतो "हॉल"। अनेकानि सभाकक्षाणि। हरितानि घासानि च, यानि नियमितरूपेण कर्त्यन्ते। लघवः जलोत्क्षेपणकाः (फौव्वारे)। येषु साम्प्रतं नील रागो (रङ्ग) विद्यते। नीलरागयुतं हि जलं दर्शकानां

---

रुचिप्रियत्वमेव दृश्यते। सीतायाः प्राप्तये भवभूतिः नाट्यमेव अवलंबितवान्। उत्तररामचरिते नाट्यस्य साहाय्येन रामभद्रः सीतां पुत्रद्वयं च प्राप्नोत्।

अधुनापि चित्रपटदर्शनाय छायाचित्रं द्रष्टुं गच्छतः जनान् पश्यन्तु। अगणिताः जनाः छायाचित्रं प्रेक्षितुं गच्छन्ति। अज्ञाः सुज्ञाः प्रज्ञाः विद्यार्थिनः आबालवृद्धस्त्रीपुरुषाः धनिकाः श्रमिकाः सर्वे सायं समये छायाचित्रं द्रष्टुं गच्छन्ति। सर्वे स्वस्वरुचिं तत्र प्राप्नुवन्ति, आत्मानं आह्लादयन्ति च। मनोरञ्जनसमये सामाजिकः कान्तासम्मितम् उपदेशमपि प्राप्नोति। शकुन्तलानाटकं दृष्ट्वा कः पुरुषः परस्त्रीं कामवासनया द्रष्टुमिच्छेत्? कः क्षत्रियः ब्राह्मणस्य अनादरं कुर्यात्?

अतः नाटकं अत्यन्तं रमणीयं भवति। नाटके सर्वं खलु दृश्यते। भिन्नरुचयो जनाः हस्यन्ते, भिन्नभिन्नदृश्यानि, संसारस्य सुखदुःखचित्रम्, अदृष्ट जगतः रमणीयं काल्पनिकं चित्रम्, मधुरोपदेशं च सर्वं सर्वं खलु नाटके अनुभूयते। अतः काव्येषु नाटकं रम्यम्। सर्वेषां समाराधनसाधनं नाट्यमेव। अतो भिन्नरुचेर्जनस्य बहुधाऽप्येकं समाराधनसाधनमिदमस्ति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भवन-अह्लादकरम्। मध्ये गोलाकारवन्तो वृत्ताः। सभा-कक्षाणि सुन्दराणि। ६२ क्रमाङ्के कक्षे ( कमरे में ) अध्यक्षस्य (स्पीकर) कांग्रेसपार्टीमीटिंगम्, प्रधानमन्त्रिणः प्रेसकांफ्रेसं च जायते। कक्षमिदं गोलाकारम्। मध्ये-अध्यक्षस्य कुर्सिकायाः वामभागे राष्ट्रपतेरतिथीनां परिवारसदस्यानां कृते स्थानानि। पूर्वं संसदः कक्षमिदं १४८ सदस्यानां कृते आसीत् परं साम्प्रतं ५५० सदस्यानां कृते विहितम्। अध्यक्षस्य कुर्सिकाया उपरि विद्युत्प्रकाशिताक्षरैः संस्कृते लिखितम् "धर्मचक्रप्रवर्तनाय" इति। ततः संसत्सचिवस्य स्थानम्। अध्यक्षस्य कुर्सिकाया उपरि "प्रेस गैलरी" विद्यते। अत्र प्रेसस्य जनाः ( संवाददाता प्रभृतयः ) तिष्ठन्ति। कौंसिल ऑव स्टेट, गैलरीं, विशिष्टदर्शकानां गैलरीं, तथा विदेशीयविशिष्टपुरुषाणां ( यथा राजदूतादयः) गैलरीं च विहाय एका महिलानां कृतेऽपि "गैलरी" अस्ति। अत्रस्थाः जनाः नीचैः स्थितान् संसद्सदस्यान स्पष्टतोऽवलोकयितुं समर्थाः। पुनश्च ध्वनिवर्द्धकयन्त्रेण तेषां भाषणान्यपि स्पष्टं श्रोतुं शक्ताः। कक्षाणि आवश्यकतानुसारं शीतान्युष्णानि च संपाद्यन्ते विद्युद्द्वारा। अत्राधुना ब्रिटेनस्य "हाउस ऑफ् कॉमन्स"वत् भाषमाणसदस्यवाचं विनैव कष्टं सकलाः सदस्याः श्रोतुं समर्थाः, इति श्लाघनीयः प्रबन्धः। उच्चतराणि, १८ ध्वनिवर्द्धकयन्त्राणि ( माई क्रो फोन ) भाषणश्रवणकष्टनिवारणार्थं सर्वत्र (संसत्कक्षे) स्थितानि सन्ति। श्रूयते—अस्य प्रबन्धस्य श्रेयो वर्तमानाध्यक्षे श्रीमावलंकरे विश्राम्यति। येन स्वकीयायां १६४८ वर्षे कृतायामिंगलैण्डयात्रायां 'हाउस ऑफ् कामन्से" विलोक्येदृक्प्रबन्धः अत्रापि कृतः। अस्मिन् "हॉले" श्रीविट्ठलभाईपटेलस्य चित्रम्।

"राज्यपरिषद् स्थानम्":—

इदमपि-अर्धगोलाकारम्। यत्र ८६ सदस्याः स्थातुं शक्ताः।

"प्रिंसेस चेम्बरम्":—

इदमपि राज्यपरिषदिवार्द्ध गोलाकारम्। साम्प्रतं स्थानमिदं भारतीयसर्वोच्चन्यायालयस्य कार्यालयः। नूतनभवननिर्माणे जाते उच्चन्यायालयस्य स्थानपरिवर्तनं भविष्यति।

'पुस्तकालयः":—

अस्मिन् १५,०००, पंचदशसहस्राणि पुस्तकानि सन्ति। प्रतिदिनं १५०, समाचारपत्राणि समायान्ति। राष्ट्रपतेः कुर्सिकोपरि महात्मनः गांधिनः चित्रम्। चित्रमिदमिंगलैण्डस्य प्रख्यातकलाकारेण "सर ओरवल्ड विले" महोदयेन चित्रितम्, एकेन संसत्सदस्येन च संसदे उपहारीकृतम्।

१०, क्रमांके कक्षे प्रधानमंत्रिणः कार्यालयः। सदस्यानां कृते च, षड्विश्रामगृहाणि। तेषां सौकर्यार्थमेको लघुपत्रालयोऽस्ति। इम्पिरियलबैंकस्य, रिजर्वबैंकस्य च कार्यालयोपि विद्यते। वाष्पयाने स्थानस्वरक्षितीकरणार्थं "रेल्वेविभागस्य" एको लेखकोऽत्र तिष्ठति। दर्शकानां कृते प्रतीचालयश्चास्ति। गोलाकारेऽत्र कुर्सिकाः स्थापिताः प्रवेश-पत्रं (पास) विना दर्शकोऽमे गन्तुमसमर्थः। प्रवेशद्वारेषु रक्षकपुरुषाणां विशिष्टतरः प्रबन्धः। भवनस्य विभिन्नभागेष्वारोहणसौकर्यार्थं विद्युत्यन्त्रं (लिफ्ट अस्ति।

भवनस्यास्य निर्माणे तस्मिन्समये ८३,००,००० लक्षरूप्यकाणि व्ययीभूतानि। साम्प्रतं भवनस्यास्य मूल्यं ४, कोटिरूप्यकमितमित्यनुमीयते। अस्मिन भवने ग्रीका भारतीया च कला विद्यते। द्वारे निर्मिताः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# मुण्डस्याट्टहासः

(अनु० श्रीप्रेमशङ्करमिश्रः, इटारसी)

ईशवीयाष्टमशताब्द्यां 'मुहम्मदबिनकासम'नामा यवनः सिन्धुप्रदेशस्थितं देवलमाचक्राम । तदानीं महाराजो दाहरः सिन्धून् अधिशास्ति स्म । युवराजः शत्रुसांमुख्याय प्रेषितः दुर्दैवात् समरे अरातिभिः स्वर्गं प्रापितः । देवलसेनाः पराजिताः । समुद्रतटे चन्द्रतारांकितहरितध्वजधूननं संजातम् ।

दाहरः पुत्रस्य वीरगतिं श्रुत्वा प्रतीकारधिया स्वदेशगौरवरक्षासमुत्साहप्रज्वालितवीररसः शत्रूनभि जगाम । प्रचुरयवनसेनाविनाशं विधाय दौर्भाग्यात्पञ्चत्वं गतः । सहस्राधिकैः यवनैः "खलीफा बलीदस्य" समीपे उपहाराय मृतस्य दाहरस्य शिरः कायादपहृतम् । दुःखपूर्णं समाचारं प्राप्य महाराज्ञी सैन्यसंचालनं कृत्वा अबलाजातिगौरवं भारते प्रतिष्ठापितवती । एवं भारतमातुः सेवाकृते दाहरस्य समस्तपरिवारः क्षत्रियोचितकर्तव्यद्वारा स्वकीयबलिसमर्पणं कृतवान् । एतादृशेषु अवसरेषु चेद्भाग्यप्रातिकूल्यं नागच्छत्तर्हि भारतस्येतिहासः अन्य एवाभविष्यत् ।

दाहरस्य प्रासादो दस्युभिः कामं लुण्ठितः । लुण्ठितवस्तुषु दाहरस्य शिरः, छत्रम्, सूर्य-परिमाल नामनी कन्ये अपि उपायनत्वेन बगदादनगरे खलीफा बलीदस्य समीपे प्रेषिते । भयानकं दाहरस्य शिरः विलोक्य एव कम्पिताङ्गयष्टिः बलीदः सत्वरं पुरतः अपसारयामास । कन्यकयोः सौन्दर्यं दृष्ट्वा कुसुमेषुभिन्नहृदयः विवाहप्रस्तावनाम् कृतवान् तदा सूर्यदेवी शोकजाश्रुपूरितनयना जगाद–आवाम् भवतो योग्ये न स्वः । यतः कासिमः आवामपवित्रयत् । एतत् श्रुत्वा बलीदः रोषताम्राक्षः प्रोवाच–नीच कासिम! मां वञ्चितवानसि! दुर्मते! अस्य फलं सत्वरमेव भुंक्ष्व । भारतविजययोजनासंलग्नः कासिमः बलीदस्यादेशविधायिभिः वीरैः शुष्ककृत्तिमध्ये स्यूतः बगदादं प्रापितः । स्वस्य दोषराहित्यत्वे किमपि वक्तुम् अवसरः अपि तेन न प्राप्तः । कृत्तिस्यूतस्योपरि बलीदः बहुशः पादप्रहारं कृत्वा स्वामिभक्तेः पुरस्कारं तस्मै ददौ ।

---

(छज्जाः) भारतीया एव । अन्यान्यप्यनेकानि चिन्हानि भारतीयान्येव । मध्ये संस्कृते लिखितम्:—

"न सा सभा यत्र न सन्ति वृद्धाः,
वृद्धा न ते ये न वदन्ति धर्मम् ।
धर्मो न सो यत्र न चास्ति सत्यं,
सत्यं न तत् यत् कपटेन युक्तम् ।।"

"बाग् बहिर्न समागच्छे" दित्यस्य प्रशंसनीयः प्रबन्धः । अस्मिन् भवने कृष्णसंगममर्मरनामकप्रस्तरः, "गया" प्रदेशस्य । 'चेम्बर ऑफ् प्रिंसेज"विभागस्य प्रस्तरः मकराणा (राजस्थान)नगरस्य । शीशमवृक्षाणां काष्ठं दक्षिणभारततः । तथा सागवानप्रभृतीनि काष्ठानि-आसामतः बर्मा(ब्रह्मा)तश्च समानीतानि ।

साम्प्रतं संसद्भवने भारतीयेतिवृत्तपरिचायकानां भारतीयसंस्कृतेः प्रतीकस्वरूपाणां चित्राणां चित्रणं स्यादिति शासकाः विचारयन्ति इत्थं श्रूयते । "कलाविज्ञानयोः स्पष्टतरेण, मनोहारिणा समन्वयेनास्मत्संसद्भवनं संसारस्य भव्येषु भवनेषु गण्यते" इति भारतीयानां कृते गौरवास्पदम् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अर्वाचीनाः संस्कृतसाहित्यकाराः

(अनु० देवर्षिकलानाथशास्त्री साहित्याचार्यः B. A.)

[अस्माभिः कतिपयमासपूर्वम् आङ्गलभाषायां यन्त्रलिपीकृतं (Typewritten) एकं लघुपुस्तकम् अधिगतम्। एतत्खलु सुप्रसिद्धसंस्कृतेतिहासलेखकस्य ए० एम्० कृष्णमाचारियर M. A., M. L., Ph. D. I. R. A. S. भूतपूर्वमद्रासप्राड्विवाकस्य "संस्कृत-साहित्येतिहासतः" (History of classical Sanskrit Literature) केवलमाधुनिकशताब्दी-मध्ये संजातानां साहित्यकाराणामितिहासं संकलय्य तेन विदुषा लिखितमस्ति। एतस्मिन् हि भारतवर्षे संजातानाम् आधुनिकयुगीनसंस्कृतसाहित्यकाराणां (ईशवीय १८०० संवत्सरम् आरभ्य पर्यन्तं १९४० समुद्भूतानां) विशेषतो दक्षिणाञ्चलवासिनां परिचयः, तद्ग्रन्थानां सूची समीक्षा च विशदं संकलितानि, भारतीपाठकानां संस्कृताध्येतॄणां गवेषकाणां च महते लाभाय स्युरित्यत्र लेखकेन आवश्यकपरिवर्तनानन्तरं परिवर्द्धनानन्तरं च संस्कृतेऽनूद्य यथाक्रमं प्रकाश्यते।

—सम्पादकः]

एतस्मिन् एकोनविंशशताब्द्या मध्यभागे दाक्षिणात्यैः बहुभिः कविभिः काव्यानि रचितानि। तोलनम्बुद्रिणा तोलमहाकाव्यम्, चन्दनपल्लीनगर्याः एदायधेन रामचरितकाव्यम्, कुंजुकुथन ताम्बिरनेन यादवविजयकाव्यम्, नम्बुद्रिपादेन रुक्मिणीस्वयंवरप्रबन्धः, क्राङ्गनोरस्थ-कुण्डु-कुट्टन-ताम्बिरनेन किरातव्यायोगः बभ्रुवाहनचम्पूश्च रचितानि। क्रांगनोर कोचुन्नि-ताम्बिरनेन गोश्रीचरितकाव्यम्, बाणायुधचम्पूः, विप्रसन्देशकाव्यम्, अनङ्गविजयविटराजविजयाख्यं भाणद्वयं च रचितानि।

मनोरमानाम्नी सुप्रसिद्धकवयित्री अप्यभूत्, या एकशताब्दं पूर्वं मृत्युमाप। लक्ष्मीरजनीनामकराजकुमारी प्रसिद्धा कवयित्री अभूत् यया सनातनगोपालकाव्यं लिखितम्। द्वादशवर्षाण्यतीतानि अस्या मृतायाः। कुर्चिराजकुमारी सुभद्रा (१९२१ मृत्युः) सौभद्रास्तवमलेखीत्। सन् १८१३ वर्षे इतिहासतमोमणिनामकग्रन्थो लिखितोऽस्ति, यस्मिन् आङ्गलानां भारते आगमनम्, राज्यस्थापना च वर्णिते स्त। अंगरेजचन्द्रिका (१८०१) विनायकरचिता आंगलसाम्राज्यवर्णनं कुरुते। रामस्वामि राजालिखितं "राजाङ्गलमहोद्यानं", राजराजवर्मणः

---

सूर्य-परिमालदेव्यौ पुनः अपि बलीदस्य पुरतः हर्म्यपृष्ठे उपस्थापिते। बलीदः जगाद-किं तथ्यमेव दास्मः कासिमः युवामपवित्रयत् ? "सर्वथा असत्यम्, भारतीयललनायाः स्पर्शनमपि तत्कृते असम्भवम् वर्तते। मया स्वपितुर्वैरनिर्यातनं कृतम्। तव मौढ्यं प्रशंसनीयम् यत् स्वसेवकमेवं कृत्वा नाशितवानसि। यवन! संसारस्य कापि शक्तिः भारतललनाधर्मनाशे न समर्था" एवं रोषसहितं कथयित्वा भगवती देवी विपदिग्धछुरिकया, परमालं मारितवती सा च सूर्यदेवीं जघान। उभे अपि हर्म्यपृष्ठतः पतिते। खलीफा विवृतनेत्रः स्थितः। दाहरस्य शिरः तदीय-ललनायाः कृते अट्टहासं करोति इति तेन ज्ञातम्।

'कल्याण''तः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



''आङ्गलसाम्राज्यम्'' परवस्तुरङ्गाचार्यस्य 'आंग्लाधिराज्यस्वागतं''च सर्वाणि भारते ब्रिटिशसाम्राज्यस्य वर्णनपराणि । 'विजयिनी' काव्ये विद्यालङ्कारभट्टाचार्येण महाराज्ञ्या विक्टोरियाया राज्यस्य वर्णनं कृतम् । देहलीमहोत्सवकाव्ये श्रीनिवासभट्टाचार्येण देहलीदरबारस्य वर्णनं विहितम् । पवनदूतकाव्यस्य रचयिता, जी० वी० पद्मनाभः स्वकीयजार्जदेवचरिते पञ्चमजार्जमहाराजस्य चरित्रं निबद्धवान् । भागवतकृष्णरचितं कृष्णराजाभ्युदयकाव्यम्, श्रीनिवासकविरचितकृष्णराजप्रभावोदयकाव्यम्, त्रिविक्रमशास्त्रिरचितकृष्णराजगुणालोककाव्यम्, गीताचार्यरचितश्रीकृष्णराजोदयचम्पूश्च महीशूरनरेन्द्रस्य महाराजकृष्णराजोदयारस्य गुणवर्णनपराणि ।

अहोबलम मठस्य मठाधिपतयः क्रमेण सर्वेऽपि प्रायः संस्कृतविज्ञा अभूवन् । इयंपरम्परा बहून् महाकवीन् उत्पादितवती । आदिवनशठगोपस्वामी प्रथमो मठाधीशोऽभूत् ।

६—आदिवनशठगोपस्वामी तिरुनारायणपुरवास्तव्यः (१३७६-१४५८) तिरुमलाई नम्बिआकर) तस्य उत्तराधिकारी नारायणः (अधिकारकालः १४५८-१४७२) द्वावपि कवी आस्ताम् । नारायणेन षोडश ग्रन्था लिखिता इति प्रसिद्धम् । तस्य नारायणचरितम्, आलुवन्दारुस्तोत्रस्य टीका च सुतरां प्रसिद्धे स्तः । वेङ्गिपुरवास्तव्यः परांकुशः ( १४६७-१५११ ) षष्ठो मठाधीशोऽभूत, येन नरसिंहस्तवो लिखितः । शठगोपः सप्तमोऽभूत् (१५१२-१५२२) येन वासन्तिकापरिणयनाटकं लिखितम् । कल्याणपुरम् चक्रवर्त्तीपरांकुशरामानुजः ( १७६२-१७७४ ) चतुर्विंशो मठाधीशोऽभूद्येन श्रीप्रपत्तिः, नरसिंहमङ्गलाशासनम् इत्यादिकाव्यानि रचितानि ।

७—इलानगरगदाधरपुरम् वीरराघवः सप्तविंशो मठाधीशोऽभूत् (१८२७-१८३०) येन कृपासागरस्तवः, क्षीरनदीस्तवः, विहगेश्वरस्तवः, देवराजस्तवः, लक्ष्मीनरसिंहस्तवः इत्यादिस्तवाः, नीलकण्ठविजयचम्प्वाः प्रातिद्वन्द्व्ये वैकुण्ठविजयचम्पूरपि च रचिता ।

८—अट्टिपट्टु मदाबुसि शठगोपरामानुजः चतुस्त्रिंशः (१८७८-१८८१) आसीत् । अनेन कविहृदयरञ्जिनी, वेदगिरिवर्णनम्, तुरगगतिरित्यादिग्रन्था विरचिताः ।

९—पिल्लैपक्कम् इलयवल्लि वीरराघवः सप्तत्रिंशत्तमोऽभूत् ( १८९७—९८ ) येन शारीरकसुप्रभातश्रीगोष्ठीनाथस्तवौ रचितौ ।

१०—श्रीनिवासः(१८०२-६१) अयं महीशूरराज्यस्य परकालमठस्य ऊनत्रिंशत्तमो मठाधीशोऽभूत् । अनेन अलङ्कारसंग्रहस्य रचना कृता ।

---

## कोटानगरे राजस्थानसंस्कृतसाहित्यसम्मेलनम्-

आगामि २६, २७, २८ दिसम्बरे कोटानगरे राजस्थानसंस्कृतसाहित्यसम्मेलनं भविता । तत्र वेदपरिषद्–साहित्यपरिषद्–दर्शनपरिषद् इत्यादयः परिषदः भविष्यन्ति । निबन्ध–वाद–प्रतियोगिता तथा नाट्यसंगीतप्रतियोगिताऽपि भविष्यति । सम्मेलनस्य सभापतिपदे डूंगरकालेजस्य संस्कृतविभागाध्यक्षाः श्रीविद्याधरशास्त्रिणः निर्वाचिताः सन्ति । सम्मेलनावसरे अखिलभारतीयसंस्कृतप्रचारप्रदर्शिन्याः समाचारपत्रप्रदर्शिन्याः आयोजनमपि वर्तते ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सम्पादकीयम्—

### प्राचीनसाहित्यगवेषणायां नवीना प्रगतिः—

प्राचीनसाहित्यगवेषणायां नवीना प्रगति :—
ः नवम्बरदिवसे राष्ट्रपतिः श्रीराजेन्द्रप्रसादमहोदयो ...रतीयराजनीतिकोषमण्डले' (पूनानगरे) संस्कृत... ...दिनां कृते परमादरणीयं भाषणमदात्। अस्मिन्काले ...जनीतिकोषे' ह्यस्मिन् ऋग्वेदमारभ्य १७तमशताब्दी-...न्तस्य संस्कृतसाहित्यस्य, प्राकृतसाहित्यस्य च ग्रन्थेषु ...वहृतानां राजनीतेः पारिभाषिकशब्दानां संग्रहः ...रन्थोऽस्ति। राष्ट्रपतिमहोदयो विषयेऽस्मिन्नभाषत—...यद् भारतवर्षमिदं प्राचीनतमो देशः। एतस्य प्राचीनैः ...हित्यकारैः सामाजिके साहित्यिके च क्षेत्रे ईदृशः ...ऽपि विषयो न परित्यक्तो यस्मिन् तेषां लेखनी ...ङ्गोपाङ्गविषयनिरूपणे सफला नाऽभवत्। तैः ...हित्यकारैः सूचितः, भाषानुसारं विस्तृतीकृतः, स एव ...विषयोविभिन्न-विभिन्नभाषासु विकीर्णतथा व्याप्तोऽस्ति। ...न विषयेण सह संबद्धास्तत्तत्पारिभाषिकशब्दा अपि ...सु भाषासु विप्रकीर्णाः सन्ति। ततश्च नानाभाषासु ...कीर्णानामेतेषां पारिभाषिकशब्दानामेकत्र समावेशं ...ना एका एतादृशी प्रामाणिकशब्दावली संग्रहीतुमा-...श्यकी या हि सर्वास्वपि प्रान्तीयभाषासु सादरं ...ह्येत। एतस्य कृते सपूर्णमपि प्राचीनं साहित्यं ...न्थयितुमावश्यकं भवेत्। हर्षस्य विषयो यद् ...रतीयराजनीतिकोपसण्डलम्' अस्मिन्विषये महतीं ...नं कुरुते।"

### भाण्डारकरप्राच्यगवेषणासंस्थानस्य निरीक्षणम्

...नन्तरं राष्ट्रपतिमहोदयो 'भाण्डारकरप्राच्यगवेषणा-...स्थानस्य' (ओरिएण्टलरिसर्चइन्स्टिट्यूट पूना') ...क्षणमकरोत्। अत्र हि राष्ट्रपतेर्भाषणमप्यभवत्। आरम्भे संस्थानस्याऽस्य प्रबन्धसमितेरध्यक्षः श्रीगिरि-जाशंकरवाजपेयिमहोदयः (बम्बईप्रदेशस्य राज्यपालः) राष्ट्रपतेः स्वागतं कुर्वन्नभाषत—"यत् भारतवर्षे सामा-जिकाऽभ्युत्थानं देशनायकैर्यदि वास्तवे एव कर्तुमभि-लष्यते तर्हि पञ्चवर्षीययोजनायां संस्कृताय प्रमुखादपि प्रमुख स्थानं दातव्यं भवेत्। यतो हि, इयमेव भाषा भारतस्याऽस्य सर्वस्या अपि तस्याः संस्कृतेर्मूलं यस्या उपरि सामाजिकी उन्नतिर्निर्भरा।

एतस्मिन् विषये भाण्डारकरीयगवेषणाविभागाय महच्छ्रेयः प्रदेयं स्यात्। गवेषणासंस्थानस्यास्य कार्यं बम्बई-मद्रास-यू० पी०-प्रदेशेष्वेव न सीमितम्, अपि तु भारतवर्षव्यापि तदस्ति। व्यासकृतमहाभारतस्य परि-ष्कारः संस्करणं च बहोः कालाद् बहुभिर्विचक्षणैर्बहुधा विचारितम्, किन्तु कार्यरूपे परिणमयितुमनेनैव संस्था-नेन प्रारब्धम्। एतदर्थं षड्लक्षमुद्राणां व्ययो निर्धारितः। वाजपेयिमहोदयो राष्ट्रपतिमहाभागस्य संमुखे व्ययस्याऽ स्य कृते प्रार्थनामकरोत्।

राष्ट्रपतिरवोचत्—"भाण्डारकरशोधसंस्थानं भारत-वर्षे तादृग् गवेषणाकेन्द्रमस्ति येन ह्यधुना भारते अन्ताराष्ट्रियख्यातिरवाप्ता। भारतवर्षस्य इतिहासस्य श्रीगणेशादेव (आरम्भादेव) संस्कृतभाषा भारतीयानां विभूतीनां चमत्कारकप्रतिभायाः प्रकाशनस्य प्रमुख माध्यमम् अस्ति। अयं हर्षस्य विषयोऽस्ति यत् शोधसं-स्थानेनाऽनेन संस्कृतभाषायां जनसाधारणस्य रुचेर्जा-गरणाय भूरि प्रयतितम्। महाभारतं तादृशो ग्रन्थोऽस्ति येन विश्वस्मिन् कवीनां लेखकानां नाटककाराणां च लेखनस्य कृते भूयसी सामग्री पुरस्कृता। इदं भारतीय-साहित्ये एकमद्वितीयं वस्तु। महाभारतस्य आलोचना-त्मकं संस्करणं प्रकाश्य शोधसंस्थानेन भारतीयानां



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मस्तिष्काणां विकासाय, भविष्यन्निर्माणाय च महत्त्वपूर्णं कार्यमनुष्ठितम्। राष्ट्रपतिना संस्करणस्याऽस्य उद्घाटनं कृतम्।

महाभागेनानेनोक्तम्, यत् आर्थिकसंकटवशात् शोधसंस्थानमिदं गवेषणायाः प्रकाशनस्य च कार्ये भूयस्तरामुन्नतिं नाशकत् कर्तुम, परमधुनाऽहमाशासे यदेतस्य महत्वं जनतायाः, सर्वकारस्य च हृदये प्रस्फुटं भविष्यति। ततः महाभारतस्य प्रधानसम्पादकः श्री० एस० के० बेलवालकरः अभाषत—यत् शान्तिपर्वणः केवलं भागत्रयं यदस्माभिः प्रकाशितं तत् प्रायः द्विसहस्रपृष्ठात्मकमस्ति। चतुर्थो भागः सहस्रपृष्ठात्मको भविता। औंधमहाराजेन सहायतार्थं वितीर्णस्य एकलक्षमुद्रात्मकद्रव्यस्याधारेण अस्माभिः हरिवंशपुराणस्य संस्करणमप्यारब्धम्। अतीव हर्षस्य विषयो यत् हरिवंशपुराणप्रकाशनस्य इतरो व्ययो बम्बईसर्वकारेण दातुमनुमतः। अनुमीयते यद्धरिवंशसंस्करणोपरि षड-लक्षमुद्राः, चतुर्वर्षाणां समयश्चापेक्षिष्येते।

## राजस्थानविश्वविद्यालयस्योपाधिवितरणोत्सवः—

नवम्बरमासस्य विंशतारिकायां मध्याह्नोत्तरं त्रिवादनसमये राजस्थान-विश्वविद्यालयस्य सप्तमो दीक्षान्तसमारोहो महाराजकालेजस्य सुविस्तृते प्राङ्गणे महता संभारेण संवृत्तः। महोत्सवस्याध्यक्षो राजस्थानस्य राजप्रमुखो, विश्वविद्यालयस्य कुलपतिः, श्रीश्रीमान् जयपुरधराधीशोऽभवत्। समारोहेऽस्मिन् राजस्थानविश्वविद्यालयस्य विभिन्नशाखीयेभ्यः २६०६ स्नातकेभ्यः प्रमाणपत्राणि व्यतीर्यन्त। दीक्षान्तभाषणस्य प्रधानवक्ता- विश्वविद्यालयस्य अनुदानाऽऽयागाध्यक्षः (यूनीवर्सिटी-ग्रान्ट्स्कमीशन) डा० एस्० एस्० भटनागर-महोदयोऽभवत्।

प्रारम्भे राजस्थानविश्वविद्यालयस्योपकुलपतिः श्रीजी.सी.चटर्जीमहोदयो डा०भटनागरस्य परिचयम-कारयत्। ततो डाक्टरमहोदयो निजभाषणं प्रारभत। प्रधानवक्त्रा दीक्षान्तभाषणेऽस्मिन् सारतया समर्थितमिदं यत्—'सर्वेषामपि विश्वविद्यालयानां संमुखे महत्त्वपूर्णे द्वे कर्तव्ये प्रधाने स्तः। तत्र प्रथमम्—भारतस्य भौतिक-साधनानामुपयोगाय प्रचलितशिक्षायाः प्रकारेषु समुचितस्य परिष्कारस्य विधानम्। येन हि देशस्योद्योग-प्रसारणे समीहिता सहायता प्राप्येत। द्वितीयं कर्तव्यमस्ति—भारतस्य नैतिक-सामाजिक-वैज्ञानिकक्षेत्रेषु मिथः-सहयोगभावनायाः समुचितप्रकारेण जागरणम्। यदि कर्तव्यद्वयमिदं विश्वविद्यालयैर्न शक्यते पूरयितुं तर्हि ते विश्वविद्यालयाः शासनतंत्रस्य सकाशात्साहाय्य-प्राप्तेरपि अधिकारिणो न सन्ति। शिक्षायाः पूर्वोक्तोद्देश्यस्य पूर्तावेव ते सर्वकारात्सहायताप्राप्तेराशां कुर्युः।"

महोदयेनानेन समर्थितं यद् विश्वविद्यालयस्य सफलता समधिकानां विद्यार्थिनां शिक्षाप्रदानेन, शि-स्नातकानां महामहासमूहसंपादनेन नास्ति, अपि समुन्नतकोटिकायाः शिक्षायाः प्रदानेनास्ति। कालेऽ-शनैः शनैः तदेव संपद्यमानमालोक्यते, यत्परी-क्षीर्णानां संख्याबाहुल्यमस्ति, शिक्षाया यदुद्देश्यं त-पूर्तिरतिन्यूनपरिमाणे भवति। विश्वविद्यालयेषु वि-नस्य, सामाजिकविज्ञानस्य च विभागः पर्याप्तोऽ-किन्तु विद्यालयाधिकारिणां, शिक्षितानां चापि त-साम्प्रतमप्यपरिज्ञातमस्ति यत् अस्मिन् क्षेत्रे स-त्रानां कठिनसमस्यानां सरलीकरणाय सामूहिक-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...स्माकमेव कर्तव्यमस्ति । राजस्थानं पाषाणस्य, ...तूनाम्, अन्येषां च खनिजपदार्थानां पर्याप्तः ...रोस्ति । अतएव 'राजपूताना विश्वविद्यालये' ...र्भविद्यायाः समुचितं शिक्षण प्रसारणीयम् ।

शिक्षाया उच्चता चरित्रस्य उच्चतया परिज्ञाता ...ति । चरित्रं संप्रति तथा परिष्कृतं न भवति । ...विद्यालयाः प्राचीनानां 'गुरुकुलानाम्' आदर्शे ...व सफला भवेयुर्यदा चरित्रसंपादने तेषां सफलता ...त, इत्यादि ।

सर्वमिदं सम्यगेव, किन्तु दीक्षान्तसमारोहमिमं ...रतवर्षे जायमानं विचार्य को वा भारतीयो न ...स्मितो भवेत् ? यस्य भारतस्य स्वतन्त्रताप्राप्तये ...हात्मा-गान्धिप्रभृतिभिरेतावान् पराक्रमः प्रदर्शितः, ...कमान्य-तिलकसदृशैर्धर्मानुरोधिभिरपि यस्याः स्वतं...तायाः प्राप्तये अनेकानि कष्टानि सोढानि, तस्य ...श्रमस्याऽयं परिणामः ? एकः सत्यो भारतीय-...स्मिन् सभामण्डपे चेदकस्मात्प्रविशेत्तर्हि स किं ...येत ? आरम्भांदन्तपर्यन्तः सर्वोऽपि कार्यक्रमः ...ङ्लभाषामयः । उपाधिधारकाणां स्नातकानां ...म-गाउन' वाही वेषविन्यासोऽपि आङ्ग्लानुकारी । ...च्छटा, कार्यपारम्परी अपि सर्वा गौराङ्गाणामनु-...ज्ञाता । तर्हि वराकः स कथं जानीयाद् यद्वयं ...त्रर्षे स्थिताः स्मः ।

स्वतन्त्रतासंग्रामे अयं विजय एतावत्कालं भारती-...निजवशे कुर्वतामाङ्ग्लानामस्तिः उत भारतीया-...? ये हि वराकाः साम्प्रतमपि आङ्ग्लानामङ्गुलि-...नैव अग्रे प्रचलन्ति । येन किल देशेन निजस्य संस्कृतिः, सभ्यता, आचरणानि च अन्येषां चरणयोः समर्पितानि, स हि केन वा मुखेन आत्मनो विजयं स्वतन्त्रतां च घोषयितुं सफलो भवेत् ? पदवी-धारिभ्यो भारतीयेभ्यो नवीनस्नातकेभ्यः 'उपदेश' भाषणं प्राचीनानामृषीणां वाक्यैः शोभते ? उत सप्तसमुद्रपारस्थितानां यवनानां भाषया ?

पुण्यपत्तने ( पूना ), शान्तिनिकेतने ( वङ्गदेशे ) उत्कले (उडीसा) अन्येष्वपि प्रदेशेषु 'दीक्षान्तभाषणे' संस्कृतभाषायाः संव्यवहारस्य प्रथा संप्रति प्रचलिता । किन्तु यः प्रदेशः साक्षाद् भारतमध्यवर्ती, यस्य प्रदेशस्य संस्कृतिरक्षानिमित्तं भारतीयैर्नरपालैरात्मनो मस्तकानि रणरङ्गे समर्पितानि, 'यतो धर्मस्ततो जयः' इत्यादिर्येषां ध्वजस्तेषां शासनभूमौ राजस्थाने एव किम् आङ्ग्लानामन्धाऽनुकरणं प्रसरेत् ?

अहह ध्वजे यत्र अशोकचिन्हम्, प्रेषणाविभा-गीयेषु 'त्रिकटे'षु, रूप्यकादिषु च यत्र प्राचीनभारती-यस्य अशोकसम्राजो मुद्रा, भारतराजधान्यां 'देहल्याम्' 'संसद्भवने' (पार्लियामैण्ट) यत्र 'धर्मचक्रप्रवर्तनाय' इति सिद्धान्ताज्ञा, तत्रैव भारते शिक्षायाः परिसमाप्तौ 'दीक्षान्त' भाषणसदृशे पवित्रे कार्यकलापे आमूल-चूडम् आङ्ग्लभाषायाः प्रयोगः, आङ्ग्लरीति-नीत्योर-नुकरणम् , स्वतन्त्रतागर्ववाहिनां भारतीयानां देश-नायकानां न किं लज्जाजनकम् ? विचारयेयुः शिक्षा-विभागीया प्रबन्धकाः ।

## राजस्थाने नवीनमन्त्रिमण्डलस्य नियुक्तिः—

नवम्बरमासस्य त्रयोदशतारिकायां राजस्थानप्रांतीयानां नवीनमन्त्रिणां शपथग्रहणस्य रीतिः 'रामबाग प्रासादे' राजप्रमुखस्य श्रीजयपुरधराधीशस्य सांमुख्ये समपर्यत ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


सम्प्रति हि मोहनलालसुखाडिया (मुख्यमन्त्रि)सहिताः सप्त मन्त्रिणः, द्वौ च उपमन्त्रिणौ स्तः। शपथग्रहणस्य समये मुख्यसचिवः श्रीबी० जी० रावमहोदयोऽप्यासीदुपस्थितः। मन्त्रिमण्डलेऽस्मिन्निजनिजाधिकृतानां विभागानां निम्नप्रकारेण नूनप्रविभागस्य दिग्दर्शनम्—

१—श्रीमोहनलालसुखाडिया—मुख्यमन्त्री, राजस्व, नियुक्ति, शिक्षाविभागादि।

२—श्रीभोगीलालपंड्या-उद्योग व्यापार, खाद्यविभागादि

३—श्रीरामकिशोरव्यासः-गृह, न्याय, निर्वाचनविभागादि

४—कुम्भाराम आर्यः—चिकित्सा, स्वास्थ्यविभागादि

५—श्रीव्रजसुन्दरशर्मा—वित्त, वनविभागादि

६—श्रीअमृतलालयादवः—पुनः संस्थापनविभागादि

७—श्रीरामनिवासमिर्धा—निर्माणविभागादि

१—उपमन्त्रिणी श्रीमती कमला (बेनीवाल)—चिकित्सा, जनस्वास्थ्यविभागप्रभृति

२—उपमन्त्री श्रीसम्पतरायः—सामुदायिकयोजना प्रभृति।

**'राष्ट्रीयनाट्यसमारोहस्य' महामहोत्सवः—**

महोत्सवस्याऽस्योद्घाटनं भारतस्य राष्ट्रपतिना श्रीराजेन्द्रप्रसादमहाभागेन नवम्बरमासस्य २१ तारिकायां भारतराजधान्यां नवदिल्लीनगरे ससमारोहम् अक्रियत। महोत्सवोऽयं 'सप्रूभवने' (स्प्रडकासिंटिग हाउस) समभवत्। संस्कृतसेविनां भवेन्महाहर्षो यन्महासमारोहस्यास्योद्घाटनं संस्कृतभाषायाः सुप्रसिद्धनाटकं 'शाकुन्तलं' प्रारम्भे प्रमुखीकृत्यैव समभवत्। शाकुन्तलनाटकस्याऽस्याऽऽयोजनं मोहमयीस्थ'ब्राह्मण-सभा' द्वारा कृतमभूत्। 'राष्ट्रीयनाट्यसमारोहस्य' मूलतः प्रोद्भावनं तु 'अखिलभारतीयसंगीत-नाटक-एकाडमी' द्वारा समभवत्। महोत्सवेऽस्मिन् भारतीयानां चतुर्दशभाषाणां सुप्रसिद्धानि नाटकानि जनरञ्जकेणाऽभिनयेन सह संवृत्तानि। भारतस्येतिहासे सेयमभूतपूर्वा घटना यत् भारतीयानां चतुर्दशभाषाणाम् एकविंशतिनाटकानि युगपद् रङ्गमञ्चे अभिनीतानि भवेयुः।

शाकुन्तलस्य सफलमभिनयं दृष्ट्वा सर्वेऽपि दर्शकाः सुभृशमप्रीयन्त। भारतप्रधानमन्त्री श्रीनेहरूमहोदयः शाकुन्तलाभिनयेन भूयस्तरां प्रभावितोऽभवत्। राष्ट्रपतिडाक्टरमहोदयः महर्षं सगर्वं चाऽभाषत—'यत्तदिदमस्माकं महत्सौभाग्यं यन्महोत्सवस्याऽस्यारम्भः संस्कृतभाषायाः सुप्रसिद्धनाटकात् शाकुन्तलाद् भवति' इति। स्वभाषापक्षपातिनः आङ्गलभाषापत्रकारा अपि शाकुन्तलस्याभिनयेन प्रभाविता मुक्तकण्ठं प्रशंसन्ति नाटकमिदम्। 'हिन्दुस्थानटाइम्स' प्रभृतिभिः पत्रैः साभिनन्दनं निजसम्मतिर्दत्ता यत्—'एवंविधैः कार्यक्रमैः भारतीयसंस्कृतेः स्मरणं च प्रभावश्च जनतासु व्याप्नुयात्।'

समारोहेऽस्मिन् सर्वेऽपि गण्य-मान्याः पुरुषा आसन्नुपस्थिताः। प्रतिष्ठिताधिकारिषु भारतप्रधानमन्त्रिनेहरूमहोदय-श्रीकाटजूप्रभृतयः मन्त्रिमण्डलस्य सर्वेऽपि सदस्या आसन्नुपस्थिताः। जनतायाः प्रवाहस्तु एतावानासीद् यत्प्रबन्धकरणमपि सुकठिनमिवासीत्। बहवः पुरुषाः संकुलताऽऽधिक्यात् प्रवेशपत्रमलब्ध्वैव निराशाः स्वगृहं परावर्तन्त। महाकविः कालिदासः सर्वश्रेष्ठो नाटककारः, शाकुन्तलं सर्वश्रेष्ठं नाटकम्, 'गेटे'महाभागेन शाकुन्तलस्य कैरक्षरैः प्रशंसा कृतेति सांप्रतं विचारयन्तु सहृदयाः साहित्यालोचकाः।

प्रकाशकः—जयबहादुरसिंह पता—भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रक—राजस्थान प्रिंटिंग वर्क्स, हनुमान का रास्ता, जयपुर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

राजकुमार

३१-१-५५

गुरुकुल कांगड़ी



## अस्याङ्कस्य विशिष्टाः लेखाः


★ १. स्वतन्त्रभारतं च संस्कृतं च

ले० सम्पादकः

★ २. अस्माकं राष्ट्रभाषायाः समस्या

ले० श्रीज्ञानचन्द्र एम. ए.

★ ३. अर्वाचीनाः संस्कृतसाहित्यकाराः

ले० श्री कलानाथशास्त्री जयपुरम्

★ ४. चीनस्य महन्मुक्तेरभियानम्

ले० श्रीदीनानाथत्रिवेदी जयपुरम्

★ ५. राजस्थान-संस्कृत-साहित्य-सम्मेलनस्य

संक्षिप्तं विवरणम् इत्यादि


★

तृतीयोऽङ्कः

मूल्यम्
वार्षिकम् ३) रु०
एकस्याऽङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# विषय-सूची


| क्रमः | लेखाः | लेखकाः |
|---|---|---|
| १. | भगवदनुग्रहः | पं० लक्ष्मीनारायणपुरोहितः, उदयपुरम् |
| २. | स्वतन्त्रभारतं च संस्कृतं च | सम्पादकः |
| ३. | अस्माकं राष्ट्रभाषायाः समस्या | ,, ज्ञानचन्द्रो निर्जनः, एम्० ए०, लखनऊ |
| ४. | आनृण्यम् अथवा पिकस्य पत्रम् | ,, श्रीनिवासशर्मा शिरोमणिः, चिदम्बरम् |
| ५. | भारतीप्रचाराय वङ्गयात्रा | ,, गिरिराजशास्त्री, जयपुरम् |
| ६. | अर्वाचीनाः संस्कृतसाहित्यकाराः | देवर्षिकलानाथशास्त्री, बी० ए०, जयपुरम् |
| ७. | चीनस्य महन्मुक्तेरभियानम् | ,, दीनानाथत्रिवेदी, मधुपः जयपुरम् |
| ८. | राजस्थानसंस्कृतसाहित्यसमेलनस्य संक्षिप्तं विवरणम् | ,, सुरजनदासस्वामी, एम्० ए० प्रधानमन्त्री रा० स० सा० सम्मेलनम्, कोटा |
| ९. | सम्पादकीयम्, विश्वविद्यालयानां दीक्षान्तसमारोहाः, केन्द्रीयमन्त्रिमण्डलेधिकारपरिवृत्तिः, राजस्थाने अखिलभारतीयं सम्मेलनत्रयम्। सवाईजयसिंहमहाराजस्य स्मृतिदिवससमारोहः | सम्पादकः |
| १०. | शान्तिदर्शनम् | पं० द्विजेन्द्रलालशर्मा एम्० ए०, जयपुरम् |
| ११. | सूक्ति-सुधा | |


१—ये महाशयाः भारत्या आदर्श (नमूना) वाञ्छन्ति तैः आणकषट्कस्य शुल्कपत्राणि (=) टिक... पत्रोत्तरं वाञ्छद्भिः सोत्तरपत्रं पत्रम (रिप्लाई) प्रेषणीयम्।

२—ग्राहकाः पत्रव्यवहारे स्वीयां ग्राहकसंख्यामवश्यं लिखेयुः। अन्यथा उत्तरं न प्रतीक्षेरन्।

३—भारतीकार्यालये प्राचीना अङ्काः, येषु अतिप्रशस्ता उपयोगिनो निबन्धाः सन्ति-उचितमूल्ये... प्रदीयन्ते। ग्राहकैस्त्वरा कर्तव्या।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि-
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

वर्षम् ५ | पौषपूर्णिमा, सं० २०११ | अङ्कः ३

## भगवदनुग्रहः

( कविकलानिधिः, पण्डितश्रीलक्ष्मीनारायणपुरोहितः, साहित्याचार्यः, महाराणासंस्कृतकालेज-साहित्यप्राध्यापकः, उदयपुरम्, राजस्थानम् )

कोऽपि बुधो धनिकः सुती, स्वस्थश्चकासदेव ।
हरिपदरक्तो भवति चेद्, भगवदनुग्रह एव ॥१॥
अहोऽनुग्रहस्तस्य, दयानिधेः स्मृत्वाऽपि यम् ।
सदसि सुता द्रुपदस्य, अप्यबला सबलाऽभवत् ॥२॥
कोऽपि नु मातङ्गोऽपि⊛, हरिसन्निधिं यदाप्तवान् ।
दयाविलासः सोऽपि, तस्य तरुणकरुणानिधेः ॥३॥
ध्रुवो हरेर्दययैव, ध्रुव÷ इत्यन्यैरुच्यते ।
मया विस्मयेनैव, तत्पतितोद्धरणेक्षणात् ॥४॥
अहो कृपा कृष्णस्य, दक्षिणया× दृष्ट्यैव यः ।
दुःखं तिमिरमुदस्य, सुखकमलानि विबोधयति ॥५॥
दृशा+ वामया श्रीपतेर्न सतां विपदः सन्ति ।
श्रियोऽसदब्जानां परं, सत्कुमुदानि मिलन्ति ॥६॥
धनार्जनविधौ क्वचित्, क्वचिदसत्स्वविख्यापने,
क्वचिद् विषयसेवने त्वभिनिवेश आलोक्यने ।
परं भवति पुण्यतः सुकृतिनः कलौ कस्यचि-
दपारकरुणानिधौ मुररिपौ प्रधानो रसः ॥७॥

---

⊛ मातंगः—गजः, चाण्डालश्च । ÷ ध्रुवः—औत्तानपादिः, स्थिरश्च । × दक्षिणया—दक्षिणभागस्थया सूर्यरूपया, कुशलया च । + वामया—वामभागस्थया चन्द्ररूपया, प्रतिकूलयां च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# स्वतन्त्रभारतं च संस्कृतं च

भारतमिदमार्याणामादिमा निवासभूमिः । अत्र निवसद्भिरार्यैर्वेद-पुराण-स्मृत्यादयो यथा विज्ञानग्रन्था लिखितास्तथा लोकशिक्षाप्रचारार्थं प्राथमिक-शिक्षा-पुस्तकान्यपि प्रणीतानि । तत एव संस्कृतभाषायाः साहित्यमिदं सर्वाङ्गपूर्णम्, सर्वजनोपयोगि; सुविस्तृतं च । संस्कृतभाषायास्तदिदं महत्त्वं न केवलमस्माभिरेव समुद्घोष्यते, अपि तु देश-विदेशीयसाहित्यमन्वेषण-बुद्ध्या गवेषयद्भिः पाश्चात्यपण्डितैरपि तदिदं निष्पक्ष-पातया मनीषया प्रतिपादितम् । अतएव हि सेयं संस्कृतभाषा तस्मात्कालाद्भुवि विस्तृता, यस्मिन्काले अन्यान्यभाषाणां यथावत्परिमार्जनमपि नाऽभवत, साहित्यनिर्माणस्य तु कथैव का । अद्य पश्चिमनिवा-सिनः शिक्षिता आत्मानं सभ्यशिरोमणिं कीर्तयन्ति किन्तु यस्मिन्काले भारतीयानामार्याणां सभ्यताया यौवनकालः (विकासः) आसीत्तस्मिन्काले वैदेशिकानां सभ्यंमन्यानामेतेषां समाजे सभ्यताया जन्माऽपि नाऽभवत् । अस्तु, किमेतेन निजमुखतो निजगौरवबि-कत्थनेन । किन्तु संस्कृतभाषायाः, तत्संबन्धिशिक्षायाश्च भारते चिरकालात्प्रवाहः प्रवृत्तोऽभूदिति कथनस्य तात्पर्यम् ।

यथा यथा च भारते वैदेशिकानां शासनप्रवाहः प्रसृतस्तथा तथा कुटिलनैतिकैस्तैरात्मनो भाषायाः प्रचारः प्रारब्धः, संस्कृतशिक्षायाः क्रमश्च निजेच्छा-नुसारं परिवर्तितः । किन्तु आर्याणाममीषां शिक्षापद्ध-तिस्तथा सुदृढप्रभावा, लोकहृदयेष्वेकान्ततोऽनुबद्धा च आसीद् यथा कूटनीत्या प्राचीनशिक्षापद्धतेर्मूल-निकृन्तनेऽपि संस्कृतशिक्षा सेयं भारतेऽस्मिन् यथा-कथंचित् प्रचरन्त्येवाऽऽसीत् । आर्याणां विद्याक्षेत्रमिदं वाराणसी तु प्राचीनं विद्याकेन्द्रमासीदेव, किन्तु राजस्थानमपीदं संस्कृतशिक्षायाः, तद्विद्यानां च प्रचाराय भूयस्तरामुल्लेखनीयमासीत् । अत्रत्यैर्नरपालै रणक्षेत्रेषु निजमस्तकानामपि बलिं दत्वा भारतीया रीतिः, आर्याणां गौरवं च समन्ततो रक्षितं नूनम् ।

राजस्थाने अन्यान्यराज्यानां कथानिवेदनं कदा-चित्परिगण्येत परम्परासंबन्धेन । किन्तु आम्बेरा-ज्यम् ( जयपुरराज्यम् ) इदं भारतीयानां विद्यानां कलानां च प्रचाराय चिरकालादेव देशे केन्द्रीभूतमा-सीत्, इति सर्वभावेनाऽहमावेदयितुं शक्नोमि । आम्बेरनरपालै राजनीतिचातुर्येण मोगलशासकान् आत्मनो मुष्टौ कृत्वा न केवलं राजस्थाने एव, अपि तु संपूर्णेऽपि भारते आर्याणां सभ्यता संरक्षिता । अन्यान्यैर्नरपालैर्मोगलराज्यं वशीकृत्य निजराज्यादि-वृद्धिर्विहिता । किन्तु सवाईजयसिंहमहीपालेन (जयपुर-नगरनिर्मात्रा ) यथा राज्यवृद्धिः कृता तथा भारतीय-विद्यानामपि भूयान्प्रचारः कृतोऽभूत् । स्वयं कलाप्रवी-णेन ज्यौतिषमार्मिकेण चानेन यथा भारतस्य अनेक-नगरेषु ज्यौतिषयन्त्रशाला निर्मापिताः, ज्यौतिषशास्त्रस्य सम्राट्सिद्धान्त-जयसिंहकल्पद्रुम-जयविनोदसारणी-प्रभृतयो ग्रन्था निर्मापिताः, तथा भारत-युरोपादिभ्यः प्रसिद्धान् पण्डितान् जीविकादिना संमान्य अन्यान्य-शास्त्राणामपि निबन्धाः परिष्कृताः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वदुत्तरभाविभिः माधवसिंह-प्रतापसिंह-जगत्सिंहादिनरपालैरपि निजाश्रितानां कवीनां पण्डितानां च द्वारा इतिहास-संगीत-काव्यादीनां ते ते ग्रन्था निर्मापिताः, यैर्हि भारतीयसाहित्यस्य प्रशस्ताऽभिवृद्धिः संवृत्ता। सवाई जयसिंहकालादेवाऽऽरभ्य जयपुरेऽस्मिन् संस्कृतविद्यायाः स प्रवाहः प्रवृत्तो यो ह्यधुनापर्यन्तमविच्छिन्नः प्राचरत् । गुणिजनगुणग्राहकेण रामसिंहमहाराजेन जयपुरे विद्यानां परिष्कारः पुनः प्रारब्धो यस्य सूचको "महाराजसंस्कृतकालेजः" भारते सर्वतः प्रसिध्यति । जयपुरराजकीया 'धर्मसभा' (मोदमन्दिरम्) पि राजस्थाने सुप्रसिद्धा, यस्या धर्मशास्त्रीयव्यवस्थाभिः प्रान्तेऽस्मिन् पर्याप्ता आर्यसंकृतिसंरक्षा संव्यधीयत । जयपुरविद्यालयेषु आयुर्वेदादिशास्त्राध्ययनार्थं नेपालादिदूरदूरसंस्थानेभ्योऽपि विद्यार्थिनः समाजग्मुः ।

राज्ञामनुकरणेन अत्रत्या धनिका अपि संस्कृतविद्याया धर्मभावेन सेवां चक्रुः । जयपुरराज्येऽस्मिन् शेखावाटीप्रान्ते-रामगढ-फतहपुर-डूंडलोद-नवलगढ-पिलानीप्रभृतिसंस्थानेषु श्रेष्ठिजनैर्धर्मसेवा-शास्त्रसेवानिमित्तमनेकाः संस्कृतपाठशालाः स्थापिताः, यासु भोजन-वस्त्रादि प्राप्नुवन्तो दूरदूरवर्तिग्रामाणां विद्यार्थिनः संस्कृतमधीयते । राजस्थानप्रान्ते स्वाभाविकी संस्कृतभक्तिरनेनैव परिज्ञातुं शक्या यत् बहिर्जनपदेषु ग्रामेषु एकद्वा एव पाठशालाः सन्ति या राज्यद्वारा परिचाल्यन्ते । किन्तु प्रजाद्वारा स्थापिता उपशतं पाठशालाः सन्ति । आसां पङ्क्तीनामयं लेखकः पुरा जयपुरराज्यस्थानां समस्तसंस्कृतपाठशालानां राजतन्त्रद्वारा नियमितो निरीक्षक एवासीत् । अतएव साधारणप्रजासु संस्कृतं प्रति स्वाभाविकी श्रद्धा मयाऽनुभूता । इयमवस्था तस्य कालस्य निवेदिता यस्मिन् हि वैदेशिकानां गौराङ्गाणामत्र शासनमासीत् ।

तद्धि शासनं भारतीयानां 'पारतन्त्र्यसर्जकम्', 'संस्कृतिनाशकम्', 'सर्वथा घातकं' चासीदिति वर्तमानशासकैः सर्वस्मिन्नपि भारते ग्रामे ग्रामे खर्वटे खर्वटेऽपि भ्रान्त्वा घोषितमासीत् । सर्वेऽपि च जना एतदर्थं सज्जीकृता यद् 'भारतीयता चेत्काम्यते, देशरक्षा चेदभीष्यते, प्राचीनभारतस्य सुखप्रवाहश्चेत्पुनः प्रवाहयितुमभिलष्यते, तर्हि स्वतन्त्रतासंग्रामार्थं सर्वेऽपि संनद्धा भवत' । अतएव सत्य-अहिंसा-सेवकस्य महात्मनो गान्धिमहाभागस्य संरक्षकत्वे स्वातन्त्र्ययुद्धमिदं भारते प्रचलितम् । यस्मिन् हि भारतस्य सर्वापि जनता प्राणपणेन अहिंसासंग्रामे प्रावर्तत । ईश्वराऽनुग्रहादस्मिन् सफलताऽप्यभवत् । देशोयं संप्रति स्वतन्त्रो घोष्यते ।

स्वतन्त्रे देशे स्वीया संस्कृतिः, स्वीयमात्मगौरवम्, स्वदेशस्य सत्यो योऽभ्युदयो भवति एतत् सर्वं भारतीयपुरुषाणां हृदये प्रवृत्तं न वा, नैतन्मुखतो वक्तव्यं नाम । एतद्धि भारतस्य कोण-कोणावधि संवृत्तं वृत्तं परिज्ञाय मार्मिकैः स्वतोऽनुमातव्यं नूनम् । अस्मिन् समये भारते स प्रवाहः प्रवृत्तो यो हि पश्चिमादिदेशेषु सांप्रतं समवाप्यते । स्वातन्त्र्ययुद्धात् पूर्वं यस्याः संस्कृतेः, यस्याश्चाऽवस्थायाः प्रत्याशाऽऽसीत् सा क्रोशान् दूरे परित्यक्ता । विस्तारतो निवेदनेन भवेल्लेखे भूयान् विस्तरः किन्तु भारतीया संस्कृतिर्भारतीयजनतायां कीदृशीमवस्थां गता, संस्कृतेर्मुख्यं साधनं संस्कृतभाषा कां परिस्थितिमनुभवतीति विचारशीलैः सर्वैरेव जनैः प्रत्यक्षमक्षिभ्यां दृश्यते । न तत्र वाग्विस्तारस्याऽऽवश्यकता ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


'परवृत्तान्तनिवेदनाऽपेक्षया स्वोपरि संवृत्तं वृत्त स्वाभाविकं भवति' इति किंवदन्त्यनुसारं राजस्थानेऽस्मिन् संस्कृतेः संस्कृतस्य च परिस्थितिरद्भुतैव संवृत्ता। गौराङ्गवैदेशिकानां यत् शासनं पारतन्त्र्यरूपनरकस्य प्रदर्शकमासीदिति प्रोच्यते स्म, तदपेक्षयाऽपि संस्कृतभाषा संप्रति दीनदशामुपगता। येषु विद्यालयेषु संस्कृताध्यायिनां विद्यार्थिनां संख्या पुरा पर्याप्ताऽऽसीत्तेषु आङ्गल-विद्यालयेषु संप्रति संस्कृतस्याऽध्यापक एव नास्ति। 'उर्दू' भाषाया अध्यापकोऽस्ति किन्तु संस्कृतभाषाया अध्यापको बहोः कालान्न्यूनीकृतः। संस्कृतसेविभिर्बहुवारान् देशशासकानां सविधे 'शिष्टमण्डलं' नीत्वा साग्रहं प्रार्थितं यद् जयपुरसदृशे राजस्थाने संस्कृतस्य सेयं दशा आङ्गलानां परतन्त्रशासनेऽपि नासीत्। संप्रति जनतन्त्रस्य शासनयुगेऽपि भारतीयसंस्कृतेः प्राणभूता संस्कृतभाषा इमामवस्थामुपगतेति किं नास्माकं लज्जास्थानम्? किन्तु मौखिकैराश्वासनैरेव संतोष्यन्ते संस्कृतसेविनः।

अश्रुप्रोञ्छनार्थं षष्ठ (अष्टम) श्रेणीपर्यन्तं संस्कृताध्ययनमनिवार्यं घोष्यते, किन्तु स्फुटमिदं प्रतारणामात्रम्। यतो हि संस्कृतविषये परीक्षायामुत्तरणं न परिगण्यते आवश्यकम्। ततश्च पूर्वत एव उपेक्षापात्रमिदं संस्कृतं संप्रति नाममात्रार्थं पठन्ति शिक्षार्थिनः न तस्य किञ्चित् फलम्। वर्तमानकाले हि परीक्षोत्तीर्य वेतनप्राप्त्यर्थं विद्योऽध्ययनम्। यदा तु परीक्षायामुत्तरणमनावश्यकमिति कर्णाभ्यामाकर्णितं तदा को वा मन्दमतिः पठेत्संस्कृतम्?

तदुपरि चमत्कारः सोयं यत्संस्कृतमिदमनिवार्यं घोष्यते किन्तु बहुषु विद्यालयेषु साम्प्रतमपि संस्कृताध्यापकस्य स्थानं न्यूनीकृतमेव। अतएव पठनस्य प्रबन्धमदृष्ट्वा बहव एव शिक्षार्थिनस्तदध्ययनाद्विरता एव भवन्ति। ये तु गृहजनानां ताडनया संस्कृते बलात्प्रविशन्ति ते हि अप्रबन्धेन, दुष्प्रबन्धेन वा विलोपितोत्साहाः परीक्षायां विफलीभवन्तः 'संस्कृतं कठिनमिति' मिथ्यापवादे कारणतां भजन्ति।

अहो शासकजनानां विलक्षणा लीला यद् भारतीये ध्वजे, प्रेरणा (डाक) विभागीयेषु 'त्रिकट' पत्रेषु, रजत-ताम्रादिमुद्रासु, प्राचीनभारतस्य सभ्यताचिह्नानि संरक्ष्यन्ते। किन्तु सभ्यता-संस्कृत्योर्मूलमियं प्राचीना आर्यभाषा दूरतः परिह्रियते? 'राजस्थानविश्वविद्यालयस्य' उपाधिवितरणोत्सवे संवृत्तं वृत्तं गतसंचिकायां पठितमेव भवेत्पाठकैः। एवंविधानि वृत्तानि प्रत्यहं पश्यतां जनानां न किं मनसि भवेद् यत्स्वतन्त्रतायुद्धस्य किं तदिदमेव फलम्?

भारतीयताध्वजवाहिनोऽस्माकं शासकाः शीघ्रमेव प्रयतेरन्नेतदर्थे इति सुदृढं विश्वसिमि।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अस्माकं राष्ट्रभाषायाः समस्या

लेखकः—ज्ञानचन्द्र 'निर्जन' एम० ए० (फाइ०)

राष्ट्रभाषायाः समस्यामधिकृत्य बहवो विवादाः ...स्मन् समुद्भूताः। न केवलं भारतीयस्वाधीन... पश्चादेव समस्यैषा सम्मुखेऽस्माकमुपस्थिता, ...पूर्वमपि तस्याः, राजनीतिविशारदैरेकस्याः ...भाषायाः आवश्यकतानुभूता। यतः किञ्चिद्राष्ट्रं सूत्रे ...यितुं संगठयितुं वा एकतुल्यायाः भाषायाः प्रयोगो ...रामावश्यकः। काले काले विद्वांसोऽस्या उपरि ...विचारानभिव्यञ्जन्ति। कश्चित्समर्थयते हिन्दीं, ...वदाङ्गलभाषां सर्वविधोत्कर्षप्रदां प्रतिपादयति। ...ने केचन काटजूप्रभृतयो वराकाः गीर्वाणवाणीमपि ...कदाचित् स्मरन्त्यस्मिन् प्रसङ्गे। यथा बिहारीकवेः ...नायिकाया लावण्यचित्रणे सर्वेऽपि चित्रकाराः कुण्ठित... जायन्ते, तथा राष्ट्रभाषायाः समस्यासमाधानं ...मपि भारतस्य विश्वविश्रुताः भाग्यविधातारः ...विदना दरीदृश्यन्ते—

'...लिखन बैठि जाकी सबी गहि गहि गरब गरूर।
...भये न केते जगत् के चतुर चितेरे कूर॥'

...स्वाधीनतायाः पूर्वं तावदाङ्गलभाषयैव हिन्दी... युद्धमासीत्, साम्प्रतं प्रान्तीयाभिर्भाषाभिरपि ...भाषायाः विरुद्धः शङ्खनादो विहितः। बहूनि सस्ति... राष्ट्रभाषायाः समस्यां हलीकर्त्तुं बद्धपरिकराणि ...सर्वाणि तानि किमपि हलमनासादयन्ति 'भये न ...जगत् के' इति भाषोक्तिमेव चरितार्थां विदधति। ...अस्तु, पूर्वं तावद्द्वयं पश्येम, राष्ट्रभाषायाः किं ...? कस्मैचिद्राष्ट्राय तस्याः काऽवश्यकता? ...भारताय च तस्याः किं सत्यम्?

राजनीतिविशारदैर्राष्ट्रनाम्नो मानवसमूहस्य पञ्च विशेषताः प्रतिपादिताः। १. तुल्यं लक्ष्यम् (Similar End) २. तुल्यं शासनम् (Similar State) ३. तुल्या संस्कृतिः (Similar Culture) ४. तुल्य इतिहासः (Similar History) ५. तुल्या भाषा (Similar Langvage) तत्र राष्ट्रभाषां विना राष्ट्रशरीरस्य पङ्गुता संप्रजायते। यदि संस्कृतिः, कस्यचिद्राष्ट्रस्यात्मा मन्येत तदा राष्ट्रभाषा राष्ट्रस्य लोचनं मन्तव्या, यां विना संस्कृतिः समुत्कर्षं कर्त्तुं सर्वथैवाक्षमा।

गिलक्राइस्ट (Gilchaist) महोदयस्य शब्देषु राष्ट्रीयतायाः राज्यस्य च योगो राष्ट्रनामा मानवसमूहो भवति। (A nation equals state plus nationality) राष्ट्रशब्दे राष्ट्रीयता, (तुल्यलक्ष्यादिभिः सूत्रे संबद्धो मानवसमूहः) शासनञ्च (राज्यम् State) द्वावपि शब्दौ समाविष्टौ स्तः। राष्ट्रभाषायाश्च तात्पर्यं तया भाषया भवति यस्यां न केवलं राज्यस्य कार्यालयानां न्यायालयानां वा कार्याणि क्रियेरन् किन्तु यस्यामुच्चकोटिकं साहित्यमपि— यस्मिन्नास्माकीना संस्कृतिः प्रतिबिम्बिता स्यात्, जन्येत। ये तु केचित् कथयन्ति—'राष्ट्रभाषायाः समानान्तरं प्रान्तीयस्थाः भाषा अपि समर्थनीयाः'। साधु कथयन्ति ते। न कोऽपि तासां विकासपथे तिष्ठति, न च केनचित्तासामुन्नतिपथे स्थातव्यमेव, किन्तु तासां राष्ट्रभाषया सह प्रतिस्पर्द्धा न युज्यते। यथा प्रधानमन्त्रिणा—कस्यापि प्रान्तस्यासौ भवेत्—सह कस्यापि प्रान्तीयमन्त्रिणः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


प्रतिस्पर्द्धाऽनार्या विद्यते। स्वकीये प्रान्ते ताः सुतरामुन्नमन्तु नास्य तात्पर्यं, ताः संविधानेनाङ्गीकृतायाः राष्ट्रभाषायाः जीवनं विकासं वा रुन्धन्तु। अपितु तर्कसंगतं तावदेतत्—'यदि राष्ट्रभाषाया विकासार्थं तासु कस्याश्चिन्मृत्युरावश्यकः, तया मरणमेवाङ्गीकरणीयम्'—यतः

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्

ग्रामं जनपदस्यार्थे—

अयमेव राजनीतिशास्त्रस्य सिद्धान्तः समादर्शश्च। ये तु केचिदल्पमतयो जल्पन्ति—'हिन्दीभाषाविज्ञैरन्या अपि भाषा अनिवार्यतोऽभ्यस्तव्याः' ते न जानन्ति संकीर्णमतयो, नैषः तिलतण्डुलयोरादानप्रदानस्य प्रश्नः। भावनायाः संगठनस्य प्रश्नोऽयम्। यदि वयमस्मिन् कलह एव निरता वत्स्यामः, कदाऽस्माकं राष्ट्रस्य सम्मानमुदेष्यति? कदा वयं स्वकीयायां राष्ट्रभाषायां तान् ग्रन्थानुत्पादयिष्यामो, येषामनुवादं निजभाषासु कर्त्तुं वैदेशिका अपि लोलुपा भविष्यन्ति? कदा वयं निजबुद्धया नूतनाः विद्याः, नूतनं विज्ञानं समुत्पाद्य विश्वाय दास्यामः? कदा च ब्राइसलास्की बुडवर्थविएटरनिट्ज़प्रमुखाणां पाश्चात्यानां मुखदर्शनं विहाय निजभाषायां मौलिकान् ग्रन्थान् जनयिष्यामः।

अस्माकं देशे प्रतिवर्षं सहस्रसंख्याका विद्यार्थिनः 'एम० ए०' परीक्षामुत्तरन्ति। किं कारणं, ते किमपि मौलिकं लिखितुं न प्रभवन्ति? इतिहासस्याध्यापकाः मौलिकं निबन्धमपि लिखितुमसमर्थाः। कारणं स्पष्टम्। ते स्वकीयां भाषां विहाय कार्लायलरौबिन्सनादीनां भाषां कण्ठीकुर्वन्ति कथं परकीयायां भाषायां ग्रन्थान् विरचयन्तु?

इंगलिशपक्षीयाः कथयन्ति— 'अस्माकं शिक्षा... मापदण्डस्य पतनकारणमाङ्गलभाषायाः माध्यम... निवृत्तिरस्ति। एतादृशा वितण्डावादिनः सर्वा... समस्यानां समाधानं तत्रैव पश्यन्ति। फुडग्रॉलअमर्व... कण्ट्रोलादीनां समस्यानां निमित्तं, आङ्गलशिक्षा... अभावमेव प्रतिपादयन्ति। 'English is t... langvage of liberty' इत्येव तेषां गानमपि... सर्वत्र ते तामेव द्रष्टुं समीहन्ते। किन्तु न जानन्ति... वराकाः, यदि वैदेशिकभाषायाः माध्यमेन शिक्षा... स्तरः समुन्नमेत्, तर्हि योरोपदेशेषु स्वभाषामाध्य... शिक्षा कुतो दीयेत? स्वभाषामाध्यमस्यैव प्रभा... यत्तो प्रतिदिनं नूतनं विज्ञानं, नूतनाश्च विद्याः ... यितुं समर्थाः। अस्माकं देशस्य चेयमवस्था, यच्चो... वर्षाणि यावत् पुस्तकैः समं मल्लयुद्धमपि कृत्वाऽ... विद्यार्थी वाक्यमपि मौलिकरूपेण लिखितुमप्रभुः।

अन्तर्राष्ट्रीये जगति निःसंशयमाङ्गलभाषायाः म... आवश्यकता। तदर्थं महत्त्वाकांक्षिभिः प्रयतित... सर्वसाधारणस्यार्थं राष्ट्रभाषैवानिवार्यतः समर्थ... न तु विदेशीया भाषा। राष्ट्रभाषाविषयेऽस्माकं ... दाल्लाभं गृहीत्वा मौलानाजादप्रभृतिभिः ... विश्वामित्रसृष्टी रचयितुमारब्धा। प्रधानमन्त्रिश... स्थाने 'पहलवा' इति, मन्त्रिमण्डलस्थाने 'खिच ... खोली' इति च शब्दं स्वीकारयितुमिच्छति शिक्ष... भारतस्य।

अन्ये वदन्ति—'उच्चशिक्षायाः पुस्तकानि रा... षायां नैव सन्ति, पारिभाषिकाश्च शब्दाः त... विद्यन्ते' इति। सम्यक्कथयन्ति ते। परन्तु तैः स्मर्त... यावत्पर्यन्तं उच्चशिक्षायाः माध्यममपि राष्ट्रभाषा... भविष्यति तावदर्द्धोऽपि लाभो विद्यार्थिभिर्न लप्स्य...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

# आनृण्यम् अथवा पिकस्य पत्रम्

( ले० श्रीनिवासशर्मा, शिरोमणिः, चिदम्बरम् )

...विश्वविदितवैदुष्येषु प्रज्वलप्रतापेषु महोदारेषु ...महोदयेषु! सविनयं विज्ञप्तिः। यत्सत्यं भवन्तः ...लिता भविष्यन्त्यनेन अभूतपूर्वेण इदंप्रथमतयाऽस्मासु ...लेखनसम्प्रदायसमारम्भणेन। किंतु सशपथं वक्तु... ...ऽस्मि-नात्राश्चर्यस्यावकाशः, यत् 'पक्षिणः पत्र... ...हारं न कुर्वन्तु' इति निरोधनियमो न कृतः शासक... ...कदापि। नाप्यस्माकं पत्रव्यवहारे व्ययोऽस्ति। ...पत्रलेखनप्रवृत्तोऽहं भवन्तं स्मारयितुमुत्सुकोऽस्मि-

भवन्तोहि जानन्ति—पूर्वेषां वयं सन्देशहारिणः आस्म। अथ च पत्रव्यवहारस्यानवकाशिनोऽपि वयं 'पत्रिणः' इति व्यवहृताः। पत्रशब्दस्यार्थः यथाकथंचिद् भवतु। पत्रित्वमन्येषामिव समानमस्माकम्। अतः भवद्भिः परिपुष्टः भवत्सेवायै एवात्र लिखामि।

प्रथमतया पत्रलेखनेन 'कोऽप्यपूर्वो विषयः स्यादिति' किल भवन्तः मन्येरन्। किंतु असकृत्सर्वैः परामृष्टः, प्रतीष्ट एव विषयो विस्तरेण लेखनीयोऽपि अवैरस्याय

---

...स्माकं दुर्बलतायाः प्रमाणं यद्वयं शीघ्रं पारिभा... ...शब्दान् नाविष्कुर्मः, विवादञ्च कुर्मः। किं ...ते इतिहासे, भारतीये दर्शनेऽपि केचित्पारिभा... ...शब्दाः सन्ति यत्तौ आङ्गलभाषायां पाठ्येते? ...ता यदि सन्त्येव, किं तेषामप्यनुवादो हिन्दीभाषायां ...संभाव्यते? संस्कृतसाहित्येऽपि पारिभाषिकाः ...?

...सर्वमेतदास्माकीनायाः मनोवृत्तेः प्रश्नः। राष्ट्र... ...मपि घ्नन्तो वयं विधानसभासु इंगलिशभाषणं ...यामहे। विद्यालयकक्षासु स्वहानिमपि पश्यन्त ...भाषणं कर्त्तुमुपाध्यायान् प्रेरयाम। हिन्दी... ...याः कीदृशस्यापि विदुषो भाषणे न गच्छामः। ...भाषायाः मूर्खस्यापि भाषणे कालेजभवनं सर्वतः ...पूर्णं दृश्यते। कैम्ब्रिजविश्वविद्यालयादागतस्य ...र्विन ज्ञानहस्मपि मस्तके ग्रहीतुमस्माकं छात्राः ...ता भवन्ति। न्यूयार्कविद्यालयस्योपाध्यायाना... ...मपि भक्षितुमस्माकमुपाध्यायाः लज्जां नानु-

भवन्ति। किमयमेवास्माकं सम्मानः? इदमेव गणतन्त्रम्? इदमेव विचारस्वातन्त्र्यम्? एषा स्वाधीनता? अस्माकं शिक्षाविशारदाः मैकोलेनाम्नो गौराङ्गादपि अधिकाः राष्ट्रस्य संस्कृतिहन्तारः सम्मानघातकाश्च विद्यन्ते।

किं बहुना, यदि वयं शीघ्रमेव स्वकीयां संस्कृतनिष्ठां हिन्दीराष्ट्रभाषां—या न केवलं भारतस्य बहुमतभाषा किन्तु या संसारस्य पञ्चसु महतीषु भाषास्वन्यतमा, या च सर्वाभ्योऽपि सरलतमा साधुतमा, या खलु भगवत्या गीर्वाणवाण्या स्वयं निजहस्तैः ज्येष्ठदुहितृबुद्ध्या यौवराज्यपदेऽभिषिक्ता, उन्नतिपथं प्रापयितुं न प्रयतेमहि। स्वकीयां संस्कृतिं कीर्त्तिञ्चावमन्येमहि, तदा सकलोऽपि राजनैतिकः, आर्थिकः सामाजिको वा विकासो विनाऽऽधारं रसातलमेष्यति। यतः

चलं चित्तं चलं वित्तं चले जीवितयौवने।
चलाचलमिदं सर्वं कीर्त्तिर्यस्य स जीवति॥

——

Digitized by Arya Samaj Foundation Chennai and eGangotri



भवतां महोदारता, वैदुष्यम् आदयो गुणा यथामदनुभवं उच्यन्ते । वस्तुस्थितिकथने का समीक्षा वा संकोचः । महतां गुणकीर्तनं अभ्युदयकारि चेत् किमिति सन्दर्भमिमं वृथा करवाणि ? । 'प्रत्यक्षे गुरवः स्तुत्याः परोक्षे मित्रबान्धवाः ।' अस्माकम् अन्नदातारो भवन्तो गुरवः । किं चानेन न केवलं मम अथवा भवतां, सर्वेषामेवास्मत्सजातीयानाम् अभ्युदयस्सम्पत्स्यते ।

प्रकृते भवन्तः कदा जनिमापेदिरे ? इति किमु वक्तव्यम् ? न ! नैव शक्यते । सत्यं शपे, प्रपंचस्य कालः विमर्शकैः (-विमर्शकाः के ?-) ईश्वरेणैव-यदि नामेदन्तया परिच्छिद्यते, भवतां जन्मोत्सवकालस्य इति सडिण्डिमघोषं प्रचारयितुं प्रभुरहम् । वेदेषु, पुराणेतिहासकाव्येषु यथावसरं भवन्तः स्मृताः, स्तुताः विख्यापिताश्च भृशम् । एवं विश्रुता न किलाऽचिरद्युतिरिव कंचित्कालं प्रकाशन्ते भवन्तः, अपि तु चिराय... अनन्तकालम्—(यदि शक्यते कालस्यावधिः परिच्छेत्तुं तावदित्यभिप्रायः)— । अतएव भवत्प्रभावविदः 'चिरजीवी' इति गायन्ति ।

भवतामौदार्यं, मनस्विता च केन, कथं वर्ण्यताम् ? अहो नैसर्गिकी भवतामुदारता ! । 'एकः स्वादु न भुञ्जीत' इति सूक्तिर्मन्ये भवतो निदर्शनीकृत्यैव कृता । यदि भवद्व्यावहारिकताचरितमृजुदृष्ट्या परीक्ष्यते सत्यमनुभावयामः अनुशतं भवतां कुलीनता-मनस्वितादीन् । आचार्या वदन्ति यथाः—

> काकः स्वभावचपलः परिशुद्धवृत्तिः
> लब्ध्वा बलिं स्वजनमाह्वयते परांश्च ।
> चर्मास्थिमांसवति हस्तिकलेवरेऽपि
> श्वा हन्ति हन्त च परान्कृपणस्वभावः ॥इति॥

कृपणबहुलेऽस्मिन्पक्षिकुले भवन्तः एव मनस्वि... इत्यतः किं परमम् ? । धन्यं पक्षिकुलम् ! । ... 'स्तवनप्रिय' इति संस्कृताचार्याणां वाचि न ... तेषां कृते—यद्यपि नास्त्यावश्यकता—द्राविडाचा... सन्देशमिममुल्लिखामि "काक्कै करवा करैन्दु... आक्कुमुम् अन्ननीरक्के युल" इति । (काकः ... भुङ्क्ते इत्यर्थः) इत्थं महतां वचनसन्दर्भे... स्मारितं तत्—'यदाहं स्वजनैः गर्भच्युत एव ... च्चूततरोर्मूले परित्यक्तः-भवद्भिः मयि (आहारबुद्धि... ति केचिद्वदन्ति; नैव) करुणादृष्ट्या उद्धृत्य ... मनायिष्ट अपोक्षिष्ट च परम् । इममेव रहस्यम... सत्यं महाकविर्वर्णयति "प्रागन्तरिक्षगमनात्स्वमप... तम् अन्यैर्द्विजैः परभृताः खलु पोषयन्ति" । ... अस्मन्मातृपटुत्वापेक्षया भवतामौदार्यम् आत्मीय... खलु स्पष्टं प्रतीयेते । अन्यादृशभवदौदार्यप्र... 'परभृता' इति नामपट्टमस्मच्छिरसि इदानीमपि ... शते; आयतौ च प्रकाशताम् । तादृशं बाल्यकालसौ... विचारयन्नहं .....विचारेण कोऽर्थः ? हन्त ! ते नो दिवसा गता ॥

किं बहुना बौद्धसाहित्ये 'काकजातकम्' प... 'काकोलूकीयम्' च पठतामिदं न तिरोहितं य... अत्युदाराः, विशालहृदयाः, प्रभावशालिन इ... अतएव मन्ये साहित्यकाराः—उचितज्ञास्ते !—भ... माधारीकृत्य नैका लोकोक्तीः प्रायुञ्जत । एता... भवन्तः नैव स्तोत्राभिलाषिणः' इति हन्त मद... वा जानीते ? 'पशूनामिव यूथोऽयं गतानुगतिको ज... दूरे तिष्ठतु । केचित्तु (नामाख्यानं न युक्तम्) ज... हतकस्य स्तोत्रवचसा विडम्बितो भवान्मुखस्थ... व्यनाशयदिति कथां रचयन्ति । वस्तुतः 'तुष्यतु ...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



इति जानन्त एव भवन्तः नैसर्गिकं औदार्यं प्राकाशय- न्निति मादृशां मनीषा। 'सम्भावितस्य चाकीर्तिर्मरणा- दतिरिच्यते' इति किल भवतां लक्ष्यम् ! ॥ किन्तु भवत्सजातीयेन केनचित् लोकमातरि सीतायामपराद्ध- मिति 'कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना' इति श्रीरामः ब्राह्ममस्त्रं प्रयुयोज। अनन्यगतिः सन् 'हिनस्तु दक्षिणाक्षि त्वच्छर इति' सोऽब्रवीत। 'तदाप्रभृति काकानां एकाक्षीति विश्रुतम्। सहस्राक्षस्य पुत्रस्य भवत्सजातीयः एकाक्षः अभवदिति चित्रम् !। इतोऽपि चित्रतरमेतत्—यत्—यद्यपि अविनयः कृतस्तथा, तथापि श्रीरामकृपापात्रत्वाय कल्पते इति। हिरण्यकशि- पुकंसप्रभृतयोऽपि हि कृतैरपराधैरेव स्वं भगवत्कृपापात्रं चक्रुरित्यामाहुः। 'विरोधेऽपि सम्बन्धः विद्यते' इति जगन्नाथपण्डितोऽप्याह। भवतु—

एवंगुणगणपरिपूर्णोऽपि भवति हन्त ! कथं वक्तुं शक्नोमि ? दुर्दैवादथवा असूयावशात् अन्ततः वस्तु- स्थितिकथने वाचंयमत्वप्रवृत्तेर्वा न केवलं, परं दोष- ख्यापनैकार्थस्वीकरणाद्दोषज्ञतायाः वदन्ति, विवृण्वन्ति, प्रोरते, व्यङ्ग्यभङ्ग्या विभावयन्ति च केचित् भवदीयं दोषलेशं 'न हि सर्वः पूर्णः' इत्यजानन्त इव। स किल महाशयः अप्पयदीक्षितः विधातुः उचितघटनापाटवं स्मृत्वै चिन्तयन्नमान्तमाश्चर्यपूरमभिमग्नः "चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं जातो दैवादुचित- रचनासंविधता विधाता" इत्यारब्ध। चिरादहमपि विचारवर्तिपि 'किं वापूर्वघटनापाटवं ब्रह्मणस्य उद्दिशति' इति विज्ञातुम्। किन्तु स न तथाऽऽत्मन असाधारण- गुणौघं गोपयितुं शशाकेव—न तैरस्माकं सम्बन्ध इत्युदासीनेष्वप्यस्मासु—। "यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा। यश्चैनं गन्धमाल्याद्यैस्सर्वस्य कटुरेव सः"

इति उक्तमनुस्मारयन्ननुपदमेवं वदति—"यन्निम्बानां परिणतफलस्फीतिरास्वादनीया यच्चैतस्याः कवलन- कलाकोविदः काकलोकः" इति। अप्रतीक्षितं वचनमन्या- पदेशेन निन्दायां पर्यवस्यति। कस्याप्यनुपभोग्यं निम्ब- फलम्—फलान्तरापेक्षया निम्बफले निरतिशयप्रीति जुषो भवन्त इति यत्सत्यं उभयोर्घटना चित्रैव। वर्षि- ष्ठस्यास्य परिहासवचस्सह्यतां नाम।

परं कश्चिद्वैतण्डिकः प्राह "काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः। वसन्तकाले संप्राप्ते काकः काकः पिकः पिकः" इति। विश्वविदिताः महो- दाराः भवन्तः क? अन्याधीनवृत्तिरहं क? वर्णग्रहे- णावयोरभेद इति वा, मासद्वयीपरिमितेन वसन्तेना- वयोः चिरबान्धव्यानपेक्षं महान् भेद इति वा अपरिगृह्य वचनम्। वस्तुस्थितावीदृश्यां मां बहुशः स्तुवन्तः तत्र भवति पराङ्मुखाः नूनं मम असह्याः, यद्यपि भवत्पोष्यस्य मम यशः भवद्यशः एव। भवतु, किमदूरं गतोऽहं तत्त्वान्वेषी ?। अहो वर्णग्रहेण स्मारितं प्रकृतं द्वित्रवाक्यैरुक्त्वा लेखाद्विरमामि। अद्य खलु कैश्चिद्वर्णपक्षपातिभिः 'रक्तः श्वेतः' इति गरुडः पक्षिराजत्वेनाभिमतः। भवन्तः 'कृष्णाः' इति नितरामधिक्षिप्ताः। अस्थाने खल्वेतत्। स्वार्थिनः, अस्मासु पराङ्मुखस्य च गरुडस्य कथं युज्यतां पक्षिरा- जत्वम् ?। किंच विपरिवृत्तेऽपरस्मिन्काले वर्णभेद इति लज्जावहं पक्षिकुलस्य। वस्तुतो विश्वव्यापृता भवन्त एव पक्षिराजत्वायार्हाः। पक्षिणां हिताय 'न केवलं व्यक्तित्व एव लोकः प्रतिष्ठते, परं संख्यायामपि' इति ख्यापनाय, वर्णभेदग्रहनाशनाय ( मुख्यं निवेदनम्— नाशनं नास्माकं मतम् : परं वर्णिनां व्यवहारस्तथा कारयति ) पक्षिकुलोज्जीवनाय श्रीमन्तः सोल्लासं प्रवर्त-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# 'भारती' प्रचाराय

प्रबन्धसम्पादकस्य श्रीगिरिराजशास्त्रिणो वङ्गयात्रा

नवम्बरमासस्य त्रयोविंशतारिकायां भारत्याः प्रचारार्थम् अहं कलिकातानगरे समुपस्थितोऽभवम् । पंचाशल्लक्षदेशीयया जनसंख्यया परिपूर्णोऽयं महानगरी भारतस्य विभिन्नप्रान्तीयजनैः परिवृताऽस्ति । भारतस्य विभिन्नप्रान्तीयातिरिक्तम् अत्र चीनवर्माइङ्गलैण्डअमेरिकादिदेशस्था जना अपि पर्याप्तसंख्यायां दृश्यन्ते । 'डलहौजी स्कायर' तथा 'क्लाईव रो' इत्यनयोः समीपे चीन-इङ्गलैण्ड-अमेरिका-इण्डोनेशिया-फ्रान्सादीनाम् अनेकेषां राष्ट्राणां सुबृहद्वैंकभवनानि तत्तद्राष्ट्रध्वज-युक्तानि भूयांसि अवलोक्यन्ते । प्रायः विंशतिक्रोशपरिधौ विस्तृतमिदं महानगरं विद्युत्प्रचालितैर्यानैः मरुत्तरयानैश्च एकीकृतम् । तत्र पञ्चषट्क्षणानन्तरमेव अभीष्टस्थलं गन्तुं पणकचतुष्टयेन षट्केन वा यानानि उपलभ्यन्ते । कलिकाताया 'बड़ाबाजार' क्षेत्रं व्यवसायस्य केन्द्रमस्ति। तत्र प्रायः सर्वेषां धनकुबेराणां कार्यालयाः भवनानि च दृश्यन्ते । कलिकातायाः सम्पूर्णा उच्चव्यवसाया राजस्थानस्य विरला-बंगड-डालमिया-मोर-सेक्सरिया-बाजोरिया इत्युपाधिधारिणां "मारवाडी' इत्यभिधानेन प्रसिद्धानां हस्ते वर्तन्ते ।

तत्र नगरे क्वचित् मारवाड़ीवङ्गीयेषु तीव्रा प्रान्तीय-भावना स्फुटा दृष्टिपथे अयाता ।

अहं कलिकातायां प्रारम्भे सप्ताहद्वयं स्थित्वा निम्नलिखित-प्रमुखनागरिकैः संस्कृतानुरागिभिः तथा संस्कृतज्ञैः सह अमिलम् । यैः मार्गं प्रदर्शयद्भिर्देववाण्याः प्रचारार्थं पर्याप्तः सहयोगः प्रदत्तः । सहयोग-कर्तृषु मुख्याः श्रीहरिबक्समहोदया वैद्यश्रीमोहनलाल शर्माणः वैद्यश्रीगोवर्धनलालमहोदयाः, श्रीभालचन्द्र-शास्त्रिणः, श्रीब्रह्मदत्तत्रिवेदिमहाभागाः, श्रीरामनाथ-शास्त्रिणः, पं० कजोडमलशर्माणः अन्ये श्रीचिरञ्जी-लालमिश्राः, वैद्यसोमदत्तशर्माणः एवं श्रीहेमचन्द्र-शास्त्रीत्यादयो महानुभावा भविष्यति सहयोगं प्रदातु-माश्वासनमददुः । अत्र पूज्यवरस्य श्रीनारायणस्वामिनो दर्शनं विधाय अहमत्यधिकशान्तिम् उत्साहं चाध्य-गच्छम् । स्वामिनः संस्कृतभाषाया अनन्यविद्वांसः लेखकाः शास्त्रस्य च सम्यग् ज्ञातारो वर्तन्ते ।

कलिकातानिवासिनः प्रधानश्रेष्ठिनः भवतां पूर्ण-समादरं विदधति । स्वामिनो मनसुखरायमोरमहाभागं प्रेरयित्वा पुराणानां मुद्रणस्य, तथा श्रीरंगलाल बगड़ि-यामहाभागं संप्रेर्य तेन सर्वेषां वेदानां मुद्रणस्य च व्यवस्थाम् अकार्षुः । स्वामिनः 'भारती' पत्रिकायै श्री रंगलालबागड़ियातः चतुर्दशशतमुद्राप्रदापनस्य आश्वा-सनं प्रदाय महतीं कृपाम् अन्वतिष्ठन् ।

---

न्ताम्, विजयन्ताम्, विधूयन्तां च विपद्विकुलानि । उज्जृम्भतामुत्साहः ।

अपरं च, 'सङ्घे शक्तिः कलौ युगे' । भवदीयाः सङ्घमिच्छन्ति इति मा शंकेध्वं विजये । प्रत्युत पोष्या वयं भवतां सहयोगमवश्यमानृण्याय धर्माय च करिष्यामः । अतः प्रार्थये—अचिरात् राजनिर्वचनं परिकलय्य तत्रभवन्तः पात्रिणो भवन्तु, वयं च भवद्भ्यः मतदातारः स्मः ॥

इत्थं भवत्पोष्यपरमाणुः पिकवर्गप्रतिनिधिः
ग्रामोद्यानपिकः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कलिकातायां विश्वविद्यालयस्य तथा संस्कृतमहाविद्यालयस्य प्राध्यापका 'भारती'मवलोक्य अस्या मुक्तकण्ठेन प्रशंसाम् अकुर्वन् । अत्रत्या एके प्रख्याता विद्वांसः श्रीयुतकरुणामयसरस्वतीमहाभागा देववाण्या मर्मज्ञाः परमविद्वांसो वर्तन्ते । भवतां समीपे संस्कृतस्य पुरातनानां नवीनानां च ग्रन्थानाम् अलभ्यः संग्रहोऽस्ति। अमी महानुभावा विभिन्नग्रन्थानामुद्धरणं पृष्ठसंख्यां श्लोकसंख्यां च यन्त्रवद् अनायासम् उच्चार्य स्मृतिशक्तेरद्भुतपरिचयं धारयन्ति । भारतीमवलोक्य भवन्तोऽस्या मनसा वाचा कर्मणा च सहायतां कर्तु माशीर्वादं कृतवन्तः ।

कलिकातातो द्विसाप्ताहिकप्रवासेऽहम् आसामप्रान्तस्य गौहाटी-डिब्रूगढ़-तिनसुखिया-नौगाव-धुवडी-आदिनगरेषु अपि अगच्छम् । अत्र सर्वस्मिन् विद्यालये सर्वस्मिन् माध्यमिकशिक्षाकेन्द्रे महाविद्यालये च संस्कृतम् अनिवार्यविषयः । गौहाटीविश्वविद्यालयस्य उपकुलपतयः श्रीमन्तो हैण्डिगमहोदया "भारतीं" दृष्ट्वा अस्या भूयसीं प्रशंसामकुर्वन् । अग्रे च भारत्यां प्रकाशनार्थं शुभसंदेशं प्रेषयितुमवोचन् । आसामस्य विभिन्नेषु मण्डलेषु ग्रामे ग्रामे संस्कृतस्य महान् प्रचारः । आसामीभाषायामपि वङ्गभाषायामिव संस्कृतशब्दानां बाहुल्यमस्ति । अत्रत्यनलवाड़ीसंस्कृतमहाविद्यालयस्य अध्यक्षा श्रीदशरथशर्माणः तथा डिब्रूगढकालेजस्य अध्यक्षादयो महानुभावा भविष्यति भारत्याः सहायतां कर्तुं तथा लेखादि दातुं स्वीकृतिं दत्तवन्तः ।

आसामप्रान्तीया जना अतिस्वाभिमानिनः स्वावलम्बिनश्च वर्तन्ते । आसामीया जनाः स्वकीयकृषिकर्मणैव जीविकोपार्जनं कुर्वन्ति । अत्र राजस्थानस्य सर्वेषां वीरपुरुषाणां जीवनचरित्रं तथा मीराया भजनानि बालकान् अतिप्रेम्णा पाठयन्ति अध्यापकाः ।

कलिकातायां श्रीमन्तः सोहनलालदुग्गढमहोदया गोहत्यानिरोधान्दोलने बन्दिनोऽभवन् । लक्षाणां दैनिकव्यवसाये सत्यपि इमे वीरपुरुषा मासचतुष्टयस्य बन्दिजीवनं व्यतिगमय्य अस्वस्थावस्थायां कारामुक्ताः सन्तो भारत्याः १०१) रुप्यकाणां सहायतां व्यदधुः । श्रीलक्ष्मीनारायणपोद्दारमहोदया अपि १०१) रुप्यकाणि भारत्याः सहायतार्थं दत्तवन्तः ।

प्रान्तीयसर्वकारैः सहापि वार्तालापोऽभूत् । परिणामस्वरूपं श्रीयुतशिक्षामन्त्रिणः, जी० सी० आई० महोदयस्य समीपे आवेदनपत्रं दातुम् अकथयन् ।

इत्थं कलिकाताऽऽसामप्रान्तयोः भारत्याः प्रसारं प्रचारं कर्तुं तथा भविष्यत्काले लोकैः सह सहयोगं सम्पादयितुं व्यवस्था कृता ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अर्वाचीनाः संस्कृतसाहित्यकाराः

(अनु० देवर्षिकलानाथशास्त्री साहित्याचार्यः B. A.)

[अस्माभिः कतिपयमासपूर्वम् आङ्गलभाषायां यन्त्रलिपीकृतं ( Typewritten ) एकं लघुपुस्तकम् अधिगतम्। एतत्खलु सुप्रसिद्धसंस्कृतेतिहासलेखकस्य डा० एम्० कृष्णमाचारियर M. A., M. L., Ph. D. M. R. A. S. भूतपूर्वमद्रासप्राड्विवाकस्य "संस्कृतसाहित्येतिहासत." ( History of classical Sanskrit Literature) केवलमाधुनिकशताब्दीद्वये संजातानां साहित्यकाराणामितिहासं संकलय्य एकेन विदुषा लिखितमस्ति। एतस्मिन् हि भारतवर्षे संजातानाम् आधुनिकयुगीनसंस्कृतसाहित्यकाराणां (ईशवीय १८०० संवत्सरम् आरभ्य १९४० पर्यन्तं समुद्भूतानां) विशेषतो दक्षिणाञ्चलवासिनां परिचयः, तद्ग्रन्थानां सूची समीक्षा च विशदं संकलितानि, भारतीपाठकानां संस्कृताध्येतॄणां गवेषकाणां च महते लाभाय स्युरित्यत्र लेखकेन आवश्यकपरिवर्तनानन्तरं परिवर्द्धनानन्तरं च संस्कृतेऽनूद्य यथाक्रमं प्रकाश्यते।

—सम्पादकः]

परकालमठस्य ( मैसूरस्थस्य ) मठाधीशेषु एकत्रिंशत्तमः श्रीकृष्णब्रह्मतन्त्रपरकालस्वामी ( जन्म १८३९-१९१६ मृत्युः ) पूर्वं कृष्णमाचार्य इति प्रसिद्धोऽभूत्। अनेन पेनर अमिदयल्लवनग्रामे जन्म लब्धम्। एतत्पिता तात्याचार्यो माता च कृष्णाम्बाऽभूताम्। अनेन संस्कृते ६७ ग्रन्थानां रचना विहिता। रङ्गराजविलासचम्पूः, कीर्तिकोत्सवदीपिका, श्रीनिवासविलासचम्पूश्चास्य चम्प्वः, चपेटाहतिस्तुतिः, उत्तररङ्गमाहात्म्यम्, रामेश्वरविजयः, नृसिंहविलासकाव्यम्, मदनगोपालमाहात्म्यं चास्य काव्यानि। एतस्य अलङ्कारमणिहारः संस्कृतजगति सुप्रसिद्ध आकारग्रन्थोऽस्ति यो जगन्नाथपण्डितराजानन्तरं केनापि विदुषा लिखितः प्रायः एकमात्रम् आकरग्रन्थः। अलङ्कारकौस्तुभाख्योऽप्योऽपि श्रूयते। अत्र नैयायिकशैल्या केवलमलङ्काराणामुपरि समीचीना मीमांसाऽस्ति, उदाहरणेषु च तिरुपतिस्थश्रीनिवासदेवस्य स्तुतौ निबद्धाः कवेः स्वकीया एव रचनाः प्रत्ताः।

अभिनवरामानुजाचार्यः नैध्रुवकाश्यपगोत्रीयवेंकटराजस्य पुत्रः वादीभकेसरिकुटुम्बे उत्पन्नोऽभूत्। स्वकीयमपरं नाम 'मायावादिमदगजकण्ठीरवाचार्य' इति योजितमासीत्। अयम् एकोनविंशशताब्द्यामुत्पन्नेषु दर्शनपण्डितेषु प्रमुखः करवेटनगरस्य तिम्मजगत्सेः समकालिकश्चासीत्। तिरुपतिस्थश्रीवेङ्कटेशप्रभोः कृते लिखितमस्य 'श्रीनिवासगुणाकरकाव्यं' सप्तदशसर्गात्मकं प्रसिद्धमस्ति यस्य टीका अष्टमसर्गपर्यन्तं स्वयं ग्रन्थकर्त्रा लिखिता अवशिष्टसर्गान्तं टीका कवेर्भ्रातृव्येण वरदराजेन अलेखि।

कृष्णरामभट्टः—जयपुरनगरस्य सुप्रसिद्धेषु कविष्वन्यतमः अभूत्। अयमायुर्वेदस्य प्रकाण्डो विद्वान् जयपुरमहाराजसंस्कृतकालेजे आयुर्वेदस्य प्रधानाध्यापकश्चाभूत्। अयं गुर्जरदेशीयनागरब्राह्मणेषु भटमेवाड़ा अवटङ्कधरोऽभवत्। जयपुरनगरे एतद्देशस्य भूपानां समादरः, राजवंशे च महान् सम्मानोऽभूत स्वयं चायं प्रमोदप्रियः, भङ्गारसिकः, सफलः सुमधुरः कविपण्डितश्चाभवत्। आयुर्वेदजगति एतद्रचिता 'सिद्धभेषज-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मणिमाला' भूयांसमादरं लब्धवत्येव, परन्तु विनोदा-
वसरे लिखितान्यस्य काव्यान्यपि तत्सामयिककविषु
चिरात्राय चर्चागोचरतामभजन्त । एवंविधकाव्येषु
"जयपुरविलासकाव्यम्" "होलामहोत्सवकाव्यं" च
परिगणयितुं शक्येते । द्वयोरप्यनयोः काव्ययोः जयपुर-
नगरस्य, सामन्तानां, वीथीनां, मेलकानां, महोत्सवानां,
श्रीमतीनां पण्डितानां च विनोदपूर्णा काव्यवर्णनसरणि-
रङ्गीकृता। एनयोः भाषान्तराणां प्रयोगः, देशभाषायाः
सुभाषायाश्च पुटं, भाषासमकयोजनमित्यादयः
काव्यचमत्काराः सुस्फुटं योजिताः । होलिकामहोत्सवस्य
सुरुचिरं विनोदप्रहसनपूर्णं वर्णनं द्वितीये काव्ये लभ्यते।

एतल्लिखितं "कच्छवंशमहाकाव्यम्" सुप्रसिद्ध-
मैतिहासिकं काव्यमस्ति यस्मिन् जयपुरराजवंशस्य
कच्छवाहाख्यस्य पारम्परिकं वर्णनं निबद्धम् । इदम-
द्यावधि अमुद्रितं जयपुरराजहर्म्यपुस्तकालये सुरक्षितम् ।
"पलाण्डुराजशतके" व्याजापरनाम्नः पलाण्डोर्महाराज·
त्वकं, तस्य दिग्विजयः, अपरेषां कन्दमूलफलानां
पराजयश्च शतश्लोकात्मके खण्डकाव्ये निबद्धानि ।
"आर्यालङ्कारशतकम्" "मुक्तकमुक्तावली" सारशतक-
मित्यादीनि काव्यानि अन्यान्यपि लभ्यन्ते येष्वनेन
कवीयाऽसाधारणप्रतिभा प्रकटिता । छन्दश्छटामण्डनं
छन्दःशास्त्रस्य ग्रन्थोऽस्ति ।

एतस्य जन्म सन् १८४७ वर्षे मृत्युश्च १८९६ वर्षे
अभूत् । महाभागेनानेनाल्पतर एवायुषि सुमहद्यशो-
ऽर्जितम् । एतस्य वंशे अस्य श्रीमान् सहोदरः श्रीलहरि-
रामभट्टोऽप्यसाधारणप्रतिभाशाली कविरासीत् । यस्य
खण्डकाव्यानि, गीतयश्चाऽधुनापि लभ्यन्ते । "जय-
नगरपंचरङ्गा"ख्यं खण्डकाव्यं च । तस्मिन् समये
जयपुरात्प्रकाश्यमाने "संस्कृतरत्नाकर" पत्रे अस्य कवेः
रचनाः प्रकाशं प्राप्ताः । एतस्य पुत्रौ गङ्गाधर–कलाधर-
भट्टौ अपि प्रतिभाशालिनौ । कलाधरभट्टः स्वयम्,
गङ्गाधरभट्टतनूजो नरहरिभट्टः सम्मानितवैद्यश्चाधुना-
ऽस्य कुले वर्त्तेते । द्वावपि कवी स्तः ।

लक्ष्मणसूरिः— अयं रामनदीयश्रीविलिपुत्तुर-
समीपे पुनलवेलिग्रामवास्तव्यमुथुसुब्बऐयरस्य पुत्र
आसीत् । जीवनकालः (१८५६–१९१९) । निखिलशा-
स्त्रज्ञोऽयं महामहोपाध्यायपदवीमलभत । अयं मद्रास-
स्थितपञ्चयप्पाकालेजे संस्कृताध्यापकोऽभूत् । "कृष्ण-
लीलामृता"भिधं तस्य महाकाव्यं कृष्णस्य व्रजलीलानां
वर्णनं करोति । विप्रसन्देश, मनःसन्देश, वेङ्कटेशस्त-
वप्रभृतीन्यन्यान्यप्यस्य काव्यानि ख्यातानि । देहली-
साम्राज्यनाटके अनेन पञ्चमजार्जसम्राजा कृतस्य
दिल्लीदरबारस्य काव्यमयं वर्णनमनुष्ठितम् । पौलस्त्य-
वधनाटके रावणवधस्य कथोपनिबद्धा । अनर्घराघव,
उत्तररामचरित, वेणीसंहार, बालरामायण, रत्नावल्यादि-
नाटकानां टीका अनेन लिखिताः सर्वत्रोपलभ्यन्ते ।
मदनरचितायाः पारिजातमञ्जर्याः खण्डितांशानां
जीर्णोद्धारः, अ.मूलचूलपरिष्कारश्चाप्यनेन विहितः ।

गद्यलेखेऽप्यनेन सुमहत्कार्यमनुष्ठितम् । एतस्य
"भीष्मविजय" औपन्यासिकशैल्या कौरवसेनापते-
र्भीष्मस्य जीवनचरित्रेण सहैव, तद्वर्चसः, शौर्यस्य
चापूर्वं महिमानं प्रख्यापयति । न केवलमिदेव, अपि
त्वनेन रामायणकथायाः सारसङ्ग्रहः रामायणसङ्ग्रहे,
महाभारतकथायाः सारसङ्ग्रहश्च "महाभारतसङ्ग्रहे"
कृतः ।

——



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★चीनस्य महन्मुक्तेरभियानम्★

( अनु० दीनानाथत्रिवेदी 'मधुपः' जयपुरम् )

१९४९ खिष्टाब्दे जनवरीमासस्य १४ दिने माओत्से-तुङ्गेन घोषणाऽकारि यत्-चीनजनतायाः मुक्तिसेनायां तावद्बलं विद्यते येन सा वांछेत्तर्हि क्षणेनैव कुमिंटांगस्य शासनसूत्रं समुच्छेत्तुं प्रभवति। तथापि शान्तिनामसुरक्षायै साम्यवादिनां गणो योद्धुं नासीत् समुत्सुकः। अतएव माओत्सेतुङ्गः शान्तिसन्धेः कतिचित् नियमान् विलिख्य च्यांगस्य समीपं प्राहिणोत। येषामर्थस्त्वात्मसमर्पणमेवासीत्। तथापि कुमिंटांगः तान् स्वीकर्तुं न प्राभवत्। तथापि माओत्सेतुङ्गस्य घोषणया च्याङ्गस्य शान्ति-सन्धेः प्रार्थनायाः भङ्गः कृतः। च्यांगेन सम्यग् ज्ञातं यत्-चीनस्य भूम्याकाशयोः तस्य शब्दस्य किमपि मूल्यमेव नावशिष्टमस्तीति।

एवं स्थितौ जनरालिसीमो व्यचिन्तयत्—यत् कुमिंटांगस्य मध्ये एव प्रतिदिनमेधमानस्य भयस्य प्रबलस्य विरोधस्य च शान्त्यर्थमेतदेव समुचितं प्रतिभाति यत स नानकिंगं परित्यज्य निर्गच्छेत्। एतदन्तरालकाले च सुदूरं निवसन् यांग्च्या दक्षिणे भागे सुरक्षायाः सांग्रामिकसज्जां कारयेत्, तथाऽऽत्म-सर्वकारेण प्रचालितायाः शान्तिवार्तायाः मिषेण विदेशीय-साहाय्यसम्पादनायाऽपि प्रयतेत।

तथैव १९४९ खिष्टाब्दस्य जनवरीमासस्य २१ दिने मध्याह्ने द्विवादनवेलायां ली, सुंगजेनाय कार्यभारं समर्प्य जनरालिसीमो च्यांगकाई-शेकः अमेरीकीयं वायुयानमारुह्य नानकिंगात् पञ्चोत्तरैकशतक्रोशमित-दूरस्थे चेकियांगप्रान्ते निजपूर्वजानां परम्परागतं गृहं 'फेंगवा' मगात्। द्वाविंशतिवर्षाणि यावत् यः च्यांग... चीनराजकीयं पदमलङ्कुर्वाणः चीने एकच्छत्रं शास...नमकार्षीत्, १९४५ तमे खिष्टीयाब्दे च विजयोत्स...स्यावसरे च 'रेसकोस पार्क' स्थशंघाईचीनजन...यं च्यांगं जयघोषैरसकृत् समाच्छादितवती; तस्य च्यांगस्य ततो गमनावसरे चीने तदर्थं न त्वेकोऽप्यु... एवाभूत् नापि चैकः करतलध्वनिरेवाऽजायत।

इत्थं फेंगवामुपयातः स जनरालिसीमो १९... खिष्टाब्दस्य भीष्मे ग्रीष्मे काले सततं निजपरित्यक्त... राजधान्यां जायमानानामुपद्रवाणां शान्त्यर्थं वि...लान् प्रयत्नान् कुर्वन्नतिष्ठत्। च्यांगस्य कार्यप्रणा... समालोचकाः पत्रकारास्तेऽपि तदा कारागारेऽपात्य... शान्तेरान्दोलनकर्तॄणां छात्राणां गणेषु दण्डवृष्टि... क्रियत, नानकिंगस्य राजमार्गे च ते गुटिकाव... बहवो भस्मसात्कृताश्च। अस्मिन्नेव समये चोद... धिकारिणो लित्सुंगजेनस्यापहरणोपायाश्चान्व...ष्ठीयन्त।

अराजकताक्रान्तेऽस्मिन् समये माओत्सेतुं... पुनः कुमिंटांगस्य सम्मुखे एवम्भूतश्चैकः ... प्रस्तावः समुपास्थाप्यत, यं स स्वीकर्तुं नालम... अपरतश्च स माओत्सेतुंगेन निजसैन्यं दक्षिण... यांग्चीनदीप्रतरणसज्जां कर्तुमादिशत।

१९४९ खिष्टाब्दे अप्रैलमासस्य २० दिने ... माओत्सेतुंगस्याऽन्तिमस्याऽऽदेशस्य क्षणान्तरे... 'चीनजनताया मुक्तिसेना यांग्चीनद्याः पारं गन्तु... भत। दुर्लङ्घ्यं भयानकं चैनं जलप्रसारमवत...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



साम्यवादिनां समीपे केवलं काष्ठनिर्मिताः नावः आसन्। कतिचिच्चाभूवन् स्थूलाभिः रज्जुभिः काष्ठफलकैरेव रचितानि जलवाहनानि।

परमन्यत्र साम्यवादिनामिदं यांग्च्यारोहणमवरोद्धुं कुमिटांगस्य पार्श्वे जलपोतानां वायुयानानाञ्च विविधमुपकरणं सुसज्जमवर्तत।

तथापि साम्यवादिनां यांग्च्यारोहणस्यास्य महतो अभियानस्य कुतश्चित् किमपि विरोधस्यावरोधस्य च चिह्नं नादृश्यत। यद्धि प्रायोऽमेरीकीययुद्धसामग्रीसम्पूर्णमपि तदीयशिक्षणकलैधमानं चीनस्य जलयानानां दलं युद्धाय निजां सन्नद्धतां नादर्शयत। क्षणात् साम्यवादिनो भस्मसात्कर्तुं समर्थान्यपि वायुयानान्यपि तदा योद्धुं नाभ्यागच्छन्। कुमिटांगेन सम्भवतः पञ्चलक्षमितं सैन्यं यांग्चीनद्यास्तटयोः परिरक्षितमभूत्, परं तस्य सैन्यस्य युद्धशक्तेरनुमानं संख्यया कर्तुं नाशक्यत।

अप्रेलस्य २० दिने सायं टीकांगे यांग्चीनदीस्थितायां कुमिटांगस्य चम्वाः पंक्तौ साम्यवादिभिः प्रथमआक्रमणं विहितम्। अशीतितमोऽष्टाशीतितमश्च सैन्या विभागौ नगरस्यास्य सुरक्षायै नियुक्तावास्ताम्। एतावुभावपि पृतनायाः विभागौ युद्धस्य आरम्भमात्रावेव राजद्रोह(बगावत)मकार्ष्टाम्। अप्रेलस्य २१ दिने साम्यवादिनो नानकिंगस्य हैंकोवस्य च मध्ये किउकियांगं प्राप्नुवन्। अस्या घटनाया द्वितीयदिन एव चीनजनताया मुक्ति-सेना कियांग्यिनस्य दुर्गमुपागमत् यत् कुमिटांगस्य सुरक्षापंक्तेः सर्वतः सुदृढं स्थलं पर्यगण्यत। कियांग्यिनस्य दुर्गस्य रक्षका रक्षणनिपुणाः सैनिकाः 'मुक्ति-सेनायां' नैव, अपि तु कुमिटांगस्यैव शतघ्नीपूर्णेषु जलयानेषु गुटिकाप्रहारान् कर्तुमारभन्त येन साम्यवादिनः ससुखं नद्याः पारं गन्तुं शक्नुयुः।

चीनस्य जनताया मुक्ति-सेना द्रुतगत्याऽग्रे वर्धमानैवागात्। एकेनैवाऽहोरात्रेण त्रिंशत्सहस्रसंख्याकाः सैनिकाः नानकिंगस्य दक्षिणपश्चिमभागवर्तमानं त्रिंशत्क्रोशमितदूरस्थं कुहूं प्राप्नुवन्। ततस्त्रिदिनानन्तरमेव ते चैना रिपब्लिकस्य राजधान्या भित्तेः समीपमगुः।

अप्रेलस्य २४ दिने चीनजनताया मुक्तिसेना जनरलचेन–पी जनरललिनपोचे'गयोः सेनापतित्वे नानकिंगस्यान्तः प्राविशत्। साम्यवादिनां रेडियोयन्त्रेण नभोवाण्यां घोषणाऽक्रियत यत् "कुमिटांगस्य प्रतिक्रियावादिनः शासनस्य समाप्तिरभूत्। तस्य सर्वकारस्यास्तित्वमेव विलयं यातम्।"। अत्याचारिणः च्यांगसर्वकारस्य समूलोच्छेदनकर्त्रीं मुक्तिसेनां संद्रष्टुं संख्यातीता जनता सहर्षमभ्यागमत्। अमन्दानन्दभाजः सैनिकाश्च विजय-गानानि गायन्तो व्यहरन्। मन्त्रमुग्धेव जनताऽपि तैः सहैकतानाऽभूत्। दिगन्तभेदिनो जयघोषा उच्चैरभितोऽश्रूयन्त।

'अधुनाऽस्माभिः सर्वस्या अपि जनताया विषये विचाराः कर्तव्याः।'

'प्रतिक्रियावादिनः सर्वनाशो भवतु।'

'मात्र्योत्सेतुंगो मुक्तिप्रदोऽस्ति। मात्र्योत्सेतुंगोऽस्माकं परित्राता विद्यते।'

सहस्रशोऽन्ये राजपुरुषाः च्यांगस्य पलायनपरां सेनामन्वधावन्। नानकिंगस्य विजेता जनरलचेनयी महाशयेनैका विज्ञप्तिः प्रकाशिता—यत्र प्रतिज्ञातमभूत्—यत् जनतायाः जीवनं सम्पदो गिरजागृहाणि पाठशालाश्च रक्षिष्यन्ते, परं जनद्रोहिणः 'च्यांगकाई



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# राजस्थानसंस्कृतसाहित्यसम्मेलनस्य संक्षिप्तं विवरणम्

ले० सुरजनदासस्वामी प्रधानमन्त्री रा० सं० सा० सम्मेलनम्, कोटा

राजस्थानसंस्कृतसाहित्यसम्मेलनस्य पञ्चममधिवेशनं दिसम्बरमासस्य २६, २७; २८ दिनांकेषु महता समारोहेण कोटानगरे सम्पन्नम्। सम्मेलनस्य सभापतयः बीकानेरीयडूंगरकालेजसंस्कृतविभागाध्यक्षाः श्रीविद्याधरशास्त्रिण आसन्। सम्मेलनस्योद्घाटनं राजस्थानप्रान्तस्य उपराजप्रमुखपदमलंकुर्वाणेन श्रीमन्महामान्येन कोटानरेशेन विहितम्। अस्मिन्नधिवेशने प्रतिनिधीनां संख्या अधिवेशनान्तरापेक्षया साधीयसी आसीत्। अस्मिन्नवसरे संस्कृतच्छात्रसम्मेलनस्य, महिलासंस्कृतसम्मेलनस्य, कविसम्मेलनस्य, साहित्यपरिषदः, दर्शनपरिषदश्चाप्यधिवेशनानि साफल्येन सम्पन्नानि। अपि च इन्द्रसभादृश्यम् (कविसमाजः) मेघदूतस्य अभिनवश्छायाभिनयः, शाकुन्तलनाटकस्य चतुर्थाङ्कस्याभिनयः, अभिनवसत्यहरिश्चन्द्ररूपकस्य चाभिनयोऽप्येतस्याधिवेशनस्योल्लेखनीयानि कार्याण्यासन्। प्रायशः सर्वमेव कार्यं प्रेक्षकाणां हृदयावर्जकमासीत्। स्वागतादिव्यवस्थाऽपि साधीयसी, प्रतिनिधीनां परमसन्तोषावहा चासीत्।

कविसम्मेलनस्य सभापतिपदं साहित्यवैभवजयपुरवैभवाद्यनेकाभिनवग्रन्थनिर्मातृभिः, आजीवनसाहित्यसेवापरायणैः माननीयैः भट्टश्रीमथुरानाथशास्त्रिमहाभागैरलंकृतम्। कवीनां स्वतंत्रा कृतयः समस्यापूर्तयश्च प्रौढाः, प्रांजलाः, सरसा, विदुषां हृदयाह्लादिकाश्चासन्। पञ्चत्रिंशतकविभिः स्वीयाभिः कृतिभिः कृतिनां मनोविनोदो विहितः। इतः परं समयाभावात् बहूनां कवीनां रचनाश्रावणं न संवृत्तम्। दर्शनपरिषदः साभापत्यं जयपुरमहाराजकालेजे दर्शनप्राध्यापकपदमलंकुर्वाणैः काव्यतीर्थश्रीद्विजेन्द्रलालशर्मा एम. ए. महाभागैः, साहित्यपरिषदः, संस्कृतच्छात्रसंमेलनस्य चाध्यक्षत्वं रामगढ़

---

शेक एण्ड कम्पनी' तिसंस्थायाः सर्वाऽपि संपत् सर्वकारायत्ता सम्पत्स्यते।

आगामिनि दिवसे प्रातः पादोनसप्तवादनसमये द्वादश राजपुरुषा अमेरीकीयसंयुक्तराष्ट्रस्य दूतावासे विधायाक्रमणं ते राजदूतस्य ततः शयनागरं प्राविशन्। राजदूतो जे० लेटनस्टूअर्टोऽर्धनिद्रित एवासीत् निजशय्यायां दण्डायमानः। आजीवनादेव चीनप्रवासिनं चीनभाषायाश्च महाविद्वांसं द्विसप्ततिवर्षवयस्कं-अमेरीकीयकूटनीतिविशेषज्ञमिमं महताऽपमानजनकेन शब्देन सम्बोध्य साम्यवादिनो राजपुरुषाः (तद्भवनस्थं वस्तुजातं प्रति संकेतं कृत्वा) इदानीमिदं सर्वमपि वस्तुजातं जनताया भविष्यतीत्यवोचन्। ततो बहिर्गच्छन्तस्ते राजपुरुषा दूतावासस्थमेकमनुचरमुक्तवन्तो यत् अयं स्टूअर्टः स्थानादस्मात् बहिर्गन्तुं नार्हति। बहिर्गते त्वस्मिन् प्राणरक्षा न भविष्यतीति।

चीनस्य जनतायाः मुक्ति-सेनयाऽनानकिंगस्यायं विजय एशियायां साम्राज्यवादोपनिवेशवादादीनां कृते मरण-घोषणाऽऽसीत्। पश्चिमदिग्भवगोलार्धे स्वसीम-क्रान्तेरनन्तरं प्राग्भवगोलार्धे मानवजातेर्महति मुक्तेरभियाने प्रगतेरिदं प्रथमं पादार्पणमभूत्।

———



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नगरे हरिनन्दनरूईयाआयुर्वेदिककालेजाध्यक्षैः श्री हनुमत्प्रसादशास्त्रिभिः, महिलासंस्कृतसाहित्यसम्मेलनस्य च साभापत्यं बीकानेरीयसुदर्शनाकालेजाध्यक्षया श्रीसुवर्णलतादेव्या विहितम्। उभयोरपि परिषदोः समागतैः सुधीभिः साधीयांसो विचाराः प्रकटिताः। महिलासम्मेलने महिलानां संख्या साधीयसी उल्लेखनीया चासीत्। स्त्रीशिक्षायां संस्कृतस्याऽनिवार्यताविषयकः प्रस्तावः ऐकमत्येन स्वीकृतः।

एतदधिवेशनावसरे साप्ताहिकस्य संस्कृतशिक्षणशिविरस्याऽप्यायोजनं कृतम्। तत्र च कोटामण्डलीयविद्यालयानां षष्टिसंख्यामिताः संस्कृताध्यापकाः प्रशिक्षणार्थमागताः। 'सरलया रीत्या कथं संस्कृतमध्यापनीयम्' इति प्रत्यक्षां प्रणालीमाश्रित्य ते शिक्षिताः। जनवरीमासस्य प्रथमे दिवसे शिबिरस्य दीक्षान्तसमारोहः सम्पन्नः। तस्य अध्यक्षता च राजस्थानस्य उपशिक्षामन्त्रिपदमलंकुर्वाणया माननीयया श्रीमत्या कमलावेनीवालमहोदयया विहिता। मंगलाचरणस्वागतगीत्यनन्तरं डा० श्रीमथुरालालशर्मणा स्वागताध्यक्षेण उपशिक्षामन्त्रिण्याः संक्षिप्ते परिचये दत्ते सति स्वागतमन्त्रिणा डा० श्रीफतहसिंहमहोदयेन शिविरस्यावश्यकत्वं तदीयं संक्षिप्तं विवरणं च प्रस्तुतम्। अन्ते अध्यक्षमहोदया अध्यापकेभ्यः प्रमाणपत्राणि वितीर्य "संस्कृतभाषा सर्वासां प्रान्तीयभाषाणां जननी, भारतस्यैक्यसम्पादिका, भारतीयसंस्कृतेः प्राचीनानां महर्षीणाममूल्यस्य ज्ञानस्य च निधिः, अतः साऽवश्यमध्येतव्या" इति संस्कृतस्यावश्यकत्वं महत्त्वं, संस्कृतशिक्षणशिविराणां चावश्यकत्वं प्रतिपादितवती।

संस्कृतप्रदर्शिन्याः संस्कृतशिक्षणशिबिरस्य चोद्घाटनं कोटानगरे २६।१२।५४ दिनाङ्के माननीयेन राजस्थानसभाध्यक्षेण राजस्थानसंस्कृतसाहित्यसंमेलनस्य अलवरसंमेलनाध्यक्षेण श्रीनरोत्तमलालजोशीमहोदयेन कृतम्।

सम्मेलने ये प्रस्तावाः स्वीकृतास्तेषु मुख्याः प्रस्तावा निम्नाङ्किताः। तद्यथा—

१—रा० सं० सा० सम्मेलनमिदं प्रस्तौति यत् संस्कृताध्ययनं प्रोत्साहयितुं छात्रवृत्तीनां स्वीकरणं, छात्रावासानां स्थापनम्, आजीविकार्थं च संस्कृतस्नातकानामपि हाईस्कूलेषु कालेजेषु च नियोजनं शासनाधिकारिभिर्विधेयम्।

२—सम्मेलनमिदं प्रस्तौति यत् राजस्थानशासकमण्डलेन अष्टमकक्षापर्यन्तं संस्कृतमनिवार्यं विहितं तथा हाईस्कूलपरीक्षायामपि संस्कृतमनिवार्यं करणीयम्, अष्टमकक्षापर्यन्तं तस्मिन् विषये समुत्तरणम् अनिवार्यरूपेण सम्पादनीयम्।

३—सम्मेलनमिदं प्रस्तौति यत् आंग्लस्नातकानां प्रशिक्षणव्यवस्थेव संस्कृतस्नातकानामपि प्रशिक्षणव्यवस्था शासनाधिकारिभिर्विधेया, तदर्थं विभिन्नाः प्रशिक्षणोपायाश्चोऽपि निर्धार्याः।

४—सम्मेलनमिदं प्रस्तौति यत् प्रौढशिक्षाविभागेन साक्षरताप्रचार इव संस्कृतप्रचारोऽपि जनतायां रात्रिपाठशालादिस्थापनद्वारा विधेयः।

५—सम्मेलनमिदं प्रस्तौति यत् संस्कृतसंस्कृतिसाहाय्यभूतानां व्यासवल्मीकिशङ्करकालिदासादीनां जयन्त्युत्सवानामायोजनं शासनाधिकारिभिरादेश्यम्।

६—सम्मेलनमिदं प्रस्तौति यत् मेडिकलपरीक्षासु आयुर्वेदविषयकस्य पत्रस्य संनिवेशः सम्पादनीयः।

७—सम्मेलनमिदं प्रस्तौति यत् महाविद्यालयेषु विद्यालयेषु च अध्यक्षतापदे आचार्यादिपरीक्षोत्तीर्णाः विद्वांसोऽपि विशेषप्रशिक्षणं प्रदाय नियोज्याः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



८—सम्मेलनमिदं राजस्थानशासनाधिकारिणां संस्कृतभाषां प्रति व्यवह्रियमाणाया उपेक्षापूर्णाया नीतेर्घोरं विरोधमाचरति । तां नीतिमपनेतुं संस्कृतभाषां समुन्नेतुं च तान् अनुरुन्धे । एतदर्थं तत् केन्द्रीयशासनाधिकारिणां देशनेतृणां चापि ध्यानमाकर्षति ।

९—सम्मेलनमिदं शासनाधिकारिणः प्रार्थयते यत् ते संस्कृतभाषायाःसंस्कृतविद्यालयानां च प्रोत्साहनाय संस्कृतविद्यालयेभ्यो दीयमानायामार्थिकसहायतायां वृद्धिं कुर्युः, न्यूनातिन्यूनं ७० प्रतिशतं साहाय्यं तेभ्योऽवश्यं प्रदद्युः ।

१०—सम्मेलनमिदं कोटाधिवेशनावसरे संस्कृतशिक्षकाणां प्रशिक्षणाय शिक्षणशिविरसंचालनस्याऽनुमतिप्रदानार्थम् अध्यापकेभ्यो यात्राभोजनव्ययप्रदानार्थं च शिक्षामन्त्रिणं मुख्यमन्त्रिणं च धन्यवादैरभिनन्दति ।

११—माननीयेन श्रीकोटानरेशेन यः सार्धसहस्रपरिमितो महान् द्रव्यराशिः अन्यः सर्वविधः सहयोगश्च कोटासम्मेलनार्थं प्रत्तः तदर्थं सम्मेलनमिदं नैकशो धन्यवादैः श्रीकोटानरेशमभिनन्दति ।

१२—संस्कृतसाहित्यमाश्रित्य संस्कृतभाषायां भारतस्येतिहासं निर्मातुम् एकस्या इतिहाससमितेः स्थापनाय सम्मेलनमिदं विनिश्चिनोति ।

१३—सम्मेलनमिदं राजस्थानशासनमण्डलं विश्वविद्यालयाधिकारिणश्च प्रार्थयते यत् तैः संस्कृतपरीक्षास्वपि समुत्तीर्णेभ्यः सर्वोत्तमच्छात्रेभ्यः छात्रवृत्तयः प्रदातव्याः ।

१४—सम्मेलनमिदं विश्वविद्यालयाधिकारिणः प्रार्थयते यत् यथा हिन्दीसाहित्यसम्मेलनेन स्वीयोच्चपरीक्षासु संस्कृतस्यैकं पत्रम् अनिवार्यतया स्थापितं तथा विश्वविद्यालयस्य हिन्दीपरीक्षास्वपि संस्कृतस्यैकं पत्रमनिवार्यरूपेण स्थापनीयम्, येन हिन्दीभाषाज्ञाने साधीयसी वृद्धिः स्यात् ।

१५—कन्यानां कृते सर्वासु परीक्षासु संस्कृताध्ययनमनिवार्यं सम्पादनीयम्, इति सम्मेलनमिदं राजपूतानाविश्वविद्यालयाधिकारिणः राजस्थानशासनाधिकारिणश्च निवेदयते ।

महिलासम्मेलने सर्वेषु बालिकामहाविद्यालयेषु विद्यालयेषु च संस्कृतकक्षाणां स्थापनाविषयकः, अष्टमकक्षापर्यन्तं संस्कृते अनिवार्यतया समुत्तरणविषयकः नारीत्वस्य पूर्णविकासाय, भारतीयसंस्कृतेः पुनरुज्जीवनाय च बालिकानां कृते मैट्रिकपरीक्षायां संस्कृतस्यानिवार्यतास्थापनविषयकश्च प्रस्तावः स्वीकृतः। अन्येऽपि प्रस्तावाः स्वीकृताः, परं स्थानाभावात् नात्र प्रकाश्यन्ते ।

—

( शेष पृष्ठ ७० का)

राजस्य गुणावलिं प्रकटयता प्रोक्तम्—"२०० वर्षेभ्यः पूर्वम् अस्मिन्नेव दिने पूर्वोक्तमहाराजेन नगरस्याऽस्य शिलान्यासः कृतोऽभूत्, यद्धि नगरमस्मिन्नपि आज्वल्यमानविज्ञानयुगे आदर्शनगरं प्रख्यायते । प्रधानमन्त्रि श्रीनेहरूमहोदयेन 'हिन्दुस्थान की कहानी' नामके स्वीये पुस्तके लिखितम्—महाराजजयसिंहो महान् सेनानीः, तथा प्रसिद्धो ज्योतिषी, विद्वान् वैज्ञानिकः, गणितज्ञः, तथा सुप्रसिद्धो निर्माणमार्मिकः, शिल्पकारश्चासीत् ।" महाराजस्य सर्वतोऽधिकं स्मृतिचिह्नं जयपुरनगरमेवाऽस्ति यत् वर्तमानविज्ञानयुगेऽपि 'भारतस्य पाटलं (गुलाबी) नगरम्' नाम्ना वैदेशिकैरपि प्रशस्यते । एतन्नगरं राजस्थानस्य राजधानीति प्रख्यायते । एतस्य स्वच्छतास्थापनं तथा सौन्दर्यनिर्वाहः भवदधीनः, तथा भवत्स्थापित 'नगरपालिकाया' अधीनः ।"

महाराजाधिराजेन प्रतिवर्षं सार्द्ध लक्षमुद्राप्रदानमेतदर्थं सभायां घोषितं यत् अनेन द्रव्येण जयपुरराज्यस्य सुयोग्यसंस्थानाम्, एवमन्यान्यलोकहितकार्याणां च प्रचालनं सम्यग्रूपेण स्यादिति । आवश्यकतायां सत्यां प्रतिवर्षमन्यदपि द्रव्यराशौ संवर्द्धनं क्रियेत, इति महोदारेण महाराजेनाभाषितम् ।

—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

### भारतीयविश्वविद्यालयानां दीक्षान्तसमारोहाः—

आङ्ग्लानां शासनसमाप्तावपि आङ्ग्लभाषायाः साम्राज्यं भारतेऽधुनापि समाप्यते इति बहुषु कार्येषु प्रयासः। शासनादिविभागेषु आङ्ग्लभाषायाः प्रचुरः प्रचारः प्राचीनसंस्कृतिभक्तानां जनानां कदाचिदविदितोऽपि भवेत्। किन्तु शिक्षाविभागे भारतीयभाषां परिहृत्य, वैदेशिकभाषायाः संमानः सर्वस्याऽपि शिक्षितजनस्य सुस्पष्टं नवीन इव प्रतीयते। ये विश्वविद्यालया भारतीयाः प्रोच्यन्ते, भारतस्य हैन्दवप्रान्तेषु स्थिताः सन्ति, भारतीयाः शिक्षार्थिनश्च तेषु पठन्ति, तेष्वपि 'दीक्षान्तसमारोह' सदृशेषु उत्सवेषु, आमूलचूडं कार्यक्रमः आङ्ग्लभाषायां भवतीति विलोकयतां खिद्यते चेतः। राजस्थानविश्वविद्यालयस्य समाचारो गतसंचिकायां पठित एव भवेन्नूनम्।

संप्रति लखनऊनगरे, नागपुरे च जायमानौ विश्वविद्यालयीय-दीक्षान्तसमारोहौ विशेषतः समुल्लेखनीयौ। लखनऊविश्वविद्यालयस्योपाधिवितरणोत्सवे उत्तरप्रदेशस्य राज्यपालेन श्री० के० एम्० मुन्शीमहाभागेन कुलपतेरासनात् स्नातकेभ्यो या 'दीक्षान्तशिक्षा' दत्ता सा—'धर्मं चर, सत्यं वद' इत्यादिरूपा संस्कृतभाषयैव प्रदत्ताऽभूत्।

एवं नागपुरविश्वविद्यालयस्य दीक्षान्तोत्सवेऽपि कुलपतिना श्रीडाक्टरपट्टाभिसीतारामय्यामहाभागेन दीक्षान्तीयं भाषणं संस्कृतभाषयैव पठितम्। महाभागेनाऽनेन भाषणे सर्वेभ्योऽपि भारतीयविश्वविद्यालयेभ्यः साऽग्रहं प्रार्थना कृता "यत्सर्वैरेव विश्वविद्यालयैर्दीक्षान्तसमारोहस्य सर्वाण्यपि कार्याणि संस्कृतभाषयैव संपाद्यानि। यतः 'सेयं संस्कृतभाषा सर्वासामेव भारतीयभाषाणां जननी'। संस्कृतप्रेमिणः संवादेनाऽनेन सुभृशं प्रसीदेयुर्यत्—समारोहस्याऽस्य मुख्योऽतिथिरासीत् श्रीराजगोपालाचारी महाभागः। एतस्मै महोदयाय 'डाक्टर ऑफ् लॉज्' [ राजनियमाचार्यः ] इत्युपाधिः प्रादीयत तत्र। तदिदं पदकप्रदानपत्रं संस्कृतभाषयैव लिखितमासीत्।

### केन्द्रीयमन्त्रिमण्डलस्याऽधिकारपरिवृत्तिः—

भारतप्रधानमन्त्रिश्रीनेहरूमहोदयस्य महान्तं कार्यभारं किञ्चिल्लघूकर्तुं गतमासे भारतस्य केन्द्रीयमन्त्रिमण्डले महत्वपूर्णं परिवर्तनमभूत्। उत्तरप्रदेशस्य मुख्यमन्त्री श्रीगोविन्दवल्लभपन्तः संप्रति भारतसर्वकारस्य गृहमन्त्रिपदमारूढः। अद्यावधि गृहमन्त्रिपदारूढः श्रीकैलाशनाथकाटजूः साम्प्रतं रक्षाविभागाध्यक्षः। इतः पूर्वं सोयं रक्षाविभागः श्रीनेहरूमहोदयस्याधीनोऽभूत्। रफीअहमद किदवईमहोदयस्य स्वर्गवासात् रिक्तीभूते खाद्यमन्त्रिपदे भूतपूर्वः पुनर्वासमन्त्रिश्रीअजितप्रसाद जैनः संप्रति नियुक्तः। श्रीजैनमहोदयस्य स्थानं तु मन्त्रिमण्डले नवीननिर्वाचितः श्रीखन्नामहोदयोऽधितिष्ठति।

### राजस्थाने अखिलभारतीयं संमेलनत्रयम्—

गतदिसम्बरमासस्य अन्तिमसप्ताहे राजस्थानप्रान्तेऽस्मिन् राजधान्यां निखिलभारतीये द्वे संमेलने संवृत्ते। तयोः प्रथमा 'हिन्दीपरिषद्'। यस्या अखिलभारतीयं द्वादशं संमेलनमत्राऽऽसीद् यस्य उद्घाटनं राजस्थानस्य मुख्यमन्त्रिणा श्रीसुखाडियामहाभागेनाऽकारि। एतस्याऽध्यक्षोऽभद् डा० रामकुमारवर्मा। विशेषातिथिश्च भारतीयः सुप्रसिद्धः साहित्यसेवी श्रीहरिभाऊ



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



उपाध्यायमहाभागः। हिन्दीपरिषदोऽस्यास्तदिदमायोजनं 'राजस्थानसंस्कृतिपरिषद्' तत्वाऽवधाने संवृत्तम्। अत्र हि स्वागताऽध्यक्षपदमध्यतिष्ठत् श्रीनरोत्तमलाल-जोशीमहाभागः [राजस्थान-विधानसभायाः प्रधानोऽध्यक्षः]।

द्वितीयम् 'अखिलभारतीय वाणिज्यसंमेलनम्' (भारतीय कामर्स कान्फ्रेंस), यस्योद्घाटनं अनिल-चन्द्रगुहमहोदयः संपादयामास, यो हि केन्द्रीयं 'रेवेन्यू मिनिस्टर' पदमलंकरोति। संमेलनस्याऽस्याऽऽयोजनं राजपूतानाविश्वविद्यालयस्य तत्त्वाऽवधाने संवृत्तम्। सभापतिपदं च पटनाविश्वविद्यालये वाणिज्यविभाग-स्याऽध्यक्षः श्री० बी० आर० मिश्रामहाभागेऽध्यतिष्ठत्।

तृतीयं 'जनसंघस्य अखिलभारतीयं संमेलनम्'। एतद्धि जोधपुरनगरे संवृत्तम्, यस्याऽध्यक्षोऽभूत् काश्मीरप्रजापरिषदः प्रमुखः पं० प्रेमनाथडोंगरमहोदयः। संमेलनेऽस्मिन् देशमात्रे प्रसृताया: श्रीविकासशून्यताया: (बेकारी) कठिनसमस्यायाः भूयान् विचार-विमर्शोऽभूत्।

**सवाईजयसिंहमहाराजस्य स्मृतिदिवससमारोहः**

जयपुरनगरनिर्मापकः सवाईजयसिंहमहाराजो (द्वितीयः) महान् शासकः, वीरो योद्धा, प्रसिद्धः साहित्यकारः मार्मिको ज्योतिषवेदिता, अद्वितीयो निर्माणशिल्पज्ञः, तथा अन्योन्याविशिष्टगुणसंपन्न आसीत्। एवंविधो राजविभूतिर्महाराजः वर्षद्वयस्य पश्चाद् भारते नाऽऽविर्बभूवेति जयसिंहस्मृतिदिवस-समायोजनसमितेरुपाध्यक्षः डॉ० श्रीमथुरालालमहोदयः प्रकाश्यभाषणे समभाषत। एतत्समारोहस्याऽऽयोजनं जयपुरनगरस्थित 'जलेबचौक'समीपस्थे राजहर्म्ये समभवत्। एतत्संबन्धिवस्तूनां बृहत्प्रदर्शिनी राज-हर्म्यान्तर्गत 'मुबारिकमहल' मध्ये समायोजिता; याहि २० दिसम्बरपर्यन्तं सर्वसाधारणस्य दर्शनार्थमुद्घाटिताऽऽभवत्।

१७ दिसम्बरदिवसे पूर्वोक्तस्थाने सोयमुत्सवः प्रारभ्यत, यद्धि स्थानं ध्वज-पताकाभिरतितमां शोभित-मभूत्। समारोहेऽस्मिन् सुप्रसिद्धैतिहासिकेन डा० राधाकुमुदमुकर्जीमहोदयेन, तथा भारतस्य 'सूचना-प्रसारण'मन्त्रि-श्रीबालकृष्णकेसकरमहाभागेन च, जयसिंहमहाराजाय महता आदरेण श्रद्धाञ्जलिः समर्पितोऽभूत्। श्रद्धाञ्जलिसमर्पणसमये प्रोक्तं मुकर्जी-महोदयेन—"सवाई जयसिंहमहाराजः शत-प्रतिशतं मानव-व्यक्तित्वस्य प्रतिमूर्तिरासीत्। एष विलक्षणो विद्वानासीत्। एष हि भारतविराजमानानां निजनिर्मापित यन्त्रशालानां रूपे स्वीयमहत्त्वस्य महतीमेकां मुद्रामिङ्कयामास, या हि चिरकालार्थमिमं नरपालम-मरमकरोत्।" मुखर्जीमहोदयेन सुप्रसन्नेन भूत्वा प्रोक्तमासीद् यत् "महासिंहतो राष्ट्रनेतुरस्य स्मारकरूपे 'जयसिंहसंस्कृतसंस्था' तथा 'गवेषणासंस्था' अस्माभिः स्थापनीया। तथा एतस्य 'भाषणमालीया' अप्यायोजनं कर्तव्यम्।"

सभायामस्यां राजस्थानस्य मुख्यमन्त्रिश्रीमोहन-लालसुखाड़ियामहोदयस्यापि भाषणमभूत्। स्मृति-दिवससमितेरध्यक्षो भूतपूर्वमन्त्रिश्री जयनारायणव्यास-महोदयोऽपि सादरं श्रद्धांजलिसमर्पयामास। सभायामस्यां भारतप्रधानमन्त्रिश्रीजवाहरलालनेहरूमहोदयस्य तथा गृहनिर्माणमन्त्रि श्रीस्वर्णसिंहसरदारस्याऽपि शुभसंदेशाः समपठ्यत।

प्रदर्शिन्या उद्घाटनं कुर्वता राजस्थानराजप्रमुखेन जयपुरनरेन्द्रेण श्रीमानसिंहमहाराजेन जयसिंहमहा-

(शेष पृष्ठ ६८८ पर)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# ❀ शान्ति-दर्शनम् ❀

श्रीद्विजेन्द्रलालशर्मपुरकायस्थः एम. ए., काव्यतीर्थम् विद्यालंकारः
प्राध्यापकः दर्शनविभागे, महाराजकालेजस्य, जयपुरम्

पूर्वानुवृत्तम्

## सूत्रम् ॥ क्लिष्ट-संसार-रक्षिका ॥२॥

प्रेमभाष्यम् ।

युद्धस्य भीत्या महतः समन्ताद्
अन्योन्यमुत्पीडन - संकुलत्वात् ।
क्लिष्टस्तु संसार इतीह नित्यं
सर्वोप्यशान्तः स्वकृति-स्वभावैः ॥१५॥

क्लेशैरशेषैर्भय - संशयैश्चाऽ-
थाऽनिश्चयत्वेन तु जीवितस्य ।
संपीडितञ्चाद्य जगत् समस्तम्
एकैव शान्तिः परिरक्षयित्री ॥१६॥

शान्तिर्यथार्थं समुपास्यतां वै
मान्यैव लोके स्थितिमादधाना ।
धात्री पृथिव्याः प्रकृतिं बिभर्ति
योग्यां तथा सर्वत एव सम्यक् ॥१७॥

सेष्टा नराणां परमा शरण्या
लोकं तथा नॄन् समवेद् विनाशात् ।
ज्ञानैर्विचाराचरणैः प्रचारै-
रानीयमानेह भवेत् प्रतीता ॥१८॥

## सू० ॥ लोकस्थितेर्दृढाधारः ॥३॥

प्रेम ।

आत्म - प्रणाशं ह्युपयातमेव्य
लोकस्य सत्ता स्वविरोधभीता ।
आधारसारं त्विह शान्तिमात्रं
संप्रेक्षतेऽद्याऽनपराऽभितन्त्रम् ॥१९॥

सैषा धरित्र्याः स्थितिमाविधात्री
सामर्थ्यमस्या धरणे धरन्ती ।
स्थाय्याश्रयः साऽस्थिरसत्त्वकाया-
दीर्घस्थिरत्वं जनयेद् धरण्याः ॥२०॥

संसेव्यमानाऽपि परं समस्तैः
सम्यग्जनैश्चाद्य मनः—शरीरैः ।
जीवैः सजीवां तु धरेद् धरित्रीं
भावात्मिका शान्तिरिहेष्यमाना ॥२१॥

## सू० ॥ साऽशेषशुभहर्षिता ॥४॥

प्रेम ।

सैवात्र सत्यं भुवि धारयन्ती
कल्याणसौख्यादि-नृभोग्यपुञ्जम् ।
अच्छिन्नमव्याहतमात्मनिष्ठं
स्थलं तथाऽत्रान्तरमिष्टमेषाम् ॥२२॥

सर्वस्य विश्वे हितहर्षराशि-
श्चाशेष इत्येव तदाश्रितः सन् ।
शान्तेरधीनत्वत एव सम्यग्
राजिष्यते स्वाश्रितता-समृद्धः ॥२३॥

कुतः समुद्भवेच्छान्ति रधिष्ठानं तथैव किम् ।
को हेतुश्चाप्युपायाः के सूच्यन्तेऽतः सतां मुदे ॥

## सू० ॥ महत्ता भावनोद्भूता ॥ ५ ॥

प्रे० भा ॥ स्वार्थस्य पंके परिपीड्यमाने
सर्वस्य लोकस्य तथाऽर्थरूपः ।
जातो नवीनांकुर एकबोधः
क्षीणोऽप्यमन्याकर एव शान्तेः ॥२४॥

औदार्यपूर्णान्महतः प्रबोधात्
सद्भावनाऽऽधार-सरः सुसारात् ।
जायेत भूयो भुवि भीतिभिन्ने
शान्तिः सरोजं तदिवेष्ठमेव ॥२५॥

—क्रमशः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# सूक्ति-सुधा

विवादो धनसंबन्धो याचनं स्त्रीषु संगतिः ।
आदानमग्रतः स्थानं मैत्रीभङ्गस्य हेतवः ॥ १ ॥

दर्शितानि कलत्राणि गृहे भुक्तमशङ्कितम् ।
कथितानि रहस्यानि सौहृदं किमतः परम् ॥ २ ॥

बर्बरश्च तपस्वी स्याच्छूरश्चाऽव्यक्तव्रणः ।
मद्यपा स्त्री सती राजन्निति न श्रद्धामहे ॥ ३ ॥

सा भार्या या प्रियं ब्रूते स पुत्रो यत्र निर्वृतिः ।
तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते ॥४॥

व्रजत्यधः, प्रयात्युच्चैर्नरः स्वैरेव कर्मभिः ।
अधः कूपस्य खनक उच्चैः प्रासादकारकः ॥५॥

परेषां क्लेशदं कुर्यान्न पैशुन्यं प्रभुप्रियम् ।
पैशुन्येन गतौ राहोश्चन्द्रार्कौ भक्षणीयताम् ॥६॥

प्रभुप्रसादे विश्वासं न कुर्यात् स्वप्नसंनिभे ।
नन्देन मन्त्री निक्षिप्तः शकटारोपि बन्धने ॥७॥

न पुत्राऽऽयत्तमैश्वर्यं कुर्यादार्यः कथंचन ।
पुत्राऽर्पितप्रभुत्वोऽभूद्धृतराष्ट्र तृणोपमः ॥८॥

व्याकुलोपि विपत्पातैः स्मरेद्विष्णुं सदा हृदि ।
शरतल्पगतो भीष्मः सस्मार गरुडध्वजम् ॥९॥

वादविवाद करना, उधार लेना देना, कुछ चीज माँगना, स्त्रियों से ज्यादा संसर्ग, कुछ चीज ले लेना, तथा सभा में आगे बढ़कर बैठ जाना ये मित्रता टूटने के कारण हैं ॥१॥

अपनी पत्नी आदि को दिखाना, निःशङ्क होकर घर में भोजन, अपने छिपे रहस्यों को कहना इनसे बढ़कर और मित्रता क्या होगी ? अर्थात् यही मित्रता के चिन्ह हैं ॥२॥

उजड्ड आदमी तपस्वी हो, बहादुर हो और जिस को कभी घाव न लगा हो । मद्यपीने वाली स्त्री सती हो, हे राजन् इस बात पर भरोसा नहीं होता ॥३॥

सच्ची भार्या (स्त्री) वही है जो प्रिय बोले । पुत्र वही है जिससे चैन मिले । मित्र वही है जिस पर विश्वास किया जाय । अपना देश वही है जहाँ जीविका चलती हो ॥४॥

मनुष्य अपने ही कामों से नीचा और ऊँचा चढ़ता है । कूआ खोदने वाला नीचे और महल बनाने वाला ऊँचा चढ़ता है ॥५॥

मालिक को चाहे अच्छी लगती हो तो भी दूसरों को दुःख पहुँचाने वाली चुगली कभी न करे, चुगली के ही कारण सूर्य और चन्द्रमा राहु के द्वारा ग्रास किये जाते हैं ॥६॥

मालिकों का खुश होजाना स्वप्न के समान अस्थिर है, उस पर विश्वास नहीं करना चाहिये नन्दराजा ने अपने मन्त्री शकटार को भी कैद में डाल दिया था ॥७॥

श्रेष्ठ मनुष्य को चाहिये कि समर्थ दशा में अपनी संपत्ति को पुत्र के अधीन न करे । राजा धृतराष्ट्र पुत्र दुर्योधन को हुकूमत सौंप कर आप तृण के समान हो गया था ॥८॥

विपत्तियों के पड़ने पर भी हृदय में सदा ईश्वर का ध्यान रखे । शरशय्या पर पड़े रहने पर भीष्मपितामह ने भगवान् विष्णु का स्मरण किया ॥९॥

प्रकाशकः—जयबहादुरसिंह
पता—भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रक—राजस्थान प्रिंटिंग वर्क्स, हनुमान का रास्ता, जयपुर ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

राजकुमार

23-5-55

★

## अस्याङ्कस्य विशिष्टाः लेखाः


★ १. हृदय विवरणम्

ले० वैद्यचक्रपाणिशर्मा

★ २. कविकुलगुरुः कालिदासः

श्री वासुदेवशास्त्री वागेवाड़ीकरः

★ ३. संस्कृतभाषाविषये संस्कृतज्ञानां कर्तव्यम्

सम्पादकः

★ ४. पर्वतीया (कथा)

पं० मदनमोहन झा

★ ५. अर्वाचीनाः संस्कृतसाहित्यकाराः

अनु० श्रीकलानाथशास्त्री इत्यादि


★


चतुर्थोऽङ्कः

मूल्यम्
वार्षिकम् ३) रु०
एकस्याऽङ्कस्य ।=


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# विषय-सूची


| क्रमः | लेखाः | लेखकाः | पृष्ठसंख्या |
|---|---|---|---|
| १. | प्रवचनम् | श्रीशिवशरणझा झांसी | ७५ |
| २. | हृदय विवरणम् | श्रीवैद्यचक्रपाणिशर्मा आयुर्वेदाचार्यः | ७६ |
| ३. | ३० जनवरी-संदेशः | श्रीकेदारनाथमिश्रः लखनऊ | ७७ |
| ४ | वाक्यं रसात्मक काव्यम् | श्री प्रा० वि० भा० मुसलगांवकर एम० ए० गुना | ७८ |
| ५. | कविकुलगुरुः कालिदासः | श्रं वासुदेवशास्त्री वागेवाडीकर शोलापुर | ८२ |
| ६. | संस्कृतभाषाविषये संस्कृतज्ञानां कर्तव्यम् | सम्पादकः (पूज्य बाबा साहेब आप्टे महोदयानां लेखमाधारीकृत्य) | ८७ |
| ७. | पर्वतीया | पं० मदनमोहनझा व्या० न्या० सा० आचार्यः मुजफ्फरपुरम् | ९० |
| ८. | अर्वाचीनाः संस्कृतसाहित्यकाराः | अनु० देवर्षिकलानाथशास्त्री जयपुरम् | ९४ |
| ९. | सम्पादकीयम् | | ९५ |
| | भारते गणतन्त्रदिवसः | | |
| | उपाधिप्रदानम् | | |
| | रूसप्रदेशीयं प्रतिनिधिमण्डलम् | | |
| | संस्कृतविश्वविद्यालयः | | |
| १०. | सूक्ति-सुधा | | ९६ |


१—ये महाशयाः भारत्या आदर्श (नमूना) वाञ्छन्ति तैः आणकषट्कस्य शुल्कपत्राणि ।≤) टिकट), पत्रोत्तरं वाञ्छद्भिः सोत्तरपत्रं पत्रम (रिप्लाई) प्रेषणीयम् ।

२—ग्राहकाः पत्रव्यवहारे स्वीयो ग्राहकसंख्यामवश्यं लिखेयुः । अन्यथा उत्तरं न प्रतीक्षेरन् ।

३—भारतीकार्यालये प्राचीना अङ्काः, येषु अतिप्रशस्ता उपयोगिनो निबन्धाः सन्ति-उचितमूल्येन प्रदीयन्ते । ग्राहकैस्त्वरा कर्तव्या ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि-
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी।
भागीरथीव भावाढ्या भारते भातु भारती॥

वर्षम् ५ | माघपूर्णिमा, सं० २०११ | अङ्कः ४

## प्रवचनम्

[ श्रीशिवशरणझा, झाँसी ]

नोपविशत, न च तिष्ठत, किन्तु चलत, चिन्तयत निजकर्तव्यम्।

१—पथिक-जनो जनखेलमपश्यन् प्रचलन् गुरु-पन्थानं लघयति।
सिद्धिम्प्राप्य स्वकीयोद्देशे पुनर्विचिन्तः श्रान्तिं गमयति॥
मध्य-विरामः कथमिव तस्य लक्ष्य-सक्त-मनसः पुरुषस्य।
मानव-जीवनमये, सार्थकं खलु कर्तव्यं वा मर्तव्यम्॥

२—धावति रविरम्बरे चिरन्तन-समयान्नाद्यापि तु स श्रान्तः।
वायुर्वहति दिवा रात्रावपि दिशि दिशि, भवति न किञ्चित् क्लान्तः॥
लक्ष्य-भावना चेतसि येषां तेषां श्रान्तिरुपैति न पार्श्वम्।
शिष्ट-समाजे गौरवमाप्तुं श्रेयो वर्त्म न परिहर्तव्यम्॥

३—लक्ष्य-सिद्धिमप्राप्य न चित्ते काचिच्चिन्ताप्यानेतव्या।
मध्येमार्गमुपेता विघ्ना बुद्धिबलाभ्यां संजेतव्याः॥
अनलो नैव समुद्रो, नोच्चः पर्वतराजो, न वनमगम्यम्।
इत्यवधार्य च कृत्यनुरोधात् काठिन्येषु पदं धर्तव्यम्॥

४—कार्यं सम्पादयितुं स्वान्ते दृढः समेधनीयश्चोत्साहः।
भीरूणां जीवनमतिहीनं भवति, न भवति च भुवि निर्वाहः॥
गुण-गौरव-गर्विता निखर्वीकृत-रिपवो लोके जन-वन्द्याः।
साहसिकानामनुसन्धायाऽऽदर्शचरित्रमुदाहर्तव्यम्॥

५—ग्रन्थे, गुरु-सन्निधावधीतं यत्तत्कार्ये परिवर्तयत।
इतिहासे चामर-पुरुषाणां पंक्तौ निज-नामाऽऽलेखयत॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# हृदय विवरणम्

ले० वैद्यचक्रपाणिशर्मा आयुर्वेदाचार्यः

अहो समयपतनस्य परा काष्ठा यथा आबालवृद्धमामूर्खसहृदयञ्च प्रसिद्धान्यपिशारीरवस्तूनि शङ्कामुत्पादयन्ति । संस्कृतभाषायां हृदयवाचका अनेके शब्दा दृश्यन्ते, एतेषां स्थानमपि सर्वत्र निश्चितमेवास्ति । यथाः—शोणितकफप्रसादजं हृदयं यदाश्रयादिधमन्यः प्राणवहाः, तस्याधो वामतः प्लीहा फुफ्फुसश्च । दक्षिणतो यकृत् क्लोम च । तद् विशेषणचेतनास्थानमतस्तस्मिंस्तमसावृते सर्वप्राणिनः स्वपन्ति । अत्र स्पष्टतया फुफ्फुसादिमध्ये हृदयं वर्णितम् । तथापि पाश्चात्यविज्ञानदवाग्निदुर्विदग्धहृदया योग्यगुरुमुखादनधीतशास्त्ररहस्यतया मृगतृष्णाकार्णवे निमग्नमस्तिष्काश्च मस्तिष्कमेव हृदयं मन्वानाः स्वेतरानपि भ्रमगह्वरे निपातयितुं प्रयतमाना दृश्यन्ते । तानालोच्य विषीदति नितरां चेतः ।"अङ्गादङ्गात्संभवसि हृदयादधिजायसे । स त्वमङ्गकषायोऽसि दिग्धविद्धामिव मादये मामसूं मयीति" इत्यादिमन्त्रैः हृदये स्नेहाधिक्यमुक्तमत एव चिरोत्सृष्टमित्रपुत्रकलत्रादिकमालोच्य सहसा लोकप्रसिद्धहृदयेनाऽश्लेषयितुं प्रयतन्ते जनाः । सम्पन्ने चाश्लेषे कियत्क्षणमानन्दसमुद्रे निमग्नाः सन्तः स्वरूपमेव विस्मरन्ति । आनन्दानुभवानन्तरं लब्धसंज्ञा मूर्द्धादिसंयोगं विधाय चुम्बनादिक्रियासु प्रवर्तन्ते । इति सर्वत्र प्रवर्त्तमानाः दृश्यन्ते । न प्रथमतः प्रेमोत्कटतायां मूर्द्धाद्याश्लेषे प्रवर्त्तमानाः दृश्यन्ते । अतएव वेदे हृदयादधिजायसे, इत्यनेन प्रेम्णः स्थानं हृदयमधिकतया निर्धारितम् । ईदृशि स्पष्टतया प्रतिपादितेऽपि को मूर्खः मस्तिष्कस्य हृदयत्वं साधयितुं प्रयतेत। "शृङ्गाटकान्याधिपतिः शङ्खौ कण्ठशिरोगुदम् । हृदयं वस्तिनाभी च घ्नन्ति सद्योहतानि तु" । अत्र मनस शृङ्गाटकाधिपतिः शिरोभ्यः पृथग् हृदयपरिगणितेन मस्तिष्कात् हृदयपृथग्भाव व्याहन्तुं किं नाम मूर्खोऽपि मनसा प्रयतेत । प्रसन्नाभ्यां कफासृग्भ्यां हृदयं पङ्कजाकृति । सुषिरं स्यादधो वक्त्र यकृत् क्रोडान्तरस्थितम् । स्थान्याग्निपक्वानां मूत्रस्य रुधिरस्य च । हृदुराडुकः फुफ्फुसश्च कोष्ठ इत्यभिधीयते । सू०त्रि० । पञ्चदश कोष्ठानि तद्यथा-नाभिश्च, हृदयञ्च क्लोम च, यकृच्च, प्लीहा च, वृक्कौ च बस्तिश्च, पुरीषाधारश्च, आमाशयश्च, पक्वाशयश्च उत्तरगुदञ्च, अधरगुदञ्च, क्षुद्रान्तरञ्च, स्थूलान्त्रञ्च, वपावहनञ्चेति । इत्यत्र कोष्ठाङ्गत्वेन वर्णनात्मको

---

क्षणभंगुरं शरीरं किन्तु कीर्तिः स्थिरेति संसाधयितुम् ।
अचल-निश्चयेनाभय-मनसा पथि वीराणामुपसर्तव्यम् ॥ — ४

६— संप्राप्तोऽयं पुण्य-प्रतापात् सुलभ-साधनो मानव-देहः ।
उत्थानावसरेऽस्मिन् सर्वं त्यक्त्वा लक्ष्ये कार्यः स्नेहः ॥
ज्ञात्वापि क्षण-मूल्यममूल्यं कालं गमयथ मिथ्यालापैः ।
"चरैवेति"-श्रुति-भाषितं वचनं नैव कदाचिद् विस्मर्तव्यम् ॥ ५



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ३० जनवरी-सन्देशः

ले० केदारनाथमिश्रः लखनऊ

उपस्थिताद्य सैव ३० जनवरी यस्याम्—
महसा तिमिरं निरस्यता मह-सान्द्रं गमिताः प्रजाः सुखम्।
ससा जननी च येन सा सहसा हन्त ! गतः स मोहनः ॥

धर्मराजवत् सत्योपासकस्य तस्य महतः राष्ट्रपितुः अमर आत्मा, अद्य कोटिकोटिहृदयेषु राष्ट्रभक्त्यै, सत्यपालनाय च नव-चैतन्यं सञ्चारयति । यमुना-तटे ज्वलन्त्याः तस्य चितायाः ज्वालाभ्यः प्रकटीभूतः प्रखरः प्रकाशः सदैव सत्यसाधनायाः कठिने मार्गे, अस्माकं सम्बलो भविष्यति । संसार नश्वरतायाः उपहासकर्ता, तस्य अन्तिम-शब्द-रूपेण निस्सृतं रामस्य अमरं नाम अस्मान् भारतीयत्वस्य सर्वोच्चादर्शस्यानुकरणाय आदेशं स्फूर्तिं च दास्यति, इति न केवलमाशासे एव, अपि तु विश्वसिमि अपि ।

---

नाम साहसिको हृदयस्य मस्तिष्के स्थानं प्रकल्पयितु समवेत्। हृदयं चेतनास्थानमुक्तं सुश्रुत देहिनाम्। तमोभिभूतेस्तस्मिंस्तु निद्रा विशति देहिनाम् । अनेन सुत्रेण हृदयस्य स्तनयोर्मध्येऽधिष्ठानं चेतनास्थानमुक्तम् । एतेन हृदयस्य कस्मिन् स्थाने स्थितिः परच्च तद् वरित्वेति सन्देहस्यावसरोऽस्ति । परन्तु शरीरे कस्मिन् स्थाने चेतनाऽस्ति केन चेति सन्देहो-ऽवशिष्ट एव। तत्र जीवितः शरीरिणो न दतङ्गव्याधि-करोते; परन्तु यद् चेतनारहितं स्यादतश्चेतनायाः सर्वत्र विद्यमानतयाऽस्मिन् स्थाने चेतनास्त्यत्र च चेतना नास्ति । इति केनापि वक्तुं न पार्यते, परन्तु चेतनाऽस्तीति विचारे औपनिषदि अधिकरणमेवाऽ-विरामः ।

राजनीत्याः कपट-जालेभ्यः लोभमोहाभ्यामलिप्तेन तेन महात्मना निष्कामभावेन कठिनम् जीवनमङ्गीकृत्य देशभक्तानां राजनीतिः सञ्चालिता, सिद्धीकृतञ्च पुनरेकवारम् यद्भारते भारतेऽस्मिन् राजसूत्रसञ्चालकानाम् वशिष्ठचाणक्यरामदासादीनां परम्पराद्यापि जीवितास्ति इति ।

अयं तस्यैव तपसः तेजसश्च प्रभाव आसीद्यद्युरोपस्य विभिन्नराजनीतिकमतानामनुसरणेन, भारतीयत्वं विनाश्य, भारतीयजनसाधारणं भोगवादग्रस्तं विधातुमुद्यताः अपि, नैके नेतारः तस्यानुगामिनोऽभवन् यद्यपि, तेषां येन मतभेदो विरोधोऽपि चासीत् ।

महात्मा गान्धी एकं विशेषं सन्देशं गृहीत्वा भारतभूमावागत आसीत् । तस्य सिद्धान्ताः भारतीयेभ्यः विदेशीयेभ्यश्च कोटि-कोटिमनुष्येभ्यः मार्गदर्शका आसन्, सन्ति, भविष्यन्ति च भविष्यति । तैरस्मभ्यं स्फूर्तिरदायि, दीयते, दास्यते च भविष्यत्स्वपि कालेष्विति बलीयान्मे विश्वासः ।

गान्धिनः मुखान्निस्सृता या कल्याणमयी वागद्यापि भारतीयजीवनं परिप्लावयति, सा सर्वेभ्यो लोकेभ्यो स्फूर्तिं दास्यति, सर्वांश्च लोकान् कल्याणपथं नेष्यति, लोके धर्मभावं विस्तार्य सर्वेषामभ्युदयनिःश्रेयसी सधयिष्यतीत्यत्र नास्ति स्तोकोऽपि सन्देहस्यावसरः । तस्य वाणी विश्रान्तिः संसारसागरे प्रक्षिप्तस्य प्रपीडितस्य मानवलोकस्य, विधानञ्च शान्तेः । सा धर्मस्य धरणिः, सुखस्य सरणिः, तरणिः च भवसागरस्य इति न तिरोहितं कस्यापि । तस्य सिद्धान्ताः शोकं शोषयित्वा,



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



दुःखं दूरीकृत्य, चिन्तां चूर्णीकृत्य, अज्ञानान्धतमः विदारयन्तः, ज्ञानामृतमर्पयन्तः, सौजन्यं वितरन्तः, शान्तेः प्रचारं, सुखस्य सञ्चारञ्च कुर्वन्ति । कामक्रोधमोहलोभेभ्यस्समुद्धृत्यास्मान् सत्वरं, सरलं, सनातनं सन्मार्गं प्रदर्शयन्ति । अस्माकं जीवनं सफलं, सुन्दरं, सुखसंयुतं च विदधति । अस्मभ्यं परां शान्तिं परमानन्दञ्च प्रददति ।

साम्प्रतं, यदा संसारेऽस्मिन् कुचक्रं षड्यन्त्रमेव च सर्वं मत्वा, इयमेव प्रतियोगिता प्रचलति यत् 'केन राष्ट्रेण अन्यराष्ट्र-नागरिक-विनाशाय अधिका शक्तिः सञ्चिता',(तदा) भारतवर्षोऽयं गान्धिनः शान्ति-अहिंसा-क्षमा-सत्यादिभिः सिद्धान्तैरेव शान्ति-सुरक्षार्थं विश्वनेतृत्वं कर्तुं शक्ष्यतीति बलीयान्मे विश्वासः ।

महात्मना गान्धिना एषां सिद्धान्तानाम् केवलमुपदेशमेव न दत्तमपि तु स्वजीवने एतान् व्यावहारिकरूपमप्यदायि । उज्ज्वल-चरित्रनिर्मातारौ अहिंसा-सत्ययोः सिद्धान्तौ तं देशतोऽप्यधिकौ प्रियावास्ताम्, तेन राजनीत्यामपि कृतोऽनयोः प्रयोगः । चेखिद्यते स्म चेतः तस्य चिन्तयानया यद्यपि धर्मराजस्य भरतखण्डे एव सत्य-पालनं न भविष्यति, तर्हि कुत्र भविष्यत्यस्मिन् संसारे ।

गान्धिमहोदयः कृशतनुः अपि अकृशहृदयः, कौपीनावशेषः अपि अशेषगुणानां रत्नाकरः, विरक्तोऽपि भारतभूरक्तः "न्यायसत्याभ्याम् सर्वमपि वारयितव्यम्" इत्यस्याः भारतीय-परम्परायाः प्रतीकःच आसीत्, अस्मादेव कारणात् सः भारतीयायाः जनतायाः श्रद्धाभाजनम् अभूत, अभूच्च स्वतन्त्रभारतस्य राष्ट्रपिता, अस्ति च त्यक्तदेहोऽपि सर्वजनहृदयमन्दिरशायी ।

हन्त ! सन्ततमपि नितान्तमेवाखिद्यतेऽशान्तं भूत्वा मामकीनं स्वान्तम् तस्याभावादद्य । तस्य हत्यानन्तरमपि यदि तस्य सिद्धान्तैः जन-जन-हृदयानि व्याप्तानि भवेयुस्तर्हि सन्तुष्टाः भवेम, यत "स महात्मा अमरोऽभूत्, तस्य जीवनकालेऽस्माभिस्तस्यादर्शाः न पालितास्तदा तस्मिन् दिवं याते तु पालिताः", किन्तु नेदमप्यभूत् । गान्धिन एव हत्या न कृता, अपि तु तस्य हत्यानन्तरमेव तस्य सिद्धान्तानाम् सत्याहिंसादीनाम् अपि हत्या कृता । तस्य हन्ता तु दण्डितः, किन्तु तस्य सिद्धान्तानाम् हन्तारः अद्यापि भारतीय-जनतायाः पथप्रदर्शकरूपेण, तस्यानुयायिस्वरूपेण, दृष्टिपथमायान्ति । लोभमहाव्यालदष्टाः त्यागमहामन्त्रमाहात्म्यज्ञानानभिज्ञाः न जानन्ति ते, यत् 'महात्मनः' अनुयायीभवितुमेतदावश्यकमस्ति यत् भारतीयतायै सर्वश्रेष्ठता दत्त्वा, राष्ट्रहितचिन्तकं प्रत्येकं वर्गं व्यक्तिं च सहानुयायीकृत्य चलामः, तस्यादरञ्च कुर्याम, भवेद्यं मतेनानुकूलोऽननुकूलो वा, विनानेन 'महात्मा गान्धिन जयः' इत्यादयो निर्घोषाः व्यर्थमेव भविष्यन्तीति ।

इयं ३० जनवरी अस्मान् गान्धिनः सन्देशं ददाति, यत् "अयि भारतीयाः ! अद्यापि समयोऽवशिष्यते युष्मत्कृते, अतएव—"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः" इति मनोराज्ञां निखिलेऽपि भूमण्डले प्रचारयन्तो, भारतीयसंस्कृतेः, हिन्दूजातेः, आर्यधर्मस्य च, न केवलं संरक्षणाय प्रत्युत निखिलेऽपि भूमण्डले पुनः प्रचाराय प्रयताः भवत, सन्नह्यत, उत्तिष्ठत, जाग्रत, आन्दोलयत च यशोधवलीकृताशां भारतीयां विजयवैजयन्तीं पुनरेकदा विश्वस्मिन् समग्रेऽपि, लभध्वं च पुनरेकदा जगद्गुरुतामिति' ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# वाक्यं रसात्मकं काव्यम्

ले० प्रा० वि० भा० मुसलगांवकर एम.ए. अन्तर्महाविद्यालय गुना (म० भा०)

जनानुरंजनमेव काव्यस्य प्रयोजनम् । "सद्यः परनिर्वृतये" काव्यमिति मम्मटेनापि कथितम् । अस्मिन् खलु संसारे सुखात दुःखमधिकतरम् । दुःखावेगेन मनुष्याः अतीव विरक्ताः भवन्ति । एषां दुःखनिवारणार्थं अनेके उपायाः परमेश्वरेण निर्मिताः खलु । तेषां मध्ये जनानां बुद्ध्याः अनुरंजनार्थं काव्यमेव प्रमुखं साधनमस्ति ।

सामाजिकाय काव्यं अनुरंजनं ददाति न तु शाब्दिककथा केवलम् । रूक्षशब्दकथाः नीतिकथाः अथवा केवलाः पौराणिकाः कथाः जनानां अनुरंजनार्थं असमर्थाः । वैचित्र्ययुक्ताः कथाः आनंदं ददति । रमणीयार्थप्रतिपादकः शब्दसमूहः पाठकाय आह्लादं ददाति । अतः "रमणीयार्थप्रतिपादकः शब्दः काव्यम्" इति बुधैः वर्णितम् । "वैचित्र्यं काव्यम्" इयमपि प्रसिद्धोक्तिः । महाभारते शकुन्तलायाः कथा सुप्रसिद्धा एव । किन्तु सा कथा काव्यं न भवति । महाभारतस्य शकुन्तलाख्यानपाठः पाठकाय आह्लाद दातुं न शक्नोति । किन्तु महाकवेः कालिदासस्य शकुन्तला विश्वाय रोचते । कालिदासस्य "अभिज्ञानशाकुन्तलं" नाटके काव्यमस्ति, वैचित्र्यमस्ति, रमणीयार्थः, रसाविष्कारः च दृश्यते । अतः कालिदासस्य अभिज्ञानशाकुन्तलम् काव्यम् न तु महाभारतकथा ।

काव्यनिर्माणसमये कविः अनिर्वचनीयं आनंदं अनुभवति । तुलसीदासः स्वान्तःसुखाय रामचरितं वर्णयति । सामाजिकः अपि तत्काव्यपठनात्—अनिर्वचनीयं आनंदं प्राप्नोति । अयमानन्दः कस्मात् प्रादुर्भवति ? कवेः शब्दरचनाकौशल्यात् अथवा अलङ्कारवैचित्र्यात् वा भावाविष्कारकौशल्यात् । अयमानंदः कवेः शब्दरचनाकौशल्यात् प्रादुर्भवति इति केचित् कवयः वदन्ति । केचित् 'अलङ्कारवैचित्र्यात्' इति घोषयन्ति । केचित् कवयः शब्दध्वनिः आनन्दं जनयति इति सिद्धान्तं कुर्वन्ति । किमपि वचनं सत्य भवेत्, किन्तु काव्येन आनन्दो जायते इति महासत्यम् । काव्यपठने पाठकः संसारस्य सर्वं दुखं विस्मरति उच्चानन्दं अनुभवति च । एतद् महत् सत्यमस्ति ।

अयम् आनन्द एव काव्यस्य आत्मा । केचित् कवयः अलङ्कारवैचित्र्येण काव्येषु आह्लादं साधयन्ति । "आनंदनिस्यन्दीनि रूपकाणि ।" किन्तु अलङ्कार-

---

"त्रायस्व ह्रासमुपयान्तमिमं स्वधर्मं;
मातुर्निजस्य मुखमुज्ज्वलयाशु भूयः ।
विद्वन् ! यशांसि समुदञ्चय चार्यजातेः;
देशस्य चास्य गतगौरवमानयस्य ॥"

अन्ते च, स्वन्त्रतायाः पुनःप्रतिष्ठापकाय, भारतीयसंस्कृतेः समुद्धारकाय, सत्याहिंसयोः अवताराय, विश्वजनीनप्रेम्णः प्रतिमूर्तये, विश्ववन्द्याय, युगमहापुरुषाय, महात्मने गान्धिने श्रद्धाञ्जलीन् समर्पयन्तो, विरमामि विस्तारात् वदन्—गान्धिन् !

भारतावनि-नीति-नौरियं भवता मार्गविदा विना कृता ।
महति प्रबले भवद्गुणैर्निधृता शान्तिपथेन यास्यति ॥
अयि भारतभूमि-नन्दन ! स्व-पदन्यासपवित्र-नन्दन !!
जगदद्भुत सत्यविक्रम !!! प्रणतान् रक्ष निजैर्निरीक्षणैः ॥

—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वैचित्र्यं किंचित कालपर्यन्तं आनन्दं ददाति, न तु सर्वकाले। भाववैचित्र्यं सर्वकाले आनन्दं ददाति। अस्य आनन्दस्य 'रस' इति पारिभाषिकसंज्ञा वर्तते। रसो नाम आस्वादनम्। सुखानुकूल भावना। अनुकूलसंवेदनां निर्मात्रीं भावनां रस इति कथयन्ति। रसेषु सुखानुकूलभावना अन्तर्भवति। यत् वस्तु, यः पदार्थः अनुकूलां संवेदनां ददाति तद्वस्तु स पदार्थः वा रसयुक्तं फलं भवति। तथैव सुखानुकूलभावना यया भावनया जायते सा भावना 'रस' इति अभिधानेन प्रख्यायते। "रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनंदी भवति।" इति ऋग्वेदे अपि कथितम्। अतः यत् वाक्यं आनन्दं ददाति तत् रसात्मकं वाक्यम्। तत् रसात्मकं वाक्यमेव काव्यम्।

रसस्य मानसिकावस्था एव आधारः अस्ति। मानसिकावस्थाः अष्टविधाः सन्ति।

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः॥

एते अष्टविधा स्थायिभावाः सन्ति। मनुष्यस्य अन्तःकरणे एते अष्टविधाः सर्वकाले वसन्ति। सर्वे इतरे असंख्याः भावाः एतेभ्यः अष्टविधभावेभ्यः प्रादुर्भवन्ति। एतान् स्थायिभावान् अनुसृत्य अष्टविधाः रसाः प्रादुर्भवन्ति।

शृंगारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥
निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः

(मम्मटः)

ये भावाः स्थायिभावान् उद्दीपयन्ति ते विभावाः ज्ञायन्ते। विभावो नाम विशेषः भावः। ये भावाः स्थायिभावान् प्रकटयन्ति ते विभावाः। द्विविधः प्रकारः अस्य भावस्य। १-आलंबनविभावः। २-उद्दीपनविभावः। "नायकादिः आलंबनविभावः"। नाटकेषु काव्येषु वा कविः रसं व्यञ्जयितुं नायकादि पात्रं प्रकटी करोति। यथा रामायणे रामचन्द्रः, शकुन्तलानाटके दुष्यन्तः। नायकादीनां पात्राणां साहाय्येन कविः भावं आविष्करोति। २-उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये। आलंबनस्य चेष्टाद्या देशकालादयस्तथा॥' ये भावाः समये समये परवर्तन्ते ते संचारिभावाः इति कथ्यन्ते। ये भावाः संचरन्ति, भ्रमणं कुर्वन्ति ते संचारिभावाः अथवा व्यभिचारिभावाः सन्ति। विभावानुभाव व्यभिचारिसंयोगात् रसनिष्पत्तिः। कवयः काव्येषु रसं निर्मातुं प्रथमं आलंबनविभावान् उद्दीपनविभावान् प्रदर्शयन्ति। तदनन्तरं अनुभावान् प्रकटयन्ति ततः व्यभिचारिभावाः प्रवर्तन्ते। एषां भावानां युक्तपोषणात् रसः आविर्भवति। एतद् स्पष्टीकर्तुम् अहं भवभूतेः 'उत्तररामचरितं' उदाहरामि। उत्तररामचरिते नाटके भवभूतिः शोकरसं निर्मातुं इच्छति। सः रामभद्रस्य सीतापरित्यागात् उत्पन्नं शोकावेगं प्रदर्शयित्वा सामाजिकेषु शोकभावं निर्मातुं इच्छति। सः केन प्रकारेण इमं रसं उत्पन्नं करोति? कविः प्रथमं रामचन्द्रः सीतादेवी आदि पात्राणि निर्माति। एतेषां पात्राणां द्वारा कविः रसभावं आविष्करोति। ततः कविः भावोद्दीपनाय भावानुकूलं वातावरणं भौतिकाधिभौतिकाः घटनाः विरचयति। उत्तररामचरिते शोकभाव दृढीकर्तुं कविः कृष्णमेघाः, अगाधजलवर्षाः, वृक्षस्य पवनः इत्यादिबाह्यवस्तूनां योजनां करोति। अतः एते उद्दीपनविभावाः। ततः सामाजिकः एतान् भावान् दृष्ट्वा शोकभावं हृदये स्मरति कल्पते च। अयम् अनुभावः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



उत्तररामचरिते रामभद्रः दण्डकारण्ये यदा गच्छति तदा तत्र स्थल, वृक्ष पदार्थान् दृष्टवा सः सीतां स्मरति विलपति च। सीता आलम्बनविभावः, दण्डकारण्यस्थलवृक्षादि उद्दीपनविभावाः, तथा एतान् दृष्ट्वा रामचन्द्रः सीतां स्मरति विलपति च इति अनुभावः। एतं शोकभावं पोषितुं कविः तदनन्तरं विविधान् संचारिभावान् प्रकटयति। यदा नायकः शोकावेगं अनुभवति तदा स जीवने नैराश्यभावमपि अनुभवति। नैराश्यभावे तस्मै प्रियवस्तु अपि अप्रियं भवति। सः मधुरफलमपि कटु स्वदते। सर्वे एते व्यभिचारिभावाः। एते भावाः केवलं मूलरस पुष्यन्ति। एते भावाः सर्वकाले स्थायिनः न भवन्ति। "विभावानुभावव्यभिचारिभावसंयोगात् रसनिष्पत्तिः" भवति। उत्तररामचरितेऽपि रामः रोदनं करोति, जीवितुं त्यक्तुं इच्छति, तदा शोकभावः स्थायी भवति। करुणरसश्च तस्मात् प्रादुर्भवति।

काव्येषु एकः रसः प्रधानम् अस्ति। प्रधानरसपोषणार्थं कविः नानारसान् योजयति। एतेषु अष्टविधाः रसाः प्रमुखाः। किञ्चित् काव्यं शृंगाररसप्रधानं, किंचित् करुणरसप्रधानमस्ति। रत्नावली नाटिका शृंगाररसप्रधाना, वेणीसंहारं नाटकं वीररसप्रधानं तथा भवभूतेः उत्तररामचरितं करुणरसप्रधानमस्ति। केचित् पंडिताः "शृंगारः रसानां राजा" इत्युक्त्वा सर्वत्र शृंगार एव रसः, इति सिद्धान्तं कुर्वन्ति। शृंगार एव एको रसः, सर्वे रसाः तस्य पोषणार्थमेव प्रादुर्भवन्ति इति तेषां मतम्। अनुरंजनमेव काव्यस्य प्रयोजनमिति सिद्धान्तं कृत्वा करुणभयानकादिरसाः जनान् आनन्दयितुं न शक्नुवन्ति अतः एते न रसाः इति ते कथयन्ति। केचित् पण्डिताः चत्वारः रसाः इति मन्यन्ते। एते पंडिताः 'रति, शोक, क्रोध विस्मय' इति चत्वारः स्थायिभावाः इति मन्यन्ते। अतः तेभ्यः शृंगार, करुण, वीर, अद्भुत एते चत्वारः रसाः मन्यन्ते। हास्यरसं शृंगारे, रौद्रभयानकादिरसाः वीररसे, तथा उत्साहादयः अद्भुतरसे अन्तर्भवन्ति इति स्पष्टीकरणं कुर्वन्ति।

केचित् पण्डिताः रसानां संख्यां वर्धयन्ति। तेष्वपि केचित् नवविधा रसाः, केचित् दशविधाः रसाः, केचित् द्वादशविधाः रसाः, मन्यन्ते। निर्वेदं स्थायिभावं अंगीकृत्य शान्तरसं स्थापयन्ति। यथा प्रबोधचंद्रोदयं नाटकं शान्तरसप्रधानम्। केचित् भक्तिरसः वात्सल्यरसः इति कल्पयन्ति। महामुनि भरतः रसाः अष्टविधाः इति मन्यते। किन्तु अभिनवगुप्तः शान्तरसं अंगीकृत्य रसाः नवविधाः इति मन्यते। एतत् खलु भरतसिद्धान्तस्य विकासो न तु खण्डनम्।

काव्येषु रसाविष्कारो द्विप्रकारेण भवति। काव्येषु कविः रसास्वादं करोति तदेकप्रकारकम् (Subjective) पाठकोऽपि पाठसमये रसास्वादं करोति एषः द्वितीयः प्रकारः। नाटकेष्वपि नायकः अभिनयं कृत्वा रसास्वादनं अनुभवति। सामाजिकोऽपि तद्दृष्टवा रसास्वादनं अनुभवति। अतः उभयप्रकारेण रसाविर्भावो भवति। उदाहरणार्थं उत्तररामचरिते नाटके रामभद्रः शोकभावं अनुभवति, प्रेक्षकोऽपि शोकभावं अनुभवति। रामभद्रः सीतां स्मृत्वा रोदनं करोति। सामाजिकोऽपि तद्दृष्टवा अश्रुपातं करोति। एतदेव रसास्वादनम्। एष एवरसाविर्भावः।

एतेन प्रकारेण काव्येषु रसाविर्भावो भवति च सहृदयाः आल्हादं अनुभवन्ति। अतः यत् काव्यं रसाविष्कारं करोति, यस्मिन् काव्ये जनाः आत्मनः दुःखं विस्मृत्य परमं आल्हादं अनुभवन्ति तदेव काव्यम्। रसात्मकं वाक्यमेव काव्यम्। रमणीयार्थप्रतिपादकः शब्दः एव काव्यम् न तु निरर्थकशब्दाडंबरः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★ कविकुलगुरुः कालिदासः ★

ले० म० पं० वासुदेवशास्त्री बागेवाड़ीकरः साहित्याचार्यः काव्य-वेद-तर्क-तीर्थम् शोलापुरम्

स्वकृतिभिः सर्वस्मिञ्जगति प्रसिद्धिं गतानां निखिलानां प्राचां संस्कृतकवीनां मध्ये बाणभट्टं वर्जयित्वा नैकस्यापि चरितं सहजतया समुपलभ्यते। प्रायेण सर्वैरपि तैरात्मनिवेदने तूष्णींभावः स्वीकृतः। तेन हि लोके तानुद्दिश्य नैकविधाः विसंवादिन्यो जटिला रम्याः कथाः प्रचलिताः। तस्मात् तेषां केवलं चरित्रलेखनमपि कष्टप्रायं सञ्जातं कालनिर्णयस्तु सुतराम्। तथापि बहोः कालाद् विदुषामविरतप्रयत्नैः सम्प्रति कतिपयकवीनां प्राचीनतमानां बाह्याभ्यन्तरप्रमाणैः कालं निर्णेतुं शक्यते। जनश्रुतिमनुलक्ष्य लिखितैः कविचरितैरयं व्यामोहः समुत्पादितः। कालिदासभवभूतिदण्डिप्रभृतीनां प्रथितयशसां महाकवीनां चरितानि विपर्यस्तान्यतीव समुपलभ्यन्ते। तथा हि—

एकदा साक्षाद् विद्यादेवी सरस्वती कमनीयं कामिनीरूपमास्थाय कन्दुकेन क्रीडतिस्म। तां तथाविधां वीक्ष्य दण्डी प्राह—

"एकोऽपि त्रय इव भाति कन्दुकोऽयं
कान्तायाः करतलरक्तरक्तः।
भूमौ तच्चरणनखांशुगौरगौरः
स्वस्थः सन् नयनमरीचिनीलनीलः॥"

भवभूतिरवदत—

"विदितं ननु कन्दुक ते हृदयं
प्रमदाधरसङ्गमलुब्ध इव।
वनिताकरतामरसाभिहतः
पतितः पतितः पुनरुत्पतति॥"

कालिदासोऽब्रवीत्—

"पयोधराकारधरो हि कन्दुकः
करेण रोषादभिहन्यते मुहुः।
इतीव नेत्राकृतिभीतमुत्पलं
स्त्रियः प्रसादाय पपात पादयोः॥" इति

अन्यच्च—भवभूतिना प्रथितस्योत्तररामचरितनाटकस्यावलोकनप्रसङ्गवशात्

"किमपि किमपि मन्दं मन्दमासत्तियोगात्,
अविरलितकपोलं जल्पतोरक्रमेण।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णोः,
अविदितगतयामा रात्रिरेवं व्यरंसीत्॥"

इमं पद्यं पठित्वा "अविदितगतयामा रात्रिरेवं व्यरंसीत्" इत्यत्र "रात्रिरेव व्यरंसीत्" इति परिवर्तनं कालिदासप्रेरितो भवभूतिः कृतवान्"। इत्यपि किंवदन्ती श्रूयते। अनेन कालिदासस्य भवभूतेः समानकालीनत्वं संसूच्यते। परं न च तत्तथा।

अपि च कालिदासाय दण्डः स्पर्द्धते स्म। कालिदासोऽपि दण्डिनो को वा एकदा कविरिति स्पर्धयं परां काष्ठां गता। तदा स. ज्ञात सरस्वती देवी प्रादुर्भूय वादीत्।

"कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः।" इति

तदा प्रभूतकोपाविष्टः कालिदासस्तामप्राक्षीत्—

"अहं × अहं ×"

सरस्वती देवी - "त्वमेवाहं न संशयः।"

एवमादिभिर्जनश्रुतिभिर्बहुभिरेते त्रयः कवयः समानकालावस्थितिभाजः इति महान् वितर्कः समुत्पन्नः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



एवं नायमंशतोऽपि प्रामाणिकतां भजते। भवभूति-वृत्तिनौ कालिदासादर्वाचीनौ। न तौ कालिदाससमान-कालीनौ एतत्तु कालिदासकालनिर्णयात्सुस्पष्टं भवति। अत एव तावत्कालिदासमेव पर्यालोचयामः। संस्कृत-कवीनामेक एव कविर्वर्तते यस्य कालनिर्णये न महानायासः। स च बाणभट्टो हर्षस्य सभापण्डितः। अयं क्रिस्ताब्दस्य सप्तमे शतके संबभूव। तेन बाणेन निर्दिष्टानां स्वग्रन्थे कवीनामेकतमः कालिदासः। तस्मात् कालिदासो बाणात्पूर्वं समभवदिति सुनिश्चितम्।

एवं स्थितेऽपि ततोऽपि पूर्वं कस्मिन् काले स जात इति न स्फुटीभवति। कालिदास उज्जयिन्यां विक्रमादित्यस्य भूपतेः सभायामासीदिति यथाऽवबुध्यते तथा भोजस्यापीति श्रूयते। तथापि शाकुन्तलादिनाटकादीनां कर्ता कविकुलगुरुः कालिदासो विक्रमादित्य सभायां राजकविर्विलसति स्मेति निश्चयेन निश्चेतुं शक्यते। स च विक्रमादित्यो विक्रमसंवत्सरस्य प्रवर्तकः क्रिस्ताब्दात् पूर्वं सप्तपञ्चाशत्तमे वर्षे समजनि। इत्येतत् बहुभिः प्रमाणैः संप्रति सुनिश्चितम्। नायं विक्रमादित्योपाधिं बिभ्रतश्चन्द्रगुप्तस्य समये समभूत्। न वाऽन्यस्य कस्यचित् क्रिस्तोत्तरकाले सञ्जातस्य भूपस्य। यद्यपि कविवरेण्यस्यास्य ग्रन्थेषु सुस्पष्टं तन्न निर्दिष्टं येन पुराविदस्तस्य कालनिर्णयाय कल्पेरन्। तथापि उपोद्बलकप्रमाणवशात् तद्ग्रन्थतः किं किं विज्ञातं भवत्यस्मिन् विषय इति पर्यालोच्यते।

## उज्जयिन्यां निवासः

मेघदूतनाम्नि काव्ये रामगिरेराश्रमस्थो यक्ष अलकानगरीगतां स्वभार्यां प्रति मेघं दूतं प्रेषयितुमनास्तमुत्तरदिग्भागेन गन्तुमुपदिशति। अयं रामगिरिर्नाम नागपुरसमीपस्थो रामटेकनामा गिरिः। तत्र वर्णिता विदिशानाम नगरी संप्रति भेलसानाम्ना प्रसिद्धा। उत्तरां दिशं गन्तुकामेन नर्मदां नदीं तीर्त्वा गन्तव्यम्। सा च नदी कालिदासेन वर्णिता। इदानीं तया दिशा यो लोहमार्गः प्रचलितो विद्यते स पन्था बहोः कालात् लुण्णोऽस्ति। अनेन मार्गेणोज्जयिनी सुदूरं वर्तते। वक्रेणापि पथैतेनैव त्वं याया इति यक्षो मेघमुपादिशत्। एतेन कालिदास उज्जयिनीमध्यवात्सीदिति प्रतीयते। तत्रत्यो महाकालेश्वरोऽपि सुबहु सादरं वर्णितः। तदानींतने समये महाकालेश्वरस्य महिमा सर्वत्र विश्रुत आसीत्। उज्जयिन्याः सौभाग्यमतिक्रान्तसकलभूलोकं श्रीविशालत्वमपि।

"प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्"

इति वचनेन तत्रत्या ग्रामवृद्धा वासवदत्ताहरणादि उदयनोपाख्यानं प्राहुः। तथा च—

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे"

एवं वत्सदेशाधीश्वर उदयन उज्जयिनीनृपालस्य वासवदत्तां दुहितरमपहृतवानिति कथाऽपि स्मर्यते। तेन हि स्वप्नवासवदत्तस्य रचयितुर्भासकवेः समयादारभ्य कालिदाससमयं यावदियं कथा लोकैर्लोककथेति गीयते स्म। क्रिस्ताब्दानन्तरं संभूतानां कवीनां नेयं कथा काव्यविषयीभूता। अतः कालिदासो भाससमयान्नातिदूरवर्तीति व्यज्यते। अपरं च—

"हारांस्तारांस्तरलघुटिकान् कोटिशः शङ्खशुक्तीः
शष्पश्यामान् मरकतमणीनुन्मयूखप्ररोहान्।
दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणां च भङ्गान्
संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः॥"

"कृतमिव दिवः कान्तिमत् खण्डमेकम्"



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


रत्नाकरगतानि विविधानि कोटिशो रत्नानि यस्या विपणिषु राशिभूतान्यासन् । ततो रत्नाकरा जलमात्राव-शेषाः संजाताः । सोऽजयिनी सर्वसमृद्धौ स्वर्गमप्यतिशेते स्म । किमुत भूतलगतानीतराणि नगराणि। मेघदूतका-व्योक्तमेतत्सम्पन्नत्वमेतस्या नगर्याः पुरा कदाचिदासी-दिति इतिहासतो विदितं भवति । तस्मिन्नेव समये कालिदासः ख्रिस्तसमयात् पूर्वं सप्तपञ्चाशत्तमे वर्षे समजनीति सिध्यते ।

अयं कविश्रेष्ठो नैकेषां भूपतीनां सभां भूषयति-स्मेति नैका आख्यायिकाः श्रवणसरणिमापतन्ति । अत एव तस्य कालनिर्णये महदाकुलत्वम् । क्रिस्तपूर्वं संजातस्य विक्रमसम्राजोऽनन्तरमुज्जयिनीं प्रशासतो भूपतीन् पराजित्य शकास्तद्राज्यमकुर्वन् । तान् शकान् द्विशतवर्षैश्चन्द्रगुप्तः पराजिग्ये । उज्जयिनीं चात्मसा-त्कृतवान् । प्रजा भूतपूर्वाणां विक्रमशालिनां राज्ञां विविधाः कथाः नचिरसंजाताः सोत्साहं कथयन्ति खलु यदा पूर्वानन्तरं कश्चिदन्यः पराक्रमशाली महीपालो जायते तदा पूर्वगुणान् विस्मृत्य तमेव प्रशंसन्ति । मेघदूते कालिदासेनोदयनभूपस्य कथा प्रजानां प्रासङ्गिकभाषणविषयतां प्राप्तेति स्मर्यते । न तु चन्द्र-गुप्तादीनामन्येषाम् । अतः कालिदासश्चन्द्रगुप्तादीनां पूर्वं बभूवेति स्फुटम् ।

इयमुदयनकथा कथासरित्सागरे विद्यते । एष वत्साधिपतिः सदैव मृगयासक्तः । तस्य यौगन्धरायणो नाम नीतिशास्त्रपारगः सुनिपुणः प्रधानामात्यः । तदानीं प्रद्योतोनाम राजोज्जयिनीं शशास । तस्य वासवदत्तानाम चारुसर्वाङ्गी कन्याऽऽसीत् । अथैकदा वत्सराज उदयन उज्जयिन्याः समन्ततो मृगयायै भ्रमन् प्रद्योतरचितमन्तर्निगूढयोधं यन्त्रगजं सुदूरमन्व-धावत् । ततस्तस्य कृत्रिमकुञ्जरस्योदराभ्यन्तरात् सहसा प्रादुर्भूताः सैनिकास्तं न्यरुन्धन् । बन्दिग्राहं च गृहीत्वा कारायां संस्थापितः । प्रद्योतस्य कारामध्युषु च उदयनस्य दैववशादेकदा वासवदत्ता नयनगोचरी बभूव । ततस्तौ मिथोऽनुरक्तौ । चाणक्यसमो नीतिनिपुणो यौगन्ध-रायणो बन्दिवासादुदयनस्य मोचनोपायं व्यचिन्तयत् । तन्निर्देशवशाद् वत्सराजो वासवदत्तामपहृत्य ततोऽ-पक्रान्तः । इत्येषा कथा बहूनि वर्षाणि लोकैर्गीयते स्म । सैषा कथा कालिदासेन स्वकृतावुदाहृता । अतः कालि-दासो वत्सराजानन्तरं नातिचिरेण कालेन चन्द्रगुप्ता-दीनां च प्रथमं बभूवेति निश्चितम् । तदनुरोधात् तस्य सम्राजो विक्रमादित्यस्य संवत्सरस्य कर्तुः सभा-पाण्डित्यं युज्यते । ख्रिस्तपूर्वं तदानींतने काले वेदशास्त्रा-भिज्ञो गीर्वाणवाणीकण्ठमणिः कविगुणगणग्राहकः पण्डितपरिषन्मण्डितो न कोऽप्यन्यो महीपतिरासीत्, यस्य सभापाण्डित्यं कविकुलगुरौ कालिदासे संभवेत् । कालिदासस्य शिवोपासकत्वं विष्णुभक्ते विक्रमादित्ये सम्राजि पाण्डित्यसमीक्षायां नैव विरुध्यते, अकिञ्चि-त्करत्वादस्य-विषयस्य । विक्रमादित्यस्तु प्रचलितस्य विक्रमसंवत्सरस्य प्रवर्तकः क्रिस्तपूर्वं ५७ तमे वर्षे भारतं शशासेति नैकप्रमाणोपलब्धेः संप्रति सुनिश्चितम् ।

कालिदासस्यैतादृक् प्राचीनत्वमसहमानानां पुरावृ-त्तविदां पण्डितानां मतस्य युक्तायुक्ततायां किञ्चिदूह्यते—

"तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
कपोलपाटलादेशि बभूव रघुचेष्टितम् ।।"

एवं रघुवंशस्य चतुर्थे सर्गे हूणानां निर्देशो वर्तते । क्रिस्ताब्दस्य पञ्चमे शतके काश्मीरस्योत्तरे दिग्भागे हूणाआसन्निति चीनदेशस्येतिहासतो ज्ञायते । कालि-दासोऽपि तदैव समभवदिति प्राध्यापकपाठकमहाशया



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्राहुः। परं तन्न सहन्तेऽपरे। यतः क्रिस्ताब्दात् पूर्व द्विशताधिककालादूर्ध्वं भारतस्योत्तरापथे हूणानां निवासोऽविद्यतेति महाभारततो विदितं भवति। मेरौ तपश्चरणं कुर्वाणं शुकमात्मज्ञानसंपादनाय जनकं प्रति गमनमुपादिशद् व्यासः। तत्र च हूणचीनानां निवासो वर्णितः। अयं मेरुगिरिः सैबेरियाप्रदेशस्योत्तरादिक्प्रदेश आसीत्। तत्र यः कच्छप्रदेशो वर्णितः स संप्रति गोबीप्रदेश इत्यभिधीयते। कालिदासकृतं हूणवर्णनं कालिदासस्य पञ्चमे षष्ठे वा क्रिस्ताब्दे जननत्वाय कल्पेत चेन्महाभारतस्यापि निर्माणकालः स एव स्यात्। परं नैतत्प्रतिपादयितुं कोऽपि धृष्णुयात्। तथा च

"पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना"।

(रघु० ४–६०)

इत्येतद्रघुवंशगतं वर्णनं सिन्धोस्तीरप्रदेशे पारसीकानामाधिपत्यं संसूचयति।

"यवनीमुखपद्मानां सेहे मधुमदं न सः।"

(रघु० ४–६१)

अत्र तु निर्दिष्टा यवना नाम ग्रीकाः। ते यं प्रदेशं शशासुः स आफगाणप्रदेशः। तत्र च द्राक्षावलयभूमीनां द्राक्षामधूनां च विपुलत्वमासीत्। "पाश्चात्यैरश्वसाधनैः" इति वर्णनेनात्र ग्रीकानां नायक अलेक्झाण्डरोऽपि स्मर्यते। एवं च यवनशब्देनात्र ग्रीका एव बुध्यन्ते। क्रिस्तपूर्वं तत्र पञ्चाशद् वर्षाणि यावदेव ग्रीकानां स्वाम्यमासीत्। तदनन्तरं तत्र कनिष्ककानां प्रभुत्वमासीत्। ततो बहोः कालाद् भूयस्तं प्रदेशं हूणा अशासुरिति ज्ञायत इतिहासतः। पञ्चके शतके तत्र ग्रीकानां राज्यं नैवासीत्। तथा च—

"अथोरगाख्यस्य पुरस्य नाथं
दौवारिकी देवसरूपमेत्य।
इतश्चकोराक्षि विलोकयेति
पूर्वानुशिष्टां निजगाद भोज्याम्॥"

एवमिन्दुमतीस्वयंबरप्रसङ्गे कश्चित् पाण्ड्य उरगपुरनाथ इति वर्णितः। एतदुरगपुरं कान्यकुब्जतीरवर्ति नागपुरमिति मल्लिनाथेन निगदितम्। इदमुरगपुरं मध्यप्रदेशान्तर्गतं सांप्रतं प्रसिद्धं नागपुरं न। तत्र हि पाण्ड्याः कदापि नैवासन्। न तथाविधोऽप्यस्याभिप्रायः कवेः।

"पाण्ड्योयऽयमंसार्पितलम्बहारः"

इत्यन्तरश्लोकत एव पाण्ड्योऽयमुरगपुराधिप इति स्फुटम्।

"अनेन पाणौ विधिवद्गृहीते,
महाकुलीनेन महीव गुर्वी।
रत्नानुविद्धार्णवमेखलाया,
दिशः सपत्नी भव दक्षिणस्याः॥

(रघु० ६–६३)

इत्यस्मिन् श्लोके तद् "उरगपुरम्" दक्षिणस्यां दिशि वर्तमानं पाण्डयानां राजधानी समुद्रमेखलायितमित्यपि संसूचितम्। एतेनैतदुरगपुरं त्रिचनापल्लीसमीपस्थं "उरपुरम्" इति नाम्ना प्रसिद्धं यद्वर्तते तदेव। एतत् पुरा पाण्ड्यानां समृद्धं निवासस्थानमासीत्। रघुवंशे वर्णितं पाण्ड्यानां सम्पन्नत्वं क्रिस्ताब्दस्य सार्धशतकं यावदवर्तत। अनन्तरं चौलपल्लवादिभिर्जिता एते मदुरामध्यवात्सुः। चौलादीन् वर्जयित्वा पाण्ड्या एव कालिदासेन वर्णिताः। अतः पाण्ड्यानां सम्पन्नकालानन्तरं कालिदासस्य संभवो नैव संभवति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## ख्रिस्तपूर्वत्वस्य प्रमाणान्तरम्

कालिदासः क्रिस्ताब्दात् पूर्वं जात इत्यत्रान्यत् प्रमाणमुपलभ्यते। अश्वघोषप्रणीते बुद्धचरिते नाम काव्ये सौन्दरानन्दे च वर्तमानैः श्लोकैः कालिदासस्य कुमारसंभवस्था रघुवंशगताश्च भूयांसः श्लोकाः साम्यं भजन्ते। तदनुरोधादेतत् सुनिश्चितं यत् केनाप्येकतरेणान्यस्य चौर्यं कृतमिति। परमेतयोर्ग्रन्थयोः समालोचनेनैवं सिध्यति यदश्वघोषेणानुकरणं कृतम्। तद्वशात अश्वघोषात पूर्वं शताधिकतरः कालः कालिदासस्य संजातस्य। अश्वघोषस्तु क्रिस्ताब्देऽष्टसप्ततितमे जातः। तेनापि कालिदासस्य कालः क्रिस्तात्पूर्वं सप्तपञ्चाशत्तमः इति निश्चीयते।

अपि च ज्योतिर्विषयकं कालिदासकृतं समुल्लेखनं तस्य प्राचीनत्वं साधयति। मकरसंक्रमणादारभ्य कर्कसंक्रमणं यावदुत्तरायण गण्यमानं ज्योतिःसिद्धान्तं क्रिस्ताब्दस्य चतुर्थशतकानन्तरं प्रवर्तितम्। कालिदासस्तु वसन्ताद्यावच्छरदमुत्तरायणम्। शरद प्रावसन्तं दक्षिणायनं प्राह। शिवस्य तपस्तपत आश्रमे शक्रप्रेरितस्यानङ्गस्य साहाय्यर्थं यदा वसन्तः समागतस्तथा—

कुवेरगुप्तां दिशमुष्णरश्मौ
गन्तुं प्रवृत्ते समयं विलङ्घ्य।
दिग्दक्षिणा गन्धवहं मुखेन
व्यलीकनिःश्वासमिवोत्ससर्ज ॥" (कुमार० ३-२५)

भानुर्दक्षिणां दिशं परित्यज्योदीचीं प्रतस्थे। इति वर्णनात् दक्षिणायने परिसमाप्ते प्रवृत्ते चोत्तरायणे वसन्तस्यारम्भकालः परिगणितः। तथा च—

"जिगमिषुर्धनदाध्युषितां दिशं,
रथयुजा परिवर्तितवाहनः।
दिनमुखानि रविर्हिमनिग्रहैः,
विमलयन् मलयं नगमत्यजत ॥" (रघु० ९-२५)

वसन्तारम्भे दशरथो मृगयायै गन्तुमियेष। अत्र हि रवेर्दक्षिणादिक्परित्यागो हिमनिग्रहः। उत्तरदिक्प्रवेशश्च वसन्तारम्भः। इति दिग्दर्शितम्। अपि च—

"अगस्त्यचिह्नादयनात्समीपं
दिगुत्तरा भास्वति सन्निवृत्ते।
आनन्दशीतामिव बाष्पवृष्टिं
हिमस्रुतिं हैमवतीं ससर्ज ॥" (रघु० ७६-४४)

अत्र तु कालिदासो दक्षिणायनम् "अगस्त्यचिह्नायनम्" इति निर्दिशति। पूर्वतने श्लोके कुशस्य कुमुद्वतीसंगमप्रस्तावयशात्।

"निःश्वासहार्यांशुकमाजगाम
घर्मः प्रियावेषमिवोपदेष्टुम् ॥"

इति ग्रीष्मसमय आजगामेति वर्णितम्। ग्रीष्मसमयप्रवेशानन्तरं सूर्योऽगत्स्यचिह्नायनादुत्तरदिक्सं संनिवृत्तः इति कथितम्। संप्रति तु ग्रीष्मसमय आषाढमासे प्रादुर्भवति। तदा रविरुत्तरायणाद् दक्षिणायनं प्रविशति। कालिदासेन तु तदन्यथा प्रतिपादितम्। एतेनापि कालिदासस्य संभूतिः क्रिस्ताब्दात पूर्वमेव सिध्यति।

अपरं च—कालिदासश्चौर्यापराधे देहान्तशासनं स्मृतवान्। क्रिस्ताब्दात् पूर्वं जाता मन्वादय एतं ब्रुवन्ति। परं क्रिस्ताब्दस्य प्रथमे शतके सञ्जातो बृहस्पतिश्चौर्यापराधे दण्डशासनमुक्तवान्। ततः कालिदासो बृहस्पतेः प्रथमं मन्वादीनामनन्तरं समजनीति वक्तुं सुशकम्।

एवं चायं कविप्रवीरः क्रिस्तपूर्वं विक्रमादित्यसम्राजः काले विलसति स्मेति बहुभिः प्रमाणैः संसिध्यति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृतभाषाविषये संस्कृतज्ञानां* कर्तव्यम्

[ सम्पादकः ]

संस्कृतभाषा आर्याणामुज्ज्वलपरम्परायाः प्रदीप्तिमानेको निधिः । संसारस्य सर्वभाषाणां मध्ये संस्कृतभाषा सुतरां पुरातनी । भारतस्य प्रायः सर्वा एव भाषाः संस्कृततः समुद्भूताः । इतिहासेन तदिदं सर्वथा प्रमाणीकृतं यत् संस्कृतस्य प्रभावो न केवलं भारतोपरिवास्ति, अपितु तिब्बत-चीन-जापान-कोरिया-लङ्का-मलाया-जावा-सुमात्रा-तुर्कस्थान-अफगानस्थानप्रभृतिषु, तथा दूरातिदूरवर्तिषु मिश्रमैक्सिकोप्रभृतिदेशेष्वपि सुतरां वर्तमानोऽस्ति । संस्कृतस्य साहित्यं सुन्दरतायां मौलिकतायां च सर्वतः श्रेष्ठं परिगणितम् । संस्कृतस्य शब्दकोषो यथा अत्यन्तं विपुलस्तथा संस्कृतस्य व्याकरणं तथा तस्य अन्यान्यसाहित्यमपि अत्यन्तं परिनिष्ठितम्, विशुद्धतायामनुपमम् ।

संस्कृतभाषायाः सर्वतोऽधिकमेकमन्यदपि महत्त्वमिदं वर्तते यत्—ऐतिहासिकेऽस्मिन् समये भारतोपरि बभूवुरनेकान्याक्रमणानि । शकाः, हूणाः, यवनाः अनेके अत्राऽऽगताः । स्वशासनं भारते प्रचाल्य सर्वे ते प्रतिनिवृत्ताः । तदनन्तरं भारते ते आङ्गलदेशीया अपि समागताः, येषां राज्ये कदाचिदपि सूर्यो नास्तमगात् । शासनं च तेषां सार्द्धशताब्दीपर्यन्तमेकच्छत्रमभूत् । एवं विधानां बहिर्देशीयचक्राणां प्रभावो भारतीयभाषाणामुपरि प्रबलतया भवेदिति स्वाभावसिद्धमासीत् । इतिहासः साधयति यत् हिन्दीभाषा पारस्य-अरब्यभाषाशब्दानां मिश्रणेन हिन्दुस्तानी-अथवा उर्दूरूपं जग्राह । महाराष्ट्रभाषाऽपि पारस्यादिभाषामिश्रणेन उर्दूसहचरी अभवत् । केवलं संस्कृतभाषैव तादृशी अभवत्, यस्यां वैदेशिकसंसर्गेऽपि न काचिद्रूपपरिवृत्तिरभूत् । संक्रमणकालेऽप्यस्मिन् संस्कृतभाषा अन्तः, बहिश्च सर्वथा अविकृताऽतिष्ठत् । न केवलमियं स्वयं शुद्धा अतिष्ठत्, प्रत्युत आरब्य-पारस्य-उर्दूभाषाणां मिश्रणेन सर्वथा दूषिता या अन्यान्या भारतीया भाषा आसन्, तासां शुद्धीकरणस्याऽऽधारोऽपि सेयं संस्कृतभाषैव समभवत् ।

संपूर्णोऽपि संसारः साम्प्रतमपि सर्वथा विजानाति यत् दर्शनानाम् आर्यधर्माणां चाऽध्ययनार्थं संस्कृतभाषाया अध्ययनमनिवार्यम् । हिन्दुभिः स्वतन्त्रतया अनेकानि शास्त्राणि, अनेके संप्रदायाश्च प्रवर्तिताः, एका प्रभावशालिनी धर्मपरम्परा परिचालिता । किन्तु सर्वेषामेषां प्रचारसंबन्धि साहित्यं संस्कृतभाषायामेव लिखितमभूत् । अतएव यदि भारतीया वयमस्माकं राष्ट्रस्य वास्तविकं परिचयं चेत्कामयामहे तर्हि संस्कृताध्ययनमस्माकं कृते नितरामावश्यकम् ।

संस्कृतं चिरकालाद्भारतस्य राष्ट्रभाषा । बहोः कालादेतस्या अध्ययनं राष्ट्रभाषारूपेणैव देशेऽभवत् । देशस्य शासका राजानो महाराजाश्च संस्कृतभाषायाश्चिरजीवनप्रचारार्थं संस्कृतपण्डितेभ्यः, संस्कृतपाठशालाभ्यश्च उदारतापूर्वकं राजाश्रयमददुः । अस्मिन् युगे अंग्रेजीभाषायाः साम्राज्यं भारतस्य गृहे गृहे विलोक्यते । किन्तु पूर्वसमये संस्कृतस्य प्रभुता ततोऽप्यधिकायते स्म भारतीयाः पुरुषाः संस्कृतभाषामात्मनो राष्ट्रीयसत्ता-

* श्रीबाबासाहेब आप्टे महोदयस्य लेखमाधारीकृत्य ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



स्थिरीकरणस्य प्रधानं साधनं मन्यन्ते स्म । जन्मनः समारभ्य मृत्युपर्यन्तं = जायमानाः षोडश संस्काराः सर्वेऽपि संस्कृतभाषाद्वारैव संपन्ना अभूवन्, ये वर्तमान-कालपर्यन्तमपि येन केनचित्प्रकारेण समाजे प्रचलिताः सन्ति । प्रत्येकं बुद्धिशाली पुरुषो राष्ट्रियसंस्काराणां महत्त्वं सर्वभावेन मानयति । प्रत्येकधर्मे प्रत्येकसमाजे चाऽपि संस्काराणां महत्त्व स्वीकृतमस्ति, किन्तु हिन्दु-समाजे संस्काराणां महत्त्वं विशेषरूपेण संमानितं नूनम् अस्माकमविचलो विश्वासोऽस्ति यत् संस्काराणां प्रभावादेव वयं यथार्थमानवा भवामः । इयं वार्ता संप्रति सर्वैरेव शिक्षितैः सुदृढीकृता यत् संस्काराणां ( अर्थाद्-व्याकरणस्य) सुदृढतया परिचालनादेव सेयं संस्कृत-भाषा प्राणघातकानामाक्रमणानां सत्त्वेऽपि निजं जीवि-तमद्यावधि सुरक्षितं चकार ।

संस्कृतभाषायाः स एष महिमा, युगयुगान्तरेभ्यः प्राप्तं राष्ट्रियतायास्तदिदं गौरवम्, अंग्रेजसदृशानां धूर्तबुद्धीनामाक्रमणकारिणां दृष्टावपि समायाति स्म । अंग्रेजानां काकदृष्टितो नेद गुप्तीकृतमतिष्ठद् यत् भारतोपरि अनन्तानांमाक्रमणानां सकटे सत्यपि, संस्कृतभाषायां उदात्तविचाराणां पौष्टिकभोज्यसेवनादेव अत्रत्यसमाजस्य धारणा पूर्ववत् अक्षुण्णा अतिष्ठत् । अनेकेषामाघातानां सहनस्य आत्मिकं बल तस्मिन्नति-ष्ठत् । एतत्सर्वं विचार्य, अस्माकं दुर्भाग्यात्, निजशा-सनस्य प्रारम्भे एव तैरतिदुर्लक्ष्यरूपेण नानाविधैर्गुप्त-प्रकारैरस्माकं राष्ट्रियभाषाया उपरि आघातं कृत्वा एतस्या उच्छेदस्य प्रयत्नः प्रारब्धः । अस्माकं भाषायाः स्थाने आङ्गलभाषा राष्ट्रभाषारूपेण अस्माकमुपरि संस्थापिता । शनैःशनैराङ्गलभाषानभिज्ञो ग्रामीणो, मूर्खश्च ससिद्धो देशे । आङ्गलानां तदिदं कुटिलं षड्यन्त्रं बहुष्वंशेषु सफलमभवत् । आङ्गलानामनुकर-णेन अस्मद्देशीयाः शिक्षिता अपि संस्कृतभाषां 'मृत-भाषाम्' अकथयन् । दौर्भाग्यात् अस्माकं हस्तादेव अस्माकं राष्ट्रभाषाया उच्चाटनं सोत्साहमभवत् ।

'साधारणजनाः संस्कृतं न बुध्यन्ते' इति मिषेण धार्मिकसंस्कारां अपि प्रान्तीयभाषासु भवेयुरिति प्रयासः प्रारब्धोऽभून्नूनम् । संस्कृतपण्डितानामुपहासः प्रार-भ्यत । पुरा हि प्रत्येकधनवान् पुरुषः संस्कृतपण्डितेभ्यः समुचितमाश्रयं ददाति स्म । किन्तु नानाव्यपदेशैः अंग्रेजा भारतीयधनिकानां भूम्यादिसंपत्तीरपहरन्ति स्म, येन हि संस्कृतभाषाया आश्रयः स्वत एव उच्छिन्नो-ऽभवत् । एवं शनैः शनैर्जीविकादिविलोपात् पण्डित-परिवाराः नाममात्रार्थं संस्कृतं शिक्षित्वा अंग्रेजीशिक्षा-ऽभिमुखाः समभवन् । दिवसा एवंविधाः समागच्छन् यत् 'येस्, नो' इत्येवंमात्रशिक्षिता अपि जनाः सानन्दं पञ्चविंशतिमुद्रावेतनं लभन्ते स्म । किन्तु घोरपरिश्रमेण अनेकशास्त्रज्ञस्यापि पण्डितस्य निजपरिवारपोषणमपि दुष्करमभूत् । ततो येन केनाप्युपायेन निजोदरपूरणस्य प्रवृत्तिर्मनुष्यस्याऽस्य स्वाभाविकी । ततो वराकाः पण्डिता एव प्रवृत्तेरस्या अपवादभूताः कथं भवेयुः ? अस्याः परिस्थितेः परिणामः अतिविचित्रो भयानकश्चाभवत् ।

गतायाः शताब्द्या उत्तरार्द्धे अस्माकं समाजे ये नवीना नेतारः समुद्भवन्, ते भारतीयैरादर्शैः, भारती-यविद्याभिश्च सह नितान्तमपरिचिता आसन् । किन्तु अस्मिन्नेव समये परतन्त्रताजनिता नानाविधाः क्लेशाः परितः प्रासरन् । अस्य प्रतीकारार्थं नानाविधा उपायाः प्राचरन् । समाजस्य युवकजनानां बलवृद्ध्यर्थं स्थाने स्थाने व्यायाम-मल्लक्रीडादिरङ्गाः प्रतिष्ठिता अभवन् । सामूहिकव्यायामस्य तन्त्रं प्रारभ्यत । राजनीतिमुद्दिश्य



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



विदेशीयस्य संग्रहो विदेशीयस्य बहिष्कारोऽपि प्राचलत्। ततः शनैः शनैरियमपि भावना प्रबलाऽभूद् यद् यावत्कालमं-ग्रेजा भारते स्थास्यन्ति तावत् अस्मत्कृतानां प्रयासानां फलं न भविष्यतीति। अतएव संघर्षस्य भावना बलवती अभवत्। सर्वेषामपि जनानामवधानं राजनीतिं प्रति आकृष्टमभूत्। अङ्गरेजानां भारताद् बहिष्करणमेव मुख्यं लक्ष्यमभूत। कस्याऽपि विचारशीलस्य एतां वार्तां प्रति लक्ष्यमपि नाऽभवद् यत् अस्मिन् संघर्षयुगे अस्माकं भारतीयानामपि विचाराः साम्प्रतम् अभारतीयाः संपन्नाः। अस्माकमभिरुचिः पाश्चात्यप्रकाराणां संजाता। राष्ट्रियवृत्तैः कृते ये सद्गुणा आवश्यकास्ते सर्वेऽपि नाशमगमन्। भारतीयसंस्कृतिं परिचालयितुं यादृशी दिनचर्या, यादृग् वातावरणमुपयुक्तं सर्वं तद् विलुप्तम्। किन्तु एतां वार्तां प्रति विचारस्य, अवधानदानस्य वा अवसर एव नाऽभवत्। दुर्भाग्येन सह वक्तव्यं भवति-यद् अद्यतने भारते समन्ताद् दृश्यमानो विचारसंबन्धी संभ्रमः, राष्ट्रीयभावेषु पतितो विच्छेदः, तस्यैव अकरणात्मकस्याऽऽन्दोलनस्य परिणामः। भारतस्याऽस्य राष्ट्रीयं स्वरूपं कीदृक्, अस्माकं श्रद्धाभाजनानि के के? अस्माभिः केन मार्गेण गत्वा उद्देश्यपूर्तिः कर्तव्या, एतेषां विषयेऽपि संदेहाः समुपस्थिताः। हन्त! इतोऽधिका राष्ट्रिया आपत्तिः काऽन्या भवेत्।

एवंविधे विचारसंकटे एव १५ अगस्तदिवसे (१९४७ तमे ख्रिष्टवत्सरे), भारतस्य (पाकिस्तान-हिन्दुस्थानेतिरूपेण) विभागं कृत्वा अङ्गरेजाः स्वदेशं प्रति निवृत्ताः। एतेन सहैव अस्माकं नेतृ-समाजे कृतकृत्यतायाः (विजयप्राप्तेः), स्वार्थपूर्तेश्च यथा प्रवृत्तिर्जागरूकाऽभवत्तथा द्वितीयपार्श्वे निराशाया विफलताया वा वातावरणमुत्पन्नमभूत। साधारणजनैर्विचारितं यत् संप्रति भारतं स्वतन्त्रं जातम्। येऽस्माकं प्रतिपन्थिनः स्वार्थरोधकाश्च विदेशीया आसन् संप्रति ते दूरेऽभवन्। साम्प्रतमस्माकं परिश्रमस्य, कठिनप्रयासकरणस्य च नास्त्यावश्यकता। इदानीं भारतस्य शासकाः अस्मद्देशीयाः अस्माकं भ्रातर एव। अत एव सर्वं साधनीयं सर्वकार एव साधयिष्यति। हन्त, अस्या अकर्मण्यतायाः परिणामं यद्यपि विचारशीलाः सर्वत्र द्रष्टुं विचारयितुं च शक्नुयुः, किन्तु तस्याः सर्वतोमुखो भयानकः परिणामोऽस्या संस्कृतभाषाया उपरि समभवत्।

उपरि यथा वर्णितवानस्मि तथा राष्ट्रियताऽभिमानस्य जागरणार्थं सेयं संस्कृतभाषाऽप्रतिम साधनम्। देशस्य सर्वतोमुखं बलवत्त्वाऽर्थम्, आत्माभिमानस्य प्रोत्साहनं निजसंस्कृतेः पुनरुज्जीवनं च सर्वथा आवश्यकम्। अतएव एवंविधस्य सर्वस्यापि कर्तव्यस्य सिद्ध्यर्थं संस्कृतभाषायाः, तन्निष्ठविद्यानां च पुनरुज्जीवनं सुतरामावश्यकमासीत्। संस्कृतस्य समुन्नयनार्थमनेकविधैरपि दृष्टिकोणैः प्रगाढः प्रयत्नः कर्तव्योऽभूत्। किन्तु दुर्भाग्यवशाद् वक्तव्यं भवति यत् स्वराज्यप्राप्तेः सप्तवर्षानन्तरमपि संस्कृतभाषाया वनवासो न समाप्यते! राज्यतन्त्रम् (सर्वकारः) अस्मिन् विषये न किञ्चिदपि करोति। संस्कृतपण्डिता अपि पूर्ववत् उदासीनाः। सुस्पष्टा सा वार्ता यत् सेयं संस्कृतभाषा भारतीयसंविधानद्वारा संमानितासु चतुर्दशभाषासु अन्यतमा परिगणिता। प्रतिदशवर्षोत्तरं भाविन्यां जनगणनायां वयं निजमातृभाषां उपभाषां वा संस्कृतं लेखयितुं पारयामः। किन्तु सेयं वार्ता संस्कृतपण्डितानां स्मरणशक्तितो दूरीभूता। १९५१ तमे ख्रिष्टवत्सरे या जनगणनाऽभवत् तस्याः नानाभाषाभाषिणां लोकानां प्रकाशितसूच्याम् आसेतुहिमाचलं संपूर्णेऽपि भारते संस्कृतभाषिणां संख्या केवलं ५५५ निर्दिष्टा !!



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# पर्वतीया

ले० पं० मदनमोहनझाः व्या० न्या० सा० आचार्यः मुजफरस्थराजकीयसंस्कृतमहाविद्यालये साहित्यप्रधानाध्यापकः

भागीरथीतीरेऽवस्थितस्य 'हरिहरपुरस्य' प्राकृतिकं दृश्यमतिसुन्दरमास्ते ।

ग्रामस्य वामभागे तरलतरङ्गा गङ्गा प्रवहति । दक्षिणे हिंस्र-पशु-शून्यं-मृगमयूरादिमनोहरजीवावासभूतम्, षड्तु-सुगम-सुभग-सुमनोभरम्, कमनीयं काननं चकास्ति । पूर्वस्यां दिशि विविधवनस्पति-वन-सञ्छन्नोऽपि यत्र तत्र दूरदृश्यमान-धवल-शिलातलखण्डः, सतत-निष्यन्दमान-निर्झर-जलप्रवाहः, सजीव इव, नातिविस्तारः सानुमान् शोभते । पश्चिमायाञ्च विशाला रसालवाटिका विद्यते, यस्या लघवो महान्तश्च तरवो दूरादागच्छतां दर्शकानां मानसे महावकाश-संतानित-नील-पट-मण्डप-भ्रान्तिमुत्पादयन्ति ।

काशीनगर-सविध वर्तितया चग्रामे चतुर्मुखो-राजमार्गः, गृहिणां पथिकातिथि-लाभ-सौभाग्यं सम्पादयति ।

---

अस्माकं स्वतन्त्रभारतस्य योऽयं 'शिक्षाविभागः' तस्य तु कथैव का ? भारतोपरि योऽयमुपकारः स कैरन्यैर्वर्ण्यताम् ? निर्धार्मिकतायाः व्यवधाने बालबुद्धिभ्यश्छात्रेभ्यस्ता वार्ताः शिक्ष्यन्ते या अभारतीयाः अर्थात् अराष्ट्रियाः । एतद्विभागद्वारा कुत्रचिद् गीताध्ययनोपरि प्रतिबन्धः स्थाप्यते, तर्हि कुत्रचित् अस्माकं राष्ट्रियतायाः सर्वथा उन्मूलकानि पुस्तकानि पाठ्यत्वेन निर्धार्यन्ते । बहुषु स्थानेषु तु संस्कृतम् अतिकठिनमस्तीति व्याजेन संस्कृतभाषायै अर्द्धचन्द्रः प्रदीयते । अहह ! अस्माकमुच्चपदस्थाः सर्वकारीयाः अधिकारिणः कर्मचारिणश्च महामहत नामधेयं दत्त्वा, घोरमाडम्बरं च कृत्वा एतद्-भाषमाणाः श्रूयन्ते यत् "संस्कृतभाषां प्रति अस्माकं महान् अनुरागः, एषैव भाषा राष्ट्रभाषासिंहासनार्थं सुयोग्या ।" किन्तु केवलं वागाडम्बरेणाऽनेन किं सिध्येत् ? 'वनमहोत्सव' सदृशानां स्वल्पफलानामाडम्बराणां प्रदर्शने कोटिशो मुद्राः व्ययीक्रियन्ते । आरव्य-पारस्यप्रभृतीनाम् अभारतीयभाषाणां प्रचारार्थं लक्ष-लक्षमुद्राणां पौष्टिकभोजनं प्रच्छन्नराष्ट्रद्रोहिभ्यः सर्वकारः प्रतिवर्षं सोत्साहं प्रददाति । किन्तु संस्कृत-भाषा-रक्षकेभ्यः पण्डितेभ्यः प्रश्रयं दत्त्वा एक-द्वयानां संस्कृतविश्वविद्यालयानां परिचालनस्यावश्यकता न कदाचिदप्यनुभूता राज्यशासकैः ? अस्माकं संस्कृत-पण्डिताः केवलं संस्कृतसंमेलनम्, संस्कृतपरिषदामायोजनं विहाय संस्कृतप्रचारस्य मार्गमेव न जानन्ति ।

संस्कृतभाषा अस्माकं राष्ट्रियसंपत्तिः । किञ्चिदप्यस्यामीदृशं नास्ति यस्य नाशः सह्नीयो भवेत् । सर्वमप्यस्य मैश्वर्यसूचकम्, आर्यत्वाऽभिमानार्हं च । संस्कृतभाषायाः सर्वस्वमिदमस्माभिः पुनरुज्जीवनीयं भवेत् । संस्कृतस्य परम्परा नद्यापि सर्वथा विनष्टा । अद्यापि दशसहस्रं पञ्चदशसहस्रं वा पण्डिता भारतेऽस्मिन् भवेयुः । किन्तु ते सर्वे संप्रति विपद्ग्रस्ताः । तेषमग्रे कठिनसमस्या सेयं यत् तेषां पाठनाय (अध्यापनाय) विद्यार्थिनो न लभ्यन्ते । ये किल शिक्षा-समुचितं वयः प्राप्य शिक्षाक्षेत्रे प्रविशन्ति । ते हि बाह्यप्रतिष्ठायाः, तात्कालिकस्याऽर्थलाभस्य च लोभे निमग्ना आङ्गलभाषाध्ययने एव निपतन्ति । (क्रमशः)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अस्मिन् ग्रामे बहूनि गृहाणि न सन्ति। तृणकाछादिनिर्मिता एवावासा अधिका दृश्यन्ते। परमेषां निर्माण-क्रमं संस्कारञ्च दृष्ट्वा ग्रामवासिनां वास्तुकलायाः कुशलेश्च ज्ञानं सहजमेव सम्भवति।

इष्टिकाभवनान्यपि दश, पञ्च वर्तन्ते, यानि मस्तकान्युत्थाप्य तृणगेहान् उपहसन्तीव प्रतीयन्ते।

प्रासादस्त्वत्र ग्रामे "शम्भूशरणसिंहस्यैव" केवलं विराजते। स एवास्य ग्रामस्य ग्रामणीः। लोकाः कथयन्ति—यदस्यैव पूर्वपुरुष इहागत्य प्रथममुवास। अपिच पश्चादुषितवत्सु बहुषु स्वनाम्नैव वसते र्नामकरणमकरोत्। तस्यामेव कुलपरम्परायां समुत्पन्नः "शम्भूशरणसिंहो"ऽद्यत्वे ग्रामस्य नेतृत्वं कुरुते।

अस्य सविधे धनिकगृहस्थोपयुक्तं सर्वमेव वस्तु जातं वर्तते। महती कृषिः, विशालं गोधनम्, सुन्दराणि मन्दिराणि, सुशीला सौम्याकृतिश्च पत्नी, आवश्यकी शिक्षा, फलतोऽस्य जीवनं सुखशान्तिमयं प्रत्येति।

अपरेऽपि ग्रामवासिनोऽस्य च्छत्र-च्छायां सुखेनैव समयं गमयन्ति। ते इष्टकाभवनपतयस्तु अस्य नेदीयांसो दवीयांसो वा कुटुम्बिन एव, ये शम्भूशरणसिंहेन तदीयैः पूर्वजैर्वा दत्तं भू-यौतुकमासाद्य न्यावसन्। इतरे ग्रामीणा अस्य कुलस्य अल्पवित्ताः भृत्याः, ते अल्पवित्ता अपि भोजनकष्टं नानुभवन्ति। शम्भूशरणसिंहस्यैव क्षेत्रेषु परिश्रमेण कृषिं कृत्वा नव्यां सर्षपशाकं, नवौदनं विच्छिन्नं च दधि भोक्तुं सौभाग्य लभन्ते।

शम्भूशरणसिंहस्य स्वभावेन सदाचरणेन च प्रायः सर्वे प्रसन्नास्तिष्ठन्ति। किन्तु स्वयं शम्भूशरणसिंह एव बहिः प्रसन्न इव दयमाणोऽपि अन्तस्तपन् दिनानि नयति। एकान्ते समुपविष्टस्यास्य मुखे कोऽपि साधारणमपि मनोविज्ञानं जानन् विषादस्य च्छायां लक्षयेत्।

विषादस्य हेतुरपि बलवान् वर्तते, सत्स्वपि सकल-सुखसाधनेषु सन्ततिसुखेन स वञ्चितोऽस्ति। यदा स रहोगतः स्वकीयामापत्तिं पश्यति, तदा तस्य हृदयं हाहाकारं कर्तुमारभते।

स मनसि विचारयति—"सन्तति-सुखमन्तरा प्राणिनां कीदृशं निर्वृतिस्थानम्? यदन्तरा समग्रापि सुखसामग्री प्रौढवयसां हीना प्रतिभासते। अहमेव यावत् युवक आसम्, तावत् सदा प्रसन्न एवातिष्ठम्। प्रियायाः सान्निध्यं परां प्रीतिमुदपादयत्, परन्तु यथा यथा वयसि प्रौढता आयाता, तथा तथेयं सन्तति-चिन्ता चेतसि पदमारोपयितुमारभत। इदानीं तु स्थितिरियं समुत्पन्नाऽस्ति, यत् कुत्रापि कर्मणि मनो न लगति। सरलाऽपि (मम पत्नी) सततमुदास्ते। बहुबोधिताऽपि समये न स्नाति, न भुङ्क्ते, नापि शेते। तस्या इमां दशां पश्यतो मम वेदना समधिकं वर्धते। अतोऽहं प्रायस्तत्समीपं गन्तुं बिभेमि। सततं चिन्तामिमां विस्मर्तुं नानाविधेषु कार्येषु आत्मानं नियुञ्जानस्तिष्ठामि। कर्मशीलस्वभावतया यदा कदाचित् विस्मृतचित्तश्चिन्तामपि विस्मरामि। अपिच पुरुष-हृदय—सुलभां प्रेयसी-प्रसाद-प्राप्ति-लालसामादाय अन्तःपुरे कान्तामुपसरामि। परन्तु तत्र सैव विषाद-मयी स्थितिः। तस्मिन् समये मम पौरुषं क्षुब्धं सञ्जायते, रुद्धः कामः क्रोधे परिणमते, परं स क्रोधो बहिर्गमनात्प्रागेव पुनः शोकरूपमासादयति। तदा स्वापराधमिव स्वीकुर्वन् सरलां संबोध्य सन्तोषयामि।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सरला च मम वाक्यानि अशृण्वतीव केवलं मन्मुखे दृष्टिमारोप्य रोदिति। रुदत्येव सा बाष्पगद्गदकण्ठेन वक्तुं प्रवर्तते। त्वं मम मनोदशां न जानासि, पुरुषा नारीहृदयं ज्ञातुमपि न शक्नुवन्ति। स्त्रीणां हृदये मातृपदलाभाय कीदृशी लालसा तिष्ठतीति ता एव जानन्ति। यदा मयोत्सङ्गे बालकं लालयन्ती कापि बाला विलोक्यते, तदा ममोरः विदीर्णम् भवति। किं पुत्र-विरहस्त्वां न खेदयति? अस्या महत्याः सम्पत्तेः- यां महता क्लेशेनार्जितवानसि—उत्तराधिकारी को भवेत् इति चिन्ताऽपि चित्ते नोद्भवति? "को नः- कुले निवपनानि करिष्यतीति" कालिदासीयं पद्यं कदापि स्मृति-पथ नारोहति? इतः परं तत्राहं स्थातुं न प्रभवामि, ततः प्रपलाय्य क्वचनैकान्ते चिरं रुदित्वा मनो लघूकरोमि"।

अनेन प्रकारेण पञ्चषाणि वर्षाणि विगतानि, इदानीं यावत् पुत्रो नाभूत्, परन्तु अधुनापि तयोर्दम्पत्योस्तादृशी दशा नासीत्, यत्रागत्य लोकाः सन्ततेराशामपि त्यजन्ति।

संय्योगेनैकदा कश्चित् वयोवृद्धः साधुः रात्रौ विश्रान्ति-स्थानमन्विष्यन् तद्द्वारि समुपागतः। आतिथेयः शम्भूशरणः तं साधुं समादरेण शुभासने समुपावेशयन्, यथास्थिति साधोर्मनोऽनुकूलमभोजयच्च।

भोजनकाले च सरला साधोरग्रे स्वकीयं दुःखं प्राचीकटत्। प्रायः इदानीं यावत् शताधिकानां साधूनां यन्त्राशीर्वादान् सरला जग्राह। परमयं साधुः तस्या वेदनामनुभूयापि यन्त्रमाशीर्वादं वा नादात्। अपितु औषधमेकं निर्माय तस्यै प्रायच्छत्, सेवनविधिञ्चाबोधयत्।

मासं सेविते तस्मिन्नौषधे सरला गर्भमधत्त। गर्भावस्थायामीदृशसन्ततिकामाया यादृशी परिचर्या समुचिता, सा सर्वा साधु समपद्यत। कोऽपि दोहदोऽ पूर्णो नातिष्ठत्। एवं गर्भकालः कथमिव व्यत्यगात् इति शम्भूशरणः, सरला, तत्सहोत्थायिनः परिजना वा नालक्षयन्।

साम्प्रतञ्चैतत्। दुःखदिवसा व्यतियाप्यमाना अपि न व्यतियन्ति। सुखवासराश्च निमेषमात्रा इवा ननुभूता एव गच्छन्ति।

इत्थमतिक्रामत्सु दिनेषु चैत्रशुक्लनवम्यां सर प्रसूतिपीडामन्वभवत्। अयं संवादो द्वारि समुपविष्टस्य शम्भूशरणस्य श्रवणयोरपतत्। सहसाऽसौ प्रमोदोदधिमग्न इव किं कर्तव्यविमूढः क्षणमतिष्ठत्।

परं कियत्क्षणानन्तरमेवानिर्वचनीया चञ्चलता त- दङ्गेषु प्रादुरभूत्। तस्मिन् समये स इतस्ततो धाव दृदृशे। कमपि परिचारकं चिकित्सकाह्वानाय प्राहिणो अपरं नाभिच्छेदिकाकरणाय, इतरं ज्योतिर्विदानयनाय स्वयमपि सूतिकागृहद्वारं यावत् गन्तुमनायासमुत्थितौ पादौ रोद्धुं नापारयत्। शुभलग्ने सरला सुभगं सु मसूत।

परन्तु सुतोत्पत्तिकाल एव हर्षातिरेकेण प्रसव- पीडया, दैव-दुर्विपाकेन वा माता मूर्च्छिताऽभूत्। सु दुःखयोरिदं सम-सामयिकमाक्रमण गृहपतिं मत्त व्यधात्।

परीक्षितकौशलाः कियन्तश्चिकित्सकाश्चिकित्सा- कार्षुः। किन्तु वारमेकं क्रोडे कृत्वा सजलाभ्यां नयनाभ्यां मुखनिरीक्षणादधिकं तनय-सुखं समुपभोक्तुं सरला नाशकत्। वारंवारं मूर्च्छाक्रमणं भवदेवावशिष्टं चतुर्विंशतिहोराणां कृते पुत्रिणी भूत्वा 'सरला जीवन लीलां समावृणोत्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



चिरप्रतीक्षित उत्सवः शोके पर्यणमत। विपन्नः शम्भूशरणो मूर्ध्नि हस्तौ विन्यस्य द्वार-प्रकोष्ठे भीत इव त्रुटित इव, मृत इव मूकोऽवर्तिष्ट।

द्वारि दानार्थिनो विप्रा हताशाः कियतीः कला गम्भीरामाकृतिमाधाय पश्चात् सान्त्वयितुं शम्भूशरणस्य समीपमसरन्। तैरवबोधितः शम्भूशरणः कर्तव्य-विवेकेन समयोचितं प्रियाया दाहादिसंस्कारमकारयत्।

अन्तःपुरे तु क्षणमत्रस्य कृते हर्षजलप्लव इवागत्य तत् स्वाभाविकमपि प्रमोदसाधनसलिल सह नीत्वैवा-गच्छत्। शोकाभिभूतहृदयाः कुटुम्बिन्यः परिचारिकाश्च शिशोर्निर्भालनादिकमपि व्यस्मार्षुः। परन्तु शिशु-रसौ जीवनादृष्टवत्तयाऽवहेलितोऽपि प्राणानधारयत्।

एवं समाप्तः शम्भूशरण-जीवनस्य सरसोऽध्यायः।

(२)

काश्यां दशाश्वमेध-सविधे प्राचीनरीतिनिर्मितं विशालमेकं भवनं विद्यते। यस्य सोपान-परम्परा गङ्गा-प्रवाहं स्पृशति।

सायंकाले तस्याः सोपानपरम्परायाः पार्श्वरक्षके समुन्नते भित्तिभागे समुपविष्टः दशवर्षदेशीयो, दीप्त-ललाटः, महोरस्कः उन्नतघोणो, विशाललोचनः, स्वस्थो नातिदुर्बलो नातिपीनः सौम्यवेषभूषश्च बालक-एको निर्निमेषाभ्यां नेत्राभ्यां गङ्गातरङ्गेषु खेलन्तीमस्तं गच्छतो भास्करस्य शोण-पीतामाभां विलोकयन्नास्ते।

स एवायं शम्भूशरणसिंहस्य पुत्रः, यो मातृमुखं नापश्यत्, जननीस्तन्यं नापिबत्, सहजं मातुः स्नेहं नान्वभवत्।

इदानीमत्रासौ जनकेन नामकरणादियज्ञोपवीतान्तं संस्कारसम्भारं विधिवत् सम्पाद्य शिक्षार्थम् प्रेषितः पूर्वजविरचितेऽस्मिन् भवने सह शिक्षकेणावश्यक-परिजनैश्च निवसति। अस्य पिताऽपि अस्मिन्नेव गृहे स्थित्वा यत् किञ्चिदपठद्।

अस्य नाम राजीवलोचन इति विद्यते। लोचनयो राजीवसाम्यमुपलभ्यैव पिता इदमीदृशं नाम अकृत। परन्तु लोकाः करचरणादिषु वर्तमानमपि राजीवतुल्यतां लुम्पतो लोचनपदस्य परिजिहीर्षयेव तं बालं राजीवेति त्रिभिरेवाक्षरैः संबोधयन्ति।

अस्य मालकस्य प्रवृत्तिरन्तर्मुखी अधिका बहिर्मुखी च स्वल्पा वर्तते, प्रायो मातुरभाव एवास्या वृत्तेरन्त-र्मुखत्वे हेतुः। मातैव प्राणिनां शैशवे तदद्वितीयं स्थानं भवति, यतो बाला हसितुं, वक्तुं, रोदितुञ्च जानन्ति। मातुरेव तेन तेनेङ्गितेन दोलागतस्यापि शिशोर्नयने नृत्यतः। मातुः सहजवात्सल्यादेव शिशवस्तमुत्साह-माददते, येन शिशूनामङ्गेषु चञ्चलता तरङ्गिता तिष्ठति।

अत एव मातृविधुरा बाला असमय एव प्रायो वृद्धा इव गम्भीरा दृश्यन्ते। मातेव कान्या शिशोस्तास्ता अप्रासाङ्गिकीः कथाः स्नेहेन शृणुयात्। एवं स्थितौ मातृहीना दीना बालका अल्पभाषिणो भवेयुरेव। इत्थमतिशैशवे मनुष्याणां हृदयेषु यो महान् आघातो लगति, तस्य च्छाया यौवनेऽपि नापयाति। आपच स एवाघातो मनुष्यान् अन्तिमश्वासपर्यन्तस्य कृतेऽन्त-र्मुखान् निर्मिमीते।

सत्येवं विचारप्रचारे राजीवस्यान्तर्मुखी प्रवृत्ति-र्गम्भीरता वा समुचितैव प्रतिभाति। राजीवस्य मनः कोलाहलमये काशीनगरे तथा न प्रसीदति यथा ग्रामे। जनसम्मर्दं प्रति तु जन्मत एवास्य महती घृणा वर्तते।

(क्रमशः)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अर्वाचीनाः संस्कृतसाहित्यकाराः

(अनु० देवर्षिकलानाथशास्त्री साहित्याचार्यः B. A.)

[अस्माभिः कतिपयमासपूर्वम् आङ्गलभाषायां यन्त्रलिपीकृतं ( Typewritten ) एकं लघुपुस्तकम् अधिगतम्। एतत्खलु सुप्रसिद्धसंस्कृतेतिहासलेखकस्य डा० एम्० कृष्णमाचारियर M. A., M. L., Ph. D. M. R. A. S. भूतपूर्वमद्रासप्राड्विवाकस्य "संस्कृत-साहित्येतिहासत." ( History of classical Sanskrit Literature) केवलमाधुनिकशताब्दी-द्वये संजातानां साहित्यकाराणामितिहासं संकलय्य एकेन विदुषा लिखितमस्ति। एतस्मिन् हि भारतवर्षे संजातानाम् आधुनिकयुगीनसंस्कृतसाहित्यकाराणां (ईशवीय १८०० संवत्सरम् आरभ्य १९४० पर्यन्त समुद्भूतानां) विशेषतो दक्षिणाञ्चलवासिनां परिचयः, तद्ग्रन्थानां सूची समीक्षा च विशदं संकलितानि; भारतीपाठकानां संस्कृताध्येतॄणां गवेषकाणां च महते लाभाय स्युरित्यत्र लेखकेन आवश्यकपरिवर्तनानन्तरं परिवर्द्धनानन्तरं च संस्कृतेऽनूद्य यथाक्रमं प्रकाश्यते।

—सम्पादकः]

**महामहोपाध्यः श्री टी० गणपतिशास्त्री—** ( १८६० जन्मकालः ) अयं तिन्नवेल्लिप्रान्तीये तिरुवइ-रामसुब्ब ऐयरगृहे जन्मालभत। अनेन बाल्य एव संस्कृते सुमहान् अधिकारः कृतोऽभूत्, सप्तदशवर्षावस्थायां वायं "माधवी-वसन्त" नामकमेकं नाटकं प्राणैषीत्। अयं तिरुवेन्द्र संस्कृतकालेजस्याध्यक्षः, परस्ताच्च तिरुवेन्द्र महाराजप्रचालितसंस्कृतप्रकाशनगृहस्याधिकारी (Curator) अस्थात्।

संस्कृतजगति गणपतिशास्त्री भासस्य नाटकानां पुनरुद्धर्तृत्वेन प्रख्यातः। अनेनैव 'भासनाटकचक्रस्य' प्रद्धि केवलं श्रुतपूर्वमासीत्, गवेषणं प्रकाशनं च कृतमभूत्। भासनाटकानां शुद्धिं, परिष्कारं सम्पादनं च विधायानेन तेषां भूमिकायां संस्कृतनाटकसाहित्यस्य विषये महत्त्वपूर्णा सामग्री पुरस्कृता। एतस्य काव्यग्रन्थेषु श्रीमूलचरितम् (तिरुवङ्कुरराजवंशस्येतिहासः) भारत वर्णनम् तुलापुरुषदानकाव्यम् (तिरवांकुरराजहर्म्ये 'तुला-भार' प्रथामाधारीकृत्य) अपर्णास्तवः (पार्वतीस्तुतिकाव्यम्) चक्रवर्त्तिनीगुणमणिमाला (विक्टोरियासम्राज्ञा महात्म-त्म्यवर्णनम्) उल्लेख्यानि सन्ति। 'अर्थचित्रमणिमाला'-ख्यो लक्षणग्रन्थोऽप्यनेन प्रणीतो यस्मिन्नर्थालङ्का-राणामुदाहरणरूपेण तिरुवङ्कुरमहाराजस्य श्रीविशा-खरामवर्मणो गुणवर्णनपराणि पद्यान्युपहितानि। "सेतुयात्रानुवर्णन"नामके सुशोभने गद्यप्रबन्धे शास्त्रि-महाभागेन रामेश्वरयात्रायाः सुललितं वर्णमनुष्ठितम्। एतस्मिन् हि तत्कालीनसामाजिककुरीतीनां समालो-चना, हिन्दुशास्त्रीयरीतीनां महत्त्वम्, यात्राया दृश्यव-र्णनमित्यादीनि जनमनोहराणि संवृत्तानि।

**श्रीविधुशेखरभट्टाचार्यः—** अयं संस्कृतस्य, वङ्गभाषायाश्चप्रकाण्डो विद्वान् संस्कृतजगति सुभृशं प्रख्यातः। शान्तिनिकेतन, कलिकातानगरे सोऽयं प्राध्याकपदेऽतिष्ठत्। पालीभाषायां कृतश्रमोऽयं संस्कृते बहूनि काव्यानि प्राणैषीत्। यौवनविलासः, उमापरिणयः, हरिश्चन्द्रचरितम्, चित्तविलासः, चन्द्र-प्रभा इत्यादीन्यस्य काव्यानि। अयं 'मित्रगोष्ठी' पत्रि-कायाः ( काश्याः प्रचरन्त्याः ) सम्पादक आसीत। एतस्य संस्कृतभाषा नितान्तंसरला, सुललिताचास्ति। 'मित्रगोष्ठी'पत्रिकायां प्रकाशिता एतस्य लघुकथा अद्यापि सादरं स्मर्यन्ते संस्कृतसंसारे। एतस्य जन्म हरिश्चन्द्र-पुरे ( वङ्गप्रान्तीयमालदाप्रदेशे ) सन् १८७६ वत्सरे समभूत। एतत्पिता त्रैलोक्यनाथोऽभूत शान्तिनिके-तने कतिपयवर्षाणि स्थित्वा सोऽयं कलकत्ताविश्ववि-द्यालये प्राध्यापकपदेऽतिष्ठत्। अयं नानाविधपदवी-विभूषितोऽस्ति। मिलिन्द्रप्रश्नस्य संस्कृते समानयनमस्य कृते सुचिरन्तनस्य यशसः कारणम्। स्वसम्पादितायां मित्रगोष्ठीपत्रिकायां संस्कृतचन्द्रिकायां चास्य कविताः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

**गणतन्त्रदिवसः**—२६ जनवरी दिवसे भारते गणतन्त्रदिवसोयं महता समारोहेण संपूर्णेऽपि भारते गणतन्त्रदिवसोयं महता समारोहेण समामान्यत। भारतराजधान्यां देहल्यां राष्ट्रपतिमहाभागेन जल-स्थल-वायुसेनानां सैनिकपंक्तेः सैन्यसज्जा (परेड) सादरं निरीक्षिता। अस्मिन्नवसरे भारतस्य कोणकोणेभ्यो लोकनृत्यकाराणामामन्त्रणं व्यधीयत। अस्मिन् नृत्यकलाशिल्पिभिरेभिः स्व-स्वकलाचातुर्यं प्रादर्श्यत लोकसभासंमुखे। लोकनृत्यमिदं भारतीय-प्राचीनसंस्कृतेः सजीवं स्मारकमिति को वा विवेकी न वेद। अस्मिन्नवसरे डा० श्रीराजेन्द्रप्रसादमहाभागस्य विशेषनिमन्त्रणमधिगत्य पाकस्थानस्य 'गवर्नर जनरलः' गुलाममुहम्मदमहाभागो भारतमुपागच्छत्। महोदयेनानेन साकं पाकस्थानीयमन्त्रिमण्डलस्य त्रयोऽन्ये मन्त्रिमहाभागा अप्यासन्। गवर्नरमहाभागस्याऽस्य भारतशासनतन्त्रकृतं महत् स्वागतमभूत्। गुलाममुहम्मदमहोदयस्य भारतागमनेन भारतपाकस्थानयोः परस्पर-संबन्धे सौहार्दस्य सद्भावस्य च वृद्धिर्भवेदिति राजनैतिकानां दृष्टिः।

**उपाधिप्रदानम्**—गणतन्त्रदिवससमारोहेऽस्मिन् राष्ट्रपतिमहाभागस्य हस्तात् कला-विज्ञान-साहित्य-राजनीतिक्षेत्रेषु विशिष्टकार्यकर्तृपुरुषेभ्यो विशिष्टप्रकारका उपाधयः प्रादीयन्त। तत्र सर्वतो विशिष्ट उपाधिः 'भारतरत्नम्' डा० राधाकृष्णन्, श्रीराजगोपालाचारी, डा० सी० वी० रमन, डा० भगवानदास केला, विश्वेश्वरैयमहोदयेभ्य प्रादीयत। एवं 'पद्मविभूषणम्', 'पद्मश्रीः' इत्युपाधी अन्यान्यगण्यमान्य सदस्येभ्यः प्रदीयेताम्। सोयमुपाधिवितरणोत्सवः श्रीराष्ट्रपतिभवने ससमारोहमन्वष्ठीयत। एवमेव भारतस्य विभिन्नविभिन्नप्रान्तेषु सोयं गणतन्त्रदिवसोत्सवः संमानितोऽभूद्, यत्र राज्यस्य राज्यपालैः राजप्रमुखैर्वा सैनिकानां सैनिकसज्जाप्रदर्शनं निरीक्षितमभूत्।

राजस्थानराजधान्यां जयपुरेऽपि सोयं विशिष्टः समारोहः समभूद् यत्र राजप्रमुखेन श्रीश्रीजयपुरधराधिपेन सैनिकसंमानस्य (गार्ड आफ् आॅनर) निरीक्षणमक्रियत। किञ्च—यैर्भारतीयैः देशसेवाकार्ये वीरगतिः प्राप्ता तेषां विधवाभ्यः अन्यान्यसंबन्धिभ्यश्च 'वीरचक्रम्' पुरस्कारश्चापि प्रादीयद। सोयमुत्सवः स्वतन्त्रभारते सर्वप्रथमः समभूत्।

**संस्कृतविश्वविद्यालयः**—यावत्कालाद्भारतं स्वतन्त्रमघोष्यत तत्कालमारभ्यैव शासनतन्त्राधिकारिषु बहूनामेव महाभागानां संस्कृतभाषां प्रति भक्तिवादः प्रशंसावादाश्चाकर्ण्यन्ते। 'इयमेव राष्ट्रभाषासिंहासनोचिता' इत्यपि संस्कृतभक्तानां कर्णरसायनं श्रूयते। किन्तु अद्यावधि कार्यरूपे किं परिणतमिति चेद् गवेष्यते, तर्हि स्पष्टं निराशादर्शनम्। अन्यदेशीयभाषाणां कृते भारते भूयांसो विश्वविद्यालयाः सन्ति येभ्यः प्रतिवर्षं परश्शता 'ग्रेजुएट' पदधारिणो निष्पद्यन्ते। किन्तु या संस्कृतभाषा भारतीयसंस्कृतेर्मूलम्, यस्यामार्षं तद्विज्ञानं निहितं यस्य विज्ञानस्य बलेनैव भारतस्य मस्तकमद्याप्युन्नतम्, तस्याः संस्कृतभाषायाः कृते एकोऽपि विश्वविद्यालयो नास्ति। नापि चास्मिन् स्वातन्त्र्ययुगेऽपि तत्प्रतिष्ठापनस्योद्यमः। कियत्कालात्पूर्वमश्रूयत यत्कुरुक्षेत्रप्रान्ते संस्कृतविश्वविद्यालयस्थापनस्य विचारः प्रक्रान्त इति। किन्तु तदारम्भो नाद्यापि जनैर्विदितः।

संप्रति काशीस्थ 'पण्डित-पत्रिका' यामपठ्यत यत् विदुषामेकस्यां सभायामुत्तरप्रदेशमुख्यमन्त्रि-श्रीसंपूर्णानन्दमहाभागेन सोत्साहं साग्रहं च समुदीरितं "यत् संस्कृतविश्वविद्यालयस्य स्थापनायामेव मम मुख्यमन्त्रित्वस्य साफल्यम्। यद्यपि अस्मिन् कार्ये प्रतिबन्धका बहवः सन्ति किन्तु सर्वे ते सबलं समाधेया एव"। सभायामस्यां प्रतिबन्धका-परिगणय्य तेषां समाधानमपि महाभागेनानेन विहितम्। अन्ते तु प्रोक्तं महाभागेन– 'एकदा अहमघोषयं यत् वाराणस्यां संस्कृतस्य

---

...नीयो लेखाश्च प्रकाशं प्राप्ताः। अनेन बहुलबौद्धजातकानां पालीतोऽनूद्य संस्कृते निबन्धनमक्रियत, येषु ...जातककथा, बद्धविहगादीनि प्रसिद्धानि। भरतचरित्रमस्य ...ग्रन्थः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सूक्ति-सुधा

अधोऽधः पश्यतः कस्य महिमा नोपचीयते ।
उपर्युपरि पश्यन्तः सर्व एव दरिद्रति ॥ १ ॥

अपने से छोटे लोगों को देखने पर किसका गौरव नहीं बढ जाता तथा अपने से ऊँचे (अधिक धनवानों) को देखकर सब दरिद्रता का अनुभव करते हैं । १ ॥

आलस्यं स्त्रीसेवा सरोगता जन्मभूमिवात्सल्यम् ।
सन्तोषो भीरुत्वं षड् व्याघाता महत्वस्य ॥ २ ॥

आलस्य, स्त्री की सेवा, सदा रुग्ण रहना, जहाँ जन्मे उसी स्थान से प्रेम रखकर अन्यत्र न जाना, सदैव सन्तुष्ट रहना, कायरता, ये उन्नतिशील के लिए विघ्नकारी हैं ॥ २ ॥

विश्वविद्यालयो भविष्यति । यद्यपि अनेकैः कारणैर्मम-घोषणा तदा साफल्यं न गता । तथापि अधुना तत्कार्यं भविष्यति । यदि मम मुख्यमन्त्रित्वेऽपि संस्कृतविश्वविद्यालयो नाऽभवत् तर्हि मम मुख्यमन्त्रित्वं निष्फलमिति अहं मन्ये '

महाभागस्याऽस्य संस्कृतश्रद्धामभिनन्दन्तो हृदयान्तरतलेन प्रतीक्षामहे मङ्गलमयमिममवसरम् ।

**रूसप्रदेशीयं प्रतिनिधिमण्डलम् (डेलिगेशन)**—वर्तमानकाले रशियाप्रदेशो विज्ञान-सभ्यता-कला-साहित्यादि विषयाणामुन्नत्यै प्रतिपदं प्रवर्द्धते इति भवेद्विदितं लोकवृत्तान्तपाठकानाम् गतसचिकायां 'सोवियत' प्रदेशे संस्कृतभाषां प्रति कीदृक् समादरः, शिक्षाविभागे तदर्थं के के प्रयत्नाः प्रचलन्तीति संवादः पठितः स्यात्पाठकमहाभागैः । अस्मिन् वर्षेपि कला-साहित्यादि प्रणयिनां रशियावासिनां विदुषामेकं प्रतिनिधिमण्डलम् (डेलिगेशन) सर्वदेशेषु भ्रमन् भारतेऽपि सोत्साहं समागमत् । इतस्ततो भ्रान्त्वा संप्रति अस्मिन् मासे राजस्थानराजधान्यां जयपुरे समागच्छत् । अत्र हि राजस्थानस्याऽभूवन्निमे प्राघुणिकाः ।

फर्वरीमासस्य द्वितीयतारिकायां राजस्थानस्य शासकमण्डलेन विद्वत्संघस्याऽस्य सभाजननिमित्तम्, राजस्थानीयसंमान्यविदुषां परस्परपरिचयार्थम्, कलाकाराणां मिथः सौहार्दसंवर्द्धनार्थं, च 'खासाकोठा' स्थाने राजस्थानीयविदुषां कलाकाराणां च सुहृत्सभा प्रीतिभोजश्च नियमितोऽभूत् । अस्मिन् सम्मेलने राजस्थानीयैः कविभिः हिन्दीभाषायाम्, 'राजस्थानी' भाषायाम् च प्रतिनिधिकल्पिताः श्राविता अभूवन् रूसप्रतिनिधिमण्डलस्य संमुखे । पत्रस्यास्य संपादकेनाऽपि संस्कृतभाषायाः 'कवित्वम्' प्राकाश्यत चित्रकारैरात्मनिर्मितानि चित्राणि प्रदर्श्यन्त । ततः 'कलासंस्थानस्य' अध्यक्षेण श्री ब्रह्मानन्दमहाभागेन 'भूपाली' रागस्य स्वरलहरी सोत्साहं प्रकटिताऽभूत् । अस्मिन् संमेलने राजस्थानीयशासनविभागस्य कला वैदुष्यप्रेमिणः प्रायः सर्वे एव उच्चाधिकारिणः सममिलन् । अत्रत्यानां विदुषां कलापाटवपरिचयं प्राप्य अनन्तरं प्रतिनिधिमण्डलस्य द्वित्रैः विद्वद्भिः एकया विदुष्या च, रशियनभाषायाम् तथा द्वित्रैः प्रमुखविद्वद्भिः (उजबेग) भाषायां चापि कवितासंवादः श्रावितोऽभूत् । मण्डलस्यास्य संस्कृतमार्मिकाः संस्कृतभाषायां नवीनप्रकारस्य कवितामाकर्ण्य भूयस्तां प्रासीदन् । सर्वमपि मण्डलं संभूय कवये प्रचुरान् धन्यवादानददुर्निजभाषया ।

———

प्रकाशकः— जयबहादुरसिंह
पता—भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रक—राजस्थान प्रिंटिंग वर्क्स, हनुमान का रास्ता, जयपुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

राजकुमार

28-8-54

संस्कृतभाषा कथं मृतेत्युच्यते ? एतद्विषये अ० भा० संस्कृतसाहित्य सम्मेलनस्य सभापतीनां चिन्तामणिद्वारकानाथदेशमुखमहाभागां श्रूयतामुक्तिः-

नानाभाषा विविधविषयेष्वाश्रयन्ति प्रजास्ताः
गीर्वाण्या हि प्रसवजनिताः स्तन्यमस्याः पिबन्ति
सैषा धात्री कथमिव मृता गण्यते भारतेस्मिन्
जीवन्तीषु प्रचलिततगास्वङ्गपुष्टासु वाक्षु ॥ १

वर्षम् ४

षष्ठाङ्कः

मूल्यम्
वार्षिकम् ३) रु०
एकस्याङ्कस्य ।-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार पञ्चनद-आन्ध्र-सर्वकारैः स्वीकृता—

# विषय-सूची


| क्रमः | लेखाः | लेखकाः | पृष्ठ संख्या |
|---|---|---|---|
| १. | भारतश्रीः | पं० लक्ष्मीनारायणसाहित्याचार्यः उदयपुरम् | १२३ |
| | कथं दौर्भिक्ष्यसम्भावना | " | " |
| २. | विद्यालयेषु अनिवार्यं सैनिक-शिक्षणम् | पं० रतनलालमिश्रः आयुर्वेदाचार्यः नागौर | १२४ |
| ३. | सुखस्य मूल्यम् | पं० शिवप्रसादशास्त्री जयपुरम् | १२५ |
| ४. | पर्वतीया | पं० मदनमोहन झाः मुजफ्फरपुरम् | १२८ |
| ५. | किं ना विधातुं न कृतश्रमः क्षमः | पं० परशुरामशास्त्री डीडवाना | १३१ |
| ६. | पण्डित-वैज्ञानिकयोः सम्वादः | विद्याभूषण पं० गणेशरामशर्मा साहित्यरत्नम् | १३३ |
| ७. | मन्मथसंवत्सरस्वागतपद्यानि | अणे इत्युपाह्वः श्रीहरिसूनुर्माधवः | १३६ |
| ८. | गणतन्त्रस्य सफलतमप्रयोक्ता 'वीर विक्रमादित्यः' | पं० रतनलालमिश्रः आयुर्वेदाचार्यः, नागौर | १३७ |
| ९. | अर्वाचीनाः संस्कृतसाहित्यकाराः | देवर्षि कलानाथशास्त्री बी० ए० साहित्याचार्यः | १४० |
| १०. | सम्पादकीयम् | सम्पादकः | १४१ |



## —: संस्कृते युगान्तरम् ! :—

संस्कृतभाषा अमरवाणी। सेयं सदा सर्वयुगेषु साहित्यस्य प्राणभूता। इयं वर्तमानकालेऽपि भारतीय साहित्यं सर्वतः प्रख्यापयतीति निश्चयाम 'जयपुरवैभवम्' नाम सचित्रं नवीनं 'राजस्थान'वर्णनात्मकं पुस्तकं शीघ्रातिशीघ्रं संप्राप्यम्। अस्मिन् जयपुरराज्यस्य नगर-स्थान-राजमार्ग-उद्यान-उत्सवादीनां वर्णनं कवित्त-दोहा-सवैयादिहिन्दीछन्दोभिः संस्कृते दृश्यताम्। नीचैः संस्कृतटीका तथा हिन्दीभाषायामनुवादोऽप्यस्ति। सप्तशतपृष्ठात्मकस्य स्थाने स्थाने ब्लाकचित्रैर्मण्डितस्य सजिल्दस्य पुस्तकस्य अतिसुलभं मूल्यं ५) पञ्चमुद्राः।

प्राप्तिस्थानम्—

**भट्टश्रीमथुरानाथशास्त्री**

मञ्जुनिकुञ्जः, पृथ्वीराजरोड, जयपुरम्


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्मशास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षम् ५ | चैत्रपूर्णिमा, सं० २०१२ | अङ्कः ६

## भारतश्रीः

( कविकलानिधिः पं० श्री लक्ष्मीनारायणपुरोहितः, साहित्याचार्यः, महाराणासंस्कृतकालेज
साहित्यप्राध्यापकः, उदयपुरम् राजस्थानम् )

ऋद्धिं स्वातन्त्र्यसारं दिशि दिशि नितरां नेतृभिर्नीयमाना,
प्रादुर्भूतप्रमोदैर्भरतवसुमतीवासिभिर्भुज्यमाना ।
गाढेर्ष्याकूणिताक्षैरितरजनपदैः सस्पृहं वीक्ष्यमाणा,
स्थातुं सूर्यांशुयोगं जगति पुनरपि भ्राजतां भारतश्रीः ॥ १ ॥

देशो नः सर्व एवाऽनवरतमयतां धर्ममार्गेण, भोगान्
भुञ्जानो मोमुदीतु, श्रयतु च भगवत्पादसायुज्यमन्ते ।
द्रष्टुं चेदेवमिष्टं जनहितनिरतै राष्ट्रनौकर्णधारैः,
स्वीकार्या सर्वकार्ये प्रथितगुणगणा देवगीर्भारतश्रीः ॥ २ ॥

## कथं दौर्भिक्ष्यसंभावना

नेतारो यदि नेहरूप्रभृतयो दैवीं गिरं साम्प्रतं
मङ्क्षु प्रागिव भारते प्रसृमरां भूयश्चिकीर्षन्ति चेत् ।
लोपं प्राप्स्यति संस्कृतिः कुशलिनी प्राच्या न नो कर्ह्यपि,
काले वर्षति वारिवाहिनि कथं दौर्भिक्ष्यसंभावना ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# विद्यालयेषु अनिवार्यं सैनिक-शिक्षणम्

ले० रतनलाल मिश्रः आयुर्वेदाचार्यः, व्याकरणा...
काव्यतीर्थः उपाध्यक्षः—संस्कृतविद्यालयः,
नागौर ( राजस्थान )

इह खलु मानवेनादिमयुगादारभ्याद्य यावद् या काप्युन्नतिर्विहिता सा शक्त्युपासनाया एव फलमस्ति। शक्तिशब्देनास्माकं तात्पर्यं तद्व्यापकेनार्थेनास्ति। मानसिक-शारीरिक-बौद्धिकाध्यात्मिक-भौतिकीनां सर्वविध-शक्तीनां यथासमयमस्माकमावश्यकता भवत्येव। एकस्य सम्पादनं तथान्यस्य विघटनमुपादेयसिद्धं न भूत्वा जीवनस्यैकाङ्गिता–निर्मापकमस्ति। वस्तुतो विभिन्नशक्तीनां सुन्दर-समन्वय एव जीवनसाफल्यस्य मूल-मन्त्रोऽस्ति। एष समन्वयो व्यक्तौ, परिवारे, जातौ, समाजे राष्ट्रे वा भवेदिति। महाभारत-सदृशस्य राष्ट्र-व्यापिनो युद्धस्य सफलं पर्य्यवसानं न तु केवलार्जुनस्य शक्तावभवत्। न तथा कृष्णस्य शक्तावभवत्। तत्रोभयोः शक्तीनां समन्वय आवश्यक आसीत्। अतएव गीतायां सञ्जयोऽब्रवीत्—

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥१८।७८॥

सञ्जयोऽत्र कृष्णपार्थयोः कृते येषां विशेषणानां प्रयोगं विदधे तानि महान्ति सारवन्ति सन्ति। श्री–विजय-विभूति-ध्रुवनीतिसदृशानां दुर्लभवस्तूनां प्राप्तिर्न केवलं बुद्धिबलेनैव सम्भवा। नच शारीरिकबलेनापि। कृष्णं, योगेश्वरं कृष्णं तथा पार्थं, धनुर्धरं पार्थं च कथयित्वा सञ्जयो बुद्धिबलस्य शारीरिकबलस्य च सुन्दरमिमं समन्वयं तत्र व्यधात्।

महाभारतस्य युद्धमतीतस्य घटनास्ति। तथापि मानवजातिरधुनापि युद्धबिभीषिकयां सन्त्रस्तास्ति। एकमात्रं न, द्वे द्वे विश्वव्यापिनी महायुद्धे निरीक्ष्य तथ सन्नभविष्यति काले इतोऽप्यधिकभीषणस्यैकस्य तार्तीयीकस्य महायुद्धस्य खलु विचिकित्सा मानवजाति भयाक्रान्तामकृत। एतदेव भयं प्रत्येकराष्ट्रं निजसैनिक शक्तिविवृद्ध्यर्थं प्रेरयति। अतएव विभिन्नशिक्षा संस्थासु सैनिक-शिक्षणमनिवार्यं भावयितुमावश्यकं मनन्ति विपश्चिदपश्चिमाः। आधुनिका विद्यार्थिन ए तु भविष्यति काले राष्ट्रभरं भरिष्यन्तीति।

अत्रैका शङ्का स्वाभाविकी जागरूका वर्तते छात्राणां कोमल-मानसेऽनिवार्यसैनिकशिक्षणस्य परिणामो भविष्यति? अस्य शिक्षणस्य फलस्व... किं तेषां सुकोमले शान्तिप्रेष्ठे च हृदये युद्धलि... जागरूका न भविष्यति? किञ्चितस्पष्टतमशब्दैः कथ्येत तर्हि किमेतत् हिंसायाः पाशविकमनोवृत्ति... पोषणं नास्ति? शिक्षा-सम्बन्धि यत् वातावरणं वि... लयेषूपस्थितं भवति। किं तत् सैनिक-शिक्षणेन न रुद्ध-वातावरणमुत्पन्नं न भविष्यति? एतादृशीपुश... न विशेषसारोऽस्ति। अस्माद्विपरीतमेतद् वक्तुं शक्य... यत् सैनिक-शिक्षणं विद्यार्थिनामेकाङ्गिनीं शिक्षां पूर्णं प्रापयति। अनुशासनहीनताया वर्धमाना या मनोवृत्ति... विद्यार्थिनां कृतेऽभिशापरूपा विद्यते। अनुशासनही...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सुखस्य मूल्यम्

पं० शिवप्रसादशास्त्री उपनिरीक्षक संस्कृतशिक्षणालय जयपुर ( राजस्थान )

चतुर्दशशताब्द्यां राणालक्षसिंहो मेवाड़पतिरासीत्। राज्यविस्ताराय सोऽत्यन्तं पराक्रमं प्रादर्शयत्। दिल्लीपतेरपि कियन्तः प्रदेशास्तस्य राज्ये सम्मिलिताः। संसारे प्रसिद्धमस्ति यत् समरप्रिया राजानः स्वप्रकृतौ रुक्षतां कठोरताञ्च धारयन्ति परं लक्षसिंहस्तु प्रसन्नचेताः विनोदप्रियश्चाभवत्। तस्य विनोदप्रियताया एकदा विरुद्धं परिणामं निशाम्य सर्वा प्रजा व्यग्राभवत्।

एकस्मिन् दिने मेवाड़पतिः स्वसदस्यैः सह राजसभाभवने तस्थौ। तदैव मारवाड़प्रान्तस्य रावरणमल्लसकाशात् दूतः समागत्य सभाभवने प्रविश्य यथोचिताचारपूर्वकं मेवाड़पतेश्चरणयोरेकं नारिकेलं धृत्त्वा मारवाड़ाधीशस्य सन्देशमश्रावयत्। रावरणमल्लो राणालक्षसिंहस्य ज्येष्ठपुत्रेण राजकुमारेण चण्डेन सह स्वकन्याया हंसाया विवाहं कर्तुं प्रस्तावं प्रस्तावं प्रैषयत् परं लक्षसिंहो दूतेन सह हास्यं कुर्वन् स्वश्मश्रु शनैः शनैः स्पृशन् अब्रवीतिस्मः—भोदूतराज ! पश्यत्येव भवान् मम दाढिका तु श्वेता जाता। मह्यन्तु प्रस्ताव एष क्रीड़नकसम एव विद्यते। नारिकेलमिमं राजकुमारस्य

---

विद्यार्थी स्वशिक्षकात् किं नाम शिक्षितुं प्रभवति। अनुशासनहीनता साम्प्रतं भारतेवर्षे प्रसेस्त्रीयमाणा वर्तते। तद्विषये प्रायः सर्वे एव धीमन्तः कृतज्ञानाः सन्त्येव। सैनिक-शिक्षणस्य मूलमन्त्रोऽनुशासनपालनमेवास्ति। अनुशासन-शिक्षा च विद्यार्थि-समाजायोचिता नास्ति। अपि तु आवश्यकी विद्यतेतमाम्। विद्यालयेषु यां सीमां यावत् सैनिकशिक्षा प्रदीयते, तेनानुमीयते यत् विद्यार्थिनः पूर्णतः सैनिकवृत्तयो भविष्यन्ति? न समीचीनम्। अनेन तु केवलमियदेव प्रभवति यद् राष्ट्रे युद्धस्य प्रत्यक्षसङ्कटे प्रस्तुते, अन्यनागरिकान् अपेक्षयैतादृशा विद्यार्थिनः किञ्चिदधिकं क्षिप्रगत्या सैनिकयुद्धायोपयोगिनो निर्मापयितुं शक्या इति। एतादृशा विद्यार्थिनः पूर्णसैनिका न, अपि तु आंशिकसैनिका भवन्ति। अतो यदि भाविन्या आवश्यकताया दृष्ट्या कोऽपि राष्ट्रो निजजन-शक्ति-परिष्कारार्थं प्रयत्नशीलो भवति तर्हि एतन्नैव गदितुं शक्यते यत् एतादृशः प्रयत्नः श्लाघ्यो नास्ति।

सैनिक-शिक्षणस्यैकान्योपयोगितापि स्पष्टतमास्ति। विद्यालयेषु प्रदीयमानायाः शिक्षाया मुख्यमुद्देश्यमेकं विशिष्टदिशायां विद्यार्थिनां मस्तिष्कस्य विकासोऽस्ति। सैनिकशिक्षायाः समीकरणमेतदुद्देश्यस्य सिद्ध्यर्थं स्वर्णे सुगन्धिमुत्पादयतीति। अस्याः शिक्षाया योगेन तेऽधिककर्मठा भवन्त्येव, सहैव कठोर-जीवनस्यापि अभ्यासिनो भवन्ति। इत्थं सैनिकशिक्षणं तेषां शारीरिकविकाशे सहायकं भवत्तेभ्यः स्वास्थ्येन सह जीवनस्य भाविनि सङ्घर्षेऽविचलितार्थं शिक्षामपि प्रददाति। विद्यालयेषु बौद्धिक-विकाशस्य वातावरणं तु प्रस्तुतं भवत्येव। सैनिकशिक्षणेन शारीरिकशक्तिवृद्ध्यर्थमपि अनुकूलं वातावरणं भवति। एतद्विविधविकाशार्थमुपयुक्तः समयो विद्यार्थि-जीवनमेवास्तीति।

देशस्य गण्यमान्य-विद्वद्भिः शिक्षा-संस्थासु सैनिकशिक्षणमनिवार्यं भावयितुं यद् बलं दीयमानमस्ति। तदेतादृश-विचारैः प्रेरितमस्तीति। शम् इत्यलं पल्लवितेन।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


पार्श्वे एव नयतु भवान् ।

द्वापरे युगे यदा महाराजः शान्तनुः धीवरस्य कन्यया सह विवाहं कर्तुमैच्छत् तदा तस्य ज्येष्ठपुत्रो-देवव्रतः पितृपूजाया निस्वार्थभावस्य चापूर्वमुदाहरण-मदर्शयत्। स पितुः प्रसादाय धीवरस्य रुच्यनुसारं प्रतिज्ञातवान् यत्कदापि राज्यं नैषिष्यामि न च विवाहं करिष्यामि। कलौयुगे राजकुमारश्चण्डोपि स्वपूज्य-जनकस्य शापं सहर्षं स्वीकृत्य प्रतिज्ञां व्यदधात् यन्न कदापि राज्यं ग्रहीष्ये। यदा चण्डस्य पार्श्वे नारिकेलवार्ता गता ज्ञातश्चतेन यत् पित्रा दूतं प्रति हास्ये कथितं स्ववि-वाहस्य च हास्ये कामनापि विहिता साश्चर्यं सखेदञ्च क्षणं तूष्णीं स्थित्वा वार्ताहरमुवाच। दूतराज ! पितरम्मे कथ्यताम् यत् यस्या रमण्या हास्येपि मम पितुः विवाहस्य कल्पना स्यात् सा रमणी जननीसमा विद्यते। हंसया सह मे विवाहस्य कापि संभावना नास्ति।

लक्षसिंहः स्वपुत्रस्येदमुत्तरं श्रुत्वा विषण्णोऽभवत् दूतस्याग्रे च लज्जते स्म। विवाहप्रस्तावास्वीकरणेन मारवाड़धराधीशंस्यापमानो भवेत् भविष्यति च काले भयावहस्य युद्धस्य संभावनापि विद्येत। अतः स स्वविक्षोभं शान्तं कृत्वा चण्डं राजसभायामाह्वयामास। राजकुमार आगत्य पितुः संम्मुखेपि तदेवोत्तरं प्रायच्छत्। लक्षसिंहोऽकथयत्। प्रियसुत ! विवाहयोग्यावस्था ते विद्यते हास्यरसस्यास्वादमजानन् त्वमेवं निश्चिनोषीति राजनीत्यनभिज्ञता प्राकाश्यमेति। एवन्ते विवाहप्रस्ता-वास्वीकरणेन महान् प्रत्यवायो भविता। वृथैवैकेन मित्र-राष्ट्रेण सह विरोधो भविष्यति मेवाड़प्रान्ते समराग्निर्ध-क्ष्यति। अतस्त्वं मे कथनानुसारं मारवाड़प्रदेशस्य महीपतेः जामाता भवितुं सन्नद्धो भव। न कोपि विचा-रोत्र विषये विधेयः इति श्रुत्वापि राजकुमारो नामन्यत चण्डस्य पुरस्तु विवाहस्यास्य प्रस्ताव एव घृणोत्पादक आसीत्। यस्याः कृते तस्य पितुर्विवाहस्य कल्पना स्यात् तया सह स विवाहं विधातुं कथं सन्नद्धो भवेत्। सा तु तस्य जननी विद्यते। सांप्रतं राणा लक्षसिंहरुरुः कोप। चण्ड ? यदि त्वं स्वपितरं सङ्कटे पतितं दृष्ट्वापि न सङ्कोचमेषि न चलज्जसे हीनमेतं कर्म कुर्वन् तर्हि राजकुमारीं हंसामहमपि ते मातरं विधास्यामि। परं हंसायाः पुत्रो भविष्यति तर्हि स एव मेवाड़पतिर्न त्वम्। चण्डेन सहर्षं कथितम्। पितुराज्ञा शिरोधार्या। राजसभायाः समक्षं प्रतिजाने यत् जनन्या हंसायाः सुतएव मेवाड़पतिः पितुः पश्चात् भविष्यति। सदैवाहं तस्य प्रजारूपेण स्थास्यामि। लक्षसिंहो नारिकेलं स्वीचकार स्वयम्। हंसाया मेवाड़प्रान्ते आगमनं जातम् लक्षसिंहेन च सह सविधि विवाहो जातः।

शनैः शनैः कालो ययौ। राज्ञः प्रणयलिप्सा महिष्या राजलिप्सया मिश्रिता बभूव। तया श्रुतमासीत् यत् राजकुमारश्चण्डो राज्याधिकारी आसीत् परमधुना कुक्षिजातस्तनयो राजा भविष्यति। एतेनापि सा दुःखितासीत् यत् चण्डेन तस्या नारिकेलमस्वीकृत्य महानपमानो विहितः। यदि स नारिकेलं स्वीकुर्यात् तर्हि सा वृद्धभार्या कथं स्यात्। अनेन दुःखेन सन्तप्तायास्तस्याः सौभाग्येन कुक्षेः पुत्ररत्नमजनि। हंसायाश्चेतसि राजमातुः कल्पना या आसीत् सा वस्तुतः सत्या बभूव। सा कार्यमपूर्णं नैच्छत् राज्ञो वृद्धत्वात् मुकुलं युवराजं विधातुं तस्या आशा बलवती बभूव। यद्यपि चण्डः प्रतिज्ञातवान् व्यवहारेण स उदारोपि प्रतीयते स्म परं पूर्णतया मुकुलस्य पन्थानं निष्कण्टकं कर्तुं सा मितरां ऐच्छत्। लक्षसिंहस्तु स्वहृदये मुहुर्मुहुर्विचिन्त्य तं प्रसङ्गं चण्डस्याधिकारं हरन् व्याकुलो बभूव। राजसभा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कृतां घोषणां स्मृत्यापि स व्यग्रोऽभवत्। यद्यपि चण्डात् कापि शंका न परं चण्डायावश्यं काचित् शंका आसीत्। तेनैका युक्तिश्चिन्तिता यया तस्यौदार्यस्य प्रसिद्धिरस्ति। यवनैः पवित्रे गयातीर्थे आक्रमणं विहितं। लक्षसिंह- श्चण्डं समाहूयाब्रवीत्:-यवनैर्गयायामधिकारो विहितः। तस्य तीर्थस्य रक्षणं क्षत्रियाणां धर्मः। का मतिर्भवतः। चण्डेनोक्तम् पितुराज्ञा गरीयसी। शीघ्रमेवाहं शत्रून् हन्तुं गमिष्यामि स्वाभाविकीं हास्यशीलतां प्रदर्शयन् लक्षसिंहोऽवदत्। पितरि जीवति पुत्रो गयां न गच्छेदिति धर्मशास्त्रादेशो विद्यते। अतस्तत्राहमेव यास्यामि किन्तु शरीरस्यजरठत्वात्ततोहं नागमिष्यामि। मुकुलस्ते भ्राता ऽधिकारं लभेत। "मेवाड़देशस्य राजसिंहासनम्" चण्डस्य कोधिकारो भविता"? "अहं मुकुलनृपस्य प्रजारूपेण स्थास्यामि। इति श्रुत्वा लक्षसिंहः स्वमनसि पश्चात्तापेन व्यथितो भूत्वा प्राहः—पुत्र? अहं त्वादृशं पुत्ररत्नं क्षत्रियश्रेष्ठं प्राप्य सगर्वोस्मि। त्वं मेवाड़देशस्य रत्नम्। यदि तस्मिन् काले त्वं बालत्त्वं न कुर्यास्तर्हि सांप्रतं परिस्थितिरेषा कस्मादुपस्थिता भवेत्। चण्डोपि पितृस्नेहेनार्द्रः सन्नुवाचः—नाहं तेन बालत्त्वेन कदापि पाश्चात्तपामि न च मे मनसि व्यग्रतास्ति। प्रसीदाम्यहं पितुराज्ञां शिरोधार्यां कृत्त्वा स्वभ्रातुः कृते राज्यं त्यजन्। यस्य जनकः स्वपुत्रस्य व्यवहारेण प्रसन्नो भूत्वा परलोकं गच्छति स धन्यः पुत्रः। लक्षसिंहो- ऽप्युद्धाय गतः परं तत्रैव पञ्चत्वं गतः। मुकुलो मेवाड़- देशस्याधिपो बभूव परमधुना स बाल एवासीत् गयातीर्थं गच्छन् लक्षसिंह एवं कथयामास यत् मुकुलस्य बाल्यकाले चण्डो राज्यशासनं स्वीकृत्य बालनृपस्य साहाय्यं विधास्यति। धन्योसौ लक्षसिंहः। यथा स्वकाले चण्ड एक आदर्शतनयस्तथैव लक्षसिंहोपि आदर्शजनको- बभूव। लक्षसिंहः गयाक्षेत्रे युद्धे अतएव अगच्छत् यत् चण्डोपि स्वजन्मसिद्धादधिकारात् वञ्चितो न भवेत्। चण्डः स्वभ्रातुः प्रतिनिधिरूपेण राज्यभारं स्वीचकार। तस्य शासने दृढत्वं न्यायं दयाञ्च श्रुत्त्वा शत्रवो बिभ्यति स्म। स प्रजायाः सुशासको दुष्टानाञ्चोन्मूलको जातः। सर्वत्रदेशे शान्तिर्विराजते स्म परं परमेश्वरेण मेवाड़- देशस्य कृते शान्तिश्चिरस्थायिनी न निर्मिता कदाचिदन्तः कलहेन कदाचिच्चशत्रूणामाक्रमणेन मेवाड़देशो जर्ज- रितः। अद्य हंसा मुकुलजननी एव शत्रुत्त्वे बभूव देशस्य। एकदा हंसाया अग्रजः किञ्चित् पारितोषिकं भगिन्यै भागिनेयाय चानयत्। स्वभगिनीमपृच्छच्च चण्डो राज्यकर्मणि त्वत्तः संमतिं नयति वा न। राजमात्रा नेत्युत्तरे दत्ते जोधसिंहोऽवादीत्। विदितम्मया यन्मे- वाड़देशस्याधिपश्चण्डो न तु मुकुलः। यतः स स्वकर्तव्या दग्रे गच्छति। इति कथयित्वा गते भ्रातरि राजमाता नितरां चण्डस्य लोकप्रियतां शक्तिञ्च विज्ञाय मात्सर्ये- र्ष्यालुर्जाता। चण्डः शनैः शनैर्मुकुलस्याधिकारं हृत्वा स्वजनकस्यादेशञ्च विस्मृत्य मेवाडदेशस्याधिपो भवे- दिति मुहुर्मुहुर्बिभेतिस्म हंसा।

चण्डेनाप्येकदा विज्ञातम्। तस्य चेतस्तु कश्मल शून्यमासीत्। स त्वरितमेव राजमातुः प्रासादे गत्वा पादवन्दनं विधायोवाच मातः! अद्यावधि मेवाडदेशस्या- धिपस्य बालोऽहं राज्यकार्यं कृतवान् परमधुना राज्ये सर्वथा शान्तिर्विद्यते। महाराजो मुकुलोऽपि स्वप्रकृतेः प्रियोऽस्ति। मम कर्तव्यं पूर्णम्। अद्यावधि मे मनो- राज्यलोलुपं न त्वियते परं न जाने भविष्यति काले परि- वर्तनं भवेत्। अतो राज्यभारं स्वीकुरु। हंसा तु पूर्वमेवेत्थं कर्तुकामा अतः सा स्वचेतसि प्रसीदन्ती समुवाच। सत्यं तृष्णापरवशं मनः को विश्वसीत। कदा गन्तु-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# पर्वतीया

[पूर्वानुवृत्तम्]

ले० पं० मदनमोहनझाः व्या० न्या० सा० आचार्यः मुजफ्फरपुरस्थराजकीयसंस्कृतमहाविद्यालये साहित्यप्रधानाध्यापकः

एवं वधू-मुखमवलोक्य वधूगतमेव विविधं वदत गतं तन्महिलामण्डलम् । केवलं कियत्योबालिका द्वित्रागृहव्यापारविमुखास्तरुण्यश्च वधूं परिवेष्ट्य स्थिताः । यास्तन्महिलामण्डलमनुगतायाः पितृष्वसुरभावेऽवसरं लब्ध्वा वधूं वादयितुं नानाविधाश्चेष्टाः कर्तुमारभन्त ।

वधूरूपा श्यामा किंकर्तव्यविमूढतया तासामत्याचारं सहमाना मौनं न जहाति । तावत्तासामुपद्रवं पश्यन्ती, शृण्वती च वादनाग्रहवाक्यं तत्रोपस्थिता पितृष्वसा । तामालोक्यैवभीता इव बालिका एकतः स्थिताः ।

पितृष्वसा च ताः सस्नेहमभिहिताः कथमिदानीं यूयं वक्तुं वधूं व्यग्रां कुरुथ ? आगता चेद् वधूरेकदा वदिष्यत्येव, अपि च युष्माभिः सहैव प्रथमं वार्ताः करिष्यति, यतो यूयं समवयस्काः सख्यः, अहं तु द्वित्राणि दिनानि स्थित्वा स्वस्थानं गमिष्यामि ।

एवं तया आश्वासिता अपि ता बालिका अप्रत्याशनीय-साफल्यविरहेण खिन्ना एव मन्थरगत्या तस्मात् प्रकोष्ठात् निर्गत्य स्वस्वगृहाणि प्रतस्थिरे ।

इदानीं श्यामा एकान्तं लब्ध्वा प्रथमं स्वाङ्गलतिकां सरलामकरोत् । ततो लोचने उन्मील्य गृहोपकरणानि

---

कामोऽसि । शीघ्रमेव गन्तुकामः । "यादृसी तवेच्छा" हंसायाः कण्टकश्छिन्नः । चण्डेन सह स्नेहभक्ताः केचन मनुष्या अपि गताः ।

हंसा राज्यभारं वोढुं भ्रातरं समाह्वयामास भ्राता आगतः किन्तु 'सुताया राज्यैश्वर्यं द्रष्टुं जनकोऽपि समायातः । हंसायाः पिता रावरणमल्लः सिंहासने तिष्ठन् स्वक्रोडे मुकुलमपि स्थापयामास । सर्वे मारवाडदेशीयाः हंसायाः पितृवंशीयाः क्षत्रियास्तत्रैवागत्य वसंतो राज्यकार्यं सम्यक् चालयितुं सचिवा हि प्रौढेषु राज्याधिकारपदेषु नियुक्ता रणमल्लेन । मारवाडदेशस्य राज्यशासनं तु तेषां हस्तेऽविद्यत एव । परमेतत् दुहितुरपि राज्यं कथमपि रक्षणीयम् शनैः शनैः प्राचीना अधिकारिणोऽर्धचन्द्रं दत्वा निष्कासिता एवं प्रकारेण मारवाडाधीशस्याधिकारे मेवाडराज्यं गतम् । मेवाडवासिनः परस्परं कथयन्तिस्म परमेश्वरस्य लीलेयं केनाप्यवगन्तुं न शक्यते । केचन कथयन्ति यत् किमस्माकं नीतम् परं तथापि देशवासिनो न कदापि पूर्वमेतादृशीं दशां देशस्यापश्यन्नतस्तेषां हृदये महद्दुःखं जायतेस्म । भविष्यति मेवाडप्रान्तस्य सर्वथा नाशे तेषां पूर्वजानां नामापि न लभ्येत इति कृत्वा मेवाडप्रान्तीयाः क्षत्रिया अतिसन्तप्ता आसन् । परं न किमपि कर्तुं समर्थाः । यतो हि चेत् कोऽपि बाह्यशत्रुरागत्यैवमधिकारं कुर्यात्तदा तु ते सैन्यबलेन तं हन्युः परमधुना तु राजमातुरादेशेनैवं जातम् । प्रजाप्यत्यन्तं कष्टमनुभवतिस्म । ये जना लक्षसिंहस्य चण्डस्य वा शासनं सुखवर्धकं कथयन्ति ते येन केनाप्युपायेन दण्डं लभन्तेस्म प्रजायाः कष्टेन संचितं वित्तं नवागन्तुकानां विलासपूर्णे जीवने निरर्थकं नाश्यते स्म । चण्डस्तु दूरं गत्वा ग्रामे एकस्मिन् स्वसैनिकैः सह निवसन् मृगयया जीविकां चालयन् राज्यकार्यान्नितरां निरपेक्षो भूत्वा स्वाधिकारबाह्ये कर्मणि वार्तामपि कर्तुमनुचितं मन्यतेस्म । राजधानीस्थिता प्रजा तस्य निवसितिस्थानमपि न जानातिस्म ।

——



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...दं प्रारब्धवती । पश्यन्त्याश्च तस्याः पूर्वम् सुवि-...हृते रमणीये पर्यङ्के विरचितायां दुग्धफेनोपमायां सुकोमलायां शय्यायां दृष्टिरपतत् । तां शय्यां दृष्ट्वा ...चेतसि प्रादुरभूवन् विविधा मधुरभावाः यं पतिमधुना-...पि सा द्रष्टुमपि नाशकत् । तस्यैव पत्युः रमणीयं रूपं ...भ्रमं शीलं, स्वं प्रति सहजामासक्तिञ्च कल्पयित्वा ...तासवेव मदमयी संवृत्ता, अपि च प्रतीक्षमाणाऽ-...त् तं कालम्, यदा प्रियमिलनेनात्मनो यौवनस्य ...कृतार्थतां कल्पितवती आसीत् ।

इतः श्यामा सुख-स्वप्नं पश्यन्ती— आसीत्, ...न्यतो राजीवोऽपि यथामति विभवम् कल्पनां कुर्वन्न-...र्वत । स विचारयन्नासीत्—कदाहं तया सह मिलि-...ष्यामि ? मिलनानन्तरञ्च कास्कावार्ता भविष्यन्ति ? अहं तु गतमात्र एव प्रक्ष्यामि—त्वं किं पठसि ? तव ...पार्श्वे कियन्ति पुस्तकानि सन्ति ? त्वं कां कां खेलां जानासि ? एषां प्रश्नानामुत्तरे यदा सा स्वपाठस्येयत्तां पुस्तकानां संख्याम् खेलानां गणनाञ्च श्रावयिष्यति, ...ाहमवश्यं ततोऽधिकमधीतवन्तमात्मानं वक्ष्यामि, ...पुस्तक-संख्याञ्च विपुलतरामाख्यास्यामि । खेलायां ...ऽपि मां जेतुमेव कथं शक्नुयात्, इयतीः खेलाः ...ययिष्यामि यावतीनां नामान्यपि सा न श्रुतवती ...त् ।

धन्योऽयमवस्थाभेदः । युवती पत्नी किं विचार-...ति, बालः पतिश्च किं चिन्तयति । एवं चिन्तयतोर्द-...म्पत्योर्यदा रात्रौ मिलनसौभाग्यमभूत्, तदा विचित्रै-...वस्था समुत्पन्ना । श्यामा पतिमालोक्य चकिता बभूव, राजीवश्च पत्नीमालोक्य संकुचितः । द्वावपि विचारितं ...प्रवृत्तवन्तौ । श्यामायाः पति-बाल्यजनितः क्षोभो ...स्मृति-हेतुः, राजीवस्य कल्पितसमवयस्क-सहचरी दर्शनाभावः । एवमेकशय्यासीनावपि तौ मूकावास्ताम् । द्वयोरपि हृदये आशा-विरुद्धप्रसङ्गोपस्थितेर्विषमाप्रति-क्रिया प्रारब्धासीत् ।

श्यामाया मनसि भवति—किमेनमेव पतिमादाय स्वकीययौवनमहं कृतार्थयिष्यामि ? किमयं बालः प्रियो मम मनोभावं ज्ञातुमपि प्रभवेत् ? एतस्यावस्थातु संप्रति बालक्रीड़ोपयुक्ताऽस्ति, अयं युवकजन-स्पृहणीयां युवतीमादाय किं करिष्यति ? फलतो नाहमस्योपयुक्ता, न चायं ममोपयुक्तः । भगवन् ! किमकृतार्थमेव मम यौवनं गच्छेत् ?

राजीवो विचारयति—इयंतु 'कालिन्दी'— (एतन्नामिका पितृष्वस्रेया ज्येष्ठाभगिनी राजीवस्यासीत्) भगिन्या अवस्थां धारयति, सा पदे पदे मां भर्त्सयति, न च कदापि मम कीडने भागं गृह्णाति, अपितु क्रीडन्तं मां रुणद्धि, पठनाय प्रेरयति, यद्यहं कदापि तस्या-उपदेशं न मन्ये, तदा सा पितुरन्तिके मम दोषं कथ-यति, पिता च तद्वचनं प्रमाणीकृत्य मां तर्जयति । किमियमपि मया सह तथैव व्यवहरेत् ? यदा अत्रत्या-अपि मत्तोऽधिकावस्थावन्तो बालका बालिका वा कदापि मया सह सहानुभूतिं न प्रदर्शयन्ति, तर्हि इयमेव कथं प्रदर्शयेत् ? अस्तु, अस्या मनोभावग्रहणे का हानिः ? यदीयमपि कालिन्दीभगिनीव प्रतीयेत, तदा हमस्याः समीपे नागच्छेयम् ।

एवं मनसि विचार्य राजीवः श्यामां वक्तुं मस्तक-मुदस्थापयत्, तावत् पश्यति यदियं रोदिति, तस्या रोदनं दृष्ट्वा राजीव उद्विग्नो बभूव, कथमियं रोदिति ? अहं तु न किमप्यकथयम्-इति विचारयत एव तस्य मुखादनायासेन वागस्फुटत्—कथं त्वं रोदिषि ? किं ममागमनेन कष्टमभूत् ?



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


श्यामा राजीवस्य वचनं निशम्य अश्रूणि प्रोञ्छती प्रत्युवाच—न तवागमनं कष्टकारणम्, ममात्रागमनमेव मदीयकष्टहेतुः। किं त्वमत्र शयिष्यसे ? अन्यत्र वा ? यद्यत्रशेतुमिच्छसि—सुखेन स्वपिहि, अहमपि स्वपितुमिच्छामि, मम मनो न प्रसन्नम्।

अथ राजीवस्तामवोचत्—नाहमत्र महोष्मणि प्रकोष्ठे शयिष्ये, त्वं शेष्व, अहं बहिर्गत्वा शये, इति वदन्नेव राजीवस्ततो निरगात्।

किमनयोर्दम्पत्योर्मनोभावोऽनुचितोऽस्ति ? नहि, यतः श्यामायाः पुरो यौवनस्य मधुरा याचनाः समुपस्थिताः सन्ति, राजीवस्याग्रे शैशव-सुलभ-क्रीडा-कौतुकमुपस्थितमास्ते।

अतः परमपि कियद्दिनानि यावत् राजीवो ग्रामे अतिष्ठत्, परन्तु कदापि श्यामया सह वार्तालापो नाभूत्। वार्तालापं कर्तुं प्रागवदुत्साहोऽपि तस्य हृदयेनातिष्ठत्।

श्यामा यदीच्छेत्, तदा राजीवेन सह वार्तालापं कर्तुम शक्नुयात्, परन्तु सा राजीवादुदासीनेव भूताऽसीत्। साक्वचिदुपविश्य दिनानि नयति। परिचारिकाभिः प्रेर्यमाणा नित्यकृत्यानि निर्वर्तयति।

राजीवो यथापूर्वं कदाचित् गङ्गातरङ्गम् पश्यति, कदाचित् पर्वतशिखरेषु स्थितान् लघु-महातरून् निरीक्षते, कदाचित् कानन-रमनीयतां दृष्ट्वा मुग्ध-मना भवति। तस्य हृदये किमपि दुःखं नास्ति।

पिता पुनः पठितुं काश्यां प्रहेतुमिच्छति इति समाचारमकस्मादुपलभ्य राजीवस्य मनः ईषत् खिन्नमिवाभूत्। परन्तु विरोधं कथं कुर्यात्, फलतः पुनरसौ पूर्वपरिचितेन स्वशिक्षकेण सह काशीमगमत्, परिचारकः पाककर्ता ब्राह्मणश्च सहागच्छताम्।

( ५ )

इदानीं राजीवः स राजीवो नासीत्, शैशवस्य ते दिवसागताः, तैर्दिवसैः सह ताः सर्वा वार्ता अपि अगमन्।

अद्यत्वे स बी० ए० वर्गस्य सुन्दरायतिः छात्रोऽस्ति। तस्यावस्थेदानीं विंशतिवर्षेभ्य ऊर्ध्वमास्ते। शरीर-कुसुमं यौवनवसन्तमासाद्य पूर्णविकासमुपलेभे। एतेनावस्था-परिवर्तनेन साकमेतस्य मनोऽपि परिवृत्तम्, दृष्टिकोणोऽपि परिवृत्तः विचारधाराऽपि परिवृत्ता। यदि किमपि अपरिवृत्तमासीत्तर्हि तत्तस्य प्रकृति-प्रेम। नवीन-प्राकृतिक-दृश्यावलोकने तस्य मनो यथापूर्वमभिरमते। वस्तुतोऽद्यत्वे तस्य व्यथितं मनः प्रकृति-निरीक्षणादन्यत्र शान्ति-मेव नोपलभते।

मनोव्यथाया हेतुरासीत् यदसौ सम्प्रति युवक-यौवन-सुलभेन रागेण रक्तं तस्य हृदयम्। मित्रमण्डल-वार्ता-मात्रेण तस्य मनो न तुष्यति।

इदानीं तस्य हृदयं तस्याः प्रेयस्या आवश्यकताम् अनुभवति, या वल्गा-रहित-हयवदुपधावद्युव-जन-मनो गृहीत्वा बध्नाति। कथयितुं सा प्रेयसी प्राप्ताऽस्ति राजीवस्य, परन्तु युवजनमनोहरणाय यो विशेषो नारीषु अपेक्षितोऽस्ति, स विशेषोऽद्य राजीवस्य भार्यायां नास्ति। एकदा तस्यामपि स विशेष आसीत्, किन्तु तदा राजीवः विशेषं ज्ञातुं शक्तिरेव नासीत्। यावदसौ तं विशेषं परिचेतुमारभत, तावत् श्यामा (तस्य पत्नी) तं विशेषं रक्षितुम् नापारयत्।

रक्षितुमपि कथं शक्नोतु, यदवधि सा युवती पतिगृहमागता, तदवाधि आधिग्रस्तैवातिष्ठत्। मानसिक-भोजनाभावेन शारीरिकभोजनेऽपि सा शिथिलप्रयत्ना रेवाभवत्, येन पतिगृह गमनस्य वर्षाभ्यन्तरएव सा नानाविधै रोगैराक्रान्ता बभूव। अस्वाभाविक ब्रह्मचर्य-धारणमपि तस्या रोगे निदानंजातं भवेदित्यपि नारचर्यम्।
(क्रमशः)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# किं ना विधातुं न कृतश्रमः क्षमः

रचयिताः—परशुरामशास्त्री श्री रामानुजसंस्कृतमहाविद्यालय डीडवाना (राजस्थान)

धात्रा न पक्षाणि कृतानि देहिनाम्
किन्त्वद्य मर्त्या भ्रमणार्थमुच्चकैः।
आकाशमार्गेण व्रजन्ति निर्भयाः
किं ना विधातुं न कृतश्रमः क्षमः॥ १॥

भूमण्डले खे ग्रहवृन्दसङ्कुले
अग्नौ जले ग्राहनिवासभीषणे।
सर्वत्रगोऽस्त्यद्य नरो यथानिलः
किं ना विधातुं न कृतश्रमः क्षमः॥ २॥

यावन्न शक्नोति शतं हि जीविनाम्
कर्तुं समस्ते दिवसेऽपि वा भृशम्।
यन्त्रैः क्षणेनाद्य विधीयतेऽखिलम्
किं ना विधातुं न कृतश्रमः क्षमः॥ ३॥

दुर्जेयमत्यन्तप्रसिद्धमुच्चकैः
मर्त्यैस्तु गौरीशिखरं पदाङ्कितम्।
अद्यास्ति पुंभिः प्रकृतिः पराजिता
किं ना विधातुं न कृतश्रमः क्षमः॥ ४॥

शीतायते चण्डमरीचिजालको
भास्वान्, समुद्रः स्थलतां च गच्छति।
शक्तेः पुरस्तात्पुरुषस्य मानिनः
किं ना विधातुं न कृतश्रमः क्षमः॥ ५॥

चान्द्रायणेनैव विना सलोकतां
गन्तुं प्रवृत्तोऽद्य कलानिधिर्विधोः।
तं लोकमासाद्य पुमान् शमेष्यति
किं ना विधातुं न कृतश्रमः क्षमः॥ ६॥

पञ्चत्वमाप्तस्य कथं नु देहिनः
प्राणाश्च गच्छन्ति कुतः क्षणेन वै।
इत्थं विविच्यामरतां व्रजिष्यति
किं ना विधातुं न कृतश्रमः क्षमः॥ ७॥

विज्ञानविस्तारपटीयसा ततः
विष्णोः पदं यद्द्विपदां विनाशकम्।
पुंसा तदप्यात्मकृतं भविष्यति
किं ना विधातुं न कृतश्रमः क्षमः॥ ८॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# पण्डित-वैज्ञानिकयोः सम्वादः !

विद्याभूषणः पं० गणेशरामशर्मा, साहित्यरत्नम्

वैज्ञानिको मृत्तरयानेन व्रजन् पण्डितसुहृदं विलोक्य वदति—"अभि भोः,! प्रियसुहृद् ! विद्वन् !! नमो नमः !!! क्व प्रस्थितो भवान् ?"

पण्डितः—"महाशय ! कुशलं ते !! चिराद्दृष्टो भवान् !!! अहमधुना पाठशालां प्रति चलितोऽस्मि। तत्राद्य संस्कृतस्य कविसम्मेलनोत्सवः ! अहमेव तस्य संयोजकस्तन्मया शीघ्रतरमेव गन्तव्यं तत्रेति कृतसङ्कल्पः समयात्पूर्वमेव हि प्रस्थितोऽस्मि ! श्रीमान् कुतो व्रजति ?"

वैज्ञानिकः—"अहं तावत् प्रयोगशालां प्रति बद्धलक्ष्योऽस्मि। त्वं तु मित्र, न कदापि प्रयोगशालामस्माकमागच्छसि ! सदैव कविसम्मेलनेषु गलमास्फालयन् त्वं किं मुधा समस्तं कालमायुर्मानसीं शक्तिं च क्षपयसि ? भाषावादेषु जीवनं सकलं सङ्कीर्णमेकदेशीयं कुर्वंस्त्वं किमर्थं विज्ञानराजनीतिसमाजशास्त्रादिषु रुचिं नो धत्से ?? यदि त्वं मे प्रिय सुहृद् ! नान्यथा मन्यसे, तदाहं निर्भ्रान्तं वच्मि, यदधुनातनेऽस्मिन्समये श्रीमतां सर्वेषां पण्डितानामेवंविधानि कविसम्मेलनानि कियन्महत्त्वमासादयन्तीति तत्त्वतो न जाने !"

पण्डितः—"कथमेवं वदसि मित्र ! संस्कृतसाहित्यं, सुरभारतीयं संस्कृतभाषा च किमपि लोकातिशायि वस्तु ! तत्कृते समर्पितसर्वस्वा वयं संस्कृतपण्डिताः। अस्माकमेतत् प्राथमिकं कर्तव्यं यत् संस्कृतोन्नतये किमपि करवाम यथाशक्ति। अत्र किमाक्षेपयोग्यम् ? आम्, जाने तवाक्षेपस्य कारणम् ! भवांस्तु पाश्चात्यशिक्षाशिक्षितस्तत्समाजदीक्षितः। तत्प्रभावादेवास्माकमिमं पुरुषार्थं निन्दसि ! किं त्वं न जानीषे, जगति सनातनो वर्णाश्रमधर्मो, महर्षीणां चरिताचाराः, आर्यसभ्यतासंस्कृती, संस्कृतसाहित्यं, देववाणी संस्कृतभाषेति कापि महती हि सम्पत्तिर्भारतीयानामस्माकम् !!! तथाप्येतत् सर्वं यदि तुभ्यं न रोचते, तदतीव स्वाभाविकम्। नास्तिकस्य ते वेदशास्त्रेषु बतानास्था, संस्कृतं प्रति चाश्रद्धा, पण्डितोपेक्षणं चेति नवशिक्षितानां दुर्मनोवृत्तिः। अस्तु अस्मत्कृते तु भारतीया सभ्यता, संस्कृताभ्युदयाय किमपि कर्तव्यमेवेति सिद्धान्तीकृत्य समारब्धम् संस्कृतान्दोलनम्, प्रवर्तितानि, सम्मेलनानि संस्थापितानि प्रतिष्ठानानि, समाजाः, विद्यालयाः, संस्थाः पाठशालाश्च। यदि चात्र नान्यत् किमपि विशिष्टं फलं, तथापि प्रचारस्तु सम्पत्स्यत एव संस्कृतस्येत्येतावानेव परमो लाभः ! 'नहि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति' इति गीतायां भगवत्प्रोक्तमादृत्य संस्कृतस्य हितसाधनेच्छया प्रवर्तितमस्माभिरत्रान्दोलनम्।"

वैज्ञानिकः—"भगवन् ! क्षमस्व !! मया तु केवलं श्रीमत्कल्याणायैव प्रसङ्गतः सङ्केतितं यदधुना कविसम्मेलनायमेव केवलं जीवनस्य कोऽपि महान् विकाशकः सर्वश्रेष्ठो यद्धि जीवन् यावत् कश्चित् सचेतनो मानवधर्मा पुनः पण्डितो भाषाशिक्षकत्वं वा कविसम्मेलनानि संयोजयन् क्षपयेत् बत दुर्लभं मानवं जन्म, निखिलमायुः पुरुषार्थं, स्वास्थ्यं समयं च। किं न त्वं पश्यसि यदिदानीं केवलमेकस्या भाषायास्तत्साहित्यस्य च ज्ञानेन वा न साधीयान् भवति बुद्धेः सर्वाङ्गीणो विकाशः !"

पण्डितः— "हा, हन्त ! किं ब्रूयां मित्रवर ! महतीयं विडम्बना ! भारतीयैर्भूत्वापि च कैश्चिद्भ



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



दृशैव नवशिक्षितैरस्माकं प्राचीनं सनातनं स्वदेशीयं च सर्वं निरादृतम् ! आंग्लभाषां पठित्वा यूरोपं गतस्त्वं पाश्चात्याचारान् समाचरन् नास्तिकत्वमात्मनः प्रकट- यसि, किमन्यत् ?"

वैज्ञानिकः—"मित्र, मलिनं मनो मा कृथाः ! अहं तु खल्वेकदेशीयां प्रवृत्तिं विलोक्यैवमुक्तवानस्मि ! भूदेव !! मा विमनायस्व !!! यदि त्वं पुनः सङ्कीर्णमेव दृष्टिकोणमाश्रित्य वृथैव कुप्यसि मह्यम्, तदा त्वहमपि न किमपि सुस्पष्टं कटु सत्यं वक्तुं समुत्सहे ! अथ यदि त्वं मुधाऽखर्वं गर्वायसे, तदा त्वमेव वद, किं तावत्तव सम्मेलनैरेभिः कोऽर्थश्च साध्येत नाम ?? अपि भवन्तः संस्कृतपण्डिता वर्तमानं युगमेतत् पाषाण- काले परिवर्तयितुं प्रयस्यन्ति ? तदसम्भवम् ।"

पण्डितः— "त्वं तु सखे ! पठितोऽपि मुग्ध इव प्रतिभासि मे ! संसारेऽस्मिन् संस्कृतसाहित्यादृते कुतो- ऽन्यत्र भास्वरं वेदविज्ञानम् , शास्त्रतत्त्वज्ञानम् , लोकोत्तरा च वाङ्मयविभूतयो मनोहराः ???

साधूक्तं भोः—

'न वेत्ति यो यस्य गुणप्रकर्षं,

स तं सदा निन्दति नाऽत्र चित्रम् !!!"

वैज्ञानिकः—"वृथा विकत्थसे त्वं पण्डित मित्र ! यद्यहं वैज्ञानिकचिन्तनपद्धत्या नवीनं तर्कवादं स्थापयेयं तर्हि तुरतस्तदा त्वं सद्य एव भूयो दिगम्बरत्वं यातासि । अहमिदानींतनेषु पण्डितप्रकाण्डेषु संस्कृतवित्सु सार्व- भौमतर्कवादयुद्धे यावदपेक्षितां प्रतिभां सक्षमतां च न सम्भावयामि । यतस्ते यदात्र वादे निगृहीता भवन्ति तदा 'शेषं क्रोधेन पूरयेत्' इति क्षणादेवोत्तरायणं पलायनं चावलम्बन्ते । यदि चेत्तव मदीयं दृष्टिकोणं ज्ञातुमुदारा बुद्धिवृत्तिर्जिज्ञासा च तदा धैर्येण श्रूयताम् । अहं त्वां प्रसभं पृच्छामि यदधुना वेदानां क उपयोगः, शास्त्रैश्चातिप्राचीनैः किं सिध्येन्नाम ? नेदानीं विश्वस्य राष्ट्राणां सर्वेषां स्थितिस्तादृशी यस्यां नित्यमेव हि यज्ञाः प्रवर्तन्ते स्म, परलोककल्याणायैव लोकाः सततमध्यात्म- चिन्तनं कुर्वन्तिस्म । अधुना तु प्रजानां जीवनसङ्घर्षः कठिनो जटिलश्च संजातः । विज्ञानराजनीत्यर्थशास्त्रा- धीनमेव हि सर्वो मानवसमुदायः स्पन्दते, श्वासोच्छ्वासं च कुर्वन् प्राणिति । विज्ञानाविष्कृतैर्भौतिकैर्यन्त्रसाधनैः सम्पन्नं विश्वमखिलं प्रत्यक्षचमत्कारशून्यं शास्त्रं, काव्यं, कलां च तृणाय मन्यते !"

पण्डितः—"त्वं तु सुहृद्वर ! एम० ए० पर्यन्तं संस्कृतमधीतोऽपि कथमेवं ब्रवीषि ? किं न जानीषे वेदेषु शास्त्रेषु चास्माकं सर्वमपि भौतिकं दैविकमाध्या- त्मिकं च तत्त्वं निहितमास्ते । तत्र धनुर्वेदो ह्यायुर्वेदः, रसायनशास्त्रं, शल्यतन्त्रं, संजीवनीविद्या, कायकल्पम- र्थशास्त्रं, राजनीतिः, शिल्पं कलाकौशलमिति समग्रमपि च जीवसृष्टिपरब्रह्मसम्बन्धि लोकोपकारकं विज्ञानं सरहस्यं बीजरूपेण निहितं वर्तते । तत्र च पुनर्व्याकरणं न्यायः, सांख्यं, योगः, वैशेषिकं, मीमांसेति किं किं नास्ते ! अस्माकं कणादो महर्षिः परमाणुरहस्यं सर्वं साङ्गोपाङ्गं जानाति स्म । महाभारतयुद्धे शस्त्रास्त्राणि, वायुयानानि, सर्वाण्यपि विज्ञानस्य चरमविकासस्य भास्वन्ति प्रमाणानि ! जानन्नपि त्वं किं मुधा मया सह वादे वल्गसि । वृथैव त्वं युक्तिशून्यं तर्कजालं तनुषे ।"

वैज्ञानिकः—भोः ! बहूक्तं त्वया ! त्वं तु सर्वं भूत- युगीनं समर्थयसे, सहस्रवर्षेभ्योऽप्यथ प्राचीनम् ! मत्पक्षे तु वर्तमानाः सर्वेऽपि प्रत्यक्षप्रमाणभूता वैज्ञा- निका आविष्काराः, यैः पण्डिता अपि लाभलवलेशं भुञ्जन्त्येव ससुखम् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अथ च यदि श्रीमतां संस्कृतसाहित्ये सर्वमेव सुसिद्धमास्ते तदा वर्षाणां सहस्रेभ्यः संस्कृतं जानानाः श्रीमन्तः पण्डिता विचारशीलाः किमिति रेलगन्त्रीं, मृत्तरं, वायुयानं, वायुशकलं विद्युच्छक्तिप्रयोगान्, आकाशवाणीयन्त्रं अन्यमपि वा कमपि चमत्कारयुक्तं लोकोपयोगिनमाविष्कारं कर्तुं नो प्रबभूवुः ? वस्तुतो यूयं पण्डिताः प्रत्यक्षं जगद्वर्तमानमस्वीकुर्वाणा विगतकालीने स्वप्नदर्शन एव तत्त्वमीमांसां चिन्तयथ। अद्यत्वे विज्ञानं किं भवदधीनं स्पन्दते ? अर्थव्यवस्था श्रीमद्विवेकायत्ता ? राजनीतिविधिविधानानि, शासनतन्त्रं च पण्डितानां मुखमपेक्षन्ते वा ? किंविधं वा चमत्कारविशेषं प्रदर्शयितुं सक्षमा यूयम् ? दीपशलाकां, सूचीं, लेखनीं, उपानहौ, वस्त्राणि, उपनेत्रं, छत्रं घटिकायन्त्रमित्यादि सर्वमपि यन्त्राविष्कृतं वस्तुजातं प्रतिदिनं स्वजीवनचर्यायां प्रयुञ्जाना अपि भवन्तो भूदेवा विज्ञानं तिरस्कुर्वन्तीति विलक्षणम्।"

पण्डितः—"अरे ! त्वं वृथाक्षिपसि पण्डितान् संस्कृतं च। यूरोपादिदेशानां लोकैः सह सम्पर्कमधिकाधिकं स्थापयन्तो भवत्सदृशा भारतेऽपि तत्तद्देशीयानामिव जीवनचर्यामप्राकृतां, सभ्यतां च कृत्रिमामङ्गीकुर्वाणा वर्णाश्रमं विनाशयन्तः प्रजातन्त्रशासनपद्धतिं प्रवर्तयमानाः प्रजानाम् योगक्षेमं बाध्यमानं जीवनसङ्घर्षं च जटिलाज्जटिलतरं जायमानं कामयन्ते, ततो हि यन्त्रवादं बहु मन्यन्ते। न जानीथ किं यदद्यत्वे संसारेऽस्मिन् विज्ञानशक्तिदर्पादेव जनसाधारणानां जीवनमशान्तं समजायतेति ?

अत्रास्माकं देशे भारते सुविस्तृताञ्चला धरणिः सर्वरत्नगर्भा, शस्यश्यामला, नात्युष्णं न चातिशीतं वातावरणं, षड्ऋतुविभक्तो नैसर्गिकश्च वत्सरक्रमः, तत्र यूरोपीयाणामिव यन्त्रप्रवर्तनस्य का बत महती आवश्यकता यदान्नवस्त्रादिकं सर्वमनायासं हि सुलभम्। अन्यदेशीयैः सार्द्धं राजनीतिसम्बन्धघनिष्ठता, भारतस्यास्य तथाकथितमन्ताराष्ट्रियत्वं किमर्थं यदि चायं देशः स्वावलम्बनोऽपि परदेशीयां राजनीतिपद्धतिमाश्रयेत्। अन्नं, वस्त्रं, पत्रं, पुष्पं, फलं, जलं, गोरसाः, इक्षुदण्डा इत्येतावदेवार्थसम्पत्सुखदमत्रत्यमर्थशास्त्रम्। तदा पुनः किं प्रयोजनमत्र देशे यन्त्रवादप्रवर्तनस्य, राजनीतेरर्थशास्त्रस्य च परदेशीयानाम् ?"

वैज्ञानिकः—"धन्योऽसि महाभाग ! तवेदं कवित्वं वाङ्मयरचनाप्रावीण्यं, सरलजीवनोपदेशं च नूनमहं श्लाघे, परन्तु मित्र, क्षम्यतां, त्वमतीव सङ्कीर्णं चिन्तयसि सुविस्तृतमपि विशालं जगत्। अद्यत्वे यान् भवन्तो भूदेवा नास्तिकान् मन्यन्ते, अवैदिकान्, वर्णसङ्करान् राक्षसान् वा कथयन्ति ते एव जले, स्थले, अन्तरिक्षे सर्वत्राव्याहतगति विज्ञानशक्तेर्बलाद्विस्फूर्जत् स्वकीयं शासनतन्त्रं स्थापितं वर्तते। विज्ञानाविष्कारबलात् तैर्भूगोले, खगोले ग्रहमण्डले, विद्युल्लोके, मेघेषु, अग्नौ, वायौ, सर्वत्र स्वसत्ता प्रसभं संस्थापिता। श्रीमतां धर्मधुरन्धराणां पण्डितानां श्रीमत्पूर्वजानां च परिषदस्यां विदेशीयैर्नाविकैः स्वाधीनं नवं राजतन्त्रं प्रचारितम्। नैकेनापि संस्कृतपण्डितेन मन्त्रबलाद्वेह विज्ञानेन वा अध्यात्मयोगप्रभावाद्वा निवारिता वर्णसङ्कराः ! तन्मन्ये भवन्तो भारतीयाः पण्डिता वेदानामपौरुषेयत्वं पूर्वजानां पराक्रमं, संस्कृतसाहित्यस्य च महत्तां श्लाघमानाः कुलीनाः सरलाः सदाचारा अपि परब्रह्मणो मायाशक्तेश्चिद्विलासैः परिस्पन्दमानं नवनवविकारं व्रजद्भास्वरं विराड्विश्वमेतत् पश्यन्तोऽपि न पश्यन्ति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



"पुराणमित्येव न साधु सर्वम्" इति तु त्वं सम्यक जानास्येव सखे ! किमधिकं ब्रूयाम् !"

पण्डितः—"भोः, जाने ! नवशिक्षिता यूयं सर्वे पाश्चात्त्यानां पालितपुत्रास्तेभ्यो गृहीतसंरक्षणास्तदाचार-विचाराः स्वदेशमिमं शान्तजीवनाभिलाषिणं विज्ञान-राजनीतिराष्ट्रवादयुद्धे बलात् पातयितुं प्रयस्यथ। पूर्वमनार्यैः पीडितास्ततो यवनैः पुनराङ्ग्लैरधुना विज्ञान-वैदिभिश्च पीडिताः प्रजा नास्तिकत्वं स्पृशन्ति, तदा संस्कृतसाहित्यज्ञानां विदुषां राजसंरक्षणं विना कथं वैज्ञानिकत्वं प्रसिध्येत् ! प्रजा नास्तिकत्वं गताः। धर्मो नाम मूर्खत्वं, चरित्रं चित्रपटे, कपटे च पाण्डित्यं, तदा कथं न लोके भ्रष्टाचारा, उत्कोचाः, महर्घता, अननुशासनं, निर्मर्यादिता इत्यादयो दोषा जायेरन् ! यदि लोका वर्णाश्रमसनातनमनुवर्तमानाः संस्कृतभारतीं पठन्तोऽध्यात्मधर्मोपदेशान् पण्डितेभ्योऽनुदिनं शृण्वन्तोऽभविष्यन् तदा नात्र भारते सैषा स्थितिः शोचनीया-राजकता वाभविष्यत्। शासनं यावन्न संस्कृतं संरक्षेत् तावद्राष्ट्रस्योन्नतिर्न शोभना भवितुमर्हति विज्ञानवादेन। संरक्षणं यदि स्यात्तदा तु संस्कृतपण्डिता अपि विज्ञानाविष्कारकलां कलयितुं ध्रुवं समर्थाः।"

वैज्ञानिकः—"सुहृद्, तव संस्कृतं प्रति या प्रीतिः संस्कृतज्ञेषु च बहुमानः पक्षपातस्तामिमां भवद्भावनामनपायिनीमहं प्रशंसामि। तथापि त्वं नाग्रदर्शी न च त्वं परिणामदर्शिनीं विकाशाग्रगामिनीं वैज्ञानिकीं प्रतिभां धत्से। पुरातनं सर्वं चिन्तयंस्त्वं, अपरिवर्तनवादी अदेशकालपात्रे च प्रवर्तसे। अद्याहं त्वां प्रतिजाने, यदि संस्कृतोद्धारधुरन्धरा पण्डिताः कमपि चमत्कारविशेषं प्रदर्शयितुं नवीनं कमप्याविष्कारं वा कर्तुं संरक्षणं साधनानि, धनानि चापेक्षन्ते तदेतत्सर्वं जाते स्वराज्ये स्वाधीनेऽस्मिन् प्रजातन्त्रात्मके शासने भवदाधीनमेव मन्यताम्। सर्वेऽपि भारतीया वैज्ञानिकाः शासनाधिकारिणः संस्कृतस्याभ्युत्थानमुपयोगं च कामयन्ते। सर्वा अपि राष्ट्रियाः प्रयोगशालाः, सर्वेऽपि च विद्यालया यन्त्राणि सर्वाणि चोपकरणानि संस्कृतविदुषां चरणेषूपायनीकर्तुं शक्यन्ते। अपि च भवन्तः किन्तु किमपि कर्तुं प्रोत्सहन्ते ?"

पण्डितः—"यदि साधनानि सुलभानि स्युस्तदा संस्कृतज्ञा अवश्यमेवास्यां दिशि प्रगतिं कर्तुं शक्नुवन्ति। अस्तु, अधुना विलम्बो जायते। विषयोऽयं साहाय्यापेक्षो बहुजनविमर्शयोग्यः। पुनर्मिलितावावां विचारयिष्यावः।"

वैज्ञानिकः—"साधु ! अद्य तु भवांस्तत्र संयोजकः, अहं तु प्रयोगशालायां नवान्वेषणेऽद्य किमपि तात्त्विकं प्रयोक्तास्मि। यदि कदाचित् कविसम्मेलनेभ्योऽवकाशं लभसे, तदा तत्र मे प्रयोगशालां नूनमायाहि। तत्राहं ते चमत्कारकरं कमपि प्रयोगं दर्शयिष्यामि। मौखिकेन वादेन किं सिध्येत् ? अहं तु 'यः क्रियावान् स पण्डितः' इति समर्थये। क्षम्यतां यद्यत्र प्रसङ्गे मया किमपि परुषं त्वां प्रत्युक्तं चेत्। अद्य तु तावत्कविसम्मेलनं साध्यताम् ! नमोनमः भूदेवाय तुभ्यं नमोनमः।"



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# मन्मथसंवत्सरस्वागतपद्यानि

अणे इत्युपाह्वः श्रीहरिसुनुर्माधवः

जयवर्षस्याऽवसाने मन्मथोऽब्दः प्रवर्तितः ।
नमस्तस्मै जनानन्दहेतवे मीनकेतवे ॥ १ ॥
ब्रह्मणस्त्वम् दिव्यशक्तिः प्राणिसृष्टिविनिर्मितौ ।
विश्वप्रेमोद्भवस्त्वत्तो जीवनानन्दकृत् प्रभुः ॥ २ ॥
धर्माऽविरुद्धो भूतेषु कामोऽस्मीति कृतः स्तवः ।
गीतासु भगवता यस्य मन्मथाय नमो नमः ॥ ३ ॥
भस्मीभूतम् वपुस्तस्य रुद्रमन्यूत्थवह्निना ।
लिंगदेहाऽवशिष्टः सन् प्राणिनाम् देहमाविशत् ॥ ४ ॥
दृष्ट्वा मनसि शंकाऽऽसीदर्धनारीनटेश्वरम् ।
जितः शंभुर्मन्मथेन जितो मारः शिवेन वा ? ॥ ५ ॥
इन्द्रेण पदलुब्धेन तपोभंगे नियोजितः ।
गताः पराजितास्तेन तपोभ्रष्टा अधोगतिम् ॥ ६ ॥
बुद्धभीष्मशुकैः कामो यमिभिश्च पराजितः ।
अत्यय्याम् गतिम् श्रेष्ठाम् तज्जेतारः समाप्नुवन् ॥ ७ ॥
येन सुमप्रहारेण जगत् सर्वम् वशीकृतम् ।
एक एव जगज्जेता मन्मथो दृश्यते मया ॥ ८ ॥
अन्येषाम् दिग्जयप्रौढिर्नृपाणाम् भाति मे वृथा ।
धरैकदेशमाक्रम्य विश्वविप्लवकारिणाम् ॥ ९ ॥
शस्त्रयुद्धेन नैवाप्तिर्विश्वशान्तेः कदाचन ।
अणवादिस्फोटगोलानाम् निर्माणम् विश्वनाशनम् ॥ १० ॥

सम्प्रश्रयपरिप्रश्नैः स्नेहसंभाषणादिभिः ।
सामयत्नः सपत्नस्य कर्तव्यः परिवर्तने ॥ ११ ॥
विनायकेन संप्राप्तम् भूदानेऽध्वरे यशः ।
समुत्पाद्याऽतिविश्वासम् लोकचित्ते स्वकर्मसु ॥ १२ ॥
मानवो मानसाऽऽधीनस्तन्मनः परिवर्तनात् ।
भवेत्सिद्धिरसाध्येषु विषयेष्वपि निश्चिता ॥ १३ ॥
फ्रेन्च सत्ताङ्कितस्थानम् पांदेचर्यादिभारते ।
फ्रेन्चानामानुकूल्येन समाविष्टम् जयेऽयने ॥ १४ ॥
गोमान्तको भारतस्योदधिरक्षक आत्मजः ।
पोर्तुगीजभुजंगानाम् विषबाधाऽतिविह्वलः ॥ १५ ॥
पोर्तुगालबिलम् सर्वे प्रविशन्तु भुजंगमाः ।
चेष्टाः कालानभिज्ञानाम् पश्चात्तापस्य कारणम् ॥ १६ ॥
गोमान्तको मन्मथेऽस्मिन् समालिंगतु भारतम् ।
विधूतकल्मषः पुत्रः समायातु पितुर्गृहम् ॥ १७ ॥
प्रादुर्भवतु विश्वासस्तिरो भवतु संशयः ।
विश्वे वहतु स्नेहाब्धिः कलहोम्भस्सु मज्जतु ॥ १८ ॥
मथ्नातु मन्मथः पापम् सुकृतम् ग्रथ्नातु शोभनम् ।
बध्नातु पारतंत्र्यं च सम्पुष्णातु स्वतंत्रताम् ॥ १९ ॥
ऊनविंशदलम् पद्मम् मन्मथाय समर्पये ।
कालचक्रधरो देवः संतुष्यत्वनयाऽर्चया ॥ २० ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# गणतन्त्रस्य सफलतम-प्रयोक्ता

# वीर–विक्रमादित्यः

नि० रतनलालमिश्रः आयुर्वेदाचार्यः, व्याकरणशास्त्री, काव्यतीर्थः, संस्कृतविद्यालयः, नागौर ( राजस्थान )

मर्यादा-पुरुषोत्तमस्य भगवतः श्रीरामचन्द्रस्यानन्तरं वीरप्रसविन्यां पुण्यसलिलायामस्यां मातृभूमौ भारतीय-जनता-हृदयसिंहासनेषु यद्याधिपत्यमधिगच्छति साधिकारं चेद्गणतन्त्रस्य सफलतम-प्रयोक्ता वीरशेखरीभूत उज्जयिनी-नायक उज्जयो विक्रमादित्य एव। तत्सम्बन्धीय-नानाविधचेतश्चमत्कृदुद्यादर्शाभिभूत–लोककथाभिश्चन्द्रायिताभिर्भारतीय–जनता-चेतश्चकोरोऽद्यत्वेऽपि नैसर्गेण प्रतिबद्धो लीलायते। विक्रमनाम्नैव भारतीय-प्रतिजन-मानसे विचित्रास्थाया एवमपूर्वोत्साहस्य च लोकोत्तर-प्रवाहः प्रवाहितो भवति, स तु सुतरां वाचामगोचर एवेति। यद्विषये महाकविर्गुणाढ्यः प्रोवाच—

स पिता पितृहीनानां बन्धूनां च स बान्धवः।
अनाथानां च नाथः स प्रजानां कः स नाभवत्॥

एषा गुणाढ्यस्यातिशयोक्तिः कथमपि भणितुं न शक्यते यतो हि गतद्वि-सहस्राब्दीतो विक्रमं प्रति भारतीयजनताया या महती श्रद्धा सन्ततं प्रवहति, सा तस्य महनीयायाः कीर्तेः साक्षिकारिते। विक्रमस्यास्याः लोकप्रियताया रहस्यं सुतरामद्यापि निगूढमस्ति। परं लोकोक्तिरीदृशी विद्यते, यत्–स महापराक्रमी दीनोद्धरणोचितचित्त एवं योद्धाऽऽसीदिति। शकानां दुर्जेयामेवं शान्तिविघातिकां शक्तिं खण्डश आक्रोश्य भारते शान्तिमयं लोकप्रियं च स शासनमतिष्ठिपत् किन्तु विक्रमस्यैषा शक्तिरेवैतल्लोकप्रियतायाः कृते पर्याप्ता नास्तीति।

अत्राहमेतत्स्पष्टं चिकीर्षामि यत्—यस्य विक्रमस्य यशोध्वजो ध्रुवायमानः चिरकालं यावद् भारतीयगगने दोधूयाञ्चक्रे। स तु न गुप्तवंश्यः, न च मौर्य्यवंश्य आसीदिति। समुद्रगुप्तः चन्द्रगुप्तो वा विक्रमादित्यस्य पदवीं साधु जग्राह, किन्तु ऐतिह्य-तथ्यैरद्यैतन्निरचीयत यत् प्रथितो विक्रमादित्य उज्जयिन्या नायक आसीत्। यः पराक्रम-शक्ति-बलेनैव न, अपि तु प्रेम्णोत्तमनीत्या चैकदा भारतस्य स्थितिं द्रढीयसीं तथा स्वर्गोपमां निर्ममे। इदमीय-गवेषणाभिरेतत् प्रमाणितं यत् स साम्राज्यवादी न, अपि तु जनतन्त्रप्रणाल्याः समर्थक आसीत्। सर्वोत्कृष्टवैशिष्ट्यमेतदस्ति तस्य, यत् स भारतस्य प्राचीनगणतन्त्रप्रणाल्याः सफलः प्रयोक्ताऽसीत्। तदानीन्तनभारतस्यापार-वैभवं तथा तस्य च कारणेन विक्रमस्यातुलनीयकीर्तेरेतदेव निगूढतमरहस्यमस्तीति।

यद्विक्रम-संवत् विक्रमेण संस्थापितमुच्यते, पूर्वं तन्नामासीद् मालवगणस्थितिरिति : तत्प्रचालितसंवत्सरस्यैतन्नामकरणमेव हि तस्य महाप्रभावस्य शासनप्रणा-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ल्याश्च प्रामुख्यमावहति। इयदपि न, तदानीन्तनप्राप्त-मुद्रा अपि विक्रम-शासन-प्रणालीमाभासयन्ति। तासु मुद्रासु "मालवानांजयः" इत्येवाङ्कितमेव स्पष्टयति यद्विक्रमस्य शासनप्रणाली वैयक्तिक-महत्त्वाय प्रश्रय-दात्री राजतन्त्रप्रणालीतः सर्वथा भिन्नाऽऽसीदिति।

भारतीय-नीति-शास्त्रस्य पण्डित-प्रकाण्डं तथा तत्त्वदर्शी भर्तृहरिः तात्कालिक-राजकीयवातावरणस्य यच्चित्रं निम्नपद्ये चित्रयामास, तेन विक्रमादित्यस्य व्यक्तित्वस्य, तस्य च शासनव्यवस्थानुमीयतेः—

सा रम्या नगरी महान् स नृपतिः सामन्तचक्रं च तत्,
पार्श्वे तस्य च सा विदग्ध-परिषत्ताश्चन्द्रबिम्बाननाः।
उन्मत्तः स च राजपुत्रनिवहस्ते वन्दिनस्ताः कथाः,
सर्वं यस्य वशादगात् स्मृतिपथं कालाय तस्मै नमः॥

समस्ताभाव-विधुरं तदानीन्तनं केवलमिदं राज-नीतिकमेव वातावरणं नास्ति। अत्र देशस्य समृद्धिः शक्तिः तथा तद्विपुलवैभवं स्पष्टतया प्रतिबिम्ब्यते। "ताः कथाः" इत्यत्र महात्मनो भर्तृहरेर्या मार्मिकी वेदना लक्ष्यते, सानुभवगम्यास्ति। "ते वन्दिनः" इति पदेन साधारणाः साम्प्रतिका भाटा न लक्ष्यन्ते, ये केवलं राज्ञो महिमानमुपवर्ण्याजीविकामर्जयन्ति। एता-दृशा भाटा भर्तृहरेर्हृदये स्थितिमाप्तुं न शक्नुवन्ति। विक्रम-कालिका ये कवयः कालिदासादयो यन्निज-महोत्तर-दायित्वमपीपलन्, तत्तदानीन्तन-वन्दिजनानां व्यक्तित्व-परिचायकमस्ति। परमार्थतस्तात्कालिका वन्दिन एकगणतन्त्रराष्ट्रस्य वाणीरूपे विक्रममेव खलु प्रशशं-सुरिति।

कालिदासो विक्रमं शिश्राय। एतज्ज्ञात्वा वयं विक्रमकालिदासयोस्सम्बन्धं तद्विधप्रायं मन्महे यथा चन्दबरदाई-पृथ्वीराजयोरिति। एक-साम्राज्यशा-सम्राड्रूपे विक्रमावबोधेनैवास्माकं ज्ञानं विपरीतार्थं भवति। वस्तुतो विक्रमः कुल-परम्परागतराज्याधिकारी नासीत्। नापि कालिदासो विक्रमं श्रित आसीद् यत् मालवगणानां पुञ्जीभूतशक्तिरूपे कालिदासस्य प्रतिष्ठाऽऽसीत्।

विक्रमादित्यो मालवगणैर्निर्वाचितगणराज्यस्य प्र[...] आसीत्। एतदेवास्ति कारणं यद् विक्रममनु विक्रम[...] कस्याश्चिदपि सन्तत्याः सम्राड्रूपेऽस्तित्वं नैवोपलभ्य[...]

यद्विदग्धपरिषदः स्मरणमात्रमेव भर्तृहरिसदृश[...] निर्मोहं महात्मानमपि समाजिह्लदत, सा मध्यमकालि[...] लासितायाः परिषद् नासीत्। तस्याः परिषदः कला[...] गुणिजनाश्च तात्कालिकभारतोत्कृष्टस्थितेः प्रतिनि[...] आसन्। विक्रमस्य नवरत्नानि नृपतेरनुगामिनो ना[...] तेषु कालिदाससदृशाः सरस्वत्या वास्तविकाः प्रतिनि[...] आसन्नेव। धन्वन्तरिसदृशा वैज्ञानिकाः, अमर[...] सदृशा भाषाशास्त्रिणोऽपि तां परिषदमलं चक्रुः[...] निम्नपद्येन नवरत्नानां विक्रमसभायामस्तित्वं [...] प्रतीयते—

धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघट-खर्पर-कालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव-विक्रमस्य॥१॥

अनेनोत्कृष्टगुणिजनमण्डिता विक्रमस्य सा परि[...] विक्रमस्य शासननैर्मल्योत्कृष्टताद्योतिकाऽऽसीत्। [...] परिषदि समस्तमालवगणानां सारतत्त्वमेव मूर्तं [...] समुपस्थितमासीत्। एवं निखिलोत्तमगुणैर्गुणिजन[...] विभूषितो मालवगण-मुख्यो विक्रमस्तदानीन्तन[...] सत्ताया वास्तविकः सञ्चालकः आसीत्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## मालवगण-मुख्यः

विक्रमो मालवगणमुख्योऽकथ्यत । प्राचीनग्रन्थेषु ...पि विक्रमः सम्राट्पदालङ्कृतो न विहितः । विक्रमः ...नीत्या एवं पाण्डित्येन च १६ षोडशानामेतादृशानां ...राज्यानां सङ्घटनं विदधे । यानि स्वाधीनानि सन्त्यपि ...सूत्रे बद्धान्यासन् । तेषां समेषां नैजराजधान्यः परि... ...ासन् । तानि राज्यानि इयत्प्रसिद्धानि एवं पूर्णा... ...सन् यदियद्दीर्घकालप्रवाहेऽपि तेषां विशिष्टता नष्टा ...भवत् । अङ्ग–मगध–काशी–कोशल–बाजी–मल्ल–चेदि–...–कुरु–पाञ्चाल–मत्स्य–शौरसेनावन्ती–गान्धार–काम्बो–...णां षोडशगणराज्यानां स्मृतिचिह्नान्यद्यत्वेऽपि ...विक्रमस्य कीर्तिमहिमानं व्यञ्जन्ति । एषां गणराज्यानां सम्मिलितरूपमेव "मालवगणः" न्यगद्यत । समस्तगण-...नां प्रमुख उज्जयिनीनायको विक्रम आसीत् । ...गणा विक्रमस्याधीनत्वं भयेन नोरीकृतवन्तः । अपितु विवेकपूर्णविचारेणैव । विक्रमादित्ये केचिदेतादृशा ...गुणा आसन्, ये तात्कालिकगणराज्यपद्धतेः कृते सर्वथा-...मभजन् । तस्मिन् विक्रमे एकतः शूरतायाः देश-...श्च भावनाऽऽसीत्, अन्यतो गम्भीरज्ञानं एवं ...दर्शान् प्रति च प्रगाढनिष्ठाप्यविद्यत ।

पुराणेषु येषामनेकगणराज्यानामुल्लेख उपलभ्यते, ...तथा कौटिलीयार्थशास्त्रेषु एवं जातकेषु पाणिनिकृ-...ध्याय्यामुल्लिखितैरनेकस्थलैश्चैतन्निश्चीयते यदिय-...समयं यावदस्माकं भारतं गणराज्ये स्वराजनीतिक-...मयीयपत् । भारतस्य स समयः परमार्थतः सुवर्ण-...आसीत् । हन्त ! कालमहिम्ना शनैः शनैरिमानि गणराज्यानि स्मृत्यध्वन्यध्वन्यानि सञ्जातानि । ईशवीय-पञ्चमशताब्दीं यावदिदमीयगणराज्यानां ध्वंसावशेषाणि स्मृतिशेषाणि समुपालभ्यन्त । सिकन्दराक्रमणकालेऽपि गणराज्यानामस्तित्वमुपाश्रूयत । इत्थं यद्यपि तत्सामयिकं पूर्णमैतिह्यमद्योपलब्धं नास्ति, किन्तु विक्रमरूपे प्राचीन-भारतीयगणतन्त्रस्यैकः प्रमुखः आदर्शोऽद्याप्यास्माकीं प्रगतिं बृंहयितुं पर्याप्ततम एवास्तीति ।

वस्तुतस्तु अद्यतनभारतस्य स्थितिर्वैक्रमकालिक-भारतस्य स्थितिं प्रायः प्राप्नोत् । केवलमेकगणतन्त्र-प्रवर्तकरूपे ख्यातिमेव नायासीत् । अपितु विशालमिमं देशं शकानां पराधीनतात उन्मोचयितुमपि श्रेयस्तस्मै विक्रमायास्तीति । इत्थं पराधीनभारतस्योन्मुक्त्यर्थं यत्र सोऽतुलनीयसङ्घर्षं विदधे, तत्रैव स्वतन्त्रभारतं निर्माण-स्योत्कृष्टपथेऽप्रसरं विधाय तस्य स्थितिं सत्ययुगरूपे परिवर्तितामपि चक्रे । घोरपरतन्त्रतातो मुक्तिः पुनश्च गणतन्त्रद्वारा सुवर्णयुगागमनमेतादृशी घटनास्ति याऽद्यतनं भारतम्भृशमनुकरोतीति । अद्यतनभारतमपि पारतन्त्र्याद् मुक्तिं लब्ध्वा गणराज्यपद्धतिं स्वस्मिन् व्याप्तां कर्त्तुं संलग्नमस्ति ।

अस्यां २६ षड्विंशतितमजनवर्य्यां पुण्यतिथौ विक्रमस्य तद्गणराज्यस्य सुवर्णस्मृतिरस्माकं मस्तिष्के हृदये च प्रसेस्रीयते । अद्य वयं नेहरूशासितदेहलीं विक्रमस्योज्जयिनीं निर्मिमासामः । येनास्माकं भारतं समस्तदेशेभ्यः तल्लोकोत्तरमाध्यात्मिकं बोधं प्रदाय "विश्वगुरुः" इतिपदवीं भजेदिति जगन्नियामकं परमात्मानं मुहुर्मुहुः प्रार्थ्य विरमामि लेखादस्मादिति ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अर्वाचीनाः संस्कृतसाहित्यकाराः

( अनु० देवर्षिकलानाथशास्त्री, जयपुरम् )

[ अस्माभिः कतिपयमासपूर्वम् आङ्गलभाषायां यन्त्र-लिपीकृतं ( Typewritten ) एकं लघुपुस्तकम् अधिगतम्। एतत्खलु सुप्रसिद्धसंस्कृतेतिहासलेखकस्य डा० एम० कृष्णमाचारियर M. A., M. L., Ph. D. M. R. A. S. भूतपूर्वमद्रासप्राड्विवाकस्य "संस्कृत-साहित्येतिहासतः" ( History of classical Sanskrit Literature ) केवलमाधुनिकशताब्दी-द्वये संजातानां साहित्यकाराणामितिहासं संकलय्य एकेन विदुषा लिखितमस्ति। एतस्मिन् हि भारतवर्षे संजातानाम् आधुनिकयुगीनसंस्कृतसाहित्यकाराणां ( ईशवीय १८०० संवत्सरम् आरभ्य १९४० पर्यन्तं समुद्भूतानां ) विशेषतो दक्षिणाञ्चलवासिनां परिचयः, तद्ग्रन्थानां सूची समीक्षा च विशदं संकलितानि, भारतीयपाठकानां संस्कृताध्येतॄणां गवेषकाणां च महते लाभाय स्युरित्यत्र लेखकेन आवश्यकपरिवर्तनानन्तरं परिवर्द्धनानन्तरं च संस्कृतेऽनूद्य यथाक्रमं प्रकाश्यते।

सम्पादकः ]

**विजयराघवाचार्यः** वीरवल्ली, कौण्डिन्यगोत्रोद्भवस्य वरदार्यस्य सुतः (सन् १८८४) काञ्चीनगरीसविधस्थे ग्रामे जन्म लेभे। काञ्चीनगर्यामेतेन विद्योपार्जनं कृतम्। अलङ्कारशास्त्रे सोयं नैपुण्यमवाप। शिलालेखाध्ययने अयं विशेषज्ञः, अधुना च श्रीवेङ्कटेश्वरदेवस्थानम्, तिरुपतिनगरेऽयं विशेषः शिलालेखाध्ययनकर्ता। अयं चित्रकूटाख्यनाटकस्य प्रणेता, वैभवविलास-वेदान्तदेशिक - गुरुपरम्पराप्रभाव- नीतिनवरत्नमाला-अभिनवहितोपदेश-कवनेन्दुमण्डली-वसन्तवासर-दान प्रशंसा-दिव्यक्षेत्रयात्रामाहात्म्य-आत्मसमर्पण-नवग्रह-स्तोत्र-दशावतारस्तवः-पञ्चलक्ष्मीविलास-सुरभिसन्देश-गान्धिमाहात्म्य - तिलकवैदग्ध्य - नेहरूविजयेत्यादि-काव्यानां रचयिता चास्ति। पञ्चलक्ष्मीविलासे हि अनेन धनलक्ष्मी-धान्यलक्ष्मी-जयलक्ष्मी-गृहलक्ष्मी-आरोग्य-लक्ष्मीति ख्यातानां पञ्चानां लक्ष्मीणां स्तुतौ द्विशत-श्लोकात्मक एकैकः सर्गो व्यरचि। सुरभिसन्देशे-काव्य-वर्णनापद्धत्या भारतीयानामाधुनिकनगराणां मार्मिक वर्णनं सुनिबद्धमस्ति। गान्धी तिलक-नेहरू(मोतीलाल) काव्येष्वनेन स्वातन्त्र्यान्दोलनस्य राजनैतिकः पक्षः काव्यविधया पुरः स्थापितः।

**यज्ञसुब्रह्मण्यम् स्वामिदीक्षितः** (१८३२-१९०६) अन्नदीक्षितस्य कौण्डिन्यगोत्रोद्भवस्य वल्लियाम्बायाः सुतः एट्टियपुरम् ( तिन्नवेल्लिप्रान्ते ) नगरे जन्म लेभे। अयं बहुशास्त्रनिष्णाततां, काव्यपाटवं चावाप, तिन्नवेल्लि-प्रान्तीयएट्टियपुरे राजपाण्डित्यञ्चाध्यगमत्। कविकेसरी-त्यस्य तत्र सुप्रसिद्धिः। १८७५ वर्षीये देहलीदरबारे जातस्य महापुरुषाणां खङ्गमस्यानेन काव्यमयं निबन्धं विहितम्, द्वादशतरङ्गात्मिकायां वल्लीपरिणयचम्प्वां च दक्षिणाञ्चले सुप्रसिद्धा लोककथा निबद्धा यस्या उपरि इलाथुरसुन्दरराजअय्यङ्गारेण टीका कृता। काव्यद्वय-मिदं प्रकाशितम्, बहून्यप्रकाशितकाव्यानि तदीयभ्रातु-व्यस्य सुब्रह्मण्यऐयरस्य (M. A., प्रिंसिपल रामेश्वरम् देवस्थान संस्कृतकालेज मदुरा, समीपे सन्ति।

**चन्द्रमारुताचार्यः** (मृत्युः १९००) वत्सगोत्रीयस्य परिमलरङ्गाचार्यस्य सुतः काञ्चीनिकटे अलिशूरनगरे



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्

अखिलभारतीयसंस्कृतसम्मेलनस्य द्वाविंशम-धिवेशनम्— भारतीपाठकैः पूर्वसूचनायां पठित-मेव यत्सम्मेलनस्य द्वाविंशमधिवेशनं भारतराजधान्यां देहल्यां चैत्रशुक्लतृतीयातस्त्रीणि दिनानि ससमारोहं भवेदिति। तदनुसारं चैत्रशुक्लतृतीयायां ( २६ मार्च-दिने) पूर्वाह्णे ( नववादनतः ) सरश्रीहरगोविन्दमिश्र महोदयस्य सभापतित्वे विषयनिर्वाचनसमितेरधिवेश-नमभूद्, यत्र सम्मेलने प्रस्तोतव्यानां विषयाणां सर्व-सदस्यानां संमत्यनुसारं निर्धारणमभूत्।

सायं पञ्चवादनतो मुख्याधिवेशनं प्रारब्धमभूत्। यत्र समागतयोभारतवित्तमन्त्रिणः श्रीचिन्तामणिद्वारकानाथदेश-मुखमहाभागाः समभवन्। प्रथमं काशीस्थवैदिकमण्डल द्वारा सामगानमङ्गलमक्रियत। ततो जगद्गुरुशंकराचार्य

समुत्पन्नः। अयं पितुर्विद्यामधिगम्य बहुषु प्रान्तेषु विचरन् भूयशः समुपार्जितवान्। अयं इतबलपुरीनरेशेन रवि-वर्मणा स्वनिकटे स्थापितोऽभूद्यस्य विधुरविलापाख्य काव्येऽनेन टीका संयोजिता। अयमन्ते मद्रासप्रान्तीय एकस्मिन् संस्कृतकालेजे प्राध्यापकोऽप्यभूत्। लघुरस-कुसुमावली एतस्य रीतिग्रन्थः। चित्रमीमांसोद्धारेऽनेन जगन्नाथपण्डितराजकृतस्याप्ययय्यदीक्षितकृतचित्रमीमां-सालोचनस्य प्रत्यालोचना पुरस्कृताऽस्ति। अला-तूरनगरनिवासी वेङ्कटवरदाचार्यः ( श्रीवत्सगोत्रः जन्म १८७६ ) अस्य साहित्यिकप्रतिद्वन्द्वी आसीत्। अयं 'कोमलमारुताचार्य' नाम्ना मुक्तकपद्यानि अलिखत् यानि संस्कृतभाषिणीपत्रिकायां विज्ञानचिन्तामणिपत्रे च समये समये प्रकाशितानि।

श्रीभारतीकृष्णतीर्थचरणानामाशीर्वचनमपठ्यत। ततः स्वागतकवितायामधिसभं श्राविताया स्वागताध्यक्ष श्रीनरहरिविष्णुगाडगिलमहाभागस्य स्वागतभाषणम-पठ्यत। एतदनन्तरं प्रधानसभापतेः श्रीदेशमुखमहा-भागस्य मुद्रितं भाषणमभवत् [ अवकाशे सति यस्य सारो यथाऽवसरं भारतीपाठकेभ्य उपह्रियेत ]।

एतदुत्तरं भारतस्य दूरदूरप्रान्तेभ्यः प्राप्तानां देश-माननीयानां महापुरुषाणां शुभसंदेशाः अपठ्यन्त। संदेशानां संख्याबाहुल्यात् परतो नामनिर्देश एव महाभागानामक्रियत। एवं यथासंभवं सर्वं कार्यं संपाद्य तद्दिनाधिवेशनमुपसमह्रियत।

तस्मिन् दिन एव [ २६ तारिकायाम् ] रात्रेर्नववादनतः अखिलभारतीया संस्कृतकविगोष्ठी प्रारभ्यत। एतस्याः सभापतिरासीत् आसां पंक्तीनां लेखकः सोयं भारती-सम्पादकः। संयोजकश्च श्रीप्रभुदत्तशास्त्री विद्यावाच-स्पतिः। अत्र हि प्रसिद्धप्रसिद्धस्थानेभ्यः एव समागतानां कविमहाभागानां संख्या प्रचुरतमा आसीत्। गोष्ठीनियताः समस्या आसन्—'सम्मेलनं' 'यौवनं भारभूतम्', 'देहली'। अत्र पूर्वं तु कविमहाभागानां संख्यैव प्रवृद्धतरा आसीत्। तदुपरि एकैकमहाभागेन तिसृणामपि समस्यानामनेकाऽनेकाः पूर्तयो व्यधीयन्त, येन भूयान् समयो व्यत्यगात्। किन्तु कवय उत्साहिनः समर्थाश्चा-सन्। पूर्तयोऽपि युगानुसारं प्रायो हृदयग्राहिण्योऽभू-वन्। अतएव व्यतीतोऽपि समयो न कस्यचिदरुन्तुदो-ऽभूत्। ततः सभापतिना समयानुरोधेन लोकानामाग्रह-वशात् पूर्वनियतविषयस्य वसन्तस्य द्वे घनाक्षरीपद्ये, एकं मङ्गलपद्यं चाऽपठ्यत। लोकानां प्रमोदध्वनिभिः सेयं गोष्ठी सानन्दं व्यसर्ज्यत।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



चैत्रशुक्लचतुर्थ्याम [२७ ता०] प्रातरष्टवादनतः 'शिक्षापरिषत्' प्रारभ्यत। एतस्याः सभापतिरासीत् काशीस्थगवर्नमैण्टकालेजस्य भूतपूर्वोऽध्यक्षः डा० श्रीमंगलदेवशास्त्री एम० ए० डी० फिल० महोदयः। समुद्घाटनकर्ता चासीन् महामहोपाध्यायः श्रीगिरिधरशर्मचतुर्वेदमहाभागः। उद्घाटनसमये भाषणं कुर्वता महाभागेनाऽनेन प्रोक्तं यत् शिक्षायाः सरणिः सांप्रतं तादृशी भवेद् यया अधिकाधिकः संस्कृतभाषायाः प्रचारो भवेत्। बहवस्तामिमां भाषां राष्ट्रभाषां कर्तुं कामयन्ते किन्तु सांप्रतं समस्तेऽपि भारते संस्कृतज्ञानां संख्या कतिलक्षमिता। सेयं संख्या कोटिमिता भवेत्तदैव राष्ट्रभाषात्वमस्याः संभवेत्। अस्तु, शब्दाडम्बरं परिहृत्य संप्रति संस्कृतपाठ्यक्रमे अर्थोपरि, लोकानां रुचेरुपरि च दृष्टिरावश्यकी। अस्ति कश्चित्पद्धतिविशेषः, पुस्तकविशेषः, इत्यादिना वर्तमानसमये न कार्यं चलेत् इत्यादि। ततः सभापतिमहोदयेन शिक्षायां काः काः त्रुटयः, किं किं तासां प्रतिविधानमित्यादि यथावत्स्वभाषणे व्याख्यायत। शिक्षानुभविनो भाषणे ये ये विशेषा जनैः शुश्रूषिता आसन्, ते प्रायः सर्वेऽपि भाषणेऽस्मिन्नश्रूयन्त। तदिदं भाषणं मुद्रितम्। अतएव पठितमेव भवेत् संस्कृतसेवकैः। किं विस्तरेण ?

ततः श्री इन्द्रविद्यावाचस्पतिना [वेदान्ताचार्य एम० ए० पी० एच्० डी] स्वभाषणे प्रोक्तं यत् वर्तमानसमये सेयं संस्कृतभाषा कठिना, इति सर्वत्रोद्घोषः। अतएव पाठ्यक्रमे तदिदमवधानमत्यावश्यकं यत्संस्कृताऽध्ययनं सर्वजनरुचितं सरलं च भवेत्। व्याकरणादेः काठिन्य


# द्वितीयवर्षस्य हृदयाकर्षिणी समुन्नतिः

## नूतनो व्यवसायः

| | | |
|---|---|---|
| १९५२ ईशवीयवत्सरे | ,, | ८० तिलक्षोत्तरा २ कोटिः |
| १९५३ ,, | ,, | ३ कोटितोप्यधिकम् |
| १९५४ ,, | ,, | २५ तिलक्षोत्तर ४ कोटितोप्यधिकम् |

## वृद्धिङ्गतो धनराशिः

३१ दशम्बर १९५३ ईशवीयवत्सरपर्यन्तं घोषितो धनराशिः

| | | |
|---|---|---|
| रु० १५—०—० | प्रतिवर्षं | जन्मपर्यन्तम् |
| रु० १२—०—० | ,, | अर्पितधनम् |

## दी न्यू एसियाटिक इन्स्योरेंस कम्पनी लिमिटेड

प्रधानकार्यालयः नवदेहली

उत्तरभारतस्थाः शाखाकार्यालयाः —

देहली, लक्ष्मणपुरम् ( लखनऊ ) जलन्धरः, वाराणसी, इन्दौर, नागपुरम्, बरेली, आगरा, जयपुरम् इत्यादयः।




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नवीनप्रचारितसाधनैः सुतरां निवर्तनीयमित्यादि । ततः श्रीयमुनादेवी शास्त्रिणी (काशीविश्वविद्यालयाध्यापिका) मुक्तचिरे स्वभाषणे समार्थयत यत् एतस्मिन् पाठ्यक्रमे स्त्रीशिक्षाया उपर्यपि विशिष्टाऽवधानमावश्यकम् । शिरावो नार्यश्चापि राष्ट्रस्योन्नतेर्मूलम् । अद्यतनी नारी पन्थानमनुसरति यो हि भारतीयसंस्कृतेः प्रतिकूलः । अतएव नारीणामादर्शाः सीता-सावित्र्यादयो भवेयुरि-त्यावश्यकम् । अतएव पाठ्यक्रमे स्त्रीशिक्षाऽपि सम-प्रमुखतया विचार्येत इत्यादि ।

साहित्याचार्य पं० पुरुषोत्तमचतुर्वेदिमहोदयेन प्रोक्तं संस्कृतव्याकरणे सन्धि-समास-रूपाणि, इति त्रीण्यपि आवश्यकानि, किन्तु प्रारम्भिकशिक्षायामेतानि शिक्षा-र्थिनां संमुखे अतिकठिनरूपे समुपतिष्ठन्ति । अतएव तेषां सारल्यार्थं नवीनप्रणाल्यां यत्नो विधेयः । संस्कृतस्य शास्त्री आचार्यो वा एकदेशी विद्वान् न भवेत् किन्तु सामान्यविषयाणां तस्य ज्ञानं पर्याप्तं भवेदित्यावश्य-कम् । एतदर्थं शास्त्रिपरीक्षायां वैकल्पिकरूपेण गृहीतो-विषयः आचार्यपरीक्षायामपि गृहीत्वा पूर्येत चेत्तदैव स ज्ञानसंवादको भवेत् इत्यादि ।

श्रीब्रह्मदेवविद्यालंकारेण प्रोक्तं संप्रति निदानम् वि-नाय चिकित्सा प्रारभ्यते । अतएव नवीनायां परिष्कृत-प्रणाल्यां संस्कृतसारल्यस्य, संस्कृतेः संरक्षणस्य चापि दृष्टिरावश्यकी । वर्तमाने आंग्लदेशात्प्रतिनिवृत्तो विद्वान् उच्चकक्षारूढः परिगण्यते । किन्तु गुरुकुले शिक्षि-तोऽवरकक्षयारूढः संभाव्यते । ततश्च स्वतन्त्रताप्राप्ते-रनन्तरमपि विचारस्वातन्त्र्यं देशे न प्रवृत्तमिति स्पष्टं प्रतीयते । अतएव वर्तमानशिक्षायां संस्कृतेरनुवर्तनमाव-श्यकमधिगण्यतामित्यादि ।

एतदुत्तरं सायं मुख्याधिवेशनमभवत् । द्वाविंशेऽ-स्मिन्नधिवेशने प्रधानतमः प्रस्तावोऽभवद् यद् एकस्य संस्कृतविश्वविद्यालयस्य साम्प्रतमतितमामावश्यकता । यत्र हि विदेशीयभाषाणां प्रायो महामहत्सु सर्वेष्वेव नगरेषु विश्वविद्यालयाः श्रूयन्ते, तत्र भारतस्य सर्वस्व-भूतायाः संस्कृतभाषायाः एकतमोपि विश्वविद्यालयो नास्तीति स्वतन्त्रस्य भारतस्य कृते महद् लज्जास्पदम् । अतएव भारतराजधान्यां देहल्यां संस्कृतस्य प्रकाण्डो विश्वविद्यालयो भवेद् यस्मिन्-महान् पुस्तकालयः, सुविस्तृतो गवेषणाविभागश्चापि संबद्धो भवेत् । एतस्य प्रस्तावस्य उपस्थापकोऽभूत् संमेलनस्यास्य प्रधानमन्त्री श्रीकेदारनाथसारस्वतमहाभागः । समर्थनं च-शिक्षा-कार्ये एव संपूर्णमपि वयो यापितवता म० म० श्रीगिरि-धरशर्मचतुर्वेदमहाभागेनाऽक्रियत । प्रोक्तमत्र श्रीमता यद्वर्तमानकाले विज्ञानस्य सुमहान् महिमा । विज्ञान-शून्या शिक्षा न कैश्चिदभिनन्द्यते । किन्तु वर्तमानकाले यद्विज्ञानं प्रचरति, तस्यापि मूलतः प्रचारका अस्माकं पुरातना ऋषय आसन् । वेदे-भूमेराकर्षणशक्तिः सुस्प-ष्टमावर्णिता, यां वर्तमानकालिका अपि स्वीकुर्वन्ति । गुरुवरश्रीमधुसूदनविद्यावाचस्पतिमहाभागैः स्वीयेषु ग्रन्थेषु विज्ञानस्याऽस्य साधन विस्तरेण कृतम् । अत-एव वैदिकविज्ञानस्य प्रकाशनविभागोऽपि विश्वविद्या-लयेऽस्मिन् भवेत् ?

अस्तु, विश्वविद्यालयस्यास्य प्रारम्भकरणार्थं मूल-चन्द्रखैरातीरामस्थायिधनराशितः तस्य प्रबन्धाध्यक्षैः पञ्चलक्षमुद्रात्मको निधिः सभायामेव दानार्थमुद्घोषितः । एवमेव अन्यान्यवदान्येभ्यः स्थायिकोषे लब्धे भारतीय-शासनकोषतोऽपि समुचिता आर्थिकी सहायता प्राप्येत इति निश्चितमभूत् । सभापतिमहाभागैः, गाडगिलमहो-दयैश्च विश्वविद्यालयप्रस्तावे सुमहानुत्साहः प्रदर्शितः । देशमुखमहाभागेन प्रोक्तम्—'नाहमन्यद् वक्तुं जानामि ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



किन्तु आवश्यके सति परितः तावदहं याचिष्ये यस्या-वगुण्ठनार्थं वस्त्रमपि पर्याप्तं न भवेत्' इत्यादि।

चैत्रशुक्लपञ्चम्याम् [२८ ता०] प्रातः, अष्टवादनतो महामहोपाध्यायपं०श्रीगिरिधरशर्मचतुर्वेदमहोदयस्य पञ्च-सप्ततितमवर्षप्रवेशमहोत्सवसूचको हीरकजयन्ती-महोत्सवः प्रावर्तत। तद्दिने सभापतिः श्रीमान् दरभङ्गा-धीश्वरो महाराजश्रीरामेश्वरसिंहमहोदयो भवेदिति सर हरगोविन्दमिश्रमहाभागस्य प्रस्तावे महाराजः सभापति-पदमलंकरोतिस्म। श्रीपुरुषोत्तमचतुर्वेदमहोदयेन श्रीगिरिधरशर्मचतुर्वेदिनां वंशस्य परिचयो दत्तो यत् श्रीमतां पूर्वजाः पूर्वं मेवाडाधिपतिमहाराणामहोदयस्य संमानिता आसन्। ततो जयपुराधीश्वरमहाराजश्रीमाध-सिंहदेवस्य (पुरातनस्य) समये पूर्वपुरुषा जयपुरमागमन्। यत्र कवीश्वरतायां राज्यतः प्रभूता ग्रामादिसंपत्तिरुप-लब्धा। गिरिधरशर्ममहाभागो मेवाडविराजमानश्रीचतु-र्भुजदेवस्योपासनया कुलेऽस्मिन्प्रसूतः। आरम्भकालादेव श्रीमतो बुद्धिरतिशायिनी व्यलोक्यत। ततो जयपुरराज-कीयसंस्कृतमहाविद्यालये व्याकरणेऽधीती सोयं भारत-प्रसिद्धश्रीशिवकुमारमिश्रमहोदयैरपि ससंतोषं प्रशं-सितः। विद्यायां यथा महाभागोऽयं प्रशस्ततमस्तथा धर्मश्रद्धायामपि मान्यतमः। श्रीमतः सन्ध्योपासनादि कार्यकलापो मध्याह्नोत्तरं द्वित्रिवादनपर्यन्तं प्रचलति। संस्कृतसेवायां धर्मप्रचारे च महाभागस्य कीदृशोध्यवसा-य इति तु भारतस्य कोण-कोणावधि परिचयो भवेत्— इत्यादि।

ततो महामहोपाध्याय पं०परमेश्वरानन्द-विद्याधर-शास्त्रि-श्रीकृष्णजीशास्त्रीयमुनादेवीप्रभृतिभिर्महामहोपा-ध्यायमहाभागस्य गुणवर्णनं निजकृतज्ञता च प्राकाशि। भारतीसंपादकेनाऽपि पद्येनैकेन अभिनन्दनीयमहाभा-गस्य तथा प्रशस्तिरावर्णिता, यत्रैकपद्येन संपूर्णोऽपि गुणमहिमा संक्षिप्य सूचितोऽभूत्। बहुभिस्तत्पद्यमालि-खितं तत्रैव। ततः श्रीदरभङ्गाधिपतिना पञ्चसप्तति-वर्षसंख्यया पञ्चसप्ततिशत ७५०० मितानि रूप्यकाणि (शुल्कपत्राणि) धनराशिरूपे महामहोपाध्यायमहाभाग... करतले समर्पितानि। चतुर्वेदिमहोदयेन कृतज्ञताप्रकाश... निजभाषणे प्रोक्तम्—संस्कृतसम्मेलनस्य सेवा साम्प्र... पर्यन्तं मे निर्व्याजाऽऽसीत् किन्तु अनेन समर्प... सेयमपि सव्याजा समपद्यत। किन्तु मम सोयं जय... महोत्सवस्तदैव सफलो मन्येत यदा हि भारतराजधा... संस्कृतविश्वविद्यालयस्थापनं भवेत्। सर्वैरपि कार्यक... भिर्विश्वविद्यालयस्य विजयशङ्खनादो भारतस्य प्रत्ये... प्रान्ते पूरणीयः, इत्यादि।

एतस्मिन्नेवदिने वेदान्तशास्त्रविषये 'शङ्काकापरीक्षा...ऽप्यासीत्। एतस्यां निर्णेतारः पं०श्रीगिरिधरशर्मप्रभृत... स्त्रयः समभूवन्। परीक्षायामस्यां पं० शशिधरशा... महानन्दठक्कुरश्चेति द्वावपि समानाङ्कभागिनौ निर्णी... अतएव एकसहस्रमुद्रात्मकपुरस्कारो द्वयोरपि पञ्च... पञ्चशतमुद्रारूपेण विभज्य वितीर्णोऽभूत्।

चैत्रशुक्लपञ्चम्याम् ( २८ ता० ) रात्रौ नववाद... संस्कृतनाट्यसमिति—द्वारा 'मुद्राराक्षस' नाटकस्याऽ... नयः समभवत्। अत्रापि चन्द्रगुप्त भागुरायणप्रभृ... नामभिनयः प्रशस्यतरोऽभूत्। एवं तु राजत-सौवर्णप... प्रदानस्य रीतिस्तु वर्तमानकाले सभ्यताऽनुगता परि... णिता। अतएव प्रायः सर्वेभ्य एव नटेभ्यः पारितो... प्रदानमाघोष्यत।

अस्तु, सर्वोऽपि चेत्कार्यकलापः सूक्ष्मेक्षि... वीक्ष्येत तर्हि द्वाविंशमिदमधिवेशनं सर्वतः सफलमभू... भोजनादिव्यवस्था प्रसिद्धश्रेष्ठिश्रीविरलामहाभा... प्रबन्धेनाऽभूत्। भोजनादिव्यवस्थाकर्तारो विनी... श्रद्धाशालिनश्चासन्निति बहुभ्यो महाभागेभ्यः श्रु... समागतानां प्रतिनिधीनामपि संख्या प्रभताऽऽसी... चतुःशततोधिकाः समभवन्प्रतिनिधय इति ... सर्वतः प्रबन्धकारकः पं० श्री केदारनाथसारस्वतमह... गो दिष्ट्याऽनया सफलतया वर्द्धते। उत्तरोत्तरम... परिमाणकार्येषु सफलता भूयादिति हृदयेनाशास्महे

प्रकाशक—जयबहादुरसिंह

पता—भारती भवन, गोपालजी का रास्ता, जय...

मुद्रक—राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

राजकुमार

विश्वकविटैगोरः



'नाहं स्निह्यामि भारतं तस्य प्राकृतिकसौन्दर्यवशात्, न च एतस्मात् कारणात् यदहं प्रादुरभवम् एतस्य भूमौ, किन्त्वहं स्निह्यामि इतो हेतोः यदयं संकटपूर्णसमयेऽपि स्वपूर्वपुरुषैः प्रवाहिता विचारधाराः सुरक्षितवान् ।'

वर्षम् ५

सप्तमाङ्कः

मूल्यम्
वार्षिकम् ३) रु०
एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# —: विषय-सूची :—


| क्रमः | लेखाः | लेखकाः | पृष्ठसंख्या |
| --- | --- | --- | --- |
| १. | कृष्णानुस्मरणम् | श्रीनन्दकिशोरझा, श्रीनगर, बेतिया | १४७ |
| २. | परदोषदर्शनादात्मदोषदर्शनं श्रेयः | श्रीचन्द्रशेखर रामचन्द्र ताम्बे, नागपुरम् | १४८ |
| ३. | संस्कृतसाहित्यस्य महत्त्वम् | श्रीसत्यभूषणो वेदालङ्कारः, एम० ए०, आगरा | १४९ |
| ४. | सुखस्य मूलम् | श्रीशिवप्रसादशास्त्री, जयपुरम् | १५१ |
| ५. | हेतुवादिनः किं वा नास्तिका' | श्रीरामदवेशास्त्री | १५४ |
| ६. | राष्ट्रपुरुषस्मरणम् | श्रीबालशास्त्री हरदासः साहित्याचार्यः नागपुरम् | १५६ |
| ७. | पर्वतीया | श्रीमदनमोहनझाः सा० आचार्यः मुजफ्फरपुरम् | १५७ |
| ८. | अवशिष्टा नियमाः | श्रीदीनानाथशर्मा शास्त्री, दरीबाकलाँ देहली | १६१ |
| ९. | म० पं० वासुदेवशास्त्री | श्रीचक्रपाणिः | १६२ |
| १०. | न्याय-निष्ठ-कवि हृदयम् | श्रीनन्दकिशोरझा, श्रीनगर-बेतिया | १६३ |
| ११. | अर्वाचीनाः संस्कृतसाहित्यकाराः | अनु० देवर्षिकलानाथशास्त्री | १६४ |
| १२. | मधुमासः | रामनाथ पाठकः 'प्रणयी' आरा (बिहार) | १६६ |
| १३. | सूक्ति-सुधा | सम्पादकः | १६८ |

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्ष ५ | वैशाखपूर्णिमा, सं० २०१२ | अङ्क ७

## कृष्णानुस्मरणम्

( रचयिता—नन्दकिशोरझा, श्रीनगर, बेतिया )

यत्पादोदकसम्भवा त्रिपथगा पुण्यप्रवाहा श्रुता
दृष्टैवाशु पुनाति, वारि पतिताञ्जीवान्नयत्युद्गमम् ।
आश्चर्यं सुजलापि लोकगतये विश्वाब्धिसेतुर्मता
तद्विष्णोश्चरणारविन्दयुगलं शोभेत मे मानसे ॥ १ ॥

यत्पादाङ्कितमस्तकं स भुजगं नाश्नाति नागान्तको
भक्ष्यं ब्रह्मविनिर्मितं ह्युपगतं सम्पीडितोऽपि क्षुधा ।
भक्तानां परिरक्षणे धृतधियः कृष्णस्य कस्यापि चेत्
तत्पादान्वितमस्तु मानसमलं कालात्पुनः किं भयम् ॥ २ ॥

यो मीनः श्रुतये भवाय कमठो भूम्यै वराहस्तथा
प्रह्लादाय नृकेसरी च बलये खर्वोऽथ रामास्त्रयः ।
भूभृद्वैश्रवण प्रलम्बहतये जातो दयायै जिनः
कल्की म्लेच्छकुलाय संश्रिततनुः कृष्णाय तस्मै नमः ॥ ३ ॥

रसपदेषु सुखस्पृहया मनो भ्रमितुमिच्छसि भृङ्गकुलं यथा ;
हरिपदाम्बुजमेव भजस्व तद्विरसता नहि यत्र न बन्धनम् ॥ ४ ॥

वृथा मनः संश्रयसे सुवर्णं करोति यत्त्वां सहसा विवर्णम् ;
सदा समाराधय कृष्णवर्णं करिष्यतेऽसौ द्रुतमात्मवर्णम् ॥ ५ ॥

नृणां दृशामक्षिण रसो विशाले गवां रसे गोरसनारसः स्यात्
एको रसो नन्दकिशोरभूते नित्यं भवेन्नन्दकिशोरनाम्नः ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# परदोषदर्शनादात्मदोषदर्शनं श्रेयः

( श्रीचन्द्रशेखर रामचन्द्र ताम्बे, नागपुरम् )

[मयैषा कथा क्वचन हिन्दीभाषायां पठितासीत्। तामेवात्र संस्कृतसेवायै गीर्वाणवाणीप्रणयिनां भारती-पाठकानां च मनस्तोषायोपस्थापयामि। आशासे यद् भारत्याः पाठका अनयावश्यं प्रसीदेयुरिति।]

कस्मिंश्चित्पत्तनेऽतीव वीरो धार्मिको दयालुरैश्वर्य-शाली नृपो बभूव। तस्य राज्ये शान्तिः प्रसृतासीत्प्रजाश्च सुखिन्य आसन्। असौ राजा महान्विनोदशीलोऽवर्तत, येनैव सह वार्तालापं कर्तुमारभत तमेव विनोदविषय-मकरोत्। अतस्तस्य सर्वत्र राज्ये विनोदप्रियत्वेन प्रसिद्धिरभवत्। न कोऽपि तस्य पुरो विनोदं कर्तुं समर्थः।

जन्माष्टम्याः पर्वाऽऽगतम्। अखिलमपि नगरमु-त्सवार्थं सज्जीभूतम्। वृष्टिकाले व्योम मेघाच्छन्नमालो-क्यत। अद्य राजा स्वीये प्रासादे भगवतः श्रीकृष्णस्य लीलाकथाः शृण्वन्बहुभिराहूतैर्विप्रैः सार्धमुपविष्ट आस्त। सर्वे जाताः संलग्नाः श्रीकृष्णस्यार्चने।

किन्तु तत्राप्येकस्य ब्राह्मणस्यागमनमपेक्षितमासीत्। असौ तन्नगरस्थो नासीत्। अन्यस्मान्नगरादायातो राज्ञा निमन्त्रितोऽभूत्। भूपतिस्तं प्रतीक्षमाणस्तूष्णी-मवातिष्ठत।

राजदर्शनोत्को भूदेवस्तदैव राजप्रासादं प्रति गन्तु-मुद्यतः। मार्गेण गच्छतस्तस्य वर्षाः प्रारभन्त। तस्यै-कस्मिन्हस्ते छत्रमन्यस्मिंश्च काष्ठदण्डः। वयः पञ्चा-शद्वर्षपरिमितं पन्थाश्च क्रोशपरिमितः। पर्जन्य उच्चैः पतति स्म। यथाकथंचिन्मार्गं समाप्य प्रासादद्वार-समीपमवाप।

मार्गक्रमणपरिश्रान्तो देहस्थौल्यात्सोपानद्वयमेव (दो ही सीढियां) कृच्छ्रात्पारयित्वा तृतीयं सोपानमारो-हन्पादस्थापनाऽसमर्थः पृष्ठतोऽपतत्। तत्पतनजनित-ध्वनिस्तत्रत्यसर्वजनैराकर्णितः। द्वारपालैर्दृष्टं यदसौ ब्राह्मणः स्फटिकसोपानशिलायां जलक्लिन्नत्वात्पदं निधातुं नाशकत्। आत्मनः समक्षं दुर्दशां गतमपि विप्रं ते तत्काल एव नोदस्थापयन्नपि तु अहसन्। राजापि तद्ध्वनिकारणं ज्ञातुं तत्रागतः। पुरोऽवलोक्य च विपद्ग्रस्तं महीसुरं विनोदपरोऽट्टहासं चकार। घण्टापादं (पञ्चदशमिनिटपर्यन्तं) यावत् विहस्य ब्राह्मणमुत्थाप्यान्तः प्रवेशयितुं सेवकानादिशद्राजा।

अस्मिन्नवसरेऽयमागन्तुको द्विजोऽतिक्रोधितो दृश्यते स्म। यदि तस्मिंस्तादृशं ब्राह्मं तेजो यादृशं पूर्वऋषीणामासीदभविष्यत्तर्हि तेन स राजा शापितोऽभविष्यत्। तच्छक्तिरहितत्वात्तु तस्य क्रोधः स्वगात्रे-ष्वेवाऽसीदत्। तदनन्तरं राजा योग्यासनदानादिना-तिथिमुपचचार।

सर्वे ब्राह्मणा भोजनार्थमुपविष्टाः। राजापि तेषां पुर उपाविशत्। भोजनकाले पार्थिवो विनोदयुतेन स्वरेणातिथिं तमेवाह—"महाशय पुरा मुनिनाऽगस्त्येन महाजलनिधिः स्वोदरे स्थापितोऽभूत्। तदा तस्य कापि पीड़ा नासीत्। भवांस्तु तस्यैव वंशजो भूत्वा क्षुद्रात् पर्जन्यजलादप्यात्मानं रक्षितुं नाशक्नोत्, पुनः पदनिधा-नाऽसमर्थो भूमौ पतितः। सत्यं ब्राह्मणानां पतनस्य परा काष्ठेयम्।"



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# 卐 संस्कृतसाहित्यस्य महत्त्वम् 卐

( सत्यभूषणो, वेदालङ्कारः, एम. ए. आगरा )

इयं हि गीर्वाणवाणी अस्मद्देशस्यालौकिको निधिः। भारतीयसंस्कृतिः साहित्यं च देववाण्यैव पूर्णरूपेण प्रेरणां प्राप्नोति। नात्र संदेहलेशोऽपि। अनादिकालादस्मद्देशस्य जातीयजीवने संस्कृतभाषाया महान् प्रभावो लक्ष्येत। चिरकालाद् विस्मृताऽपीयं भारतीयानां मनसि श्रद्धां प्रतिष्ठां चोत्पादयति। संसारे न हि काचिदेतादृशी भाषा यस्याः साहित्यं प्राचीनतादृष्ट्या संस्कृतसाहित्यस्य समतामासादयितुं शक्नुयात्। सर्वमान्योऽ

---

एतच्छ्रुत्वैव तस्यातिथेर्निवृत्तः क्रोधः पुनरुदपद्यत, परं राजवचसः सम्यगुत्तरं दातुमवसरस्याऽसत्वात्तदा किमपि नावदत्।

सर्वेषां भोजनं समाप्तम्। ते पाणिपादप्रक्षालनमकुर्वन्। सर्वेषूपविष्टेषु राज्ञोपहसितो विप्रोऽवोचत्—"राजन् पुरो वर्तमानं जलभरितं पात्रं पश्यसि। तस्मिन्नेकं प्रस्तरखंडं पातय।" अतिथिवचो निशम्य राज्ञा साकं तत्रस्था जनताऽऽश्चर्यमग्नाऽऽसीत्। आश्चर्यस्य कारणद्वयम्—प्रथमं यद् ब्राह्मणेन तेन सेवकं विहाय स्वयं राजा किमर्थमाज्ञापितः? द्वितीयमिदं यद् जले प्रस्तरखण्डपातने ब्राह्मणस्य किमिवोद्देश्यमिति।

पार्थिवोऽपि द्विजवचनमनुल्लङ्घनीयमिति मत्वा स्वयमेवैकं प्रस्तरखण्डं तस्मिन्नपातयत्। तत्खण्डं कांश्चिद्बुद्बुदानुत्थाप्य नीरे निमग्नम्। जलमग्ने तस्मिन्प्रस्तरशकलेऽतिथिनोच्चैर्हसितुमारब्धम्। किन्तु तं हसन्तं विलोक्य कोऽपि न हसितवान्यतस्तत्र हसनस्य किमपि कारणं सपार्थिवानां तेषां विदितं नाभवत्। घण्टार्धपर्यन्तं हसित्वा ब्राह्मणः शान्तोऽभूत्। सर्वे साश्चर्या आसन्। भूपालो विप्रं हासकारणमप्राक्षीत्। अतिथिर्जगाद—"राजन् यथाहं त्वया पूर्वमुपहसितस्तथैव त्वमपि सम्प्रति मयोपहस्यसे। अत्र न किमप्याश्चर्यकारणं वर्तते। पश्यतु भवान्। तस्यैवोत्तरं ददामि यद् भोजनसमये मामुद्दिश्य भवानवादीत्। त्व पुराविदसि। त्वया ज्ञातमेव स्याद्यत्त्रेतायां वानरा स्वामिनः क्षत्रियकुलशिरोमणे रामस्य नामबलेनैव महामहतः प्रस्तरान्सागरजलेऽस्थापयन्। ते च जले न निममज्जुः। किन्तु भवान्स्वयं तस्यैव महिमवतो भगवतो रामस्य कुले जात एकं लघ्वपि प्रस्तरखण्डमस्मिँल्लघुनि पात्रेऽपि प्रवाहयितुं न समर्थः। एतदेव मे हासस्य कारणम्। किं कथयसि तन्निवेदय।"

राज्ञो मनसि वचसोऽस्य तादृशः प्रभावो जातो यत्स किमपि प्रत्युत्तरं कर्तुमशक्तः। नृपस्तत्काल एवातिथेः पदकमलयोरपतत्। स्वीयमपराधं क्षमयितु प्रार्थितवान्। तयोः प्रेमाश्रुरूपेण प्रकटितमभूत्। सर्वे आश्चर्यमया आसत। विप्रोऽभाषत—"नरेन्द्र! बहो कालादस्माकं ब्राह्मणक्षत्रियवर्णानां तेजः पराक्रमश्च क्षीणत्वं उपयातौ। वयं पूर्वेषामुदाहरणं दत्त्वा परस्परमुपहसामः, किन्तु नेदमुचितं विद्यते। आत्मनो दोषं न गणयित्वा परस्य दोषं पश्यामः। अनेन वैरं वर्धेत शक्तिश्चाधिकं नश्येत्। अतः क्षत्रियैर्ब्राह्मणाः, ब्राह्मणैः क्षयित्रा वा न कलङ्कनीयाः।"

इत्थमुक्त्वा राजानमुपदिश्य सोऽतिथिर्गन्तुमुत्सुको राज्ञा पूजितः स्वगृहं प्रस्थितवान्। पृथिवीपतेरपि पुरोभागिता प्रदोपपतङ्गप्रभेव सपदि परास्ता।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मेतान्। अन्यथा त्वां भिक्षुकीं विधास्यन्ति। स्वसुताया गृहे वसन्त एते न कथमपि लज्जन्ते। धिगेतान्'। अधुना हंसा स्वमूर्खतां जानन्ती विचारयामास। वस्तुतो मे पुत्रस्य कोऽप्यधिकारो न वर्तते। सरलस्वभावस्य राघवदेवस्य हननेन सा निश्चेतुं शशाक यदेतेषां मतिर्न शुद्धास्ति। एकदा सा स्वपितरं रणमल्लं कथयामास—राघवदेवस्य मृत्युनाहं पीडितास्मि। हन्तारोऽवश्यं दण्डनीयाः। इति श्रुत्वा राव रणमल्लः—प्रत्यब्रवीत्—'त्वमस्मान् राजनीतिं शिक्षयन्ती न जिह्रेषि। तूष्णीं तिष्ठ। यदेव वयं कुर्मस्तत् पश्यन्ती न किमपि शुभाशुभे ब्रूहि।' इति पितुः कथनेन हंसा स्पष्टतया ज्ञातुं शशाक यदेते जनकादयो मेवाडदेशं हस्तगतं विधास्यन्ति। सा चिरं रुरोद। चण्डे चाविश्वस्य तं मुहूर्तमशपत यस्मिन्नेतान् समाह्वयामास। इत्थं पश्चात्तापं कुर्वन्ती सा राजमाता स्ववयः क्षपयामास।

गते च कियति काले घटनैका परापि संजाता। नियमानुसारं मुकुलं स्वाङ्के निधाय राव रणमल्लः सिंहासने उपाविशत्। मुकुलो बहुकालमेवं तिष्ठन् श्रान्तो भूमौ खेलतिस्म। मेवाडाधिपे सिंहासनेऽनुपस्थितेऽपि रणमल्लः सूर्याङ्कितच्छत्रादधः सिंहासने उपविष्ट एवासीत्। एतद्दृष्ट्वा सभायां सर्वे कोपाध्माताः किमपि कर्तुमशक्तास्तूष्णीमतिष्ठन् परं राजधात्री नासहत। सा तूर्णं हंसासमीपे गत्वा प्रोवाच तद्वृत्तम्। हंसापि स्वपितुः समक्षे कथितवती यत् सर्वा प्रजा सन्तुष्टा येन कर्मणा भवेत्तदेव भवता कार्यं विधेयम्। रणमल्लः स्पष्टं जगाद—यदि त्वं मुकुलं जीवन्तं द्रष्टुमिच्छसि तर्हि तोषमास्यताम्। मेवाडदेशस्याधिपस्य पुरो निरर्गलतया ब्रुवन्ती दण्डार्हा भविष्यसि। इदानीं सिंहासनाध्यक्षस्ते पुत्रो नास्ति किन्तु जनकः।

इति श्रुत्वा सा भयेन व्रीडया चार्धमृता बभूव। तस्याः सर्वोऽहंकारोऽश्रुप्रवाहेऽवहत्। रुदन्ती [illegible] राजधात्र्याः सह सम्मतिं विधाय चण्डस्यान्वेषण[illegible] निश्चितवती। धात्र्याः केचन सम्बन्धिनो नगरा[illegible] निवसन्ति स्म। प्रासादे तेषामागमनेन सन्देह[illegible] प्यवकाशो नासीत्। तानेव धात्री चण्डस्यान्वे[illegible] प्रैषयत्। इतश्च राजमातुर्विचारे महत् परि[illegible] जातम्। यदैव रणमल्लो मुकुलं हन्तुं तां निरं[illegible] तदैव सा परमेश्वरभक्तिमेवाधिकां मत्वा हरि[illegible] दाने पुण्ये च संलग्नाभवत्। मुकुलहस्तेन सा [illegible] भ्यो वित्तं दापयति स्म। रणमल्लोऽपि एत[illegible] मन्यते स्म। सोऽब्रवीत् हंसा सम्यक् विदधा[illegible] विधवा सा संसारात् विरक्ता भूत्वा भगवद्भजन[illegible] श्रेष्ठं मन्येत। सोऽजानात् यत् तस्य भर्त्सनेनैव [illegible] इत्थं करोति। तस्मिन्नेव काले रणमल्लस्य संतोष[illegible] घटनान्यापि समभूत्। ये केचन भिल्लाः क्षत्रि[illegible] चण्डेन सह गतास्तेपि निरुद्देश्येन कष्टमयेन जीवनेन श्रान्ताः स्वगृहेषु निवर्तन्ते स्म। चण्डे [illegible] भावना या शेषा आसीत् सापि तस्य पदभंगेन न[illegible] चण्डस्य विद्रोहिणो दुर्गे प्रविशेयुरिति राजाज्ञा प्र[illegible] यथापूर्वं ते राजसेवकाः स्वीकृताः। प्रजापि [illegible] सुखमयजीवनेनानुभवति स्म यत् ते रणमल्लस्याधि[illegible] सुखं निवसन्ति। राजमातुरपि वैराग्यवृत्तिर्वर्द्धते [illegible] इत्थं शनैः शनैरहानि व्यतीतानि। रणमल्लः स्व[illegible] सह विलासमयं जीवनं सर्वथा निष्कंटकं [illegible] प्रारभत। रणमल्लस्तु प्रासादे रमणीभिः सह [illegible] पुत्राश्च प्रजां पीडयामासुरत्याचारः। रमणीषु [illegible] मेवाडप्रान्तस्य रक्तनिर्मिताः स्वस्य क्रीडायै बलादानी[illegible] स स्वकलुषितकृत्येन मेवाडदेशस्य राज[illegible]



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...न् कथमपि न विरराम ।

दीपावलिमहोत्सवोऽपि समाजगाम । तस्मिन् देशे ...दुत्सवपरम्परा प्रारभत तादृक्षी न कदापि दृष्टा ...न वा । प्रतिगेहं दीपश्रेणिर्नितरामशोभत । शास-...नाज्ञा प्रावर्तत यद्यदि कोऽपि गेही स्वगृहे दीपक-...न् स्थापयित्वा दीपावलिमहोत्सवयोगन्न दास्यति ...सर्वथा दण्डार्हो मन्येत । दीपनिर्मातारः कुम्भकारा-...विक्रेतारस्तैलिकाश्चात्यन्तं धनवन्तो बभूवुः । ...गारस्य बहिः सूर्याचन्द्रमसौ प्रहरिकावास्तामन्तश्च ...नस्य नर्तकीसमा रूपाजीवाः स्वनृत्येन दर्शकानां ...न् मोहयन्ति स्म । तस्मिन् महोत्सवे हंसापि सम्मि-...ता । राजधान्याः दक्षिणदिशि गोशुंडानाम्नि ग्रामे ...त्सवं विधाय हरिभजनेन स्वचेतः पावयन्ती राज-...ना सर्वं ग्राम्यजनं मिष्टान्नमभोजयत् । पुरोहितेन ...चण्डविरोधिभिः सैनिकैश्च सार्धं मुकुलोऽपि तत्रो-...गतः । सर्वा प्रजा तत्र विद्यमाना आसीदत् । परमे-...रं प्रार्थयामासुः मुकुलं चिरायुषं विधातुम् । सद्य ...परमात्मन् आततायिभ्यो राज्यं मोचयित्वा मुकुल ...धिपतिं विधेहि । इयति हर्षेऽपि मुकुलस्य शरीर-...श्चण्डविद्रोहिणो न प्रहृष्टाः पूर्णतया । समाप्ते ...वे राजधानीं न्यवर्तन्त ते मुकुलं स्वेनैव सह नीत्वा, ...मुहुर्मुहुः स्थित्वाग्रे चलन्ति स्म । शनैः शनैस्ते ...स्य पूर्वे द्वारे गताः । अस्मिन्नेव काले तेऽश्वखुर-...ं श्रुत्वा पश्चात् पश्यन्ति स्म, चत्वारिंशत् तुरगारो-...तेषां नयनपथवर्तिनो जाताः । तेषां नायकः ...रणवासोभिस्तु नितरां दरिद्रः प्रतीयते स्म परं ...सज्जितो मुखेन तेजस्वी । द्वारपालैरुक्तम्—कोऽयं ...। नायकः स शान्तिरूपेणागदत् वयं गोशुण्डा-...जने समुपस्थिताः । वयमाज्ञप्ताः यन्मेवाडदेशा-धि...पेनं सह दुर्गपर्यन्तं गच्छत ।' अनेनोत्तरेण सन्तुष्टा द्वाररक्षकाः न किमप्यूचुः । एवं ते सर्वां राजधानीं पारयन्तो दुर्गस्य मुख्यद्वारं प्रापुः । अत्र रक्षकाः संदेहं चक्रुः । नायको यथा स्वपरिचयमददात् तथा न ज्ञायते स्म । एवं नीत्या कार्यं चलन्तं न दृष्ट्वा स खड्गप्रहारं कृत्वा द्वाररक्षकान् यमलोकातिथीन् चकार ।

सर्वत्र प्रसृतं यद्राजकुमारश्चण्डः स्वसैन्यबलेन सह समायातः । ये जनाः पूर्वं चण्डेन सह विद्रोहं विधाय समायाताः राज्यसेवायाञ्च संलग्नाः ते सर्वेऽवसरं प्राप्य दुर्गद्वारमुद्घाटयामासुः । अन्ये च बहवः शस्त्रधारिणश्चण्डसहायका दरीदृश्यन्ते स्म । सहसैवेदमकल्पितमाक्रमणं श्रुत्वा हंसाया भ्रातरः क्षेत्रं विहाय पलायिताः । अस्मिन् तुमुले सर्वस्मात् प्राक् येनागन्तव्यम् तस्य रणमल्लस्य कुत्रापि स्थितिर्न दृष्टा । स प्रासादस्यैकान्तभागे मदिरामदेन मत्तः शेते स्म । अपहृता प्रेयसी पार्श्वे स्थिता प्रतिशोधावसरं ज्ञात्वा तस्यैव शिरोवस्त्रेण खट्वारूढं तं दृढं अबध्नात् । यदा चण्डोऽन्वेषयन् रणमल्लं प्रासादे आगच्छत् तदा तं बद्धं निरीक्ष्योच्चैर्जहास । पार्श्वे आगच्छता तुमुलरवेण तन्द्रा यदा रणमल्लस्य विनष्टा तदा स निष्फलं यत्नं कुर्वन् चुकोप परं किं कुर्यात् परवशो वराकः । सर्वेऽपि समीपस्थाश्चण्डानुयायिनो जनाः सहर्षं यदा अहसन् तदा चण्डो जगाद । भोः श्रूयतां असहाये शत्रौ हास्यं वीरोचितं कार्यं नास्ति । राजमातुः पार्श्वे नयत एनम्, तस्या एव पितैषः, सैव न्यायं विधास्यति तदैको वीरो जगाद । राजकुमार ! राजमातुः समीपे नयनमस्य न शोभनम् । एष स शत्रुर्नास्ति येन सहौदार्यं प्रदर्श्येत । तेनैवं कथिते द्वितीयः कश्चित्सहसैवासिना तं जघान । एवं मेवाडदेशः स्वशत्रुभिर्मुक्तो



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# हेतुवादिनः किं वा नास्तिकाः

( ले० श्रीरामदेव शास्त्री )

यदि क्रियते किंचित् दृष्टिपातविलसितं अतीतयुगेतिवृत्ते तर्हि स्पष्टमेव प्रतिभासते यद् धर्मस्य जीवनं सर्वदा कष्टसम्पृक्तमेव। तपस्विनं धर्मं अनु युगे युगे दण्डं धृत्वा उपस्थिताः एव इमे नास्तिकाः। केचित् कायक्लेशभयेन, केचित् स्वमतसंस्थापनाभ्यसूयया, अपरे इन्द्रियास्वादलौलुप्येन, इतरे स्वच्छन्दभावनाप्रतिषेधरोषेण केचिच्च स्वबुद्धिवैभवव्यर्थाहंकारदर्शनसंकल्पेन धर्मस्य खण्डनं कृतवन्तो न विरताः। धर्मस्तु धैर्यगाम्भीर्यमूर्तिः अवदत् "ददतु ददतु गालीर्गालिमन्तो भवन्तो वयमिह तदभावाद् गालिदानेऽसमर्थाः"।

साम्प्रतमपि धर्मस्य सम्यक् चर्मकर्षणं क्रियते बुद्धिवादिभिः। तपस्वी ईश्वरस्तु हिरण्यकशिपोः राज्ये आपतितः। अहोरात्रं दण्डपाणयः इमे हेतुवादिनः ईश्वरमनुधावन्ति। एषां हिरण्यकशिपोरन्तं गृहे कदा भविष्यति प्रह्लादस्य जन्म इति च प्रतीक्षन्ते धर्मप्राणाः।

पाश्चात्यचर्मचक्षुषा पश्यतामेषां पुरतः धर्मस्तु हालाहलचषकमिव प्रतिभाति। धर्मस्तस्य सर्वातिरिक्तो शत्रुः। "येन मे भोजनं, पानं, चलनं, हसितं, गदितं विलसितं चापि प्रतिबाधितं तस्य प्राणान् हत्वैव विरमिष्यामीति" कृतप्रतिज्ञोऽयं हेतुवादी। अयं [illegible] धर्मपञ्जरे नात्मनो बन्धनं इच्छति। स्वतन्त्र[illegible] अस्मिन युगे सर्वमपि प्राणिजातं स्वातन्त्र्यम् [illegible] भवतु। किमर्थं अयं स्त्रीषु पतीनाम् पुत्रेषु पितॄणां [illegible] मातॄणां अंकुशः। विततेऽस्मिन् वियति [illegible] शुकः क विरमिष्यति इति तु न जानीमहे। [illegible] इदमेव वरं वक्तुम्—"डयतु डयतु कामं कीर [illegible] स्वतन्त्रः, ददतु ददतु संज्ञां कोऽपि कारुण्यमूर्तिः।"

---

बभूव। मारवाडदेशस्य बहवो जना मृता दुर्गद्वारेऽन्ये च दूरे पलायिताः। राजमातुर्भ्राता जोधसिंहः कुत्रापि पलायनं कृत्वा स्वजीवनं ररक्ष। चण्डो हंसासमीपे गत्वा चरणयोः पपात। स्वकर्तव्यञ्चापृच्छत्। हंसायानयनयोरश्रूणि हृदये च कृतज्ञताभावा आसन्। सा किमपि वक्तुं न शशाक।

किमस्ति च एषां हेतुवादिनां मतं का च [illegible] प्रवृत्तिः इति समासेन स्थापयितुं यतिष्ये। अस्ति [illegible] तेषां इदं अभिमतं—आधुनिकेन विज्ञानेन स[illegible] प्रतिपादितं एतत्-कारणेन विना कार्यं न प्रभव[illegible] ईश्वरस्य अस्तित्वं नास्ति यतोहि तस्य अस्तित्वे न [illegible] किमपि प्रमाणम्। यदि सः सर्वमांगल्यहेतुः सर्व[illegible] तर्हि कथं नास्माकं पुरतः प्रत्यक्षीभवति। उदरंभरि[illegible] कैश्चित् ब्राह्मणैः अशिक्षितस्य जनसमुदायस्य बुद्धिं [illegible] जनयित्वा प्रदर्शितोऽयं पुराणपाखण्डपथः। "मनु[illegible] एव समस्तवस्तुनिकषः" इति प्रोटागोरसस्य उक्ति[illegible] सर्वोत्कृष्टं प्रमाणम्। यथार्थमेव च उक्तवान् धर्म[illegible] वेदप्रामाण्यं कस्यचित् कर्तृवादः, स्नाने धर्मे[illegible] जातिवादावलेपः। संतापारम्भः पापहानाय [illegible] ध्वस्तप्रज्ञानां पंचलिंगानि जाड्ये।

आधुनिकेन मनुष्यबुद्धिजनितेन विज्ञानोत्[illegible] खंडितेयं बालमनोविनोदाय रचिता पुराणवार्ता। [illegible] महाभारते संजयः स्वदिव्यदृष्ट्या महाभारतयुद्ध[illegible] स्थित्वैव धार्तराष्ट्राय श्रावितवानिति दिव्यम[illegible]



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



संजयस्तुतिं कुर्वन्तो यूयं कथं न वन्दथ ( रेडियो ) आकाशवाणीयन्त्रकर्तारं यस्य महिम्ना अनन्तयोजन-दवीयसः व्यवहारान् स्वगृहे पर्यंकसुप्ताः एव श्रोतुं द्रष्टुं च पारयथ ? विज्ञानस्य विचित्रसृष्ट्या यदि जितं जगतो मनोराज्यं तर्हि नास्ति कापि विस्मयस्य वार्ता। इति गर्विताः हेतुवादिनः विज्ञानलाभेन।

न केवलं दृश्यमाने भौतिके युगे एव तेषां बुद्धि-प्रसारः, तर्कशास्त्रेऽपि अस्ति तेषां युक्तिपूर्णा प्रवृत्तिः। प्रसिद्धाश्च M. N. Roy प्रभृतीनां अस्मिन् विषये तर्कपूर्णाः ग्रन्थाः।

अस्ति च बुद्धिप्राधान्ये अस्मिन् युगे मनोमय-वादिनां विशिष्टः सम्प्रदायः। यः सर्वमपि ज्ञानं बुद्धि-निकषे परीक्षितुं इच्छति। बुद्धिनिकषे शुद्धम् एव ग्राह्यं भवति तेषाम्। चार्वाकास्तु लघुदर्शनाः एषां तुलना-यां। नास्ति तेषां दर्शने एवंविधं सुदृढं तर्क-प्रावल्यम्। "ऋणं कृत्वा घृतं पिबेत्" इति तु चारित्र्य-मात्रमेव दर्शयति। एवं चारित्र्यविषये सन्ति विभिन्नाः विचाराः। इमे तु चार्वाकमेव प्राक्तनं बुद्धि-वादिनं मन्यन्ते। पश्चिमे यथा कापर्निकसडार्विन-प्रभृतिभिः स्वमतप्राबल्येन तेषां धर्मग्रन्थप्रामाण्यम् खण्डितं तथैव इमेऽपि अस्माकं ग्रन्थगौरवं खण्डयितुं उद्यताः स्वबुद्धिवैभवेन।

प्रसिद्धाः इमे भौतिकवादिनः, विवेकवादिनः मनो-मयवादिनः, हेतुवादिनः, बुद्धिवादिनश्चेति नामभिः। परन्तु साम्यवादिनां साहित्यसंदेशवाहकाः एव इमे। पाश्चात्यदर्शनप्रभाविताः इमे सर्वत्र स्टालिनलेलिनादि-साम्यवादिविदुषां साहित्यं प्रमाणयन्तः स्वमतं प्रति-पादयन्ति।

प्रयासश्च तेषां प्रवृत्तिव्यवहारं भारतस्य विभिन्नेषु प्रान्तेषु। साम्प्रतमेव अखिलभारतीयहेतुवादिनां सम्मेलनं मेरठनगरे संजातम्। तत्र अध्यक्षीयपदम् अलंकुर्वन्त्या श्रीमती एलनभगिन्या उक्तं—

"मनोमयवादिनां इदम् आन्दोलनं सर्वेषां प्रगति-संघर्षाणां समकोट्यां न केवलं नास्तिकवादस्य प्रचार-मात्रमेव प्रयोजनम् उद्दिश्य प्रचालितं परं ईश्वरस्यास्तित्व विरोध एव अस्य प्रधानं उद्दिष्टम्। व्यक्तिहितमेव सर्वोपरि मन्यमानैः अस्माभिः यस्य अस्तित्वमेव नास्ति तस्य ईश्वराभिधेयस्य प्रतिषेधे एव प्रयासो विधेयः। पुरा खलु मूर्खजन-लोक-व्यवहार-निर्वाहाय ईश्वरस्या-स्तित्वं संपाद्य निर्व्यूढं चेत् स्वकार्यं, वरमेव। परं साम्प्रतं धर्मस्य न कामपि उपयोगितां पश्यामो वैज्ञा-निकेऽस्मिन् युगे। विज्ञानस्य प्रसारेण धर्मस्य ईश्वरस्य च अस्तित्वं अपसारणीयमेवास्माभिः"।

स्वीकृताश्च निम्नांकिताः प्रस्तावाः—

१. 'हिन्दूविवाहाधिनियम' स्थाने नागरिकविवाहाधि-नियमविधि-र्विधेयः। स च मानवमात्रस्य कृते सामान्यं भवेत्।

२. राजकीयव्ययेन धार्मिकप्रदर्शनं न भवेत्।

३. विद्यालयेषु प्रातः प्रार्थनानिषेधः आवश्यकः। धर्म-निरपेक्षराज्ये हास्यास्पदमेतत्।

४. आकाशवाणीमार्गेण प्रसार्यमाणाः धर्मवार्ताः न्यायावरुद्धाः भवेयुः।

एभिः पुनर्जन्म, ईश्वरास्तित्वं, वेदान्तादिदर्शनं च स्वबुद्धिवैभवेन यत् खण्डितं तत् चार्वाकेभ्यः अतिरिच्यते एव।

संस्कृतसाहित्ये "नास्तिकदर्शनपदे" एषामेव दर्शनम् अस्माभिः स्वीकरणीयं इति मे मतम्। साहित्य-नवावताराय एषोऽपि अभिनवो विषयः। यथासमयं एषां मतं प्रतिपादयिष्यते भारत्याम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# राष्ट्रपुरुषस्मरणम्

(रचयिता:—बालशास्त्री हरदासः साहित्याचार्यः नागपुरम्)

रावणान्तकरं रामं मर्यादापुरुषोत्तमम् ।
राष्ट्रकार्यार्थसिद्धयर्थं ध्यायेत्सर्वगतं विभुम् ॥१॥

येन पूर्णावतारेण निमित्तीकृत्य पाण्डवम् ।
वर्तता युगसंध्यायां गीताधर्मः प्रवर्तितः ॥२॥

भूमिर्दृप्तनृपव्याजदैत्याक्रान्ता सुदुःखिता ।
योधिता येन कारुण्यात्स कृष्णोऽस्तु शिवाय नः॥३॥

गाण्डीवे सशरे कराद्विगलिते पार्थेऽपि मूर्च्छान्विते
क्रोधान्धे निजसैन्यदारणपरे भीष्मे धनुर्धुन्वति ।
हित्वा पार्थरथं जवेन कलयन्हस्ते रथाङ्गं पुन-
र्भक्तार्थं निजकीर्तिहारणपटुर्धावन्हरिः पातु नः ॥४॥

येनार्थशास्त्रं निर्माय नन्दराजगता मही ।
अमर्षेणोद्धृता तस्मै चाणक्याय नमो नमः ॥५॥

निजखड्गप्रतापेन मायिनः कूटयोधिनः ।
यवनान्यो विनिर्जित्य चन्द्रगुप्तः प्रतापवान् ॥६॥

कन्यारत्नं च रत्नानां निचयं चैव लब्धवान् ।
तं राष्ट्रभूषणं मौर्यं मूर्धन्यं को हि विस्मरेत् ॥७॥

यस्तिग्महेतिना वीरस्संहरन् परसैनिकान् ।
आजहाराश्वमेधाँस्त्रीन्कलिकाले महाक्रतून् ॥८॥

विद्यानां सदनं मूर्तं कलानां मणिमन्दिरम् ।
समुद्रगुप्तं गुप्तानां विनतिर्वंशभूषणम् ॥९॥

यः पौरुषेण समरे दुर्मदानाततायिनः ।
क्रान्शकान्विनिर्जित्य मोचयामास भारतम् ॥१०॥

राजा स जयति श्रेष्ठो विक्रमार्को गुणाकरः ।
निहन्ता यश्च हूणानां यशोवर्मा प्रतापवान् ॥११॥

अगणितबलपुञ्जैरायर्यौ हर्षनामा
सुगतनयनिगीर्णेऽस्मिन्महाराष्ट्रदेशे ।
खरतरकरवालेनास्य भङ्गं विधाता ;
जयति स पुलकेशी वीरभूभाग्रयायी ॥१२॥

मूर्तिमान्वीरधर्मो यः पृथ्वीराजोऽस्तु नो हृदि ।
यवनैर्घातितः क्षुद्रैः कृतघ्नैः कपटेन यः ॥१३॥

यः क्षात्रधर्मस्य नवावतारस्सेहे न भङ्गं निजगौरवस्य ।
वव्रे नियुद्धं निजजीवितान्तं भेजे वनं राज्यसुखं विहाय
॥१४॥

अभिमानधनेन येन मूर्धा नमितो यवनेशपादयोर्न ।
चलितं न विपत्सु यस्य चेतस्स जयति धैर्यनगः प्रतापसिंहः
॥१५॥

दूषिता यज्ञभूर्म्लेच्छैरतस्तेगबहादुरः ।
तस्या विशुद्धिमन्विच्छन् चक्रे स्वात्मार्पणं गुरुः ॥१६॥

म्लेच्छैर्निकृन्त्यमानोऽपि ज्ञानी तानवदद्धसन् ।
वर्धतां हिन्दुधर्मोऽयं शरीरस्यात्र का कथा? ॥१७॥

तस्य पुत्रोऽतितेजस्वी खालसामार्गभास्करः ।
स्वकीयानात्मजानिद्धे रणयज्ञे जुहाव यः ॥१८॥

शस्त्रेण रक्ष्यतां धर्ममिति चाध्यापयत्स्वकान् ।
गुरुर्गोविन्दसिंहश्च स्मर्तव्यौ भूतिमिच्छता ॥१९॥

निकृन्त्यमाने यवनैश्शरीरे निहन्यमाने तनयेऽपि वीरः ।
तन्मांसखण्डे वदने प्रसह्य निपात्यमाने निजगाद
वाक्यम् ॥२०॥

'न हिन्दुधर्मः कुणपात्मवादी शरीरनाशेन न मे विनाशः' ।
बन्दा स चाध्यात्मविदां वरिष्ठो मलीमसंनाशयतु
प्ररूढम् ॥२१॥

आक्रान्तेऽवनिमण्डलेऽथ यवनैरासेतुहैमाचलम्
घोरे गोद्विजदेवताविदलने संजायमानेऽनिशम् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# पर्वतीया

(ले० पं० मदनमोहनझाः न्या० सा० आचार्यः मुजफ्फरपुरस्थराजकीयसंस्कृतमहाविद्यालये साहित्यप्रधानाध्यापकः)

( ६ )

प्रभात-कालीनः समयः स्वभावतः सर्वत्र सुन्दरः प्रतिभाति, विशेषतः पर्वत-परिसरे तस्य शोभा समधिकं वर्धते।

अद्य राजीवोऽपि एकस्य पर्वतस्याधित्यकायामपलकनयनैरुषः-शोभां विलोकयन्नास्ते। इदानीं सूर्यस्य शोणं बिम्बम् पूर्वस्यां दिशि उदयगिरेर्बहिर्निस्सरद् विद्यते। सूर्यस्य शोणिम्ना प्रकृतिः रञ्जिताऽस्ति। अस्मिन् समये पर्वतस्य हिम-मण्डितं वनस्पति-मयं शिखरमतिरमणीयं दृश्यते।

राजीवस्य हृदयं तद्दृश्यमालोक्य मुग्धमभूत्। चित्रमसौ चित्र-निर्माण-यन्त्रं यदस्य पार्श्वभागे लंबमानमासीत्—करेणादाय तस्य दृश्यस्य चित्रमादातुं तत्परो बभूव।

यंत्रं सज्जीकृत्य यावदसौ तन्नलिकायां सूक्ष्मेक्षिकया पश्यति, तावत्पश्यत्ययं पुरतः स्थितां मनुष्याकृतिम्। किमिदमिति निर्णेतुं यदाऽसौ विखिन्न इव मस्तकमुत्थापयति, तदा षोडशवर्षीया एका बाला पुरतो हसन्ती स्थितेति विलोकयति। तां दृष्ट्वा रूक्षस्वरेणाप्ृच्छत्—का त्वम् ?

बाला—पर्वतीया कृषक-कन्या।

राजीवः—कथमिहागत्य स्थिता ?

बाला—स्वकीयं चित्रं ग्राहयितुम्।

राजीवः—नाहं मनुष्यस्य चित्रं गृह्णामि ?

बाला—कस्य चित्रं गृह्णासि ?

राजीवः—प्रकृतेः।

बाला—(हसन्ती) किमहं प्रकृतेरंशभूता नास्मि ?

राजीवः—(क्रुद्ध इव) नहि, त्वं मम समक्षादन्यत्र याहि, बाला अश्रुत्वेव हसन्ती स्थिता।

ततो राजीवः 'यदि त्वमितो न यासि तर्हि अहमेवान्यतो गच्छामीत्युक्त्वा' वेगेनान्यत्र जगाम। पुनश्च तत्र चित्र-ग्रहणाय यन्त्रं सज्जीचकार, यावदसौ यन्त्र-सज्जीकरणे संलग्न आसीत्, तावत् पुनरसौ बालिका केनापि पथा राजीवेनाज्ञातमेवागत्य तथैवाग्रे स्थिता। राजीवश्च यदा पुनः यन्त्र-नलिकायां तामग्रे स्थितामपश्यत्, तदा क्रोध-ज्वलिताभ्यां नेत्राभ्यां तां दहन्निव भर्त्सना-वाक्यान्यवोचत्। परन्तु सा बालिका ईषदपि त्रासं नानुभूय पुनरवोचत्—पथिक ! मनुष्याणामपि प्रकृति-मध्ये गणना भवति। गणनैव नहि, मनुष्या एव प्रकृतेः सर्वोत्कृष्टः पदार्थः, अतो ममापि चित्रमेकं गृहाण, किमपि पातकं न स्पृशेत्, अपि च मम मनोरथः पूर्णः स्यात्।

---

...चक्रं विदधौ द्विषद्विशासनं राष्ट्रं समुज्जीवयन्
...च्छत्रपतिः शिवस्स कलयन् दिव्यां भवानीं करे
॥२२॥
...र इव चापस्य राष्ट्रमुत्तेजयन्मुहुः।
...न्यालग्रहे यस्य बोधोऽभूद् गरुडोपमः ॥२३॥
...र्थं रामदासं तं हिन्दुराष्ट्रगुरुं परम्।
...रेद्ध्यायतां नित्यं पापपुञ्जविनाशनम् ॥२४॥
...भामासुतेनैतद्रचितं बालशास्त्रिणा।
...नां स्मरणं भूयाद्भव्यकार्यविधायकम् ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



निश्छलहृदयात् निस्सृतं तस्या वाक्यं राजीवस्य मनसि प्रभावमवश्यमुत्पादयांबभूव, परन्तु राजीवः क्रोधाविष्टतया तं प्रभावं दूरीकृत्य पर्वतस्योपरिभागे गन्तुं प्रवृत्तः। तस्य चेतसि आसीत्—कियद्दूरं गत्वा चित्रं ग्रहीष्यामि, किन्तु वेगेन गन्तव्यम्, यतो यावदियं बालिका तत्र गच्छेत्, तावदेवाहं स्वकार्यं समापयिष्यामि। एतद्दृश्यमपि काल-विलंबं न सहेत।

एवं विचार्य राजीवोऽतिवेगेन चचाल। कियद्दूरं गत्वाऽकस्मात् पादस्खलनेन पञ्चाशद्धस्त-परिमिते निम्न-गर्तेऽपतत्।

तं पतन्तमालोक्य तारस्वरेण चीत्कुर्वन्ती सा बालिका तस्य समीपेऽधावत्। तस्याश्चीत्कारं श्रुत्वा लता-विटपान्तरिते निकटस्थे गृहे स्थितस्तस्या बालिकाया ज्येष्ठो भ्राताऽप्यन्वधावत्। राजीव-समीपे गताया बालिकायाश्चीत्कारो रोदने परिणतोऽभूत्, यतः सा तत्र गत्वा पश्यति यदसौ पथिकः संज्ञाशून्यो भूमौ लुठितोऽस्ति। मस्तकादन्येभ्यश्चाङ्गेभ्यः शोणित-प्रवाहो निस्सरति। स्वरूपमात्रेण क्षणपरिचितं तं पथिकमस्यां दशायामवलोक्य क्षणं किंकर्तव्यविमूढा सा। बालिका शीघ्रं स्वाञ्चलं छित्वा पथिक-मस्तकस्य तत् स्थानं रुदत्येवाबध्नात् यतो रक्तं प्रवहतिस्म।

यावद् बालिका एतावत्कृत्यमकरोत् तावद् रोदन-शब्दमनुसरन् तस्या भ्राताऽपि तत्रोपस्थितः। स दुर्घटनामिमामालोक्य चकितो भगिनीमपृच्छत् कोऽयम्? कथञ्च पर्वतात् पतितः? भ्रातुः प्रश्नमिममाकर्ण्य भीतेव सा बालिका सर्वं वृत्तान्तमकथयत्, यच्छ्रुत्वा स भगिनीमवोचत्—तव दोषेणैवास्येदृशी दुर्दशा संजाता। सा बालिका स्वकीयं दोषं स्वीकुर्वती जगाद—भ्रातः! किमधुना कर्तव्यम्? अस्य पथिकस्योपेक्षा कथमपि नोचिता। भ्राताऽपि तदनुमोदयन् उक्तवान्—आवाभ्यामयमुत्थाप्य स्वगेहं नेतव्यः, ततो यद् भावि तद् भवेत्।

ततस्तौ राजीवं स्वगृहमानीय स्वच्छ-कन्था-शयने शाययताम्।

इदानीमपि राजीवो निश्चेष्ट एवासीत्, तस्यैतां दशामालोकयन्तौ तौ, तयोर्वृद्धा माता च महतीं चिन्तामन्वभवन्।

स भ्राता (यस्य नाम सामरोऽस्ति) धावित्वा पर्वतीयमेकं वैद्यमाहूयाऽऽनयत्, स वैद्यो मार्ग एव सामरमुखाद् रोगिणोऽवस्थामामूलचूड़मवगत्य कियतीर्वनौषधीरुत्पाट्य सहानीतवान्। आगत्यं च वैद्यस्ता औषधीर्निष्पेष्य राजीवस्य व्रणेषु अलेपयत्, अपि चैकमौषधं लब्धसंज्ञे रोगिणि पाययितुं दत्वा गमनोन्मुखो बभूव।

तं गन्तुकामं दृष्ट्वा सा पर्वतीया बालिका विक्ल... वैद्यस्य मार्गं रुद्ध्वाऽपृच्छत्—वैद्य! रोगिणः कीदृशी स्थितिः? शीघ्रं स्वस्थो भविष्यति नु? रोगी संज्ञां कुतो न लभते?

बालिकाया वैकल्य व्यञ्जकानिमान् प्रश्नान् श्रुत्वा वैद्यः सहानुभूति-मधुरैः स्वरैरवोचत्—बालिके! चिन्ता न कर्तव्या। सत्वरमेव स्वस्थो भविता तवायमतिथिः। दूर-पतन-जन्यातङ्केन, शोणित-निस्सरणेन च निस्संज्ञोऽयं, चतुर्विंशति-होरानन्तरं संज्ञां लभेत। तावत् त्वया रोगिणो मुखे लघु लघु अनिलो विधेयः। लब्धसंज्ञो यदा पानीयमसौ याचेत, तदा मद्दत्तां औषधिं साधु-पिष्टां जले मेलयित्वा रोगी पाययितव्यः। एतावदुक्त्वा वैद्यो निरगात्।

गते वैद्ये माता सामरमुवाच—पुत्रक! त्वं ... गोधूमं छित्वा आनय, सहैवोद्यानात् सुपक्वानि ...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...णि फलान्यपि त्वयैवानेतव्यानि। पर्वतीया रोगिण-स्सहाय गन्तुं न शक्यति। रोगी संज्ञां लब्ध्वा भोजनमपि तु याचेत। यावदहं गोधूमस्य रोटिकाः रचयामि।

रोगिणो भोजन-वार्तामाकर्ण्य सामरोऽवदत्—मातः! वैद्यो दिनत्रयं यावत् रोगिणोऽन्नं दातुं निषिद्धवानस्ति।

माता—(चकितेव) सामर! किं कथयसि, दिनत्रयं रोगी निराहार एव तिष्ठेत्?

सामरः—नहि, अन्नं न भोद्यते, फलभक्षणे न प्रतिबन्धः। द्वयोः सन्ध्ययोः पुराणः आसवोऽपि लघुमात्रायां दीयेत।

माता—अस्तु, स्वार्थमेव तर्हि रोटिका निर्मीयन्ते।

सामरः क्षेत्रं गतः। माता चुल्हीं फूत्कर्तुं प्रयाता। पर्वतीया तु रोगिणः समीपे उपविश्य तं वीजयति। वीजयन्ती च सा रोगिणो मुखं निर्निमेषं पश्यति। निर्गच्छता श्वासेन तं जीवन्तमनुमाय तुष्यति। क्रियत्कालानन्तरं रोगी वारमेकं मस्तकमधुनोत्, हस्तञ्च मस्तक-तले आरोपयितुमानयत्. परन्तु शीघ्रमेव सव्रणं मस्तकभारासहं हस्तं दूरतोऽकरोत्, रोगिणः इमां चेष्टां निरूप्य पर्वतीया प्रसन्नेव झटिति तस्य मस्तकं स्वकीयोत्सङ्गेऽस्थापयत्। अपि च तावत्पर्यन्तं तथैव तन्मस्तकं स्थापितवती अतिष्ठत्, यावत् राजीवः संज्ञां नालभत।

लब्धसंज्ञश्चासौ पिपासा-क्षामकण्ठः पानीयमयाचत। तन्मुख-निस्सृतां वाचं निशम्य प्रसन्नानना पर्वतीया मातरमाहूयौषधिमिश्रं सलिलं रोगिणे दातुमकथयत्। माता रोगिणो दशा-परिवर्तनेन प्रसन्नतामनुभवन्ती महता स्नेहेन जलमौषधिमिश्रमपाययत्।

ततो राजीवः शान्तिमिवानुभवन् 'क्वाहं' 'के च मां परिचरन्तो नैसर्गिकीं दयां दर्शयन्ति' इत्यादि जिज्ञासितवान्।

माता च यथाश्रुत-दृष्टं पतनादि अत्रागमनावधि सर्वं वृत्तान्तं स्नेहाप्लुतया वाचा अश्रावयत्।

राजीवश्च तद्वृत्तान्तं श्रुत्वा स्वदशापरिज्ञानेन रुदन्, इच्छन्नपि धन्यवादवाणीमुच्चारयितुं नापारयत्। तन्नयनयोरश्रु दृष्ट्वा मर्माहता पर्वतीया मधुरस्वरेण तमुद्दिश्य न्यगदत्—पथिक! व्यग्रो न भव, शीघ्रमेव स्वस्थो भविष्यसि, वैद्येनोत्तमा औषधयो दत्ताः, उक्ताश्च वयं यत् चतुर्विंशतिहोराभ्यः परतः स्वस्थो भविता रोगी। सत्यम्, तत्कथनानुसारमेव त्वमिदानीमस्माकं भाग्येन संज्ञां प्राप्तोऽसि, भ्राता त्वदर्थमेव पुराणमासवमानेतुं गतोऽस्ति, स आगत्य यदा लघुमात्रां वारुणीं पाययेत्, तदा कोऽपि क्लेशो न स्थास्यति।

एता वार्ताः श्रुत्वा राजीवस्य ध्यानं पर्वतीयां प्रत्याकृष्टम् अभूत्, अपि चेदमपि ज्ञानमभवत्, यदस्याः क्रोडे मन्मस्तकं रक्षितमास्ते। अतः परमसौ मस्तकं पर्वतीयोत्सङ्गादधः कर्तुमयतत।

परन्तु पर्वतीया निवारयन्ती जगाद—पथिक! एवमेव तिष्ठ, अन्यथा कष्टं भविष्यति। तस्याः वचने एक एतादृश आत्मीयभाव आसीत्, येन राजीवः तदनुरोधमवहेलयितुं नाशक्नोत्, अपि च नयने निमील्य—न जानामि—किमचिन्तयत्।

यद्यपि तस्य मनोभावोऽश्रुरूपेण नेत्रमार्गान्निस्सृत्य कपोलयोरलक्ष्यत, तथापि पर्वतीया तं ज्ञातुमसमर्थाऽश्रुनिर्यासेन कमपि क्लेशमनुमायापृच्छत्—पथिक! किं क्वापि पीड़ा भवति?

राजीवः—नहि,



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पर्वतीया---अथ किमर्थं रोदिषि ?

राजीवः—एवमेव रोदनमागतम्। तावत् सामरः फलानि वारुणीञ्चादाय समुपस्थितः। सोऽपि रोगिणः संज्ञा-लाभ-समाचारं श्रुत्वा दृष्ट्वा च तं प्रासीदत्।

अथ मधुराणि फलानि पर्वतीया हस्तेन भोजयित्वा वारुणीमपाययत्।

फलाहारेण वारुणीपानेन च बलं लब्ध्वा यदा राजीवः प्रसन्नवदन इव जातः, तदा माता पर्वतीयामचकथत्—पुत्रि ! इदानीं त्वमपि गत्वा किमपि भुङ्क्ष्व।

इदं श्रुत्वा राजीवोऽवदत्—किमियं नाधुनावधि भुक्तवती ?

माता—पथिक ! तवागमनक्षणादेवमेवोपविष्टा त्वां वीजयति। भोजनायाभिहिताऽपि "यावत् अतिथिरयं न किमपि भोक्ष्यते,तावदहं कथं भोक्ष्ये" इत्युक्त्वा नाभुङ्क्त।

इमं प्रसङ्गमाकर्ण्य राजीवो मुग्धइव पर्वतीयां दृष्ट्वा साग्रहमवोचत्—बालिके ! कथं त्वया मदर्थमियान् क्लेशः सोढः ? अस्तु, अहमधुना कृतभोजनः स्वस्थ-श्चास्मि। त्वमपि गत्वा भोजनं कुरु।

अथ पर्वतीया तमपृच्छत्—शयने तव मस्तक-स्थापने क्लेशो न भवेत् ? राजीवः—कोऽपि क्लेशोऽधुना नास्ति, त्वं याहि। पर्वतीया भोजनाय गता।

राजीवो निमीलितनयनोऽनया स्वपत्नीं तुलन-विचारमकार्षीत्—इयमेका. एका च मम पत्नी, कियद-न्तरमेतयोः ? क्षणपरिचिताऽपि इयं मामाकर्षति, सा च चिरपरिचिताऽपि मामाक्रष्टुं नाशकत्।

अहमिदं नेच्छामि यन्मम पत्नी अद्वितीया सुन्दरी भवतु, महतीं शिक्षां धारयतु, विविध-कला-कौशलं रक्षतु, सेवापरायणा वा तिष्ठतु, किन्तु केनापि तादृशेन वस्तुना तस्यां भवितव्यम्, येन सा मम मनः आक्रष्टुं प्रभवेत्। यस्यां तादृशं किमपि वस्तु नास्ति, तां पत्नीमादाय कोऽपि किं कुर्यात्, एवं विचारयन्नेव राजीवो निद्रां लेभे।


# द्वितीयवर्षस्य हृदयाकर्षिणी समुन्नतिः

## नूतनो व्यवसायः

| | | |
|---|---|---|
| १९५२ ईशवीयवत्सरे | ,, | ८० लक्षोत्तरा २ कोटिः |
| १९५३ ,, | ,, | ३ कोटितोप्यधिकम् |
| १९५४ ,, | ,, | २५ लक्षोत्तर ४ कोटितोप्यधिकम् |

## वृद्धिङ्गतो धनराशिः

३१ दशाम्बर १९५३ ईशवीयवत्सरपर्यन्तं घोषितो धनराशिः

| | | |
|---|---|---|
| रु० १५—०—० | प्रतिवर्षं | जन्मपर्यन्तम् |
| रु० १२—०—० | ,, | अर्पितधनम् |

## दी न्यू एसियाटिक इन्स्योरेंस कम्पनी लिमिटेड

प्रधानकार्यालयः नवदेहली

उत्तरभारतस्थाः शाखाकार्यालयाः—

देहली, लक्ष्मणपुरम् (लखनऊ) जलन्धरः, वाराणसी, इन्दौर, नागपुरम्, बरेली, आगरा, जयपुरम् इत्यादयः।




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अवशिष्टा नियमाः

श्रीदीनानाथशर्मा शास्त्री सारस्वतः, विद्यावागीशः, विद्याभूषणः, विद्यानिधिः
[ प्रिन्सिपल सं० हि० महाविद्यालय, रामदल, दरीबाकलाँ, देहली ]

## १. पादशुद्ध्यादिनियमाः

मलत्यागोत्तरं पादौ जलेन शोधनीयौ। एतेन यत्र शुद्धिर्जायते, तत्र शरीरं स्निग्धं स्वस्थमपि च तिष्ठति। लघुशङ्कोत्तरं मूत्रयन्त्रं शीतलाभिरद्भिः प्रक्षालनीयम्, यतो हि मूत्रं पित्तप्रधानं भवति, तस्मिंश्च विषाणवस्तूत्यपि भवन्ति, तदा शाटिकादौ मूत्रांशलग्नतया यत्र अशुद्धिरुपतिष्ठते, तत्र विविधरोगाणां सम्भावनापि तिष्ठति। तद् मूत्रयन्त्रस्य प्रक्षालनमुपयोगि। उपस्थेन्द्रियस्य अग्रभागे कतिचिद् ईदृशस्नायवस्तिष्ठन्ति, या अल्पामपि उत्तेजनां प्राप्य उत्तेजिता भवन्ति। मूत्रोत्सर्गसमये उष्णानां दूषितानां च मूत्रांशानां स्पर्शेन तासु स्नायुषु उत्तेजना प्राप्यते, शीतलजलद्वारा प्रक्षालनेन सा शङ्का निवर्तते।

मौहम्मदा लघुशङ्काकाले मूत्रांशस्य प्रस्रवाशङ्कासमयं यावद् उपस्थस्य तत्कालोत्थापितलोष्ठादिद्वारा शुद्धिं कुर्वन्ति—इदमपि युक्तम्। आस्माकीनाः प्राञ्चोऽपि कतिचिद् भित्तिस्पर्शद्वारा उपस्थमशोधयन् परमेतदादिव्यवहारैः किञ्चिद्धानिरपि आशङ्क्यते, यतो हि उष्णतौ तद्भित्तेर्लोष्ठस्य वा उष्णत्वात् शीतकाले च तयोरत्यन्तशीतलत्वात् तत् शैत्योष्ण्यमुपस्थमुखद्वारा अन्तः प्रविश्य सद्धानये कल्पेत, अतो जलद्वारैव उपस्थशुद्धिः श्रेयसी।

एतच्चापि स्मरणीयं यद्—विद्यालयेषु वा, गृहेषु वा, स्थानान्तरेषु वा, एकस्मिन्नेव स्थाने अनेके मूत्रयन्ति, नैतत् स्थाने। एवं विधानेन अन्यदीया रोगपरमाणवः इन्द्रियद्वारा संक्राम्यन्ति। तद् नैवं विधेलिमम्। अथवा स्थानमेकमेव भवेत्, तत्र तत्र जलं 'फिनैल' जलं वा प्रक्षेप्तव्यम्। देहल्यादिनगरेषु मूत्रणस्थानेषु प्रत्येककलायां जलयन्त्रद्वारा स्वयमेव शुद्धिर्जायते—अयं श्रेयान् प्रकारः। एतेन इतरेतररोगःबीजसंक्रमणाशङ्का न तिष्ठति। उपदंशप्रभृतयो रोगा पितृपरम्पराप्राप्ता भवन्ति। तद्रोगवन्तो यत्र लघुशङ्कां कुर्युः, तत्र अन्येषां लघुशङ्काकरणे स रोगः संक्राम्यति। तत् प्रत्येकजनो लघुशङ्कासमये जलनयनमभ्यस्यतु।

## २. मुखप्रक्षालनम्

मुखे शीतलं जलं सम्भृत्य ततः शुद्धशीतलजलेन मुखाक्षि प्रक्षालयितव्यम्। एतेन नेत्रनसा अधिकतेजस्वितां कलयन्ति। नेत्रे च शीघ्रं न विक्रियेते।

## ३. दन्तधावनं मञ्जनं वा

दन्तानां महत्वं सर्वविदितम्। दन्तानां स्वास्थ्ये शारीरिकस्वास्थ्यं निर्बिभर्ति। डाक्टराः कतीनाञ्चिद् युवकानां दन्तान् एतदर्थं निस्सारयन्ति यद् यदि एवं न क्रियेत, तत् तदीया राजयक्ष्माक्रान्तताया आशङ्का तिष्ठति। तद् दन्तशुद्धये दन्तधावनकाष्ठमावश्यकम्। एतेन 'कमखर्चबालानशीन' इति लोकोक्त्याश्चरितार्थ्यं जायते। निम्बादीनां दन्तधावनेन तत्कटुत्वमभ्यन्तरेपि गच्छति, एतेन यत्र दशनक्रमीणां दूरीभावः, तत्र उदररोगदूरीभावोपि जायते। प्राञ्चो दन्तधावनार्थं सद्यश्छिन्नं काष्ठविशेषमेव उपयोक्तुमादिदिशुः। तेन यत्र दन्तमलशुद्धिर्भवतिस्म, तत्रैव तत्कषायभाग उदरं प्राप्य आभ्य-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# म० पं० वासुदेवशास्त्री

[ ले० चक्रपाणि ]

शोलापुरस्थाः प्रथितयशसो ज्येष्ठाः श्रेष्ठाः ह० दे० माध्यमिकशालायाः संस्कृताध्यापकाः पण्डितवरेण्याः श्रीमन्तो वासुदेवशास्त्रिणः सेवाया अस्मिन् मासे (चैत्रे) निवर्त्यन्ते । कश्चिदध्यापकः स्वसेवायाः निवर्तितः अत्र किं वा महत्तरत्वम् ? येन स प्रशस्यते ? इति केचिद् मन्येरन् । परमेते वासुदेवशास्त्रिमहाभागा न सामान्याः अध्यापकाः ।

एते १९५२ तमे विक्रमाब्दे 'अक्कलकोट' नगरे जनिमलभन्त । बाल्य एव पितरि परलोकं गते स्वमातुलेन सुगृहीतनामधेयेन मणूरकरोपाह्वेन पण्डिताचार्येण पोषिताः संवर्धिता वेदविद्यां चाध्यापिताः । समग्रां साङ्गां ऋक्शाखामधीतवान् पञ्चवर्षदेशीयोऽयं युवा ।

"अधीत्य वेदं न विजानाति योऽर्थं
स्थाणुरयं भारहारः किलाभूत् ॥"

इति केनापि पठितस्य यास्कवचनस्याधिगतार्थो भृशं व्यथितचेता मनस्यकरोत्—"किं मेऽर्थविहीनेन वेदपठनेन" । तत एव 'भगवन्, अध्यापय मां संस्कृतम्' इति ब्रुवन् विद्वरेण्यान् अवधानिकुलोत्पन्नान् बालाचार्यानबालमतीन् सहसा शरणमयात् । तेषां सन्निधौ कानिचिद्वर्षाणि सव्याकरणान् काव्यनाटकादीन् ग्रन्थान् तर्कवादांश्चाध्यैत । तदनन्तरं वर्षत्रयं यावत् सांगलीराजधान्यां राजकीयपाठशालायामनन्तशास्त्रिणां समीपे न्यायशास्त्रं सविशेषमशिक्षत ।

१९१९तमे क्रिस्ताब्दे ह० दे० माध्यमिकशालायां संस्कृताध्यापकत्वेनैते प्रविष्टाः । तदा ते आँग्लभाषाज्ञानहीना अधीतवेदशास्त्रा अप्यनधीतव्यवहारशास्त्रा अचिरादेवाविरतव्यवसायपरा व्यवहारकुशलाः सञ्जाताः । अध्यापनेन समं स्वाध्यायोऽप्येभिः सम्यक् सम्पादितः । एतैः काव्यतीर्थ-वेदतीर्थ-तर्कतीर्थ-साहित्याचार्य-आयुर्वेदाचार्यादयो नैके उपाधयः काशीकलकत्तादिस्था विविधाः परीक्षा दत्त्वा समधिगताः । तथा च मेट्रिकपरीक्षायामपि समुत्तीर्णाः । पुण्यपत्तन-काशी-मद्रास-प्रभृतिषु प्रान्तेषु वेदशास्त्राध्ययनाध्यापनकार्यरतेषु विद्यापीठेषु सदस्यत्वेन परीक्षकत्वेन प्रवेशं लब्ध्वा सम्मानस्थानलाभेन स्वविद्यालयस्य नगरस्य च प्रतिष्ठां संवर्धयामासुः । शोलापुरनगरपालिकायाः सायं संस्कृतपाठशालायाः प्रधानाध्यापकपदमलंकुर्वाणैरेभिः काव्यसाहित्यदर्शनशास्त्रेषु परःशतं पण्डिता निर्मिताः । षट्त्रिंशतं संवत्सरानखण्डमनलसतया अध्यापनकार्यं सम्यक् सम्पाद्य सम्प्रति निवर्तन्ते । अनेन तेषां शिष्य-

---

न्तरिकमलमपि शोधयति स्म । इतश्च तत्र व्ययोपि साधारणः । परमद्यतना दन्तशुद्धिकृते महामूल्यलभ्या वैलायतिकौषधीर्गृहीत्वा 'ब्रुश' द्वारा तदौषधिं दन्तेषूपलिप्य तच्छोधनं कुर्वते । परं कूर्चिकायां दन्तमलकीटाणवस्तिष्ठन्ति । इतश्च वैलायतिकाऽपवित्रौषधिग्रहणेन धर्मो गच्छति । तत्र प्राचीनरीत्यानुसरणमेव स्थाने । यदि तावत् समयो न स्यात्, तद् विशुद्धमञ्जनस्योपयोगो विधेयः । 'आंखों में अञ्जन, दांतों में मञ्जन' इति लोकोक्तिः प्रसिद्धा । तत्रापि यदि सुविधा न स्यात् तत तैललवणद्वारा दन्तशुद्धिः कार्या । एतेन दशना दृढा जायन्ते, शीघ्रं च न पतन्ति । तेषु छिद्राण्यपि न भवन्ति । दुर्गन्धोपि तेषु न तिष्ठति ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★ न्याय-निष्ठ-कवि-हृदयम् ★

( ले० नन्दकिशोरझा, श्रीनगर-बेतिया )

इटल्याः स्वेच्छाचारी मुसोलिनीर्यदाऽनुचितरीत्या अबीसीनियामात्मसादकरोत्तदा जापानस्य महाकवेर्नोगुचे न्यायनिष्ठं कविहृदयं न जाने कया भावनयोद्वेलितमभूत्, तथा चासौ भारतीयकवीन्द्ररवीन्द्राय स्वविस्तृतं पत्रं लिखित्वा तदाततायित्वं प्रतिपादयन् विरोधप्रदर्शनमकरोत्। अन्ततो न्यायनिष्ठस्य कविहृदयस्य तद्वृत्तये काचित्प्रेरणाऽपि तु वर्तते।

परन्तु यदा जापानवासिनो रूसस्थेषु स्वकीयां बर्बरतां दर्शयितुं प्रारभन्त, तदाप्यसौ महाकविबर्बर्ष्णीं स्थातुं नाशकत्, प्रत्युत विस्तृतपत्रमेकं लिखित्वा तेनैव कवीन्द्रेण तस्या औचित्य-समर्थनं कारयितुं न व्यस्मरत्। किन्तु षष्टिमुपगतः कवीन्द्रो यदा तद्विषये स्वानुप्राशं ( स्वमतं ) नामेलयत्, प्रत्युत प्रतिकूलमेव स्वरागमलपत्, तदा तयैव कविलेखन्या अस्मै 'दार्शनिक

---

...ताः सहकारिशिक्षकवृन्दं नागरिकाश्च दुःखोद्विग्नमनसाः सस्नेहं सम्मानं सम्पादयन्ति। तेनैवैतेषां सर्वजनप्रियत्वं शिष्यवात्सल्यं स्वकार्यनिरतत्वं च प्रतीयते। ईशा-केन-कठादीनामुपनिषदां महाराष्ट्रभाषयानुवादः ...भिर्ग्रन्थरूपेण प्रकाशितः। संस्कृतनिबन्धसंग्रहसंग्रहौ ग्रन्थौ तु संस्कृतभाषाया अध्येतॄणां विद्यार्थिनां पर्याप्तमुपयुक्तौ। गीर्वाणवाण्यां भूयांसः प्रबन्धा...दयो वहुषु संस्कृतपत्रिकासु प्रकाशतां गताः। एतेषां ...लेखादिषु मानवप्रकृतेर्माधुर्यं स्वभावपरिपोषः, ...त्मिकता, प्राचीनैतिहासयस्य स्वरूपदर्शनम् एवमा...दयो गुणा अनुभूयन्ते। अमीषां भाषापरिपाटी प्रवाह...मा परिमार्जिता भावोपपन्ना च। एतत्सर्वं "भारती" ...श्रेयाः पाठकगणानां प्रत्यक्षमेव। "सम्राट् विक्रमः" "कविश्रेष्ठः कालिदासः" "पद्मिनीदेवी" "पन्नाधात्री" ...दयो गवेषणपराः प्रबन्धाः कथाश्च 'भारती' पत्रे ...सिद्धिं गताः। केवलमधीतवेदा अनधीतनव्याध्ययन...लिका अत्रभवन्तो। नवीनानप्यध्यापनपटीयसोऽति...न इति निरीक्षकैः। शिक्षणाधिकारिभिर्गृहीतानुभवैः ...नाः पर्यवेक्षणवेलायां यन्निगदितं तत्तु चिन्त्यमेव।

एते वैदिककर्मनिघ्ना अपि माध्वमण्डलम्, वेदपाठशाला, वेदशास्त्रोत्तेजकसभा तिलकविद्यापीठम्, ब्राह्मणसमाजसेवासंघः, ऋग्वेदिदेशस्थब्राह्मणसंस्था, संस्कृतवाग्वर्धिनीसभा, लक्ष्मी को० बैंकप्रभृतिषु नैकविधासु संस्थासु प्रधानत्वेन समाजकार्यं कुर्वन्तः सन्ति। स्वाभिमानधनत्वात् स्वकार्यनिर्वाहकत्वादन्यायस्य प्रतिकारपरत्वादेभिर्बहवो विपत्प्रसङ्गा अनुभूताः। महत्यपि विपत्प्रसङ्गे सम्प्राप्ते स्वनिग्रहत्वं न कदापि परित्यज्यते न वा धैर्यम्। येषां मनो लोभाद् भयाद्वा न कदापि विचलितम्। निश्चितादविरामोऽयं प्रकृतिगुणः। "बुद्धिस्तु मा गान्मम" इत्येतच्चाणक्यवचनं सदैव यदनूद्यतेऽमीभिः। अहो कियान् स्वमतौ विश्वासः। प्रसङ्गविशेषे तेषां चेष्टितैरार्यचाणक्य एव स्मार्यते।

अस्मिन् मधुमासे तेषां नवपञ्चाशत्तमो वर्धन्तीमहोत्सवो नैकैः स्नेहानुबन्धिभिः सम्भारैर्महद्भिः सम्पादितः। स्तुतिसुमनोभिश्चैते महाभागा अभिवृष्टाः। अत्रभवन्तु सरस्वतीपुत्रेषु भगवाञ्जानकीजानिर्नितरां दीर्घायुरारोग्यं वितरतु। सम्पादयतु च चिरं गीर्वाणवाणीसेवामधिकाधिकम्। इत्येवाशासे।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अर्वाचीनाः संस्कृतसाहित्यकाराः

( अनु० देवर्षिकलानाथशास्त्री साहित्याचार्यः B. A. )

[अस्माभिः कतिपयमासपूर्वम् आङ्गलभाषायां यन्त्रलिपीकृतं ( Typewritten ) एकं लघुपुस्तकम् अधिगतम्। एतत्खलु सुप्रसिद्धसंस्कृतेतिहासलेखकस्य डा० एम्० कृष्णमाचारियर M. A., M. L., Ph. D. M. R. A. S. भूतपूर्वमद्रासप्राड्विवाकस्य "संस्कृत साहित्येतिहासः" ( History of classical Sanskrit Literature ) केवलमाधुनिकशताब्दीद्वये संजातानां साहित्यकाराणामितिहासं संकलय्य एकेन विदुषा लिखितमस्ति। एतस्मिन् हि भारतवर्षे संजातानाम् आधुनिकयुगीनसंस्कृतसाहित्यकाराणां (ईशवीय १८०० संवत्सरम् आरभ्य १९४० पर्यन्तं समुद्भूतानां) विशेषतो दक्षिणाञ्चलवासिनां परिचयः, तद्ग्रन्थानां सूची समीक्षा च विशदं संकलितानि, भारतीपाठकानां संस्कृताध्येतॄणां गवेषकाणां च महते लाभाय स्युरित्यत्र लेखकेन आवश्यकपरिवर्तनानन्तरं परिवर्द्धनानन्तरं च संस्कृतेऽनूद्य यथाक्रमं प्रकाश्यते। सम्पादकः]

---

लम्पट' स्योपाधि-प्राप्तावपि विलम्बो नाभूत्। अन्ततः अनेनैव ( हेतुना ) कविहृदयं क्वापि सूर्यादपि प्रखरं क्वापि चन्द्रादपि सुशीतलं च मन्यते। भद्रं, विश्व-विख्यातः कविर्भवितुमस्मादपि भद्रतरं भव्यभावनामयं कीदृशं हृदयमपेक्षितम् ?

धन्यं, कविहृदयं भवेत् त्वेतादृशमेव !

हन्त ! पश्चाद् यदा पातालवासिनो (अमेरिकास्थाः) जापानस्य कञ्चित्प्रान्तं क्षणेनैवाणुबमेन भस्मसादकुर्वन् तदाऽसौ जीवन् कविः किमनुभूतवान् इति कथयितुमशक्ता वयं तादृशन्यायनिष्ठकविहृदयाभावात्।

**श्रीनिवासशास्त्री** (मृत्युः १९००) कौण्डिन्यगोत्रोद्भवोऽयं सुप्रसिद्धसंस्कृतविदुषो लेखकस्य च नारायणशास्त्रिणो भ्राता। अयं मन्नरगुडि( तंजौर )स्थमहामहोपाध्याय-त्यागराजशास्त्रिणो राजूशास्त्रीतिप्रसिद्धस्य निकटे शास्त्राण्यध्यैष्ट। श्रीनिवासशास्त्री शिवाद्वैतवादी आसीत्। शैवाद्वैतसिद्धान्तोऽयमप्पय्यदीक्षितेन समुपसूत्रितोऽभूत्, अप्पय्यदीक्षितमतस्य पुष्टिरनेनापि कृता। सोऽयं सर्वासूपनिषत्सु टीका लिलेख। श्रीनिवासशास्त्रिणः शास्त्राध्ययनं नितरां विस्तृतं गम्भीरञ्चाभूत्। अयं ब्रह्मविद्यापत्रिकाया बहुकालं सम्पादकोऽप्यतिष्ठत्। एतस्य ग्रन्था उपाधयश्च द्वावपि विविधाः स्ताम्, दक्षिणभारतेऽस्य महाभागस्याभूद् भूयसी प्रतिष्ठा। विज्ञप्तिशतक, योगिभोगिसंवादशतक, शारदाशतक, महाभैरवशतक, हेतिराजशतक—श्रीगुरुसौन्दर्यसागररससाहस्रिकेत्यादीन्यस्य काव्यानि "सौम्यसोम" नामकं रूपकं च ख्यातानि सन्ति। एतल्लिखितान्यन्यान्यपि काव्यानि श्रूयन्ते यद्विषये प्रामाणिकज्ञानसामग्री नाधिगता साहित्येतिहासकारैः।

**अम्बिकादत्तव्यासः**—गौडब्राह्मणोऽयं जयपुरप्रदेशीयभानुपुरग्रामे दुर्गादत्तव्यासस्य गृहे १८५८ ई० वत्सरे जन्म लेभे। अयं प्रकाण्डः संस्कृतविद्वान् आशुकविः, अवधानी चासीत्। अयं विविधोपाधिभिर्भागलपुरविद्यालये संस्कृताध्यापकोऽभूत्। शिवाजीवीरस्य चरित्रवर्णनात्मकं लिखितः "शिवराजविजय" ख्योऽस्य गद्यग्रन्थः सुप्रसिद्धः, उपन्यासशैल्या सुललितं प्रणीतो य उत्तरभारते माध्यमिककक्षास्वध्याप्यते सादरम्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



रत्नशतकप्रस्तारदीपिका-गणेशशतक-शिवविवाहादीन्यस्य काव्यानि। एतस्य मृत्युः सं० १६०१ वत्सरेऽभवत्।

**वेङ्कटराघवाचार्यः सेतलूर,** ( १८४६—१६०६ ) कौशिकगोत्रोत्पन्नरङ्गनाथस्य पुत्रः श्रीरङ्गनिवासी त्रिशिरःपुरपत्तनस्थ एस० बी० जी० महाविद्यालये प्रधान-संस्कृतपण्डितोऽभूत्। एतस्य रामाष्टप्रासमञ्जरी, रङ्गनाथाष्टप्रास, श्रीरङ्गनायिकानक्षत्रमालिका, आर्यासप्तति-इत्यादीनि काव्यानि एतत्सुतस्य वी० राजगोपालशर्मणो (बी० ए०) निकटे वर्तन्ते। एतद्रचितं मन्मथविजय-नाटकं मोहमयीतः प्रकाशमुपगतम्।

**गणपतिशास्त्री**— ( १८७१—१६१३ ) अयं तंजोरप्रदेशीयपैङ्गनाडुनगरे जन्मालभत। एतत्पिता मौद्गल्यगोत्रीयः सुब्रह्मण्यः माता च शीतलक्ष्मी आस्ताम्। कुम्भकोणंनगरेऽद्वैतसभाया अयं मुख्य-पण्डितोऽभूत्, ततश्च शाङ्करमठस्य प्रधानपण्डितः। अयं सर्वशास्त्रनिष्णातः, महामहोपाध्याय-वेदान्तकेसरी-त्यादिपदवीधरश्चासीत्। एतस्य शिष्याः भारते प्रसिद्धिमधिजग्मुः। कादलङ्गुडिनटेशशास्त्री यः संस्कृतसाहित्येऽधुना सुप्रसिद्धः, एतस्यैव शिष्यः। कटाक्षशतक—अन्यापदेशताटकापरिणय ध्रुवचरित रसिकभूषणगुरुराजसप्तति इत्यादीन्यस्य काव्यानि, कतिपयस्तुतयः, छंदःशास्त्रे च वृत्तिमणिमाला उपलभ्यन्ते।

**पञ्चपगेशशास्त्री कविरत्नमेतस्य भ्राता**— ( जन्म १८७४ ) अयमपि कुम्भकोणस्थशाङ्करमठस्य विंशतिवत्सराणि प्रधानपण्डितोऽतिष्ठत्, अधुना तु प्राप्तावकाशस्त्यागराजनगरे ( मद्रास ) निवसति। विविधशास्त्रानुशीलनसम्पादनादिकं कृत्वाऽनेन हरिश्चन्द्र-विजय—ताटङ्कप्रतिष्ठामहोत्सवाख्यचम्पूद्वयम्, काव्यकोलाहल-गौरीचरणसप्तति-व्यासपूजामहोत्सव-शङ्करगुरुचरितसङ्ग्रहाख्यकाव्यचतुष्टयम् कतिपयस्तुति-काव्यानि चालिख्यन्त।


**हिन्द मिल्स लिमिटेड**

१५, डुगलमार्गः, बेलार्ड इस्टेट
मोहमयी १ (बंबई)

- लेयार्ड — लम्बवस्त्र (लांगक्लॉथ)-परिधानीयवस्त्र (शर्टिंग)-प्रावरण (शीटिंग)-शय्यावस्त्र (चादर) ड्रिल — सूक्ष्मवसन (मलमल)-पापलीन-धौत-शाटी-मञ्जरी-सुसीज इत्यादीनां कृते।

तथा

- काकेटचिह्नितं दृढसूत्रम् (स्टेपल फाइबर) एवं कार्पाससूत्रम् (कॉटन) १०तः ६० काउण्टपर्यन्तम्—एतेषां क्रयाय।

विशेषतः ग्रामीणोपभोगस्य कृते निर्यातविक्रयाय च सुप्रसिद्धमिदम्

तार—'हिन्दग्राम'
फोन—ऑफिस ३००१७, मिल ६०४४३




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# मधुमासः

[ रामनाथ पाठकः 'प्रणयी', क्षत्रिय-विद्यालयः आरा (बिहार) ]

आयातो मधुमासः !
नवल-लतासु गतासु विकासं दिशि-दिशि भ्रमर-विलासः !
आयातो मधुमासः !

अनुपम-सुषमा-सरस-रसाले,
कियती मादकताऽस्मिन् काले,
प्रिय-मंजुल-वंजुलशाखास्वपि जीवन-यौवन-रासः !
आयातो मधुमासः !

'कुहू-कुहू'-कोकिल-कल-गानम्,
कुरुते प्रणयिषु शर-संधानम्,
मदयति हृदयमधिकमधु विकिरन् कल-मद-मलयोच्छ्वासः !
आयातो मधुमासः !

नव-वीणां नव-स्वर-झंकारम्,
रचयति कोऽपि नवं संसारम्,
मधुर-मधूक-कुसुम-पर्यंके विहरति रे, रति-हासः !
आयातो मधुमासः !

सुन्दरतायाः अयमवतारः,
सुन्दरतायाः किम् शृङ्गारः,
कस्य मनो न मनोभवबाणैः सम्प्रति हरति पलाशः !
आयातो मधुमासः !

प्रकृतिरियं क्षणभंगुर-माया,
खेलति नश्वरतायाश्छाया,
हन्त ! तथापि न मानवलोकं मुञ्चत्याशा-पाशः !
आयातो मधुमासः !



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## संस्कृतसमाचारः

### संस्कृतलेखकानां कृते सुवर्णावसरः ! प्रतियोगितात्रयम्

देहलीवास्तव्यैः श्रीकैलासचन्द्रमहोदयैः 'भारती' द्वारा लघुकथा-एकाङ्किनाटक-कविताप्रतियोगितानाम् आयोजनाय (१७५) रूप्यकाणां राशिः प्रदत्तः । अल्पेन कालेन स्वल्पव्ययेन सह भारती एताः प्रतियोगिता आयोजितुं वाञ्छति ।

१. भारते भारताद् बहिश्च निवसन् कोऽपि नरो नारी वा प्रतियोगितायामेतस्यां भागं ग्रहीतुं क्षमाः ।

२. लघुकथायाः, एकाङ्किनाटकस्य कविताया वा (एकस्य कस्यचन) प्रेषणं भारतीकार्यालये श्रावणपूर्णिमामनुल्लंघ्य कार्यम् । तदनन्तरं लब्धा कृतिर्नाङ्गीक्रियेत ।

३. लघुकथा भारत्याः पृष्ठचतुष्टयात् पृष्ठषट्कपरिमितकाया स्यात् नाऽतोधिका, न्यूना वा । शब्दसंख्या न्यूनान्न्यूनं सहस्रद्वयात्मिका, अधिकाधिकं च सहस्रात्मिका भवेत् ।

४. एकाङ्किनाटकं भारत्याः पृष्ठचतुष्टयात्सप्तपृष्ठपर्यन्तं विस्तृतं भवितुं शक्यम् । शब्दसंख्या एकसहस्रं सहस्रद्वयं वा ।

५. कविता प्रशस्यरूपेण वीररसप्रधाना न्यूनात् न्यूनं दशपद्यात्मिका अधिकं च त्रिंशत्पद्यात्मिका स्यात् ।

६. लघुकथाप्रतियोगितायां, एकाङ्किनाटकप्रतियोगितायां च लब्धप्राथम्याय विदुषे प्रत्येकम् एकपञ्चाशद्रूप्यकमितो द्रव्यराशिः, द्वितीयस्थानमधिगतवते च प्रत्येकं पञ्चविंशतिरूप्यकाणि ससम्मानं प्रदास्यन्ते ।

७. कविताप्रतियोगितायां सर्वप्राथम्यमुपेयुषे विदुषे एकविंशतिमुद्राः प्रदास्यन्ते ससम्मानम् ।

८. भारतीनिर्णायकसमितेर्निर्णयो ऽन्तिमरूपेण मान्यः स्यात् । एतस्यां समितौ त्रयो निर्णायकाः सन्ति ।

१—म० म० पं० गिरिधरशर्मा चतुर्वेदः ।

२—भट्टश्रीमथुरानाथशास्त्री भारतीसम्पादकः ।

३—वैद्यराजजयरामदासस्वामी आयुर्वेदकालेजाध्यक्षः ।

९. लब्धपुरस्काराः कृतयः, अन्यास्वपि योग्याः रचना भारत्यां प्रकाशमेष्यन्ति !

वयं सर्वानपि संस्कृतज्ञान् सोत्साहं प्रतियोगितास्वेतासु भागं ग्रहीतुमामन्त्रयामहे ।

"भारती"–परिवारः


## फोनिक्स मिल्स लिमिटेड

मुद्रणम् (प्रिंट्स) सूत्रजालकानि च (Lenos)

## डॉन मिल्स कंपनी लिमिटेड

सीवनदोरकाणि (स्यूइङ्ग थ्रेड) एवं परिधानीयवस्त्राणि (होजरी)

## ब्रेडबरी मिल्स लिमिटेड

उपरिपरिधानवस्त्रम् (कोटिंग) परिधानीयम् (शर्टिङ्ग) श्वेतीकृतं लम्बवस्त्रम् (ब्लीच्ड लांग क्लाथ)

अभिकर्त्तारः (एजेंट)—

## रामनारायण सन्स लिमिटेड,

इम्पीरियल बैंक बिल्डिग बैंक स्ट्रीट

बम्बई १




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सूक्ति-सुधा

युक्तमुक्तं पुराविद्भिश्चिन्ता जूर्तिः सुदारुणा ।
न भेषजैर्लङ्घनैर्वा न चान्यैरुपशाम्यति ॥१॥

पुराने आदमियों ने ठीक कहा है कि चिन्ता बडा भारी ज्वर (बुखार, पीडा) है, जो न दवा, न लंघन, न और और उपायों से शान्त होता है ॥१॥

दीपो भक्षयति ध्वान्तं कज्जलं च प्रसूयते ।
यदन्नं भक्षयेन्नित्यं जायते तादृशी प्रजा ॥२॥

दीपक अन्धकार को खाता है, और काजल पैदा होता है। जैसा अन्न खाता है वैसी ही संतान होती है ॥२॥

अकृत्वा पौरुषं या श्रीविकासिन्यपि किं तया ।
जरद्गवोऽपि चाश्नाति दैवादुपगतं तृणम् ॥३॥

बिना पुरुषार्थ (पराक्रम) करें यदि लक्ष्मी और वह बढी भी तो उससे क्या फल ? बुड्ढे बैल को भी भाग्य से चारा मिल ही जाता है ॥३॥

प्रस्तावसदृशं वाक्यं सद्भावसदृशं प्रियम् ।
आत्मशक्तिसमं कोपं कुर्वाणो न विनश्यति ॥४॥

जैसा प्रसङ्ग हो वैसा वचन, जैसा स्नेह हो समान मित्र, अपनी शक्ति के अनुसार क्रोध हुआ मनुष्य कभी नष्ट नहीं होता ॥४॥

स एव रसिको लोके, श्रुत्वा काव्यं परैः कृतम् ।
उत्पद्यते हि युगपद् वदनेऽक्ष्णोश्च यस्य वाः ॥५॥

इस लोक में वही रसिक है, दूसरे की रचना को सुनकर जिसके मुख में और आंखों एक साथ 'वाः' निकले । [आंखों से वा माने वारि (प्रेमाश्रु) और मुख से 'वाह' यह तारीफ का शब्द]

विदुषां वदनाद्वाचः सहसा यान्ति नो बहिः ।
याताश्चेन्न पराञ्चन्ति द्विरदानां रदा इव ॥६॥

समझदारों के मुख से यकायक कोई वाणी नहीं निकलती । जो कदाचित् निकली तो फिर हाथी के दांतों की तरह पीछे नहीं जाती । अर्थात् हाथी के दांत जैसे एक दफा बाहर निकले बाद पीछे नहीं जाते इसी तरह सज्जनों का वचन फिर अन्यथा नहीं होता।

अहो किमपि चित्राणि चरित्राणि महात्मनाम् ।
लक्ष्मीं तृणाय मन्यन्ते तद्भरेण नमन्त्यपि ॥७॥

अहा ! महापुरुषों के चरित्र कैसे आश्चर्यजनक कि जो लक्ष्मी (धन) को तृण की तरह तुच्छ मानते हैं किन्तु उस लक्ष्मी के भार से वह नीचे नमते हैं अर्थात् उनके पास लक्ष्मी (धन) आने पर उन्हें नहीं होता, वह नम्र ही होते हैं ॥७॥

प्रकाशक—जयबहादुरसिंह

पता—भारती भवन, गोपालजी का रास्ता, जयपुर

मुद्रक—राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती



निर्भीक--भारतसुसंस्कृतिरक्षकोऽयम्
खड्गेन खण्डितखरोग्रतरप्रतापः ।
देशेऽत्र सामयिकनीतिपटुः प्रवीरो
धीरश्चिरं विजयतां शिवराजवीरः ॥

वर्षम् ५ } अष्टमाऽङ्कः { मूल्यम्
वार्षिकम् ३) रु०
एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❀ विषय-सूची ❀


| क्रमः | लेखाः | लेखकाः | पृष्ठसंख्या |
|---|---|---|---|
| १. | भारती | पं० विश्वबन्धुशास्त्री भरतपुरम् | १७१ |
| २. | भारती-विजयम् | पं० प्रेमशंकरमिश्रः मुरेही (सतना) | १७२ |
| ३. | मरुभूमिः | श्री श्रीनिवासशर्मा शिरोमणिः चिदम्बरम् | १७६ |
| ४. | पर्वतीया | श्रीमदनमोहनझा मुजफ्फरपुरम् | १८१ |
| ५. | तैलाभ्यङ्गनियमाः | श्रीदीनानाथशास्त्री सारस्वतः, देहली | १८५ |
| ६. | संस्कृतभाषायां विश्वभाषायाः साक्षात्कारः | श्री श्री० दा० सातवलेकरः सूरत | १८६ |
| ७. | सम्पादकीयम् | सम्पादकः | १९० |
| ८. | सूक्ति-सुधा | " | |


---

## संस्कृतसेवकानां कृते सुवर्णावसरः ! प्रतियोगितात्रयम्

देहलीवास्तव्यैः श्रीकैलासचन्द्रमहोदयैः 'भारती' पत्रिकायै लघुकथा-एकाङ्किनाटक कविताप्रतियोगितानामायोजनाय १७५) रूप्यकाणां राशिः प्रदत्तः। अल्पेन स्वकीयव्ययेन सह भारती एताः प्रतियोगिता आयोजयितुं वाञ्छति।

१. भारते भारताद् बहिश्च निवसन् कोऽपि नरो महिला वा प्रतियोगितायामेतस्यां भागं ग्रहीतुं क्षमाः।

२. लघुकथायाः, एकाङ्किनाटकस्य कवितायाः वा (एकस्य कस्यचन) प्रेषणं भारतीकार्यालये श्रावणपूर्णिमामनुल्लंघ्य कार्यम्। तदनन्तरं लब्धा कृतिर्नाभिरोच्येत।

३. लघुकथा भारत्याः पृष्ठचतुष्टयात् पृष्ठषट्कपर्यन्तमितकाया स्यात् नाऽतोधिका, न्यूना वा। शब्दसंख्या न्यूनान्न्यूनं सहस्रद्वयात्मिका, अधिकाधिकं च त्रिसहस्रात्मिका भवेत्।

४. एकाङ्किनाटकं भारत्याः पृष्ठचतुष्टयात्सप्तपृष्ठपर्यन्तं विस्तृतं भवितुं शक्यं, शब्दसंख्या एकसहस्रं सहस्रद्वयं वा

५. कविता प्रशस्यरूपेण वीररसप्रधाना न्यूनात् न्यूनं दशपद्यात्मिका अधिकं च त्रिंशत्पद्यात्मिका स्यात्।

६. लघुकथाप्रतियोगितायां, एकाङ्किनाटकप्रतियोगितायां च लब्धप्राथम्याय विदुषे प्रत्येकम् एकपञ्चाशद्रूप्यकमितो द्रव्यराशिः, द्वितीयस्थानमधिगतवते च प्रत्येकं पञ्चविंशतिरूप्यकाणि ससम्मानं प्रदास्यन्ते।

७. कविताप्रतियोगितायां सर्वप्राथम्यमुपेयुषे विदुषे एकविंशतिमुद्राः प्रदास्यन्ते ससम्मानम्।

८. भारतीनिर्णायकसमितेर्निर्णयोऽन्तिमरूपेण मान्यः स्यात्। एतस्यां समितौ त्रयो निर्णायकाः सन्ति।

१—म० म० पं० गिरिधरशर्मा चतुर्वेदः। २—भट्टश्रीमथुरानाथशास्त्री भारतीसम्पादकः।

३—वैद्यराजजयरामदासस्वामी आयुर्वेदकालेजाध्यक्षः।

९. लब्धपुरस्काराः कृतयः, अन्यास्वपि योग्याः रचना भारत्यां प्रकाशमेष्यन्ति !

वयं सर्वानपि संस्कृतज्ञान् सोत्साहं प्रतियोगितास्वेतासु भागं ग्रहीतुमामन्त्रयामहे।

"भारती"-परिवारः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
जयपुरम

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्ष ५ | ज्येष्ठपूर्णिमा, सं० २०१२ | अङ्कः ८

## भारती

(ले० पं० विश्वबन्धुः शास्त्री, आचार्यः श्रीमद्दयानन्दसंस्कृतमहाविद्यालयस्य भरतपुर)

परा पवित्रभारती, विभासताम् सदा सताम्,
जगद्धिताय वर्त्ततांम्, विवेक-वर्धिनी सताम् ।
सखीव पुण्य-पोषिता, विकासिनी विभासिनी,
प्रतप्तभानु-दीपिनी, सुचन्द्रिकेव नन्दिनी ॥१॥

× × ×

प्रकाशताम्मनस्सु सा, विवेक-दायिनी शुभा,
विराजतां सुहृत्सु सा, सदातिशायिनी सुधा ।
बिभर्त्ति लोक-लोकपान्, पुनः पुनः सुमातृका,
सदैव भारती बिभर्त्तु, भारते प्रभारता ॥२॥

× × ×

असत्पथो निवार्य्यताम्, तमोऽपहन्तृका सताम्,
पुनः पुनर्विवर्त्तिनाम्, जगन्निबन्धमच्छिनत् ।
क्रिया-कलाप-कौशलान्, सुधारयत्यसौ मुदा,
सुमातृका-सुभातृका, सुदारिका सु भारती ॥३॥

× × ×

अखण्डभूमिमण्डले, प्रभासमानज्योतिषा,
उदेति सूर्य्यमण्डलम्, तमो हतम् तमो गतम् ।
प्रकाशिता दिशो नवाः, विकासिताश्च पङ्कजाः,
सदा विहारमाचरेत् मनस्सु नस्सुभारती ॥४॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# भारती-विजयम्

(लेखकः—प्रेमशङ्करमिश्रः संस्कृतपाठशाला झुकेही जि० सतना)

एकाङ्किरूपकेऽत्र छात्रत्रय-विचारकद्वयवार्तालापमाध्यमेन संस्कृतस्य गौरवम् प्रदर्शितम्

(स्थानम्—संस्कृतविद्यालयगामिनः मार्गस्य एकतः स्थितम्। तत्र रमेशसुरेशनामानौ छात्रौ मांगलिकपद्यं गायतः)

भक्तव्रातनिषेवितांघ्रियुगला लावण्यवारां निधिः।
पद्मालीमधुपानमत्तमधुपश्रेणीकचा निर्मला ॥
वीणापुस्तकधारिपाणिकमला मालाभिराजत्करा ।
अस्माकं प्रियकारिणी भवतु सा श्रीशारदा सारदा ॥१॥

[तन्द्रामीलितलोचनः नरेन्द्रः पाणिद्वयेन नेत्रे घर्षयन् प्रविशति]

नरेन्द्रः—मदीयमधुरनिद्रासुखं भवन्तौ न मपर्षयतः, यतः निखिलजनसौख्यकरे प्रवाति वायौ शब्दं कृत्वा शून्यतां विनाशयतः।

उभौ—भ्रातः इयं रम्यवेला निद्रायाः कृते नास्ति। पवनः अपि नवीनस्फूर्तिं दत्वा अस्मान् कर्मसु प्रवर्तयति।

सुरेशः—भगवतः भास्करस्य किरणानां स्पर्शं प्राप्य विकसितं कमलवनं, तत्र च मकरंदपानमत्ताः प्रमुदिताश्च मधुपाः नृत्यन्ति।

रमेशः—प्रसूनगन्धं समादाय वायुः मानवानां मनांसि प्रसादयति।

सुरेशः—कलरवकारिणः एते पक्षिणः इतस्ततः उड्डीयन्ते।

रमेशः—असौ बकः महता ध्यानेन मत्स्यान् विलोकयन् ध्यानपरायणः छात्र इव प्रतीयते।

सुरेशः—अद्य विद्यालये कः पाठः पठनीयः।

रमेशः—"देववाणी-गौरवम्" इति।

सुरेशः—देववाणीगौरवम् न केवलं भारतस्य अपि तु समस्तस्य जगतः सौख्यकारकमिति मन्ये केनापि कथितम्—

भारते जनुरासाद्य भारती नैव सेविता।
मानुषत्वं वृथा नीतं मेदिनीभारकारिणा ॥२॥

रमेशः—अहं तु अभिलषामि।

देशसंस्कृतिरक्षार्थं लोकरंजनहेतवे
भारते संस्कृता भाषा मुदा सर्वैरधीयताम् ॥३॥

नरेन्द्रः—उभौ अपि मामनादृत्य न जाने किं प्रजल्पतः। नूनं संस्कृतपठनेन विकृतमस्तिष्काः संस्कृतविदः अवधीरितसंस्कृतव्यवहाराः भवन्ति।

उभौ—हन्त! अपराद्धौ स्वः। देववाणीगौरवाकृष्टचित्ताभ्यां सत्यमेवातिक्रान्तः समुदाचारः। (प्रकाशम्) भारतीयनिधिभूतां पुरातनीं भाषाम् कथं निन्दसि?

नरेन्द्रः—मृता सा प्रोच्यते कैश्चित्।

सुरेशः—नूनं धूर्तप्रतारितैः॥

नरेन्द्रः—वंचिताः स्युः कथं विज्ञाः।

रमेशः—परोन्नेया बुधाः कथम्?॥

नरेन्द्रः—अलं महतां निन्दया, मम तु सुनिश्चितमिदम् मतम् विद्यते यत्प्रचारहीना भाषा मृतपदवाच्या भवति।

रमेशः—भारतमातुः पयसा अन्नेन च पुष्टदेहस्य तव मुखात् संस्कृतभाषा मृतभाषा इत्युक्तिः हृदयम् सन्तापयति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सुरेश:—आसेतुहिमाचलं यस्याः प्रसारः, जन्मनः प्रभृति मरणान्तं यस्याः प्रयोगः भवति, संसारस्य ज्ञानक्षेत्रे मूर्धन्याः वेदाः यस्याः माध्यमेन विरचिताः सन्ति, हन्त ! तामेव भवान् मृतां वदति। प्रचारस्तु अस्माभिरेव कर्तव्यः।

रमेश:-भवतां कथनमतीव लज्जाकरमिति मन्ये।

नरेन्द्र:—एषा अतिकठिना, रटनं विना अस्याः पठनं न जायते, प्रचारवार्ता तु दूरे तिष्ठतु।

सुरेश:-अहो ते बुद्धिवैपरीत्यम्। पारेचतुःशतक्रोशं स्थितानां विदेशीयानां भाषा कठिना न प्रतीयते, न च तदध्ययने परिश्रमः अनुभूयते। यतः तदध्ययनद्वारा साम्प्रतम् दग्धोदरपूर्तिकृते लिपिकपदस्य प्राप्तिः संजायते।

रमेश: कठिनता, सरलता च पाठकानां पाठनशैलीमपेक्षते।

नरेन्द्र—भिक्षुकनिमितिमात्रसारया अनया किम् ?

सुरेश:—कालविपर्यय एषः, विदेशीयसत्ताभाषावशंगतैः भारतीयैः चिरकालेन सैषा भगवती परित्यक्ता

रमेश:—भाषायाः व्यवहारन्यूनता एव तद्विदां हीनदशात्वे कारणम् भवति।

सुरेश:—जर्जरकलेवरः सुरभारतीसेवकः भारतीयज्ञाननिधिं रक्षितवान्।

रमेश:—स्वकीयबन्धुभिः तिरस्कारं लब्ध्वा अपि तेन आत्महत्या न कृता। निन्दका अपि न उपालब्धाः कामं भिक्षया उदरदरीं पूरितवान्। इति आश्चर्यास्पदं नास्ति किम् ?

नरेन्द्र:— इयं भाषा ब्राह्मणानामेव, तेषामपि मध्यतः पण्डितपदवाच्यानामेवेति प्रवादः लोके प्रसारं न गतः किम् ?

सुरेश:—अयमपरः आक्षेपः सुरभारत्या उपरि, किं भोः, गवांपयः जातिविशेषवर्गविशेषकृते एव बलकारकं भवति।

रमेश:—धारानरेशस्य सा घोषणा विस्मृता किम् ? यत्र घुष्यते स्म 'अनधीयानः विप्रोऽपि मम पुराद् बहिरस्तु, अध्ययनशीलो विद्वान् कुंभकारः अपि मम पुरे तिष्ठतु।

सुरेश:—'सर्वसाधारण परिचितभाषायां शासनपत्राणि लिख्यन्ते' इति तु भवानपि स्वीकरिष्यति। प्राचीनशिलालेख-आदेशपत्र-सर्वजनबोधकवाक्यानां संस्कृतमयत्वे कः हेतुः इति भवान् विमर्शयतु।

रमेश:—अस्माकं विचारे संस्कृतपठने सर्वेषामधिकारः विद्यते। इतिहासघटनावली अत्र प्रमाणभूता अस्ति।

(नेपथ्ये तारध्वनिः)

[आः क एष अविचार्यकारी जनः परमपवित्रे भारते वर्षे उच्छृंखलविचारधारां प्रवर्तयति भ्रष्टाचारप्रियः]

(रामानन्दः वेगेन आगच्छति)

रामानन्दः—परम्पराप्राप्तसमस्तशास्त्रे,
लोकोपदेशे परमप्रवीणे।
मयि स्थिते सर्वविचारदक्षे,
विमूढभावोत्र कथं प्रवर्तते ॥५॥

(सर्वेऽपि सादरं प्रणमन्ति)

रामानन्दः—रे मूढाः बालकाः किमर्थं यत्किमपि अनर्गलं जल्पन्तः न लज्जथ ? संस्कृतपठने द्विजानामेव अधिकार इति शास्त्रीया व्यवस्था न श्रुता किम् ?



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कलानाथः—[सहसा प्रविश्य] संस्कृतपरिचयक्षेत्रे अधिकारचर्चा दैवदुर्विलसितम् इति मन्ये। अन्यथा भाषापरिचयक्षेत्रे अधिकारचर्चायाः क उपयोगः ?

रामानन्दः—अहो इदानीं ज्ञातम्। यदत्र दुरभिसन्धौ भवानपि सम्मिलितः।

कलानाथः—कः दुरभिसन्धिः ? भारतीयानां परमपवित्रं कर्तव्य एषः।

रामानन्दः—तर्हि धर्मशास्त्राणि ध्मायन्ताम् धूमध्वजेषु।

कलानाथः—नहि कुत्रापि शास्त्रेषु संस्कृतभाषाध्ययने द्विजानामेव अधिकार इति चर्चा प्राप्यते।

रामानन्दः—वेदाङ्गभूतानां व्याकरणच्छन्दःप्रभृतिविषयाणां पठने सर्वेषामधिकारप्रतिपादकः भवान् सत्यमेव देशोन्नेता।

कलानाथः—शास्त्रमर्मज्ञ शान्तेन मनसा विचारणीयम्। वेदाध्ययने सत्यपि अधिकारनिरूपणे तदंगानां ज्ञाने तादृशी व्यवस्था न विलोक्यते। यतः लौकिकवैदिकरूपेण तत्र प्रकारद्वयं लभ्यते। पाणिनीये शब्दशास्त्रे भाषायाम्, छन्दसि, ऋषौ लोके प्रभृतिपदानां प्रयोगः अत्र प्रमाणभूतः अस्ति।

रामानन्दः—नाटकेषु भाषाभेदव्यवस्थितः इति तु भवानपि मन्येत। तत्र चेट-शकार-दासी-नीचजनानां संस्कृतभाषाव्यवहारः न दृश्यते। उत्तमपात्राणां राजादीनाम् संस्कृतप्रयोगः दृश्यते। एतेन अधिकारचर्चा सिद्धा भवति।

कलानाथः—भाषाभेदव्यवहारः अधिकारसाधकः न अस्ति, अपि तु पात्राणां स्तरबोधनाय साहित्यशास्त्रीयव्यवस्थां साधयति। अन्यथा संस्कृतभाषया नितरामपरिचितः तत्परिज्ञाने कथं समर्थः भवेत् ?

रामानन्दः—अहं तु अधिकारव्यवस्थायां उल्लंघनं राष्ट्रस्य श्रेयसे न मन्ये।

कलानाथः—इदं दौर्भाग्यम्। यदस्माकं पूज्याः प्रकाण्डपण्डिताः सुरभारतीविरोधे कटिबद्धाः। आश्चर्यस्य वार्ता अस्ति यद् भवादृशाः जनाः 'पूर्वं संस्कृतभाषा विश्वभाषा आसीत्' इति वदन्ति। अहो असम्बद्धविचारावली।

[रामानन्दः मौनं तिष्ठति]

नरेन्द्रः—महोदय ? देववाणीपठनपरायणः अन्यभाषां विहाय लोकव्यवहारं कथं प्रवर्तयेत ? अद्य तु समस्तं जगत् विज्ञानस्य प्रभावेण कुटुम्बसदृशः जातः। नहि सर्वत्र संस्कृतप्रचारः अस्ति।

कलानाथः—वत्स ? अन्यभाषापरित्यागः द्वेषभावना च संस्कृतप्रेमिणा न कर्तव्या। यतः भाषाद्वारा साहित्यपरिचयः जायते। ततश्च पारस्परिकसांस्कृतिकपरिचयः भवति। देशाचारविज्ञानप्रभृतिपरिचयं लब्ध्वा वयं स्वीयम् सान्निध्यम् अन्यदेशीयैः अनुभवामः। अद्य संसारे विचारैकतायाः मित्रत्वस्य च परभावश्यकतास्ति। भाषापरिचयः अत्र आवश्यकः।

सुरेशः—संसारे बहुश्रुतः जनः पूज्यते, समाजे शोभते, देशमुन्नयति, न तु कूपमंडूकप्रवृत्तिः।

रमेशः—स्वकीयज्ञानं हित्वा अन्यदीय ज्ञानं कदापि नहि शस्यते। अतः संस्कृतभाषाज्ञानपूर्वकं विभिन्नभाषाविज्ञाने प्रयत्नः करणीयः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नरेन्द्रः--आर्य ? अहमपि सुरभारतीप्रचारं चिकीर्षामि।

(रामानन्दः सासूयं पश्यन्निर्गच्छति)

कलानाथः—अतीव आनन्दस्य वार्ता अस्ति । युवकजनानां सहयोगं प्राप्य एव राष्ट्रिय उत्थान योजना सफला भविष्यति । अहं तव निर्णयं मुक्तकण्ठं प्रशंसामि। इदानीं प्रचुराः सुरभारती-प्रचारकाः अपेक्ष्यन्ते ।

नरेन्द्रः--आर्य ? करणीयं किमपि प्रतिबोधयतु भवान् ।

कलानाथः भारते ग्रामे २ विद्यालयस्थापनं तथा राज्यद्वारा संचालितेषु विद्यालयेषु संस्कृतस्य अनिवार्यमध्यापनं करणीयम् । सरलशैली-द्वारा भाषापरिचयोपयुक्तग्रन्थरचना । इतिहास--भूगोल--प्रभृतिनवीनग्रन्थतुलनात्मकपठनव्यवस्था करणीया । भारतीय-वैशिष्ट्यसूचकग्रन्थानां भावबोधकसरल-ग्रन्थानां प्रणयनम् ।

सर्वेऽपिविद्यार्थिनः—सुरभारती जयतात्। योजनाबद्ध-कार्ये वयं योगं दास्यामः ।

कलानाथः—अत्र विषये युष्मादृशां कर्तृत्वशक्तिरपेक्ष्यते।

अद्य वयं सर्वेऽपि मनसा भावयाम

धनं धान्यं प्राज्यं निखिलजनसौख्यान्वितिकरम्,  
भवेद्दिव्या वाणी निखिलजगतः शासनकरी।  
कपाली भूतेशो हिमकरकला जह्नु तनया,  
शिवोपेतो देवो मम हृदयतापं च हरताम् ॥६॥

चन्द्रचन्द्राभ्रखयुग्मेऽब्दे वैक्रमे चैत्रमासके ।  
रामजन्म रवेर्वारे पूर्णतां रचनगता ॥७॥


# द्वितीयवर्षस्य हृदयाकर्षिणी समुन्नतिः

## नूतनो व्यवसायः

| | |
|---|---|
| १६५२ ईशवीयवत्सरे | ८० लक्षोत्तरा २ कोटिः |
| १६५३ " | ३ कोटितोप्यधिकम् |
| १६५४ " | २५ लक्षोत्तर ४ कोटितोप्यधिकम् |

## वृद्धिङ्गतो धनराशिः

३१ दशाम्बर १६५३ ईशवीयवत्सरपर्यन्तं घोषितो धनराशिः

रु० १५—०—० प्रतिवर्षं जन्मपर्यन्तम्

रु० १२—०—० " अर्पितधनम्

# दी न्यू एसियाटिक इन्स्योरेंस कम्पनी लिमिटैड

प्रधानकार्यालयः नवदेहली

उत्तरभारतस्थाः शाखाकार्यालयाः —

देहली, लक्ष्मणपुरम् ( लखनऊ ) जलन्धरः, वाराणसी, इन्दौर, नागपुरम् , बरेली, आगरा, जयपुरम् इत्यादयः ।




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# मरुभूमिः

[ ले० शे० श्रीनिवासशर्मा, शिरोमणिः, चिदम्बरम् ]

"स्मृतिपथान्न दूरमतिक्रान्तोऽयं विषयः । केवलं ह्य एव अनुभूत इव प्रतीयते । मम द्वादशवर्षीयः कुमारः प्रत्यूषसमये श्लोकमिममनुवाचयति स्म मुखस्थीकरणाय- "परार्थे यः पीडामनुभवति भङ्गेऽपि मधुरः यदीयस्सर्वेषामिह खलु विकारोऽप्यभिमतः । न संप्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः तदिक्षोर्दोषोऽसौ न, पुनरगुणाया मरुभुवः" इति । व्रतिनः ब्राह्ममुहूर्तमिति यं वदन्ति सोऽसौ समयः । सर्वदैव मम उषस्युत्थानशीलस्य 'कुमारस्यापि शिक्षा साधु कृता भवेदिति' सोऽप्युत्थापनीय आसीत् । सकृदपि श्लोकः अनुवाचितः श्रुतश्च । परं मन्दभाग्यस्य शिक्षादीक्षया वञ्चितस्य मम कथं एतद्श्लोकतात्पर्यं ज्ञातुं शक्यते ? प्रत्युत समयोऽप्यालोचितुं नास्ति । पञ्चवादनसमये प्रातः मम उद्योगसमयः इति गन्तव्यमासीत् । अतः सद्यः प्राभातिकं संस्कारमवाप्य अथवा संपाद्य प्रस्थितोऽहं ममोद्योगस्थानं तन्तुयन्त्रालयं प्रति ।"

"तूत्तुकुडीनगरे विशाले प्रशान्ते च समुद्रतीरे विलीनभूयिष्ठ चन्द्रान्वेषणायेव, बृहत्तरतरङ्गमालासूययेव सगम्भीरमभ्रङ्कषशिखरः विराजते तन्तुयन्त्रालयः 'हार्वि' प्रभूणाम् । अत्र किल सहस्राधिकाः पुरुषाः स्त्रियश्च क्रमेण नियतसमय आगच्छन्ति, स्वस्वकर्मणि प्रवर्तन्ते, निवर्तन्ते च नियतसमये स्वस्वगृहान्प्रति । केचिन्मासिक वेतनं लभन्ते, केचिद्दैनिकम् । शताधिकाः कार्मिकाः यान्त्रिकविभागे, वैद्युतविभागे, अन्येष्वपि विभागेषु कर्म कुर्वन्ति । कश्चित्तेषां त्वष्टेव, कश्चित्सृष्टिकर्तेव, कश्चिद्दण्डधर इव च स्वस्वहस्तलाघवं प्रदर्शयन्त्यनुदिनम् । ते सर्वेऽपि कर्मणो निवृत्ताः युद्धनिवृत्ता वीरा इव द्वाःस्थपरिशोधनपुरस्सरं यदा बहिरागच्छन्त्येकैकशः तदा तदेवालं द्रष्टॄणामाश्चर्याय । ततोऽपीदमाश्चर्यं यत्तत्रापि कश्चित् 'स्तेनः' गृहीतोऽपि भवेत् । एवं च द्वारपरिशोधकः सर्वथा धर्मसङ्कटे पतितः, यतस्सहकारिभृतका अपि विश्वसनीयाः, प्रभवोऽपि तर्पणीयाः । अन्यथा 'इतो भ्रष्टस्ततो भ्रष्टः......।' दैवात् देशकालोचितं यथा व्यवहरन्तं मां 'निपुणः कणपः' इति सर्वेऽपि वदन्ति अथवा वर्णयन्ति ।

"अतीतवर्षद्वयाभ्यन्तरे द्वाःस्थपरिशोधकपदे नियुक्तोऽहं समुचितेन समीचीनेन च पथा तत्पदमध्यवहम् । अतएव तस्मिन् दिनेऽपि समये उपस्थातुं ससंभ्रमं पादौ न्ययुञ्जि । किं तु ततोऽप्यतिशीघ्रं मनः अतिदूरमवागाहत । क्षणं, अतीतदशवर्षेषु कथमासं, इदानीं कथमस्मि इति क्षणं, 'परार्थे यः पीडामनुभवति' इत्यस्य को वार्थः' इति क्षणान्तरे अपरिज्ञायमानार्थस्याप्यस्य मम जीवने कथमपि प्रभावः वर्तते वा न वा इति च बहुधा चरित्वापि, निश्चयकरणे विचारविभ्रमैस्सङ्कुलं मनः न सिद्धान्तसीम समासदत् । कूर्मशशयोः पणबन्धे कूर्मः कथञ्चिदुदतरत् । मन्दं मन्दं कार्यालयमयासिषम् ।"

"पञ्चदश निमेषा अवशिष्टाः पञ्चवादनस्य । इदानीं रात्रिकर्मकरा निवर्तिष्यन्ते । ततः सार्धपञ्चवादनसमये पुनः कार्यारम्भः यन्त्रालये । यदाहं यन्त्रालयद्वारि पदं न्यधां तदा रात्रिकर्मकराणां परिशोधनाय स नासीत् द्वाःस्थः येन पञ्चवादनपर्यन्तं द्वारि सन्निधातव्यं नियमतः । इदानीं किं कर्तव्यम् ? अन्नदातारः न वञ्चनीयाः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



स्वधर्मोऽपि पालनीयः। चित्स्फूर्तिर्मम विद्युता पस्पर्धे। सद्यः द्वारि परिशोधकस्थाने आत्मानं न्यधापयम्। रात्रिकर्मकराः एकैकशः परिशोधिताः, प्रतिनिवृत्ताः स्वगृहान्। सङ्गताश्च संमतवेषाः सांयुगीना इव वीराः विश्रामनवाः कर्मकराः। तानपि यथाक्रमं परिशोध्य अन्तः प्रावेशयम्। निर्मक्षिकं कृतं तत्स्थानम्। ऋते तस्मात् 'पुनः कार्यमारब्धमिति' सूचकाद्यन्त्रसीत्काराच्चिरपरिचितादन्यः न कोऽपि शब्दः अस्माकं समाधिं भिन्ते। मनो मम सर्वं इन्द्रियप्रकाशमेकीकृत्य केवलं कर्मसिंस्तस्मिन्व्यसृजद्द्वारपरिशोधके। अधमस्स नरः यः स्वधर्मं मनसाप्युल्लङ्घयति। दूरे पुनः कार्येण। कथमिदं सह्यतां यद्वृतिः सस्यानि भक्षयति? यद्वा मृगान्भक्षयितुमनुमन्यते?। वस्तुतः सस्यस्य भक्षणे, भक्षणानुमतौ वा वृतिर्जडा न दण्डनार्हा परं प्रकृते स द्वारपरिशोधकः अवश्यं दण्डनार्हः औदासीन्याय, दण्डयिष्यते च। अहो! किमिति परेषां विषये चिन्तनं?। 'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः'।.... इत्व। कि सत्यमेव सः द्वास्स्थः 'परः'? न.....नैव!"

"स किल न केवलं कर्मचारी मत्सजातीयः बन्धुर्वा परं मदीयजीविकाया एवाधारभूतः। इतो द्वादशवर्षेभ्यः पूर्वं कुत्रापि कोणे निरादरं, परिक्लिष्टं, जीविकानिराशं च मां स्थितं, स्वैरमाशाबन्धेऽवरोप्य नवजीवनोपायलतया सम्यगासिञ्चन् परिपोषयति स्म। अन्ते आकृतौ जीवने च परिपुष्टं मां वीक्ष्य 'सार्वजनीनत्वाय कल्पतां इयं पुष्टिः' इति विचारयन्निव सः स्वभगिनीलतां मया संयोजयामास। अहो! कियद्रुचिरः स सन्दर्भः? ततः क्रमेण वसन्तवर्षादयः सान्तराः प्रवर्तन्तां नाम, परं निरन्तरो वसन्तः आगतः मम जीवने' इत्यहं मेने। सा च मया संयुक्ता लता पुष्पिता, फलिता च समये। किन्तु तत्फलं स्वादु, रुचिरं च मदेकार्थं दत्वा फलपाकान्ता जाता। श्रीरामोऽपि सामयिकविरहे सीतां 'आधौ सिद्धौषधिमिव हितां केलिकाले वयस्यां' स्मृत्वा विषीदति, साधारणस्य मम महाप्रलयं तं स्मृत्वा विलपतोऽतीयुर्वासराः इति नैवाश्चर्यम्। 'इतो द्वादशे वर्षे अनितरसुलभां सुखजीविकां निरवर्तयम्' इत्यस्य प्रत्यक्षप्रमाणं, प्रेयसीदत्तं च तत्फलमसौ द्वादशवर्षीयः मम कुमार एव, यः इदानीं "परार्थे यः पीडामनुभवति" इति श्लोकं पठति स्म।"

"प्रेयस्याः प्राणोपरमात्प्रस्कन्नमनसो मम 'जीविकेति माया सृक्तिकेत्येव सत्यम्' इति प्रत्यभासीज्जीवन्मुक्तस्येव। जडता, ग्लानिश्च स्त्रीत्वपक्षपातादिव पत्नीविपद्दर्शनपातकिनं मां अतिमात्रमप्रतिसरं अवध्नीताम्। एकः एव स शिशुरप्युपेक्षणीय आसीत्। वृक्षः फलं भारममंस्त।"

"यावदहं खिन्नमना अभवं तावत्सः स्यालः—नः सुहृद्मयि स्निग्धतरः अभवत्। मम कुटुम्बकार्याण्यपि सादरं समीक्षतेस्म। विशेषतः मम पुत्रम्। एकदा प्रातः अष्टवादनसमय एव मयि शयनादुत्तिष्ठति सति, बालकः पयोऽभावात् क्षुधा रोदितिस्म। बहुधाहमसान्त्वयम्। 'क्षुधन्तं न प्रतिभाति किंचित्।' ततोऽपि बालोऽसौ। किं क्रियताम्? वराटिकापि नास्ति जीवनाधारभूता। स्वर्णरूपिणि! प्रसीद! किमहं पापमकरवम्? येनाहं तपाम्येवम्' इति विलपन्नेव वज्राहत इव भूमावपतम्। यदाहं संज्ञावानुदतिष्ठं, तत्र बालकः नासीत्। 'कुत्र गतो भवेत्? केन वा गृहीतः?'.....। अथवा सः मत्सुहृदेव 'मुत्तैया' स्वगृहं क्षीरपायनायानेष्यत् यदि न कोऽप्यन्यः दरिद्रस्य मम गृहं मनसाप्यचिन्तयिष्यत्। 'धन्यः शवो निरुच्छ्वासः दीर्घनिद्रातिशीतलः। सावज्ञः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


करुणापात्रं बन्धूनां न तु दुर्गतः।' इति विचारयत्येव मयि, बालकेन सह आगतः सः 'किमित्येवमस्वस्थो दृश्यसे ?' इत्यपृच्छत्। 'तात ! मातुलः मे पयः अदात्' इति बालः सन्तोषमाविश्चकार। मम तु एकतः खिन्नस्य अपरतस्तदादरसन्तुष्टस्य किमपि वक्तव्यं न प्रत्यभासीत्। पुनः पुनरनुयुक्तः सर्वं मन्मनोगतं सुहृदे न्यवेदयम्। अहो ! 'संपत्सु केलिसदनं व्यसनेषु समाश्रयः। कोशो विस्रम्भचर्चासु किं नाम न सुहृन्नृणाम्' ॥ 'भवतु किमेतावता खिद्यसे ? अहं प्रयतिष्ये तवोद्योगप्राप्तये। तावन्मया सह मम गृहे एव वस। बालस्यापि मातृवियोगः विस्मृतो भवतु' इति निःशङ्कं अवदत्। मम संकोचं वीक्ष्य पुनःपुनरनुबध्नन् स्वयमेव मां, पुत्रं च स्वगृहमनयत्। तदाप्रभृतितस्य गृहे वसतः मम त्रिचतुराः वत्सरा अतीयुः ॥"

"तावतापि नासीन्मम उद्योगप्राप्तिः। देशे सर्वत्र शिक्षितानां बिरुदभाजामेवोद्योगः नावाप्यते चेत्किमु निरक्षरस्य मम। दौर्भाग्यं च मम तावत्प्रबलं प्राप्तुमुचितमपि प्रतिबद्धम्। किं बहुना ! । जन्मान्तरीयकर्मवशादिव न केवलं मां पदे पदेऽधः पातयतीदं दौर्भाग्यं, अपितु संक्रामी रोग इव मदाश्रयदातारमपि बाधितुमारेभे। क्रमशः स्वल्पवेतनेन, स्वकुटुम्बेन साकं मत्कुटुम्बस्यापि भर्तव्यतया सुहृद् मुत्तैया अधमर्णोऽभवत्। एकतः ऋणार्णकरणेन उत्तमर्णानां दृष्टिः शिरःशूलिकामापादयत्, अपरतः कुटुम्बे पक्षपातः भ्रान्तिम्। 'सर्वं शून्यं दरिद्रस्य'। परं, एकमाश्वासपदमासीत्सुहृदः उद्योगः। एवं च कथमपि 'एति जीवन्तमानन्दः नरं वर्षशतादपि' इति चक्षुषी निमील्य उत्तरं प्रतिपेदिवहे।"

"लक्ष्यजीविनां प्रबलशत्रुः—विधिः। तस्य नाम कियान् प्रभावः। पूर्णसुन्दरवस्तुनः असाधुत्वाय अप्रतिष्ठायै च जगतः स्वार्थिता, ईर्ष्या, कुप्रथा च हेतवो भवन्तीति विद्वद्भ्यः श्रुतं मया। विधिः वराकोऽपि तत्र सहकारी भवति। 'चित्तंसवर्धनं यच्च यच्च नेत्ररसायनम्। चिराय निरनुक्रोशः सहते तद्विधिः कथम् ?' इमं सिद्धान्तं, मत्तः मत्सुहृदनुशतमन्वभवत्प्रत्यक्षरूपेण। 'हार्वि' यन्त्रालये द्वारपरिशोधकपदे तिष्ठन् मैत्रीनिकषोपलः मुत्तैया साधुनिर्वाहेण यावदजयत्तावदिदानीं अपजयदुर्विधिना प्रतारितः अभवत्। तेन हि 'चोरः' इति गृहीतः कश्चित्कर्मचारी, रोषेण प्रतिहिंसाऽऽग्रहेण च काममपि कूटनीतिमरचयत्, यया सुहृद उद्योगापचितिः अभवत्। 'कर्मगृहीतेनापि कुम्भीनलकेसन्धिच्छेदने शिक्षितोऽस्मी'त्युक्तम्। विप्रलम्भतीर्थङ्करैः 'चन्दनं पादुकोपयोगि कृतम्' सुहृद् 'हार्वि' प्रभूणां गृहे किंकरः कृतः॥"

"न कालस्सर्वथा एकान्तः। नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण' इति सूक्तिः सुहृदा मया चाज्ञायत तस्मिन्दिने। सर्वमङ्गलानामायतनं तत् शुक्रस्य दिनम्। अतएव खलु 'सर्वमङ्गलायाः प्रतीष्टं तद्दिनमिति व्याहरन्ति सन्तः। तस्मिन्नेव दिने मम चतुस्सांवत्सरिकं तपः फलितम् प्रत्यक्षतः। सुहृदः अशिथिलप्रयत्नात् महतां पुरःप्रशंसभाच्च हार्वियन्त्रालयान्ममोद्योगनियोगावेदपत्रं प्राप्तम्। 'अगस्तप्रथमदिनात् अस्माभिः कण्णाः (अहम्) यन्त्रालये द्वारपरिशोधकत्वेन नियुक्तः' इति पर्यवेक्षकहस्ताक्षरयुतं तत्पत्रं असकृदनुवाचयत्सुहृद। 'कियान्मोद आसीदिति' निष्कर्षवचनं प्रमादः। एतावतानुभूताः क्लेशाः पयसि जलबिन्दव इव विलीनाः। सत्यमेव तदा वयं नवे जगति नवतयोत्पन्ना इति मेनिरे। 'क्लेशः फलेन हि पुनर्नवतां विधत्ते।' शुष्कः वृक्षः पल्लवितः इति केचिद्विस्मयपरवशा भवन्ति, किंतु



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वस्तुतः प्रत्यहं परःसहस्रं जनाः जीवने पल्लवितास्सद्यः शुष्का भवन्ति, अथवा शुष्काः भवन्ति, अथवा शुष्काः ...न्ते इत्यत्र मात्रयापि ब श्रद्दधतेः। अहो विचित्रोऽयं ...कः॥"

"तद्दिने रात्रौ यथाक्रमं भोजनानन्तरं इतस्ततो भाष...णावां शयनमुपासराव। सद्यः परावृत्य किञ्चि...न्मुखमपश्यन् सुहृदावभावे--'मित्र! नैतावता कदा...हं गभीरभावमदर्शयम्, अथाप्यद्य आवश्यकता ...नीति दर्शयामि। आवां सततश्रमात्, आर्जवाच्च ...नं उन्नतं लभावहे। किन्त्वयं दुर्विदग्धः लोकः तन्न ...ते। जीवनतारतम्ये कर्मवैचित्र्यं विधिश्चेति कारणं ...णां समानं खलु। एवं चेत्, कुतः कस्मैचित्स्पृहयति, ...स्मैचिद्द्रुह्यति?। 'सर्वः स्वार्थं समीहते' इत्यतः नान्य...न्यथा कथं स कर्मचारिब्रुवः 'स्तेनः' मह्यमद्रुह्यत्? ...था कथमध्यक्षः मयि विश्वासं नाकरोत्?। भवतु; ...रि सायं 'गृहशुनकः सम्यक् न स्नापितः' इति मह्य...कुप्यत्स महाशयः। 'सेवां श्ववृत्तिं विदुः' इति सत्यम् ...किंचनत्वेन सेवा क्रियतां नाम। किंतु अकिंचनस्या...स्ति मनः, मनुष्यता च। वस्तुतः मनस्वितायाः, मनु...ताया ऋते, निर्दुष्टता, स्वाभिमानिता च नरेणावश्यं ...न्विते भवेताम्। स्वधर्मेण सह स्वाभिमानो यस्य ...नि स न मनुष्यः। किंतु अस्मादृशां स्वाभिमानित्व...दत्ताधिकारमपि एते दुर्विदग्धाः प्रभवोऽपोहयन्ति। ...स्थितिं न पश्यन्ति, द्रष्टुं वा नेहन्ते। 'ऐश्वर्यमद...न्ना हि न पश्यन्ति नृपद्विपाः। प्रतिदिनं प्रातरारभ्य ...न्ध्यमविरतं कर्म कुर्वाणाः कति पर्याप्तमेकवारं वा ...नं लभन्ते? कतीनां बालकाः क्षुधा पयसे खिद्यन्ते? ...नुभूकुबेराणां गृहे शुनकाः बिडालाश्च पयः पाययन्ते ...न्दनम्। कीदृशी एतेषां समभावना? नेपोलियन्-

महाशयोऽतिनिर्घृण इति वदन्ति, तथापि दाक्षिण्ये निरुपम इत्यपि अभ्युपेयम्। तदीयः कश्चित्कर्मचारी वेतनलाभेऽप्यतिव्ययशीलत्वात् अधमर्णो जातः दशसहस्रमुद्राणाम्। चिन्ताकुलस्य तस्य निद्रामलभमानस्य निशायामपि कार्यालये कर्म कर्तव्यमासीत्स्वमनश्शान्तये। एकदा नेपोलियनेन कारणं पृष्टस्सः सर्वमाचख्यौ। यद्यपि नेपोलियनः प्रथमं भृशमक्रुध्यत्तस्मै, परं पश्चात्तप्तः दशसहस्रमुद्राभिस्सह एकं पत्रं प्रैषयत्। तत्रैवं लिखितमासीत्-"प्रथमं कार्यालयात्त्वां पृथक्करिष्यामीत्यमंसि। परं, पितरौ तव परितपिष्येते इति नाहमकरवं तथा। आभिर्मुद्राभिः ऋणमपाक्रियताम्। आयतावेवं मा कुरु" इति। एवं खलु प्रभुभिः भाव्यं सर्वैः। अहो! वज्रादपि कठोराणि मृदूनि कुसुमादपि। लोकोत्तराणां चेतांसि..."। किं केचिद्भविष्यन्त्येवं कदाचित्? यदि भविष्यन्ति, भूमिः स्वर्गो भविष्यति। किमित्यरण्यरुदितं क्रियते मया। पूर्वे कति त्यागिनः भुवः स्वर्गीकरणाय प्रयेतिरे। किमयं लोकस्तांश्चिरमजीवयदन्वमोदत वा? 'यावत्पुच्छं न नष्टं तावद्गौस्तस्य सारं न विजानाति'। श्रीकृष्णः, श्रीशङ्करगुरुः, क्रिस्तुः, गान्धिः एवं बहवः कर्मयोगिनः स्वात्मानं पूर्णाहुतिं चक्रुः लोकसमुन्नतये। इदानीमपि कति वा तान्स्मरन्ति? भवतु, भवते किंचित्स्मारयितव्यं वर्तते—यत्त्वमद्य साधूनां गर्ताधःपातनाय यत्रारिषड्वर्गः सन्निधत्ते तत्रैवोद्योगी गमिष्यसि। तत्र स्वसत्तायाः स्वाभिमानितायाः, स्वधर्माद्वा मा परिहीयेथाः। "मुहूर्तबद्धसौहार्दा विलज्जा बहुसेविताः। लुब्धा नृपाश्च वेशाश्च दूरस्था एव शोभनाः"। अतस्सर्वथा जागृहि। नातिवक्तव्यमवशिष्यते—इत्युक्त्वा स विरराम। 'यथाशक्ति प्रयतिष्येऽनुवर्तनाय भवद्वचनस्येत्युक्त्वा 'भ्रातः भर्तृपिण्डोपजीविनां तदर्थे



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



निधनमप्युत्सवः। भीष्मकथा हि भवतैव कथिता मह्यम्। अतो भवानपि मातिमात्रं क्रुध्यस्व तेभ्यः इति सप्रणयंप्रार्थयम् ।"

"कदाचित् मुत्तैया अवदत्—मित्र ! 'महाजनो येन गतः स पन्थाः' इति नीतिः। महाजनानां पन्थानं यः अनुवर्तते, अथवा अनुवर्तनाय प्रयतते सोऽपि महाजनो भवतीति तात्पर्यम्। परं अहं मन्ये–महाजना एव महाजनानुसरणमर्हन्ति, नेतरे साधारणा अस्मादृशा अपीति। यदि वयं महाजनाननुसर्तुं प्रयतामहेऽथवा प्रयत्नं कर्तुं चिन्तयामः, तदेवानुचितमसम्भाव्यं मन्यते लोकः, तादृशं च नरं प्रतिरुणद्धि' इत्युक्त्वा किंचित्परावर्तते स्म। तदानीं तेनानुभूतोऽयं सन्दर्भः मे स्मृतिपथं गतः। —'ऐषमवत्सरारम्भे भृतकावासे गोणीभिस्तालनालिकेरच्छदैश्चोपकल्पितेषु वातवृष्ट्यादीनामात्यन्तिकसेवनाज्जीर्णशीर्णेषु कुटीरेषु न जाने कुतो वा तादृशं कोपमकरोदग्निः येन प्रायः भस्मावशेषतां नीतं तत्स्थलम्। अग्निपरीतमाकर्ण्य तत्स्थलं सानुशयः मुत्तैया अविगणय्य स्वोद्योगसमयं, अनापृच्छय स्वाध्यक्षं सद्यः अधावत्। तत्र चिरोपोषिते इवाग्नौ सातिशयं ज्वालाजिह्वाः प्रसारयति सति, स्त्रियः, बालाः वृद्धाश्च आत्मरक्षणार्थमेवाप्रभवन्तः निरन्तरश्रमफलं स्वल्पं तत्कुटीरं अग्निना प्रणश्यत् हन्त ! निजनेत्राभ्यां सकरुणं साक्षीकुर्वन्ति। इदानीं सुहृदा किं कार्यम् ?। आलाचितुं नास्त्यवकाशः। पञ्चैः सहयोगिभिः उपान्तजलाधारात् शतशः जलघटानानीय अग्निमभ्यषिञ्चत्। यद्यप्येतावता कानिचिद्भस्मीभूतानि—अवशिष्टान्यपि कानिचिद्गृहाणि। इदानीं नूतनोऽयं प्रश्नः, यत्ते निराश्रयाः कुत्र वसेयुः। मुत्तैया सद्यः 'यजमानानां कृते तेषामेव सेवकान्सहकरोमि' इति बुद्ध्या वस्तुसम्भाराय निजाध्यक्षेण दत्तानि पञ्चाशद्रूप्यकाणि निराश्रयाणां हार्विसेवकानां कुटीरनिर्माणायोपयोजयामास। वस्तुतः एतदर्थे स्थितिज्ञैर्यजमानैः सुहृदे पुरस्कारः कार्यः। परन्तु 'विनाऽऽदेशं किङ्करस्येदृशी ममता ?' इति प्रभुत्वपक्षपातिभिः किमिव नाक्रियत विपरीतं परुषम्।"

"ततस्सामान्यतो गताः कतिचन मासाः। इदानीं कथंचित् द्वारपरिशोधकपदं पुनः प्रापितः मुत्तैया। तदसहमानस्सत्यविरोधी कश्चित् 'भक्षितेऽपि लशुने न शान्तो व्याधिः' इति अमन्यत। यथोचितं स्वधर्ममवलम्बमानेऽपि तस्मिन् लोकः यथापूर्वमासीत्। 'न जहाति शुनः पुच्छं नामितं वक्रतां ध्रुवम्'। अहमपि किंचित्प्रबुद्धस्तस्य।"

"ह्यः भोजनानन्तरं मुत्तैया नैशोद्योगाय प्रस्थितः। परमद्य प्रातः मदागमनसमये न दृष्टः। कुत्र गतः स्यात् स्वोद्योगं परित्यज्य ? किं स्वधर्मादुदास्ते प्रतिस्पर्धया ? एवं यदि यत्सत्यं समाप्युपेक्ष्यः सः त्यक्तधर्मः विद्विड्दूष्यः। कथमेवं भवेत् मुत्तैया न्यायपक्षपाती ?। प्रातराशाय पार्श्वे कापिकापणं गतः किंस्वित्केनचित संलापेनातिक्रान्तकालः स्यात् ?। तदा स्वधर्मत्यागलज्जया वा, प्रभुजनावमानासहिष्णुतया वा, आहोस्वित् उद्योगोद्वासनभीत्या वा परावर्तते ?। त्यक्तधर्मस्य कुतो वा लज्जा भीतिर्वा ? स नूनमुद्वासयिष्यते प्रभुभिः, अथवा स्वयमेवोद्वासयिष्यत्यात्मानं स स्वाभिमानी।... आम्। एवमुद्वासयिष्यते चेत तत्कुटुम्बस्य........? तदाधारस्य मम......? तदेकप्रतीकस्य वा किङ्करवर्गस्य......? अहो !"

ठण् ठण् ठणरवः अप्रतीक्षितः प्रादुरभूत्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# पर्वतीया

(ले० पं० मदनमोहनझाः न्या० सा० आचार्यः मुजफ्फरपुरस्थराजकीयसंस्कृतमहाविद्यालये साहित्यप्रधानाध्यापकः)

(७)

इदानीं राजीवः सर्वथा स्वस्थः सम्पन्नोऽस्ति । पर्वतीया लघु-परिवारे तथाऽसौ ममौ, येन तत्परिवारस्य स्थायी सदस्य इव प्रतीयते । कदाचित् मातुः समीपे

"भग्नसमाधिः परितो व्यलोकयम् । सार्धद्वादशवादिताडितेति ज्ञात्वा सन्नद्धस्सर्वान्कर्मणो निवृत्तान्परित्यक्तुं, स्वनियोगं च पूरयितुम् । क्रमश आगताः कालानुगाः कर्मकराः । तेषां मुखेऽपूर्वा कृतकृत्यता लसत् । सवैलक्ष्यस्मितं कश्चित्स्वरः श्रेणिमध्यादुच्चरत—"वराकश्चिराय निर्गतः अस्मात् लोकात्" । अन्यः स्वरः—"कर्म कः स्वकृतमत्र न भुङ्क्ते ?" । तृतीयः स्वरः—"सत्यधर्मपक्षपाती किङ्करप्रतीकोऽपि हन्त कालवशं नीतः" । तुरीयः स्वरः—"स किल निजघातिनामपि स्वर्गे स्थानं प्रापयिष्यति" । अन्यः स्वरः "अहो साक्षाद्देवदूतः किल सः"—। दूरात् हीयमानः कश्चिदन्यः स्वरः "परिदूये बत मुक्तैयाविनाकृतं करुणं प्रति"। न जाने यावता मे द्यावापृथिव्यौ व्यत्यस्ते ।"

"चराचरकुलस्य कर्मसाक्षी" अहमस्मि इति घटनायेव नभोमध्यमागतः, सत्यधर्मद्वेषिणि असमान इव नितरां चण्डः सूर्यः आत्माभिमुखमाकर्षति स्म लोचनवर्गम् । इदानीं कस्यचित्साहाय्येन मार्गमावृण्वतो मे नवा प्रज्ञा प्रादुरभूत् । प्रास्फुटच्चास्य श्लोकस्यार्थः—

"परार्थे यः पीडामनुभवति भङ्गेऽपि मधुरः,
यदीयस्सर्वेषामिह खलु विकारोऽप्यभिमतः ।
न सम्प्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः,
तदिक्षोर्दोषोऽसौ, न पुनरगुणाया मरुभुवः ॥"

समुपविश्य विविधाः कथाः श्रावयति, कदाचित् सामरेण सह क्षेत्रे गत्वा यथा-शक्ति कृषि-कर्म कर्तुं चेष्टते । तस्यानभिज्ञाभ्यां कराभ्यां क्रियमाणं कृषि-कर्म दृष्ट्वा सामरो हसन् कथयति—पथिक ! मुधा त्वं श्राम्यसि, नेदं तव कार्यम् । पर्वतीयया सह गत्वा उद्याने फलान्यवचिनु, तत्त्वं कर्तुं शक्नोषि, तव सहयोगमुपलभ्य पर्वतीयाऽपि प्रसीदेत् ।

राजीवो वरदानमिव सामरवचनमङ्गीकृत्य महतोत्साहेन पर्वतीयया सहोद्यान-कार्य-सम्पादनाय प्रतिदिनं गन्तुमारब्धवान् । पर्वतीया राजीवस्य सान्निध्येन द्विगुणितोत्साहा द्विगुणं कार्यमपि कुर्वती बभूव । एवं राजीव-पर्वतीययोः परस्परमनुरागः क्रमशोऽवर्धत । एकदोद्याने बकुल-तरु-तल-शिलाऽऽसीनयोस्तयोर्वार्ता प्रचलतिस्म—

पर्वतीया—मदीयमान्यातिथे ! अद्ययावत्त्वामतिथि-पथिक-शब्दाभ्यामेव संबोधयामि, परन्तु तत्संबोधनमधुना मह्यं न रोचते, नाम-ग्राहमेव त्वां शब्दापयितुं मनो वाञ्छति, अतः स्वकीयन्नाम ज्ञापयितुं शक्नोषि ?

राजीवः—पर्वतीये ! त्वं यदि पर्वतीया अहं तर्हि नागरः, किं रोचते तुभ्यमेतन्नाम ?

पर्वतीया—ललितमिदन्नाम बहु रोचते मह्यम् । अद्यारभ्यैतदेव नाम कथयिष्यामि ।

राजीवः—पर्वतीये ! एकां वार्तां पृच्छामि ?

पर्वतीया—नागर ! एकामेव कुतः ? द्वे पृच्छ ।

राजीवः—पर्वतीये ! किं त्वं सत्यमुत्तरं दास्यसि ?



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पर्वतीया—नागर ! तव समक्षेऽपि किं मिथ्या वदिष्यामि ?

राजीवः—पर्वतीये ! तव परिवारस्य भारभूतः कदापर्यन्तमहं स्थास्यामि ? बहुदिनानि यावदेवंविधा स्थितिरुचितापि नास्ति ।

पर्वतीया—(म्लानमुखी) मम नागर ! माम्-नहि-अस्मान् विहाय गन्तुं शक्नुयाः ?

राजीवः—शरीरमिदं गन्तुं शक्नोति ।

पर्वतीया—प्रसन्नेव) हृदयं नेति वाक्यशेषः । नागर ! त्वमपि कियत् सरलोऽसि, सारथिमन्तरा किं रथः प्रचलति ?

राजीवः—पर्वतीये ! यद्यहं न गन्तुमिच्छामि, तदा किं त्वं मां रक्षितुं शक्नोषि ? (इत्युक्त्वा मुखं नमयाञ्चकार) ।

पर्वतीया—(चकितेव राजीवस्यावनतं मुखमुत्थापयन्ती) नागर ! किमिदं कथयसि, किं कोऽपि स्व-हृदय-संरक्षणेऽप्यसमर्थो दृष्टः ?

राजीवः—( पुलकिततनुः ) पर्वतीये ! त्वमतिचतुराऽसि पराजितोऽहं तव वाचा ।

पर्वतीया—(हसन्ती) नागर ! नागरो भूत्वा पर्वतीयातः पराजयं स्वीकुर्वाणः कुतो न लज्जसे ?

राजीवः—पर्वतीये ! क्वचित् क्वचित् पराजयोऽपि विजयादधिकः स्पृहणीयः सुखदश्च भवति । अस्तु,

बहोः कालादिच्छामि तव चित्रमेकं ग्रहीतुम्, आशासे तवाप्येतदभिमतं भवेत् ? (इत्युक्त्वा राजीवस्तन्मुखमीक्षमाणोऽतिष्ठत्)

पर्वतीया च नयने नर्तयन्ती प्रत्युवाच—नागर ! प्रकृति-पूजकस्त्वं मानव-चित्रं न ग्रहीतुं प्रतिज्ञातवान् वर्तसे, अद्याकस्मान्मनुष्येष्वपि तुच्छाया एकस्याः स्त्रियाश्चित्रं ग्रहीतुं किमित्युत्कण्ठितोऽसि ।

राजीवः—पर्वतीये ! पूर्वमयमनुभवो नासीत्, यन्मनुष्येऽपि ईदृशमाकर्षणमस्ति, इदानीं त्वया स अनुभवः कारितः ।

पर्वतीया—नागर ! अतिप्रियोऽधुना त्वं भवसि किमिदमाकर्षणं सदा तिष्ठेत् ? एवं ब्रुवाणैव सा राजीवस्याङ्के न्यपतत, अपि च राजीवस्य हनुदेशं चालयन्ती प्रमत्तेवाब्रवीत्—नागर ! कथय-कथय मां त्यक्त्वा क्वापि न यास्यसि ?

राजीवः—पर्वतीये ! यदि त्वं मां न त्यक्ष्यसि, तर्हि अहं त्वां नैव त्यक्ष्यामि इति कथयत एव राजीवस्यौष्ठमनायासेन पर्वतीयायाः कपोले संश्लिष्टम् ।

पर्वतीया—नागर ! चल अतिक्रामति गृह-गमनवेला, इति वदन्ती उत्थाय पदद्वयमगमत् ।

राजीवः—पर्वतीये ! श्वस्तव चित्रग्रहणस्य प्रस्तावः स्थिरीभूतः ।

पर्वतीया—नागर ! कथमहं तवेच्छां व्याहन्मि, परन्तु स्व-चित्र-ग्रहण- वार्तया मम हृदये पीडेव जायते, यतोऽनेनैव चित्रग्रहण-प्रसङ्गेन तव तादृशी दुर्दशा संजाता ।

राजीवः—पर्वतीये ! तामधुना दुर्दशां न कथय, यतः सा दुर्दशैवास्याः सुदशायाः हेतुः ।

पर्वतीया—नागर । यदि तवाग्रह एव मम चित्रं ग्रहीतुम्, तर्हि अहमिच्छामि यत्तत्रैव गत्वा तेन दृश्येन सहैव मम चित्रं गृहाण ।

राजीवः—अभिमततरमेतन्मदीयम् ।

अथ द्वावपि हस्ते हस्तं ददतौ गृहं प्रस्थितवन्तौ ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



(८)

अद्य सूर्योदयात् होरापूर्वमेव राजीवः शय्यामपहाय पर्वतीयया सह तस्मिन् स्थानेऽगच्छत् यत्र तयोः प्रथमः परिचयः समुत्पन्न आसीत, तत्र उषःकालस्य भिन्नेन-भिन्नेन दृश्येन सह पर्वतीयायाः अनेकानि चित्राणि गृहीत्वा नव-वादन-वेलायां स्वावासमाजगाम।

आगत एव च राजीवः बहिःकुटीरे समुपविष्टं, दुर्बलगात्रं, विवर्ण-वदनं, निज-पितरं ददर्श। तं दृष्ट्वा राजीवो विस्मितो, हृष्टः, खिन्नश्च क्रमेण समभूत्।

पिता च चिरोपलब्धं पुत्रम् द्वयोर्भुजयोरन्तरे कृत्वा मस्तकं नयनवारिभिरभिषेक्तुमारभत।

पर्वतीया एतत्दृश्यमालोक्य वस्तुस्थितिमजानन्ती ...कक्षे मातरमुपजगाम। तत्र मातरं विवर्णां दृष्ट्वा पर्वतीया प्रश्नानां वृष्टिमिव चकार।

मातः! द्वारि कोऽसौ वृद्धः? किमर्थञ्च नागरमालिङ्ग्य रोदिति? इत्यादि।

माता च चिरं मूका स्थित्वा पश्चात् पुत्रीमतिकातरां ...श्चावलोक्य दीर्घोच्छ्वासेन सहावोचत्—पुत्रि! ...नागरस्य पिताऽस्ति, नागरं नेतुमायातः।

एभिः कतिपयैः पदैः बाणैरिव विद्धा पर्वतीया ...रवोचत्—न गमिष्यति मम नागरः, न गमिष्यति, ...रि नागरं मत्तः पृथक् कर्तुं न समर्थः। पितास्ति ...सोऽपि तिष्ठतु, अहं तस्य पादौ पूजयिष्यामि, सेवां ...ष्यामि, तस्य किमपि कष्टं न भविता।

एवमाक्रोशन्तीं पुत्रीं सान्त्वयन्ती माता सान्तर्दुःख-...—पुत्रि! त्वं नागरं रोद्धुं शक्नोषि, तवाधिका-...न तस्मिन्, परन्तु स विवाहितोऽस्ति, तस्य पत्नी ...रुदती महता दुःखेन जीवनं यापयति।

एतया वार्तया वज्रमिव पर्वतीयोपरि न्यपतत्, सा यत्रोत्थिताऽसीत्, तत्रैव वेगेनोपविष्टा।

रुदती चात्मगतमेव वक्तुमारेभे—तर्हि नाहं तं रोत्स्यामि, अपि तु गन्तुमेवाग्रहीष्यामि, यद्यहं तमेकस्या नार्या उच्छिद्य स्व-वल्लभं करिष्यामि, तर्हि नूनमपरा काचित् मत्तोऽपि तमुच्छेत्स्यति।

एवमालोच्य मातरमुक्तवती—मातः! सामरभ्राता कुत्र गतः?

माता—स एनं समाचारं श्रुत्वा तवागमनात् पूर्वमेव क्वचित् पलायितः।

पर्वतीया—मातः! त्वमेव तर्हि बहिर्गत्वा नागरं कथय, यदसौ पित्रा सह यातु।

माता—पुत्रि गमिष्यत्येव, किन्तु इयद्दिनानि यावत् येन सह प्रेम अकार्षीः, अपि चेदानीमपि प्रायः करोषि, किं तमभुक्तवन्तमेव प्रहेष्यसि? अपि च तस्य पिताऽपि मान्यः, स एव कथमभुक्तो गच्छेत्?

पर्वतीया—मातः इदानीमेकमपि पलमत्र तस्य स्थितिरनुचिता, पाथेयं सह देहि, मार्गे यथेच्छं भोक्ष्येते। मातः! किमिति विलंबसे? गत्वा कथय गन्तुम्।

माता रुदती बहिरागत्य नागरं पर्वतीयायाः कथनमश्रावयत्। परन्तु राजीवः "पर्वतीया मां गन्तुमेव प्रेरयती"त्युक्तौ विश्वासं नाकृत, अतः वारमेकं तया सह मिलनमैच्छत्। अद्य प्रागवत् स्वयं प्राङ्गणमुपसर्तुं न शशाक, अपि तु रुदन्निव मातुरग्रे स्वकीयामिच्छां प्रकटीचकार।

माता दूतीव तदिच्छां पर्वतीयां श्रावयामास। पर्वतीया मातुर्मुखात्तस्यैव नागरस्यान्तिमामिच्छां श्रुत्वाऽपि नान्वमोदयत्, अपि तु मातरमब्रवीत्—मातः! कथय



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


नागरम्, इदानीं मिलनस्यावश्यकता नास्ति, माता निषेधवाक्यं श्रुत्वाऽपि तथैव स्थिता। पर्वतीयापि क्रियत्कालं विचार्य पुनरवदत्—मातः! तस्य यदीय-मेवेच्छास्ति, तर्हि आगच्छतु, अहं हृदयं वज्रसारं कृत्वा समुपविष्टास्मि।

माता गत्वा राजीवं गृहे प्राहिणोत्, स्वयं च तत्पित्रा सह वार्तालापं कुर्वती अतिष्ठत्।

राजीवो यदा गृहेऽविशत, तदा अञ्चलेन मुख-मावृत्य रुदतीं पर्वतीयामपश्यत्। अथ राजीवः किं-कर्तव्यविमूढः क्षणमतिष्ठत्। ततो निष्ठीव्य गलनलं प्रमृज्य न्यगदत्—पर्वतीये! किं त्वं माम् स्वसान्निध्यात् दूरं कर्तुं वाञ्छसि?

पर्वतीया नागर! पथिक! तव गमनमेवोचितम्। अहं स्वार्थमेकस्याः पतिव्रतायाः सौभाग्यं नाशयितुं नेच्छामि। परन्तु खेदोऽयमेवास्ति, यत्पूर्वं त्वं स्वविवा-हस्य वार्तां नाचकथः।

राजीवः—पर्वतीये! त्वमेतत्संबन्धे कदापि ना-पृच्छः, अहमपि नाचकथम्, मम ध्यानमपि नैतद्दिशि गतम्। मम विचारस्तु अधुनापि अयमेवास्ति, यत् स विवाहो भूतोऽपि अभूत एव!

पर्वतीया—पथिक! एवं न वक्तव्यम्। अस्य श्रव-णोऽपि पाप्मा स्पृशति। अस्तु, यद्भूत् तत्परिवर्तितुं न शक्यम्, सम्प्रति अयमेव मम तवाग्रेऽनुरोधः, यत् त्वं मां विस्मृत्य तामेव पाणिगृहीतीं भज। अहमपि तव ध्यानं कुर्वती जीवनं यापयिष्यामि।

राजीवः—(रुदन्) पर्वतीये! न माम् दूरीकुरु, त्वया विरहितस्य मम जीवनमसम्भवम्।

पर्वतीया—पथिक! त्वं विश्वासं कुरु, अहं सदा तवैव स्थास्यामि। कदाप्यन्यस्य न भविष्यामि। परन्तु अत्र जन्मनि त्वं ममैतत् शरीरं प्राप्तुं न शक्नोषि।

राजीवः—पर्वतीये! गमनात् पूर्वं वारमेकं मुखं तु दर्शय।

पर्वतीया—पथिक! इदानींतनस्य मम मुखस्या-दर्शनमेव वरम। यदि विस्मर्तुं न पारयेः, तर्हि पूर्वदृष्ट-मेव मुखं ध्यायेः, एतावदुक्त्वा रुदती कम्पमाना च पर्वतीया शीघ्रं गन्तुं राजीवं विवशमकरोत।

विवशो राजीवः रुदन् गृहान्निस्सृतः। बहिरागतश्च गृहे विचित्रं पतन-शब्दमश्रौषीत्, परन्तु परावृत्य द्रष्टुं नाशक्नोत्। द्वारि मातरं प्रणम्य पित्रा सह स्वदेशमाग-मत्, परन्तु आमरणं तन्मुखं विस्मर्तुं नापारयत।

शुभम्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# तैलनियमाः

[ श्रीदीनानाथशर्मा शास्त्री सारस्वतः, विद्यावागीशः, विद्याभूषणः, विद्यानिधिः
(प्रिं० सं० हि० महाविद्यालय, रामदल, दरीबाकलाँ, देहली) ]

ततः स्नानं चिकीर्षता जनेन प्राक् तैलमर्दनं विधेयं भवति। शीतकाले वपुषि सहसा जलस्य प्रक्षेपणं हानिकृज्जायते, अतएव प्राक् तैलाभ्यङ्गः प्रयोजनीयो भवति। तैलमपि शरीरे बलप्रदायकं भवति। एतेन शारीरिकी रूक्षतापि व्यपगच्छति। मुखं स्निग्धमपि वीक्ष्यते। इदमभ्यक्तं तैलं रोमकूपद्वाराऽन्तः प्रविश्य तल्लाभमर्पयति। तैलाप्रयोगे कृते शारीरिकरूक्षतायां प्रवृद्धायां कण्डूसमये वपुषो मृत्तिकेव निःसरन्ती प्रतीयते। भीष्मे ग्रीष्मे तैलाभ्यङ्गस्य नावश्यकता भवति। कर्णयोस्तैलनिषेके कृते तत्रत्यनसा बलं प्राप्य अक्ष्णोर्ज्योतिर्वर्धते। एवं पादयोस्तैलयोजने उपानज्जन्या कठोरता, आघातजन्या वेदना च दूरीभवति, पादतले योजनेन अक्ष्णोर्ज्योतिरपि वर्धते। तैलमर्दनं सूचीवेध (इन्जैक्शन) वत् शीघ्र-लाभाय कल्पते। तैलेषु सार्षपमेव प्रयोज्यं भवति। तिलस्नेहाभ्यङ्गेन सद्यः स्नाने तु वातव्याधिर्भवति। सार्षपप्रयोगेण कण्डूयादद्रु प्रभृतयस्त्वाचरोगाः नश्यन्ति। तद्विशिष्टमर्दनेन च रक्तगतिः प्रवर्धते। शिरसि तैलसेकेन मस्तिष्कं सबलं जायते। तैलाभ्यङ्गं कृत्वा स्नानेन शीतभयं न तिष्ठति, वातदोषश्शान्तस्तिष्ठति। विशिष्टवासरेषु यत् खलु शास्त्रेषु तैलोपयोगो निषिद्धः शास्त्रे, तत्र कारणं तत्तद्ग्रहमूलप्रकृतिं विविच्यैव। प्रातःकाले तत्तद्वारग्रहस्य प्रभावस्तिष्ठति। यदि उष्णप्रकृतिकग्रहस्य वारः, तर्हि तस्य शरीरे पूर्वत एव प्रभावसत्वाद् अन्तरूष्माऽर्थं कृतस्तैलप्रयोगो हानय एव घटेत। तथापि यदि तत्प्रयोगोऽनिवार्यो दृश्येत, तत्राऽस्मत्पूर्वजैः पुष्पदूर्वादिप्रक्षेपेण तत्प्रभावदूरीभाव-पिशुनितः। वैज्ञानिकैरस्मत्पूर्वजैः स्वकीयतपोबल-मूलकानुभवैः प्रत्येकवस्तुविश्लेषणं कृत्वा तत्प्रकृति परिचयः प्राप्तः, शास्त्रेषूट्टङ्कितश्च, ततस्तत्र वैज्ञानिकतैव। ततस्तत्रोपहासविधानं स्वकीयमतेरापातदर्शित्वप्रकाशनमेव।

इमे श्लोका अस्मिन् विषये प्रसिद्धा ये स्मरणीयाः सन्ति—

'तैलाभ्यङ्गे रवौ तापः, सोमे शोभा, कुजे मृतिः।
बुधे धनं, गुरौ हानिः, शुक्रे दुःखं, शनौ सुखम्।'
'अर्के पुष्पं, गुरौ दूर्वा, भूमिपुत्रे रजस्तथा।
भार्गवे गोमयं दद्यात् तैलाभ्यङ्गो न दूषितः।'

अधिकमेतद्विषये स्वप्रकाश्यमान 'श्रीसनातनधर्मालोक' ग्रन्थमालायां विविच्येत। इयं ग्रन्थमाला धार्मिकसर्व्वविधसंशीतीनां निवारिका, सा च सर्वैः संग्राह्या सिध्येत्। तस्याश्चत्वारि पुष्पाणि गृहगतैः ८॥) रूप्यकैः प्राप्यन्ते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृतभाषायां विश्वभाषायाः साक्षात्कारः

(ले० पं० श्री० दा० सातवलेकर, स्वाध्यायमण्डले, आनन्दाश्रमे, पारडी जि० सूरत)

## भारतस्य भारती

भारतस्य राष्ट्रस्य भाषा 'भारती'ति सुप्रसिद्धा एव वर्तते। वेदमन्त्रेषु अपि भारती भाषा तथा भारता जनाः प्रशंसिता दृश्यन्ते यथा—

विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनम्।
ऋ० ३। ५३। १२

"विश्वामित्रस्य इदं ब्रह्म इदं सूक्तं भारतं जनं रक्षति" इत्यत्र भारतनामकस्य जनसमुदायस्य संकेतो दृश्यते। तथा तस्य भारतजनस्य या भाषा सा भारती अपि एवमेव प्रशस्यते वैश्वामित्रे मण्डले—

आ भारती भारतीभिः सजोषा
इला देवीर्मनुष्येभिरग्निः।
सरस्वती सारस्वतेभिरर्वाक्
तिस्रो देवीर्बर्हिरेदं सदन्तु॥ ऋ० ३। ४। ८

"भारती भारतराष्ट्रस्य भाषा भारतीभिः अन्याभिः उपभाषाभिः साकं, सरस्वती संस्कृत्युपासकैः सारस्वतेभिः साकं, तथा इला मातृभूमिः सर्वैर्मनुष्यैः सह, अत्र अस्मिन्यज्ञे सदन्तु, आगच्छन्तु, अत्रागत्य विराजन्तु।"

इला मातृभूमिः सर्वैर्मनुष्यैरुपास्या, सरस्वती तु सारस्वतेभिरेव संभजनीया वर्तते। भारती तु भारतीभिः अन्याभिः उपभाषाभिः साकं समुपास्यते। अत्र भारतस्य भाषा भारती निगदिता दृश्यते। भारतस्य जनाः भरता भारता वा तेषामपि उल्लेखो वर्तते वेद-मन्त्रे यथा—

अतारिषुर्भरता गव्यवः सम्। ऋ० ३। ३३। १२

गव्यवः गा इच्छन्तो भरताः समतारिषुः। अत्र सर्वसामान्यजनवाचकं भरता इति पदं दृश्यते। तथाच—

आसन् परिच्छिन्ना भरता अर्भकासः
अभवच्च पुर एता वसिष्ठः।
आदित् तृत्सूनां विशः अप्रथन्त॥ ऋ० ७। ३३। ६

"अत्र भरता जनाः अर्भकासः बालबुद्धयः परिच्छिन्नाः कलहप्रिया आसन्। तेषां यदा पुरोहितः वसिष्ठः समभवत्, तदानींप्रभृति भरतानां विशः-अप्रथन्त। समृद्धाः परमोत्कर्षमापन्ना अभवन्।" इत्यत्रापि भरता जना उल्लिखिता दृश्यन्ते। एतेषां जनानां या भाषा अस्ति सा भाषा भारतीति स्पष्टमेव भवति। भारतस्य सूनवः अपि अत्र प्रशंसिता दृश्यन्ते यथा—

भारतस्य सूनवः। ऋ० २। ३६। २
भरतस्य पुत्राः। ऋ० ३। ५३। २४

'भरतराष्ट्रस्य पुत्रा एते भारता' वा भायाः प्रकाशस्य मार्गे अर्चिरादिके पथि वा रताः ते भारताः, प्रकाशमार्गावलंबिनो दिव्यज्योतिर्मार्गावलम्बिनो भद्राः पुरुषा वा अत्रापेक्षिता इति विद्वद्भिः विचार्य निश्चयः कर्तव्यः।

आकाश्मीराल्लंकापर्यन्तं विस्तीर्णं भारतं राष्ट्रं इदानीं दृश्यते, किं तदेतद्राष्ट्रं पूर्वोक्तेन वेदमंत्रेण उल्लिखितं, अथवा प्रकाशमार्गस्थितानां अर्चिरादिमार्गावलम्बि मानवसमूहोऽत्र 'भारतजन' इति पदेन व्यवहृियत इत्यस्य विचारः कर्तव्यः सद्भिः वेदविद्भिः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सुरभारती

अस्या 'भारती' नाम्न्या भाषाया अपराणि नाम- धेयानि 'सुरभारती, देवभाषा, गीर्वाणवाणी' इत्यादीनि इदानीमपि सुप्रसिद्धानि सन्ति ।

के नाम ते सुराः, के नाम ते देवाः, के नाम ते गीर्वाणा इति प्रथममत्र निश्चेतव्यम् । देवलोकस्य अपरं नामधेयं 'त्रिविष्टपं' इति वर्तते । तस्यैव 'त्रिविष्ट पस्य' अपभ्रष्टं नामधेयं 'त्रिवेट' इति इदानीं सुप्रसिद्धं वर्तते । त्रिष्टिप एव तिबेट देश इत्यत्र न कोऽपि सन्देहः । तत्र सुरनद्या गंगाया उद्गमप्रदेशः समीप- मेवास्ति । स्वर्गद्वारमपि तत्रैव हिमगिरौ वर्तते । भारतस्य उत्तरस्यां दिश त्रिविष्टपाख्यः प्रदेशो वर्तते । येन मार्गेण युधिष्ठिराद्याः पाण्डवा स्वर्गारोहणं कृतवन्तः स एव त्रिविष्टपस्य मार्गो हरिद्वारस्य उत्तरस्यां दिशि वर्तते । स्वर्गद्वारप्रदेश एष एव । एष एव सुरलोकः, यत्र देव- जातीनाम्नी मानवानां जातिः सर्वशुभगुणसंपन्ना निवासं कृतवती पाण्डवानां समये । कुन्त्यां जातोऽर्जु- नस्तस्यैव देवराष्ट्रस्य शासकस्य इन्द्रस्य नियोगजः पुत्रः आसीत् । सोऽर्जुनश्च अस्त्राणां प्राप्त्यर्थं अस्मिन्नेव त्रिविष्टपे गतः, तस्मात्त्रिविष्टपराज्ञः इन्द्रात् नानास्त्रा- ण्यानीतवान् ।

अस्मिन्स्वर्गे गमनमर्जुनेन जीवितदशायामेव कृतम् । मरणोत्तरं यस्य प्राप्तिर्भवति स अन्यः स्वर्गः । एष त्रिविष्टपनाम्ना प्रसिद्धः स्वर्गो जीवितदशायामपि गन्तुं तत्र वा निवसितुं शक्यः । इदानीमपि तत्र सर्वैः गन्तुं शक्यते । अस्मात्त्रिविष्टपात् अर्जुनः कैलासं प्रति गत- वान् । तत्र च भगवन्तं श्रीशंकरं संपूज्य, तस्मात्पाशुप- तास्त्रं प्राप्तवान् । एष कैलासः इदानीमपि गन्तुं योग्य- एवास्ति । शतशो जना इदानीमपि तत्र गच्छन्ति, तस्य प्रदक्षिणां च कुर्वन्ति । अतः कैलासनिवासो जीवित- दशायामपि भवितुं शक्यः । सर्वमेतत्प्रत्यक्षमेव वर्तते, अतस्तस्य सिद्ध्यर्थं प्रमाणान्तरप्रदर्शनस्य किमपि प्रयोजनं नास्ति ।

श्रीभगवतः शंकरस्य शासनक्षेत्रं भूतस्थानं आसीत् । तदेवेदानीं भूतस्थानं 'भूतान' इति नाम्ना प्रसिद्धमस्ति । सर्वेषां जनानां तत्र गमनं तस्मात्स्थानात्पुनरत्र प्रत्याग- मनं चेदानीं सुखेनैव भवितुं शक्यम् । अत एतद्विषये न कापि शंका प्रभवितुं इदानीं शक्या ।

भारते तु भारतीयानामार्याणां निवासः । त्रिविष्टपे तिबेटदेशे देवजातीनां विबुधानां निवासः, तथा च भूतस्थाने–भूतानदेशे 'भूत' नामकानां जनानां निवास आसीत् । 'भोटिया' इति यन्नामेदानीं उच्यते, तदेव दर्शयति तत्रत्यानां प्राचीने काले 'भूतजाती' इति नाम आसीत् ।

त्रिविष्टपनिवासिनां देवानां या भाषा आसीत् सा एव 'देवभाषा, सुरभाषा, सुरभारती' इत्यादिभिर्नामभिः प्रसिद्धास्ति इदानीमपि ।

"देवाः । विबुधाः । सुराः । सुमनसः । लेखाः । ऋभवः । अमृतान्धसः । वृन्दारकाः ।" इत्यादीनि तेषां नामानि प्रसिद्धान्येव वर्तन्ते ।

'विबुधा' इति विशेषेण ज्ञानविज्ञानसंपन्नाः । 'सुमनस' इति शोभनमनस्काः । 'लेखा' इति लेखकाः लेखनकर्मणि कुशलाः । 'ऋभव' इति शिल्पकर्मणि कुशलाः । 'अ-मृतान्धसः' इति ये मृतमन्नं मृतपशु- देहात्समुत्पन्नं न भक्षयन्ति ते । 'वृन्दारका' इति प्रशस्तो



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वृन्दः संघः येषां ते शोभनसंघटनसंपन्ना इति एषामेतानि नामधेयानि, एषां शोभनगुणान् प्रकाशयन्तीति द्रष्टव्यम् ।

यत्तूच्यते पाणिनिकालेऽपि लेखनकला नासीदिति, तत्तु 'लेखा' इति एतेषां नाम्नैव प्रत्याख्यातम् । 'लेखा' इति लेखकानामेकः स्वतंत्रो वृन्द एव तेषां मध्ये आसीदिति स्पष्टमेव भवति अनेनैव नाम्ना । अतोऽनेन 'लेखा' इति पदेन लेखनकला नासीदिति शंका स्वयमेव परास्ता । त्रिविष्टपवासिनो देवजात्या विबुधा मानवा लेखनकर्मणि प्रवीणा आसन्, तथा च तेषां भाषा 'सुरवाणी, देवभाषा, देववाणी, सुरगीः' आदिनामभिः सुप्रसिद्धास्ति इदानींपर्यन्तम् ।

एतेन सिद्ध्यति यत् अस्मिन्नार्यावर्ते, उत्तरे भारते, त्रिविष्टपे, भूतस्थाने च एषैव सुरभाषा प्रचलिता आसीदिति । अर्जुनस्य तत्र गमनं, तत्रत्ये शिक्षणालयेऽध्ययनं, तत्रत्येन केनापि राज्ञा सह कुन्त्याः अर्जुनमातुः नियोगेन संबंधः, तेन संबंधेन अर्जुनस्य जन्म, अनेन कारणेन कर्णेन सह अर्जुनस्य भ्रातृत्वसंबंधः इत्यादिकं व्यवहारं दृष्ट्वा स्पष्टमेव भवति, यदेषा सुरभारती यथार्याणां तथा देवानामपि व्यावहारिकी भाषासीदिति। एतेन आर्यावर्त-त्रिविष्टप-भूतस्थानादयः प्रदेशाः संस्कृत-भाषाभाषिण एवासन्निति निश्चितं भवति ।

ब्रह्मणः प्रदेशो ब्रह्मदेशः, विष्णोः प्रदेशः गण्डकी-नद्या उद्गमस्थाने शालिग्रामस्थाने नयपालस्योत्तरे विभागे आसीत्, भगवतः शंकरस्य प्रदेशः कैलासीयः भूतस्थानीयः प्रसिद्धः । एते ब्रह्मा-विष्णु-महेशाः संस्कृतभाषां न जानन्ति स्मेति केनापि वक्तुं न शक्यते । अतः ब्रह्मदेश-भूतान-कैलास त्रिविष्टप-नयपालादिषु प्रदेशेषु संस्कृत-भाषा प्रचलिता आसीदिति स्पष्टं भवति ।

दक्षिणभारते वानराणां निवासः लंकायां च राक्षसानां निवास आसीत्। सुग्रीव-हनूमानंगदादयो वानरवीराः, तारादिका वानरस्त्रियः च संस्कृतभाषाज्ञाने निपुणा एवासन्नित्यत्र संदेहलेशोऽपि नास्ति। रामेण सह हनूमतः संवादः प्रथमं घण्टाद्वयपर्यन्तं संजातः। तत्र एकमपि हनूमतः स्खलनं नाभवदिति भगवता रामचन्द्रेण प्रशंसितं वाल्मीकीये रामायणे। रावणम् पुलस्त्याश्रमे वेदादिशास्त्राणि सांगानि अधीतवान्, स च अग्निहोत्रधारी आसीत्, वेदशास्त्रनिपुणः, तत्र लंकायां राक्षसा अपि संस्कृतज्ञा एवासन्निति वाल्मीकीये रामायणे प्रतिपादितम् । एतेन लंकायां तथा दाक्षिणात्ये भारतप्रदेशे, वानराणां देशे च संस्कृतभाषा प्रचलिता-सीदिति कथनं शंकास्पदं नैव भविष्यति ।

ऋषिभिर्भरद्वाजादिभिः दक्षिणे भारते स्वकीयाः आश्रमाः स्थापिताः । तेषु बोधभाषा संस्कृता नासीदिति कथं केन वक्तुं शक्यते ? अतः लंकायां दक्षिणे भारते किष्किंधायां, उत्तरे भारते, हिमालये, त्रिविष्टपे, कैलासे, भूतस्थाने, ब्रह्मदेशे, नयपाले सुरभारती प्रचलिता आसीदिति स्पष्टं भवति ।

कैलासे यः शांकरीयो विद्यालय आसीत्, तत्र देवानां कुमाराः, तथैव असुराणां, आर्याणां अपि कुमाराः अध्ययनार्थं आगच्छन्ति स्म । इति पुराणेषु सुप्रसिद्धं वर्तते । राक्षसानां, सर्पाणां असुराणां, आर्याणां, देवानां भूतानां संमेलनमेव कैलासे आसीत् । बाणासुरः, रावणः अन्ये शतशोऽसुराःशंकरप्रसादेनैव बलान्विताः समभवन् तथा च ते तदनंतरं देवान् आर्यांश्च संत्रासयामासुरिति इतिहासकथाः सर्वे जानन्त्येव ।

असुरास्तु असीरियाप्रदेशीयाः, दानवा दान्यूब-देशीयाः, बका बाक्ट्रीयादेशवासिनः, राक्षसा ह...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



शीया आसन्निति तेषां नामभिरेव स्पष्टं भवति। भगवान् शंकरस्तु ब्रह्मविद्यायां, आत्मविद्यायां, वेदविद्यायां, नाट्यनर्तनविद्यायां प्रवीण आसीत्। सर्वे पूर्वोक्ताः पश्चिमे भूभागे निवसन्तो असुराः शांकरीये विद्यालय एव नानाविद्या अधीतवन्त इति श्रूयते। अतस्ते सर्वे संस्कृतभाषां जानन्ति स्मेति सुस्पष्टमेवास्ति। शुक्राचार्यस्तु भार्गवो असुराणां प्रदेशे गत्वा तत्रत्यानामसुराणां आचार्यः संजातः। स तु संस्कृते प्रवीण आसीदित्यत्र कोऽपि संदेहो नास्ति।

रावणस्य माता कैकसी, तस्याः पिता सुमालीनामक एको राक्षसो मध्यामेरिकादेशात् भारते आगतः। स पुलस्त्यस्याश्रमे न्यवसत्। तत्र कैकसी गर्भं दधार रावणादीन् जनयामास च। मैक्सिकोनामके मध्यामेरिकादेशे संस्कृतभाषा प्रचलितासीदिति एतेन प्रतीयते। अन्यथा स भारते एव किमर्थं कथं वा आगतः अनाहूत इव यदि तस्य कोऽप्यत्र संबंधः न भवेत्?

मेक्सिकोदेशे 'ग्वातिमाल' नामकं नगरं वर्तते। 'गौतमालयं' एव तत्। किमेतत्संस्कृतस्यैव रूपं नास्ति। एवमेव प्रायशः सर्वेषु देशेषु ग्रामनामानि, पर्वतनामानि, नदीनामानि मनुष्यनामानि च संस्कृतोद्भवान्येव दृश्यन्ते। यथा रूसदेशे 'आह्वान्तानि' मनुष्यनामानि इदानीमपि दृश्यन्ते। "मोलोटोह्व, वेराशिलाह्व, माल 'कोह्व' आदीनि नामानि आह्वान्तानि सन्ति। 'आह्व' पदं संस्कृते नामवाचकं वर्तते, यथा 'अमृताह्वः' विनायकाह्व इत्यादीनि संस्कृते नामानि भवन्ति। तथैव "वीरशीलाह्व, मोलोटोह्व, मालेन्कोह्व" आदीनि आह्वान्तानि नामानि कथं रूसदेशे गतानि? कथं नाम 'आह्व' इति पदं रूसदेशे गतम्? यदि तत्र कदाचिदपि संस्कृतभाषायाः संबंधः नासीत्।

रूसदेशे एतदेकमेव नाम वर्तते इति न, शतशःस्थान पर्वत-ग्राम-नदीनामानि तत्र संस्कृतोद्भवान्येव दृश्यन्ते यथाः—

## रूसदेशे संस्कृतनामानि

| | | |
|---|---|---|
| Veta | वेत | वेदः |
| Samoyedas | सामयेदस | सामवेदः |
| Sorot | सोरोत | श्रुतं |
| Rusa | रूसा | ऋषिः |
| MokSha | मोक्ष | मोक्षः |
| Usa | उसा | उषा |
| Ussa | उस्सा | " |
| Viaz | वियाज्य | व्यासः |
| Nerekta | नेरेक्त | निरुक्तं |
| Oma | ओमा | उमा |
| Gori | गोरी | गौरी |
| Yug | युग | युगं, योगः |
| Sura | सूर | सूरः, सूर्यः |
| Polist | पोलिस्त | पुलस्तिः |

अत्र "वेद–सामवेद–मोक्ष–उषा–व्यास उमा-गौरी पुलस्ति" आदीनि नामानि शुद्धानि संस्कृतनामान्येव सन्ति। एतान्येवैतादृशानि नामानि सन्ति इति न, प[रं] एतादृशानि शतशो नामानि सन्ति। रूसदेशे यदि संस्कृतभाषा नासीत कदाचिदपि प्रचलिता, तर्हि एवं विधानि नामानि तत्र कथं गतानि इति दर्शनीयं तै[ः] येषां मतं विरुद्धं वर्तते। वयं तु मन्यामहे यत्प्राचीने काले वैदिकी भाषा, संस्कृता वा लौकिकी भाषा वा तत्र प्रचलितासीदिति। क्रमशः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्

**परमाणुबम्बस्य प्रतिष्टम्भः**—पश्चिमदेशीय-विज्ञानेन प्रचालितैर्नूतनाऽऽविष्कारैर्लोकानामुपकारो हानिर्वा इति बहुधा विचारयन्ति शिक्षार्थिनः। विद्यालयेषु बहुधा 'वाद-स्पर्द्धा'या (डिबेट) विषयोऽपि नियम्यते यत् 'साम्प्रतिकेन भौतिकविज्ञानेन जनानां लाभो हानिर्वा।" किन्तु हिंसाभावनां मनसिकृत्य उद्भावितेन विज्ञानेन लोकानां न कदाचिदुपकारो भवतीति साम्प्रतं प्रत्यक्षीक्रियतां सर्वैः। नवीनेन पाश्चात्येन विज्ञानेन यथा विद्युत्-वायुयान-रेडियो-प्रभृतीनि वैज्ञानिकवस्तून्याविष्कृतानि तथा 'परमाणु बम'—'एटम-बम' प्रभृतीनि घातकवस्तूनि अपि उद्भावितानि। तेषामाविष्कारे वैज्ञानिकस्य हृदये—अन्यस्य हिंसैव उत्पादनबीजम्। अतएव न तैः कदाचिद्भूमण्डले मानवानां लाभः समुद्भवेदिति प्राचीनाऽऽर्याणां विश्वासः। तेषां किल एवंविधवस्तूनामुद्भावने प्रवृत्तिरेव न भवति। अन्यजनानां रोमाञ्चकारिणं सर्वनाशं समुत्पाद्य न ते स्वार्थसिद्धिं वाञ्छन्ति। 'इदानीं घातकविज्ञानेन जनतायां कीदृशी घृणा उत्पादिता', इति पश्चिमदेशीय-राष्ट्रैरेव डिण्डिमघोषेण घोषितं नूनम्।

संवादपत्रपाठकैः पठितं स्यात् पत्रेषु यत्—'भारतस्य वयोवृद्धेन सक्रियराजनीतितः प्राप्तावकाशेन चक्रवर्ति श्रीराजगोपालाचारिमहाभागेन—'परमाणुबम्बस्य परीक्षणे, प्रयोगे च सुदृढप्रतिबन्धनियमनार्थमात्मनो विचाराः प्रकटिता आसन्।' वर्तमानकाले एव 'नेवडा' स्थाने अमेरिकाराष्ट्रेण नूतनाविष्कृतस्य एकस्य परमाणुबम्बस्य परीक्षणं कृतमासीत्। इतः पूर्वमपि प्रशान्तमहासागरे परमाणुबम्बस्य या परीक्षा कृताऽभूत्तयाऽपि धन-जनादीनां कियती हानिः समभवदिति सर्वैरेव जनैः परिज्ञातमेव। एवंविधानामाविष्काराणां न केवलं भारतीयैरेव, अपि तु शान्तिकामुकेन विश्वस्य प्रत्येकराष्ट्रेण भृशं निन्दा कृता। देशस्याऽनुभविना राजनैतिकेन श्रीराजगोपालाचारिमहोदयेन अमेरिकायाः प्रमुखपत्रे 'न्यूयार्कटाइम्स' नामके पूर्वमपि कानिचित् प्रकटपत्राणि प्रकाशितान्यभूवन्, येषु परमाणुबम्बस्य परीक्षणे पूर्णप्रतिबन्धस्थापनार्थं प्रार्थना कृताऽऽसीत्।

महामहत्सु पश्चिमस्य तेषु तेषु राष्ट्रेषु सेयं प्रार्थना प्रचारिताऽऽसीद् यानि किल राष्ट्राणि परमाणुबम्बस्याऽऽविष्कारे आत्मनो गौरवं प्रकटयन्ति। तानि हि क्षणमात्रे एव विश्वस्य सुखं शान्तिं च सर्वथा उन्मूलयितुं वाञ्छन्ति। यतो हि एवंविधानि प्रलयङ्कराणि शस्त्रास्त्राणि लोकस्य सर्वथाऽनिष्टकराण्येव। अतएव एवंविधशस्त्रास्त्राणां निर्माणस्य, प्रचारणस्य च सर्वथा प्रतिबन्ध एव कर्तव्यो विवेकिनाम्।

इङ्गलेण्डस्य अमेरिकायाश्चापि प्रमुखपत्रैस्तु एतावदुद्घोषितमासीद् यत्—"परमाणुबम्बस्य निर्माणे परीक्षणे च अमेरिका यदि प्रतिबन्धं न नियोजयति तर्हि अमेरिकाद्वारा दीयमाना आर्थिकसहायता भारतेन साऽवहेलं तिरस्करणीया नूनम्। भारतवर्षमात्मानम् अहिंसामार्गवर्तिनं सर्वतो घोषयति। ततश्च भारतदेशो यदि विश्वस्मिन् आत्मनस्तरं सर्वथा उन्नतं स्थापयितुं वाञ्छति तर्हि तदिदं कर्तव्यं तेन कर्तव्यमेव। अप्रिलमासे संजातेन एशिया-अफ्रिकयोरूनत्रिंशद्राष्ट्राणां संमेलनेनाऽपि 'वाण्डुङ्गस्थाने' परमाणुबम्बस्य भयानकः सोयं प्रश्नो विचारितोऽभूत्। तत्रापि सर्वैरेव स्वतन्त्रराष्ट्राणां प्रतिनिधिभिः सर्वसंमत्या सोयं प्रस्तावः पारि-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...तोऽभूद् यत् 'परमाणुबम्बस्य परीक्षणे पूर्णः प्रतिबन्धः प्रतिविधेय एव ।' वर्तमानकाले विश्वस्य या राजनैतिकी परिस्थितिः परिलोक्यते तामनुरुध्य महत्त्वपूर्णः सोयं ...न: सर्वैर्गंभीरतया विचारणीय एव । स्वल्पकालात् ...र्वम्, रूसराष्ट्रस्य सर्वकारेणाऽपि एका विज्ञप्तिः प्रक- ...िताऽभूद् यस्यां परमाणुबम्बस्य प्रचारे, प्रसारे, ...रीक्षणे चाऽपि प्रतिबन्ध-निर्माणस्य एका प्रयोगा- ...त्मिका योजना निर्दिष्टाऽऽसीत् ।

...पण्डितनेहरूप्रचारिता पञ्चसूत्रीयोजना, पञ्च- ...तायाः शान्तिप्रवर्तकाः पञ्चाऽपि सिद्धान्ताः ( परस्परं ...त्री, अनाक्रमणनीतिः, प्रादेशिकी अक्षुण्णता परस्परं संमानप्रदानम् इत्यादयः ) एशिया-अफ्रिकयोः सर्वैरेव स्वतन्त्रराष्ट्रैर्यदि पालयितुमिष्यन्ते तर्हि विनाशकारीणि एवंविधशस्त्रास्त्राणि न कोऽपि बुद्धिशाली हृदयतः संमन्येत । यूगोस्लावियाप्रदेशस्य राष्ट्रपतिं मार्शलटीटो-महोदयमारभ्य, रूसराष्ट्रस्य मार्शलबलगानिनपर्यन्ताः सर्वेऽपि राजनैतिकाः कर्णधारा विश्वशान्तिं कामयन्ते नूनम् । एवमवस्थायां विश्वस्य शान्तिभङ्गकारिण्यः इमा योजनाः शान्तिप्रियेण येन केनापि राष्ट्रेण प्रतिबन्धनीया एव । विचारशीलाः पुरुषाः साम्प्रतं तुलयन्तु प्राचीनानामार्याणां सर्वतोऽप्यहिंसाप्रवर्तकान् मूलसिद्धान्तान् नूनम् !!

---


# हिन्द मिल्स लिमिटेड

**१५, डुगलमार्गः, बेलार्ड इस्टेट**

**मोहमयी १ (बंबई)**

● लेयार्ड — लम्बवस्त्र (लांगक्लॉथ)-परिधानीयवस्त्र (शर्टिंग)-प्रावरण (शीटिंग)-शय्यावस्त्र (चादर) ड्रिल — सूक्ष्मवसन (मलमल)-पापलीन-धौत-शाटी-मञ्जरी-सुसीज इत्यादीनां कृते ।

तथा

● काकेटचिह्नितं दृढसूत्रम् (स्टेपल फाइबर) एवं कार्पाससूत्रम् (कॉटन) १०तः ६ काउण्टपर्यन्तम् — एतेषां क्रयाय ।

विशेषतः ग्रामीणोपभोगस्य कृते निर्यातविक्रयाय च सुप्रसिद्धमिदम्

तार — 'हिन्दग्राम'

फोन — ऑफिस ३००१७, मिल ६०४४३




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# सूक्ति-सुधा

उदेति सविता ताम्रस्ताम्र एवाऽस्तमेति च ।
संपत्तौ च विपत्तौ च महतामेकरूपता ॥१॥

यह सूर्य उदय होने पर तथा अस्ताचल को के समय ( दोनों हालतों में ) लाल ही दिखलाई है । संपत्ति और विपत्ति में महापुरुषों की सदा रूपता (एकसी मनोवृत्ति ) होती है ॥१॥

हृदयानि सतामेव कठिनानीति मे मतिः ।
खलवाग्विशिखैस्तीक्ष्णैर्न भिद्यन्ते मनागपि ॥२॥

मैं मानता हूँ कि सज्जनों के ये हृदय ही ( करडे ) हैं, जो दुष्टों के वाक्यरूपी तीक्ष्ण बाणों भी जरा भी कभी नहीं भिन्न होते । दुष्ट पुरुष जितनी तानेजनी करें ( आक्षेप करें ) वह उसकी से अपना मार्ग नहीं छोड़ते ॥२॥

वित्ते त्यागः क्षमा शक्तौ दुःखे दैन्यविहीनता ।
निर्दम्भता सदाचारे स्वभावोयं महात्मनाम् ॥३॥

धन होने पर त्याग अर्थात् दान देना । उसे छोड देने की वृत्ति । शक्ति रहने पर भी की बुराई को सहजाना । दुःख होने पर भी नहीं धारण करना । सदाचार के विषय में कभी नहीं करना । ये महात्माओं का स्वभाव है ॥३॥

क्वचित्सर्पोऽपि मित्रत्वमियान्नैव खलः क्वचित् ।
न शेषशायिनोऽप्यस्य वशे दुर्योधनो हरेः ॥४॥

कहीं सर्प (सांप) मित्रता का व्यवहार कर दे किन्तु दुर्जन कभी अच्छा व्यवहार नहीं सकता । सर्प ( अर्थात् शेषनाग ) पर सोने वाले के भी दुष्ट दुर्योधन कभी वश में नहीं आया पुरुष सर्प से भी भयंकर नीच होता है ) ॥४॥

या स्वसद्मनि पद्मेऽपि सन्ध्यावधि विजृम्भते ।
इन्दिरा मन्दिरेऽन्येषां कथं तिष्ठति सा चिरम् ॥५॥

जो लक्ष्मी अपने निवासस्थान कमल में भी काल पर्यन्त ही निवास करती है [सायंकाल को मुद्रित ( कलीरूप में ) हो जाते हैं, वह विकास शोभा नहीं रहती ] । फिर यह लक्ष्मी दूसरों के में चिरकाल पर्यन्त कैसे ठहर सकती है ? [ जो घर में ही बहुत थोड़े समय तक रहती है, वह के पास चिरकाल तक कैसे रहेगी ? यह लक्ष्मी संपत्ति) अस्थिर चंचल है ॥५॥ ]

प्रकाशक — जयबहादुरसिंह
पता —भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रक—राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

स्वराज्यस्थापनावीरः
सन्महाराष्ट्रकेसरी ।
लोकमान्येषु तिलक-
स्तिलकोऽयं प्रणम्यताम् ॥

मूल्यम्
वार्षिकम् ३)
एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❋ विषय-सूची ❋


| | | |
|---|---|---|
| १. मधुगायनम् | प्रो० शिवशरणशर्मा, बिन्दकी, उ० प्र० | २१९ |
| २. तीर्थस्नानम् | श्रीदीनानाथशास्त्री सारस्वतः देहली | २२० |
| ३. 'जीवनसमरे क्षणं हसत' | सौ० माधुरी देवर्षिः, जयपुरम् | २२० |
| ४. अपूर्णा कथा | श्रीप्रेमशंकरमिश्रः, इटारसी, म० प्र० | २२१ |
| ५. श्रावणमासवर्णनम् | श्रीजगपालसिंहशास्त्री, रोहतक | २२५ |
| ६. काव्यस्योपादेयता | श्रीप्रह्लादचन्द्रशास्त्री डीडवाना, राजस्थान | २२६ |
| ७. वर्षर्तु वर्णनम् | ,, ,, | २२७ |
| ८. एको गुणः खलु निहन्ति समस्तदोषान् | श्रीकेदारनाथमिश्रः, बाराबंकी | २२८ |
| ९. श्रीरामार्याशतकम् | श्रीपीताम्बररावतैलङ्गः, अजयगढ़, विन्ध्यप्र० | २३० |
| १०. शर्करा लवणं च (बालस्तंभः) | सङ्कलितम् | २३१ |
| ११. संस्कृतविद्वांसोऽपि जागृयुः | श्रीचण्डीप्रसादशर्मा, बीकानेर | २३२ |
| १२. परमेश्वरः | स्वामी श्रीलक्ष्मणशास्त्री, नागोर | २३४ |
| १३. आत्मबलिदानम् | श्रीहरगोविन्दपाराशर साहित्यरत्नम् | २३६ |
| १४. सम्पादकीयम् | सम्पादकः | २३९ |


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

# भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्ष ५ | श्रावणपूर्णिमा, सं० २०१२ | अङ्कः १०

## मधुगायनम्[1]

[ प्रो० शिवशरणशर्मा बिन्दकी फतेहपुर उ० प्र० ]

कीदृशं मधुगायनं रे ?
हरतु यन्मानसव्यथां नैवास्ति किमपि रसायनं रे ।
अनुदिनं वर्षाणि तप्त्वा. सरिदियं परिशुष्कनीरा
नीरसा सिकतामयी चिरदुःखिनी निर्मनुजतीरा ।
दृश्यते संतापमयता क्वाद्य तद्रसप्रवहणं रे ?
पीडितास्ते यैः सहाहं सर्वदा निवसामि गेहे ।
ज्ञानरहिता अन्नहीना वर्तते वस्त्रं न देहे ।
दुःखितानामग्रतो वद कीदृशं सुखसाधनं रे ? ॥२॥
स्वर्णभूमिरियं न पश्यसि कीदृशी हा दैन्यपूर्णा ।
कीदृशीयं वंचनास्ति बुभुक्षिता स्वयमन्नपूर्णा ।
कर्णकुहरेष्वद्य पूर्णं व्याप्तमास्ते रोदनं रे ॥३॥
अद्य वेला नास्ति श्रोतुं गायनं वा रोदनं वा ।
कुरुत किंचिदिहाथवा स्यात् शर्वरीयं मरणपर्वा ।
गर्हितं नीचं वृथा त्वं धारयसि स्वं जीवनं रे ॥४॥

१. गानार्थे 'गायन'शब्दो हिन्दीभाषातः संक्रान्तः सह्यन्ते सहृदयैरपि । संपादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# तीर्थस्नानम्

श्रीदीनानाथशर्मा शास्त्री सारस्वतः, विद्यावागीशः, विद्यानिधिः
प्रिन्सिपल संस्कृतहिन्दीमहाविद्यालयः, रामदल, दरीबा. देहली

तीर्थानि धर्मभूमयः सन्ति। अत्र ऋषिमुनिभिर्विविधयज्ञाः कृताः; अनेकविधास्तपस्याः कृताः। विष्णववतारैश्च तानि पावितानि। यथा सूर्यकान्तमणिद्वारा सूर्यस्य नभोगताः किरणाः सञ्चित्य अग्नयो भवन्ति, तथा भगवतः सर्वत्र व्यापिका शक्तिरेषु पावनस्थानेषु सञ्चित्य प्रकटीभवति। तत्रत्या च नदी स्वसेविनां स्नातॄणां शरीरमनोबुद्धीनां कल्याणप्रदा भवति।

सूर्य्ये तच्छक्त्या पूतो जलौघस्तिष्ठति। सूर्यद्वारा च वृष्टिर्भवतीति सुप्रसिद्धम्। सा च वृष्टिः पर्व्वतेषु प्रायशो जायते; तेषामुन्नतत्वात् तत्र वृष्टिप्राचुर्यं स्वाभाविकम्। इतश्च उन्नतपर्वतेषु शुद्धा लाभदायिकाश्च ओषधयोपि तिष्ठन्ति। स च जलौघस्ताभिः सह संगत्य निरन्तरमधः स्रवति। राशीभूतश्च स गङ्गादिमहानदीरूपेण अस्मद्भारतवर्षमेति। अस्मदीयाः प्राञ्चस्तन्नदीजलविश्लेषणं कृत्वा तासां-तासां, पुण्यविशेषातिशयमनुबभूवुः; ततश्च तैस्तासां-तासां पुण्यप्रदातृत्वे तारतम्यमपि स्थापितम्। तत् तेषु तीर्थेषु स्नानेन पुण्येन सह ऐहिकलाभानामपि सम्भवो जायते। इतश्च तासु महानदीषु अनावृतत्वात् सूर्यस्य, चन्द्रमसः, नक्षत्राणां च रश्मयोपि व्यक्तं स्वप्रभावं कुर्वन्ति, तत्तासु तीर्थव्यपदेश्यासु नदीषु आवृतकूपादिजलापेक्षया पूततरत्वं स्वतः सिद्धम्। तस्मात् अस्माकीनाः प्राञ्चस्तीर्थस्नानमतितरां तुष्टुवुः।

## व्यायामः

स्नानानन्तरं व्यायामोपि लाभजनकः। स्नानात् प्राग् व्यायामे चिकीर्षिते तु तत्र सुबहु विश्रमितव्यं भवति; परं स्नानसन्ध्योत्तरं तु न विश्रमापेक्षा भवति। व्यायामेन शरीरं विभक्तसुदृढावयवं जायते। मेदः क्षीयते परं व्यायामोपि लघुः स्यात्। तस्मिन्ननुष्ठिते सति अन्न-परिपाकात् पुरुषः कदापि रुग्णो न भवति इत्यनुभवसाक्षिकम्; नात्र कोप्यर्थवादः। यतो हि व्यायामे प्रातःकालिकशुद्धवायौ सति फुप्फुसौ शुद्धौ विस्तृतौ, प्लीहा यकृच्च साम्ये स्थिते सती तद्वृद्धिस्वरूपप्रवेक्ष्यमाणरोगाणामाशङ्कां सर्वथा निवारयतः। शरीरे च स्वस्थे सर्वाणि पुण्यकार्याणि स्युः, तद् एतदीयोपयोगिता धर्म्य एव।

---

# 'जीवनसमरे क्षणं हसत !'

(सौ० माधुरी देवर्षिः, जयपुरम्)

श्वश्रूः—(स्वस्नुषायै सरोषम्)—रजनि! एषु दिनेषु त्वमतीव मुखरा संवृत्ताऽसि। सर्वदा भृत्यान्, बालकांश्च भर्त्सयसि। गृहकर्मणि नावधानं ददासि। यदा विवाहानन्तरं त्वमत्रागतैवासीः तदा तु शान्तस्वभावा सुशीलाचाभूः।

वधूः—मातः! सत्यं वदति भवती। मुखरा संजाताऽस्मि। अनुल्लंघनीयः संगते प्रभावः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अपूर्णा कथा

( प्रेमशंकरमिश्रः ३११ हरिपुरा, इटारसी, म० प्र० )

[ जयपुरीयश्रीसंस्कृतवाग्विवर्द्धिन्याः परिषदः षष्ठवार्षिकाधिवेशनावसरे संस्कृतकथालेखनप्रतियोगितायां प्रथमपुरस्कारस्वर्णपदेन सम्मानिता— ]

प्रावृट्कालीने नभसि विलम्बमानमेघमाला नितरां चित्तहारिणी भवति, विशेषतः सायं दृश्यमानमरीचिमालिनो हिरण्मयी प्रभा तस्याः सुषमां शतगुणितां करोति। नवीननीलतमशाद्वला वसुन्धरा दिनमणिकरस्फुरिता चीनांशुक-परिवेष्टितेवाकर्षति बलादवलोकनरतानां मनः।

एकदा सायं त्रिविधसमीरणाप्यायितमना अहं निवासभूतनगरात्क्रोशमात्रं प्रयातः। तत्र बाष्पयानमार्गस्योभयतः खर्जूरतरु-पंक्तिः पश्चिमतस्तु कलकलनिनादिनी प्राप्तकौटिल्यभावा स्रवन्ती स्रवति। यदा प्रतीचीदिक् स्वस्थानावाप्तदिननायकसंप्राप्तसौभाग्यागर्विता कुङ्कुमलितेवाननारुण्यमाकलयति तदा तस्य भूखण्डस्य रमणीयकं पारेगिरं भवति।

तत्र वाष्पयानमार्गस्य समीपे किमपि कृष्णं वस्तुजातमवलोक्य निपुणं निरीक्ष्य पुस्तकमिति निश्चितवान्। समुत्थाप्य च पत्रपरिवर्तनं विदधतो मे दृष्टिरेकतो लेखेण संलग्ना, ज्ञातं च मया कस्या अपि रमण्याः "स्मरण-पुस्तकम्" मन्येऽधुनैव गताद् धूम्रयानात्पतितं स्यादिति। तस्मिन् पत्रे लिपिकृतमासीत्।

अतीतचिन्तनपरायणाया मम लोचनयोः पुरः सर्वापि घटनावली चलचित्रमिव प्रतीयते।

मन्दभाग्याया मम जनिसमय एव ममतामयी जननी मां विहाय दिवं प्रयाता। मन्ये तातचरणा मां सुतनिर्विशेषं पुपुषुः।

तदीयस्नेहकल्पलतान्तरालस्थितया मया कदाप्यसौख्यानुभवो न विहितः। कतिपयकालात्यये मयावगतं यत् सत्यपि परिणयार्हे वयसि द्वितीयविवाहप्रार्थनां तातचरणा नैव स्वीचक्रुः।

पंचमहायनस्थिता एकदा मध्याह्नकाले क्रीडापरायणा तृषाकुला श्रान्ता चाहं यदा गृहान्तरालं प्रविष्टा तदा तल्पशायिनं तातं विलोक्य चिन्ताकुला जाता, यतः प्रचुरायामान्यपि दिनानि मत्सेवया गृहकार्यसंलग्नतया वा यापयन् न कदापि तात ईदृशः पूर्वमवलोकितः।

तदानीं ममान्तिके संस्थाप्य कराभ्यां परामृशन्मदीयं वपुः प्रस्फुरितलोचनाभ्यामितस्ततोऽवलोक्य किंचिन्निजगाद परं न तदाशयोऽवगतस्तदानीम्। केवलं "दीनबन्धो! किं भविता रमायाः प्रभो? त्वमेव संतारय बालिकाया अस्या जीवननौकाम्" इति पदावली मदीयकर्णयोरद्यापि कूजतितराम्।

किंचित्कालात्यये तातस्य मुखे किमपि दत्वा तदवलोकनतत्परं कंचिज्जनमहं विलोकितवती। नूनं स राजवैद्य आसीत् भेषजदानपरायणः, तातस्य रोग उत्तरोत्तरं वृद्धिभावं गतः।

एकदा निमीलितलोचनं तातं काष्ठपुत्तलिकेव स्थिताहमलोकयम्। तदानीं बहवो जनाः समागत्य तातशरीरं कुत्रापि निन्युः। रोदनपरायणां मां 'ते पिता औषधालयं गतः,पुनः तव समीपे समागमिष्यति, मा रोदीः" इति सान्त्वयामासुः। कतिचिद्दिनात्यये कश्चिज्जनः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



समागतः। तातमात्रपरिवाराहं तं कथमपि न परिचिनोमि स्म। स च वाष्पाकुलनेत्रो मामुत्थाप्य रुदतीं मां पर्यचुम्बत् निनाय च अन्यत्र कुत्रापि।

निराश्रयस्य आश्रय-प्रदातारो विरला भवन्ति। यावज्जीवनं मातुलोपकृतिरविस्मरणीया मे। यस्य गेहे मदीयं बाल्यं व्यतीतम्, मातुलान्यास्तस्य च स्नेहो मां विस्मृतप्रायतातस्नेहामकरोत्। स राजकीयकार्यालये नियुक्त आसीत्। नव्यविचारशालिने तस्मै कन्याशिक्षणं सनासाभ्रूसंकोचं निंदन्तो जना न रोचन्ते स्म। तस्य विचारे "भारतीयैः प्राचीनसंस्कृतिमाधारीकृत्य नूतन-समाजभवननिर्मितिः देशोन्नतेः परमोपकारिणी प्रतीयते स्म।" फलतो मदीयमध्ययनं माध्यमिकशाला-पर्यन्तं जातम्।

इदानीं मदीय-जीवनस्य वसन्तकालः समागतो यत्र चापल्यपत्रपतनमन्ते च लज्जा-किसलयोद्गमनं च जायते। पादयोस्तरलता लोचनयोः समागच्छति। एकदा मातुलान्या मुखान्मया परिणयसम्बन्धिनी वार्ता श्रुता तातकल्पयोवियोगकल्पनैव मां दुःखाकरोत्। एकतश्च भाविजीवनसम्बन्धिनी कल्पना चेतः समान्दोलयत परन्त्वभाग्यचिन्तना मदीयकल्पनानर्तकी चरणौ निगडबद्धाविव चकार। अनतिचिरमेवाहमन्यदीया संवृत्ता। स्नेहोद्रेकात् वाष्पपर्याकुलेक्षणौ मातुल-मातुलान्यौ परित्यज्यान्यदीयभवनेऽहं संप्राप्ता। मिलनस्य प्रथमक्षण एव क्रीतहृदयावावां संजातौ। एकस्यापि क्षणस्य वियोग आवयोः कृते वर्षायते स्म। पतिमहोदया मां सुरवाणी मशिक्षयन्। परन्तु वंशपरम्परागत-जीविका-साधनभूते कार्ये तेषामरुचिर्नित्यं तन्मुखोपरि चिन्तारूपेण नृत्यति स्म। चिन्तिते पत्यौ सुखान्वितमपि जीवनं सन्तोषाभावान्नरकायितमासीत्।

बाल्ये मातुलगृहे स्नेहातिरेकात्सौख्यान्वितं मदीयं जीवनमासीत् इति निवेदितमेव। तदानीं पुस्तक-पठन-मात्रकार्यया मया गृह-कृत्यानामुपेक्षा विहिता; सैवेदानीं मरुन्तुदा संवृत्ता। न केवलं शिक्षापदेन पुस्तकपठनमेव ग्रहीतव्यमपितु गृहकृत्यमेव मुख्यतया विधेयम्। एषा वार्ता मदीयहृदये दिवानिशं प्रास्फुरत्।

श्वश्रूजनस्येयमभिलाषा भवति यत् स्वकीयकार्यशैल्या वधूजनः कार्यं करोतु, परन्तु चातुर्य्येण सम्पादितेष्वपि शैली-रुचि-भेदादनच्छत्वं भवति। मम तु चातुर्याभावात् श्वश्रूवर्गभर्त्सनाश्रवणमेव केवला गतिर्बभूव। पूर्वं गृहकृत्योपेक्षा ममैवाक्षन्तव्योऽपराध इति कृत्वा कटुक्वाथमिव तद्वचांसि पीयन्ते स्म। वधूजने सहिष्णुताया अभावे तु गृहेऽकांडताण्डवं निश्चप्रचमेव भवति इति सम्यगवगतवत्यहं तथापि यथाकथंचिदपि मदीयसंसारार्णवसन्तरणं सुखेनैव भवतिस्म। तदानीमेकया घटनया सर्वमपि दृश्यं परिवर्तितम्। मदीयजीवने झंझावातः समागतः। सत्यपि भास्करोदये एकस्मिन्दिनेऽनवलोक्य पतिमहोदयमितस्ततः सव्यग्रभावमवलोकयन्त्या मया संप्राप्तमेकं पत्रम्, तत्र लिपिकृतमासीत्—

प्रियतमे! रमे?

"अपारे संसारे स्वजीवनोडुपं संगृह्य गन्तव्यमनिश्चित्यैव व्रजतो मे का दशा भविष्यति" इति तु दैवायत्तमेव, परन्तु त्वया धैर्यमास्थाय मदीया निष्ठुरता सोढव्या प्रसादद्याश्च गुरवः।

तावकीनः सुरेशः—

पत्रपठनकाल एव वेपमानाङ्गयष्टिरहं तत्पत्रं गुरुवृन्दगतमकरवम्। सर्वेऽपि जना अस्यानर्थस्य मूलं मामेवाजानन्—इत्यपरो मदीयदुःखहेतुरुत्पन्नः। क्रमशः सर्वत्राटोपमानमेघमालाकुलितं नभः समागतम्। तोयद-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...त्वाद् हंसच्छदाच्छमेघाचिताकाशपुष्पप्रकटितहास्या शरद् विगता। शुभ्रतनचन्द्रिकाप्लुता यामिन्यः वारं वारं समायाताः प्रयाताश्च परं न कश्चित्कान्तोदन्तोऽधिगतः। सत्यपि जनस्य सर्वनाशे सत्यपि प्रकृतेर्न किंचिदपि ...ते। तदानीं मम का दशा बभूव ? इति तु भुक्तभो-...ज्ञेयम्। एकतो निजदयितस्य विप्रयोगः परतश्च ...वर्गा-व्यङ्ग्यवचनावली मां विदीर्यमाणहृदया-...रोत। शनैः शनैः वर्षषट्कमपयातं, पतिमहोदयागमनं ...क्षमाणाया मम।

चन्द्रग्रहणपर्वस्नानोद्देश्येन गुरुजनैः साकमहं ...राणसीं प्राप्ता। तत्र महान् जनसंमर्द आसीत्। भगवतो विश्वेश्वरस्य मन्दिरे जनानां संमर्दाधिक्याद् बहवो जनाः ...ठे पतन्ति स्म; किन्तु पुण्यावाप्तिकृत-प्रयत्नो ...तत्र दृष्टिपातमपि कर्तुं न पारयति स्म। यत्र पुरुषा-...यं दशा भवति, तर्हि वराक्यो महिलास्तु कथं दर्शनं ...तुं समर्था भवेयुः।

जनसंमर्दवशादहं गृहजनेभ्यो दूरीभूता, परन्तु ...लुण्ठन-मध्यगतया मया किमपि द्रष्टुं न पारितम्। ...रैव क्षणैः मया स्वकीया स्थितिः ज्ञाता। मन्ये ...जना अपि मदन्वेषणतत्परा आसन् परन्तु जनसमुद्रे ...स्यापि अन्वेषणं न केवलमसंभवमपि तु कठिनतामपि ...चति। मदीयदुर्दिनारम्भकारिणी द्वितीया घटना ...टना। नूनं हेतुरस्याः पिशाचिनी अवगुंठनप्रथैव ...ना।

एकत्र गृहजनावाप्तिदुराशासंस्थितां वित्रस्तमृग-...लोचनां शुष्ककंठौष्ठतालुकां वेपमानाङ्गयष्टिं ...मन्दं रुदतीं मां दृष्ट्वा कश्चित् जनः विशालतनुः ...पुण्ड्रांकितललाटो धृतकाषायो मुण्डितमस्तकः ...कमंडलुः मदन्तिके समागत्य प्रोवाच—'बाले! कासि त्वं? मन्ये विमुक्तबान्धवा संपन्नकुलोद्भवा च त्वमसि। अस्मात् स्थानादनतिदूरे मदीय आश्रमो विद्यते।

तीर्थेषु सभ्यवेषवतां न्यूनता नास्ति इतिमया नैकशः श्रुतम्। किन्तु तदीया प्रभावशालिन्याकृतिः स्ववृत्तविनिवेदन-मुखरां मां चकार। सर्वमपि वृत्तमधिगम्य ते स्वामिनो मां स्वकीयाश्रमे निवासयामासुः। तदानींको जानातिस्म यदियमेव घटना मदीयाभाग्योदयं विधास्यति तथा चात्रैव मम भाग्योदयो भविता। आश्रमे गत्वा मया विज्ञातं यदियं शिक्षणसंस्था विद्यते, यत्र श्रीस्वामि-चरणानां निरीक्षणेन संस्कृताध्यापनं जायते। एकतः स्वामिनां कुटीरं तस्मादनतिदूरे पठनस्थानं, ततोऽग्रे यज्ञपूजनादिस्थानमासीत्। तद्भागसंलग्नेऽपरभागे सार्वजनिकसभाभवने तत्समीपे अधिकारिणां निवास-स्थानानि, तदग्रे च छात्रालय आसीत्। मम निवासोपि पृथक् कुटीरे स्वामिचरण-निकटावस्थिते प्रकल्पितः। शनैः प्राप्तपरिचयाः स्वामिचरणा- मां श्रीमद्भगवद्-गीतापाठकार्यमादिदिशुः। अधीतसंस्कृतविद्यां च मां ज्ञात्वा ते नितरां प्रसन्ना जाताः। भगवतः श्रीकृष्णमु-खान्निर्गतं पीयूषं पायं पायं मे हृदये शान्तिः आगता, तच्चिन्तनतत्पराहं दिनानि व्यत्ययापयम्। कलित-धाष्ट्‍र्या च संजाता।

आगामिभाद्रकृष्णाष्टम्यां श्रीकृष्णजन्मोत्सवो भविता, तदानीमेव विद्यालयस्य अधिवेशनमपि भविष्यति इति मया परिचारिकामुखादवगतम्। उत्सवे मदीयमासनं श्रीस्वामिचरणसमीपे कल्पितम्। तत्र च मया श्रीभगवद्गीतायाः पाठः कर्तव्य आसीत्।

स्वकीयासनस्थितया मया आस्थानमण्डपान्तराले विद्यार्थिवृन्देनोपवेशनादिव्यवस्थां, संचालयन् कश्चि-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ऽजनोऽवलोकितः। परिचितमिव तमवालोक्यान्दोलितं मे चित्तं नूनं पतिमहोदया एव सन्ति इति निश्चिकाय।

द्वितीये क्षणे पत्युश्चरणयोरहं प्रणमन्ती साश्चर्यं सर्वैरवलोकिता, मे नयनयोरविरतं वारि स्रवति स्म। क्षणादेव पतिमहोदयाः श्रीस्वामिचरणानां समीपे समागत्य सर्वमपि स्वीयमितिवृत्तं निवेदयामासुः। मदीयगृहजनवियोगादनु विद्यालयप्राप्तिं निभाल्य सर्वे जनाः विश्वनाथदयां प्रशंसितवन्तः। पतिमहोदयैः गृहं प्रति मदवाप्तिः स्वीयं च वृत्तं प्रेषितम्।

\+ \+ \+

कतिपयसमयानन्तरं पतिमहोदयेन साकं गृहं प्रति प्रचलिताहम्। तत्र मदीयननान्दुः परिणय आसीत्। आवां प्रचुरकालं स्वकीयजनुःस्थानादतिपूरे यापयित्वा पुनः प्रत्यावर्त्स्यावः एषा कल्पना आवयोर्हृदयमुल्लासयति स्म। कदा पितरौ अन्यान् गुरूजनांश्च द्रक्ष्यामः? इति उत्कलिकाकुलमासीदावयोर्हृदयम्। संप्राप्ते गृहे सर्वेपि जनाः साश्चर्यं सोत्कंठं सहर्षञ्च तत्रागत्य दशवर्षाणां घटनावलीं प्रथमक्षण एव जिज्ञासन्ते स्म। स्नेहात्सर्वत्राप्यामोदाम्भोधिः प्रसृतः।

शनैः२ परिणयदिवस आसन्नः समीप एव। तदानीं परिवारजनस्य समागताभ्यागतजनस्य च समागमनेन गृहं परिपूर्णं जातम्। सहसैवैकस्मिन्दिने समागतं पत्रं पठित्वा मां प्रति सर्वेषां व्यवहारः पूर्वतोऽपि रूक्षत्वमापन्न इति मे हृदयं भाविविपत्तिशंकया वेपितम्। सर्वत्रापि गाम्भीर्य्यं विलोक्यते स्म। मिथो वार्ताकारिणो जना मदुपस्थितौ मौनमाकलयन्ति स्म। परिवारवर्गेण सह मन्त्रणां विधाय पतिमहोदया मां गृहीत्वा कार्यविशेषार्थं वाराणसीं प्रस्थिताः। तदा प्रयागनगरे धर्मशालायाम् आवां निवासमकुर्व। रात्रौ 'किंचित्कार्यार्थमापणं गम्यते" इत्युक्त्वा प्रयातस्य पत्युः हस्तोट्टंकितं पत्रं द्वितीयदिने मया प्राप्तं तत्र लिपिकृतमासीत्—

रमे!

मानवः सामाजिकः प्राणीति हेतोस्त्वदीयचारित्र्यशुद्धिं जानन्नपि परिस्थितिवशगो भगिनीहितकाम्यया त्वां त्यक्तवानस्मि इति क्षन्तव्योऽयमागस्कृत्। विधेर्विधानं विचित्रमेवास्ति।

कदाचित् तावकीनः-सुरेशः

पत्रपठनसमकालमेव मदीयपादयोरधस्ताद्धरा पातालमूलं प्रयातेवानुभूता मया। पत्राक्षराणि सर्पायमाणानि दृष्टानि। नेत्रयोः पुरोऽन्धकारोऽविरलोऽश्रुप्रवाहः संलग्नः। तत्रैवाहं न जाने कदा निद्रिता.........
........................ ....... इतोऽग्रे कतिचित्पत्राणि पृथग्भूत्वा पतितानीव प्रतीतानि।

अग्रे किमपि भवेन् मम हृदयं तु नानाविचाराकुलं जातम्। हा? हन्त? सामाजिकमूर्खतापूर्णनियमसंकटे प्रकांडपंडितोऽपि शिरो नमय्यौचितीमविगणय्यन्नकार्यमाचरति। कृतं शिक्षया यया हृदयशोधनं न भवेत्, जीवन् वराकी मूढता यत्फलं कातरतारूपं लब्ध्वा सामाजिकानामियं परिस्थितिरस्ति। यस्मिन् समाजे सुरेशसदृशा विद्वांसो भवेयुः स कथं न रसातलं यातु?

इदं वृत्तं न केवलं कल्पनावल्लीकुसुमायितमपि तु समाजेऽद्यानेका रमासदृश्यो रमण्यः सधवा अपि वैधव्यमनुभवन्ति। शतशो वाराङ्गनावृत्तिकरणे बाध्या जायन्ते। नार्याः कोऽपराधः? इति न कोऽपि सामाजिको धार्मिको वा दृष्टिपातमपि कर्तुं वाञ्छति इत्येषा पराकाष्ठा दांभिकतायाः।

कामं न ते पश्यन्तु, वयं निगदामो यदेतादृश्यो घटनाः सुरेशसदृशा युवानश्च समाजस्य, जातेः राष्ट्रस्य वा कलंकतुल्याः सन्ति। तथा च मानवतायाः कृते अभिशापा इमा घटनाः सन्ति। सत्यविषये मौनाकलनपरा जना राष्ट्रोन्नतिनैतिकजीवनसमुन्नयनमार्गे प्रस्तरखंडायिता एव। अतोऽस्माभिरात्मसँस्कारान्तरायभूताः प्रथाः सर्वथा हेयाः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# श्रावण-मास-वर्णनम्

जगपालसिंह शास्त्री, विद्यालय नूरणखेड़ा ( रोहतक )

मासेषु सर्वेषु फाल्गुनः श्रावणश्च द्वावेव मासौ ख्यातिमापन्नौस्तः। श्रावणे मासि ग्रीष्मोऽपि शनैः शनैः स्वतापं जहाति, शीतश्च निजागमनस्य सज्जां विदधाति। अयमभिप्रायो यदस्मिन् काले नात्यधिकमुष्णत्वं न च शीतत्वम्। सूर्यस्य चण्डकरैस्तप्ता पृथिवी पिपासितेव नव समुद्यतजलधरैर्जलमासाद्य तृप्तिमेति, मनोहरं सुगन्ध-मुद्गिरति। नवानि तृणाङ्कुराणि स्थाने स्थाने स्व हरितिं प्रसारयन्ति। केकिनां केकाध्वनिभिः समाकृष्ट-हृदयाः समवलोक्यन्ते पथिकाः। जलपूरिता जलवाहाः कृष्णतामापन्नाः सगर्जनं वर्षन्ति। कृषकाश्च जलतृप्तां वसुन्धरां समवलोक्यारोपणयोग्यां बहुतरं मोदन्ते। शीतलः समीरः पयःकणमिश्रितः प्रकृत्यानन्दानुभव-तत्परान् मानवान् ब्रह्मानन्दमनुभावयति। उपवनेषु विकसितानि विविधानि पुष्पाणि स्वोपरि जलबिन्दून् संधार्यातितरां शोभन्ते। पादपालवालस्थपानीयेषु लघु-पक्षिणः सस्फुरणं स्नानं कुर्वन्ति। वर्षणानन्तरमपि वृक्षा जलबिन्दुनिपातनक्रमं न त्यजन्ति। सुदूरविस्तृतशाद्वल-भागाः केषां न चेतांसि बलादाकर्षन्ति। मनोहरं दृश्यं सन्दृश्यते सर्वतः। अवर्णनीयो वर्षासमयः।

श्रावणमासे प्रायः सर्वत्रैव वर्षा भवति। सौभाग्यवा-नयं मासः। अस्मिन् मासे या वर्षा भवति, तयैव कृषकाः कृषिकार्यं विस्तारयन्ति। अस्मिन्नेव समये सर्वफलप्रसि-द्धान्याम्राणि सुष्ठुप्रकारेण परिपाकं गच्छन्ति वृद्धिञ्च। श्रावणमासस्य शुद्धपक्षे तृतीयायां महोत्सवो भवति। तस्मिन् दिने बालकाः कन्याश्चोद्यानेषु दोला दोलयन्ति, सामोदं गायन्ति, नृत्यन्ति च। अस्मिन् मासे मधुरगीतानि गायन्त्यः कामिन्यः सुमधुरध्वनिना कोकिलस्वरमाप्यधरी कुर्वन्ति। सर्वत्र एवैष तृतीयामहोत्सवः सानन्दं क्रियते। मासोऽयं सकलानन्दजनकः। गड़गड़ध्वनिना मूसलाधारेण वर्षन्तो मेघा उत्कण्ठितं मयूरवृन्दं सकेका-रवं कुर्वन्ति। मेघगर्जनबिन्दुपातैश्च जातद्विगुणः शब्दः अट्टालिकानां जलप्रपातैश्चतुर्गुणो भवति। एतादृशे महति शब्दे च वर्षायाः, उच्चशिखराः प्रासादा निश्चलतां नीरवतां च धारयन्ति।

वर्षणानन्तरं राजमार्गेषु महाजना धृतबहुमूल्यवासा भ्रमन्तो दृश्यन्ते। रमणीयो वर्षतु कालः। धन्यश्च श्रावणो मासः। कवयोऽपि स्वमनोविनोदार्थं श्रावण-मासं वर्षाकालञ्च वर्णयामासुः। सकलमासाधिकप्राप्त-प्रमुत्वः खलु श्रावणमासः। अधिकाधिक्येन वर्णितुं शक्यः। मेघाच्छन्नआकाशे सुष्पष्टतयावलोक्यमान-मिन्द्रधनुः कस्य न मनो हरति। शून्ये व्योम्नि सकूजनं भ्रमन्ती श्वेतवर्णा बकपङ्क्तिः अत्यधिकां शोभां बर्धयति। सर्वतो रमणीय इव भाति श्रावणे मासि।

द्वादशसु मासेषु श्रेष्ठोऽयं मासः श्रावणः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★ काव्यस्योपादेयता ★

ले० प्रह्लादचन्द्रशास्त्री, काव्यतीर्थः अध्यापकः, गवर्नमेन्टइन्टर कालेज. डीडवाना (राजस्थान)

आपातरमणीयेऽस्मिन् संसारे समुपजायन्ते ये शरीरभाजः प्राणिनस्तेषां समभिवर्तते वाञ्छा, यद्वयं सर्वदा सुखं समधिगच्छामः कलयामश्चालौकिकामन्दानन्दसंदोहम्। तत्प्राप्त्यै प्रयुञ्जते योगसाधनं योगिनः, भगवन्तं भजन्ति भक्ताः, अधीयते च स्वाध्यायमधीतिनः, एवं विविधप्रकारेण प्रयतन्ते तमधिगन्तुमधिकृता धन्या मानवाः, किन्तु तेष्वास्ते सर्वसुलभं शर्मदं साधनमेकं हृद्यं काव्यमेव। तथा चास्माभिर्मानवशरीरं प्राप्याखिलजीवने सर्वाणि सुखानि वस्तूनि चाधिगम्यापि यदि काव्यरसो नास्वादितस्तदा न लब्धं किमपि रसवत्फलम्। तेन विना च निरर्थकमस्मज्जीवनम्। यथा ह्युक्तं केनापि नीतिकारेणः—

'संसारविषवृक्षस्य द्वे एव रसवत्फले।
काव्यामृतरसास्वादः संगमः सुजनैः सह"

पुनश्च किं तावत् काव्यमिति प्रश्नावसरे तु बहुविधानि काव्यलक्षणानि यथा—अलङ्कारप्रधानयुगे उपर्युपर्येव साहित्यसलिलधिमालोडयद्भिर्दण्डिभामहादिभिः स्वीकृतमलङ्कारसर्वस्वमेव काव्यम्। तत्र च वक्रोक्तिजीवितकारेणोक्तं यत् "वक्रोक्तिः काव्यजीवितम्" "सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते। यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना।" तमेव स्वरं परिपुष्टयता "रीतिरात्मा काव्यस्येति" वामनाचार्येण कथितम्। काव्यप्रकाशस्य रचयिता मम्मटाचार्य आह—"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।" आनन्दवर्धनाचार्येण "काव्यस्यात्मा ध्वनिरि"ति कथयता स्फुटरूपेणाङ्गीकृता वास्तविकता काव्यलक्षणस्य। "रसगङ्गाधर" निर्मात्रा पण्डितराजजगन्नाथेन "रमणीयार्थप्रतिपादकः शब्दः काव्यमि"ति लक्षितम्। यस्य ज्ञानेनालौकिकानन्दानुभूतिर्जायते स एव रमणीयार्थः। एतादृश आनन्दश्चैव काव्ये रसस्तस्य रसस्य प्राधान्यमेव स्वकीयदृष्टिकोणेन स्वीकृतं पण्डितराजेन। आचार्यविश्वनाथेन तदेव समर्थितं—"वाक्यं रसात्मकं काव्यमि"ति। काव्ये १) कल्पना (२ बुद्धि (३) (४) शैलीतत्त्वानां प्राधान्यं स्वीकुर्वद्भिः पाश्चात्याचार्यैरपि रसस्य प्राधान्यमुररीकृतम्। तथा च 'काव्यं जीवनस्यालोचना' 'Literature is a cirticism of life' मैथ्यू आर्नल्ड।

वेदाध्ययनादिके च सति किं प्रयोजनं काव्यस्येति विदधति प्रश्नं प्राश्निकाः, किन्तु तैर्विचारणीयं यद् प्रकृष्टबुद्धिप्रागल्भ्येन बोधनीयं वेदशास्त्रं कथमवबोद्धुं शक्ष्यन्ति सुकुमारमतयः कुसुमसुकुमाराः कुमाराः। काव्येन च सुखादेवाल्पधियां भगवच्चरणारविन्दस्तवनादिकेन केषाञ्चित् भूललामभूतानां भूपतीनां धनवताञ्च प्रशंसायां प्रस्तुतश्लोकादिभिर्धर्मार्थौ भवतो हस्तगतावर्थाच्च सुलभा एव कामप्राप्तिः। एवञ्च कल्पितकाव्यकलया मोक्षं समुपलब्धुं निरतिशयसुखास्वादपूर्वकं शक्नुवन्ति मोक्षाभिकामुकाः काव्यकर्तारः। अन्यथात्वे तु नानाविधकष्टपूर्वकमविरलपरिश्रमेण, अतीते च बहुकाले कथञ्चित्तमलौकिकानन्दमनुभवितुं शक्ता भवन्ति।

काव्यरचना च नहि सुगमा सर्वेषां कृते, किन्तु पूर्वजन्मोपार्जितपुण्यैनैवास्य रचनां विधातुं समर्थ



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भवति जनस्तथाप्युक्तम्–"कवित्वं दुर्लभं लोके शक्तिस्तत्र सुदुर्लभा" किन्त्वस्य पठनं पाठनञ्च सरलतमम्।

केषाञ्चिन्मते स्वान्तसुखायैव पठ्यते; जायते सृज्यते च काव्यम् 'Art for art's sake कला कलायै" किन्तु टाल्सटायकथनस्याशयः—"बौद्धिकक्षेत्राद् मानसिकक्षेत्रे तस्य सत्यस्य स्थापनं, यस्य चोद्देश्यं मनुष्यमात्रे कल्याणप्रदायिनीमेकतां स्थापयित्वा भगवतः प्रेमपूर्णशासनस्य स्थिरीकरणमेवेति साहित्यस्योद्देश्यम्।" "And above all it is not pleasure, but it is means of union among men, joining them together in the same feelings and indispensable for the life and progress towards well-being of individuals and humanity" अर्थाद् कला न केवलानन्दस्य कृते अपि तु मानवानामेकतायै, साधनरूपेण च व्यक्तेर्मानवतायाश्च कल्याणाय मानवमात्रं एकरसीकरणमुत्पत्त्यै विकासाय चावश्यकी। भारतीयप्रसिद्धः काव्यप्रकाशो'क्तदिशा "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये, सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे।" रवीन्द्रनाथटैगोरेणोक्तं—"साहित्ये चिरस्थायी भवितव्यमिति"ति मनुष्यप्रियचेष्टा। 'स्वान्तः सुखाय तुलसी रघुनाथगाथा' इति हिन्दीसाहित्याकाशस्य प्रमुखनक्षत्रशिरोमणितुलसीदासोप्याह—किन्तु तस्याप्युद्देश्यं लोकरञ्जनं लोककल्याणमेवेति मानसस्यान्तः साक्ष्येन स्पष्टतया ज्ञायते।

कतिपये ब्रह्मानन्दसहोदरं योगिनामपि च दुर्लभं रसं काव्येनास्वादयन्ति, केचन च पूर्वं कीदृशी दशास्माकं, केन प्रकारेण च कुशलाः कलाकपाले, कस्यामवस्थायां चासीदस्ति चास्मदीयं साहित्यं, कथंभूतश्चेतिहासं भूगोलं विविधविज्ञानमित्यादि ज्ञानार्थमधीयते काव्यशास्त्रम्। अपरे चाकलयन्ति स्वकालयापनायैवैतच्छास्त्रम्।

अतः कारणैरेभिर्महत्युपादेयतेह जगति काव्यशास्त्रस्य, किं बहुना काव्यं हि नाम अयत्नप्राप्यं बन्धुः, सुधाधाराधरीकृतानुपमसास्वाद्यम्, एतद्रसाग्रे शर्करापि कर्कशा, द्राक्षारसोऽपि विरसः।

# वर्षर्तुवर्णनम्

[रचयिता :—प्रह्लादचन्द्रः शास्त्री, काव्यतीर्थम् डीडवाना (राजस्थान)]

बलाहकव्याप्तनभोऽतिसुन्दरं
विलोक्य को वेत्ति न भाविवर्षणम् ?
तथापि शंकाङ्कुरुते हि चातकः
प्रतिज्ञतो विश्वसितीह भिक्षुकः ॥ १ ॥

पयोधराच्छादितमम्बरं चिरम्,
निहृत्य नृत्यन्ति मयूरपङ्क्तयः।
सुखं लभन्ते सकला हि जन्तवः,
प्रशंसनीयानि दिनानि प्रावृषः ॥ २ ॥

विभान्ति वर्षर्तु दिने वनालयः
वहन्ति नद्यः सुजलान्वितास्तथा।
सुनीरसस्यैर्विलसन्ति भूमयः
भवन्ति हृष्टाश्च सदा रकर्षकाः ॥ ३ ॥

क्षणे क्षणे दीप्यति दामिनीप्रभा
यथा नवोढा जलदांशुकान्तरे।
गभीरगर्तेषु च दर्दुरध्वनिः
कथं न कर्णेष्वमृतं निषिञ्चति ? ॥ ४ ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★ एको गुणः खलु निहन्ति समस्तदोषान् ★

( ले० केदारनाथमिश्रः, तहसील फतेहपुर, बाराबंकी )

एतदीयमैतिह्यम् । पुरा परमचिन्तितः परमेष्ठी प्रोवाच प्रविश्य प्रणमन्तं प्रतीहारं 'प्रतीहार ! साम्प्रतं नारी-विरुद्धमत्यधिकं श्रूयते, मन्ये मम कृतिषु निकृष्ट-तमा सा ।'

प्रतीहारः—नारी सुन्दरी भवति भगवन् ।

ब्रह्मा—सुन्दरं तु केवलं तस्याः शरीरमेव भवति । वस्तुतः नारीशरीरं निर्दोषं निर्मातुमहमेतावन्निमग्नोऽ-भवम्, यत्तस्या आत्मविषये मया किञ्चिदप्यवधानं नादायि । साम्प्रतञ्चेदृत्ता अप्रियाः समाचाराः श्रूयन्ते यदेनां जातिं सकृदेव नाशयितुकामोऽस्मि संवृत्तः ।

प्रतीहारः—परन्तु जनाः जनिं कथं लप्स्यन्ते स्वामिन् ?

ब्रह्मा—किं ? जनाः जनिं कथं लप्स्यन्ते ? जनाः समुद्रतरङ्गेभ्यः समुत्पन्नाः भविष्यन्ति; यथैकः यूनानी-कविः वाञ्छति स्म । पठिता मया तस्य कविता २५०० वर्षाणि पूर्वम् ।

प्रतीहारः—सकलभुवनोपदेशदानदक्षस्य भवतः पुरो जिह्वा जिह्वेति मे जल्पितुम्, परन्तु देव ! ......

ब्रह्मा—(विनिवार्य मध्य एव)"प्रतीहार ! मा भैषीः । अहम् नारीजातेरुन्मूलनमेतावत्सत्वरं न करिष्यामि, यादृश्या त्वरया निर्मिता, वर्द्धिता च सा, मया । प्रथमं तावत् श्रोष्यामि यत् किं कथयन्ति जनाः तस्याः विषये यतः लोकतन्त्रयुगेऽस्मिन्, नोपेक्षितुमीहे बहुमतम् । अतएवं त्वं यमलोकं गत्वाचिरमेव ममाज्ञया विज्ञापया-शेषान् आमरणं नारी-विरुद्धान् अन्यान् च सूचय सर्वानपि तत्रत्यान् लोकान् यत् श्वः इयत्यामेव वेला-यामिहैव द्रष्टव्योहं तैरिति । तेषां मतानि ज्ञात्वैव दास्यामि स्वनिर्णयम्" इत्येवमभिहितश्च प्रतीहारः प्रणम्य "कृतमवधारयतु स्वामी समादिष्टम्" इति विज्ञाप्य स्वाम्यादेशसम्पादनाय निर्जगाम ।

अथापरेद्यु रारोहत्युदयाचलं भगवति गभस्तिमत्या-रुरोहासनं ब्रह्मा । अस्मिन्नेवान्तरे अनेके जना एकत्र सञ्जाताः तत्र, नैकविधाः कवयः, महाकवयः, पण्डिताः, आचार्याः, धर्मगुरवः, पोपाः, आर्कबिशपाः ( Arch-bishop ) विशपाः, साधवः, संन्यासिनः, धार्मिक-पुरुषाश्च तत्रोपस्थिता आसन् । ब्रह्मा तान् पश्यन्नाह—"शुश्रूषुरस्म्यत्रभवतां नारी-विषयकान् जीवनानुभवान्, तच्छ्रावयन्त्वत्रभवन्त एकैकशः" इति ।

अथ सर्वप्रथमम् न्यवीविदद्ग्रसरीभूय कुरूपता-प्रतीकः सुकरातः, "भगवन् ! यदाहमात्मानमीश्वर-वद्दिव्यमकरवम् पूजितश्चाभवम् लोकैस्तदा मे पत्नी ममो-परि पुरीषपात्रमाक्षिप्यैव सन्तुष्टाभूदिति" । अत्रान्तर एवावादीदफलातूनोऽपि "एतस्मादेव कारणान्नाहम-शक्नुवम् निर्णेतुं, यदियं नारी-जातिः, मनुष्यजातिषु गणितव्या पशुजातिषु वा ।" तदनन्तरमग्रसरोऽभवद्वि-ख्यातवक्ता डेमास्थनीज उवाच च "अपि जानन्त्यत्र भवन्तः यन्मयैकया बालिकया सह विवाहः किमर्थं कृतः ? अत एव, यद्यपवाद एवाभिलष्यते तर्हि ज्यायान् न्यूनतरः ।" तस्मिन्नेवान्तरे अग्रे आगत्यावादीदरस्तू—"विश्वरहस्यं विज्ञातुं बहुशः विहितो मया प्रयत्नः, किन्तु, एनमेव निष्कर्षं प्राप्तोऽस्मि यन्नास्ति कोऽप्यन्तरः बुद्धिमतीनारीमूर्खपुरुषयोरिति ।"



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



विंतवचसि तस्मिन्निजगाद तत्क्षणमेव वयसा वृद्धोऽपि ज्ञानेन प्रौढः,उत्साहेन च युवा कान्तावः "देव ! ईश्वरसंसर्गः स्त्रीसंसर्गमपहायैव सम्भवतीति न तिरोहितं त्वयापि।"

तदनंतरमग्रसरा अभवन् "स्त्रीष्वपि हृदयं भवती"-त्यस्मिन्विषये क्रासहस्ताः पादर्यः, बिशपाः, आर्कबिशपाश्च। ततः बभाषे बाहुमूर्ध्वीकृत्य निर्दयः तेतूं लियनः, "परमेष्ठिन् ! स्त्रियाः दर्शनमपि पापं मन्ये, किम्पुनः स्पर्शम्?"। अथ प्रतिपन्नमौने तेतूं लियने सिरियनचर्चस्य अधीश ईपराइमः मन्दं मन्दं हसन् प्रणम्य प्रास्तावीत् किंचित्–"भगवन् ! एकदैका नारी माम् वातायनेनापश्यत् प्राक्षीच्च, "भद्रमुख ! अभिलषन्ति किमपि भवन्तः ?" "आम्, प्रभूतवज्रलेपसहिता इष्टिका अभिलषामि पूर्णतः पिधातुमेनं वातायनमिति' कथितम् मया।" अथ समभाषत सन्तः ( Saint ) सिप्रियनः "देव ! नारीगायनापेक्षया मह्यं गर्दभस्वरोप्यधिकं रोचते" इति।

ततः दृग्गोचरीभूताः रेनेसां–रिफार्मकालिकाः जनाः। रावेलनामा कोऽप्याचचक्षे, "भगवन् ! अहं तु नारी-घोटकयोरिदमेवान्तरम्मन्ये, यदेकां दण्डेनापरञ्च वचसा वशीकरोमीति"। अथ शेक्सपियरेणानुगम्यमानः मन्दं स्खलन्, आयातोऽन्धः मिल्टनोऽपि, व्याजहार च–"स्वामिन् ! जनाः स्त्रियं स्थलकमलं कथयन्ति, परन्तु नेत्रहीनः स्थलकमलसौन्दर्यं द्रष्टुमसमर्थोहं तु कण्टकमात्रमनुभवामि" इति कथयित्वा तूष्णीमभवत्। ततः जगाद गम्भीरया गिरा शेक्सपियरः "देव ! स्त्रीणामश्रूणि शक्त्या विपरिणमेरन् चेत्तदा अश्रुबिन्दुतः भयंकराः सर्पा एव जायेरन्" इति।

अथाशीतिवर्षदेशीयः फोन्तैने कथयितुमारेभे, "स्वामिन् ! सकलेऽपि स्वजीवनेऽहं भवतः तिस्रः कृतीः अवगन्तुं नाशक्नुवम्, बाइबिलं, नारीं, संगीतञ्चे-त्यभिधाय तूष्णीमेव समवातिष्ठत । शापेनहावरः अवादीत्, "देव ! मम मते तु स्त्रियाः कचाः यावद् दीर्घाः भवन्ति, बुद्धिः तावती एव वामनी भवतीति । "हैनेनापि समर्थितम्—'न जाने नारी क अन्तमेति, राक्षसश्च कुतः प्रारम्भं प्राप्नोति" इति ।

अथाग्रे आयातः मनु–शंकराचार्य–पंडितराजजगन्नाथ–तुलसीदासादिभिरनुगम्यमानः भारतीयनीतिधुरन्धरः धैर्यधारिधौरेयः कौटिल्यः । ब्रह्मा कौटिल्यमाज्ञापयच्छ्रावयितुं स्वकीयमनुभवम्; स त्ववादीत, "देव ! किं ब्रूमः ?"'असत्यं साहसं माया मात्सर्यं चातिलुब्धता। निर्गुणत्वमशौचत्वं स्त्रीणां दोषाः स्वभावजाः । "

तदनन्तरम् पप्रच्छ परमेष्ठी मुनिवरं मनुं, स आह–"हन्त ! सन्ततमपि नितान्तमेव चेखिद्यतेऽशान्तं भूत्वा मामकीनं स्वान्तम्—

नैताः रूपं परीक्षन्ते नासां वयसि संस्थितिः ।
सुरूपं वा कुरूपं वा पुमानित्येव भुञ्जते ।
पौंश्चल्याच्चलचित्तत्वान्नैस्नेह्याच्च स्वभावतः ।
रक्षिता यत्नतोऽपीह भर्तृष्वेता विकुर्वते ।।"

मनुस्मृति अध्याय ९ श्लो० १४–१५

अथाह भगवान् गौतमः "मम धर्मनाशे स्त्रियः ( भिक्षुण्यः ) एव कारणमिति नास्त्यत्र सन्देहस्य स्तोकोऽपि अवसरः" । इत्यभिधाय विरराम च ।

ततः पृष्टः शंकराचार्यः बभाषे, "भगवन् ! एकदा केनापि मम शिष्येण पृष्टम्—"गुरो ! कृपालो ! कृपया वदैतद् द्वारं किमेकं नरकस्य? 'नारी' मया तत्क्षणमेवोक्तम्। पण्डितराजश्च प्रणम्य—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# श्रीरामार्याशतकम्

## [ नवोपलब्धस्य काव्यस्य-परिचयः ]

( ले० श्रीपीताम्बररावतैलंगः अजयगढ विंध्यप्रदेशीयः )

सुविदितमिदानीमिदं सर्वैः देववाणीसेवकैः यत वर्त्तमानस्य स्वतंत्रभारतवर्षस्य, जनसम्मानप्राप्तेषु समाचारपत्रेषु "भारती" एव संस्कृत-भाषा-रक्षाव्रत-परायणा, प्रचारिका च यथार्थरूपेण राष्ट्रीय-रंगमंचे गीर्वाणवाणीहितस्य। समुपलदयेदं मयापि समुपस्थाप्यते एकस्याऽप्रकाशितस्यातिलघुकायग्रंथस्य परिचयः श्रीमतां सेवायाम्—

---

"त्वया द्वेधा भ्रमश्चक्रे कान्तासु कनकेषु च,।
तासु तेषु अनासक्तः साक्षाद्भर्गो नराकृतिः"।

इति कथयित्वा स्वानुभवम् प्रकटीकृत्य तूष्णीं तस्थौ। अथाह तुलसीदासः, 'देव! किमपि बिभणिषति मे हृदयम्, अपृष्टोऽस्मि मन्दोऽहं हिन्दीकविः, अतएव संक्षेप एव विवक्षामि यत्—

'अवगुन-मूल,सूल-प्रद,प्रमदा सब दुखखानि' इति।

अथाग्रसरोऽभवत्कोपि काषायवासाः करकलितदन्तीन्द्रदन्तदण्डः, भस्मच्छुरितललाटः, रुद्राक्षमालिकासनाथीकृतकण्ठः संन्यासी, उवाच च—"एतान् सर्वान् अपि अबोधान् वक्तृन् क्षमस्व भगवन्। एभिः सर्वैरप्येकत्र स्खलितम्। विस्मारितमेभिः सर्वैरपि यदिमे सर्वेऽपि मातृवन्त आसन्, न जानन्त्येते यत्—

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥"

हा हन्त! मनुरपि स्ववाक्यम् विस्मारयति। महदिदं दौर्भाग्यं मानवजातेः।

---

अस्त्यस्य ग्रंथस्य "श्रीरामार्याशतकमिति" नामास्ति प्रस्तुतग्रन्थे त्वष्टाधिकैकशतार्यासंज्ञकानि छंदांसि। ७×४ इञ्चस्य द्वादश पृष्ठानि च।

ग्रन्थान्ते त्वित्थमेव लिखितम्–'इति श्रीविद्वन्मुकुट महामुद्गलभट्टविरचितमष्टाधिकं श्रीरामार्याशतकम्।'

एतदतिरिक्तं स्वरचितकाव्यसौष्ठवदिशि संकेतं कुर्वता प्रतिपादित-विषय-समीक्षणाय विद्वत्सु सानुरोधं कृता प्रार्थना निम्नांकितेन श्लोकेन कविना—

'अति-चमत्कृति-कृत-सरलाशया;
सुकवि-मुद्गल-भट्ट-कृतोदया।
रघुपति स्तुति-युक्ति-सुधामयी,
कृतिरियं कृतिभिः समवेक्ष्यताम्॥

सन्ति ग्रन्थारम्भे श्लोकाः—

( १ )

त्वयि विमुखे मखमुख्ये,
सख्येनाऽन्यस्य कस्य जीवामि।
जीवामि तु भवदर्पित-
वसनाशनमात्रजीवनः सर्वैः॥

( २ )

परितः पश्यसि, परितःशृणोषि,
परितो जगद्विजानासि।
मां-राम किं सदन्त-
र्नेशृणोषि न वीक्षसे न वा वेत्सि॥

( ३ )

जानाति भूप्रसल्पो, नाल्पं जानाति भूप इत्येतद्
उचितं सकलमविज्ञे, सर्वज्ञे त्वय्यदः कथं श्लाघ्यम्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# शर्करा लवणं च

काष्ठफलके एकस्यां कटोरिकायां शर्करा अपरस्यां च कटोरिकायां लवणं रक्षितं आसीत् । भोजनस्य ... अधुना अपि तत्र न समायाताः । भोजनकर्ता-

(४)

... विलसति लिप्सा, दातरि दित्सा तु दूरतोऽपास्ता ।
... कृपणकथेयम्, रमापते राम नोचिता भवति ॥

(५)

... रङ्कमङ्कनिष्ठः प्रार्थयमानोऽर्भको लभेतेष्टम् ।
... जगदुद्भव भवदङ्कगतो लभे न तद्भवतः ॥

(६)

... पाशनिबद्धं, कारागारे कलेवरे निहितम् ।
... न मोचयसि मां त्वं तर्हि स्वात्मनैव मे वृत्तिः ॥

(७)

... चितमिदमेवादौ, श्रीमद्द्वारि स्थितोऽप्यहं दीनः ।
... यति कथं नहि त्वां, मम वृत्तिस्तदनु मानवाधीना ॥

(८)

त्रिभुवन-पालनदीक्षित ! रक्षणशक्तिस्तवाक्षताऽपीमम् ।
सामान्यमिव विशेषं किं मां परिहृत्य सर्वतः स्फुरति ॥

(९)

यदि पुनरपराधानां कोटिभिरन्तर्विषादमायासि ।
... ताडितापि बालैः रुष्यति किमपीह मानुषी जननी ॥

(१०)

... वद राघव तथ्यं, कोपोऽयं केन मदपराधेन ।
... यसे दाशरथे, दशरथपद्योर्यदन्यथा ब्रूषे ॥

उपरि लिखितैः श्लोकैर्यदि भविष्यति श्रीमतां 'भारती ... पाठकानां मनोरंजनं तर्हि त्वहमू समस्तं संप्रेषयिष्यामि ॥

रश्च अन्यस्मिन् प्रकोष्ठे स्थिताः परस्परं विनोदवार्ता कुर्वन्ति स्म ।

शान्तिं दृष्टवा शर्करा वक्तुं लग्ना— 'अहह कीदृशः विकटः समयः समायातः अस्ति, यत् नीचा अपि अधुना उच्चानां समकक्षे स्थिताः भवन्ति ।'

लवणं अपृच्छत्— 'भगिनि शर्करे, कः असौ नीचः अत्र विद्यते ?'

मुखं चलयित्वा शर्करा अवदत्— 'किं त्वं स्वं उच्चं जानासि ?'

लवणं अकथयत्— 'कामं अहं नीचः उच्चो वा भवामि । मां विना त्वां जगति कः अपि न प्रद्यति । ज्ञातम् ।'

शर्करा गर्वेण भर्त्सयन्ती उवाच— 'तूष्णीं भव ! लघुमुखेन महतीं वार्तां करोषि रे । सम्प्रति अचिरेण एव तव स्वरूपं सम्मुखे समागमिष्यति । प्राघुणिकाः आगत्य एव मां प्रथमं स्पृदयन्ति । त्वं च एकस्मिन् कोणे एव पतितः रोदिष्यसि ।'

लवणं अवदत्—भगिनि, स्वरूपं तु तव एव प्रकटीभविष्यति । कथं एतावन्तं गर्वं करोषि । कामं त्वां प्रथमं प्रथमं ते आस्वादयन्ति । परंतु विरक्ताः भूत्वा क्षणेन एव मम आदरं विधास्यन्ति ।

शर्करा अकथयत्— 'तदा तु दुग्धे, मिष्टान्ने, पायसे सर्वत्र त्वं एव अपेक्ष्यसे' तव सहायतां विना किं अपि सिद्धं न भवति, किं एवं एव न ?'

लवणं उवाच - परं तु द्विदले, भाज्यां तु त्वम् एव शोभां वर्धयसि ? तत्र तु मां बिना गोमयवत् सर्वम् ।'



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृतविद्वांसोऽपि जागृयुः

( ले० चण्डीप्रसादशर्मा 'दाधीचः' व्या० सा० सांख्ययोगाचार्यः हिन्दीसाहित्यरत्न
महाराजा श्रीगङ्गासंस्कृत विद्यालय बीकानेर )

इह खलु सत्यानृतरागद्वेषसंयोगवियोगादिद्वन्द्व-दूषिते, आपाततः प्रतीयमानसारेऽपि वस्तुतः साररहिते विरञ्चिप्रपञ्चे भवति समेषामपि जनानां दुःखप्रहाण-पूर्वकं परमसुखावाप्तये सततमुद्योगः। परञ्चाघटितघटी-यस्या भगवत्या मायया वशीभूताः इतस्ततः परिभ्रम्य-माणा अपि न प्राप्नुवन्ति परमानन्दम्। इदानीं यत्रकुत्रापि दृष्टिं प्रक्षिपामस्तत्र सर्वत्रैव स्वकीयया विषमावस्थया क्लिश्यमानानां मानवानामार्तनादाः श्रूयन्ते। पराकाष्ठा-गतान् आर्तनादान् श्रोतुमपि न पारयामः किं पुनः दूरी कर्तुम्।

वैदेशिकपाशशासनोन्मुक्तापि भारतमाता इदानीमपि सुखं नानुभवति। अथवा परमकारुण्यवती भगवती सा कथं सुखिनी भवितुं शक्यते, यस्याः सन्ततिः सम्प्रत्यपि सर्वक्लेशैः तातप्यते, अनुदिनं भारतवर्षं उदरदरीपूर्ति-चिन्तया सन्दूयते, दैनन्दिनमायव्ययन्यूनाधिक्यज्वरेण जर्जरितं सत् कार्श्यं कार्पण्यञ्च नेनीयते। कलियुगेऽ-स्मिन् न व्यापारिवर्गः व्यापारे सुखी, प्रतिदिनं वृद्धिगतस्य करस्य निराकरणाय चिन्तितः सन् रोदिति, न राज्य-सेवकवर्गः समुचितपरिश्रमोपलब्ध्यभावेन प्रसन्नचित्तः। शिक्षिता अशिक्षिताश्च सर्वेऽपि वृत्त्यभावेन। राजमार्गे आहिण्ड्यमानाः पारिवारिकार्थिकचिन्तान्विता, आत्मनो जन्मनैरर्थक्यं मन्यमानाः, विनष्टधैर्या दरीदृश्यन्ते। प्रतिदिनं भिक्षुसंख्या वर्धते, येषां करुणदशां श्रावं श्रावं ग्रावापि रोदिति।

---

शर्करा क्रोधातुरा अभवत्—अरे यदा किंचित् अधिकं कस्यचित् अपि मुखे लगसि, लोकाः 'थू-थू' कृत्वा मुखात् बहिः प्रक्षिपन्ति। मां च मुखे धारयित्वा आस्वादयन्ति। जानासि रे न हि।

लवणं तथैव उत्तरं अदात् मक्षिकाणां संगत्या 'भन्-भन्' इति करणातिरिक्तं त्वया किं भूयते। यत्र यत्र त्वं गच्छसि तत्र तत्र दुर्गन्धदूतिकाः एताः मक्षिकाः प्राप्ता एव। सत्यं वदामि। यदि त्वं न अभविष्यत् जगति तदा एतादृशं दुर्गन्धसाम्राज्यं न अभविष्यत्। न च रोगस्य आधिपत्यं समजनिष्यत। दूरं अपसर अस्मान् अपि दुर्गन्धदुष्टान् करिष्यसि, खंडे।

शर्करा क्रोधेन अरुणमुखी जाता। श्वासस्य गतिश्च वेगवती प्रबला अभवत्। एतस्मिन् एव समये पाचकः शाकस्य पायसस्य च एकैकां कटोरिकां आदाय तत्र समायातः। तत्र तयोः कटोरिकयोः शाके लवणं, पायसे च शर्करां निक्षिप्य स्थाने अस्थापयत्। गते पाचके लवणं शनैः शनैः अवदत्—भगिनि, न जाने मया क्रोधे किं किं उक्तं भवेत्, तत् क्षन्तव्यम्। शर्करा अपि अवदत्—न हि भ्रातः, अपराधः मम एव आसीत्। मया तव अधिकं अपमानं कृतम्। अद्य मम चेतसि समागतं यत् स्थाने स्थाने सर्वे एव उच्चाः नीचाः च भवन्ति। अन्यथा सर्वे जगति समानाः। न कोऽपि नीचः, न कोऽपि च उच्चः अस्ति। आगच्छ द्वौ अपि मिलित्वा संसारस्य सेवां कुर्वः। लोकानां शान्तिं सम्पादयावः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



स्वतन्त्रेऽस्मिन् पवित्रतमे भारतवर्षे अतिगर्हितदशा संस्कृतविदुषां छात्राणाञ्च वर्तते। ये खलु द्विजन्मानः पुरा "एकः शब्दः सम्यक्ज्ञातः सुष्ठुप्रयुक्तः स्वर्गे लोके कामधुक् भवति" इत्येवं लक्ष्यं निर्धार्य अखण्डमपि ब्रह्माण्डं स्वतेजसा वशीचक्रुः, शब्दब्रह्मोपासनया स्वजीवनं सफलयतां ऋषिकल्पानां तेषामग्रे दुष्यन्तप्रमुखा राजानः प्रार्थयन्तिस्म यत् "किञ्चिदुपविश्य कृतार्थं कुर्यु" इति। स्वकर्तव्यैकपरायणानां तत्रभवतां तेषां "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इत्येवं गुरुरादिष्टादर्शमन्तरा नासीत् विषयलालसा अर्थस्पृहा वा।

अथवा कथं न स्यादीदृशी दशा ये निजकर्तव्यविस्मृताः केचित श्रेष्ठिलालाटिकाः, अन्ये घोटकवाहकाः अपरे पण्डितम्मन्या दृश्यन्ते, अत एव स्वकर्तव्यपरिच्युतानां जीविकाप्राप्तये इतस्ततः अटाट्यमानानां विचरतां निस्तेजोमुखानि दर्शं दर्शं पाश्चात्यवेशभूषया अलङ्कृतात्मानः आधुनिकाः भारतीयाः हास्येन उपहासयन्ति।

एतस्या अवनतेः प्रमुखकारणमस्माकं मते विद्यते एतस्याः स्वस्याः जननन्याः संस्कृतभाषाया उपेक्षासेवानिराकरणमेव। यदीच्छन्ति स्वेषां समुद्धारं तर्हि संस्कृतविदुषामेकमात्रं कर्तव्यमिदमेवावगच्छन्ते यत्ते स्फोटवादादिषु शुष्कवादेषु निजरक्तशोषणं ... , परित्यज्य च प्रकाण्डपाण्डित्यलोभं भारतस्य निर्माणे स्वप्रतिभां नियोजयेयुः "एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चारित्र्यं शिक्षेरन् पृथिव्यां सर्वमानवाः" इति मनोराज्ञां प्रचारयन्तः समस्तेऽपि ... निजसंस्कृतेः संस्कृतस्य च रक्षणाय भारतीयां ... स्वतन्त्रताकामान्दोलयत। विलोकयन्त्वद्य निम्नजातीया अपि सत्याग्रहेणानशनेन च निजमनोरथं सफलीकृत्य हृष्टमानसा विचरन्ति। परं चाद्यापि संस्कृतज्ञास्तु "बुद्धू"-पदवचनीयतां विन्दन्त एवेति हा हन्त।

सर्वेऽपि संस्कृतविद्वांसश्छात्राश्च यदि संभूय स्वजनन्याः प्रचाराय प्रसाराय च कटिबद्धाः स्युस्तर्हि मन्ये अविलम्बेनैव समुद्धारो भवितुं शक्यते। परं स्वपरिणाममविचारयन्तः येन केनाप्युपायेन स्वजीविकासंचालनाय यतन्ते। फक्किकारटनेन परिभ्रष्टमस्तिष्कानामेतेषां मनसि नोदेति राष्ट्रीयभावः सुरसरस्वत्याः प्रचारभावः वा।

ते न जानन्ति यत् यस्याः भगवत्याः समाराधनेनैवाद्य वयं बुद्धिबलवन्तः सन्तः निजकुटुम्बपालनक्षमाः दक्षाश्च स्मः सैवाद्य दैवी वाक् कालस्य दौरात्म्यात लोकानां अश्रद्धया अध्येतॄणां बुद्धिमान्द्यात् क्रमशोऽपचीयमानावयवा विलोक्यते जगतीतले। एतस्या अध्यापनाध्ययनमन्तरा पवित्रतमस्य भारतवर्षस्य चिरन्तनं गौरवं सभ्यता च न व्यपदेष्टुं शक्यते अस्माभिः।

अतो यदि वाञ्छन्ति भारतीया विद्वांसः स्वसंस्कृतिरक्षां तर्हि भारतशत्रूणामनार्याणामुन्मूलने बुद्धिवैभवं प्रसार्य दीनदीनाया एतस्याः सुरसरस्वत्याः प्रचारकरणे हार्दिकं प्रयत्नमाचरत। न च खलु अध्येतृपरम्परां विहाय अन्यः कश्चनोपायः प्रचारस्यास्माकं पार्श्वे वर्वर्ति। अध्ययनमध्यापनं चेदानीं सर्वत्रैव भारते दुरूहानां पाणिनिग्रन्थानां न्यायग्रन्थानाञ्च संचलति। द्वादशवर्षसाध्यमध्ययनमिदं दृष्ट्वैव भाग्यवशादुपपन्नदारिद्र्येण चोपहतः विशेषतश्च परिणामकालिकं वृत्त्यभावरूपं फलं विचारयन् अध्यापनमध्य एव सञ्जातवैरस्योऽधीती एतदध्ययनात् विरमति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



श्रीतः तत्प्रचारैकतानमतीनां विचक्षणानां कर्तव्यं यत् क्रान्तदर्शिभिः महर्षिभिः प्रणीतानां सर्वत्र समादरं प्राप्तानां व्याकरणदार्शनिकग्रन्थानां छायामाश्रित्य सरलान् ग्रन्थान् रचयेयुः । एतेषाञ्च सरलग्रन्थानां वैज्ञानिकरीत्या अध्यापनद्वारा संस्कृते संजातरुचीन् छात्रान् सम्पादयेयुः । एतदध्ययनानन्तरं प्रौढग्रन्थानामध्यापनेऽपि असंख्याः छात्राः स्वत एव कामं प्रवर्तेरन् । इत्थं पठनपाठनप्रणाल्या अस्माकं छात्राणां सर्वत्र समादरं पश्यन्तो वयमपि स्वकीयं परिश्रमं सफलं मन्यमाना अवश्यमेव सन्तुष्टान्तरंगाः भविष्याम एवेति नास्ति सन्देहावसरः ।

नेदानीं पश्चात्तापकालः, परञ्च आवश्यकता विद्यते यत् पैतृकं नेतृत्वं अङ्गीकृत्य आलस्यस्य संकोचस्य दीर्घसूत्रितायाश्च त्यागं विधाय विनष्टीकृताया अस्या न केवलं संरक्षणाय अपितु निखिलेऽपि ब्रह्माण्डमण्डले पुनः प्रचाराय चिरकालसमायातां नैजीं निद्रां परित्यज्य संस्कृतभाषाया घोरशत्रुभिः साकं योद्धुं सन्नद्धा उत्तिष्ठत । साम्प्रतमपि अवशिष्यते भवतां कृते कालः ।

"सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता ।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः ॥"

इति कविसम्राट्भवभूतिडिंडिममविस्मृत्य यत्र कुत्रापि सांस्कृतिकमहासम्मेलनं भवेत् तत्र सर्वत्रैव निजान् भव्यान् आदर्शान् प्रचारयन्तो बहिः समागच्छन्तु भवन्तः । नेदानीं समयो निजकुटीरे उपविश्य ग्रन्थमननस्येति निश्चयेन विज्ञातव्यम् । न वा शासकादिभ्यो गालिप्रदानेन, निन्दया च न किमपि सेत्स्यति । न केवलं संस्कृतविद्वांस एव अपि तु ये अन्तेवासिनोऽपि "त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः" इत्येवं आदर्शेन निजान् परिचाययन्तः सफलतायै प्रयत्नमाचरेयुः । निजयैव वेषभूषया प्रौढिमय्या च योग्यतया निखिलान् पाश्चात्यभाषाभाषिणः छात्रान् भर्त्सयेयुः । कालोऽस्ति नायं शयनस्य मान्याः इति निश्चित्य सर्वथा पवित्रतमेऽस्मिन् कर्मणि निजसाहाय्यं प्रदाय प्राक्कालिकान् आदर्शान् प्राकट्यं नयेयुः ।

इदानीं नैकोऽपि सुरसरस्वत्याः समाराधनं याथातथ्येन विदधाति । प्रकाण्डैर्विद्वद्भिः स्मर्तव्यमिदं यत् नास्ति प्राक्तनकाले कुम्भीधान्यानां भूदेवानां पुनीताया अस्याः प्रमुखमुद्देश्यं केवलमर्थोपार्जनमेव, अपि तु "सा विद्या या विमुक्तये" इत्येवं मनसिकृत्य "विद्या ह वै ब्राह्मणमाजगाम गोपाय मां शेवधिष्टेऽहमस्मि" इति निजकर्तव्यं पालयन्ति स्म ।

विश्वसिमि—यदनयैव रीत्या एतस्याः प्रचारं वयमपि ।

आर्यजन मानसभवन जिसकी उतारें आरती।
भगवान भारतवर्ष में गूंजे हमारी भारती॥

इति सिद्धान्तं निर्द्धार्य, परित्यज्य च निजान् सर्वान् स्वार्थमयान् व्यवसायान् अग्रे भवेम तर्हि अवश्यमेव परमानन्दं प्राप्स्यामः । किन्त्वद्य न कोऽपि निःस्वार्थभावनया यतते, अन्यथा कथं बहुमूल्यसाध्यानामनेकेषां सांस्कृतिकमहासम्मेलनानां वैयर्थ्यं स्यात । परञ्च यदि यत्र कुत्राप्येकत्रिता भवन्ति तत्र सर्वत्रैव निजपाण्डित्यप्रकटनम्, परदोषोपबृंहणम्, सम्मेलनाय याचितार्थेनैव निजहर्म्यनिर्माणमित्यादिकर्माणि कुर्वन्तो दृश्यन्ते प्रत्यक्षेण । अन्यथा वयमेव कथं दरिद्रनारायणसमुपासकाः, कथञ्चैते पण्डितम्मन्याः धनिकाः इति मात्सर्यमुत्सार्य विचारणीयं संस्कृतविद्वद्भिः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# परमेश्वरः

(ले० स्वामी लक्ष्मणशास्त्री संस्कृतविद्यालयाऽध्यक्षः, नागौर (मारवाड़) राजस्थान)

श्रूयते, पुरा बभूव कोऽपि विष्णुमित्रो नाम द्विजः कस्मिंश्चिन्नगरे । स श्रीविष्णुभक्तः शास्त्ररहस्यवित् सततं परमेश्वरभक्तिप्रवणश्चासीत् । स गृहस्थो यथालाभसन्तुष्टः सततं सच्छास्त्रविमर्शतत्परश्चाभवत् । तस्य हरिमित्रो नामासीत्सुतः । स बाल्यकालत आरभ्य पञ्चदशवर्षपर्यन्तं स्वपितुरेव विद्यामधीतवान् । किञ्च स सततं पितृशिक्षया सुशीलोऽध्यात्मज्ञानविचारे विशेषतः प्रवीणो जातश्च ।

अथ कदाचित् पिता स्वपुत्रं गणितादिवार्त्ताविद्यासु शिक्षितं विधातुं तमादायैकस्यां तत्प्रदेशेऽतिविश्रुतायां राजकीयविद्याशालायामगमत् । तस्या विद्याशालाया मुख्योऽध्यापकः शिवदत्ताभिधो विष्णुमित्रस्य चिरपरिचितो मित्रं चासीत् । अतः स विष्णुमित्रमागतं दृष्ट्वा अभिगम्य सत्कृत्य च तमेकस्यां सन्निहितायामासन्द्यामुपवेशयामास । हरिमित्रोऽपि तं मुख्याध्यापकं सविनयं प्रणम्य स्वपितुर्निकट एवोपविवेश । आगमनकारणं विदित्वा विष्णुमित्रस्य पुत्रं हरिमित्रं स्वसमीपमाहूय विहस्य च मुख्याध्यापकोऽवोचत्—

हरिमित्र ! तव पिता सर्वदैव ममाग्रतोऽध्यात्मज्ञानविषये तव प्रशंसां कुरुते । अहमपि तद्वचो लेशतोऽपि मृषा न मन्ये । किन्त्वं मत्कृतस्य प्रश्नत्रितयस्योत्तरं सम्यक् प्रदातुं शक्ष्यसि ? यत् परमेश्वरः कुत्रास्ति ? परमेश्वरः किं जानाति ? परमेश्वरः किं करोति ? एतद्विषये यत्त्वया पितुः सकाशादधीतं, तद्वयं श्रोतुमुत्सुकाः स्मः ।

हरिमित्रोऽपि तेन मुख्याध्यापकेन कृतस्य प्रश्नत्रितयस्योत्तरं विवक्षुस्तमेवं सहसैव प्रतिपृष्टवान्—श्रीमन्तः ! मदीयं धाष्ट्र्यं बालभावसुलभं चाञ्चल्यं च क्षान्त्वा भवन्तः प्रथमं मत्कृतस्याल्पीयसः प्रश्नत्रयस्य, उत्तरप्रदानायानुग्रहं कुर्वन्तु । 'यत् परमेश्वरः कुत्र नास्ति ? परमेश्वरः किं न जानाति? परमेश्वरः किं न करोति ?' एते मम प्रश्ना भवद्भिः कृतानां त्रयाणां प्रश्नानां सर्वथोपयुक्तोत्तरप्रदाने नूनं स्वयमेव शक्ता भविष्यन्तीति द्रढीयान् मे विश्वासः ।

इति निशम्य तस्य बालकस्य वचनं मुख्योऽध्यापकोऽपरे च तत्रोपस्थिता महान्तो जना विस्मिताश्चकिताश्चासन् । किमपि प्रतिवक्तुमशक्नुवन्तश्च ते तं बालकं तत्पितरं च धन्यवादैः संवर्धयामासुः । मुख्योऽध्यापकोऽन्ये च तत्रोपसङ्गता महान्तो जनास्तस्य बालकस्य बुद्धेर्मुहुर्मुहुः प्रशंसां कुर्वन्तः स्वे स्वे कर्मणि व्यापृता बभूवुः ।

---

विश्वसिमि यत् - सर्वेऽपि भारतीयाः संस्कृतविद्वांसश्छात्राश्च निश्चयेन पौर्वापर्यं सम्यगतिञ्च निश्चित्य झटित्येव क्रियान्वितकार्यकरणाय सज्जाः भविष्यन्तीति । लेखेऽस्मिन्—मदीयो नाक्षेपः कंचन विद्वांसं प्रति, केवलं पञ्चदशवर्षपर्यन्तमतितपता संस्कृतस्य प्रौढान् ग्रन्थान् अधीत्यापि सन्तोषमप्राप्नुवता मयका, संस्कृतछात्राणाञ्चेद नींतनीं विषमदशामवलोक्य उद्गाराः समेषामपि विदुषामग्रे प्रकटीकृताः । आशासे च मदीयस्यास्य मनोरथस्य सफलतायै सर्वेऽपि संस्कृतप्रेमाणः प्रयासं विधास्यन्तीति । शिवम् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# आत्मबलिदानम्

( ले० हरगोविन्दपाराशरः, शास्त्री, काव्यतीर्थ, साहित्यरत्नम् )

सवेगँश्चलन्मारुतवद् गतिमान् वीरभानुः महाकान्तारं प्राप। पथि प्रचलतस्तस्य मनः राज्यसत्तां प्रत्यत्यन्तमुद्विग्नं तथा देशरक्षणार्थमतीवोत्सुकमासीत्। यतोऽलीशाहः तत्कालीनः नृपः ( बादशाहः ) क्रूरो नृशंसश्चावर्तत। सः वैदेशिकः मर्त्य आसीद्येनार्यावर्तमाक्रम्य स्वराज्यं विस्तारितम्। यदा सोऽस्मिन्देश आगमत्तदा कोटिशः पुरुषान् करालकालग्रासांश्चक्रे। देवालयान् भूमिसात्कृतवान्, प्रजाश्च कठोरशासने बबन्ध। तस्येच्छा हिन्दुसंस्कृतिं विनाश्य क्षत्रियत्वस्यामूलोत्पाटनरूपासीत्। वीरभानुः तस्यालीशाहस्य सचिवोऽवर्तत। यदा राज्ञा हिन्दुप्रजादमनार्थं पादावुत्थापितौ तदा मातृभूमेः स्वातन्त्र्यप्रियो भारतप्राणः, नितरां प्रशंसनीयः सः ( वीरभानुः ) विरोधमकरोत्। एतज्ज्ञात्वालीशाहेन तस्य राज्यनिष्कासनं व्यधायि। सोऽप्यात्मगौरववान् स्वदेशरक्षणाय कृतप्रणः राज्यतः बहिर्गत्वा भारतीयान्विबोधयामास। उपविष्टाश्च ते जनाः विदेशीयालीशाहस्य राज्यविनाशाय। एतच्छ्रुत्वा राजा स स्वपृतनां वीरभानुनिबन्धनायाज्ञाञ्चक्रे। वीरभानुः स्वघोटकमारुह्य सवेगं पलायितवान्, किन्तु राजसैनिकाः तस्य पृष्ठधाविनोऽभूवन्, यदा वीरः सः नगराद्बहिः बभूव, तदा तेन ते राज्यसेवकाः वेतनलुब्धकाः सपराक्रमं पराजिताः। तदनन्तरं सिंहशूकरव्याघ्रव्याप्तं भयावहमसौख्यकरमरण्यं प्रविवेश।

राजालीशाहः वीरभानोः पराक्रममाकर्ण्यातीव चिन्ताज्वालाव्याप्तः सँस्तस्य हननाय महतः प्रयत्नानकरोत्, किन्तु वीरभानोरन्वेषणे सोऽसफलोऽभवत्।

वीरभानुररण्यं प्राप्य तत्रस्थान्वनचरान् स्वसंघटनशक्त्या एकत्रीकृतवान्। आवश्यकसामग्रीणामभावात्ते पाषाणायसादिखनिजकर्कशपदार्थेभ्यः शस्त्रास्त्राणि व्यरचयन्। तदा स्वनामधन्यः पूर्णोत्साही सः वीरभानुः वनचराञ्जगाद—"अयि भारतादिवासिनः! साम्प्रतमयम्भारतः विदेशीयैः मुगलैः पदाक्रान्तः। तैरस्माकं धर्मः संस्कृतिश्च निःशेषङ्क्रियते। ते अस्मान् प्रपीडयन्ति, दुःखं ददति। अस्माकं ग्रन्थान्वेदपुराणादीन्नाशयन्ति, देवालयान् भारतवैभवञ्च ध्वंसयन्ति। अनेन प्रकारेण ते हिन्दुसनातनधर्मं समूलं विनाश्य भारतं स्वभोगभूमिञ्चिकीर्षन्ति। दशायामस्यामस्माभिः स्वधर्ममौलिभूतस्य शास्त्रस्य गीतोक्तभगवद्वाक्यस्य "स्वधर्मे निधनं श्रेयः, परधर्मो भयावहः" इत्येतस्य सक्रियमनुसरणं विधेयम्। एतदर्थे यद्यस्माकं जीवनानि नश्यन्तु, तर्ह्यपि नैव चिन्ता विधेयापि तु स्वदेशधर्मरक्षायै—प्राणोत्सर्गोऽपि विधेयः। अस्माभी राणाप्रताप--शिवाजी--प्रभृतयः स्वपूर्वजाः न कदापि विस्मर्तव्याः, यैः देशधर्मरक्षणे विदेशीयसत्तानिष्कासनाय च स्वप्राणा अप्युत्सृष्टाः। राज्ञोऽलीशाहस्यात्याचारः चरमसीमां प्राप्तः। सः हिन्दुजनपदं निःशेषं विधाय भारते स्वाकण्टकं राज्यमभिलषति। परञ्चास्माकमत्रं नितान्त कर्तव्यं यद्यावद्वयं जीविताः स्मः तावदियं पुण्यभूमिः विदेशीयां परतन्त्रतां नानुवर्तयिष्यति। अतएव पूर्णतः सन्नद्धाः सबलाः वयं इव एवालीशाहस्य राजधानीं हस्तिनापुरमाक्रम्य, पूर्णशक्त्या युद्धं करिष्यामस्तथा भारतमखण्डं स्वतन्त्रञ्च विधास्यामः।"



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



एतन्निश्चयानुसारं सेनापतिः महावीरः वीरभानुः लक्षाधिपूर्णं दशसहस्रपरिमितमादिवासिनां सैन्यमादा- ...शाहस्य दुर्गमाचक्राम। एतदाक्रमणमाकर्ण्य सो ...व भयभीतः बभूव, किन्तु द्वितीयक्षण एवोत्साहं ...या लक्षपरिमितां स्वपृतनां युद्धार्थमादिदेश।

हस्तिरथाश्वारोहिणः पदातयश्च सशस्त्रकाः लौह- ...रास्त्राणयुक्ताः मांसभक्षणेन पुष्टशरीराः नृशंसा- ...यवनसैनिकाः युद्धार्थमधावन्। ते स्वशक्ति-गर्विताः मिथ ऊचुः—"अशक्तानज्ञातसमरकौशलान् कृष्णाकृतिमतः तान्वयं वै हनिष्यामः क्षणार्धे। ते न सन्त्यस्मत्सदृशाः वीराः" इति। अत्र वीरभानुना संघटिता उत्साहिता आदिवासिनः बहुपदातयः प्रस्तरलौहादिनिर्मितशस्त्रयुक्ताः कर्कशकृष्णाकृतयः सन्तोऽपि यशश्शुभाः, शाकान्नादिनिर्मांसभोजिनोऽपि शक्तिमन्तः पुष्टशरीराः, वाहनादिरहिताः सन्तोऽपि स्वमातृभूमौ प्रेम्णा विचरन्तः दुष्प्रापपराजयाः, नवलकोमलहृदया अपि शत्रुविनाशने निर्दयाः दक्षाश्चासन्।


# दी ओरिएण्ट पेपर मिल्स लि०

निर्माता

**पैकिंग के लिए :**

(क) एम० जी० रिब्ड क्राफ्ट
(ख) एम० एफ० अनरिब्ड क्राफ्ट
(ग) वाटरप्रूफ क्रैफ्ट
(घ) क्रीप क्रैफ्ट

**लिखने और छपाई के लिए :**

(क) ह्वाइट प्रिण्टिग
(ख) क्रीम – लेड
(ग) सेमी – ब्लीच्ड
(घ) अनब्लीच्ड

**पैकिंग और रैपिंग के लिए**

ब्राउन रैटिंग

**बाक्स, कार्टन्स आदि बनाने के लिए**

(क) कार्टन बोर्ड
(ख) एम० जी० ग्रे बोर्ड
(ग) एम० एफ० ग्रे बोर्ड
(घ) ट्रीप्लेक्स
(च) डुप्लेक्स
(छ) कार्टिज
(ज) टिकेट बोर्ड
(झ) कवर बोर्ड

## ओरिएण्ट पेपर मिल्स लि०

मैनेजिंग एजेण्ट्स बिरला ब्रदर्स लि०

८, रायल एक्सचेंज प्लेस, कलकत्ता–१

ओरिएण्ट पेपर आपकी और आपके उद्योग की सेवा करता है




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वर्तमानदिल्लीनगरतः गव्यूतिदूरं तयोः सैन्यद्वययोः युद्धमभूत्। यद्यपि भारतीयसैनिकाः क्षत्रियाः दशसहस्रपरिमिताः, यवनाश्च लक्षसंख्यका अवर्तन्त, तथापि ते आदिवासिनः सोत्साहं पराक्रमपूर्वकं युयुधिरे। यवनानां संख्याधिक्याद् युद्धोपकरणानाञ्च बाहुल्याद्भारतीयानां सैन्यक्षतिरधिका जाता—अतः उत्साहरहिताः प्राणरक्षणतत्परास्ते समराङ्गणं विहाय प्रधावितवन्तः। तानेवं कायरोचितकृत्यविधायकान् धावनतत्परान् स्वयोद्धॄन् दृष्ट्वा वीरभानुः हस्तमुद्यम्य स्वसैन्यध्वजमुत्थाप्य प्रोवाच "भोः भोः !! स्वदेशरक्षणतत्पराः भारतमातुष्पुत्राः। स्वकर्तव्ये किमिदं कार्पण्यं क्रियते भवद्भिः। इदं धर्मरूपयुद्धक्षेत्रं न प्राप्यते सर्वैः। किं भवन्तः स्वदेशस्य महत्तामपहाय स्वपूर्वजान्न कलङ्कयथ ? जीवनमिदन्तु क्षणभंगुरमतः एतान वराकान् प्राणान् रक्षयितु भवन्तः स्वकर्तव्यपराङ्मुखाः मा भवथ। स्वबले ईश्वरे च विश्वासं कुरुत। भवन्तः श्रीरामानन्दिनां वंशजाः ये कदापि स्वकर्तव्यानि न तत्यजुः। यथा लघुतृणसंघटनेन निर्मिता रज्जुः हस्तिबन्धनाय प्रभवति, तथैव यदि भवन्तः संघटिताः संभूय पूर्णशक्त्या युद्धङ्करिष्यन्ति, तर्हीदं सुनिश्चितं यद्विजयमाला भवद्गले एव विलसिष्यति। अतः मा भयं कुरुत, तथा पूर्णोत्साहेन शक्त्या च स्वरिपून् हत।"

एतान् वीरभानुमुखान्निसृताञ्छब्दानाकर्ण्य पुनरुत्साहितमानसाः विजयप्राप्तिनिश्चयोत्फुल्लहृदयाः ते भारतीयाः योद्धारः तत्क्षणमेव परावर्त्य पूर्णसंघेन शक्त्या च युयुधिरे। तेषामविरतेन युद्धेन त्यक्तोत्साहाः यवनाः आदिवासिसैनिकैर्मरणं प्रापुः। वीरभानुरपि स्वपृतनाकौशलं विजयञ्च पर्यालोच्य भारतस्वतन्त्रतायै विवृद्धोत्साहः अलीशाहेन सह युद्धञ्चकार। सहसा वीरभानुः स्वाश्वमलीशाहस्य गजे उत्प्लाव्य तत्क्षणमेव स्वकरवालेन तस्य शिरश्चिच्छेद, तेन सः पञ्चत्वमवाप। किन्तु द्वितीयक्षणे स आत्मानं यवनसैनिकैः परिवृतं प्राप। एकेन सतापि वीरभानुना नैकाः यवनाः कालकवलिताः कृतास्तथापि अनवधानेन पृष्ठतः आगच्छन् यवनखड्गस्तस्य शिरश्छेदनं चक्रे।

तत्क्षणमेव भारतीययुद्धार्थिनः युद्धं कुर्वन्तः तत्राजग्मुः। स्वदेवरूपं देशप्रेम्णः साक्षाद्रूपं यवनकृतन्निष्प्राणं तं दृष्ट्वा विवृद्धमन्यवस्ते यवनानतीव निर्दयतया जघ्नुः। अनेनाऽऽगतविजयकामना स्वपालकरहिता यवनसेना युद्धक्षेत्रात्पलायिता। भारतीयाः तानवशिष्टानपि शत्रून् हत्वा आर्यध्वजं हस्तिनापुरे राजप्रासादे संस्थाप्य तदग्रे वीरभानोः गुणान्संस्मरन्तः तम्प्रति श्रद्धाञ्जलीन् अर्पितवन्तः।

फ़ीनिक्स मिल्स लिमिटेड़
मुद्रणम् (प्रिंट्स) सूत्रजालकानि च (Lenos)
डॉन मिल्स कंपनी लिमिटेड़
सीवनदोरकाणि (स्यूइङ्ग थ्रेड) एवं परिधानीयवस्त्राणि (होजरी)
ब्रेडबरी मिल्स लिमिटेड़
उपरिपरिधानवस्त्रम् (कोटिंग) परिधानीयम् (शर्टिंग)
श्वतीकृतं लम्बवस्त्रम् (ब्लीच्ड लांग क्लाथ)
अभिकर्त्तारः (एजेंट)
रामनारायण सन्स लिमिटेड़,
इम्पीरियल बैंक बिल्डिंग बैंक स्ट्रीट
बम्बई १



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## म्पादकीयम्

### महाराजप्रमुखस्य महाराणाभूपालसिंहमहोदयस्य

सानम्—राजस्थानीयमहाराजप्रमुखस्य उदयपुरा- श्रीमहाराणाभूपालसिंहमहोदयस्य '४ जुलाई आयुषः एकसप्ततितमे वत्सरे) मध्याह्नसमये सानमभूत्। गतेभ्यश्चतुर्दिवसेभ्यो महाराणामहा- मूत्राशयपीडया क्लिष्टोऽभूत। ४ जुलाईदिनस्य शस्त्रचिकित्सा कृताऽभवत्, किन्तु एकवादन- नानायत्नैरपि पीडानिवृत्तिर्नाभूत्, अपि तु तेरवरोधेन मृत्युरेव समभवत्। अमङ्गलसमा- नेन न केवलं मेवाडप्रदेश एव अपि तु समग्रमेव स्थानं शोकाकुलम- । राजस्थानस्य मन्त्री सुखाडिया- वायुयानद्वारा उदयपुरमगात्, हि महाराणामहा- शवसंस्कार- समिलत् । जयपुरराजधान्यां शोक- चारे प्राप्ते एव राजकीयभवनानां ध्वजानि नतान्यभवन् । ५ तारिकायां सर्वेपि कार्यालयाः नरुद्धा अभूवन्।

महाराणामहोदयेन १९३० तमे खिष्टीयवत्सरे पुरराज्यस्य शासनभारोऽङ्गीकृतोभूत्। महाराणा- यो महोदारप्रकृतिरासीत्। अतएव जनतायां भूयो प्रियोभवन्महाभागः। श्रीमतो दानौदार्यमालोक्यैव शासनकेन्द्रात्प्रतिवर्षं पञ्चलक्षमुद्रा अधिकं प्रदीयन्ते स्म। वर्तमानकाले भारतीयेषु राजसु श्रीमानेव सर्वथा ज्येष्ठोऽभूत्। महाभागस्यास्य युवराजः साम्प्रतं ३४ वर्षवयस्कः। महाराणामहोदयस्य स्वर्गवासेन राजस्थान-प्रान्ते महान् विषादोऽभवत्। स्थानस्थानतः शोक-संदेशाः प्राहीयन्त। महाराजप्रमुखस्य देहावसानेन शोकसंतप्तो गृहमन्त्री श्रीरामकिशोरव्यासमहोदय आकाशवाण्या शोकसहानुभूतिं प्रासारयत्। राजस्थानस्य राजकीयविज्ञप्तेरनुसारम् सोयं शोक-विषादः सप्ताहं यावत् संमान्येत। अर्थात् १० जुलाईदिवसं यावत् सार्वजनिकः कोऽप्यामोदः प्रमोदो न प्रभवेत्प्रकटम्। स्वर्गतस्य महाराणामहोदयस्य शाश्वतीं शान्तिं, तत्परिवारे च सन्ततमनामयं चराचरनायकात्प्रार्थयामहे।

श्रीयुत स्वामी सोमेश्वरानन्दजी 'भारती' बीकानेर धूणीनाथ पंचायत मन्दिर के महन्त हैं। आपने ५०१) रुपया देकर भारती का संरक्षकत्व स्वीकार करने का आश्वासन दिया है।

—व्यवस्थापक

**'संस्कृतवाग्विवर्द्धिन्यां' गुरुपूर्णिमा-महोत्सवः**—१८-७-५५ दिवसे 'संस्कृतवाग्विवर्द्धिनी' परिषदो गुरुपूर्णिमामहोत्सवोऽस्मिन्नपि वर्षे सानन्दं समपद्यत। सभापतिरासीदासां पङ्क्तीनां लेखकः सोयं 'भारती' सम्पादकः। नवीनया संस्कृतगीत्या पं० श्रीवेणीमाधव-धर्माधिकारिणा श्रीसरस्वतीवन्दनायां सुस्वरमभिगीतायां प्रारम्भोऽभवत् सभायाः। शाहपुरा संस्कृतपाठशालाध्यक्षेण पं० श्रीदेवकीनन्दनशास्त्रिणा संस्कृतभाषायाः सर्वपाठ्यत्वं, सरलत्वं च साधु समीरितम्। ततो 'महाराजाकालेजस्य' संस्कृतस्य प्रधानमहाध्यापकेन (प्रोफे०) श्री पी० एल० भार्गवमहाभागेन गुरुपूर्णिमाया विषये सामयिकं समभ्यधीयत। अमाया दिने जायमानस्याऽस्य पूर्णिमामहोत्सवस्याऽपि विषये सविनोदमु–



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



दीरितं यत्—'अन्धकारमय्याममावस्यायामेव प्रकाश-प्रचुरायाः पूर्णिमाया महत्त्वमवगम्यते मनीषिभिरिति ।'

ततो भट्टश्रीकलानाथशास्त्रिणा भारते वर्तमानां संस्कृतस्य सामयिकीं परिस्थितिं सम्यगावर्ण्य,तत्प्रचाराय पण्डितमण्डलद्वारा सारल्यप्रवर्तनस्य प्रार्थना प्रास्तूयत। ततो महाराजसंस्कृतकालेजाध्यक्ष पं० श्रीचन्द्रशेखर-द्विवेदिमहाभागेन, तथा श्रीइन्द्रलालशास्त्रिमहोदयेन, तथाऽन्यान्यैश्च प्रवक्तृभिरेतद्विषये स्व-स्व-मतानि प्रकटितानि। एतदनन्तरं व्याख्यानवाचस्पतिभिः म० म० पं० श्रीगिरिधरशर्मचतुर्वेदिमहोदयैः संस्कृतशिक्षा-विषये सर्वमपि सामयिकं सम्यक् समभ्यधीयत। श्रीमद्भिरुक्तं यत् संस्कृत-विषयकपाण्डित्यमधिगन्तुं पाणिनीयव्याकरणशिक्षाद्वारेण संस्कृताध्ययनं चिरात् प्रचलितमेव। किन्तु वर्तमानसमये साधारणजनान संस्कृतशिक्षाक्रमे सारल्यसंपादनाय—प्रारम्भत एव सूत्रव्याकरणमनुपादाय अनुवादादिद्वारा सामयिकरीत्या प्रारम्भिकी शिक्षापि प्रवर्तताम्। एतदर्थमवश्यं तादृशानि पाठ्यपुस्तकानि, तदनुकूला अध्यापकाश्च समपेद्यन्ते इत्यादि।

अन्ते सभापतिभाषणे—शिक्षाक्रमे सारल्यसंपादनाद्यावश्यके विषये त्वरितमुपसंहृते, मङ्गलगीति—धन्यवादप्रदानाद्यनन्तरं सभाविसर्जनमभूत्।

**कुरुक्षेत्रे संस्कृतविश्वविद्यालयः**— समुद्रपारंगतानां गौराङ्गाणां देशभाषायाः कृते भारतस्य प्रतिप्रांतमेव प्रायो विश्वविद्यालयाः सन्ति। किन्तु आर्याणां स्वतन्त्रशासनेऽप्यस्मिन्नार्यावर्ते भारतजीवभूतायाः संस्कृतभाषायाः कृते नैकोऽपि स्वरूपोचितो विश्वविद्यालयोऽस्तीति बहोः कालात्संस्कृतसेवकाः शासकान् प्रार्थयन्ते। राजधान्यां देहल्यामेको विश्वविद्यालयो भवेदिति अखिलभारतीयसंस्कृतसाहित्यसम्मेलनस्य द्वाविंशाधिवेशनेऽपि सर्वैः संभूय संप्रार्थितम्। किन्तु सोयमार्याणां मनोरथ-महीरुहः संप्रति प्ररोहाभिमुखोऽपि न दृश्यते।

कुरुक्षेत्रे एको विश्वविद्यालयो भवेदिति बहोः कालात्पूर्वमश्रूयत। एतद्विषये अ० भा० संस्कृतसाहित्य-संमेलनस्य स्थायिमन्त्रिणा पं० श्रीकेदारनाथसारस्वतमहाभागेनाऽपि पुरा स्वागते सूचितमासीत्। संप्रति पञ्जाम्बुसर्वकारेण त्रयोदशसदस्यानामेका समितिर्नियमिता, या हि कुरुक्षेत्रे संस्कृतविश्वविद्यालय-स्थापनसंबन्धे विचारविमर्शं कुर्यात्। एतस्याः परिषदः सभापतिरस्ति पञ्जाम्बुप्रान्तस्य राज्यपालः श्री सी० पी० एन्० सिंहमहोदयः। एतस्या गण्यमान्यसदस्येषु श्रीजगतनारायणमहोदयः (पञ्जाम्बुप्रदेशस्य शिक्षामन्त्री) श्रीउज्वलसिंहः (वित्तमन्त्री), श्रीदीवान आनन्दकुमार-महोदयः [पञ्चाम्बुविश्वविद्यालयस्य उपकुलपतिः] विशेषत उल्लेखनीयाः सन्ति। समितिरियं शीघ्रमेव मङ्गलकार्यमिदं संपादयेदिति दृढनिबद्धहृदयाः प्रतीक्षामहे।

---

**महानुभाव**

कहानी प्रतियोगिता की अवधि कार्तिकतक बढ़ा दी गई है तथा भाद्रपद का एक ही अंक निकलेगा अतः द्वितीय भाद्रपद में प्रकाशित होगा।

—व्यवस्थापक

---

प्रकाशकः— जयबहादुरसिंह पताः— भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रकः— राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार जयपुर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाचनालय, गुरुकुल कांगड़ी

# भारती

...द् भारतवर्षस्य लोकचक्रं प्रचालयन् ।
...पाणिः प्रणम्योऽसौ संकटे देवकीसुतः ॥

वर्षम् ५

एकादशोऽङ्कः

मूल्यम्
वार्षिकम् ३) रु०
एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# विषय-सूची


१. जयति 'भारती'भूरियम् — श्रीरामचन्द्रद्विवेदी एम. ए. आचार्य:
२. "स्मरणीयः-अगस्तः" — विद्यार्थी मांगीलालमिश्रः नेछवा, सीकर
३. खेलन्ती खट्वा ! — श्रीगणेशरामशर्मा झालावाड (राजस्थान)
४. कुसुमस्य दैन्यम् — शे० श्रीनिवासशर्मा, शिरोमणिः चिदम्बरम
५. तव मुखे — श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरन्
६. संस्कृतच्छात्रैः समवधातव्यम् — श्रीचण्डीप्रसादशर्मा "दाधीच" बीकानेर
७ आयुर्नियतमस्ति, उताहो अनियतम् ? — भिषग्मणिः वैद्यमणिरामशर्मा गौडः श्रीगङ्गानगर
८. काष्ठपादुकापरिधानम् — श्रीदीनानाथशास्त्री, सारस्वतः, रामदल देहली
९. पुस्तकालोकः — सम्पादकः
१०. सम्पादकीयम् — "
११. सूक्ति-सुधा — "


## संस्कृतसेवकानां कृते सुवर्णावसरः ! प्रतियोगितात्रयम्

देहलीवास्तव्यैः श्रीकैलासचन्द्रमहोदयैः 'भारती' पत्रिकायै लघुकथा-एकाङ्किनाटक कविताप्रतियोगितानामा-योजनाय (१७५) रूप्यकाणां राशिः प्रदत्तः । अल्पेन स्वकीयव्ययेन सह भारती एताः प्रतियोगिता आयोजयितुं वाञ्छ[illegible]

१. भारते भारताद् बहिश्च निवसन् कोऽपि नरो महिला वा प्रतियोगितायामेतस्यां भागं ग्रहीतुं क्षम[illegible]

२. लघुकथायाः, एकाङ्किनाटकस्य कविताया वा (एकस्य कस्यचन) प्रेषणं भारतीकार्यालये श्रावणपूर्णि[illegible]मनुल्लंघ्य कार्यम । तदनन्तरं लब्धा कृतिर्नाभिरोच्येत ।

३. लघुकथा भारत्याः पृष्ठचतुष्टयात् पृष्ठषट्कपर्यन्तमितकाया स्यात् नाऽतोधिका, न्यूना वा । शब्दसं[illegible] न्यूनान्न्यूनं सहस्रद्वयात्मिका, अधिकाधिकं च त्रिसहस्रात्मिका भवेत् ।

४. एकाङ्किनाटकं भारत्याः पृष्ठचतुष्टयात्सप्तपृष्ठपर्यन्तं विस्तृतं भवितुं शक्यं, शब्दसंख्या एकसह[illegible] सहस्रद्वयं वा ।

५. कविता प्रशस्यरूपेण वीररसप्रधाना न्यूनान् न्यूनं दशपद्यात्मिका अधिकं च त्रिंशत्पद्यात्मिका स्यात् ।

६. लघुकथाप्रतियोगितायां, एकाङ्किनाटकप्रतियोगितायां च लब्धप्राथम्याय विदुषे प्रत्येकम् एक[illegible]शद्रूप्यकमितो द्रव्यराशिः, द्वितीयस्थानमधिगतवते च प्रत्येकं पञ्चविंशतिरूप्यकाणि ससम्मानं प्रदास्यन्ते ।

७. कविताप्रतियोगितायां सर्वप्राथम्यमुपेयुषे विदुषे एकविंशतिमुद्राः प्रदास्यन्ते ससम्मानम् ।

८. भारतीनिर्णायकसमितेर्निर्णयोऽन्तिमरूपेण मान्यः स्यात् । एतस्यां समितौ त्रयो निर्णायकाः सन्ति ।

१—म० म० पं० गिरिधरशर्मा चतुर्वेदः । २—भट्ट श्रीमथुरानाथशास्त्री भारतीसम्पादकः । ३—वैद्यराजजयरामदासस्वामी आयुर्वेदकालेजाध्यक्षः ।

९. लब्धपुरस्काराः कृतयः, अन्याश्चापि योग्याः रचना भारत्यां प्रकाशमेष्यन्ति ।

वयं सर्वानपि संस्कृतज्ञान् सोत्साहं प्रतियोगितास्वेतासु भागं ग्रहीतुमामन्त्रयामहे ।

"भारती"—परि[illegible]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

# भारती

भानुवद् भारतीयानां भास्वद्भुवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्ष ५ } भाद्रपदपूर्णिमा, सं० २०१२ { अङ्कः ११

५०१८८

## जयति 'भारती' भूरियम्

( ले० रामचन्द्रद्विवेदी एम. ए, आचार्यः )

[ १ ]

समस्तवरसम्पदां प्रसवभूमिरर्घातिग-
प्रभूतमणिहारिणी हिमकरीटविद्योतिनी।
श्रुतिस्मृतिमहामणिस्फुरितदिव्यताटङ्किनी,
मुखायितमृगाङ्किनी जयति भारती भूरियम् ॥१॥

[ २ ]

अमन्दकविकल्पनारुचिरकल्पवल्लीभव-
प्रबन्धकुसुमावलीकलितकान्तकण्ठस्थली ।
यशोंऽशुधवलीभवद्भुवनकालिदासप्रसू--
रसूचितशिवेतरा जयति भारती भूरियम् ॥२।

[ ३ ]

मदान्धबलसंयुताऽऽगतशकेन्द्रमुख्याहित--
प्रमत्तगजगण्डयोर्निशितभल्लदण्डोपमा ।
स्वसंस्कृतिसमुन्नतिक्षणविचक्षणा सन्ततं,
नतञ्च मनुते स्वकं जयति भारती भूरियम् ॥३॥

[ ४ ]

जवाहरजवाद्धृताऽतुलसमृद्धिसिद्ध्यूर्जिता,
पटेलपटिमार्णवानुगतसर्वभेदापगा ।
पुरन्दरपुराधिकप्रथितसर्वसौभाग्यभाग्,
अवाङ्मुखरिपुप्रजा जयति भारती भूरियम् ॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★ "स्मरणीयः—अगस्तः" ★

( ले० विद्यार्थी मांगीलालमिश्रः नेछवा, सीकर )

न केवलं भारत एव अपि तु समस्तदक्षिणेशिया देशेऽप्यगस्तमासः स्वकीयप्राकृतिकसौन्दर्ये विशिष्टः। भारतश्च पुनः कथं विस्मृतिगर्ते पातयेदिमं मासम्। यदा हि कतिपयशताब्दीतः पारतन्त्र्यस्य निगडबन्धनेषु सुबद्धो हि भारतो मुक्तो बभूवागस्तमासे। परं स्मरणीयमिदमपि यद्–भारतस्याङ्गभङ्गोऽप्यस्यामेव पुण्यतिथौ समभवत्। देशविभागकथाविस्मृत्यर्थं किं वयं प्रस्तरहृदयाः स्याम ? पारतन्त्र्यात् स्वतंत्राः जाताः, शासका अपि परिवर्त्तिताः। परं किं शासने परिवर्तनं जातम् ? न समभवद्। केवलं चर्मपरिवर्तनम्। गौरचर्मस्थाने "कृष्णचर्म" स्वदेशीवस्त्रावरणेषु समागतम्। हा ! हन्त !! दुर्दैवम् !!!

स्वतन्त्रतासंग्रामादप्यधिकः संबन्धो भारतस्य सामाजिकधार्मिकजीवनतोऽगस्तमासस्य। कृषिनिर्भरो हि भारतः। वस्तुतः भारते कृषेः वास्तविकं रूपं विद्यते। अतः सर्वप्रथमं तु भारतीयाः कृषका एव चिरप्रतीक्षितस्य अगस्तस्य हृदयतोऽभिनन्दनं स्वागतं च संपादयन्ति। क्षेत्रेषु सरलाः कृषकाः तृणहरितां सुगन्धां वसुन्धरां दृष्ट्वा हृष्टमनसः सन्तः स्वकीयसुखसंसारं कल्पयमानाः स्वर्गे विचरिता इव सुखीभवन्ति। इत्थं हृष्टाः भारतीयानां पितृकल्पाः कृषकाः संसारार्थं सुखपथं स्वच्छीकुर्वन्ति।

**हरिता तृतीया:**—अस्मिन् मास एव श्रावणशुक्लतृतीयायाः मनोमोहकं पर्व समागच्छति। वप्रक्रीडापरिणतगजप्रेक्षणीयं "आश्लिष्टसानु" मेघमवलोक्याऽस्माकं सम्मुखे कालिदासस्य मेघदूतनिर्माणकालः परिभ्रमति इव जायते। अस्मिन्नगस्ते एव लाहौरनगर्यां अंग्रेजसर्वकारस्य भारतान्निष्कासनार्थं प्रतिज्ञा विहिता, याऽस्मिन्मासे एव सफला जाता।

**तुलसीजयन्ती**— को न जानाति भारते, रामनाम्नः महामन्त्रप्रचारकं, रामचरितमानसप्रदातारं, हिन्दीसाहित्यस्य अमरप्राणं प्रातःस्मरणीयं महात्मानं तुलसीदासम्। को नाम भारतीयः श्रावणशुक्लसप्तम्याः दिवसं विस्मर्तुं शक्तः। किं नाम हिन्दूगृहम् यत्र न विद्यते रामायणग्रन्थः। का एतादृशी भाषा, यस्यां न जातो रामायणाऽनुवादः।

**रक्षा-बन्धनम्**—अतीततो वयं भारतीयाः रक्षाबन्धनं समाचराम इत्यत्रेतिवृत्तं प्रमाणम्। को विस्मरेदिदं महापर्व। अबलायाः रक्षाभारं वयं रक्षाबन्धनस्यैकेन सूत्रेणैव वोढुं समर्थाः संजायामहे। तद् दुर्भाग्यं भारतीयानां, ये न शक्ताः, पंचनद, वंग, सिन्धसीमाप्रान्तेषु अबलाः स्वसॄः त्रातुम्। धर्मभगिन्याः रक्षासूत्रेणैव तात्कालिको भारतसम्राड् हुमायुः स्वजातिबन्धोः गुजरातसुलतानबहादुरशाहस्य विरोधे योद्धुं दूरदेशाद् दिल्लीतोऽलंघ्यान् सरिच्छैलानुल्लंघ्य सत्वरं समागतः। १९४६ मिते खृष्टाब्दे अस्मिन्मासे एव यवनम्लेच्छैः हिन्दूनां पाशविकी हत्या विहिता। हशनशहीदसुहरावर्दिना "लीग" द्वारा हिन्दूनां यो नरसंहारो विहितः, किं प्राप्यते तदुदाहरणं, विश्वस्य कस्यापि राष्ट्रस्येतिहासे। सोऽप्यगस्त एव आसीत्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



जन्माष्टमी:–पापाचारात्याचारदुराचाराणां संहारकस्य, भगवतः श्रीकृष्णस्यापि जन्म अस्मिन् भाद्रपदे एव कंसस्य कारागारपरिधौ समभवत्। किं तद् राष्ट्रम्, यत्र न विद्यते "गीतायाः" सम्मानः। का सा भाषा, या गीतां प्राप्य न जाता धन्या। का राजनीतिः, या न प्राप्यते गीतायाम्। पुनश्चाद्यतनकाले वयं स्वतन्त्रभारतस्य स्वकीयं सर्वकारं प्रार्थयामः, "यद् भारते गोवधो निरुध्यताम्। किमेषा भारतस्य, भारतीयानां च विडम्बना न ? हा ! हन्त !! भारत !!! तव पतनपराकाष्ठा। भगवन्नवतर ! केवलं वारमेकम्।

१ अगस्तः—को न स्मरति, भारतीयकांग्रेस-गोरणदलनायकस्य महामान्यलोकनायकबालगङ्गाधर-तिलकस्य निधनदिवसं प्रथमागस्तम्। यदा हि श्रुतवान् विश्वः सिंहनादमिमम्–"यत् स्वतन्त्रताऽस्माकं जन्मसिद्धो हि अधिकारः।" पुनश्च देशादतिदूरेऽराकान्पर्वतशृङ्खलासु स्थिते बन्दीगृहे विश्रामार्थं बाध्यः कृतः स भारतसिंहपुत्रः। "केशरी"नामकपत्रसंस्थापकस्य भारतीयक्रान्तिकारिणां गुरोः, लोकमान्यतिलकस्य स्मृतिः किं विस्मृतियोग्या। सदैव स्मरणीयः १९२० मितस्य खृष्टाब्दस्य प्रथमागस्तः।

२ अगस्तः—२ अगस्ते "श्रीसन्याट्सेनः" आंग्लानामधिकारे जातः। अगस्तसन् १९३०-३२, पर्यन्तं ब्रह्माप्रदेशेन, स्वातन्त्र्यवेदिकायां (२०००) द्विसहस्राणाममरपुत्राणां बलिर्दत्तः। धन्योऽसि ब्रह्मा(वर्मा) देश ! अन्ततः त्वमपि भारतस्याङ्गमेव।

७ अगस्तः—इत आसीदद्य सकलवंगे विरोधदिनम्, ततश्च वंगवासिनां रक्तपिपासुः कर्जनो वंगभङ्गस्य पूर्णकार्यक्रमे सन्नद्धः। ७ अगस्त १९०५ खृष्टाब्दे रक्षाबन्धनेन सहैव वंगस्य विभिन्ननगरेषु समभवद् वङ्गभङ्गान्दोलनस्य "श्रीगणेशः।" आसीद् राजनीतौ प्रथमान्दोलनमिदम्। १९४१ खृष्टाब्दे ७ अगस्ते गीतांजल्या अमरप्रणेता, शांतिनिकेतनस्य प्राणः, विश्वकवी रवीन्द्रनाथठक्कुरः, रुदन्तं विश्वं त्यक्त्वा चकार महाप्रयाणम्। गीतांजलिग्रन्थे "नोवेल" सदृशेन सम्मान्यपुरस्कारेण (१,६१,२०० रूप्यकाणां) सम्मानितस्य कवीन्द्रटैगोरस्य निधनतिथिर्न खलु भारत एव अपितु स्मर्यते विश्वस्य सकलराष्ट्रेष्वपि। विदेशेष्वाधुनिकभारतीयसाहित्यस्य मुखमुज्ज्वलं कुर्वन्, रवीन्द्रः प्रथमोऽद्यतनपर्यन्तं चान्तिम एव।

८ अगस्तः—१९४२ वर्षस्य ८ अगस्ते भूयः सिंहनादं चक्रुर्भारतस्यामरपुत्राः "आंग्लाः ! त्यजत भारतम्। नहि भारतेऽभारतीयाः शासने प्रभवः। भारतोऽस्माकं, वयमेवाऽत्रत्याः शासकाः।" भारतो जगाद—'कार्यं कर्तव्यम्, नो चेद् मर्तव्यम्' परिणामतो म्लेच्छाः ब्रिटिशशासकाः, क्रूरदमनं स्वीचक्रुः। भारतीयस्वातंत्र्यसंग्रामे सदैव स्मरणीया भविष्यति अमरा तिथिरियम्।

९ अगस्तः—१९४२ वर्षस्य ९ अगस्तः समभवद् भारतीयसुपुत्राणां कृते शूलीदिनम् (फाँसी)। क्रान्त्याक्रान्तो जातो भारतः। अस्मिन्नेव दिवसे तेन ब्रिटिशसम्राजेत्थं श्रुतं—यस्य राज्ये नास्तं गच्छतिस्म भानुर्यद् "भारतस्य प्रतिजनं कथयति यद् आंग्लाः ! त्यजत भारतम्।" पुनश्च कथनेन साकमेव भारतीय बन्दीगृहाणि भारतीयैरेव पूर्णानि जातानि। न ज्ञायते



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यमितिवृत्तम्—यत् "कतिपयाः शूल्यां समारोपिताः। तिपयाः गुलिकानामाखेटक्रीडनकाः बभूवुः। कतिख्यकानां च जननीनामङ्काः शून्याः जाताः। थ च कतिपयाङ्गनानां सौभाग्यमस्तं जगामेति।" ९२५ वर्षस्य अस्मिन्नेव दिवसे "आजाद"सदृशैः न्तिकारिशिरोमणिभिः "काकोरी"तः समायान्तं ष्पयानं निरुध्य सर्वकारीयकोषं लुण्ठितम्। १९३१ ऽस्मिन्नेव दिवसे लाहौरकारागृहे 'यतीन्द्रस्य" बलानशनसम्मुखे नताननं बभूव ब्रिटिशसाम्राज्यम्। स्वतन्त्रतायाः पश्चादपि १९५० वर्षेऽस्मिन्नेव वसे भारतीयसुपुत्रौ हरिसिंह-दर्शनसिंहौ बलिवेदियामारोहितौ। ययोः समाधिस्थलयोः कृते मध्यभारतसर्वकारेणादेशो निष्कासितो यद्—"हरिदर्शनयोः माधिस्थले भग्नीक्रियेताम्" इति।

९ अगस्तोऽयं भारतीयनवयुवकानां कृते "शहीददिवा" रूपेणोत्सवदिनं संजातम्। संपाद्यते प्रतिदिन त्सवरूपेण, पुनश्च न जाने कतिवर्षपर्यन्तं वयं संपादयिष्यामहे।

**११ अगस्तः**—"नहि भारतीयाः सोढुं समर्थाः स्वदेशे परशासन"मित्येवंविधान्दोलनस्य प्रथमो हि श्रीगणेशः ११ अगस्तदिने (१९०८ ई०) श्री खुदीराम बोसस्य "शूलीदिवसे" भारतेन कृतः। श्रुतं च "वन्दे मातरम्" गीतस्य अस्मिन्नेवागस्ते श्रीखुदीरामबोसेन सर्वप्रथमं गानमपि वंगप्रान्ते विदेशीयवस्तूनां होलिका दग्धा।

**१४ अगस्तः**—१९४७ वर्षस्य १४ अगस्तरात्रौ द्वादशवादनकाल एव देशो विदेशीयैः बभूवः मुक्त। सूर्योदयात्पूर्वमेव जातो भारतः स्वतंत्रः। १४ अगस्त एवाहमदनगरकारागृहे श्रीमहादेवभाई देसाईमहोदयस्य संजातं निधनम्।

**१५ अगस्तः**—१९४७-१५ अगस्ते मार्तण्डस्य रक्तमरीचिमण्डलैः सहैव विश्वजनैर्विलोकितं दिल्लीनगर्याः रक्तदुर्गशिखरे उन्नतं भारतीयं तिरंगध्वजम्। सकलो हि देशो मत्तो बभूव स्वतन्त्रतामदतः। इतो दूरीभूतं शताब्दीतो दासत्वम्, ततः श्रुतं भारतमातुः करुणं चीत्कारमयं क्रन्दनम्। सर्वैरेव दृष्टम्—यदवध्यायाः भारतमातुरंगभंगो विहितः। इतः परमपि भारतमातुः करुणक्रन्दनेन सहैव सर्वैरेव श्रुतः, वङ्ग, पंचनद, सिंधु, सीमाप्रान्तेषु लक्ष २ नराणाम् चीत्कारः। असंख्यानामबलानामसह्यं रोदनम्, विवशानां शावकानां "हा! मातः!! हा! मातः!!" इत्याह्वानम्। श्रावं श्रावं परितोऽसह्यं रोदनं भग्नहृदयाः जाताः देशवासिनः। स्वर्गतोऽजरामराणां भारतीय"शहीदाना"मात्मानोऽस्मान्धिक्कृत्योत्थिताः—किमेतदर्थमेव वयमानन्दतः शूलीषु चटिताः? किमेतदर्थमेव वयं संजाताः शहीदाः? वदत रे! भारतीयशासकाः! किमस्माकन्नासीत् जीवनं प्रियम्? अस्माकं बलिदानस्य दुरुपयोगकरणे त्वादृशानां दुष्टानां कोऽधिकारः? दूरीभूताः भवत, अस्मद्दृष्ट्या। न त्वादृशानां कलंककृष्णाननानामवलोकने वाञ्छा।

व्यर्थमेव जातं झांसीश्वर्याः बलिदानं, युद्धं शिवाशूरस्य, चन्द्रहासाः प्रतापस्य, रक्तं हल्दीघाट्याः, बन्दावीरस्य आत्मबलिदानं च। गुरुगोविन्दसिंहस्य पुत्रौ व्यर्थमेव भित्तिकायां नष्टीभूतौ! व्यर्थो बभूवाऽलौकिकोऽभूतपूर्वः चित्तौरदुर्गस्य "जौहरः"। किमा-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...मिदं पाकिस्तानार्थम् ? धिक् ? शतशो धिक् !! ...यात् भारतीयनेतृन् ! लक्षवारं धिक् ! एता... स्वतंत्रतां च।

...प्रतमपि तत्स्वातन्त्र्य तु दूरमेव, यदस्माक... ...हीदानां मनसि चासीत्। यत्र न भविष्यति ...र्मण्यत्वं च। सर्वे एव प्राप्स्यन्ति भोजनम् यत्र ...या: भविष्यति शासनं, यत्र च न क्रेतुं समर्था: ...हयकैन्यायिम्। ईदृगासीदस्मत्स्वातंत्र्यकल्पनम्। ...फलं जातम् ? किं भविष्यति भारतोऽखण्डः ...संख्या: भारतीया: बलिभूता जाता: ? अथ च ...ते भविष्यति सर्वमिदम् ?

...सकेषु जातं परिवर्तनम्, परं शासनं साम्प्रत... ...देश, यत्र बुभुक्षाया अकर्मण्यतायाश्च साम्राज्यं ...विलोक्यते। यत्र न दृश्यते न्याय:। इति ...धिकांशदेशवासिभिर्न स्वीकृत: समारोह: १५ ...स्त। समारोहमिममस्वीकुर्वन्स्वयं महात्मा गांधि... ...यत् मदङ्गभंगात्पूर्वं कदापि न भविष्यति ...भंग:।" क्व साम्प्रतं महात्मनोऽनुचरा:, यै ...जनानां विरुद्धं भारतस्य विभजनं स्वीकृतम्। ...शो भिक्षावद्याचितस्वातन्त्र्यार्थमारोहयामास ...यामसंख्यान् पुत्रान् ? किं विलोक्यते याचित... ...स्य "रामराज्यम्" ?

...यं न विहितं देशविभाजनविरोधे राष्ट्रपित्रा ...अनशनम् ? किं विलोक्यते सत्तामदमत्तै रुचित... ...या। धन्योऽसि अगस्त ! त्वदीया: बिचित्रा: ...अपि च धन्या:।

...१६ अगस्त:—१६०६ मिते खृष्टाब्दे १६ ...ब्रिटिशराजधान्यां "लन्दन"नगर्यां "कर्जन-वायलीं" परेतपतिपालितपुरीपथिकक्करणापराधे "श्रीमदनलाल धींगरा:" शूल्यामारोहित:। श्रद्धेय मदन ? व्यर्थीभूतं त्वदीयं बलिदानमपि।

**१६ अगस्त:**—१६४२ वर्षे १६ अगस्ते सर्वप्रथमं बलियानगरे प्रजातंत्रसर्वकारो जातो, य: २१ अगस्तानन्तरं नष्टो बभूव। सर्वप्रथमो हि क्षेत्रोऽयं १६४२ वर्षस्यान्दोलने, यत्राङ्गलराज्यं समाप्तं जातम्।

**२२ अगस्त:**—१६४२ वर्षस्य २२ अगस्ते मार्शस्मिथ, नेदरसोलयो: नायकत्वे गौरांगसेनया बलिया नगरस्य नवजात: प्रजातंत्रशिशुर्नष्टीकृत:। गौरांगानां दमनचक्रं विलोक्य जनैर्विस्मृतं हिटलरस्य दमनम्।

इत्थं भारतेतिवृत्तेऽगस्तो मास: सदैवामरमासरूपेणाङ्कितो विद्यते। यं न विस्मरिष्यन्ति कदापि भारतीया:। अथ च को जानाति भविष्यत्, स्यादस्मिन्मास एव भारतोऽखण्डो भूयात् ? तमेव दिवसं वयं प्रतीक्षामहे। न खलु स्वप्नमिदं, परं सत्यम्। पुनश्च क: रोद्धुं शक्नुयात्सत्यम्। अवश्यमेव भविष्यति भारतोऽखण्ड:। सदैव भारतीयै: मृत्युरेवालिंगित:, चाटुकारितानमनयो: स्थाने। भारतीया: न कदापि द्रष्टुं समर्था: स्वदेशे परशासनम्। आस्माकीनो वंग:, पंचनदोऽप्यास्माकीन एव। पूर्णं पाकिस्तानमस्माकमेव। भारताङ्गं तत्। वयं तत्रापि भारतध्वजं द्रष्टुकामा:।

मात: ? देह्यस्मभ्यं शक्तिम्, यया वयं त्वदीयं छिन्नांगं पूरयितुं समर्था: स्याम। अद्यापि भारते लक्ष्मीबाई, शिवा, राणासदृशानामभावो न। साम्प्रतमपि देशे "भगतसिंह", "आजाद"समाना: लक्षशो वीरा:। आस्माकीनो ध्येय:—"अखण्डो भारत:"। स भविष्यति। अवश्यं भविष्यति, क: समर्थ: तं निरोद्धुम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★★ खेलन्ती खट्वा ! ★★

( ले० विद्याभूषणः पं० श्रीगणेशरामशर्मा, साहित्यरत्नम्, ज्यौतिषोपाध्यायः, हिन्दी-संस्कृताध्यापकः, श्रीराजेन्द्र-इन्टर-कॉलिज, झालावाड़ ( राजस्थान )

अस्माकं भारतीयानां गृहस्थाश्रमे, जीवनोपयोगिषु परिग्रहोपकरणेषु, खट्वायाः कियन्महत्त्वमावश्यकता चेति प्रायः सर्वेऽपि जानन्त्येव, परन्तु खट्वायाः सदुपयोगा नानाविधाः परमप्रयोजनीयास्तात्त्विकाश्च भवन्तीति केचिदेव विरलाः, मुक्तभोगाः, सहृदयाः, मार्मिकाः सर्वांशतो विदन्तीति कृत्वाद्य सर्वसाधारणानां कृते खट्वादर्शनविषयेऽत्र प्रवर्तामहे :—

सर्वसुखावहा, नवनीतकोमला, दुग्धफेनोपमामलधवलास्तरणसुशोभिता, सोपधाना शय्या कस्य मनो न हरति ? कलाकृतिसमुत्कीर्णाः मनोहरा मञ्चाः, पर्यङ्काः, वेत्रासनानि, चतुष्पदीत्यादयः सर्वे श्रीमत्या अत्रभवत्याः खट्वाया एव सुपरिष्कृता आकृतिभेदाः । ते च सर्वे मनुष्यजीवनस्य विकाशोन्नतिक्रमेण, सभ्यतास्तरसमुत्कर्षेण साकमेव क्रमशो रूपान्तरैः सर्वादिभूतायाः स्वजनन्याः खट्वाया एव महत्त्वमुद्घोषयन्तीति केषांचिन्मादृशां खट्वारामाचार्याणां तद्दर्शनशास्त्रव्युत्पन्नानां निर्भ्रान्तं सुविनिश्चितं मतम्। मन्ये, मम विषये तद्गुणगणाज्ञानतां पाठकमहाभागानामपि किमपि गभीरमसह्यं वा वैमत्यं स्यात्। शय्यामञ्च-पर्यङ्कपीठिकाप्रभृतीन्यासनोपकरणानि महर्घतया न हि सर्वसाधारणानां प्रजाजनानां सुलभानि भवन्ति, स्तानि प्रचुरधनोपलभ्यानि। परमेषा खट्वा राजपर्यन्तं, सामान्यसदस्यतो नेतृपदमधिकुर्वतो मन्त्रिमहोदयपर्यन्तं च स्वल्पव्ययसुलभा सर्वैः ससुखं व्यवह्रियते !! एवमेषा खट्वा सर्वोपकारसाम्राज्ञी, राष्ट्रियार्थशास्त्रदृष्टया बहूपयोगिनी सिद्धान्यपि च सर्वजनहितैषिणी, समदर्शना, साम्यसिद्धान्तं समाश्रयते प्रजातन्त्रत्वं वात्मनः प्रथते !!!

अथ पुनर्मञ्चादीन्युपकरणानि सद्गृहस्थानां भवनेषु, राजयोगिनां प्रासादेषु, हर्म्यपृष्ठेषु, महा मणिमन्दिरशालानां प्रकोष्ठेष्वेव सदासर्वदा स्थिरत्वेन स्थिरासनत्वेनोपकल्पितानि, न तथाल्पायास

---

विचित्रो हि अगस्तमासः । यस्य प्रतिघटना विवेचने स्यादेकं पूर्णेतिवृत्तम्। अस्मिन्नगस्त एव महात्मना गाँधिना त्यक्ता भारतीयकांग्रेससदस्यता, त्यक्तश्च भारतीयकम्यूनिष्टपार्ट्या कांग्रेसतः सहयोगः । १६२१ वर्षस्यागस्ते एव मुहम्मदअलिना जिन्नायवनेन त्यक्ता कांग्रेसपार्टी। शिमलासम्मेलनमप्यस्मिन्मास एव जातं, पुनश्च विफलमप्यस्मिन्मास एव। चर्चिलस्य "अगस्त-ऑफरो"ऽप्यस्मिन्मास एव भारते समायातः, यं भारतीया अस्मिन् मासे स्वीचक्रुः । द्वितीयमहासमराङ्गणे १७ अगस्त जापानस्य समभवत् पतनम्, पुनश्चास्मिन् मास निपातितमणुशस्त्रम्। १६२४ वर्षेऽगस्त एव निधनं प्राप्तः ।

पुनश्चाद्यायमेवागस्तो मासः "शहीद-दिवा" भारतस्य पुण्यं पवित्रं पर्व समभवत्। सदैव त्यपि । किं विस्मृतियोग्यो हि "शहीद दिवा"।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...ति, सति प्रयोजने च सुखवाह्यानि भवन्ति । परन्त्वेषा ...ट्वा नगरेषु, ग्रामेषु, गृहेषु वा सर्वत्र जनसाधारणक्रेया ...त्युत स्थानात्स्थानान्तरं वोढव्या भवतीत्यस्या अपरः ...ऽपि गुणोत्कर्ष उपयोगिता च । केचित्त्विमामाकुञ्चन- ...साधारणयोग्यां, यात्रोपयुक्तामपि रचयन्ति सर्वाङ्गसुन्दरीं, ...नीयां च किल कुशलाः कलाकाराः शिल्पिनः । ...नीदृशाः कलाविदो धन्यवादार्हा यैरेवं खट्वाया नव- ...करणपरिष्कारा विहितास्तस्या उपयोगाश्चानेके ...परिकल्पिताः !!

केचिदथ धनिनो महाजनाः स्ववैभवातिशयस्य ...विकप्रवरतायाश्च प्रदर्शनाय किङ्किणीझणत्कारसहि- ...भिः स्वर्णरजतकांस्यशृङ्खलाभिः खट्वां भगवतीं मध्ये- ...समवलम्ब्य मोदन्ते तामेतामान्दोलयन्तः सुखं शेरते ...! धनिकानां स्थितिस्तु सर्वसाधनसम्पन्ना भवति ...तु मध्यमवर्गीयां सामान्यगार्हस्थ्यस्थितिमावहतां ...नां तु खट्वैषा कियदुपकरोतीति वर्णनातीतम् ! ...न्यतः खट्वा रात्रौ शयनायोपयुज्यते लोकैरिति ...वयं सम्यग्जानीमहे, किन्तु शास्त्रज्ञाः विज्ञान- ...विदो, लोकतन्त्रनेतारोऽन्येऽपि च बुद्धिजीविनः ...कारा:, सम्पादका:, लेखका:, कवयो दिवानिशं ...नी सञ्चालयन्तो यदा भृशं श्राम्यन्ति तदान्ते श्रीमतीं ...खट्वादेवीं शरणं गच्छन्ति । तामाराध्याराध्य तदङ्के ...विश्रम्य सुचिरं गतक्लेशा भवन्ति । दिने दिने नवनवां ...नी शक्तिं, स्वस्थतां, स्फूर्तिं चाप्नुवन्ति ! एवमियं ...भावतामपि महदुपकरोति खट्वा ! स्वयम् प्राचीन- ...ना, पुराणी, सनातनी चापि खट्वाऽद्यत्वे विकसित- ...काणां, ज्ञानविज्ञानाभिमानिनां, फैशनावताराणां, ...सभ्यतानुयायिनां, शिक्षोद्रिक्तमानसानां, विदुषा- ...णां कृतेऽपि बहूपयोगिनी ! कृषीवलानां, श्रमिणां तु खट्वा सर्वतोऽधिकमुपकरोति । यतः सर्वं दिनं भूमिक्षेत्रेष्वतिकठोरं परिश्रमं कुर्वतां तेषां मध्यान्तरसमये खट्वैव परिश्रमापनोदाय शरणं सम्पद्यते ! दूतत्वं स्वीकुर्वाणा धावका जना मध्येमार्गं स्निग्धच्छायशीतले देशे खट्वायां विश्राम्यन्ति ! मृगयारसिकाः सिंहादिश्वापदानामाखेटक्रीडाप्रसङ्गेषु निर्मानुषेऽरण्ये चापि कुहचिद्वृक्षशाखासु मञ्चरचनां खट्वयैवोपकल्पयन्ति । यत्र जीवनमरणसमस्या, यत्र न कोऽप्यन्यः सहायः, एवंविधे मृगयाविधावपि सैषा खट्वा बन्धुत्वेनाधारः प्रसिद्ध्यति सिंहघ्नानां दुस्साहसिकानां वीराणामित्यहो माहात्म्यमुपयोगश्चास्याः ! गुर्वीं प्रसववेदनामनुभवन्तीनां स्वभावतो लज्जाशीलानामतः स्वं दुःखं प्रयत्नाद्गोपायन्तीनां प्रसूतिकानामर्भकजन्मकाले धात्रीव प्रियसखीवातिविश्रब्धं साहाय्यमाचरति खट्वा ! यत्रात्मीयोऽपि जनः सहसा सहायको भवितुमसमर्थः, तत्रैवंविधमुपकारं महान्तं कुर्वाणेयं खट्वा महिलाभिः कथं नाद्रियेत ?

अपरं च ये येऽत्र लोके शूराः, वीराः, विद्वांसो, नेतारः, कवयः, कलाकाराः, सन्तो, महान्तो, योगिवर्याः, जडाः, वा पुरुषपुङ्गवाः, पुरुषाधमा वा जायन्ते ते सर्वेऽपि स्वजीवने प्राणानां प्रथमपरिस्पन्दनक्षणादेव खट्वाशरणा भवन्तीति महानेवोत्कर्षोऽयं खलु खट्वायाः !!!

अथ पुना रोगिणां तु खट्वैवैकमद्वितीयं शरणं, किन्तु जीर्णेन्द्रियाणां, विकलाङ्गानाम्, वृद्धानामशक्तानामियं खट्वा खलु जीवनालम्बनं, विपद्बन्धुः ! केचिच्छिशवोऽपि च खट्वामवलम्ब्य गतिसंचारशिक्षां लभन्त इति प्रत्यक्षमेवावलोक्यते ! केचन पुनरन्यसाधनाभावे मृतस्य जनस्य शवमग्निसंस्काराय श्मशानं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रति खट्वायामारोप्य नयन्तीत्यस्याः कोऽपि परलोकसिद्धिसाधनोचितो ह्युपयोगः !

भूरिभोगान् भुञ्जानानां जनानां सुखसज्जा खट्वां विना कथं सम्भाव्येत ? नववधूसङ्गमें मधुरजन्यां पुष्पालङ्कारप्रसाधनैः शृङ्गारिता खट्वा प्रणयिनोर्द्वयोरन्तरङ्गा प्रियसखीव रतिरसानन्दसाक्षिणी सम्पादयति कमप्यमन्दानन्दाह्लादम ! सेयमेवंविधेषु मनोरमेषु मार्मिकेषु च प्रसङ्गेषु यदा खट्वा पर्यङ्करूपिणी प्रकृष्टं हर्षमानन्दमाह्लादातिरेकं समनुभवति तदा दम्पत्योः कर्णकुहरेषु किमपि संयोगशृंगारकाव्यं कलं कूजति, नर्मालापांश्च गायन्तीव विराजते । इत्थं संयोगवियोगशृङ्गारे नायिकानायकयोः स्थायिभावानां व्यभिचारिणां च रसोद्रेकं यथा तत्त्वतो वेत्ति खट्वा, न तथा 'करबदरसदृशमखिलं भुवनतलं' परिपश्यन्तः सूक्ष्मगतयो रससिद्धा महाकवयो, न वालोचनाप्रवर्तकाः साहित्याचार्याः, न पुनर्जगन्मिथ्येति मायावादमीमांसकाः सूक्ष्मदर्शना दर्शनाचार्याश्च प्रभवन्त्यत्र रसपरिपाकप्रकरणे ! खट्वा किल रज्जुतन्तुजालैरात्मनः सगुणत्वं निर्गुणत्वमुभयमपि शिक्षयति स्वरूपतो वेदान्तवादिनाम् । ज्योतिर्विदस्तु खट्वाकारकल्पनासाहाय्येनैव शिष्यान्दर्शयन्ति खमध्ये सप्तर्षिमण्डलं दृक्प्रत्ययायेति सर्वशास्त्रार्थबोधिनीयं खट्वा !!!

न केवलमेतावदेव प्रत्युत गृहस्थाश्रमे वसना... गृहान् प्राप्तानामतिथिदेवानां सेवासपर्यासम्... पाद्यमर्घ्यमनु विश्रामाय तान् बहु सम्भावयन्ती ... योगमहत्त्वं साक्षात्कारयति सेयं खट्वा । आस्त... काममनुत्तममुत्तमं, मध्यमं, साधारणमपि वा ... परन्तु खट्वारूपायां साधनसम्पत्तौ विद्यमानायां ... किमपि शोभनमेव सौकर्यम् सिध्यति । विशेषतो ... संग्रहोचितानां भोग्यपदार्थानामपेक्षातो नैयून्ये तु ... साधीयसीं सहायतां विधत्ते गृहधर्मिणाम् । यदा ... प्रथमदिवसे मुसलाधारं वर्षति पर्जन्यो, यदा च ... टपटपाशब्दं कुर्वत्प्रविशति रन्ध्रेभ्यो गृहान्तर्... सर्वतो यदा चासनोचिता वेश्मभूमिर्भवति स... कार्द्रा, यदा वा सर्वेऽपि सद्मप्रकोष्ठाः स्निग्ध... भित्तयो भोगासनशयनादिकार्येष्वनुपभोग्या ... प्राङ्गणमपि च यदाकर्दमक्लिन्नं बोभवीति तदा ... दीयं खट्वाभगवती भूतधात्रीव कीदृग्योगक्षेमं ... सानिलोत्करासु, विद्युत्स्फुरणभीषणासु, स्तनि... गर्जननिर्घोषासु वर्षारात्रिषु गृहमेधीयानां, विं... भावशतपीडितानां किंपचानानां बहुप्रजानां द... गृहस्थानामिति तु कोऽपि मुक्तभोग एव ... जानीयाज्जागतिको जनोऽत्र जगत्यां खट्वोपयो... रस्यम् !!!



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# कुसुमस्य दैन्यम्

( ले० शे० श्रीनिवासशर्मा, शिरोमणिः चिदम्बरम् )

आस्थानमण्डपमध्यास्ते कामदेवः। श्रियः सौन्दर्यादीनि, हरेः मनोमोहिनी शक्तिश्चेति सर्वमत्संक्रान्तं विलसति। अधुनैवासौ मूर्धाभिषिक्तः। अपूर्वं तस्येदं स्थानं नूतनतया सृष्टम्। असौ तथा लोकसृष्टेः उपयोगीनि, प्राणिनामानन्दजीवदानि च कार्याणि करिष्यति। न केवलमिदम्, कालमूर्तं रुद्रस्येव संहारकर्मण्यपि तस्य विलसिताकरिष्यन्ति।

एतावता स नारभते स्वाधिकारं प्रयोजयितुम्। किन्तु तदर्थं उपक्रमसंभारसम्पादने दत्तदृष्टिः वरीवर्ति। लावण्यमाधुर्यादिना पूर्णं यद्विलसति, तद्वस्तु आत्मीयं कर्तुं तस्याभिलाषः तीव्रतरः॥

वसन्तः—कामस्य बहिश्चरा इव प्राणाः पार्श्वे स्थितः। अप्सरसः परितः स्थिताः सङ्गीतेन, नाट्येन च तस्य मोहमुद्वेलयन्ति।

मन्मथस्येयमेव चिन्ता स्मृतिश्च, यत्पंचेन्द्रियाणां आवर्जके वस्तुनि स्वमुद्राङ्कनं कर्तव्यमिति। चक्षुषे रमणीयतां, स्पर्शाय मृदुतां, जिह्वायै माधुर्यं, घ्राणाय सौगन्ध्यं, श्रोत्राय सौशब्द्यं च किं किं वस्तु आदधाति? तेषु गरिष्ठं वा कुत्र वर्तते? इत्यस्मिन्गवेषणे तस्य मनः व्यग्रमभूत्। एवं कतिचन प्रहराः अथवा निमेषाः अतीताः स्युः।

अथ तत्कटाक्षवीक्षितेनानुज्ञाता काचिदप्सराः उपसृत्य सविनयमुपतस्थे।

"कामरूपिणि! अद्य त्वं भूलोकं गन्तुमर्हसि। तत्रत्येषु मनोज्ञवस्तुषु श्रेष्ठं किमपि निर्णीय आददीथाः।"

"यदाज्ञापयति स्वामी।"

सद्यः स्वहंसपक्षौ वितत्य भूमिमवातरत्सा सुन्दरी। किं कमनीयं? कुत्र कमनीयम्? इति गवेषयामासतुः तस्याः चक्षुषी। परस्परं घातप्रत्यभिघातयोरुद्गतां तरङ्गमालां प्रसारयन्तं समुद्रराजमद्राक्षीत्। तत्तीरे रजतपत्रपुटान् चञ्चुभिर्विदलयति बकगणे च तस्याः अक्षियुगलं प्रविष्टम्। नीलविहायसि, अत्युच्चशिखरेषु पर्वतेषु, धरणीतलं रेखयेवाङ्कयन्तीषु नदीषु च तस्या दृष्टिः प्राचलत्। सर्वं दृष्टं सौन्दर्यमन्दिरमेव। तथापि⋯। तस्या मनसि तृप्तिर्नोदभूत्।

सूर्यकिरणानामसुलभप्रवेशं निबिडं कंचिदारामं प्राविक्षत्। उन्मील्य चक्षुषी प्रस्फुटं पश्यति स्म। तत्र चित्रेषु कुसुमेषु तस्या अक्षिणी अलगताम्। न तेभ्यस्ते समाहर्तुं प्राभवत्सा। "कामदेवेन प्रतीष्टं वस्तु विलोकितम्" इति तस्या हृदि गर्वः प्रादुरभूत्। चक्षुर्हरं किंचित्फुल्लं कुसुममुपसृत्य सावधानं निध्यायन्ती आननन्द। "पुष्प! भूदेव्याः प्रकृतिप्रसाधनं त्वमेव सौन्दर्यस्य शिखरम्। त्वमेवास्माकं रतिकान्तस्य प्रतीष्टं वस्तु" इति स्वयं मोदमुखरा साक्षात् स्वर्गं प्रति त्वरते स्म।

चक्षुषस्समावर्जकेषु वस्तुषु प्रसूनं प्रशस्ततमं इति तदानीं कामदेवः प्राबुध्यत।

(२)

तस्याः नाम ललिताङ्गीति। तत्तनुः मार्दवस्य निवासः। सा अन्या, मार्दवं चान्यत् इति भेदवचनमपि दुष्टम्। अद्य कामदेवस्य कृपाकटाक्षः तस्यां प्रासरत्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



"ह्यः दृष्टिमधुरं वस्तु निर्ज्ञातम् । त्वमद्य स्पर्शमधुरं वस्तु निर्ज्ञायागच्छ" इत्यन्वशात् कामः ।

"यथा प्रभोराज्ञा" इत्युक्त्वा प्रस्थिता ललिताङ्गी । स्वकरपल्लवेन सा वस्तूनां मार्दवं सपरिच्छेदं बोद्धुं प्रावर्तत हरिणगणमध्यगता तानस्पृशत् । तेषां सुखः देहस्पर्शः नूनं तस्या मोदमजीजनत् । हंसानामुदरतलं पस्पर्श । यद्यपि तत्रत्यपिंछस्य मार्दवं न केनाप्युपमीयेत इति निश्चिकाय तथापि 'परीक्षिष्ये' इति विचिन्त्य पुष्पवाटिकां विवेश । अतिरम्याणि प्रसूनान्यविचार्यैव तस्याः करपल्लवमरुधत् । पुलकितगात्री सा "अहो मृदुत्वं शैत्यं च पुष्पाणाम् । एतानि किल शृङ्गारमूर्तेरस्मत्स्वामिनः मोदमपहरिष्यन्ति । कानि नामान्यानि पुरत एषाम् ?" इति चिन्तयन्ती कामसभामगात् ।

(३)

तृतीयो दिवसः । अद्य अमृतवल्ल्या वारः । "जिह्वामधुरेषु वस्तुषु प्रशस्तं किम् इत्यन्विष्यागच्छ" इत्याज्ञां शिरसि कृत्वा प्रतस्थे सा । तस्याः स्वादुपरिज्ञाने नैपुण्यं प्रभूतम् । सैव कामदेवस्य महानसपर्यवेक्षिका ।

इदानीं इक्षूणि फलानि च तस्याः परिशोधनं अन्वभवन् । नानाविधानि मधुराणि फलानि आस्वदत । "धिक् देवलोकम् । अहो बत तरुः कश्चित् । तत्र जातिस्तु पञ्चधा । तेऽपि फलन्ति स्वर्णानि, रत्नानि, मुक्ताफलानि च । किमर्थं तानि ? भक्षयितुं आस्वादयितुं च भूदेव्याः प्रसाद एव मधुरः । स च कतिविधः ? कियान्मधुरः ?" इति सा विस्मयं परमं प्राप । अन्ततः 'फलान्येव मधुराणि वस्तुषु' इति निरणैषीत् ।

"गतदिनद्वयेनात्र आगतवत्योः प्रमदयोर्मनो जहार यत्कुसुमं तदपि पश्येयम्" इति मनसि चकार । सद्यः पुष्पवाटिकामुपगम्य प्रसूनसमीपेऽतिष्ठत् । तस्य कमनीयता मार्दवं च यत्सत्यं कामदेवस्य आह्लादकं इत्यजानात् । अतर्कितमेव तस्या दृष्टिरितश्चेतश्च बभ्राम । "किं तत् ?" इति पस्पर्श । तदासीन्मधुरं मधु । तदास्वादयामास । चिन्तयामास च "अहो वञ्चिता खल्वहं भ्रमेण । वराकाण्येतानि पुष्पाणि इदमपि खलु आत्मसात्कुर्वन्ति । अहो मधुरम् ! कियदन्तरं त्वग्बीजव्यतिकराणां फलानां अस्य च ।"

सौभाग्येन अमृतवल्ल्याः रससमीक्षायामपि तदेव पुष्पम् उत्तममभवत् । 'रसानां श्रेष्ठं तदेव पौष्पं मधु' इति तृतीयं प्रशस्तिपदं तस्मा अदीयत ।

(४)

अद्य सुवासिनी समाययौ । न ह्यन्यतरसा कुत्रापि गता । यतः मध्येमार्गं दक्षिणपवनशिशुः समागतः । शैत्यं, सौगन्ध्यं च तस्मिन्नास्ताम् । सुवासिन्याः आह्लादसीमानमतिक्रान्तः । 'अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ?' इति । 'वत्स दक्षिणपवन ! तव मान्द्यं शैत्यं च नूनं ललिताङ्गी नावाबुद्ध । पुष्पाण्युच्चैश्चकार दुर्मणा । तव सौगन्ध्येन ज्ञातेन ममागमनकार्यं सिद्धम् । नमस्ते' इत्यवदत् ।

'नैव जाने प्रस्फुटं त्वद्वचनस्याशयम् । नहि मयि स नैसर्गिकः गुणः वर्तते । येन भगवती मां वर्णयति । मान्द्यमिदं अगस्तगिरिनिर्झरात् अपहृतम् । सौगन्ध्यं चेदं पुष्पवर्गस्य सौजन्यात्समवाप्तम् ।' इति स 'मन्दः' पवनः उवाच । हन्त ! भूयोपि किं तदेव कुसुमम् ? किं तदेव केवलं सुगन्धवत् वर्तते ? सुवासिनी व्यस्मयत । मलयमारुतनिर्दिष्टेन पथा सा पुष्पनिकुञ्जं विवेश ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...मत्त इव पुष्पस्य गन्धः तामाचकर्ष । तत्रैव ...त्वा अतिष्ठत् ।

सौगन्ध्ये प्रथितं वस्तु पुष्पमेवेति सिद्धान्तस्तस्मिंस्तु- ...ये दिवसे प्राख्याप्यत कामदेवस्य सभायाम् ।

( ५ )

सर्वमिदं कुसुमिनी जानातिस्म। कथम् ?....दक्षिणः ...नो हि तस्या उच्चैः पदं प्राप्तमकथयत् । कामदेव- ...णि सभायां प्रसृतमात्मनो यशः विज्ञाय तस्या दर्पः ...समजृम्भत । 'अहं सुन्दरी, ततोऽपि सुस्वादुमधुमती, ...विलासिनी चे'त्यादिविचारपरस्पराः तस्या मनस्युदीयुः ।

तस्मिन्दिने कामदेवः पञ्चमीं समीक्षां कर्तुं ...प्रेषयत्परिजनम् । गानविलासिनी तत्कैङ्कर्यमङ्गीचकार । ...सौ यत्र यत्र श्रूयते मधुरं संगीतं तत्र सर्वत्रात्मनः ...चरणं प्राक्रमत । सावदाततरङ्गकरतालं सागरस्य ...वगीतिः तस्या मनो नोदचालयत् । तरोर्विटपकोणे ...लीनस्य, वसन्तकाल एव कूजतः कोकिलस्य स्वरः ...तामुदकण्ठयत् । महाशैलात् सोल्लासं सशब्दं च ...निर्झरस्य सङ्गीतरागः नारोचत तस्यै । अन्ततः ...सर्वाः स्वस्वविमर्शस्य पर्यन्तभूमिं यामसीसदंस्तामेव ...कुसुमिनी प्रद्यामि' इत्यगच्छत्, अतिष्ठत्, प्रतीष्टं वस्तु ...लभत, प्रत्यैक्षत, परं फलितं नाभवत् ।

दिनचतुष्टयेऽपि प्रशस्तिप्राप्त्या दृप्ता कुसुमिनी ...समक्षं तिष्ठन्त्याः अप्सरसः भ्रमस्य 'को हेतुः' ...नाजानात् । गानविलासिनी 'आत्मनः प्रतीक्षितं तत्र ...कुसुमे लभेय' इति समकल्पयत् । तन्न लेभे । तस्या मनः ...अनुकम्पते स्म 'कुसुमिनि ! चिरादन्विष्य त्वामासादित- ...वती । दिनचतुष्टयेऽपि त्वत्प्रभावान्मुदितास्सख्य ...अहमपि मोदिष्ये' इति सप्रत्ययमागता । त्वं तु ...तूष्णीमास्से । मम प्रतीक्षितं सङ्गीतं न त्वयि वर्तते । मह्यमेवोदासीना कुतो भवसि ? । कुत्र गमिष्यामि इदानीम्' इपि प्रालपत् । समयः अतिक्रान्तः । तत 'श्वः आगमिष्यामि' इत्युक्त्वा अयासीत् ।

अशुचत्कुसुमिन्या मनः । अभ्रशत्तस्या दर्पः । 'हन्त ! कुत्र गमिष्यामि । मधुरसङ्गीतं कुतो वा लप्स्ये ? मदीयं दैन्यम् इदानीमेव जानामि । को वा पूरयिष्यति माम्' इति मुक्तकण्ठं अरुदत् । मन्दं समागतः मलयपवनः समसान्त्वयत् । सायङ्कालः शनैः प्राकाशयद्विभ्रमम् । परं कुसुमकन्यकायाः मनः न प्रकृतिमापेदे ।

समापत्त्या तदानीं तत्रैकः भृङ्गस्समायात् । कुसुमिनीं क्लिश्यन्तीं वीक्ष्य 'किमर्थं त्वं रोदिषि' इति सानुकम्पमपृच्छत् ।

'भृङ्गराज ! किं ब्रवीमि । कामदेवस्याज्ञया गतेषु चतुर्दिनेषु चतस्रः सुरकन्यकाः अत्रागताः । ताः मदीयं सौन्दर्यं मार्दवं, सौरस्यं, सौगन्ध्यं च विज्ञाय विस्मिताः ययुः । अद्यापि कापि समागच्छत् । सा पर्यपृच्छन्मां 'संगीतं त्वय्यस्ति वेति ।' अहं तूष्णीमतिष्ठम् । सा निरगच्छत् । त्वं वद, यत् सङ्गीतं मयि नास्ति तत्को वा दास्यति ? श्वः आगत्य समीक्षन्त्यां तस्यां यथापूर्वं स्थिताहमपमानस्यावश्यं पात्रीभविष्यामि' इति सगद्गदमवदत् ।

"कुसुमकन्यके ! किमिदम् असाध्यं नाम । तव शोकमिदानीं अपनेष्यामि, यावत्त्वदीयानि दलानि प्रस्फुटानि करिष्यसि" इति वदन्स भृङ्गराजः पुष्पान्तः प्रविश्य मधुरं 'झङ्कार' मारभत । पुष्पवाटिका समग्रापि तस्य झङ्कारश्रुतौ लयमवाप ।

षष्ठे दिवसे प्रातः नाकलोकात् गानगवेषणाय कन्यका समाययौ । दूरादेवेदं अमृतगानं समायान्त्या-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



स्तस्याः चित्तमाचकर्ष। साक्षादागत्य पुष्पस्य पुरतस्तस्थौ। तस्मादेव पुष्पाद्गानं प्रवृत्तं विज्ञाय 'अहो! त्वमेव प्रशंसार्हा। पुष्पबालिके! त्वमेव कामदेवाय रोचसे! धन्या त्वमायुष्मती भव!' इति प्रशंसन्ती स्वधाम प्रपेदे।

तस्मिन्दिने 'पञ्चेन्द्रियाणां मधुरं वस्तु पुष्पमेव' इति सत्यं व्यजानात्कामदेवः। अथ तत्स्वायत्तीकरणेन मनः प्रसादयामास। इन्द्रियमोहकानि प्रसूनानि मदीयान्यस्त्राणि भवन्तु! पञ्चेन्द्रियाणां आस्वादयितॄणि तान्येव मम सैन्यानि। तैस्सर्वं जगदहं दासीकुर्याम्। 'कुर्यां हरस्यापि पिनाकपाणे धैर्यच्युतिं के मम धन्विनोऽन्ये'। पञ्चेन्द्रियाणि आयत्तीकर्तुं मम पञ्चशराणामावश्यकता। पुष्पाण्येव तानि भवन्तु पञ्च शराणि" इति सः अन्वगृह्णात्। तदाप्रभृति कामदेवः पञ्चपुष्पबाणः अभवत्।

कुसुमबाला भृङ्गमालिलिङ्ग। "भवतैव किल ममैषा सुस्थितिः प्राप्ता' इत्यन्वनयत्सा। भृङ्गश्च तामनुरागिणीं सोल्लासं चुचुम्ब।

"कामदेवस्यायुधीभावो नाम स्वप्नेऽपि अप्राप्यसाध्यम्। यदि मम दैन्यं नापाकरिष्यत, तर्हीदमनुत्तममुच्चैः पदं नावाप्स्यत। तच्च दैन्यं भवानपाकरोत्। सर्वमिदं सौभाग्यं भवद्दत्तम्। किं वा प्रियमुपहरिष्यामि भवते! मयीदं मधु वर्तते। इतः प्रभृति भवते इदं समर्प्यते। भवद्द्वारा अन्येऽपि इदमास्वादयन्तु"— कुसुमबाला सानन्दबाष्पमगदत्। भृङ्गः कुसुमकन्यकाया मृदुदलं परिचुम्ब्य मधु आस्वादयन्मत्तः मधुरं सङ्गीतं ससर्ज। तच्चैवं श्रूयते:—

"चित्रैर्वर्णवरैर्जनस्य नयनानन्दं विधत्से प्रिये!
सौरभ्येण च कुत्र को वितनुते घ्राणसुखं त्वदृते।
प्रस्निग्धैर्मृदुलैर्दलै रचयसि स्पर्शे सुखं प्राणिनां
अन्तर्वासियुवद्विरेफसुहृदां गीतैः श्रुतिं सेवसे॥
प्रातः पात्रमिव प्रभूतमधुना पूर्णा रसे रोचसे
रोदस्योस्सुमनोजनैः कुसुमिनि! स्थाने परं स्तूयसे।
मारस्यामितवैभवस्य च भवस्यस्त्रं जगन्मोहनं
किं वेतः परमं प्रसून! शरदां पारे शतं जीवतात्॥"

## तव मुखे

(दीनानाथत्रिवेदी 'मधुपः' जयपुरम्)

आसीत् कश्चनैको महाशयः। तस्य 'तव मुखे' इति कथनस्य प्रकृतिरेवाभूत्। अतएव स्वभावपरवशेन तेन प्रतिवाक्यमेव 'तव मुखे' इति प्रयोगः क्रियते स्म।

एकदा तस्य सेवकः कुत्रचिदगात्। अधिके विलम्बे जातेऽपि यदा स गृहं न प्रत्यागतवान् तदा महाशयोऽयं तमन्वेष्टुं गृहादुदचलत्। पथि एव तस्य मित्रममिलत्। मित्रस्य चैतन्नासीद्विदितं यदेष प्रतिवाक्यमपि 'तव मुखे' इति मुहुर्वदतीति। यतो हि सः स्वल्पेनैव कालेन समजायत तेन परिचितः।

मित्रेणोक्तं—क गम्यते?

महाशयः— सखे! किं बोधयामि 'तव मुखे' अद्य मम सेवकः कुत्रापि यातः। 'तव मुखे' चेदानीं तमन्वेषयामि। यदि स 'तव मुखे' मेलिष्यति चेत् 'तव मुखे' इयतीश्चपेटिका दास्यामि, येन 'तव मुखे' मम कराङ्गुलीनां चिन्हानि स्पष्टमङ्कितानि भविष्यन्ति। एतच्छ्रुत्वैव तेन मित्रेण स महाशयः करपादाघातैस्तथा सन्ताडितोऽभूत्, येन तस्य शरीरस्य सन्धयः शैथिल्यमभजन्। परं यदैव तस्य सखा विज्ञातवानिदं यत् 'तव मुखे' इति कथनस्यास्य स्वभाव एव वर्तते इति तदा तु सर्वेऽपि तत्रस्थाः जना अप्युच्चैरहसन्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृतछात्रैः समवधातव्यम्

( ले० पं० चण्डीप्रसाद शर्मा "दाधीच" व्या० सा० सांख्ययोगाचार्यः, हिन्दीसाहित्यरत्नम्
श्रीमहाराजागङ्गासंस्कृतविद्यालयः बीकानेर )

अयि निलिम्पवाणीसमुपासकाः !

स्वतन्त्रेऽस्मिन् पवित्रतमे भारते भवतां संस्कृतभाषां प्रति किं कर्तव्यं वर्वर्तीति न समेषां छात्राणां तिरोहितम्। विदितमेवेदं भवतां यत्—राजकार्ये संस्कृतभाषा न प्रयुज्यतेऽस्मिन् युगे। यास्कसमये यस्याः सर्वत्र विपुलप्रचारत्वं राष्ट्रभाषात्वञ्चासीदिति "नादिन्याक्रोशे पुत्रस्ये" त्यादि भगवतः पाणिनेः सूत्रैः स्पष्टमेव प्रतीयते। स्वीक्रियते च विश्वमान्यैः विद्वत्पुंगवैः। परं चेदानीमेतस्याः स्थितिरस्ति केवलं ग्रन्थेषु, तीर्थेषु, संस्कारेषु, धर्मपाठेषु, क्वचिद् दर्शनविवादेषु, अथवा वृत्त्यर्थमितस्तत आहिण्डमानानां संस्कृताध्येतॄणां मुखेषु वा।

पाश्चात्त्यशिक्षादीक्षितानां भारतीयम्मन्यानां तु मतमेवेदं यदेषा संस्कृतभाषा मृता नष्टा वा। स एवाऽयमस्माकं पवित्रतम आर्यावर्तः, ते एव हि परशुरामकल्पा ब्रजन्मानः, ता एव हि पाठशालाः परञ्च क्व गतं तदस्माकं ज्ञानगौरवं, येन अस्माकं देशः 'सुवर्णचटका' (सोने की चिड़िया) इति व्यवह्रियते। पुरा देशस्यास्य ज्ञानसमृद्धिं समाकर्ण्य सुदूरदेशान्तरतोऽपारपारावारं समुल्लङ्घ्याऽपरिमितं कृच्छ्रमनुभूयापि विद्याग्रहणाय समागुपतिष्ठन्तेस्म द्वीपान्तरस्था जना इति कस्य सत्यभारतीयस्य मन्तव्यं न भवेत्। परमद्यत्वेतु अस्माकं छात्राः दार्शनिकशिक्षाग्रहणाय वैदेशिकमुखमवलोकयमाना दृश्यन्ते, मन्यते चात्मानं कृतकृत्यम्। परस्सहस्रैः आघातैः संस्कृतछात्राणां या दशा वर्तते, वर्तिष्यते चिराय यवनार्याणामेतेषां समुन्मूलने यदि भवतां न भवेत् उद्योगः।

संस्कृतभाषाया एतादृशी गर्हिता दशा कथं सञ्जाता, किञ्चात्र निदानमिति लक्ष्यीकृत्य विचार्यमाणे इदमेव दृष्टिपथमायाति यत् पारतन्त्र्यं भजतामस्माकं एषा स्थितिः समजायत। परञ्चाद्य भारतभूमिः स्वाधीना जनतंत्रा च वर्तते। लोकनिर्वाचिता देशभक्ता एव तस्याः शासनं संञ्चालयन्ति। परमसौभाग्यञ्चास्माकं भारतीयानां यत् विश्व-वन्द्यस्य महात्मनो गान्धिनः सततप्रयत्नैर्नष्टाऽस्माकं पारतन्त्र्य-श्रृंखला। स्वातन्त्र्यञ्च वयं सर्वे अनुभवामः, लोकतन्त्रे तिष्ठामः, नास्ति कोऽपि विघ्नः सम्प्रति संस्कृत-प्रचारमार्गे।

यदि स्वतन्त्रेऽस्मिन् भारतवर्षेऽपि पवित्रतमा वन्द्या भारत-भारतीयं यथास्थानं भवद्भिर्न संप्रतिष्ठापिता तर्हि मन्ये—"तस्याजननिरेवास्तु जननीक्लेशकारिणः" इतिमाघ पद्यानुसारेण न भवतां जन्मसाफल्यम्। अतः कैः कैः साधनैः कैः कैः प्रयत्नैर्वा संस्कृतभाषा पुनरपि व्यवहृता पूजिता च भवितुं शक्नोतीति सर्वैरपि संस्कृतच्छात्रैः संभूय विचारणीयम्। एतेषामतिप्राचीनतमानां जरठानां प्रयत्नैर्न किञ्चिदपि भवितुं शक्यते। चिरात् दीनदीना जीर्णा संस्कृतभाषा सत्पुत्राणां भवतां नवयुवकानां मुखानि वीक्षमाणा उच्छ्वसिति।

मेधाविनः !

प्रचारकालोऽयं, आन्दोलनयुगे च वर्तामहे, अकृतोपद्रवो न महत्तरोऽपि पूज्यतेऽस्मिन् कलाविति दृढतरं निश्चित्य भवद्भिरपि दृढसङ्कल्पैर्भूत्वा तथा प्रयत्नोऽनुष्ठेयः। यथेयं स्थविरतरा वन्द्या जननी गीर्वाणवाणी स्वोचितं परमासनं लभेत। नैतत् कदापि विस्मर्तव्यं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भवद्भिर्यत् महाकष्टं सोढ्वा बुभुक्षितैः पिपासितै गृहवा-सादिरहितैः तपोवर्तिभिर्विद्वद्वरेण्यैः परमास्कन्दयवन-समयेऽपि संस्कृत-संस्कृतिनिधिरयं भवदर्थं संरक्षितः।

भवन्वश्च यद्यस्मिन् काले निजकर्त्तव्यं न पालयिष्यन्ति तर्हि मन्ये—"संभावितस्य चाकीर्तिर्मरणादतिरिच्यते।" इति श्रीकृष्णवाक्यानुसारं भवतां का गतिर्भविष्यतीति नवयुवकै र्भवद्भिरेव सम्यग् विचारणीयम्।

नितान्तखेदस्य विषयोऽयं यदत्र भारते चारित्र्यमेवैकं प्रमुखतत्त्वम् आसीत् तस्मिन्नेवाद्यास्माकं देशे सत्स्वपि देशभक्तेषु भवत्सु छात्रेषु, अध्यापकेषु, व्यापारवर्गे, राजवर्गे, अन्यत्र सर्वत्रापि नैतिकत्वाभावो मुहुर्मुहुर्दृष्टिगोचरः क्रियते। अतो गर्हितस्यास्य दोषस्य निराकरणाय संस्कृतभाषायां समुपलभ्यमाना अहिंसासत्यास्तेयादि साधारणधर्माः, नैतिकत्वस्योपदेशाश्च निर्भयैः भवद्भिर्न केवलं भारते एव अपितु सर्वत्र संसारे प्रचारणीयाः। येन—एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः, इतिमानवधर्मशास्त्रीयवाक्यं पुनरपि भारते क्रियान्वितं स्यादिति मे सती मतिः।

"संस्कृतभाषायाः समुद्धारं करिष्यामः, प्राणान् वा त्यक्ष्यामः" इत्येवं पवित्रं लक्ष्यं निर्धार्य यदि यशोधनाः सर्वेऽपि सुरसरस्वतीसमुपासका भवन्तो यत्नं करिष्यन्ति तर्हि अवश्यमेव देवैः संसेविता, पवित्रैः ऋषिभिः सुसंस्कृता, पाणिन्यादिमुनित्रयेण सुव्यवस्थापिता विश्वमान्यैः कालिदासादिभिः कविवरैः अलंकृता, बहुभिः विद्वद्भिः संवर्द्धितेयं भारतभारती भूयोपि सर्वत्र भारते भास्वती भविष्यतीति आशास्महे।

प्रार्थयामहे च भगवन्तं पिनाकपाणिं यत्दयालुः स अवश्यमेव भवतां मनोरथान् सफलयिष्यतीति किमधिकं केवलं लेखेनेति विरम्यते।


# ओरिएण्ट पेपर मिल्स लि०

निर्माता

**पैकिंग के लिए :**

(क) एम० जी० रिब्ड क्राफ्ट
(ख) एम० एफ० अनरिब्ड क्राफ्ट
(ग) वाटरप्रूफ क्रैफ्ट
(घ) क्रीप क्रैफ्ट

**लिखने और छपाई के लिए :**

(क) ह्वाइट प्रिंटिंग
(ख) क्रीम – लेड
(ग) सेमी – ब्लीच्ड
(घ) अनब्लीच्ड

**● पैकिंग और रैपिंग के लिए ●**

ब्राउन रैपिंग

**बाक्स, कार्टन्स आदि बनाने के लिए**

(क) कार्टन बोर्ड
(ख) एम० जी० ग्रे बोर्ड
(ग) एम० एफ० ग्रे बोर्ड
(घ) ट्रीप्लेक्स
(च) डुप्लेक्स
(छ) कार्टिज
(ज) टिकेट बोर्ड
(झ) कवर बोर्ड

## ओरिएण्ट पेपर मिल्स लि०

मैनेजिंग एजेण्ट्स बिरला ब्रदर्स लि०

८, रायल एक्सचेंज प्लेस, कलकत्ता–१

ओरिएण्ट पेपर आपकी और आपके उद्योग की सेवा करता है




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# आयुर्नियतमस्ति, उताहो अनियतम् ?

( लें० भिषग्मणिः प्राणाचार्यः, वैद्यमणिरामशर्मा गौड़ः श्रीगङ्गानगर )

यदा कश्चित् प्रतिभासम्पन्नः पुरुषः स्त्री वा म्रियते तदा केचन पुरुषाः तत्रागताः 'समागतोऽस्य मृत्युरिति' वदन्ति। केचन च अनुपायेन मिथ्योपचारेणाऽनु- ...न वा मृतः इति मन्यन्ते। यदा वयं अस्य प्रश्न- ...त्तरदाने शास्त्राणां पत्राण्यवलोकयामः, तदा शास्त्रे- ...द्विविधमेव पक्षं पश्यामः। सर्वेष्वेवंविधेषु शास्त्रेषु ...णां प्राणिनामायुर्नियतमस्तीति निरूपितम्, तद्द्वय- ...ध्यताम्।

"स जातो यावदायुषं जीवति इति" छान्दोग्य उप- ...दि पूर्वकृतफलानुबंधात्तदुत्पत्तिः।

...उपपन्नश्च 'तदवियोगः कर्मक्षयोपपत्तेः' इति न्याय- ...त्रे जीवन्मुक्तानां पुरुषाणां मुक्तत्वात् कथं न शरीरं ...ते? अत्र सांख्यदर्शनकारेण मुनिना कपिलेनो- ...-जीवन्मुक्तश्च १ चक्रभ्रमणवद् धृतशरीरः २ ...संस्कारलेशात्तत्सिद्धिः ३। यथा कुम्भकारेण भ्रामितं ...तद्व्यापाररहितमपि चक्रं न स्थिरतां लभते ...तु संस्कारलेशेन भ्रमत्येव, तद्वदेव मुक्तस्यापि ...।

...सति मूले तद्विपाको जात्यायुर्भोगाः' इति पात- ...शास्त्रे जात्यायुर्भोगाः कर्मफलविपाकोद्भवाः सन्ति। ...कर्माणि तु अवश्यमेव भोग्यानि भवन्ति, तदुक्तं ...सूत्रे श्रीशंकराचार्येण—प्रारब्धकर्मणां तु भोगादेव ...। तथा चाणक्येनोक्तं। 'आयुः कर्म च वित्तं च ...निधनमेव च। पंचैतानि हि सृज्यन्ते गर्भस्थ- ...देहिनः ॥१॥' गीतायां श्रीकृष्णेनाप्युक्तम्—

"मयैवेते निहताः पूर्वमेव निमित्तमात्रं भव सव्य-साचिन्।" नियतायुष्ट्वात् विगतायुषो वीराः पञ्चत्वं याताः केवलं तव निमित्तत्वमेवावशिष्यते। इत्थंप्रकारेण वाल्मीकिरामायणे रावणेन भृशं प्रतारिता जगज्जननी सीताप्याह—'लोकप्रवादः सत्योयं, पंडितैः समुदाहृतः। नाकाले म्रियते कश्चित् प्राप्ते काले न जीवति।

महाभारते यदा नलः स्वभार्यां दमयन्तीं वने परित्यज्य गतः, तदा दमयन्ती रुदन्ती विलपन्ती मार्गे कंचित् कामपीडितं वधिकं स्वपातिव्रत्यप्रभावेण दग्ध्वा कस्मिंश्चित् वने गता। तत्र वने व्यापाररतैः कैश्चित् पुरुषैः सह सा रात्रौ सुप्ता। तदैव हस्तियूथेन सर्वे ते हताः, किन्तु दमयन्ती एवावशिष्टा (न मृता)। तदा साऽऽह—नाकाले म्रियते कश्चित् श्रुतं वृद्धाऽनुशासनम्। या नाहमद्य मथिता हस्तियूथेन दुःखिता॥' माता कौशल्याप्याह—अनेन दुःखेन च देहमर्पितं ध्रुवं ह्यकाले मरणं न विद्यते। भक्तवरः तुलसीदासोप्याह—'हानि लाभ जीवन मरण यश अपयश विधि हाथ।' एवं दर्शनेषु, नीतिशास्त्रेषु, पुराणेतिहासेषु आयुर्नियतमस्तीति प्रतिपादितम्। किन्तु आयुर्वेदशास्त्रे प्राणिनाम् आयुर्न नियतमस्तीति प्रतिपाद्यते। यथा च—एकोत्तरं मृत्युशतमथर्वाणः प्रचक्षते। तत्रैकः कालसंयुक्तः शेषास्त्वागन्तवः स्मृताः॥" महर्षिः सुश्रुतः—"सति चायुषि नष्टः स्यादामयैश्चाऽचिकित्सितः। यथा सत्यपि तैलादौ दीपो निर्वाति वात्यया।" भावमिश्रः—'यदृच्छया समापन्नमुत्तार्याऽनियतायुषम। भिषग्मानी निहंत्याशु शतान्यनियतायुषाम्।" यदि हि नियतकालप्रमाण-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# 卐 काष्ठपादुकापरिधानम् 卐

( ले० श्रीदीनानाथशास्त्री सारस्वतः, विद्यावागीशः, रामदल, देहली )

काष्ठपादुकापरिधानं हि नु धर्मे महत्त्वपूर्णं मन्यते, विशेषतो ब्रह्मचारिणः पुरा पादयोः परिदधति स्म। एतदपि न विज्ञानशून्यम्। अस्मदीयाः प्राञ्चो यद् यद् वस्तु प्राशंसन्, प्रायुञ्जत च, तत्र-तत्र तैर्निगूढं विज्ञानं विचारितमासीत्। बहिस्ते तद्रहस्यमेतदर्थं न प्रकटयन्ति स्म, यद् एवं सति तन्नियमस्य महत्त्वं व्यपगच्छति। परमद्यतनसमयस्तन्नियमानां रहस्यं जिज्ञासते। तेन वैवश्येन अस्माभिरपि तद् व्यञ्जनीयं भवति; अन्यथा एष समयस्तु तान् नियमान् व्यर्थान् आकलयति; तन्नियामकाँश्च बालिशान्।

काष्ठपादुका एतदर्थं स्थाप्यते स्म यद् अहिंसाप्रिया आस्माकीनाः प्राञ्चोऽवगच्छन्ति स्म यद्—अधिकांशे गवादिवध उपानत्कारणादपि भवति, योऽद्यत्वे प्रत्यक्षः। इतश्च जना मृदुचर्माभिलषन्ति पादयोर्म्रदिम+स्थापनाय। तदर्थं जीवितपशूनां दुर्दशाया हिंसा भवति—एतदादि-हिंसादूरीभावाय ते काष्ठपादुकां न्ययमयन्। मृतकचर्म-स्पर्शेन ❀ च शरीरमपि अशुद्धं तिष्ठति इति ते विदन्ति स्म। इतश्च ते एतदपि विदुर्यत् पादुकास्थितपुरुषस्यो-परि विद्युद् न पतति। परिहितोपानत्को जनो यदि प्रमादात् विद्युतं स्पृशेत्, तर्हि विद्युत् तस्मिन् संक्रम्य तं हन्ति; परं काष्ठपादुकायुक्ते तु तत्प्रभावो न जायते। स्नानं कृत्वा च तत्परिधातुः शरीरे पार्थिवविद्युदपि न संक्राम्यति, तेन च शरीरं स्वस्थं तिष्ठति। इतश्च तत्कीलकेन पादांगुष्ठनसा नम्यते, तेन ब्रह्मचारिणो गृहस्थस्य वा प्रबला कामोत्तेजना न तिष्ठति, परमुपा-नद्धारणात्तु पादयोरंगुष्ठे पृष्ठे च या शिरा भवत्याक्रा-न्ता, सा कामविवर्द्धिनी भवति। स्त्रीषु कामशक्तिः प्रबला भवति पुरुषापेक्षया, अतः स्त्रिय उपानहं धार-यित्वा प्रतिक्षणं कामातुरा भूत्वा नोत्पथगामिन्यो भवन्तु, एतदर्थं प्राञ्चस्तासामुपानद्धारणं प्रशस्तं न मन्यन्ते स्म, तासां च पादाङ्गुष्ठे रजतभूषणानि परिधापयन्ति स्म; येन तासां सा कामजननी शिरा दान्ता× तिष्ठेत्।

---

मायुः सर्वं स्यात्तदाऽऽयुष्कामाणां न मंत्रौषधिमणिमंगल-बल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणि-पात-गमनाद्याः क्रियाः इष्टश्च प्रयुज्येरन् न प्रवृद्धोऽग्निर्न च विविधविषाश्रयाः सरीसृपोरगादयः, न प्रपात। गिरिविषमदुर्गाम्बुवेगाः परिहार्याः स्युः। नापीन्द्रो नियतायुषं शत्रुं वज्रेणाभिहन्यात् इति चरकः। एवं दर्शनशास्त्रे आयुर्वेदशास्त्रे च परस्परं विरोधाभासः प्रतिभाति। कथमेतस्य परिहार इति विद्वद्भिः विचार्यं समाधेयं च।

---

+म्रदिमः ; नकारान्तोऽयं शब्दः। ❀ स्पर्शेन। अत्र णत्वप्राप्तिर्नास्ति। × दान्ता—शान्ता।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# पुस्तकालोकः

भगवत्याः संस्कृतसरस्वत्याः संप्रति भारते विचित्रा स्थितिः। यदवधि भारतं स्वतन्त्रमित्याख्यायते ततः प्रभृति संस्कृतस्य प्रचारः प्रकर्षेणाऽपचीयत इति फलेन चिनुमः। परतन्त्रतया अपवादपात्रतां नीते आङ्गलानां शासनकालेऽपि भारतेऽस्मिन् संस्कृताऽध्यापनस्य यावत्यः संस्था आसन् वर्तमानकाले ततो न्यूनतराः संवृत्ताः। नामतः स्थितास्वपि संस्कृतप्रचारसंस्थासु तासु क्रमतोऽध्ययनाऽध्यापने नितरां न्यूनीभूते। शासनाधिकारिणः प्रजानामग्रतो निजाभिभाषणेषु भारतीयसंस्कृतेः संस्कृतस्य च भृशं गीतानि गायन्ति किन्तु कार्यद्वारा तत्परिमाणो नाऽद्यापि दृष्टः। फलमिदं जातं यत् संस्कृतस्य चिरंतनेष्वपि प्रचारकेन्द्रेषु संस्कृतभारती कृशतरा संवृत्ता। वैरल्यदशायां चैवं, शिक्षाक्रमे नवीनता प्रवृत्ता। सहैव च तया, यथेच्छं विशृंखलतापि स्थानं लेभे।

संस्कृतभाषा सेयं कठिनेतिकृत्वा तत्तत्प्रदेशीयैः शिक्षाकर्णधारैः सरलतानिमित्तं नानाप्रकारैः संक्षेपः प्रारब्धः। व्याकरणस्य दशलकारेषु (वर्तमानभविष्यदादिकालसूचकेषु लडादिषु) लट् लृट् लोट् लङ् लिङ् इति पञ्चलकारात्मकः 'अर्द्धावशेषः क्राथः' प्रवर्तितः। पदानां परस्परं सन्धौ अपि कठिनता भवतीति निःसंधिकान्येव पदानि प्रयोक्तुं प्रारब्धानि। एवं किल नितरामुद्घातीनि भूयस्तरामुच्चावचेऽस्मिन् संस्कृतसरस्वत्याः प्रगतिपथे कृतधियामपि संस्कृतसेवकानां मनसि नानासंशयाः समुद्भूता यत् केन मार्गेण संप्रति संस्कृतसरस्वती प्रवर्तनीया। कथं चाऽस्यां सारल्यमापादनीयम्। कः स्यात्पाठ्यक्रमः, का च शैली भवेद्भाषायामिति संस्कृतशिक्षाक्षेत्रे चिरात्कार्यं कुर्वतामपि समवाये समवर्तत विविधा विचारगोष्ठी। एवं वैषम्यमये समये संस्कृतसरस्वत्यामस्यां के साधवः शब्दाः प्रचारणीयाः, असाधवः के चापशब्दाः निवर्तनीया इति विचारमयी प्रवृत्तिः संप्रति संस्कृतकार्यकारिणां विदुषाम्। एतस्मिन्नेव समये—

## शब्दापशब्दविवेको

नाम ग्रन्थोऽस्माकमुपयातो दृष्टिगोचरम्। एतस्य निर्माता प०श्रीचारुदेवशास्त्रिमहाभागः। एष हि भारतप्रसिद्धे 'कालेजे' चिरात्संस्कृताऽध्यापनानुभवी। उपसर्गार्थचन्द्रिका—वाक्यमुक्तावलि—व्याकरणचन्द्रोदयादि—व्याकरणग्रन्थानां प्रणेता। वाक्यपदीयस्य संस्कर्ता। अतएव शब्दापशब्दयोर्विवेके नीरक्षीरविवेकी हंस इव प्रशंसनीयः सोयं संसिध्येदिति को वा नाऽऽशासीत। महाभागोऽयं राजस्थानीयसंस्कृतसेविनामपि नाऽपरिचितः। एष हि पुरा जयपुरात्प्रकाशमाने 'संस्कृतरत्नाकरे' व्याकरणस्य धातुविषयमादाय मार्मिकं निबद्धवान्नूनम्।

पुस्तकमिदं 'भारती' पत्रिकायाः प्रबन्धककार्यालये किञ्चित्कालात्पूर्वं जातु समागतं स्यात्, किन्तु मम हस्तगतस्याऽस्य व्यतीतानि कतिचिद्दिनान्येव। पुस्तकस्यास्य नाम्ना च भवेदेव विदितं पाठकानां यद् ग्रन्थस्यास्य वर्ण्यविषयः संस्कृतभाषाशब्दानां साधुत्वविनिर्णयः। संस्कृतभाषायाः शब्दराशिश्च तावान् विस्तृतो यस्य हि पारायणं कुर्वन् बृहस्पतिसदृशोऽपि प्रवक्ता वर्षशतेनापि नान्तं जगाम। ततश्चैतद्विषयको विचारः सर्वोऽपि सहसैव संप्रकाशयितुं सुशकः स्यादिति साध्यं नास्त्येव। पत्रिकायाः कायोऽपि न तथा विस्तृतः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अतएव यथावकाशमेतद्विषयिणीयमालोचना शक्येत पाठकानां पुरतः संप्रकाशयितुम्।

ग्रन्थोऽयं 'श्रीचारुदेवेन शास्त्रिणा' प्रणीतः, किन्तु 'जालन्धरस्थैः 'भारतीयसंस्कृतभवन'स्वामिभिः श्रीकृष्णानन्दशास्त्रिभिः' स्वव्ययेन प्रकाशितः। मूलग्रन्थः ३२५ पृष्ठमितः, 'भूमिका-निवेदनां' च ५५ पृष्ठात्मिका। पुस्तकस्य मूल्यं मुखपृष्ठे नास्ति मुद्रितं किन्तु लेखन्या लिखितमस्ति 'मू० ५)'। अतएव पञ्चभिर्मुद्राभिः सोयं ग्रन्थः प्रकाशकस्य समीपात्संग्राह्यः। ग्रन्थोऽयं—संस्कृतभाषाया व्यवहारः (शब्दप्रयोगः) कथं प्रवर्तनीय इत्यस्य विवेचनार्थं प्रणीतो ग्रन्थकृता। तथा हि प्रारम्भभूमिकायां प्रोक्तं ग्रन्थकारेण "इह वयं वाग्व्यवहारमधिकृत्य किञ्चित्प्रस्तुमः। न खलु यथा तथा प्रवर्तमानो वाचो व्यवहारो नो विमर्शस्य विषयः। सामान्येन तेन विमृष्टेन नार्थः। न चापि यस्याः कस्याश्चिद् वाच एव स विवक्षितः। किं तर्हि पारम्पर्यागतः शिष्टाभ्यनुज्ञातः संस्कृतव्यपदेशभाजो दैव्या वाचो विशिष्टो व्यवहार एवाभिप्रेतः। यानि यथा वा पदानि शिष्टैरुच्चार्यन्ते तानि तथैव साधूनि भवन्ति। तथा साधुत्वमभ्युपेत्य चेतरैरप्यनुवृत्त्यानि भवन्तीत्यत्र 'पृषोदरादीनि यथोपदिष्टम्' इति सूत्रकारवचनमेव मानम्।" इत्यादि।

ग्रन्थस्य भाषा प्रौढा, आर्षी भाष्यशैलीमनुगच्छतीति उपरिनिदर्शितेन उद्धरणेन किञ्चित्परिचीयेत मार्मिकैः। प्रणेता शास्त्रिमहाभागो व्याकरणस्य मार्मिकः, तस्य प्रकामं भक्तः, संस्कृतसाहित्ये चापि नितान्तं प्रौढिशाली। एतद्ग्रन्थनिर्माणायाऽपि शास्त्रिमहोदयेन साहित्यस्य भूयांसो ग्रन्था अनुशीलिता इति मर्मस्पृशो विद्वांसो जानीयुरुदाहरणदानेन। तत्तत्परीक्षोत्तरणायैव ये संस्कृतभाषामधीयते तेषां कथा दूरे। किन्तु ये संस्कृते प्रविश्य मार्मिका विद्वांसो भवितुमिच्छन्ति, तेषां कृते सोयमवश्यमुपकारको भवेद् ग्रन्थ इति जाने। मुखपृष्ठे लिखितमपि ग्रन्थकृता— "तत्तत्प्रयोगसाधुत्वचिन्तने बुद्धिवैशद्यकारकश्छात्राणामुपाध्यायानां च समसुपकारको ग्रन्थविशेषः।"

पूर्वार्द्धोत्तरार्द्धेति ग्रन्थस्य द्वौ भागौ। तत्र पूर्वार्द्धे व्याकरणानुसारं प्रकरणानि विभज्य, व्याकरणसिद्धानि तानि पदानि वाक्ये कथं प्रयोज्यानीति उदाहरणद्वारा प्रबोधयति ग्रन्थकारः। उत्तरार्द्धे तु—पूर्वार्द्धे यानि वाक्यानि प्रयुक्तानि, तेषां साधुत्वाऽसाधुत्वे विवेचयति ग्रन्थकृत्। प्रतिवाक्यं च १-२-३ इति संख्या दत्ता। एतत्संख्यानुसारं तत्तस्मिन् प्रकरणे तत्तेषां वाक्यानां साधुत्वमसाधुत्वं वा उत्तरार्द्धे ज्ञातुं शक्नुयात्पाठकः। पूर्वार्द्धे तत्तस्मिन्प्रकरणे प्रारम्भे नेदं सूचितं ग्रन्थकृता यदयं प्रयोग पूर्वपक्षविधयैव समुद्धृतो ग्रन्थे, न सिद्धान्तरूपेण। अतएव 'सम्यगयं प्रयोगः' इति भवति कृतधियामपि भ्रमो नूनम्। यथा 'लोका लोभाय धर्मस्य बलिं ददति प्रायेण'। यतो हि 'लाभस्याग्रे सत्यस्य बलिं ददति धनिकाः' इत्यादिव्यवहारः प्रचलितः प्रायेण। किन्तु ग्रन्थकारः शिक्षयति—'धर्मं बलिं ददति' इत्येव साधु। रूपकालंकारोऽत्रानुवृत्यः। किञ्च पूर्वार्द्धे दत्तस्य वाक्यस्य साधुत्वाऽसाधुत्वविवेचनार्थं बहुतरमन्वेषणं कर्तव्यं भवति। यतो हि यत् शीर्षकं पूर्वार्द्धे दत्तम्, तदपेक्षया परिवर्त्य विवेचनाप्रकरणे दत्तं शीर्षकमन्यथैव। यथा पूर्वार्द्धे शीर्षकम्—"व्यवहारतो विवेच्यानि पदवाक्यानि", किन्तु उत्तरार्द्धे शीर्षकं जातम्—"पदवाक्यव्यवहारविवेचनम्"। अर्थोऽवश्यमेक



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



एव। किन्तु वर्तमानकालिकाश्छात्राः ( येषां कृते ग्रन्थ-प्रणयनस्य परिश्रमः ) सहसैव परिचिनुयुस्तदिदमिति संशयास्पदमेव।

ग्रन्थे 'संहितायां विवेच्यानि' ( यस्य अवान्तरप्रकरणानि अच्सन्ध्यधिकारः, हल्सन्ध्यधिकारः, इत्यादीनि) स्त्रीप्रत्ययेषु विवेच्यानि' इत्येवं रूपेण द्वादश-त्रयोदश-विधानि प्रकरणानि। 'प्रकरण' प्रकरणेऽपि कुत्रचित्प्र-चलितं व्यवहारमतिक्रामति ग्रन्थशैली। यथा—'उप-ग्रहाधिकारः'। अत्र परस्मैपदात्मनेपदप्रक्रियेति ग्रन्थ-कर्तुराकूतम्। किन्तु 'उपग्रह' शब्दोऽयम् एतदर्थवृष्टौ उपग्रह एव। ग्रन्थकारो व्याकरणविषये मार्मिकस्तस्य नितान्तं भक्तश्चेति पूर्वमुक्तवानस्मि, किन्तु बहुत्र व्याकरणस्य यष्टिमादाय लोकव्यवहारं बलात् प्रहेल-यितुमिच्छतीव ग्रन्थकार इति प्रतीतं भवति। 'मासस्यावकाशमादाय स गृहं गतो बन्धून् द्रक्ष्यामि, तैः सह रंस्यामि च" इति वाग्व्यवहारोऽयं सर्वतः प्रचलितः, किन्तु ग्रन्थकारो बलात्प्रेरयति—"मासमवकाशं गृहं गतः" इत्येव प्रक्तव्यम्। यतो हि 'अत्यन्तसंयोगे द्वितीया' इत्यस्त्यनुशासनम्। यस्य व्यवहारस्य जनतया सह चिरकालात् अत्यन्तसंयोगः, तं विस्मृत्य इमं व्याकरणस्य अत्यन्तसंयोगं बलाद् गृह्णातु जनतेत्याग्रहो ग्रन्थकारस्य।

"प्रद्वेषप्रयुक्ता यवनाः सोमनाथमूर्तिं प्राहार्षुः"। अत्र सप्तमी प्रयोक्तव्या [ अर्थात् सोमनाथमूर्तौ इति ] इत्यादेशो ग्रन्थकर्तुः। कारकप्रकरणे चिरात्प्रसिद्धिरियं विवक्षाधीनानि कारकाणि भवन्तीति। किन्तु ग्रन्थकारः प्रयोक्तुरिच्छां व्यामोहयितुमिच्छति। चिरात्प्रचलित-स्तथैवं व्यवहारः— 'बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति' इत्यादिः।

"संस्कृतपण्डितान् विहाय नान्येऽस्योपरि विचारयन्तीति खेदः"। तदिदं वाक्यं व्यवहारतः शुद्धमेव। 'एतस्योपरि गवेषणा जाता' 'एतदुपरि भूरि विचारितमस्माभिः', इत्यादिर्व्यवहारः प्रचलितो लोके। किन्तु ग्रन्थकारः प्रतिषेधति, नैवं वक्तव्यम्। किन्तु—"नान्ये इदं विचारयन्तीति वक्तव्यम्।" कारणमाह ग्रन्थकृत्—"अनुकृतिरियं लोकभाषायाः, बालेष्वेवोपपद्यते, न प्रौढेषु।" संस्कृतमिदं लोकभाषा भवेदिति सर्वतः प्रयतन्ते संस्कृतसेविनः, किन्तु विद्वत्समाजे यद्येवंविधा लहरिः प्रवहेत्तदा सिध्येत्किं समीहितं साधकानाम्?

बहुत्र प्रौढप्रयोगप्रवृत्त्या दुर्बोधान् शब्दान् प्रयुङ्क्ते शास्त्रिमहाभागः। यथा "नक्तं दिवं श्राम्यन्नपि देवदत्तः परीष्टिं नाऽपीपरत"। अत्र 'अपपारत्' इति वक्तव्यमिति विवेचनं ग्रन्थकर्तुः। किन्तु 'परीष्टि' पदेन 'परीक्षार्थं' प्रत्येकप्रौढोऽपि प्रायो न प्रबुध्येत। "अपि त्वं पर्यविन्दो दारान्? अहो अन्याय्यमेतत्।" अत्र सर्वलकारविषयेऽपि 'परिविन्दसि' इति लडेव वक्तव्यः, इति हि संशोधनं ग्रन्थकर्तुः। किन्तु 'पर्यविन्दः' इति पदेन 'ज्यायांसं भ्रातरं परित्यज्य त्वं दारान् अविन्दः' अयमर्थो विदुषाऽपि न सहसा बोद्धुं शक्यः। यतो हि "परिवेत्ताऽनुजोऽनूढे ज्येष्ठे दारपरिग्रहात्" इति 'परिवेत्ता' शब्दस्यैव सोयमर्थो निरूढः, नायं परिपूर्वेण 'विद्लृ' धातुना यस्मिन् कस्मिन्नपि लकारे बोद्धुं शक्यः, शब्दस्वाभाव्यात्।

अस्तु, ग्रन्थमिममालोक्य सुप्रसन्ने मम मनसि यत्किञ्चिदिदमुद्भूतं तन्निर्मायभावेनावेदितं मया। ग्रन्थोयं भूयस्तरामुपकारको भवेत्संस्कृतमधीयानानां नूनम्। एवंविधविवेचनाग्रन्थस्यैतावत्कालमासीच्चावश्य-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सम्पादकीयम्

**स्वतन्त्रतादिवसः**—अगस्तमासस्य पञ्चदशी १५ तारिका भारतीयस्वतन्त्रताया जन्मदिवसः । अस्मिन्नेव दिने भारतेनानेन स्वातन्त्र्यमुपलब्धम् । भारतीयस्वातन्त्र्यस्य सेयम् अष्टमी वर्षग्रन्थिः । अस्मिन् दिने भारतराजधान्यां देहल्यां 'रक्तदुर्ग'संमुखस्थे प्राङ्गणे नागरिकाणां सार्वजनिकी महती सभा सममिलत् । दुर्गात् प्रमोदसूचकाः 'तोभ'ध्वनयः प्रातरेवोत्कर्णानकार्षुर्नागरिकान् । सप्रमोदं समागतेन भारतप्रधानमन्त्रिणा भारतीयध्वजारोहणं वन्दनं चाऽकारि । तदनन्तरं श्रीप्रधानमन्त्रिणा जनतायाः संमुखे स्वीये भाषणे भारतीयनीतेः शान्तिप्रधानता सार्वजनिकी एकता च सूचिता । गोआप्रान्ते जायमानां पुर्तगालोयानां क्रूरतां प्रत्यक्षमालोकयमानमपि भारतं सहसैव उत्कटतापूर्णं पदन्यासं न नाम कर्तुमभिलष्यतीति बहुधा सूचितवानसौ ।

एवमेव राजस्थानराजधान्यां जयपुरेऽपि प्रातरष्टवादने सचिवालयस्य प्राङ्गणे एकत्रिंशत्तोभध्वनीनां घोरगभीरे निनादे सर्वतः संचरत्येव राजप्रमुखः श्री भीमसिंहो राष्ट्रीयध्वजं सप्रमोदं प्रास्फोरयत् । संजायमानां सैनिकसज्जाम् ('परेड') च निरैक्षत । निजभाषणे स्वातन्त्र्यप्रमोदस्य शान्तिमयतामसूचयत् । नगरस्य स्थानस्थानेषु प्रजानां प्रमोदसभाः समभवन् । नगरस्य चतुष्पथ्यां (माणिक चौक) नागरिकप्रजामण्डलद्वारा साधारणसभा सममिलत् । नगरे त्रिपोलियागोपुरे, स्वर्गशूल्याम् तथा नाहरदुर्गे च विद्युद्दीपमालिकायाः सुमहान् प्रकाशः समभवत् । सोयं स्वतन्त्रतादिवसो भारतीयप्रजानां सुखकारकः, उत्तरोत्तरं सर्वविधसुखसंपत्तिदायकश्च भूयादित्याशास्महे ।

---

कतेति ग्रन्थमिमं हृदयेनाऽभिनन्दामि । शोधनाऽनवधानकृता मुद्रणाऽशुद्धयस्तु भृशं खेदयन्ति । द्वितीयसंस्करणे निराकरणमेतासामवधानेन भवेदिति वाञ्छामि । विमर्शग्रन्थे एवंविधा अशुद्धयो नितरां भ्रामिका भवन्तीति विरमामि विस्तरात् ।

—

## गोआ-सत्याग्रहः

'गोआ' प्रदेशे पुर्तगालीयानां शासनं बहोः कालात्प्रचलतीति तच्छासकाः प्राहुः । किन्तु १५८० तमे ख्रिष्टवत्सरे पुर्तगालप्रदेशोपरि 'स्पेन' राष्ट्रस्य प्रभुत्वे संजाते शनैः शनैः पुर्तगालाऽधिकृताः सर्वेऽप्युपनिवेशाः पुर्तगालीयानां हस्तात्प्रच्युताः । केवलं सुदूरतमेऽस्मिन् भारते योऽयमुपनिवेशो गोआप्रान्ते समभूत्स एव तच्छासनेऽवशिष्टोऽभूत् । एतद्वासिभिर्मनुजैः १९४६ तमाद्वत्सरान्निजस्य स्वातन्त्र्यार्थमहिंसात्मकः सत्याग्रहः प्रारब्धोऽभवत् । नासौ स्वातन्त्र्यकामना अद्यतनी ।

पक्षपातशून्याः ये किल वैदेशिकाः सन्ति तैरपि स्वीकृतं यद् गोआप्रदेशीयानां भाषा कोंकणप्रदेशीया । सेयं वसतिः सांस्कृतिक्या आर्थिक्या च दृष्ट्या सुस्पष्टं भारतस्याऽङ्गभूता । अत्रत्या जनतापि प्रतिशतं समतिपरिमिता इदमेव वाञ्छति यत्सेयं वसतिर्भारतान्तर्गता भवेत् । किन्तु जन-भावनायाः सुस्पष्टमवहेलां कृत्वा पुर्तगालीयैः सोयं प्रदेशो बलान्निगृहीतः । एतावत्कालमनेके राष्ट्रवादिनो गोआप्रदेशीयाः सत्याग्रहिणः पुर्तगालीयशासकैर्मृत्युमुखे समर्पिताः । बहवश्च कारागारे



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...द्धाः । भारतस्य स्वातन्त्र्यप्राप्तेरुत्तरं देशे स्वातन्त्र्य-...ना प्रबलतरं जागृता । अतएव केवलं गोआप्रदेश-...वर्तिन एव न, अपि तु भारतस्य सुदूरसुदूरप्रान्त-...नोऽपि गोआप्रदेशीयानां साहाय्यार्थं सर्वसंकटानि ...त्वाऽपि स्वातन्त्र्यप्राप्तौ समवेताः । वर्तमानकाले ...तया तत्र जनमतं संघटितं वर्तते ।

भारतसर्वकारोऽपि १९५० तमाद्वत्सरादेव प्रयत्न-...नोऽस्ति यत् लिस्बनशासका एतत्प्रदेशानां भारता-...नसंबन्धे उभयसंमतं किञ्चित् माध्यस्थ्यं ...मझौता ) स्थिरीकुर्युः । भारतसर्वकारेण तदिद-... स्मारितमासीद् यत् लिस्बनशासकतन्त्रं यदि ...न्त्रं तर्हि 'राष्ट्रसंघस्य' निरीक्षणे एतासां वसतीनां ...स्याऽपि संग्रहः कर्तुं शक्यः स्यात् । फ्रांसाधि-...मुपनिवेशानां दृष्टान्तोऽपि तेषां संमुखे सुस्पष्ट-...न, किन्तु लिस्बनसर्वकारेण शान्तिपूर्णाः सर्वेऽपि ...याचा अवहेलिताः । जानन्ति किल विचारशीला यत् निजानुमतायाः शान्तिनीतेरनुसारं भारतसर्वकारेण एतत्समस्यायाः समाधानार्थं हिंसात्मकः कश्चिन्मार्गो नाऽद्यापि स्वीकृतः । अतएव गोआप्रदेशीयया जनतयाऽपि अहिंसात्मकः सोयं सत्याग्रहः अन्तिमोपायत्वेनाऽवलम्बितः । मन्ये, लिस्बनसर्वकारः साम्प्रतमपि शान्तेर्दूरवर्ती न भवेत् । गोआप्रदेशीया राष्ट्रवादिनस्तु सुदृढामाशां कुर्वन्ति यत् धर्मयुद्धेऽस्मिन् तेषां विजयो निश्चितं भावी, इति ।

खेदस्य विषयोऽस्ति यत् १२ अगस्तदिवसे ये निःशस्त्राः निरीहाः सत्याग्रहिणः स्वतन्त्रतायै शान्तिपूर्वकं पुर्तगालाधिकृतप्रदेशे प्रवेष्टुमवाञ्छन् ते पुर्तगालसैनिकैः गुलिकास्त्रप्रहारेण पशुमारं मारिताः । पञ्चविंशतिप्राया जना मृत्युमभजन्त । निःशस्त्राणामुपरि सोयं नृशंस-हत्याकाण्डः पुर्तगालसर्वकारस्य कृते भृशं लज्जाजनकः, अन्ताराष्ट्रीयनियमानामवहेलना सेयं विश्वजनीनमसन्तोषं जुगुप्सां च जागरयति ॥

## संघे शक्तिः कलौ युगे

[ वि० भा० मुसलगांवकर एम० ए० गुना ( मध्यभारतम् ) ]

इह खलु संसारे बलवान् एव जयति । "जीवो ...स्य जीवनम्" इति विश्वनीतिः । "नायमात्मा ...हीनेन लभ्य" इति श्रुतिः । अतः सर्वे मनुष्याः ...नः भवेयुः ।

किन्तु एकस्य जनस्य शक्तिः अतीव अल्पा परिमिता ...किन्तु संघशक्तिः अपरिमिता । संघशक्तिं पराजेतुं न ...शक्नोति । अतः कलियुगे संघे एव शक्तिः निवसति । ...मनुष्यः समाजप्रियः इति कथ्यते । अतः सः ...स्य अंगम् अस्ति । समाजशरीरात् भिन्नं तस्य ...अस्तित्वम् । अतः समाजस्य बले एव तस्य बलं तिष्ठति ।

अतः वयं सर्वे जनाः परस्परं बान्धवाः । मा विद्विषामहै । परस्परं मिलित्वा वयं ध्येयं साध्नुमः । यतः—

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥

आधुनिके काले 'संघः organization एव राष्ट्रस्य प्राणः भवति । न केवलं राष्ट्रस्य अपितु विश्वस्य । इह जगति विश्वबन्धुत्वभाववर्धनाय प्रेमधर्मप्रसाराय राष्ट्रसंघः कार्यं करोति । अतः संघे शक्तिः कलौ युगे इति सत्यमुक्तम् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★ सूक्ति-सुधा ★

व्रजत्यधः प्रयात्युच्चैर्नरः स्वैरेव कर्मभिः।
अधः कूपस्य खनक उच्चैः प्रासादकारकः ॥१॥

आदमी अपने कामों से ही नीचे और ऊँचे चढ़ता है। कुआ खोदने वाला नीचे जाता है, और महल को बनाने वाला ऊँचा चढता है ॥१॥

उपकारः परो धर्मः परार्थं कर्म नैपुणम्।
पात्रे दानं परः कामः परो मोक्षो वितृष्णता ॥२॥

दूसरे की भलाई करना परम धर्म है। दूसरे के लिए काम करना निपुणता है। योग्य पात्र में दान देना उत्कृष्ट काम है। तृष्णा का त्याग कर देना मोक्ष है ॥२॥

अप्युन्नतपदारूढः पूज्यान् नैवापमानयेत्।
नहुषः शक्रतां प्राप्य च्युतोऽगस्त्यावमाननात् ॥३॥

ऊँचे ओहदे पर पहुँच कर भी आदमी को चाहिये कि अपने पूज्यों (बड़ों) का अपमान न करें। राजा नहुष इन्द्रपद पर पहुँच कर, महर्षि अगस्त्य के अपमान करने से नीचे गिर गया ॥३॥

लक्ष्मीर्वसति जिह्वाग्रे जिह्वाग्रे मित्रबान्धवाः।
जिह्वाग्रे बन्धनं प्राप्तं जिह्वाग्रे मरणं ध्रुवम् ॥४॥

इस जीभ में ही लक्ष्मी अर्थात् धन संपत्ति रहती है और जिह्वा में ही मित्र और बन्धु बान्धव रहते हैं। जीभ से ही बन्धन मिलता है तो इस जीभ में ही मरना लिखा है अर्थात जिह्वा के द्वारा अच्छा और बुरा बोलने से अच्छा और बुरा फल मिलता है ॥४॥

निःसारस्य पदार्थस्य प्रायेणाऽऽडम्बरो महान्।
न सुवर्णे ध्वनिस्तादृग् यादृक् कांस्ये प्रजायते ॥५॥

जिस चीज या मनुष्य में तत्त्व (सार) नहीं होता वहाँ ढोंग की मात्रा अधिक होती है। सोने की चीज में उतनी आवाज नहीं होती जितनी कांसी की बनी चीज में ॥५॥

द्वाविमौ पुरुषौ लोके सुखिनौ न कदाचन।
यश्चाऽधनः कामयते यश्च कुप्यत्यनीश्वरः ॥६॥

इस लोक में ये दोनों मनुष्य कभी सुखी नहीं होते। जो निर्धन होने पर भी कई तरह की कामनायें करता रहता है तथा जो सामर्थ्य नहीं रहने पर भी कोप करता है ॥६॥

प्रकाशकः— जयबहादुरसिंह पताः— भारती भवन, गोपालजी का रास्ता, जयपुर

मुद्रकः— राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

प्रमुखं संस्कृतमासिकपत्रम्

…तोऽधिष्ठाता
…ता स्वातन्त्र्य-संपदाम् ।
…तिः संधाता
…हरुर्जयताच्चिरम् ॥



वर्षम् ६

प्रथमोऽङ्कः

मूल्यम्
वार्षिकम् ३) रु०
एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❋ विषय-सूची ❋

| क्रमः | लेखाः | लेखकाः | पृष्ठ संख्या |
|---|---|---|---|
| १. | जिज्ञासा | श्रीशिवशरणझा झांसी | |
| २. | नव्यवत्सरारम्भः ( वर्तमानयुगे संस्कृतम् ) | सम्पादकः | |
| ३. | भारतीयाध्यात्मशिक्षयैव विश्वशांतिः संभाव्यते ! | श्रीगणेशरामशर्मा झालावाड | ४ |
| ४. | पुरा भारतीयानाम् आयुष्मत्ता | श्रीभीमसेनशास्त्री चूरू | ७ |
| ५. | आदि-कविः ( रूपकम् ) | श्रीबुद्धदेवपाण्डेयः पटना | १० |
| ६. | धर्ममर्म ( दशलक्षणमहापर्व ) | श्रीताराचन्द्रजैनः रमहेक | ११ |
| ७. | साम्यवादः | श्रीवैद्यमणिरामशर्मा गौडः श्रीगङ्गानगर | १२ |
| ८. | श्रीरामस्य राज्याभिषेकसमयः | श्रीरामप्रपन्नशर्मा जयपुरम् | १४ |
| ९. | संस्कृतमेव राष्ट्रभाषा भवेत् | श्रीउमाकान्तमिश्रशास्त्री वैद्यनाथधामः | १५ |
| १०. | सम्पादकीयम् (संस्कृत भाषा च भारतं च, वनस्थलीविद्यापीठस्य वार्षिकोत्सवः) | सम्पादकः | १८ १९ |
| ११. | देशदर्शनम् | " | २२ |
| १२. | सरलसंस्कृतशिक्षणोपायाः | " | २३ |
| १३. | सूक्ति-सुधा | " | |

## संस्कृतसेवकानां कृते सुवर्णावसरः ! प्रतियोगितात्रयम्

देहलीवास्तव्यैः श्रीकैलासचन्द्रमहोदयैः 'भारती' पत्रिकायै लघुकथा-एकाङ्किनाटककविताप्रतियोगितानामा-योजनाय १७५) रूप्यकाणां राशिः प्रदत्तः । अल्पेन स्वकीयव्ययेन सह भारती एताः प्रतियोगिता आयोजयितुं वाञ्छति।

१. भारते भारताद् बहिश्च निवसन् कोऽपि नरो महिला वा प्रतियोगितायामेतस्यां भागं ग्रहीतुं क्षमः।

२. लघुकथायाः, एकाङ्किनाटकस्य कविताया वा (एकस्य कस्यचन) प्रेषणं भारतीकार्यालये कार्तिकपूर्णिमा-मनुल्लंघ्य कार्यम । तदनन्तरं लब्धा कृतिर्नाभिरोच्येत ।

३. लघुकथा भारत्याः पृष्ठचतुष्टयात् पृष्ठषट्कपर्यन्तमितकाया स्यात नाऽतोधिका, न्यूना वा। शब्दसंख्या न्यूनान्न्यूनं सहस्रद्वयात्मिका, अधिकाधिकं च त्रिसहस्रात्मिका भवेत्।

४. एकाङ्कनाटकं भारत्याः पृष्ठचतुष्टयात्सप्तपृष्ठपर्यन्तं विस्तृतं भवितुं शक्यं, शब्दसंख्या एकसहस्रं सहस्रद्वयं वा।

५. कविता प्रशस्यरूपेण वीररसप्रधाना न्यूनान् न्यूनं दशपद्यात्मिका अधिकं च त्रिंशत्पद्यात्मिका स्यात्।

६. लघुकथाप्रतियोगितायां, एकाङ्किनाटकप्रतियोगितायां च लब्धप्राथम्याय विदुषे प्रत्येकम् एकपञ्चाशद्रूप्यकमितो द्रव्यराशिः, द्वितीयस्थानमधिगतवते च प्रत्येकं पञ्चविंशतिरूप्यकाणि ससम्मानं प्रदास्यन्ते।

७. कविताप्रतियोगितायां सर्वप्राथम्यमुपेयुषे विदुषे एकविंशतिमुद्राः प्रदास्यन्ते ससम्मानम्।

८. भारतीनिर्णायकसमितेर्निर्णयोऽन्तिमरूपेण मान्यः स्यात् । एतस्यां समितौ त्रयो निर्णायकाः सन्ति।

१—म० म० पं० गिरिधरशर्मा चतुर्वेदः । २—भट्ट श्रीमथुरानाथशास्त्री भारतीसम्पादकः।

३—वैद्यराजजयरामदासस्वामी आयुर्वेदकालेजाध्यक्षः ।

९. लब्धपुरस्काराः कृतयः, अन्याश्चापि योग्याः रचना भारत्यां प्रकाशमेष्यन्ति ।

वयं सर्वानपि संस्कृतज्ञान् सोत्साहं प्रतियोगितास्वेतासु भागं ग्रहीतुमामन्त्रयामहे ।

—प्रबन्ध-सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादकः—
देवर्षिकलानाथशास्त्री B. A.
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षः ६ } कार्तिकशुक्लाप्रतिपत्, सं० २०१२ { अङ्कः १

## जिज्ञासा

( लेखकः—श्रीशिवशरणझा, झाँसी )

त्वां विहाय को मे ग्रहणीयः ? त्वयैव वाच्यम्।
जगति बृहत्यपि नास्ति स्वकीयः, कस्माद् याच्यम् ॥

१— अपरे सुहृदां वा बन्धूनामुपाश्रयेण
विषमे समयेऽपि नोद्विजन्ते, सन्ति सुखेन।
परिचिनोमि पूर्वस्मात् कालात् त्वामेवाहम्
त्वन्तु महिममयं मामुपेक्षसे कृतक-मिषेण
निराश्रयत्वाद् यदनुभवामि विपाकं प्राच्यम् ॥

२— त्वदनुचिन्तनेन व्यतियन्ति सप्त-दिनानि
नैव तु दूरं यान्ति मनागपि कटु-कष्टानि।
प्रीतिस्त्वयि मम भवति, भविष्यति पुरः पूर्ववत्
परं प्रतीतिर्ह्नि सति यथा ग्रीष्मे सलिलानि ॥
मणि-सम-जीवनमहो, भवति मम कस्मात् काच्यम् ?

३— त्वदवहेलया जीवनमपि समपद्यत भारम्
रुचिरं विश्वमिदं प्रतीयते काराऽगारम्।
उत्सारय मां निज-देशादिह नास्मि विवत्सुः
इयमुपगता निराशा मामुत्सन्न-विचारम्
व्यवहरसीत्थं, यथा प्रहरणं स्याद् नाराच्यम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## नव्यवत्सरारम्भः

### वर्तमानयुगे संस्कृतम्

सुकृतिसहायकस्य भगवतश्चराचरनायकस्य असीमयाऽनुकम्पया पाठकमहोदयानां सततसेवनं विदधती सेयं 'भारती' संप्रति षष्ठे वत्सरे पदं निदधातीति विदितमेव भवेत्तत्रभवताम्। गतेऽस्मिन् संवत्सरे भारतस्याऽस्य प्राणभूताऽपि सेयं सुरभारती कां कां परिस्थितिमनुभवतीति, मन्ये नाऽविज्ञातं भवेद्विज्ञानाम्। राष्ट्रभाषाप्रश्नस्तावदास्तां दूरे, किन्तु सर्वेषु विद्यालयेषु नियमतः संस्कृताऽध्यापनविषयेऽपि शिक्षाधिकारिणां दृष्टिकोणः शोणतामेव भेजे इति परिज्ञाय विषीदति विवेकिनां हृदयम्। "भारतम्" इति निजनाम सर्वतः प्रख्यापयन् सोयमार्याणां देशः। भारतीयैः आर्यैरेव च समग्रेऽपि संसारे सभ्यतायाः प्रथमः प्रकाशः प्रवर्तित इति को न जानाति? आदिमसभ्यतायाः प्रवर्तनाय च भगवती सेयं संस्कृतभारती एव सर्वतः पूर्वं साहित्यं ससर्ज। श्रीमन्तो वेदाः, उपनिषदः, धर्मशास्त्राणि, पुराणादयश्च संस्कृतभाषयैव सर्वतः सुद्भाविताः संदर्भाः।

भौतिकविज्ञानभासुरेऽप्यस्मिन् संसारे, आर्याणां गौरवम्, भारतस्य भाग्यवत्ता, संस्कृतभाषयैव संप्रति संप्रतिष्ठितेति को वा विचारशीलो न विजानीयात्! अन्यथा नित्यनवीनैः "साइन्सा"विष्कारैः प्रगर्विष्ठानां पश्चिमदेशीयानामग्रे का वा गणना सत्संनतस्य वराकस्याऽस्य भारतस्य? किन्तु तथापि भारतेऽस्मिन् संस्कृतभारती विस्मृतेव, विषण्णेव, विक्लेव विदेशीयेव विचित्रां परिस्थितिमनुभवति। अधिकारपदमास्थिता देशनायका भारतीयसंस्कृतेः, संस्कृतस्य च समयमुपलक्ष्य मधुरमधुरां स्तुतिमारचयन्ति। शिक्षाधिकारिणः संस्कृतप्रचारस्य मौखिकीं योजनां प्रकटयन्ति। किन्तु कार्यरूपे किं परिणतमिति चेद् दृश्यते, तर्हि लभ्यते शून्यमेव। प्रत्येकप्रान्ते सप्तसमुद्रपारस्थितानामाङ्ग्लानां भाषा महता गौरवेण पाठ्यते प्रचार्यते, प्रतिवर्षं प्रवर्ध्यते च। प्रेक्ष्यतां चक्षुषी विस्फार्य विवेकेन, यद्भारतस्य प्रत्येकप्रान्ते एव विदेशीयभाषा

४— मन-उद्याने आशा-कुसुमानि म्लायन्ति
कृपाऽम्बुना जीवनमाधातुं त्वां गायन्ति।
युक्तं साम्प्रतमितोऽवधानं, दृष्टिं देहि
किं मम शब्दा न कर्णयोस्ते पथमुपयान्ति?
पश्याम्येतं तव मौन-व्रतविधिमवाच्यम्॥

५— मनोनभसि ये विपद्घना धावन्त्यधुना तु
तानपास्य ते कृपा-कलानिधिरुदयं यातु।
सकृत् संहर मयि निजकोपं, ममापि खेदम्
प्रसन्नताया ज्योत्स्ना तव, मम निकटे भातु
तदलौकिक-सुखमनुभावय मां यदनिर्वाच्यम्॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



विश्वविद्यालयः पूर्वतः संप्रतिष्ठितः । अस्माभिश्च
ष्ठाप्यते, सगौरवं परिचाल्यते च । किन्तु या
भाषा भारतस्य च भारतीयानां च भूयस्तरां
ष्ठायै संमानाय च, तस्या भाषायाः कृते, भारतेऽ-
स्वदेशे किमेकोऽपि विश्वविद्यालयो विलोक्येत ?
कालादेतदर्थं संस्कृतसेवकैः प्रार्थना कृता, अधि-
णो मुहुर्मुहुः सूचिताः, किन्तु एतावत्पर्यन्तमपि किं
नोऽयं कार्यरूपे परिणतः ?

आस्तां विश्वविद्यालयस्य कथा । सर्वसाधारणै-
णीयेषु साधारणविद्यालयेष्वपि संस्कृताध्यापनस्य
न् कीदृशश्च प्रबन्ध इति चेत्समीक्ष्यते तर्हि
व समुदेति । बहुषु विद्यालयेषु अन्यान्यवैकल्पिक-
णां पाठनस्य प्रबन्धोऽस्ति । किन्तु संस्कृतस्य कृते
ऽप्यध्यापकः, न च तत्कृते काचित्सुविधा ।
न्नताः संस्कृतपरीक्षाः समुत्तीर्णा अपि प्रारम्भि-
विद्यालयेषु स्वल्पवेतनकं पदं प्राप्नुवन्ति । न च
तादृशः संमानो यथा 'ग्रेजुएट' पदधारिणां महा-
नाम् ।

## पत्त्राणां परिस्थितिः

एवंविधायां परिस्थितौ संस्कृतसाहित्यविस्तारस्य,
नसाहित्यनिर्माणस्य वा का दशा स्यादिति स्वयं
भातं भवति प्रतिभावताम् । वैदेशिकानां राज्ये 'पुरात-
संस्कृतपुस्तकानामन्वेषणस्य, उपलब्धानां प्रकाशनस्य
, यः प्रबन्धः प्रचलितोऽभूत्सोऽपि संप्रति 'प्रसुप्त इव
'। संस्कृतस्य मासिकादिपत्त्राण्यपि नवीनानि
येयुरिति दूरापास्तम् । प्राचीनान्यपि पत्त्राणि
नि । केवलं तेषां स्मृतिः खेलति हृदयपटले ।
विद्योदय-संस्कृतचन्द्रिकासूनृतवादिनीमित्रगोष्ठीप्रभृ-
नां तु स्मृतिरपि लोकानां हृदयात् शनैः शनैरपयाति ।

किन्तु मञ्जुभाषिणी-सद्धर्म-सूर्योदय-सुप्रभात-प्रभृतीनि ततो नवीनान्यपि पत्त्राणि नामशेषाणि केवलं वृत्तानि । यानि कानिचित्पत्त्राणि संप्रति प्रचरन्ति तान्यपि संस्कृत-सेवकानामुत्साहमात्रमवलम्बमानानि यथाकथंचिद् व्यवहरन्ति ।

श्रीमती 'मधुरवाणी' 'बेलगावं' विहाय संप्रति—"मधुरवाणीकार्यालयः, 'गदग' (जिला धारवाड) तः" नवीनतया प्रचरतीति किंचित्प्रमोदामहे । श्रीमत्या दीर्घ-जीवनं कामयमानाश्चाभिनन्दामो विहारमेतस्याः । 'संस्कृतसाकेतः' कियत्कालात्पूर्वमवलोक्यमानोऽपि सांप्रतं न दृश्यते । काशीतः प्रचरन्ती 'पण्डितपत्रिका' पाक्षिकी अपि वत्सरे चतुःपञ्चवारान् दर्शनं ददाति । काशीस्था 'सारस्वती सुषमा' त्रैमासिकी । सा संपादकं सम्यक् परिजानती अपि प्रबन्धकार्यालये एव विश्राम्यति । कलिकात्तास्था 'संस्कृतसाहित्यपरिषत्पत्रिका' सर्वभावेन साहित्यमेवाऽभिनयतीति चित्रं चित्रम् । अर्थात् प्रायशो द्वित्राः संचिकाः सहिता एव प्रकाश्यन्ते । 'मञ्जूषा' तु कलिकत्तातः पुनः प्रकाशयितुमारब्धेति कर्णाभ्यां शृणुमो, नाऽऽप्नुमो दर्शनमेतस्याः ।

## सेवानिवेदनम्

संप्रत्यात्मकथां निवेदयामः । संस्कृतसेवकानां सेवा-मार्गे पदं निदधती सेयं 'भारती' तु यथावसरमात्मनि-योगमशून्यं कृतवती । सैषा यथासंभवं सामयिकान् निबन्धान् प्रकाशयति, संस्कृतप्रचारविषयकान् समाचा-रान् प्रचारयति । नवीनानुदीयमानान् लेखकानुत्साहयति । युगरुचिमनुसृत्य 'लघुकथाः' सादरमाददाति । बहूनामनु-रोधात् 'सूक्तिसुधायाम्' हिन्दीभाषया सुभाषितानामर्थ-मपि विशदीकरोति, येन बहवः संस्कृतशिक्षार्थि सौकर्यमनुभवन्ति । विनोदप्रियाणां कृते विनोदवाटिकां



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



विकासयति। 'नवयुगसाहित्यम्' उल्लासयति। शिक्ष-माणानां कृते यथावकाशं 'बालस्तम्भम्' अपि सेयं निदधाति। यथोपयोगं संस्कृतसाहित्यसर्जकानां परिचयमपि पाठकानां पुरः प्रकाशयति। भारतस्य प्रान्ते प्रान्ते संस्कृतचर्चां प्रचारयति। संस्कृतप्रचारशून्येषु केन्द्रेषु संस्कृतप्रचारार्थं यथावसरमायासमुपयोजयति। एवं किल सेयं 'भारती' भारतीसेवनाय परिकरमाबध्नती पाठकमहाभागानां मनोऽनुरोधमनुसरत्येव। पाठकमहोदया अपि तदेतस्यां प्रचुरमनुग्रहं प्रदर्शयन्तीति ससंतोषमावेदयामः। यतो हि प्रतिवर्षमेतस्या अनुग्राहकसंख्या यथाकथंचित् प्रवर्द्धते।

शिक्षाधिकारिणो भारतीमिमां दयार्द्रया दृष्ट्या न विलोकयन्तीति कथनं नूनमकृतज्ञता स्यात्। बहुभिः शिक्षाविभागैः सेयं भारती निजप्रान्ते ससमादरं प्रचारिता। 'राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार-पञ्चनद-आन्ध्र-सर्वकारैः सेयं स्वीकृतेति' मुखपत्रे एव सेयं सर्वदा सूचयति। एवमेव अन्यान्यप्रान्तीया अपि चेन्निजकर्तव्यं निभालयेरंस्तर्हि सेयं भारती भारतीयानां सेवनसावधाना निःशङ्कं विहरेत्।

ये संस्कृतानुरागिणः, संस्कृतपण्डिताश्च तेषां सेवायामपि तदिदं विनीतं निवेदनं यत्ते संस्कृतप्रचारे अग्रभागं गृह्णीयुः। ये च प्रचारकार्ये स्वयं न प्रवर्तितुं शक्नुवन्ति तैः प्रचारकेभ्यः साहाय्यं त्ववश्यं दातव्यम्। संस्कृतसाहित्यस्य प्रचारः समयेऽस्मिन्निरुद्धप्रायः। नवीनसाहित्यप्रचारस्य का कथा, यानि पुस्तकानि पूर्वं प्रकाशितानि, लोकानामुपकारकाणि च तेषामपि संस्करणमवरुद्धं संप्रति। यदि संस्कृतपण्डिताः क्षमां कुर्युस्तर्हि स्पष्टं निवेदनीयं भवेद्, यदत्र प्रधानं कारणं संस्कृतसेवका एव। अन्यान्यभाषाप्रचारं पश्यन्तु श्रीमन्तः। यदि नवीने किञ्चिदुपकारकं पुस्तकं प्रकाशितं भवति, तर्हि सर्वेऽपि तद्भाषानुरागिणस्तस्य क्रयणं स्वयं कुर्वन्ति, अन्यांश्च प्रेर्य तत्र साहाय्यं विदधति। येन हि तत्साहित्यस्य प्रचारो भवति। तथा उत्साहिताः सन्तो जना अन्यत्साहित्यमपि संमुखे समानयन्ति। किन्तु संस्कृतपण्डितानां विचित्रा कथा। ते हि गृहस्थाः सन्ति। गृहस्थेभ्यो यद् यदावश्यकं सर्वत्र ते व्ययं कुर्वन्ति। किन्तु पुस्तकानां क्रयणे ते सर्वदा प्रतीक्षां कुर्वन्ति यत् उपायने एव पुस्तकानि लभ्येरन्। कश्चिद् 'भेंट'स्वरूपे एव पुस्तकं दद्यात्। हन्त ! किमिदं समञ्जसम् ?

संस्कृतपुस्तकानि संस्कृतसेवकानां तत्पण्डितानां च मुखमीक्षन्ते यत् ते तेषां समादरं कुर्युरिति। यदि ते एव संस्कृतपुस्तकानि न क्रीणीयुस्तर्हि किं हिन्दी-आङ्ग्लादिपाठकाः क्रेष्यन्ति ? बहुधा दृष्टं यत्संस्कृतस्य विद्यार्थिनोऽपि पाठ्यमपि पुस्तकमन्येभ्यो याचित्वा पठन्ति। यावच्छक्यं स्वयं न क्रीणन्ति। बहुधा अन्यकार्येषु ते व्ययं कुर्वन्ति, 'सीनेमा' दर्शनार्थं द्रव्यमायान्ति, किन्तु पुस्तकक्रयणे ते दीनतामभिनयन्ति। सोऽयमेतेषामपवादः अन्यान्यसाहित्यसेविभिर्विदितः, सर्वत्र प्रसेधितश्च। अतः समयमालक्ष्य संस्कृतसेविभिः संस्कृतभाषाप्रचारे किञ्चिदौदार्यमालम्बनीयम। संस्कृतप्रचारे बद्धपरिकरा सेयं 'भारती' संस्कृतसेवकेभ्यस्तदिदमेव याचते। ते भारतीप्रचारे अधिकाधिकं साहाय्यं कुर्युरित्येव तत्प्रकाशकाः प्रार्थयन्ते।

पाठकमहोदयाः पूर्ववदिव उत्तरोत्तरमस्यां प्रणयं स्थापयेरन्निति पुनः पुनः प्रार्थ्यमाना विरमामो विस्तरात्। भावयतु भारतीसेवकानां भव्यं भूतभावनो भगवानिति भूयो भूयो भावयामः। निवेदयामश्च जगदीश्वरम्—

भगवद्भावभूयिष्ठा भुवनाऽऽभोगभासिनी।
भवने भवने भूयो भारते भातु भारती॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भारतीयाध्यात्मशिक्षयैव विश्वशांतिः सम्भाव्यते !

(ले० विद्याभूषणः श्रीगणेशरामशर्मा, साहित्यरत्नम्, अध्यापकः श्रीराजेन्द्र-इण्टर-कॉलिज, झालावाड़ 'राजस्थान')

अयि प्रकृष्टप्रतिभावन्तः ! प्रौढानुभवशालिनः !! ...न्तः !!! पाठकमहानुभावाः !!! सदा-सर्वदा सर्वतः परिवर्तनशीलेऽस्मिन् संसारे घटनाचक्रं क्षणे-क्षणे परिवर्तते विपरिवर्तते चेति जानन्त्येवात्र भवन्तो भवन्तः ...धिषणाः सुविकसितमस्तिष्काः सन्तो महान्तः ...ता दीक्षिताश्च !!! संयोगस्यायं प्रसङ्गोऽवसरश्च ...द्वितीयोऽपूर्वो, यद्वयमिहात्र युगसन्धिकाले, कराले ...प्रवर्तमाने, वर्तमाने समये, महाभारतादपि सम-...विद्युत्स्फुरणतरले, प्रभञ्जनवात्याचक्रादपि तीव्र-...ऽस्मिन् सङ्घर्षप्रधानेऽधुनातने युगे, जीवन्तो ...प्रपञ्चस्याधिकाधिकं, सूक्ष्मातिसूक्ष्ममतिगभीरं, ...नुभवातिरेकमात्मनः सम्भावयामः ! प्राक्तने ...तीययुद्धे सर्वासां भौतिकसम्पदां, युद्धोपकरणोप-...नां, विज्ञानाविष्कृतानाम्, यन्त्रतन्त्राणां, शस्त्रास्त्र-...णीनां च विविधाः प्रयोगास्तत्कालीनैः क्षात्रधुरीणै-...र्वातिशयशौर्यपराक्रमदृप्तैः साम्राज्यलिप्सया भूयो ...ऽक्रियन्त ! फलतोऽत्र देशे कुटुम्बकलहाः, वर्ग-...र्षाः, जनसंहारा महान्तः, सर्वनाशकरा राजनीति-...कूटाभिसन्धिसिद्धान्ताः, भौतिका भोगवादाश्च स्व-...मापरिधिमर्यादाः सुदूरमतिक्रम्य प्राबल्यमौद्धत्यं च ...जुः ! क्रमशो ह्रासं व्रजन्ती भारतीयाध्यात्मिकी स्वस्था ...चिन्तना, शास्त्राध्ययनपरम्परा, आर्यसभ्यता, ...संस्कृतिः, प्रोद्दामबलविस्फूर्जन्ती राजशक्तिः, शासन-...नीतिः, वाणिज्यव्यापारव्यवस्था, सत्याश्रया जीवन-...चर्या च पर्यन्ते क्षीणक्षीणा सती पतनस्य परां ...पस्पर्श ! तस्यैवायं दुष्परिणामो यद्धि सर्वदेश-शिरोमणिः, सर्वसम्पत्सम्पन्नः, प्रचण्डशक्तिबलोर्जस्वलः सर्वसुखसाधनस्फीतोऽप्ययं देशोऽस्माकं देवकल्पानां पुरुषपुङ्गवानामधिकारात्स्खलितो दानवानां वैदेशिक-दस्यूनां विधर्मिणामनार्याणामधमानामाधीनो भूत्वान्ते स्वोत्कर्षं, गौरवं, स्वाभिमानं, महत्त्वं च सर्वमेकपदे विसस्मार ! सेयं कथास्माकं प्रथमच्युतेः स्वाधिकाराद्-भ्रंशस्य च संक्षेपतो बतार्यकुलगृहयुद्धस्याद्य "विवेक-भ्रष्टानां भवति विनिपातः शतमुखः !" इत्युक्तिमिमां स्मारयन्तीव संतिष्ठते !!!

ततोऽग्रे पुनर्द्वितीयस्खलनेऽस्माकमार्यसाम्राज्यस्यात्र देशे पतनमभूद्यत्र चक्रवर्तिनः सम्राजोऽप्यथानैक्यभुज-ङ्गविषमूर्छिताः, परस्परं युद्धयन्तो, भोगवादं च काम-यानाः, अनार्याधीनाः सन्तः, सर्वस्वमपि द्वेषाग्नौ जुह्वतो, भेदनीतिं कूटकपटवादं चाश्रित्य, स्वदेशवैभवं शत्रूणामाराधनायोपयुयुजुः । यवनामन्त्रणं कृत्वा लुण्टनावशिष्टामपि समृद्धिं तेभ्यः समर्पयितुमुद्यताः, कुलद्रोहायैव समारब्धोद्यमाः, 'कूपमण्डूकं गङ्गदत्तमनु-सरन्तो भारतीयाः क्षत्रिया धनानि, राज्योपनिवेशान् कल-त्राणि, कन्यकाश्च विधर्मिदस्युभ्यः समर्पयितुं स्वोत्क-र्षघातिनीर्योजना आविश्चक्रुर्विनाशं चास्य देशस्या-मन्त्रयामासुः ।

एवमेव क्रमेणाऽथ तृतीये युगसन्धिकाले, यवन-साम्राज्यविध्वंसेऽत्र देशे संजातेऽपरार्णवस्य परस्मिन् पारे वसन्तोऽपि च यात्राप्रेमिणो गौराङ्गा वाणिज्य-व्यापारच्छलाद्भेदनीतिकपटकूटजालैर्देशमिममात्मसाद्-कुर्वन् । विशृङ्खलितान् वीराननैक्यपरवशान् सन्धाय,



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



तान्विजित्य यूरोपीयं राजतन्त्रं भारतभूमौ प्रवर्तया-मासुः !!! इत्थं व रत्रयं बहुवारमनेकवारं वायं देशः पुनः पुनः परकीयानां दासत्वे पतितः। पराधीनत्वादा-त्मनो महत्त्वं, गुणगौरवं, शक्तिमत्ता, सत्यस्वरूप-मुत्कर्षं च बतात्यन्तं विसस्मारेति महानेव खेदकरः शोकावहो दुष्प्रसङ्गो नाम नूनम् !!!

सत्यप्येवमिदमित्थं सेतिहाससाक्षिकं, शताब्दीर्या-वज्जातेष्वप्यत्र देशे महायुद्धेषु, जनसंघर्षेषु, प्रजोत्पी-डनेषु, भ्रष्टेष्वपि च सदाचारेषु, दुर्बलतामापन्नेष्वपि च शूरवीरेषु, नष्टायामपि स्वदेशसमृद्धौ विस्मृताया-मपि च स्वात्मोत्कर्षचेतनायां, विलीनेऽप्यथ देशात्मबोधे, लोकमानसे प्रतनु प्रवहन्ती नाध्यात्मज्ञानगङ्गास्रोतोधारा कथमप्यत्यन्ताभावं जगामेति किमपि सर्वाश्चर्यकरं चमत्कारजुष्टमभूतपूर्वं विचित्रं तात्त्विकं सनातनं वस्तु जगत्याभाति। सूक्ष्मेक्षिकया निखिलमपि ब्रह्माण्डं कर-तलामलकवत् परिपश्यतां, दार्शनिकसार्वभौमानां, वैज्ञा-निकशिरोमणीनां, कूटनीतिवैतरणीतारङ्गमानां, महा-मतीनां, समाजशास्त्रिणामपि च मनो विस्मापयति। प्रज्ञाभिमानिनां, प्रतिभावतां मनीषिणामन्वेषणाधीर्मो मुह्यते भृशमत्र कार्यकारणपरम्परान्वेषणे तत्त्वतः। वस्तुतोऽत्र भूगोले स्थितानां यावद्राष्ट्राणां पतनोत्थान-तत्त्वमीमांसाविचारे प्रवर्तमाने, सर्वशक्तिमतः पर-ब्रह्मणः परमेश्वरस्य मायाशक्तेश्चिद्विलासविलसित-मेवाद्यं कारणं सर्वेषां लोकानां, देशानामुपनिवेशानां, ज्ञातीनां, धर्माणां, सम्प्रदायानां, समाजानां, सर्वराष्ट्र-प्रजानामुत्कर्षापकर्षयोरिति निश्चप्रचं मतं नो भारतीयानां विशेषतश्चास्तिकानाम् !!!

अथास्मत्पूर्वजनानां पुण्योपचयैः, शूरवीराणामूर्ज्जस्व-लप्रोद्भटप्रतापबलवीर्यातिशयैः, सतीसाध्वीनां पतिव्रता-शिरोमणीनां रमणीनां पतिव्रतप्रभाप्रभावस्फुरत्प्रकाश-तेजःपुञ्जप्रचयैः, पावनचरितानां महामानवानां सदा-चारचारित्र्यसंस्कारप्रभावैर्ज्ञानिनां ज्ञानतीर्थध्वजस्र-तपस्यतां स्वस्थैश्चिन्तनैर्महात्मनां मनोबलैर्दर्शनाचार्याणां तत्त्वचिन्तनविद्याबोधैस्त्यागैकव्रतव्रतिनां योगिवर्याणां समाधिसाधनप्रयत्नशतैर्वदान्यमूर्द्धन्यानां परोपकार-परायणानां सर्वस्वार्पणैः, साहसिकानां स्वदेशभक्तानां बलिदानप्राणोत्सर्गैर्महामनसां लोकनायकानां नेतृप्रव-राणां प्रोद्दामोद्योगपरम्पराभिर्देशकालपरिस्थितिजनमान-सप्रवृत्तिविदां विद्वद्धुरीणानां बुद्धिशक्तिचिद्विलास-चमत्कारैः, कवीनामनल्पकल्पनास्फुरणभावोत्तेजनैर्भा-वुकजनानां भावनाप्रवणतया, भगवदिच्छया, भवितव्य-तया वाब्दशतानि यावन्मुहुर्मुहुः पतनस्यान्धकूपगह्वरगर्ते ह्यापादमस्तकं मग्नेऽपि, चानैक्यपापपङ्के पापच्यमानोऽपि, पराधीनोऽप्यकिंचनोऽप्ययं भारतवर्षदेशोऽस्माकं सत्त्व-सम्पन्नतयाध्यात्मदीपप्रभाज्योतिर्धारामन्तः प्राणेषु प्रवह-न्तीमतिक्षीणामपि तेजोभास्वरां स्वजीवनीं शक्तिमिव भाग्यान्नात्यन्तं तत्याज। तस्मादेव हि स्वतन्त्रो बभूव, स्वराज्यं चात्र प्रावर्तत, प्रजातन्त्रशासनं च देशे सूत्रपा-म्बभूवेति महानेव हर्षोत्सवावसरः !!!

अथ पुनर्भारतेतरराष्ट्राणां, विशेषतो यूरोपरूसामेरि-काप्रभृतीनां, साम्राज्यवादसिद्धान्तस्तत आरभ्याद्यावधि मुख्यतो गौराङ्गशासनाधीने भारतवर्षदेशस्यास्मा-पारतन्त्र्यकाले भौतिकीं विज्ञानोन्नतिं जगाम। तस्मादेव तत्तद्राष्ट्राधिनायका विज्ञानशक्तिबलोन्मत्ताः प्रजातन्त्रा-त्मिकामुदारां शासनप्रणालीं बहुजनहिताय, बहुजन-क्षेमाय' स्वीकृत्यापि किलांशतोऽनुसृत्यापि च बहिर्-परोक्षरीत्या खल्वेकाधिनायकतन्त्रगुणदोषान् गृहन्तो व्यक्तिवादमुपनिवेशवादं च ध्वजीकृत्य मिथो याद्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



द्वे विश्वयुद्धे अस्माकं प्रत्यक्षं
आरभन्त ! परिणामतो द्वे विश्वयुद्धे अस्माकं प्रत्यक्षं परिपश्यतामेव समभूतां स्वजीवनकालेऽधुना ! विश्वयुद्धातिरिक्तानां, लोकसंहारकराणां, वर्गसङ्घर्षाणां तु गणनैव महतीं संख्यां स्पृशति । विध्वंसात्मकस्य लोककर्मस्य चरमां कोटिं स्पृशता विज्ञानेनाणुशक्तिविस्फोटस्फोटनैर्ब्रह्माण्डकटाहं ज्वलज्ज्वालामालाकुलं, दहनलोत्तप्तं, व्याकुलं, मर्दितं, चूर्णितमिव, खण्डं खण्डं विधायाखिलस्य जगतो जीवसङ्घानां जीवनशांतिर्भूयोभूयः कदर्थिता, विडम्बिता, निष्ठुरपीडिता, हाहाकारोऽजनि, प्रलयविप्लवः साक्षादजायत, महाकालो-ऽभूतभीषणमिदमकाण्डरणरौद्रताण्डवं दर्शं दर्शं 'त्राहि त्राहि' इति भयादकम्पत ! ततो हि विश्वशांतिरधुना-ऽवलानन्यगतिका, शरणार्थिनी विचारशीलान् महामानवानुपतिष्ठते !! सेयं समस्या व्याघ्रीव मुखं व्यादाय भयावहत्वे सर्वतोदिङ् नूनम् !!!

यूरोपयात्रां यातेनास्मद्भारतराष्ट्रस्य प्रधानमन्त्रिणा श्रीमज्जवाहरलालनेहरुणा महाभागेन विश्वशांतिस्थापनविधाने खल्वन्ताराष्ट्रियराजनीतिरङ्गमञ्चसूत्रधारोऽन्यं किमपि स्वस्थं चिन्तितं, विचारितं, विमर्शितं च विदेशीयराष्ट्रशक्तिधुरन्धरैः पुरुषपुङ्गवैः सार्द्धम् । तत्र श्रीमताऽस्मत्प्रधानमन्त्रिणा महोदयेन निरस्त्रीकरणमणुशक्तिनियन्त्रणं, राष्ट्राणां परस्परं मैत्रीभावसम्पादनं, राजनीत्यन्तर्मुक्तानामधिकाराणां संतोलनमनाक्रमणं, वैज्ञानिकसाधनानां निर्माणे नियोजनमित्याद्या ये ये उपाया शांतिस्थापनोपयुक्ताः प्रस्तावितास्ते खलु मूलतो भारतीयाध्यात्मज्ञानगर्भा विश्वजनीना दिव्यसन्देशा उपदेशाश्च सर्वराष्ट्रप्रजानां योगक्षेमाय । नेहरुणा महाभागेनास्यां दिशि ये ये प्रयत्ना लोककल्याणाय तत्र तत्र विहितास्तेऽहिंसावतारस्य गुरोर्गान्धेर्महात्मनोऽनुयायिनां विचारशीलानां तादृशानामनुरूपा नूनम् ! आधुनिकीनां विज्ञानाविष्कृतानाममोघशक्तीनां, सर्वशक्तिमतः परब्रह्मणो दिव्यविभूतीनामिव जगद्धिताय सामञ्जस्यभावेन ज्ञानकर्मसमन्वयरूपेण निर्माणात्मप्रयोग इत्येतावानेव भारतीयाध्यात्मोपदेशसारांश,

इदमेव वेदोपनिषच्छास्त्ररहस्यमनेनैवाद्वैताश्रयिसद्विवेकवता भास्वरेण प्रकृष्टज्ञानगरिम्णा निष्कामकर्मयोगोपदेशेन, विश्वबन्धुत्वभावेन, भूतसमानुभूत्या च भारतदेशोऽयं जगद्गुरुरिति विश्रूयते भुवनेषु !!! अस्तु तावद्विश्वशान्तिमभिवाञ्छन्तो वयमस्मत्प्रधानमन्त्रिणो मतमेतदिदमित्थं सर्वात्मना समर्थयामहे ! "जीवो जीवस्य जीवनम्" इति वर्तमानेऽपि जीवनसङ्घर्षेऽधुनातने "अहिंसा परमो धर्मः !" "न कोऽपि भूतानि हिंस्यात् !" "मा हिंसीः कृपणान् वृथा" इत्यहिंसासिद्धान्तः सर्वसम्मतः सार्वभौमश्च लोकेऽस्मिन्विजयतेतमाम् ! विशेषतोऽत्राधुना गान्धियुगे वर्तमानानां सर्वोदयं कामयानानां भारतीयप्रजाजनानामस्माकं किल सुदृढोऽयमविचलो हि विश्वासो यदिह संसारेऽध्यात्मोपदेशशिक्षयैव विश्वशान्तेः सम्भावना नान्यथा !!!

यथार्थं भारतवर्षदेशो दार्शनिकशिरोमणिर्जगद्गुरुश्च तदनुरूपमेव यदि चेष्टेत तदैव महामन्त्रिमहाभागस्य सोऽयं तत्त्वसिद्धान्तसंवादो यत्र तत्र सर्वत्र व्याख्यातो भृशं जोघुष्यमाणोऽपि विश्वशांतिसंस्थापने क्रियारूपेणाभीष्टां सिद्धिं सफलतां चावहेत् । यावदन्ताराष्ट्रियत्वं, यावच्च सर्वोपनिवेशराजनीतिगतविधिविधानतन्त्राणां सम्बन्धस्तावद्विषयेऽत्र सार्वदेशीये महात्मनो गान्धेः सहयोगिनोऽनुयायिनो जवाहरप्रमुखास्तत्सदृशा अन्ये नेतारो विभिन्नराष्ट्राणामग्रदूतैर्नायकैः सार्द्धं विमृश्य निगूढं कामपि प्रामाणिकीं नीतिं प्रक्रियां वाङ्गीकुर्वन्तु । यतस्ते हि विशेषज्ञाः यथार्थवेदिनः, प्रतिभावन्तोऽनुभववन्तो, राष्ट्रसेवकाः, सर्वसहाः, सर्वस्वत्यागिनस्तपस्यन्तो, महामानवाः, भूमण्डले सर्वतो विख्याताः, सन्ति । माश्च, परमत्रास्माकं देशे भारते यावानन्तःस्थितिसुधारविषयो वा कोऽपि शांतिस्थापनाप्रस्तावस्तावदादौ केचिदुपाया अत्रास्माभिर्यथामति प्रस्तूयन्ते, येष्वङ्गीकृतेषु सत्सु स्वतन्त्रस्य देशस्य शासनव्यवस्थायां, समाजसुधारणायां, शिक्षायोजनायामनुशासनप्रतिष्ठायां, किं बहुना समस्तेऽपि भारतराष्ट्रे प्रजाजनजीवने शान्तिः संभाव्यते । क्रमशः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# पुरा भारतीयानाम् आयुष्मत्ता

( लेखकः—श्रीभीमसेनशास्त्री, एम० ए० एम्, ओ० एल्०, प्रधानाध्यापकः, लोहिया कालेज चूरू )

हन्त ! अधुना भारतीयानाम् आरोग्यम् आयुश्च आत्यन्तिकीं दुरवस्थां गते । अस्माकं दास्यकालेऽपि वर्षशतात् पूर्वम्, न तत् तथाऽऽसीत् । तदानीं तु 'साठा सो पाठा' इति आभाणकः प्रसिद्धतमोऽभूत् । तस्य चायमर्थः 'षष्टि ( ६० ) वर्षीयः पुरुषः पूर्णो युवा भवति' इति । आचार्यचाणक्यादीनां काले तु सप्तति–(७०) वर्षीयः पुरुषः युवा गण्यते स्म ।

यदि ततोऽपि प्राचीने इतिहासे दृष्टिं पातयामः, तर्हि महता विस्मयेन आविष्टं भवति चेतः । महाभारत-युद्धे पाण्डवाः कौरवाश्च प्रायेण अशीति (८०) वर्षीया अभूवन् । श्रीभीष्मपितामहस्तु वर्षाणां सार्ध-शतम् (१५०) अतिक्रान्त आसीत्, यश्च प्रतिदिनं दशसहस्राणां वीरयोद्धृणां वधं कृत्वा, समराद् विरमति स्म । महाभारते द्रुपदो महीपतिः क्षत्रियाणां वृद्धतमो वर्णित आस्ते । स तु तदानीं वर्षाणां शत-त्रयम् (३००) अतिक्रान्त आसीद् इति ममानुमानम् । तस्य सतीर्थ्यः श्रीद्रोणाचार्यस्तु महाभारत-समर-समये शत-चतुष्टय-वर्षीयोऽभूद्—इति आधुनिकानां महान्तं विस्मयम् आतनोति । तथापि वर्तते इदं सत्यम् । श्रीमता वेद-व्यासेन कथितम् अस्ति—

'आकर्ण-पलितः श्यामो वयसाऽशीति-पञ्चकः ।
संख्ये पर्यचरद् द्रोणो वृद्धः षोडश-वर्षवत् ॥'

( महाभारते, द्रोणपर्वणि )

व्याकरणाद् वयं जानीमः यथा पञ्चानां वस्तूनां समुदायः 'पञ्चकः' इति कथ्यते । अद्य पि विविधासु भारतीय-भाषासु 'पञ्चक' शब्दस्य अपभ्रंशः 'पचक' ... पञ्च-वस्तु-समुदाय-रूपेऽर्थे एव प्रयुज्यते । 'चार प... अमरूद' इति वाक्यस्यार्थः, बहुव्रीजानां (५×... विंशति (२०) इत्येव भवति, नान्यः । अतः ४×८... वत्सरा एव द्रोणाचार्यस्य वय आसीद् महाभारत-यु...

आधुनिकास्तु अस्मिन् महति वयःपरि... अश्रद्दधानाः 'अशीति-पञ्चकः' इत्यस्य शब्दस्य ... शीति (८५) वर्षीयः इति व्याख्यां विदधते । ... संस्कृतव्याकरणस्य, सुरभारतीशब्दप्रयोगस्य आ... भारतीयभाषाणां च स्वकीयं महान्तम् अपरि... द्योतयन्ति ।

यदि च द्रोणाचार्यः भारतसमरसमये पञ्चा... वर्षीयोऽभूत्, तदा तु स कौरवपाण्डवानामध्या... पञ्चत्रिंशद्वर्षीय आसीत् । परं तदानींतनस्य ... विषये महाभारते उक्तमस्ति—

'तेऽपश्यन् ब्राह्मणं श्यामम् आपन्न-पलितं श्र...

(महाभारते, आदिपर्वणि, अ० १४२, श्लो...

तस्मिन् पुरातने काले पञ्चत्रिंशद्(३५) ... तपस्विनो ब्राह्मणस्य केशानां पलितत्वम् ... असंभवमेव । ततश्च 'द्रोणः महाभारतसमरे ... चतुष्टय (४ ०) वया अभूद्' अत्र संदेहलवो... विधेयः ।

इदानीम् अस्माभिः भारतीयैः स्वीयं स्वा... परिमाणं च वर्धयितुं सुमहान् प्रयत्नो विधेय...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# आदि-कविः

## [ रूपकम् ]

( लेखकः—बुद्धदेवपाण्डेयः 'सुमन' शास्त्री, हैडपण्डित श्रीदयानन्दकन्याविद्यालय, मीठापुर, पटना १ )

( स्थानम्-वनप्रदेशः । दस्युरूपेण वाल्मीकिः धनुर्धराय इतस्ततः परिभ्रमति। अन्यतः मुनयः प्रविशन्ति )

( सन्नद्ध-प्रत्यञ्चो रौद्ररूपेण )

रत्नाकरः—सावधानम् ! ऋषिगणाः, सावधानम् !! यूयं कुत्र गन्तुमिच्छथ ? तिष्ठत तिष्ठत अग्रे पादं मा धारयत ।

( ऋषिगणाः इतस्ततः अवलोकयन्तः अपसरितुं चेष्टन्ते किन्तु पुनः विनम्रीभूय वदन्ति । )

ऋषिः—यज्ञोपवीतेन भवान् ब्राह्मणः अवगम्यते, तर्हि कथं एतादृशः क्रूरव्यवहारः क्रियते भवता ?

रत्नाकरः—एवं अहं ब्राह्मणोऽस्मि, परन्तु स्त्रीपुत्रादीनां परिपोषणाय पथिकान् लुण्ठामि । युष्माकं पार्श्वे यत् किञ्चिदस्ति तत् सर्वं ममाग्रे स्थापयत, अन्यथा युष्मान् सर्वान् यमसदनं प्रेषयामि ।

ऋषिः—दास्याम एव वयं । किन्तु येभ्यः अस्मिन् कर्मणि प्रवृत्तो भवान् ते पापभागिनो भविष्यन्ति न वा इति तान् गृहं गत्वा पृच्छतु ।

रत्नाकरः—गच्छाम्यहं प्रष्टुं किन्तु इतः युष्माकम् अपसरणं न भवेत् तेनाहं युष्मान् वृक्षेण सह बद्ध्वा एव गच्छामि ।

( रत्नाकरः मुनीन् वृक्षेण सह बध्वा गृहं गच्छति पृच्छति च । )

रत्नाकरः—( पुत्रादिभ्यः ) युष्मभ्यं अहं प्रतिदिनं हत्यादिकं करोमि, यूयं पापभागिनो भविष्यथ न वा ?

पुत्रः—वयं त्वदधीनाः अस्माकं पोषणं मुख्यकर्तव्यं भवतः, अतः वयं पापभागिनो न भविष्यामः ।

( पत्नी, माता इत्यादयः सर्वेऽपि तथैव वदन्ति )

( गृहात् परिवृत्य ऋषीणां समीपं समागत्य चरणं स्पृशन् अश्रुपूर्णनेत्रेण वक्ति । )

रत्नाकरः—भगवन् !

नरकात् त्राहिमाम् । अहं नारकी, दुराचारी अस्मि क्षमस्व मे अपराधम् । एवं क्रियतां येन नरकात मम रक्षा भवेत् ।

ऋषि—राम राम इति वद । राम रामेति । अनेनैव नरकात् रक्षितो भविष्यसि ।

रत्नाकरः—(तपस्यायां संलग्नः मरा मरा इति जपति)

( "नारायण नारायण" इति जपतो नारदस्य प्रवेशः )

नारदः—धन्योऽसिवत्स ! धन्योऽसि, तपसि संलग्नस्य तव देहे वल्मीकोऽभवत् अतः अस्मात् दिनात् त्वं "वाल्मीकि" नाम्ना प्रसिद्धो भविष्यसि । उत्थितो भव त्वमवश्यमेव ज्ञानसम्पन्नो भविष्यसि । इति मे आशीर्वादः ।

वाल्मीकिः—(चरणं स्पृशन्) धन्योऽभवं भगवन् ! धन्योऽभवम्, तव चरणारविन्दकृपया ।

नारदः- आगम्यताम् । ( तौ गच्छतः )

(ततः एको व्याधः दम्पतिक्रौञ्चद्वयं बाणेन हतवान् । भ्रमन् वाल्मीकिः प्रविशति । क्रौञ्ची पत्यौ मृते सति विलपति । दयाकुलो वाल्मीकिः वदति ।)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★ धर्ममर्म ★

## [ दशलक्षणमहापर्व ]

( लेखकः—श्रीताराचन्द्रो जैनः, न्यायतीर्थः, शास्त्री,, श्रीशान्तिनाथगुरुकुलम्, रामटेक )

### क्षमा

परकृतस्यापराधस्य सहनं, क्रोधोत्पादककारणेषु सत्स्वपि तदनुत्पादनं, उत्पन्ने च क्रोधे विवेकबलेन तस्य विफलं करणं क्षमा। श्रीमद्भिराचार्यपूज्यपादैरुक्तम्—'दुष्टजनाक्रोशप्रहसनावज्ञाताडनशरीरव्यापादनादीनां सन्निधाने कालुष्यानुत्पत्तिः क्षमा। तथैव श्रीरइधुकविनापि क्षमायाः फलितार्थो निम्नप्रकारेण निर्णीतः—

जहिं आक्रोसणवयणसहिज्जइ,
जहिं परदोसणजणिभासिज्जइ।
जहिं चेयणगुण चित्त धरिज्जइ,
तहिं उत्तमखम जिण भासिजइ॥

अयमाशयः—महाव्रतिनो मुनयो दुष्टजनैः कृतानि अश्लील-परुष-निन्दावचनानि सहन्ते न किञ्चित् प्रतिवदन्ति, ते च परेषां विद्यमानान् दोषान् तन्निन्दार्थं न भाषन्ते। सततं च ते चेतनगुणान् धारयन्ति। अतो मुनय एव वस्तुतः क्षमाधर्मस्याराधका भवन्ति। अस्मादेव कारणात् जैनसिद्धान्तेषु उत्तमविशेषणैर्विशिष्टाः क्षमादयो दशापि धर्मा निगदिताः। क्षमादीनां धर्माणामणुव्रतिनो गृहस्था धारका भवन्ति, ते दुष्टजनविहितमन्यायं दुराचारं कदापि न सहन्ते, स्वसामर्थ्यात् तत्परिहारं कुर्वन्ति। एवञ्च दुष्टजनविरुद्धानि कार्याणि दृढतया आचरन्ति येन ते भविष्यत्काले तथा कर्तुं मनागपि नोत्सहन्ते। शत्रुमित्रेषु समवृत्तयो मुनयस्तु उत्तमक्षमादिधारकाः कीदृश्यामपि जटिलपरिस्थित्यां कदाचिदपि दुष्टजनविरुद्धं प्रतीकारं मनोवचःकायैः कर्तुमभिलषन्तीति विज्ञेयम्।

### मार्दवम्

स्वमनसि मृदुताभावस्य सन्धारणं व्यवहारे च बिनम्रवृत्तेः संप्रयोगो मार्दवम्। जाति-कुल-रूप-ऐश्वर्य-विज्ञान-श्रुत-लाभ-बलैर्युतोऽपि तैः स्वमहत्त्वं न घोषयति गर्वमादधानश्च प्रमत्तः सन् (गर्वोन्मत्तः) न परान् पीडयति। उक्तम्—'जात्यादिमदावेशादभिमानाभावो मार्दवं माननिर्हरणमिति' सर्वार्थसिद्धौ।

आर्जवम्—योगस्यावक्रता आर्जवम्। पू० सर्वा०। काय-वचन-मनःक्रिया योगो भवति, विचार-भाषण-कायप्रयोगानामेकतायां आर्जवं जायते। कुटिलपरिणामानामेव परित्यागे आर्जवधर्मः संपद्यते।

शौचम्—'प्रकर्षप्राप्तलोभान्निवृत्तिः शौचम्।' पू० सर्वा०। सर्वापद्दायिनि परिग्रहे आसक्तिविरहः, धन-

---

वाल्मीकिः—मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः। यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्।

( ततः प्रविशति विधिः )

ब्रह्मा—प्रसन्नोऽस्मि वत्स! प्रसन्नोऽस्मि, सम्प्रति भवन्मुखात विस्तृतं वाक्यं "श्लोक" नाम्ना प्रसिद्धं भविष्यति। इति मे आशीर्वचनम्। त्वं रामचरित्रयुक्तमेकं काव्यं रचय। तत् तु आदिकाव्येति प्रसिद्धं भविष्यति। ( प्रस्थानम् )

( पटपरिवर्त्तनम् )



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...दौ संग्रहवृत्तेरभावः शरीरेऽपि लोभसंवरणं शौचम्।

सत्यम्—'सत्सु प्रशस्तेषु जनेषु साधुवचनं सत्यम्' पू० सर्वा०। सज्जनानां सुसंस्कृतानां मानवानां हितकरं वचनं सत्यं ज्ञेयम्।

संयमः—प्राणीन्द्रियपरिहारस्संयमः॥ पू० सर्वा०। जगति यावन्त एकेन्द्रियादयो जीवास्तेषामपीडनं स्वेन्द्रियाणां मनसश्च स्वाधीने करणे संयमो जायते।

तपः—'कर्मक्षयार्थं तप्यत इति तपः।' पू० सर्वा०॥ ज्ञानावरणादीनि कर्माष्टकानि जीवस्वभावघातकानि समस्तान् जीवान् संसारार्णवे पातयन्ति। कायक्लेशादिना तपसा जीवा भस्मसात् कुर्वन्ति तानि कर्माणि। कर्माणि विनाश्य मोक्षसुखमनुभवन्ति तपोधनाः।

त्यागः—'संयतस्य योग्यं ज्ञानादिदानं त्यागः।' पू० सर्वा०। सुपात्रेभ्य आहारौषधज्ञानोपकरणपुस्तकादीनां भक्त्या प्रदानं, असहायानाथादिभ्यो दरिद्रेभ्यः दयया भोजनवस्त्रादीनां वितरणं दानं ज्ञेयम्।

आकिञ्चन्यम्—उपात्तेष्वपि शरीरादिषु संस्कारापोहाय ममेदमित्यभिसन्धिनिवृत्तिराकिञ्चन्यम्। पू० सर्वा०। कस्मिश्चिदपि धनधान्यादौ बाह्यवस्तुनि रागद्वेषमोहादौ चान्तरङ्गपरिणतौ ममेदमित्यभिसन्धिराहित्यमाकिञ्चन्यम्।

ब्रह्मचर्यम्—स्वतंत्रवृत्तिनिवृत्त्यर्थो गुरुकुलावासो ब्रह्मचर्यम्। पू० सर्वा०॥ स्वदोषपरिहाराय, ज्ञानादिगुणानामभ्यासाय, गुरुपरतन्त्रतासेवनाय, आत्मदोषत्रुटिहानाय च ब्रह्मणि=गुरुकुले, चर्यं=निवसनं ब्रह्मचर्यमिति निगद्यते।

एतैरात्मज्योतिरुद्भावकैः क्षमादिमहाधर्मैर्जगति 'सत्यं शिवं सुन्दरमिति' महनीयं स्थानं लब्धुं शक्येत। एतेषां प्रकाशपुञ्जे विस्तृते संसारे स्वार्थवशंगतानां राष्ट्राणां पदवीलुब्धकानां, जननायकानां धर्मावरणे पातकं समाचरतां जनानां पारस्परिकं कलहादिकं विलुप्तं जायते। चौरकर्मणि (ब्लेक मार्केट) संलग्नानां वणिजां गुप्तधनभाजां (रिश्वत खोर) राज्याधिकारिणामन्येषाञ्च 'लोफर बदमाश' इत्याद्युपाधिं दधतां जाल्मानां परदारधनाद्यपहारकाणां लुण्ठादीनां सर्वं नीतिविरुद्धमपकीर्तिकरमन्याय्यं कार्यं प्रलयमुपव्रजति। एतैः सुव्यवस्थिते च लोके सुखसाम्राज्यं समुल्लसेत, विवेकरसिकानां सन्नीतयो गीतयश्च स्फुरन्त्यः सर्वान् सत्वान् नन्देयुरिति मुहुर्मुहुः प्रार्थये श्रीमन्तं कृपालसन्तं देवाधिदेवं जिनम्। इति शम्।

फोनिक्स मिल्स लिमिटेड़
मुद्रणम् (प्रिंट्स) सूत्रजालकानि च (Lenos)
डॉन मिल्स कंपनी लिमिटेड़
सीवनदोरकाणि (स्यूइङ्ग थ्रेड) एवं परिधानीय-वस्त्राणि (होजरी)
ब्रेडबरी मिल्स लिमिटेड़
उपरिपरिधानवस्त्रम् (कोटिंग) परिधानीयम् (शर्टिङ्ग)
श्वकृतं लम्बवस्त्रम (ब्लीच्ड लांग क्लाथ)
अभिकर्त्तारः (एजेंट)
रामनारायण सन्स लिमिटेड़,
इम्पीरियल बैंक बिल्डिंग बैंक स्ट्रीट
बम्बई १



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# साम्यवादः

(भिषग्मणि वैद्यमणिरामशर्मा गौड़ श्रीगंगा)

साम्प्रतं साम्यवादस्य सर्वत्र डिण्डिमघोषः श्रूयते। साम्यवादस्य द्विधा धारा अवलोक्यते। प्राचीनार्वाचीना च। अर्वाचीनसाम्यवादस्य जनकः कार्लमाक्स आसीत्। सः आत्मानं परमात्मानं च मूर्खाणां कल्पनादधिकं किमपि न मन्यते स्म। अशनं, वसनं, वासः, इत्येव सर्वेषां मनुष्याणां जन्मसिद्धोऽधिकारः अयमेव परमो धर्मः। अशनवसननिवासानां व्यवस्था अर्थेन भवति। अतः अर्थ एव सर्वम्। इति पाश्चात्यसाम्यवादस्य मूलम्। अर्थस्य केन्द्रीकरणव्यवस्थां छित्त्वा विकेन्द्रीकरणं विधाय, अर्थस्य सर्वत्र समानव्यवस्थाविधानमेव आधुनिकसाम्यवादस्य प्रयोजनम्। आधुनिकसाम्यवादे वर्णव्यवस्थायाः स्थाने वर्गव्यवस्था समुत्पन्ना। येषु येषु राष्ट्रेषु साम्यवादः प्रचलितः अस्ति ते सर्वे जनतंत्रवेषे राज्यतंत्रराष्ट्राणि सन्ति। तेषु तेषु राष्ट्रेषु उदरपूर्तिप्रश्नस्तु शान्तः संजातः भविष्यति न वा। किन्तु उदरपूर्तिरेव सर्वं चेत् तर्हि पशूनां मनुष्याणां च को भेदः।

खादते मोदते नित्यं शुनकः शूकरः खरः। तेषांमेषां कोऽविशेषः वृत्तिर्येषां तु तादृशी॥ प्राचीनकालेपि साम्यवाद आसीत् किन्तु स नैतादृशः।

समानो मंत्रः समितिः समानी समानं मनः सह चित्तमेषाम् समानंमंत्रमभिमन्त्र्य समानेन वो हविषा जुहोमि। इति ऋग्वेदे। आधुनिकसाम्यवादे शरीरमेवेदं सर्वं किन्तु प्राचीनवैदिकसाम्यवादे आत्मैव सर्वम्। उपर्युक्तमंत्रे भारतीयसाम्यवादस्य रूपरेखा वरीवर्तते। तस्मिन् साम्यवादे समानरूपेणैव च यज्ञभागभुजः सर्वे आसन्। न केवलं सर्वे समानयज्ञभागभुजः प्रत्युत सर्वे समाना मंत्राः सर्वेषां समानानि मनांसि। तस्माद् भारतीयसाम्यवादस्तु सर्वाङ्गपूर्णं आसीत्। तस्मिन्साम्यवादे नार्थस्य किमपि मूल्यमभूत्। ब्राह्मणानां ज्ञानतः श्रैष्ठ्यम् शौर्यात् क्षत्रियस्य महत्वम्, धनात् वैश्यस्य शिल्पात् शूद्रस्य ज्यैष्ठ्यम्। उक्तंच—'शूद्रेषु शिल्पं वाणिज्यं वणिक्षु भूपेषु शौर्यं मुखभूषु विद्या। शास्त्रेण दत्ता किल वैद्यकेन तस्माद्गुरुर्भारतभूमिरेव।' अवलोक्यतां अस्माकं महर्षीणाम् दूरदर्शिता। यैवर्णाश्रमधर्मव्यवस्था व्यवस्थापिता।

अनया व्यवस्थया अर्थसाम्यस्य प्रश्नांकुरः एव न जायते, कुतः धनात्तु केवलं वैश्यानां ज्यैष्ठ्यम्। इतरेषाम् वर्णत्रयाणां कृते तु धनस्य किमपि मूल्यं नासीत्। तेषां ब्राह्मणक्षत्रियशूद्राणां कृते तु क्रमशः तपः शौर्यम्, शिल्पं चैव सर्वं आसीत्। ब्राह्मणा वर्णत्रयेभ्यः ज्ञानं अददुः। क्षत्रियाः त्रयाणां वर्णानां रक्षां चक्रुः एवं वैश्याः सर्वेभ्यो वर्णेभ्यो मुक्तहस्तेन धनं वितेरुः। तथैव शूद्राः सर्वेषां सेवामकुर्वन्। एवं सर्वेषां समन्वयः सहयोगः आसीत्। सर्वे स्वस्वकर्मणि रता महान्तः गण्यन्ते स्म। स्वस्वकर्मशून्यास्तु सर्वे क्षुद्राः एवं स्वस्वकर्मणि रताः सर्वे संतुष्टाः सुखिनश्चासन्। प्राचीनसाम्यवादे यथा एकः एकार्थाय आसीत् तद्वद् आधुनिकसाम्यवादे एकः एकविरोधाय अस्ति। वर्णविरोधिनः पश्यन्तु वर्गविरोधम्। अस्माकं गणतंत्रराष्ट्रस्य समाजवादस्तु वैदिकसाम्यवादात् एवं कार्लमाक्र्सवादादपि भिन्नः। यद्यपि शोभनवस्त्राणां धारणं वरं किन्तु तानि तानि शोभनानि वस्त्राण्यपि ग्रीष्मकाले न रोचन्ते जनेभ्यः। तद्वदेव यद्यपि वैदिककालस्य साम्यवादः समीचीन एव किन्तु युगधर्मानुरूपतः साम्प्रतं नेच्छन्ति तम्। न चैव आधुनिके जनतंत्रे साम्प्रतं सः साम्यवादः सफलतां यास्यति। पाश्चात्यसाम्यवादस्यापि द्वित्राणि राष्ट्राणि विहाय सर्वत्र विरोधो भवति। समाजवादस्यापि नैका गतिः नैका स्थितिः।

तर्हि किं भविष्यति ?

यद् भाव्यं तद् भविष्यति।

---



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# श्रीरामस्य राज्याभिषेकसमयः

( पं०रामप्रपन्नशर्मा, व्याकरणाचार्यः मुख्यसंस्कृताध्यापकः, मोतीकटला हाईस्कूल, जयपुर )

भगवान् श्रीरामभद्रः भारतीयार्यसंस्कृतेः प्राणभूतः ...आसीदिति नापरोक्षं मनस्विनाम्। रामचन्द्रं ... आर्यसंस्कृतिः, आर्यसंस्कृतिरेव वक्तुमयोग्या; ...हि अस्माकं सभ्यतायाः प्राणभूताः ये नियमाः ...वतो जीवनांगभूता बभूवुः। अतो हिन्दुधर्मस्य ...स्वरूपं श्रीराघवेन्द्रो बभूव।

रामचन्द्रः केवलं स्वयमेव धर्मानुयायी नासीत्, ...'राजा कालस्य कारणम्' इत्यनुसारं प्रजा अपि ...आचारानुसारं नियोजयामास। तदुक्तं रामायणे- ...वर्ण्यं च लोकेऽस्मिन् स्वे स्वे धर्मे नियोक्ष्यति' ...।

एवंभूतस्य रामस्य प्रामाणिकं चरित्रं श्रीमद् ...कीये रामायणे स्पष्टतया समुपलब्धुं शक्यते। यतो ...सत्यं वाल्मीकिभाषितम्।' स्वयं लोककर्ता वेधाः ...केः आश्रमं समुपस्थाय तस्मै दिव्यदृष्टिं ददौ, ...महर्षिः निखिलं रामचरितं दृग्गोचरीकृतवान्। ...काव्यं रामायणं च विरच्य रामपुत्राभ्यां कुशलवा... ...उपदिदेश। कुशीलवौ च साक्षात् श्रीरामसभायां ...यणं जगतुः।

...कथनस्यायमभिप्रायो यत् रामचरितविषये प्रामा... ...ता यादृशी रामायणस्य, न तादृशी ग्रन्थान्तरस्य ...तुमर्हति। अतः तदनुसारमेव किंचिदत्र विविच्यते। ...अद्यत्वे लोकाः कथयन्ति यत् रामेण रावणस्य वधः ...दशम्यां कृतः, तथा च दीपमालिकायां रामः स्व... ...मयोध्यायां समाजगाम, ततश्च राज्याभिषेकः ...इति। परं वाल्मीकिरामायणस्यावलोकनेन एतत्सर्वं शशशृङ्गायितमेव प्रतीयते ? तथाहि—रामस्य सीतापरिणयानन्तरं द्वादशवर्षाणि यावत् पितृगृहे निवासो बभूव।

उषित्वा द्वादश समा इक्ष्वाकूणां निवेशने।
भुंजाना मानुषान् भोगान् सर्वकामसमृद्धिनी ॥
तत्र त्रयोदशे वर्षे राजाऽमंत्रयत प्रभुः।
अभिषेचयितुं रामं समेतो राजमन्त्रिभिः ॥

अरण्यकांड ४७ सर्गः

इयमुक्तिः सीतायाः रावणं प्रति। अनन्तरं राजा दशरथः पुत्रस्य यौवराज्येऽभिषेचने निश्चयं कृतवान्। स्पष्टं चैतत् यत् यस्मिन् दिने श्रीरामस्य राज्याभिषेक-मुहूर्तः—आसीत् तद्दिने पुष्यर्क्षमासीत्—

'अद्य चन्द्रोऽभ्युपगमत् पुष्यात्पूर्वं पुनर्वसुम्।
श्वः पुष्ययोगं नियतं वक्ष्यन्ते दैवचिन्तकाः ॥

अयोध्याकाण्डे

इति दशरथस्य वसिष्ठं प्रत्युक्तिः। पुष्यर्क्षं सिद्धि-सूचकं मन्वते मौहूर्तिकाः। अतः राज्याभिषेकनिर्णयः पुष्य एव संजात इत्यत्र न संदेहलेशः। सोऽयं पुष्यः चैत्रमासस्य शुक्ले पक्षे नवम्यां दशम्यां वा समापतति—इति दैवज्ञानां मतम्। तत्रापि रामायणे—

'चैत्रः श्रीमानयं मासः पुण्यः पुष्पितकाननः।
यौवराज्याय रामस्य सर्वमेवोपकल्पताम् ॥

अयोध्या का०

इति पौराणां दशरथायोक्तिः।

अस्मिन्नेव चैत्रे मासे पुनर्वसौ भगवतो रामभद्रस्य जन्माऽपि बभूवेति नाविदितचरमार्यधर्मानुयायिनाम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


तस्मादयं निष्कर्षो निष्कृष्टः यत् रामस्य जन्मदिने पुनर्वसौ चैत्रे नवम्यां राज्याभिषेकमन्त्रणा संजाता। परं 'विधिरहो बलवानिति मे मतिः'। अपरस्मिन्नहनि पुष्ये अभिषेकस्थाने वनवासो लब्धो दाशरथिना चतुर्दशवर्षमितः। यस्मिन् दिने वनवासस्याज्ञा दत्ता कैकेय्या, तद्दिने एव च रामः वनं प्रतस्थे इत्येतत् सर्वं रामायणे यथास्थानं द्रष्टव्यम्।

वने त्रयोदशवर्षाणि चित्रकूट-दण्डकारण्य-पंचवटीषु उषित्वा चतुर्दशवर्षारम्भे रामेण खरत्रिशिरसादि चतुर्दशसहस्रं राक्षसाः निहताः। तत्समये हेमन्तर्तुः आसीत्, यतो हि राक्षसहननात्पूर्वं शूर्पणखासमागमसमये सीतारामलक्ष्मणाः गोदावर्यां विहितस्नानाः उपाविशन्।

कृताभिषेकः स रराज रामः
सीताद्वितीयः सह लक्ष्मणेन।
कृताभिषेकस्त्वगराजपुत्र्या
रुद्रः सनंदिर्भगवानिवेशः॥

अरण्ये०

एतत्समये—'शरद्व्यपाये हेमन्तऋतुरिष्टः प्रवर्तत।

अरण्ये०

अनन्तरं सीताहरणानन्तरं सीतामन्वेषमाणौ रामलक्ष्मणौ सुग्रीवेण समेत्य, वालिनं निहत्य च ऋष्यमूके गिरौ प्रतीक्षमाणावास्ताम। तत्रैव वर्षाकालानन्तरं शरदृतुः समायातः, यमवलोक्य रामः सुग्रीवे चुक्रोध, तच्छ्रुत्वा च सुग्रीवः सैन्योद्योगं कृत्वा लंकायामाचक्रमे।

'शरत्कालं प्रतीक्षस्व प्रावृट् कालोऽयमागतः।' लक्ष्मणस्योक्ती रामं प्रति।

किष्किन्धा०

पाण्डुरं गगनं दृष्ट्वा विमलं चन्द्रमण्डलम्।
शारदीं रजनीं चैव दृष्ट्वा ज्योत्स्नानुलेपनाम्॥

तत्रैव

एतत्सर्वप्रपंचजातस्य कथनस्यायमाशयोऽस्माकं रामस्य लंकायामाक्रमणं शरदृतौ संजातम्, आषाढशुक्ल द्वितीयायां 'आषाढीदशहरा' इत्याख्यदिने नैव जातम् इति निश्चप्रचम। भवेदेतच्च यत्, आश्विनशुक्ल दशम्यां विजयायां, पौर्वकालिकपरम्परामनुसृत्य प्रास्थानं संजातं भवेत्।

युक्ते मुहूर्ते विजये प्रयाणमभिरोचय। युद्ध०

इत्यत्र विजयमुहूर्तशब्देन विजयदशम्येवाभिप्रेता स्यात्। अनेनैतद् ध्वन्यते यत् विजयदशम्यामाश्विन शुक्लदशम्यां रावणवधो न संवृत्त इति।

संप्रवृत्ते च रामरावणयोर्युद्धे रावणस्य युद्धयात्रा मायामेव जातेति तत्र स्पष्टम्—रावणस्य सचिवेन सुपार्श्वेनोक्तम्—

अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशी।
कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः॥ युद्ध०

रावणवधानन्तरं श्रीरामः विभीषणाय राज्यं दत्त्वा स्वनगरीं राजधानीमयोध्यां प्रतस्थे। मध्ये च-

'पूर्णे चतुर्दशे वर्षे पंचम्यां लक्ष्मणाग्रजः।
भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम्॥

चतुर्दशवर्षपूरणानान्तरं पंचम्यां भरद्वाजाश्रम प्रापणे सति, केयं पंचमीति जिज्ञास्यम्। तत्र पाठकैः—चैत्रमासस्य पुष्ये रामस्य राज्याभिषेकस्थाने वनायां वनवासो विहित इति पूर्वं प्रतिपादितमस्माभिः तत आरभ्यैव पूर्णे चतुर्दशे वर्षे अर्थात चैत्रे पुनर्वसौ भरद्वाजाश्रमं रामः प्राप्तः। यतो हि -अपरस्मिन् पुष्ये रामस्य राज्याभिषेकः संवृत्तः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

### संस्कृतभाषा च भारतं च

व्यतीते मासे संस्कृतभाषामिमामधिकृत्य भारते-
...लिन्, अतिमहत्त्वपूर्णा विचाराः प्राचरन् । संस्कृतस्य
...षये सर्वतोऽधिकं समुल्लेखनीया चर्चा भारतराजधान्यां
...ल्यां समभवत्, या हि भारतीयविश्वविद्यालय'नाम्
...कुलाध्यापकसंमेलने' समघटत । संमेलनमिदं भारत-
...तन्त्रस्य शिक्षामन्त्रणालयद्वारा आमन्त्रितमभूत् ।
...स्याऽध्यक्षोऽपि भारतसर्वकारस्य 'शिक्षासचिवः'
...हुमायुकबीरमहाशयो निरवाच्यत । संमेलनेनाऽनेन
...तायाऽस्य. एकस्वरेण ससमादरं च स्वागतमक्रियत
...भारतसर्वकारेण भारतेऽस्मिन् संस्कृतस्योन्नतिरचि-
...कर्तव्याऽस्ति । एतदर्थं च संस्कृतस्य परितः प्रचाराय
प्रसाराय च, देशस्याऽस्य प्रमुखप्रमुखानां संस्कृतविदुषाम्
एका महती परिषद् (Committee) निर्मातव्या । या
हि विषयेऽस्मिन्नुचितं परामर्शं प्रदद्यात् ।

उत्तरप्रदेशस्य मुख्यमन्त्रिणा डा० श्रीसम्पूर्णानन्द-
महाभागेनाऽपि साम्प्रतमेव संवृत्ते संस्कृतविषयकसंमेलने
प्रबलतरमाघोषितमासीद् यत् संस्कृतभाषायामस्यां
भारतस्य राष्ट्रभाषासिंहासनमलंकर्तुं पूर्णा क्षमता वर्तते
इति । पञ्चाम्बुप्रान्तीयशासनतन्त्रद्वारा मनोनीतया एकया
परिषदा कुरुक्षेत्रे संस्कृतविश्वविद्यालयस्थापनाविषये
विस्तृता विचारविमर्शाः प्रकाशिता एव । प्रामाणिकरूपेण
इदमपि विदितमभूद् यद् कुरुक्षेत्रे स्थापयिष्यमाणेऽस्मिन्
विश्वविद्यालये न केवलं संस्कृतभाषाया एव शिक्षा
निर्धार्येत अपि तु एशियाप्रदेशस्य प्रमुखप्रमुखानाम-
न्येषामपि राष्ट्राणां तास्ता भाषाः परिगृह्येरन्, तासाम-
ध्यापनस्य च सुव्यवस्था सर्वत विचार्येत । कुरुक्षेत्रीय-
विश्वविद्यालयपरिषदोऽस्याः प्रशस्योऽध्यक्षः पञ्चाम्बु-
प्रान्तस्य राज्यपालः सी० पी० एन्० सिंहमहाभागः
स्वयमासीत् ।

यदा यदा हि संस्कृतभाषाप्रणयिनां भारतीयानां
समक्षे एवंविधाः संस्कृतसमाचाराः समुपतिष्ठन्ति, तदा
तदा तेषां दि अपूर्वः कश्चिदुत्साहसश्च प्रमोदश्च
प्रादुर्भवति । किन्तु एवंविधानां समाचाराणां वास्तविकं
रहस्यं किमस्ति ? भारते संस्कृतोन्नतिसंपादनविषये
प्रयोगात्मकः को वा पादन्यासः शासनाधिकारिभिः
संस्थाप्यते इति हि सूक्ष्मेक्षिकया समीक्षणीयं नूनम् ।

पूर्वोक्तान् संपूर्णानेव विषयानुद्दिश्य भारतस्य
प्रमुखेन दैनिकपत्रेण 'हिन्दुस्तान टाइम्स' नामकेन
अक्टूबरमासस्य द्वादशतारिकायामेका संपादकीय-
टिप्पणी प्रदत्ताऽस्ति । तस्याः शीर्षकमस्ति 'संस्कृतम्' ।
संपादकमहाशयः पूर्वं संस्कृतस्य महत्त्वविषयं विवृणोति ।
संस्कृतमहत्त्वविषये संस्कृतानुरागिणामेव किम्, विचार-
शीलानां सर्वेषामेव ऐकमत्यं भविष्यति । किन्तु संपाद-
कोक्तंसरस्य सोयं विचारः केवलमविचार एवास्ति यत्
'संस्कृतभाषा देशस्याऽस्य भाषा कदाऽपि नाभवत

ओरिएण्ट पेपर...
निम...
पैकिंग के लिए :
(क) एम० जी० रिब्ड क्राफ्ट
(ख) एम० एफ० अनरिब्ड क्राफ्ट
(ग) वाटरप्रूफ क्रैफ्ट
(घ) क्रीप क्रैफ्ट
पैकिंग और रै...
ब्राउन रै...
बाक्स, कार्टन्स आदि...
(क) कार्टन बोर्ड
(ख) एम० जी० ग्रे बोर्ड
(ग) एम० एफ० ग्रे बोर्ड
(घ) ट्रीप्लेक्स...
(च) डुप्लेक्स...
(छ) कार्टिज...
ओरिएण्ट पेप...
मैनेजिंग एजेण्ट्स...
८, रायल एक्सचेंज...
ओरिएण्ट पेपर आपकी और आप...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



द्धि।" वर्तमानसमये, मौगलादिवदेशिकानां शासन-समये च संस्कृतभाषा अवश्यं पुस्तकस्था निरमीयत। कन्तु खिस्टसंवत्सरवृत्तः पूर्वं यास्कपाणिन्यादि-समयेऽपि किं सा भाषा तिरस्कृताऽभवत्? या हि सा भाषा 'भाषा' पदेन स्थाने स्थाने व्यवहृता। यां भाषामेकः शकटिचालकोऽपि ब्रूते स्म। दूरादाह्वानेऽपि या भाषा मिथो व्यवह्रियते स्म। [यस्य कृते 'पाणिनिः' प्लुतम् अनुशास्ति] सा भाषा, कदापि व्यवहरणीया नाऽभवत्, अस्तु, तदर्थं विचारशीलानां निबन्धा अनुशीलनीयाः। मम 'संस्कृतभाषा' नामको ग्रन्थश्चविलोकनीयः। किं विवादेन?

**वनस्थलीविद्यापीठस्य वार्षिकोत्सवः**— अक्टूबरमासस्य ३० तारिकायां "वनस्थलीविद्यापीठे वार्षिकोत्सवस्य महान् समारोहः समभूत्। उत्सवाऽध्यक्षो

भारतस्य राष्ट्रपतिः डा० राजेन्द्रप्रसादमहाभागः समंभवत्। अतएव राष्ट्रपतेरागमनेन उत्सवेऽस्मिन्नतीव समारोहो लोकानामतीव संमर्दश्चाऽऽभवत्। प्रथमदिने [२६ तारिकायाम्] राष्ट्रपतेः संमाननाय जयपुरनगरे शोभासज्जाऽक्रियत। नगरस्य स्थाने स्थाने रक्षाविभागीयानां (सिपाही) प्रबन्धोऽभूत्, यैन हि 'बाइसि-शकलं' (बाइसिकिल) अश्वयानप्रभृतिवाहनानां कृते विशेषव्यवस्थाऽक्रियत। रात्रौ 'सिंहदुर्गे' (नाहरगढ़) स्वर्गशूली त्रिपोलियाप्रभृतिनागरिकस्थानेषु विद्युद्दीपमालायाः रुचिरः प्रकाशः समशोभत।

त्रिंश्यां तारिकायां वनस्थलीयायिनां 'बस' वाहनानां विशेषव्यवस्थाऽभवत्, येन हि परःसहस्राः पुरु… राष्ट्रपतेर्दर्शनार्थमुत्सवसमारोहं प्रचुरजनाऽऽकुलमकुर्वन्। उत्सवेऽस्मिन् प्रातर्दशवादने 'शान्ताबाई'शिक्षाकुटी… राष्ट्रपतेः स्वागतमभूत्। ततो मध्याह्ने त्रिवादनपर्यन्तं तत्रत्यस्य 'कलाभवनस्य' 'गृहस्थशिक्षाभवनस्य' 'ग्रामवासस्य' च 'प्रदर्शन' कार्यक्रमः समवर्तत। ततश्चतुर्वादनं यावत् महति सभामण्डपे तत्रत्याभिश्छात्राभिः संगीतस्य नृत्यस्य च प्रदर्शनमक्रियत। ततः सार्द्ध…

---

संप्रवृत्ते च रामरावणयोर्युद्धे रावणस्य युद्धयात्रा… मायामेव जातेति तत्र स्पष्टम्—रावणस्य सचि… सुपार्श्वेनोक्तम्—

अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशी।
कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः॥ युद्ध…

रावणवधानन्तरं श्रीरामः विभीषणाय राज्यं द… स्वनगरीं राजधानीमयोध्यां प्रतस्थे। मध्ये च—

'पूर्णे चतुर्दशे वर्षे पंचम्यां लक्ष्मणाग्रजः।
भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम्॥

चतुर्दशवर्षपूरणानान्तरं पंचम्यां भरद्वाजा… प्रापणे सति, कथं पंचमीति जिज्ञास्यम्। तत्र… पाठकैः—चैत्रमासस्य पुष्ये रामस्य राज्याभिषेक… वनायां वनवासो विहित इति पूर्वं प्रतिपादितमस्मा… तत आरभ्यैव पूर्णे चतुर्दशे वर्षे अर्थात चैत्रे पुन… भरद्वाजाश्रमं रामः प्राप्तः। यतो हि—अपरस्मि… पुष्ये रामस्य राज्याभिषेकः संवृत्तः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...नारो येन क्रमेणाऽद्याऽवधि प्रगतिं प्रादर्शयन्, तद्-नुसारं तेषां हार्दिक उत्साहः अग्रे उन्नतिं लब्धुं च ...त्साहसं विद्यते।। अतएव, दृढनिश्चयोऽस्ति यत्त-... विद्यापीठं विश्वविद्यालयरूपे परिणमेत्, यदि ...द्रीयसर्वकारस्याऽपि साहाय्यं भवेत्।

एतदनन्तरमुत्सवस्याऽस्याध्यक्षेण श्रीमता राष्ट्रपति-...भागेन स्वीये भाषणे विद्यापीठस्य कार्यक्रमात्संतोषः ...र्तितः तथा सत्राक् चातुर्यमाविष्कृतं यत्—"विद्या-...स्याऽस्य कार्यकर्तृभिः येन क्रमेण महत्युन्नतिः ...ता, 'विद्यापीठ'ता च लब्धा, तदनुसारमीश्वर-...नुग्रहः संपूर्णरूपेणाऽनुमीयते। ईश्वरस्यानुमहाद्-...तु शासनतन्त्रस्यानुग्रहो नास्त्येव। अत एव ...नानुग्रहेण विद्यापीठमिदं विश्वविद्यालयो भवेदत्र न ...ग्राश्चर्यम्।"

सभामण्डपे आगमनात्पूर्वं राष्ट्रपतिमहोदयः कवि-भिर्विशिष्टपुरुषैः सह ससमादरममिलत्। तेषु राजवैद्य-पं० नरहरिशर्मा, जोबनेरसंस्थानाधिपतिः श्रीमान् ठा० नरेन्द्रसिंहः, आसां पंक्तीनां लेखकः सोयं 'भारती'-संपादकोऽप्यासीत्। अनेन हि संपादकेन स्वनिर्मित एको ग्रन्थो राष्ट्रपतये समर्पितः। वनस्थलीविषयकं नवीनं वर्णनं च संस्कृत-पद्यैर्नैकेन श्रावितं यदाकर्ण्य राष्ट्रपतिना विनयः, परमः संतोषश्च प्रकटीकृतः। अस्तु, वयमपि विद्यापीठमिदं विश्वविद्यालयरूपे द्रष्टुं वाञ्छामः। येन हि मम पूर्वोक्तेरनुसारं "वनस्थली राजस्थानप्रान्तस्य जीवनस्थली संभवेत्।"


# ओरिएण्ट पेपर मिल्स लि०

निर्माता

पैकिंग के लिए :
(क) एम० जी० रिब्ड क्राफ्ट
(ख) एम० एफ० अनरिब्ड क्राफ्ट
(ग) वाटरप्रूफ क्रैफ्ट
(घ) क्रीप क्रैफ्ट

लिखने और छपाई के लिए :
(क) व्हाइट प्रिंटिंग
(ख) क्रीम – लेड
(ग) सेमी – ब्लीच्ड
(घ) अनब्लीच्ड

● पैकिंग और रैपिंग के लिए ●

ब्राउन रैपिंग

बाक्स, कार्टन्स आदि बनाने के लिए
(क) कार्टन बोर्ड
(ख) एम० जी० ग्रे बोर्ड
(ग) एम० एफ० ग्रे बोर्ड
(घ) ट्रीप्लेक्स
(च) डुप्लेक्स
(छ) कार्टिज
(ज) टिकेट बोर्ड
(झ) कवर बोर्ड

## ओरिएण्ट पेपर मिल्स लि०

मैनेजिंग एजेण्ट्स बिरला ब्रदर्स लि०

८, रायल एक्सचेंज प्लेस, कलकत्ता–१

ओरिएण्ट पेपर आपकी और आपके उद्योग की सेवा करता है




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## देशदर्शनम्—

**भारते स्वागतसमारोहाः—** विश्वस्य सर्वैर्देशैः सह मैत्र्या नीतिघोषं कुर्वाणस्य भारतस्य राजधान्यामेषु दिनेषु विदेशीयानामागन्तुकानां भूयान् संभारोऽस्ति। अधुनैव नवम्बरमासस्य ६ तारिकायां नेपालमहीमहेन्द्रो महेन्द्रो भारतदर्शनाय समागतः। अयं राष्ट्रपतिना, प्रधानमन्त्रिणा अन्यैश्च मन्त्रिभिः संमानितोऽभूत्। एतेन सह महाराज्ञी अपि समागताऽस्ति। एवमेव रूसदेशीयमन्त्रिपरिषदोऽध्यक्षः मार्शलबुल्गानिनोऽपि निकटेनैव भविष्यता (१८ नवम्बर) भारतमागमिष्यति। एतस्य कृते देशस्य तेषु तेषु स्थानेषु लक्षावधिरूप्यकाणां व्ययेन स्वागतसमारोहाः क्रियन्ते। ३ दिसम्बरदिने जयपुरेऽप्ययं महाभागः समागमिष्यतीति सूचितम्। राजस्थाने स्वागताय षड्लक्षमुद्राव्ययो भावी।

**देहल्यामौद्योगिक प्रदर्शिनी :—** चतुष्कोटिमुद्राव्ययेन समायोजिता औद्योगिकप्रदर्शनीयं महता समारोहेण देहलीमथुरामार्गे षट्क्रोशमितं क्षेत्रफलम् अभिव्याप्य प्रतिदिनं परोलक्षैर्जनैर्दृश्यते। अक्टूबरमासस्य २६ तारिकायां प्रधानमन्त्रिणा नेहरुणा सेयमुद्घाटिता। अस्या विभागद्वयमस्ति। विदेशविभागः, भारतीयविभागश्च। विदेशविभागे जर्मनी-रूस-यू०के० प्रभृतीनां विदेशानां पृथक् पृथक् प्रकोष्ठानि सन्ति येषु तत्तद्देशीया औद्योगिकी तान्त्रिकी चोन्नतिः प्रायोगिकरूपेण प्रदर्श्यते। जर्मनीदेशेन निर्माय भारताय समर्पितः एकः काचमयो मनुष्यो यश्चलति, बहुभाषासु भाषते च, निश्चितं दर्शनीय एव। भारतीयविभागे भारतीयानामुद्योगानां चित्रमयं प्रायोगिकं च सुदरं प्रदर्शनम्। बर्माशेल कं० द्वारा निर्मिता महामहती काचदीपिका (Lantern) ऽपि दर्शनीया। इयं प्रदर्शिनी संपूर्णं नवम्बरमासं स्थास्यति।

आश्चर्यं यत्सप्ताहाभ्यन्तर एव विद्युद्व्यतिक्रमकारणाद् द्वौ अग्निकाण्डौ जातौ। विदेश-विभागे रूमानियादेशस्य कक्षः सम्पूर्णो दग्धः। इतश्च ६ नवम्बरदिने "इम्पीरियल टुबाको (तमाखु) कं०" प्रदर्शनगृहेऽग्निकाण्डोऽभूद्यस्त्वरितमेव प्रशमितः।

अभूतपूर्वया महत्या प्रदर्शिन्याऽनया साधारणजनतायै भारतीया औद्योगिकप्रगतेः समीचीनं ज्ञानं प्रदीयते। दूरदूरप्रदेशाज्जना इमां द्रष्टुं देहलीमागच्छन्ति।

~~~

### राज्यपुनर्घटनाऽऽयोगस्य प्रतिवृत्तम् (रिपोर्ट)

भारते राज्यसीम्नां पुनर्निर्माणार्थं समायोजितः पुनर्घटनायोगः स्वकीयमतानि प्रकाशितवान्। एतदुपरि गम्भीरं विचारं कर्तुं भारतीयप्रधानमन्त्रिणा जनता बहु प्रेरिता। भारतस्य रूपरेखा परिवर्त्तनस्येदं कार्यं नास्ति साधारणम्। इदं महान्तं विचारमपेक्षते। अक्टूबरमासस्यान्तिमे सप्ताहे एतदुपरि विचारं कर्तुं मुख्यमन्त्रिणां सम्मेलनं देहलीनगरेऽभवत्।

इतः प्रत्येक प्रान्तेषु एतदुपरि विचारं क्रियते। एतस्यायोगस्य निश्चयानां विरोधो महाराष्ट्रप्रान्तीयैः पञ्जाम्बुप्रान्तीयैश्च ससमारोहं कृतः। महाराष्ट्र-गुर्जर प्रान्तयोः बम्बईप्रदेशे विलयः, राजस्थानाजयमेरुप्रान्तयोरेकीकरणम् इत्यादयः आयोगस्य प्रस्तावा विचारसापेक्षाः। राजस्थानस्य बहुभिः दलैः राजस्थानाजमेरुविलयस्य विरोधः प्रकटितः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar
~~~

Digitized by Arya Samaj Foundation Chennai and eGangotri



बालसंस्कृतशिक्षणोपायः—

# बालका मण्डूकाश्च

[अस्मात् मासाद् वयं कतिपयपाठकानामनुरोधेन बालस्तम्भे हिन्दी-अनुवादसहिता बालपाठ्या लघुकथाः ...दात् वा प्रकाशयितुमारभामहे । हिन्दी-अनुवादस्य सहायतया आरम्भिकश्रेण्या बालकाः संस्कृतकथां ...तुं शक्ता भविष्यन्ति । ]—स० सम्पादकः

एकस्मिन् तडागे बहवो मण्डूका वसन्तिस्म । एकदा ...नध्यायदिने सुखं विचरन्तः केचिद् बालकाः तत्तीरे ...क्रीडितुम् आगच्छन् । तटे क्रीडन्तः ते जले वर्त्त-...मानान् मण्डूकान् अपश्यन् । एको बालकः पाषाणेन ...मं मण्डूकं कौतुकात् आजघान ! पाषाणपतनेन ...न् अद्भुतः शब्दः अभवत् । सलिलाद् उत्पन्नम् ...शब्दं श्रुत्वा कौतुकयुक्तो द्वितीयोऽपि बालकः पानीये ...राम् अक्षिपत् । बालकम् इमं प्रस्तरान् क्षिपन्तं ...दृष्ट्वा अन्येऽपि बालकास्तथा अकुर्वन् । सलिले पतितैः ...रैः एते दर्दुराः शीर्णाङ्गाः अभूवन् ।

ततः तेषां मध्यात् जीवकनामा मण्डूकः कौतुकेन ...मण्डूकान् तान् बालकान् अवादीत्—भो बालकाः ...नां युष्माकं कौतुकेन अस्माकं प्राणाः संकटे निप-...तिताः । अतएव प्राणयाचनां कुर्वताम् अस्माकम् प्रार्थ-...नया दुष्कौतुकम् इमं त्यजत । यतो हि युष्माकं तु इदं ...विनोदमात्रमेव अस्माकं पुनरयं विनोदः प्राणापहारकः ...भवति ।" इति ! मण्डूकस्य इमां वार्तां श्रुत्वा तेषु ...मध्येषु एकः बुद्धिमान् दयालुश्च बालकः प्रभावितः ...अभवत् । स च सर्वान् वयस्यान् अस्मात् कौतुकात् ...निवारयामास । सत्यमस्ति, एवंविधेषु कौतुकेषु बालका ...न प्रवर्तेयुः ।

एक तालाब में बहुत से मेंढक रहा करते थे । एक बार छुट्टी के दिन सैर करते हुए कुछ बच्चे उसी के किनारे खेलने चले गये । किनारे पर खेलते हुए वे जल में मौजूद मेंढकों को देखने लगे । एक बच्चे ने एक मेंढक को खेल से पत्थर दे मारा । पत्थर के गिरने से पानी में अद्भुत आवाज हुई । जल से पैदा हुए इस शब्द को सुनकर दिलचस्पी से दूसरे बच्चों ने भी पत्थर पानी में डाला । इस बच्चे को पत्थर फेंकते देखकर और बच्चों ने भी वैसा ही किया । जल में पडे हुए इन पत्थरों से वे मेंढक क्षतविक्षत होने लगे । तब उन में से जीवक नाम के एक मेंढक ने दिलचस्पी के साथ हँसी मजाक करते हुए उन बच्चों से कहा—'बच्चो तुम लोगों के खेल से हमारे प्राण संकट में पड़ गये हैं । इसलिये प्राणों की भिक्षा माँगते हुए हम लोगों की प्रार्थना से तुम इस बुरे खेल को छोड़ दो । क्योंकि तुम लोगों के लिये तो यह केवल विनोद ही है पर हमारे लिये यह विनोद प्राणों का नाशक सिद्ध होता है ।"

मेंढक की यह बात सुनकर उन बच्चों में से एक बुद्धिमान् और दयालु बालक बहुत प्रभावित हुआ और उसने अपने सब साथियों को इस खेल से हटा दिया ।

सच है, इस तरह के खेलों में बच्चों को नहीं पड़ना चाहिये ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★ सूक्ति-सुधा ★

विषस्य विषयाणां हि दृश्यते महदन्तरम्।
उपभुक्तं विषं हन्ति विषयाः स्मरणादपि ॥१॥

जहर और विषयभोगों में आपस का बहुत कुछ अन्तर है। जहर तो खाने पर नाश करता है किन्तु विषयभोग तो स्मरण मात्र से नाश करते हैं। विषयों में फस जाना विष से भी भयंकर है ॥१॥

●

दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता।
अभ्यासेन न लभ्येरन् चत्वारः सहजा गुणाः ॥२॥

दानीपन, प्रियवादिता (सबको अच्छा लगे ऐसा बोलना), धैर्य (आपत्ति आने पर भी नहीं घबराना), उचित अनुचित की परख, ये गुण जन्म से अर्थात ईश्वर के घर से मिलते हैं। अभ्यास वा उद्योग से नहीं मिलते ॥२॥

●

अन्नदानं परं दानं विद्यादानमतः परम्।
अन्नेन क्षणिका तृप्तिर्यावज्जीवं तु विद्यया ॥३॥

अन्न का दान बड़ा भारी दान है। विद्या का दान इससे भी बढ़कर है। अन्न से कुछ काल के लिये तृप्ति होती है। किन्तु विद्या से जीवन भर के लिये तृप्त हो जाती है ॥३॥

●

प्रदोषे दीपकश्चन्द्रः प्रभाते दीपको रविः।
त्रैलोक्ये दीपको धर्मः सुपुत्रः कुलदीपकः ॥४॥

रात्रि में चन्द्रमा दीपक है। दिन में सूर्य दीपक है। त्रिलोकी भर में दीपक यह धर्म है। सुपूत कुल का दीपक है ॥४॥

●

अहेरिव गणाद्भीतः परान्नाच्च विषादिव।
राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति ॥५॥

जो भीड़भाड़ से ऐसे डरता है जैसे सांप से, पराये अन्न से ऐसे डरता है जैसे विष से, स्त्रियों से ऐसा डरता है जैसे राक्षसियों से, वही विद्यार्थी विद्या पा सकता है। विद्याध्ययन के समय स्त्रियों का पास आना अत्यन्त हानिकारक होने से आर्यों के यहाँ सदा से वर्जनीय रहा है ॥५॥

●

माता यदि विषं दद्याद्विक्रीणाति पिता सुतम्।
राजा हरति सर्वस्वं तत्र का परिदेवना ॥६॥

माता यदि पुत्र को जहर दे, पिता यदि अपने पुत्र को बेचे, राजा यदि अपनी प्रजा का धन हरण करे, तो अब विलाप कैसा? अर्थात राजा का प्रजा से धन हरण करने की इच्छा रखना ऐसा है जैसा माता का पुत्र को जहर देना। पिता का अपनी संतान को बेचना ॥६॥

●

प्रकाशकः— जयबहादुरसिंह                    पताः— भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रकः राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

प्रमुखं संस्कृतमासिकपत्रम्

न जायते म्रियते वा कदाचित् नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च,
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ।

वर्षम् ६

द्वितीयोऽङ्कः

मूल्यम्
वार्षिकम् ३) रु०
एकस्याङ्कस्य ।≈)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❀ विषय-सूची ❀


| क्रमः | लेखाः | लेखकाः |
|---|---|---|
| १. | कालिदाससंस्तवः | श्रीरामेश्वरप्रशादशास्त्री, डीडवाना |
| २. | धर्मः नीतिश्च | श्रीहरगोविन्दपाराशरः |
| ३. | भारतीयः साम्यवादः | श्रीसत्यनारायणदीक्षितः, सीकर |
| ४. | अध्यात्मशिक्षयैव विश्वशांतिः सम्भाव्यते ! | श्रीगणेशरामशर्मा, झालावाड़ |
| ५. | श्रीराजेन्द्रो विजयताम् | श्रीसत्यव्रतशास्त्री, जयपुर |
| ६. | कालिदासाभिमतं राजतन्त्रम् | श्रीप्रेमशङ्करमिश्रः, झुकेही |
| ७. | मस्तिष्कम् | सहसम्पादकः |
| ८. | संस्कृतसमाचाराः | सम्पादकः |
| ९. | सम्पादकीयम् (राजस्थान-विश्वविद्यालयस्योपाधिवितरणोत्सवः, सोधियतप्रधानमन्त्रिणो जयपुरे विशिष्टं स्वागतम्) | ,, |
| १०. | सरलसंस्कृतशिक्षणोपायः | सह सम्पादकः |
| ११. | सूक्ति-सुधा | सम्पादकः |


## संस्कृतसेवकानां कृते सुवर्णावसरः ! प्रतियोगितात्रयम्

देहलीवास्तव्यैः श्रीकैलासचन्द्रमहोदयैः 'भारती' पत्रिकायै लघुकथा-एकाङ्किनाटककविताप्रतियोगितान योजनाय (७५)रूप्यकाणांराशिः प्रदत्तः। अल्पेन स्वकीयव्ययेन सह भारती एताः प्रतियोगिता आयोजयितुं वाञ्छ

१. भारते भारताद् बहिश्च निवसद् कोऽपि नरो महिला वा प्रतियोगितायामेतस्यां भागं ग्रहीतुं क्षमः

२. लघुकथायाः एकाङ्किनाटकस्य कविताया वा (एकस्य कस्यचन) प्रेषणं भारतीकार्यालये पौषपूर मनुल्लंघ्य कार्यम्। तदनन्तरं लब्धा कृतिर्नाभिरोच्येत।

३. लघुकथा भारत्याः पृष्ठचतुष्टयात् पृष्ठषट्कपर्यन्तमितकाया स्यात् नाऽतोधिका, न्यूना वा। शब्दसं न्यूनान्न्यूनं सहस्रद्वयात्मिका, अधिकाधिकं च त्रिसहस्रात्मिका भवेत्।

४. एकाङ्कनाटकं भारत्याः पृष्ठचतुष्टयात्सप्तपृष्ठपर्यन्तं विस्तृतं भवितुं शक्यं, शब्दसंख्या एकस सहस्रद्वयं वा।

५. कविता प्रशस्यरूपेण वीररसप्रधाना न्यूनान् न्यूयं दशपद्यात्मिका अधिकं च त्रिंशत्पद्यात्मिका स्या

६. लघुकथाप्रतियोगितायां, एकाङ्किनाटकप्रतियोगितायां च लब्धप्राथम्याय विदुषे प्रत्येकम् एक शद्रूप्यकमितो द्रव्यराशिः द्वितीयस्थानमधिगतवते च प्रत्येक पञ्चविंशतिरूप्यकाणि ससम्मानं प्रदास्यन्ते।

७. कविताप्रतियोगितायां सर्वप्राथम्यमुपेयुषे विदुषे एकविंशतिमुद्राः प्रदास्यन्ते ससम्मानम्।

८. भारतीनिर्णायकसमितेर्निर्णयोऽन्तिमरूपेण मान्यः स्यात्। एतस्यां समितौ त्रयो निर्णायकाः स

१—म० म० पं० गिरिधरशर्मा चतुर्वेदः। २—भट्टश्रीमथुरानाथशास्त्री भारतीसम्पादक

३—वैद्यराजजयरामदासस्वामी आयुर्वेदकालेजाध्यक्षः।

९. लब्धपुरस्काराः कृतयः, अन्याश्चापि योग्याः रचना भारत्यां प्रकाशमेष्यन्ति।

वयं सर्वानपि संस्कृतज्ञान् सोत्साहं प्रतियोगितास्वेतासु भागं ग्रहीतुमामन्त्रयामहे।

—प्रबन्ध-सम्पादक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादकः—
...कलानाथशास्त्री B. A.
जयपुरम्

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

# भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षः ६ } मार्गशीर्षशुक्लाप्रतिपत्, सं० २०१२ { अङ्कः २

## कालिदाससंस्तवः

कविता:-पं० श्रीरामेश्वरप्रसादशास्त्री विद्यालंकारः प्रधानाचार्यः—श्रीरामानुजसंस्कृतमहाविद्यालयः, डीडवाना (राजस्थान)

कालिदासकवेः साम्यं कः कविः कलयत्विह ।
पदे पदे यस्य वाणी नृत्यन्तीव विलोक्यते ॥१॥
प्रसादमधुरां वाचं यस्यास्वाद्य महाकवेः ।
वैदेशिकाः प्रमाद्यन्ति, धन्यं धन्यं ब्रुवन्ति च ॥२॥
यच्चित्रं चित्रितं तेन पात्राणां प्रकृतेश्च तत् ।
पुरः स्फुरदिवाभाति संलपत् प्रविभाव्यते ॥३॥

रहस्यवादं प्रवदन्तु केचन
आश्रित्य छायां कवयन्तु वापरे ।
पिबन्तु हालां त्वथ पाययेत्कविः
कः कालिदासस्य प्रसादमाधुरीम् ॥४॥

जाता सहस्रशोऽन्ये
कवयो देशे विदेशेषु ।
विहरति कविताकुञ्जे
परमेकः कालिदासकविसिंहः ॥५॥

---

मधुमोचिकाऽरुणरसालसिता
वनिताऽधरास्तदुपयान्तु कथम् ?
सरसस्य वत्सरशतेऽपि गते
कविकालिदासवचसस्तुलनाम् ? सम्पादकस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# धर्मः, नीतिश्च

( हरगोविन्द पाराशरः व्याकरणशास्त्री (अन्तिम) काव्यतीर्थः साहित्यरत्नम् )

"यतोऽभ्युदयनिश्रेयससिद्धिः स धर्मः" इति महर्षिकणादरचिते धर्मलक्षणे स्फुटमेव प्रतीयते यन्मानवस्य प्राणिमात्रस्य वोन्नतिः कल्याणसिद्धिश्च जायते सः धर्मपदवाच्योऽस्ति। अन्ये च "चोदनालक्षणोऽर्थो धर्मः" धारणाद्धर्म इत्यादि वदन्ति। महर्षिः व्यासस्तु चरमसिद्धान्तरूपेण हस्तमुद्यम्य निनादयति—

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि, परेषान्न समाचरेत्॥ इति

मानवः निसर्गत एव आत्मनः स्वस्योन्नत्यै तदनुकूलानाचारान् कर्माणि चाचरति। स स्वस्य सुखसाधने दुःखनिवर्तने च प्रवर्तते। दैहिकसुखाप्तये स भौतिकानामुपकरणानां धन, गृह, स्त्री, पुत्रादीनां सम्पादनाय स्वजीवनस्य समयं शक्तिञ्च नियोजयति। शिक्षा, सामाजिकयोग्यता च सुखस्य साधिके, अतः ते साधयति। धर्मज्ञानरहितदशायां मर्त्यः केवलं दैहिकसुखमेव सर्वस्वमिति बुद्ध्या स्वीकरोति। स देहात्मवादी भवति।

अत्रावधेयं, यद्धर्मः दैहिकसुखमेव सर्वस्वन्न मन्यते, प्रत्युत सः लोकोत्तरमपि पश्यति। अत एव आत्मनः स्वरूपं महत्वञ्च प्रदर्शयन् सः दैविकमात्मिकं सुखञ्च शिक्षयति तापत्रयञ्च दूरीकर्तुं प्रेरयति। धर्मस्येयं महनीया विशेषता यत्स जीवनकलां पारमार्थिकसाधनञ्च प्रतिपादयति। मानवमात्रस्य कृते दैहिक-दैविक भौतिकाध्यात्मिकाभ्युदये धर्मस्य महत्यावश्यकता वर्तते। सहैव सोऽन्येषां प्रतिकूलमपि नाचरणीयं मानवैः निःश्रेयससिद्ध्यर्थमिति चोद्घोषयति। अत्र वैशिष्ट्यं यद्धर्मः सामाजिकीं व्यवस्थां सुदृढीकरोति, तां सुखप्रदां वाञ्छति। सर्वे मानवाः समाजस्याङ्गानि, सामाजिकव्यवस्थायाः कर्तारः सन्ति। अत एव स्वजीवनोन्नतिं शिक्षयन्नपि धर्मोऽनुशास्ति 'आत्मनः प्रतिकूलानि परेषां न समाचरेदिति'।

धर्मः जीवनक्रियासु परमावश्यकोऽस्मिन्नास्ति सन्देहलेशोऽपि। वस्तुतस्तु येन धार्यते स एव धर्मः। ये केचन स्वधर्मं परित्यज्य जीवनसुखशान्तिं प्राप्तुमभिलषन्ति, कथयन्ति च "धर्मोऽस्माकं जीवने क्लेशमादधाति, न तेन विना कापि क्षतिः। अतः—नास्त्यपेक्षा तस्य" इति ते भ्रमे निमग्नाः। तेषामिदं कथनं प्रामादिकमविचारितञ्चास्ति। धर्मस्त्वस्माकञ्जीवनैः सहैव प्रचलति, तस्य सम्बन्धः न केवलमात्मनापि तु देहेनापि सह वर्तते। यद्यपीयमुक्तिः सत्या यद्धर्मोऽनुभवस्य वस्तु न तर्कस्येति, तथापि तस्यार्थोऽयन्नास्ति यत्तस्य न देहेन सम्बन्धः। धर्मोऽस्माकं हृदयमन्तःकरणं विचारांश्च सात्विकान् करोति, येषां सक्रियमाचरणं देहेनापि जायते। धर्मं विना वयं स्वार्थसिद्धये परान्विनाश्य आचरेम, येन मानवसृष्टौ न सुखशान्तिः भवितुं शक्नोति। विद्वद्भिर्महापुरुषैश्च धर्मस्योपादेयत्वमावश्यकत्वञ्च जीवनेऽनिवार्यरूपेण प्रतिपादितम्। अत एव निःसंशया जीवनेऽनिवार्यावश्यकता धर्मस्य, तद्विना जीवनस्याशक्यत्वात्।

नीयते जीवनं राष्ट्रञ्च यया सा नीतिः। नीतिरस्माञ्जीवनस्य राष्ट्रस्य च सञ्चालनप्रणालीमुपदिशति। यत्र धर्मः सन्मार्गं गन्तुं प्रेरयति, तत्र नीतिः तस्योपरि गमनस्य रीतिं शिक्षयति। नीतिः स्पष्टयति जगति



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...ता, तत्पाठनपद्धतिरुपदेशप्रवचनप्रणाली वा कीदृशी ...वितुमर्हतीति प्रस्तुते प्रसङ्गतः किमप्युच्यतेऽधस्तात्ः–

१–सर्वादौ समस्तेऽपि राष्ट्रे सर्वेष्वपि च विश्व...विद्यालयेषु, माध्यमिकविद्यालयेषु, प्रवेशिकाशालासु, ...र्वविधासु शालास्वन्यास्वपि च प्रारम्भिकपाठशालासु ...दैनन्दिनी प्रार्थनाप्रणाली परमात्मनः स्तुतिस्तोत्र...ता, चरित्रनिर्माणोपयुक्ताध्यात्मोपदेशगर्भा, मनुष्ये...त्वगुणप्रतिष्ठापिका प्रवर्तताम् !

२–सा चाध्यात्मशिक्षा वेदोपनिषत्पुराणस्मृति...स्तोत्रेभ्यो हिन्दीकाव्यग्रन्थेभ्योऽपि वा प्रादेशिक...नासाहित्यग्रन्थेभ्यश्चाधुनातनदेशकालोचिताः काश्चि...देशसूक्तीः संगृह्य नवीनं कमपि पाठ्यक्रमं परिकल्प्य ...वीनं प्रचलितं वा प्रार्थनासाहित्यग्रन्थजातं किंचित् ...शोध्य, परिवर्त्य, परिवर्ध्य च सचित्रैर्नवमुद्रितसंस्क...र्मनोहरैः पुस्तकैः प्रारब्धुं युज्यते ।

३–अत्र ध्यात्मशिक्षोपयोगिपाठ्यक्रमनिर्माणे न ...देव कोऽपि भाषासम्बन्धी पक्षपातः प्रतिबन्धो दुरा...ग्रो वा । यतो ह्याध्यात्मोपदेशाः सार्वभौमसिद्धान्त...र्णीताः, महात्मभिः प्रतिपादिताः, सर्वभाषासाहित्ये ...ज्ज्वलरत्नरूपा भवन्ति । एवं सति भाषावादस्य ...स्त्येवात्र कोऽप्यवकाशलेशोऽपि, तथापि प्रकरणेऽत्रो...युक्ता सामग्री संस्कृतसाहित्यभाण्डाराद्हिन्दीसाहित्य...शाच्च यदि संगृह्येत चेत्तदानायासाल्लक्ष्यभेदः ...म्भवति । भूमण्डलेऽस्मिन् संस्कृतसाहित्ये हिन्दी...व्येषु च यथाध्यात्मतत्त्वोपदेशाः किलान्तर्निहिता ...यन्ते न तादृशाः क्वाप्यन्यत्र सुलभाः स्युरिति विवा...नीतं तथ्यम् । केचिन्नवशिक्षिताः पाश्चात्याचारवि...रप्रभाविताः प्रजातन्त्रवादिनो, धर्मसम्प्रदायनिरपेक्षं शासनविधानं समभिलषन्त, संस्कृतहिन्दीभाषयोर्मा-ध्यमाङ्गीकारे कदाचिद्विप्रतिपद्येरन्निति सम्भाव्यते परन्त्वेवंविधाः त एव केवलं नव्या नेतारो ये राजनीति-मात्रं लोकजीवनस्य मूलाधारं मन्यमानाः, भारतीया-ध्यात्मज्ञानशून्याः, भौतिकसभ्यतानुयायिनः, परदेशीय-त्वमेवान्ताराष्ट्रियत्वं भजन्तः स्युः । इत्थंविधानध्यात्म-भावरहितान् प्रति केवलमेतावदेव निवेदनं यद्धि श्रीमन्तो नवसभ्यताभिमानिनो भारतवर्षस्य जगद्गुरुत्वं काम-यन्ते चेदक्षुण्णं रक्षितुं तदा हिन्दीसंस्कृतसाहित्यं विना नान्या गतिः सार्वजनीनशांतिस्थापनोचितायाध्यात्मोप-देशाय । अत्रोदाहरणरूपाः केचित् सदुपदेशा अव-तार्यन्ते । तथाहि—

अ–"न त्वहं कामये राज्यं, न स्वर्गं नापुनर्भवम् ।
कामये दुःखतप्तानां प्राणिनामार्तिनाशनम् ॥"

आ–"आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥"

इ–"मातृदेवो भव! पितृदेवो भव!! आचार्यदेवो भव!!!"

ई–"तन्मे मनः शिवसङ्कल्पमस्तु !"

उ–"सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः !!!"

ऊ–"सत्यमेव विजयते नानृतम् !"

ऋ–"सह नाववतु सह नौ भुनक्तु सहवीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥"

इत्याद्याः शतशोऽध्यात्मोपदेशा अवतारयितुं शक्यन्ते ये पीडितां, कदर्थितां, विडम्बितां, दयनीयां, त्रस्तां, भौतिकवादभयाक्रान्तां, क्रन्दन्तीं, कान्दिशीकां रोरुद्यमानां च मानवतां सान्त्वयितुं सुधाकल्पा दिव्यौ-षधिरसाः परिणमेयुः । नाहं वेद्म्यंशतोऽप्यत्र क्व नु कुत्र किंरूपो वा सम्प्रदायाग्रहगन्धो वर्तते वर्णिका-रूपेषूपरिप्रदत्तेष्वध्यात्मशिक्षोपदेशवाक्येषु ?



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कामं भवतु स्वतन्त्रं राष्ट्रमेतद्भारतं वर्षम् ,प्रवर्तताम-खण्डप्रभुतासम्पन्नं स्वायत्तशासनं, विराजतां स्वराज्य-मत्र देशे यावच्चन्द्रदिवाकरम् स्वाधीनं चेष्टन्तां किमप्य-स्मन्नव्यनेतारो देशमिममुन्नेतुम्, जोघुष्यतामुन्नतिर्देश-स्यास्य भौतिकी, विज्ञानाविष्कारकलाकौशलं चरमां कोटीमाटीकताम्, अर्थशास्त्रसिद्धयोऽत्र पदे पदे सुलभा जायन्तां, विजयन्तां चान्ताराष्ट्रियराजनीतिस्वयम्बर-रङ्गमञ्चे भारतीया लोकनायकाः सर्वसम्पल्लक्ष्मीम्, शस्त्रास्त्राणुशक्तिप्रयोगपाटवाञ्जीयन्तां दिग्दिगन्ता भारतीयैः शूरवीरैर्नरकेशरिभिः, परन्तु यावद्दूरं विश्व-शांतिस्थापनायाः सम्बन्धस्तावत् संस्कृतभाषासाहित्यं विहायान्यन्नास्तेवोपायान्तरमितीदमित्थं ध्रुवं सत्यमिति प्रसभं ब्रूमो वयमत्र प्रसङ्गोपात्तम् ! भारतीयैर्महर्षिभि-र्मुनिप्रवरैर्महात्मभिर्महापुरुषैर्महामनोभिश्च सद्भिः संसारस्य हिताय ये हि किलाध्यात्मोपदेशाः कृपया व्यतीर्यन्त ते सर्वे सुरभारत्याः संस्कृतवाण्याः साहित्ये सन्निहिताः सन्ति। तदुपयोगाय संस्कृतज्ञानमतीवावश्यकं भारतीयानां विशेषतो नेतृप्रवराणाम् ! अस्तु !

राष्ट्रभाषाया हिन्द्याः साहित्यादपि केचित् स्तुति-स्तोत्रप्रार्थनारूपा अध्यात्मोपदेशशिक्षोचिताः दिव्या भव्याश्च भद्रा भणितयो लभ्यन्ते । ततोऽपि संगृह्या-ध्यात्मशिक्षापाठ्यक्रमो विधातुमुचितः। भक्तशिरोमणेः कविकुलकलाधरस्य महात्मनो गोस्वामिनः श्रीतुलसी-दासस्य रामचरितमानसे यथा काश्चिद्भक्तिरसमधुराः प्रार्थना वयं पश्यामस्ताः सर्वा अन्याश्च तथाविधा हिन्दीकवीनां रचनाभ्यः संगृहीतुमुचिता अध्यात्मशिक्षा-पाठ्यक्रमे। दृश्यताम्—

अ—"नमामि भक्तवत्सलं, कृपालुशीलकोमलम् ।
भजामि ते पदाम्बुजमकामिनां स्वधामदम् ।।"

इतीयं सुविख्याता स्तुतिः—

आ—"जय राम सदा सुखधाम हरे !
रघुनायक सायक चापधरे ।।"

इ—"जय राम रमारमनं शमनं,
भवतापभयाकुल पाहि जनम् ।।"

इत्याद्याः शतशोऽध्यात्मोन्नतिकारकाः स्तुतयो वर्तन्ते या अत्र कर्मण्यन्तर्ग्रहीतव्या भवन्ति ।

न केवलं संस्कृतात् हिन्दीभाषाया एव किन्तु स्वदेशस्य सर्वप्रान्तीयभाषावाङ्मयस्था सदुपयोग्या-ध्यात्मसाहित्यसामग्री पाठ्यक्रमेऽत्राध्यात्मिकेऽन्तर्ग्रहण-मर्हति नूनम् ।सर्वोदयभावनया महाराष्ट्रीवङ्गीयभारती-गुर्जरीत्यादि सर्वप्रान्तभाषाभ्यो योग्याः सामग्रीर्नीत्वा शोभनः पाठ्यक्रम आध्यात्मिकशिक्षाकर्मण्युपयोगमर्हति। पर्यन्ते वैदेशिकभाषाभ्योऽपि च "यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वेति" सर्वं संगृह्याखिलविश्वप्रजानां कल्याणायाध्यात्मोपदेशाय पाठ्यक्रमो निर्मातुं युज्यते।

स्वीकृते हि खल्वध्यात्मोपदेशशिक्षादानेन विश्व-शांतिस्थापनाया मूलसिद्धान्ते, पाठ्यक्रमयोजनायां कृतायां सत्यां, सर्वदेशभाषाभ्यः पाठ्यक्रमोपयुक्ताः प्रार्थनाः, स्तुतयः, स्तोत्राणि, सदुपदेशाः, नीतिन्याय-निर्देशकानि वाक्यानि, सदाचारास्तिक्यचरित्रनिर्माण-सक्षमाः सूक्तीरन्यच्च यदुपयोगि तत्तत्सर्वं सुखं 'सत्यं शिवं सुन्दरम्' संगृह्य-संगृह्य, सुचारु सम्पाद्य, नव-संस्करणानि मनोहराणि सम्मुद्र्य च प्रकाशनीयानि भवन्ति ।

यदि च विश्वशांतये, 'बहुजनहिताय, बहुजन-लाभाय', लोकसेवायाः शुद्धभावेन, स्वदेशस्य भारत-वर्षराष्ट्रस्याधिकाभ्युदयकामेन, सर्वविधप्रजानां समाज-हितकाम्यया, निखिलजनमङ्गलेच्छया, विश्वबन्धुत्व-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...तनिष्ठया, सत्येन, श्रद्धया, प्रीत्या, वात्सल्येन, ...न्तःकरणवृत्या, भूतदयाधर्मानुरोधाद्वा वयं भार- ...तवासुत्तमं मानवं जन्मात्र किमपि शोभनं कर्म ...मिलषामश्चेन्महत्त्वाकांक्षामन्वात्मविकाशश्रियै, तदा ...त्वा सर्वान् वृथावादविवादान् दुस्तर्कान् वा दूरे- ...न 'हंसः क्षीरमिवाम्भसः !' इति सर्वतः सारभूतं ...नावर्ज्य, फल्गून् क्षुद्रान् दोषदर्शनावेशानपहायादौ ...बन्धुभ्यो—विशेषतस्तरुणेभ्यो ह्यध्यात्मशिक्षोप- ...न शिक्षयाम, तदनु समस्तविश्वमनुजेभ्यो विश्व- ...पनोपदेशान् दातुं वयं सक्षमा भूयास्म ! अतो ...ं केवलं पशुप्रायं भौतिकभोगवादश्रयादात्मप्रता- ...े वद्धोद्यमा अज्ञानान्धकारतमिस्रायामेव सोमुह्य- माना वयं छलनां, लाञ्छनामनीतिमन्यायं, चौर्यं, लुण्टाकत्वं, पापपरायणत्वमधमत्वं, भीरुत्वं, पामरत्वमेवान्तर्हृदि स्थिरीकृत्य विज्ञानशक्त्युन्मदानामन्यान्यराष्ट्राणां राक्षसप्रायाः प्रजाजना इव मात्स्यन्यायमपकौशलाल्लोकनाशायैव वर्गसङ्घर्षमाचरन्तो जीवितुमुत्सहेमहि, तदा तु विरमत्वेषा कथाध्यात्मोपदेशस्यात्रैवेत्यलं सुज्ञेषु बहुना ! अथवा धन्या वयं स्वतन्त्राः स्वच्छन्दा भारतीया येषां पक्षे—

"चित्रं वटतरोर्मूले, शिष्या वृद्धा, गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं, शिष्याः संछिन्नसंशयाः !!
इत्युक्तिरियं सर्वांशतो घटते !

———

[३ दिसम्बरदिवसे राष्ट्रपतेः डा० राजेन्द्रप्रसादस्य जन्मदिनोपलक्ष्ये भारत्याः शुभकामनाभिः सह]

# ★ श्रीराजेन्द्रो विजयताम् ★

(ले० श्रीसत्यव्रतशास्त्री, प्राध्यापकः, हन्सराजकालेज, जयपुर)



देशस्याङ्गलवागुरासु पतितस्योन्मोचनार्थं पुरा,
संग्रामे क्षतिभीषणे हुतवतः सर्वं प्रियं पार्थिवम् ।
दिव्यं यस्य यशोऽनिशं प्रसरति त्यागात्मनः स व्रती,
'राजेन्द्रे'ति सुविश्रुतो विजयतां सौम्याकृतिर्धार्मिकः ॥१॥
यश्चार्वीः परिषेवते प्रयतधीश्चर्याः सदा लौकिकी-
र्यस्य स्वं करणं परोपकरणं स्नेहश्च लोकोत्तरः ।
अर्थे यः परमामगाद्विमुखतां सोऽक्लिष्टकर्मा कृती,
'राजेन्द्रे'ति सुविश्रुतो विजयतां सौम्याकृतिर्धार्मिकः ॥२॥
देवानां महनीयतामुपगतस्याप्यन्तिकाल्लब्धवान्,
वात्सल्यं युगपूरुषस्य सुतरां श्रीगान्धिनो यो व्रती ।
यो लोके प्रथतेतमाञ्च यशसा सोऽकृष्णकर्मा कृती,
'राजेन्द्रे'ति सुविश्रुतो विजयतां सौम्याकृतिर्धार्मिकः ॥३॥
कृषकसखः श्रमिसेवी पतिताधनचर्मकारसहकारी ।
हरिजनविधवोद्धारी जयति स चेतोहारी गुणौघधारी ॥४॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# कालिदासाभिमतं राजतन्त्रम्

(प्रेमशंकरमिश्रः अध्यापकः संस्कृतपाठशाला भुकेही, जि० सतना [वि०प्र०])

"कविः युगगायकनाम्ना स्मर्यते, तदुक्तिषु धार्मिक-सामाजिक-राजनैतिकविचाराणां छाया दृश्यते।" इति सर्वैः स्वीकृता सिद्धान्तसरणिः। इदमपि तथ्यमपह्नोतुं न शक्यते यत् कविः स्वीयसमुन्नतविचारद्वारा युगे नवीनमार्गं ददाति। तदीयविचाराणां परिज्ञानं तत्साहित्यस्वाध्यायतो जायते।

प्रस्तुते निबन्धे महाकविः कीदृशं शासनतन्त्रं स्वीकरोति स्म इति प्रतिपित्सितं विद्यते। राजपदस्य निर्वचनं "राजते शोभते" इति दृश्यते। राष्ट्रस्य शौर्य्य-तेजःप्रभृतीनामेकत्र समवायो भवति स्म इति वक्तुं शक्यते। अतएव "महती देवता ह्येषा राजरूपेण तिष्ठति।" इत्युद्घोषः कृतः आसीत्। प्रजासंमतः, धर्मभावसमन्वित एव "राजा" इति मन्यते स्म।

धार्मिकपरम्पराणां पोषणं राज्ञः परमो धर्म इति महाकविना अपि रघुवंशे प्रतिपादितम् यथा—

"रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परम्।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः।"

राज्ञः व्यक्तिगतं जीवनमतीव शुद्धं भवति इति प्रतिपादयति कविः पद्ये अस्मिन्—

"जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत्।"

"स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः।"

तदानीं शासनस्य मूलस्रोतो जनता एव आसीदिति तत्कालीनेतिवृत्तविलोकनेन निश्चीयते। शासनं स्वाम्यायत्तं मन्त्रिमण्डलायत्तम्, गणद्वारा चालितमिति त्रिधा श्रूयते। कालक्रमेण मदमत्तेषु राजसु मन्त्रिमण्डलेन कार्यं चाल्यते स्म, किन्तु कतिपयकालानन्तरं मन्त्रिणामुच्छृङ्खलशासनेन जनता संत्रस्ता इति राजप्रतिनिधि-प्रजासंमतगण-सहयोगेन राज्यव्यवस्थापनं भवति स्म। गणतन्त्रे यादृशं स्वातन्त्र्यं जनतायां भवति तादृशी स्थितिः रामस्य काले लभ्यते। युवराजचयने, राजपरिवारचारित्र्यविषये च उन्मुक्तकण्ठं निगद्यते स्म। कालिदासः प्रजानां शिक्षणव्यवस्थायाः नैतिकतायाः आध्यात्मिकतायाश्च समुन्नतेर्भारं राज्यस्यैव प्रतिपादयति यथा—

"प्रजानां विनयाधानाद्रक्षणात् भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः॥"

सेना विनीता, शौर्य्यपूर्णा आसीत् परकीय-राज्यलुंठनं कदापि न प्रोत्साह्यते स्म। अन्यदेशीयव्यवहारे तेषामुपरि स्वकीयविचारावलिर्बलान्नारोप्यते स्म। तत्तद्राष्ट्रीयसंस्कृत्यनुसारं तत्प्रतिनिधिद्वारा शासनं भवेदित्येव तदानीन्तनदिग्विजयस्याभिप्रायो भवति स्म। यथा—

"आपादपद्मप्रणताः कलमा इव ते रघुम्।
फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः।" इति

"गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः।
श्रियं महेन्द्रनाथस्य जहार न तु मेदनीम्॥"

इति च पद्यं तदानीन्तनवैदेशिकनीतिप्रदर्शनं करोति।

न्यायनाटकं विरचय्य प्रतिपक्षिवर्गकृते दण्डप्रदाने न्यायप्रवृत्तिर्नासीत्। प्रजाकल्याणमेव दण्डनीतेरुद्देश्यमासीत् यथा—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



"द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधम् ।
त्याज्यो दुष्टः प्रियोऽप्यासीदंगुलीवोरगक्षता ॥"

करादानं कोषवृद्धये न भवति स्म अपि तु प्रजाहितायैव भवति स्म, यथा—

दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥

एवं च प्रजा अपरिपीडयत् करग्रहणं तासां हितं च करग्रहणस्योद्देश्यमासीत् यथा—

"प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥

एवं विचारे कृते आयातं भवति यत् कविः प्रजाहितकर्तृत्वं नृपस्य सर्वोपरि मनुते, एतदेव कारणं विद्यते तद्विषये कथयति—

यथा प्रहर्षणाच्चन्द्रः, प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरंजनात् ॥" इति

राज्ञः लोकप्रियत्वे सः युक्तदण्डतामपि मन्यते यथा—

स हि सर्वस्य लोकस्य युक्तदण्डतया मनः ।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ॥"

इति । राजा स्वकीय–लोकहितकारकैः कर्मभिः सर्वत्र परिचितः भवति यथा—

"इक्षुच्छायनिषादिन्यस्तस्य गोप्तुर्गुणोदयम् ।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ॥"

शिक्षणप्रभृतिव्यवस्था राज्यतः स्यादिति स्वीकुर्वन्नपि राज्यस्य हस्तक्षेपं शिक्षानीतौ न स्वीकुरुते । विद्यातपोवृद्धा मुनय एव शिक्षाधिकारिण आसन् । तेषां ... दिलीपः, दुष्यन्तश्च आश्रमव्यवस्थाविघातं ... कामौ स्वल्पपरिच्छदौ गच्छतः । तत्र च प्राप्य- ... भिरेव वर्तयति ।

प्रजानां हितसाधनं तदानीं नरेन्द्राणां परमो धर्मः इति स्वीक्रियते स्म । विनयादिगुणानामभावो हि राष्ट्रव्यवस्थोन्मूलनाय प्रभवति, अतएव प्रजासु विनयाधानमतीवावश्यकं भवति स्म । रक्षायाः भरणस्य च भारं स्वयं नरपतिरेव वहति स्म, एतदेव प्रतिपादयन् कविः कथयति—

प्रजानां विनयाधानाद्रक्षणाद् भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥

शाकुन्तले दुष्यन्तः घोषणां कारयति यत् प्रियजनवियुक्तानां जनानां रक्षकः दुष्यन्तः अस्ति । एतेन अपि ज्ञायते यत्प्रजानां संरक्षणस्य सर्वा अपि व्यवस्था राज्यतो भवति स्म ।

राज्ञः धर्मवृत्तित्वं, प्रजानां विनयपूर्णत्वम्, उभयोः सदाचारपूर्णत्वं च तदानीं भवति स्म । एतदेव कारणं वर्तते यत् ईति–भीति,–चौराग्निरोगभय,–दुराचारप्रभृतीनां तदानीं नाममात्रं नावलोक्यते स्म । दिलीपस्य कारागारे बन्दी न बभूव ।

एतावता विचारेण एतदायातं भवति, कालिदासविचारे राजा देवांशसमन्वयरूपः संयत-मनोवृत्तिः दयालुः, वीरः, न्यायप्रियः, प्रजावत्सलः, धर्मरक्षकः भवति । सर्वोच्चसत्ता यद्यपि राजा एव भवति, किन्तु सः प्रजाविचाराणामवहेलनां कदापि नैव कुर्यात् । प्रजाप्रतिनिधिवर्गविचारग्रहणं सर्वेष्वपि कार्येषु कर्तव्यम् । प्रजाप्रतिनिधीनां चयनं कथं करोति स्म इति संकेतस्तु न प्राप्यते, किन्तु एतदवश्यं परिज्ञायते यत्–लोकप्रियराज्यगौरवं वहमाने सांप्रतिके युगे यादृशी त्रुटिपूर्णा चयनप्रणाली वर्त्तते तादृशी तदानीं नैव आसीत्, तथापि प्रजा अधिकस्वतन्त्रतया स्वीयं वाचिकस्वातन्त्र्यमुपभुङ्क्ते स्म । राज्ञः व्यक्तिगत



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नवयुगसाहित्यम्

# मस्तिष्कम्

—सहसम्पादकः

द्राकरप्राणजीवनः नगरस्य सुप्रतिष्ठितश्चिकित्सक आसीत्। सर्वैरन्यैश्चिकित्सकैः पराङ्मुखीकृता रोगिणस्तस्य चिकित्सया उल्लाघा भूत्वा गच्छन्ति स्म। द्राकरमहाशयोऽधुना जीवनस्य संध्यामवलोकयन्नासीत्। वार्द्धक्यमागतम्। परं शल्यक्रियायामधुनाऽपि स भृशं प्रगल्भोऽभूत्। एकदा विचित्र एको रोगी द्राकरस्य चिकित्सालये प्राप्तः। अस्य शिरसि प्रायो महती वेदना वर्त्ततेस्म। तेषु दिनेषु मानसी चिन्ताऽपि तस्य भूयसी अभत्। पत्न्याः प्रत्येकं कृत्ये स प्रातिकूल्यं पश्यति स्म। यदि पत्नी मार्गे कमपि जनं पश्यति स्म, स इदमेव शङ्कते स्म यत्सा तस्मै स्निह्यति। एवं तस्य महती मानसी चिन्ता आसीत्।

द्राकरेण निदानं कृतम्। विविधयन्त्रयोजनानन्तरं तेन निश्चितं यद्रोगिणो मस्तिष्के नैर्बल्यमागतमस्ति। तेन कथितं, भवान् मनश्चिकित्सालये कतिपयदिवसान् यावद्वसतु। भवतो मस्तिष्कं निर्बलं जातम्। अहं शल्यक्रियां कृत्वा शिरसि मस्तिष्कभागस्योपरि एकेन विशेषप्रकारकेण मर्द्दनेन (मालिश massage) मस्तिष्कस्य पुष्ट्ये प्रयत्नं विधास्यामि। आशासेऽनेन प्रयोगेण भवान् उल्लाघो भविष्यति।

रोगी यथाकथितं द्राकरस्य चिकित्सालये निवास मकरोत्। द्वितीय एव दिने द्राकरेण शल्यक्रिया विहितम्। प्राणजीवनेन सोऽयं नवीन एव प्रयोगः कृतोऽभूत्। एतस्य प्रयोगस्य साफल्ये सति जगतः सम्मुखे नवीना क्रान्तिः स्थापिता भविष्यतीत्यासीत्तस्यानुमानम्। अतएव शल्यक्रियायाः समये सोऽ भविष्यतः कल्पनयाऽऽक्रान्तः, सुभृशं प्रसन्नः आत्मश्चाऽभूत्। भगवत्कृपया शल्यक्रिया शीघ्रं समाप्ता रोगी स्वप्रकोष्ठे प्रेषितः।

अपरस्मिन् दिने यथैव द्राकरमहाभागश्चिकित्सालये समाजगाम, शल्यचिकित्सालयं दृष्ट्वा सोऽ सुमहानाश्चर्यचकितोऽतिष्ठत। रोगिणस्तस्य मस्तिष्कं यद्धि शल्यक्रियायाः समये बहिः निःसारितमासीत्, तत् सुरक्षकौषधपात्र एव पतितमासीत्। आतुरतायामन्यमनस्कतायां च तस्य योजनं द्राकरेण विस्मृतमासीत्।

---

चर्या अपि प्रजानां समालोचनापात्रमासीत्। इति वक्तुं शक्यते, यद् राज्ञां व्यक्तित्वं समष्टौ लीनमासीत अधिकाराणां घोषणमन्तरा अपि सर्वे अधिकाराः प्रजा हस्ते आसन्। राज्ञां समीपे गन्तुं कश्चिदपि एतादृशः प्रतिबन्धः न भवति स्म येन स्वकीयआवश्यकतानिवेदने तत्पूर्तौ च व्याघातो भवेत। राजा स्वयमपि यदा कदा प्रजाजनेषु साधारणतमैरपि जनैः स्वीयं सम्पर्कं स्थापयित्वा स्वीयव्यवस्थात्रुटिं निश्चिनोति स्म। चारा अपि सर्वान् जनान् राज्यविरोधिनो मत्वा सूक्ष्मेक्षिकया तदवलोकनस्थाने एतद्विलोकयन्ति स्म। यद्राज्यं प्रति तेषामसन्तोषे को हेतुः? एतस्य कारणमिदमासीत यतः राजा प्रथममेव कथयति स्म "दोषं तु मे कथय येन प्रतिविधीयेत"। स्वल्पैः शब्दैः कथयितुं शक्यते यत्—

प्रजानां चतुरस्रसमुन्नतिकारणीभूतं राज्यतन्त्रमेव महाकविकालिदासस्वीकृतम् आसीत् इति।

---



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अनर्थः सञ्जातः !! यं प्रयोगं सफलं द्रष्टुं द्राक्तरेण सोऽयं सुमहान् श्रमः कृतोऽभूत्, तस्य साफल्यं तु दूरे, तस्य विधिरेव पूर्णो न जातः। सर्वः स्वप्नो भग्नः! तस्य रोगिणो मस्तिष्के दौर्बल्यमासीत्, तस्य मस्तिष्के पुष्टिकारकद्रव्याणां मर्दनं तु दूरे तिष्ठतु, मस्तिष्कमेव शरीरादपगतम्। किमधुना भावि! शरीरस्य सर्वाधिको मूल्यवान् भागः तस्य वराकस्य शरीरादपसृतः।

किन्तु भगवत्कृपया मस्तिष्कमिदं सुरक्षकौषधि-प्रभावात् (Preservative Mixture) यथावत्, अविकृतमासीत्। द्राक्तरो रोगिणः प्रकोष्ठे अधावत्। किन्तु आश्चर्यमासीद्यत् प्रकोष्ठं तदभूत् रिक्तम्। हन्त! यदि रोगी अभविष्यत्तर्हि तस्य शिरसि पुनर्मस्तिष्कं योजयितुमासीत्सुशकम्। किन्तु सोऽपि गतः। प्रकोष्ठ-रक्षकेण कथितं यद्रोगी स्वस्थो भूत्वाऽधुनैव गतः। परं द्राक्तरो नैव विश्वासमकरोत्। ज्ञातं तेन यद्रोगी रात्रावेव मृतो भवेत्। एतस्मिन् वार्धक्ये तदिदमपयशोऽप्यभू-ल्लिखितं भाग्ये।

× × ×

व्यतिगतो भूयान् कालः। व्यस्मरत्सर्वामिमां घटनां द्राक्तरमहाभागः। एकदा स नद्यां स्नानार्थं ग्रामपरिसरे गतोऽभूत्। यथैव वस्त्रादिकमुत्तार्य स स्नातुं सज्जोऽभूत्तथैव स्वस्थ एको मनुष्यः पृष्ठतः समुपासरत्। द्राक्तरेण परिचितं यदयं तु स एव रोगी! स शीघ्रम-पृच्छत्—किं भवानधुनाऽपि जीवति? मस्तिष्कसदृश-स्यामूल्यस्याङ्गस्याऽभावेऽपि किं भवान् प्राणिति? आश्चर्यं यन्मया भवतो मस्तिष्कं पुनः स्थापयितुं विस्मृतम्। किं भवान् स एव? शीघ्रं वदतु। सुमहादाश्चर्यं मे।"

'न मया ज्ञायते यद्भवता मम मस्तिष्कं न पुनः स्थापितम्। किन्त्विदं निश्चितमनुभवामि कृतज्ञः सन् यद्भवता चिकित्साऽनन्तरं होराद्वयेनैव मम सर्वोऽपि रोगः पलायितः। नाऽहमधुना चिन्ताऽऽकुलस्तिष्ठामि। अहं स्वदयितया सह प्रगाढं प्रेमाणं करोमि, किन्तु कदापि ईर्ष्या, व्याकुलता च मां न बाधेते। कस्यचि-दपि कार्यस्य करणीयत्वे नाऽहं भारमनुभवामि। जीव-नस्य स्वस्थमानन्दमुपभुञ्जे। ऋतूनां नृत्यमहं पश्यामि, पुष्पाणि लतिकाश्च मम हृदयं मयूरवन्नृत्यं विधातुं विवशयन्ति, किन्तु भविष्यतश्चिन्ता सर्वदाऽर्थं नष्टा। पूर्वापेक्षया मम स्वास्थ्यं नितरामुन्नतिमभजत इति भवानेव पश्यति। नाहमधुना पठितुं प्रभवामि, परं तदहं वाञ्छाम्यपि न। अधुनाऽहं प्रकृतेः स्वस्थमुपभोगं कर्तुमत्रैव नद्यास्तटे स्वच्छन्दं विचरामि। ममास्या उल्लाघतायाः कृते भवतः उपकारं नाहं कदापि विस्मरामि।"

द्राक्तरमहाशयः सर्वमिदं श्रावंश्रावं चकितोऽतिष्ठत्। निश्चितमेव रोगी नितरां स्वस्थः प्रफुल्लश्चादृश्यत। द्राक्तरः कथितवान्—"मया यन्मस्तिष्कं योजयितुं विस्मृतं तदधुनाऽपि मदीये चिकित्सालये वर्त्तते। यदि भवान् मया सह चलेत्तर्हि तत् पुनरपि योजयिष्ये।"

"नाहमधुना कामपि चिकित्सां वाञ्छामि। विना मस्तिष्कमेवाऽहं सुखी अभूवम्, अस्मि च। शरीरस्य सर्वाधिकं मूल्यवन्तं भागमादाय भवानेव प्रसन्न-स्तिष्ठतु। अन्यस्मै वा कस्मैचन ददात्वेतत्। अहं तु यस्याङ्गस्य कारणादियदवधि दुःखमनुभूतवान्, यस्य निर्गमानन्तरं च जगदेतत् सुखानामालयमनुभवामि, तस्याङ्गस्य पुनर्दर्शनमपि नेच्छामि"—इति कथयन्, मन्दमन्दं गायन् सोऽयमपक्रान्तः।

आश्चर्यचकितो द्राक्तरः प्राणजीवनोऽपि विना स्नानमेव चिकित्सालयं परावृते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृतसमाचाराः—

## राजस्थानसंस्कृतसाहित्यसम्मेलन-षष्ठाधिवेशनम्—

राजस्थानसंस्कृतसाहित्यसम्मेलनस्य षष्ठाधिवेशनं शेखावाटीभूभागस्य मुख्यतमे नगरे सीकरे दिसम्बरमासस्यान्तिमे सप्ताहे भविष्यति । सम्मेलन-विषयकोपक्रमः सर्वोऽपि सज्जीभूतः । स्वागत-समितिनिर्माणं सम्पन्नम् यस्याः अध्यक्षः सीकरजिलाकांग्रेसाध्यक्षः प्रभविष्णुर्नेता श्रीलादूरामजोशीमहाभागः।स्वागतसंयुक्तमंत्रिणौ च क्रमशः सीकरनगरपालिकाध्यक्षः सार्वजनिककार्यकर्ता पं०मन्मथकुमारमिश्रः, प्रसिद्धोऽभिभाषकः (एडवोकेट) श्रीशरदप्रसादरावतश्च सर्वमतेन निर्वाचितौ । अर्थ-संग्रह-प्रचार-प्रकाशनादिसमितिरपि घटिता ।

इदमधिवेशनमभूतपूर्वमैतिहासिकञ्च भवेदिति स्वागत-समितिसदस्यैर्भृशं प्रयत्यते । अस्मिन्नवसरे संस्कृतिदर्शन, कवि-पुराणेतिहास-छात्र-महिलासम्मेलनान्यतिरिच्य निबन्धप्रतियोगिता, संस्कृत-प्रदर्शनी, शलाका-परीक्षा-संस्कृतनाटकादीनामपि समायोजनं भविष्यति ।

शलाकापरीक्षायां व्याकरणे सिद्धान्तकौमुद्यां सर्वोत्तमपदभाजे उपाध्यायछात्राय, साहित्ये साहित्यदर्पणस्य प्रौढयोग्यतायां प्रथमतां प्राप्तवतेऽभ्यर्थिने सम्मेलनेन क्रमशः ५१)–१०१) रूप्यकाणां पुरस्कारौ प्रदास्येते । निबन्ध-प्रतियोगितायामपि उत्तमनिबन्धलेखकाय पारितोषिक-प्रदानयोजना पूर्ववत् व्यवस्थिता । निबन्ध-सूचयोऽविलम्बमेव प्रकाश्यन्ते ।

अस्य सम्मेलनस्येयं भविष्यति विशेषता यदस्मिन् संस्कृतानुरागिभिस्सह तदितरभाषाभाषिणामन्यक्षेत्रजुषामपि पूर्णः सहयोगः प्राप्स्यते । सम्मेलनोद्घाटनाय भारतगणतंत्रस्योपाध्यक्षाः श्रीसर्वपल्लीराधाकृष्णन्महोदयाः अभ्यर्थ्यन्ते ।

**सम्मेलननिबन्धविषयाः**—दिसम्बरमासे भाविनः राजस्थानसंस्कृतसाहित्यसम्मेलनस्यावसरे समायोजितायै संस्कृत-निबन्धप्रतियोगितायै निम्न-विषयाः निर्धार्यन्ते, येषु कमप्येकमवलम्ब्य लिखद्भिः स्वनिबन्धः २० दिसम्बरं यावत् स्वागतसमितिकार्यालये सीकरे प्रेषणीयः—

[१] संस्कृतं प्रति संस्कृतज्ञानां, जनतायाः सर्वकारस्य च कर्तव्यम् ।

[२] स्वतंत्र-भारतस्य शिक्षा-प्रणाल्यां संस्कृतस्य स्थानम् ।

[३] राष्ट्रिय-चरित्र-निर्माणे संस्कृतस्य महत्वम् ।

[४] संस्कृतं विश्वशान्तिश्च ।

[५] राजस्थाने संस्कृतस्य भविष्यत् ।

साधारण्येन निबन्धो मौलिकः, गवेषणापूर्णः सरलसुन्दरभाषानिबद्धो नातिस्वल्पदीर्घो वाच्यलिपियुतो भवेत् । निर्णायकानां मतमविरुध्य प्राप्तप्रथमपदवीको लेखः पुरस्करिष्यते ।

**शलाका-परीक्षा-विवरणम्**—संस्कृत - सम्मेलनावसरे संस्कृतसाहित्यस्य, व्याकरणस्य च प्रौढज्ञानसुरक्षार्थं तदर्थमुत्साहनाय चैका शलाका-परीक्षा आयोजिता यस्यां राजस्थानीयस्वीकृत-विद्यालयच्छात्राः समवेतुमर्हन्ति ।

(१) सिद्धान्तकौमुद्यां समासाश्रयप्रकरणं यावत् प्राथम्यं भजमानेन छात्रेण एकपञ्चाशन्मुद्राः पुरस्कारस्वरूपं प्राप्स्यन्ते ।

(१) साहित्य-दर्पणस्य संपूर्णभागे सर्वोत्तमतां प्राप्नुवता प्रतियोगिना एकोत्तरं शतं पुरस्कारत्वेन लप्स्यते ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रतियोगितायां भागमिच्छद्भिस्त्वरितमेव स्वागतसमितिकार्यालये विद्यालयाध्यक्षानुमतपत्रेण स्वनामानि प्रेषणीयानि ।

**कालिदासमहाकवेः स्मृतिदिनम्**—अस्मिन् नवम्बरमासे विश्वविश्रुतकीर्तेः कविकुलगुरोः कालिदासस्य स्मृतिदिनानि (जयन्ती वा) ससमारोहं देशस्य विभिन्नभागेषु समायोजितानि । अमरकाव्यप्रणेतुः चिरस्मारकप्रतिभावतः, भारतीयस्यापूर्वस्यैकस्यात्मनः स्मरणं देशस्य कृते कियदावश्यकं कर्त्तव्यमिति नास्ति वर्णनीयम् । हर्षस्य विषयो यद्भारतसर्वकारस्यापि प्रसारणविभागोऽस्मिन् महत्त्वपूर्णे कार्येऽभूत् । आकाशवाणी (आल-इण्डिया-रेडियो) अपि स्वकीयेषु विभिन्नेषु केन्द्रेषु कालिदासजयन्त्या विशेषायोजनानि अकरोत् । १९ नवम्बरदिवसे देहलीकेन्द्रात् महाराष्ट्रलेखकेन वामनकरेण, डा० रामकुमारवर्मणा, के० एम० पणिक्करेण, अन्यैश्च देशस्य मान्यैः साहित्यकारैः कविगुलगुरवेऽपि श्रद्धाञ्जलयः समर्पिताः । जयपुरकेन्द्रादपि १५ नवम्बरदिने भारत्याः सहसम्पादकेन, श्रीइन्दुशेखरेण च कालिदासकवितानां सङ्गीतमयं पाठं कृत्वा कालिदासस्य स्मृतिर्जागरिता । अन्येषु आकाशवाणीकेन्द्रेष्वप्येवंविधाः कार्यक्रमा अभवन् ये अभिनन्दनार्हा एवाऽसन् । अन्येषु प्रदेशेष्वपि तादृशाः समारोहाः समभवन् येषां संक्षिप्तं विवरणं प्रकाश्यतेऽस्माभिः ।

इदमपि सहर्षं सूच्यते यदस्य महाकवेः संपूर्णग्रन्थावली, यस्या अभावो भारते बहोः कालात्पूर्वतः अनुभूयतेस्म संयुक्तराष्ट्रसंघस्य शिक्षाविज्ञानसंस्कृतिसंस्थया (यूनेस्को) प्रकाशयितुं निश्चिता ।

राजस्थानीयसंस्कृतसाहित्यसम्मेलनस्य जोधपुरशाखया महाकविकालिदासस्य जयन्ती महात्मागांधीस्कूलमध्ये कार्तिकशुक्लैकादश्यां (२५-११-५५) महता समारोहेण सम्पादिताभूत् । श्रोतृणां संख्या अपि चतुःशतं यावदासीत् । नगरस्य उच्चाधिकारिणोऽपि कियन्तः संस्कृतानुरागिणः इत्यपि च आसीद्दर्शनीयम् ।

उत्सवस्य सभापतित्वं अलंकुर्वद्भिः जस्टिसश्रीदुर्गाशंकरमहोदयैः कालिदासस्य ऐतिहासिकीं चर्चां कुर्वद्भिः महाकवेः काव्यानां सौन्दर्ये पातितः समीचीनः प्रकाशः । अन्ते च उक्तं—संस्कृतभाषां विना अस्माकं संस्कृतेः रक्षायाः न संभवः । जाने, अद्य सर्वोऽपि जनः विज्ञानं अनुधावति । मन्यामहे च इयं स्वाभाविकीप्रवृत्तिः जनानां परं इतोऽपि प्रवृत्तिः विधेया एव । यदि अस्माभिः सर्वैः मिलित्वा प्रयत्नः क्रियेत चेत् अस्माकं अभिलषितं न दूरे ।

श्रीमद्भिः महाकविनित्यानन्दमहोदयैः संस्कृतभाषायां कालिदासस्य काव्यानां माहात्म्यं वर्णितम् ।

डा० देवराजउपाध्यायेन महाकविं प्रति श्रद्धांजलिं अर्पयता उक्तं जीवनक्षेत्रे इतस्ततः पलायमानानां अस्माकं न कुतोऽपि संस्कृतं विहाय शान्तिः इति ।

श्रीमत्या गार्गी अनुसूयया संस्कृतभाषायां संस्कृतभाषायाः गौरवं प्रदर्शितम् ।

डा० सोमनाथगुप्तमहोदयेन च शाकुन्तलगतं प्रणयमाहात्म्यं कालिदासस्य च शिवभक्तिप्रियत्वं प्रतिपादितम् । प्रिंसिपलरामचन्द्रमिश्रैः, पं० कालूरामशर्मभिः कवेः ग्रन्थानां साहित्यदृष्ट्या लोकदृष्ट्या च कियन्माहात्म्यमिति श्रावितम् । मणिशंकरशास्त्रिभिः मेघदूते मेघपर्यायवाचिशब्दानां प्रयोगे कवेर्नैपुण्यं तथा च तात्कालिकीनां स्त्रीणाम् दिनचर्या च मेघदूतमाश्रित्य वर्णिता ।

अन्ते च श्रीनारायणसिंहभाटी-महोदयेन मेघदूतस्य राजस्थानीभाषायां अनुवादः श्रावितः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



इमं कालिदासजयन्त्युत्सवं सविशेषं सफलयितुं श्रीजगदीशचन्द्राचार्येण सितारवादनेन. श्रीआशकरणशर्मणा च शास्त्रीयसंगीतेन सम्यग् अभिरंजिताः श्रोतारः।

स्थानीयश्रेष्ठिप्रमुखेन श्रीगोवरधनदासकाबरा महोदयेन अभीष्टसहयोगप्रदानेन उत्सवस्य शोभा वर्धितेति साधुवादार्हः।

सम्मेलनस्य मन्त्रिमहोदयेन श्रीमणिशंकरशास्त्रिणा स्वप्रयासेन अद्यावधि अपरिचिताः नगरस्य विभिन्नक्षेत्रेषु वसन्तः संस्कृतानुरागिणः संस्कृतस्य विद्वांसः अन्विष्य समामन्त्रिताः इति प्रशंसनीयः प्रयासः।

डीडवानास्थ – श्रीरामानुजसंस्कृतमहाविद्यालयीयछात्रपरिषदस्तत्वावधाने २५।११।५५ तारिकायां प्रधानाचार्य पं०श्रीरामेश्वरप्रसादजीशास्त्री विद्यालंकाराणामध्यक्षत्वे "श्रीकालिदासजयन्तीमहोत्सवः" सोल्लासं सम्मानितः।

एतस्मिन्नवसरे विदुषां विविधभावभूषितेषु भाषणेषु सत्सु छात्रैः अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्याभिनयोऽपि विहितः। अभिनयस्य कलात्मकरूपदाने श्रीकृष्णचन्द्रशास्त्रिणः परशुरामशर्मणश्च आसीत् महान् सहयोगः।

राजस्थानसंस्कृतसाहित्यसम्मेलनादेशानुसारं सीकरेऽपि २५दिनाङ्के महता समारोहेण कालिदास-जयन्त्याः समायोजनं राजकीयश्रीरघुनाथसंस्कृतकालेजभवने सायं पं०बजरंगलालजीजोशीमहाभागस्य साभापत्ये सम्पन्नम्। तत्र पं०शुकदेवभाज्यौतिषाचार्येण विहितस्य मंगलस्यानन्तरं महाविद्यालयाध्यक्षाः पं०श्रीरघुवीरदत्तशास्त्रिणः कविसम्राजोऽस्य जीवने-साहित्ये च प्रकाशमपातयन् अन्यैश्च पं०मनोहरमिश्रएम.ए, सत्यदेवशास्त्री, श्रीसत्यनारायणदीक्षितमहोदयैरपि कविवर्येण कृतां संस्कृतसेवाम्प्रति श्रद्धाञ्जलयोऽर्पिताः, वक्तव्येषु च सुन्दर भविष्यतः आशा व्यक्तीकृता।


ओरिएण्ट पेपर मिल्स लि०

निर्माता

पैकिंग के लिए :
(क) एम० जी० रिब्ड क्राफ्ट
(ख) एम० एफ० अनरिब्ड क्राफ्ट
(ग) वाटरप्रूफ क्रैफ्ट
(घ) क्रीप क्रैफ्ट

लिखने और छपाई के लिए :
(क) ह्वाइट प्रिंटिंग
(ख) क्रीम – लेड
(ग) सेमी – ब्लीच्ड
(घ) अनब्लीच्ड

पैकिंग और रैपिंग के लिए
ब्राउन रैपिंग

बाक्स, कार्टन्स आदि बनाने के लिए
(क) कार्टन बोर्ड
(ख) एम० जी० ग्रे बोर्ड
(ग) एम० एफ० ग्रे बोर्ड
(घ) ट्रीप्लेक्स
(च) डुप्लेक्स
(छ) कार्टिज
(ज) टिकेट बोर्ड
(झ) कवर बोर्ड

ओरिएण्ट पेपर मिल्स लि०
मैनेजिंग एजेण्ट्स बिरला ब्रदर्स लि०
८, रायल एक्सचेंज प्लेस, कलकत्ता–१
ओरिएण्ट पेपर आपकी और आपके उद्योग की सेवा करता है




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

**राजस्थान-विश्वविद्यालयस्योपाधिवितरणोत्सवः-** राजस्थानप्रान्तीयो विश्व-
...विषयवर्षेभ्यः संघटितो राजस्थानप्रान्तीयो विश्व-
...द्यालयः शनैः शनैरुन्नतिं भजते इति भवेद्विदितं
...र्तिकाणाम। दिसंबरमासस्याऽस्य ३ तारिकायां

**...ऋषिकुले वार्षिकोत्सवः—** लक्ष्मणगढस्थश्रीऋषि-
...ब्रह्मचर्याश्रमसंस्कृतमहाविद्यालयस्य द्वात्रिंशत्तमो
...र्षिकोत्सवो नानाविधकार्यक्रमसमन्वितः आश्विन-
...शुक्लपूर्णिमामारभ्य दिनत्रयं यावत् महता समारोहेण
...न्नः। आरम्भदिने प्राभातिकपरिक्रमणानन्तरं दश-
...हवनवेलायां विद्यामार्तण्ड पं०श्रीघनश्यामचन्द्रशास्त्रि-
...सपलमहोदयानामाचार्यत्वे आश्रमसञ्चालकश्रेष्ठि
...लारामचूडीवालामहोदयेन वैदिकं श्रीगणपतिसर-
...त्यादिपूजनं षोडशोपचारविधिना संपादितम्। रात्रौ
...सङ्कीर्तं श्रीहरिकीर्तनं च सञ्जातम्। द्वितीयदिने
...कृतविजयध्वजारोहणानन्तरं कल्याणसंपादकस्य श्री-
...हनुमानप्रसादपोद्दारमहाशयस्य साभापत्ये वार्षिकोत्सव-
...श्रीवेदभगवतः शोभायात्रा साहित्यप्रदर्शिनीउद्-
...टनञ्च समभूत्, यत्र बहूनां विद्वज्जनमहात्मनां भाषणा-
...नन्तरं सभापतिना भारतीयसंस्कृतेः संस्कृतभाषायाश्चो-
...र्ये स्वविचारान् प्रकटीकृत्य साहित्यप्रदर्शिन्याः
...संस्कृतसाहित्यनिर्देशकचित्राणि छात्रप्रतिभाकल्पतानि
...शंसितानि। रात्रौ श्रीरामेश्वरप्रसादशास्त्रिसाहित्या-
...र्यसभापतित्वे कविसंमेलनं समपद्यत यत्र राजस्थानी-
...नेककविभिः स्वकविताः श्राविताः। तृतीयदिने वृन्दा-
...वनास्तव्य - श्रीवैष्णाचार्यश्रीचक्रधरस्वामिनामाध्यक्ष्ये
...साहित्यपरिषदश्चतुर्थवार्षिकाधिवेशनं विविधकार्यक्रम-
...समन्वितमभूद्यत्र ब्रह्मचारिच्छात्रैश्चारुमित्रानाटकं साधु-
...अभिनीतं व्यायामप्रदर्शनादिकं च सम्पन्नम्।
...योग्या अभिनेतारो राजतपदकैः पुरस्कृताः। इत्थ-
...मयं महोत्सवः संस्कृतोन्नतिविधायकः सानन्दं सोत्साहं
...सम्पन्नोऽभूत्।

विश्वविद्यालयस्याऽस्य अष्टम उपाधिवितरणोत्सवो जयपुरनगरीय-महाराजाकालेजस्य विशाले प्राङ्गणे महता समारोहेण संवृत्तः। एतस्मिन् द्विसहस्रामिताः स्नातकाः, द्विशतमिता महिलाश्चासन् उपाधिग्राहिणो नूनम्। भारतप्रसिद्धः श्रीमान् के० एम्० पणिक्कर-महोदयो दीक्षान्तभाषणमकरोत्। महोदयेनानेन शिक्षा-विषये समयोचितं यद्वक्तव्यमासीत्तत्प्रोक्तमेव, किन्तु 'अयं जयपुरीयः, एष उदयपुरीय इत्यादि संकुचितां भावनामुल्लङ्घ्य संप्रति राजस्थानीयाभिमानः सर्वैरावह-नीय' इति भृशमशिक्षयत्। वर्तमानां परिस्थितिमालोच्य मार्मिकमिदमुक्तं पनिक्करमहाभागेन। न केवलमधीया-नानां शिक्षार्थिनामेव, किन्तु राजस्थानेऽमुष्मिन् अधि-कारपदमारूढानां शासकानामपि हृदये सेयं संकुचिता भावना समये समये प्रबला भवति, इति बहुधाऽनुभूतम्। ईदृशे उदारशासने सेयं संकीर्णा भावना वस्तुतो हानि-करी। यदा हि संपूर्णस्यैव भारतस्य पुनर्निर्माणं संमुखगतमस्ति तदा यत्किञ्चित्प्रदेशसंबद्धा सेयं संकी-र्णता कथं वा हितावहा सिध्येत्?

संस्कृतभाषाविषये महोदयेनाऽनेन भूयस्तरां मार्मि-कमुदीरितम्। संस्कृतभाषायाः साहित्यादिगतां महत्तां संस्थाप्य, जयपुरराज्यस्य संस्कृतसेवा विशेषतः समुल्ले-खनीया सूचिता। यतो हि सरदारमहाभागेन प्रोक्तं यद् जयपुरराज्यमिदं ४०० चतुःशतवर्षेभ्यः संस्कृत-सेवामविरतमाचरत्। अत्रत्या राजानः संस्कृतपण्डि-तेभ्यः परस्सहस्रमुद्रावार्षिकीं ग्रामादिजीविकां प्रदाय तेषां द्वारेण संस्कृतभाषायाः, शास्त्राणां, धर्म-संस्कृत्यो-श्च संरक्षणमकार्षुः। अत्रत्येन पण्डितदुर्गाप्रसादेन 'काव्यमाला' प्रकाशिता, यद्द्वारा अनेकानेकदुर्लभ-ग्रन्थानां परिचयः संस्कृतसेवकानामभूत्। ये किल महोदयाः संस्कृतभाषां भारतस्य कृते द्वितीयां भाषां मन्यन्ते, ते हि प्रमाद्यन्ति। संस्कृतं हि भारतस्य सर्व-प्रथमा भाषा। ये हि भारतस्य संस्कृतिं, भारतीयां परम्परां च जिज्ञासन्ते तेषां कृते संस्कृताध्ययनं सर्वथा अनिवार्यम्। विशेषतस्तु राजस्थानीयानां कृते, येषां



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



हि संमानः, प्रतिष्ठा, जीवनसर्वस्वं च संस्कृतेतिहासे एव निहितम् । सरदारमहाभागेन साग्रहं सूचितं यद् विश्वविद्यालयस्याऽस्य प्रधानं कर्तव्यं यत्सोयं निजपाठ्यक्रमे संस्कृतभाषायै महत्त्वपूर्णं स्थानं दद्यात् ।

यत्किञ्चिदस्तु, उपाधिवितरणोत्सवः सुमहता समारोहेण समपद्यत । महामहान्तः प्राघुणिकाः समभिलन् । अनेकानेके स्नातका उपाधिपत्राणि, पदकानि चाऽलभन्त । किन्तु उत्सवस्याऽस्य संपूर्णोपि कार्यक्रमः आङ्गलभाषया संपन्नोऽभवत् । आङ्गलशैलीनिर्मितानि कृष्णवर्णानि 'गाउन'वस्त्राणि धारयन्तः स्नातका महोत्सवमिमं वैदेशिकमिव प्रादर्शयन् । एका त्रुटिरन्याऽपि मार्मिकाणां हृदये आस्खलद् यद् विश्वविद्यालयस्य मुख्यसंरक्षकस्य स्वर्गतस्य महाराणाश्रीभूपालसिंहमहाभागस्य देहावसाननिमित्तको न कोपि शोकप्रस्तावो, न च, कोपि संदेशो वा समपठ्यत । अस्तु, विश्वविद्यालयोयं प्रतिदिनमधिकाधिकामुन्नतिं कीर्तिं च समधिगम्यादिति परमेश्वरं प्रार्थयामहे ।

**सोवियतप्रधानमन्त्रिणो जयपुरे विशिष्टं स्वागतम्**—सोवियतरूसराष्ट्रस्य प्रधानमन्त्री श्रीवल्गानिनस्तत्सहचरः श्रीख्रुश्चेवमहोदयश्च भारतस्य दिल्लीप्रभृतिषु प्रधान-प्रधानसंस्थानेषु स्वागतसम्मानं स्वीकुर्वन् विद्याकलामन्दिरेऽस्मिन् जयपुरनगरेऽपि समागच्छत् । जयसिंहमहाराजाधिराजेन कस्मिंश्चित् अभूतपूर्वे शुभमुहूर्ते संस्थापितमिदं नगरं सर्वदैव उच्चतमं संमानमेव समध्यगच्छदिति स्पष्टमितिहासपाठकानाम् । सांप्रतं भारतस्य पुनः संघटनावसरेऽपि तदिदं नगरं नवीनतया संघटितस्य विशालराजस्थानस्य राजधानीपदमध्यगच्छत् । अस्मिन् हि नगरे प्रायः "अष्टवारा नवोत्सवाः*" इति किंवदन्ती चरितार्था भवति । एतदनुसारमेव दिसंबरमासस्य सेयमष्टमी तारिका (८।१२।५५) जयपुरनगरस्य उत्सवपरम्परायां नवीनामेव लहरीं प्रावाहयत् । प्राघुणिकरूपेण समागतस्य ससहचरस्य श्रीवल्गानिनमहोदयस्य स्वागतसमारोहो महता समुत्साहेन समभवत् ।

अष्टमतारिकायां अपराह्णस्य सार्द्धद्विवादने महाभागो 'अलून्किन' नामकाद् व्योमयानादवतीर्य राजस्थानीयजनतायाः स्वागतं स्वीचकार । राजस्थानस्य महामाननीयो राजप्रमुखः श्रीजयपुरनरेन्द्रः, प्रधानमन्त्री श्रीसुखाडियामहोदयश्च रूसराष्ट्रनेतुः स्वागतसंमानमकुरुतां सर्वप्रथमम् । ततो रूसस्य राष्ट्रीयगानं, भारतस्य राष्ट्रीयध्वनिश्च मङ्गलवादित्रेषु सर्वतः समगुञ्जत् । मङ्गलवाद्येनाऽनेन सहैव, राजस्थानीयबहुमूल्यवेषभूषासज्जिता मङ्गलकलशं पुरस्कुर्वत्यः कुमारिका मङ्गलगानमगायन् । कुमारिका इमा भारतीयरीतेरनुसारं प्राघुणिकयोर्द्वयोरेव ललाटे कुंकुमतिलकमकुर्वन् , यद्धि तिलकं गौरेऽस्मिन् वैदेशिकानां ललाटे परमां शोभां परिपुष्यद् भारतीयैः सह शुभमैत्र्याः शुभां घोषणामकरोदिव । ततः प्राघुणिकानां समारोहः साङ्गानेरसंस्थानात् "रामबाग" हर्म्यं व्यश्राम्यत् । मार्गे लक्षमिता जनता सोत्कण्ठं ससमादरं च महाभागमिमं विलोकयन्ती "हिन्दी रूसी भाई-भाई" (भारतीयाः रूसवासिनश्च मिथोभ्रातरः), 'भारत-रूसयोर्मैत्री चिरस्थायिनी भूयात्' (भारत रूस मैत्री जिन्दाबाद) इत्यादिभिर्हर्षनादैरागन्तुकानां स्वागतमसूचयत् । श्रीवल्गानिनमहाभागाः श्रीख्रुश्चेवमहोदयश्च कृताञ्जलिः सन् जनताया हर्षप्रकाशस्योत्तरमददात ।

अर्द्धहोरां यावत् रामबागोद्याने विश्रम्य सोवियतमन्त्रिमहोदयः 'पोलो' चतुरङ्गणे समागच्छत् यत्र मुख्यमन्त्रिणा श्रीसुखाडियामहोदयेन प्रीतिभोज्यस्याऽऽयोजनमक्रियत । अर्द्ध घण्टां यावत पोलोक्रीडामपश्यन्महाभागोयम् । पश्चवादनोत्तरं मान्यमहोदयोऽयं नगरदर्शनाय प्रातिष्ठत । तत्र सकलनगरस्य सज्जासंविधानादिकमालोक्य रामनिवासोद्यानस्य पृष्ठभागाज्जनसाधारणसभायामागच्छत । सेयं सार्वजनिकसभा रामनिवासोद्यानस्य हर्म्याग्रभागे (म्यूजियम) निवेशिताऽभूत्, यस्यां पुष्पगुच्छान् संग्रथ्य सुदृश्या आसन्दी निर्मिताऽऽसीत् । आसन्द्यामस्यां यथैव सोवियतमन्त्रिमहोदयेन

*'आठ वार नौ त्यौजार ।'



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...न्यासः कृतोऽभूत्तथैव अपारायां जनतायाम्—'हिन्दी ...ो भाई-भाई' इति निनादः सर्वदिक्षु प्रतिध्वनितो... । अनुमानतः सार्द्धलक्षद्वयमिता जनता सभाया... समवेताऽऽसीत् । अस्यां सभायामुपागतस्य ...नीयप्राघुणिकस्य अपरिमितयाऽनया जनतया गगन...ः करतलध्वनिभिः सप्रमोदमक्रियत स्वागतम् । ...मेघराज 'मुकुल' महोदयेन सोच्चैःस्वरं हिन्दी...ताद्वारा स्वागतमक्रियत । राजस्थानस्य मुख्यमन्त्री... सुखाडियामहोदयो राजस्थानीयजनतायाः प्रातिनि...ं समागतानां मान्यमहाभागानामभिनन्दनमकार्षीत् । ...राष्ट्रस्य द्वावपि नेतारौ ...लिबन्धपुरस्सरं हि...भाषया जनतायाः ...खे 'नमस्ते' इत्य...भिवादनमकार्ष्टाम् ।

ततो राजस्थानसंघेन ...र्पिता, ४७ तोलक...ेन सुवर्णेन घटिता, ...जटिता मञ्जूषा ...र्पित मन्त्रिमहाभा...। ततो जयपुरराज्यस्य ...प्रसिद्धेन मूर्तिकारेण ...गोपीचन्द्रमिश्रेण तथा ...रायणलाल-जैमिनिना ...कौशलं निर्मिता श्रीवल्गाननमहोदयस्य एवं ख्रुश्चेव-...महाभागस्य च मर्मरघटिता प्रतिमा पूर्वोक्ताभ्यां प्राघुणि...काभ्यां ससमादरं समार्प्यत । सेयं मूर्तिः स्वच्छपाषाण...घटिता अनयोः प्राघुणिकयोरुपरितनस्य अर्द्धाकारस्यासीत् ...किला अतिप्रशंसनोयाऽभूद् यां दृष्ट्वैव प्राघुणिक...समूहः प्रासदत् । एतदनन्तरं जोधपुररंगकलाकलिते ...'जॉरजेट' पटनिर्मिते, द्वे राजस्थानीये उष्णीषे (साफ़ा) ...द्वयोरपि प्राघुणिकयोः शिरसि निवेशिते अभूताम् । ...योः स्थापनसमकालमेव कौतुक-हर्षविनोदसंप्रेरिता ...जनता करतलध्वनिभिः परिहासप्रमोदैश्च सभामण्डप...मगुञ्जयत् ।

उष्णीषपरिधानोत्तरं द्वयोरपि संमुखे विशालो दर्पणः समानीयत, यस्मिन्नात्मनः प्रतिबिम्बं विलोक्य द्वावपि मुहुर्मुहुः स्मितमकुरुताम् । वक्षसि सुवर्णतन्तुभिर्निर्मितो हारः, शिरसि राजस्थानीयशैलीघटितमुष्णीषम् गौरं मांसलं च शरीरम्, अतएव द्वावपि प्राघुणिकौ वेषविन्यासेन साक्षाद् राजस्थाननिवासिनौ प्रतीतावभूताम् । अस्यां दर्शनीयपरिस्थित्यां सभामण्डपे छायाचित्रशिल्पिनाम् (फोटोग्राफर) मण्डलमतितमामुत्साहितमभूद्, येन हि वारं वारं विद्युत्प्रकाशं कृत्वा प्राघुणिकानां छायाचित्रमगृह्यत ।

एतदनन्तरं वल्गाननमहोदयो द्विलक्षपरिमितजनतायाः प्रमोदोत्साहपूर्णे विशाले मण्डले सादरमुत्थाय भाषणमकरोत "भवन्तो मामाज्ञापयन्तु यद् अहम् सोवियतजनतायाः प्रातिनिध्येन भवतां शुभकामनाः प्रकटयेयम् । भवद्भिर्येन प्रेमभावेन मे स्वागतमकारि तदर्थमहं हृदयस्याऽन्तस्तलेन कृतज्ञतां प्रकटयामि । भवन्तो नूनमतितमां मे आतिथ्यं च संमानं चाऽकार्षुः यं हि न कदाचिदहं विस्मरेयम् । सोवियतनेता अग्रे प्राऽभाषत—यत जयपुरराज्यस्येतिहासः संमाननीयोऽस्ति । भारतवर्षस्य स्वातन्त्र्ययज्ञे जयपुरेणानेन भूरि भूरि योगः कृतोऽभूत । अहं वहोः कालाज्जानामि यज्जयपुरस्याऽस्य भारतीयेतिहासे प्रमुखतमं स्थानम् ।

ततो राजस्थानस्य मुख्यमन्त्री श्रीमोहनलालसुखाड़ियामहोदयो राजस्थानस्य पुरातनमितिहासं संक्षेपेण प्रस्तुत्यातिथीनां संमाने राजस्थानीयजनतया हार्दिकमभिनन्दनं प्रकटयामास ।

सोवियतप्रधानमन्त्रिणः श्रीवल्गाननस्य तत्सहचरस्य च संमाननायां यः किल प्रीतिभोजो राजप्रमुखेन

## संस्कृतछात्राणां कृते "भारती" !!

सहर्षं वयं सूचयामो यद् देहलीनगर्या एकेन संस्कृतविद्यार्थिना "भारती" कार्यालये रूप्यकशतकं प्रदाय 'संस्कृतछात्राणां कृते भारती स्वल्पमूल्येन प्रदीयेत इति मनीषा प्रकटीकृता । अतः ये संस्कृतछात्राः [संस्कृतपाठशालासु अन्यकालेजेष्वपि च संस्कृतविषयमधीयानाः] स्वपाठशालाया अध्यक्षस्य हस्ताक्षराङ्कितम् आवेदनपत्रं भारतीकार्यालये प्रेषयिष्यन्ति, ते एकवर्षस्य कृते मुद्राद्वयेनैव २) भारतीं लप्स्यन्ते । आवेदनेन सह मुद्राद्वयप्रेषणमावश्यकम् ।

व्यवस्थापकः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



श्रीजयपुरधराधीशेन "चन्द्रमहल" प्रासादे दत्तस्तस्याऽवसरे श्रीमता संक्षिप्तमपि राजनीतिपूर्णं भाषितम्। प्रोक्तं यत्— भारतमिदं सर्वैरेव राष्ट्रैः सह मित्रतापूर्णं सम्बन्धं वाञ्छति। वयमनया वार्तया सर्वतोभावेन प्रसीदामो यत्पञ्चशीलसिद्धान्तः सोवियतसंघेन तथाऽन्यान्यैश्च राष्ट्रैः स्वीकृतः। अनेन हि अन्ताराष्ट्रिये मिथो विरोधे भूयसी न्यूनता संभवेत्।

वयमिदं जानन्तो भृशं संतुष्यामो यत् सोवियतसंघेन विज्ञाने, व्यवसायोद्योगे, कृषिक्षेत्रे च प्रगतिरवलम्बिता। तत एव वयं विश्वसिमो यद् राष्ट्रनिर्माणकार्ये श्रीमतामनुभवेन कश्चिन्महत्त्वपूर्णो लाभः संभवेत। अन्ते प्रोक्तं श्रीमता—यद् भवतां राष्ट्रस्य तत्ताभिर्घटनाभिः भारतीयानामस्माकं पूर्णा मनोऽभिरुचिरभवत्। भवतामनया भारतयात्रया द्वयोरपि देशयोः संबन्धाः पूर्वतोऽप्यधिकं सुदृढाः संपद्येरन्, येन हि विश्वशान्तेः स्थापनायां भूयस्तरां सौकर्यं संभवेत्।

## भारतसर्वङ्कारः शिवाजीचरित्रात्स्फूर्तिं शिक्षेत

सोवियतप्रधानमन्त्री श्रीवल्गाननो यदा पूनानगरे गतः (२६ नवम्बर) तदा प्रीतिभोजाऽवसरे मन्त्रिमहोदयेन राजनीतिपूर्णं भाषितमभूत्। महाराष्ट्रीयेतिहासस्य सौष्ठवेन विश्लेषणं कुर्वता श्रीमता प्रोक्तं यत् शिवाजिना देशभक्तं निजानुयायि दलं संगृह्य श्रद्धा ता वीरता प्रकटिताऽभूत्। शिवाजिनः संघर्षः उपनिवेशवादस्य, अत्याचारस्य च विरोधे समभवत्। महाराष्ट्रैः शिवाजिनो नेतृत्वे स्वतन्त्रतायाः संग्रामः प्रवर्तितोऽभूत्। अतएव भारतीयो राष्ट्रियसर्वङ्कारः शिवाजिनः सकाशात् स्फूर्तिं प्राप्तुं शक्नोति।

## श्रीवल्गाननस्य प्रत्युत्पन्नमतिता संस्कृतस्य महान् विजयश्च

सोवियतप्रधानमन्त्री यदा हि मद्रासप्रान्तीये कोयम्बतूरनगरे (२७ नवम्बर) गतस्तदा महाभागेनाऽनेन तत्र स्फुरद्बुद्धितायाः परिचयो दत्तः। कथा सेयमेवमस्ति—यदा हि सार्वजनिकसभायां सोवियतमन्त्रिणा "हिन्दी रूसी भाई भाई" इति हर्षनादः सोच्चैःस्वरं घोषितस्तदा तत्रत्यायां जनतायां न तादृशो हर्षनादः समश्रूयत। कारणमासीत्—यत्तत्रत्या जनता हिन्दीभाषां न जानाति। अतएव 'हर्षनादस्यास्य तामिलभाषायामनुवादः कारितोऽभत्। इदानीं 'भाई' शब्दस्य संस्कृतपर्यायवाची शब्दः प्राप्तो वल्गाननमहोदयेन। अतएव तेन महता उच्चस्वरेण घोषितम्—"हिन्दी रूसी सहोदरे" एतत्श्रुत्वैव अपारायामस्यां जनतायां तादृशो महान्नादः प्रासरद् येन गगनं च दश दिशश्च सर्वतः प्रतिध्वानिता इवाऽभवन्। अनेन संस्कृतस्य राष्ट्रव्यापितया न किं महान् विजयः सिध्येत्?

## भारतीया संस्कृतिः सर्वतः प्राचीनतमा सोवियतनेतुः क्रुश्चेवमहोदयस्य स्वीकारः

सोवियतसंघस्य कम्यूनिष्टदलस्य मुख्यसचिवः श्रीख्रुश्चेवमहोदयो नवम्बरमासस्य २५ तारिकायां यदा मोहमयीनगरे गतस्तदा महाभागेनाऽनेन प्रकाश्यभाषणे स्वीकृतं यत् भारतस्य संस्कृतिः सभ्यता च रूसराष्ट्रस्याऽपेक्षयाऽपि सुतरां प्राचीना। एतदपि तेनाङ्गीकृतं यत् रूसराष्ट्रीयैः पशूनां रक्षणाऽवेक्षणं भारतीयानां सकाशादेव शिक्षितमभूत्। नवशिक्षितमहाभागा भारतीयसंस्कृतेर्महत्त्वमधुनाऽपि किं न परिचितुयुः?

एवं भारते सम्पूर्णमपि मासं भ्रमणं कृत्वा रूसीयातिथयः संमिलितं वक्तव्यमेकं प्रचार्य १४ दिसम्बर दिवसे अफगणस्थानयात्रायै प्रस्थिताः। ततस्ते रूसं प्रस्थास्यन्ते। एषु दिनेषु भारते विदेशीयानां महान्ः स्वागतसमारोहाः समभवन्। अरबस्य सम्राट् शाहऊदोऽपि परःशतसामन्तैः सह भारतमागमत्। अनेन अलीगढविश्वविद्यालयीयछात्रसङ्घाय पञ्चसहस्रमुद्रादानं कृतम। नेपालमहीन्द्रो महेन्द्रो भारतयात्रां विधाय नेपालं प्रस्थित एव। न्यूजीलैंडस्य कृषिमन्त्री अपि भारतं भ्राम्यति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



लसंस्कृतशिक्षणोपायाः—

# सत्यवादी हरिश्चन्द्रः

## हिन्दी

महाराज हरिश्चन्द्र अपनी सत्यवादिता के लिये प्रसिद्ध हैं। उन्होंने सारा राज्य विश्वामित्र ऋषि देकर अपनी प्रतिज्ञा पूरी की थी। एक बार वे रहे थे। उन्होने सपने में देखा कि वे एक ब्राह्मण अपना राज्य दान में दे रहे हैं। दूसरे दिन सच-ही विश्वामित्र ऋषि उस ब्राह्मण के रूप में राजा रिश्चन्द्र के पास पहुंचे और उन्होंने राजा से राज्य दान करने के लिये कहा। राजा ने स्वप्न की बात दृढ रहते हुए संकल्प करके अपना सारा राज्य श्वामित्र ऋषि को दान में दे दिया। विश्वामित्र ने न के बाद अपनी दान की दक्षिणा भी मांगी, पर जा, सारा राज्य दान में दे चुका था अतः वह राज-से कुछ भी धन नहीं दे सकता था।

अन्त में राजा ने अपने आपको, अपनी रानी व्या और पुत्र रोहिताश्व को बेचकर वि था मत्र की क्षिणा दी। शैव्या और रोहिताश्व को एक पंडित ने रीदा और हरिश्चन्द्र को एक चाण्डाल ने। सांप के टने से रोहिताश्व की मृत्यु हो गई। शैव्या उसे कर श्मशान में गई जहां हरिश्चन्द्र श्मशान की खवाली कर रहा था। उसने धर्म के नियम से शैव्या से भी मुर्दे का टैक्स मांगा। राजा के सत्यपालन से भगवान् विष्णु उस पर प्रसन्न हो गये और विश्वा-मित्र ने उन्हें आशीर्वाद दिया। वे फिर सम्राट हो गये।

## संस्कृतम्

महाराजो हरिश्चन्द्रः स्वस्य सत्यवादितायै अत्यन्तं प्रसिद्धः। स स्वकीयं समग्रं राज्यं विश्वामित्राय दत्वा प्रतिज्ञां पूरयामास। एकदा स शयानः आसीत्। स स्वप्ने अपश्यत् यत् स स्वकीयं राज्यं ब्राह्मणाय ददाति। अपरस्मिन् दिने वस्तुत एव विश्वामित्र ऋषिः तस्य ब्राह्मणस्य रूपे राज्ञः समीपे जगाम. राज्ञे च राज्यस्य दानाय अकथयत्। राजा स्वप्नस्य वार्त्तायां दृढो भूत्वा संकल्पं कृत्वा संपूर्णं राज्यं ब्राह्मणाय ददौ। विश्वामित्रो दानानन्तरं दानस्य दक्षिणामप्ययाचत परं राजा सकलं राज्यं दाने दत्तवान् आसीत्, अतः राज-कोषात् स किञ्चिदपि दातुं नाशक्नोत्। अन्ततोराजा आत्मानं, राज्ञीं शैव्यां, पुत्रं रोहिताश्वं च विक्रीय विश्वामित्राय दक्षिणां ददौ। शैव्यां रोहिताश्वं च एकः पंडितः अक्रीणात्, हरिश्चन्द्रं चैकश्चाण्डालः। सर्प-दंशेन रोहिताश्वस्य मृत्युरभूत्। शैव्या तमादाय श्मशानं जगाम, यत्र हरिश्चन्द्रः श्मशानस्य रक्षामकरोत्। स धर्मनियमेन शैव्यामपि शवकरमयाचत। राज्ञः सत्य-पालनेन भगवान् विष्णुस्तस्मै प्रसन्नो बभूव, विश्वामित्रः तस्मै आशीर्वादं ददौ। स पुनः सम्राट् बभूव।


आपल्या घरीं येत आहे काय ?

नसेल तर आजच ग्राहक व्हा !

मराठी भाषेतील विचार प्रवर्तक

मासिक

एकता

[७६५ सदाशिव पेठ पुणें २]

दीपावली अंकांत अनेक वाचनीय

लेख, कथा, मनोरंजक माहिती, शिवाय

श्री लक्ष्मीचें संग्राह्य तीनरंगी चित्र

वार्षिक वर्गणी ५) रु० कि० अंक १० आणे




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# ★ सूक्ति-सुधा ★

आगच्छन्नुत्सवो भाति यथैव, न तथा गतः ।
हिमांशोरुदयः सायं चकास्ति, न तथा गतः ॥ १

आगे आने वाले उत्सव की जैसी खुशी होती है वैसी उस उत्सव के चले जाने पर नहीं होती। चन्द्रमा के उदय की शोभा जैसी सायंकाल में होती है वैसी शोभा उसके अस्त होने पर नहीं होती ॥१

संतुष्यत्युत्तमः स्तुत्या धनेन महताऽधमः ।
प्रसीदन्ति जपैर्देवा बलिभिर्भूतविग्रहाः ॥ २

उत्तम पुरुष अपनी कीर्ति से प्रसन्न होते हैं, अधम लोग बहुतसा धन देने पर राजी होते हैं। देवतागण जप करा देने से प्रसन्न हो जाते हैं। किन्तु भूत, प्रेत, डाकिनी आदि जब तक उनको बलिदान नहीं दिया जाय, राजी नहीं होते ॥२

स्वजातीयविघाताय माहात्म्यं दृश्यते नृणाम् ।
श्येनो विहङ्गमानेव हिनस्ति न भुजङ्गमान् ।।३

अक्सर देखा गया है, मनुष्य अपने स्वजातीय मनुष्य की ही हानि में अपने पराक्रम का उपयोग किया करते हैं। बाज (पक्षी) अपने सजातीय पक्षियों को ही पकड़कर मार देता है, सांपों को नहीं ॥३

गुरुं प्रयोजनोद्देशादर्चयन्ति न भक्तितः ।
दुग्धदात्रीति गोर्गेहे पोष्यते न तु भक्तितः ।।४

गुरु को अपने प्रयोजन (विद्या, ईश्वरप्राप्ति, मनोरथसिद्धि आदि) की सिद्धि के ही लिये लोग पूजते हैं। शुद्ध भक्ति से नहीं। अपने घर में रखकर जो गौ पाली पोसी जाती है, उसमें प्रयोजन है दूध मिलना। केवल भक्ति से गौसेवा करने वाले आपको विरले दिखाई देगें ।।४

उत्तमस्तोषमायाति तदङ्गं पोष्यते यदि ।
वृक्षः प्रसीदति प्रायः पादाभ्यङ्गेन न स्वयम् ।।५

देखा गया है कि—उत्तम पुरुष संतुष्ट हो जाते हैं यदि उनके अङ्गभूत (संबन्धी, भृत्य, अनुजीवी आदि) का पोषण किया जाय। आप देखो, पेड़ों (वृक्षों) की यदि जड़ को सींचा जाय तो पेड़ बराबर बढ़ते हैं। और यदि केवल वृक्ष को ही सींचा जाय, जड़ को नहीं तो वृक्ष सूख जाते हैं ।।५

निजाशयवदाभाति पुंसां चित्ते पराशयः ।
प्रतिमा मुखचन्द्रस्य कृपाणे याति दीर्घताम् ।।६

प्रत्येक मनुष्य को अपने चित्त में जैसा भाव होता है, वैसा ही दूसरे मनुष्यों के चित्त का भाव भी प्रतीत होता है। मुख-चन्द्र की छाया परछाही, प्रतिबिम्ब) तलवार में लंबी दिखाई देती है [ तलवार का आकार लंबा है, इसलिये उसमें पड़ा हुआ प्रतिबिम्ब भी लंबा दिखाई देगा ] ।।६

प्रकाशकः— जयबहादुरसिंह
पताः— भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रकः— राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार जयपुर।
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

( संस्कृतस्य प्रमुखं मासिकपत्रम् )




कविताववनितोल्लासो त्रिकासो त्रवाङ्मये ।
वाग्देवताविलासोऽयं कालिदासोऽभिवन्द्यताम् ॥

वर्षम् ६

द्वितीयोऽङ्कः

मूल्यम्
वार्षिकम् ३) रु०
एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# ❀ विषय-सूची ❀


| क्रमः | लेखाः | लेखकाः | पृष्ठ संख्या |
|---|---|---|---|
| १. | श्रीकालिदासः | श्रीगणेशरामशर्मा, झालावाड़ | |
| २. | मृच्छकटिकम् | श्रीवासुदेवशास्त्री, शोलापुरम् | |
| ३. | गो-गुरु-भक्तः सत्यकामः | श्रीदीनानाथत्रिवेदी, जयपुरम् | २८ |
| ४. | अमेरिकायां राष्ट्रपतेर्निर्वाचनम् निर्वाचनपद्धतिश्च | ,, | ३४ |
| ५. | कृपाराज्ञी (खण्डकाव्यम्) पूर्वाऽनुवृत्तम् | न. शठकोपः, विद्याप्रवीणः, उड़ीसा | ३६ |
| ६. | श्रीजवाहरजयन्ती ! | श्रीगणेशरामशर्मा, झालावाड़ | ३८ |
| ७. | एकादश किङ्कराः | स्वामी लक्ष्मणशास्त्री, नागौर | ४१ |
| ८. | सम्पादकीयम् | सम्पादकः | ४२ |
| ९. | सूक्ति-सुधा | सम्पादकः | ४३ |


## संस्कृत-विश्व-परिषद् परिपत्रम्

प्रियाः परिषत्प्राध्यापकाः, शाखा-केन्द्रमण्डलाधिकारिणश्च ।

सप्रमोदं विज्ञाप्यते यत् संस्कृतविश्वपरिषदः आगामि अधिवेशनं १९५७ वर्षस्य जान्युआरी-मासस्य पूर्वभागे कुरुक्षेत्रे भविष्यति । परिषदोऽध्यक्षाः भारतराष्ट्रपतयः श्रीमन्तो राजेन्द्रप्रसादमहाशया आध्यक्ष्यं उद्वहन्ति । कतिपयेष्वेव दिनेषु अधिवेशनतिथयः प्रकाशयिष्यन्ते ।

अधिवेशनस्यास्य सफलतायै भवत्साहाय्यमनिवार्यं भवति । अतः एतत्संबन्धेन प्रवृत्तीः अभिवर्धयितुं विज्ञाप्यते ।

वयं, निमन्त्रणपत्रिकाः, प्रतिनिधिप्रार्थनापत्राणि, धूमशकटे शुल्कार्धेन गमनागमनाभ्युपगमपत्रिकाश्च संपादयितुं उद्युक्ता भवामः । भवद्भिः अपेक्षितानां प्रतिनिधिप्रार्थनापत्राणां निमन्त्रकाणां च संख्या ज्ञापनीया। परिषदः प्राध्यापकाः, शाखाकेन्द्र-मण्डलाधिकारिणश्च धूमशकट-प्रमाणपत्र-प्रार्थनापत्रं प्रमाणीकुर्युः ।

धूमशकट-प्रमाणाय प्रार्थनापत्राणां स्वीकारेऽस्वीकारे वा मुख्यकार्यालयः धृताधिकारो वर्तते ।

सर्वस्यास्य ज्ञापनेन भवन्तः अधिवेशनसफलतायै आवश्यके कर्मणि रता भवेयुरिति विश्वस्यते। भवतां किञ्चित्सूचनीयं चेद् अविलम्बेन प्रेषणीयं तत् । भवद्भिः तिरुपत्यधिवेशनात् परं कृतस्य कार्यजातस्य वृत्तान्तः शीघ्रं कार्यालयेऽत्र प्रेषयितुं प्रार्थ्यते । वृत्तान्तेन सह, भवत्प्रदेशे विश्वविद्यालय-संबद्धासु असंबद्धासु वा संस्थासु संस्कृतानुबन्धिनीं परिस्थितिं, पाठशालीय-पाठ्य-प्रणाल्यां च समयानुरूपं परिवर्तनं कीदृक् भवितुमर्हतीति ज्ञापयन्तु ।

भावत्कः

ह. दवे

मा. प्रधानमन्त्री सं. वि. परिषद्

## आवश्यकम् निवेदनम्

सम्प्रति सर्वे संस्कृतज्ञाः संस्कृतानुरागिणः तथा 'भारती' पाठकाश्च सादरं संप्रार्थ्यन्ते यत् गीताजयन्ती-महोत्सवस्य पूर्वसप्ताहे (मार्गशीर्षमासे सर्वेऽपि महानुभावाः सुरभारतीप्रचारसप्ताहस्य समायोजनम् कुर्युः। तत्र च संस्कृतस्य प्रचाराय प्रसाराय च नानासभानां समायोजनम् तथा संस्कृतप्रचारकाणां भारतीत्यादि संस्कृत-मासिकपत्राणां ग्राहकसंख्याभिवृद्ध्यर्थं प्रयत्नाश्च स्युः ।

एतद्विषयकाः कार्यक्रमाः 'भारती' कार्यालये समागमिष्यन्ति चेत् ते अग्रिमाङ्के प्रकाशमेष्यन्तीति।

-प्रबन्ध-सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
श्रीमथुरानाथशास्त्री
सहसम्पादकः—
...र्षिकलानाथशास्त्री
साहित्याचार्यः बी.ए.
जयपुरम

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

...र्षम् ७ | मार्गशीर्ष शुक्ला १, सं० २०१३ | अङ्कः २

## श्री कालिदास

[लेखकः—विद्याभूषणः पं० श्री गणेशराम शर्मा, साहित्यरत्नम्, ज्योतिषोपाध्याय-, हिन्दी संस्कृताध्यापकः,
श्री राजेन्द्र-इण्टर-कॉलेज, झालावाड़ (राजस्थानम्)]

### (गज़लगीतिः)

...मौलिमालावन्दनीयः कालिदासोऽयम् ।
...नन्दघनकादम्बिनीनां चिद्विलासोऽयम् !! १ ॥
...ल्याणलक्ष्मीसूक्तमन्त्रान् भारतीभावान्;
...विश्वविश्रुतकीर्तिकान्तो वाग्विलासोऽयम् ! २ ॥
...यो यथातथ्यं श्रुतीनां तात्त्विकीं व्याख्याम्;
...सभ्यतायाः संस्कृतेर्मर्मप्रकाशोऽयम् ! ३ ॥
... षड्दर्शनीशास्त्रार्थतत्त्वज्ञो गुरुर्विद्वान्;
...: कविर्भावानुभूतिश्रीनिवासोऽयम् ! ४ ॥
...ऽप्यद्वयीं काव्यत्रयीं नाट्यत्रयीं चक्रे;
...यार्थरसवद्वाङ्मणीनामच्छभासोऽयम् ! ५ ॥
... प्रणयिनोर्विप्रयोगे भावगम्भीरो—
...: पार्वतीश्वरयोः सुखान्तः प्रेमपाशोऽयम् ! ६ ॥
... सृष्टिमेनां मानुषीं दैवीं च गान्धर्वीम्;
...जीवयन् रूपप्रभाभिः पूरिताशोऽयम् ! ७ ॥
... सार्वभौमं यस्य सत्प्रतिभाप्रभाभास्वान्;
... सुन्दरीणां कल्पनानां चारुहासोऽयम् ! ८ ॥
...कान्तपद्विन्यासगतिभङ्गीमनोहारी;
... काव्यकाननकेशरी स्फूर्ज्जत्प्रयासोऽयम् ! ९ ॥
... भारतीपुत्रोऽपि यो लोकैषणाभावे;
... गुप्तसाम्राज्यश्रियां भोक्तापि यः सोऽयम् ! १० ॥

परं श्रद्धास्पदं विद्वद्वरेण्यानां सुधीन्द्राणाम्;
कवीन्द्रो भाति भारततीर्थमानसराजहंसोऽयम् ! ११ ॥
स्वयं धन्यो मनीषी मान्यमूर्द्धन्योऽपि शालीनो—
हृदन्तः शांततेजाः शीलतो दासानुदासोऽयम् ! १२ ॥
प्रयोक्ता नाट्यलीलारङ्गमञ्चे यः सविज्ञानम्;
रसात्माध्यात्मसौदर्यस्वरूपाच्छप्रकाशोऽयम् ! १३ ॥
स वाग्देव्या विपञ्चीनादपीयूषप्रसादज्ञः;
तदीयोद्यानवासन्तीलताकुञ्जाधिवासोऽयम् ! १४ ॥
कलानां यो निधिः स्वच्छं चकाशे भारताकाशे;
मनोज्ञो ज्ञानगंगाकूलफुल्लो दिव्यकाशोऽयम् ! १५ ॥
स शृङ्गारे जयत्याह्लादमुग्धो भावसौन्दर्ये;
सुकविताकामिनीमधुयामिनीनां चान्द्रमासोऽयम् ! १६ ॥
प्रणामान्ते रसोद्रेकाद्यतो वाचो निवर्तन्ते;
विदग्धो नायिकानां मानिनीनां मन्दहासोऽयम् ! १७ ॥
गुणैस्तैस्तैश्चरित्राचारचर्यावर्णनैः प्राचाम्;
स सृष्टेः स्वर्णयुगसन्धानसूत्रस्येतिहासोऽयम् ! १८ ॥
मधुस्फीता गिरः परिचिन्वतां श्रीकालिदासस्य;
बुधानां किं पुरो ब्रूयाज्जनो दासानुदासोऽयम् ? १९ ॥
कवेः कीर्तेः कलालापप्रसङ्गाद्गीतिगुम्फेऽस्मिन्;
प्रसिद्धेऽङ्गाग्यतो विद्वन्मते मे सत्प्रयासोऽयम् !!! २० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# मृच्छकटिकम्

[ ले० श्रीवासुदेव शास्त्री बागेवाडीकरः शोलापुरम् ]

मृच्छकटिके नायिका वसन्तसेना जन्मना गणिका। माता तु वृत्तितो वेश्या। वेशवासस्तरुणजनसहायः। सा च मार्गोपकण्ठे समुपजाता लतेव सर्वेषामुपभोग्या। तस्याः शरीरलतिका धनहार्या पण्यभूता। प्रियो वाऽप्रियो वा, तरुणो वा वृद्धो वा पुरुषस्तया सदैव समुपचरितव्यः। वाप्यां यथा वर्णवरो द्विजवरो विद्वान् स्नाति तथा मूढो वर्णावरोऽपि। बर्हिणोपभुक्तां लतां फुल्लां वायसोऽप्युपभुङ्क्ते। यथा नावा ब्रह्मक्षत्रविशो नदीं तरन्ति तथैवेतरेऽपि। वेश्या सर्वेषां जघन्यमध्यमोत्तमानामुपभोग्या। तेन हि वसन्तसेना स्वाभिप्रायम्, अनुकूलं प्रतिकूलं वा प्रकटयितुं नालम्।

कामदेवायतनोद्याने दृष्टे चारुदत्ते अनुरक्ता वसन्तसेना वेशजाताऽपि गुणानुरागिणी। सा स्वयमेव वदति—गुणः खलु अनुरागस्य कारणं न पुनर्बलात्कारः। एवं स्थितेऽपि तस्याः कामसाफल्यं न सहजसाध्यम्। प्रथमेऽङ्क एव मार्गेण गच्छन्त्या वसन्तसेनायाः पश्चाद् राजश्यालकादीनामनुधावनेन वेशवासस्य दुरवस्थामाविष्करोति कविः। रथ्यायां तामनुधावतोऽविनयमाचरतः शकारस्य कृत्यं विद्यासम्पन्नोऽपि तस्य वयस्यो विटः समर्थयते। वेशावाससंवर्धिताऽपि सा वेश्यावृत्तिं नाभिनन्दति। स्ववृत्ते रुद्विग्ना सा कस्यापि सहृदयस्य गृहस्थस्य चरणयोः स्वजीवनं समर्प्य तत्सफलयितुमभिलषति। अस्मिन्नेव क्षणे सार्थवाहसुतस्य गुणनिलयस्य चारुदत्तस्य शीलकुसुमगन्धेन भ्रमरीव समाकृष्टा। व्याघ्राद् भीता हरिणीव घनान्धकारेतमसि पलायमाना दैववशादेकाकिनी चारुदत्तसदनसन्निधौ समागता। तिमिरेणादृश्यतां गतापि वसन्तसेना तस्या माल्यसुगन्धेन नूपुरध्वनिना च सूचिता भवति तेन चानुधाव्यते इति सकरुण इव विटोऽनुधावन् तां सूचयति।

"कामं प्रदोषतिमिरेण न दृश्यसे त्वं
सौदामिनीव जलदोदरसन्धिलग्ना।
त्वां सूचयिष्यति तु माल्यसमुद्भवोऽयं
गन्धश्च भीरु मुखराणि च नूपुराणि।।"

तेन हि सा माल्यान्यपनीय नूपुराणि चोत्सार्य धावति। अत्रान्तरेऽनुकूलदैववशाच्चारुदत्तस्य गृहस्य पक्षद्वारमुद्घाट्यते। यत्र च वसन्तसेना तिष्ठति। तस्माच्च हस्ते दीपं बलिं च गृहीत्वा रदनिका मैत्रेयश्च बलिमुपहर्तुं निर्गच्छतः। वसन्तसेना झटिति पटान्तवातेन दीपं निर्वाप्यान्तः प्रविशति। अनन्तरं विटस्य प्रार्थनावचनैः मैत्रेयस्तेषामविनयेन प्रक्षुब्धः शान्तो जातः।

चारुदत्तोऽन्तः प्रविष्टां वसन्तसेनां रदनिकाबुद्ध्या वदति—"रदनिके, मारुताभिलाषी प्रदोषसमयः। शीतार्तो रोहसेनः। ततः प्रवेश्यतामभ्यन्तरमयम्। अनेन प्रावारकेण च्छादयैनम्।" इत्युक्त्वा तस्यै प्रावारकं प्रयच्छति। अनेन जातिकुसुमसुवासितेन सा प्रमोदते। तेन चात्मानं प्रावृणोति। यदा स प्रतिवचनं न लभते तदा स्वां दशां निन्दति। रदनिकामैत्रेययोः प्रत्यागमनानन्तरं वसन्तसेना तस्य विदिता भवति। अज्ञानाद् अपरिज्ञातपरिजनोपचारेणापराद्धोऽस्मि इति तां चारुदत्तोऽनुनयति। साऽपि "अनुचितभूमिकारोहणेन अप-राद्धा" इति तं शिरसा प्रणम्य प्रसादयति। इमं समयं निमित्तीकृत्य चतुरा सा "अलङ्कारस्य निमित्तमेते पापा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...सरन्ति" इति प्रस्तूय तस्य गेहेऽलङ्काराणां निक्षेपणं ...र्थयते। स च तद् अभ्युपपद्यते। तेन सङ्कतेन सा ...गृहं प्रयाति।

एवं वसन्तसेनायाः प्रीत्या विलासः प्रवृद्धिं गतः। ...प्रणयप्रश्रयणं सहजं प्राप्तम्। तत्प्रेम विशुद्ध ...नीत्। तया राजा राजवल्लभो वा वणिग्युत्रा वा न ...नः। किन्तु कश्चिद् दरिद्रः सार्थवाहपुत्रः। निर्धन-...तमना-गणिका सर्वथा खलु वचनीया भवति। ...न् तस्या न विदितं भवति। दासी तामुपालभते च। ...हीनकुसुमं सहकारपादपं मधुकर्यः पुनः सेवन्ते ?" ...प्रतिभाषते ताम् - "अतएव ता मधुकर्य उच्यन्ते।" ...री सा उदासीना लक्ष्यते। यतः सा जानाति "नाना-...सङ्गेन वेश्याजनोऽलीकदाक्षिण्यो भवति"। इत्ययं ...दः तस्याः प्रीतेः अन्तरायो भवेत्। तथा च सहसा ...सार्यमाणः प्रत्युपकारदुर्बलतया स जनो दुर्लभ-...नो भविष्यति।

वसन्तसेनाया निरपेक्षस्नेहः प्रतीतो भवति। यथा ...ज्ञश्यालकेन संस्थानकेन प्रेषितं सुवर्णदशसाहस्रिक-...ङ्कारं परिधाय तं प्रत्यभिसर" इति यदा तस्या माता ...संदिशति तदा सा संक्रुध्य प्रतिसंदिशति। "यदि ...जीवन्तीमिच्छसि तदैवं न पुनरहमाज्ञापयितव्या" ...। सकलपुरुषनिःसङ्गा सा चारुदत्तं कामं कामयते। ...निमित्तीकृत्य यत्किञ्चिदपि कर्तुं लब्धावसरायास्त-...च्चेतसि महान् प्रमोदो जायते। द्यूते जितो धूर्तेन ...ग्रसित ऋणं च तस्मै धारयमाणो द्यूतकरः संवाह-...गृहं प्रविष्टः, तया स्वभावविशेषादनुकम्पितः। ...पि चारुदत्तस्य सेवक इति श्रुत्वा तमेवं वदति— ...र्यस्यात्मीयमेतद् गेहम्। हञ्जे, देहि आसनम्। तालवृन्तकं गृहाण। परिश्रम आर्यस्य बाधते" एवं तं सबहुमानं सेवते। ऋणमुक्तं च करोति। ततः संवाहको दैवदुर्विलासात् सर्वथा त्रस्तो भिक्षुत्वमंगीकरोति।

वसन्तसेनाया दुष्टो वारण आलानस्तम्भं भित्त्वा महामात्रं व्यापाद्य महान्तं संक्षोभं कुर्वाणो राजमार्गमवतीर्णः। ततस्तेन दुष्टेन करचरणरदनैः प्रफुल्लितकमलिनीं सरसीमिव नगरीमुज्जयिनीमवगाहमानेन परिव्राजकः संवाहकः समासादितः। तं च दन्तान्तरे गृहीतं प्रेक्ष्य कर्णपूरकेण वसन्तसेनान्नपुष्टेन दासेन सहसा लोहदण्डेनाहत्य तं मत्तं हस्तिनं, स वराको मोचितः। संमिलिताः समन्ताज्जनाः केवलं वाङ्मात्रेण कर्णपूरं शौर्यनिमित्तमभ्यनन्दन्। परं तत्र समुपस्थितेन निर्धनेन चारुदत्तेन सार्थवाहपुत्रेण शून्यान्याभरणस्थानानि परामृश्य ऊर्ध्वं वीक्ष्य दीर्घं च निःश्वस्य स्वप्रावारकस्तस्योपरि परिक्षिप्तः। इमं वृत्तान्तं कर्णपूरान्निशम्य जातिकुसुमवासितं तं चारुदत्तस्येति परिज्ञाय तं गृहीत्वा सस्नेहं स्वाङ्गं प्रावृणोति। तस्मै च स्वाभरणानि पारितोषिकमिति कृत्वा प्रयच्छति। तेन प्रावारकेण प्रच्छन्ना किमपि सन्तोषमनुभवन्ती सौधमारूढा। तेनैव पथा तदैव यान्तं तमेव स्वजीवितेश्वरं नेत्राभ्यामतृप्ताभ्यां विलोकयति।

अस्मिन् नाटके चारुदत्तो नायको धीरप्रशान्तः। उदारमनाः मान्यतमः सुन्दरश्च। तथापि जातिकुसुमवासितं प्रावारकं परिधत्ते। गानलुब्धोऽपि। निक्षेपभूतेऽलङ्कारे चौरेणापहृतेऽपि तत्कृतं भित्तिसन्धिं कलात्वेन निरीक्षमाणश्चारुदत्तो नितान्तं सहृदयत्वं भजते। नैवंविधस्य चारुदत्तस्य चित्तानुकूलत्वस्य ज्ञाने वैदग्ध्यं तस्या न विद्यते। उभयोः स्नेहानुवृत्तितायाः सफलतायां



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



तस्या गणिकात्वं महानन्तरायः । अन्यच्च चारुदत्तस्य औदार्यं निःसीमं वर्तते । औदार्यातिशयेनैवाद्य स निर्धनः संवृत्तः । पुरानुभूतं गभैश्वर्यत्वं पदे पदे तस्य मानधनत्वं वर्धयति । अहो तस्य मनस्विता । यया स आपदि धर्मपत्न्या वितीर्णं धनसाहाय्यं स्वीकर्तुं नोत्सहते । अनया निर्धनतया स बद्धानुरागोऽप्यात्मानं वसन्तसेनायाः प्रेमास्पदं न गणयति । एतत्सर्वं विजानाना वसन्तसेना चारुदत्तस्य मानशीलत्वं यथा न विहन्येत तथा तमनुकूलयितुं प्रयतते । भूपसमानेन स्वविभवेन स न कदापि वश्यः । प्रत्युत तथा प्रयतमानायास्तस्याः स सुदूरमेव व्रजेत् । अतस्तस्य प्रेमानुग्रहेणैव स्वात्मा प्रेमभाजनं जात इति तं प्रत्याययितुं प्राक्रमत । पुनः पुनस्तदभिसरणं अभिसारिकावृत्तिता इति तस्य मतिर्माभूदिति कृत्वा तया स्वालङ्कारभाण्डं तत्सन्निधौ निक्षिप्तम् ।

एतस्मिन्नन्तरे राज्ञो दुर्नीतिः प्रजासूपजापो जायते । प्रजानां केचित् प्रधानतमाः पुरुषा राजानं राजसिंहासनाद्भ्रंशयित्वाऽन्यं समुचितं भूपं राजपदेऽभिषेक्तु मभिलषन्ति । एवं संहताः केचित् प्रच्छन्ना जाताः । तेष्वेकः शर्विलको नाम प्रधानतमः । स तु वसन्तसेनाया दास्यां मदनिकायां दृढानुरक्तः । सा तु दासीभावात् पराधीना । सुवर्णभाण्डं विना तां दास्यान्मोचयितुं वसन्तसेनामाता नेच्छति । एतादृशस्य सुवर्णजातस्य संग्रहणेऽक्षमः शर्विलकश्चौर्येण तत् संपादयितुं वाञ्छति । दैववशात्स रात्रौ चारुदत्तस्य गृहे सन्धिं कृत्वा प्रविशति । तत्रत्यानि वस्तुजातानि विलोक्य परमार्थतो दरिद्रस्येदं गेहमिति निश्चित्य ततः स प्रस्थातुकामः । अत्रान्तरे स्वप्नायमानस्य मैत्रेयस्य सशपथवचनाद् वसन्तसेनायाः सुवर्णभाण्डं ततो गृह्णाति । तेन सह स मदनिकां प्रति वसन्तसेनाभवनमागच्छति । तस्यै च तद् ददाति । सा तद् स्वस्वामिन्या एवेति जज्ञौ । प्रश्नानुगतं तदधिगमप्रकारं श्रुत्वा चारुदत्ते निक्षिप्तं वसन्तसेनालङ्कारं तं निश्चिनोति । तयैव प्रेरित. 'शर्विलकश्चारुदत्तेनेदं सुवर्णभाण्डं प्रतिप्रेषितम् । तद् गृह्यताम्' इति वसन्तसेनामुपेत्य कथयति । अकस्मात् पूर्वमेव श्रुतसकलसंवादा वसन्तसेना तं प्राह—"आर्य, इमां मदनिकां प्रतीच्छ । यत आर्यचारुदत्तेनोक्ताऽहम्, य इममलङ्कारं समर्पयिष्यति तस्मै त्वया ते दासी रदनिका प्रदातव्या" इति । अत्र वसन्तसेनाया उदारधीत्वं प्रकटीभवति । आत्मौपम्येनात्र तस्या दर्शनम् । यथा वसन्तसेनाचारुदत्तयोः कामपूर्तौ वर्णाचारः प्रतिबन्धकस्तथा मदनिकाशर्विलकयोरपि । तथा हि मदनिका गणिकादासी शर्विलकस्तु ब्राह्मणः । अनयोः सङ्गमे वसन्तसेनाया महानानन्दः सहजः ।

इतश्चारुदत्तगृहे महद्वैक्लव्यं सञ्जातम् । तस्य गेहे चौरप्रवेश एव न कस्यापि नगरनिवासिनः कल्पनास्पदम् । किमुत चौर्यम् । गणिकालङ्कारापहरणार्थमिति किंवदन्ती तेनैव लोके बुद्धिपूर्वं प्रसारिता । इत्येवं जना वदेयुः । स स्वयं मैत्रेयं वदति—

"कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति।
शङ्कनीया हि लोकेऽस्मिन् निष्प्रतापा दरिद्रता ॥"

तस्य गृहिण्यपि स्वभावे सर्वथा तमनुकरोति । एवं विपद्ग्रस्तं स्वभर्तारं विदित्वा सा आर्या धूताऽनुकम्पितवती । मानधनत्वाद् भार्यायाः सानुक्रोशत्वमपि न सहेत इति विजज्ञुषी सा रत्नषष्ठ्या उपोषणस्य पारणानिमित्तं मातृगृहलब्धां रत्नावलीं ब्राह्मण इति कृत्वा मैत्रेयाय प्रयच्छति । स च चारुदत्ताय । तदा स एवं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वृत्तिः—कथं ब्राह्मणी मामनुकम्पते । कष्टमिदानीमस्मि दरिद्रः ।

"आत्मभाग्यक्षतद्रव्यः स्त्रीद्रव्येणानुकम्पितः '

एवमुक्त्वा झटिति एतादृश्या भार्याया लाभादात्मानं बहु मन्यते । "अथवा नाहं दरिद्रः । यस्य मम—

विभवानुगता भार्या सुखदुःखसुहृद् भवान् ।
सत्यं च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम् ॥

तदवस्थायां स्वाभिमानं किञ्चिद् दूरीकृत्य तां रत्नावलीं "मया तवालङ्कारो द्यूते हारितः । तस्य कृते प्रहितामियं रत्नावली" इति संदिश्य मैत्रेयहस्तेन प्रहिणोति । अल्पमूल्यस्य चौरेणापहृतस्यालङ्कारस्य कारणाच्चतुःसमुद्रसारभूतायाः रत्नावल्याः प्रदानं मैत्रेयाय नारोचत । तथापि वयस्याग्रहात् तां ससन्देशं तस्यै ददाति । सा च तां प्रतिगृह्णाति । तेन मैत्रेयो मनस्यतीव तस्यै क्रुध्यति । तस्या वैचक्षण्यं मुग्धो ब्राह्मणो मैत्रेयः कथं जानीयात् । अनेनात्मनोऽपकृष्टत्वं तस्य च उत्कृष्टत्वं प्रदर्श्य तं जेतुमिच्छति । "कथं चौरेणापहृतमपि शौण्डीरतया द्यूते हारितमिति भणति । अत एव मन्यते" । इति मनसा तं प्रशंसति ।

एवं चारुदत्तस्य गुणकुसुमदाम्ना समाकृष्टा सा वारयुवतिः घनान्धकारनिबिडां निशामविगणय्य दुर्दिनमपि सुदिनं मन्यमाना

"उदयन्तु नाम मेघा भवतु निशा वर्षमविरतं पततु ।
गणयामि नैव सर्वं दयिताभिमुखेन हृदयेन ॥"
"मेघा वर्षन्तु गर्जन्तु मुञ्चन्त्वशनिमेव वा ।
गणयन्ति न शीतोष्णं रमणाभिमुखाः स्त्रियः ॥"

इति मुखेन वदन्ती धारासारैरभिहता स्तनिताद् अभिभीता निजवल्लभं प्रति प्रस्थिता । "यो यथा वर्तते तथैव तेन वर्ततताम्" इति न्यायमनुसृत्य तमुपेत्य सा चेटीमुखेन 'प्र ह एषा खलु आर्या इदं प्रष्टुमागता कियत् तस्या रत्नावल्या मूल्यमिति । सा खलु आर्यया आत्मीयेति भणित्वा द्यूते हारिता । स च सभिको राजापथ्यकारी न ज्ञायते कुत्र गत इति । यावत्सोऽन्विष्यते तावदिदमेव गृहाण सुवर्णभाण्डम् ।" तत पूर्वं चारुदत्तगृहाच्चोरैरपहृतं तदेव सुवर्णभाण्डं तस्मै अर्पयति । अन्ततः चारुदत्तं वसन्तसेना भाषते—"आर्य चारुदत्त, युक्तं नेदमनया रत्नावल्येमं जनं तुलयितुम् ।" एवं मिथो जल्पतोस्तयोः पर्जन्यो वर्षितुमारब्धः । मेघक्लिन्ना विद्युता भीषिता साऽकस्माद्वल्लभं समालिङ्गति । तेन तस्य संयमो नश्यति । आत्मनो जीवनं धन्यं मन्यते किल । सा तत्रैव निवसति ।

एवं वसन्तसेनायाश्चारुदत्तस्य गृहप्रवेशो न केवलं तत्पत्न्या आर्यया धूतया सर्वैरपि परिजनैरभिनन्दितः । प्रवहणेन पुष्पकरण्डकं नाम जीर्णोद्यानं वसन्तसेनामानयेति वर्धमानकं समादिश्य महति प्रत्यूषे आर्यचारुदत्तो गतः । तदादेशवशात्सा तत्र गन्तुं यावद् व्यवस्यति तावद् रोहसेनं नाम चारुदत्तपुत्रं रुदन्तं शृणोति । प्रातिवेशिकगृहपतेर्दारकस्य सुवर्णशकटिकां याचमानो रदनिकया दत्तया मृदः शकटिकया क्रीडितुं नोत्सहते । इत्येतत् तस्य रोदनकारणं निशम्य सास्रं दैवमुपालभते—"भगवन्, कृतान्त, पुष्करपत्रपतितजलबिन्दुसदृशैः क्रीडसि त्वं पुरुषभागधेयैः ।" ततः "जात मा रुदिहि । सुवर्णशकटिकया क्रीडिष्यसि ।" इति तं समाश्वासयति । रदनिके, का एषा । इति रोहसेनेन पृष्टया रदनिकया "जात, आर्या ते जननी भवति" इत्युक्तः स वदति—"रदनिके, अलीकं त्वं भणसि । यदि अस्माकमार्या



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



जननी तत्किमर्थम् अलंकृता ।" एतन्निशम्य तस्य मुग्धस्य बालकस्य करुणं वचः सा तत्क्षणं साश्रुनयना स्वान्याभरणानि स्वाङ्गादवतार्य तैस्तस्य शकटिकां पूरयित्वा भणति एषा इदानीं ते जननी संवृत्ता । गच्छ, बाल, कारय सुवर्णशकटिकाम् । क्रीड ।"

चारुदत्तपुत्रस्य मातृपदप्राप्त्या पुत्रवात्सल्येन तस्या जीवितसाफल्यं जायते । रोहसेनस्य मृच्छकटिका तस्याः कृतार्थताया निदानम् । प्रातिवेशिकस्य सुवर्णशकटिकां विलोक्य प्रादुर्भूतस्तदभिनिवेशो बालस्वभावसहजः । तेन संजातेन वात्सल्येन तां मृच्छकटिकां स्वाभरणैः पूरयति । एतेनैव सा चारुदत्तस्य समधिकं प्रेमास्पदमभवत् । तथा च गणिकाजनदुर्लभं वल्लभस्य सुखदुःखानुबन्धित्वं घटितमत्र । अस्य नाटकस्य मृच्छकटिका हृत्कमलम् । तत्सौरभेण नाटकस्यास्य सकलं संविधानकं सुवासितम् । अतएव "मृदः शकटिका यस्मिन् तत्, मृच्छकटिकम्" इति कविनाऽन्वर्थं नामधेयं विहितम् ।

स्वभागधेयानां दुर्विपाकैः सहजेन धैर्यगुणेन रममाण उदारमना दारिद्र्येऽपि परमं सन्तोषं भजमानश्चारुदत्तो गणिकायाश्चारुगात्र्याः सश्रीकायाः परमप्रेमभाजनं जात इत्येव नगरवर्तिनां शकारप्रभृतीनां राजवल्लभानां दुर्जनानां महदप्रीतिस्थानम् । तत्रापि राजसंबन्धिनं विषयासक्तं दुर्जातपरीतं बालिशं शकारमवमत्य वसन्तसेनया गुणानुरागिण्या गुणाढ्यो निर्धनश्चारुदत्तः प्रीत्या वृतः । अनेन तयाऽऽत्मा महति सङ्कटे पातितः । उज्जयिन्या राजसिंहासनं दुर्नीतः प्रजापीडनपरः पालकोऽधितिष्ठति जनहितदक्षो नीतिपर आर्यकः कारागृहदुःखमनुभवति । दुर्नयपरीतं प्रजाखेददायकं भूपालं तदनुवर्तिनश्च दुर्मन्त्रिण उच्छेत्तुं सर्वात्मना प्रयतमाना नगरवासिनः प्रधानपुरुषाः प्रच्छन्नाः कालं प्रतीक्षमाणास्तिष्ठन्ति ।

अस्मिन्नेव समये समयमवेक्षमाण आस्ते राजश्यालको गणिकया कृतं स्वावमानमसहमानस्तस्य निर्यातनाय । चारुदत्तं सभाजयितुं जीर्णोद्यानं जिगमिषुर्वसन्तसेनाऽऽत्मानं प्रसाध्य यावद् बहिरायाति तावद् विस्मृतं यानास्तरणमानेतुं वर्धमानकः प्रवहणेन गतः । अत्रान्तरे राजश्यालकस्यादेशात् स्थावरकस्य चेटस्य जीर्णोद्यानं पुष्पकरण्डकं यानेन प्रस्थितस्य मार्गो ग्रामशकटै रुद्धः । मार्गे स्थितस्य कस्यचिद् ग्रामशकटस्य चक्रपरिवर्तने साहाय्यं कर्तुं गच्छन् स्थावरकः स्वप्रवहणं चारुदत्तस्य पक्षद्वारे स्थापितवान् । ततो वसन्तसेना तत्प्रवहणं चारुदत्तस्येति कृत्वाऽधिरोहति । अपसारितशकटः स्थावरकः प्रत्यागत्य गावौ प्रेरयति । तेन प्रवहणेन सा दर्दुरः सर्पविवरमिव शकारस्य भुजपञ्जरं विशति ।

अथ तस्मिन्नेव क्षणे सिद्धादेशजनितभयेन राज्ञा पालकेन घोषादानीय विशसने गूढागारे निगडितचरण आर्यको बद्धः प्रियसुहृदा शर्विलकेन बन्धनान्मोचितः । बद्धमुक्तः स मन्दभाग्यश्चारुदत्तस्यापावृतपक्षद्वारं गेहं प्रविशति । "अरे रे दौवारिकाः, अप्रमत्ता भवत स्वेषु स्वेषु गुल्मस्थानेषु । एषोऽद्य गोपालदारको गुप्तिं भङ्क्त्वा गुप्तिपालकं व्यापाद्य बन्धनं भित्त्वा परिभ्रष्टोऽपक्रामति । तद् गृह्णीत गृह्णीत ।" इतिरक्षापुरुषैरुद्घोषितम् । एकचरणलग्ननिगडोऽवगुण्ठित आर्यको वर्धमानेनानीतं प्रवहणमधिरुह्य जीर्णोद्यानं नीतः । सर्वत्र पथि रक्षापुरुषा आर्यकस्य ग्रहणाय सज्जाः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



र्यकं वहत् प्रवहणं मध्ये मार्गं द्वाभ्यां रक्षापुरुषाभ्या गतम्। प्रवहणं निरीक्षमाणश्चन्दनक आर्यकं तत्र य तस्योपरि सानुक्रोशो जातः। "प्रवहणे नार्यको सेनैव विद्यते। तद् गच्छतु प्रवहणम्"। इति समादिष्टे संभ्रान्तस्वरवशादन्यस्य वीरकस्या- यो जायते। तत उभौ कलहायेते। अन्ततः प्रवहणं केनानवलोकितमेव गच्छति चन्दनकादेशात्। तस्य मानश्चन्दनक आर्यकाय स्वखड्गं वितरति। वीर- तु अधिकरणं याति। ततः शर्विलकोऽपि पृष्ठत नुलग्नो गतः। प्रधानदण्डधारको राजप्रत्यायितो विरोधितः स चन्दनकस्तत्र चिरं स्थातुमशक्यत्वात् रपरिवृतस्तमेवानुगच्छति।

जीर्णोद्यानं प्रविष्टमात्रे प्रवहणे वसन्तसेनासमा- कण्ठत आर्यचारुदत्त आर्यकं तस्मिन् पश्यति। जीवितापायमाशङ्कमानः सोऽपनीतनिगडं तं स्वेनैव तेन प्रवहणेन प्रेषयति। भूपतेर्महद्व्यलीकमेवं य क्षणमप्यत्र स्थातुं न प्रशस्तमिति विचार्य दत्तः सत्वरं तस्मात् स्थानान्निर्याति। अनन्तरं श्यालकस्य प्रवहणमधिरूढा वसन्तसेना जीर्णोद्यानं या। तत्र तु प्रथममेव राष्ट्रियो विटसहितः समागत मीत्। ऊषरक्षेत्रपतित इव बीजमुष्टिस्तस्या मन्द- गिन्या इहागमनं निष्फलं संवृत्ताम्। अनुभूतचारु- समागमा तं राजश्यालकं सुतरामधिक्षिपति। एते- मानेन समधिकतरमेव प्रक्षुब्धो विषयान्धो जिघां- कण्ठे दृढं निपीडयति। मूर्च्छितां तां विपन्नां मत्वा रोपणभयाद् विटं सुदूरं निष्क्रामयति। स्थावरकं चेटं बन्धने स्थापयति। अधिकरणमण्डपं गत्वा शया चारुदत्तेन वसन्तसेना मारिता" इति व्यव- लेखयति।

ततो वसन्तसेनया समं तत्सख्यम्, तत्प्रवहणेन तस्या जीर्णोद्यानं प्रति गमनं चन्दनकनाम्नो रक्षा-पुरुषस्य कथनम्, न्यायसभायां प्राप्तस्य मैत्रेयस्य कक्षातो वसन्तसेनायाः सुवर्णभाण्डस्य पतनम्, एतत्सर्वं निरागसमपि चारुदत्तं सागसं प्रदर्शयति। तस्मिन् सानुक्रोशा अप्यधिकरणिका राज्ञः पालकस्याभिप्रायानु-सारेण तं प्राणदण्डेन योजयन्ति। चारुदत्तो वधस्तम्भं नीयमाने सर्वेऽप्याबालवृद्धाः सस्त्रीकाः पौरा वातायना-र्धेन विनिःसृतवदनाः "हा चारुदत्त!" इत्युद्गिरन्तो बाष्पं प्रणालीभिरिवोत्सृजन्ति। तस्य वधघोषणां समाकर्ण्य प्रासादे बद्धः स्थावरकस्तत एवाक्रोशति– "शृणुत, आर्याः शृणुत। अस्ति इदानीं मया पापेन प्रवहणपरिवर्तनेन पुष्पकरण्डकजीर्णोद्यानं वसन्तसेना नीता। ततो मम स्वामिना मां न कामयसे इति कृत्वा बाहुपाशबलात्कारेण मारिता न पुनरेतेनार्येण।" परं दवीयस्तया तस्य स्थानस्य न कोऽपि शृणोति तद्वचः। ततः स जीर्णगवाक्षेणात्मानं निक्षिपति। चाण्डालसमी-पमुपेत्य यथावृत्तं कथयति। परं स वन्ध्यप्रयत्नो जायते। आर्यचारुदत्तस्य वधनिमित्तमाक्रोशन्तौ मैत्रेय रोहसेनौ शुश्रुवन्तौ चाण्डालावपि महान्तं विषादं प्राप्तौ।

प्रथमं चारुदत्तं सेवमानो विपदि वसन्तसेनयोपकृतः संवाहकः श्रमणको भूत्वा जीर्णोद्यानसमीपे विहारे वसति। तथाभूतां वसन्तसेनां शुष्कपर्णैः प्रच्छाद्य गते शकारे स श्रमणको जीर्णोद्यानं प्रविष्टः। स तत्र प्रक्षा-लितं चीवरखण्डं वातालीपुञ्जिते शुष्कपर्णसञ्चये शुष्कं कर्तुं प्रसारयति। ततः प्रथमं पर्णसञ्चयात् समुच्छ्वासं शृणोति। अनन्तरं शुद्धालङ्कारभूषितौ स्त्रीहस्तौ निष्क्रा-मन्तौ पश्यति। तदनु पर्णानि निःसार्य वसन्तसेनां



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# गो-गुरु-भक्तः सत्यकामः

( श्रीदीनानाथत्रिवेदी (मधुपः) जयपुरम् )

एकदा महर्षेः श्रीगौतमस्याऽऽश्रमे महर्षेर्हरिद्रुम-कस्य सुतोऽल्पवयस्कः समायातः। स परमया भक्त्या महर्षेश्चरणारविन्द-युगलं प्रणम्य प्रार्थयामास भगवन्! ब्रह्मचर्य-व्रतमनुपालयन् अहं श्रीमत्पादपद्म-शुश्रूषां कर्तुमिच्छामि। आज्ञाप्रदानेनाऽनुगृह्णन्तु मां भवन्तः' इति। सस्नेहं महर्षिः पप्रच्छ सौम्य! किं तव गोत्रम्?

बालक उवाच—विषयेऽस्मिन् मया माता अपि पृष्टाऽऽसीत्। तदा जननी प्रोवाच—'वत्स! यदाऽहं युवतिरासम्, तदा तव पितुर्गृहे प्रतिदिनं बहव एवाऽतिथयः समायान्ति स्म। संप्राप्तानां तेषामतिथीनां तदा सेवाकर्मण्येव पुनः पुनरभवं व्यापृता। एवं समुचितावसरप्राप्त्यभावेन तव पितरं गोत्रं प्रष्टुं समर्था नाऽभूवम्। तव शैशवकाल एवं च पितृचरणास्ते परलोकपथिकाः संवृत्ताः' इति। अतोऽहमेतावदेव वेद्मि यदहं जबालापुत्रः सत्यकामोऽस्मीति।

प्रसन्नो भूत्वा गौतमो महर्षिः प्रोक्तवान्—'वत्स! ब्राह्मणेन विना नान्यजातीयो जनः कोऽपि एवं सारल्येन तथ्यां वार्तां कथयितुं प्रभवति। अतो निश्छलेन भावेन सत्यां वार्तां भाषमाणो नूनं त्वं जात्या ब्राह्मण एवाऽसि। अहं तवोपनयनसंस्कारं करिष्यामि। गच्छ तावत्, स्वल्पाः समिधः समाहर' इति। यदा यथाविधि तस्य यज्ञोपवीतास्त्यः संस्कारः समजनि। तदा श्रीगौतमो गोशालातोऽति दुर्बलदेहानां गवामेकशतं सञ्चित्य सत्यकाममुवाद 'सौम्य! एताः गाश्चारयितुमितो वनं नय। यावच्च एतासां गवां संख्या एकसहस्रपरिमिता न भवेत्, तावत् त्वया नात्र प्रेत्यागन्तव्य'मिति।

---

प्रत्यभिजानाति। पानीयं पाययित्वा प्रकृतिमापन्नां तां स्वविहारं नयति। ततश्चारुदत्तं वसन्तसेनावधापराधं निमित्तीकृत्य वध्यभूमिं नीयमानं निशम्य स बौद्धभिक्षुस्तया साकं नगरजनसंकुले पथि मार्गं मार्गयमाणो वधभूमिमनुप्रविष्टः।

तत्र समुपस्थितां जीवन्तीं वसन्तसेनां विलोक्य राजश्यालकः सभयं ततः पलायते। अत्रान्तरे सिद्धकार्यः शर्विलकः किंभूपं पालकं निहत्यार्यकं च तद्राज्येऽभिषिच्य तदाज्ञया चारुदत्तं मरणसंकटान्मोचयितुं जवेन तत्स्थलं प्राप्तः। तेन च पलायमानो राजश्यालको गृहीतः। परम् आर्यचारुदत्तप्रसादेन जीवन्मुक्तः। तदा स भाषते—

"शत्रुः कृतापराधः शरणमुपेत्य पादयोः पतितः।
शस्त्रेण न हन्तव्यः, उपकारहतस्तु कर्तव्यः॥"

एवं गुणनिधिना चारुदत्तेन संगतां वसन्तसेनां राजा परितुष्ट आर्यको वधूशब्देनानुगृह्णाति। अवगुण्ठनवतीं च विदधाति। तेन हि सा कृतार्था भवति। अस्मिन् प्रसङ्गे रदनिका प्राह—'अहो संविधानकम्'!

अन्ते चारुदत्तस्य वचनम् –

"लब्धा चारित्र्यशुद्धिश्चरणनिपतितः शत्रुरप्येष मुक्तः,
प्रोत्खातारातिमूलः प्रियसुहृदचलामार्यकः शास्ति राजा।
प्राप्ता भूयः प्रियेयं प्रियसुहृदि भवान् संगतो मे वयस्य,
लभ्यं किं चातिरिक्तं यदपरमधुना प्रार्थयेऽहं भवन्तम्॥"

——


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सत्यकामोऽपि गुरोरनुज्ञामधिगम्य धेनूश्चारयितुं ं जगाम। यत्र च वने घासादीनामतिसौविध्यमा- ्, तत्रैव तेनैका पर्णशाला विरचिता । एवं तत्रैव सततो गो-सेवाञ्च कुर्वतस्तस्य बहूनि वर्षाणि व्यती- भूवन्, । यदा च गावः एकसहस्रसंख्याकाः समप- , तदा एकस्मिन् दिने वृषभो मनुष्यवाचा उवाच– सत्यकाम ! सांप्रतमस्माकं संख्यैकसहस्रमिताऽभूत् । ोऽस्मान् गुरुगृहं प्रापय । अहं त्वां ब्रह्मणः पादमेकं देशामि ।' तथैव सत्यकामेनापि तदुपदेशः सादरं ः । अग्रे चाऽग्निदेवस्त्वामुपदेक्ष्यति–इत्यपि ेण भणितम् ।

न्येद्युः प्रातः स गोभिः सह गुरोराश्रमं प्रति चलितुं । अस्तं गते च भगवति सूर्ये मार्ग एव स्थान- ुसकल्प्य, गाश्च तत्रावरुध्य सर्वामपि व्यवस्थां ालं सम्पादितवान् । तथा शुष्केन्धनमानीय ल्य चाग्निं पूर्वाभिमुखं समुपाविशच्च सत्यकामः । ज्वालामध्यत एव साक्षात् अग्निदेवः सत्यकामं ोध्य, ब्रह्मणो द्वितीय-पादस्योपदेशं प्रदत्तवान् । े च हंसस्त्वामुपदेक्ष्यतीति व्याहृत्य ततोऽन्तर्हितोऽ- ग्निदेवः । सत्यकामोऽपि रात्रिं तदुपदेशस्य मननं ान् ।

अपरेद्युश्च प्रातर्गाः नीत्वा स प्रवृत्तोऽग्रतश्चलि- । सायञ्च कस्यचित् सरोवरस्य तटे निशि निवा- ं स्थितिं कृतवान् । तत्र यदाऽग्निं प्रज्वाल्य स ुविष्टवान्, तदैको हंस उड्डीयमानो गगनात् नीचै- ्य तत्समीपमागत्य तस्मै ब्रह्मणः तृतीय-पादस्योप- देशं कृतवान् । अग्रे च जलकुक्कुट उपदेशं विधास्य- तीत्युक्त्वा सोऽपि तत उदडीयत ।

ततोऽपि प्रातर्गोभिः सहाऽग्रे चलितुं प्रावर्तत । प्राप्ते च सायंकाले एकं विशालं वटवृक्षमासाद्य तत्रैव स्थितिमकरोत् । तत्रापि यथापूर्वं प्रज्वाल्याग्निं स्थितोऽ- भूत् । तदानीमेको जलकुक्कुटस्तत्समीपमागतः । तेनापि तस्मै ब्रह्मणश्चतुर्थ-पादस्योपदेशः कृतः ।

एवं स सत्यकामो गवां गुरोश्च सेवायाः प्रभावेण वृषभरूपधारिणो वायुदेवात्, अग्निदेवात्, हंसरूप- धारिणः सूर्यात्, जलकुक्कुटरूपधारिणश्च प्राणाख्य- देवात् ब्रह्मज्ञानं प्राप्तवान् ।

यदा सहस्रधेनुपरिवृतः स स्वगुरोराश्रमं प्रत्यागत- वान्, तदा ब्रह्मतेजसा तदीयं मुखमण्डलं प्रदीप्तमासीत् । गुरुश्च चिन्तारहितं विकसितवदनारविन्दं तं विलोक्याऽ- भाषत—'वत्स ! त्वं ब्रह्मज्ञानीव दृश्यसे । केनोप- दिष्टोऽसि' इति ।

सत्यकामः सविनयमलपत्—'भगवन् मनुष्येतररहं समुपदिष्टोऽस्मि' अन्यच्चापि सर्वं वृत्तजातं गुरवे निवेद्य गदितवान् - 'भगवन् भवादृशेभ्य आचार्यप्रवरेभ्यः प्राप्ता विद्या फलवती भवति । अतो भवान् मामुपदि- शतु' इति ।

निजशुश्रूषा-परायणं शान्तं दान्तं विनम्रं शिष्यं तं सत्यकामं हस्तेन परामृशन् 'तव सत्याः कामाः सन्तु' इत्याशिषं प्रयच्छन् प्रावोचत्-'वत्स ! त्वया यद् विज्ञातं तदेव ब्रह्मतत्त्वं विद्धि । इदानीमतः परं त्वया ज्ञातव्यं न किमप्यवशिष्यते' इति ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अमेरिकायां राष्ट्रपतेर्निर्वाचनम् -- निर्वाचन-पद्धतिश्च

( श्रीदीनानाथत्रिवेदी 'मधुपः' )

अस्माकं देशेऽत्र निर्वाचनान्यग्रिमे वर्षे सम्पत्स्यन्ते। परमेरिकायान्तु कार्तिकेऽस्मिन्नेव मासे सम्पन्नानि जातानि निर्वाचनानि। यत्र च रिपब्लिकन (प्रजातन्त्र) दलस्य प्रत्याशी (उम्मीदवार) श्रीमद्-आईजनहोवरमहोदयः ३,३७,६७४६२मतै राष्ट्रपति-पदप्राप्तये साफल्यं समासादितवान्। तथा डिमोक्रैटिक (जनतन्त्र)दलस्य प्रत्याशी श्रीस्टीवनसनमहोदयः २,४७०३४३१ मतानि प्राप्तवान्। एवं राष्ट्रपतिश्रीमद्आईजनहावरमहोदयो निजप्रतिद्वन्द्विनं श्रीस्टीवेन्सनं ९०,६४०३१ मताधिक्येन पराजितवान्।

अमेरिकायां राजनैतिकदलद्वयं विद्यते। डिमोक्रैटिकदलमेकं रिपब्लिकनदलमन्यच्च। राष्ट्रपतिपदाय तथोपराष्ट्रपतिपदाय च दलद्वयस्यापि प्रत्याशिनो निर्वाचन-क्षेत्रेऽवतरन्ति। एतन्निर्वाचनात् पूर्वमपि अमेरिकाया राष्ट्रपतिः आईजन हॉवरमहोदय एवाऽऽसीत्। तथोपराष्ट्रपतिश्चाभूत् रिचर्डनिक्सनमहोदयः। एतौ द्वावपि रिपब्लिकदल-पक्षवर्तिनौ स्तः। एतावेव रिपब्लिकदलपक्षादस्य वर्षस्य निर्वाचनार्थमप्यवतारितावभूताम्। डिमोक्रैटिकदलपक्षाच्च राष्ट्रपतिपदाय एडलाईस्टीवेन्सनमहोदयः प्रत्याशी अवर्तत।

निर्वाचनात्पूर्वममेरिकायामेकं प्रारम्भिकं निर्वाचनं क्रियते— एतत् 'प्राइमैरी एलेक्शन' (प्रारम्भिकमतदानम्) इत्युच्यते। अनेन चैतद्विज्ञातं भवति 'कः प्रत्याशी कियान् लोकप्रियो वर्तते'' इति। अस्मिन् प्रारम्भिकनिर्वाचने यः प्रत्याशी अत्यधिकानि मतानि प्राप्नोति, स एव लोकप्रियतमोऽपि स्वीक्रियते। तथापि स्वस्य प्रत्याशित्वरूपेण घोषणां कारयितुं 'पार्टी कन्वेन्शन' सविधे कियन्तोऽपि जनाः प्रयान्त्येव। अनेन केन्वेन्शनेन योऽपि समर्थ्यते, स एवामेरिकायां प्रत्याशि रूपेण घोषितो भवति, नान्यः कोऽपि।

राष्ट्रपतिपदाय यत् प्रारम्भिकं मतदानं भवति, 'प्रेसिडेन्शल प्राइमैरी' इति नाम्ना कथ्यते। मतदानेनानेन विस्पष्टमेतज् जायते—यत् अमुको जनः तत्पदाय सुयो ऽस्तीति, अथवा तेन 'पार्टी केन्वेन्शनार्थं' प्रतिनिध जायन्ते निर्वाचिताः।

प्रतिचतुर्थवर्षमेवाऽमेरिकायां राष्ट्रपतेर्भवति निर्वाचनमिति भणन्ति तज्ज्ञाः। परं वस्तुतो निर्वाचनमि राष्ट्रपतेर्नैव, अपि तु राष्ट्रपतेर्निर्वाचकानामस्ति। निर्वाचनवर्षस्य नवम्बरमासस्य प्रथमे मङ्गलवारे भव निर्वाचनमिदम्। राष्ट्रपति-निर्वाचन-कर्तृणां निर्वाचन नामस्तीयं निर्वाचनपद्धतिर्यत् यस्य राजस्य याव प्रतिनिधयोऽमेरिकीयकांग्रेसे भवन्ति, तावत निर्वाचकान् तद्राज्यं चिनोति।

देशस्याष्टचत्वारिंशद् राज्यानां सेनेटे (मन्त्रिसभायाम्) तु द्वौ द्वौ प्रतिनिधी एव भवतः। परं प्रतिनि सभायां राज्यानां प्रतिनिधित्वं जनसख्यानुसारमेवा ब्रिटिशपार्लमेंटवत् अयममेरिकीयकांग्रेसोऽपि 'सेने प्रतिनिधिरूपसभाद्वयस्य वर्तते संस्था। सेनेटराः षण्णवतिः, प्रतिनिधयश्च ४३५ पञ्चत्रिंशदुत्तरचतु भवन्ति। एवं राष्ट्रपतेस्तथोपराष्ट्रपतेश्च सर्वेऽपि संभू ५३१ एकत्रिंशदुत्तरचतुःशतं जायन्ते। एषु २६६



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...त्तरशतद्वयं मतानि यः प्राप्नोति, स एवामेरिका-...राज्यस्य राष्ट्रपति-पदमलङ्करोति। एवमेवोपराष्ट्रपति-...चनं जायते।

...ते ५३१ एकत्रिंशदुत्तरशतपञ्चकमिता निर्वाचका ...म्बरमासस्य प्रथमबुधवारानन्तरं सोमवारे स्वरा-...राजधान्यां भवन्ति एकत्रिताः, राष्ट्रपतेस्तथोप-...तेश्चोभयोरपि पक्षयोः कुर्वन्ति मतदानम्। जनवरी-...स्य ६ तारिकायां कांग्रेसस्य द्वयोरपि सभयोः समक्षं ...मपि निर्वाचकानां मतानां प्रकाशनं तथा गणना ...नीयते। पश्चात् न्यूनान्न्यूनं २६६ मतानि यस्य ...समायान्ति, स एव राष्ट्रपतिरुद्घोषितः क्रियते। ...कोऽपि कदापीयन्ति मतानि न प्राप्नुयात्तर्हि राष्ट्र-...निर्वाचनं यावत् उपराष्ट्रपतिरेव कार्यं सर्वमपि सम्पा-...ते।

अमेरिकीय-राष्ट्रपतिः एकलक्षडालरमितं द्रव्यं वार्षिक-...रूपेण, एतदतिरिक्तं च लक्षार्धं द्रव्यं आतिथ्य-...दि-कार्यसम्पादनाय प्राप्नोति। उपराष्ट्रपतिश्च ३० ...स्रडालरमितं द्रव्यं वार्षिक-वेतनरूपेण १० सहस्र-...रमितं च यात्रादिव्ययार्थं लभते।

...पदद्वयस्यास्य निर्वाचनस्य महान् सम्मर्दः अमेरि-...नां पार्टीकन्वेन्शनानन्तरमेव भवति। यतो हि तदैव ...श्नमेतज्जायते यत् कस्माद् दलात् के के सन्ति ...शिनः—इति।

राष्ट्रपतिनिर्वाचनाय क्रियमाणस्यान्दोलनस्य संघ-...नितिविस्तृतं तथा बहुधनव्ययसाध्यं भवति। देशस्य ...राज्यस्य समितयो भवन्ति निर्मिताः। प्रत्येकनगरे ...प्रधानकार्यालयोऽपि संस्थाप्यते, यत्राऽऽन्दोलन-...कारः, प्रचारकाश्च निवसन्ति। तथा सर्वतोऽपि एतादृशी प्रचार-सामग्री प्राचुर्येण सज्जा तिष्ठति, या अनिच्छतोऽपि पुरुषस्य बलाद् दृष्टिपथं गच्छेत्, कर्ण-विवरेषु वा प्रविशेदेव।

आन्दोलनेऽस्मिन् सर्वोऽपि नागरिकः कार्यं कर्तुं शक्नोति, पार्टी-फेण्डे (दलीयकोषे) चार्थिक-सहायतां दातुं प्रभवति। पूर्वापेक्षया अद्यत्वे निर्वाचनान्दोलनेऽप्यधिको व्ययो भवतीति वदन्ति विज्ञाः—एतत्कर्मणि १८०० तमे ख्रिष्टाऽब्दे टॉमसजेफरसनेन ५० डालरमितस्य द्रव्यस्य व्ययः कृत आसीत्। १८६० तमे ख्रिष्टाब्दे च यदा अत्राहमलिंकनो निर्वाचितोऽभूत्, तदा रिपब्लिकदलेन एकलक्षडालरमितो धनराशिर्व्ययीकृतः। अनुमीयते राजनैतिकैर्लेखकैर्यत् १६४८ तमे ख्रिष्टाब्दे हैरीट्रूमैनस्य निर्वाचने सार्ध-कोटिद्वयडालरमितस्य द्रव्यस्य समभूद्व्ययः' इति। तथा हि रेडियोयन्त्रेण प्रचारकर्मणि, यातायाते, समाचारपत्रपत्रिकाभिः, नानाविधविज्ञापनपत्रादिभिश्च प्रचार-प्रसार-कार्ये सुमहान् भवति व्ययः।

व्याख्यानदानं न केवलं प्रत्याशिन एव कार्यम्। किन्तु नेशनल-स्थानीय-समितयः सहस्रशः प्रवक्तॄन् प्रेषयन्ति। राजमार्गस्थ-मरुत्तर-यानादिषु समुत्थायैव न, अपि तु महत्सु जनसमूहेष्वपि स्थित्वा भाषणानि बहून्येव दीयन्ते। एतेषां व्याख्यानैः बहूनि समाचारपत्राणि पूर्णतया भवन्ति तदाऽङ्कितानि। दलस्य कार्यकर्तारो मूलनिर्वाचकानपि प्रार्थयन्ते। मार्गेण गच्छन्तस्तथा कार्यान्तरं कुर्वन्तोऽपि जना आन्दोलन-तर्क-श्रवणानन्दं लभन्ते। स्त्रियोऽपि प्रतिवेशिगृहान् गच्छन्ति। दल-प्रत्याशिने च मतानि याचन्ते। प्रचार-साहित्येन जनानुरागाभिरक्षणस्य, निर्वाचनक्षेत्रे मतदातॄणामानयनस्यापि च कार्यं भवति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# "कृपाराज्ञी"

## (खण्डकाव्यम्)

पूर्वाऽनुवृत्तम्

लज्जात्परे हता योधाः कृपाराज्ञ्याः महौजसः ।
अधर्मयुद्धफलतो यवनानां दुरात्मनाम् ॥३०॥
कथंचिल्लब्धसंज्ञोऽसौ सेल्यूकसमवोचत ।
सिकन्दरः पञ्चबाणबाणाहत इवाहवे ॥३१॥

शम्भोर्भालदृशा प्रदग्धवपुषं मारं स्मरन्ती मुहुः
अन्विष्यासुरवैरियाम्नि विफलायासा वियोगाकुला
अन्वेष्टुं क्षितिमण्डले कृशतनुः सा किं रती राजते?
ईदृग्रूपमथोऽन्यथा कथमहो मर्त्येषु सम्भाव्यते?॥३२

इत्यश्रौषमहं, कृपां च ललनासाम्राज्यसंभाविताम्
यां दृष्ट्वाप्सरसोऽपि यान्ति नितरां व्रीडां किमन्याः स्त्रियः।
साऽङ्कं प्राप्स्यति चेन्मदीयममुना युद्धेन किं वा फलं ?
याहीतो रमणीमणिं हृदि ममासक्तं विधातुं दृढम् ॥३३

श्रुत्वा सिकन्दरवचो वचनीयमाह
सेनापती रतिपतिज्वलनाभितप्तम् ।
सम्राड्वरेण्य ! भरतक्षितिवासिनार्यः
दृष्ट्यर्पणेन भसितं स्वरिपून् विदध्युः ॥३४॥

योषा आसन् भारतेऽस्मिन् प्रभूताः
दोषातीताः ख्यातशीला हि साध्व्यः ।
रोषाद्भूमिः फालिताऽऽसीत्कयापि
पूषाऽप्यासीद्न्यथा जातु रुद्धः ॥३५॥

एभिः प्रगल्भवचनैर्मम कोऽस्ति लाभः
योषिन्मणिं मदुरसि प्रयतस्व योक्तुम् ।
एवं भवेस्त्वमपि कीर्तिमतां वरिष्ठः
सेल्यूकसं कथयति स्म सिकन्दरस्तम् ॥३६॥

तावद्यत्नं विधास्यामि यावत् प्राणान् धराम्यहम्!
किन्तु भारतनारीषु फलावाप्तिर्न सेत्स्यति ॥३७॥
शीले स्वासां पतेद्बाधा यदा ताः पुरुषा इव ।
निस्त्रिंशपाणयो रोषात संपतेयू रणाङ्गणे ॥३८॥

इति सेनापतेर्वाचं श्रुत्वा कोपात् सिकन्दरः ।
कोशादसिं समाकृष्य पुनः सम्पूर्य वेगतः ॥३९॥
उवाच वचनं गर्वात्–"अलं शत्रुविकत्थनैः ।
मदाज्ञापालनं धर्मः गच्छानेतुं कृपां जवात्" ॥४०॥

जीवग्राहं गृहीत्वा समुपनय पुरस्तां कृपां सुन्दराङ्गीं
यामर्धाङ्गीं विरच्याखिलभुवनपतित्वं च नो कामयेय।
इत्यादिश्यागमत्स्वं शिबिरमतिजवात् कन्दरं केसरीव
गर्जन् सीकन्दरो मन्मथशरनिहतः सेल्युकसं विहाय ॥४१॥

जगाम सेल्यूकस ईश्वरेच्छां ध्यायन् सिकन्दर् चरितं च निन्दन्।
दातुं ह्यनीशः प्रतिवाचमश्वं समारुरोहाशुगतिं तदानीम् ॥४२॥

---

साहित्ये चास्मिन्—आन्दोलनस्वीकृताः पुस्तिकाः (यासु अवधेय-विषय-भागो भवति लिखितः), प्लेट-फार्माः (कार्यक्रमः), भाषणानि, प्रचारक-सहायतार्थं प्रमाणानि-तर्काश्च, प्रत्याशिनां जीवनवृत्तानि, आन्दोलनस्य उद्देश्यानां लघुपुस्तकानि, समाचारपत्राणां पुनर्मुद्रिता अंशाः, समाचारपत्रेभ्यः प्रकाशनार्थं दत्ताः सूचनाः, चित्राणि, सव्यंग्यचित्राणि, आन्दोलनगीतयः, बहुविध-लघु-दीर्घ-पत्रपत्रिकादयस्तिष्ठन्ति ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...मत् काचिदनिन्द्यरूपा
...ी कृपायाः स्फुरिताधरोष्ठा ।
...वरश्च पितसैन्यनाथः
...सः प्राप्त इति ब्रुवाणा ॥४३॥

...कर्तव्यं साम्प्रतं ब्रूहि राज्ञि !
...संख्या घातिता वीरमुख्याः ।
...नाथः सेल्युकस्सोऽवरोधं
...स्माकं शीलरक्षा कथं स्यात् ? ॥४४॥

...तं सखि कातरवाग्भिः
...पुरं प्रति बोधय नारीः ।
...त्तिष्ठति, मायुधहस्ताः
...युद्धभुवीति जगाद ॥४५॥

...नि शीलपरिरक्षणलालसा वः
...सम्पतत वीतभयाः कृपाणैः ।
...समाश्चरिगणैस्त्यजताथवासून्
...क्रामति क्षितिमिमां यवनारिवर्गः ॥४६॥

...ये द्विजवरान् वनिताश्च धेनूः
...नि देवनिलयांश्च निपातयन्ति ।
...संयन्ति भरतक्षितिधर्ममार्यम्
...म्लेच्छराक्षसगणान् युधि चूर्णयेम ॥४७॥

...सह द्विड्भिर्युद्धाय बद्धकटीश्च नः
...मुनिपुणं वाचं वीरोचितामवदत् कृपा ।
...सा चेटी ढक्कां निनादयितुं जवात्
...भुवि नार्यः शीलार्थं त्यजेयुरसूनपि ॥४८॥

...तुमुला शङ्खरावैः समापतदञ्जसा
...समरः प्रारब्धः सेल्युकस्सवचस्तदा ।
...समये युद्धस्याहो सिकन्दरकर्णयोः
...न तु सद्बुद्धिं मूढो मदेन मनोभुवः ॥४९॥

हत्वा रिपून् भरतभूमिगता नताङ्गीः
नीत्वा पुरीमनुभवेयमिति स्वकीयाम् ।
भ्राम्यन्नहं विधिवशादुपयामि यास्ताः
प्राप्ताश्चिरादुपयमो भविता क्षणेन ।५०॥

इत्यालोच्य कृपां नृपाधम उपस्कर्तुं किलान्वेषयन्
आस्ते, साऽपि युधि प्रहर्तुममुमेवान्वेषयन्ती चिरम् ।
तावन्योन्यमुपागतौ रणभुवि प्राहाथ सीकन्दरः
भूत्वा कामवशः प्रणष्टधिषणाशौर्याभिमानत्रपः ॥५१॥

अतनुस्तनुमध्यमे तनुं मे
वितनोति प्रहतां शरैस्सुतीक्ष्णैः ।
अबलासि कृपे ! कृपाणधारां
कृपणां नार्हसि सोढुमस्मदीयाम् ।५२॥

शृणु पथ्यमिदं वचो मदीयं
विरमायासदसङ्गरादमुष्मात् ।
वृणु मां पतिभावतस्त्वदीयाः
न विनश्यन्तु जनाश्च सम्पदश्च ॥५३॥

'मूढावाच्यं वदसि वनिताः भारतीयाः किमेतत् (यदेतत्)
जिह्वा शीर्णा पतति शतधा किं न ते भूतलेऽस्मिन् ।
इत्युक्त्वा सा क्षिपति निशितं यावदाकृष्य खड्गं
तावत्सेल्यूकस उपगतो वारयामास वेगात् । ५४॥

'बध्नीत तां विमलरूपवतीं कृशाङ्गीं
राज्ञीं कृपां सरसिजातमुखीं प्रगृह्य ।'
इत्यादिदेश पृतनाः स सिकन्दरोऽथ
सेल्यूकसोऽयतत, नाप कृतार्थतां तु ॥५५॥

स्वगणेन सिकन्दरोऽथ वेगात्
अरुणत्, सापि बलादयुध्यतास्त्रैः ।
समरश्रमवीतशक्तिरासीत्
अबलानां प्रबलं हि चित्तधैर्यम् ॥५६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यावत् सिकन्दर "इयं निजसाङ्कवेदि"—
त्यैच्छद्धि तावदुरसि स्वयमेव विद्ध्वा ।
तत्याज जीवनमहो ! महनीयशीला
राज्ञी कृपा, भरतभूजननीसुकीर्त्यै ॥५७॥

संग्रामभूमिमधिगत्य हि भारतीय—
वीरोऽनयन्मृतकलेपरमाशु कश्चित् ।
राज्याः, शशाम समरानल एधमानः
शिष्टं बभूव नु सिकन्दरसैन्यमेव ॥५८॥

कृपाऽदादात्मानं भरतधरणीरक्षणकृते
बलिं, योषिल्लोके स्थिरतमयशः प्राप पदवीम् ।
विदेशीयाः श्रुत्वा चरितमिदमस्माकममलम्
पुमांसोऽपि व्रीडावनतवदना मूकसदृशाः ॥५९॥

सिकन्दर् निद्राणः कमपि रवमाकर्ण्य सहसा
ब्रवीत्युत्स्वप्नेन प्रथितयशसो भारतजनाः ।
न तावत्सौन्दर्यैरपि तु सुगुणैः शीलभरितैः
गरीयस्यो येषां भरतभुवि राजन्ति वनिताः ॥६०॥

धन्या वीरप्रसविनि ! जगत्यम्ब ! पुण्या त्वमेव
गुण्या मातर्भरतधरणि ! त्वं सदा भासि धर्मैः ।
श्रेयोऽस्माकं वितरसि महत् पुण्यतीर्थैरसङ्ख्यैः
भूयो भूयः प्रणतय इमाः सन्तु पादाब्जयोस्ते ॥६१॥

लक्ष्मीहयास्यकृपया शठकोपनाम्ना
केनापि मन्दमतिना रचितं 'कृपायाः'
ओजोभिवृद्धिरनिशं पठतां किलैतत्
सम्पद्यते हृदि सतां चरितं चिराय ॥६२॥

---


# हरिनगर सूगर मिल्स लि०

फैक्टरी

हरिनगर (एन० ई० रेल्वे) (चम्पारन जिला) उत्तर बिहार

दूरभाषयन्त्रम्—

'मर्यादा-रामनगर (चम्पारन)'

प्रधानकार्यालय :—

२०७, कालबादेवी रोड, बम्बई-२

दूरभाषयन्त्रम्—

'क्रिसूगर' (बम्बई)

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

* प्योअर, * फर्स्टक्लास, * क्रिस्टल * केन शुगर




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# श्रीजवाहरजयन्ती !

[ ले० श्रीगणेशरामशर्मा विद्याभूषणः, झालावाड ]

( कवित्वम् )

तिलकजयन्ती स्वान्तरङ्गस्फुरत्तेजोमयी;
गान्धेः सा स्वराज्यसिद्धिसम्पद्वैजयन्तीयम् !
विद्यावर्द्धिनी च महामनसो+ जयन्ती मुदे;
क्रान्तिकारिणी सुभाषचन्द्रस्योल्लसन्तीयम् !!
विश्वकवेश्चित्तरञ्जनस्य दयानन्दस्य च
काव्यश्रियं न्यायं सार्यसंस्कृतिं दिशन्तीयम् !
कूटनये वल्लभस्य, विज्ञानेऽथ जागदीशी;
सार्वभौमशान्तये जवाहरजयन्तीयम् !!!१॥

विश्वशांतिसन्देशाग्रदूतत्वं वहन्ती पुन-
र्विज्ञानास्त्रविस्फोटान्मनुष्यतामवन्तीयम् !
युद्धाग्नेर्विभीषिकाविपन्नान् राष्ट्रसङ्घान्मिथो
मैत्रीभावविश्वासं ससौहार्दं नयन्तीयम् !!
सर्वोदयसाधनासमाजरचनार्थरीति-
नीतिसूत्रपातमनुशासने लसन्तीयम् !
सत्यं शिवं सुन्दरं श्रियै च प्रेरयन्ती जनान्
जननीव जायते जवाहरजयन्तीयम् !!!२।

★
★★

+ मालवीयमहोदयस्य ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# एकादशकिङ्कराः

## (शैक्षिकमेकं वाङ्मुखम्)

[ ले० स्वामी लक्ष्मणशास्त्री, संस्कृतविद्यालयाध्यक्षः नागौर (राजस्थान) ]

श्रूयते--

पुरा कस्मिंश्चन नगरे कस्याञ्चिदेकस्यां राजकीय-विद्याशालायां राज्याधिकारिणाम्, धनिनाम्, साधारणजनानां च बालकास्तत्समयोपयुक्ता विविधा विद्या अध्येतुम्प्रत्यहमागच्छन्ति स्म। एकदा प्राप्तावसरास्ते सर्वे बालकाः सङ्गत्य कस्याश्चित्कथायाः प्रसङ्गे स्वस्व-किङ्करविषयमवलम्ब्य मिथोऽहमहमिकया विनोदमेकं विदधुः। एकेनोक्तम्, मम गृहे सर्वदैवैकद्वाः किङ्करा-उपस्थिता वर्त्तन्ते। अन्येन कथितम्, मम द्वित्रा भृत्या वर्त्तन्ते। अपरेण गदितम्, मम पञ्चषाः परिचारका विद्यन्ते। इतरेण केनचिद् राज्याधिकारिणः पुत्रेण भणितम्-मम गृहे सततमुपदशा भरण्यभुजः कार्यं कुर्वन्ति।

एवं सर्वेषु तेषु बालकेषु परस्परं विवदत्स्वेकः कोऽपि साधारणगृहस्थस्य रामदत्तो नाम बालकः स्वासनादुत्थाय स्वबाहुमुत्क्षिप्य चोच्चस्वरेणावोचत्। किं यूयं स्वल्पैरप्येभिः स्वस्वकिङ्करैरेवमनल्पं गर्वं कुरुथ? ममैकस्यापि सर्वेभ्योऽप्यधिका एकादशमिता भृत्याः सन्ति, ये सततमुपस्थिताः सन्तो मदाज्ञामनु-वर्त्तन्ते।

एवं तद्वचनं श्रुत्वा तत्रोपस्थिताः सर्वे बालकास्त-त्कथनं सर्वथैव वितथं मन्वाना उच्चैर्जहसुः।

किञ्च, तत्रैवैकस्यामासन्दिकायां सुखमुपविष्टः स्व-कार्यं कुर्वाणश्च तस्या विद्याशालाया मुख्याध्यापकः शिवदत्तामिधः परस्परं विवदतां तेषां बालकानां स्वस्व-किङ्करविषये विहितां प्रौढिं श्रुत्वा न किञ्चिदपि विचलितोऽभूत्। किन्तु, चिरात् स्वपरिचितस्य तस्य रामदत्तस्य मुखादेकादशकिङ्कराणां वार्तां श्रुत्वाति-विस्मितोऽसौ मुख्याध्यापकः स्वसमीपे तं समाहूय परिहसन्नुवाच।

'रामदत्त! किन्तवाप्येकादश परिचारकाः सन्ति? चेत्सत्यमेव तवैकादश किङ्कराः सन्ति, तर्हि ब्रूहि तेषां पृथक्२ नामानि। कुत्र च ते सन्ति? किं कुर्वन्ति च ते? किं वा तव पिता तान् दृष्टिदोषभिया पलायनभिया वा न कदाचिद् बहिर्गन्तुमादिशति? किन्ते तव गृहे कस्मिंश्चिद् गर्भागारे सर्वदा प्रच्छन्ना एव तिष्ठन्ति?

तव मुखात्तवाप्येकादशकिङ्कराणां वार्तां श्रुत्वा न कोऽप्येतद् विश्वसितुम्प्रभवति। न मया न चैभिस्तव प्रातिवेश्मिकैर्बालकैरपि तव गृहे कार्यं कुर्वाणः कोऽपि किङ्करः कदापि निरीक्षितः। अन्यच्चाहं तव पितुरार्थि-क्या स्थित्यापि सुतरां परिचितोऽस्मि, यतोऽसौ तव पिता साम्प्रतमेकस्यापि किङ्करस्य व्ययभरमुद्वोढुमक्षमो-ऽस्ति, किम्पुनरेकादशानां भृत्यानाम्। अहमेतदपि सम्यग् जानामि, यत्त्वं कदापि न मृषा भाषसे। कथ-मेतत्सम्भवेत्तवाप्येकादश किङ्कराः सन्तीति।

एवं सर्वेषां तेषां बालकानां समक्षं सपरिहासं पृष्टो रामदत्तः सविनयं प्रणम्य स्वमुख्याध्यापकमवदत्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सम्पादकीयम्

**अ० भा० राष्ट्रभाषाप्रचारसंमेलनस्य सप्तमाधिवेशनम्**—अक्टूबरमासस्य अष्टादश्यां तारिकायां ष्ट्रभाषाप्रचारसंमेलनस्याऽधिवेशनं संसत्सदस्य'श्रेष्ठि-गोविन्ददासस्याध्यक्षतायां जयपुरेऽस्मिन् प्रातः प्रारभ्यत। संमेलनस्योद्घाटनं केन्द्रीयगृहमन्त्रालयस्योपमन्त्रिणा बी० एन्० दातारमहोदयेन कृतम्। प्रातः सार्द्धाष्टवादने एका शोभायात्रा नगरपरिभ्रमणमकार्षीद्, यत्र संमेलनाध्यक्ष-दातार-डा० सोमनाथगुप्तादयो रथाध्यूढा आसन्। अपराह्णे सार्द्धचतुर्वादने राजस्थानस्य राजप्रमुखेन श्रीमानसिंहमहाराजाधिराजेन साहित्य

---

महाराज! मम कथनं लेशतोऽपि नास्त्यसत्यम्। मेव ममैकादश किङ्कराः सन्ति। तेषां नामानीमानि। नेत्रे, द्वौ कर्णौ, द्वे नासिके, द्वौ हस्तौ, द्वौ पादौ, चैकम्। नेत्राख्यं भृत्यद्वयं मह्यं नानाविधानि ानि दर्शयति। कर्णौ नाम किङ्करौ मह्यं मधुरान् श्रावयतः। नासिकाभिधं परिचारकद्वयं मह्यं णि वस्तूनि समर्पयति। करौ नाम भृतकौ मम ं कार्यमनवरतं कुरुतः। पादौ नाम कर्मकरौ च हं गन्तुम् इच्छामि तत्रैव मां त्वरितं नयतः। मुखं कं भृत्यरत्नं तु मह्यं सर्वदा यथेष्टं स्वादूनि मनो-नि च भोज्यवस्तूनि समानीय समर्पयति। यथार्थ िम एव सत्या भृत्याः सन्ति। यत्ते कदाप्यनुपता न भवन्ति। स्वस्वामिनः कार्यं च यथेष्टं यथांच कर्तुं सदैव सन्नद्धास्तिष्ठन्ति। एतेभ्यो व्यति मूल्यक्रीता भृत्यास्तु सर्वे कृत्रिमा एव सन्ति। इमे क्रीताः कृत्रिमा भृत्यास्तु स्वस्वामिनः किमपि कार्यं ं यथासमयं च कर्त्तुं नैव कदापि प्रभवन्ति।

किञ्चेमे कृत्रिमा भृत्याः स्वशरीरास्वास्थ्यस्यान्यस्य स्यचनावश्यककार्यस्य व्याजं विधाय बहुशोऽनुपता एव भवन्ति। समयेऽसमये वा मासिकं वार्षिकं स्वेतनं विवर्द्धयितुं सततं स्वस्वामिनं विवशं कुर्वन्ति । विविधाभिर्विभीषिकाभिश्च स्वस्वामिनं स्वानुकूलं विधातुं सततं प्रयतन्ते। स्वामिनस्तु स्वार्थैकपरायणानां तेषां मूल्यक्रीतानां कृत्रिमभृत्यानां परवशाः सन्तो यथाशक्यं तत्कथनमेवानुसरन्ति। उदाहरणरूपेण यथा कश्चित् कृत्रिमो भृत्यः स्वामिना यदि सूदकर्मणि नियुज्यते, तदा स समयेऽसमये वा, शीतमुष्णं वा, पक्वमर्धपक्वं वा स्वाद्वस्वादु वा यद्भोजनं स्वस्वामिने समानीय समानीय समर्पयति, स्वामी तद्भोजनं यथा कथञ्चिदिच्छयानिच्छया वा भोक्तुं विवशो भवति। "कुतः पराधीनजनस्य सौख्यम्", इति नीतेः सूक्तिं च सर्वथा चरितार्थां विदधते।

किञ्च--विचारविकलास्ते स्वामिनः कृत्रिमाणां मूल्यक्रीतानामेषां भृत्यानां सततमेव दास्यभावं भजन्तः सर्वदा सन्निहितान् सदैव स्वाज्ञानुवर्त्तिनश्च स्वस्य सत्यानकृत्रिमान् हस्तपादादीन् भृत्यान् स्वे स्वे कर्मण्यनुपयोज्य तानलसानायत्यां च सत्यामावश्यकतायां सर्वथा कार्यकरणाक्षमानेव विदधति।

एवं तस्य नातिप्रौढवयसोऽपि बालकस्य रामदत्तस्य युक्तियुक्तं वचो निशम्य मुख्योऽसावध्यापकोऽन्ये च तत्रोपस्थिताः सर्वे बालकास्तत्कथनं सर्वथैवावितथं मन्वानास्तं भृशं प्रशशंसुः। विसृज्य च तमसौ मुख्याध्यापकोऽपरे च सर्वे तत्रोपस्थिता बालकाः स्वे स्वे कर्मणि व्यापृता बभूवुः इति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


कला-प्रदर्शिन्या उद्घाटनं कृतम्। अस्मिन्नवसरे प्रोक्तं राजप्रमुखेन यत्—"देशे विज्ञानस्य यथा यथा प्रगतिः प्रारभ्यते तथा तथा राष्ट्रभाषायामस्यां वैज्ञानिका एवं पारिभाषिकाः(टेकनिकल)शब्दा अपि सज्जीक्रियेरन् येन सा सुप्रचारा भवेत्। अहमेतत्श्रवणेन सुप्रसीदामि यत् संमेलनेनाऽनेन हिन्दीप्रचारस्य, तथा सौकर्येण तस्याः शिक्षणस्य च प्रणाली प्रचारितास्तीति। अहं कामये यद् राजस्थाने अन्या अपि साहित्यिक-सांस्कृतिक-समितयो निर्मीयेरन्। याभिर्मिथः सौहार्द-वृद्धिर्भवेत्। एवंविधसंस्थानां कृते मम, मत्परिवारस्य च विशिष्टमवधानं भवेत्। सर्वदा च तासां साहाय्यं क्रियेत। अध्यापकान् प्रति वक्तव्यं यत्ते सांप्रतं पूर्वापेक्षयाप्यवधानेन कार्यं कुर्युः। यतस्तेषां दायित्वं पूर्वापेक्षयापि प्रवृद्धम्। अहमस्य संमेलनस्य सफलतां राजस्थाने हिन्दीप्रचारस्य च प्रवृद्धिं कामये।"

## अध्यक्षभाषणस्य सारः

अध्यक्षपदाद् भाषमाणेन श्रेष्ठिगोविन्ददासमहोदयेन प्रोक्तम्—"भारतसर्वकारस्य नीतेः कारणात् हिन्दी-साहित्यनिर्माणे यत्कार्यमावश्यकमासीत्तदपि न संपन्नम्। पारिभाषिकशब्दावलीनिर्माणस्य कार्यमपि असंपूर्णम्। एतद्दृष्टिकोणस्य नवीनो भयावहश्च परिणामः सोयं जातो यन् माध्यमिकशिक्षातोऽप्यवरशिक्षायामपि निम्न-श्रेणीष्वपि आङ्गलभाषाऽनिवार्या स्थापिता। विश्व-विद्यालयानां शिक्षाया माध्यमं तु आङ्गलभाषैव नियतीकृता। नवीनस्यास्य निर्णयस्य स्पष्टोयमर्थः यत्—स्वराज्यप्राप्तेः पूर्वं, राष्ट्रियचेतनाप्रारम्भात् पश्चाच्च अस्माभिः अस्माकं माध्यमिकशिक्षायां-हिन्दीभाषायै, भारतीयान्यभाषाभ्यश्च, यत् स्थानं दत्तम्, अनेकेषु विश्वविद्यालयेषु स्वराज्यप्राप्तेः पश्चात् हिन्दी तथा अन्यान्यभारतीयभाषाश्च शिक्षाया माध्यमत्वेन नियमिताः, एवंप्रभृति सर्वमपि कार्यमस्माभिर्विलोपितम्। पुनः प्रारम्भादाङ्गलभाषायाः साम्राज्यमस्माभिरारब्धम्।

अस्मिन् विषये रूस-चीनौ अस्माभिरादर्शौ करणीयौ। तत्र हि वैज्ञानिककार्यकर्तारो न कस्याश्चिद् विदेशीयभाषायाः शिक्षाद्वारा संपादिताः, अपि तु स्वदेशभाषया ते वैज्ञानिकाः संपन्नाः। एतदर्थमावश्यकं साहित्यं स्वभाषायामेव च संपादितम्। बहूनां प्रान्तीय-भाषाभाषिणामयं भ्रमोऽस्ति यत् हिन्दीभाषाया उत्थानस्य सोयमर्थो यत् प्रान्तीयभाषाणां पतनं नाम। किन्तु सोयं भ्रम एव। वयं हिन्दीभाषां बलात् कस्यापि प्रदेशस्योपरि न स्थापयितुमिच्छामः। आङ्गलैर्यथा अंग्रेजीभाषा शिक्षाया माध्यमत्वेन परिकल्पिता, धारासभानां भाषापि अंग्रेजी एव स्थापिता। तद्वद् वयं न वाञ्छामः। येषां राज्यानां मातृभाषा हिन्दी नास्ति तेषां शिक्षाया माध्यमं सा प्रान्तीया भाषैव भवेत्। एवं तत्र धारासभायाः, न्यायालयानां चापि भाषा सा प्रान्तीयभाषैव भवेत्। हिन्दी तु केन्द्रस्य, अन्तःप्रान्तीय-कार्यस्य च भाषा भवेत्। आम्, द्वितीयभाषारूपे तस्याः शिक्षणं समस्तेऽपि देशे अनिवार्यरूपेण अवश्यं भवेत्। अन्यथा केन्द्रकार्यं कथं परिचलेत्?

किन्तु खेदोऽस्ति यद् हिन्दीभाषाभाषिणामेव हिन्दीं प्रति उदासीनता दृश्यते। एतस्य सत्यं दर्शनं "भारतीय-संसदि" भवति। संसदो गतस्य निर्वाचनस्य पश्चात् संसदि "संसदीयहिन्दीपरिषद्" नामिकाया एकस्याः संस्थाया निर्माणं सर्वसंमत्या संपन्नमभूद्। येन हि हिन्दीभाषाभाषिणः सदस्या हिन्दीभाषयैव संसदि भाषेरन्। प्रस्तावांश्च तयैव भाषया प्रेषयेयुः। किन्तु हिन्दीपरिषद् अस्मिन्विषये अतिन्यूनमेव सफलाजाता। हिन्दीभाषाभाषिणः इमे सदस्याः कामम् अंग्रेजीभाषा-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वाराणसी
ति० १२-११-१९५६

भारती-नाम्नी मासिक-पत्रिका मया प्रतिमासम-
वलोक्यते। सेयं प्रायो वर्षषट्कात् संस्कृतस्य सेवां
विदधाति। संस्कृतज्ञानां विरलतायामियं पत्रिका सर-
लया भाषया बालानामपि कृते सुबोधेति प्रचारः सम्पा-
द्यतेऽनया संस्कृतस्य। नियत-समयं प्रतिमासमियं
निस्सरतीति प्रशंसनीयः श्रमोऽस्या व्यवस्थापकानाम्।
यदि इतोऽपि किंचिद् गम्भीरतरा विचारपूर्णाश्च लेखाः
प्रकाशिता भवेयुरस्यां तन्मन्ये विचारकविदुषामपि
हृदयावर्जिकेयं सम्पद्येत।

अहमस्याः पत्रिकाया उत्तरोत्तरामुन्नतिं कामये
इति

गिरिधरशर्मा
चतुर्वेदः

कार्तिक शुक्ल नवमी
२०१३

…आम्यां भाषेरन्, प्रतिवाक्यं व्याकरणाशुद्धीनां मालां …येयुः। किन्तु एतेषां मस्तिष्के दृढीभूतमिदं यद् …द् वयम् आङ्गलभाषया न भाषिष्यामहे तावद् …त्माकं प्रभावः संसदि न स्थिरीभवेत्।

अहं प्रादेशिकभाषाणामवहेलनां कृत्वा हिन्दी-…भाषाया उन्नतिं न कामये, न च तत्संभवोऽप्यस्ति। अन्या …या राष्ट्रसंविधाने स्थिताः, ताः सर्वा अपि राष्ट्रस्य …ताः। न च हिन्दी राष्ट्रभाषासिंहासने एतद्बुद्ध्या …पिका, यत्तस्याः साहित्यं सर्वापेक्षया समृद्धमिति। …चित् वङ्ग, तामिलादिभाषाणां साहित्यं हिन्दीतोऽपि …द्धं भवेत्। किन्तु हिन्दी राष्ट्रभाषापदमनेन गुणेना-…यन् राष्ट्रस्य अर्द्धाधिकानां सेयं मातृभाषाऽस्तीति।"

## संस्कृतमेव भारतीयसभ्यताया आधारस्तम्भः

अस्मिन् सितम्बरमासे एव प्रकाश्यसभायामेकस्या-ध्यक्षपदं मण्डयमानेन हैदराबादस्य प्रधानमन्त्रिणा श्री वी० रामकृष्णरावमहोदयेन ससमर्थनं प्रोक्तमभूद् यत्—सेयं संस्कृतभाषैव भारतीयसभ्यताया आधार-शिलाऽस्ति। अतएव एतस्या विकासः परमावश्यकोऽस्ति। ततश्च भारतीयविदुषां साम्प्रतमेतत्कर्तव्यं यत्ते नवी-नान् कांश्चित्प्रकारानाश्रयेयुर्यैः संस्कृतभाषाऽध्ययनं प्रारम्भिकशिक्षार्थिनां कृते सरलं संपद्येत।

तत्रैव 'रियुकोक्' प्रदेशात् "जापानीयबौद्धविश्व-विद्यालये" भारतीयाध्ययनविभागस्य प्राध्यापकः 'हिन्दियो क्रिमूरा' महाशयेन ससमारोहं समर्थितमभूद्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यत्--जापानदेशे पञ्चदशविश्वविद्यालयेषु भारतीयाध्ययनविभागः पृथग्रूपेण नियतोऽस्ति, येषां विश्वविद्यालयानां मध्ये टोकियोविश्वविद्यालयोऽप्यस्ति। तेन प्रोक्तं यत् जापाने संस्कृताध्ययनस्य प्रधानं प्रयोजनमिदमेवास्ति यत्तेन भारतीयं दर्शनशास्त्रम्, साहित्यम, इतिहासः, बौद्धधर्मश्च सम्यक्तया परिज्ञायेत। स हि साधितवान् यत् संस्कृतभाषा सर्वतः प्रथमं ५२१तमे ख्रिष्टीयवत्सरे प्रावर्तत। प्रोक्तमनेन यत् जापानीयविद्वद्भिः संस्कृतस्य बहूनि पुस्तकान्यनूदितानि, सयत्नं प्रकाशितानि च। तेषु उपनिषदः, गीता, वेदान्तविषयश्च प्रधानमस्ति। स्वयमयं महाशयः सोत्साहमुदीरितवान् यत्-'टोकियोनगरं प्राप्य 'मेघदूत, शाकुन्तल, रघुवंशानां' स्वयमहमनुवादं करिष्यामि, स्वयमेव च प्रकाशयिष्यामि' इति।

**पञ्चशतग्रन्थानामकस्मादुपलब्धिः**— अक्टूबरमासे एव ''राजगृह''तः सूचनैका प्रकाशिताऽभद्— ''यत् ''नालन्दापालीप्रतिष्ठानस्य'' अवैतनिकनिर्देशकः, बौद्धसंप्रदायस्य मान्यो विद्वान् भिक्षुश्रीजगदीशकश्यपश्चीनसर्वकारस्य निमन्त्रणमवाप्य तदनुसारमगाच्चीनप्रदेशम्। स हि सम्प्रति 'हान-चू' नामके स्थाने निवसति, यद्धि 'चीनस्य स्वर्गः' इति प्रख्यायते। कश्यपमहोदयेन चीनप्रदेशे विभिन्नविभिन्नविषयाणां पञ्चशतग्रन्थास्तत्रोपलब्धाः, यानसौ 'नालन्दा'संस्थानार्थं भारतमानयति।

पूर्वोक्तेन कश्यपमहाभागेन चीनप्रदेशात्सांप्रतमेव ''मगधसांस्कृतिकसंघस्य'' मन्त्रिणे श्रीसुरेन्द्रप्रसादतरुणाय पत्रमेकं प्रहितमासीद् यत्र कश्यपेन लिखितं यत् चीनप्रदेशस्य अनेके बौद्धविद्वांसो भारतमागन्तुमुत्सुकाः सन्ति। ते हि बौद्धभिक्षुत्वरूपं संबन्धं प्रधानीकृत्य ''नवनालन्दामहाविहारे'' स्वीयाः सेवा अपि समर्पयितुमुत्सहन्ते। तेनैव इदमपि सूचितं यत्-''अस्यैव अक्टूबरमासस्य २८ तारिकायां चीनराजधान्यां पीकिङ्नगरे ''बौद्ध अकादमीसंस्थायाः'' उद्घाटनं महता समारोहेण भवेत्। भारतीयानामयं गर्वस्य विषयो यत्

भारतीय-औषधानां सर्वाधिकं बृहत् विश्वस्तं निर्माणकेन्द्रम्

श्री वैद्यनाथ-आयुर्वेद-भवनं

[प्रायवेट लिमिटेड]

कलिकाता • पटना • झांसी • नागपुरम्

सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्तानां भेषजानां
सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे

निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्येन भेषजानीमानि लभ्यन्ते



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...या अस्याः स्थापना "नालन्दापालीप्रतिष्ठानस्य" ...रेणैव भवति। एतदर्थं सुयोग्यानां दश-अध्याप... नियुक्तिर्जाता। किञ्चैको महाविशालो मठस्तदर्थं ...नियतीकृतः।

## भारते ख्रिष्टधर्मीयाणां प्राबल्यम्

...भारतराजधान्यां देहल्यामस्मिन् अक्टूबरमासे एव ...मितैः आर्यसमाजैरेतदर्थं विरोधदिवसो मानि... यत् भारते ख्रिष्टधार्मिकाणां राजनीतिमूलकः ...प्रचारो भयंकररूपेण प्रचलितः। स्वामिवेदानन्द-...तायां या विरोधसभा संवृत्ता तस्यां धर्मवीर-...प्रभृतिभिर्भाषणकर्तृभिः समर्थितं यद् युरो-...भ्यो भारतेऽस्मिन् अद्याऽवधि ऊनत्रिंशत्कोटि-...रूप्यकाणि संप्राप्तानि यद् भारते ईसाईधर्मस्य ...प्रकामं प्रवृद्धिमुपगच्छेत्। तैरेतदपि सूचितं ...भारते अष्टसहस्रमिता ईसायीधर्मप्रचारकाः, ...मिता-मिशनसंस्थाश्च, परःकोटिमुद्राणां व्ययेन ईसाईधर्मं भारते प्रबलतया प्रचारयन्ति। एतदपि सर्वतः सुप्रसिद्धं यत् ईसाईधर्मप्रचारार्थं सर्वाधिको द्रव्यव्ययः अमेरिकातः समुपलभ्यते। तदिदं षड्यन्त्र-मेतदर्थं प्रचलति यत् पण्डितनेहरूमहोदयस्य विदेश-सम्बन्धिनीं नीतिं विफलीकृत्य भारतमिदम् अमेरिका-समवाये संमिलेत्। देहलीजातायां विरोधसभायां प्रस्तावोयं सर्वसंमत्या पारितोऽभूद् यद् विदेशधर्मप्रचारस्य विरोधे भारतेऽपि प्रकामं संनद्धता अवलम्ब्येत। एतदर्थं स्थाने स्थाने 'दयानन्दसेवासदनानि' स्थाप्येरन्। संपूर्ण-हिन्दुजनतातः प्रार्थना कृताऽभूद् यत्प्रतिव्यक्ति चतुरा-णकमात्रप्रदानतोपि एककोटिमितमुद्राराशिः संगृह्यतां येन सेवाकार्यं यथावत्प्रचलेत्। लोका अतीवाश्चर्यमनु-भवन्ति यद् विरोधिधर्मप्रचारकाणां सर्वा अपि सूचना भारतसर्वकारेण प्राप्यन्ते, किन्तु एवं सत्यपि सर्वकार-पक्षान्नैतस्य प्रतीकारः किञ्चिद् भवतीति।

★ अवध शूगर मिल्स लिमिटेड
★ अपर गैंगज शूगर मिल्स लिमिटेड
★ न्यू इण्डिया शूगर मिल्स लिमिटेड
★ न्यू स्वदेशी शूगर मिल्स लिमिटेड
★ भारत शूगर मिल्स लिमिटेड
★ गोविन्द शूगर मिल्स लिमिटेड
शुद्धकणवत्याः इक्षुशर्कराया निर्मातारः
मैनेजिंग एजेन्ट्स :—
दी काटन एजेन्ट्स प्राइवेट लिमिटेड
कलकत्ता ★ बम्बई

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"भारती" प्रतियोगितासु—

# एकाङ्क-नाटक-प्रतियोगितायाः परिणामः

[illegible]कायाः नाटक-कथा-काव्यप्रतियोगितायाः परिणामानुद्घोषयन्तो वयं परमं प्रमोदमनुभवामः। परिणामप्रकाशने विलम्बोऽभवद् इत्येतदर्थं वयं क्षमाऽर्थिनः स्मः। अस्मिन्नङ्के एकाङ्कनाटकप्रतियोगितायाः परिणामः प्रकाश्यते।

एकाङ्कनाटकप्रतियोगितायाः कृते अस्माभिः पञ्च-नाटकानि प्राप्तानि। यद्यपि नाटकानां सामान्यस्तरो नातिसंतोषजनकोऽभूत् विशेषतश्च नव्यकथानकोद्भावनायाः प्रवृत्तिः केनाऽपि प्रतियोगिना नाऽभूत् प्रदर्शिता। नाटकानामाकारोऽपि स्वल्पतर एवाऽभूद्येन घटनायाः समुचितः संनिवेशः, चरित्रचित्रणं च नातिसमीचीनं संपद्यते। तथापि अस्मदुपलब्धेषु नाटकेषु नाटकद्वयं निर्णायकमहोदयसकाशात् सर्वाधिकाङ्कलाभमकरोत्। यतो हि द्वे अपि नाटके समानाङ्कभागिनी स्तः, अतः एकपंचाशद्रूप्यकात्मकः प्रथमपुरस्कारो विभज्य द्वाभ्यामपि उपलप्स्यते—एतयोर्नामिनी स्तः—

देहल्याः श्रीकृष्णलालनादानलिखितं "प्रतीकारः" नामकं नाटकम्—

मैसूरस्य श्री एच् बी० भुजंगाचार्यलिखित "प्रतिभाविलासः" नामकं नाटकं च।

पञ्चविंशतिरूप्यकाणां द्वितीयपुरस्कारस्य कृते कन्नौजस्थरामनारायणदीक्षितलिखितं "गुरुदक्षिणा" नाटकं योग्यं निर्धारितमस्ति।

इतरत् नाटकद्वयमपि शैलीदृष्ट्या अतीव शोभनमास्ते अतः "भैमीनैषधीय" नाटकरचयिता श्रीसीतारामाचार्यः, "रामायणकथानक" नाटककारः श्रीरामानन्दनायकश्चापि प्रशंसार्हौ। यैर्लेखकैः प्रतियोगितायां प्रतिष्ठा प्रशंसा च लब्धा ते भारतीपरिवारेण सस्नेहमभिनंद्यन्ते, प्राप्ताभ्यो रचनाभ्यो योग्या रचना 'भारत्यां' प्रकाशयिष्यन्ते। प्रतियोगितायां सोत्साहं भागं गृहीतवन्तो लेखका भारतीपरिवारेण धन्यवादैरभिनंद्यन्ते। पुरस्कारः खलु रचनामार्गे प्रोत्साहनमात्रम्—अतः पुरस्कारम् प्राप्तवद्भिः अप्राप्तवद्भिश्च सुरसरस्वतीसेवायां दृढतरेण चेतसा रचनायां समधिकं कौशलमर्जयितुं प्रयत्नोऽनुष्ठास्यते—इत्याशासानो— भारती-परिवारः

## ❀ सूक्ति-सुधा ❀

गाढं गुणवती विद्या न मुदे विनयं विना।
मूर्खताऽपि मुदे भूयान्महत्सु विनयान्विता ॥१॥

यदि विद्या अत्यन्त गुणवती भी हो, किन्तु विनय अर्थात् नम्रता न हो तो आनन्द देनेवाली नहीं होती। मूर्खता भी आनन्द देनेवाली हो जाय, यदि बड़े पुरुषों में नम्रतायुक्त हो। विद्या और गुणों के साथ नम्रता होना अत्यावश्यक है ॥१॥

नारी परमुखद्रष्ट्री कविरन्यव्यवहारवित्।
अपथ्यसेवी रोगी च कियद्भिर्नोपहस्यते ॥२॥

दूसरों का मुख देखनेवाली नारी, लोगों के व्यवहारों को नहीं जानने वाला कवि, कुपथ्य सेवनकरने वाला रोगी [रोग रहने पर भी रोग बढाने वाली चीज सेवन करने वाला], ये कितने आदमियों से नहीं हँसे जाते? अर्थात् ये तीनों सब ही से हँसे जाते हैं।

२० नवम्बरतः २७ पर्यन्तं वाराणसेय संस्कृत-संसदस्तत्वावधाने समायोजितया श्रीकालिदाससप्ताह-समित्या कालिदाससप्ताहसमायोजनं विहितमिति।

प्रकाशक—जयबहादुरसिंह पता:—भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रक—राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर।
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय,
गुरुकुल कांगड़ी

# भारती

प्रमुखं संस्कृतमासिकपत्रम्

ककारपञ्चकबलाद् हिन्दुसंस्कृतिरक्षकः ।
गुरुगोविन्दसिंहोऽयं म्लेच्छवंशमृगाधिपः ॥

वर्षम् ६ }
तृतीयोऽङ्कः
{ मूल्यम्
वार्षिकम् ३) रु०
एकस्याङ्कस्य =

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# विषय-सूची


| क्रमः | लेखाः | लेखकाः | पृष्ठसंख्या |
|---|---|---|---|
| १. | त्यागपत्रम् | श्री शिवशरणझा झांसी | ५१ |
| २. | धर्मशास्त्राणां परमाश्रयिण्युपादेयता | श्री साधूराम एम. ए. | ५२ |
| ३. | आसुरी आकांक्षा | श्री वासुदेव शास्त्री, शोलापुरम् | ५४ |
| ४. | चिन्ताकुलो लेखकः | श्री गणेशरामशर्मा झालावाड | ५६ |
| ५. | अस्य युगस्य बञ्चनाचातुर्यम् | श्री कृष्णदत्तशर्मा शास्त्री, आगरा | ६१ |
| ६. | पं लक्ष्मीकान्तनाडकर्णीमहोदयानां संस्कृतभाषणम् | | |
| ७. | भारतीयानां मन्त्रविद्याविज्ञाने ह्रासः | वैद्य मणिरामशर्मा श्रीगंगानगर | ६५ |
| ८. | गीतामृतं पीयताम् | श्री परशुरामशास्त्री, डीडवाना | |
| ९. | सम्पादकीयम् | | |
| १०. | जनसम्पर्कसमारोहस्य परिचयः | | |


---

## संस्कृतसेवकानां कृते सुवर्णावसरः ! प्रतियोगितात्रयम्

देहलीवास्तव्यैः श्रीकैलासचन्द्रमहोदयैः 'भारती' पत्रिकायै लघुकथा-एकाङ्किनाटककविताप्रतियोगितानामायोजनाय १७८) रूप्यकाणां राशिः प्रदत्तः। अल्पेन स्वकीयव्ययेन सह भारती एताः प्रतियोगिता आयोजयितुं वाञ्छति।

१. भारते भारताद् बहिश्च निवसन् कोऽपि नरो महिला वा प्रतियोगितायामेतस्यां भागं ग्रहीतुं क्षमाः।

२. लघुकथायाः एकाङ्किनाटकस्य कविताया वा (एकस्य कस्यचन) प्रेषणं भारतीकार्यालये पौषपूर्णिमामनुल्लंघ्य कार्यम्। तदनन्तरं लब्धा कृतिर्नाभिरोच्येत।

३. लघुकथा भारत्याः पृष्ठचतुष्टयात् पृष्ठषट्कपर्यन्तमितकाया स्यात् नाऽतोधिका, न्यूना वा। शब्दसंख्या न्यूनान्न्यूनं सहस्रद्वयात्मिका, अधिकाधिकं च त्रिसहस्रात्मिका भवेत्।

४. एकाङ्कनाटकं भारत्याः पृष्ठचतुष्टयात्सप्तपृष्ठपर्यन्तं विस्तृतं भवितुं शक्यं, शब्दसंख्या एकसहस्रं सहस्रद्वयं।

५. कविता प्रशस्यरूपेण वीररसप्रधाना न्यूनान् न्यूयं दशपद्यात्मिका अधिकं च त्रिंशत्पद्यात्मिका स्यात्।

६. लघुकथाप्रतियोगितायां, एकाङ्किनाटकप्रतियोगितायां च लब्धप्राथम्याय विदुषे प्रत्येकम् एकपञ्चाशद्रूप्यकमितो द्रव्यराशिः द्वितीयस्थानमधिगतवते च प्रत्येकं पञ्चविंशतिरूप्यकाणि ससम्मानं प्रदास्यन्ते।

७. कविताप्रतियोगितायां सर्वप्रथम्यमुपेयुषे विदुषे एकविंशतिमुद्राः प्रदास्यन्ते ससम्मानम्।

८. भारतीनिर्णायकसमितेर्निर्णयोऽन्तिमरूपेण मान्यः स्यात्। एतस्यां समितौ त्रयो निर्णायकाः सन्ति।
१—म० म० पं० गिरिधरशर्मा चतुर्वेदः। २—भट्टश्रीमथुरानाथशास्त्री भारतीसम्पादकः।
३—वैद्यराजजयरामदासस्वामी आयुर्वेदकालेजाध्यक्षः।

९. लब्धपुरस्काराः कृतयः, अन्याश्चापि योग्याः रचना भारत्यां प्रकाशमेष्यन्ति।

वयं सर्वानपि संस्कृतज्ञान् सोत्साहं प्रतियोगितास्वेतासु भागं ग्रहीतुमामन्त्रयामहे।

—प्रबन्ध-सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादकः—
देवर्षिकलानाथशास्त्री B. A.
जयपुरम्

प्रबन्ध सम्पादकः—
गिरिराजशर्माशास्त्री

# भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षः ६ } पौषशुक्लप्रतिपत्, सं० २०१२ { अङ्कः ३

## त्याग-पत्रम्

( श्रीशिवशरणझा, झाँसी )

नायं मम दोषो वक्तव्यः, प्रभो, यतस्त्वां त्यजाम्यहम् ।
बहु-बाधाऽऽकुलितो दलितोऽहं हृदि वाञ्छामाधाय ।
त्वामाश्रित्य सपर्यां चरितः सर्वेतरान् विहाय ।
अधुनाऽतश्च प्रतिष्ठे प्रेयो, रिक्त-पाणिरिति चेत् ?
कथमभिधास्ये—'महान् त्वमासी'रिति सित-सुन्दर-काय ! ॥१॥
अभ्यासे निवसन् कटु-कष्टं नक्तन्दिवमनुभवाम्यहम् ॥

भूत-काल-भीरिव चरणयोरानीता किल माम् !
आतङ्कित-मनसा चरणौ शरणीकृतवानभिराम !
अप्राप्यैव प्रसादं तावकमद्य निवर्ते नम्य !
त्वामाश्रयतो वयो व्यतीतं, महिमा जयतुतराम् ॥२॥
न्यासवतं निजमनुरागं स्वेन सहापनयाम्यहम् ॥

अहमथ किञ्चिद् विवक्षुरासं, श्रोतृ-जनस्याभावे—
मनसो भावा मनसि म्रियन्ते दग्ध्वा दुर्गति-दावे ।
दीन-गिरामपि श्रोतारः के जगति मिलन्ति सुखेन
उपेक्षका विधिनैव विरचिताः, सरला ये प्रस्तावे ॥३॥
नि च चेतसि बहु-वक्तव्यं यन्न कदाचिद् वदाम्यहम् ॥

त्वयि चाक्षेपो मम मिथ्या स्यादहं जातु कुर्याम् ।
कश्चिन्नो मम पक्षे ब्रूयाद्, यस्मात्त्वमसि महान् ।
स्वस्वामिनोर्विभेदे कष्टान्मुक्तिर्नभःप्रसूना ।
साम्य-सिद्धये मनसा वपुषा प्रयतिष्ये चाब्दान् ॥४॥
...सिदं कार्यं तावत् शान्तिं नैव दधाम्यह ॥

गच्छाम्यहं, किन्तु कुत्रे-ति किञ्चिन्नो जानामि ।
ज्ञास्याम्यग्रेऽपीत्याशासे नैव, पुरः सर्पामि ।
मधुपायीव पतिष्याम्यसमे ध्वान्तेऽध्वनि चिरकालम्
नैव मिलेदिह शाला काचित् क्षणं यत्र विरमामि ॥५॥
वाञ्छाऽभूत् तव निकटे स्थातुं त्वत्तो दूरं व्रजाम्यहम् ॥

यामिन्यामाकाशे ताराः छवि-रुचिरा राजन्ते ।
यान्ति प्रभाते सत्येवास्तं, नैव दिवा दृश्यन्ते ।
मनोरथा मे मनसि तथोत्पद्यन्ते नाम क्षणाय ।
अभिघातादस्तं गच्छन्तः पीडायै कल्पन्ते ॥६॥
भूत्वाऽभाव-वशे मधु-कालं चिन्तायां गमयाम्यहम् ॥

विश्रुतवैभव, स्वजनोपाहृत-कुसुमावृत-पद-कञ्ज ?
ईप्सित-भावनया लोभनया वशीभूत-जन-पुञ्ज ?
भूतं भय-कारकमासीन्मम भवदपि पुरो विनश्यति
भविश्यतः कल्पनामकुर्वन् इतो यामि निर्बन्ध ! ॥७॥
कम्पित-कायः चिन्तितचेताः त्रातर्भूयो नमाम्यहम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# धर्मशास्त्राणां परमाश्रयिण्युपादेयता

( श्रीसाधुराम एम० ए०, करोडीमल्ल-कालेजे संस्कृताध्यक्षः )

'स्वधर्मे निधनं श्रेयः' इति हि समादिदिशुः धर्मशास्त्राणि प्रत्युत धर्म-निरपेक्षता एव केवलम् अद्वितीया नीतिः साम्प्रतिकविश्वस्येति विचारणास्पदं तावद् एतत्। कोऽवकाशोऽद्यत्वे धर्मस्य धर्मशास्त्राणां वा ?

एवं किल अर्थवृत्ति-परताम् उपगतेऽद्य लोके, का गतिर् विषमाद् एतस्माद् अपाकृष्य पुनरपि जनं जनगणं वा सन्मार्ग आधातुम् ? दीक्षान्तकालेऽनयैवाशङ्कयाऽभिभूत आचार्यः शिष्टं शिष्यम् उपदिशति— "धर्मान् न प्रमदितव्यम्। स्वाध्यायान् न प्रमदितव्यम्।" अस्यार्थः—विषमे (धर्मकृच्छ्रे) समुपस्थिते, न जातु धर्म-स्वाध्यायाभ्याम् ऋते जनस्य संभवत्युद्धारः। धर्मस्वाध्याययोः अथवा धर्मशास्त्राणां लोकाश्रयत्वाद्, अन्यासां सर्वासाम् अपि वृत्तीनां पतनाभिगामित्वाच्च, प्रवचनस्यैतस्योपादेयता शिष्टैः प्रमाणीक्रियते ! तच्छक्यं नु अर्थव्यसनाद् उद्धृत्य धर्मकथा-दरिद्रं कलिं शास्त्राणाम् आश्रयेण पुनरपि संस्थापयितुम् ? इति हि नोऽधुना विचिकित्सा-विषयः।

प्रकृते—द्वयी वृत्तिर् जनस्य दिश्यते, तत्र प्रथमाऽर्थपरा, धर्मपराऽपरा। या वै अर्थस्य, केवलस्यार्थस्य पराकाष्ठा—यथा उ 'केवलाघो भवति केवलादी' इति हि शंसन्ति—स एव पापाभ्युदयः। स एव कालोऽधर्मस्य, दुष्कृतां च विनाशानन्तरं धर्मसंस्थापनस्य धर्मावतारस्य च। एवं च धर्मार्थयोश् चक्रपरम्परा प्रवर्तते। लोके धर्मानन्तरम् अर्थ-युगम् अपेक्ष्यतेऽर्थानन्तरं च धर्म-युगम्।

उक्तं च धर्म-शास्त्रेषु, काव्याख्यानेतिहासेषु च यद् आदौ धर्म एव जगताम् अनुशासको बभूवेति। अयं च चतुष्पाद् वृषो लोकं धारयामास—'स दाधार पृथिवीम् उत द्याम्'—कृते चतुष्पाद् भूत्वा, त्रेतायां त्रिपाद् भूत्वा, द्वापरे द्विपात्, कलावेकपात्। अथ यदाऽस्यायम् एकोऽवशिष्टः पादः कथा-शेषतां प्रयाति, तदा किल लोकोऽर्थ-वृत्त्याः परावृत्य धर्मं प्रत्युन्मुखो भवेत् !

राजा प्रजापतिर् वै अस्य धर्मस्यावशिष्ट एकः पादो, यतो ह्यसौ 'धर्मवृद्ध' इति संज्ञां गृह्णाति। 'धर्मपाल' इति च दण्डस्यापरः पर्यायः कोशेषु दृश्यते। इयं चानुश्रुतिः शान्तिपर्वणि भीष्म-पितामहानां च मुखात् प्रसृता समाम्नायते—आदौ तावद् धर्मो राजा बभूव। अनन्तरं मत्स्य-न्यायेन प्रवृत्ताः प्रजा मिथो निश्चिक्यिरे "कमपि दैवशक्ति-संपन्नं पुरुषं 'स्वयं-वृत्य' प्रजापति-रूपेण व्यवस्थार्थम् अभिषिञ्चाम" इति। ब्राह्मणाः किलैतस्यां राज-व्यवस्थायाम् अदण्ड्या बभूविरे, दुष्टो राजाऽथ ऋषिभिर् दण्डार्होऽमन्यत। प्रकृत-धर्माद् अपगते, राजधर्मस्य प्रवर्तनाव्यवस्थे कौटिल्यार्थशास्त्रे समुपदिष्टे, समं ब्राह्मण-क्षत्रियादीनां 'स्वधर्म'-'आपद्धर्म'-प्रभृति-विभाग-दर्शनादिभिः। इत्थं कलियुगे साम्प्रतम् इह-पर-लोक-विषयकं निखिलम् अपि धर्म-कर्म-जातम् अर्थशास्त्र-समाख्यया प्रस्तूयते। ते हि नो दिवसा गताः– ते हि धर्म-दिवसा गता इति, यतो हि धर्मार्ह इत्यपरा संज्ञा ह्यस्तनस्य कालस्य !

अपरं च—कलहो वै अद्यत्वे कलेः परमो धर्मः। धर्मक्षेत्रं कुरुक्षेत्रत्वेन परिवर्तते। सदाचारिणोऽपि विभज्य युयुत्सवः संपद्यन्ते। अन्यथा धर्मक्षेत्रेऽस्मिन् भारते वर्षे (आर्यावर्ते) सत्यस्यैव धर्मापर-पर्यायत्वात् सुकरम् इदं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



समाधातुं यत् सत्यमेव परमो धर्मः समम्नयतेत्यत्र याज्ञवल्क्योपनिषत् प्रमाणम्—

"स नैव व्यभवत्। तच्छ्रेयो रूपम् अत्यसृजत धर्मम्। तद् एतत् क्षत्रियस्य क्षत्रं यद् धर्मः। तस्माद् धर्मात् परं नास्ति। अथोऽबलीयान् बलीयांसम् आशंसते धर्मेण यथा राज्ञा। एवं यो धर्मः सत्यं वै तत्। तस्मात् सत्यं वदन्तम् आहुर् धर्मं वदतीति। धर्मं वा वदन्तं सत्यं वदतीति। एतद्ध्येवैतद् उभयं भवति।"

सत्येनोत्तभिता भूमिः—इति च वेदेषु ऋषिभिः क्रान्तदर्शिभिर् दृष्टम्। सत्यं वाचि प्रतिष्ठितम्। वाग् एव धर्मस्याधिष्ठात्री देवी मातेव, यावद् इतरथा—अहिंसा, श्रद्धा, मैत्री, दया क्षान्तिः, तुष्टिः, पुष्टिः, क्रिया, उन्नतिः, बुद्धिः, मेधा, तितिक्षा, ह्रीः—इति त्रयोदश भार्या मूर्त्तयश्च धर्मस्योपसंख्यायन्ते। चतुर्दशैते गुणा धर्मस्य, अन्यत्रात्मनो गुणा उच्यन्ते। एवं दृष्टे आत्मनो धर्मेणैकीभावः, यो वै स्वः (आत्मा) स एव धर्मः—अर्थात् 'स्वस्य च प्रियम् आत्मनः' इति हि तुरीयं लक्षणं धर्मस्य मूलात् प्रसूतम्। अस्य निष्कर्षः—स्व-भाव एव धर्मः।

एतद् एव तथ्यं भगवतो बुद्धस्य बालकथासूपनिबद्धम्। सत्यान् न प्रमदितव्यम्। धर्माश्रयिणः सत्या वाक् प्राणेभ्यापनुदति व्यापदम्, इत्यादि वाक्यं पुरस्कृत्य तथागतस्य ताभिस्ताभिः कथाभिः परिपुष्टा जातक-माला, वस्तुतो धर्मनीतिकथामालैव।

चतुर्वर्ग-फलप्राप्तिर् नरस्य जीवन-लक्ष्यम् इवोपदिश्यते। तत्र का व्यवस्थाऽर्थ-काम मोक्षाणाम्? अर्थ-कामौ तु सामान्येन प्रवर्तेते एव नन्तर्येण। तयोर् अन्यतरस्मिन् आत्यन्तेनासक्तिः काम-वृत्तिः। वैपरीत्येनाऽनासक्तिर् मोक्षः। धर्मार्थयोर् उभयोर् अपि मध्ये यथा कामोपभोग-संगतिः स्यात् तत्र कौटिल्याचार्या उपदिशन्ति—"धर्मार्थाविरोधेन कामं सेवेत। न निःसुखः स्यात्। समं वा त्रिवर्गोऽन्योन्यानुबन्धी। एको हि अत्यासेवितो धर्मार्थकामानाम् आत्मानम् इतरौ च पीडयति। 'अर्थ एव हि प्रधान': इति कौटिल्यः। अर्थमूलौ हि धर्म-कामौ।"

अर्थ-मूलौ हि धर्म-कामौ—कथं वाऽयमुपदेशः साधारण-जनायाद्यत्वेन रोचेत? एष वै ऐहिकप्रधानायाः कलिवृत्तेः सत्यं स्व-धर्मः। एनाम् एवार्थनीतिं कलियुगस्य युगधर्ममिव धर्मावताराः श्री-गाँधि-महात्मानः समम्नयन्त एषु शब्देषु रामराज्याभिधानेन—सत्य-अहिंसा-अर्थ-शुचिता-स्वदेशिता-गृहोद्योग-हरिजनसेवा-इत्यादिभिर् आधारैर् उत्तभितां लोक-यात्राम् उपदिश्य स्वजनेभ्य एष एव युगधर्मो 'विश्वम् एक-नीडम्' इति बुद्ध्या 'विश्व-प्रेम'-नाम्ना प्रख्याय धर्म निरपेक्षो मानव-धर्म इदानीं प्रवर्तते। वेदा आहुर् 'मनुर् भव' अर्थात् मनुष्यो भव।

एवं किल धर्मे लोक-यात्रा प्रतिष्ठिता विप्रकृष्टान प्रजानां, विप्रकृष्टस्य च प्रतिजनस्य। का विधा जनजनम् उपागमय्य समाज-व्यवस्थाधारेणैकत्र समाम्नातुम्? तत्र यथा किल न समाजः प्रवर्तते विना गृहाश्रमं, न वै धर्मव्यवस्था प्रवर्तते ऋते गृह-धर्माद् ऋते सह-धर्माद्—ऋते सह-धर्मिण्याः! एषा वै धर्मोपनिषद्, एषा वै धर्मस्य गृहस्थाश्रमरूपता।

धर्म एष यो गृहस्थाश्रमः। सत्यमित्यपर-नाम्ना धर्मोऽत्र गृहपतिः। अहिंसा तस्य धर्मचारिणी गृहिणी। यथा उ गृहाश्रमिणौ दम्पती गृहमेधाग्निना निरग्नीन अन्याश्रम-वासिनः सर्वानपि पोषयतस् तथैव सत्यहिंसे संकल्पाग्निना दीक्षिते पृथिवीं लोकाचारं चोत्तभ्नीतः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# आसुरी आकाङ्क्षा

( पं०वासुदेवशास्त्री बागेवाडीकरः, साहित्याचार्यः, काव्य-वेद-तर्क-तीर्थम्, शोलापुरम् )

"आः का यूयम् । कस्या अयं परिग्रहः । अपसरतेतः । अस्माकं महादेवी विभावरी अत्र विवत्सति । कापि ग्रामेऽन्यदाश्रयस्थानं समाश्रीयताम्" । इति वादिनीं दासीं विलोक्य नचिरादेव तत्रागत्य कृतवासा कुलूताधिपपत्नी यशोधरादेवी साकूतं साश्चर्यं पृच्छति—"अयि भद्रे, का त्वम् । का च तवेयं महादेवी । न वयमन्यत्र जिगमिषामः । तव स्वामिन्येव गच्छतु क्वापि" । इति ब्रुवाणायां तस्यां स्वयमेव तत्र समागता विभावरी महाराज्ञीं वीक्ष्य क्षणमिव विलक्षिता तस्थौ । झटित्यात्मानं व्यवस्थाप्य महादेव्याः पादयोर्न्यपतत् । अब्रवीच्च—"देवि, इयं युष्मद्दासी विभावरी" । तदवस्थां तां विलोक्य यशोधरा बभाषे—"अये विभावरि, किं त्वं महाराज्ञी सञ्जाता" । सा प्रत्युवाच—"जना मामेवं वदन्ति" । साऽपृच्छत्—"कथमिव" । सा च पुनर्ब्रूते—युष्माकं प्रधानामात्यो मे भर्ता संप्रत्यस्य देशस्य राज्यासनमधितिष्ठति । देवि, किं करोमि का गतिः । तेन यथा राजसिंहासनं समासादितं तदुच्चारयितुमपि वाणी मे न प्रसरति । सतीधर्मवशात् सर्वमेतन्मया सोढव्यम् । अरिमन्त्रवशगेन महामन्त्रिणा राज्यमधिगतम्" । इति । इदं वज्रपातसमं दारुणं वचो निशम्य परमविस्मिता यशोधरादेवी प्राह—"अस्माकं प्रधानामात्यो विश्वासभङ्गं कृतवान् इत्यत्र न मे मनो विश्वसिति । न वा कोऽपि श्रद्दध्यात् । अधुना महाराजस्य का वार्ता । कथ्यतां सत्वरम्" । इति वदन्तीं चिन्ताकुलमानसां महाराज्ञीं प्रेक्ष्य नितान्तं सन्तोषं मनसि दधाना सा दुष्टाशयाऽलीकं शोकावेगं प्रदर्शयन्ती प्रत्यब्रूत—"अम्ब, सुगृहीतनामधेयस्य तत्रभवतो महाराजस्य करुणकरुणं घोरतमं वृत्तान्तं निवेदयितुं न मे जिह्वा प्रवर्तते" । इत्येवं ब्रुवाणां तामाक्षिप्य यशोधरा सावेगं समगिरत् । "न खल्वत्याहितं देवस्य" । सा कथयति—न केवलमत्याहितम् । अवज्ञानमपि । सावज्ञं महाराजस्य वधो जातः" । इमामशनिपातविषमां वार्तां श्रुत्वैव सा कुलिशाघातभग्नात् पादपाल्लतेव सपदि भूमि

---

गृहे गृहि-गृहिण्योर् धर्मदुघा वेदिः । यज्ञे देवपूजा-संगतीकरण-दानैर् देवाधानम् । धर्म-दीपिका, धर्म-चारिणी, धर्म-गृहिणी—इति च पत्न्या अपर-नामानि श्रूयन्ते ।

वेदेपूपनिबद्धं सकलमपि ऋषि-दृष्टं गृहस्थस्य परं प्रमाणम् । धर्म-साक्षात्काराद् ग्लायद्भ्योऽवरेभ्यः स्मृतयः, स्मृतिभ्यः परायद्भ्यः सदाचारः—'यद् यद् आचरति श्रेष्ठो लोकस् तद् अनुवर्तते,' परत्र 'सतां हि संदेहपदेषु वस्तुषु प्रमाणम् अन्तःकरण-प्रवृत्तयः ।' एतद् एव धर्मस्य स्वम् ।

धर्मार्थाद् परावृत्य धर्म-ध्वजा धर्म-लिङ्गिनश् छद्मिनो धर्म-बहिरङ्गम् एव धर्म-सर्वस्वं कृत्वाऽसि-पत्रेणैव धर्मप्रचारेण लोक-यात्रां दूषयामासुः । काले काले धर्मावताराः प्रमाण-पुरुषा दिवो भुवम् अवतीर्य अर्थ-वृत्त्या उदात्तीकरणेन धर्मं पुनर् अवस्थापयामासुः । दूषिताम् अर्थवृत्तिं ततो धर्मानुदानेनाऽपरेऽर्थावतारा निर्णेज इव पुपुविरे । बुद्ध इव धर्म-कायास् ते प्रतिष्ठां स्मृतिं च लेभिरे । इति हि लोकस्य सतीत्वं यद् एतान् महाभागान् स्मृतिगतान् सर्व-कालीनान् इव स्मारं स्मारं प्रेरणां लभते, भूयो-भयश् च स्वात्मानं धारयते ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ततः परिजनप्रयत्नात्प्रकृतिमापन्ना सा विभा-
वर्यादे। ततः परिजनप्रयत्नात्प्रकृतिमापन्ना सा विभा-

रीप्रेरिता स्वभर्तारमनुगन्तुं प्रवृत्ता। अनुगमने कृत-
तां विलोक्य सकलोऽपि परिवारः शोकार्णवे मग्नः।
निश्चलमानसां तां स्वोद्यमाच्चालयितुं न कोऽपि
शशाक।

तदनुरचितां प्रज्वलितां चितां संपादितसहगमन-
विधाना गृहीतसौभाग्यवायनाभिः सुवासिनीभिः सत्कृता
सोत्साहं सानन्दं यावत् प्रविशति तावत्कोऽपि परि-
व्राट् सम्राडिव शतशो दण्डकमण्डलुधारिणां काषायवा-
ससां संन्यासिनां कुलेन परीतः कुतोऽप्यागत्य सहसा
ज्वालावलीढां चितामुत्पतिष्यन्तीं तां महाराज्ञीं न्यरौ-
त्सीत्। अवादीच्च—"नायं विहितस्ते चिताप्रवेशो
भर्तरि जीवति सति। नेदं सहगमनं प्रत्युतात्मघातः।
कमलं महापातकेनानेन"। एतद्वचःप्रतीता सा राज्ञी
चिताप्रवेशादात्मानं निवारयन्ती समीपगताभि-
र्ज्वालाभिः प्रज्वलितवासाः दग्धावयवा निःसंज्ञा भुवि
पपात।

अथ तथाभूतां तां तत्परिचारिकाभिः शिबिकामा-
रोप्य वनमनाययत। तत्र चाल्पैरेवाहोभिर्व्रणारोपणो-
पचारेण दाहव्रणोपशमनेन सा नीरोगतां नीता। अथै-
कस्मिन् दिवसे सर्वेषां विरक्तानां मध्ये प्रोच्चासनमधि-
ष्ठितः स परिव्राट् पत्युर्जीवतो वृत्तान्तं जिज्ञासमानां
यशोधरां यथार्हमासने समुपवेश्य तत्रभवतो महाराजा-
धिराजस्य सकलमुदन्तजातं तस्यै न्यवेदयत।

अयि भोः प्रियपाठकाः, केयं विभावरी? कैषा
महाराज्ञी? एवं तस्या व्यापादनेऽनुगमननिमित्तेन
विभावर्याः को वा हेतुः? इत्येषा महती समुत्कण्ठा
युष्माकं मनसि समुत्पन्ना स्यात्। तत्सर्वं कथयामि।
सावधानं समाकर्ण्यताम्—

आसीत् पुरा किल दयादाक्षिण्यादिनैकगुणगणा-
लङ्कृतो नयेन प्रजापालनतत्परो यशोवर्मा नाम कुलूतानां
भूपालः। एकदा दिग्विजयं संपादयता तेन मलयनरपते-
र्महाग्रहस्य युद्धे हतस्य सर्वस्वमपहरता रूपसंपन्ना पितृ-
विहीना मलयराजदुहिता समासादिता। आनीय च
साऽन्तःपुरमध्ये विनिवेशिता। अनाथा राजदुहितेति
कृत्वा राज्या यशोधरया दुहितृनिर्विशेषं पोषिता पालिता
च। गच्छता कालेन सा यौवनमुपारूढा। यौवनेन
सार्धं प्रवृद्धा सम्राज्ञीपदाभिलाषा तस्याश्चेतसि बलवत्
पदमकरोत्। प्रवृद्धकामा सा जातु रहसि महाराजस्य
पुरतः स्वकामनां व्यवृणोत्। सम्राजा चावधीरितपरिण-
यप्रार्थना सा सपदि प्रतिजज्ञे यत् "कुलूतानां सम्राज्ञी-
पदमनधिगम्य नाहं स्वस्था भवामि"।

अनन्तरमल्पैरेवाहोभिः प्रधानामात्यस्य सिंहनादस्य
द्वितीयपत्नी परलोकं गता। स चानपत्य आसीत्।
दारकस्य कारणात् स पुनर्दारग्रहणं चिकीर्षतिस्म।
सर्वैर्विशेषतो महाराज्या प्रतिषिद्धाऽपि विभावरी साग्रहा
स्वयं तेन वृद्धेन निजमनोरथावाप्तिसाधनेन समं परि-
णिनाय।

अथैकदा राज्यलोभाकृष्टैर्हूणैस्सह प्रवृत्ते कुलूतानां
घस्मरे समरे सम्राजा प्रत्याख्याता तत्पूर्वमत्रमानं मानसे
सुचिरं समुद्वहन्ती विभावरी रिपूणां साहाय्येन वैरं
निर्यातयितुं राज्ञीपदं च समधिगन्तुं निरचिनोत्।
निजकपटप्रबन्धे स्वभर्तारमनुकूलयितुं कञ्चिदुपायं
योजयामास। एकदा एकान्तेऽरिप्रतीकारोपायचिन्तने
निमग्नमानसं स्वपतिं निभृतमुपगम्य प्रेम्णा स्कन्धे
निहितपाणिर्मधुरया वाचोवाच—"रिपुमर्दनः प्रजाधर्षण-
त्राणपरः आर्यपुत्रो भार्याधर्षणत्राणमपि न चिन्तयति।
किमुत प्रेमसम्भाषणम्। यद्येवं परिणयस्तु किमिति



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



विहितो न जाने"। इत्युक्त्वा किञ्चिदिव प्रकटितप्रणय-कोपा नातिदूरे भूम्यां समुपाविशत्। अननुभूतप्रणय-चेष्टोऽमात्योऽनया प्रणयिन्याः प्रणयचेष्टया प्रणयाकुलितहृदयो बभूव। यदुक्तं च—

"सुभाषितेन गीतेन युवतीनां च लीलया।
मनो न भिद्यते यस्य स योगी ह्यथवा पशुः"॥

तेन हि स तां यथा यथाऽनुनेतुं प्रावर्तत तथा तथा तस्याः प्रणयकोपः समधिक एव प्रवृद्धो दृष्टः। अन्ततः कथञ्चिदनुनीता सा वशंगतं पतिमधिकतरमेव वशमानेतुमेवं निजगाद—"नाथ, मम धर्षकस्य नामश्रवणेनालम्। श्रुत्वापि भवान् न किमपि प्रतिकर्तुं शक्नोति"। ततः स प्राह—"प्रिये, कथय तं नामधेयतः। येन प्रतिकर्तुं नूनं शक्नुमः। कुलूतानां प्रधानामात्यः स्वभार्याधर्षणं न कदापि सहिष्यते। को वा तादृशो जगति तिष्ठति यं दण्डयितुमसमर्थोऽहम्। न कोऽपि मां सामर्थ्येऽतिशेते। सत्वरं कथय तम्। येनाचिरादेव तस्य शिरो मे खड्गेन लूनं भुवि पतितं द्रक्ष्यसि"। एवं वादिना प्रवृद्धमन्युना पत्या भूयोभूयः सनिर्बन्धं पृष्टाऽपि सा कुटिला कुटिलप्रबन्धं न चिरेण वक्तुं प्रचक्रमे—"जीवितेश, यदहं विवक्षुस्तत् ते न रोचिष्यते। अपि च तं दण्डयितुं त्वं न शक्ष्यसि। तथापि यदि ते निर्बन्धः कथयामि। श्रूयताम्। कुलूताधिपस्तव सम्राट कामयते माम्। अभीक्ष्णं रहसि मामुपलक्ष्य प्रणययाचनां कुरुते। मया सह रन्तुं प्रयतते। अद्य यावत् कथमपि मया स्वशीलं रक्षितम्। इत ऊर्ध्वं तथाकर्तुं सर्वथाऽसमर्थाऽहम्। कलत्रत्राणे भवतः समय एव नास्ति। एवं प्राप्ते प्राणत्याग एव वरं न जीवनम्"। इति निवेद्योच्चैः प्रारोदीत्। अनेन परमविस्मितोऽमात्यः क्षणमिव विचार्य गभीरया वाचा ब्रूते—"विभावरि, अशक्यमेतत्। महाराजो नैतादृशः। प्रथितं किल तस्य चरितं जगति। नैतत्तत्र लक्ष्यते। न वा कोऽपि विश्र-स्याच्छपथशतेन कथितमपि"। एवमादि ब्रुवतस्तस्य वचनमाक्षिप्य सा तमुक्तवती—"नाथ, प्रथममेव सङ्कल्पितं मया, मयि न ते विश्वास इति। परमेतदेव पृच्छामि तस्मिन्नुपकारिणि मिथ्यारोपेण मे को वा लाभः। किं मामीदृशीं कृतघ्नां गणयत्यार्यपुत्रः। भवतु। प्रत्यक्षीकरोत्वद्यैव भवान्। "राजकार्यवशादद्य सायं निभृतं ग्रामान्तरं गमिष्यामि। श्वः प्रत्यागन्तास्मि"। इति मिथो राज्ञे निवेद्य निगूढं मन्दिर एव तिष्ठ भवान्। ततस्तवानुपस्थितिं समुपलभ्य नूनं स निशीथ एकाकी मन्मन्दिरं समागमिष्यति। ततो मे वचनं प्रत्यक्षमेव भविष्यति भवतः। अनन्तरागारात् सर्वं विलोक्यताम्। नान्तरोपस्थातव्यं भवता"। इति। अमात्येन 'तथा' इति प्रतिपन्नं तस्याः कुलटाया वचनम्।

अनन्तरं कपटनाटकपटीयसी सा विभावरी स-दासीमुखेन साम्राजं रहसि विज्ञापितवती—"तात युष्माकमियं बालिका भवद्वचनमननुरुध्यमानाऽद्य स्वचापलस्य फलमनुभवति। गलितयौवनो जरठो भर्ता सदैव मां साधुवृत्तामन्यथा शङ्कते। संप्रति न मे जीविताशा। मरणात्प्राग् भवद्दर्शनमपेक्षते मे चेतः दर्शनेनानुगृह्यतामेषा दुहितृकल्पा बालिका मुग्धा अद्यैव मध्यरात्र एकाकिना भवता मन्दिरं मे समाग-न्तव्यम्। प्रतिपालयामि भवदागमनम्"। इति। अनेन संदेशेन भूपतेश्चित्तं किञ्चिदिव संभ्रान्तम्। विचार्य तेन यथाप्रार्थितं स्वदर्शनं तस्यै प्रतिश्रुतम्।

यथाप्रतिपन्नं पृथ्वीपतिरेक एव निशीथिन्याममात्यभवनं प्राप्तो दास्या तया निर्दिश्यमानमार्गो विभावर्या मन्दिरं प्रविष्टः। समागतं नृपं वीक्ष्योत्थिता निर्विण्ण



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



…तां करे धृत्वा प्रेम्णा नृपतिः स्वसमीप उपवेशय… —"अलमत्यादरेण । स्वकन्यकागेहे नेष्यत… विधमातिथ्यं पित्रा"। विभावरी तु नेत्राश्रूणि चेला… प्रमृजन्ती मन्दं मन्दमुवाच—"किं ब्रवीमि । …ञ्चितं हि वक्तुं न मे वाचा प्रवर्तते । चेतस्याहित… …यो मे भर्ता पितृसन्निभं भवन्तं बलवदाशङ्कते । …सह सम संभाषणादिकमनपहरन्तीं मां सततं विप्र…ते । उपपादयन्तीं चापि सदैव प्रताडयते । भवदङ्क…ताऽहं दर्शनं भाषणं च कथमिव परिहर्तुं पारयामि । …पुंश्चलीं मन्यमानः सततं निर्भर्त्सयति पतिः । एवं…यां दशायां जीवनान्मरणमेव वरम् । कृतनिधन…याऽनेन चरमेण भवद्दर्शनेन भृशमनुगृहीतास्मि"। …ब्रुवाणैव समीपस्थां कक्षां झटिति प्रविश्य द्वारं दृढं …तवती । मरणव्यवसायात्तां नियंस्यन् भूमिपालो…ल्या चिरं कपाटं प्राहरत् । परं सा न द्वारमुद्घाटि…ती, न वा किञ्चिदपि प्रत्युत्तरं प्रदत्तवती । अन्ते …शतां गतः प्रतिनिवृत्तः ।

अनन्तरप्रकोष्ठे स्थितोऽपि ध्वनिप्रवेशप्रतिबन्धक…श्रुतसंवादः सिंहनादः काचमयेन गवाक्षमार्गेण …ण केवलेन प्रेक्षणेनैव "सत्यमेव सम्राट् स्वकामिनीं …यते । मम ग्रामान्तरगमनं निशम्य तया सह रन्तुं …मन्दिरं प्रविष्टः । पतिव्रतया स्वभार्यया कथमपि स्व…ं रक्षितम् । तया यत्कथितं तत्सर्वमवितथम्"। …लोक्य क्रोधाध्मातोऽपि दयितावचनान्निरुद्धचेष्टो …षधिरुद्धवीर्यो भुजग इवान्तर्भृशमतपत् ।

अथ निर्याते नृपतौ स वृद्धो युवत्या अगारद्वारं …गत्य तया द्वारमुद्घाटयामास । ततो रमणीवशग…वञ्चितः स वृद्धमन्त्री तत्प्रेरितो रिपुसाहाय्येन स्व…मिनमुद्धर्तुं निश्चिकाय । स स्थविरः स्वराज्यनिष्ठां परित्यज्य, राजकुले भक्तिविशेषं दूरीकृत्य, स्वकर्तव्यं च विस्मृत्य स्त्रीबुद्धिः "निःसंशयं तव वचनं करिष्ये" इति तस्यै प्रत्यश्रृणोत् ।

अथ बहुधनप्रदानेन हूणैः संधाय जातु सा विभावरी विभावर्यां कयाञ्चित् तत्सैनिकप्रवेशं निगूढं नगरे कारयित्वाऽनवधानतया सर्वे कुलूतसैनिकाः सहसा ग्राहिताः । सर्वत्र नगरे स्ववशगान् रक्षापुरुषान् स्थापयित्वा सकलं राज्यतन्त्रं स्वायत्तीकृतम् । अनन्तरं राजवधं चिकीर्षन्ती सा निभृतं राजगृहं प्रविष्टा । प्रथममेव विदिततत्कपटप्रबन्धो राजगुरू राजमन्दिरं प्रविश्य मूलसैनिकै रक्षितमवरोधं सुरङ्गया नगराद्वहिः सुदूरं प्रेषयामास । तदनु च राजशयनागारं गत्वा गाढप्रसुप्तं भूवल्लभं प्रबोध्य नगरममित्रायत्तं श्रावयामास । आनीतानि च वस्त्राणि समर्प्य प्राह—"राजन्, राजवस्त्राण्यपतार्यैतानि च वासांसि परिधायास्मात् स्थानादविलम्बितमपक्रम्यताम् । पूर्वमेव मया परिवारः सान्तःपुरो मूलबलाभिरक्षितोऽपवाहितः"। इत्याभाष्यानिच्छन्तमपि तं धरणीधरं ततो बलान्निष्कासितवान् । निर्गतमात्र एव राज्ञि प्रविष्टा सा तत्र पुरोधसं वीक्ष्य राजानं चानवलोक्य व्यर्थश्रमत्वात् कुपितोज्जगर्ज । "रे ब्रह्मन्, क्वास्ति ते भूपतिः । दर्शय । नो चेत् त्वमचिरादेव न भविष्यसि"। इत्युदीर्य कृपाणपाणिस्तं हन्तुं प्रवृत्ता । तथाऽऽयान्तीं तां स सदर्पमाह—"रे कुटिले, अलमनेन साहसेन"। तस्य तेन वचसा वर्चसा च क्षणं स्तम्भिता सा किञ्चिदिव विचार्य "गृह्यतामयम्" इति सेवकानादिदेश । अनन्तरं कस्यापि शिरोविहीनं शवमुपलभ्य "पुरोधसाऽनेन राजवधो विहितः" इत्युद्घोष्य तं कारायां रुरोध । तदनु च राजविहीने शून्ये राजसिंहासने प्रजानुमत्या स्वभर्तारं स्थापयामास । इत्थं च तया सम्राज्ञीपदमधिगतम् । चिराच्च सम्पन्नमनोरथाऽऽत्मानं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कृतकृत्यं मेने। संचारिताश्च तया सर्वत्र राज्ञो राजपरिवारस्य चा वेषणाय नानाव्यञ्जनाः प्रणिधयः। आत्मनः सम्राज्ञीवैभवं दर्शयितुकामया तया राज्ये सर्वत्र सञ्चारो विहितः। पथि तु यदृच्छया महाराज्ञीं यशोधरां विलोक्यालीकां भूपतिनिधनवार्तां श्रावयित्वाऽनुगमननिमित्तं तस्या अपि मरणं साधयितुं प्रवृत्ता।

राजधान्या अपक्रान्तो नरपतिरङ्गनाजनविरुद्धेन तादृशेन विभावरीचरितेन चकितचकितोऽप्यनिमित्तेन प्रधानामात्यस्य तथाविधेन विश्वासभङ्गेन परं विषादमुपगतोऽसुरत्नं सुरत्नं विरक्तवेषं विधाय निभृतं तत्र तत्र संचरमाणः संगृहीतैर्गृहीतविरक्तवेषैर्वीरजनैरनेकशतसंख्यैः समं पौरेषु जानपदेषु चामात्येऽरुचिं वर्धितवान्। संचरणशीलः स चितां प्रवेष्टुकामां महिषीमकस्मादवालोकयत्। न्यरौत्सीच्च। संप्राप्तशरीरस्वास्थ्यां तां जीवतो महाराजस्य श्रवणेन स्वस्थमानसां विधाय समुचितावधिना तद्दर्शनेन च भाविना तां विरक्तवेषधारी समाश्वासयत् अवासयच्च प्रच्छन्नं क्वापि गिरिगुहायाम्।

अथैकदा प्रजासु समुत्पादितोपजापः स विरक्तप्रमुखो राजवधापराधं निमित्तीकृत्य शूलमारोप्यमाणं राजगुरुं शुश्रूषुवान् प्राणव्ययेनापि स्वस्वामिनः प्रियचिकीर्षया प्रयतमानैः प्रच्छन्नवीरैः शतशो विरक्तैः सार्धं कुलूतराजधानीं संप्राप्तः। यदि सत्यमेव राजगुरुणा महाराजस्य वधः कृतः, ततोऽयं महानधर्मः। अस्मादृशैर्वि कैरपि धर्मप्रवणैः प्रजाजनैः सहास्य विमर्शोऽवश्यं कार्यः। अस्मिन् विषये नोदासीनैर्भाव्यम्"। इत्युद्घोष्य तेन महती धर्मसभाऽऽकारिता। तत्र च नैके धर्माचार्याः, निखिलाः पण्डितप्रवराः, सशिष्या मुनयः, सकला विरक्तपुरुषाः, एवमादयः सहस्राणि जनाः संमिलिताः। विभावर्यपि सामात्या समुपस्थिता। राजगुरुरपि समुपस्थापितः। सर्वानुमत्या स च विरक्तप्रमुखः सभाध्यक्षपदे नियुक्तः। ततः प्रचलितायां न्यायसभायां 'राज्यलुब्धेन राजगुरुणा प्रबलेन शत्रुणा संधाय राजगृहं निभृतं प्रविश्य नः सुगृहीतनामधेयस्य महाराजस्य वधो विहितः। तदनु च स्वानुचरैस्तस्योत्तमाङ्गमपहारितम। गूढद्वारवेदिना तेनैव नगरे शत्रुबलप्रवेशः कारितः। विदितशत्रुबलप्रवेशया महाराजस्य प्रबोधनेच्छया राजभवनं प्रविष्टया मया सर्वमेतत् प्रत्यक्षीकृतम्। अनेनैव राज्ञोऽवरोधजनोऽप्यदर्शनतां नीतः। एतासां सर्वासामनर्थपरम्पराणामयमेव मूलकारणम्। इति कृत्वैष प्राणदण्डेनायोजितः। न्याय्यमेतत्"।

इत्थं विभावर्यां निवेदिते राजगुरुरब्रवीत्–"अयि भोः प्रेष्ठाः सभाध्यक्षाः, गरिष्ठाश्च सभोपस्थायिनः, अलीकं सकलमेतत्। बाल्यात् प्रभृति सम्राज्ञीपदलंघनोत्सुकैयमेवास्य महतोऽनर्थस्य निदानम्। यदा महाराजेनास्याः पाणिग्रहणमवधीरितं तदाऽनयैव बुद्ध्याऽमुया वृद्धामात्येन सह परिणयो विहितः। ततः, "महाराजो मां कामयते। बलाच्च रन्तुं रहसि प्रवर्तते"। इत्यादिनाऽनृतवचसा महामन्त्रिणो मनसि संशयः समुत्पादितः। तं च प्रत्याययन्त्या निशीथे सम्राडाहूतः। अविदिततत्कपटप्रबन्धः स च ऋजुमतिस्तदागारं रात्रौ प्रविष्टः। प्रविष्टमात्राय तस्मै "तव महामन्त्री मां दुःशीलां मन्यते। आवां च सदैव शङ्कते। एवमपमानितास्ताऽहं जीवितमुत्स्रक्ष्यामि"। एवमादि निवेदितम्। ततोऽत्र तत्संवादोऽनन्तरकक्षास्थोऽमात्यः पूर्वमेवाहितसंशयो मनसि सानुक्रोशं वात्सल्यात् तां वक्षसि कृत्वाऽनुनयन्तं भूपतिमन्यथाऽमंस्त। तां च सर्वथाऽनुमेने। स्वाधीनपतिकामेनां निगूढं नगरेऽरिप्रवेशं कारयित्वा राजवधप्रवृत्तां विदित्वा राजमन्दिरं प्रविश्य प्रधानं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# चिन्ताकुलो लेखकः !

विद्याभूषणः पं० श्रीगणेशरामशर्मा, साहित्यरत्नम्, ज्योतिषोपाध्यायः,
हिन्दीसंस्कृताध्यापकः, श्रीराजेन्द्र-इण्टर-कॉलिज, झालावाड़ (राजस्थानम्)

सत्यं शिवं सुन्दरं
कव्यं कथमन्यथानुभवतः सत्यं शिवं सुन्दरं
र्मस्पृक् च मिथो विरोधि सहसा तथ्यं च पथ्यं वचः ?
त्वग्राहिणि ! मा विमुञ्च तरलं दाहि प्रमाणाधिकं
न्ते, लेखनि ! हा !! मषीविषमहो !!! चिन्ताकुलो लेखकः ॥

स्वभावत एव ये निसर्गसिद्धाः क्रान्तिकारिणो रिवर्तनकराः साहित्यस्रष्टारो भवन्ति लेखकास्ते सहैव गूढाभिप्रायवन्तो गम्भीरविचारकाश्चिन्तनशीलाश्च भवन्ति । कवयस्तु भुवि भावुका अनुभूतिप्रवणा ललितकलितानन्तकल्पनालोके यथेच्छं स्वच्छन्दं विचरन्तोऽभिनवां भुवनमोहिनीं नव्यां निर्मितिं विधातुं कोमलानि, मधुराणि, सरसानि च काव्यानि प्रतिभोन्मेषाद् भावोन्मादवशाच्च सृजन्ति । परं लेखको भूतकालीनं सर्वं करतलस्थामलकवज्जानन्नपि, वर्तमानजगज्जालसूत्रतन्तून् सूक्ष्मं विवृण्वानोऽपि, स्वानुभवसिद्धान् विचारान् सिद्धान्ताश्रयप्रौढान् लिपिबद्धान् कुर्वन् लोकानामात्मनश्च भविष्यन्निर्माणे सावधानं विमृशन् भास्वरमक्षरं च साहित्यं स्रष्टुं चिन्तयति ।

कवयः क्रान्तदर्शिनो लेखकाश्च प्रत्यक्षं सूक्ष्मं निपुणं च पश्यन्ति किन्तु लेखकाः कल्पनापेक्षया स्वानुभवं बहुमन्यन्ते । सुदूरदृष्टयः परिणामदर्शिनोऽपीमे लेखकाः सदा सर्वदा सर्वतः सर्वजनैरनुभूयमानान् गूढान् गम्भीरानतिप्रौढान् विचारान् सटीकं, सटिप्पणं, मर्मस्पृक्, स्पष्टं च व्याख्यान्ति । अथ पुनः कविरात्मनो लोकस्य चान्तर्मानसमनुरञ्जयन्, आनन्दाह्लादसुखवादं समाश्रयति, मनोविनोदं च वितनुते । परं लेखकधुरीणो जगत्प्रपञ्चव्यवहारे जायमानाः सर्वा अपि मानसीर्वृत्तीर्निपुणं बुध्यन्नानन्दातिरिक्तं तिक्तं कट्वनुभवमपि याथार्थ्येन विश्लेषयन्नुपदिशति जनेभ्यो न्यायनीतिरससारसर्वस्वम् । तत्त्वमीमांसां विधत्ते, राष्ट्रधर्मान् प्रवक्ति, समाजचेतनोद्बोधं जागरयति, विचारविमर्शादानप्रदानसौकर्यं निर्दिशति, जीवनोत्कर्षसाधनाध्यव-

---

वरोधजनमपवाह्य वेषान्तरं कारयित्वा भूमिपालं मतिसत्वरं हठाद्राजभवनान्निष्कासितवान् । अनं तत्र प्रविष्टेयमनधिगतभूपतिर्मां न्यगृहीतवती । या नान्येन वा केनापि राज्ञो वधः कृतः" । इति विरतवचसि तस्मिन् सा कुटिला सकोपं प्रोवाच-ऽपि कृतागा आत्मानं निरागसमेव प्रतिपादयति । कृतं दुष्कृतं चान्यस्मिन् पातयति । आस्तां तावदेवम् । यदुक्तमनेन तत्सर्वमनृतम् । अस्माभिर्निर्णीदण्डो युक्त एव । अलमन्यथा विचार्य" । एवं भाष सा सभाया निर्यातुं प्रावर्तत ।

अत्रान्तरे सभाध्यक्षो झटिति निजवेषं परित्यज्य रूपं प्रकटितवान् । तदनु सकला अपि विरक्ताः स्वं रूपमाविष्कृत्य शस्त्रपाणयः कृतकसम्राज्ञीं तस्या नुयायांश्च सपदि न्यगृह्णन् । तत्क्षणं सम्राजं विजज्ञुषी सकला क्षणमिव स्तम्भिता हर्षोत्फुल्ला चासीत् । त्यन्तु सर्वमेतत्स्वस्मरणीचरितं संदृश्य सव्रीडः सम्राचरणयोर्न्यपतत् । तं च क्षमामयाचत । न केवलममा परं विभावर्या अप्यपराधो महान् भूभुजा क्षान्तः । सर्वेऽवदन्—"अहो स्त्रियाश्चरित्रम्" !!



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri



सायं दृढयति, राजसमाजतन्त्राणि परिष्करोति, साहित्यसेवामर्यादां संस्थापयति, वाङ्मयविस्तारं तनुते, शांतिसन्देशान् वितरति, क्रान्तिवह्निज्वालास्फुलिङ्गकणान् विकिरति, भ्रान्तिमज्ञानं च निवारयति।

लेखको यथार्थवादमात्मनः कर्तव्यं निश्चित्य प्रजानां जीवनयात्रासु प्रकृष्टं दिग्दर्शनं, पथः प्रदर्शनं च करोति। स खलु 'हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्' इति तत्त्वतो जानन् तत् सत्यमपावृण्वानः सत्यज्योतिःसाक्षात्कारं कारयितुं प्रचेष्टते। लेखको दर्शनिको, विज्ञानवेत्ता, नेता, समाजसुधारकोऽन्यायद्रोही, ध्रुवमिदमित्थमिति ब्रुवन्, स्फुटवादी लोकान् कर्तव्येषु नियुङ्क्ते। साहित्यसेवाव्रतमाचरन् सर्वजनसमीहितं साध्नोति, विचारसम्पदं सुरक्षति, चिन्तनशीलानां जनानां मार्गनिदर्शनं विदधाति, योग्यकर्मानुष्ठानाय प्रेरयति च सक्षमान् मनुजान्। अतश्चिन्ताकुलो भवति लेखकः!

'कथमहं लेखकः स्याम्?' इति सर्वादौ समुदेति चिन्तनशीलता लेखकमस्तिष्के! लेखकत्वसिद्ध्येऽसौ शिक्षां समाश्रयति, भूतकालीनैर्वर्तमानैश्च लेखकैर्विचारकैश्च सहात्मनो मानसं विचारविनिमयसम्बन्धं परोक्षं प्रत्यक्षं च संस्थाप्य तदनु लेखनोपादानसम्पदं सङ्गृह्णीते। रहस्यमयं, विचित्रं, विभिन्नवृत्तिवृत्ताकारप्रकारं जगदेतत् सूक्ष्मं निरीक्ष्य तत्स्वरूपं वास्तवमनुभवशक्त्याभिव्यङ्क्तुमुत्सहते, प्रवर्तयति चात्र कर्मणि द्विजिह्वां कुशलां लेखनीं, पञ्चाङ्गुलीनामैक्यसाधनया खल्वेकाग्रतासमाधियोगमभ्यस्यति! कविर्जगतः सौन्दर्यं व्यावर्णयति, परन्तु लेखकः सारासारौ विविच्य निर्मथ्य च मनीषामात्मनोऽनुभवसिद्धानव्यभिचारिणोऽभिप्रायान् व्यनक्ति। सत्यं, तथ्यं, पथ्यं च तत्त्वं मीमांसितुमुल्लसति लेखकस्ततोऽसौ सावधानः सतर्को जागरूकश्चिन्ताकुलश्च बोभूयते!

साहित्यपरिष्कारं कुर्वाणोऽपि च लेखको हंसक्षीरन्यायमाश्रयन् समालोचयति निर्भीकम्, विकृतां समाजव्यवस्थामनुदारां कार्यपद्धतिं प्रति क्षोभमात्मनः प्रकटयन्नपि नवनिर्माणाभ्युपायान् प्रस्तौति, समुन्निनीषते लोकानां जीवनस्तरोन्नतिविषये स्फीतां, विशुद्धां, प्रबुद्धां च दृष्टिम्, भ्रष्टाचारान् रुणद्धि, लेखन्यग्राङ्कुरे राजनीतितन्त्रधुरमुत्तोलयितुमुत्सहते। एकान्ते निवसन् सुखं स्थिरमासनं निषद्य नेतृत्वं प्रौढं व्यक्तित्वं च कामयते निष्कामम्। सिद्धासनः सिद्धलेखनीको लेखकः किल सर्वजनशिक्षादीक्षासंस्कारदाने स्वस्याचार्यत्वमुत्तरदायित्वं सुयोग्यं मन्यमानो राष्ट्रस्याग्रदूतत्वमभिलपति, दुर्धर्षां विचारक्रान्तिमभूतपूर्वां प्रवर्तयति, लोकविप्लवं स्थगयति, प्रजानामभ्युदयं, क्षेमं, कुशलं, कल्याणं, सुखमारोग्यं, स्वास्थ्यं, मङ्गलं, श्रियं, सम्पदं, विद्यां, शांतिं च कामयमानश्चिन्तयति गभीरमुपायांस्तांस्ताञ्छुभोदर्कान् प्रयत्नान्, सार्वजनीनोत्थानवादांश्च श्रयति। ततोऽसौ मर्मस्पृक् वदति, प्रभाव तुष्टमाचरति, निष्पक्षपातं निर्णीते, स्वमनोमन्थनसम्भूतं वाङ्मयं सारभूतं नवनीतमिव प्रयोगशतसिद्धं सञ्जीवनं रसायनमिव वितरति प्रजानां पुष्टये तुष्टये च!

सत्यसिद्धान्तान् समाश्रयँल्लेखको राष्ट्रसमाजसाहित्यसेवासाधनविधौ सर्वस्वार्पणमात्मोत्सर्गं बलिदानं च समर्थयते! रूढिवादं तिरस्कुर्वन् अपि त्रिकालाबाधितां सनातनीं मर्यादां समभिरक्षितुं प्रयतते, व्यक्तिपूजामपमन्यमानोऽपि गुणविशिष्टेषु महामानवेषु सेवासपर्यां समाचरन्मोमुद्यते, श्रद्धाजडत्वमपाकुर्वाणोऽपि देशभक्तिं भजति, तन्त्रशैथिल्यमाक्षिपन्नपि सहयोग-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अस्य युगस्य वञ्चनाचातुर्यम् !

श्रीकृष्णदत्तशर्मा शास्त्री, बी० आर० ट्रेनिंग कालेज, आगरा

द्वे नार्यौ वस्त्राणि क्रेतुमगच्छताम्मयराष्ट्रनगरे (मेरठ) एकस्मिन् वस्त्रापणे। तत्र प्रसिद्धवस्त्रविक्रेतुरे-स्य समीपे गत्वा ते अतिष्ठताम्। ते तत्र दृष्ट्वा सः वणिक् उवाच "मातरौ ! किमिच्छथः ?"

एकाह—"क्षौमवस्त्राणि क्रेष्याव:। अतस्तान्येव दर्शनीयानि।"

वणिक—(असंख्यानि बहुमूल्यवस्त्राणि तयोः सम्मुखे संस्थाप्य) "यानि वस्त्राणि युवाभ्यां रोचन्ते तानि ग्रहीतव्यानि।" ताभ्यामनेकानि बहुमूल्यवस्त्राणि गृहीतानि। वस्त्राण्यादाय तयोरेकोवाच—वस्त्रादाना-त्पूर्वं गुरुजनानामाज्ञा विचारणीया। अतो मया गृहं गन्तव्यम्। श्रुत्वेदं सानुमोदिता तेन वणिजा। सा सखीं पुत्रवतीं तत्रैव विहाय तानि वस्त्राण्यदाय ततोऽगच्छद् गृहम। बहुकालो जातः। परन्तु सा नायाता। सा पुत्रवती नारी निजसखीमनागतांदृष्ट्वा तं वस्त्रक्रेतारमवदत्—"न जाने किम् घटितम् ? यन्नायाता सा ? मया सा प्रतीक्षिता, परञ्च नायाता। अतो मया ज्ञातव्यन्तस्या अनागमनकारणम्।" इदमुक्त्वा सा स्वपुत्रं तत्रैव स्थापयित्वा तं वस्त्रविक्रेतारमवोचत्—पुत्रोऽयम्मे शेतेऽत्र। ममानुपस्थित्यामसौ यदि विनिद्रो भवेत्तदा त्वयायम् रक्षणीयः।" ततो गता च सा।

होराद्वयं जातं परञ्च नैकापि समायाता तयोः। नापि स शिशुरेव प्रबुद्धोऽभवत्। तदा सः बणिक् संशयारूढो जातः। सः तस्य शिशोर्मुखाधानमपसार्य तं दृष्ट्वा चोच्चैः प्रारोदीत्—अकथयच्च—"हा ! हा ! हतोऽस्मि, वञ्चितोऽस्मि ताभ्याम्। नायं शिशुः। नायं जीवितो बालः। अयन्तु 'रबड़' इत्याख्यस्य द्रव्यविशेषस्य 'बबुआ' अस्ति।

( २ )

कलिकातानाम्नि नगरे लब्धप्रतिष्ठो वर्तते एकः स्वर्णकारः। तस्य व्यापारो विदेशेष्वपि विस्तृतोऽस्ति। तस्मिन्नेव नगरे श्रेष्ठ्यप्येको निवसति। तस्य श्रेष्ठिनः पत्नी व्यवहारकुशलातीव धूर्ता चास्ति। तयोः मुद्राः राजकीयमुद्रागारे (बैंक) न्यस्ताः सन्ति।

एकस्मिन्नहनि सा स्त्री मुद्रागारे गता। तया लक्ष-द्वयात्मिकाः मुद्राः गृहीतास्ततः। मुद्रादाता कर्मचारी तया तासाम्मुद्राणां क्रमाङ्कान् लिखितुं प्रार्थितः। तेन कर्मचारिणा क्रमाङ्काः लिखिताः तासाम्।

अन्यस्मिन् दिने स्वर्णकारस्यापणे पुरुष एकः अमूल्यानि रत्नानि क्रेतुमागाम। तेनामूल्यानि रत्नान्यनेकानि दृष्टानि। तेषु तेन कानिचिद्रात्नानि निर्वाचितानि, येषाम्मूल्यं लक्षद्वयं जातम। पुरुषस्तं स्वर्णकार-

---

...नां दृढयति, नवनिर्माणोत्साहे साहसं निदधदपि ...परायणतामधिनायकत्वमेकाधिकारं, विचारसङ्कीर्ण-...न्धविश्वासं, वर्गसङ्घर्षवाद, कूटज्ञतां, मिथ्याप्रवादं, ...रण्यं, प्रमादमालस्यं, दुःशीलत्वं, चारित्र्यदौर्बल्य-...द्धत्यं, देहाभिमानं, भौतिकार्थवादांश्च समूलमुत्पाट-...तुं प्राणपणं चेष्टते ! सभ्योऽपि, सुसंस्कृतोऽपि, ...र्मोऽपि, मनुष्यताभक्तोऽपि, मर्यादामनुपालयन्नपि, ...लोऽपि, व्यग्रतारहितोऽपि च सदासर्वदा जगद्धिताय ...न्ताकुलो भवति लेखकः !!!



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# पं०लक्ष्मीकान्तनाडकर्णीमहोदयानां संस्कृतभाषणम्

संस्कृतविश्वपरिषदः द्वितीयाधिवेशने राष्ट्रपतिभिः राजेन्द्रप्रसादशर्मभिः प्रतिपादितम्—"अस्माकं संस्कृतिः साहित्यम् प्रादेशिकभाषाः कलामतप्रभेदाः इतिहासाश्च इत्येवं संपूर्णजीवनं संस्कृतज्ञानेन विना अस्मदर्थं अबुद्ध-अज्ञात-प्रहेलिका इव स्थास्यति।" इति। पं०गाडगिल-शर्मभिः च एकस्मिन् समये कथितं—स्वसंस्कृतिपरिचयार्थम्, तत्संवर्धनार्थं, जीवनशुद्ध्यर्थं चारित्र्यसंवर्धनार्थं,भाषाविकासनार्थं न केवलं एतावदेव, परंतु राष्ट्रैक्यसाधनार्थमपि संस्कृतस्य विद्यते अत्यावश्यकता, अनिवार्यत्वेन अध्यापनम्, यत् सांप्रतं उपेक्ष्यते इति। महाभागैः राष्ट्रपतिभिः गाडगीलवसन्तशर्मभिः च अस्मिन् संदर्भे मे मतैक्यं विद्यते।

संस्कृतवाङ्मयमहोदधेः सम्यग्मंथनेन न केवलं वेदब्राह्मणोपनिषत्स्मृतिइतिहासकाव्य-इत्यादीनां ज्ञानमुपलभ्यं किंतु वर्ण-लेखनव्याकरणव्यवहारज्योतिषवैद्यकधर्मपुराणवस्तुशास्त्र-अंकगणितबीजगणितभूमिति-अर्थशास्त्रराजनीति इत्यादीनां संन्निपातमपि संपादयितुं शक्यं भवति। एवंविधायाः सर्वाङ्गसुन्दरभाषायाः महत्त्वस्मरणात्प्रश्नः समुत्पद्यते, अनया भाषया व्यवहर्तुं वक्तुं शक्यं अशक्यं वा। वेदकालिकी भाषा सुलभा

---

मकथयत् यदि त्वं रत्नविक्रयस्य प्रमाणपत्रं (रसीद) ददासि तदा तु द्वयोरेव हानिर्भविष्यति। मया 'विक्रयकरः' तथा त्वया 'आयकरो' दातव्यः स्यात।

तेन हेमकारेण सोऽनुमोदितः। उवाच च त्वया सम्यगुक्तम्, एतदेव करणीयम्। कृतमप्येवमेव ताभ्याम्। पुरुषः सः विना विक्रयपत्रमादाय रत्नानि गृहीत्वा, लक्षद्वयात्मिकाः मुद्राः दत्वा च यानारूढो (मोटरकार) भूत्वा गृहं प्रत्याजगाम।

तदैका स्त्री रत्नानि क्रेतुमागमत्। तयापि लक्षद्वयमूल्ययुक्तो रत्नहार एकः क्रीतः। तया विक्रयपत्रम लब्धुमिच्छया स स्वर्णकारस्तद्दातुमादिष्टः। तेन विक्रयप्रमाणपत्र दत्तम। प्रमाणपत्रं स्वायत्तं कृत्वा सा यानारूढा जाता। यातुं समुद्यता सा तेनावलोकिता। स तस्या रत्नहारमूल्यमैच्छत्। परन्तु तयोक्तम्—"मया मूल्यम् दत्तम्।" सः कथयन्नासीन्न दत्तन्त्वया।

तयोः कलहो जातः। सा तं भर्त्सयन्ती तत्र राजपुरुषाणामुपस्थितिमैच्छत्। राजपुरुषाः आययुः। तैः स्थितिः परीक्षिता। सा तु कथयन्ती आसीत् मया मूल्यं दत्तम् परन्तु स कथयन्नासीन्नानया दत्तं किञ्चिदपि। तयोक्तम्—मया लक्षद्वयं रूप्यकाणां दत्तम् येषाम् क्रमांका अपि सन्ति इमे। तया क्रमांकाः आख्याताः। तै राजपुरुषैर्निवेदिता सा दातुं प्रमाणम्।

निवेदितन्तया—"मयाद्यैव लक्षद्वयात्मिकाः मुद्राः राजकीयमुद्रागारान्निष्कासिताः, तत्र तासाम् क्रमांकाः कर्मचारिणा अनुलिखिताः। ता एव मुद्राः मयास्मै दत्ताः। ताः वर्तन्ते कोषे अस्य। भवद्भिरन्वेषणीयाः।" तैः तथा कथितं लक्षद्वयमन्वेषितम्। तथा तासाम्मुद्राणाम् क्रमांका अपि तैः राजमुद्रागारात्परीक्षिताः। त एव क्रमाङ्काः आसन् यत्क्रमांकाङ्किताः मुद्राः तत्रासन्। सः स्वर्णकारस्तैर्धृतस्तथा कारागारे प्रेषितः। सापि गृहं जगाम।

यद्यपि तया न दत्तं किञ्चिदपि, परञ्च तस्य स्वर्णकारस्य पार्श्वे नासीत् किमपि प्रमाणपत्रम्। पुरुषोऽसौ, येन विना विक्रयप्रमाणपत्रं मूल्यं दत्त, रत्नानि च गृहीतानि, स आसीत्तस्याः स्त्रियाः पतिः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



…त्रिमा च। दिनेषु गच्छत्सु वृद्धिं गतव्याकरणशास्त्र-…ारदानां पाण्डित्यप्रकर्षात्, नूतनधातुसाधितैः शब्द-…ैश्च वेदकालीनभाषायाः रूपान्तरं अनिवार्यं…म् पाणिनेः नियमबंधनात् अस्याः भाषायाः संस्कृत…संज्ञा जाता। दंडिनः काव्यादर्शे पुनरपि इयं हि…। आर्यावर्ते प्रचलिता हि संस्कृतभाषा। न केवलं…पीठेषु विद्वद्गोष्ठीषु वेयमुपयोजिता किन्तु इतरे…अपि संस्कृतभाषायां व्यवहारं कुर्वाणाः आसन्।…केषु स्त्रियः हीनपात्राणि च प्राकृतस्य उपयोगं…। संस्कृतभाषाप्रवीणैः भाषाप्रकर्षः सामाजिक-…र्थिक-उच्चतरस्थानं प्रतिष्ठा च समासादिता। इतरेषां नीचस्थानसमुत्पन्नः मत्सरः वृद्धिं गतः। पाश्चात्त्यदेशेषु …लेटिनभाषायाः ईदृशी एव स्थितिः। धर्म.मंडलस्था…धप्रदर्शिका आंग्ल-फ्रेंच-इटालियन इत्यादयः तत्र…भाषाः समुत्पन्नाः। भारते कालक्रमेण क्रांतिकारकः…भाषाणां उद्गमः। संस्कृतभाषायाश्च क्रमेण…हारे लोपः अनिवार्यतया समभूत्। परन्तु प्राचीन-…भाषायाः अस्याः सापेक्षत्वं युक्तस्वरनिर्गतिः अंन्त्य-…योजना च प्राकृतभाषासु दृश्येते। आद्यबौद्धिक-…यानपद्धतिग्रंथाः प्राकृतभाषायां रचिताः। महायान-…तिग्रंथास्तु संस्कृतभाषायाम् प्राकृतशिलालेखेषु अपि, …चित् संस्कृतभाषायाः अन्तर्भावः। प्रायेण तु प्राकृत-…णां विकासः वर्णमालासु दृग्गोचरः। अपभ्रंश-…रसेनी-मागधी-अर्धमागधी-महाराष्ट्री-पैशाची-अवंती…दय. 'प्राकृतभाषा व्यवहारे संरूढाः। तासां…पं न विभक्तिकार्यप्रचुरं किन्तु वाक्यपदपृथक्कृतिमयम्। …कृतभाषाविकासप्रारम्भकालात् नवशतकानि पूर्णानि। …विधरूढेः बलात् निर्मूलनं अद्य अशक्यमेव। …श्चात्त्यदेशेषु लेटिनभाषायाः ईदृशी एव स्थितिः।

केवलं धर्मविधिषु संस्कारकार्येषु क्वचित् न्यायदान-सभासु च केवलं अस्याः उपयोगः। आंग्लभाषालोपात् अस्माकं राष्ट्रभाषा हिंन्दी इति घटनायां निश्चितम्। पूर्वोक्तकारणैः व्यावहारिकदृष्ट्या संस्कृतभाषा राष्ट्रभाषा भवितुं अर्हति इति न संभाव्यम्। किन्तु इदं निःसंशयमेव यत्संस्कृतभाषा संश्रयद्रुमः प्राकृतभाषास्तु लता इव। उक्तं हि- अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी इति। एवंविधमहत्त्वसंपन्नायाः शब्दसंपत्समृद्धायाः संस्कृतभाषायाः ज्ञानं लाभकारकं एव। वर्तमानेन कालेन वर्तयन्ति विचक्षणाः इति साधु वचनम्। तदस्माभिः अनुसर्त्तव्यम्। परिस्थितिं अविचार्य कृतः क्लेशः निष्फलतां व्रजति। परिस्थितिविपर्यासस्तु दुष्कर एव। परन्तु प्रत्यहं उचितषु संस्कृतभाषायाः उपयोगः न शक्यः इति विषादः न कर्तव्यः। संस्कृतभाषाध्ययनं जीवनहितवर्धकं लोकयात्रार्थसाधकं लोकसंग्रह-समाज-धारणवृद्धिकारकं निर्विवादमेव। देववाणीमूल्यमापनं केनापि कविना वर्णितं हि—

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः,
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते,
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥

मङ्गलदेवशास्त्रिभिः भारतीयसंस्कृतेः कानिचिद्वैशिष्ट्यानि प्रतिपादितानि। तानि—आध्यात्मिकी भावना, पारलौकिकी भावना, आत्मसंयमः, मातृसंमाननं, परस्परं विचारसहिष्णुता च भवन्ति। एतेषां परिपालनं अस्माकं कर्त्तव्यम्। भारतीयसंस्कृतिः तत्कालभेदेन तत्तदवस्थितिभेदेन विविधप्राकृतभाषावैपुल्येन च भिन्नापि गङ्गायाः धारेव सततं प्रगतिशीलापि एकसूत्ररूपेण वर्तमाना स्वस्या एकात्मतां पवित्रतां च न जहाति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अत एव भारतवर्षे चिराय प्ररूढासु अनुदारसांप्रदायिक-भावनासु विद्यमानासु अपि तत्वविदो विचारशीलाः विद्वांसः परोक्षप्रियाः देवाः प्रत्यक्षद्विषः इति श्रुतेरादेशमनुसरन्तः इव तेषु तेषु सम्प्रदायेषु व्यापिन्याः एकस्याः भारतीयसंस्कृतेः भावनया एव भावितचित्ताः उदार-हृदयाः सर्वत्र समदृष्ट्या न कुत्रापि सम्प्रदाये पक्षपातिनः भवन्ति न च अन्यायेन कदाऽपि व्यवहरन्ति। परस्परं विचारसहिष्णुता बहुमूल्या। भगवद्गीतायामपि अन्तिमे अध्याये विचाराचारमुक्तिवर्णनं विमृश्यैतदशेषेण यथेच्छसि तथा कुरु। इति।

पं० गाडगिलवसंतशर्मणां प्रचारसाफल्यद्योतकं इदं मंडलं संस्थाप्य युष्माभिः ऐतिहासिके अस्मिन्करवीरपत्तने महत्कार्यं सम्पादितम्। यद्यपि युष्माकं प्रारम्भे स्वल्पक्षेत्रविशिष्टं अधिष्ठानं लब्धं तथापि कालक्रमेण लोकप्रेम्णः विस्तृततरं अन्यस्थानं अनिवार्यमेव स्थास्यति। केलकर-कवीश्वर-गाडगीलशर्मभिः उपलब्धं करवीरपत्तनस्थ-संस्कृतभाषाभिमान-सदभिरुचि-महत्वाकांक्षेतिहासं ज्ञात्वा भृशं प्रमोदितं मे मनः। श्रीमच्छङ्कराचार्यैः स्थापितं करवीरपीठं बहुश्रुतं हि। छत्रपतिभिः शाहुमहाराजैः अपि बहुजनसमाजे वेदविद्याप्रचारकार्यार्थं वैदिकशालागृहं स्थापितं। पं० राशिवडेकर अप्पाशास्त्रिभिः मासिक-मुद्रितसंस्कृत-चन्द्रिका-अभिधान-पत्रिकायाः पुनरुज्जीवनं कृतम्। तथैव सूनृतवादिनी-नाम्नी पत्रिका अपि प्रारम्भिता। पं० बालाचार्यखुपेरकरशास्त्रिणः तथैव आस्थानपंडिताः जेरेशास्त्रिणः विद्यालङ्कारधारिणः। राजाराम-महाविद्यालय-संस्कृतभाषा-प्राध्यापकैः ग. श्री. हुपरीकरैः तथा डॉ. श्रीखंडेभिश्च ग्रन्थलेखनरूपेण संस्कृतवाङ्मयस्य स्तुत्या सेवा कृता। दीर्घप्रवासिनः व्यवहारदक्षाः संस्कृतभाषामर्मज्ञाः, अस्माकं सर्वेषां प्रियाः गाडगीलवसन्तशर्माणः मूलतः करवीर-निवासिनः इति स्वयमेव महादरभावनया प्रस्थापयन्ति। मण्डलस्य कार्यकर्तारः उत्साहपूर्णाः अ...ीकृत-कार्यनिर्वाहनिपुणाः वाङ्मयरसिकाश्च। तेषां सर्वेषां वयं सर्वे उपकृताः स्मः, योग्यं सहकार्यं च दत्वा तेषां सङ्कल्पसिद्धिं वय सुलभां करिष्यामः। तेषां विविधकरणानि पृथक्चेष्टाश्च प्रशंसनीया एव भवन्तु। दैवमपि तेषां नित्यं अनुकूलं एव भवतु इति अस्माकं सर्वेषां श्रीगणेशाय प्रार्थना। दिनेषु गच्छत्सु शाला विश्वविद्यालयेषु छात्राणां संस्कृतभाषायां वर्धमानं अभिरुचिलोपं प्राध्यापकेभ्यः ज्ञात्वा नितरां विषण्णं मे मनः, मया पूर्वं कथितं हि यत् संस्कृत-भाषा सर्वासां भारतीय-भाषाणां संश्रयद्रुमः। तस्य संश्रयद्रुमस्य संरक्षणं अस्माकं सर्वेषां पवित्रं कर्त्तव्यम्। तस्मिन्न भवतु कदापि दोषः। भौतिकव्यवहारेषु नैपुण्यं आध्यात्मिकप्रगति-संहति-शान्तिमूलिका सात्विकवृत्तिप्रधाना संस्कृतिराजनीति—विषयकज्ञानेन इयं भाषा सुसमृद्धा अस्ति। तस्यां प्रावीण्य-सम्पादने छात्रैः कृतः क्लेशः कदापि निष्फलो न भविष्यति। राष्ट्रभाषा-हिन्दी अपि संस्कृतभाषामूलिका एव। संस्कृतभाषायाः ज्ञानेन हिन्दीभाषायां प्रावीण्यं सुलभमेवेति निश्चिततत्वेन प्रतिपादयामि।

पुनरपि अद्य उद्घाटितस्य करवीर-संस्कृत-प्रचारक-मण्डलस्य सदैव शुभेच्छाः दत्वा करवीरनिवासिभिः अस्य मण्डलस्य वृद्ध्यर्थं बद्धपरिकरत्वेन वर्तितव्यं इति आशां प्रकटीकृत्य सुखकर्तारं, दुःखहर्तारं विघ्नघ्नं ज्ञानदायकं श्रीविनायकं नमस्कृत्य—"सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा"। इति च प्रार्थ्य युष्माकं सर्वेषां सुहृदां सावधानमनसा मद्भाषणं श्रुतं इति धन्यवादं कृत्वा—

सा नो माता भारती भूर्विभासतां—इति च प्रेम्णा प्रघुष्य विरमामि अहम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भारतीयानां मन्त्रविद्याविज्ञाने ह्रासः

भिषग्मणि, प्राणाचार्य, वैद्यमणिरामशर्मा गौड़ः श्रीगंगानगर

वेदेषु शास्त्रेषु पुराणेतिहासेषु च मन्त्रविद्यायाः आश्चर्यकरं वर्णनमुपलभ्यते। मन्त्रप्रभावेण ...दिराक्षसा अजेया अभवन्। मार्कण्डेयादि-...णाः मृत्युं तरित्वा अमृता अभवन्। दशरथ-...द्या राजानः पुत्रान् लेभिरे। मन्त्रबलेन सजयः ...नं श्रवणं चाकरोत्। यथा साम्प्रतं आकाशवाण्या ...यो द्वारा] जनाः श्रवणमात्रमेव कर्तुं शक्नुवन्ति। ...नकाले मन्त्रबलेन शत्रून् हन्तुं समर्था आसन्। ...मृतान् जीवयितुमपि समर्था बभूवुः। यदा कलि-...मोहितेन परीक्षिता ऋषिकण्ठे सर्पो निक्षिप्तस्तदा ...ः ऋषिकुमारः परीक्षितं शशाप। तेन च मृतः ...क्षित् सम्राट्। येन सर्पदंशेन नृपः पंचत्वं यातः स ...ः ब्राह्मणरूपं विधाय मार्गे गच्छति स्म। तदा मन्त्र-...महाविद्वान् काश्यपः मिलितः। विप्रवेशस्थेन ...पृष्टं, भोः! कुतः गच्छन्ति भवन्तः? उक्तं च ...पेन–श्रुतं मया, केनचित् सर्पेण राजा परीक्षित् ...,तेन राजा परीक्षित् मृतश्च। अतः मृतं नृपं पुनः ...णं जीवितं वा विधाय, पारितोषिकरूपेण पुष्कलं ...लप्स्ये।

सर्पेण चोक्तं–किं भवान् मृतं नृपं जीवयितुं ...ः? काश्यपेन बाढमित्युक्तम्। तदा सर्पेण कश्चित् ...ो दग्ध्वा भस्मसात् कृतश्चोक्तं यदि चेत् शक्तिरस्ति ...वृक्षं जीवय। तदुक्तं महाभारते—ततः स विद्वान् ...वान् काश्यपो द्विजसत्तमः भस्मराशीकृतं वृक्षं ...था समजीवयत्। अहो किमाश्चर्यमतः परम्। ...विषचिकित्सा वेदेष्युपलभ्यते यथा—वचोभिः उग्रैः निरिणामि ते विषम्। अथर्ववेदे। इत्यादि बहवः मन्त्राः वेदेषु सन्ति। महर्षिसुश्रुतेन स्वकीयसंहितायां उल्लिखितं–"देवब्रह्मर्षिभिः प्रोक्ता मन्त्राः सत्यतपोमयाः। भवन्ति नान्यथा, क्षिप्रं विषं हन्युः सुदुस्तरं। विषं तेजोमयैर्मन्त्रैः सत्यब्रह्मतपोमयैः। यथा निवार्यते क्षिप्रं प्रयुक्तैर्न तथौषधैः।"

यस्मिन्समये औषधप्रयोगेण विषस्य चिकित्सा विफला भवति स्म, तदा मन्त्रबलेन मृतान् जीवयन्ति स्म। किन्तु वृद्धवाग्भटकाले मन्त्रशक्तिः किञ्चित् शिथिला संजाता उक्तं च तत्र—विषं प्रति विषं योज्यं तंत्रैर्मन्त्रैरसिध्यति–अतीते पंचमे वेगे सप्तमस्यानतिक्रमे, प्रभो र्निवेद्य प्रयते नैव व्याख्याय कस्य चित्। सुश्रुतस्तु यथा मंत्रैः क्षिप्रं विषं निवार्यते तथोषधैः प्रयुक्तै र्न विषं निवार्यते इति मन्यते। किन्तु वृद्धवाग्भट्टः मंत्रैः तंत्रैः निष्फलैः सद्भि विषंप्रति विषं योज्यं, इत्याह। किन्तु भावमिश्रकाले मंत्रशक्तिः सर्वथा विलुप्ता संजाता, अतः भावप्रकाशे विषस्य विषमौषधम् इत्युक्तम्। साम्प्रतं तु मंत्रचिकित्सायाम् विद्वत्समाजे विश्वास एव न। तथापि क्वचिद् क्वचिद् मंत्रचिकित्सकाः महदाश्चर्यं कुर्वन्ति। विंशतिवर्षात् पूर्वं मया पांचालदेशे दृष्टं एकं ग्रामीणं सर्पदष्टं डाक्टरैः परित्यक्तं। एको हरिजनो मृतवत् संज्ञाशून्यं तं ग्रामीणं मंत्रबलेनाजीवयत्।

केचन मंत्रज्ञा इदानीमपि केवलं मंत्रबलेन रुग्णान् निरोगान् कुर्वन्ति, अपुत्रकांश्च मत्रबलेन पुत्रयुक्तान् विदधति। अहो क सा मंत्रविद्या साम्प्रतं अस्माकम्। अधुना तु सर्वत्र आडम्बरं, धर्मविडम्बना दरीदृश्यते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# गीतामृतं पीयताम्

परशुरामशास्त्री, श्रीरामानुजसंस्कृतमहाविद्यालयः डीडवाना, राजस्थान

मा रोदीः, किमहं करोमि विपदां जालैः समन्ताद् वृतः
इत्थं कर्मविपाकमात्मविहितं रात्रिन्दिवं चिन्तयन् ।
कर्मण्येव तवाधिकार इति चेन्निश्चित्य धर्मान्वितम्
कृत्वा कर्म लभस्व शान्तिमतुलां "गीतामृतं पीयताम्" ॥ १ ॥

चाञ्चल्यं मनसोऽवशित्वमपि चेदित्थं गवां बाधते
त्यक्त्वा धर्मपथं च शुद्धधिषणामुन्मार्गगश्चेदसि ॥
भिन्नं चेत्तत्र मानसं धनपरैर्धर्मध्वजैः पातकैः
दूरीकर्तुमशेषदुःखमिवहं "गीतामृतं पीयताम्" ॥ २ ॥

भो! भो मानव मानवोऽस्यनुपमां प्राप्यापि बुद्धिं पराम्
अज्ञानावृतचेतसा बलवतीं यातो दशां पाशवीम् ।
चातुर्यं परिचिन्त्य चेतसि निजं यातः कथं दीनताम्
लब्धुं शाश्वतिकीं च शान्तिमधुना "गीतामृतं पीयताम्" ॥ ३ ॥

विश्वं विश्वमिदं जनार्दनकृतं तेनैव संचालितम्
यत्किंचित्क्रियते जगत्यनुपमं दुःखं यथा वा सुखम् ।
तत्सर्वं तदधीनमेव क्रियते सर्वत्र चास्ते हरिः
कृत्वा कर्मपरां निजां मतिमतो "गीतामृतं पीयताम्" ॥ ४ ॥

---

अपूज्याः पूज्यन्ते, धर्मशास्त्रशून्याः गुरवः गर्जन्ति। रक्तांबराच्छन्ना विषकुंभपयोमुखा धूर्ता जनान् प्रतारयन्ति। पातिव्रत्यधर्मस्य नाममात्रेण नार्यः कुप्यन्ति, समानाधिकारस्य उद्घोष घोषयन्त्यो रोषं प्रदर्शयन्त्यो धर्मनिन्दन्त्यः पुरुषान् प्रति बक्रदृष्टया विलोकन्ते। पाश्चात्यसंस्कृतिसंस्कृताः पुत्राः शिष्याश्च पितरं गुरुं च दूषयन्ति भर्त्सयंति च। अस्माक शासनसूत्रसंचालकाः शासकाः भारतीयं गणराज्यं धर्मनिरपेक्षमस्तीति उच्चैः उच्चरन्तः सन्तः किमपि गौरवमनुभवन्ति। वराकाः सद्वृत्ताः साधवः दीनहीनदशायां युगधर्मं विचिन्त्य क्लेशान् सहन्ते। नीतिधर्मस्य वंधनानि भग्नानि। अनियंत्रितसमाजव्यवस्था प्रतिदिनं अधोऽधा याति। देशे भ्रष्टाचाराः अत्याचाराः अनाचाराः विवर्धन्ते न कोपि किमपि कर्तुं शक्नोति। वलीयसी केवलमीश्वरेच्छा।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

आयुर्वेदश्च वर्तमानभारतं च——वेद–उपनिषत्-पुराणादिभिर्यथा प्राचीनानामार्याणां महत्त्वं सर्वस्मिन् भूमण्डले स्थापितमभूत्, तथैव प्राचीनैः ऋषिभिर्दिव्य-ज्ञानेन सर्वाङ्गपूर्णीकृतः सोयमायुर्वेदोऽपि प्राचामार्याणां महत्त्वं सर्वस्मिन् भूवलये स्थापयामास। एतस्य मूल-तत्त्वान्यादाय अरब-ग्रीसादिप्रदेशेषु भैषज्यतन्त्रस्याऽऽविर्भावोऽभवत् भारते-अरबप्रदेशे च सुतरां सफलस्य आयुर्वेदस्यास्य मूलमादाय पाश्चात्त्यप्रदेशेषु भैषज्य-तन्त्रस्य निर्माणमभूत्। तदिदं न केवलं वयम्, अपि तु स्वयं पाश्चात्यगवेषका अपि स्वीकुर्वन्ति यत् पश्चि-मराष्ट्रेषु प्रसृतस्य वैद्यकतन्त्रस्य आदिमं मूलं भारतीया आर्या एव, इति।

सोयमायुर्वेदो भारतेऽस्मिन् चिरात्प्रसृतो लोकाना-मसाधारणं हितं साधयामास। मद्रास-युक्तप्रदेश-वङ्गादि-प्रान्तेषु आयुर्वेदस्य चिकित्साप्रणाली बहोः काला-ल्लोकानां हितं साधयन्ती, सर्वतः प्रासिध्यत्। राजस्थान-प्रदेशे तु प्राचीनसंस्कृतेःसंरक्षकैर्भारतीयभूपालैर्निजनिज-राज्येषु आयुर्वेदस्य संरक्षणं, प्रचारश्च चिरादक्रियत। तस्य चिकित्साप्रणाली राजस्थानप्रान्ते बहोः कालात् सर्वतः समादरणीयाऽभवत्। अत्र हि शिक्षाविभागे यथा अन्यान्यसंस्कृतविद्यानां पठन-पाठनप्रणाली समा-दरणीयाऽभवत, तथा आयुर्वेदस्य शिक्षाक्रमोपि समस्त-भारते सुप्रसिद्धः समादरणीयश्चाभवद्। जयपुरस्य आयुर्वेदविभागे पुरा मध्यप्रदेश-युक्तप्रान्त-पञ्चाम्बुप्रदेशा-दिभ्यो दूरदूरप्रान्तेभ्यः शिक्षार्थिनः समागच्छन्। किं बहुना नेपालादिसुदूरप्रदेशेभ्योपि जयपुरे आयुर्वेदाऽ-ध्ययनार्थं शिक्षार्थिनः समागच्छन्, सफला भूत्वा स्व-स्वप्रान्ते आयुर्वेदस्य प्रचारं चक्रुः। सुगृहीतनामधेयै-रायुर्वेदमार्तण्डैः श्रीलक्ष्मीरामस्वामिमहाभागैर्जयपुरे आयुर्वेदस्य तथा प्रचारः समुन्नतिश्चाक्रियत यथा भारतस्य प्रत्येकप्रान्ते तेषां महाभागानां शिष्याः, चिकि-त्साप्रणाली च प्रसिद्धाऽभवत्। न केवलं प्राचीनप्रणाली एव तैः प्रचारिता, अपितु वर्तमानयुगे आवश्यकी या किल नवीनशारीरिकविज्ञानपद्धतिः शस्त्रचिकित्सा वाऽपि तैस्तया सह संयोजिता। एवं किल राजस्थाने आयुर्वेदस्य चिरात्प्रचारो लोकेषु सफलतया समा-द्रियते स्म।

प्राचीना आयुर्वेदीया चिकित्सापद्धतिः भारतस्य ग्रामेष्वपि सफला समसिध्यत्। अतएव जयपुरराज्यस्य जनपदेषु, ग्रामेष्वपि आयुर्वेदीया चिकित्साप्रणाली शासनतन्त्रेण प्रचारिताभवत्। ग्राममण्डलेषु राज्यद्वारा नियमिता वैद्या ग्राममण्डलेषु औषधालयमास्थाप्य प्रजानां चिकित्सामकार्षुः। प्रतिवर्षं च तेषां सफलतामुद्वीक्ष्य अस्मिन् कार्ये अधिकारिभिः समुन्नतिरक्रियत। एवमेव अन्येष्वपि राजस्थानेषु प्राचीना सेयं चिकित्सापद्धतिः प्रजानां रोगहरणे सफला स्वीकृताऽभवत्। मध्यदेशे, युक्तप्रान्ते, विहारादिष्वपि सेयं प्राचीना चिकित्साप्रणाली सफलतया प्रचलति स्म, सांप्रतं प्रचलति च। वर्तमानस्य शासनतन्त्रस्य धार्मिकेषु केषुचिद्विषयेषु प्राचीनभारतीय-पद्धत्या सह भवेत् कदाचिद्वैमत्यं, किन्तु आयुर्वेदेन तथा तत्प्रचारितपद्धत्या सह नांऽशतोपि तस्य वैमत्यमिति जानीमः। कांग्रेससंस्था हि भारतीया, भारतीयरीति-नीतीनां पोषिका चेति बहूनां विश्वासः। अथवा यत्कि-ञ्चिदस्तु, किन्तु आयुर्वेदेन सह कांग्रेसीयानां, तथा वर्तमानशासकानां च न नाम विरोधभाव इति निश्चेतव्यं भवति। किन्तु गतमासे अखिलभारतीयस्य



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पाश्चात्त्यायुर्वेदिकसंघस्य [ आलइण्डिया मेडिकल-कान्फ्रेन्स] द्वात्रिंशद्वर्षीयं यत् अधिवेशनमस्मिन् जयपुरनगरे संवृत्तं तस्मिन् आयुर्वेदीयचिकित्साप्रणाल्याः सुस्पष्टं विरोधं दृष्ट्वा महदाश्चर्यमभूत्, चेतसि विश्वासश्च नाऽभवत्। 'कान्फ्रेंसस्य' अध्यक्षपदमारूढेन डा० उकीलमहोदयेन काश्चिदेवंविधा वार्ताः कथिता या हि सुस्पष्टमायुर्वेदविरोधिन्यः। "आयुर्वेदार्थं षट्कोटिमुद्राणां नियतीकरणं द्वितीयपञ्चवर्षीययोजनायां रूप्यकाणां पव्ययः" । 'एलोपैथी'पद्धतेः कृते अधिकाधिकरूप्यकाणां याचनं नाऽनुचितमासीत्। किन्तु भारतीयस्य जनतन्त्रस्य शासनयुगेऽस्मिन् "भारतीयचिकित्सायाः कृते, मुद्राणां व्ययः "निरर्थकव्ययः, नाशो वा ('बरबादी') अस्ति इति कथनं सर्वस्याऽपि भारत–निवासिनः कृते खेदाऽऽवहं, लज्जाजनकं च। "आधु–निकचिकित्सापद्धतिरेव [ अर्थात् पाश्चात्यचिकित्सा-प्रणाली एव] राजकीयाश्रयभुक्ता परिगण्यताम। प्राचीनाऽऽयुर्वेदीयाः संस्थाः, तथा यूनानी, होमियोप्रभृति-संस्थाः सर्वा निरुध्येरन्। नवीनाश्च नाऽग्रे केनचित्परि-चाल्येरन्" इत्यपि वाक्यश्रवणं भारतीयस्य कृते हृन्मर्मविदारकम्। अस्तु, एतस्य विरोधो राजस्थानीयवैद्यक-संस्थाभिः स्थाने स्थाने कृतः। "सद्वैद्यसभा, जयपुर" तः कविराजश्रीदेवदत्तभारद्वाजमहोदयस्य पत्रमधिगतं तद्धि स्थानान्तरे विलोक्येत पाठकैः। एवमेव 'राजकीयायुर्वेदमहाविद्यालयस्य' छात्रसघप्रमुखेन श्रीरमाकान्त-शर्मणा ३० दिसम्बरदिवसे 'राष्ट्रदूते' प्रकटितं वक्तव्यमपि निरीक्ष्येत पाठकमहाभागैः।

एतद्धि विचारशीलानामवश्यं विस्मयमुत्पादयेत् यद् भारतस्य प्रायः प्रतिप्रान्तमेव भारतीयवैद्यकपद्धतेरनुमोदनं जनैः क्रियते। कुर्नूल (मद्रासप्रान्ते) नगरे 'अखिलभारतीय–आयुर्वेदकांग्रेसे' "आयुर्वेदद्वारा कियान् लाभो देशस्य, तदर्थं किं किमायोजनम् राष्ट्रस्य कर्तव्यम्" इत्यादिचर्चाः श्रूयन्ते। किन्तु यद् राजस्थानं भारतीयसंस्कृतेः प्रधानं क्षेत्रम, भारतीयतायाः कृते येन देशेन परस्सहस्राणां मनुष्याणां बलिदानं कृतम्, तस्मिन्नेव राज्ञां जीवनक्षेत्रे भारतीयस्यायुर्वेदस्य विरोधः प्रकाश्यसभासु श्रूयते। अस्तु, देशस्य विवेकिनः शासका भारते जायमानमायुर्वेदस्य असाधारण लाभं विचारपूर्वक विमृशेयुः तथा एतस्य कृते अधिकाधिकं प्रचारसुविधां सम्पादयेयुः।

## अखिलभारतीय–आयुर्वेदकांग्रेसे ( 'कुर्नूल' )

अध्यक्षमहोदयेन सप्रमाणं साधितं यत्–वैदेशिकपद्धत्या निर्मितानि औषधानि जनसाधारणस्य कृते न सुलभानि। केवलमायुर्वेदज्ञाश्चिकित्सका एव जनताया वास्तवसेवां कुर्वन्ति। एतद्धि वैद्यानामेव महत्त्वपूर्णं कर्तव्यं यत्ते भारते उत्पन्नानां वनौषधीनामुपयोगं कृत्वा वैदेशिकौषधानामायातम् ( देशे आगमनम् ) न्यूनं कुर्वन्ति। वैदेशिकौषधानां कृते यो महान् व्ययो भवति तस्य संमुखे वैद्यकौषधानामति स्वल्पो व्ययः। लाभश्च तदपेक्षया दशगुणितः। जनसाधारणस्य स्वास्थ्यलाभाय या देशस्याऽऽवश्यकता तां वैद्या एव पूरयन्ति। अतएव आयुर्वेदविद्यालयानाम्, चिकित्सालयानां च प्रोत्साहनं शासकाः कुर्युरित्यावश्यकं कर्तव्यम्। देशीयौषधानां केन्द्रीयविभागे आयुर्वेदविज्ञस्य विदुषो नियोजनं सुतरां कर्तव्यम्।

सम्मेलनस्योद्घाटनं कुर्वता आन्ध्रप्रान्तस्य सहकारिताविभागस्य मन्त्रिणा श्रीडा०संजीवमहोदयेन सुस्पष्टमुक्तं "यत्—ग्रामीणक्षेत्रेषु चिकित्साकार्यमायुर्वेदस्य सहायतां विना कथमपि न साध्यम्।" इत्यादि।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



"सद्वैद्यसभा, जयपुर" तः प्रहितं कविराजश्री ...देवदत्तभारद्वाजमहोदयस्य प्रकटपत्रम्-- "आल-...इण्डियामेडिकलकान्फ्रेन्स"स्य ३२ तमे अधिवेशने ...ध्यक्षपदात् श्रीडा: उकीलमहोदयेन या वार्ता: प्रोक्तास्ता: ...ष्टमायुर्वेदविरोधिन्यः—

१- आयुर्वेदार्थम् षट्कोटिरूप्यकाणि द्वितीयपञ्च-...वर्षयोजनायां यानि निर्धारितानि सोय मुद्राणां ... 'बरवादी'।

२—आयुर्वेदे 'रोगप्रतिरोधात्मक'साधनानि ...मानानीव।

३—यदि अंग्रेजीस्थाने 'हिन्दी' नियुज्यते तर्हि वयं ...स्य विज्ञानभाषातः पृथग् भविष्यामः।

४—चीनदेशोपि स्वीयां प्राचीनां चिकित्साप्रणालीं ...वान्।

...का याधिवेशनेऽपि प्रस्तावः कृतः—यत् देशस्य ...रः आधुनिकीं चिकित्साप्रणालीमेव राजाश्रितां ...नीं स्थापयेत्। प्राचीनायुर्वेदीयाः, तथा यूनानी-...प्रभृतिसंस्था न स्थाप्येरन्। प्राचीनाश्च ...येरन्।

...सद्वैद्यसभा, जयपुर'स्य विशेषाधिवेशने प्रस्तावः ...भूत्—"यत् प्रान्तीयेन तथा केन्द्रीयेण सर्वकारेण ...आर्तानामुपेक्षां कृत्वा आयुर्वेदीयप्रणाली एव ...नीया। [राष्ट्रदूतः शनिः ३१-१२-५६]

...—'मेडिकलकान्फ्रेन्ससभायाम्' Vital Rob ...yurbeda in Modern Mediene. ...एको निवन्धः अंग्रेजीभाषायाम् श्रावितोऽभूत—...आयुर्वेदे रोगप्रतिबन्धात्मकसाधनानां विशिष्य ...साधितमभूत्। दिनचर्या—ऋतुचर्या—पथ्या-...विवेक—त्रिदोषसिद्धान्त—जीवाणुसिद्धान्त— रसौषधानां महत्त्वं विशिष्य प्रकटितमभूत्। ५०० प्रतयो निवन्धस्यास्य डाक्टरेषु, अंग्रेजीशिक्षितेषु च वितीर्णा अभवत्।

## भ्रमनिराकरणम्

संस्कृतरत्नाकरस्य कार्तिकमासीयाऽष्टमी संख्या सांप्रतमेव नयनगोचरमुपगता, तस्याः संपादकीयलेखे 'अहो वैषम्यम्' इति शीर्षक प्रदाय संपादकमहोदयेन भारतीसपादकोपरि भूयानाक्रोशो विहितः। स्वयं संपादकमहाभाग एव लिखति—"संस्कृतरत्नाकरोऽयं चिराय भट्टमहोदयानामेव सपादकत्वे प्रचलति स्म। साम्प्रतमपि पत्रेऽस्मिन्श्री भट्टमहोदयानां महत्वपूर्णा लेखाः प्रकाश्यन्ते ?" एवं किल संस्कृतरत्नाकरेण सह सर्वथा सुदृढसबन्धे सत्यपि संपादकमहाभागस्य कथमयं भ्रमः समभवद् यत्संस्कृतरत्नाकरस्योपेक्षा भारतीसंपादकेन कृता, इति। अवश्यं किञ्चित्कालात्पूर्वं संमेलनकार्यादिषु परिश्रमबाहुल्येन सारस्वतमहाभागस्य शरीराऽस्वास्थ्यमभूत्। किन्तु कियत्कालात्पूर्वं सारस्वतमहोदयेनैव पत्रे लिखितं यदिदानीमहं स्वस्थोऽस्मीति। एवं शरीरस्वास्थ्ये संपन्नेऽपि कथमकस्मात्सेयं मनोविकृतिः संवृत्ता ? अस्मिन्नन्तराले भूरिभोजनस्य, अन्धकारे भोजनस्यैव वा, कतमः प्रसङ्गः समुपस्थितो यस्मिन् "जीवितमक्षिकानिगरणं" दृष्टं सारस्वतमहाभागेन।

यां 'भारती'संख्यामवलोक्य 'संस्कृतरत्नाकरस्योपेक्षा भारतीसंपादकेन कृता' इति विज्ञातं सारस्वतमहाभागेन, तां पुनरेकवारं पठितुं विज्ञापयामि। तत्र हि वत्सरारम्भनिवेदने सोयं प्रसङ्गो यत्—"वर्तमानसमये नवीनसाहित्यप्रचारस्य का कथा, प्राचीनमपि साहित्यं विलोपोन्मुखम्। पत्राणि विद्योदयादीनि यान्यतिप्राचीनान्यासन् तानि तु लुप्तान्येव। किन्तु तदुत्तरं प्रका-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



शयितुमारब्धानि संस्कृतचन्द्रिकाप्रभृतीन्यपि नाममात्र-शेषाणि"। एवं किल यानि पत्राणि संप्रति लुप्तानि, यैर्वा संकेतपरिवृत्तिः, किञ्चिद्वैषम्यादिकं वा कृतम्, तेषामेव पत्राणां तस्मिन्प्रसङ्गे समभूदुल्लेखः। 'साकेतः' योऽद्यावधि प्राचलत्सोपि संप्रति न दृश्यते" इति विलुप्तपत्राणामेव प्रसङ्गे समभूत्तस्योल्लेखः। 'मधुर-वाण्या' स्थानपरिवृत्तिः कृतेति तत्प्रसङ्गेन तस्याः कीर्तनम्।

तथा च संस्कृतभाषाया वैरल्यदशांदर्शनार्थं विलुप्त-पत्राणामेव समभूत्तत्रोल्लेखः। ईश्वरो मा कार्षीदेवं यत्संस्कृतरत्नाकरस्य भवेत्तत्रोल्लेखप्रसङ्गः। रत्नाकरः संमेलनस्य मुखपत्रम्, वर्तमानपत्रेषु सर्वापेक्षया प्रलः, संस्कृतसेवने सयत्नश्चेति संवर्धयत्येव भारत्याः संपादकस्तमिमम्। अकाण्डे मा भूद्भ्रमो भारत्या उपरि सारस्वतमहोदयस्येति भूयो भूयो निवेदयामि। "हरियाणा शेखावाटी ब्रह्मचर्याश्रमस्य" विषये 'गवेष-णाया ?' तथ्यं परिज्ञाय सारस्वतमहाभागस्य परितोषः प्रादुरभूदिति भूरि भाग्यं भारत्याः।

**काशीस्थानां पण्डितराज--श्रीराजेश्वरशास्त्र द्राविड़महोदयानां भाषणम्** — केनचित्कार्यप्रसङ्गेन महाभागानाममीषां समभूदागमनं जयपुरनगरे। अतएव दिसम्बरमासस्य विंशयां तारिकायां "महाराज-संस्कृतकालेजे", एकविंशयां च 'संस्कृतवाग्विवर्द्धिन्यां' समभूद् भाषणसमारोहः श्रीमताम्। संस्कृतकालेज-सभायां कालेजाध्यक्षैः श्रीचन्द्रशेखरद्विवेदिमहाभागैः स्वागते, सभापतिवरणे च कृते, प्रारभ्यत पण्डितराज-महोदयानां भाषणम्—"वर्तमानकाले देशस्याऽभ्युन्नतये संस्कृतसेविपण्डितमहाभागैरस्माकं प्राचीना राजनीतिः समाजस्याऽग्रे समुपस्थापनीया। वर्तमानकालिका देश-नेतारः सर्वेऽपि पाश्चात्यराजनीति-प्रभावाक्रान्ताः। प्राचीनाऽस्माकं राजनीतिः सर्वाङ्गपूर्णा, देशस्य हिता-वहा च। अतएव देशस्य कल्याणं वाञ्छद्भिः प्राचीना राजनीतिः साम्प्रतं सर्वतः प्रचारणीया" इत्येव सर्वस्य सारः।

द्वितीयदिने [ एकविंशयां तारिकायाम ] संस्कृत-वाग्विवर्द्धिन्यामपि सरस्वतीवन्दनायां कृतायाम, सभा-पतेः प्रधानवक्तुश्च पुष्पमाल्यादिना संमाननायां कृता-याम, प्राक्रम्यत भाषणं पण्डितराजमहाभागेन—"यद् भारतस्य प्राचीना राजनीतिरेव भारतस्य कृते हितावहा। प्रोक्तं श्रीमता यत्—प्राच्यभारतीयानां समाजे केवलो धर्म एव न प्राधान्य भेजे। अपि तु धर्म राजनीती अपि सह शय्यामधिशयाने एव सर्वतः प्रचारणीये आस्ताम्। राजनीतिं विना धर्मः श्रीहीनः। धर्मेण विना राजनीतिर्विधवेव। अतएव द्वयोरेव सहभावे देशस्य हितायेति नीतिग्रन्थानां वाक्यैः साधितमभूत् राजनीतेस्तत्तद्ग्रन्थानां निष्प्रतिरोध तत्तद्वचनोपन्यासैः श्रीमतां मेधायाः पूर्णपरिचयायाऽभूत् येन हि सर्वे विद्वांसः, श्रोतारश्च प्रकामं प्रासदन्। उभयदिने सभापतिपदं 'भारत्याः' सोयं संपादक समध्यतिष्ठत।

---

( पृष्ठ ७२ का शेष )

स्वीकुर्युः। केवलं वचारकं जागरणम् एव न अपिपु जाग्रतसमाजस्य कायिकमानसिकद्रव्या सम्पूर्णाः समर्पणशक्तयः परमपूजनीयगुरूजीमहोदय अनुशासने अस्माभिः स्थाप्येरन्।

अस्मिन्नभियाने सहयोगिनो भूत्वा वयं स्व कात्मतां प्रति तथा च तस्या अनन्योपासकं प्रति प्रकटयेम, इदमेव निवेदनम्।

केन्द्रीयकार्यकारेमण्डल

राष्ट्रीयस्वयंसेवक



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# जनसंम्पर्कसमारोहस्य परिचयः

[ राष्ट्रियस्वयंसेवकसंघसंचालकस्य श्रीमाधव-सदाशिव-गोलवरमहाभागस्य पञ्चाशत्तमवर्षग्रन्थिमहोत्सवे जयपुरादेकेन लिखितोऽयं परिचयोऽस्माभिरधिगतः । पाठकानां प्रमोदायत्र प्रकाश्यते । —सहसम्पादकः ]



...भारते वर्षे को न जानाति परमपूजनीयान् ...' इति प्रसिद्धान् श्रीमाधवरावगोलवलकरमहा-...! राष्ट्रियस्वयंसेवकसंघस्य सरसंघचालकत्वेन ...जीवनतः प्रेरणाग्राहका यथा संख्यातीताः संघस्य ...काः सन्ति तथैव भारतमातुरनन्योपासकत्वेन, ...स्य निरपेक्षसेवकत्वेन राष्ट्रस्य महासंघटकत्वेन, ...दर्शित्वेन च समस्तभारतीयास्तेषां जीवना-...ताः वर्तन्ते ।

...थमं ते "गुरुजी" इति नाम्ना प्रसिद्धिं गत-...काशीविश्वविद्यालयस्य स्वीये विद्यार्थिपरिवारे । ...ला विद्यार्थिप्रियाध्यापका इव ते विश्वविद्यालयस्य ...प्राविशन् । अध्यापनं तु तेषां कुलपरम्परागतैव ...मीन । अतएव यदि तदेव जीवनस्य ...यज्ञातं भवेत् तदा तदस्वाभाविकं न दृश्यते । ...तोः नवसु सन्ततिपु यमेकाकिनं पुत्रं परमेश्वरो ...ारक्षत् तस्याध्यापने एव नियोजनं विधेरिष्टम् ...।

अन्यथा अर्थोपार्जनस्य सामान्याकर्षणं विहाय तथा पितरौ गृहादिकं च सर्वं परित्यज्य रामकृष्णमिशनस्य "सागरगाछी" आश्रमपथस्य पथिकः भवितुं तेषां प्रेरणा कथं भवेत् ?

साधनाय एव ते गृहत्यागिनोऽभूवन् । यस्य महतः कार्यस्य उत्तरदायित्वं भविष्ये तैर्वोढव्यम् आसीत् तदर्थमधुनापि आवश्यकी सिद्धता संपूर्णा नाभूत् । धर्मप्राणमहामनोमालवीयमहोदयानां पावनछत्रच्छायासु अध्ययनाध्यापनानन्तरं स्वामिविवेकानन्दस्य गुरुभ्रातुः स्वामिअखण्डानन्दस्य श्रीचरणयोः साधनां । तत्कृपाप्रसादस्य प्राप्तिरिदानीमवशिष्टा आसीत् । "सागरगाछी" आश्रमे तस्याः पूर्तिरभूत् । किं बहुना स्वस्य एतस्य अलौकिकशिष्यस्य मन्त्रसंस्काराय एव वयोवृद्धाः स्वामिनोऽखण्डानन्दमहाभागाः स्वीयान् प्राणान् धृतवन्त आसन्, यतः एतच्छिष्यसंस्कारानन्तरमेव कतिपयदिवसानन्तरं ते स्वामिनः समाधिस्था अभूवन् । अखण्डानन्दस्वामिनो निर्वाणानन्तरम् तेषामयं शिष्यः मस्तिष्के आध्यात्मिकोन्नतेस्तथा राष्ट्रसेवाया विचारस्य द्वन्द्वं धृत्वा नागपुरम् अगच्छत् । यत्र एको महान् तपस्वी तस्य प्रतीक्षां कुर्वन्नासीत । स च तपस्वी प्रथमत एव अस्य युवकस्य प्रसुप्तां शक्तिं परीक्ष्य स्वीयाङ्गीकृतकार्याय तं मनोनीतम् अकरोत् । आसीत् स तपस्वी संघटनमन्त्रस्योद्गाता राष्ट्रियस्वयंसेवकसंघस्य जन्मदाता डा०केशवरावहेडगेवरः । तदानीं तयोः यन्मेलनमासीद् एका युगपरिवर्तनकारिणी घटना, नास्ति अस्मिन् सन्देहः । केशवमाधवयोः युतिरभूत् । यथा रामकृष्णनरेन्द्रयोः [ विवेकानन्दयोः ] अभूत । डा०केशवरावस्य प्रभावेन संस्पर्शे आगत्य श्रीमाधवस्य अन्तरद्वन्द्वमेकस्मिन् स्थिते समन्वये परिणतं जातम् । प्रारम्भे डाक्टरमहोदयेन सह वादविवादपटोः श्रीमाध-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वस्य जिज्ञासु मनः डाक्टरमहोदयस्य स्वल्पसहवासेन एव स्थिरमभूत ।

तेषां जीवनतत्त्वस्य बोधोऽभूत् । स्वजीवनकार्यस्य साक्षात्कारो भूत्वा तेषां समग्रशक्तयः क्रमशः प्रबुद्धा अभवन् । डाक्टरहेडगेवारस्य निकटसम्पर्के ते अधिकाधिकं गुरुत्वं प्राप्तवन्तः । काशीविश्वविद्यालयस्य परिसीमायां विद्यार्थिनां प्रियं "गुरुजी" इतिनाम डाक्टरहेडगेवरोऽपि गौरवेण समबोधयत् ।

यस्मै कार्याय डाक्टरहेडगेवरस्य आविर्भावोऽभूत् आसीत्तद् राष्ट्रधर्मस्य जागरणम् । एतस्मिन्कार्ये तैः जीवनसर्वस्वं समर्पितम् । एतस्माद् हेतोः ते राष्ट्रियस्वयंसेवकसंघस्य निर्माणम् कुर्वन् । राष्ट्रियसंघठनविस्तारस्य तथा राष्ट्रधर्मप्रचारस्य भारं वोढुं योग्यं "श्रीगुरूजी" महाभागस्य असामान्य व्यक्तित्वं विकसितं ज्ञात्वा तेषामसीम समाधानम् अभूत् । परिणामस्वरूपं १९४० ख्रिष्टाब्दे स्वजीवनयात्रायाः समाप्तिकरणावसरे डाक्टरमहोदयः स्वकीयसम्पूर्णकार्यस्य गुरुभारं तस्मै समर्पितवान् । तदा "गुरुजी" महाभागानामायुः ३४ वर्षमात्रमासीत् ।

विगतेभ्यः १६ वर्षेभ्यः भारते वर्षे तेषामनवरतभ्रमणं प्रचलति । स्वस्य अलौकिकप्रतिभया तथा विशुद्धजीवनेन डाक्टरहेडगेवरेण सूत्ररूपे प्रतिष्ठितानां सिद्धान्तानां प्रतिपादनं तथा प्रचारं कुर्वन्तस्ते देशं चैतन्यपूर्णं कृतवन्तः सन्ति । आगामिन्यां फाल्गुनकृष्णैकादश्यां तदनुसारं ८ मार्च १९५६ ख्रिष्टाब्दे 'श्रीगुरूजी' महोदयाः स्वस्य आयुषः पञ्चाशद्वर्षं परिपूर्य एकपञ्चाशद्वर्षे पदार्पणं कुर्वन्ति । सार्वजनिकरूपेण तेषां जन्मतिथेः समारोहस्य तथा तेषां सत्कारस्य च सिद्धता देशस्य सर्वस्मिन् भागे प्रचलिता । तेषां समाजार्पितजीवनं प्रति स्वस्य विश्वासं तथा श्रद्धाम् उद्भाव्य तत्सदृशजीवनयापनस्य प्रेरणायाः सर्वस्मै समाजाय वितरणमेव एतस्य समारोहस्य हेतुरस्ति ।

पूज्यानां "गुरूजी" महाभागानां मङ्गलविचारस्य अखिले देशे प्रसारस्तथा तेषामङ्गीकृतेषु कार्येषु यथाशक्ति सहयोगप्रदानमेव तान् प्रति श्रद्धाप्रकटनस्य श्रेष्ठो मार्गः ।

अखण्डोऽविभाज्यस्तथा स्वस्य अस्मितया चैतन्ययुक्तः सुदृढश्च हिन्दूराष्ट्र एवास्माकं सनातन आराध्योऽस्ति, इदं 'गुरूजी' महोदयैः सर्वेषां सम्मुखे प्रस्थापितम् । तेषां दृष्ट्या भारतीयराजनीतेराधारं प्रादेशिकं नास्ति, तेषां विचारः कतिपयराजनैतिकाधिकारं यावत् सीमितो नास्ति अपितु तस्याधिष्ठानं मूलतः आध्यात्मिकम् अस्ति । 'मातृरूपेण वय स्वराष्ट्रं चिन्तयेम' इति भक्तिभावम् अस्मिन्नात्मविस्मृते समाजे उद्बोद्धुमेव ते सर्वदा तत्पराः सन्ति ।

प्रान्तीयता, आत्मनिर्णयो, भाषादुरभिमानं पन्थाभिनिवेशादिकाश्च अद्य बह्व्यः समस्या अस्य मातृभावस्याभावात् उत्पद्यमानाः सन्ति । इदं युक्तं निदानं राष्ट्ररोगस्य तैः कृतम् । पाकिस्तानम् गोवा तथाकथित आजादकाश्मीरश्च देशस्य विच्छिन्नान्यङ्गानि तस्य रोगस्य मूर्तिमत् स्वरूपम् सर्वेषां सन्मुखेऽस्ति । भारतस्य संघात्मकं संविधानम् अर्थात् स्वायत्तराज्यानां विधानसभानां च निर्माणमपि तस्य मूलभूताया एकात्मकभावनाया द्योतकम् । भाषानुसारिणां तथा विभिन्नपन्थावलम्बिनां राज्यानां याचना तन्निमित्तोत्पन्ना कटुता तस्य अपरिहार्य परिणाममात्रम् । भविष्यद्गर्भे अस्य भयङ्कराः परिणामा निहिता भवितुमर्हति । अतः पूज्य गुरुवर्याणां विचारानुसारेण एक एव तरणोपायोऽस्ति स च यथार्थराष्ट्रभावस्य अभिव्यञ्जकम् एकात्मकशासनम्, अर्थात् एकस्यैव राज्यस्य एकस्या एव विधानसभाया एकस्या एव कार्यपालिकायाः स्थापना ।

अतएव राष्ट्रस्य एकात्मतायाः मन्त्रद्रष्टॄणां पूज्य गुरुवर्याणां जन्मदिनमहोत्सवे मङ्गलावसरात् प्रेरणामादाय वयं देशस्य प्रतिव्यक्तिसमीपम् उपतिष्ठेमहि तेभ्यः तेषाममृतमयं संदेशं श्रावयेमहि । भारतीयाया एकात्मतायाः क्रियाशक्तेः ... कुर्मः । तेभ्योऽस्माकम् अनुरोधोऽस्ति यत्ते जनजागरणस्य एतं कार्यं

( शेष पृष्ठ ७० परिद्रष्टव्यः )

प्रकाशक—जयबहादुरसिंह । पता—भारती भवन, गोपालजी का रास्ता, जयपुर ।
राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाज़ार जयपुर, में मुद्रित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल काँगड़ी

# भारती

प्रमुखं संस्कृतमासिकपत्रम्

हिन्दुसंस्कृतिरक्षार्थं युध्यमानेन वैरिभिः।
महाराणाप्रतापेन प्रतापी देश एष नः ॥

वर्षम् ६

चतुर्थाङ्कः

मूल्यम्
वार्षिकम् ३) रु०
एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❀ विषय-सूची ❀


| क्रमः | लेखाः | लेखकाः | पृष्ठ संख्या |
|---|---|---|---|
| १. | भारती किल भासताम् | श्री धर्मदेवो वेदवाचस्पतिः | ७५ |
| २. | गीताप्रवचनम् | श्री उदयवीरशास्त्री, बीकानेर | ७६ |
| ३. | अद्यत्वे पुत्रैषणा | श्री गणेशरामशर्मा, झालावाड़ | ७८ |
| ४. | वर्तमानसमये नारी-शिक्षा तथा अस्माकं कौटुम्बिकं जीवनम् | श्रीधरप्रसादपन्त, पीलीभींत | ८३ |
| ५. | संस्कृतपत्राणां विहङ्गमावलोकनम् उपयोगित्वं च | डा० शङ्करलालशर्मा, बम्बई | ८४ |
| ६. | विश्वशान्तेरुपायाः | श्री काशीनाथशास्त्री, अम्बाला | ८८ |
| ७. | निराशान्धकारे आशाप्रदीपः | श्री माधवरावसदाशिवगोलवलकरमहाभागः | ८६ |
| ८. | सम्पादकीयम् | सम्पादकः | |
| | राजस्थानसं० सा० सम्मेलनस्य षष्ठाधिवेशनम् | | ६० |
| | वटोदरप्रान्ते संस्कृतसमुत्साहः | | ६३ |
| | विनोदवाटिका | सहसम्पादकः | ६५ |
| ६. | सूक्ति-सुधा | सम्पादकः | ६६ |


---


# संस्कृतसाहित्ये नवीनं प्रकाशनं

## संस्कृतकवितारसिकानां कृते जयपुरवैभवम्

संस्कृतसाहित्ये नवयुगप्रवर्त्तकमिदं काव्यं साम्प्रतं प्रकाशितं यस्मिन् राजस्थानराजधान्या जयपुरराज्यस्य जयपुरराजवंशस्य, राजस्थानीयोत्सवानां, जयपुरनगरस्य प्रमुखनागरिकानां पंडितानां च काव्यमयं वर्णनम्। भट्टश्रीमथुरानाथशास्त्रिरचिते अस्मिन् काव्ये संस्कृतस्य प्रमुखकवीनां काव्यमयमालोचनम्, विविधभाषाया-श्छन्दांसि, एकस्मिश्छन्दसि बहुभाषाः, भाषासमकम्, चित्रकाव्यादीनि, विनोदसामग्री अपि प्रचुररूपेण प्राप्येत। जयपुरस्य राजस्थानस्य च दर्शनीयस्थानानामनेकानि चित्राणि, हिन्दीभाषाकविता चाप्यत्र समवेताः। काव्येन सहैवास्य हिन्दीअनुवादोऽपि दत्तोऽस्ति। काव्यस्यास्य पृष्ठसंख्या ७००, आकर्षकमुद्रणयुक्त सजिल्दं चेदं काव्यं ५) रूप्यकेभ्यः निम्नलिखितसंकेतात् प्राप्यम्। संस्कृतस्नेहिनः काव्यमिदं सकृत् अवलोकयितुम् अनुरुध्यन्ते। भारतीयग्राहकाणां कृतेऽत्र मूल्ये न्यूनतापि कर्तुं शक्यते।

स्थानम्—
भट्टश्रीमथुरानाथ शास्त्री
मञ्जुनिकुञ्जः पृथ्वीराज रोड, जयपुर


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
श्रीमथुरानाथशास्त्री
सहसम्पादकः—
कलानाथशास्त्री B. A.
जयपुरम्

प्रबन्ध सम्पादकः—
गिरिराजशर्माशास्त्री

# भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

६ | माघशुक्लप्रतिपत्, सं० २०१२ | अङ्कः ४

## "भारती किल भासताम्"

( श्रीधर्मदेवो वेदवाचस्पतिः, एम. ए. )

मञ्जुलैर्मधुरैः पदैः स्वैः संप्रसादं तन्वती ।
भव्यभावैर्भूषितेयं भारती किल भासताम् ॥ १ ॥

शारदीयैः पाणिपङ्कजकलिततन्त्रीनिःस्वनैः ।
सर्वतः श्रुतिशब्दितेयं भारती किल भासताम् ॥२॥

बालकानां वाग्विलासं हृत्प्रकाशं विदधती ।
सन्मनांसि च मण्डयन्ती भारती किल भासताम् ॥३॥

शेमुषीशय्याशयानानां जनानां मानिनी ।
भूरि भद्रं भावयन्ती भारती किल भासताम् ॥४॥

भूषणै रसपाकभावैः स्वात्मगात्रविभूषिणी ।
सूक्तिसारं सिञ्चयन्ती भारती किल भासताम् ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# गीताप्रवचनम्

विद्याभास्करः श्रीउदयवीरः शास्त्री, प्रधानाचार्यः श्रीशार्दूलसंस्कृतविद्यापीठ, बीकानेर

संस्कृतवाङ्मये गीता शिरोऽलंकारभूतेव विराजते, गीतायाः समादरः समाजे खल्वनेनैवानुभूयते, यत्तस्या व्याख्यानभूताः शतशो ग्रन्थाः साम्प्रतमाबालवृद्धमाद्रियमाणाः समुपलभ्यन्ते। न केवलं देवभाषायामार्यभाषायां वा, न च भारतीयविविधप्रान्तभाषास्वेव, अपि तु वैदेशिकभाषास्वपि गीताव्याख्यानान्यनेकानि दृष्टिपथमायान्ति। अतीते मार्गशीर्षमासे शुक्लपक्षे चतुर्थीतिथिमारभ्य एकादशीं यावत् गीतासप्ताहः सर्वत्र भारते बहुत्र विदेशेऽपि च गीताभिनन्दनोत्सवरूपेण प्रचलित आसीत्। तत्र महतां विदुषां महात्मनां गीताध्यायिनां गीतार्थप्रतिपादनपराणि श्रोतृजनोल्लासजनकानि भक्तिभावोद्भावकानि प्रवचनानि गीतापाठप्रवृत्तयश्च सततं प्रावर्तन्त। ग्रन्थे यावान् प्रचारः साम्प्रतं जगति गीतायास्तावान्नान्यस्य कस्यचिद् ग्रंथस्य स्यात्। क्वचिद् गीतामन्दिराणि भवनानि वा निर्माप्यन्ते, क्वचिज्जनैरन्तिकस्थैः संभूय गीतामण्डलानि संस्थाप्यन्ते, अपरत्र पुनः प्रकाशनार्थं गीताया मुद्रायन्त्रालयाः समुद्घाट्यन्ते, अनेकत्र च गीताविद्यालयाः पाठमात्रप्रवृत्तय एव वा प्रचाल्यन्ते प्रतिदिनम्।

किमत्र कारणम्, किन्तदाकर्षणं गीतायाः, कोऽत्र विशेषः, किन्तन्महत्त्वम्, का तत्र शक्तिर्यया प्रेर्यमाणाः पुनः पुनरत्र प्रीतिं प्रदर्शयन्ति पुरुषा इति जिज्ञासायां समुपतिष्ठते खल्वत्र विचारः—प्रतिक्षणं सांसारिकप्रवृत्तिपरम्पराभिः पर्याकुलो भूत्वा मानवो यदा शान्तिक्षणमपेक्षते, विविधसम्पदैश्वर्यसम्पन्नोऽपि सदध्यात्मक्षुत्क्षामकण्ठस्तत्पीडाशान्तये कमप्यलौकिकं शान्तिकरमर्थमभिलषति, प्रतिपन्नपुत्रपौत्रकलत्रादिरपि ... शयाऽन्तर्दह्यमानः शीतलरसाभिलाषामनुभवति, ... गीतैव केवलं शरणम्। एवं भूतास्ववस्थासु गीता... श्रवणमध्ययनं मननं परमालम्बनम्। कष्टक... व्यामोहरोगस्य महौषधं गीतैव। दुःखशोकभयाद्यग... सागरसंतरणाय परमोऽयं सेतुः। गीताभ्यासस्तां... सद्भावान् हृदि समुद्बोधयति, यैर्हि मोहपर्याकु... समुद्विग्नः परिभ्रष्टो मानवः सन्मार्गमनायासेनैव स... श्रयते, अध्यात्मतत्त्वप्रतिपादनं विस्तरेणोपनिष... वरीवर्त्ति। परमयं गीतासारः सर्वासामुपनिषदा... सर्वोपनिषत्सारत्वात् स्त्रीलिंगत्वाच्चोपनिषत्स... गीतेति स्त्रीलिंगत्वेन निर्देशः श्रीकृष्णप्रवचन... तदुपदेशानां वा सर्वथा संगच्छत एव। अन्यथा गी... गीतं वेति कुतो नोच्चार्येत। साक्षाद्भगवतोपदिष्टत्वा... सर्वत्र पुष्पिकासु प्रत्यध्यायावसानावसरे 'श्रीमद्भ... द्गीतासूपनिषत्सु' इति समुल्लिखितं दरीदृश्यते। अत... माहात्म्ये—

> सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
> पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥

इति स्पष्टमुद्घोष्यते। अत्र गीतामृतभोक्तृ... पार्थस्य निर्देशात् केचन शङ्कामातन्वते, पार्थमन्... नान्यः कश्चिदत्राधिकारीति मानवमात्रकृते गीताभ्या... पदेशः सर्वथापि निष्फल एव स्यादित्यत्र वि... विचार्यते।

यद्यपि सत्यमेतत श्रीमतो भगवतः कृष्णस्याऽ... पदेशो मध्यमपाण्डवमर्जुनमभिलक्ष्यैव प्रावर्त्तत, ...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अवसरे कीदृशे प्रसंगे किंभूतायामवस्थायां केषु च समुपस्थितेषु कारणेषु प्रवृत्तिरेषा संजाघटीति इत्यपेक्षते । गीतायाः प्रथमाध्यायः खल्वमुमवसरमपेक्षते विशदीकरोति । यदा हि धर्मक्षेत्रे कुरुक्षेत्रे पाण्डवानां महती सेना मिथो युद्धमभिलषन्ती स्थिता, कौरवराजो दुर्योधनः शस्त्रपाणिमाचार्यमभिगम्य स्वीयां पाण्डवीयां च सन्नद्धां सेनामभि-वीक्ष्य सर्वे भवन्तः पितामहं प्रधानसेनापतिं भीष्म-मभिरक्षन्तु—इत्यादिदेश, भीष्मप्रभृतयश्च कौरवचमूनां शङ्खनादसङ्केतेन स्वीयां युद्धसज्जां समुदघोष-यन् तादृशं युद्धसज्जासङ्केतमङ्गीकुर्वाणाः पाण्डवाः भीमार्जुनयुधिष्ठिरप्रभृतयोऽपि नैजान् शङ्खान् सहैव प्रदध्मुः । एवं सत्यां युद्धघोषणायां प्रवृत्ते च शस्त्रसम्पातेऽर्जुनः श्रीकृष्णं सारथिरूपेण स्थितमुवाच—संस्थापय मदीयं रथमुभयोरपि सेनयोर्मध्ये, यावदहं योद्धकामान् समुपस्थितानेतान् द्रष्टुमीक्षे, मया कैः सह साम्प्रतं योद्धव्यमिति । ततः सारथिर्भगवान् कृष्णः सेनयोरुभयोरन्तराले श्वेताश्वयुक्तं कौन्तेयस्य रथं संवाह्यास्थापयत् । तत्र च स्थितः कौरवसेनायां सर्वानपि सम्बन्धिनः पुत्रपौत्रा-न्भ्रातॄन् श्यालान् मातुलान् पितॄनन्यान् बन्धुबान्ध-वानवलोक्य तेषाञ्च युद्धकामनया तत्रावस्थितिं स्वहस्तेन तेषां विनाशञ्च संप्रधार्य व्यामोहाकुलितान्तःकरणोऽर्जुनः सशरं धनुरेकतः परित्यज्य भीषणान् देश-विनाशकान् युद्धपरिणामान् पर्यालोचयन्नाहं योत्स्य इति गोविन्दमुक्त्वा तूष्णीं भूत्वा निश्चेष्ट इव तस्थौ । तदानीमज्ञानितया कर्त्तव्यपथभ्रष्टं व्यामोहकलुषितान्तःकरणं कुन्तीपुत्रं परिज्ञाय महायोगेश्वरो हरिः कर्त्तव्यप्रवृत्तये गीतार्थमुपदिदेश । यथा च तादृशार्थ-प्रतिपादनेन तदानीमर्जुनस्य मोहो नष्टः कर्त्तव्यपथ-प्रवृत्तिरूपञ्च ज्ञानं समुदभूत्, तथाऽद्यापि किंकर्त्तव्य-विमूढस्य मोहपर्याकुलस्य मानवस्य प्रतिदिनं नियमेन गीतायाः श्रवणमध्ययनं मननं व्यामोहान्धकारमपाकृत्य क्रमश्यलौकिकं ज्ञानालोकमाकलयति । एवं नियताभ्या-सतत्परो गीतोपदिष्टदिशाचरन् कश्चिदपि श्रद्धोपेतोऽधि-कारी स्वाभिलषितं पदमधिगच्छतीति नात्र सन्देह-लवोऽपि ।

गीता भगवता प्रोक्ता वेदव्यासेन वा पुनरिति विचारः कदाचिदुन्नमय्य शिरः समुपस्थितो भवति विदुषां पुरतः । तत्र केचन—भगवतैव प्रोक्ता 'धर्मक्षेत्रे कुरुक्षेत्रे' इत्याद्यानुपूर्वीका सकलापि समुपलभ्यमाना गीता इति व्याचक्षते । अत एव लोके न केवलं गीता, अपि तु भगवद्गीतेति नाम्ना व्यवह्रियते । पुष्पिकासु च प्रत्येकाध्यायपरिसमाप्त्यवसरे प्रदर्शितासु 'श्रीमद्भगव-द्गीतासूपनिषत्सु' इत्येव समुल्लिखितमुपलभ्यते । एवञ्च सप्तशतश्लोकी भगवता स्वमुखेनैवोच्चारिता इति तेषां भक्तिप्रवणानामाग्रहः । परमन्ये तन्न सहन्ते । ते ह्येव-मुपपादयन्ति, भगवद्गीता खलु महाभारतान्तर्गता तस्यै-वांशमात्रम् । महाभारतं हि वेदव्यासेन रचितमित्यत्र कस्यापि संशयो नास्ति । एवञ्च तदन्तर्गता तस्यैवांशभूता गीतापि वेदव्यासनिर्मितैवेत्यत्र सन्देहो न कर्त्तव्यः । कुतस्तर्हि गीता व्यासगीता वेत्येव नोच्यते, कथं भग-वद्गीतेत्येव व्यवह्रियते ? श्रूयताम्, अयमत्र विवेकः । यदा सेनयोर्मध्ये रथोपस्थ उपविष्टोऽर्जुनः स्वसम्बन्धिनः परितोऽवलोक्य व्यामोहमापेदे, तदा भगवान् सर्वोपनि-षत्सारभूतं आत्मानात्मविवेकप्रसाधकं तं तमर्थं प्रतिपाद्य स्ववाक्यैरेव पार्थं प्रबोधयामास, न च तादृशः स काल आसीत्, यत्र द्वित्रिहोरापर्यन्तं निराकुलो भूत्वा सांख्य-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अद्यत्वे पुत्रैषणा !

पं० श्रीगणेशरामशर्मा, श्रीराजेन्द्र-इएटर कालिज, झालावाड़

संसारेऽस्मिन् मनुष्यजातेः पुत्रेषणा नामैकातीव प्राकृता निसर्गसिद्धा सहजा वृत्तिः। यूरोपदेशीयैर्भारतीयैश्च गम्भीरचिन्तनशीलैर्दार्शनिकैस्तत्त्वज्ञानिभिः प्राणिशास्त्रप्रवीणैर्मनोविज्ञानवेदिभिर्नृवंशविद्याविशारदैः सृष्टिविज्ञानविपश्चिद्भिः कामशास्त्रप्रणेतृभिश्च मानवमानसे जायमानानां कासांचित् प्रमुखेच्छावृत्तीनां मध्ये पुत्रैषणा प्राथम्येन परिगण्यते। भारतीयाः शास्त्रवेत्तारो

वेदान्तादिशास्त्रार्थप्रविवेचनपरं प्रलम्बीभूतं प्रवचनं प्रस्तोतुमनवसरं नावमन्येत कश्चित्। शस्त्रसम्पातोन्मुखवेलायां तथा रहस्योद्घाटनतत्परा शास्त्रचर्चा सर्वथाप्युपहासास्पदतामेव भजेत। अतएव सम्भाव्यते, पञ्चदश विंशतिर्वा पलानि यावत् साम्प्रतिकैः कालोचितैः स्ववाक्यैः प्रबोध्यार्जुनं युद्धाय सज्जीकर्त्तुं सफलो बभूव भगवान्। तमेव भगवदुक्तमर्थमुपजीव्य वेदव्यासोऽष्टादशाध्यायपरिमितां सप्तशतश्लोकात्मिकां गीतां विचारयामास। एवं बाह्यकलेवरो गीतायाः खलु वेदव्यासविनिर्मितः, आत्मा त्वर्थभूतो भगवत एव। अतएव वेदव्यासप्रणीतापि गीता भगवद्गीतेत्येव व्यवह्रियते।

गीताध्ययनपूर्वकं तदर्थविचारस्तदनुकूलमाचरणञ्च सर्वस्यापि महान्तमभ्युदयमावहतीति निश्चितम्। भगवता बोधितमर्थमाचरन्नेवाऽर्जुनः श्रेयोरूपं विजयं लेभे। एवमर्थप्रधाना आचारप्रधाना वा गीता, न शब्दप्रधाना पाठप्रधाना वा केवलम्, शब्दास्तु वेदव्याससन्निवेशिताः, अर्थस्य भगवदुक्तत्वात् श्रेयोऽर्थिभिस्तदाचरणमेव परमावश्यकम्, तदेव गीताप्रवचनस्य मुख्यं लक्ष्यं कल्याणावहञ्चेति विरम्यते।

विद्वांसो मनुष्याणां मनोवृत्तिविश्लेषणप्रसङ्गे लोकैषणा वित्तेषणा-पुत्रेषणा चेति वृत्तित्रयीमाद्यां नैसर्गिकीं स्वीचक्रुः! मनुष्यः स्वभावत एव विशुद्धया कामवृत्त्या प्रेरितः सन्ततिं जनयितुं प्रवर्तते। अत्र "एकोऽहं बहु प्रजायेय" इति बीजम्। न केवलं मनुष्य एवापि सर्वेऽपि सचेतना जननेन्द्रियवन्तो जीवा रजःप्रधानासु स्त्रीयोनिषु क्षेत्रत्वं प्रकल्प्य तत्र वीर्यबीजं संस्थाप्य परमां मुदमनुभवन्तो लोके स्ववर्गवंशविस्तारं कामयन्ते। मनुष्यस्तु सर्वप्राणिषु श्रेष्ठत्वात् सर्गक्रमे संयतं सनियमं च प्रवर्तमानो योग्यामात्मानुरूपां सन्ततिं जनयतीति सर्वसम्मतम्। पुनर्जन्मसिद्धान्तं स्वीकुर्वाणा विद्वांसोऽपि च "आत्मा वै जायते पुत्रः" इति प्रोचुः। कामशास्त्रविदो ब्रुवन्ति यन्मनुजो यौवनं प्राप्य रमण्यां रमते तदा स्त्रीपुंसोर्द्वयोः कोऽप्यानन्दवृत्तेरद्वितीयः परितोषो भवति, सन्तानोत्पत्तौ जातायामेव मनुजद्वन्द्वस्य प्राकृतो विकाशक्रमः परिपूर्णतामेति। सन्तानाभावे दम्पत्योर्वन्ध्यत्वं भवति जीवनं च निष्फलं जायते, तथ्यमेतत्प्रत्यक्षमेवावलोक्यते लोके। सन्ततेरभावमसहमाना जना नानाविधान् प्रयत्नान् यज्ञानुष्ठानदानौषधिरसरसायनतन्त्रचिकित्सादेवाराधनरूपान् विदधतीत्यपि पुत्रैषणायां सतृष्णतां मानवानां प्रमाणयति। 'पुंनाम्नो नरकात्त्रायत इति पुत्रः', 'नास्त्यपुत्राणां गतिः' इत्येवंविधां व्यवस्थां धर्मशास्त्रज्ञाः श्राद्धपिण्डोदकक्रियाकलापवर्णनप्रसङ्गे प्रेतोद्धाराय स्वगोत्रसम्भवां सन्ततिमत्यावश्यकीमाहुः। पुराणेतिहासचरितानुचिन्तनादपि तथ्यमेतत्स्फुटं प्रसिद्ध्यति यदिहानेके ब्रह्मर्षयो राजर्षयः सर्वे



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



साधारणाश्च स्वाभाविकप्रजननक्रमेणौरसं पुत्रमनवाप्य पुत्रेष्टिप्रभृतीन् यज्ञान् समीज्य तःप्राप्तये महत्तपस्तेपिरे, स्त्रियश्च साध्व्यो देव्यो व्रताचरणदानादिभिर्देवताः परितोष्य दिव्यान् वरान् प्राप्य पुत्रमुखदर्शनसुखमनुबभूवुः स्वजीवनसाफल्यं च मेनिरे। दिलीपदशरथादयः प्राप्तये महान्तं प्रयत्नं कष्टसाध्यं चाप्याचेरुरिति सर्वविदितम्। इत्थं सर्वतो दृक्पातेन पुत्रैषणा हि सर्वजीवानां विशेषतो मानवानामेका प्राकृता सहजा नैसर्गिकी तृष्णा समुत्कटा च मनोवृत्तिरिति स्वीकरणे न कस्यापि विचारशीलस्य विप्रतिपत्तिः स्यात्। स्ववंशविस्तारं, स्वसन्ततेर्लालनं पालनं, बाललीलावात्सल्यलानुभवसुखं, निश्चितेऽपि मरणेऽप्यथ स्वसन्तयोत्तराधिकारसमर्पणम् चाभिलषन् मनुष्यः स्वात्मनः श्रेयणां रक्षतीत्यत्र नास्त्येवाणीयानपि विसंवादः! एवं सतौ यदीदानींतनो मानवसमाजः पुत्रोत्पत्तिं वाञ्छति, जननक्रियायां प्रवर्तते, दाम्पत्यभावमाश्रित्य गृहाश्रमे स्वकलत्रेषु रममाणः पुत्रैषणामभिरक्षति तत्तदतीव स्वाभाविकं, निसर्गसिद्धमाक्षेपरहितं भाति!

परमधुना विज्ञानार्थशास्त्रराजनीतिप्रधानेऽस्मिन् भौतिकसङ्घर्षप्रधाने किल कराले कलिकाले वर्गयुद्धसंत्रस्तं मानवजीवनमालोचयितुं प्रवर्तमहि तदाद्यत्वे पुत्रैषणाःसङ्कृते यदाकदा क्लेशायापि च जायत इत्यत्र विषयेऽत्र पाठकानां पुरतः किंचिद्वक्तुं प्रयतेऽहमासां पङ्क्तीनां स्तरः खल्वधस्तात्। आशास्यते, परिवर्तितं जगत्प्रपञ्चमिदानीन्तनं, विश्रृङ्खलितां चास्माकं भारतीयानां सामाजिकीं व्यवस्थां, नव्यां शासनपद्धतिं, क्लेशबहुलां च जीवनप्रणालीमालोच्यात्र पाठका विचारविमर्शमेतं गम्भीरमपदध्युः—

प्राक्तना अस्माकं पूर्वजा भारतीयाः प्राकृतं सरलातिसरलमाडम्बररहितं च जीवनक्रममनुसरन्तो यमनियमवन्तो वर्णाश्रमाचारविचारनिर्मलमुत्तमचरितचर्याचारित्र्यशोभनं धर्मार्थकामत्रिवर्गमेव परमं पुरुषार्थं लौकिकं मन्यमानाः संयतभावेन यदृच्छयोपपन्नान् सांसारिकान् भोगान् भुञ्जते स्म। वंशानुक्रमकुलीनत्वसंस्कारपरम्परासु च ते बहु श्रद्दधानाः साग्निसाक्षिकम् विधिवत् परिणीतेषु स्वकलत्रेषु योग्ये वयसि प्राप्ते यौवनोद्दामलीलाविलासै रमन्ते स्म कामोपभोगानन्दसुखं चानुबभूवुः। ऋतुकालाभिगामिनस्ते गर्भाधानसंस्कारं धर्मधिया समाचेरुः, फलतो यथेप्सितां योग्यां सन्ततिं स्ववंशप्रतिष्ठानुरूपामाज्ञाकारिणीं सुशीलां च प्राप्य सुखेन दीर्घमायुर्जीवित्वा भुक्त्वा च तांस्तानशेषान् दिव्यान् भोगाञ्जीवनसाफल्यमनुभूय पर्यन्ते स्वर्गं मोक्षं च यथाभिकाङ्क्षितं लभन्ते स्म। तस्मादेव तेषां सन्ततिर्व्यतीतेष्वपि वर्षशतेषु पुरुषशतेषु न कदापि विपथगामिनी दुराचारानाज्ञाकारिणी समजायत। परन्तु हा! हन्त!! अद्यत्वे भोगप्रधानेऽस्मिन् बत भौतिके युगे मनुजानां जीवनचर्या भिन्नप्रकारैव प्रवर्तते। नेदानीं लोकाः प्राक्तना इव सत्यकामाः सत्यसङ्कल्पाः सत्याचरणा गर्भाधानसंस्कारं सुयोग्ये देशे काले पात्रे च कर्तव्यबुद्ध्या समाचरन्ति। काकतालीयवत् घुणाक्षरन्यायाद्वा प्राप्तां सन्ततिं—पुत्रं वा कन्यां वा—लब्ध्वा कथमपि जीवनयात्रामनुसरन्तो गार्हस्थ्यं स्वस्थमस्वस्थं वातिवाहयन्ति। परिणामतो यावदपेक्षितामनुगुणामनुरूपामात्मतुल्यां सुयोग्यां सुशीलां च सन्ततिमनवाप्य विपरीताचारचरणवद्भिः सन्तानैः कदर्थिताः परिपीड्यन्ते। अतः पुत्रैषणा सम्प्रति गृहस्थानामेका महती विडम्बनैव पर्यवस्यति! क्वचित् क्वचित्तु पुत्रवत्त्वं कन्यापितृत्वं वा क्लेशबहुलं जातमिव समवलोक्यते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अधुनातनो गृहस्थो न खलु प्रागिव लब्धे किल-
ारिमन् सन्ताने स्वात्मनः कामभावं परितुष्टं मन्यते न
ा गृहिण्यो देव्योऽपि चैकस्यां सन्ततौ प्राप्तायां सत्या-
ात्मानं भुक्तभोगं कृतकृत्यं वा मत्वा कामाद्विरमन्ति ।
विशेषतः पुमांस एवेन्द्रियपरायणतया च भोगेच्छामा-
मनः पुनः पुनस्तर्पयितुं कामवासनाकृष्टाः प्रजोत्पादन-
कर्मणि प्रवर्तन्ते । फलतः प्रतिवर्षमेकां योग्यामयोग्यां
ा सन्ततिमिच्छन्तो वानिच्छन्तोऽपि प्रसह्य प्राप्नुवन्ति ।
इत्थमसंयमाद्यदृच्छया लब्धाः सन्ततयो रुग्णा दुर्बला
नित्यास्वस्थाः पित्रोः कुटुम्बस्य च पीडायै चिन्तायै
केवलं जायन्ते ! प्रजापतयश्चेमे गृहस्थाः स्वसन्तानानां
भरणे पोषणे शिक्षायां दीक्षायां च व्ययातिभारं क्लेश-
परम्परां दारिद्र्यं चानुभवन्ति । रुग्णबालानां चिकित्सा-
कर्मण्यपि च तेऽसामर्थ्यं विन्दन्तस्तदकालमृत्युक्ले-
शांश्च भूयो भूयः सहन्ते !! भाग्याज्जीवन्त्योऽपि
चैवंविधाः प्रजाः स्वजीवनक्रमे नाभीष्टामुन्नतिं प्रगतिं
च कर्तुं पारयन्ति । इत्थंभूताः शिशवो राष्ट्रस्य, समा-
जस्य, परिवारस्य, पित्रोश्च भाररूपाः केवलं जनसंख्या-
वर्द्धनमात्रैकोपयोगा निष्पद्यन्ते ! परिणामतो वर्तमाने-
ऽस्मिन् संसारे जनसंख्यावृद्धिरिदानीमेका सार्वदेशीया
महती जटिला समस्या बोभूयमाना दरीदृश्यते । एव-
मिदानीं विश्वस्मिन् पुत्रेषणा विडम्बना प्रसिद्ध्यति ।

अपरं च प्रजानां जन्मसम्बन्धिन्यः काश्चित्
संख्यातीताः क्लेशपरम्परा गृहस्थैर्भोक्तव्या भवन्ति ।
सर्वादौ जातायां गर्भस्थितौ गृहिणीनामधुनातनीनां
शरीरसंस्थानदौर्बल्यात् स्वास्थ्यं क्रमशः सन्देहदोलाधि-
रूढं शङ्कातङ्काकुलं विघ्नपरम्पराक्रान्तं च जायते । गर्भो-
न्नतिक्रमेणेमा देव्यो मासि मासि क्षीणक्षीणं कृशतरं च
स्वस्वास्थ्यं जायमानं चिन्तयन्त्यो बत तिक्तरूक्षदाहिनः
स्वदेशीयान् परदेशीयान्वा पथ्यापथ्यांश्चौषधिरसान्
सेवन्ते तथापि स्वास्थ्यक्षयमात्मनो नावरोद्धुं प्रभ-
वन्ति । यदा कदा सूचीभेद्यां शल्यतन्त्रात्मिकां च
चिकित्सामभ्यङ्गीकर्तुं विवशा भवन्ति, तद्विकृतिजन्यान्
क्लेशांश्च सोढुं परवशा जायन्ते च तथापि यथेष्टं
स्वास्थ्यं नैव रक्षितुं पारयन्ति । सत्यप्येवं स्वगार्हस्थ्ये
धनविरहाद्दारिद्र्याद्बलाजनत्वात्पराधीनतया कुटुम्बि-
जनानां नैष्ठुर्याद्वावश्यकर्तव्यताकं दिनचर्यासंलग्नं
परिश्रमसाध्यं कठिनमपि कार्यकलापं समाचरन्त्यो गर्भ-
पातदुःखं वेदनातिशयं च सहन्ते । दुःखपरम्परा गुर्वीः
सहमाना अपि गृहिण्यो देव्यः कथमपि क्लेशाज्जाते-
ऽपि प्रसवप्रसङ्गे चात्यन्तं शिथिलगात्रा नीरक्ता रुग्णा
भवन्ति, प्रजननक्रियाव्यापारश्च स्वाभाविको नियति-
नियमोऽपि वा तासामस्वाभाविकं दुस्सहं वेदनापूर्णमप-
मृत्युहेतुकं दुःखं परिणमति ! सीमन्तोन्नयनादयो माङ्ग-
लिका गर्भसंस्काराश्चैतासां कृते शोकप्रदा जायन्ते !
गृहस्थाश्रमस्य मूलाधारभूता भोगभित्तय इव देव्यो हि
यदा गर्भधारणात् क्लिश्यन्ति पीड्यन्ते च तदाऽन्येऽपि
च पतिपुत्रादयः कुटुम्बसदस्याः सर्वे दिनचर्याक्रमभङ्गा-
दन्नपानादिपोषणपरिचर्याविच्छेदाद्दुःखशतानि भुञ्ज-
न्ते । एवमद्यत्वे पुत्रेषणा विडम्बना ।

एवं कष्टपरम्पराभिः पूर्णेऽपि हि गर्भकाले प्रसव-
काले सन्निहिते च सर्वादौ गर्भिणी-प्रसूतिगृहं प्रति
नेतव्या भवति, यतोऽन्तर्मनसि दम्पतिभ्यां साकमेव
सर्वेऽपि जानन्ति यदेवं कामासक्तिवशादसंयमाद्वा जातो-
ऽस्वाभाविको वार्षिकः प्रसवोऽनिष्टकरो बाधाशत-
सङ्कुलो विपज्जालवलितो विनौषधालयं, विना डाक्तर-
महाशयं, विना च वैज्ञानिकशल्यचिकित्सासाधनजातं
नैव क्षेमेण निर्वाह्यो भवति निर्विघ्नम् । यदि पुनःप्रसवो



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मूढो गर्भिण्याः प्राणापहारकरोऽपमृत्युजनको वा भवे-त्तदा विषमप्रतिकारे किलैवंविधे समये का वा गतिर-स्तीति कृत्वाधुनातनः सर्वसाधारणोऽपि नागरिकः क्वचि-न्महौषधालयस्थं सर्वसाधनसम्पन्नं प्रसूतिगृहं शरणं व्रजति। एवं प्रसूतिगृहाश्रयोऽनिवार्य्यो बहुव्ययसाध्यो-ऽपि शिक्षितम्मन्यैर्नागरिकैरगत्या स्वीकर्तव्यो भवति नाम नूनम्। तत्र गत्वा पुनर्द्वाक्तराणामन्येषां च तत्र-त्यकार्यकराणां सेवकसेविकानां चाज्ञापालनं, तन्नियमा-नुवर्तनं, धनादिना तत्परितोषणं च कर्तव्यबुद्ध्या श्रद्धया वाश्रद्धया, शक्त्या वाशक्त्या वा करणीयं भवति पुत्रैषिणा गृहस्थेन। इत्थं क्रमेणाद्यत्वे पुत्रैषणा तर्पयति पितृमानसं, पीडयति वा पितृहृदयं, वर्धयति वा गार्ह-स्थ्यशकटीभारं प्रतिवर्षमुत्तरोत्तरम्।

अथ परिश्रमशतैर्दुःखव्याघातानन्नेकान् सोढ्वा पुत्रमुखचन्द्रदर्शनावसरं लभन्ते गृहस्थाः। तत्रापि च रजोवीर्यदोषात्पित्रोर्नवजाताः शिशवो यथायोग्यं परिपुष्टिं नासादयन्ति। मुहुर्मुहुरौषधिसेवनैः प्रायो रुग्णा दुर्बला अस्वस्थाश्च जननीजनकयोर्मानसीं चिन्तामपारां वर्द्ध-यन्ति। तल्लालनं पालनं चातीव कष्टप्रदं, क्लेशबहुलं चाऽसाध्यप्रायं जायते। द्राक्तरौषधालयप्रसवगृहादिपरा-वलम्बिनां लोकानां बालस्वास्थ्यसंरक्षणे चिकित्सायां चानुभवविरहात् शिशुपरिपालनमतीव दुष्करं व्यय-साध्यं परावलम्बि वा भवति! इत्थं देशेऽत्र संख्यावन्तः शिशवो दन्तपंक्तिप्रादुर्भावादन्नप्राशनसंस्कारात्पूर्वमेव म्रियन्ते धरणीगर्भान्तर्लीनजीवनलीलाश्च भवन्ति।

भारण्याज्जानुचलनयोग्ये जाते सन्ताने तत्स्वास्थ्या-पेक्षयाक्षरारम्भात्प्रभृत्येव शिक्षासमस्याद्यतनी समधिकं जटिलतमामधुना गृहस्थाश्रमे वसतां भारतीयानां नः। प्रचुरधनव्ययसाध्या हीदानीं शिक्षा नव्ययुगीना, सापि पुनर्नो गृहशिक्षा, कुलमर्यादाशिक्षा, चरित्रनिर्माण-शिक्षात्मसंस्कारशिक्षा, समाजसेवाशिक्षा, साहित्यपरि-ष्कारशिक्षा, सदाचारनिर्माणक्षमा शिक्षा च। प्रत्युत फैशनपिशाचावेशा, जीवनं सङ्घर्षमात्रं प्रमाणयन्ती पदे पदे चारित्र्यस्खलनैकपरिणामा, राजनीतिगताधि-कारभुक्तये नेतृत्वावाप्तिफला, कृत्रिमवेशभूषाभाषाडम्बर-जल्पाकत्वोद्घोषचाकचक्यवती, प्रमादालस्यानृतकूट-कपटजननी, द्रव्यार्जनैकोत्कटदुर्वासना, सर्वतो निरुप-योगिनी विद्यालयवलिवेद्यां भ्रान्तमस्तिष्काचार्याणां गुरुमन्त्रेषूच्चार्यमाणेषु शुल्कच्छलात् पित्रोः सर्वस्वं स्वाहा कुर्वती कुमारान् बाबून् कुमारिकाश्च चित्रपटता-रिका निर्माति निर्लक्ष्यं लक्षशः स्वच्छन्दम्!!! फलतो ह्यात्मजा अपि पित्रोर्विपरीताचारचरिताः, स्वच्छन्दता-वादिनोऽन्ताराष्ट्रियं सर्वं सम्यग्जानन्तोऽपि च गृहस्थयोः स्वपित्रोर्गृहस्थितिं तत्त्वतो न जानाना, उच्छृङ्खलाः प्रोद्धताः स्वेच्छाचारिणोऽकर्मण्या आरामप्रिया निष्प-द्यन्ते! अतएव हीदानीन्तनानां मानवप्राणिनां नवी-नानि संस्करणानि क्रमशो हीनान्यधमानि पतनोन्मु-खानि मनुष्यतायाः कलङ्करूपाणीव जायमानानि पर्य-वलोक्यन्ते!

अपव्ययादिदुर्व्यसनाक्रान्ता इमे नवयुगीना आत्मजाः स्वयं नानादोषदुष्टा अपि पूर्वजाननुन्नतानज्ञा-ञ्जडवादिनो मन्यमानाः स्वस्य विज्ञानवेदित्वं राजनी-तिप्रवीणत्वमर्थशास्त्राचार्यत्वं च प्रख्यापयन्ति! न ते कुलक्रमलवलेशमनुरुन्धन्ति, न स्वकर्तव्यमनुचिन्तयन्ति, न देवर्षिपितृणत्रयापाकरणं धर्मं मन्वते, न स्नेहानुबन्धं रक्षन्ति, न शीलं समनुशीलयन्ति, न विशुद्धां सात्त्विकीं धियं दधते, न लोकापवादाद्भयं, न वाचारविचारं, ज्ञानं ध्यानं मानं सम्मानं वा किमपि मन्यन्ते!!!



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



आधुनिकाः पुत्रा आस्तिकत्वमवैज्ञानिकत्वमवगच्छन्ति, कुलप्रतिष्ठां दम्भं मन्यते, वंशमर्यादां पाखण्डं प्रमाणयन्ति, शुभान् संस्कारान् रूढिवादान् घोषयन्ति, संयमं कार्पण्यं कलयन्ति, धर्मप्रियतां भीरुतां भावयन्ति, परलोकचिन्तां परोपकारभावनां श्रद्धाजडत्वं, गुरुजनसेवासपर्यां दासत्वमेव जानते ! एवं स्थितौ को नु बत सुपुत्रो दुहिता वा पित्रोर्गृहस्थाश्रमेऽनुभूयमानानि दुःखशतानि समनुविन्देत् ? को वा वार्द्धक्येऽपि जननीजनकौ सेवेत ? को वा मनसा वाचा कर्मणा धनेन श्रमेण च पितरौ तर्पयेत् ? कश्च मातृदेवः पितृदेव आचार्यदेवो वा भवेन्नामायुष्मानाज्ञाकरोऽनुशासनपरोऽद्य प्रियतमः पुत्रश्चिरञ्जीवः ? ? ?

नैतावानेव पित्रोस्त्रासः पुत्राधमकृतोऽपि तु, केचित् सुपुत्रा महोदया द्वादशवर्षाणि यावत् विद्यालयेषु निवसन्तो नन्दनकाननसुखमिवानन्दसन्दोहममन्दं भुञ्जन्तो यौवने पदं निदधाना गुरुकुल एव यदृच्छयोपकल्पिते कुमारिकास्वयम्बरोत्सवे स्वोद्योगापकौशलशतैर्गान्धर्वीं विवाहप्रणालीमधुनातनीमाश्रित्य कांचन समानगुणशीलवयोविद्यामनवद्यां प्रेयसीं परिणीय समानयन्ति तदा बहुप्रजः पितात्मनः प्रजापतित्वं धिक्कुर्वन् मूकवेदना अनुभवन्नेव पुत्रेषणासुखभक्षणं भुङ्क्ते परलोकेऽपि च नाकांक्षते पिण्डोदकमात्मजेभ्य इत्थंभूतेभ्यः ! ! !

यदि च कश्चिदद्यतनः सुपुत्रो विद्यालयगुरूणां गुह्यातिगुह्यं मूलमन्त्रादेशं सरहस्यं सम्प्रदायदीक्षाव्रतं सर्वात्मना गृहीत्वा प्रशिक्षणलाभाय पर्यटनानन्दानुभवाय च समुद्रस्य परेपारं विदेशान् गन्तुं वल्गति तदा विश्वामित्राय हरिश्चन्द्रेणेव तत्पित्रा धनप्रबन्धोऽवश्यं विधातव्यो भवति । केचित्पुत्राः पुत्र्यो वा काश्चिदाजन्मब्रह्मचारित्रं वा कौमारव्रतं वा रक्षितुं कामयन्ते । एतदपि पुत्रेषणापराधिभिः पितृभिरात्मदोषस्य दण्डोऽयमिति सह्यतां नेयं स्यात् । केचित्पुनः पुत्राः पुत्र्यश्च नेतृत्वमेव स्वजीवनोद्देश्यमभिकांक्षन्तस्तत्साधनत्वेनात्मनो राजनीतिप्रावीण्यमाश्रयन्ते विद्यार्थिसङ्घस्य मन्त्रिपदस्वीकारादारभ्यैवैवंविधा यस्य कस्यापि विरुद्धं यत्र कुत्राप्यान्दोलनान्याचरन्तो लोकनायकत्वमभ्यस्यन्ति ! अपरे पुनः केचन तनुजास्तादृशा विद्यानुरागिणो निष्पद्यन्ते ये हि दिवानिशं पुस्तकालये वसतिं प्रकल्प्य तत्रैव सततं सुहृद्भिः साकं विद्वद्गोष्ठीसुखं निर्विशन्तो निरवकाशास्तिष्ठन्ति, ततस्ते पितरौ सेवितुं न पारयन्ति ! अन्ये केचित् कलाप्रियाः कलाकाराः साहित्यसेविनो लेखकाः कवयश्चित्रकाराश्चित्रपटसङ्गीतरसिका विज्ञानविशारदा भवितुमिच्छन्ति । ततो हि ते सदासर्वदा कल्पनालोके विचरन्तो मोमुह्यन्तेऽतः पित्रोः सेवासौकर्यं न मनागप्यासादयन्ति ! अन्ये च केचन वाणिज्यव्यवसायदक्षतां बिभ्रतोऽर्थशास्त्रयोग्यतामसाधारणीमात्मनः प्रख्यापयितुकामा आत्मजाः क्षणादेव कौबेरीश्रियमात्मसात्कर्तुं नवनवानव्यापारेषु व्यापारान् प्रतिदिनमुद्घाटयन्ति । पित्रोरजानतोरेवाधमर्णतामङ्गीकृत्य न्यायालयेष्वभियोगपराजिता अकस्माज्जनकं प्रतिभुवं प्रसह्य परिकल्पयन्ति ! केचनाजन्मनो नित्यरोगिणस्तनूजा मातुरुच्चाराः पितुर्विकारा इव शरीरमौषधियुद्धस्य कुरुक्षेत्रं कुर्वाणाः खट्वाशरणा मातापितृभ्यां शुश्रूषणीया भवन्ति । बहवः पुनर्देशभक्ता राष्ट्रसेवकाः समाजसुधारकाः सत्पुत्राः काराकारतीर्थेषु स्वयं तपस्यन्तः सन्तापयन्ति च पितरौ मुहुर्मुहुः ।

इत्थमद्यत्वे पुत्रषणा महती विपत्संकुला प्रतीकारारुन्तुदा विडम्बना गृहस्थानामिति भुक्तभोगा अनुभववन्तो ब्रुवन्ति साश्रुधारं पश्चात्तापमाचरन्तोऽन्तर्दधा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# वर्तमानसमये पाश्चात्त्य नारीशिक्षा, तथा अस्माकम् कौटुम्बिकं जीवनम्

श्रीधरप्रसादपन्तः, (उपाध्यक्षः संस्कृतछात्रसंघः) श्रीदुग्धेश्वरसंस्कृतकालेज, पानीभीत (उत्तरप्रदेश)

...स्त्रीणां शिक्षणे एवं वैदुष्ये च पक्षे भारतीयाः ...जनाः प्राचीनसमयादेव आसन्। भारतीयसंस्कृतेः ...तायाः इतिहासाच्च सिद्धयति यत् वैदिककाले, ...काले एवं हिन्दूकाले च आर्यकुल-ललाम-भूताः स्त्रियः ...पण्डिता आसन् किन्तु ताः सर्वाः आदर्शगृहिण्यश्च ...न्ति स्म।

अद्य भारतस्य शिक्षाशास्त्रिमहोदयाः नारीशिक्षया ...स्य, सामाजिकस्य, पारिवारिकस्य चार्थिकावस्थायाश्च

---

...: प्रगतिशीलेऽस्मिन्नव्यभव्ययुगे विशेषतश्चास्माकं ...न्ने भारते देशे !!! केचित्त पुनः सन्ततिकृतो- ...रीक्षिता व्यथिता विक्लवाश्च जनका जनन्यश्च ...मनः पुत्रेषणाफलं भुञ्जन्तो भद्रकुलोत्पन्नत्वात्सभ्य- ...बोधाद्रान्तर्व्यथामिमां निगूहन्ति तनयतनूजाकृतो- ...ांश्च सर्वान् तूष्णीं सहन्ते !!!

सत्येवं प्रत्यक्षानुभवे यदि वयमात्मनो गृहस्थाश्रमं ...मयं स्वस्थं निष्कण्टकं विपद्बाधारहितं सफलं च ...च्छामहे तदादौ प्रजोत्पादने तच्छिक्षणे च संयमं ...श्रयेमायमेव श्रेयाननुत्तमोऽभ्युपायः। यदि च ...ञ्चारमपि संयमिनो वयं न भवितुं पारयामस्तदा ...निकेऽस्मिन् युगे भोगवादिभिराविष्कृतैः कृत्रिमैः ...धनैरपि च सन्ततिनिरोधं कुर्याम, नो चेत्पुत्रेषणाद्यत्वे ...री विडम्बनेति सुस्पष्टमेव। साधूक्तमेतत्:—

"एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम्।
पुत्राणां दशभिः साकं भारं वहति गर्दभी" ॥१॥
"अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः।
सकृद्दुःखकरावाद्यावन्तिमस्तु पदे पदे" ॥२॥

संशोधनाय प्रयत्नशीलाः सन्ति। किन्तु मम संमतौ अस्य परिणामः प्रतिकूलएव दृष्टिगोचरो भवति। अस्य प्रमुख हेतुरयं यत् योरोपदेशस्य एवं भारतस्य संस्कृतिः, सामाजिकपरिस्थितिः, शिक्षादीक्षाश्च आदिकालादेव महद्भिन्नाः सन्ति।

अस्माकं परम्परागतविचारधारा एवं मनोवृत्तीश्च पूर्णतया विनाश्य, तथा हठात् पश्चिमीयविचारभारं भारतीयजनानां जीवने निक्षिप्य, पाश्चात्यशिक्षा-समर्थक-शास्त्रिवर्गोऽद्य भारतीयमानवस्य कौटुम्बिकम् जीवनम् सुखमयम्, शान्तिमयं, आनन्दमयञ्च निर्मातुं सफलो भविष्यति किम्?

पाश्चात्यवातावरणेन प्रसारितेयं नारीशिक्षा अस्मभ्यम् मानसिक एवं आत्मिकशान्तिप्रदायिनी भवति किम्? अलम्, अनया पद्धत्या शान्तेः कामना तु मृगमरीचिका एवाऽस्ति। आधुनिकमानवसमाजः नावगच्छति इति न, किन्तु अवगच्छत्येव यत् वर्तमाननारीशिक्षापद्धतिः अस्माकं कौटुम्बिकजीवनाय पूर्णरूपेण घातिका अभवत्। आंग्लशिक्षा एवं सभ्यता पूर्वकालादेव हिन्दूसंस्कृतिम्, भारतीयसभ्यतां, शिक्षाम् तथा हिन्दूधर्मम् पदाक्रान्तमकरोत्।

आधुनिकी महिलाशिक्षापद्धतिः योरोपीयानां शिक्षाऽस्ति। तस्यां शिक्षायां पवित्रहृदयानां भारतीयनारीणां आदर्शाः न सन्ति अपितु विषयासक्तानां पाश्चात्यनारीणामुग्रता विद्यते। यस्या मध्ये विलासिताऽपि स्पष्टतया परिलक्षिता भवति।

साम्प्रतिकी शिक्षिता भारतीयमहिला आत्मशीलं, सदाचारं, संयमं, लज्जां तथा सेवाभावञ्च न जानाति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृतपत्राणां विहंगमावलोकनम् उपयोगित्वं च

डा० शंकरलालशर्मा कल्याणकैम्प (बम्बई)

सातत्यव्यावहारिकशब्दनिधिज्ञानाधिगमाय देश-विदेशानां वृत्तावबोधनाय लेखलेखनकलाप्रावीण्योपबृं-हणाय मनोविनोदरंजनाय घटितघटनासमाचारवृत्ताय च भिन्नभिन्नभाषाभिज्ञमानवौघानां कृते भिन्नभिन्न-भाषाणां मासिक-पाक्षिक-साप्ताहिक-दैनिकपत्राणां अनवरतं प्रकाशनं, अध्ययनं, दर्शनञ्च नितरामावश्य-मिति निर्विवादम। अनया रीत्या कोपि जनः समाचारा-वबोधने कीदृशं काठिन्यमाप्नोति न हि। अयञ्च सरलः सुगमः पंथा अवलोक्यत एव। संदेशनिर्वाहक-यंत्री-संलापयंत्रीद्वारा च इतोऽपि अधिकतरसरलं सौविध्यं प्राप्यते समाचारोपलब्धौ। परं अन्योन्यमार्गेषु विभवभूयिष्ठं वरीवर्त्ति। भिन्न २ भाषाणां मासिक-पाक्षिकसाप्ताहिकदैनिकपत्राणां प्रकाशनं प्रतिमासं प्रति-दिनं च बोभोति बाहुल्येन। नवीननवीनानि चाविर्भ-वन्ति दैवानुकूल्यात। तानि जनतया क्रीयन्ते वाच्यन्ते सोल्लासेन सोत्साहेन च। निश्चयमेव इतरभाषा-बहूनि पत्राणि भूरिसंख्यायां "संस्कृतात्" ऋते प्रकाश्य-प्रहीयन्ते च विदेशेषु प्रत्यहम्। अहो! महती खेदस्य वार्त्तास्ति। संस्कृते तु पंचषा मासिकपत्रिका एव न्यूनाति-न्यूनसंख्यायां दृग्विषयीचेक्रियन्ते, पंचषाणि च साप्ताहि-कानि। दूरे आस्तां कथा दैनिकस्य। किमितोऽपि दु:ख-तरं नु? संस्कृतसूरिकेन्द्रायमाणे भारतखडे अन्यभा-षामयानि दैनिकपत्राणि प्रत्यहं प्रकाश्येरन्। के-संस्कृतमेव शापभारभवेत्, इति विलोक्य ताम्य-

---

किन्तु नरस्य कार्यक्षेत्रे उद्दण्डतया स्थातुं स्पर्धां करोति।

आधुनिकशिक्षायामस्माकम् कौटुम्बिकं, गार्ह-स्थिकञ्च जीवनं सुखि तथा रसपूर्णम् निर्मातुं अध्यायाः न सन्ति। तथा त्यागस्य, तपश्चर्यायाः सहिष्णुतायाः, समर्पणस्य, शमदययोः एवं सदाचारस्य भावाङ्कुराणि पल्लवितानि पुष्पितानि च कर्तुं सामर्थ्ययम् नास्ति।

अस्यां पाश्चात्यशिक्षायां तु वासनायाः विविधरङ्ग-रञ्जितोन्मत्तयौवनस्याऽऽकर्षणम् अस्ति। वर्तमानसमये पाश्चात्यशिक्षणपद्धत्या, नारीशिक्षासमर्थक-महानुभा-वेभ्यः ईश्वरसाक्षितयाऽहं प्रष्टुकामोऽस्मि यत् अनया शिक्षणपद्धत्या देशस्य, राष्ट्रस्य, पारिवारिकस्य, सामा-जिकस्य, नैतिकस्य चोन्नतिः किम्?

वर्तमानशिक्षायां शिक्षितायाः (ग्रेजुएट)गृहे एकतः क्षेत्रे बालकानां रोदनं विद्यते, तथा अपरतः स्वं पतिम्प्रति तस्या कटु-वाक्प्रहारः। किं कुर्वन्तु ते, लो-लज्जया एवं कुलस्य प्रतिष्ठाया भयेन ते पतिदेव शिक्षिताया एवं निनादं मूकीभूय शृण्वन्ति।

महतो दुःखस्य विषयोऽस्ति यत् सीता, सावित्री, दमयन्ती, गार्गी, मदालसेत्यादीनां, सतीसाध्वी-नारीणाम् उत्तराधिकारिण्यः स्त्रियः अद्य पतिव्रतधर्माय, शीलाय, सत्याय च तिलाञ्जलिं दत्वा सीता-सावित्री-सदृशीनां नारीणां निन्दां कुर्वन्ति।

पाश्चात्यरङ्गेषु रञ्जिता आधुनिकी नारी अद्य चलचित्रेषु नायिका(अभिनेत्री)रूपे, एवं सौन्दर्य-स्पर्धायाः हाटके स्वकीयं विकारग्रस्तरूपं दर्शयित्वा गौरवान्वितञ्चावगच्छति। अत्यन्तलज्जास्पदविषयो-हिन्दू, हिन्दी, हिन्दुस्तानवासिभ्यो जनेभ्यः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...न:। इद स्फुटं प्रतीयते यत् संस्कृतभाषां प्रति लोक- ...संस्कृताभिमानश्च न दरीदृश्यते। औचिती अभि- ...वंहीयान् अनुरागः, वरीयसी आदृतिः, सध्रीची- ...प्रीतिश्च सुतराम। केवलया किं भवेत् वाचिक्या ...नुभूत्या? अतः प्रभूताः पत्रिका जनिं लब्ध्वापि ...विलीना बोभुवति विज्ञवाचकनैपुण्यात् रिक्थक्रो- ...त्वाच्च। किं नास्तीदं व्रीडायाः स्थानं अस्माकं कृते? ...ाकं दौर्भाग्यवशात् एषा संस्कृतगीः अशरणी ...माणा, अनाद्रियमाणा मृषोद्यंकलङ्कत्वसाराप्येत ...भाषासम्भाषणेन? वयं मौनिमुनय इव, समाधि- ...योगिन इव, चित्रचित्रिताकृतय इव, कीलकीलिता ...यंत्रयंत्रिता इव भीत्यवलम्बिता इव स्तब्धाः मूका- ...ष्ठेम इति महदाश्चर्यं दैवदुर्विलसितस्य? किमेषा- ...वार्त्ता नास्ति? या संस्कृतभाषा अस्माकम् आद्या, ...जननी, ऋषिमुनिभिः संसेविता, परिपोषिता, परि- ...ता, इतरजन्मप्रदायिनी हेयदृष्ट्या दृश्येत? मह- ...श्चैतत्। "न हि प्राणात् प्रियतरा, लोके काचन ...ते। वरिष्ठा सुरवाण्या च विना संस्कृतभाषया"।

सम्प्रतीदं विचारणीयमास्ते। समस्तायां भारता- ...नि कियन्त्यः संस्कृतपाठशालाः, विद्यालया,: विश्वविद्या- ...लयाश्च प्रतिष्ठापिताः सन्ति। तत्र वैदुष्यप्रवीणाः, ...पण्डितप्रकाण्डाः, अध्यापकाः प्रोफेसराश्च छात्रान् ...अध्यापयन्ति? यदि ते तान् कर्तव्यधिया प्रेरयेयुः, ...प्रचारधिया समुत्तेजयेयुः यत्रतत्र मातृभाषा ...प्रचारमनीषया उत्साहयेयुः प्रतिज्ञापयेयुश्च। स्वयमपि ...र्कीं सहानुभूतिं याथातथ्यं सहयोगं सौजन्यं ...हार्दं प्रदर्शयेयुश्च साहाय्यवितरणेन संस्कृतस्य ग्राह- ...सम्पादनेन। संस्कृतस्य गौरवगरिमाणं, मानमर्यादि- ...मानं, प्रतिष्ठाभूमानं, प्रियतास्वादिमानं च रक्षितुं पाल- यितुमलंभविष्णवो भवेयुः। इत्यत्रास्ति न कापि सं- दिग्धिः। सा पौनःपुण्येन उन्नतिशिखरमारूढा तिष्ठेत सपदि। विद्वद्वियति धवलिम्नाद्युत्या रजनीकर इव विद्योतेताजस्रं। हन्त! परकीये राज्येऽपि संस्कृतस्य एतादृशी दयनीयदशा नास्त। यादृशी अस्मिन् स्वाधी- नताक्षेत्रे स्वतन्त्रे भारते विलोचनपथमवतरति। अलं विशिष्य कथनेन। यदि भाषायामस्तीदृशी परिस्थितिः तर्हि संस्कृतपत्राणि ग्रहीतुं को नाम उत्सहेत उत्कण्ठेत च इतिविविधा चिंताततिः खटखटायते मे मनसि अश्रान्तम्। कदा एषा भूयो विलसिष्यति चन्द्रचन्द्रिकेव प्राप्तद्विगुणितगरिमगरिष्ठा विबुधविहायसि।

स्वाधीनताप्राप्त्यनंतरं कैश्चन महानुभावैः संस्कृत- विचक्षणैः यथाशक्यं संस्कृतभाषायां पत्राणि प्रकाशयितु माविष्कर्त्तुं च भृशं प्रयासि। परं दौर्भाग्यत्वात् कानि- चित् अनियतरूपेण कथंकारं प्रकाश्यमानानि पंचष- मासावधौ मरणासन्नतांप्राप्त्वापि दैवप्रातिकूल्यात् सपद्येव प्रच्छन्नानि अजायन्त। इतराणि च संस्कृत- ज्ञानां अननुरागित्वात् अद्यावधि जीवन्ति अपि अन्ति- मश्वासान्श्वसन्ति कदा २ दृग्गोचरतां दर्शनतां च आ- यान्त्येव। हन्त! संपादकवराकाः ससाहसं सधैर्यं पर- स्सहस्राणि कष्टानि सोढ्वापि क्रियमाणप्रयत्नशता अक्षमा इव पत्रप्रकाशनं चिकीर्षन्ति कथं कारसौविध्या- धिगमात् कुर्वन्ति च काठिन्येन। पौनः पुन्येन वाच- कवरिष्ठान् दयालुग्राहकसन्दोहान् संस्कृतरसिकान् अनु- रुंधन्ति, मधुराक्षरैः प्रियैश्च अनुनयन्ति, सकरुणं विल- पन्ति प्रलपन्ति आलपन्ति च ग्राहकोपबृंहणाय संरक्षा- यै च। साहाय्यं प्रतीक्षन्ते दशदिक्षु चक्षुर्निक्षिप्य, उत्क- तया च अभिलपन्ति पौष्कलद्रव्यराशिम्। हा! अन्ते नैराश्यं, नैष्फल्यं, औदास्यं वैकल्यं, दौर्मनस्यं च लभन्ते



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



किंकर्त्तव्यविमूढतामश्नुवते । भारत एव अस्याः कर्त्तनं विमर्दनं कर्त्त केचित् नायकशिरोमणयः अविवेकवै-कल्यात् इच्छन्ति ! को लाभः स्यात् एनां बहुश्रमैकसाध्यां प्रवीणछात्रैकवेद्यां अत्यायासबोध्यां पठितुं इति विज-ल्पन्ति । इत्थंभाविकां विफलतां बोभूयमानां त्रिविच्य आलोच्य च चेखिद्यमानाः तातप्यमाना अग्रे किं भा-वीति निर्णेतुं निश्चेतुं उन्मनायन्ते अहर्निशम् । न जाने इमानि प्रचलितानि पत्राणि अग्रे चलिष्यन्ति वा प्रगाढत-मसि प्रच्छिन्नानि भविष्यन्ति इति तु सर्वान्तर्यामी भग-वान् वेद । परं मे मनस्तु सन्देहायते परिस्थितेः निरी-क्षणादेव । ईदृशी अस्ति आस्माकीनानां संस्कृतपत्राणां दुःखावहा चिन्ताजनिका च दशा । यां दर्शं २ चेतः दन्दह्यते तातप्यते चान्तःकरणं सातिशयम् । आस्मा-कीना भारती अस्माभिः अनाद्रियमाणा अन्यत्र विदेशेषु अनिवार्यरूपेण विद्यालयादिषु निर्धार्यते निःशङ्कं, सो-ल्लासं अध्याप्यते च । स्वदेशं भारतं उज्झित्वा जर्मनीदेशं यियासन्ति भारतीया संस्कृतमध्येतुम् । अहो ! भारतवर्ष ! त्वदीयानां पुत्राणां एषा दशा संजातास्ति साम्प्रतम् ।

कथनस्य नास्ति आवश्यकता । यत् पण्डितसमुदायः संस्कृतप्रेमिनिकरः आलस्यं विहाय इमां कर्त्तव्यधारां अविगणय्य जागृयात् निद्रातंद्रायाः सपदि । तर्हि निश्च-प्रचं बोभूयात् संस्कृतपत्राणां प्रभूतता । बोभूयमानो ह्रसिमापि मंक्षुदूरीभवेत् । पत्राणां संक्षिप्तपरिचयः—

भारती—मासिकी जयपुरतः ६वर्षेभ्यो निःसरति । अस्याः प्रकाशनं नयनमनोहरं नियमितम् । विविधमंजु-ललेखविभूषितं प्रगतिविधायकं पत्रं मन्ये । वाचकाः अकंपयानुकंपया साफल्यपदमारूढं संस्कृतज्ञानां हृदयानि आह्लादयति नितराम् । अस्याः संपादकमहाशयाः सुयोग्याः, संस्कृतपरिपोषिणः उदारचेतसः सन्ति ।

भवितव्यं—नागपुरतः ४वर्षेभ्यः नियमितवेलाया रोचकलेखैः हास्यविनोदपरिपूर्णैः रम्यैः विभूषिता पत्रिका जनमनांसि रंजयित्वा प्रगतिमासादयति निकामम् । अस्य संपादकानुभावाः श्रीभा०वर्णेकरएम्०ए० काव्यतीर्थाः पीढितीयुक्ताः ।

संस्कृतं—अयोध्यातः २५वर्षेभ्यः पं०कालिप्रसाद-शास्त्रिसंपादकत्वेऽश्रान्तं प्रकाशते । एभिः महानुभावैः कौटिम्बिकसहस्राणि कृच्छ्राणि सोढ्वापि मध्येमार्गं विघ्नशतैः प्रतिहतैः राष्ट्रभाषांदोलने साफल्यं नाध्यगामि । तदपि द्विगुणितोत्साहेन अर्धसाप्ताहिकं कर्तुकामैः महान् प्रयासः कृतः परं न किमपि सिद्धम् ।

साकेतः—अयोध्यातः साप्ताहिकरूपेण कदा-कदा दृष्टिपथं आयाति असहयोगात् ग्राहकवृंदानाम् । अस्य संपादकाः पंडितप्रकांडाः दिवानिशं प्रयतन्ते ।

वैजयन्ती—बालकोटतः (प्रथमं मधुरवाणी मासिक-रूपेण प्रकाशते स्म) अधुना साप्ताहिकी जाता । आकार-प्रकारेण सुशोभना आकर्षिका विविधभावलेखालंकृता कदाऽऽ दर्शनसुलभा । अस्याः संपादकाः पंडितकोविदाः सरलचेतसः उदारधियश्च सन्ति ।

पण्डितपत्रिका–काशीतः निःसरति स्म साप्ताहिकी साम्प्रतं पंचषमासेभ्यः दर्शनदुर्लभा । अस्याः संपादक-मंडलं सुमहत् । सर्वे विद्वद्वरिष्ठाः, लोकप्रियाः, तपोमूर्त-विशेषांकं गीतानामानं प्रकाशितुकामैः अभ्यर्थना कृ-लेखेभ्यः । परं केनापि न प्रेषितः । ततः सपदि नयन-गोचरता अभवत् ।

सुप्रभात-सूर्योदयौः—अधुना अनयोः पत्रयोः ऐति-हासिकी वार्ताऽजायत ।

अधुना अधस्तात् केचन हिताधायका उपाया अस्मैत्कस्सेवायां प्रस्तूयन्ते । येषां सक्रियोपयोगेन



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...विशो लाभो निष्पद्येत इति मे दृढीयान् विश्वासः।

१—किमपि पत्रं दयालुग्राहकाणां अनुकंपामन्तरा सुदीर्घं प्रचलितुं दुष्छुतरम्। अतः ग्राहकाभिवृद्धये समुचितोपाया अवलम्बनीयाः। विज्ञापनप्रकाशनेन उपदेश ...भाणनेन च जनता उत्साहनीया समुत्तेजनीया।

२—आर्थिककोषापर्याप्तत्वात् पत्रचिरजीवित्वं ...तरां असम्भवम्। द्रव्येण सर्वे वशाः, अर्थसंचयप्रबंधः ...रणीयः केनापि प्रकारेण।

३—संस्कृतभाषाप्रचाराय ग्राहकसंपादनाय च ...चन वक्तृत्वपाटवयुता उपदेशका नियोक्तव्याः। ...गरे२ ग्रामे२ भ्रमित्वा संस्कृतोपयोगित्वं महत्वं च ...दर्श्य ग्राहकतास्वीकरणे जनता प्रलोभनीया।

४—प्रत्येकबृहन्नगरात् संस्कृतपत्राणि (मासिक-...त्रिक-साप्ताहिकरूपेण) बहुलतायां प्रकाशनीयानि। ...नोचीनसामग्री। रोचकलेखाः, मनोहरविशेषाङ्काः, ...यग्राहिककविताः, सामयिकसमाचारनिबन्धाः, अद्भुत-...यविनोदवृत्तान्ताः प्राकाश्यं नेयानि।

५—वार्षिकमूल्यं समुचितं स्यात्। येन प्रत्येकजनः ...तुं भवेत्।

६—पत्रेषु व्यापारिकविज्ञापनानि हिन्दीभाषायां अवश्यं स्थापनीयानि येन महत्साहाय्यं भविष्यति पत्रप्रचालनाय।

७—पंडिताः सर्वदा अभ्यर्थनीया भाषोद्धाराय। छात्रवृंदाश्च उद्बोधनीयाः पत्रं पठितुं आनायितुम्!

८—यदि स्वकीयव्यर्थवसुव्ययकरणात् प्रत्यहं पणकद्वयं पृथक् स्थाप्येत स्थायिकोशे, एकहायनानन्तरं कियद् विपुलैराशिः संकलितः संचितश्च स्यात्। सत्यम्। एकादशरूपकाणि आणकचतुष्टयं च। अनया युक्त्या महान् लाभो भवेत् उभयोः।

९—अवरुद्धेषु पत्रेषु ग्राहकाणां धनं विनष्टीभवति। येन बुभूषन्तः ग्राहका अन्यस्मै पत्राय साहाय्यं दातुं औदासीन्यं व्यंजयन्ति। संपादकानां कामपि प्रार्थनां सूचनां याञ्चां श्रोतुं बधिरायन्ते। अतः एतद् आशु दूरीकरणीयं।

यदि औपरिष्टनिगदितोपायाः याथातथ्येन क्रियेरन्, तर्हि ह्यविवादं महान् उपकारः फलिष्यति संस्कृतपत्राणाम्। उन्नतिश्च शीघ्रतरा भविष्यति इत्याशासेऽहम्।

———



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# विश्वाशान्तेरुपायाः

श्रीकाशीनाथशास्त्री, संस्कृतकालेज, नयनादेवी अम्बाला

वर्तमानकाले परितोऽशान्तेर्ध्वनिः श्रूयते। प्रथमन्तु राजनैतिकक्षेत्रे एवाशान्तिर्वर्तते, ये देशाः ये जनाश्च स्वं स्वं विजेतारं जानन्तिस्म, त एव विजयं प्राप्यापि अविजेतारस्सन्ति। आर्थिकक्षेत्रेऽप्यधिकाऽशान्तिर्वर्तते। देशे देशे श्रमिकाणां यन्त्रपतिभिः सार्कं, कृषिकाणां स्वामिभिः सार्कं, पदाभिलापुकाणां शासकैः सह सेवकस्य स्वामिना सार्धं रूप्यकेभ्यः संघर्षो वर्धते। स्थाने स्थाने-आन्दोलनानि जायन्ते प्रतिदिनं समाचारपत्रेषु आन्दोलन-समाचाराः पठयन्ते। स्वपक्षानुमोदाय भाषणानि भवन्ति। समाजे शिक्षास्थानेऽपीयमशान्तिः परिदृश्यते। अन्यक्षेत्रेषु अपि अशान्तिरेव वर्तते। अद्य जनाः स्वं स्वं कर्तव्यं न जानन्ति। अद्य तु या याचना वर्तते, सा केवलाऽधिकाराणाम्। अहो? अद्य समाजस्य प्राचीना व्यवस्थाः शिथिलाः जाताः। अहो? अद्य मानवस्य नैतिकपतनं भवति। एवं वयं पश्यामः, यद् कस्मिश्चित् क्षेत्रेऽपि शान्तिर्न दृश्यते। न जानेऽस्माकं पूर्वजा अस्मिन् विचारे तत्पराः अभवन्? यत् लोहपाषाणाभ्यामग्निरतीव कठिनतया ज्वलति, चेत् अस्य स्थानेऽन्यत्किमपि साधनं भवेत्, तथा च ईदृशो दीपको भवेत्, यो वायुना प्रकाशहीनो न भवेत्, तथा च द्वयोर्होरयोर्विंशतिमीलपर्यन्तं गमनाय किमपि साधनं भवेत्। तदा वयं जानीमः यत् जीवनमधुना सुखमयं वर्तते। परं वर्तमानसमये विज्ञानेन वयमतीव दूरे आनीताः, यत्र वयमाश्चर्यचकिता भवामः। विद्युतः प्रकाशः व्यजनम्, वाष्पयन्त्रम्, टेलीफोनयन्त्रम्, आकाशवाणी, मोटरयानम्, वायुयानम्, अणुशक्तिः, इत्यादीनि सुगमताया बहूनि साधनानि सन्ति। वर्तमानसमये दिल्लीतः प्रयागगमनाय होराद्वयं समयो वर्तते। आकाशवाणी-यन्त्रेण पञ्चशतमीलदूरे स्थिता वयं नेतॄणां भाषणानि शृणुमः। भयङ्कररोगाणां नाशाय औषधयः निर्मिताः। विद्युत्प्रकाशो वायुना प्रकाशहीनो न भवत्यद्य। अहो तदपि शान्तिर्न दृश्यते। अद्यत्वे तु उदरपूरणायान्नं नास्ति। शरीराय वस्त्रं न लभ्यते। अहो विचित्रा दशा। वस्तुतः अस्या अशान्तेः किं कारणम्?

वस्तुतः अस्या अशान्तेः कारणं वर्तते, परस्पर-अविश्वासः, जातीय-द्वेषः, सत्यस्याभावः गान्धिनः अहिंसाया अभावः। तथा चार्थिकाशान्तिः। यन्त्राणामाविष्कारेण जना द्विपक्षे विभक्ता जाताः। एकतः धनिकवादः प्रधानः। समयेऽस्मिन् देशस्य व्यवसाय एव न, अपितु राष्ट्रनीतिः, युद्धनीतिः, अस्त्रशस्त्रशाला (कारखाने) धनिकानां हस्त एव वर्तन्ते। भारतस्याशान्तेर्मुख्यानि कारणानि धनिकवादः यन्त्रयुगादीनि एव वर्तन्ते। यन्त्रयुगेन यावती वृद्धिः प्राप्ता—तावती एव देशे निर्धनता आयाता। वर्तमानयुद्धसंघर्षणामिदमेव कारणं वर्तते। अत एवाद्ययावत् अमरिका, जर्मनी, जापानेटलीदेशैः सार्कं सन्धिप्रस्तावः स्वीकृतो नाभवत्। गतमहायुद्धेन देशे आर्थिक-दशा परिवर्तिता। यावत्पर्यन्तं साधारणविभागस्यापि जनेभ्यः वस्त्रान्नयोरभावः दृश्यते। अधिकपरिमाणेऽन्नमन्नविभागे नष्टं जातम्। अवशिष्टमन्नं विपणी-चौरैः सम्यक् तया विभागे न आनीतम्। अद्य मानवस्य पतनं भवति। बहुभागेषु अशान्तिर्भवति। अनया समाजस्यापि



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# निराशान्धकारे आशाप्रदीपः

सरसंघचालकः श्रीमाधवराव सदाशिवगोलवालकरमहाभागः

इदानीमस्माकं देशस्य वातावरणं परस्परमविश्वा-सेन, तथा सद्भावनाया अभावेन परिपूर्णम् स्थितिः चेयमत्यन्तं खेदाऽऽवहा। किन्तु तथापि नैराश्यस्य नाऽऽवश्यकता। एतस्य सोयमेवोपायो यत् वयं पार्थक्यस्य सर्वा अपि भावनाः समूलं नाशयामः। ताः सर्वा वृत्तीर्वयं निःशेषयामो, या मातृभूमेरेकतां प्रति अस्माकं निष्ठां बहुधा बाधन्ते। एतदुद्देश्यस्य पूर्तये प्रथमेव प्रभावशाली पादन्यासोऽस्ति यत् संविधानस्य संघात्मिकां रूपरेखां परिवर्त्य, पूर्णस्वायत्तानामर्धस्वाय-त्तानां वा राज्यानां सत्ता समाप्ता क्रियेत। भारतेऽस्मिन् एकराज्यस्य एकस्या विधानसभायाः, एकस्याः कार्यपा-लिकायाश्च स्थापना क्रियेत। या हि प्रादेशिकेन, सांप्रदायिकेन, भाषासम्बन्धिना, अन्येन वा केनचित्प्र-कारेण, पृथक्त्ववादस्याऽभिनिवेशेन निर्मुक्ता भवेत्। शासकानां कर्तव्यमस्ति यत्ते साहसं धारयेयुः। घटनानां च यथार्थदृष्टिकोणेन निरीक्षणं कुर्युः। संमुखोपस्थितं भयंकरसंकटं परिजानीयुः। अज्ञजनानां पथिच्युतस्य विरोधस्य सांमुख्यं कुर्वन्तस्ते एकात्माकं संविधानं निर्मीयुः। इदं स्पष्टमस्ति यत् कांश्चित् केवलवावदूकान् विहाय, संपूर्णोऽपि जनसमाजः एतत्कार्यस्य प्रबलं समर्थनं कुर्यात्। तथा अस्माकं वर्तमाना नेतारः अग्रिमसंन्तत्यर्थं भारतस्य एकात्मतां निर्माय सर्वदार्थं पूज्यतां प्राप्स्यन्तीति।

---

...निकपतनं जायते। तथा विज्ञानस्य स्वामिस्थाने भृत्यता ...ते। अद्यत्वेऽन्यदेशोभ्योऽन्नं भारतेऽऽनीयते। ...मतीव लज्जाया वार्ताऽस्ति। तथा च देशे निरक्षरता, ...रित्रहीनता चापि वर्तते। अधुना तु देशे निरक्षरता ...स्यति। परं पर्वतीयमण्डलानां बहुभागेषु अद्य यावत् ...र्तते। अद्यत्वे योयस्य भावना समाजे न वर्तते, परं ...गस्य भावना वर्तते। विलासितया सक्ताः जनाः ...न्ते! अधुना सत्य-स्पष्टवादितादीनां गुणानां समाजे ...दरो नास्ति, परं असत्यविश्वासघातादीनां दुर्गु-णानामादरः समाजे भवति। अनेन प्रकारेण ज्ञायते, ...न् युगोऽयमशान्तेर्वर्तते।

अशान्तेः पूर्वोक्तानां कारणानां दूरीकरणेन शान्ते-...गोऽवश्यमेव आगमिष्यति। परमियं शान्तिः भारते ...क्रियारूपेण करणीया। अनेन प्रकारेण सर्वे जनाः ...न्नताः भवेयुः। तेषां नैतिक-उन्नतिर्भवेत्। सर्वे जना ...स्वं कार्यं प्रसन्नतया कुर्वन्तु। निर्धनताया रोगाणाञ्च ...नामापि न भवेत्। समाजस्य व्यवस्था सुष्ठुभवे-त्। स्त्रीणां समाजे आदरो भवेत्। मनुनाऽपि उक्तं —

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः" तथा स्त्रियश्च-रित्रवत्यो भवन्तु। राज्यव्यवस्था चापि सुष्ठु भवेत्। अद्यत्वे समानताया भावनाया भावना समाजे वर्तते। आर्थिकक्षेत्रे धनस्य व्यवस्थापि सुष्ठु भवेत्। अतः आर्थिकक्षेत्रे धनिकवाद-स्थाने साम्राज्यवादितया भवि-तव्यम्। आर्थिक, सामाजिक, राजनीतिक, नवीनस्था-पनायां मानवानां दृष्टिकोणपरिवर्तनस्यापि आवश्यकता वर्तते। यावत्समयं यथालाभसन्तोषस्य भावना न भविष्यति, तावत्समयमार्थिकदृष्टिकोणस्य सुचारुभावना मानवेषु न भविष्यति। ग्रामेषु शिक्षाया औषध्यालयानां प्रबन्धो भवेत् तेभ्यः धनग्रहणाय राजकीयनिधि [बैंक] भवेत्। वाचनालयानामपि व्यवस्था भवेत्। यावत्-समयमध्यात्मचिन्तनं मानवेषु न भविष्यति, तावत्समयं "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन" अस्य मार्ग-स्यापि प्रवृत्तिर्न भविष्यति। न यावत् भगवन्निष्ठा भवि-ष्यति, तावत्समयमशान्तिर्न नश्यति। अतः पूर्वोक्तकार-णैरेव विश्वशान्तिर्भवितुमर्हति।

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सम्पादकीयम्

# 'राजस्थान-संस्कृतसाहित्यसम्मेलनस्य' षष्ठं वार्षिकाधिवेशनम्

संस्कृतानुरागि महाभागैः संस्कृतपत्रेषु पठितमेव भवेत्तदिदं वृत्तं यदस्मिन् वर्षे शेखावाटी-प्रान्तस्य सीकरनगरे राजस्थानप्रान्तीयस्य संस्कृतसाहित्यसम्मेलनस्य वार्षिकमधिवेशनं भविष्यतीति। आसीदस्य समयो दिसम्बरमासस्य, जनवरीमासस्य वा अन्तिम-सप्ताहः सुनिगतः। किन्तु नानाविधैः कारणैस्तस्मिन् समये तदिदमधिवेशनं कर्तुं नाऽपारि सीकरनगरीयैः संस्कृतसेवकैः। सम्प्रति फर्वरीमासस्य ४-५ दिवसयोः ( माघकृष्णाष्टमी नवम्योः ) तदिदमधिवेशनं सीकर-नगरे महता समारोहेण सम्पन्नमभूत्। एतस्याध्यक्षो-ऽभूत् 'राजस्थानसेवाऽऽयोगविभागस्य' ( पब्लिक सर्विसकमीशन ) अध्यक्षः श्रीमान् पं० देवीशङ्करति-वाडिमहाभागः। सम्मेलनस्याऽस्य उद्घाटनसमारोहः अजमेरप्रदेशस्य मुख्यमन्त्रिणः, सुप्रसिद्धसाहित्यविदुषः श्रीहरिभाऊउपाध्यायमहाभागस्य करकमलेन निष्पन्नोऽभूत्। अधिवेशनेनाऽनेन सहैव 'संस्कृत-छात्र सम्मेलनम्', दर्शनपरिषद्, संस्कृतिपरिषद्, कवि-सङ्गीत-सम्मेलनप्रभृतीनि अन्यान्यपि महत्त्वपूर्णानि कार्याण्यभवन्।

सीकरनगरे या स्वागतसमितिर्नियमिताऽभूत्तस्या अध्यक्षः श्रीमान् लाधूरामजोशीमहोदयः, तथा स्वागत-मन्त्रिणौ पं० मन्मथकुमारमिश्र शब्दप्रसादरावतमहा-भागौ। तथा संयोजकोऽभूत् पं० श्रीरघुवीरदत्तशास्त्रि-महोदयः। अधिवेशनमिदं सीकरनगरस्य सुविशाले 'बजाजभवने' समपद्यत। अधिवेशनस्य प्रथमदिने ( अष्टम्याम् ) प्रातः, गणेशस्मरणहवनादिकं धार्मिक-मङ्गलकार्यं समपद्यत। ततः सरस्वतीवन्दनायां कृतायां 'संस्कृतप्रदर्शिन्याः' उद्घाटनसमारोहः प्रारभ्यत। प्रदर्शिन्याः सुमहामहान्ति साधनानि जयपुरप्रतिष्ठित 'भारती' कार्यालयादेव समागच्छन्, यत्र संस्कृतसाहित्यस्य क्रमिक इतिहासः प्रदर्शितोऽभूत। तदिमां प्रदर्शिनीं दृष्ट्वा प्रासीदन्मार्मिका लोकाः। प्रदर्शिन्या उद्घाटनसमारोहः सीकरनगरस्य रवराजश्री कल्याणसिंहमहोदयस्य हस्तेन समभूत्। तदनन्तरं वेदभगवतः शोभायात्रा नगरस्य मध्येमार्गं समभूत, यत्र दर्शकानां भूयान् समवायः समवटत।

एतदनन्तरं विषय-निर्वाचिनी समभ्यविशद्, यस्यां सम्मेलने प्रवेशनीयानां प्रस्तावानां सर्वसम्मत्या निर्धारणमक्रियत। ततः, अपराह्णस्य चतुर्वादनतः सम्मेलनस्य प्रकाश्यमधिवेशनं प्रारभ्यत। मङ्गल-स्वागतगानस्य चोत्तरं श्री हरिभाऊउपाध्यायमहाभाग-स्वीयमुद्घाटनभाषणं प्रारभत। यस्योपक्रमः ( मङ्गलं भगवान्विष्णुः ) इति मङ्गलाचरणपद्येनैवाऽक्रियत। श्रीमता प्रोक्तं यत् संस्कृतमस्माकमवलम्बनम्। एतद्-रक्षा सुतरामावश्यकी। डा० काटजू तथा राजा-महाशयैरुभयैरेव, संस्कृतं प्रति राष्ट्रभाषानिर्माण-सम्मतिः प्रार्थना च कृता। किन्त्वहं विचारयामि किमेतत्सम्भवति? यदि सम्भवति तर्हि सेयं विधिः कथा। किन्तु यदा हिन्दीभाषाया एव व्याकरणं कठिनमितिप्रख्यायते, तदा संस्कृतस्य का कथा? भगवता पाणिनिना तदिदं सुदृढं निर्मितं किन्तु तदिदं कठिनमपि संवृत्तम्। भवन्तो निर्धारयिष्यन्ति यत्सा...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



शिक्षापद्धतिः कीदृशी भवेत् ? हर्षस्य विषयो यद्राजस्थानसर्वकारेण संस्कृतविकाससमितिरेका नियमिता-स्ति। भवतां प्रार्थनया सह मम सोयं प्रथमोवसरः। अहं सम्प्रति एकस्य लघीयसो भागस्य मन्त्री अस्मि, किन्तु सोऽपि साम्प्रतं स्वात्मविलयाय संनद्धः। इत्यादि।

"ततः स्वागताध्यक्षस्य श्रीलाधूरामजोशीमहोदयस्य स्वागतभाषणमभूत्। यत्र प्रोक्तमनेन महाभागेन यत् वैदिककालादारभ्य अद्यपर्यन्तं संस्कृतभाषासेविभिः पण्डितैर्विद्यार्थिभिश्च संस्कृतभाषायाः संरक्षणार्थम-पूर्वा तपस्या कृताभूत्, तस्या एव फलमिदं यत् संस्कृत-भाषाविरोधिनां वैदेशिकानां प्रबलतमाघातं सोढ्वापि सम्प्रति जीवति, गृहे गृहे बीजरूपेण वर्तमाना चाऽप्यस्ति। इत्यादि।"

एतदनन्तरं सम्मेलनार्थं समागताः सन्देशाः स्वागतमन्त्रिणा श्रीमन्मथकुमारमिश्रमहाभागेन समप-ठ्यन्त। सर्वप्रथमं डा०राधाकृष्णनमहोदयस्य, तदन-न्तरं देशमुख, ढेबर, के०एम०मुन्शी, डा०पट्टाभिसीता-रामैय्याप्रभृतीनां सन्देशा अश्राव्यन्त।

एतदनन्तरं प्रधानसभापतेः प्रस्तावः आसां पंक्तीनां लेखकेन कृतोऽभूद्-यत् विज्ञानयुगेऽस्मिन् भौतिकवि-ज्ञानविषये सम्प्रति यत्किञ्चित् शिक्षमाणस्य भारतस्या-स्य महत्त्वं सर्वादिमसभ्यतायाः प्रवर्तकस्य संस्कृतस्यैव कृते परिगण्यते। ततश्च संस्कृतभाषायाः प्रचाररूपमु-द्देश्यमादाय वयमत्र संघीभूताः स्मः। सम्प्रति सङ्घ-स्याऽस्य नेतारं वयं कामयामहे। वैदिकसभ्यताप्रवर्ति-तया भाषाया अस्या अध्यक्षो वैदिकपरिवारजात एवा-पेक्ष्यते। अतएव अहं श्रीदेवीशङ्करतिवारिमहोदयस्य नाम प्रस्तौमि। एतदुत्तरं बीकानेरवास्तव्य श्रीविद्याधर-शास्त्री एम०ए०महोदयोऽस्यानुमोदनं कृतवान्। ततः उदयपुरप्रान्तात् श्रीलक्ष्मीलालजोशीमहोदयोऽस्य समर्थनमकरोत्। सीकरप्रान्तात् पं० श्रीघनश्यामचन्द्र-शास्त्रिमहाभागः समर्थनमकार्षीत्। ततः पुष्पमाल्यस-त्कृतः श्रीतिवारिमहोदयो हिन्दीभाषया स्वभाषणमुपा-स्थापयत्। यत्र संस्कृतभाषायाः, संस्कृतेश्च सम्बन्धे भूयस्तरामाग्रहः प्राकाशि। अनयोरुत्थानस्य सम्बन्धे सर्वैरेव भारतीयैः सुबहु प्रयतितव्यमित्यादि मार्मिकमुदै-र्यत। भाषणमिदं मुद्रितं सभायामेव सर्वेभ्यो वितीर्यते स्म। पठितं च भवेत्सर्वैरेव। एतस्य संस्कृतानुवादः पं० श्रीचन्द्रशेखरद्विवेदिमहोदयेन (जयपुरमहाराज संस्कृतकालेजाध्यक्षेण) समपठ्यत।

एतदनन्तरं स्वर्गतानां संस्कृतसेविनां शोकप्रस्तावः पारितोऽभूत्।

तदनन्तरं राजस्थानीयविधानसभाया अध्यक्षेण श्रीनरोत्तमलालजोशीमहोदयेन संस्कृतस्य, तत्प्रचारस्य च विषये भूयस्तरां मर्मस्पृक् समुदीरितम्। श्रीमता प्रोक्तम्-यद्यपि संस्कृतस्य परिस्थितिः सम्प्रति परिष-र्तिता। केन्द्रीयविधानसभाया आरम्भादद्यपर्यन्तं संस्कृतविषये भूयान् विचारपरिवर्तः समभूत्। प्रारम्भे यदा हि लक्ष्मीकान्तमैत्रेण संस्कृतस्य राष्ट्रभाषात्वस्य प्रस्तावः समुपस्थापितोऽभूत्तदा सर्वैरेव तस्योपहासः कलितोऽभूत्। किन्तु सम्प्रति देशस्य कोण-कोणात्सोर्य घोषः संश्रूयते—यत्संस्कृतस्य सम्बन्धे सम्प्रति सुतरा-मुदारविचाराः काम्यन्ते। श्रीयुतपनिक्कर-के०एम०मुन्शी काटजू प्रभृतयः संस्कृतस्य सुतरां पृष्ठपोषकाः। पूर्वं हि पाणिनि-कात्यायन-पतञ्जलिभिः संस्कृतभाषाया भूयसी उन्नतिः कृता। प्रचारस्य च मार्गः परिष्कृतः कृतोऽभूत्। इदानीमभिनवस्य पतञ्जलेरावश्यकता



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतीयते। सम्प्रति भाषायाः सारल्यार्थं सन्धिषु समासेषु च भूयसो विच्छेदस्यावश्यकता। सन्ध्यादिविच्छेदे कृते भाषा सरला भवेत्। किन्तु तथा कृते प्राचीनग्रन्थपरम्परायाः अवबोधः कठिनो भवेत्। कदाचिदेवं कृते संस्कृतस्य सुस्थिरतायां लुप्तायां, शनैः शनैः संस्कृतस्यैव लोपो भवेदिति भयं भूयस्तरां भवति। यतोहि पुराकाले अन्या अपि अपभ्रंशाद्या बह्व्यो भाषा उत्पन्नाः, क्रमेण विलुप्ताश्च। किन्तु संस्कृतभाषा न नाम नष्टा, यतो हि सेयमासीत्सुस्थिरा भाषा। यदि अद्यत्वे भगवान् व्यासोऽस्माकं सम्मुखे समागच्छेत्तर्हि वयम् अद्याऽपि तयैव भाषया तेन सह संलापं कर्तुं शक्नुमः, या हि भाषा तस्मिन्समये व्यासस्याऽऽसीत्। अत एव आवश्यकं त्विदमेव यत्परम्परागताया भाषाया विकृतिं न कुर्मः। अद्यत्वे संस्कृतभाषां विद्यार्थिनः किमिति न पठन्ति? एतस्य कारणं वायोः (हवा) युगपरिवर्तनमेव। अयं पाठ्यक्रमो विदेशेभ्य एव भारते समागतः। खेदस्य तु सोयं विषयो यत् प्राचीनपण्डितानां परिवारेभ्योऽपि संस्कृतपठनं लुप्यते। संस्कृतपरीक्षाः, आङ्गलपरीक्षाश्च समानान्तरेण कियत्पर्यन्तं परिचलेयुः? हन्त संस्कृत-कालेजः, आङ्गलभाषाकालेज इति विभेदोऽनावश्यकः। सम्प्रति संस्कृतमिदं भारतस्याऽऽत्मसाद् भवेदित्यावश्यकम्। संस्कृतं लोकजीवनस्य भाषा। दक्षिणाञ्चलप्रचलिताः सर्वा अपि भाषाः संस्कृतमिश्रिताः। संस्कृतमिदं न केवलं भारतस्यैव भाषा। डा० रघुवीरमहोदयो बहून् ग्रन्थान् चीनदेशतः समाहरत। अतएव सेयं विश्वव्यापिनी भाषा। इत्यादि।'

ततः श्रीलीलावती (पं० श्रीरघुवीरदत्तशास्त्रिमहोदयस्य पुत्री) अपि संस्कृतप्रचारसम्बन्धे समभाषत यत् महिलाजनेष्वपि सम्प्रति संस्कृतप्रचारस्य महती आवश्यकता।

रात्रौ सङ्गीतस्य, तथा हिन्दीभाषया निबद्धस्यैकस्याऽभिनयस्य प्रदर्शनमक्रियत। तदनन्तरं संस्कृतकविसम्मेलनं प्रारभ्यत। यस्याऽध्यक्षोऽभूदासां पङ्क्तीनां लेखकः सोयं 'भारती' सम्पादक एव। दूरदूरागतैर्बहुभिः कविमहाभागैर्निजरचना अश्राव्यन्त। 'जीवनंभारभूतम्' इत्यादीनां पूर्वदत्तानां समस्यानामपि पूर्तयः श्राविता अभूवन्। निशीथपर्यन्तं सोयं कार्यक्रमः प्राचलत्। ततः समाप्तौ सभापतेर्मङ्गलघनाक्षरीपद्येन सभाया विसर्जनमभूत्।

द्वितीयस्मिन् दिने (५ तारिकायाम्) अष्टवादने प्रातः संस्कृतच्छात्रसम्मेलनमध्यविशद्-यस्य सभापतिरासीद् पं० श्रीचन्द्रशेखरद्विवेदीमहोदयः [प्रिंसिपल, महाराजसंस्कृतकालेज, जयपुर]। ततो दशवादने दर्शनपरिषदोऽधिवेशनमभूद् यस्याध्यक्षोऽभूत् श्रीयमुनाधरलाटामहाभागः [रामगढ, शेखावाटी]। अपराह्णे तु 'संस्कृतिपरिषत्' समभूदधिविष्टा, यस्या अभूदध्यक्षः श्रीरामनिवास 'सौरभ' महाभागः [झालावाड]। एतदङ्गभूतस्य कार्यकलापस्य समापनोत्तरम्, अपराह्णे चतुर्वादने सार्वजनिकं द्वितीयदिनस्याधिवेशनं प्रारभ्यत। अत्र हि संस्कृतोन्नतिविषये बहवः प्रस्तावा उपस्थिताः, अनुमोदिताः, समर्थिताश्चाऽभूवन्। ये हि समधिकस्थानापेक्षित्वात् सति सम्भवे पृथक् प्रकाश्येरन् [सीकरस्थ-स्वागतसमितेः कार्यालयात्तेषां प्राप्तिप्रतीक्षा]।

एतदनन्तरं 'शलाकापरीक्षा' प्रारभ्यत। अस्मिन् वर्षे साहित्यदर्पणे, सिद्धान्तकौमुद्याः समासाश्रयविधिपर्यन्ते भागे च सेयं परीक्षा प्रस्तुताऽऽसीत्। साहित्यविषयस्य परीक्षकाः—आसां पङ्क्तीनां लेखकः सोयं 'भारती' सम्पादकः, पं० विद्याधरशास्त्री, बीकानेरस्थ



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


...हनूमत्प्रसादशास्त्री चाऽऽसन् । परीक्ष्याश्चत्वारो विद्यार्थिनोऽभूवन् । किन्तु नैकेनाऽपि यथावत्सन्तोष-जनकमुत्तरं प्रत्तम् । एवं व्याकरणे एकमात्रो विद्यार्थी ...आसीत् । तस्यापि यथावत्सन्तोषिका परीक्षा न ...त्ता । अतएव पूर्वप्रतिश्रुतः पूर्णः पारितोषिको न ...तुमशक्यत । किन्तु विद्यार्थिनामुत्साहसंवर्द्धनार्थं ...हित्ये प्रथमाय २१) एकविंशतिमुद्राः, द्वितीयाय ११) ...दशमुद्राः, सम्मेलनकार्यालयात्प्रादीयन्त । एवमेव ...करणेऽपि । एतदनन्तरं सम्मेलनस्याऽस्य साफल्य-...हः प्रारभ्यत । अद्यावधि सीकरस्य संस्कृतमहा-...ालयः (कालेज) अतिसङ्कीर्णे अनावृतप्राये एकस्मिन् ...ङ्गणे समध्यविशत् । यस्मिन् विद्यार्थिनामध्याप-...नां च सर्वविषयेष्वतीव असुविधा आसीत् । अस्य ...ालयस्य निरीक्षणं जयपुरादागतैः 'संस्कृतविकास-...ितेः' सदस्यैरपि कृतमभूत । तैरपि महाविद्यालयस्य ...नमिदं नाऽभिरोचितम् । किन्तु भूयसः प्रमोदस्य ...ं विषयो यत् यथैव प्रस्तावादिकार्यं समाप्तमभूत् ...व सीकरस्य रावराजाश्रीकल्याणसिंहमहाभागेन ...सभमागत्य अतीव उदारतया परमोत्साहेन च ...ं घोषितमभूद् यत् संस्कृतमहाविद्यालयस्य कृते ...मतीव समुचितं स्थानमद्यैव वितरामि । आवश्यक-...यां सत्यां तस्य परिष्कारस्य कृते तत्समुचितं द्रव्यं ...वितरामि । एतदनन्तरं शेखावटीप्रदेशस्यान्यान्यैरपि ...ः श्रेष्ठिमहोदयैः संस्कृतविद्याप्रचाराय सहस्रतो-...का मुद्रास्तत्कालमेव व्यतीर्यन्त [ येषां नाम, द्रव्य-...संख्या च सम्मेलनकार्यालयात्परतो विज्ञायेत ]।

अग्रिमवर्षस्याऽधिवेशनार्थं राजस्थानस्य सुप्रसिद्धा-...तिहासिकनगरादुदयपुरान्निमन्त्रणमलभ्यत, यद्धि ...सम्मत्या स्वीकृतमभूत । एतदनन्तरं अग्रिमकार्य-निर्वर्तनार्थं कार्यकारिण्याः समितेर्निर्वाचनमभूत् । ततो धन्यवादप्रदानप्रथायाः प्रेमप्रकर्षतः प्रपालनोत्तरं भारत-मातुर्वन्दनमङ्गलेन सभाविसर्जनमभूत् ।

## वटोदर ('बडौदा') प्रान्ते संस्कृतसमुत्साहः

[काव्यलक्षण-रसविषये व्याख्यानम्]

भारतवर्षमिदं संस्कृतभाषायाः केवलंप्रभव-क्षेत्रमेव न, अपि तु प्रभावक्षेत्रमपि । अस्मिन् भारते संस्कृत-विद्यासेयं तादृशी प्रभावशालिनी समपद्यत यद् विद्या-प्राप्तये दूरदूरद्वीपेभ्योऽपि विद्याभिलाषिणः समागच्छन्ति स्म । पाटलिपुत्र-काशी-तक्षशिलादीनि तादृशानि क्षेत्राण्या-सन् येषु द्वीपान्तराणामपि शिक्षार्थिनः समागच्छन् । एतदतिरिक्तम्, हिन्दुसंस्कृतिरक्षका अत्रत्या राजानोऽपि विद्या कलानां रक्षार्थं प्राचारार्थं च नानाविधान् प्रयत्नान् कुर्वन्तो भारतीयविद्यानां कृते सुस्थिराणि केन्द्राणि स्थापयामासुः । जयपुरनगरप्रतिष्ठापकेन महाराजश्री-जयसिंहदेवेन निजराज्ये यथा ज्यौतिष-धर्मशास्त्रादीनां सुस्थिराणि संस्थानानि स्थापितानि, तथा गायकवाड-नरपालेनाऽपि वटोदरराजधान्यां विद्यानां कलानां च कृते भूयस्तरामुदारता प्रकटिताऽभूत् । इयत्तानाम्ना बहोः कालादत्र संस्कृतपरीक्षाः प्राचलन् यासां कृते दूरदूर-देशेभ्यो विद्वांसः समागच्छन्ति स्म, द्रव्यादिसंमानं चाऽधिगच्छन्ति स्म ।

वर्तमानयुगं राज्ञां कृते प्रतिकूलम् । अस्मिन् समये प्रजापीडकेभ्यो राजनामधारिभ्यो व्याकुलीभूता जनता प्रजारञ्जकेभ्योऽपि राजभ्यो ननु भीत-भीतेव । अतएव हि प्राचीनानि राजसंस्थानानि संप्रति पूर्वैश्वर्येण विर-हितानीव । न तेषु साम्प्रतं विद्यानां कलानां च तादृशी संपत् । किन्तु प्रमोदस्य विषयो यद् वटोदरपत्तने



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साम्प्रतमपि संस्कृतविदुषां समवायः समयानुसारं साधीयानेव। 'महाराजासयाजीरावविश्वविद्यालयेन' आमन्त्रितप्राध्यापकरूपेण (विजिटिङ्ग प्रोफेसररूपेण) साग्रहमामन्त्रितोऽहमवालोकयं वटोदरपत्तनं प्रथमप्रथममेव। अत्र मया अन्यनगराणामपेक्षया संस्कृतचर्चा सुदशापन्नव समासादिता। शिक्षाविभागस्य नियमानुसारम्, अत्रत्ये 'संस्कृतमहाविद्यालये' दिनद्वयं यावदभूत् मम व्याख्यानम्। प्रथमदिने रसगङ्गाधरस्य काव्यलक्षणमवलम्ब्य। यत्र हि अग्निपुराणमारभ्य दर्पणान्तानां सर्वेषामेव साहित्यनिबन्धानां काव्यलक्षणस्य अतिमार्मिकीमालोचनां विधाय स्वलक्षणं स्थापितम्। द्वितीयदिने-रसगङ्गाधरनिरूपितं रसस्वरूपं विशदीकृत्य एकादशसंख्यानां रससंप्रदायानां मूलतत्त्वं निर्धारितमभूत्।

एतत्प्रसङ्गेन मया दृष्टं यत् अत्रत्ये साहित्यानुरागि-समवाये राज्याश्रिताः संस्कृतविद्वांसस्तु सर्वे आसन्नेव। किन्तु आङ्गलभाषाकालेजस्याऽपि साहित्यानुरागिणः सर्वे समागता अभूवन्। एवं प्राच्यगवेषणाविभागस्य ('ओरिएण्टल रिसर्च इन्स्टिट्यूट') अधिकारिणोपि सर्वे सम्मिलिता अभूवन्। अस्मिन् विभागे अन्यान्यसंस्थानेषु सुदुर्लभाः संस्कृतभाषाया अनेके प्राचीना अमुद्रितग्रन्था मया दृष्टाः। इत एव हि कार्यालयात् 'गायकवाड़संस्कृतसिरीज्'नाम्नी ग्रन्थमाला प्रकाशिताऽस्ति, यस्यां 'व्यक्तिविवेक' 'काव्यमीमांसा'(राजशेखरस्य)दयोऽद्भुता ग्रन्थाः प्रकटिता अभूवन्। यस्यां च साम्प्रतम् अभिनवभारतीटीकासहितं भरतस्य नाट्यशास्त्रं प्रकाश्यते।

एतदेव न एतन्नगरीये साहित्यसमाजे नगरस्य न्यायाधीशाः ( सिटी मैजिस्ट्रेट ), आङ्गलभैषज्यविभागाधिकृताः ( डाक्टर ), वाकीलाः, ज्यौतिषिकाः, याज्ञिकाः, कर्मकाण्डिनश्चेत्यादयः सर्वेऽपि नगरवासिनः सभ्याः सोत्साहं समवायन्। राजकीयसंस्कृतमहाविद्यालयस्याऽध्यक्षोऽस्ति— श्री हरिप्रसादमहतामहोदयः M. A. B. T. काव्यतीर्थम्। महाविद्यालये चास्मिन् प्रायः सर्वाण्येव शास्त्राण्यध्याप्यन्ते। येषामध्यापनाय अनेके सुयोग्या विद्वांसो नियताः सन्ति। तेषु व्याकरणाचार्य पं० श्रीकालिकाप्रसादशुक्लमहोदयेन सहाऽस्मदादीनां समभूत्प्रगाढः परिचयः। एष हि महाभागो वटपत्तनस्थ 'संस्कृतविद्वत्सभायाः' प्रधानमन्त्री।

## विद्वत्सभा च तदध्यक्षश्च

इदानीं गुर्जरप्रान्ते आर्यसंस्कृतेर्ज्योतिर्भूतस्य, वटपत्तनीयपण्डितसमाजप्रमुखस्य किञ्चित् परिचयः प्राप्यताम्। एष हि पण्डितपञ्चाननः साहित्यशिरोमणिः श्रीबदरीनाथकाशीनाथशास्त्रिमहाभागः। अयं हि महोदयो न्यायादिदर्शनेषु मार्मिकोऽपि सुललितकवितायां सिद्धहस्तः। महाभागेनाऽनेन वर्तमानयुगे प्रचलितानां नवीनगीतीनां प्रकारेण संस्कृतस्य सुललितगीतयो विरचिताः, या हि तत्रत्यसभासु समये समये गीयन्ते [ सत्यवसरे इमा गीतयो 'भारती' पाठकानामपि सेवायां समुपस्थाप्येरन् ]। महाभागोऽयं काँकरोलीस्थगोस्वामिप्रवर— तृतीयपीठाधीश्वर श्रीव्रजभूषणलालजीमहाभागैः 'विद्यासुधानिधि' सुवर्णपदकेनालङ्कृतः। 'अभिनवजयदेव' इति प्रान्तेऽस्मिन्महोदयस्याऽस्य प्रसिद्धिः। न केवलमिदमेव। अपितु सोयं गुर्जरप्रान्ते श्रीमद्भागवतकथाप्रवचनेऽपि सर्वतो विश्रुतः। पुराणकथा सेयं श्रीमतो वंशपारम्परिकी। महाभाग-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...पितृव्याः श्रीरमणनाथशास्त्रिमहोदया भागवत-...गुर्जरप्रान्ते सर्वतो विख्याता आसन्। अनेनैव ...बदरीनाथशास्त्रिमहाभागेन 'संस्कृतविद्वत्सभा' ...स्थापिता, यस्याः प्रधानमन्त्री पं० श्रीकालिका-...महोदयः। विद्वत्सभायाः पत्रं 'सरस्वती-...' नाम्ना प्रकाश्यते, यस्य सम्पादकः पूर्वोक्तः पं० ...प्रसादमहोदयः।

...स्मिन्नवसरे विद्यासुधानिधिमहाभागेन विद्वत्स-...विशेषाधिवेशनमेकमायोजितमासीत्। यत्र नगर-न्यायाधीशः (सिटी मजिस्ट्रेट) श्रीकृष्णलालजोशी महाभागः, अन्ये च नगरप्रसिद्ध 'डाक्टर', श्रेष्ठि-ज्यौतिषिकादयः समागच्छन्। सभायामस्यां "वर्तमानकाले संस्कृतप्रचारस्य के उपायाः, कथं च संस्कृतभाषायां सारल्यं सम्पादनीयम्" इति विषयः प्रक्रान्तोऽभवत्। यस्योपरि बहूनां पण्डितानां विचारा अज्ञायन्त। एतस्य द्वितीयदिने पं० श्रीबदरीनाथशास्त्रिमहाभागानां गृहे एका विद्वद्गोष्ठी समायोज्यत, यस्यां शास्त्रिमहोदयस्य कवितागीतयो बालिकामुखेन सुललिता अश्रूयन्त।

———

# विनोदवाटिका

## [ नवयुगस्य नवदम्पती ]

...दम्पती परस्परं प्रणयकथाः कुर्वन्तौ आस्ताम्। ...प्रियतमेन—"भवत्याः स्निग्धकुञ्चितं भ्रमरकृष्णं ...पं दृष्ट्वा सर्वथा समाकृष्टोऽभूवम्"। प्राऽव-...सी—"कस्यचिन्मोहकस्य मौक्तिकमनोहरां महो-...ं दन्तपङ्क्तिमालोक्य बलाद्वशीकृताऽभवम्"। ...दं सम्यक्। किन्तु कुन्तलानामेतावतीं मनोहरतां ...ऽप्यहं वीक्षितवान्। अप्येतस्य कारणं शक्नुयां ...?" इति प्रोक्तवान् प्रियतमः।

प्रियतमाऽप्युक्तवती—"दन्तानामेतावतीं सुन्दरतां ...प्यहं विलोकितवती। कश्चिदेतस्य कारणमपि ...पारयेयम्?"

हसन् प्रियतमो दन्तपङ्क्तौ निहितवान् हस्तम्। यथैवाऽसौ हस्तमाकृष्टवान् तथा द्वे अपि दन्तपङ्क्ती हस्तगते अभूताम्। विज्ञातमभूद् यत्सेयं दन्तपङ्क्तिर्विज्ञाननिर्मिता कृत्रिमा!!"

प्रियतमापि प्रबलं परिहसन्ती केशकलापमाकृष्टवती। यथैव सा हस्तमधश्चकर्ष, तथैव कुन्तलसन्ततिः सर्वाऽपि हस्तगता बभूव। विदितमभूद् यत् केशकलापोऽयं कृत्रिमः। अत एव तस्याऽपनयने शिरस्तलं स्वच्छ-चिक्कणमलोक्यत।

'विनोदी'

———



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



SAHARANPUR
9—45
5 MAI 56

# ★ सूक्ति-सुधा ★

प्रायः सन्त्युपदेशार्हा धीमन्तो न जडाशयाः।
तिलाः कुसुमसौगन्ध्यमहिनो न यवाः क्वचित् ॥१॥

सज्जनों के उपदेश देने योग्य बुद्धिमान पुरुष हुआ करते हैं जडबुद्धि नहीं। फूलों की खचने के पात्र तिल ही होते हैं, जौ नहीं। तिलों में ही सुगन्ध संक्रान्त करके फुलेल (तेल) बनाया जाता है ॥१॥

संस्थितस्य गुणोत्कर्षः प्रायः प्रस्फुरति स्फुटम्।
दग्धस्याऽगुरुखण्डस्य स्फारीभवति सौरभम् ॥२॥

मरजाने पर आदमी के गुणों का बढ़ाव फैल जाता है। अगरु यदि जल जाता है तो सुगन्ध और भी चारों तरफ फैल जाता है ॥२॥

उपकर्तुं यथा स्वल्पः समर्थो न तथा महान्।
प्रायः कूपस्तृषां हन्ति सततं न तु वारिधिः ॥३॥

गरीब छोटे आदमी से जिस प्रकार दूसरों का उपकार बन आता है उस प्रकार बडे आदमी से नहीं। बेचारा छोटा कुआँ ही लोगों की प्यास बुझाता है लम्बा ओंडा समुद्र नहीं ॥३॥

जडे प्रभवति प्रायो दुःखं बिभ्रति साधवः।
शीतांशावुदिते पद्माः संकोचं यान्ति वारिणि ॥४॥

जड [शीतल, किं वा मूर्ख] की प्रभुता होने पर प्रायः सज्जनों को दुःख उठाना पडता है। शीत किरण (चन्द्रमा) के उदय होने पर कमल जल में सिकुड़ जाते हैं ॥४॥

कश्चित्कस्यचिदेव स्यात्सुहृद्विश्वासभाजनम्।
पद्मं विकासयत्यर्कः संकोचयति कैरवम् ॥५॥

कोई बिरला ही किसी का विश्वासपात्र मित्र होता है। देखिये यह सूर्य पद्म यानी कमल को खिलाता है किन्तु कैरव (रात्रिविकासी कमल) को संकुचित करते हैं ॥५॥

ईश्वराः पिशुनान् शश्वद् बिभ्रतीति किमद्भुतम्।
प्रायो निधय एवाहीन् द्विजिह्वान् दधतेतराम् ॥६॥

बड़े आदमी प्रायः अधिकतर चुगलखोरों का भरण पोषण करते हैं यह कोई अद्भुत बात नहीं। निधि अर्थात् गडा हुआ धन द्विजिह्व दो जिह्वा वाले (यहां कुछ वहां कुछ कहना) सर्पों को अपने पास रखता है ॥६॥

प्रकाशकः—जयबहादुरसिंह
पताः—भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रकः—राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

प्रमुखं संस्कृतमासिकपत्रम्



त्यागी दृढव्रतोऽसौ संयमवान् हिन्दुसंस्कृतेरविता ।
'गुरुजी'ति गौरवाढ्यो माधवविबुधश्चिरं जयतात् ॥

वर्षम् ६

मूल्यम्
वार्षिकम् ३) रु०
एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❋ विषय-सूची ❋


| क्रमः | लेखाः | लेखकाः | पृष्ठ संख्या |
|---|---|---|---|
| १. | वसन्तस्य स्वागत | सम्पादकः | |
| २. | अनङ्गप्रभा | श्रीवासुदेवशास्त्री वागेवाडीकर शोलापुरम् | १०० |
| ३. | होलिकाभिनन्दनम् | श्रीरुद्रदेवत्रिपाठी बम्बई | १०५ |
| ४. | मानवः तस्य महत्वं च | श्रीराजकुमारजैनः जयपुरम् | १०६ |
| ५. | परमपूजनीयाः श्रीगुरुजीमहाभागाः | श्रीकौशिकः | १०८ |
| ६. | सम्पादकीयम् | सम्पादकः | ११६ |
| ७. | नवरत्नमाला | प्रा० श्री भा० वर्णेकरः नागपुरम् | ११८ |
| ८. | सूक्ति-सुधा | श्रीकेदारनाथमिश्रः वाराणसी | |


सूचना :—सर्वे ग्राहकाः सूच्यन्ते यत् पत्रव्यवहारावसरे निजग्राहकसंख्यां स्वस्मिन् पत्रे अवश्यं दर्शयेयुः। अन्यथा पत्रोत्तरे बाधा समुत्पस्यन्ते ।

## -❋ "भारती" पत्रस्य उद्देश्यानि नियमाश्च ❋-

१. संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचारपरि- पोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि ।

२. 'भारती' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम् ।

३. मासिकपत्रमिदं प्रतिमासं पूर्णिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात् ।

४. एकस्यांकस्य मूल्यम् ।=) आणकषट्कम् ।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादकः—
...हिलानाथशास्त्री B. A.
जयपुरम्

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

# भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी।
भागीरथीव भावाढ्या भारते भातु भारती॥

वर्षं ६ } फाल्गुनशुक्लाप्रतिपत्, सं० २०१२ { अङ्कः ५

## वसन्तस्य स्वागतम् !!

[ घनाक्षरी—छन्दसि ]

देवघनाक्षरी—

वनविटपेषु भूरि शोभते कुसुमघटा
रोचते सरोजखण्डसुषमा सरसि सरसि।
भाति सहकारे कलकोकिलकुहूनां रवो
मधुकरयूनां स्वनः सरसां पयसि पयसि।
मञ्जुनाथ रसिकमनःसु मदलक्ष्मीर्भाति
दृशमुपयाति कामचर्चासौ रहसि रहसि।
मन्ये मधुपर्वणि मनोभूर्मदजन्मोन्माद—
मङ्क्ते विशङ्कं निजमुद्रया मनसि मनसि॥

सिंहावलोकनम्—

गीयन्ते निकुञ्जे गुणगीतयो वसन्तस्याद्य
मत्तपिकपुञ्जे कुहूध्वनयः प्रचीयन्ते।
चीयन्ते चतुर्दिक् चञ्चरीककुले मोदरसाः
सरसरसाले सर्वसुषमाः समीयन्ते।
मीयन्ते मनःसु मन्मथस्य महिमानो भूरि
मञ्जुमकरन्दाः सरघाभिः परिपीयन्ते।
पीयन्ते दृशैव रसिकेन फुल्लवासन्तिकाः
काममभी वासन्तिका वासराः सुगीयन्ते॥

—भट्टश्रीमथुरानाथशास्त्रिरचितात् "साहित्यवैभव" काव्यात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अनङ्गप्रभा

महोपाध्याय पं०वासुदेवशास्त्री बागेवाडीकर साहित्याचार्य, वेद-तर्क-तीर्थः, शोलापुरम्

अस्ति खलु पूर्वापरवारिधिवेलापर्यन्तविस्तृतं दिगन्तप्रसृतैरिव शाखाबाहुभिर्बहुभिः किंशुकैरालिङ्गितभूमध्यं खमिव स्पृशद्भिः अत्युच्छ्रितैर्गिरिवरसखैः स्वर्गाधिपतये तापसतपश्चरणम् अगणितकायक्लेशं निवेदयद्भिरिव नैकैस्तालतमालपादपैरुपशोभितं केसरिकरितरक्षादिभिः हिंस्रः, मृगशशकाद्यैः अहिंस्रैश्च पशुभिः संकीर्णंक्रूरसत्वमप्यक्रूरजनसंसेवितं पुलिन्दवृन्दैर्हतानां नैकक्रूरसत्वानां रुधिरस्रावैः पुरा विन्ध्यवासिन्या देव्या निहतानां दैत्यानामिव रञ्जितभूमिभागं विन्ध्यारण्यं नाम। अस्यैव महावनस्य समीपे नैकविधैर्नैकसंख्यैः रत्ननिवहै रत्नाकरशोभां वहन्तीभिर्विपणीभिरुपशोभितं विशालैः सुधाधवलैः प्रासादैर्विराजमानं, स्वे स्वे कर्मण्यभिरतैर्वृन्दारकवृन्दैरिव पुण्यैर्नगरजनैरध्युषितं स्वाध्यायपराणां द्विजानां वेदध्वनिभिर्निनादितं नैकविधसुवस्तुसम्पदा सदाऽमरपुरमिव ऋद्धं धनधान्यसमृद्धं सुरपुरं नाम नगरम्। विन्ध्यप्रदेशस्यास्य पद्मराजनाम्नोऽधिपतेस्तन्नगरं राजधान्यासीत्।

नयेन महीं शासतस्तस्य भूपालस्य पद्मा नाम पद्मनेत्री चारुगात्री महिषी बभूव। परस्परानुरक्तौ तौ दम्पती चिरं सन्तानं न प्रापतुः। प्रजाहितदक्षे मन्त्रज्ञे मन्त्रिणि निहितराज्यभारः स धर्मपत्न्या तया समं विन्ध्याचलवासिन्या देव्याः सर्वथा समाराधनपरः संजातः। ततः केनचित् कालेन देवीप्रसादात् स तस्यां राज्यां तनयामलभत। सा सौन्दर्ये रतिमप्यतिशेते स्म। शुक्लपक्षे चन्द्रकलेव सा प्रतिदिनमवर्धत। अतः पिता कलावती इति तस्या नाम चक्रे। यदा सा यौवनमधिगतवती तदा नैके युवानो राजकुमारास्तां राजकुमारीं प्रार्थयन्त। पर स्वरूपगर्विता सा नैकमपि कुमारमन्वमन्यत। सा प्रति जज्ञे—"शूरं रूपवन्तं ज्ञानिनमेव वृणीय" इति। तत श्चिरं न कोऽपि तामकामयत। तेन तस्याः पिता भृशं चिन्तातुरोऽजायत।

अथैकदा ताम् अगणिताभराङ्गनालावण्यां श्रा श्रावं तया सह परिणिनीषवश्चत्वारो युवानो राजसभां समुपस्थिताः। सभाकर्णिततदाशयेन राज्ञा पृष्टाः राजकुमारीसमक्षं स्वं स्वं वृत्तान्तं निवेदयामासुः। एके नोक्तम्—"अहं चतुर्वेदजुषः श्रोत्रियस्य ब्रह्मनिष्ठस्य कुले समुत्पन्नो जीवदत्तनामा। अनधिगतधनोऽपि समधिगतसकलविद्याधनः। अधिगतधनुर्विद्यः समरवीरः शरीरसौन्दर्यहीनोऽपि समृद्धगुणसौन्दर्यः। देवीप्रसादाल्लब्धसञ्जीवनविद्यो विगतासुं सासुं करोमि" इति। अपरेण कथितम्—"क्षात्रकुलसम्भवो रणधुरन्धरोऽहम् अनूपरूपसम्पन्नोऽनेन खड्गेन जीवामि" इति। ततोऽन्यो निवेदितवान्—"कृषिकर्मरतः पशुपक्ष्यादिभाषावेदी शूरो रूपवान् वैश्योत्तमः" इति।

अनन्तरं चतुर्थः प्रोक्तवान्-शूरवंशसंजातोऽहं प्रत्य पञ्चपट्टिका निर्मिमे। अतो जना मां पञ्चपट्टिकमाहुः। तास्वेकां देवायान्यां ब्राह्मणाय समर्पये। तृतीयामेकां स्व चतुर्थीं पत्न्याः कृते रक्षामि। अवशिष्टां च विक्री कुटुम्बोपजीविकां सम्पादयामि। सौन्दर्ये तु मदनमप्य तिशये" इति। ततः कलावती प्राह चत्वारोऽप्येते न मेऽभिमताः। यतो विप्रोऽयं दुर्दर्शनः। क्षत्रियस्तु



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...ः सेवकश्च । अवशिष्टौ द्वौ हीनवर्णौ" ।
...त्वा सा तान् सर्वान् प्रत्याचष्ट ।

अथैकस्मिन् दिवसे महाकायो गजः सहसा नगरं ...निखिलं नगरं तुमुलमकरोत् । तथाविधं विपन्न- ...पुरमवलोक्य ते चत्वारोऽपि तस्य मत्तेभस्य ...प्रधाविताः । खड्गधारी युवा तं महता बलेन ...प्रहरत यथा स तत्क्षणं परावर्तत । अनन्तरमेकदा ...ना मृगयार्थे वनं गतः । मृगयादर्शनकाङ्क्षया ...तत्र गताः । मृगयासक्तं किञ्चिल्लक्ष्यं लक्षीकृत्य ...ध्यानपरं नृपं सहसा कुतोऽपि कश्चित्करालवदनो ...रवः कण्ठीरवोऽभ्यपतत् । अभियान्तं तं वनरा- ...वीक्ष्य अगणितस्वजीवितसंशयास्ते साहसिकास्तं ...अभ्यद्रवन् । तैरुपद्रुतः पञ्चाननो यथागतं न्यव- ...अनेन तेषां महता साहसोपेतेन शौर्येण प्राण- ...मुक्तो नितरां सन्तुष्टो महीपतिः । प्रत्यागतः स ...लः सभायां स्वकन्यकां समाहूय सर्वेषां सदः- ...समक्षमुपदिष्टवान्—"बाले, एते सर्वेऽपि महास- ...त्त्वाः शूरतमा लोके । अमीषां वीरत्वं प्रत्यक्षीकृत- ...भिः । तेषामन्यतमस्त्वया वरणीय इति मे मतिः । ...धनवन्तं करोमि" इति । तदनुरोधात् साऽब्रूत— ...नु । यथाऽऽज्ञापयति तातः । ज्योतिर्विदमाहूय स ...यः केन सह मे विवाहो घटते" इति ।

आकारितः कार्तान्तिकः समागत्य ग्रहगतिं विज्ञाया- ...—"देव, न केनापि समं परिणयोऽस्या घटते । ...शापभ्रष्टा विद्याधरकन्या वर्तते । अस्या आयुरितो ...यथावधि । त्रिभिर्मासैरमुष्याः परिणयस्य विचारो ...ः" । ततो मासत्रयानन्तरं भूयः सर्वेऽपि सदसि ...स्थिताः । आस्थानमण्डपोपविष्टा कलावती अक- ...स्मात् स्वं पूर्वजन्मवृत्तान्तमस्मरत् । सपदि नेत्रे निमील्य प्राणानत्यजत् । तेन हि सकला सभा परं दुःखिताऽभवत् । दुःखावेगं नियम्य राजा जीवदत्तं लब्धसञ्जीवनविद्यं प्राह—"भो महाब्राह्मण, सम्प्राप्तस्ते विद्याप्रत्ययस्य समयः । तव विद्याप्रभावेणेमां जीवनसहितां कुरु" इति । तदनु स द्विजवरयुवा देवीं ध्यात्वा विद्या-योगमकुरुत । परं सा न जीवितं प्रत्यपद्यत । अनेन वन्ध्यप्रयत्नेन विलक्षो जीवदत्त आत्मानं मोघविद्यं विदित्वा जीवितनिरपेक्षोऽभवत् । विन्ध्याचलवासिनीं स्वाराध्य-देवतां स्मृत्वा खड्गेन स्वयं स्वशिरश्छेत्तुं प्रावर्तत । अत्रान्तरे 'रे युवन्, अलमनेन साहसेन । इयं विद्याधरकन्यका कारणवशात् शापभ्रष्टा मानुषीं योनिमनुप्रविष्टा । परिपूरितावधिः सा सम्प्रति निजं स्वरूपं प्राप्तवती । अतोऽस्याः कृतेऽयुक्तस्ते शोकः" । इति नभोवाण्या जगाद देवी । तेन शिथिलीभूतसाहसः स भूदेवकुमारस्तपश्चरणार्थं विन्ध्यारण्यं प्रविष्टः ।

तत्र विन्ध्यवासिन्या देव्याः पुरस्तादुग्रं तपस्तपतस्तस्य स्वप्ने देव्याविर्भूयोवाच । "ब्रह्मन्, श्रूयताम् । हिमाचलप्रदेशे विद्याधराणां विहारभूमिर्वीरपुरं नाम सुन्दरं नगरम् । तस्याधिपतेश्चित्रसमरस्य स्वलावण्येन तिरस्कृतामराङ्गनालावण्या अनङ्गप्रभा नाम कन्यकाऽऽसीत् । रूपगर्वितया तया लावण्यजितपुष्पसायका बहवो वीरकुमाराः प्रत्यादिष्टाः । अथ एकदैकस्मिन् पर्वणि मात्रा सह मन्दाकिन्या जले स्नातुं गता सा हिमगिरिशोभावकृष्टमानसा भ्रमन्ती कञ्चिदाश्रमं पावनं प्राविशत् । तत्रैकं समाधिमग्नं जटाजूटमण्डितमूर्धानं ब्रह्मवर्चसा ज्वलन्तं पावकमिव पावनं मुनिमपश्यत् । निर्जिताश्विनीकुमारस्य तस्य लावण्येन मन्त्रमुग्धा व्यालीव समाकृष्टा तस्यान्तिकं समुपेत्य तं सरभसं कण्ठे गाढं समालिलिङ्ग । परिष्वङ्गवशात् भग्न-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



समाधिः स मुनिस्तां शशाप। "पुंश्चलि, देवयोनिं लब्ध्वापि त्वमेवं कामार्ता मत्ता नैष्ठिकम् अगणिततनूपातं तपश्चरन्तं मां यद् दूषितवती ततो मानुषीं योनिमनुप्रवेक्ष्यसि। तत्रापि यौवनारम्भ एव पुरुषसुखाद्वञ्चिता भविष्यसि। ततस्तां तनुं त्यक्त्वा पितृगृहं भूयो यास्यसि। कुरूपो मर्त्यः खड्गसिद्धस्ते पतिर्भविष्यति ब्राह्मणः। सोऽपि मुनिकन्यकाभिलाषान्मर्त्यत्वं प्राप्तः। त्वामनिच्छन्तीं स यदा मर्त्यलोकं निनीषति तदाऽन्यः कोऽपि त्वां हरिष्यति। यतस्तेन पूर्वजन्मन्यष्ट परदारा अपहृताः। त्वं च तस्मिन्नेव जन्मनि विद्यायाभ्रंशनादष्टजन्मनां दुःखमनुभविष्यसि। विनष्टस्मृतिस्त्वं समुचितवराणामवमानापराधाद् बहून् मानुषान् भर्तॄन् लप्स्यसे" इति। सा चाधुना पुनः पित्रोर्निकटं गता। अतो वीरपुरं गत्वा समरे समरघस्मरं चित्रसमरं तत्पितरं विजित्य तां लभस्व। इमं खड्गं गृहाण। अनेन ते हस्तगतेन गगने तव गतिर्भविता। सर्वत्र विजयश्च"। इत्युक्त्वा तस्मै खड्गं दत्वा देवी तिरोहिता। ततो यावज्जीवदत्तो प्रबुद्धस्तावत् समीपे दिव्यं खड्गमपश्यत्। तुष्टान्तरो जीवदत्तो देवीं प्रणम्य खड्गं हस्ते धृत्वाऽऽकाशं समुत्पत्य हिमालयं प्राप्तः। वीरपुराधीशं चित्रसमरं समराङ्गणे जिगाय। पराजितेन तेन प्रदत्तामनङ्गप्रभां विवाह्य कञ्चित् कालं दिव्यान् भोगान् स बुभुजे।

अथैकदा स जीवदत्तः स्वां भार्यां श्वशुरं चावदत्—"अनया नवोढया पत्न्या समं स्वलोकं गच्छामि। जन्मभूमिर्हि निकृष्टाऽपि प्राणिनां परमप्रिया"। इति। ततस्तेनानुमतोऽसौ तामनिच्छन्तीं हठाद् गृहीत्वा खड्गहस्तो विहायसा जीवलोकमवातरत्। श्रान्तया भार्यया प्रोक्तो जीवदत्तस्तत्रैकस्मिन् गिरौ रमणीये विश्रामार्थमतिष्ठत्। सम्पादिताहारपानस्स तां प्राह—"प्रिये किञ्चिन्मधुरं गीयताम्" इति। तदनुरोधात् स गातुं प्रारभत। तन्मधुरं गीतं शृण्वन्नेव स निर्भरनिद्रामनुप्रविष्टः। अत्रान्तरे मृगयाविरतो हरिवरो नाम राजा श्रान्तो विश्रामाभिलाषी तत्स्थलं प्राप्तः। हरि इव तेन गीतध्वनिनाऽऽकृष्टः स तदन्तिकमभ्यागतः। अनङ्गस्य प्रभामिव तामनङ्गप्रभामवलोक्य तस्य चे मदनस्य शरैर्विहस्तम्। साऽपि पुष्पसायकस्येव त तत्सौभगं वीक्ष्य चकितचकिता मनस्यचिन्तयत् "किमयं मूर्तो मनसिजः। मम गानतुष्टेन रुद्रेण पुन र्जीवितः प्रेषितः"। इति चिन्तयन्त्येव मोहिता तमादरात् पृष्टवती—"कस्त्वम्? कथं चेदं कान्त प्राप्तोऽसि"?। आत्मनः सर्वमागमप्रकारं तस्यै नि स भूपतिस्तामन्वयुङ्क्त—"का त्वं सुन्दरि? रतिप्रति कश्चायं ते सन्निधौ प्रसुप्तः? आख्याहि सुभगे स यदि न मन्यसे मामनर्हम्"। एवं पृच्छन्तं तं निखिलं वृत्तान्तं प्रोच्य निगदितवती—"दृष्टमात्रे त्व समुत्पन्नानुरागाऽहम्। एहि सत्वरं गगनपथा तव न गच्छावः यावदयं मे पतिर्न जागर्ति"। एतत्तस्या अ मतं वचो निशम्य हरिवरस्त्रैलोक्यराज्यलाभजनि प्रमोदमवहत्। ततः सा तं भूपं हठादाकृष्य स्वां वि हृद्यचिन्तयत्। परं मुनिशापवशाद्भर्तृद्रोहाच्च नष्टवि मात्मानं विज्ञाय भृशं विषादमगमत्।

तां तथा विषण्णामवलोक्य ज्ञातकारणो रा तामसान्त्वयत्—"नायं विषादस्य कालः। यावत् पतिर्न प्रबुध्येत तावत् त्वर्यताम्। दैवायत्ते वस्तुनि शो नोचितः। को हि स्वशीर्षच्छायां विधिलिखितं च ल ङ्घयेत्"। एवं ब्रुवाणस्तामादाय झटिति मनोद्रुतगति रथेन स स्वं पुरमधावत्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अथ सुप्तप्रबुद्धो जीवदत्तः कान्तां तं च खड्गवरमनवलोक्य समचिन्तयत्—"क्व नु गता मे प्रिया खड्गश्च। किं नु तयैव सोऽपहृतः। किं वा तौ द्वावपि केनापि बलान्नीतौ"। एवं भ्रान्तमनाः शोचंस्तां विचिन्वानो गिरिगह्वरेषु वनोपवनेषु च निराहारो द्वादश दिनान्यभ्रमत्। तत एकं ग्रामं प्राप्य तत्र कस्यचिदाढ्यस्य विप्रस्य गृहं प्राविशत्। प्रियदत्ताख्या गृहस्वामिनी सुभगा सती तमासन उपवेश्य "अयि दासि, त्वरितमस्य पादौ प्रक्षालय। प्रियाविरहादटवीतोऽटवीं भ्रमतोऽस्य निराहारस्य जीवदत्तस्य द्वादश दिनान्यतीतानि। शीघ्रं देहि भोजनमस्मै"। इति स्वदासीमादिशत्। तस्यास्तद्वचो निशम्य विस्मयमापन्नो जीवदत्तः "किमत्र मे प्रियाऽनङ्गप्रभा सम्प्राप्ता। किं वेयमन्तर्वेदिनी। कथमनयैतत्सर्वं ज्ञातम्।" इति चिन्ताकुलोऽजायत। धौतपादः कृतभोजनः स महत्याऽऽर्त्या तां पप्रच्छ—"आर्ये ब्रूहि मे कृपया कथं वेत्सि मम वृत्तम्। किं त्वमन्तर्ज्ञानिनी योगसाध्या योगिनी? तथा चेत् क्व मे प्रिया?" क्व च मे खड्गः? प्रसीद। कथनेनानुग्राह्योऽयं जनः।

एवं पृष्टा सा पतिव्रता तं न्यगदत्—"भद्र न जानाम्यहं योगं, भर्तुरन्यच्च दैवतम्। पुत्रभ्रातृसमानन्यान् पश्यामि पुरुषानहम्। न च मेऽनर्चितो याति कदाचिदतिथिर्गृहात्। तेन वेद्मि भावि भूतं भविष्यच्च। त्वयि सुप्ते विधिवशात् मार्गेण गच्छता गीतादृष्टोपयातेन हरिवरेण नृपेण ते प्रियाऽनङ्गप्रभा स्वपुरं नीता। तस्यास्ते पुनर्लाभो न शक्यः। यतः स भूपालो महाबलः। सा कुलटा तमपि विहायान्यं व्रजेत्। स च खड्गस्तत्प्राप्तये देव्या तुभ्यं दत्तः। तस्यामपहृतायां सोऽपि देवीं प्रति गतः। भवितव्येऽर्थेऽयं ते व्यामोहो वृथैव। एवं पापानुबन्धं मुञ्च। अधनाऽन्यानुरक्तयाऽनया पापया ते किम्।" इत्युक्तस्तया साध्व्या जीवदत्त उवाच—"अम्ब, तवानेनोपदेशेन मे व्यामोहोऽपगतः। कामं न श्रेयसे कस्य संगमः पुण्यकर्मभिः। पूर्वपापवशादेतद् दुःखं मे पतितम्। तत्क्षालनाय उज्झितमत्सर पुण्यक्षेत्राणि गमिष्यामि। अनङ्गप्रभाहेतोर्मेऽन्येन सह वैरेण कोऽर्थः। जितक्रोधेन सर्वं हि जगदेतद् विजीयते।" इत्युक्त्वा स तां सादरं प्रणम्य यात्रायै प्रस्थितः।

यात्रान्ते तामेव विन्ध्यवासिनीं देवीमुग्रेण तपसा समतोषयत्। सन्तुष्टा देवी तं निजगाद—"यूयं चत्वारो मामका गणाः। यूयं जातु विहर्तुं गङ्गापुलिनं गताः। तत्रैका मुनिकन्यका स्नान्ती दृष्टा कामातुरैर्युष्माभिः प्रार्थिता। "कन्याऽहम्। अपेतास्मात् स्थानात्"। इत्युक्ते तया त्वं तां हठादाकृष्टवान्। तदा "तात त्रायस्व माम्। त्रायस्व माम्" इत्युच्चैराक्रन्दत्। तत्क्रन्दनं श्रुत्वाऽन्तिकस्थो मुनिः "पापिष्ठाः यूयम्। मनुष्ययोनिं लभध्वम्" इति शशाप। स च शापो मम प्रसादावधिः।" ततो देवीप्रसादात् स पापमुक्तो निजं रूपं प्राप्तवान्।

अनङ्गप्रभा च हरिवरे नगरे हरिवरस्य महीमतेः प्रधानमहिषीपदमधिगवती। स च भूपतिर्मन्त्रिणि न्यस्तराज्यभारोऽहर्निशं कान्तासक्तो बभूव। अथैकदा तस्य भूभृतः सभायां लब्धवरो नाम नाट्याचार्यः संप्राप्तः। तस्य नृत्तवाद्यादिषु परमं नैपुण्यं दृष्ट्वा भूमिपतिना सोऽन्तःपुराणां नाट्याचार्यो विहितः। तस्य विशेषानुग्रहादनङ्गप्रभा सर्वासामवरोधस्त्रीणां नृत्ये स्पृहणीयाऽभवत्। तेन हि सा तस्यानुरागिणी जाता। सोऽपि कामवशात् किमप्यन्यदनृत्यत्। लब्धावसरा सा विविक्ते नाट्यवेश्मनि नाट्याचार्यं प्राह—त्वया विनाहं क्षणमपि जीवितुं न शक्ष्यामि। भूपालश्च नैतत् सहिष्यते। तस्मादन्यत्र यास्यावः। यत्रस्थौ तेनावां न कदाप्यव-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



बुध्यावहै। राज्ञा च नाट्यतुष्टेन दत्तं हस्त्योष्ट्राद्यं प्रभूतं ते धनं विद्यते। मम चाभरणादि।" अनेन तद्वचसा नितरां हृष्टो नाट्याचार्यस्तथेत्यन्वमन्यत।

प्राप्तसमया सा केनाप्यलक्षिता पुरुषवेषं विधाय उष्ट्रार्पितधनेन तेन सममपक्रान्ता। लब्धयाऽनया स लब्धवरः स्वीयां लब्धवीराख्यां यथार्थतामन्यत। विदितवृत्तान्तो राजा तां भृशमशोचत्। "खड्गविद्याधरं पतिं परित्यज्य दृष्टमात्रेण त्वां या समुपाश्रिता सा त्वया सह कथं चिरं स्थास्यति। नूनं सा नाट्याचार्येण साकं गता। विजानतोऽपि भवतस्तस्यां कोऽयं स्नेहानुबन्धः। विलासिनी हि सन्ध्येव सर्वस्य क्षणानुरागिणी।" एवमादि मन्त्रिवरेण प्रबोधितः शुचा जीवितनिरपेक्षो भूपो विचार्य शुचं विहाय स्वदारेषु सविशेषं रतः।

साऽप्यनङ्गप्रभा वियोगपुरं गत्वा तत्र कञ्चित् कालं तेन संगीतकेन संगताऽतिष्ठत्। दैवदुर्विलासात् तस्य संगीताचार्यस्य सुदर्शनाख्येन यूना द्यूतकारेण सार्धं संगतिर्जाता। नचिरेण तेन नाट्याचार्यस्य निःशेषं धनं द्यूतेऽपहृतम्। तदा निःश्रीकं तमपास्यानङ्गप्रभा झटिति द्यूतकारं तमभजत। प्रणष्टधनदारः स वैराग्यात् तपसे गङ्गातीरमगात्। अविलम्बितमेव स्तेनैर्हृतसर्वस्वः सुदर्शनो निर्धनो बभूव। ततो दुर्गतौ अनुतापिनीं तां गृहीत्वा स्ववयस्कं हिरण्यगुप्तं नाम महाधनं वणिक्प्रवरमयात्। तं च ऋणमयाचत। स वणिक् दिव्यरूपां तां सा च धनवन्तं तं वीक्ष्य तत्क्षणं परस्परानुरागिणौ जातौ। "अद्य रात्रावत्रैवोष्यताम्। श्वः प्रभाते यथेप्सितं दास्यामि। अधुना तु भोजनं विधीयताम्। चिरादागतोऽसि।" एतादृगाशयं तस्य वचनं निशम्यापि सुदर्शन उभयोर्भावमन्यादृशमेवावेद्य तं प्रतिबभाषे। 'नाहमाद्यत्र' वासं कर्तुमभिलषे। नापि मे भोजनेच्छा। सद्य एवावाभ्यां गन्तव्यम्" इति। तदुपरि सार्थवाहोऽवदत्। "यदि नास्ति ते भोजनेच्छाऽद्य मे गृहे तथा भवतु। परं प्रथममेव सखे तवेयं भार्या मम गृहमागता। कथमभुक्त्वा सा मम गृहतो गन्तुमर्हति।" इति तमाभाष्य स तां गृहीत्वाऽभ्यन्तरं प्राविशत्। तस्या निर्गमं दीर्घकालं प्रतिपालयन् सुदर्शनस्तत्प्रचोदितैर्भृत्यैर्हठादिव मन्दिरान्निष्कासितः। ततो द्यूतकरो दुःखितो व्यचिन्तयत्। "कथं मम मित्रेणैव मे कलत्रमपहृतम्। अथवा यन्मया कृतमन्यस्य तदन्येन कृतं मम।" इत्यालोच्य स विलक्षो भूत्वा प्राव्रजत्। पुष्पात् पुष्पं प्राप्ता मधुकरीव साऽनङ्गप्रभा रूपधनाधिकं वणिजं प्राप्य प्रामोदत। परं सोऽप्यल्पैरेवाहोभिः सभोगव्ययैः कृशधनो जातः। यतः 'म्लायति श्रीः कुलस्त्रीव गृहे बन्धक्यधिष्ठिते।' ततो वाणिज्यार्थं संभृतभाण्डको हिरण्यगुप्तः वियोगमसहमानः तया प्रियतमया सह सुवर्णाख्यं द्वीपं गतः।

अथैकदा सागरे सागरवीरो नाम कश्चिद् धीवराधिपस्तेन मिलितः। तेन सह समुद्रयानं कुर्वतः सस्त्रीकस्य तस्य नभः साभ्रं संजातम्। तदनु सहसा धारासारैर्वर्षत्सु तोयदेषु प्रभञ्जनेन प्रक्षुब्धतां नीतेऽब्धौ कल्लोलमालिकाभिरभिहतं तत् प्रवहणमभज्जत्। ततो वीचिविक्षेपात् सुदूरं गतः स दैवयोगतः प्राप्तां काञ्चित् प्रवहणीमारुह्य तीरमगमत्। तत्रोदधौ मज्जन्तीं तां दिव्यरूपां युवतीं विलोक्य स दाशपतिः वारिण्यात्मानं प्रक्षिप्य फलकमेकमवलम्ब्य तां सपद्यारोपयत्। बाहुभ्यां जलं विक्षिपति प्लवमानेऽस्मिन क्षणादेव नष्टाभ्रमभवद् गगनम्। उदधिश्च प्रशान्तकोपस्य मुनेश्चित्तमिवाभवत्। स चाशु दारुफलकारूढया तया सुन्दर्या सह क्वचित् तीरभूमिं प्राप्तः। अनन्तरं तामाश्वास्य स्वपुरं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नीतवान्। प्रियाप्राप्तौ नष्टाशं हिरण्यगुप्तं दुःखेन स्वपुरं प्रतिनिवृत्तं विदित्वा भूपकल्पं सुन्दरं प्राप्तयौवनं तमेव धीवरनायकं स्वप्राणनायकमकरोत् । नाङ्गना भ्रष्टशीला हि निम्नोन्नतमवेक्षते ।

अथ दाशाधिपतेर्भवने विविधान् भोगानुपभुञ्जाना सा तदन्तिकेन पथा यान्तं कुसुमाकरस्येव सुकुमारयौवनं विजयवर्माणं नाम क्षत्रियकुमारं समवलोक्य प्रासादावतीर्य तमुपेत्योवाच--"सुन्दरीहृदयवल्लभ, दर्शनाकृष्टहृदयामां प्रणयिनीं भजस्व ।" इति । सोपि नभः पतितां दिव्याङ्गनां तामभिनन्द्य स्वभवनमनयत् । अदर्शनतां गतां तां प्रेक्ष्य पुनर्दर्शनाभिलाषां हित्वा दुर्बलः सागरवीरः सुरसरितस्तीरं गत्वा तनुत्यागे मतिं न्यदधात् । सा तु अनङ्गप्रभा अनङ्गप्रभेण विजयवर्मणा सार्धं विविधानि सुखान्यनुभवन्त्यतिष्ठत् ।

केनचित् कालेन जातु तस्य पुरस्याधिपतिः सागरवर्मा नगरदिदृक्षया गजारूढः प्रचलितः । स्वावाससमीपगेन वर्त्मनायान्तं नृपतिं समाकर्ण्य तं द्रष्टुकामा-ऽतिकामा सा सौधमारूढवती । संदर्शनेनैव हृतचित्ता मन्मथायत्ता तत्क्षणं हस्तिपं प्राह—"भो निषादिन्, नाहं कदापि करिणमारूढा । तन्मामारोहय करेणुम् । पश्याम्यहं कियत्सुखमिति ।" एवमुक्ते हस्त्यारोहे स्वस्वामिनो मुखमवलोकयति स राजा शब्दानुरोधेन यावच्चक्षुः प्रेरयति तावत् त्रैलोक्यसुन्दरीं तां चन्द्रकान्तां चन्द्रशालोपरि वीक्षते । अवलोकनमात्रेणैव तां स्वानुरक्तां बुद्ध्वा प्रदीप्तकामः स आरोहमवदत् । रे मा विजहाहि मनोरथं मनोरमाया एतस्याः । आरोपयेमां सत्वरम् । तदादेशवशादन्तिकं नीते हस्तिनि सा सपद्युदप्लवत् । निपातभीतेव तं भूपं कण्ठे दृढमगृह्णात् । क्व सा स्वयंवरेऽप्रीतिः, क्व चेयं बहुभर्तृष्वपि चाप्रीतिः । दिव्यवनितालाभेन परां मुदं प्राप्तः सोऽवनिपतिर्द्रुततरं निजमन्दिरं न्यवर्तत तया साकम् । आशुतरं च सा तस्यावरोधगृहे महादेवीपदं प्राप ।

विदितवृत्तान्तो विजयवर्मा क्रोधाध्मातचेता राजमन्दिरमेत्य राजभटैः सह चिरं प्रयुध्य समासादितक्षात्रोचितनिधनः अपावृतद्वारं स्वर्गं प्राविशत । न हि वीरा विषहन्ते स्त्रीनिमित्तं पराभवम् । "किमेवंविधया बन्धक्या । भजास्मान् । एहि नन्दनं वनम्" इतीव सुराङ्गनास्तं सुरालयं निन्युः ।

ततः परं साऽनङ्गप्रभा नदीव सागरे सागरवर्मणि राजनि स्थैर्यमलभत । अनन्यगामिनी चाभूत् ।

# होलिकाभिनन्दनम्

श्री रुद्रदेवत्रिपाठी साहित्याचार्यः, मोहमयी

यस्यां समस्तविबुधा बहुमाननीया, नारीजनैः पुरजनैः परितो रमन्ते ।
कुर्वन्ति बालकगणाः सततं हहाहा, तां होलिकां वयमहो ! ह्यभिनन्दयामः ॥ १ ॥
केचिन्नरा निजनिजैः सह मित्रवर्यैर्नीत्वा सुवाद्यमति बालकबालिकाभिः ।
कुर्वन्ति ताण्डवमयं नटनं हि यस्यां तां होलिकां वयमहो ह्यभिनन्दयामः ॥ २ ॥
यस्यां सदाऽर्च्यविधिना सुरगौरिहन्त्रीं, नार्यः प्रसन्नमनसा परिपूजयन्ति ।
कोलाहले च बहवः पटवो भवन्ति, तां होलिकां वयमहो ! ह्यभिनन्दयामः ॥ ३ ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★ मानवः तस्य महत्त्वं च ★

राजकुमारोजैनः "भारिल्लः" जयपुर

संसारे यदि वयं केनचिदन्यवस्तुना सह मानवस्य तुलनां कुर्याम तदा जीवाजीवसम्पूर्णपदार्थेषु मानवः एव श्रेष्ठः सर्वोत्कृष्टः सर्वगुणसम्पन्नश्च जीवो दृष्टिगतो भवति । तस्मात्स धन्यःभाग्यवांश्च येन सुदुर्लभमेतन्मानवशरीरमवाप्तम् । यतः संसारे सर्वेष्वपि पशुपद्यादिजीवनेषु मानव एव श्रेष्ठः सर्वोत्कृष्टश्चास्ति । प्रत्येकमानवोऽद्येच्छति यत्तस्य संसारे किंचिदस्तित्वं किंचिन्महत्वं वा भवति । अतः स्वकीयजीवनस्यास्तित्वं ख्यापयितुं स्वजीवनं वा महत्वपूर्णं कर्तुं सत्यभाषणादिपापानां विभिन्नदोषाणां वा त्यागः कार्यः श्रेष्ठगुणग्रहणं च कर्त्तव्यम् । यतः गुणेभ्यः एव व्यक्तेर्महत्वं भवति । नास्ति गुणेभ्यः पृथक् व्यक्तेः किञ्चिन्महत्वम् । यथोक्तम्—

व्यक्तेर्महत्वं नहि किंचिदस्ति,<br>
यदस्ति किंचित्खलु तद्गुणानाम् ।<br>
संसारमुक्तिप्रभिदाऽपि नूनं,<br>
गुणैः कृताः केवलम स्त लोके ॥

अर्थः—महत्वस्य कारणानि गुणा एव सन्ति । नास्ति व्यक्तेःकिञ्चिदपि महत्त्वम् । गुणानां सत्वे एव हि व्यक्तेर्महत्वमस्ति । संसारमुक्त्योश्च भेदोऽपि केवलं गुणकृत एवास्ति । अतएवास्ति मानवस्येदं कर्त्तव्यं यत्स स्वकीयमानप्रतिष्ठाऽस्तित्वमहत्वाद्यर्थं सर्वप्रथमं श्रेष्ठतमगुणोपार्जनाय निरन्तरं प्रयत्नं कुर्यात् । यतः गुणोपार्जनंविना महत्वप्राप्तिकरणं दुर्लभमेव नास्त्यपि तु नितान्तासम्भवमेवास्ति । गुणग्रहणं च तदैव भविष्यति यदा मनुष्यः परद्रव्ये दोषान्वेषणं त्यक्त्वा गुणान्वेषणं करोति । गुणदोषसमुच्चयेषु च दोषान् विहाय गुणानसमाकर्षति । गुणोत्साऽस्ति यदि कस्यचिन्नरस्य हृदये तदा तु तस्य दोषान्वेषणमतिः त्यजनीया, गुणग्रहणमतिश्च ग्रहणीया । यथोक्तम्—

गुणोत्सा यदि चित्तेऽस्ति, उन्नितीषु मनो यदि ।<br>
तां विमुञ्च तदा शीघ्रं, दोषादानवतीं मतिम् ॥

अपि च—

तेनाप्यते नैव महत्पदं तद्गुणेषु यो दोषचयं प्रपश्येत् ।<br>
ततो मदुत्तातिरेकेण शीघ्रं नरेण वार्या हि कुबुद्धिरेषा ॥

अर्थः—यदि कस्यचिन्मानवस्य मनसि गुणानां प्राप्त्यर्थं वाञ्छाऽस्ति, यदि कश्चिन्मनुष्यःस्वोत्थानमिच्छति तु स शीघ्रातिशीघ्रं स्वदोषग्रहणमतिं त्यजेत् । यतः येषां बुद्धिः परदोषग्रहणं करोति, तेषामुत्थानमशक्यमेवास्ति । विचारैरीदृशैस्तेषामुन्नत्यपेक्षयाऽवनतिः एव भवति, आत्मनश्च तेषां पतनं भवति ।

यो मनुष्यो गुणेषु दोषसमूहं पश्यति, स न कदापि जगत्प्रसिद्धं तन्महत्पदमवाप्तुमर्हति । अत एव तन्महत्वस्यप्राप्त्यर्थं दोषदर्शनस्य कुमतिरतिशीघ्रं परिवर्तनीया ।

साम्प्रतिकः मानवः लौकिकार्थानां प्राप्त्यर्थं देवीदेवतानामुपासनामभ्यर्चनाञ्च करोति । अस्मिन्नेव च स स्वं धन्यमहोभाग्यवन्तञ्च मन्यते न जानातीदं स यदि मे लौकिकार्थाः भौतिकत्वात् क्षणिकाः शीघ्रनाशवन्तश्च सन्ति । स त्विदमपि न विचारयति यत्का ममोपासना ? को ममोपास्यः ? किं फलं च ममोपासनायाः ? विचारयित्वेदमेव ह्युपासना कर्त्तव्या । तदैव तस्या उ-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...सनायाः सम्यक्फलं प्राप्तुमर्हति। अन्यथा तु न। ...र्थे यदि वयं सूक्ष्मदृष्ट्या विचारयामस्तदा ...तिमात्रेभ्यः गुणा एव वास्तविकोपास्याः स्युः। अतः ...तिमात्रेण गुणानामेवाभ्यर्चना पूजा वा कर्त्तव्या। ...ः गुणपूजा' एवास्ति यथार्थोपासना। यथोक्तम्— ...वनप्रवाहे"—

न चाकृतिर्नैव वयोऽर्चनीयं,
न रूपधेयं न च नामधेयम्।
उपास्यतत्वं यदि किंचिदस्ति,
गुणात्मकं तत्किल सारभूतम्॥

अर्थः-उपासनातत्वज्ञानार्थमिदं ज्ञानमावश्यकमस्ति ...कृतिर्वयो रूपं नाम चैतेषु नास्ति कश्चिन्समोपास्यः। ...ि संसारे उपास्यं नाम किंचिदस्ति, तद्गुणातिरिक्तं ...ति किंचिदपि। गुणपूजा एवास्ति वास्तविकोपासना।

सम्प्रति मनुष्यः स्वमूलधर्मं स्वरूपं मानवतां विहाय ...षणावशाद् गर्हितानि कार्याणि करोति, यानि तस्य ...नार्थं सर्वथाऽनुपयोगीनि क्षणिकान्यस्थिराणि च ...ति। तथा येषां फलमपि क्षणिकमस्थिरं निर्मूलं ...सारं व्यर्थञ्चास्ति। अतः यदि मानवः स्वजीवनं ...युक्तं सफलं च कर्तुमिच्छति, तदा तेन सर्वप्रथमं ...षणायाः परित्यागः कर्तव्यः। यदि नास्ति संसारे ...षणासमं किंचित्त्याज्यमन्यवस्तु। यदि मानवः ...षणां त्यक्तवांस्तदा सर्वं त्याज्यं त्यक्तमेव। ...क्तम्—

यैर्लोकैषणा त्यक्ता स्वकर्तव्यपरैः नरैः।
तैस्त्यक्तं सर्वमाहेयं हीयं हेयतमा मता॥

अद्य मनुष्यः विभिन्नप्रकाराः परीक्षाः उत्तीर्य ...विधप्रकारान् एम. ए., बी. ए, एल. एल. बी., ए. एम. एस., बी. आई. एम. एस., एम. बी. बी. एस., वकील, बैरिस्टर, मैजिस्ट्रेट, डाक्टरेट आद्युपाधीनादधाति। किन्तु नास्त्येतादृशः कोऽपि मनुष्यः यो स्वमूलधर्मस्वरूपमानवतायाः परीक्षामुत्तीर्य तस्या एव मानवतायाः सेवां करोति। इमां वार्तां श्रुत्वा तु केचिज्जनाः एतादृशाः स्युः, ये ब्रूयुः "वयं मानवतायाः परीक्षां दातुं वाञ्छामः। कुत्र भवति तस्याः परीक्षा?" परन्तु ते मनुष्याः मूर्खाः अविवेकिनश्च सन्ति। ये ईदृशः प्रश्नान् कुर्वन्ति। यदि कश्चिन्मनुष्यः मानवतायाः परीक्षां दातुं वाञ्छति, तदा तेन किंचिदन्यत् स्थानान्तरं गन्तुमावश्यकम्। स्वकीयात्मन्येव हि परीक्षामिमामुत्तरितुमर्हति। किन्तु हा खेदः! महाखेदः!! यत्तोऽद्य ज्ञानवन्तोऽप्यज्ञानाः, नेत्रवन्तोऽप्यक्षिविहीनाः, कर्णवन्तोऽपि बधिराश्च सन्ति। अस्ति तेषामियं मूर्खता एव। मानवाः अद्य मानवतां त्यक्त्वा दानवतां स्वीकुर्वन्ति तां पोषयन्ति परिवर्धयन्ति च। अस्तीदमेव कारणं यदद्यास्माकं स्वतन्त्रदेशान्मानवतायाः ह्रासः दानवतायाश्च नग्नताण्डवनृत्यम्भवति, तस्याश्च पूर्णरूपेण वृद्धिःप्रकोपश्च भवति। नास्त्यद्य मानवः स्वकर्त्तव्यम्प्रति सावधानः। सर्वेऽपि जनाः अद्य सदुपदेशं देशस्य स्वस्य च समुन्नत्याः सुष्ठु भाषणं कुर्वन्ति ददति वा। किन्तु तत्सदुपदेशं भाषणं वा स्वजीवनेऽवतरितं न कुर्वन्ति। न च तदुपदेशानुसारं वर्तयन्ति। तदा कथं भवितुमर्हत्यस्माकं देशस्य स्वस्य वा समुन्नतिः। अतः एतादृश्यामवस्थायामस्माकमिदं कर्त्तव्यमस्ति यद्वयं स्वकीयमानवतां स्वीकुर्वन्तः तस्याश्च रक्षणं कुर्वन्तो दानवतायाः समूलनाशार्थं निरन्तरं प्रयत्नं कुर्याम। तदैवास्माकं देशस्योन्नतिः सर्वतोमुखी प्रगतिश्च सम्भाविता स्यात। अन्यथा तु न। इति।

---



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# परमपूजनीयाः श्री गुरुजीमहाभागाः

लेखकः—श्री कौशिकः

श्रीमतां चरित्रम् ? रत्नाकरस्य तीरे स्थित्वा तदन्तः-स्थितानां रत्नानां परिचयः खलु नितरां कठिनः। तद्वदत्रापि। श्रीमतां चरित्रम्। तस्य अद्यापि परिचयोऽपि सम्यङ् नास्ति। केवलं तानभितो भ्रमता मया कथं खलु लोकेभ्यो निवेद्येत तत्। साहित्यसम्राजा श्रीमता नरसिंहचिंतामणिकेलकरेण कर्मयोगिनां श्रीमतां तिलकमहाशयानां चरित्रमधिकृत्य कियन्तोऽपि ग्रन्थाः लिखिताः। परं कियान् कर्मयोगः महाराष्ट्रेण ज्ञातः ? महात्मनां गांधीनां विषये न अनल्पाः ग्रंथाः। किन्तु कियन्तः ते यैः तेषामुपदेशः स्वजीवने अंगीकृतः। परं भगवता रामकृष्णेन एकमात्रः विवेकानन्दः शिष्यत्वेन प्राप्तः यः भगवन्तं सम्यक् ज्ञातवान्। तेन अखण्डं विश्वं प्रकाशितम्। दिगन्ताः दीपिताः। यस्य खलु जीवनं तस्य तस्य महात्मनः तत्वस्य सत्वस्य च आदर्शीभूतं स एव तस्य तस्य महात्मनः चरितं ज्ञापयितुमर्हति। यथा विवेकानन्दः रामकृष्णस्य। इत्थं दुष्करं खलु चरित्रलेखनम्। तर्हि यावत क्रियावान् कविः न उदेति तावत् किमस्माकम् अकर्म एव श्रेयः ? केवलमनेनैव विचारेण अस्य महापुरुषस्य वाण्याः क्रियायाश्च दर्शनं कारयितुम् उद्युक्तोऽहम्। नाहं चित्रकारः। किन्तु चित्रं प्रेक्षितुं जाने। अद्य पञ्चदशवर्षेभ्यः अधिकः कालः व्यतीतः यदा अहं तानपश्यम्। अनेन कालेन शनैः शनैः संक्राम्यन् अहं तच्चरणमूलं प्राप्तः।

भागीरथ्याः पावने तीरे स्थितः पान्थः विश्वनाथमंदिरस्य सुवर्णकलशेन आकृष्टः तन्मंदिरमाविशति। तत्राधिगतैः पत्रैः पुष्पैश्च जगच्चालकस्य अर्चनां रचयति। परं किमेतावता विश्वचालकस्य सम्यग् ज्ञानं तेन प्राप्तमिति कथ्येत ? प्रत्युत यथा हि अन्तिकं वर्तते मूर्तेः तथा देवाद् दूरमपि भवेत् सः। कथमपि आकृष्टः भारतराष्ट्रमंदिरं पुनर्विधातुं बद्धपरिकरस्य विधातुः समीपं गतोऽहम्। तानभितः मादृशा बहवः सन्ति। समीपवर्तिनः वयमिति कमपि आनन्दं अहंकारं च प्रतीमः। परं तेषां अगाधस्य माहात्म्यस्य अस्माकम् अज्ञानस्य च भीषणता। तद्विषये किंचित् लेखितुं प्रवृत्तैः अस्माभिः अधुना साक्षात् क्रियते। अतः नैतद् चित्रं, न वा एतद् चरित्रम्। केवलं व्यक्तिदर्शनमेतद्। तदपि यथा मया दृष्टं तथा।

चरित्रकथने कुलस्य ऐतिह्यस्य आजन्मनः विकासस्य अवस्थानां चरित्रनायकस्य क्षेत्रे क्षेत्रे विक्रमोदाहरणानां वर्णनमपेक्ष्यते। तेषां कथाः—ननु सत्यासत्यात्मिकाः सन्तु ताः—चरित्रनायकस्य आत्मचरित्रात अथवा अन्येभ्यः वा संकलिताः सन्ति। परमेतेषां महाभागानां जन्मदिनमपि अद्यपर्यन्तम् अज्ञातम् आसीत्। मानधनात् पितुरपि स्वपुत्रस्य विषये न किमपि ज्ञातुं शक्यते। तेषां जननी जगज्जननीव। केवलं बहुविधैः अलौकिकैः वृत्तान्तैः शैशवं वा तारुण्यं वा अशून्यमासीत् इत्येव ज्ञायते अस्माभिः। राष्ट्रीयस्वयंसेवकसंघस्य धुरः स्वीकारात प्राक् तेषां असाधारण्यां बुद्धौ के विचाराः तिरोहिताः, कथं च तादृशी प्रक्रिया भूता इति सत्यं तैर्विना को नाम कथयितुं पारयेत्। यदा नामते स्वचरित्रं स्वयमेव निवेदयेयुः तदैव तेषां मनोव्यापारान् जगत् प्रतीयात। किन्तु अपि नाम ते स्वचरित्रं लिखेयुः ? यतः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



चरित्रं आत्मश्लाघां मन्यते ते । पाश्चात्यानां णे स्वचरित्रकथनपरिपाटी अस्माभिः अंगीकृता ते तेषां मतम् । इयं पद्धतिः अभारतीया । नरः स्मरणीयः अमरः वा भवति, तत्र आत्मचरित्रलेखनं तु । किन्तु अविस्मरणीया कृतिरेव तन्निदानम् । खलु नामानि प्रातःस्मरणीयतां गतानि तैः पुरुषवरैः चरित्राणि स्वयमेव लिखितानि ? जगतः उपकारकं कृत्वा अज्ञातरूपेण जगत्परित्यागरूपिणी एव तीया पद्धतिः । "मया तु इत्येव परमेश्वरः प्रार्थ्यते मम कार्यं शीघ्रतरं समापयितुं तेन साहाय्यं देयम्, न्तरं च मया निभृतमेव अस्मात् लोकादपसर्तव्यम् जीवनं, आत्मचरित्रं च विषयीकृत्य ईदृशः येषां राः तेभ्यः तच्चरित्रविषयकं किं नाम अस्मद्-गोचरं भवेत् ।

कस्यापि मनुष्यस्य सम्यक् परिचयः यद्यपि दुष्करः पि आवश्यकः । यदि सम्यक् परिचयः न प्राप्तः को नाम अनर्थः न स्यात् । गृहे सेवकं नियोक्तुम् या कन्यादानाय जामातरं वरयितुं भृशं चिकित्सवः । कथं खलु सः ब्रवीति, कथं च व्यवहरति इति पि सुनिपुणं निरीक्षामहे । सामान्यजनानामपि कृते ष्ठी परीक्षा । 'गुरुजी' तु अनन्यसाधारणः पुरुषः । तेषां च चरणयोः शतशो युवकैः स्वजीवन-णि अनाघ्रातानि, अनास्वादितानि समर्पितानि । राः हिन्दुजनाः तेषां आज्ञामात्रेण स्वजीवनानि न्ति । कोटिशः भारतीयेषु अयं महापुरुषः अस्य न्दिरस्य पुनर्रचनां कथं वा कदा वा करिष्यति त्र केचन संशयेन केचन भयेन, अन्ये च क्षया उत्कण्ठया, आशया च अव-क्षन्ति ।

अस्यां भारतकर्मभूमौ एषु अर्धशताब्देषु अनल्पाः संस्थाः प्रादुर्भूताः । आर्थिकं, सामाजिकं, राजकीयं वा लक्ष्यं संपादयितुं क्रियाविद्भिः तैः तैः पक्षैः उपपक्षैः मण्डलैः परिषद्भिः स्वस्वसंकुचितक्षेत्रे समाजोन्नतिं साधयितुं साहाय्यम् दत्तमेव । परन्तु तेषु नैकेनापि संपूर्णस्य राष्ट्रस्य अभ्युदयनिःश्रेयसस्य परिपूर्णः विचारः कृतः । ईदृशं परिपूर्णं विचारं कुर्वन् एकमात्रं संघटनमस्ति । तच्च द्रष्ट्रा केशवेन निर्मितम् । तस्य योगक्षेमः च माधवे समर्पितः । तेन माधवेनैव अस्य संघटनस्य मंत्रेण निखिलोऽपि भारतदेशः मोहितः । संघस्य विरोद्धारः अपि अनुमन्यन्ते यत् राष्ट्रीयस्वयं-सेवकसंघस्यैव हि संघटनं तादृशं भवति यस्य अनु-यायिनः निखिलेऽपि देशे प्रसृताः । ये च संस्थान्तरा-नुयाय्यपेक्षया अविभाज्याः अभेद्याः, एकप्रमुखाः भार-तीयसमाजस्य मनोनुनयस्य इदं महत् कार्यमस्ति । भारतीयः समाजः यथा विशालः, तथा अस्य कार्यस्य रूपमपि विशालम् । परं येषां संदेशेन इदं कार्यं प्रच-लति ते कथयन्ति "किम् त्वरयध्वम् । अमृतस्य पुत्राः वयं भारतीयाः अपि अमृताः । अमरस्य अस्य राष्ट्रस्य संघटनस्य कालमर्यादापि कथं स्यात् । तत्तु अनन्तं भवतु । यदा तत् संघटनं शिथिलं भवति तदा राष्ट्रं अधः पतति । अतः अभेद्यं, सन्ततं, अनन्तं संघटनं रचयितव्यम् । मरणमपि तिरस्कृत्य प्रत्येकं भारतीयं भारतीयत्वस्य अमृतं पाययितुं आकांक्षमाणस्य अस्य राष्ट्रीयसंघटनस्य स्फूर्तिदाता अयं महापुरुषः । कथं खलु ईदृशं पुरुषं अभिजानीयाम् ?

भारतीययुद्धस्य प्रारंभे कुरुक्षेत्रे योद्धुमनसः अर्जुनस्य मनसि कार्याकार्यसंदेहः यदा समुत्पन्नः तदा 'स्थितप्रज्ञस्य का भाषा' इति तेन भगवान् श्रीकृष्णः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पृष्ठः । तदा यदुत्तरं भगवता श्रीकृष्णेन दत्तं, तदुत्तरमेव व्यतीतेषु परस्सहस्रेषु वर्षेषु अपि असाधारणस्य कस्यापि महापुरुषस्य निकषीभूतम्"। अस्यां लक्षणगुणपरीक्षायां आप्तसाफल्याः अनेके महापुरुषाः अस्माकं भारतवर्षे आदर्शरूपेण सन्ति । एवंभूतः प्रत्येकः पुरुषः तस्मिन् तस्मिन् काले युगप्रवर्तकः एव भूतः । येन संपूर्णं साफल्यं प्राप्तं स भगवद्रूप एव मतः । सहस्रशः मानवाः एतल्लक्ष्यम् अधिगन्तुं यतन्ते । परं यत्नवत्सु परस्सहस्रेषु अपि अन्यतमः एव जीवनस्य ज्ञानं साक्षात्करोति । 'गुरुजी' स्थितप्रज्ञाः इति मया कथ्येत चेत् केचन उपहसेयुः । 'गुरुजी' अपि तत्र अनुमन्येरन् अतएव मया कथ्यते यत् स्थितप्रज्ञस्य परिणातामवस्थां मा नाम ते गताः सन्तु किन्तु तत्समीपं तेषां स्थितिः भवत्येव । यदि किमपि प्रमाणमपेक्ष्यते तर्हि तेषां चरित्रमेव पश्यन्तु ।

मनुष्यस्य व्यवहारेणापि कथं तस्य गतिः, कथं तस्य उक्तिः, एतद् ज्ञात्वापि तस्य स्वभावगुणान् ज्ञातुं शक्यते । अथवा एतदपि वक्तुं शक्यते यत् मानवस्य अन्तरंगस्य स्वाभाविकस्य उपार्जितस्य च ज्ञानस्य, विकास गतानां गुणावगुणानां प्रतिबिम्बं तादृशे व्यवहारे संक्रान्तं भवति। अस्मच्चरित्रनायकस्य गतिर्निपुणं निरीक्ष्यताम । कथं खलु तेषां गतिः । गांभीर्यसमवेतया त्वरया ते गच्छन्ति अथवा अनुयायिनां किमपि निवेदनं शृण्वन्तः धीरं गच्छन्ति । पुरा गुरुजी अतिजवेन गच्छन्ति स्म। अनुगच्छन्त. तेषां अनुसरणमपि कर्तुं न पारयन्ति स्म । संघशाखास्थाने यदा तेषामागमनं भवति तदा स वेगः प्रत्यक्षीक्रियते । उपस्थितेषु एव तेषु संघशाखायां, आगमनसूचकः वंशिकाशब्दः प्रेर्यते । तदा सर्वे स्वयंसेवकाः 'दक्षाः' भवन्ति । 'गुरुजी' ध्वजप्रणामार्थं गच्छन्ति । तत्समये या खलु तेषां गतिः सा एव तेषामभीष्टा गतिः । न केवलं संघस्थानेषु, अपि तु बहिरपि एतावता वेगेन संघकार्यं प्रचलतु इति दर्शयति इव तेषां गतिः । एतद् विना अन्यत्र ते कदापि सहगामिनः परित्यज्य न गच्छन्ति । सर्वैः सार्धं ते गच्छन्ति । परं तेषां दूरदर्शिदृष्टितः न किमपि अपसरति कदापि वक्रदृष्टिः न भवति, अतः प्रमादोऽपि न भवति । सर्वज्ञपुरुषस्य इव तेषां गतिः । चरणस्य न्यासे न्यासे निश्वासः प्रकटीभवति । प्रत्येकं पदन्यासः अपि तथा सावधानतया भवति यथा प्रतिसंहरणस्य प्रसंगः एव न उदेति । तेषां पदन्यासस्य गतिं, समतां, पद्धतिं च वीक्ष्य सर्वोऽपि प्रतीयात् यतः अस्य महापुरुषस्य मनसि कुत्र गन्तव्यम् इत्येतस्मिन् विषये संशयलेशोऽपि न विद्यते इति ।

श्रुतिरम्याणां शब्दानां, नयनमनोहरस्य दृश्यस्य, रसनाभीष्टानां, खाद्यपेयानां प्रत्यतुं सुखदानां वस्त्रप्रावरणानां संपादने एव मानवस्य शक्तिः बुद्धिश्च व्यापृणुतः श्रीमद्भिः ज्ञानेश्वरमहाभागैः उक्तमस्ति श्रोत्रादीनि इन्द्रियाणि कथमपि नियम्यन्ते परं, रसनानियमनं दुष्करम् इति । रसनाप्रेम तु वर्धमानमेव अस्ति। केवलं व्रतपालनेन विषयेभ्यः मुक्तिः न संभाव्यते। कश्चन तिक्तं वर्जयति । अन्यश्च मिष्टं वर्जयति । अन्यः कमपि एकमेव पदार्थं भुङ्क्ते । एते सर्वेऽपि निग्रहवन्तः । परं तेषां वासना तु वर्तते एव । केवलं नियमैः तस्या निग्रहः कृतः अस्ति । गुरुजीसहवासः यैः प्राप्तः ते सर्वे जानन्ति यत् पञ्चादशवर्षेभ्यः प्रभृति ते एकभुक्ताः सन्ति । स्वभोजने पात्रे पतितस्य कस्यापि पदार्थस्य रुचिं न कथयन्ति । कदाचित् तेषां माता कस्यापि पदार्थस्य



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...विषये पृच्छां करोति तदा ते उदाहरन्ति यत्— ...तु रसनायाः विषयः। न खलु मम रसना स्वैरिणी ...ता वा। सा रुचिं नैव जानाति। एतच्छ्रुत्वा ...शः चिकित्सकः संशेते, किम् सत्यमेव एतेषां ...न्द्रियं सुगन्धदुर्गन्धयोः विवेकं न करोति, एतेषां ...किं रुच्यरुच्योः विशेषं न गणयति, एतेषां श्रोत्रं ...मधुरकर्कशौ समानौ संधारयति, एतेषां शरीरं किं ...ष्णं सममेव मन्यते? अथवा केवलमुपचारः ...म्। एतेषु द्वन्द्वेषु भेदमेव न ते जानन्ति इति कथं ...यम्। सत्यं तु एतद् यद् संपूर्णम् आत्मतुष्टत्वात् ...नाविषयाः एव न तान् बाधन्ते। यत्र गन्तुमपि मे ...न उद्युक्तं भवति तादृशे दुर्गन्धमये मार्गे श्वासम् ...वरुध्य ते गच्छन्ति। अयं पदार्थः मह्यं रोचते, ...वचनं मया न कदापि श्रुतम् नागपुरस्य प्रचण्ड- ...संतापेऽपि आतपत्रं वा व्यजनं वा तैः स्वहस्ते ...मिति किं केनापि लक्षितम्? दिल्लीपंजाबप्रान्ते ...हिमे शीततौं तेषां वस्त्रप्रावरणेषु परिवर्तनं न ...यम्। अहो औष्ण्यम्। अहो शैत्यम्। अहो प्रवातः। ...भीषणः पर्जन्यः। इत्येतादृशानि वचनानि तेन ...वातावरणेन सार्धं सामरस्यम् अगतानां लोकानां ...भ्यः श्रूयन्ते। न तथा एतेषां महाभागानाम्। सर्वमेव ...वरणं सह्यं सुखावहं च तेषां कृते। ईदृक् तेषां ...रस्यं सर्वप्रकारकभारतीयवातावरणेन सह। यतः ...सः कामो हि दूरं गतः। विषयाणां शंकाऽपि निवृत्ता।

अत्र केचन ब्रूयुः। अलं खलु वागाडम्बरेण अलं ...तु वागाडम्बरेण। अलं खलु असत्यम् उक्त्वा। यदि ...भवन्तः कथयन्ति तत् सत्यमस्ति तर्हि कथं तैः सदा ...पानं क्रियते किमर्थं च कौशेयानि वस्त्राणि। किं ...भोजनानि च महार्हाणि अंगुलीयकानि। इतीदृशान् बुद्धिभेदं जनयतः संशयान् केचन प्रकटीकुर्वन्ति परम् अत्र किंचित् प्रष्टुकामा वयं यत् एतेषु किं तदस्ति यत् गुरुजीमहाभागैः स्वरुचिं प्रीणयितुं कृतम्। गुरुजी अन्यत् किमपि न भुञ्जते अतः स्वयंसेवकैः दत्तं चायपानं ते स्वीकुर्वन्ति। तत्कृत्वा तेषां स्वागतं कृतमिति मन्यन्ते ते स्वयंसेवकाः। उत्कृष्टं पेयं तु सर्वस्यैव इष्टम्। परं अनेकवारं तैः पीतं तद् चायपेयं तादृक् विद्यते यादृक् मादृशः जिह्वाग्रे स्थापयितुमपि न प्रभवेत्। वस्त्राणि प्रान्ते प्रान्ते अनुयायिभ्यः प्राप्यन्ते। तेषां च अन्येभ्यः दानं कृत्वा एव अवशिष्टानि स्वयं उपयुञ्जन्ति। एतत् तु सम्यक् अहं जानामि यत् तेषां समीपं नास्ति एकमपि वस्तु यत् संघटनस्य धनव्ययेन क्रीतम्। भवतु तद् घटिकायंत्रं, लेखनयंत्रं वा। येषां तादृशी वासना एव नास्ति यस्याः तृप्त्यै भौतिकं विश्वं ते अवलम्बेरन्। कदा कदा ते क्रुध्यन्ति। तदा ते तूष्णीमेव तिष्ठन्ति। अथवा क्रोधं जनयतां कारणानां तर्केण चिकित्सां कृत्वा कथं तानि कारणानि परिहर्तव्यानि इति उपदिशन्ति। अनन्तरं तत्पुरुषविषये किमपि कल्मषं तेषां मनसि न अवशिष्यते। प्रमादं कुर्वन्तः यावत् स्वप्रमादं न जानन्ति तावत् तैः अनेकवारं प्रतीक्षितम्। अक्षमार्हापराधिभ्यः अपि क्षमा दत्ता। तत्र तेषाम् अन्तःकरणस्य औदार्यमेव हेतुः।

सकलां भारतभूमिं भ्रमन्तः ते यावतः जनान् जानन्ति कि तावतः जनान् कोऽपीतरः न केवलं अस्मिन् भारते अपि तु अस्मिन् संसारे जानीयात्। तेषां स्मृतिशक्तिः सम्यक् वर्तते इति कथनं तेषां स्मृतिशक्तेः उपहासकारकं भवेत्। मया क्रियन्तोऽपि जनाः अवलोकिताः ये बुद्धिमन्तः सन्ति। किन्तु गुरुजीसदृशः अप्रमेयस्मरणशक्तिः पुरुषः नाद्यापि प्रेक्षितः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वयं कति जानान् नामानुसारं जानीमः। एकसहस्रादधिकानि न खलु भवेयुः तेषां नामानि। अहो विशालं खलु तद् यदस्माभिः स्मृतिगतं कृतं इति अनुमन्यापि कतिवर्षेभ्यः प्राक् पठितात् ग्रंथाद् किमपि प्रकरणं उद्धरणं वा निवेदयितुं प्रभवेम। स्मृतिशक्तेः ये नाम निकषाः सन्ति तेषु परीक्ष्यमाणे, तस्मिन् स्मृति-सामर्थ्ये, तद् अलौकिकमेव प्रतीयात्। संभाषणे विचक्षणः श्रोता अनेकग्रन्थानां तेषां ज्ञानं अनुभवेदेव। इदं तु सर्वेषां विदितं यत् गुरुजी विज्ञानशास्त्रज्ञाः। विद्यापीठे तेषां अध्ययनस्य विषयः जीवशास्त्रम् इति। परं यदा अयं भौतिकशास्त्रज्ञः उपनिषन्न्यायवेदान्ता-युर्वेदमहाभारतरामायणादिसंस्कृतग्रन्थेभ्यः। ज्ञानेश्वर-मयूरपंतादिमहाराष्ट्रकविग्रंथेभ्यः न केवलं तुलसीरामा-यणादिधर्मग्रन्थेभ्यः अपि तु आंग्लकाव्यनाटकादि-ग्रंथेभ्यः सहजतया उदाहरणानि प्रकरणानि च निवेदयति तदा विस्मयेन मनः अभिभूतं भवति। ईदृशं विशालं वाचनं येषां विद्यते तादृशः जनाः न अनल्पाः, किं तु तादृशीं स्मृतिं धारयन्तः तु अलौकिकाः एव।

संघटनस्य धुरः स्वीकारात् प्राक् रामकृष्णाश्रये श्रीमतां विवेकानंदानां सहकारिणां सान्निध्ये तैः अल्पः कालः यापितः तेषां महात्मनां सान्निध्ये शुचिर्भूतस्य जीवनव्यवहारः यथा प्रारब्धः, तथा अधुनापि प्रचलति। स्नानं ध्यानं च न कदापि परिह्रियेते। स्नानध्यानाद्या-ह्निकमकृत्वा ते भोजनं नैव गृह्णन्ति। आसनयोगे असामान्यं खलु तेषां कौशलम्। विदर्भप्रान्ते श्रीमन्तः बापुसाहेब सोहनी इति नामधेयाः अधिवक्तारः सन्ति। यदा ते कारागृहे आसन् तदा गुरुजीमहाभागैः दुष्कराणि अपि आसनानि प्रत्यक्षीकारितानि। तदु-द्दिश्य तैः उक्तम् 'मन्ये योगाचार्याः एव ते इति।' शुचिर्भूतं जीवनं, योगाभ्यासः ध्यानादिआह्निकं, तथा कूर्चकलापोऽपि तैः रामकृष्णाश्रये एव प्राप्ताः इति मे तर्कः।

एतेषां महाभागानां प्रभावपूर्णं व्यक्तित्वं, तेषां विचारप्रक्रियाः वाण्याः, लोकसंग्रहकरात् आचरणात् च स्फुटीभवति तैः एकमात्रः एव ग्रन्थः निर्मितः के वयम् इति नामधेयः सः। अस्मिन् लघुग्रंथे विस्मृतस्य राष्ट्रीयत्वस्य परिचयः पुनःस्मरणं च हिन्दूनां कृते कारि-तम्। लक्षमितानि पुस्तकानि सर्वत्र प्रसृतानि तस्मिन् प्रतिपादितानि तत्त्वानि अविवाद्यानीति मनसि कृत्वा तेषां आधारे भारतराष्ट्रमंदिरस्य रचनां कर्तुं प्रवृत्ताः वयम्। परं अभ्यन्तरे एव द्विराष्ट्रवादस्य संभ्रमेण भारतस्य विभाजनं जातम्। वस्तुतः अभूतपूर्वस्य अस्य कुविचारस्य यशसा हिन्दुराष्ट्रसिद्धान्तस्य समर्थनं एव सर्वैः कर्तव्यम्। किन्तु भ्रान्तमनसः वयं संमिश्रराष्ट्री-यत्वस्य विनाशकारिणः कुविचारस्य प्रभावेण अभि-भूताः अभवाम। 'के वयम्' इत्यस्मिन् विषये संदेहः समुत्पन्नः। एतस्य परिपाकः अधुना सर्वान् अस्मान् भीषयति। इदं तु मे दृढं मतं यत् विचारवद्भ्यः पुनरपि 'के वयम्' इत्ययं विषयः विशुद्धेन तर्केण परि-स्थितिसापेक्षतया च सुनिपुणं चिन्तितव्यः। तदा श्रीमतां तत्त्वमेव समीचीनमिति ते जानीयुः। पुनश्च न कदापि वयं शुद्धं राष्ट्रीयत्वं विस्मरेम। एतावान् महिमा अस्य लघुग्रन्थस्य।

श्रीमद्भिः ग्रंथनिर्माणं कर्तव्यमिति बहवः वदन्ति परं कार्याभिमुखं तेषां चित्तम्। इतिहासस्य निर्माणं अस्मल्लक्ष्यम्। तं कथयन्तः बहवः भविष्यन्ति इति तेषां मतम्। रामकृष्णादिमहात्मभ्यः प्रभृति डॉ.हेडगेवार-पर्यन्तं सर्वेपि भारतीयानाम् आदर्शीभूताः तेषां



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...विता: । परं तेषु शिवराजः डॉ. हेडगेवारश्च इत्येतौ ...ते तेषां आचारस्य वा विचारस्य वा मूलभूतौ । प्रत्ये- ...न हिन्दुना 'शिवरायस्य रूपं स्मरणीयम्, तस्य कृतिः ...रणीया, तथा च आचरणं कृत्वा पूर्वजानां कीर्तिः ...र्तनीया' इति ते सर्वदा कथयन्ति । हिन्दुराष्ट्रीयत्वस्य ...म्यक् परिणामः यदि कुत्रचित् द्रष्टव्यः तर्हि सः श्री ...शिवरायस्य आचरणे । श्रीशिवरायः एव अस्मद्राष्ट्रस्य ...आदर्शस्थानम । शिवरायस्य उद्योगः स्वराज्यसंस्थापने ...रिणतः । डॉ. हेडगेवारैः अपि विस्मृतस्य राष्ट्रीयत्वस्य ...नरुच्चारः संघस्य संस्थापनेन कृतः । द्वयोः विचारे ...रीत किञ्चिदपि अन्तरम् । किं बहुना राज्ञः शिवरायस्य ...योगतं पुनरपि राष्ट्रे संचारयितुमेव डॉ. हेडगेवारैः ...सः संस्थापितः । परन्तु स्वकीयस्य अस्य वटवृक्षस्य ...तारः संपूर्णस्य हिन्दुसमाजस्य एकमात्रं शरणं भूतः ...वेतद् प्रत्यक्षीकर्तुं अस्माकमपुण्यतया ते नात्र ...वाः । शिवरायहेडगेवारौ अप्रमेयशक्तिशालिनौ ...पुरुषौ । अस्य राष्ट्रस्य पुनरुत्थानार्थं क्षयितजीवितौ ...लं पञ्चाशत्वर्षाभ्यन्तरे एव क्षीणायुषौ जातौ । एतौ ...ौ युगपुरुषौ अधिकृत्य यदा श्रीमन्तः भाषणं कुर्वन्ति ...दा एतयो राष्ट्रगुर्वोः पुरुषार्थः वाङ्मयं रूपं धृत्वा इव ...तॄणां प्रत्यक्षीभवति । सत्यमेतद् यत् श्रीमन्तः न ...मपि लिखन्ति । परं यत् ते वदन्ति तत्र कथं कोऽपि ...ज्ञस्यं न प्रेरयति । पञ्चदशवर्षेभ्यः असंख्येयान् ...रयान् आप्लावयन्ती तेषां वाग्गंगा अविरतं प्रवहति । ...दि तादृशानां विषयाणां संग्रहः क्रियते तर्हि सागरवद् ...अमर्यादः सः भवेत् । एते च तेषां विचाराः तात्कालि- ...कान् आधिव्याधिउदरभरणादीन् उद्दिश्य क्षमपि क्षणिकं ...र्थं न सूचयन्ति अमृतकल्पाः खलु ते संपूर्णस्य राष्ट्रस्य ...जीवनापि ते स्पष्टं प्रतिपादयन्ति यत् राष्ट्रस्य गुरुता न भौतिके विभवे आयता अपि तु आध्यात्मिके औदार्ये ।

श्रीमतां वक्तृत्वममोघमिति कथनेन कथं तत् इति ज्ञातुं न शक्यते । भारतवर्षे प्रभावशालिनः वक्तारः एव विरलाः । तत्रापि आत्तसंपूर्णभारतवर्षकीर्तयः विरलतराः एव । वक्तृत्वं नाम न केवलः वाग्विलासः । न वा केवलं उदात्ताः विचाराः । समुपस्थितानां श्रोतॄणां ग्रहणक्षमः विचारः प्रसंगोचितैः परिस्थितिसापेक्षैः स्निग्धगंभीरसुन्दरैः वा सरलसरलैः शब्दैः श्रोतॄणां हृदयगमः येन खलु क्रियते स एव वक्ता । कति खलु ईदृशः वक्तारः अस्मिन् देशे ।

प्रसंगस्य अवधानं, श्रोतॄणां वैशिष्ट्यं तदनुकूलं वाण्याः विचाराणां च रामबाणसमः प्रयोगः इत्येतानि श्रीमतां वक्तृत्वस्य वैशिष्ट्यानि । काशीक्षेत्रे तेषां कदाचन सम्मानः कृतः । नगरपालिकायाः सम्मान-समारोहस्य अनुकूलाः अननुकूलाः च सदस्याः पुरतः उपविष्टा आसन् । तत्क्षेत्रस्थाः महान्तः विद्वांसः दशग्रन्थिनः तत्वज्ञाः, तार्किकाः नैय्यायिकाः, कवयः तत्रासन् । तथा च परस्सहस्राः जनाः । अभूतपूर्वः खलुः जनोत्साहः परां कोटिं गतः आसीत् । ईदृशं विविधरुचिं जनसमूहं सपदि एव कथं इमे श्रीमन्तः तोषयेयुः इति आशंका मनः स्पृष्टवती । किन्तु तेषां शान्ता, शुचिर्भूता मूर्तिः व्यासपीठे उदिता । शुभ्रवेषपरिधारी अयं कोऽपि ऋषिरेव अस्माकं पुरतः उदितः इति सर्वजनसमूहस्य चित्तं तैः आकृष्टम् । क्षणान्तरे एव तैः भाषणं प्रारब्धम् ।

"कथं खलु मया अत्र भाषणं कर्तव्यं । किं च मया वक्तव्यमिति न जाने । बालकस्येव मे मनः मूकं जातम् । यदा यदा अहं काशीनगरीमागच्छामि तदा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मातरं खलु प्राप्तोऽहमिति मन्ये। अनया स्वर्गंगया पवित्रीकृतोऽहम्। अनेन हिन्दुविश्वविद्यालयेन जीवन-रहस्यस्य ज्ञानमयः मार्गः दर्शितः। भवन्तश्च सर्वे अधीतसकलविद्याः, पारंगतसकलशास्त्राः, संदीपित-प्राचीनतत्वज्ञानपरम्परा आचार्याः गुरवश्च मे। भवतां पुरतः बालकेन मया किं वक्तव्यम्।" एतादृशं भाषणा-रंभं श्रुत्वा एव सर्वे विद्वांसः विरोधिनः अपि संमूढाः। अनन्तरं च सार्धहोरामात्रं यः विचारप्रवाहः प्रवृत्तः तस्य कीदृक् उपमानं स्यात्। प्रपातोपमः सः उत नर्मदा-दुग्धधारेव सः, उत भागीरथीप्रवाहसमः उत चन्द्रसुधा-वर्षानुतुल्यः। नैकमपि उपमानं तुलार्हम्। कापि विगुणता वर्तते प्रत्येकस्मिन्। मम एतन्मनः यत् श्रीमतां वक्तृत्वं सागरमन्थनसदृशम्। शांतगम्भीरस्य तेषां विचार-सागरस्य मन्थने प्रारब्धे सति, सर्वाणि रत्नानि पारिजा-तकसमानि मनोहारीणि वाक्कुसुमानि चेतुं भवन्तः अर्हन्ति। शब्दार्थयोः अप्रमेया संपन्नता भवतः चकित-चित्तान् विदध्यात् कदाचित् सात्विकेन प्रक्षोभेण हालाहलतुल्यः उपहासः मृतकल्पान् भवतः कुर्यात्। परंतु बहुधा समाधानम्, आशा, उत्साहः, आकांक्षा, हिन्दुराष्ट्रस्य भवितव्ये अदम्यः विश्वासः एव भवतां मनःसु स्थिरतरतां लभेरन्। श्रीमतां भाषाप्रभुत्वम् असामान्यम्। हिन्दीमराठीआंग्लीयभाषासु तत्तुल्यः वक्ता स्यादेव अस्माकं देशे अपि नाम भारतदेशीय-वक्तृणां स्पर्धा कदापि अस्माकं श्रुतिगोचरं भवेत्।

श्रीमतां भाषणं न कदापि अरुचिं जनयेत्। भवतु तत् भाषणं दशक्षणात्मकं वा होरात्र्यात्मकं वा। तस्मिन् भाषणे सोपदेशं कथासंकलनं अस्ति, मर्मभिद् उपहासः अस्ति। सुसंगतः रसपरिपोषः अपि अस्ति। स्वयं-सेवकानां सभासु (बैठक) हास्यरसोद्भाविभिः प्रश्नोत्तरैः, विचित्रवाक्पाटवेन च उच्चैः हास्येन ते संपूर्णं वाता-वरणं अभिभवन्ति। पर प्रकृत्या ते न हास्योत्पादकाः। निर्विषयं राष्ट्रसेवा एव तेषां जीवनहेतुः। तत्र मनोवि-नोदार्थं अवकाशोऽपि नास्ति। अतः तेषां वचसि नान्यः भावः। विनोदस्तु नास्त्येव। तेषां वाण्याः एकमात्रः स्थायीभावः। स नाम श्रोतृणां मनसि हिन्दुराष्ट्रस्य विशुद्धस्य तत्त्वस्य प्रस्थानं, तदर्थं स्वयंसेवकानां चित्तेभ्यः उत्साहप्रदानम्, सहानुकम्पिषु विश्वासस्य आशायाश्च निर्माणम्। तेषां भाषणं श्रुत्वा विरोधिनः अपि चलि-तचित्ताः भवन्ति। अनुकूलाश्च द्विगुणतरेण उत्साहेन संचरन्ति इत्यत्र न विस्मयलेशः। दक्षिणस्यां दिशि आंग्लभाषायां, उत्तरस्यां च हिन्दीभाषायां। तेषां भाष-णानि श्रुत्वा तत्रत्यैः विद्वद्भिः न केवलं तेषां शुद्धानां सिद्धांतानां, न वा युक्तियुक्तानां विचाराणां अपि तु तेषां भाषाप्रभुत्वस्यापि मुक्तकण्ठं प्रशंसा कृता एतत् किल श्रूयते यत् हिन्दीसाहित्यक्षेत्रे गुरुजीसम वक्ता दुर्लभः।

मातृभूमेः पूजार्थं स्वजीवनपुष्पाणि समर्पयित-व्यानि इत्यर्थं तरुणान् उत्साहयतां, समाजस्य सेवार्थं निरपेक्षं सर्वस्वत्यागं उत्स्फूर्तयतां, राष्ट्रस्य वैभवार्थं बलमुपासितव्यमिति आदिशतां श्रीमतां मुखात् विगतेषु पञ्चदशवर्षेषु याः सुरम्याः कथाः,। यानि स्फूर्तिदायीनि आख्यानानि या ध्वंसिनी चिकित्सा, ये च उपयोगिनः उपायाः निसृताः, तेषां संग्रहः खलु सागरोपमः स्यात्। तत्र सर्वेषां सर्वेषां रसानां, भावानां, उत्साहस्य, आशायाः, विश्वासस्य, आकांक्षायाः। अमृतास्वादं प्राप्तुमर्हामः।

या निशा सर्वभूतानां तस्या जागर्ति संयमी। यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः। प्रतिरात्रं यावत् ते स्वयंसेवकैः सार्धं यत्र कुत्रापि ते सन्तु, स्वीकृत-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...र्यस्य विचारं कुर्वन्ति। वस्तुतः यत्र यत्र संघः स्वयं-सेवकाश्च सन्ति तत्रैव ते गच्छन्ति। निखिलेऽपि ...ते तैः संचारः कृतः, परं यत्र संघः न विद्यते, भवतु ...द् अतिप्रसिद्धं स्थानं तीर्थक्षेत्रं वा तद् द्रष्टुं कामना ...तेषां नास्ति। महाराष्ट्रनृपवरैः पेशवेनामधेयैः पानि-पतसंग्रामार्थं गच्छद्भिः 'उत्तरां दिशं गच्छामः ततः ...निवर्तमानानामस्माकं काशीयात्रापुण्यमपि भवतु' ...कृत्वा स्वकुटुंबानि अपि आत्मना सह नीतानि। परिणामतः काशीयात्रा तु दूरे एव अपास्ता। संग्रामेऽपि ...जयः अभूत्। श्रीमतामयम् आग्रहः यत् एकमात्रं ...नम् एकमात्रं उद्दिष्टं, तच्च संघकार्यात्मकं, तस्य साधनां ...इति। अनुष्ठिते च तस्मिन् सर्वमपि सिध्येत्। ...ः यत्र स्वयंसेवकाः तेषां च संघः वर्तन्ते तत्र ते गच्छन्ति। तत्रैव प्रातःकालादारभ्य मध्यरात्रपर्यन्तं ...क्रमः भवति। मध्यरात्रादनन्तरमपि अल्पीयसीमेव ...त्रां ते लभन्ते। केवलं त्रिचतुर्होरात्मिका च सा। ...राह्णे च सार्धहोरामात्रं विश्रामः। अवशिष्टश्च ...ऽपि समयः निद्रितान् जागरयितुम्, जागृतान् ...रतान् विधातुं व्यतीतः भवति।

यस्य मनसः कामक्रोधादयः समूलं नष्टाः, यस्य ...न्द्रियाणि वासनारहितानि जातानि, आत्मतुष्टत्वात् यः अमृतं वा कटुकषायं पेयं वा समानं गणयति, स्वीय-सौजन्येन खलदुर्जनानपि यः व्रीडयति, सज्जनांश्च ...यति, निरपेक्षः सन्नपि जानानां सुखार्थं यः यतते, अलौकिकः सन्नपि लोकसदृशं व्यवहरति, विरक्तः सन्नपि संसारस्य चिन्तां वहति, ईदृशः अयं महापुरुषः अखण्ड-...मादयुक्तः विश्वासप्रदः अखण्डामृतनिर्झरः अस्य महापुरुषस्य समीपं गच्छन्तु भवन्तः, कथयन्तु च स्वीय ...दुःखानि, स्वीयसंकटानि, तेषां उदारात् मनसः सुखदं विचारमेव भवन्तः लभेरन्। आत्मविश्वासेन आशया च सनाथीभूताः एव भवन्तः निवर्तेरन्। कश्चित् श्रीमतां समीपं गतः, श्रीमद्भिः च स्वविचारेण स्वशब्देन वा तस्मै दुःखं दत्तमिति स्मर्यते एव न मया। स्युरेव ईदृशाः जनाः यैः संघटनस्य समाजस्य कार्यस्य च अपराधः कृतः ये श्रीमद्भिः ताडिताः स्युः। परं एतेषां विषये अपि निवेदयितुकामोऽस्मि यत् श्रीमद्भिः कृतं विचारदर्शनं कार्यपद्धतिदर्शनम् सोढुमक्षमास्ते संघटनाद् बहिर्गताः। न बहिष्कृताः। किन्तु स्वकीयं दोषं निह्नोतुं ते श्रीमतः दूषयन्ति।

एकदा नागपुरस्थान् स्वयंसेवकान् उद्दिश्य तैः उक्तम् "अहो अस्माकं मतभेदः भवद्भिः सार्वमिति उद्घुष्य बहवः कार्यात् पराङ्मुखाः भवन्ति। १७६१ तमे अब्देऽपि पानिपतसंग्रामे मतभेदपिशाचं निर्माय महा-राष्ट्ररणधुरंधराः रणात् पलायिताः। कीदृशः च आसीत् मतभेदः। किं युद्धं तेषां कांक्षितं नासीत् किं वा हिन्दु-राष्ट्रस्य तत्त्वं अभिप्रेतं नासीत्। द्वे अपि न स्तः। केवलं सेनापतेः सदाशिवरावस्य युद्धयोजना तेभ्यः न अरोचत। परिणामतः हिन्दूनां पराजयः भूतः। यस्मिन् रणक्षेत्रे स्वराज्यस्य प्रतिष्ठापनं भवितव्यम्, तस्मिन् क्षेत्रे सर्वं राष्ट्रं पारतंत्र्यावर्ते निपतितम्। शतद्वयवर्षात्मकः कालः गतः। तथापि न वयं स्वमतानां दुरभिमानं त्यजामः। किंकारणः खलु अयं मतभेदः। सः किं संघटनस्य उद्दिष्टमुद्दिश्य वर्तते। उत हिन्दुराष्ट्रस्य भवितव्यसंबंधि नास्त्यत्र मतभेदः चेत् किंकारणः सः किमुद्दिश्य सः "अत्र किंचिद् विरम्य हृदयं प्रमथ्यमानं यद् वचनं उक्तम् तेन तेषां हृदयस्था चिन्ता एव प्रकटीभूता। यदि मद्विषयकः मतभेदः भवति तर्हि कथयन्तु 'मम दोषः', परं कार्यपराङ्मुखाः मा भवन्तु"



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सम्पादकीयम्

## स्वतन्त्रभारते संस्कृतम्

भारतमिदं सर्वतः पूर्वं सभ्यताप्रकाशस्य प्रवर्तकम्। संसारे यया सभ्यतया मानवस्य मानवता सत्या भवति, सा सभ्यता भारतेनैव प्रवर्तिता, प्रवर्द्धिता च।

---

इति न केवलं सर्वे स्वयंसेवकाः किन्तु संपूर्णोऽपि हिन्दुसमाजः तैः प्रार्थितः। ईदृशस्य महतः संघटनस्य सर्वश्रेष्ठः नेता एतावता विनयेन स्वीयान् अनुयायिनः स्वीयं च समाजं याचनां करोति। तदा अस्य हृदयस्य विशालतां उदात्ततां च साक्षात्कुर्मः।

के नाम विचाराः, काः नाम चिन्ताः, कानि नाम रहस्यानि, तेषां हृत्सागरे अन्तर्हितानि। भवितव्यमुद्दिश्य कानि नाम भीषणानि चित्राणि तेषां मनःपटले नृत्यन्ति। तानि ज्ञातुं नैव शक्नुमः। यतः सर्वसंग्राहकं तेषां मनः। तद् एकस्य रहस्यं अन्यं न कथयति। एकस्य दुःखेन अन्यं न व्यथयति। सर्वगताः चिन्ताः मनसि निधाय केवलां आशां विश्वासं च तद् ददाति। ईदृशस्य अगाधस्य अंतःकरणस्य परिचयः कथं खलु कार्यः।

कमपि मूढविचारं परिष्वज्य कथाकथंचित् यत्र-कुत्रापि प्रलपन्तः नेतारः न विरलाः। ते च अद्यतमे विपदावर्ते निमग्नाः अवशाः संजाताः। एवंस्थिते अयमेव एकमात्रः महापुरुषः यः असंमूढः, सदयेन अन्तःकरणेन निमज्जतः उद्धर्तुकामः, संपूर्णं राष्ट्रं संजीवयतुमनाः प्रलयकालीनमनुसदृशः। तस्य चक्षुषोः करुणा, हृदये स्नेहः, भुजयोश्च बलं विद्यते। ईदृशस्य महापुरुषस्य व्यक्तिदर्शने अल्पोऽयं मे प्रयत्नः! नैतत् चरित्रं केवलं स्मरणमात्रमेतत्।

---

आर्याणामुपनिषदो मानवस्य हृदयपरिशोधनाय, सत्प्रवृत्तीनां जागरणाय च सर्वतः पूर्वं प्राभवन्निति न केवलं वयमेव, अपितु समुद्रपारवासिनः पाश्चात्या अपि हृदयेन स्वीकुर्वन्ति। वेदोपनिषद्-दर्शनादयश्च ग्रन्थाः संस्कृतभाषयैव समुत्पादिताः। अतएव आर्याणां कृते संस्कृतभाषा सेयं सर्वतः प्रथमतया समुपार्जनीयेति सर्वैरेव देशहितकामुकैरुद्घोषितम्। स्वातन्त्र्ययुगस्य प्रवर्तको महात्मा गान्धिमहाभागोऽपि पूर्वं समुदघोषयत् यत्—"सर्वैरेव देशकार्यकर्तृभिः संस्कृतभाषा आवश्यकतया अध्ययनीया।" सेयं घोषणा तत्काले प्रचरद्भिः संस्कृतपत्रैरपि ससंतोषमुद्धृताऽभवदिति मन्ये संस्मरेयुः संस्कृतसेविनोऽपि भारतीयाः। किन्तु स्वातन्त्र्यप्राप्तेरनन्तरं भारते संस्कृतस्य का परिस्थितिरभवदिति विचारशीलानामपि विचारणीयं संवृत्तम्।

वर्तमानसमये सर्वेष्वपि संस्कृतप्रचारक्षेत्रेष्वपि संस्कृतं विरलप्रचारं संवृत्तम्। काशी-जयपुर हरिद्वारादि-प्रदेशेभ्यः, संस्कृतक्षेत्रे कार्यकर्तॄणां यानि विवरणानि श्रूयन्ते तेषु संस्कृताध्येतॄणां संख्या प्रतिवर्षं न्यूनी भवति। भारतीयाः शिक्षाविभागीया मुखतः संस्कृतस्य संस्कृतेश्च प्रशंसागीतानि गायन्ति किन्तु कार्यरूपे किं परिणमतीति प्रत्यक्षमीक्षणीयम्। एतेषु वर्षेषु आङ्गलभाषाया विश्वविद्यालयाः, महाविद्यालयाः (कालेज) माध्यमविद्यालयाः (हाईस्कूल) च कां कामभ्युन्नतिं, प्रगतिं च प्राप्नुवन्निति वार्षिकविवरणैः प्रत्यक्षदर्शनैश्च सुस्पष्टम्। किन्तु नवीनानां संस्कृतविद्यालयानां संस्थापनस्य का कथा, प्राचीनेषु संस्कृतविद्यालयेषु अध्येतॄणां या किल संख्या पूर्वमासीत्सापि प्रतिवर्षं प्रतिमासं परिक्षीयते इति सर्वतः परिस्थितिः प्रत्यक्षा भवति। एवं स्थितौ संस्कृतविश्वविद्यालयस्य संस्थापनकथा तु



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...था सुदूरे। "काश्यां, कुरुक्षेत्रे च संस्कृतविश्वविद्या-
...: शीघ्रातिशीघ्रं स्थापितो भवेदिति" बहोः कालात्
...मः। "इदानीं योजना अपि निर्मिताः" इत्यपि
...णा समश्रूयत, किन्तु स विश्वविद्यालयः कीदृशः,
...रिस्थितिकश्चेति भविष्यद्गर्भे एव निलीनम्।

जयपुरराज्यमिदं संस्कृतप्रचारविषये सर्वतोऽपि
...तवर्षे सुप्रसिद्धम्, कार्यरूपे परीक्षितं च। अत्रत्यैः
...कैः संस्कृतप्रचाराय महान्तो विद्यालया राजधान्याम्,
...द्धप्रसिद्धेषु नगरेषु, जनपदेषु च संस्थापिताः, येषु
...वर्षं संस्कृतस्य उच्चोच्चाः परीक्षाः प्रददतिस्म विद्या-
...नः। एतत्प्रबन्धाय समर्थाः पण्डिताः, निरीक्षकाश्च
...मिता अभूवन्। सेयं परिस्थितिर्वैदेशिकानां शास-
...न्तमपि प्रवृत्ताऽभवत्। किन्तु यतःप्रभृति देशीय-
...तन्त्र प्रवृत्तं तत आरभ्यैव सेयं दुर्घोषणा श्रूयते
...—'संस्कृतविद्यालयेषु प्रतिवर्षं छात्रसंख्या हीयते'
...। एतत्प्रतीकाराय प्रधानप्रधानसंस्कृतसेविनां
...मण्डलं राजस्थानस्य शासकानां सविधे समुपस्थितं
...तं च यत्—"राजस्थानम्, विशेषतश्च जयपुर-
...म् आर्यसंस्कृतेः संस्कृतस्य प्रचारविषये प्रमुखतया
...गणनीयम्। अतएव शिक्षाविभागीयैः संस्कृत-
...स्थितेः संरक्षणाय विशेषतः प्रयतनीयम्" इति।
...: कालादनन्तरम् शिक्षाविभागीयैः 'संस्कृतविकास
...मितिः' परिकल्पिता। या हि समये समये संगत्य
...कृतशिक्षायाः प्रचारस्य प्रसारस्य च विषये सुबहु
...चारयति।

समित्याऽनया सुदीर्घा प्रश्नावली प्रकाशिता, यां
...संस्कृतपण्डितानां, संस्कृतसेवकानामन्येषां धनिका-
...नां च समीपे संप्रेष्य संस्कृतप्रचारविषये तेषामभिमतं
...नं ज्ञातुमिच्छति। एतस्याः सदस्या राजस्थानमात्रे
परिभ्रम्य, प्रसिद्धाप्रसिद्धविद्यालयानां परिस्थितिं प्रत्यक्षं वीक्ष्य, संस्कृतानुरागिणां साह्यं गृहीत्वा च संस्कृत-प्रचारविषये निजकर्तव्यं निर्धारयिष्यति। संप्रति संस्कृतसेवकाः सुतरामाशापूर्णया दृष्ट्या प्रतीक्षन्ते-संस्कृतस्य तादृशं प्रचारं येन संस्कृताध्येतॄणामपि वर्तमानभारते सुखेन निर्वाहः स्यात्। पुरयतु मनोरथं भगवान्।

वटोदरपत्तनस्थ श्रीमन्महाराजसयाजिरावविश्व-विद्यालयान्तर्गत—

## संस्कृतमहाविद्यालये पदकप्रदानमहोत्सवः—

गुर्जरप्रान्ते वटोदर ( बडोदा ) राज्यं विद्या-कला-दीनां प्रचारार्थं सुप्रसिद्धमिति सर्वविदितम्। अत्रत्यः संस्कृतमहाविद्यालयः संस्कृतप्रचारक्षेत्रे संमानमर्हति। अस्य महाविद्यालयस्य प्रमाणपत्र-पदकप्रदानादिमहोत्सवो महता समारोहेण फर्वरीमासस्य १९तारिकायां समपद्यत। सभापतिरासीत् विश्वविद्यालयस्योपकुल-पतिः श्रीमती हंसामहतामहोदया।

वैदिकमङ्गलप्रार्थनाऽनन्तरं महाकविभासकृतकर्ण-भारनाटकस्य कश्चिदंशश्छात्रैरभिनीतः। ततो महा-विद्यालयस्याऽध्यक्षेण श्रीहरिप्रसादमहतामहोदयेन विद्यालयस्य वार्षिकं विवरणमपठ्यत। तस्य सारः सोयम्—

प्राचीनसंस्कृतेः संस्कृतभाषायाश्च सुस्थिरीकाराय सेयं संस्था ३-६-१९१५ ख्रिष्टदिवसे स्वर्गवासिना श्रीसयाजिरावमहाराजेन संस्थापिता। महाविद्यालय-श्चायं १८-६-५१ तमे ख्रिष्टदिवसे विश्वविद्यालयस्या-ङ्गतया परिगणितोऽभूत्। अस्मिन् द्वादशवार्षिकोऽभ्या-सक्रमो नियमितः प्रथमकक्षायाम् वर्षत्रये आवश्यक-संस्कृतिज्ञानोत्तरम् ऐच्छिकरूपेण शुक्लयजुर्वेदसंबन्धिनी



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



परमपूजनीयसरसंघचालक-श्रीगोलवाल्करमहाभागानां ५१तम जन्मदिनोत्सवनिमित्तं समर्पिता

# नवरत्नमाला

( कविः—प्रा० श्री० भा० वर्णेकरः नागपुरम् )

यत्कीर्तिप्रभया प्रदीपितमिदं सर्वं दिशां मण्डलम्
यो लोकोत्तरसद्गुणैरगणितैर्लोकस्य मूर्ध्नि स्थितः ।
मूर्ध्ना यश्च बिभर्ति भारतसमुद्धारैकभारं सदा
सर्वेषां हृदयंगमो नरमणिः कोऽप्येष लोकाग्रणीः ॥१॥

वित्ते स्यादणिमा तथापि महिमा विद्याविधौ विद्यते
मूर्तौ स्याल्लघिमा परन्तु गरिमा कीर्तौ दरीदृश्यते ।
प्राप्त्याद्या अपरास्तथैव सकला दिव्या महासिद्धयः
गीतोद्बोधितकर्मयोगविधिना त्वद्दासतामागताः ॥२।

विद्वत्सन्निधिपुण्यतो हि भवतः सायुज्यतां शारदा
शक्तिश्चापि सरूपतामुपगता केनाऽपि पुण्येन सा ।
कीर्तिः सा हि सलोकतामनुभवत्यन्याः पुनर्देवताः
सम्प्राप्तुं च समीपतामिव सदा श्रीमाधवस्योत्सुकाः ॥३

माधुर्यं वचसो गुणाश्च हृदये शान्तः प्रधानो रसः
बोधव्यञ्जकता स्थिता प्रतिपदं सच्छास्त्रपूताः क्रियाः ।
दोषः क्वापि कदापि नैव घटितो नालंकृतो वासना
तन्मन्येऽखिललोकनिर्वृतिकरं काव्यं हि ते जीवनम् ॥४

चिरं निपीताः सुखयन्ति मानसं
या: किल्बिषं वाऽपि दहन्ति मानसम् ।
पीयूषपूर्णा अपि वह्निगर्भाः
वाचो निपेयास्तव नित्यमेव ॥५॥

---

ऋग्वेदसंबन्धिनी वा वैदिकी शिक्षा दीयते । पुराण-विषयिणी शिक्षापि यथेच्छं दीयते । मध्यमकक्षायाम् पञ्चभिर्वर्षैः आवश्यकाङ्ग्लभाषायाः एस्. एस्. सी. पर्यन्तज्ञानेन साकमैच्छिकरूपेण साहित्य-व्याकरणा-दीनि शास्त्राणि, त्रिस्कन्धं ज्यौतिषं वा पाठ्यते । उत्तम-कक्षायाम् चतुर्भिर्वर्षैः पाणिनीयं व्याकरणं, धर्मशास्त्रं सिद्धान्तज्यौतिषं, साहित्यादिकं वा अध्याप्यते ।

अद्य यावदस्मिन् विद्यालये २७१संख्यकाः शुक्ल-यजुर्वेद-ऋग्वेदयोर्याज्ञिकोपाध्यायाः निष्पन्नाः । १२४ पौराणिकाः, ३६ संस्कृतविशारदाः, ४२ ज्योतिर्विशारदाः, ६२ आयुर्वेदविशारदाः, २ व्याकरणशास्त्रिणौ, २ धर्म-शास्त्रिणौ, १ ज्यौतिषशास्त्री, ५ साहित्यशास्त्रिणः, १३ व्याकरणाचार्याः, १४ ज्यौतिषाचार्याः, ५ धर्म-शास्त्राचार्याः, संवृत्ताः । विवरणपाठोत्तरं गुर्जरभाष[ya] 'पारखु' नामकम् एकाङ्किरूपकमभ्यनीयत । ततः संगी-तोत्तरम्—'अधिकाररक्षक' नामकम् एकाङ्किरूप[ka] हिन्दीभाषयाऽभिनीतमभूत् । ततः उपकुलपतिमह[o]-शयाया हस्तेन प्रमाणपत्र-पदकादि-प्रदानमभूत् । अन्ते अध्यक्षमहोदयया स्वभाषणे उपदिष्टं य[त्] पुराणकथानां वर्तमानसमये सोयमुपयोगो यत् पौरा-णिकाः अवकाशसमये ग्रामादिषु गत्वा कथाद्वारा पौराणिकप्रचारं कुर्युः । इत्यादि ।

ततः प्रधानाध्यापक-श्रीहरिप्रसादमहतामहोदयद्वारा धन्यवादप्रदानोत्तरं मङ्गलगीतेन सभाविसर्जनमभूत् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



गुणैरनघैश्चरितैरुदारैः
त्वया स्वराष्ट्रप्रमुखत्वमाप्य ।
कृतार्थताप्रापितमत्र लोके
पुण्यार्जितं तन्नरजन्म नूनम् ॥६॥



काम धुरीणाः शतशोऽपि सन्तु
सा हिन्दुताऽभूद् भवता सनाथा ।
"नक्षत्रताराग्रहसकुलाऽपि
ज्योतिष्मती चन्द्रमसैव रात्रिः ॥"७॥

ऋषयः खलु ते महाजनाः
मृदुचित्ता अपि ये दृढव्रताः ।
जनताहितहेतवेऽनिशं
गतचिन्ता अपि ये सचिन्तनाः ।८।

ध्येयस्थण्डिल ऊर्ध्वदृष्टिरनिशं वज्रासनैकस्थितः
दग्धस्वार्थविभूतभूषिततनुर्निर्द्वन्द्वभावं गतः ।
संघैकप्रणव जपन्नविरतं यो मातृभूदैवतः
लोकब्रह्मसमाधिमग्नहृदयः कोऽप्येष योगी वरः ।९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★ सूक्ति-सुधा ★

त्यजन्ति शूर्पवद्दोषान् गुणान् गृह्णन्ति साधवः
दोषग्राही गुणत्यागी चालनीरिव दुर्जनः ॥१॥

सज्जन पुरुष सूप की तरह, दोषों को छोड़ देते हैं और गुणों को ग्रहण कर लेते हैं, बुरे आदमी चलनी की तरह, गुणों को छोड़ देते हैं और दोषों को ग्रहण कर लेते हैं ॥१॥

व्यालाश्रितापि विफलापि सकण्टकापि
वक्रापि पङ्किलभवापि दुरासदापि ।
गन्धेन बन्धुरसि केतकि ! सर्वजन्तोः
एको गुणः खलु निहन्ति समस्तदोषा ॥२॥

तुझ पर सर्पों का वास है, तुझ में फल भी नहीं होते, तू कण्टकों से आच्छादित भी है तू वक्र भी है उत्पत्ति भी तेरी कीचड़ से है, तथापि हे केतकी! अपनी अनुपम सुगन्ध से तू सब की प्यारी हो रही है, सच है, यदि एक भी अलौकिक गुण हुआ तो उस से सारे दोष ढक जाते हैं ॥२॥

न सन्ध्यां सन्धत्ते, नियमितनमाजं न कुरुते
न वा मौञ्जीबन्धं कलयति, न वा सुन्नतविधिम् ।
न रोजां जानीते, व्रतमपि हरेर्नैव कुरुते
न काशी, मक्का वा, शिव शिव न हिन्दुर्न यवनः ॥३॥

न संध्या करते हैं, न नमाज ही पढ़ते हैं, न यज्ञोपवीत से काम न सुन्नत से ही, न रोजा रखते हैं, न कोई व्रत ही करते हैं, न काशी को मानते हैं, न मक्का को ही जाते हैं, शिव शिव, आज कल के लोग न हिन्दू में न मुसलमान में ॥३॥

न द्विषन्ति न याचन्ते परनिन्दां न कुर्वते
अनाहूता न चायान्ति तेनाऽश्मानोऽपि देवताः ॥४॥

न किसी से द्वेष करते हैं, न माँगते हैं, न दूसरे की निन्दा ही करते हैं, और न कहीं बिना बुलाये ही जा धमकते हैं, इसीलिये तो पत्थर भी देवता कहे जाते हैं ॥४॥

यदीच्छसि वशीकर्तुं जगदेकेन कर्मणा
परापवादसस्येभ्यश्चरन्तीं गां निवारय ॥५॥

यदि संसार को एक ही काम से वश में करना चाहते हो, तो पर-निन्दा करने से अपने को रोको ॥५॥

आयुषः क्षण एकोऽपि न लभ्यः स्वर्णकोटिभिः ।
स चेद्विफलतां नीतः का नु हानिरितोऽधिका ? ॥६॥

कोटि-स्वर्ण-मुद्राएँ देकर भी आयु का एक क्षण नहीं खरीदा जा सकता; यदि ऐसे आयु-क्षण को भी हम व्यर्थ नष्ट करें, तो सबसे बढ कर क्या हानि होगी ॥६॥

न नश्यति तमो नाम कृतया दीपवार्तया ॥७॥

दीपक का नाम ले लेने मात्र से अन्धकार नहीं दूर हो जाता ॥७॥

प्रकाशकः— जयबहादुरसिंह पताः—भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रकः— राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

22-5-56



अहिंसा-सत्य-सिद्धान्तं मानवेषु प्रचारयन् ।
सिद्धार्थो बुद्धभगवान् बुद्धिं बोधयताद् भुवि ॥

बुद्धं शरणं गच्छामि-
धर्मं शरणं गच्छामि-
संघं शरणं गच्छामि ।

वर्ष ६

समापोऽङ्कः

मूल्यम्
वार्षिकं ३) रु०
एकस्याऽङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❋ विषय—सूची ❋


| क्रमः | लेखाः | लेखकाः | पृष्ठ संख्या |
|---|---|---|---|
| १. | जानकीजाने ! | श्रीरुद्रदेवत्रिपाठी साहित्याचार्यः, मोहमयी | |
| २. | औपनिषदः सिद्धान्तः | श्रीनरहर दामोदरशास्त्री. ठाणें | १४= |
| ३. | गोविन्दस्य कथा | पं. श्रीवासुदेवशास्त्री बागेवाडीकरः, शोलापुरम | १५० |
| ४. | पिपासुकश्चातकः | श्रीश्यामदेवशास्त्री बी० ए०, अमृतसर | १५६ |
| ५. | राजयक्ष्मा | वैद्य मणिराम शर्मा गौडः श्रीगङ्गानगर | १५७ |
| ६. | हे राष्ट्रकर्णधारा नहि वयमुपेक्षणीयाः | श्रीपरमानन्दशास्त्री, (पञ्चाम्बुविश्वविद्यालयः) | १५ |
| ७. | संस्कृतस्य वैशिष्ट्यम | पं० मुनिदेव उपाध्यायः, धार, मध्यभारत | १६० |
| ८. | एको रसः करुण एव | श्रीधरप्रसादपन्तः, पीलीभीत, उत्तरप्रदेश | १६१ |
| ९. | एका वाणी सत्या | श्रीगणेशरामशर्मा, झालावाड़ | १६३ |
| १०. | सम्पादकीयम | सम्पादकः | १६४ |
| ११. | संस्कृतसमाचाराः | ,, | १६६ |
| १२. | सूक्ति-सुधा | ,, | |


## —❋ "भारती" पत्रस्य उद्देश्यानि नियमाश्च ❋—

१. संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचारपरि- पोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि ।

२. 'भारती' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम ।

३. मासिकपत्रमिदं प्रतिमासं पूर्णिमायां पूर्णिमायां तिथौ प्रकाशितं स्यात् ।

४. एकस्यांकस्य मूल्यम =) आणकषट्कम् ।

## भारती-प्रतियोगिताः—

भारतीद्वारा आयोजितानां कथा-काव्य नाटकप्रतियोगितानां कृते समागताः कथाः काव्यानि नाटकानि च निर्णायकमहाभागानां सविधे प्रेषितानि सन्ति । त्रयाणामपि निर्णायकानां मतैक्ये सति प्रतियोगिता- निर्णयो घोषयिष्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादकः—
देवर्षिकलानाथशास्त्री B. A.
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षः ६ | वैशाखशुक्ला १, सं० २०१३ | अङ्कः ७

## जानकीजाने !

[ श्रीरुद्रदेवत्रिपाठी साहित्याचार्यः, मोहमयी ]

जीवनं मम भारभूतं, जानकीजाने ! निभालय ।
पादयोः पतितं सुतं मां, नाथ ! शीघ्रं पालय ।
वाहिताः कति वासरा नो, त्वत्पदस्मरणं विना;
हन्त ! हन्त ! कृतं मया किं, संसृतावविवेकिना ।
दारपुत्रसुतास्नुषादौ रञ्जितं निरतं मनः;
सत्यमेव समार्पितं, निजजीवनं भजनं विना ।
कल्पतरुमपहाय हा हा ! निम्बवृक्षनिषेविणीं,
स्वार्थसिक्तां दुर्विनीतां, शेमुषीं परिचालय ॥ जीवनं०
सर्वदा समुपेक्षिताः सुकथाः सतामथ सर्वथा;
संश्रिता संसारसागरसारिणी सततं प्रथा ।
मोहमायामत्सरादिषु सम्प्लुतः सहसा विभो !
विक्लवीभूयाचरामि समुद्धृतेर्यतनं वृथा ।
समुचितः पन्था भवेद्यस्तं प्रभो ! मां कान्दिशीकं,
दर्शयाशु सुबोधदायिन् ! करुणया करुणाऽऽलय! ॥ जीवनं०
प्रत्यवायपरम्पराणां, पार एव न विद्यते;
उद्भवन्ति परा अनेका, यावदेका छिद्यते ।
किञ्च यावच्छक्यमधुनावधि मया यतितं बहु;
किन्तु लब्धा नैव शान्तिस्तेन चेतः खिद्यते ।
सर्वतो भूत्वा हताशस्त्वत्पदं समुपागतः,
सन्ततं तमसावृते हृदि, बोधदीपं ज्वालय ॥ जीवनं मम०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# औपनिषदः सिद्धान्तः

[ श्री नरहर दामोदर शास्त्री, ठाणे ]

अस्मिन् जगति सकलमानवसमाजाय नवं चैतन्यं प्रदाय निरतिशयशान्तिसुखप्रदाने श्रेयोभागस्माकमौपनिषदः सिद्धान्त एव। उपनिषत् साक्षात् कामधेनुरेव। ब्रह्मसूत्रप्रणयनमासामुपनिषदामाधारेणैव समभूत्। श्रीमद्भगवद्गीतापि गोपालनन्दनकृतदोहसमुपनिषद्रूपकामधेनोः परमं मधुरं दुग्धामृतमेव। भारतवर्षे यावन्त आस्तिकसंप्रदाया विद्यन्ते तेषां निखिलानामप्याधारभूतानीमानि त्रीणि ग्रन्थरत्नानि यानि प्रस्थानत्रयीति नाम्ना प्रथन्ते। अद्वैतविशिष्टाद्वैतशुद्धाद्वैतद्वैताद्वैतशिवाद्वैतादीनामाधारभूता भगवती प्रस्थानत्रयी। अस्याः प्रस्थानत्रय्या आधारेणैव सर्वसंप्रदायाचार्याः स्वस्वमतिबलानुसारं विवेचनात्मिका व्याख्या विधाय परमस्य सत्यस्यान्वेषणं कृतवन्तः। उपनिषदां प्रादुर्भावो वेदानामत्युच्चात् शीर्षस्थानीयाद्भागात्समभूत्। यः प्रायेण वेदान्तो ब्रह्मविद्याम्नायमस्तकमिति वा कथ्यते। वस्तुत उपनिषदेषा ब्रह्मविद्याया आदिमं स्रोतः। एतस्मान्निर्गत्य विविधवाङ्मयस्वरूपे विकसिता सती ज्ञानगङ्गा जीवानां पापतापान् शमयति। यासामुपनिषदां मन्त्राणां पाठमात्रेणापि हृदयमपूर्वं कमप्यानन्दमनुभवति तासामुपनिषदां महिम्नो वर्णनं नाम सूर्याय दीपप्रदर्शनसमानं वर्तते। आस्माकीन औपनिषदः सिद्धान्तो ब्रह्मविद्याया जिज्ञासुजनमात्मज्ञानसंपादनायाऽऽदिशति नह्यशेषविद्यामहार्णवसंपन्नशास्त्रज्ञतालाभाय। यतः केवलशास्त्रज्ञः संसृतिचक्ररूपशोकसमुद्रपारं गन्तुं न शक्नोति। तस्मात् स जिज्ञासुरनुभवशाली परमात्मवेत्ता भवत्वित्येतदावश्यकम्। एतदर्थमुपनिषत्स्वनेकाख्यायिकाभिः सृष्टिप्रपञ्चस्य निरासं कृत्वा जिज्ञासोर्बुद्धावभेदज्ञानस्थिरीकरणाय 'एकमेवाद्वितीयम्' 'इदं सर्वं यदयमात्मा' 'उदरमन्तरं कुरुते' 'अथ तस्य भयं भवति' इत्यादिनाश्रुतिवचनैरभेददर्शिनः प्रशंसा भेददर्शिनो निर्भर्त्सना च प्रदर्शिता।

अद्वैतवेदान्तप्रक्रियानुसारं मलविक्षेपावरणनामधेयाभिरविद्यायास्तिसृभिः शक्तिभिर्जीव आवृतः। अन्तःकरणस्य मलिनसंस्कारजनितदोषाणां (मल) निवृत्तिर्निष्कामकर्मणा भवति। विक्षेपस्य नाम चित्तचाञ्चल्यस्य नाश उपासनाभिर्भवति। आवरणस्य (नाम स्वरूपविस्मृतेः) नाशस्तत्त्वज्ञानाज्जायते। अर्थाच्चित्तस्यैतेषां त्रिविधानां दोषाणामपगमायोपनिषत्सु भिन्नानि भिन्नान्यौषधानि प्रदर्शितानि सन्ति। येन त्रिप्रकारा गतयो भवन्ति। सकामकर्मिणो जना धूममार्गेण स्वर्गादिलोकान् प्राप्य क्षीणे पुण्ये पुनर्जन्म लभन्ते। निष्कामकर्मिण उपासका अर्चिरादिमार्गेण निजोपास्यदेवताया लोकमवाप्याधिकारानुसारं सालोक्यं सामीप्यं सारूप्यं सायुज्यं मुक्तिविशेषं वा प्राप्नुवन्ति। इमौ द्वौ यौ सकर्मी निष्कामकर्मी च परस्परविभिन्नौ तत्त्वज्ञानिनो तयोः प्राणानामुत्क्रमणं (लोकान्तरगमनं) न भवति। अर्थात्तयोः शरीरं स्वस्वतत्त्वेषु लीनं भवति तेन तौ कैवल्यपदमश्नुवाते। अस्तु।

अनेन प्रकारेणास्मदीया अनादय उपनिषदस्तस्य परब्रह्मणः स्वरूपं विशदीकृत्य तस्य च स्फुटतरं निरूपणं कृत्वाऽऽस्माकीं हृदयभूमिकामेतादृशीं योग्यां


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



निर्मान्ति येन तस्यां तत्त्वज्ञानरूपांकुरः शीघ्रं प्रस्फुटेत् । तं कस्या अपि कल्याणकारिण्या विद्याया ग्रहणाय मुमुक्षुजनस्य सत्यतपःसेवात्यागश्रद्धाविनयादीनां कियत्या-वश्यकता वर्तत इत्ययं विषय उपनिषत्सु काभिराख्या-यिकाभिः प्रदर्शितो वर्तते । न केवलमियदेवापि तु ब्रह्मनिष्ठस्याभयप्राप्तिनिरूपणेन साकं ब्रह्मणो वेत्तुरा-नन्दस्य सर्वोत्कृष्टतानेकेषु स्थलेषु प्रदर्शिता वर्तते । तात्पर्यमेतद्विद्यते यत् प्राधान्येनोपनिषदां लक्ष्यं ब्रह्म-विद्याया उपलब्धिरेव । तदर्थं तत्त्वज्ञानस्य तदुपयोगि-कर्मणामुपासनानां विस्तृतं विशदं च वर्णनं व्यधायि ।

ब्रह्मविद्यायाः प्रसादात् समत्वदर्शनं भवति । अज्ञा-नग्रन्थयो भिद्यन्ते । सर्वसंशयाः क्षीयन्ते । एवं चित्तचा-ञ्चल्यं नष्टं भवति । चित्तमन्तर्मुखं जायते । ब्रह्मवि-दया मिथ्यानुभूतिर्नश्यति । स्वयंप्रकाशस्यावाङ्मनस-गोचरस्य चेतनानन्दरसैकघनस्य विज्ञानस्वरूपस्य पर-ब्रह्मणः साक्षात्कारो जायते । ब्रह्मविद्यामृतपानस्यावर्ण-नीयं माहात्म्यं विद्यते । येनास्य तत्त्वामृतस्य पानं कृतं स तृप्तः संवृत्तः । तस्य पुनः किमपि कर्तव्यं न वर्तते न वा प्राप्तव्यम् । ब्रह्मवेत्तुर्दृशि निखिलस्य प्रपञ्चप्रसा-रस्य विलयो भवति । स च सच्चिदानन्दस्वरूपो जायते तेनासज्जडं दुःखरूपं प्रतीतं न भवति । तस्य दृष्टौ द्रष्टा दृश्यं दर्शनमित्यात्मिका त्रिपुटी विलीना जायते । स एको निश्चलो निर्बाधो निष्कलश्चिदानन्दघनसत्तामात्र-स्तिष्ठति । स यान्यादर्शभूतानि कार्याणि विधत्ते तानी-तरेषां जनानां दृष्टावपि संभवन्ति । ब्रह्मवेत्तृदृशि न कोऽपि कर्ता न वा किमपि कार्यम् । यतस्तत्त्वदर्शिनो जलतरङ्गयोरन्तरं न पश्यन्ति । तद् भिन्नत्वं बाह्यदर्शिनां जनानां दृशि प्रतीतं भवति यया दृष्ट्या प्रेरितास्ते वदन्ति यज्जले तरङ्गा उत्पद्यन्ते । किन्तु जलं तरङ्गान् दृष्ट्वा कदापि तेषां गणनामकरोत् किम् ? कथनस्येद-मेव तात्पर्यं यदेकमखण्डं चिद्घनं वस्तु वर्जयित्वोत्पत्ति-प्रलयबद्धसाधकमुमुक्षुमुक्तादिप्रकारकः कोपि व्यवहारो न वर्तते ।

ब्रह्मात्यन्तं दुर्दर्शं वर्तते यतः सदा व्यवहारेपि निर-तानां विषयिणां जीवानां व्यवहारातीतलक्ष्यब्रह्मपर्यन्तं दृष्टिप्रापणं नितान्तं कठिनं वर्तते । येषां वेदपारगामिनां मुनिजनानां रागद्वेषलोभभयक्रोधादीनां विकाराणां निवृत्तिर्ब्रह्मनिष्ठस्य श्रोत्रियस्य सद्गुरोः कृपया सम-जायत तेषामस्य प्रपञ्चातीतस्याद्वयपदस्य बोधो भवति । अस्य विशुद्धस्य तत्त्वस्य बोधे जाते स महात्मा सर्वथा निर्द्वन्द्वो निर्भयो भवति तथा स्तुतिनमस्कारस्वधाकारा-दिककर्मश्रेणीभ्यो विरक्तो यदृच्छालाभसन्तुष्टो भवति । अथ बाह्याभ्यन्तरेषु सर्वत्रैकमात्मतत्त्वमोतप्रोतं पश्यं-स्तस्मिन् रममाणः कदापि तत्त्वच्युतो न भवति । एषा बोधस्थितिः । एतदर्थं जिज्ञासूनामखिलः प्रयत्नो भवति । एतस्याः स्थितेर्लाभे च प्राणी कृतकृत्यो भवति । कथ-नस्येदं तात्पर्यं यदौपनिषदं दर्शनमेव सम्यग् दर्शनम् । यत्प्रसादाद्भवभयनिरसनपूर्वाऽऽत्यन्तिकानन्दावाप्तिर्भ-वति । अस्या विशुद्धाया दृष्टेर्लाभ एव मनुष्यजीवनस्य परममुद्देश्यम् एवं गहनतानुप्रविष्टस्यौपनिषदसिद्धा-न्तस्य लाभमन्तरा जीवनं व्यर्थम् । एतदप्राप्तिर्महत्तमा विनष्टिर्वर्तते ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# गोविन्दस्य कथा

[ ले० महोपाध्याय पं० वासुदेवशास्त्री बागेवाडीकरः साहित्याचार्यः, काव्य-वेद-तर्क-तीर्थम्, शोलापुरं ]

"अयि भोः, तात, किं मम नवीना जननी समागमिष्यति ? किमेतत् सत्यम ?" इति मातृवञ्चितो गोविन्दः सहसा कुतोऽपि श्रुतवृत्तान्तः स्वपितरं पृच्छति। तस्य पिता विद्याधरपण्डितः प्रतिभाषते। "अथ किम्। सा त्वां प्रेम्णा लालयिष्यति पालयिष्यति च।" प्राह बालः—"किं मे दिवंगता माता प्रत्यागच्छति तथैव मयि स्निह्यति"। इदं मातृवत्सलस्य सुतस्य वचनं निशम्य विद्याधरपण्डितो विधूयमानेन मूर्ध्ना प्रतिवचनं दत्वा तूष्णीमतिष्ठत्। बालस्तु ततः प्रभृति मातृदर्शनं नचिरा मे भूयो भवितेति प्रसन्नवदनः प्रहृष्टान्तरात्मा सञ्जातः। वयस्येभ्यश्च कथयति। "मम जननी पुनरायास्यति। मां क्रोडे करिष्यति। नवाश्चित्राः कथाः कथयिष्यति। मिष्टं चान्नं मां भोजयिष्यति। न सा कदापि मे दूरवर्तिनी भविष्यति।"

विद्याधरपण्डितः पण्डितकुले जातः अधीतव्याकरणादिशास्त्रो नन्दपुरग्रामे न्यवसत्। स्वाध्यायं कुर्वन् यदृच्छया लब्धेन वृत्तिमुपकल्पयन्नास्त तस्य पत्नी सती सत्यदेवी प्रेष्ठा श्रेष्ठा च गोविन्दं पुत्रं प्रसूय वर्षत्रयेण परलोकं गता। तदा विद्याधरपण्डितः परमदुःखितः। ततोऽपि गोविन्दः। अस्मिञ्जगति मातृहीनो बालः परमकरुणास्पदम्। स जनन्या ऋतेऽन्यमाश्रयं न पश्यति। सर्वेषां दीनानां नाथः परमकारुणिको भगवान् परमात्मा वर्तते। अनाथास्तं करुणां याचन्ते। स्वदुःखभारं चाधरीकर्तुं शक्नुवन्ति। परं जननीहीनो बालस्तमपि दीननाथं शरण्यभावेन नोपैति। स केवलं मातुः स्मरति। अतः स सर्वस्मादपि वञ्चितो भवति। जननीविरहितो बालः पक्षविकलः पक्षी।

एवं दुर्दैवहतो गोविन्दः सदैव खिन्नः। नाहारमभिनन्दति नापि पानीयम्। न समानवयोभिर्बालैः समं रमते। न वा पितुः सन्निधौ क्षणमपि तिष्ठति। न दिवा न वा रात्रौ निर्भरनिद्रासुखमनुभवति। एवं मातृवियोगदुःखितस्य तस्य षण्मासा गताः। यदा च जननीलाभो भूयो जायते इति वार्ता तस्य श्रवणसरणिमापन्ना तदा स भृशं हृष्टः। तस्य मनो दुःखमजहात् सपदि। अहो कियती विचित्रा शक्तिः केवले जननीशब्दे। तस्य चित्तान् खिन्नता अपेता। क्षणादेव सर्वं विश्वं तस्यानन्दमयं प्रतिभातम्। अहो मुग्धत्वं बालकस्य।

## (२)

विद्याधरपण्डितस्य विवाहसंभारो गोविन्दस्य च जननीलाभो निश्चिते दिवसे यथाविधि संपन्नः। तदा मिलितानां ज्ञातीनां समुल्लासो भिन्नो गोविन्दस्य च कोऽप्यन्य एव। वध्वा गृहप्रवेशानन्तरं काचिद् वृद्धा गोविन्दं गृहीत्वा वधूं विद्यावतीं प्राह—"नन्दिनि, मातृवत्सलोऽयं मुग्धो बालो महान्तं काल त्वां प्रतिपालयति। एतं सदैव स्निग्धया दृष्ट्या अभिवर्षय।" गोविन्दश्चारुगात्रीं भूषणभूषिताङ्गीं तां विलोक्य चकितचकितः सहर्षं तस्याः प्रावारकं च धृत्वा "अयि मातः" इत्युदगिरत्।

यौवनवसन्तोदारसमये प्रीतिवाततरङ्गैरान्दोलिता लतेव सहकारसमागममपेक्षमाणा सा विद्यावती तस्या-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



बालस्य वात्सल्यपूर्णमपि वचनं कुलिशपातसमं ।असहमाना सपदि परुषतरमभाषत । "मैवं मां ...य" । एतेन निष्ठुरेण वचसा बालस्य मनसि ...पूर्णं आमोदो बिन्दुमात्रोऽपि नावशिष्टः । स ...वयं सास्रं तस्या वदनं विलोकयन् स्थितः । तदा ...द्धा भूयोऽपि जगाद । "वत्से, अलं क्रोधेन । कथं ...नातु एष वराको बालकः केन शब्देन त्वं संबो-...व्या । विलोक्यतामस्य प्रेमपूर्णमन्तःकरणं न तु ...भिमतं ते वचः । अनेन शब्देनापि संबोधितायाः ...ते क्षतिः । अनुगृहाण जननीवत्सलतयेमम्" । ...नि" इति संबोधनमस्य न मे रोचते" इति वदन्ती ...पटान्तेनावृत्य रोदितुमारब्धा ।

अथ अल्पैरेव मासैर्विद्यावती गर्भिणी जाता । पूर्वं ...द क्वचित् क्वचित् लालयन्ती सा संप्रति रूक्ष-व्यवहरति । यदा सा सुतमसूत तदा सा गोविन्दं ...था दूरतो विसर्जयन्ती अतिष्ठत् । तस्य बालस्य ...ल इति नाम चकार । जनन्या अङ्कगतं तं शिशुं ...यितुं यदा यदा गोविन्दः प्रवर्तते तदा तदा तं सा ...धति । बालकप्रिया हि बालाः । तथा निषिद्धो ...न्दश्चिरं भृशमखिन्न्त । रहसि च गत्वा स्वगतं ...हरति । "इमं रामणीयकमर्भकम् अङ्के निधायोपलाल-...मुत्सहते मे चेतः । परं तथा कर्तुं माता मां नानु-...नाति । किमहं तं भूमौ पातयामि ? किमिति मां ...धति न जाने ।" सापत्नमातुर्हृदयं ज्ञातुं बालः कथं ...शक्नुयात् ।

...थैकदा गोविन्दो जननीं महानसे कार्यान्तर-...तां वीक्ष्य दोलायां प्रसुप्तं शिशुं निभृतमुपैत् । ...रं तं प्रेक्षमाणः सुकोमलौ कपोलौ ललितं पर्यचुम्बत । ...स्पर्शेन संजातनिद्राभङ्गः स बालक उच्चैराक्रन्दितुं प्रारभत । तेन तस्य रोदनध्वनिना त्वरया समागता विद्यावती दोलासमीपगतं गोविन्दमवालोकयत् । संक्रुद्धा च तं कपोलेऽचपेटयत् । भूयो गृहं प्रतिनिवृत्ताय विद्याधरपण्डिताय "सुप्तस्य गोपालस्य कपोलौ गोविन्देन अंगुल्यग्रेण पीडितौ" इति तया निवेदितम् । एवं सपत्नमात्राऽन्यथा प्रचोदितः पिता संक्रुद्धो गोविन्दं दण्डेनाताडयत् । गोविन्देन प्रथममेवेदं पितुस्ताडनमनुभूतं तच्च सापत्नजनन्याः कुटिलनीतिवशात् । इत आरभ्य तस्य जीवनक्रमः परिवर्तितः ।

अथ गच्छता कालेन गोविन्दः प्रेममयेन सहवासेन परिवर्जितः । ततः प्रायेण स भोजनाय शयनाय च गेहं समायाति । इतस्ततो ग्रामे क्वापि परिभ्रमति । अध्ययनव्यवसायादपि तस्य मनः शनैः शनैर्विरतमासीत् । अन्ते स पाठशालामपि परित्यक्तवान् । प्रथमं यः कुशलः कुशाग्रबुद्धिः सच्छीलः इति सर्वेषां ग्रामे प्रशंसाविषय आसीत् स एव संप्रति तेषां तिरस्कारविषयो जातः । ग्रामवासिनः प्रत्यहं तस्य पीडाकरत्वं दुःखशीलत्वं च पितुरग्रतो व्यवृण्वन् । पिता च तं वारं वारं ताडयामास । न कोऽपि गृहस्थः स्वसुतं तेन साकं संपृक्त सहते स्म । एवं स स्वकीयैः परकीयैश्चापि परिवर्जितः । न कस्यापि प्रीतिभाजनं सः ।

( ३ )

गोपालस्तु नियतं पाठशालां गच्छति स्वपाठांश्च पठति । तेन हि गुरवः मातापितरौ च तमभिनन्दन्ति । तं पाठयितुं गेहेऽपि अध्यापको नियुक्तः । सदा प्रसन्नवदनः स विनयशाली सुचरितैः सर्वान् प्रीणाति स्म । एवं तयोर्भ्रात्रोर्महति विरोधे वर्तमानेऽपि परस्परोपरि महती प्रीतिरासीत् । गोविन्दो न कस्मिन्नपि स्निह्यति न वा कोऽपि तस्मिन् । परं कनीयसि बन्धौ तदन्तः-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



करणे महान् स्नेहानुबन्धः । पितृभ्यां निवारितावपि तौ मिथः स्नेहानुवर्तिनौ । यथा गोविन्दस्य कनीयसि तथैव गोपालस्यापि स्वाग्रजे स्नेहानुवृत्तित्वम् । अशनपानादिषु पक्षपातिन्या मात्रा सार्धं विवदमानेन तेन भूयो भूयो ज्यायसि स्वपक्षपातित्वमाविष्कृतम् । गोविन्दोऽपि गोपालसङ्गतौ महान्तं सन्तोषमनुभवति स्म । गोपाल एव जगति तस्यैकं महतः प्रमोदस्य स्थानम् । "स्नेहेन स्नेहो वैरेण वैरं प्रवर्धते" इति यदुच्यते तत्सत्यम् ।

अथैकदा पिता गोविन्दं "इदानीं त्वं पाठशालां न गच्छसि । अध्ययनं च न करोषि । किमिदम् । किं ते मनसि वर्तते । पित्रैव तवोदरभरणभारः अत्यन्तं वोढव्यः" इति अध्ययनपरिवर्जनं निमित्तीकृत्याऽपृच्छत् । "अहं तु शालां गच्छामि । परं शिक्षको मां निःसारयति । यतो मम प्रतिमासं देयं शुल्कं सुबहु अवशिष्टम् ।" इति तस्य प्रतिवचनं निशम्य विद्याधरपण्डितो न्यगदत् । "त्वं सम्यङ्नाधीषे । एकस्यामेव कक्षायां वर्षत्रयं शिक्षसे । अथापि नोत्तीर्णतां भजसे । तवानुजः परस्मिन् वर्षे तव कक्षां प्रविशेत । किं न जिह्रेषि एतस्मात्" । ततः स वदति—"मम ललाटे विद्यैव नास्ति" । पिता पुनः पृच्छति—"किं ते ललाटे लिखितम्" । "मम ललाटे भिक्षाटनं लिखितम्" । इति तस्योत्तरं श्रुत्वा सक्रोधं पित्रा स उक्तः "यद्येवं भिक्षां याचस्व । निर्याहि मे गृहात्" ।

एवं पित्रा निष्ठुरं धिक्कृतः स सदनं परित्यज्य क्वापि सुदूरं गन्तुं निरचिनोत् । "प्रेयान् कनीयान् बन्धुः स्वनिर्गमनं न कदाप्यनुमन्येत । प्रत्युत निरुन्ध्यात्" इति कृत्वा केनाप्यलक्षितः परेद्यवि एव एकाकी अकिञ्चनः स्वग्रामं स्वभवनं प्रेयांसमपि कनीयांसं भ्रातरं सहसा परित्यज्य प्रस्थितः । पादचारो ग्रामाद्ग्राममटन् भिक्षां भिक्षमाणः कैश्चिदहोभिः श्रमोपजीव्यां मुम्बापुरीं प्रविष्टः ।

नास्ति किञ्चन धनं नापि विद्या । न वा परिचितः कोऽपि । एतादृशो युवा विशालायां मुम्बापुर्यां किं करिष्यति । क्व निवत्स्यति । कथं वा जीविकां संपादयिष्यति । युवावस्था ईदृशी खलु । सा नभसि मन्दिराणि रचयति । सागराम्भसि पद्भ्यां चलति । भूमौ च नावं सचारयति । नास्ति किमपि दुर्घटं नाम । न गणयति विपदम् । महान् किल आत्मनि विश्वासः । एवंविधः एव युवा गोविन्दः । तेन प्रागेव व्यवसितः स्वव्यवसायः । मुम्बां प्रविष्टमात्र एव स एकस्यां धर्मशालायाम् आवासं रचयामास । पथि भिक्षार्जितं किञ्चिद् द्रव्यमासीत् । तेन कानिचित् वृत्तपत्राणि क्रीत्वा श्रमजीविनां निवासेषु चतुष्पथे प्रत्यूषे एव विक्रीणीते । प्रथमदिवस एव तेन अष्टौ आणकाः प्राप्ताः । शनैः शनैः प्रतिदिनं तस्य धनलाभो वर्धते स्म । एतद्व्यवसायवशान्मासाभ्यन्तर एव भूयसां श्रमजीविनां परिचयो जातः । ततस्तेन तेषामेव निवाससमूहे किंचिद् आगारं भाटकदानेन स्वायत्तीकृतम् । तत्र प्रौढानां कृते साक्षरताप्रसारकार्यं प्रारब्धम् । श्रमजीविनां विश्रामसमये तेभ्यः अक्षरशिक्षां विदधाति । सकृत् प्रातः पाकं विधाय भुङ्क्ते । स्वयमेव पात्राणि परिमार्ष्टि । वस्त्राणि च क्षालयति । भूमौ शेते । न कदापि खिद्यते । अनेन तस्य समुदाचारेण सर्वे श्रमजीविनस्तस्मिन् भृशं स्निह्यन्ति । परं स सदैव स्वभ्रातरं चिन्तयति स्म । स्वस्थः स एकदाऽनुजन्मने पत्रेणात्मनः सकलमुदन्तजातं न्यवेदयत् । न चिरेण तस्योत्तरम् तेन प्राप्तम् । तत्पत्रदर्शनेन नितरां सुसन्तुष्टः सोऽमन्यत । 'नाहं जगति परित्यक्तः एकाकी । विद्या



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



…भूमण्डलेऽस्मिन् सः यो मयि स्निह्यति । मामपे… स्मरति च ।" यथा तृषिताय जलं तथा गोविन्दाय …लेन प्रेषितं पत्रम् । केवलेन पत्रदर्शनेन संतुष्टं तस्य …नसं गोपालस्य विद्याभिवृद्धिं पठित्वा समधिकं संतो… …भजत । "प्रतिमासं शिक्षणार्थं तस्मै किमपि धनं …व्यम्" इति मनीषया तेन स्वं परमान्नभोजनमपि …हितम् । किं पुनराराम विरामव्ययः । ततस्तेन कागजा… …नां लेखनसाधनानां पुस्तकानां च विपणः समारब्धः । …यसी विपणिः संपादिता । अत्र यावान् द्रव्य… …भो जायते तदर्धं प्रतिमासं भ्रात्रे प्रेषयति ।

( ४ )

गृहं नाम प्रीतेर्महदाश्रयस्थानम् । महताऽऽयासेन …या चेदं स्थानं प्राप्यते । एतद् बाल्ये मातापित्रोः …णा भगिनीबन्धूनां च स्नेहेन सततं चेतः समाक… …। यौवने च कलत्रपुत्रादीनां प्रीत्या । भुवि इदमेक… …स्थानं यन्मानवानां जीवनयात्रायां स्थैर्यमुत्पादयति । …मञ्जूषा खलु नराणां शीलरक्षणाय विहिता । असौ …किल मनुजान् निखिलेभ्यो विप्लवसागरेभ्य उत्तार… …। परं गोविन्दस्य ईदृग् गेहं क्वास्ति । क्व च तरसा… …र्यम् । यत् तं सततं मुम्बापुरीगतान्मोहमयादपायात् …यात । नास्ति मातृवात्सल्यं न विद्यते पितृस्नेहः । न …पि पुत्रप्रीतिः । सर्वथैव न वर्तते गृहिणीबन्धनम् । …रं केवलं बन्धुस्नेहेन बद्धः स सदवात्मानं रक्षति । … केवलं भ्रातृस्नेहवशात धनसंचयं कर्तुं प्रारभत । …बन्धुर्गोपालोऽपि अवहितमना अध्ययनपरोऽभवत् । …विचारतत्वं सर्वातिगं च बुद्धिकौशलं शृण्वन्तो बहवो …राः प्राप्तवयस्कां रूपाढ्यां स्वां स्वां कन्यां तस्मै …तुं समायान्ति । वधूमुखदर्शनोत्सुका माताऽपि तस्य विवाहकौतुकं निर्वर्तयितु त्वरते स्म । अत्रान्तरे गोपालः आचार्यपरीक्षायां प्रथमश्रेण्यां प्रथमाङ्केनोत्तीर्णतामलभत । ततः स तत्रैव पाठशालायां साहित्याध्यापकत्वेन सपदि नियुक्तः ।

जनन्या भूयोभूयः प्रेरितोऽपि गोपालो ज्येष्ठे भ्रातरि अविवाहिते स्वविवाहं प्रथमं विधातुं नेच्छति । "गोपालस्य विवाहनिरपेक्षतायाः कारणं गोविन्द एव" इति विद्यावती मेने । तन्निमित्तीकृत्य तस्या विद्याधरपण्डितेन सह महान् कलहो जातः । ततस्तेन गोविन्दं पत्रमलिखत् । तत्र अद्ययावद् यन्मौनं स्वीकृतं तदुद्दिश्य प्रथमं शुचं प्रदर्शितवान् । "त्वां तव भ्रातरं च वधूसमन्वितं विलोकयितुं समुत्सुकमावयोर्मनः । अहमत्यन्तं दुःखार्तो भवामि यदि त्वं मे न पूरयसि पश्चिमामिमामभिलाषाम् ।" एवंविधं पितुः पत्रं पठित्वा गोविन्दः परमदुःखितोऽभवत् । सोऽचिन्तयत्—मम गृहान्निर्गतस्य बहूनि वर्षाणि व्यतीतानि । न मे जीवनवृत्तान्तस्य जिज्ञासा कदाप्येकेनाप्यक्षरेण पित्रा कृता । इदानीमेव मे स्मरणं सर्वथा स्वाभिप्रायेण । असंपादितविवाहं मां स्मृत्वा नूनं गोपालः स्वविवाहं संपादयितुं नोत्सहते । यतः स मयि भृशं स्निह्यति । एतदेव महत् पीडाकरं तातचरणानाम् । अतो यथा गोपाल आत्मनो विवाहं विधास्यति तथा मया कर्तव्यम् । स मम स्नेहवशान्न सकलमपि कुलं विपरीतं विधातुं प्रवर्तताम् । अस्माकं कौटुम्बिकं जीवनं पूर्वत एव न कल्याणमयम् । संसारे मानवः कश्मलेन प्रायो वैमनस्यं क्रौर्यं च निर्मिमीते । व्यामोहं गतः स प्रेष्ठेभ्योऽपि द्रुह्यति । यद् अद्ययावन्मया संसारेऽनुभूतं तदत्रैव परिसमाप्यताम् । यत्किञ्चिन्मया संपादितं तत्सर्वं भ्रात्रे समर्प्यते । स समीहितसंपादनेन पितरौ प्रीणयताम् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



एवं विचार्य गोविन्दः अन्येद्युरेव रूपकाणां सहस्रेण सह पित्रे पत्रं प्रेषितवान्—"अहो सुफलितं मे महद्भाग्यमद्य। यत्तत्रभवत्प्रसादेनात्रभवता चिरादनुगृहीतोऽस्मि। गोपालस्य विवाहमहोत्सवः संपाद्यताम्। तस्य श्रेयोदर्शनेन मम मनः प्रमोदस्य परां काष्ठामधिरोहति। तदर्थं मया किञ्चिद् धनमितः प्रेष्यते। तेन वध्वाः कृते मङ्गलमयानि भूषणान्युपकल्पनीयानि। मम विवाहमधिकृत्य त्वेवमेव वच्मि। एवंविधस्य भागधेयस्य नाहं भाजनम्। आजन्म यन्मया दृष्टं श्रुतम् अनुभूतं च तत्सकलमेकपदे विस्मृत्य मृगतृष्णिकासमानाय श्रेयसे यतिष्ये चेन्नास्ति जगति मत्समोऽन्यः कोऽपि मूढः। क्षन्तव्योऽय बालः। विवाहशब्दमपि न सहते मे चेतः।"

तेन च गोपालं प्रति लिखितम्—"मातापित्रोरादेशः सुपुत्रेण न कदापि विहन्तव्यः। मादृशेन तु मूढेन दुर्भाग्येन न कापि कन्या परिणेतव्या। चेखिद्यते मे चित्तम् यदहं ते विवाहमङ्गलं संपादयितुं समुपस्थातुं न क्षमः। तव श्रेयसोऽन्यन्न विद्यते मम परसंतोषस्थानं भूतले।"

पत्रं पठित्वा गोपालस्य मनस्येवमभवत्—"मातापित्रोः प्रेम्णा बाल्यादेव वञ्चितो मे ज्यायान् भ्राताऽऽत्मनि निष्ठुर ईदृशः संजातः। शैशवात् प्रभृति स सर्वैर्न्यक्कृतः। उपेक्षितश्च। इदं सर्वं मे प्रत्यक्षम्। न मे वचनस्यापि तत्रावसरः किमुत प्रतीकारस्य। एवं-स्थिते यदि गार्हस्थ्ये तस्यैवमनभिरुचिर्नात्र चित्रम्। एतत्सर्वं प्रत्यक्षीकुर्वता विजानता मयापि कथमिव न परिहर्तव्येयं संसारविपद्।" इति विचार्य तेनापि एवं विषयः सर्वथा परित्यक्तः। गोपालस्येमं निश्चयं विदित्वा तस्य जननी गोविन्दस्योपरि संक्रुद्धा भर्तारमब्रवीत्—"दूरस्थोऽपि चाण्डालोऽय समानर्थाय भवति। अनेनैव दुष्टेन ममाज्ञाकरः पुत्र एवमविनीततां नीतः। विलोक्यताम्। का गतिः। किं करोमि।" एवं शपमानां तां विद्याधरपण्डितः कथमपि प्रशमं नीतवान्।

## ( ५ )

माता विद्यावती प्रतिदिनं लब्धावसरा सुतं विवाहायानुकूलयितुं किमपि किमपि भाषमाणा तिष्ठति। "कस्य कन्या गुणवती सुरूपा वर्तते। कस्याः पिता कियन् शुल्कं प्रयच्छति। कस्याः पिता लोके कियन्तीं प्रतिष्ठामधिगतः।" एतत्सकलं निरलसं वर्णयति। परं न किमप्यवधत्ते गोपालः। प्रतिसंवत्सरमुक्तेषु मासेषु ज्ञातीनां परिचितानां च गेहेषु विवाहमङ्गलकृत्यानि संपद्यन्ते। परिणीता बह्वः कन्यका मातृपदमधिरूढाः। कासाञ्चिद् वसनानि शिशुजनाङ्गरजसा मलिनानि भवन्ति। एतद् वीक्ष्य विद्यावती आत्मानमधन्यं मन्वाना "भगवन् कदा वा द्रक्ष्यामि सुन्दरं वधूमुखम्। कदा वा सुललितं दशनविहीनं पौत्रमुखदर्शनं मे भविष्यति। अपि नाम विद्यते ममैवंविधं भागधेयम्।" एवं शोचन्ती सा प्रायेण भ्रान्तचित्ता संपन्ना। "केनाप्युपायेन गोपालः स्वाध्यवसायान्न विरमति" इति यदा सा विजज्ञुषी तदा सा अनर्थस्यास्य हेतुं गोविन्दं मेने।"

"त्वं महान् नीचः कुटिलः। कृतघ्नेन त्वया मम सुतो मोहजालेन बद्धो वशीकृतः। अनन्तजन्मसंचितस्य वैरस्य निर्यातनाय त्वमस्मत्कुले समुत्पन्नः। न त्वं केवलं मातृद्रोही पितृद्रोही कुलघ्नश्चापि। ममात्मजमेवं विवाहोन्मुखं कृत्वा त्वया पश्यतः पितुः सन्तानविच्छेदः कृतः। निरयादृते नास्ति तेऽन्यच्छरणम्।"



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...शयं हृदयविदारकं पत्रं गोविन्दाय संप्रेष्य किञ्चि-...क्षोभाऽभवत । नैवं सकृत् पत्रप्रेषणेन प्रशान्ता। ...पि तथैव पत्रं लिखितम् । असकृद् ईदृगाशयानि ...मर्मच्छिन्दि नैकानि पत्राणि दिनान्तरेण ...णि ।

गोविन्दात् प्रतिमासं प्राप्यमाणं धनं गोपालेन ...रकवृत्तिवशान्न समीहितम् । तेन हि गोविन्दः ...नं निरालम्बं मन्यमान उद्विग्नो भूतः । तस्मिन्नेव ...विद्यावत्याः प्रथमं पत्रं तस्य हस्तगतमासीत् । तद् ...यित्वा तस्यान्तःकरणं बलवद् दुनोति स्म । दिना-...द्वितीयं प्राप्तम् । तत् तदनुगामीनि चान्यानि ...णि तथाविधाशयानि मत्वाऽपठित्वैव बह्निसात्कृ-...। एभिर्मर्मच्छिद्भिरक्षरैः स्वान्ते तथा नितान्तं विद्धः ...नपानादीनि समुचितकर्तव्यानि पूर्ववन्नाभ्यनन्दत्। ...हनि कृशाङ्गः संजातः । एवं दुर्बलः स विपणिं ...। एकान्ते सदैव निमग्नः सोऽचिरादेव नैकैर्व्या-...राक्रान्तः । एवं तस्याधिव्याधी प्रकोपतां गतौ ।

एवं रुग्णशय्यां गतस्य तस्य एकस्मिन् दिने कनीयान् ... भ्राता गोपालः सहसा समीपं समागतश्चरणौ ...। अकस्मादागतं भ्रातरं समवलोक्य भ्रातृवत्सलः ...थावस्थोऽपि समुत्थाय प्रेम्णा गाढमाश्लिष्यत् । हर्षातिरेकात् स क्षणं सगद्गदस्तूष्णीमतिष्ठत् । तथा जर्जरितदेहं जराजीर्णमिव लक्ष्यमाणं व्याधिग्रस्तकलेवरं तमग्रजं संवीक्ष्य गोपालः साश्रुनयनोऽवदत्—"अयि बन्धो, किमियं ते दशा । स प्रत्यब्रवीत्—"मम दैव-दुर्विलासस्य परिणामः। परं त्वमकस्मात् कथमिवागतः। पत्रेण तवागमनं कथं न सूचितम् ।" स प्रत्युवाच—"पूर्वमेव मया पत्रं प्रेषितम् । न त्वया तत् संप्राप्तमिति भाति ।" तदुपरि स उवाद "कदाचित् पत्रं विपण्यां पतितं स्यात् । विपणिमप्रविष्टस्य मम बहूनि दिनान्य-तीतानि । भवतु । अपि कुशलं मातापित्रोः ?" ततः स प्रतिबभाषे—"कुतोऽद्यापि तातः ।" स आह—"किम् अत्याहितम् ?" स कथयति—"दुरवस्थयाऽनया नः कुलस्य पीडितस्य त्वामेव सततं चिन्तयतः पितुरुपरतस्य मासो व्यतीतः । विपन्ने जनके विभ्रान्तचित्ता माता किमपि किमप्यन्यथा प्रजल्पन्ती कथमपि न प्रकृति-मापद्यते । अधुना त्वमेव तस्या जीवितस्यालम्बनं परमभैषजम् ।" इत्युक्त्वा विरतवचसि तस्मिन् गोविन्दः प्राह—"अहो बत, अवसन्नं नः सकलं कुलम् । मातुर्दर्शनाय श्व एव प्रभाते प्रस्थास्यावहे । सा हि परमं दैवतमावयोः । यत उक्तं च—

"न मातुः परदैवतम् ।"

## संसारे सर्वतः कठिनं कर्म !

दन्तमञ्जनद्रवस्य (टूथपेस्ट) नलिका (ट्यूब) तो निष्कास्य पुनः नलिकायां प्रवेशनम् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# पिपासुकश्चातकः

[ श्यामदेवशास्त्री बी. ए., अमृतसर ]

ओ प्रियतम ! तावन्निस्सारं, हाऽपेक्षे नैवामृतसेकम् ।
आः ! म्रियमाणोऽहं तृषापरं, कामये तु जीवनकणमेकम् ॥१॥
हे श्यामघनामृतमय शाश्वत ! आकाशवितत परिपूरिताश ! ।
निस्तप्तनिवहनिश्वासमलिन ! नवनीलनलिनकाननीकाश ! ॥२॥
नीहारमया हि मया निभृतं, नदनदीमनोहरहारधराः ।
तृष्णाज्वालासन्दग्धहृदा, सेविता हन्त नैकधा धराः ॥३॥
ज्वालामुखीति नाम्ना विदिताः, शीता अप्येते बहिः परम् ।
चिरसञ्चितमिव पुटपाकनिभाः, अन्तर्वहन्ति सन्तापभरम् ४॥
रत्नाकरोऽपि पारावारः, हे करुणावरुणालय ! सुचिरम् ।
दृष्टो बडवानलदूनोऽसौ, स्वान्तं न वहति हानिजं स्थिरम् ॥५॥
क्षारोदधिना तृष्णा शान्ता, हे सरसहृदय ! वद कस्य कदा ? ।
बाष्पं स परेषां हरतु कथं, मुञ्चति बाष्पं यः स्वयं सदा ॥६॥
शुश्रूषितानि शीतानि तानि, पुष्करिणीपल्वलपावनानि ।
घनसारगन्धसारावृतानि, दीनेन मया बहुशो वनानि ॥७॥
त्वक्सारस्तम्बे भजमानं, सङ्कोचं वा निद्राभावम् ।
तत्रापि ददृशिवान् मन्दोऽहं, दारुणरूपं दहनं दावम् ॥८॥
अत एव तुषारान् कासारान्, कूलेष्ववेद्य खद्योतगणान् ।
नोपैमि विहस्तश्चापन्नः, मत्वेव नाथ ! तानग्निकणान् ॥९॥
विद्युद्गर्भेऽपि जडेऽतितमां, इमे भव्य ! दिव्ये तव देहे ।
वीक्षे गिरिसागरगहनानां, प्रतिमूर्तिमिव प्रिय ! प्रियतम ! हे ! ॥१०॥
एते त्वत्तो जननीसदृशात, दीना न लभन्ते पयोऽनिशम् ।
तत्किमिति न याचे त्वामेकं, जीवनाधार ! वद भुवनेशम् ॥११॥
केऽप्याहुरधन्याः 'यः स्वीयं विद्युद्दाहं नो हर्तुमलम् ।
शमयिष्यति स कथं जडमूर्तिः, तावकं तोयदः तृषानलम् ॥१२॥
हे घनश्याम ! ते किन्तु नाम, श्रुतमपि द्रुतमिव तुहिनक्षोदम् ।
किरति स्वान्ते च मनोऽभिराम !, सुदतीवामन्दामोदमदम् ॥१३॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# राजयक्ष्मा

[ ले० भिषग्मणि, प्राणाचार्य, वैद्य मणिराम शर्मा गौड़, श्रीगंगानगर ]

हा हन्त ! यस्मिन्देशे यक्ष्मणः आक्रमणं नाम-प्य्रापि नाभवत् स एव देशः यक्ष्माश्रमः संजातः। विषयासक्तः शीतांशु राजयक्ष्मणा गृहीतः। औषधप्रयोगेण रोगात् नितरां प्रमुक्तः। कालो यक्ष्मणः प्रकोपः कथं नु भवति स्म ? स कथं वायुवेगेन, नहि नहि विद्युद्वेगेन प्रतिजनं स्थानं कुर्वन्नवलोक्यते। साम्प्रतं क्ष्ययुता बाह्याडम्बरयुता विज्ञानसम्मता ऐलो-चिकित्सा यथा यथा यक्ष्मरोगार्णवनिमग्नान् प्रचार्यते तथा तथा ह्यस्य रोगस्य अभिवृद्धि । कोऽत्र हेतुः ?

ईशातः अभ्ररसवेदाब्द (४६०) पूर्वं यूनानस्य ख्यातचिकित्सकेन हिपोक्रैटिजमहोदयेन लिखि-—दूषितशरीररचनायाः फलं यक्ष्मा । अतस्तेन सामुद्रिकजलवायुना तस्य चिकित्सा प्रति-पादिता। पुनश्च सेल्सस एवं गेलिन इत्याभ्यां वैज्ञानिकाभ्यां चरकसुश्रुतानुसारेण अजादुग्धेन तस्य चिकित्सा उक्तेति।

तदनन्तरं इटली, फ्रांस, स्पेन, चिकित्सकैः संक्रामकोऽयं रोगः इति निर्णीतः। अतः फ्रांसे राज्यविधानेन यक्ष्माक्रान्तरोगिणां पृथङ्निवासः विहितः। किन्त्वनेन विधिना न शान्तोऽयं रोगः। अनन्तरं पाश्चात्यवैज्ञानिकेषु विचारपरिवर्तनं जातं पुनश्च ते वैज्ञानिकाः प्रकृत्या एव क्षयः भवतीति अनुमेनिरे । तदनन्तरं जर्मन-देशस्य डाक्टररोवर्टकाकमहोदयेन १८८२ सन् वत्सरे यक्ष्मणः कारणं रोगकीटाणवः सन्तीति प्रतिपाद्य विज्ञाने नवीनः कीटाणुवादसिद्धान्तः प्रकाशितः। पूर्वं ते वैज्ञानिकाः कीटाणून् अजरामरेति मन्यन्ते स्म

---

करुणां कुरु यातु सर्पादि दूरं, तृष्णा च कृष्ण ! भयदा सेयम्।
रसमये विलीनस्त्वयि खेऽहं, आनन्दमयो येन भवेयम् ॥१४॥
प्रार्थना-वचांसि मदीयानि, ग्रस्तान्यपि चेदन्तरान्तरा ।
भावना धार्यतेऽविच्छिन्ना, हे नाथ ! तथाहि विशुद्धतरा ।१५॥
श्रान्ते न नितान्तमनन्तपथे, लिप्सयाऽप्यशान्तहृदा भ्रान्तम्।
शक्नोम्यधुना नावस्थातुं, तृष्णां न च जीवनमेत्यन्तम् ॥१६॥
आः ! कान्त ! वहामि निराशोऽहं, लोचनयोर्यद्यपि बहुतोयम्।
रुष्ट इव चिरात्तृष्णावह्निर्न तथापि सदयघन ! शान्तोऽयम ॥१७॥
क्लान्तस्यातितमां हा शुष्कः, यद्यपि च विद्यते मे कण्ठः।
हे श्रेष्ठ ! परं हृदये स्नेहः, त्वां प्रति तु मामको भूयिष्ठः ॥१८॥
ओ प्रियतम ! तावन्निस्सारं, हाऽपेक्षे नैवामृतसेकम्।
आः ! म्रियमाणोऽहं तृषापरं कामये तु ········॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



किन्तु यदा रुग्णस्य कफे मृतान् कीटाणून् विलोकितवन्तस्तदा कीटाणवः अजरा अमरा इति भ्रमो विगलितः। साम्प्रतं मोलरप्रभृति वैज्ञानिकाः स्वीकुर्वन्ति यत् शरीरात् बहिर्हि रोगकीटाणुध्वंसकानि तत्त्वानि सन्ति किन्तु शरीरे हानिमकृत्वा शरीरस्थरोगकीटाणून् विध्वंसेरन् एतादृशानि तत्त्वानि नोपलब्धानि। अस्मिन् सिद्धान्ते सर्वे वैज्ञानिकाः एकविचाराः सन्ति।

अधुना पुनश्च प्रकृत्या जयः इति केचन वैज्ञानिकाः मन्तुमारब्धवन्तः। अहो यस्य विज्ञानस्य जगति महान् डिण्डिमघोषः प्रभवति स कियद्विधपरिवर्तनशीलः इत्येवावलोकनीयमस्ति।

साम्प्रतं भवतां पुरतः आयुर्वेदसम्मता चिकित्साप्रणाली समुपस्थाप्यते।

यक्ष्मणः कारणम्। प्रथमम्--स्वास्थ्य-रक्षणस्य नियमोल्लंघनं, दिनचर्या-निशाचर्या-ऋतुचर्यादीनाम् व्यतिक्रमश्च। द्वितीयम्--अधिकवीर्यविनाशो ब्रह्मचर्याभावश्च। तृतीयम्-सामर्थ्यादधिकः श्रमः पौष्टिकभोजनालाभश्च। तथा पौष्टिकभोजनसेवनं परिश्रमाभावश्च। चतुर्थम्--चिन्ताशोकक्रोधादिना मानसिक आघातः संसर्गश्च।

यक्ष्मणः स्वरूपम्--कासो ज्वरो रक्तपित्तं त्रिरूपे राजयक्ष्मणि इतिभोजोक्तेः--

भक्तद्वेषो ज्वरः श्वासः कासः शोणितदर्शनम्।
स्वरभेदश्च जायेत षड् रूपं राजयक्ष्मणि॥

इति सुश्रुतोक्तेः षड्रूपम्--

स्वरभेदोऽनिलाच्छूलं संकोचश्चांसपार्श्वयोः।
ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः॥

इत्यादि माधवोक्तेः एकादशरूपं वा। राजयक्ष्मणि सर्वत्रैव ज्वरः कासः पित्ताद् रक्तनिर्गमोऽभिहितः।

राजयक्ष्मणि पथ्यम्--

पूर्णब्रह्मचर्यपालनम्। सात्म्यभोजनं। शुद्धजलवायुसेवनम्। मरौ वा गिरौ निवसनम्। उद्यानेषु गृहारामेषु चंक्रमणं भ्रमणं वा। शोकमोहचिंताक्रोधादिमानसिकविकाराणाम् दूरतः सर्वतः परिवर्जनम्। पूर्णविश्रामश्च।

चिकित्सा--संक्षेपतः क्रियायोगो निदानं परिवर्जनम्। यैः यैः कारणैः रोगोत्पत्तिर्भवति तानि तानि सर्वाणि परिवर्जयेत्। पाश्चात्यवैज्ञानिकाः रोगकारणं कीटाणून् मन्यन्ते अतस्ते कीटाणुनाशकौषधप्रयोगं कुर्वन्ति किन्त्वस्माकं आयुर्वेदसिद्धान्तानुसारेण मिथ्याहारविहाराभ्यामदृष्टाच्च शरीरे यक्ष्मणो विषमुत्पद्यते, तेन विषेण समुद्भूताः कीटाणवः वक्षसि यक्ष्मरोगं जनयन्ति। तेन उरसि व्रणः संजायते। यत्रैते कीटाणवस्तिष्ठन्ति।

कीटाणूनां शुद्धमांसमपेक्षितं भवति अतस्ते वक्षसि मांसं भुंजाना अग्रे अग्रे परिधावन्ति इत्थं प्रकारेण यक्ष्मिणः वक्षसि सर्वत्र कोथः संजायते। अतः राजयक्ष्मणः कारणं विषमेव न तु कीटाणवः। यदि विषस्य चिकित्सा क्रियेत तर्हि कीटाणूनामुत्पत्तिरेव प्रतिबद्धा भवेत्। विषयस्य विषोद्भूतानां कीटाणूनां च चिकित्सा यज्ञाद् भवति। तदुक्तं अथर्ववेदे--

मुंचामि त्वा हविषा जीवनाय अज्ञातयक्ष्मादुत राजयक्ष्मात्। ग्राहि जग्राहि यद्यते देवं तस्या इन्द्राग्नी प्र मुमुक्तमेनम्।

अस्मिन् मंत्रे हविषा यज्ञेन, यक्ष्मात् उत राजयक्ष्मात् मुंचामि। इत्यादिपदैः राजयक्ष्मणः चिकित्सा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# हे राष्ट्रकर्णधारा नहि वयमुपेक्षणीयाः

[ विद्यावाचस्पति श्रीपरमानन्दशास्त्री व्याकरण-साहित्याचार्यः (पञ्जाम्बुविश्वविद्यालयस्य संस्कृतविभागः) ]

हे राष्ट्रकर्णधाराः ! नहि वयमुपेक्षणीया हे वयमपि तु भारतीयाः

१. अस्माभिरेव कष्टैः कौपीनमात्रतुष्टैः
मुक्तैः शिलोञ्छभक्तैः प्रत्याशया विमुक्तैः
सर्वोच्चसंस्कृतिः सा समगोपि भारतीया । वयमपि०

२. लोकेष्वलौकिकत्वं यद्भारतेन वाप्तम्
निष्कामसेवकानामस्मादृशां निरीहं
बलिदानमत्र चित्रं जागर्ति नोऽर्हणीयाः ! वयमपि०

३. यद्यत्र संस्कृतज्ञास् त्यागाय नाभविष्यन्
लोकेषु गीयमाना आदर्शमानवीया
नो नामतोभविष्यत् संस्कृतिरियं स्वकीया वयमपि०

४. आशाभिरापि सत्ता काभिर्न काभिरेषा
उपजीव्यघातिनीयं सर्वाङ्गशोषिका सा
हा हन्त किन्तु नान्तं यातार्तिरस्मदीया । वयमपि

५. ताभिर्विडम्बनाभिर्हा नवनवाभिरेवम्
अपमानमथ निराशां गमिताः परं विचार्याः
ते नो प्रतारणीया ये सन्ति माननीयाः । वयमपि

६. अद्योन्नतिर्ग्रहाणां हा पल्लवाग्रहाणाम्
संदृश्यते समन्तात् काले विलक्षणेऽस्मिन्
हंहो फलेग्रहीणामिव नतिरवेक्षणीया । वयमपि

—००:०:००—

यज्ञेन प्रतिपादिता । तथैवाह चरकाचार्योऽपि—राजयक्ष्मा पुरा जितः तां वेदविहितामिष्टिमारोग्यार्थी प्रयोजयेत् । चरके चिकित्सास्थाने तद्वदेव ट्रि लिट् साहबमहोदयेन सितायाः धूमेन यक्ष्मकीटाणूनां विनाशो भवति, इत्युक्तं ।

एतत्तु वैज्ञानिकैः सर्वथा स्वीक्रियते—यत् सूक्ष्म-वस्तु स्थूलवस्तुनि प्रवेष्टुमर्हति । किन्तु न स्थूलवस्तु सूक्ष्मवस्तुनि प्रवेष्टुं क्षमं । यक्ष्मकीटाणवः एकस्मिन् इंचस्थाने पंचविंशतिसहस्रसंख्यकाः स्थातुं शक्नुवन्ति । ग्रेंजाष्टमभागे एककोटिकीटाणवः तोलयितुं शक्यन्ते । यक्ष्मकीटाणवः ईदृग्विधाः सूक्ष्माः तूलाश्च प्रभवन्ति नहि कीटाणुषु कः औषधप्रभावो भवेदिति चिन्तनीय-मस्ति । प्रोफेसर मैक्समूलरः फिजिकल रिलिजन-नामकपुस्तके लिखति स्म, औषधभक्षणात औषध-नस्यस्य प्रभावोऽधिको भवति । चीनजापानयोर्होमं घोममिति वदन्ति, अनेन च होमेन तत्र महाभयंकर-कष्टान् कष्टतरान् असाध्यांश्च रोगान् दूरीकुर्वंति जर्मनदेशे लवेंडरवर्तिकया रोगान् दूरीकुर्वन्ति। पारसीयाः यज्ञं कुर्वन्ति । जर्नल किङ्ग आई, एम, एस, सेनेटरी कमिश्नरमहोदया "प्यूबानिकक्लेग" नामकपुस्तके लिखंति सुगंधौषधधूमेन महामारीयक्ष्माद्याः संक्रामका असाध्यतमा रोगाश्च नश्यंति ।

इत्थंप्रकारेण प्राचीनकाले कीटाणुनाशकौषधिभिः यज्ञेन च यक्ष्मणः चिकित्सा भवति स्म ।

यज्ञधूमेन वायुमंडलं शुध्यति तेन रोगा अवरुध्यन्ते। अतः यज्ञेनैव यक्ष्मणः अवरोधं कुर्वन्ति स्म । साम्प्रतं तत्स्थाने बी, सी, जी, प्रयोज्यते येन रोगाः विवर्धन्ते ।

---



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृतस्य वैशिष्ट्यम्

[ पं० मुनिदेव उपाध्यायः काव्यतीर्थ, धार, मध्यभारत ]

[असुबोधशैल्या लिखितोऽप्ययं लेखः प्रेरणाप्रद इति पाठकानां पुरतः प्रकाश्यते--संपा०]

पातञ्जलयोगशास्त्रे "प्रतिपादितमस्ति—भोगापवर्गार्थं दृश्यम्", इयं विविधा विचित्रा च सृष्टिः "परमेश्वरेण रचिता सा भोगार्थमपवर्गार्थञ्च। यदि मनुष्यशरीरं गृहीत्वा भोगपरायणो भूत्वा श्रेयसार्थमपवर्गार्थं न प्रयतते तर्हि जन्मधारणस्य सार्थकता न विद्यते। श्रीमता भगवता कपिलाचार्येण सांख्यतन्त्रे प्रथमसूत्रे लिखितम्—"त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" आध्यात्मिकाधिभौतिकाधिदैविकेति तिस्रो विधा यस्य तत् त्रिविधं दुःखञ्चेति त्रिविधदुःखं तस्य निःशेषतो निवृत्तिः सोऽत्यन्तपुरुषार्थः।

श्रीमता भगवता शङ्कराचार्येणापि विवेकचूड़ामणौ प्रोक्तम् "दुर्लभं त्रयमेतद् दैवानुग्रहहेतुकम्, मनुष्यत्वं मुमुक्षुत्वं महाजनसंश्रयः, अस्मिन् संसारे मनुष्यशरीरं विधार्य मोक्षाय यः न चेष्टते वृथैव तस्य जन्म" श्रीमता भगवता कणादेनापि वैशेषिके उक्तम्—इहामुत्र वाऽभीष्टोदयः, त्रिविधदुःखात्यन्तनिवृत्तिलक्षणा मुक्तिर्निःश्रेयसम्। तत्र यस्मिन्नमुत्र लोके सर्वमपि श्रेयः कल्याणं परिसमाप्यते न किञ्चिदपि परिशेषं तिष्ठति स धर्मः।

"तद्वचनादाम्नायस्य प्रामाण्यम्"—तस्य कर्त्तव्याकर्त्तव्यरूपस्य विधिनिषेधस्वरूपस्य प्रमाणं वेदः। महर्षिमनुना स्वस्मृतौ विहितम्।

"वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः।
तद्धि कुर्वन् यथाशक्त्या प्राप्नोति परमां गतिम्।।"

तत्र परमेश्वरवचनत्वेन वेदस्य प्रामाण्यमङ्गीकृतम्—"हिताहितबोधकत्वं धर्माधर्मनिरूपकश्चाम्नायो वेदः, स वेदः संस्कृतभाषायामथ च संस्कृतमन्तरेण कथं यथायथं ज्ञायते? विशिष्टज्ञानरताः वयं भवेम अन्यत्र मनुना प्रत्यपादि यद् वेदादेव सर्वं सिध्यति। इदमेव कारणमस्ति संस्कृतं देववाणी इति उच्यते। यथार्थतया परंपरया परमेश्वरोऽस्माकं पिता माता च, तस्य देवस्य जगन्मातुः भाषा संस्कृतभाषा, अपि च मातृभाषापदयोग्या, वेदस्याम्नायो वाक्यम्, 'त्वं हि नः पिता वसो, त्वं माता शतक्रतो।' अतो मातृभाषापदवाच्या यथार्थेन वेदभाषा, अन्याः भाषाः प्रतिच्छायारूपकाश्च।

ऋग्वेदे समायातम्

ओं स्तुता मया वरदा वेदमाता प्रचोदयन्तां पावमानी द्विजानाम्, आयुः प्राणं, प्रजापतिं, द्रविणं कीर्तिं स्तुता व्रजत ब्रह्मलोकम्।

वेदभाषा (संस्कृत) अस्माकं माता, धर्माधर्मौ विहिताविहितौ च सर्गकालतः चोदयति प्रेरयति चास्मात् कारणाद्, पतञ्जलिमुनिनोक्तम्—"स पूर्वेषामपि गुरुः कालेनानवच्छेदात्। स एवेश्वरो भाषाज्ञानादिप्रकाशकत्वेन—अग्निवायुसूर्यादि महर्षीणामपि गुरुः। उपनिषदि समायातं परापरारूपेण भेदेन च द्वे विधे वर्त्तेते, परा विद्या, ब्रह्मविद्या यया तदक्षरं विनाशविरहितमधिगम्यते। अपरा विद्या लौकिकी भौतिकज्ञानम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# एको रसः करुण एव

[ ले० श्रीधरप्रसादपन्तः, श्रीदुग्धेश्वरसंस्कृतकालेज, पीलीभीत, उत्तरप्रदेश ]

कल्पनाजन्य-जगज्जीवन-जाले सुखदुःखयोः महान् प्रभावो विद्यते। वस्तुतो दुःखस्यैव सहानुभूतिं करुणारसः प्रधानतया ददाति। यद्यपि मनोवैज्ञानिकदृष्ट्या सुखेन प्रसन्नता भृशं जायते किन्तु तेनैव सार्धं विलासिताऽपि समुत्पद्यते।

नवसंख्यकरसेषु करुण एव रसं शास्त्रवेत्तारो विद्वज्जनाः शीर्षस्थानाधिकारिणं कथयन्ति। यद्यपि एतेऽस्मिन् विभिन्न-सिद्धान्ताः सन्ति विद्वद्गणेषु, तथापि मताधिक्येनाऽयमेव रसः प्रमुखतमो वर्तते। कविराजभवभूतिकवेः 'उत्तररामचरित' नामधेये नाट्यकाव्ये करुणारसस्यैव प्रधानता परिलक्ष्यते।

प्रायेण सर्वेषु देशकालेषु करुणायाः प्राधान्यमासीत्। अस्मिन्भारतेवर्षे तु काव्यस्योद्गमः करुणाया एव प्रादुर्बभूव। कविता-वनिता कान्तस्य महर्षिवाल्मीकेः करुणाकलितकोमलहृदयेन कामविह्वल-क्रौञ्चयोः एकतरस्य, व्याधद्वारा नृशंसवधकारणेन कवित्वशक्तिः प्राप्ताऽभूत्।

यथा—

'मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥'

यस्यां करुणायां वाल्मीकीयरामायणस्य प्रादुर्भावो जातस्तस्या अन्तस्रोतेषु विजयोल्लासावपि प्रवाहितौ

---

वर्त्तमानकाले भौतिकज्ञानस्य पराकाष्ठा प्रतीयते किन्तु आत्मज्ञानशून्याः जनाः सदाचारविरहिताः कूटनीत्यवलम्बिनः विद्वेषप्रियजनाः परस्परं कलहं कुर्वन्तः सन्तः प्राणिसंहारं सदा चिन्तयन्ति च प्रत्यक्षमिदम्।

पुराकाले यदा वेदविद्यापठनपाठनमासीत् तदा जनामर्यादां पालयन्तिस्म, यथा निरुक्ते यास्कमुनिना वेदमन्त्रस्य प्रतीकमादाय लिखितम्—"स्तेयं, तल्पारोहणम् ब्रह्महत्यां, सुरापाणं दुष्कृतस्य कर्मणः पुनः पुनः सेवां पातके अनृतोद्यामिति वैदिककालतः युधिष्ठिरकालपर्यन्तं वैदिकमर्यादापालनेन अस्माकं राष्ट्रस्य अतीव उत्कर्षः आसीत्। अपरञ्च वैदिकशिक्षाऽभावेन सर्वे पतनोन्मुखाः जाताः, यत्र तत्र सर्वत्र राष्ट्रे सम्प्रति अशान्तिर्दृश्यते। प्रत्यक्षमिदम् वेदमार्गत्यागस्य कुफलम्—वेदपरायणैः भवितव्यं सदा शान्तिपथेच्छुकैर्जनैः अथ च सदा वेदविद्योपासकाः भवेयुः, वेदविद्यामन्तरेण कुतः शान्तिः, शान्तिविहीनाः कथं सुखिनः भवेयुः, वेदाध्ययनशीलानां संस्कृतमेव द्वारम्। यथा कस्मिंश्चिद् गृहे द्वारमन्तरेण प्रवेशमसम्भवं तथा कथं संस्कृतं विना वेदे प्रवृत्तिः स्यात्।

'निरुक्ते विहितम्, षडङ्गो वेदोऽध्येतव्यः, एष एव प्रकारो वेदाध्ययनस्य, वेदस्य षडङ्गानि संस्कृतभाषायामतः संस्कृतपठनस्य पाठनस्य च अत्यन्तमावश्यकता वर्तते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



समुपलक्ष्येते। रामवनवासम् सीताहरणम्, लक्ष्मणशक्तिस्तथा सीतापरित्यागादयः मार्मिकाः प्रसङ्गाः करुणायाः स्निग्धधारया रसार्द्राः सन्ति।

महाभारते यद्यपि रणक्षेत्रस्य रौद्रताण्डवं श्रूयते, तथापि तस्मिन् विजित-विजेतृणामुभयपक्षीयकरुणायाः साम्राज्यमासीत। वीरार्जुनहृदये मानवीयकोमलतायाः नाशः श्रीकृष्णस्य कर्तव्योपदेशस्यैव फलमासीत्, धर्मराडयुधिष्ठिरादयः पञ्चपाण्डवाः— कथं रुधिर-रञ्जित-साम्राज्यं नोपभुक्तवन्तः ?, करुणाया एव भावस्तानवरुद्धवान्।

नैषधकाव्ये तु करुणा विशेषरूपेण राजते। राजहंसो राजानं नलं प्रति सकरुणं कथयति:—

"मदेकपुत्रा जननी जरातुरा
नवप्रसूतिर्वरटा तपस्विनी,
गतिस्तयोरेकजनस्तमर्दयन्नहो,
विधे! कथं त्वां करुणा रुणद्धि न।"

भवभूतेः 'उत्तररामचरित' काव्ये सीताहरणानन्तरं शोकातुरो रामः स्वशोकं प्रकटयन्कथयति—

'हा हा देवि! स्फुटति हृदयं ध्वंसते देहबन्धः,
शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा,
विश्वङ् मोहः स्थगयति कथं मन्दभाग्यः करोमि॥"

न केवलं भारतीयकाव्येषु करुणा परिदृश्यते, अपितु विदेशीयकाव्यगीतेष्वपि रसोऽयमुपलक्ष्यते, सोफोक्लीज - यूरिपिडीसप्रमुखकवीनां प्रतिभा, दुःखान्तनाटकलेखनेष्वेव विराजते।

महाकवि—कालिदास-विरचित 'अभिज्ञानशाकुन्तलम्' यद्यपि सुखान्त नाटकः तथापि तस्मिन् शापवश-परित्यक्तानारीहृदयस्य मर्ममयी वेदना दीर्घनिश्वासाना मुष्णस्पर्शो प्राप्यते, महाकवेः 'शाकुन्तलम' सर्वोत्कृष्टा कृतिरस्ति।

विश्वस्य प्रमुखतमासु भाषासु अस्यानुवादोऽभवत्। केनापि कविना उक्तिवैचित्र्येण उक्तम्—

"कालिदासस्य सर्वस्वमभिज्ञान-शाकुन्तलम्"

महाकविभवभूतेः कविता तु पाषाणद्रावणकारुण्येनैव अगाधा संस्कृतसाहित्यस्य विभूतिः संजाता।

विदेशीयकविसम्राजः शेक्सपीयरमहाशयस्य 'ओथेलो' हैमलेटादि, नाटकेषु मानवहृदयस्य विषादमयी छाया करुणारूपेण शोभते।

हिन्दी-साहित्य-गगनस्य रविशशिनोः सूरतुलस्योः कविताः करुणारसेनोताः प्रोताः सन्ति। आधुनिककाव्यसाहित्येषु करुणा विशेषेण नृत्यति।

न केवलं काव्ये, अपितु धर्मे अपि करुणा परिलक्ष्यते।

अतोऽस्मिन् विकटसमयेऽपि करुणायाः पालनं कर्तव्यम्, करुणाऽभावे तु दैन्यदारिद्र्यक्लेशात्याचारादीनि दुष्कर्माणि भविष्यन्ति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# एका वाणी सत्या

( ले० विद्याभूषणः पं० श्रीगणेशरामशर्मा, साहित्यरत्नम्, झालावाड़ )

एकस्मिन् समये क्वचित् द्वौ सुहृदौ परस्परं वार्ता-लापं अकुरुताम् । प्रसङ्गात् तयोः मध्ये एकेन उक्तम्—"...तानां परमज्ञानवतां अनुभविनां पण्डितानां कथनानुसारं एतत् श्रूयते यत् अत्र लोके मनुष्यः दिवा रात्रौ च यत् भाषते तत्र प्रत्येकस्य जनस्य मुखात् निर्गतेषु वचनेषु एकं वाक्यं सत्यं भवति । मनुष्यस्य ज्ञानं ...न्तं अल्पं च भवति तस्मात् सः न जानाति निश्चयेन यत् तस्य मुखात् निर्गतासु वाणीषु कदा किं ...किं सत्यं भवति तस्य च वाक्यस्य क्व नु कः प्रभावः ...ति । परन्तु एतावत् तु ध्रुवं सत्यं यत् एकस्मात् सूर्योदयात् पुनः द्वितीयं सूर्योदयं यावत् अष्टप्रहरेषु मनुष्यस्य मुखात् एकं वाक्यं तु अवश्यमेव सत्यं निर्गच्छति तस्य प्रभावः फलं चापि नूनं भवति एव ।"

एवं स्वमित्रस्य कथनं श्रुत्वा अन्येन मित्रेण चिन्तितं यत् अस्य विषयस्य सत्यासत्यनिर्णयस्तु अवश्यमेव करणीयः । बहु विचारं कृत्वा स क्रियात्मकेन प्रयोगेण तथ्यातथ्यं परीक्षितुं एकां योजनां रचयामास । तथा हि—एकशेरभारं चतुष्कोणं ताम्रस्य धातोः पिण्डं नीत्वा सः उषसि शीघ्रमेव गहनं वनं जगाम । तत्र गत्वा सः एकान्ते स्थित्वा तं ताम्रपिण्डं प्रति 'सुवर्णं भूयाः !' इति पुनः पुनः एकमेव वाक्यं वदन् स्थितः । सः स्वमनसि इत्थं विचारयामास यदि रात्रिन्दिवं उच्चार्यमाणेषु एकं वाक्यं सत्यं भवति तदा अयं ताम्रपिण्डः, मदीयेन एकस्यैव वाक्यस्य पुनः पुनः उच्चारेणान अवश्यमेवात्र रूपान्तरितः बहुमूल्यं सुवर्णं भवेत् एव' इति ।

अथ मुहुर्मुहुः एकमेव वाक्यं 'सुवर्णं भूयाः !' इति उच्चारयन् सः दिनस्य चतुरः प्रहरान् अत्यवाहयत् । परं स ताम्रपिण्डस्तु न सूर्यास्तं यावत् सुवर्णत्वे परिणतः । प्रदोषे जाते, शोभितायां रागारुणायां सन्ध्यायां, विराजिते च निर्मलाकाशे चन्द्रदेवे, देदीप्यमानेषु तरलतरतारकपुञ्जेषु, विभातायां च रजन्यां सः पुनः धैर्यं अवलम्ब्य तं ताम्रपिण्डं प्रति 'सुवर्णमयो भव !' इति साध्यवसायं पुनः पुनः वदन् तस्थौ ।

इत्थं कुर्वतः तस्य रात्र्याः त्रयः प्रहराः व्यतीताः परं स ताम्रपिण्डस्तु यथापूर्वम् अतिष्ठत् । तं ताम्रपिण्डं सुवर्णत्वे अपरिवर्तितं दृष्ट्वा सः किंचिदिव निराशः अभवत् । अशान्तिं, निराशां, खेदं च अनुभवन् अपि तं ताम्रपिण्डं प्रति 'सुवर्णे परिवर्तस्व !' इति एकमेव वाक्यं वारं वारं उच्चारणपरः तस्थौ ।

यदा सः प्रभातां रजनीं आलोकत, पूर्वक्षितिजे उषसः अरुणं प्रकाशं अपश्यत्, पक्षिणां कलरवं च यत्र तत्र अशृणोत् तदासौ प्रायः पूर्णतया निराशोऽभूत् । यदा सः सूर्योदयस्य समयं समीपं आगच्छन्तं अपश्यत् तदा सस्वमनसि शेषामपि च आशाकणिकां अत्यजत् । रात्रौ जागरणेन खिन्नः क्षुधा तृषा क्षामः, परिश्रमेण च क्लान्तः भूत्वा सः भृशं अक्रुध्यत् । क्रोधस्य आवेशवशात् स तं सुवर्णसिद्धेः प्रयोगं उपसंहरन् इव तत्र स्वसम्मुखं स्थापितं तं ताम्रपिण्डं प्रतिवीक्ष्य तं च सम्बोध्य प्रोच्चैः उवाचः—'अरे, जड ! ताम्रपिण्ड !! यदि त्वं सुवर्णरूपं न धत्से तदा रजतमयः भव !' इति । तस्य तद्वाक्यस्य उच्चारणसमकालमेव स



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सम्पादकीयम्

## संस्कृतं च केन्द्रीयशिक्षामन्त्रालयश्च

संस्कृतभाषासेवकैर्बहोः कालात्पूर्वं तदिदं परमोत्साहेन पठितमासीद् यत् पञ्चाम्बुप्रदेशीये कुरुक्षेत्रे 'संस्कृतविश्वविद्यालयः' भारतसर्वकारद्वारा नचिरादेव संस्थापितो भवेत्। 'संस्कृतरत्नाकर'प्रभृतिभिः पत्रैश्चातितमामाशापूर्णया दृष्ट्या तदिदं प्रतीक्षितमासीद् यत्सोयं विश्वविद्यालयस्त्वरितमेव भारतवसुन्धरामलंकुर्यात्। यतो हि जनतन्त्राधिष्ठिते स्वतन्त्रेऽप्यस्मिन् भारते संस्कृतस्य स्वतन्त्रो विश्वविद्यालयो नैकतमोऽप्यस्ति, यदा च विदेशीयभाषाया आङ्गलभाषायाः प्रतिप्रान्तमेव विराजन्ते विश्वविद्यालयाः। अतएव संमिलितैः सर्वैरेव संस्कृतानुरागिभिः संभूय भारतराजतन्त्रस्य सविधे प्रार्थना चिरादक्रियत यत् आर्याणां जीवनभूतायाः संस्कृतभाषाया विश्वविद्यालयो न चिरादेव संस्थापनीय इति।

गतेऽस्मिन् अखिलभारतीये संस्कृतसाहित्यसंमेलनस्य द्वाविंशतितमेऽधिवेशनेऽपि संमिलितैः सर्वैरपि सुप्रतिष्ठितैः संस्कृतसेवकैः संस्कृतविश्वविद्यालयविषयकः प्रस्तावः पारितोऽभूत्। अत्र हि वित्तमन्त्रिणः श्रीदेशमुखमहाभागाः प्रधानाध्यक्षपदममण्डयन्। एतस्य विश्वविद्यालयस्य संस्थापनप्रयत्नार्थं स्वामी श्रीसत्यानन्दमहाभागेनापि सुबहु परिश्रान्तमासीत्। मध्ये मध्ये, तद्दिने सुप्रियसंवादा अप्यश्रूयन्त यत् पञ्चाम्बुप्रदेशीयेन सर्वकारेण विश्वविद्यालयस्थापनमिदमनुमतमपीति। अत एव प्रत्येकस्य संस्कृतानुरागिणः सेयं सुमहती प्रत्याशाऽऽसीद् यत् अचिरादेव "संस्कृतविश्वविद्यालयः"

---

ताम्रपिण्डः भास्वरस्य शुद्धस्य अतिमहर्घस्य देदीप्यमानस्य च रजतस्य रूपे क्षणात् परिवर्तितः।

अधुना तं ताम्रपिण्डं रजतरूपे परिणतं दृष्ट्वा सः मनसि इत्थं पश्चात्तापं कर्तुं आरभत—अहो मे धैर्यच्युतिः! अहो मे कातरत्वम्!! अहो मम आत्मविश्वासदौर्बल्यम्!!! हा, हन्त! हन्त!! दुर्भाग्येन वञ्चितोऽहम्!!! केवलं एकं एव वाक्यं अवशिष्यते स्म

परं मया भाग्यहीनेन धैर्यं परित्यक्तम्। नो चेत् अयं ताम्रपिण्डः शुद्धं कलधौतकान्तं सहाभूयं सुवर्णं अभविष्यत् नूनम्। धैर्याभावे मया सिद्धोऽप्ययं प्रयोगः भ्रष्टतां नीतः! अहह!! अधुना किं करोमि क्व च गच्छामि, कं पृच्छामि अहं मन्दभाग्यः!!!' इति एवंविधान् अनेकान् विलापकलापान् कुर्वाणः—'सर्वस्यापि विनाशकालसमये ह्यर्द्धं त्यजेत्पण्डितः!' इतिवत् कथमपि स्वमनसः समाधानं कृत्वा तं सद्योजातं रजतपिण्डं नीत्वा स्वगृहं ययौ।

अनया वार्तया वयं काश्चित् बहुमूल्याः शिक्षाः लभामहे। प्रथमा शिक्षा तु इयं यत् मनुष्यः रात्रिन्दिवं यावत् यत् किमपि च भाषते तत्र एका वाणी सत्या भवति। द्वितीया शिक्षा यद्धि धैर्याभावे सिद्धः अपि अर्थः क्षणात् विनश्यति। तृतीया शिक्षा यत् पुरुषः कियन्तं अपि परिश्रमं घोरं पुरुषार्थं वा कामं करोतु परं भाग्यात् अधिकं किमपि नो लभते। चतुर्थी शिक्षा यद्धि मनुष्येण विचार्य वचनं उच्चार्यम् यतः न ज्ञायते कदा का वाणी शुभा अशुभा वा मुखात् निर्गच्छेत् विश्वेदेवा अन्तरिक्षे 'तथास्तु' 'तथास्तु' इति वदन्तः तां वाणीं सत्यां प्रमाणयेयुः। इति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रतिष्ठितो भवेत्। किन्तु 'हिन्दुस्तानटाइम्स' पत्रादिदं ...दवृत्तं मूलत एव संचूर्णितमेव संपद्यते।

तत्र हि संस्कृतसेवकैः सुमहता विषादेन तदिदं वृत्तं ...तं यत्—श्रीमौलानाआजादमहोदयस्य मन्त्रालयेन ...स्कृतविश्वविद्यालयस्य कार्यक्रमः स्थगितः कृतः।" ...त, यस्य कृते संपूर्णभारतीयानामाशापूर्णा दृष्टिः ...तोऽप्यत्र संलग्नाऽभूत् तस्यैव एवं परिस्थितिर्भवेत्? ...मौलानाआजादमहाभागः आर्यदेशस्यास्य भारतस्य ...तोऽपि प्रमुखः शिक्षाकर्णधारः। स हि आर्याणामा...भाषायाः संस्कृतसरस्वत्याः प्रकाण्डपण्डितो न भवे...थापि संस्कृतस्य सामान्यतःपरिज्ञाता त्ववश्यं भवेदेव ...ति हि साधारणबुद्धिरपि जनो विश्वसिति स्म। ...न्त्वस्मिन् विश्वासे किञ्चिदन्तरायभूतमिवाऽऽ...क्ष्यते। पूर्वोक्तात् हिन्दुस्थानटाइम्सपत्रादेव पाठकै...गतं यत्–'जगद्विख्यात श्रीरवीन्द्रनाथटागोरमहोदय...रा सुप्रतिष्ठितस्य विश्वभारती-विश्वविद्यालयस्य ...मुखवाक्यम् ('मोटो') "सत्यं-शिवं सुन्दरम्" इति हि ...आजादमहाभागेन कारणेनाऽनेन निराकृतं यत् ...अस्मिन् 'शिवम्' इति पदं हिन्दूदेवतायाः शिवस्य ...बोधकम्। अतएव साम्प्रदायिकं, ततश्च नेदं वर्तमान...काले स्वीकर्तुमर्हम्" इति। हन्त! कोयमगाधो ज्ञान...महिमा !!!

'सत्यं शिवं सुन्दरम्' इति वाक्यं संप्रदायगन्धशू...न्यैस्तटस्थैरप्युपादीयते। किं बहुना, 'थीयोसोफिस्ट' ...महाभागा अपि तदिदं वाक्यं सादरमुद्धरन्ति, घोषयन्ति। ...किं अस्मिन् वाक्ये 'शिवस्य' शंकरस्य भगवतः ...प्रवतारः समभूत्? अस्तु

संस्कृतसेवका निर्निमेषया दृशा पश्यन्ति, कर्णौ च ...सावधानमायोजयन्ति यत सोयं संवादो मृषाभूतः सिध्येत् संस्कृतविश्वविद्यालयश्च त्वरिततमं सुप्रतिष्ठितो भवेत्।

**जयपुरे जनसंघस्य प्रतिनिधिसभा**—२१ अप्रेल तारिकायां भारतीयजनसंघस्य प्रतिनिधिसभाया वार्षिकाधिवेशनं रामलीलामैदानस्थाने ससमारोहं समघटत। एतस्या अध्यक्षः श्री देवप्रसादघोषः आसीत्। अन्यान्यावश्यककार्याणां मध्ये अध्यक्षीयं भाषणमपि प्रमुखमभूत्। अत्र हि घोषमहाभागेन सामयिकराजनैतिकविषयाणां मार्मिको विमर्शोऽभूत् कृतः। एतेन "कल्याण"राज्यस्यालोचनां कुर्वाणेनोक्तं यत् पूर्वं क्षुधा म्रियमाणायाः परोलक्षजनतायाः कृते भोजनस्य, चिकित्सायाः शिक्षायाश्च प्रबन्ध आवश्यकः, तदनन्तरं महामहतीनां योजनानां निर्माणं, विदेशीयान् प्रभावयितुं भूयसो द्रव्यराशिव्ययस्य प्रदर्शनं च भवेत्। एतस्याऽधिको भागो नेहरूसर्वकारस्यालोचनायां, पूर्ववङ्गाद्विवासितानां हिन्दूपरिवाराणां दीर्घसंख्यायां भारते समागमनस्य कारणानां मीमांसायां राज्यपुनर्घटनायोगस्य समीक्षायां चोक्तोऽभूत्। अन्ते घोषमहाशयेन सम्यगुक्तमासीत् यत् नेहरूमहाशयो हिन्दुत्वस्य विरोधं भयं च परिहृत्य पुनः हिन्दुसंस्कृतेः स्वर्णसिद्धान्तानामनुसरणं कुर्यादित्यहं प्रार्थये। पुरा हि राज्ञां शासनस्यायमादर्शोऽभूत्—

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्,<br>
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।<br>
प्रजानां विनयाधानाद्रक्षणाद् भरणादपि।<br>
स पिता, पितरस्तासां केवलं जन्महेतवः।

(कालिदासः)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृतसमाचाराः--

**तोरावाट्यां संस्कृत--सम्मेलनम्**— राजस्थान-संस्कृतसाहित्यसम्मेलनस्य शाखारूपेण उपजिला-तोरावाट्यां संस्कृतसाहित्यसम्मेलनं ११ अप्रेलदिने नीमकाथानाग्रामे, श्रीहेमचन्द्रशास्त्रिणां सभापतित्वे सम्पन्नम्। अत्र प्रातः संस्कृतविकाससम्बन्धे विमर्शो विहितः। संस्कृतविकाससमित्या प्रकाशितायाः प्रश्नावल्या उपरि विचारः संजातः। प्यारेमोहनशास्त्रिणः स्वागतभाषणं, मण्डनमिश्रस्योद्घाटनभाषणं, प्रस्तावाष्टकस्य स्वीकृतिश्च समभूत्। प्रस्तावेष्वेषु हाईस्कूलपरीक्षायां संस्कृतस्यानिवार्यता, संस्कृताध्यापकानां फिक्सेशनं प्रशिक्षणं च, संस्कृतछात्राणां कृते वृत्तिप्रदानं, संस्कृतविभागस्यायुर्वेदवत् पृथक् स्थापना-इत्यादयो मुख्यमुल्लेखनीया आसन्। सायं सार्वजनिकस्थाने सभा समायोजिता यस्यां बालासहायशर्मणां नाजिममहोदयानामध्यक्षत्वे संस्कृतप्रचारविषये विदुषां भाषणान्यभूवन्।

अग्रिमवर्षकृते श्रीगोविन्ददेवजोशी सभापतिः श्रीराधामोहनशर्मा च मन्त्री निर्वाचितौ।

---

भागवतस्यायं श्लोको नेहरूमहाभागेनाऽऽलोचयितव्यः—

"यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम्,
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति।"

अस्माभिः सर्वैरपि—'संगच्छध्वं, संवदध्वं, सं वो मनांसि जानताम्" इति वेदमन्त्र उद्घोषयितव्यः।

——

**अखिलभारतीयसंस्कृतसाहित्यसंमेलनस्य त्रयोविंशमधिवेशनम्—**

गतसंचिकायां पाठकमहाभागैः पठितं स्याद् "यत् अ० भा० संस्कृतसाहित्यसंमेलनस्य त्रयोविंशं यदिदमधिवेशनं मोहमय्यां भविष्यति तद्धि मेमासस्य प्रथमे द्वितीये वा सप्ताहे संपद्येत।' एतदपि तस्मिन् समये नाऽभून्निश्चितं यत् अधिवेशनस्य अध्यक्षपदं को वा महाभागो मण्डयिष्यतीति। किन्तु देहलीनगरस्थात् संमेलनकार्यालयात् कार्यालयमन्त्रिणः श्रीलीलाधरशर्ममहाभागस्य ३ मई लिखितं पत्रं साम्प्रतमेव भारतीकार्यालये प्राप्तम्। तदनुसारमिदमधिवेशनं जूनमासस्य २-३-४ तारिकासु मोहमय्यां संपद्येत। एतस्याऽध्यक्षपदं पुरी गोवर्द्धनपीठस्य वयोवृद्धाः प्रसिद्धविद्वांसः श्रीजगद्गुरुशंकराचार्याः श्रीभारतीकृष्णतीर्थमहाभागा अलंकरिष्यन्ति। भारतस्य प्रसिद्धपुरातत्त्वज्ञः श्रीपाददामोदरशास्त्री सातवलेकरमहोदयः स्वागताध्यक्षः एवं ल० म० चक्रदेवमहाभागोऽस्य स्वागतमन्त्री निर्वाचितोऽस्ति। मोहमयीप्रान्तस्य राज्यपालः श्रीहरिकृष्णमेहताबमहोदयश्च महोत्सवस्योद्घाटनं करिष्यति।

स्मरेयुः पाठकमहाभागा यद् द्वाविंशतितमे देहलीसंमेलने स्वीकृतस्य प्रस्तावस्याऽनुसारं संस्कृताऽनुसंधानमन्दिरस्य स्थापना प्रस्तुताऽऽसीत्। तदनुसारं केन्द्रीयशासनस्य जनतायाश्च सहयोगेन देहल्यामनुसंधानमन्दिरस्य स्थापनार्थं संमेलनेन पूर्णः प्रयत्नोऽद्यावधि कृतः। शीघ्रमेव मन्दिरस्याऽस्य शिलान्यासः संपाद्येत। कार्येऽस्मिन् संमेलनकार्याध्यक्षः श्रीनरहरिविष्णुगाडगिलमहाभागः, मन्त्री श्रीकेदारनाथसारस्वतमहोदयश्च भूयस्तरां प्रयत्नशीलौ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मोहमय्यधिवेशनेऽस्मिन् भारतीयसंस्कृतशिक्षण-देशकालोपयोगितासंपादनार्थं प्रमुखयोजना प्रस्तू-ता। एतदतिरिक्तम् केन्द्रीयसंस्कृतविश्वविद्यालयस्य, कालयस्य, प्रकाशनविभागस्य तथा अन्यान्येषामा-कार्याणां योजनास्तत्रोपस्थिताः क्रियेरन् । ग्रीष्मा-रो भाविनोऽस्याधिवेशनस्याऽऽयोजना विशालरूपे धाऽस्ति । भारतस्य सर्वेभ्योऽपि प्रान्तेभ्यः सहस्र-मिताः प्रतिनिधयः संमिलेयुरिति कार्याधिकृता शासते । प्रतिनिधीनां यातायातार्थं बाष्पयानविभा-ने यात्राव्यये न्यूनताकरणमपि (रेलवे कन्सेशन) यते । वर्तमानाधिवेशने प्रतिनिधिशुल्कं पञ्चमुद्रा नीकृताः । सम्मेलनप्रतिनिधिभ्यो मुम्बईनिकट-नामैतिहासिकदर्शनीयस्थानानां प्रदर्शनस्याऽपि था कृता । अधिवेशने प्राचीनसंस्कृतपुस्तकानां नी, मृच्छकटिकनाटकस्याभिनयः, एतदादेरपि ना चिकीर्षिता संप्रति । संमेलनसंबन्धिसर्वविध-रपरिज्ञानार्थम् –

स्वागतमन्त्री–'अ० भा० संस्कृतसाहित्यसंमेलनस्य २ अधिवेशनम् ]

स्वागतसमितिः, ३१८ चर्नीरोड, बम्बइ ४ स्थाने व्यवहारः कार्यः ।

## बीकानेरनगरे संस्कृतसमितेरागमनम् :—

८ अप्रेलदिनं प्रातः राजस्थानसर्वकारनियमितायाः नसमित्याः सदस्याः बीकानेरस्थपण्डितैः सह-त्य विचारविनिमयं कर्तुं बीकानेरनगरं प्रापुः । न्या शार्दूलसंस्कृतविद्यापीठनिरीक्षणं कृतम् । यः प्रकटितः । सायम् ६ वादने बीकानेरविदुषां सभा समभिलत् यत्र समितिप्रचारितायाः प्रश्ना-वल्याः प्रदत्तानि विद्वद्भिरुत्तराणि । स्मृतिपत्रञ्च श्री-विद्याधरशास्त्रिणा समर्पितम् । रत्नदुर्गस्थैः श्रीकृष्ण-चंद्रशास्त्रिभिः, उदयवीरशास्त्रिभिः, भगवानदास हरियाणा, ब्रजलाल बी. ए. श्रीस्वर्णलता अग्रवाल एम. ए., इत्यादिभिः सभायां भागो गृहीतः ।

२६ अप्रेलदिने प्रातः द्वितीया सभाऽभूद्यत्र श्री-लक्ष्मीलालजोशि–चन्द्रशेखरशास्त्रि प्रभृतिसदस्यैः, प्रो. मूलचन्द–रामनारायण आचार्यप्रभृतिभिर्विद्वद्भिश्च स्वविचाराः प्रकटिताः । विद्याधरशास्त्रिभिः स्वकीया पंचवर्षीया योजना स्थापिता ।

## संस्कृतवाग्विवर्धिन्यां कविगोष्ठी विद्वद्गोष्ठी च :—

२३ अप्रेलदिवसे सायमष्टवादनसमये एकं कविसम्मेलनमभूद्यस्मिन् श्रीनरहरिभट्ट-श्रीद्विजेन्द्रलाल-शर्म एम० ए०–नारायणकाङ्कर–दीनानाथत्रिवेदि–चन्द्र-शेखरशास्त्रिप्रभृतीनां कविताः, कलानाथशास्त्रि, शिव-दत्तशास्त्रि प्रभृतीनां भाषणानि चाऽभूवन् । सम्मेलना-ध्यक्षेण श्रीचन्द्रशेखरशास्त्रिणा स्वभाषणे संस्कृत-पण्डितानां परिस्थितिमावर्ण्य संस्कृतसंस्कृतेः प्रसा-रस्यावश्यकता सूचिता ।

एतस्य समारोहस्य दिनद्वयानन्तरं २५ अप्रेलदिवसे परिषदस्तत्त्वावधाने काश्याः सुप्रसिद्धविदुषां श्रीराजे-श्वरशास्त्रिणां सम्माने एका गोष्ठी अनूपशहरस्थ पं० श्रीअखिलानन्दशास्त्रिणां साभापत्ये समायोजिता । यत्र विद्वद्द्वयेन सारगर्भभाषणे प्रत्ते ।

—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# ★ सूक्ति-सुधा ★

तावद्भयाद्धि भेतव्यं यावद्भयमनागतम् ।
आगतं तु भयं वीक्ष्य प्रहर्तव्यमभीतवत् ॥१॥

डर की बात से तब ही तक डरना चाहिये जब तक वह सामने नहीं आवे । भय को सामने देखकर तो निःशङ्क होकर प्रहार करना चाहिये, अपनी बहादुरी का परिचय देना चाहिए ॥१॥

हीनसेवा न कर्तव्या कर्तव्यो महदाश्रयः ।
पयोऽपि शौण्डिकीहस्ते मद्यमित्यभिधीयते ॥२॥

यदि सेवा ही करनी पड़े तो हीन पुरुष की सेवा न करे । किसी महान पुरुष का आश्रय ले । क्योंकि हीन की संगति दूसरों को भी हीन बना देती है। मद्य बेचने वाले के हाथ में पानी भी मदिरा ही समझी जाती है ॥२॥

वैद्यानामातुरः श्रेयान व्यसनी मौनियोगिनाम् ।
विदुषां जीवनं मूर्खः सद्वर्णो जीवनं सताम् ॥३॥

वैद्यों को रोग पीडित पुरुष प्रसन्न करता है (क्योंकि उसके द्वारा उन्हें धन मिलता है) जो नाना दुर्व्यसनों में (अथवा संकटों में) पड़ा हुआ है उसको मौन साधने वाले वा योगी (करामात दिखाने वाले साधु) पसन्द करते हैं (क्योंकि वही उनकी सेवा करता है ।) पंडितों की सेवा मूर्ख से अच्छी तरह होती है अच्छे वर्ण ब्राह्मण आदि से सब ही सज्जनों की जीवन रक्षा होती है ॥३॥

अम्भसा भिद्यते सेतुस्तथा मन्त्रोऽप्यरक्षितः ।
पैशुन्याद्भिद्यते स्नेहो वाचा भिद्यते कातरः ॥४॥

जल से पुल टूट जाता है । किसी गुप्तमन्त्र की यदि रक्षा न की जाय तो वह भी फूट जाती है चुगली से प्रेम टूट जाता है किन्तु डरपोक पुरुष वाणी मात्र से फूट जाता है ॥४॥

विश्वासप्रतिपन्नानां वञ्चने का विदग्धता ।
अङ्कमारुह्य सुप्तानां हन्तुः किं नाम पौरुषम् ॥५॥

जो विश्वास किये हुए हैं अर्थात् किसी के विश्वास पर भरोसा किए हुए हैं उनके ठगने में कौन चतुराई है ? जो किसी की गोदी में आकर सोये हुए हैं उनको मारने वाले की क्या बहादुरी है ? ॥५॥

बहुभिर्न विरोद्धव्यं दुर्जनैः स्वजनैरपि ।
स्फुरन्तमपि नागेन्द्रं भक्षयन्ति पिपीलिकाः ॥६॥

बहु-संख्यक आदमियों के साथ विरोध नहीं करना चाहिये चाहे वह दुर्जन हो या अपने ही आदमी हों । फडफडाते हुए जहरीले साँप को भी बहुत संख्या वाली चीटियां खा जाती है (चाट जाती हैं) ॥६॥

प्रकाशकः— जयबहादुरसिंह
पताः—भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रकः— राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर ।
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

संस्कृतस्य प्रमुखं मासिकपत्रम्

वी. पी. from Rs. 3/12 on 24.7.56



...र्यसंस्कृतिसर्वस्व-संरक्षण-विचक्षणः ।
...ल्लमूर्छाकरो हिन्दूछत्रपो दृश्यतां शिवः ॥

वर्ष ६

अष्टमाङ्कः

मूल्यम्
वार्षिकम् ३)
एकस्याङ्कस्य ।=

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## ❀ विषय-सूची ❀


| क्रमः | लेखाः | लेखकाः |
| --- | --- | --- |
| १. | धनिनं प्रति | श्रीशिवचरणझा, झाँसी |
| २. | सा विद्या या सुसंस्कारक्षमा | श्रीप्रभाकरआप्टे, तासगाँव |
| ३. | नारीणां भोजनस्थितिः | श्रीमूलचन्द्रबहडा, लक्ष्मणगढ़ |
| ४. | भारते संस्कृतविद्यालयोऽवश्यं स्यात् | श्रीसत्यव्रतशर्मा, कुराली |
| ५. | नियतिपौरुषयोः को बलवत्तरः ? | श्रीप्रह्लादचन्द्रशास्त्री, डीडवाना |
| ६. | स्वातन्त्र्यवीराः श्रीसावरकरमहोदयाः | श्रीकाशिनाथत्र्यम्बकशिम्पी, बंबई |
| ७ | देववाण्याः कृते क्रान्तिरपेक्ष्यते | सहसम्पादकः |
| ८. | बाल-भारती— | |
| | भाग्यं पुरुषार्थश्च | श्रीगणेशरामशर्मा, झालावाड़ |
| ९. | भगवतो बुद्धस्य चरित्रम् | श्रीशिवदत्तचतुर्वेदः, जयपुरम् |
| १०. | सम्पादकीयम्— | |
| | अ० भा० सं० सम्मेलनाधिवेशनम् | |
| | विद्याभवने पंडितसभा | सहसम्पादकः |
| ११. | सूक्ति-सुधा | सहसम्पादकः |
| १२. | मोहमयीसम्मेलनदृश्यम् | ” |


सूचना :—सर्वे ग्राहकाः सूच्यन्ते यत् पत्रव्यवहारावसरे निजग्राहकसंख्यां स्वस्मिन् पत्रे अवश्यं दर्शयेयुः अन्यथा पत्रोत्तरे बाधा समुत्पत्स्यन्ते ।

### —❀ "भारती" पत्रस्य उद्देश्यानि नियमाश्च ❀—

१. संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचार पोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि ।

२. 'भारती' पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम् ।

३. मासिकपत्रमिदं प्रतिमासं पूर्णिमासं पूर्णिमायां तिथौ प्रकाशितं स्यात् ।

४. एकस्यांकस्य मूल्यम् ।=) आणकषट्कम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादकः—
...कलानाथशास्त्री B. A.
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षः ६ | ज्येष्ठशुक्ला १, सं० २०१३ | अङ्कः ८

## ★ धनिनम्प्रति ★

[श्री शिवशरण झा, झाँसी]

किं जल्पसि भो, दीन-जनानां नास्ति जगति जीवितुमधिकारः ?

...धवलितोऽयं प्रासादः ।
...गोष्ठ्यं तव यत्र निषादः ॥
...उपपन्नो व्यवसायैर्येषाम् ।
...नानुमतस्तेषामुपकारः ॥१॥

किञ्चिदकृत्वा सततं शेषे ।
नित्यं नूतनता तव वेषे ॥
परिणामोऽयं श्रमस्य येषाम् ।
तेषां विषये मृतो विचारः ॥२॥

..., कुरुषे बहु-खेलम् ।
...ता येषां भृशमवहेलम् ॥
...षामेवार्थिनामश्रुत्वा ।
सत्कारो द्वारादपसारः ॥३॥

तव कोषे विलसन्ति धनानि ।
कष्टैस्तेषां यान्ति दिनानि ॥
किन्तु न किञ्चिद् वितरसि तेभ्यः
क्षुधया नश्यति तत्परिवारः ॥५॥

पापोपायैर्भूमि - धनानि ।
कामं कृत्वा हस्तगतानि ॥
अलं पीडयसि दीनानधुना
कुपितः किन्ते विभव-विकारः ॥५॥

वैषम्यं काष्ठामुपयातम् ।
दूरयितुं तैरधुना ध्यातम् ॥
फलतः तुन्दिल, तव तु पुरस्तात्
न स्याद् मारुतयान-विहारः ॥६॥

दीनानां जठरानल-ज्वाला ।
प्रकटीभूता क्षोभ-कराला ॥
शाम्येदाहुतिमादायैव ।
अथमस्याः शान्तये प्रकारः ॥७॥

सन्ति स्थातुं नैव गृहाणि ।
भोक्तुं येषां नाप्यन्नानि ॥
नैव च वस्त्राण्यपि परिधातुम् ।
कोपस्तेषां त्वयि दुर्वारः ॥८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सा विद्या या सुसंस्कारक्षमा !

( ले० प्रभाकर आपटे, बी० ए० तासगांव )

अयि विमर्शशालिनः पाठकाः ! स्वातंत्र्यकाले प्रायो वर्षदशकमनुभूतमस्माभिः । प्रजातंत्रं हि तिष्ठत्यस्मद्राज्ययंत्रम । सुराज्यस्य शिल्पकारा वयमेव । विकासमूलभूता शिक्षणपद्धतिरिति मे मतिः । अस्यामध्ययनरीत्याऽधीयमानं मां बहुविधाः समस्या उपस्थिताः । सारभूतो नूनमेष प्रश्नः ।

"प्रचलितविद्यावितरणपद्धत्या अधीयमानं छात्रं, स्वजीवितस्य सर्वांगीणविकासमिच्छन्तं आधुनिकी शिक्षणरीतिः समाश्वासयति वा न वा !" इति ।

प्रथममस्याः समस्याया उत्तरं मनसा नासाद्यते । आसादितं चेन्न समाधानकरं भवति । न च नेति प्रत्युत्तरं स्वीकर्तुं मनः प्रवर्तते । अखिलराष्ट्रमौलिभूतराष्ट्रपतेरारभ्य सामान्यप्राथमिकशिक्षकपर्यंतं सर्वेऽप्यामूलाग्रपारवर्तनवादिनः दृश्यन्ते । गुरुमुखादादाय विद्या कण्ठगता कर्तव्या, उत प्रत्यक्षप्रणालेः ( d rect method ) अंगीकरणं श्रेयं इत्यपि विवादविषयः। ऐकान्तिकमतप्रतिपादनं न खलु श्लाघ्यं, द्वयोरपि गुणदोषसंभवप्रसगात । अपि सनातनगुरुकुलपद्धतेः पुनरुज्जीवनं सुकरम ? सुतरां दुःसाध्यमिति केचन ब्रूयुः । सत्यं हि प्रतीयते । तत्रापि तद्गतगुणानामावश्यकता नापक्षीयते ।

आचार्येषु श्रद्धा, अतीतवर्तमानसारस्वतोपासकेष्वादरः, अध्येयविषये जिज्ञासोत्कण्ठे, एतावद्भिर्भावबलयैर्घटितं शुचिमांगल्य ज्ञानोपासनाय सहकारिभूतम्। आपातत एव प्रभवेदिदं वायुमण्डलमिति नोचितं वक्तुम्। ईदृग्वायुमंडलनिर्माणाय विद्यार्थिशिक्षकपालकविद्याक्षेत्रसूत्रधारिणां चाहंभावत्यागपूर्वकं स्वकर्तव्याधिगमनं तत्पूर्त्यै सहकार्यं चापेक्षितम् ।

केचन ब्रूयुः, "अधीतस्य ध्येयं, यो ज्ञानविकासः स हि साध्यतेऽद्यतनाध्यापनप्रकारे। प्रतिविषयपारंगता अध्यापकास्तत्तद्विषयज्ञानं सम्यग्वितरन्ति । एको वै गुरुरखिलविषयस्य न प्रभवति । तथापि राष्ट्रस्य घटकभावात् प्रत्येकव्यक्तिरात्मनः सर्वांगीणविकासमर्हति। व्यावहारिकदृष्ट्या तु व्यवसायप्रवेशात्प्रागेव व्यक्तित्वघटनायावकाशो वर्तते । असौ कालः शालेयमहाविद्यालयीयजीवनेन व्याप्तः 'विधात्रा निर्मितस्य, न्यास इवार्पितस्य बालस्य, पूर्णव्यक्तिमत्त्वे परिवर्तनं कर्तव्यं पित्रा, मात्रा, गुरुणा च' इतीयं पूर्वा रूढिः । एतेषां

---

दीन-प्रतिक्रियाऽग्निः सर्वम् ।
भस्मीकुर्याद् वैभव-गर्वम् ।।
समीकरणमन्तरा त्वदर्थं ।
अपरः कश्चिद् नास्त्युपचारः । ९।।

लोभ-घटस्ते पूर्णो जातः ।
भंजन-काल उपेतो भ्रातः!।।
त इव कष्टं सोढुं सम्प्रति ।
समुद्यतस्व, चलः संसारः ।।१०

शृणु, भृशमुत्तिष्ठति युग-नादः ।
देशे प्रसरतु समता-वादः ।।
दीना अपि जीवेयुर्यस्माद् ।
लघुस्तत्रापि भवेद् धन-भारः ।।११।।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...ते प्रीतिः, तस्य च वर्धमाना तेषु श्रद्धा, तस्य ...तं कारयतः।

अर्थशास्त्र ( Economics ) गत-श्रमविभाग-...मार्गमाश्रित्य केचन प्रत्यवतिष्ठेरन् । किं तेषां ...? शिक्षण-संस्कारौ व्यक्ति-जीवनस्य द्वे ...ऽङ्गे । तयोरुन्नतिहेतू अन्ये संस्थे । कच्चित्सुलभ-...लाभः सर्वेभ्यः ? नैव । असंस्कृतस्य हि विद्या-...रदस्य चारित्र्यं किं स्पृहणीयं भवति ? न केवलं ...करणीयं किन्तु समाजघातकमनेकदा । उदाहरणैः ...लाभः । एकं वा द्वे वोदाहर्तव्ये ! अश्लाघ्यं हि ... तथापि गतिसामान्यप्रपञ्चाय वदामि । पद्म-...णसदृशपदवीभाक् कोऽपि स्थापत्यविशारदः ...यदिनान्तेन्यायालये द्रव्यव्यवहारनिमित्तमभियुक्तः। ...सूचकमिदम् ?

अपि लक्ष्यतेऽस्मिन् दृष्टान्ते सुसंस्करणं प्रथमव-...? चारित्र्यसंवर्धनाय सुसंस्करणं नितरामावश्य-... 'स्वभावो दुरतिक्रम' इत्यर्धसत्यमेतत् । न तेन ...रक्रियाया वैतथ्यमनुमीयताम् । भगवता वासुदेवे-... "जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते" । ...क्षमं बालमनः । आगमीनिर्वाणान्ताः षोडश-...काराः स्मृतिकारैर्विहिताः । सर्वेऽपि सुसंस्कारानभि-...न्ति । पितरौ निश्चयेन स्वतोकेभ्यः शीलविकास-... संस्कारानिच्छतः । परं तौ विद्यालयानुप्रेषणा-...कं किञ्चिदपि कर्तुं न क्षमौ । अत एव गुरुष्ववेद-...दायित्वमापतति । साधूक्तं महाकविभासेन—'बालं ...गुरवे प्रदातुर्नैवापराधोऽस्ति पितुर्न मातुः—' ...न्तु इममुत्तरदायित्वमङ्गीकर्तुं नेच्छन्ति, न ...नुवन्ति प्रायः । कतिपये आचार्या दिष्ट्या छात्रेषु ...या, मार्गदर्शकाः सुदक्षाश्च । परमार्थेन गुरुपदं भूषयितुमपेक्ष्यन्ते आधुनिकाचार्याः । हन्त न साधयन्ति साफल्येन सर्वे । आचार्यस्तु दर्पण इव छात्राणामग्रे अवतिष्ठते । अविशुद्धो ह्यादर्शः कीदृक् प्रतिमां प्रतिबिम्बयेत ? किं चानुसृत्य स्वव्यक्तित्वं तैर्घटितव्यं ? यदि त एव सिनेतारिकासु-नटनटीषु स्वनिष्ठामादध्युः छात्राणामग्रेऽभिनेतृभिः संलापे, सहवासे स्वप्रीतिं प्रदर्शयेयुः का गतिः स्यादनुयायिनाम् ? कीदृशो भावितोऽभावितो वा संस्कारः स्वाचरणैः शिष्यगणो प्रतिफलनमासादयेत ? ईदृशो विचारो वर्तमानाचार्याणां चेतांसीषदपि स्पृशति कच्चित ? हिंदुसंस्कृतौ 'गुरुः' ऐहिकपारमार्थिकजीवनमार्गदर्शको भवति । आंग्लभाषायामपि Philosopher and guide (तत्त्वज्ञमार्गदर्शकः) इति शब्दाभ्यां गुरुभूमिकाया उचिता व्याख्या कृताऽस्ति । राष्ट्रस्यावनतिसूचको भीषणः खलु प्रश्नः सपदि निराकरणमर्हति । अन्यथा समाजविनाशाय प्रसज्येत । ये महाशयाः स्वकर्तव्ये दक्षास्तेऽपि सहिष्णुतया, शालीनतया वा केचिदुदासीनतया मौनं भजन्ते न प्रतीकारं कुर्वन्ति समस्यायाः ।

अन्ये तु वाचिवीरा अन्यत् ब्रुवतेऽन्यदेव कुर्वते । शिक्षणाधिकारिणः प्रायः स्वासनं स्थिरीकर्तुं यतन्ते । तेषां तदेव सत्यं त वाहो ऋतं यत्स्वार्थमुत्पादयति । तस्माद् विचक्षणैः स्वतंत्रप्रज्ञैः, सदिच्छमानैर्मनीषिभिः समाजधुरीणैरौदासीन्यं त्याज्यम् । ते हि ह्येतां दुरवस्थां परिवर्तयितुं पारयिष्यन्ति । क्रियासमयः पुरोऽवस्थितः । अन्यथा तेऽपि समाजविनाशपापं भजेयुः ।

छात्राणामपि महती कर्तव्यधारा । अस्माभिरन्तर्मुखैर्भवितव्यम् । पश्यत—

प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।
किन्नु मे पशुभिस्तुल्यं किमु सत्पुरुषैरिह ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# नारीणां भोजनस्थितिः

( ले० वैद्य मूलचन्द्र बहड़, लक्ष्मणगढ़ )

विदितमेवैतत् अभिनवविज्ञानोन्मेषविकसितधियां सुधियां तत्रभवतां भवतां यद्धि पुरुषाणां वंशपरम्पराप्रचालने स्त्रीणामेव प्राधान्यमिति। पुरुषास्तु रेतःसेकमात्रं कृत्वा निवर्तन्ते। तदनन्तरं नवमासपर्यन्तं गर्भस्थबालकपोषणं, प्रसवानन्तरं यावत्सार्धं वर्षं स्वकीयस्तन्यपानादिना प्रियशतैरपि सततं तल्लालनं पालनं च स्त्रीकर्तृकं भवति। एवंस्थिते ताभ्यः साधारणं भोजनं विहाय, हृद्यं, द्रवं मधुरप्रायं स्निग्धं दीपनीयं संस्कृतं पौष्टिकं रुचिकरं भोजनमत्यावश्यकं, येन ताः स्वशरीरस्य आवश्यकतापूर्तिं कुर्वाणाः स्वयं प्रहृष्टाः स्वस्थाश्च भवेयुरिति।

परंतु गृहेषु भवति किमिति न कोपि दृष्टिपातमपि कर्तुं अभिलषति इति महान् खेदस्यावसरः। गृहेषु कुटुम्बिनां उच्छिष्टं पर्युषितं शुष्कं क्लिन्नं अन्नं स्त्रीभ्योऽर्प्यते ताश्च पुनः वराक्यः सगर्भाः सव्याधयो वा बालवत्साः विवत्सा वा कीदृश्योऽपि भवेयुरिति।

---

एकलव्यो ध्यातव्यो येनाचेतनगुरुप्रतिमायां स्वमन आधायाप्रतिहता विद्या संपादिता। तस्माद् यानि यानि गुरूणां सुचरितानि तानि तान्युपास्यानि। नो इतराणि। एतावती खलु मनोधारणा दुराराध्या छात्रेभ्यः सर्वेभ्यः। यदि वयं तेषां मनः स्ववगामहे तर्हि हि कर्णविहीननौकेव तेषां मनोनौका दोलायमानाऽवभासेत।

सुस्पष्टा खल्वियं समस्या। सा विद्या या सुसंस्कारक्षमा। यदा वयं तथाविधामध्यापनपद्धतिं भारतवर्षे मूर्तरूपां पश्येम सुवर्णदिनमेव तत् स्यात्। अचिरादेव उदेतु तत्।

आढ्येष्वपि गृहेषु सहस्रशस्तावदवलोक्यते यत् तत्रत्या योषितो घृतं न भुंजते न च पिबन्ति पयः, किं बहुना उष्णं भोजनमपि एता न अश्नन्ति। हन्त भोः! कथंकारं तादृग्विधदशायां स्वस्थसन्ततिसंभवः संभाव्येत। इदानीं यावत्यः स्त्रियो दृश्यन्ते तासु प्रायेण प्रतिशतं पञ्चसप्ततौ स्तनयोः स्तन्याभावोऽवलोक्यते। गव्येन आजेन सम्प्रति प्रचलितेन वा शुष्केन विदेशीयेन पयसा बालकाः पाल्यन्ते। एतदेव कारणं यत् इदानींतनाः बालकाः जन्मप्रभृति एव उदरव्याधिजुष्टा मनोबलादिभिः दूरमपसारिता ईतिक्लान्ता इव कुसुमा विकृताकृतयः दुर्निरीक्ष्याश्च प्रतिभान्ति। वर्षगणैरपि पद्भ्यां प्रचलितुं न प्रभवंति चेति। इतस्तावत् स्वस्थजननीजनीनां बालकानां स्वच्छं मातृस्तन्यं पिबतां दशमासिकानामपि दोर्भ्यां दोर्भ्यां प्रधावतां बालकेलिः द्विषामपि चेतसि बालमुकुन्दस्मृतिं स्फोरयति इति महदन्तरम्। औपरिकदुग्धादाः बालकास्तु पुनः स्वल्पेनैव कालेन संसृतियात्रां समापयन्तो मया बहुशो विलोकिताः। यत्राहं तेषां पितरौ पृच्छामि यत्किं भो एतस्य मातृस्तन्यं तु पर्याप्तं स्रवति? तत्र उत्तरं मिलति महोदयाः! दुग्धं क्व? बालकोत्पादस्य किञ्चित् कालानन्तरमेव दुग्धं तु शुष्कतामगमत। न विद्मः किं कारणं जातमिति। एवं इदानीं अस्माक गार्हकी व्यवस्था वरीवर्ति। वस्तुतः सत्यं चेदम् यावत् स्त्रीभ्यो दुग्धं स्निग्धं वा भोजनं न लप्स्यते कुतस्तावत् सन्ततिस्वास्थ्यमिति। अतएव यदि भवन्तः स्वसन्ततीनां नैरोग्यं वाञ्छंति दृष्टुं कामयन्ते च भारतस्य प्राक्तनी-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भारते संस्कृतविश्वविद्यालयोऽवश्यं स्यात्

[ ले० सत्यव्रतशर्मा, कुराली (पूर्वपंचनदीयः) ]

[ अधुनैव कुरुक्षेत्रे संस्कृतविश्वविद्यालयस्य शिलान्यासः सम्पन्नः। लेखकस्यानुरोधः स्वयं सफलीभूत इति सप्रमोदं सूचयामः अभिनन्दामश्च भारतसर्वकारम्। विश्वविद्यालयस्थापनमिदं कियदावश्यकम् इति लेखकेन साधु सन्दिष्टम्।—सम्पादकः ]

संस्कृतं विश्वस्य सर्वप्राचीना भाषाऽस्ति। न केवलं भारतस्य, अपितु विश्वस्य भाषा एतत्त एव लब्धजीविताः सन्ति। न परमेशियायाः, योरुपस्यापि पस्तोर्नयोः संस्कृतस्य शब्दाः बाहुल्येन लभ्यन्ते। अयत हेतुः यदफगानसर्वकारेण स्वाध्ययनक्रमे संस्कृताय तमनिवार्यं पदम्। भारतस्य तु समस्तानां भाषाणां सविनी संस्कृतभाषैवेति जानन्त्येव सम्यग्भाषावैज्ञाज्ञाः। यदि नेह संस्कृताय तत्स्थानं दित्सितमस्माकं भिः, तथापि भाविन्या राष्ट्रभाषाया हिन्द्याः साहिशब्दकोषादिप्रवर्धनार्थमस्ति संस्कृतस्य तद्विदुषां च रमावश्यकता।

संस्कृतभाषाऽर्थधर्मराजसमाजेषु समस्तासु कलासु प्रचुरं साहित्यं बिभर्ति। अस्या भाषाया वेदा विश्वस्य प्राचीना ग्रन्था मन्यन्ते। उपनिषद्वेदान्तप्रतिपादिमाध्यात्मिकं ज्ञानं विश्वे सर्वोत्तमं वर्तते। वेदार्थनिपादकं कर्ममीमांसाशास्त्रमतिगहनं सुन्दरं च। भास्कराद्युपज्ञाते ज्योतिःशास्त्रे आकाशीयखेटानां तमध्ययनमस्ति। केचिद्विषयाः सन्तोऽपि वर्तमालानुपयोगिनो गहनतां याथार्थ्यं च बिभ्रति। तेषां था लोपोऽश्रेयस्करः खेदकरश्च। न सत्यपि संस्कृराष्ट्रभाषात्वे संस्कृतविश्वविद्यालये प्राचीनं विज्ञानं लब्धसंरक्षणं न विलोपमेष्यति। समयानुपयोगिनोऽपि कस्यचिदसांप्रदायिकस्य व्यापकदृष्टिं ख्यापयतो निर्दोषस्य विज्ञानस्याभावो न श्रेयस्करः।

संस्कृते तत्साहित्यमस्ति यत्समग्रविश्वं सत्यमानवतायाः पाठमध्यापयितुं पारयते। येन च सीमिततां संकीर्णतां वा समाप्य शान्तिः स्थापयितुं शक्यते। संस्कृतस्य साम्यवादः सर्वोत्कृष्टो यथार्थश्च साम्यवादः। विश्वस्मै सत्यमानवताया उपदेशं प्रदाय ऐक्यसूत्रप्रोतकृज्ज्ञानं संस्कृतदर्शने भृतमस्ति। संस्कृतसाहित्यतः सत्यविश्वनागरिकताया व्यावहारिकताया वा ज्ञानमवाप्यते। गान्धि-टाल्स्टायादयो विश्वनागरिकाः समाजसुधारकाश्च संस्कृतदर्शनतथ्यानुसरणेनैव संजाताः। विश्वशान्तिसंदेशप्रदायकैर्विश्वधर्मोपदेशकैर्दर्शनैः संयुता संस्कृतभाषाऽसाम्प्रदायिकी विश्वोपयोगिनी सामयिकी चाप्यस्ति। नापि दीयेत राजनीतावस्यै किंचित् पदम्। केवलं भारतीयदर्शनानामुच्चज्ञानावाप्तये स्यात संस्कृतसाहित्यस्य विकासः, अन्ताराष्ट्रियाश्च भारतीयदर्शनानामुच्चज्ञानं लब्ध्वा सत्यमानवतां विश्वमुपदिशेयुः, एतदर्थं न्यूनान्न्यूनं संस्कृतजन्मभुवि भारते संस्कृतविश्वविद्यालयोऽवश्यमेव स्यात्। भारतस्य केन्द्रीयशिक्षाविभागेन कुरुक्षेत्रे संस्कृतविश्वविद्यालयस्थापनयोजना यथावदुन्नेया। अयं भारतस्य विश्वस्य च कृते परमोपयोगि वस्तु!

---

स्थां तर्हि शिक्ष्यन्तां पाल्यन्तां च स्त्रियः येन ताः सा कुर्वन्त्यः सन्ततिचर्यामभिकामयेयुः अनुभवेवायुर्वेदस्यास्य परमादरणीयतामिति शम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# नियतिपौरुषयोः को बलवत्तरः

[ ले० प्रह्लाद ्न्द्रः शास्त्री, प्रभाकरः, बाँगड़ कालेज, डीडवाना (राज०) ]

[ नियतिर्याति कस्यचिदपि पुरुषस्यातिरिक्तं धन-मपहर्तुं पथि च प्रतिमुखमागच्छत् पौरुषं मिलति तत्रैव भवति परस्परमालापः ]

नियतिः—रे पौरुष, अपि कुशलं भवतः ? कुत्र प्रयासि ? किं विधातुं ते वाञ्छा ? आधुनिके समये कीदृशस्ते प्रभावः ?

पौरुषम्—अयि ! भवत्या दर्शनेन सर्वं शुभम्, किन्तु न ज्ञायते त्वया मद्गौरवं, तत्र मदीयः को दोषः ! प्रभावतो भास्करस्य सन्निधौ यदि न पश्यत्युलूकः किं तत्र सूर्यस्य दूषणम् ?

नियतिः—महाभाग, वार्ता तु शिष्टतया विधातव्या, एतावान् गर्वः कथं, किन्न जानासि मत्स्वरूपम् ? मयि विरुद्धायां विख्यातसुरपादपादपि न प्राप्नुवन्ति जना मनोवाञ्छितम, नाधिगच्छन्ति किमपि वस्तुजातं महताध्यवसायेनापि, न वाऽऽरूढा भवन्ति गौरवास्पदे। तथाहि—"कल्पवृक्षोऽप्यभव्यानां प्रायो याति पलाशताम्।"

पौ०—श्रुतं सोल्लासं त्वदात्कथनम्, कथय, कथय, अन्यदपि कथय।

नि०—किं श्रोष्यसि ! अधिगतशास्त्रार्था वागीश्वरा अपि विद्वांसो दरिद्रतया जीवनं यापयन्ति ! किं त्वं नावलोकयसि ? यत पशुसंज्ञातो मानवश्रेण्यामानयन्तः समस्तजनतां, प्रजनयन्तश्च भावनाभिर्जनसेवकान् महापुरुषान राष्ट्रनिर्मातारोऽध्यापका बहुसमयपर्यन्तं कार्यं कृत्वापि जीवननिर्वाहयोग्यामपि वृत्तिं न लभन्ते किं तत ? मद्धेतुनैवैतत।

पौ० नायं तव प्रभावः। अयं तु भारतीयार्थव्यवस्थाया दोषस्तेन कारणेन बहूनामार कर्पटिकाकवलस्याप्यभावः, देहावयवानाच्छादयितुं वस्त्राण्यपि न, वासयोग्यावासानां तु का वार्ता ? अपरत्राभ्रम्पर्शिन्योऽट्टालिका निर्मक्षिका आवृतकपाटाः सन्ति, कतिपुचिद् भवनेष्वेकद्वित्रा जना निवसन्ति हसन्ति च मानवतां देवदुर्लभं वैभवं प्राप्य।

नि०—नात्र मत्प्रतीतिः। अखिलमिदं मत्प्रसादेनैव। यद्येवं तर्हि जरामरणभयरहिता यशःशरीराः कलाविदः कवयो मत्स्तुतिं केन हेतुना विदधीरन् "भाग्यं फलति सर्वत्र न च विद्या न पौरुषम्" तथा च मत्प्रभावेण सुधाकरं सुधाकरं ग्रसति राहुर्विश्वस्मिन्नालोकविधायितमर्यमाणमपि; आधिव्याधियुतपरिवर्तनशीलसंसारे जन्मधारिणां तु का कथा ?

पौ०—सत्यमुक्तं भवता, एतत्सर्वं तेषां साध्वसाधुकृतकर्मभिर्भवति न ह दैवपर्यायवाचिकर्मणा। आधुनिका नेतारो राजकीयोच्चाधिकारिणश्च बहुमुखयोजनाभिर्भाखरानांगलादिबन्धान् विधाय तैश्च सिञ्चनविद्युदुत्पादनेन धरित्रीं सुजलां सुफलां शस्यश्यामलां विधातुमुद्यताः। अचिरगते साफल्ये नदीमातृकतां च गते राष्ट्रे तव (दैवस्य) सत्ताया लेशमात्रमपि न भविष्यति, सर्वत्र मदीयगुणानेव गास्यन्ति सर्वे।

नि०—भवतु, परं किं विस्मृतं त्वया ? "दैवायत्तं फलं पुंसामि"ति, जना उद्योगेन बहुविधान् कार्यकलापान् कर्तुं क्षमास्तत्र फलप्रदानं तु ममाधीनमेव। यदि ममेच्छा स्यात्तदा तु धनधान्यपूर्णा पृथिवी भवेदन्यथा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# स्वातन्त्र्यवीराः सावरकरमहोदयाः

( श्री काशिनाथ त्र्यम्बक शिम्प , बम्बई )

अस्माकं भारतराष्ट्रे भारतमातरम् उद्धर्तुं नैके प्रयत्नमाना महान्तः विभूतयः बभूवुः। भारतराष्ट्रस्य स्वातन्त्र्यस्थण्डिलाय स्वस्य च आप्तस्वकीयानां च जीवितसमिधः समर्प्य तत् क्रतुकुण्डं प्रज्वालयितुं यदि केन महत् कार्यं कृतं स्यात् तर्हि तत् केवलं स्वातन्त्र्यवीरसावरकरमहोदयैः एव। स्वातन्त्र्यदेवीकण्ठस्थम् आत्मनः जीवितपुष्पाणां निर्माल्यं यदि केन कृतं तर्हि तत् सावरकरमहोदयैः एव।

ते ईदृश्याम् एव अवस्थायां प्रकट भूताः यदा केवलं 'वन्दे मातरम्' इति उच्चारणम् अपि महापराधः तत्कालीनराजपुरुषाणां मतेन आसीत्। तेषां समकालीनः तीव्रमतवादिनः सौम्यमतवादिनः च नेतारः आशान्वित स्वातन्त्र्ययज्ञम् इन्धितुं प्रायतन्त। किन्तु क्रान्तेः स्फुलिङ्गान् विना भारतीयानां सुप्तमनांसि न च प्रज्वलन्ति भवितारः इति समीक्ष्य सावरकरमहोदयाः स्वक्रान्तिकारकसङ्घटनया परदास्यशृङ्खलां दूरीकर्तुं प्रयत्नान् प्रारभन्त। प्रारम्भे 'मित्रमेला'सङ्घटनायाः लघुस्वरूपेण निर्मिताः प्रयत्नाः 'अभिनवभारत'-नाम्न्यां विश्वव्यापिन्यां सङ्घटनायां रूपान्तरं भेजिरे। तेषु प्रयत्नेषु मदनलालधिङ्ग्रा-भगतसिंहादीनां सावरकरानुगानां प्राणानां हवींषि पतितानि।

तेजसा बिभ्यती नृशंससत्ता प्रकुप्य तान् सावरकरमहोदयान् बन्दीकृतवती। श्रीशिवरायाणां शिष्यत्वं प्रतिपादयन्तः ते तां मदान्धां सत्तां वञ्चयित्वा जलयानात् विश्वाख्यातम् उड्डयनं कृतवन्तः। परं दुर्दैववशात् ते गृहीताः। अनन्तरं मृत्योः अपि भीषणः पञ्चाशतः वर्षाणां कृष्णजलदण्डः तैः प्राप्तः। किन्तु यथा अचल मेरुः प्रभञ्जनेन अपि स्वस्थानात् विचलितः न

---

...जकवलत्वमिताः स्युः प्राणिनः। मदीयेङ्गितेनैव ...नानिकानि यन्त्राणि निरर्थकानि सार्थकानि च भवन्ति। ...थनमपि "करतलगतमपि नश्यति यस्य हि भवितव्यता ...ति।" अतो यावद् भूस्तावद् ममास्तित्त्वं स्थास्यति ...ले।

पौ०—भो! यातः समयः, समयेन सह परिव...ते सर्वम्। "धनिकान् प्रति दरिद्राणां हृदयेषु कोप्य...नोषो न भवे"दित्याशंक्य तेषामभिकर्तृभि(एजेन्ट)-...ं विचारधारा प्रवाहितासीज्जनसमुदायेषु यत दैवा...ना एव जनस्य सर्वावस्था भवति किन्त्विदानीं सर्वे ...ाः स्वकीयाः समस्या अध्येतुं समर्थाः कार्याकार्य...ारणे च क्षमाः। अतस्तैः सुविचारितमद्य यत् दैवस्य ...न सत्ता न, सर्वं खल्विदं कपटजालमेव।

नि०—वरं भद्र! कस्त्वया सह वाक्कलहं करोतु?

पौ—बाढम, आधार विना तर्कस्य न महत्त्वम्। एतत् सत्यं यत सर्वो जन उद्योगं कृत्वा लक्ष्मीमुपैति सुखी समृद्धिशाली च भवितुं शक्नोति। सर्वकारेणापि समाजवादरीत्या, ईदृश एव प्रयासः क्रियते यदखिललोकोऽन्नवस्त्रावासयोग्यस्थानादिकं प्राप्नुयात्। तथाहि—सत्यमुक्तं केनापि नीतिकारेण :—

'नास्त्युद्यमसमो बन्धुः यं कृत्वा नावसीदति"

साधयामो वयमधुना। त्वयापि स्वकीयः पन्था अन्वेष्टव्यः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



देव ाण्याः कृते :—

# क्रान्तिरपेक्ष्यते !!

( श्रीकलानाथशास्त्री, साहित्याचार्यः, बी० ए० )

कस्मिंश्चित्समये विश्वसाहित्यस्य जीवातुभूतायाः, जगति सर्वतः प्रथमं ज्ञानरवेरुदयङ्करण्या, विश्वस्मिन् सर्वमूर्द्धन्यसाहित्यसर्जिकायाः संस्कृतभाषाया दिनानि पुनः सकृत परिवर्तनमयन्त इति पश्यामः। महाराज-भोजस्य समयमारभ्य अद्यावधि भाषयाऽनया कति २ दुर्दिनानि न दृष्टानि, कति कत्यत्याहितानि न सोढानि, कियन्तः खलु प्रतोदा नानुभूताः ? पश्चिमदिशातः समीयुषां माहम्मदविजेतृणां गदाघाता अपि भाषाया अस्याः साहित्यवैभवं खर्वीकर्तुं नाभूवन् समर्थाः। बौद्धसम्राजां शनिदृष्टयः भाषाया अस्याः परोलक्षं ग्रन्थान् विनाश्यापि साहित्यसमुद्रं शोषयितुं नापारयन्। गुलामसम्राजां, तुर्कराजानां, मोगलशासकानां च गूढैरभिसन्धिभिर्यस्याः साहित्यं, शिल्पशास्त्रं, विज्ञानं कलाशास्त्राणि च साकूतं भ्रंशितानि, साऽद्यापि जागर्ति।

---

भवति तथा एव अनेन दण्डाशनिना सावरकरमहोदयाः स्वध्येयात् किञ्चिदपि न चेलुः। अपरं च अन्दमाने घोरकष्टानि विषह्य तत्रापि तैः स्वातन्त्र्यज्योतिः शुद्धि-कार्यज्योतिः च प्रज्वालिते।

अन्दमानात् विमुक्तेः अनन्तरम् अखण्डभारत-राष्ट्रस्य प्रतिष्ठापनाय भगीरथप्रयत्नाः यदि केन कृताः स्युः तर्हि केवलं सावरकरमहोदयैः एव। लुप्तप्राय-हिन्दुत्वाय पुनर्जीवितं यदि केन दत्तं स्यात् तर्हि तत् तैः एव। हिन्दुसङ्घटनायाम् अन्धश्रद्धया समाविष्टानां रूढीनां प्रतीपः प्रभञ्जनो यदि केन वाहितः अस्ति तर्हि सः तैः एव। राष्ट्रगौरवार्थं सुभाषचन्द्राय क्रान्तिकार्यस्य प्रेरणा यदि केन दत्ता स्यात् तर्हि सा सावरकरमहोदयैः एव। एतेषु सर्वकार्येषु ते असह्यं जनापवादं प्रत्य-घ्नन्। किन्तु 'वरं जनहितं ध्येयं न केवलजनस्तुतिः', इति ध्येयं मनसि कृत्वा तैः ते प्रत्याघाता महता धैर्येण विषोढाः। भारतीयाः तत्कथितेन मार्गेण अगमिष्यन् चेत् मातृभुवः विच्छेदनस्य घोरसमयः न उद्भविष्यत्। अस्तु।

तदनन्तरमपि अस्माकं राष्ट्रपितृणां दुःखदवधस्य समयं गृहीत्वा कैश्चित् क्षुद्रधीभिः जनैः मिथ्या कल्लोलः उत्पादितः। किन्तु जातवेदसः बहिरागतं जातरूपम् इव ते (सावरकरमहोदयाः) अस्मात् दिव्यात् सुतरां तेज-स्विनः भूत्वा बहिरागताः।

सावरकरमहोदयानां वाङ्मयसम्भारः भारतीय-वाङ्मयस्य ललामं बभूव। तेषां 'स्वातन्त्र्यसमरः' स्वात-न्त्र्यगीता बभूव। तेषां काव्यप्रतिभा महाकविप्रतिभाम् अनुवर्तते। 'हिन्दुत्व'नाम्ना प्रबन्धेन हिन्दुसङ्घटना-स्थितान् भेदान् विलाप्य एकधारिणी सङ्घटना निर्मिता।

सावरकरमहोदयैः क्रान्तिदर्शिदृशा प्रतिपादितं तत्त्वं कालान्तरेण सर्वेषाम् एव सम्मतं भवति इति अनुभवः वर्तते। अद्यापि ते एकाकिनः इव भान्ति। किन्तु 'वनराजः केसरी' अपि एकाकी न वर्तते किम् ? एतत् मनस्विनां लक्षणम् अत्र न संशयः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



राताढ्यां, यदा विश्वस्मिन् नासीत्कुत्रापि किंचि-
शिक्षाकेन्द्रं (मिश्रे ग्रीसदेशे चावर्त्तन्त इति श्रूयते,
द्यावधि प्रमाणमुपलब्धम्) तदा जगतः समस्त-
न शिक्षाध्वजमुत्तोलयन् परःसहस्रान् छात्रान्
द्यायां, अध्यात्मविज्ञानस्य, खगोलभूगोलयोः,
शास्त्राणां च पारदृश्वानो निर्मिमाणो नालन्दा-
विद्यालयो वह्निसात्कृतः। परःशतान् विदुषो विश्वस्मै
निवान् तक्षशिलाविश्वविद्यालयो भ्रंशितः, पाट-
स्य कौशाम्ब्याः, काश्मीराणां च महाविद्यालया-
कृताः। अत्रैव सर्वतः प्रथममङ्कविद्या जनिं लेभे
यं ग्रीसदेशीयैः ततो मिश्रैः ततश्च रोमनै-
ता, अध्यात्मविद्यायास्तु समुदय एव समभूदत्रैव।
समत्रैव सर्जितम्, यदा अरबदेशीयाः आयुर्वेदस्य
न् पश्यन्त एवासन् तदाऽस्माभिः सूक्ष्मेक्षिकया
विज्ञानम्, अपराणि आयुःशास्त्राणि च
नि। तानि विज्ञानानि यद्यद्यावधि नानाशयि-
, तर्हि कुत्रास्माकं स्थितिरद्याभविष्यदिति तु
टं शक्यतेऽनुमातुम्। किन्तु त एव भग्नावशेषा
पुनर्जाग्रति, पुनर्जीर्णोद्धारगोचरीक्रियन्ते इति
दृवन्तु तत्सेविनः।

प्रायः सहस्रं वर्षाणि दासताक्रान्तस्य भारतस्य
मातृभाषा भृशमाहता, जर्जरीकृता, अर्द्धमृता-
यां विनिःश्वसन्ती समभूत्। स्वतन्त्रताप्राप्तेर-
रं भूयोऽपि सुधाप्लावनं भविता, पुनरपि सा
नां जागर्त्ति च लब्धा इति प्रत्याशाऽऽसीत्। यदि
प्रयतनमकरिष्यत्, तर्हि तदेतदपि चक्षुषोर्गो-
भविष्यदेव, परन्तु शिथिलेष्वपि प्रयत्नेषु अव-
भावि तद् भविष्यत् अद्य वर्त्तमानतां लभत इति
मो वयं समग्रा अपि। अद्य भारतीयाः सर्वेऽपि
शासकाः संस्कृतं स्निह्यन्ति, श्रद्दधति, तस्मै योग्यस्थानं
प्रदातुं चेष्टन्तेऽपि। सोमनाथमन्दिरस्य पुनःस्थाप-
नाऽवसरे कृतारम्भा संस्कृतविश्वपरिषद्, यस्या अध्यक्षो
राष्ट्रपतिः डा० राजेन्द्रप्रसादः, मन्त्री चोत्तरप्रदेशीय-
राज्यपालः श्रीकन्हैयालाल मा० मुन्शी, भारतवर्षे
जागरूका। वाराणस्यां नागपुरे च तस्या द्वितीयतृती-
याधिवेशनयो राष्ट्रपतिना, क० मा० मुन्शिमहोदयेन
च संस्कृतं यथा प्रोत्साहितं स्तुतं च तद्वयं सर्वेऽपि
जानीमः। लखनऊनगरे ओरियेंटलकान्फरेंसाधिवेशने
विश्वविद्यालयानुदानायोगसदस्येन राज्यपुनर्घटनायोग-
सदस्येन श्री के. एम. पणिक्करमहाशयेन, जालन्धर-
नगरे अखिलभारतीयसंस्कृतसाहित्यसम्मेलनस्य एक-
विंशाधिवेशनावसरे लोकसभाया उपप्रवक्त्रा श्रीअन-
न्तशयनमय्यङ्गारेण, पुनस्तिरुपतिनगराञ्चले विश्वपरि-
षदश्चतुर्थाधिवेशनावसरे भारतराष्ट्रपतिना डा० राजे-
न्द्रप्रसादेन, उत्तरप्रदेशमुख्यमन्त्रिणा डा० सम्पूर्णा-
नन्देन च यथाऽस्या भाषाया महत्त्वं भारतस्य कृते
विश्वस्मिँश्च समुद्घोषितं, न तदद्य तिरोहितं विदु-
षाम्। अत्रैव खलु विद्वद्भिः "संस्कृतभाषायाः सर्वेष्वपि
विश्वविद्यालयेष्वनिवार्यमध्ययनं नियम्येते"ति यः
प्रस्तावः पारितः सोऽपि निकटे काले सुरगिरः सुम-
हान्तमादरप्रचारं पिशुनयतीति किं वा विशेषनिवेदनेन?
अतएव पुनर्युगेऽस्मिन् भारतस्यातीतगौरवभूतायाः
संस्कृतिप्राणायाः संस्कृतवाण्या अस्याः पुनर्जागर्त्तिर्लो-
केषु महान् प्रचारश्च भावी इति सर्वेऽनुमिन्वते। किन्तु
तदिदमद्य मे सुस्पष्टं निवेदनीयं यत्सर्वकारस्य मौखि-
कैरौपचारिकैश्चाश्वासनैः सुरवाण्याः स्थितौ न किंचन
परिवर्त्तनं भवेद्यदि तस्याः सेवका अध्येतारश्च अस्यां
दिशि प्रयत्नान्नानुतिष्ठेयुः। सर्वकारस्यमहता साहा-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ग्येन सह सेवकानामस्माकं सुमहान्तः प्रयत्नाः समपेक्ष्यन्ते सुरसरस्वतीसमुद्धाराय

अद्य संस्कृतशिक्षार्थिनां द्वौ भेदौ। एकस्मिन् भागे ते संस्कृतविद्वांसश्छात्राश्च समागच्छन्ति ये पुरातनपरिपाट्या संस्कृतविद्यालयेषु व्याकरणदर्शनसाहित्यादिविषयान् यथावत्पठन्ति। अपरः प्रकारस्तेषां. ये आङ्गलमहाविद्यालयेषु सहायकभाषारूपेण परस्तात् (एम. ए. आदिश्रेणिषु) मुख्यभाषारूपेण वा संस्कृतमधीयते। संस्कृतभाषायाः स्वतन्त्रभारतेऽस्मिन् या स्थितिः अधुना वर्त्तते, याश्च परिस्थितयो भविष्यति काले सम्भविष्यन्ति तासां स्थितीनां निर्माणे सुधारणे च सर्वेषामपि संस्कृतविदुषां विद्यार्थिनां च तत्साहाय्यममपेक्ष्यते येन भाषाया अस्याः सुनिर्धारितं महत्त्वपूर्णं च स्थानं भाविशिक्षापरिपाट्यां नियमितं भवेत्। संस्कृतमहाविद्यालयेषु पठतां छात्राणां द्राधिष्टं कर्त्तव्यजातमस्ति संस्कृतभाषायाः संवर्द्धने, तेषां च सेवायां मया परस्ताद् बहु निवेदनीयं, किन्तु आङ्गलमहाविद्यालयेषु संस्कृतं पठतां छात्राणां कृतेऽप्यद्य तावान् कर्त्तव्यभारः समापतितो यस्य निर्वाहः सुतरामपेक्षित इति किंचिदस्ति मे वक्तव्यं तेषां कृते।

आङ्गलमहाविद्यालयेषु पठतां विद्यार्थिनां समीपे संस्कृतभाषायाः सहैव हिन्दीभाषाया आङ्गलभाषायाश्च सहायकं ज्ञानं भवति, येन ते स्वकीयविचाराणां प्रकाशनाय अनेकेषां माध्यमानां सहायतां ग्रहीतुं शक्नुवन्ति। अद्य तेषामेव स्कन्धयोरयं भारो यत्संस्कृतभाषायाः समृद्धसाहित्यस्य महत्त्वोद्घोषणमन्यभाषामाध्यमेन सुदूरदेशेषु क्रियेत।

सवतः प्रथमं तेषामग्रे निवेदनीयमेतदेव, यत्ते केवलं परीक्षोत्तरणाय, बहुलाङ्कलाभलोभस्य च दृष्ट्या संस्कृतं न पठेयु। प्रायः आङ्गलविद्यालयेषु पठतां छात्राणामियमेव पद्धतिर्दृष्टा यद् बहुलाङ्कलाभद्वारा उच्चश्रेणि (डिवीजन) निर्माणाय संस्कृतविषयं गृहीत्वा परीक्षामुत्तरन्ति येन ते संस्कृतस्य गंभीरं ज्ञानमासादयितुं न प्रयतन्ते, अतएव अव्युत्पन्ना भवन्तीति प्राचीनसंस्कृतविदुषां प्रायोवादः। एतत्कृते न केवलं छात्रैरेव, अपितु अध्यापकैरध्यक्षैश्चापि बहु अवधातव्यं यत्संस्कृते एम. ए. परीक्षोत्तीर्णाः केवलं पाठ्यक्रमनियमितग्रन्थान् अधीत्यैव प्रमाणपत्रं न गृह्णीयुरपि साहित्यस्य किंचिद् गहनमध्ययनमपि कुर्युः। यस्य साहित्यस्य विस्तार एव तस्य महत्त्वस्य भूयःस्वयं प्रमाणभूतः तस्य विस्तृतस्य साहित्यस्य यत्किञ्चिद् अध्ययनमपि यदि नास्माभिः कृतं तर्हि किं कृतम्। कालिदासो न केवलं भारतस्यैव, अपितु विश्वस्य सर्वमूर्धन्यो महाकविर्नाटककारश्चेति भूयानद्य समुद्घोषः। सत्यमेवेदम्। कुमारसंभवस्य, रघुवंशस्य, मेघदूतस्य, चामरः प्रणेता, शाकुन्तलस्य विश्वमूर्धन्यः स्रष्टा कालिदासः संस्कृतभाषायाः सर्वप्रथमं गर्वभाजनम्, किन्तु तस्यैव सर्वेषां ग्रन्थानामध्ययनं नाद्याऽस्माभिः क्रियते इति सलज्जं निवेदनीयमेव भवति। रघुवंशस्य त्रयोदशं सर्गम् कुमारसंभवस्य पंचमं, मेघदूतस्य पूर्वार्द्धं च पठित्वा वयं परीक्षामुत्तरामः, काव्यानामेषां का विशेषता इतरसर्गेष्विति कदापि द्रष्टुमस्माकमिच्छा न भवति। विक्रमोर्वशीयऋतुसंहारादीनां तु कथैव का। अस्याः प्रणाल्याः परिहारोऽस्माकं सर्वप्रथमं कर्त्तव्यम्।

प्रसङ्गागतमिदमपि निवेदनीयं यदाश्चर्यस्य विषयः स्त्वयं यद् भारतात्कालिदासस्य प्रामाणिकी ग्रन्थावलिर्नाद्यापि प्रकाशिता। आङ्गलनाटककारस्य शेक्सपीयरस्य विषये यदा परःसहस्रं ग्रन्था लभ्यन्ते, तस्य व्याकरणं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



शब्दसूची इत्यादि बहु साहित्यं तस्योपरि निर्मितं, महाकवेर्नाटककारस्य च कालिदासस्य ग्रन्थावलिरेव यते, शब्दसूच्याः अथवा व्याकरणस्य तु का ?

र्षस्य विषयो यत् संयुक्तराष्ट्रसंघस्य शिक्षाविज्ञान-तिसंस्थाया (UNESCO) भारतीयशाखा भारते, या अस्या अधिवेशनोपलक्ष्ये प्रामाणिकीमेकां दासग्रन्थावलिं प्रकाशयितुं बद्धपरिकरा। इतो तीयाकाशवाणी (ऑल इण्डिया रेडियो) अपि दासजयन्त्यादीनामायोजनेन विश्वकवेरस्य स्मृतिं गरूकां विधातुं चेष्टते। श्रूयते यदहमदाबादनि-ना प्रो० सहगलमहाशयेन कालिदासस्य शब्दसूची परिश्रमेण निर्मिता। एवंविधाः प्रयत्नाः स्वागतार्हाः।

तात्पर्यमिदमेव यदधुना संस्कृतसाहित्यस्य गहनं र्णं ज्ञानं, समालोचनं चास्माकमावश्यकम्, स्य चिरविस्मृतानां भानुकवि-वेङ्कटाध्वरि-नां कवीनां पुनः प्रचारश्चापेक्षितः।

तेन सहैव संस्कृतछात्रैर्भारतव्यापि भ्रातृत्वान्दो-कं प्रचारणीयं सुमहदपेक्ष्यते। अद्य संस्कृतमेकं भाषा यस्याः स्वरूपम्, उच्चारणसरणिः, णं च विश्वस्य सर्वेषु देशेषु समानम्। काश्मी-संस्कृताध्यापकस्तामेव भाषां भाषते यां भाषां रस्य संस्कृतपण्डितो वदति। पाणिनीयव्या-य तदिदं श्रेयः। अतएव न केवलं भारतीयाना-अपि तु विदेशीयानामपि संस्कृतज्ञानामेकसूत्रतायाः नाय सेयं भाषा शृङ्खलाभूता। सर्वेऽपि वयं ज्ञाः, एकभाषाज्ञत्वाद् भ्रातरः। संस्कृतभाषाऽस्माकं यत्र कुत्रापि वयं गच्छामस्तत्र यः कश्चनाऽपि संस्कृतज्ञः, सोऽस्माकं सहोदरः। इदं तु निश्चितं यदस्मिन् कालेऽपि संस्कृतस्य तावान् विश्वजनीनः प्रचारः यत्प्रत्येके प्रान्ते, प्रत्येके देशे, प्रत्येके नगरे च संस्कृतज्ञा अवश्यमेव लभ्येरन्, कामं भवेयुस्तेऽल्पसंख्यकाः सोऽयं सुरगिरो विश्वजनीनस्य समादरस्य संकेतः। ततश्चास्माकं संस्कृतज्ञानां सुसंघटनाय, विश्वव्यापिने प्रचाराय चास्माभिः प्रत्येकेन संस्कृतज्ञेन सह सख्यं स्थापनीयं स्यात्। इदमस्माकं विश्वजनीनं भ्रातृत्वं यदाङ्गलदेशे, जर्मन्यां, रशायां, अमरीकायां, फ्रांसस्पेनादिषु सर्वेष्वेव देशेषु अस्माकं परिचिता भ्रातरश्च सन्ति। संस्कृतभाषाया ज्ञानं महतो गौरवस्य परिणतिः। य एवैमां भाषां वेद, स विश्वस्मिन् सर्वमूर्धन्यां भाषां जानाति, सर्वमूर्धन्यस्य साहित्यस्य परिचित इत्येवं गौरवबुद्धिः संस्कृतज्ञेषु च स्थापनीया स्यात्।

यदि वयं भारतस्य विभिन्नप्रान्तेषु गच्छेम, तत्र विश्वविद्यालये संस्कृतविद्यार्थिभिः सह निश्चितमेव संगच्छेमहि, संस्कृताध्यापकान् पश्येम इत्यावश्यकम्। इतश्च यः कोऽपि परप्रान्तीयः संस्कृतविद्वान् छात्रो वा समागच्छेत् तेन वयं कुटुम्बिवत् व्यवहरेम इत्यप्यावश्यकत्वेनाऽऽपतितम्। हर्षेण सूचयितव्यं भवति यद्विश्वसंस्कृतपरिषदा भारतस्य सर्वेषु प्रान्तेषु प्रत्येकं शिक्षासंस्थानां, विद्यालयानां [कालेजानां] च समीपे विशेषपरिपत्रकाणि प्रेषितानि येषु संस्कृतोन्नत्यै संस्कृते वादविवादप्रतियोगितानां, निबन्धप्रतियोगितानाम्, अतिरिक्तव्याख्यानानां (Extension Lectures), संस्कृतच्छात्रवृत्तीनां, संस्कृतनाटकाभिनयानां च समायोजनानि कृत्वा भारतीयाया मूलभाषाया अस्याः प्रोत्साहनं ते कुर्युरिति सानुरोधं समन्त्रितम्। आङ्गलविद्यालयस्य विद्यार्थिभिः प्रत्येकविद्यालये संस्कृतसेवापरिषदा-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



दीनां संस्थापनेन तद्द्वारा तादृशानामायोजनानां कृते सर्वकारीयं साहाय्यमपि लब्धुं सुशकम्। अद्य सर्वकारस्य कोऽपि अधिकारी संस्कृतच्छात्रान् तेषां प्रार्थनाश्चोपेक्षितुं न कदापि शक्नोति। तथा सति न केवलं स संस्कृतिद्वेषीति निन्दनीय एवाऽपितु देशस्य विरोधीति दण्ड्योऽपि। भारतस्य राष्ट्रपतेः, उपराष्ट्रपतेः प्रतिरक्षामन्त्रिणः काटजोः, वित्तमन्त्रिणः श्रीदेशमुखस्य, उत्तरदेशराज्यपालस्य कन्हैयालालमुंशिनः, राजगोपालाचार्यस्य, अन्येषां च देशनेतॄणां संस्कृतगिरो मुक्तकण्ठं प्रशंसनेन यदि अन्यत् किञ्चिन्न साधितं तर्हि तदिदं तु निश्चितमेवोपकृतं यद्देशस्य प्रत्येकजनः संस्कृतभाषां, तज्ज्ञांश्च समादरदृष्ट्या पश्यति। गतकतिपयवर्षपूर्वं ये संस्कृतज्ञाः पण्डिताश्चोपहासपात्राण्यभूवन्, तेऽद्य समाजे प्रतिष्ठादृष्ट्या व्यवह्रियन्ते। संस्कृत-विदुषामियं प्रतिष्ठा चिरन्तनी सम्पद्येतेत्येतदर्थं प्रयतनीयमस्माभिः।

सर्वतोऽधिकं महत्त्वपूर्णं तदिदमस्माकं कर्त्तव्यं यत्संस्कृतभाषायां नवसाहित्यसृष्टिः नवीनसाहित्यसमादरश्च प्रसारणीयः। प्राचीनानां जरतां संस्कृतपण्डितानां केवलमतीतसाहित्ये एव गौरवदृष्टिर्न समुन्नतिसूचिकेति सुस्पष्टं ब्रवीमि। समाजस्य, युगस्य च परिस्थितीनामनुकूलां साहित्यसृष्टिं या भाषा समुपेक्षते साऽचिरादेव रसातलं प्रविशतीति विश्वस्यानुभवः। प्राचीनतायाः प्रपञ्चेनैव लैटनभाषा मृताऽभूदिति विदुषामुक्तिः। संस्कृतमपि यदि पाणिनिकात्यायनशाकटायनान्नंभट्टादीनां प्रमीतानां विदुषां रचनाः, माथुरीपंचलक्षणीखण्डनखण्डखाद्य--मनोरमाशब्दरत्नादीन् ग्रन्थांश्चान्तरा न किमपि नवं साहित्यं प्रसारयितुमीहते तदा तस्या अनुदिनं विरलप्रचारत्वं निश्चप्रचम्। अद्य यदि संस्कृतभाषाया अन्यभाषाभिः सह, संस्कृतकवीनामन्यदेशीयकविभिः सह, संस्कृतदर्शनानामन्यदेशीयदर्शनैश्च सह तुलनात्मकं विवेचनम्; अभिनव-मानवतासिद्धान्तानां साहित्यम्; नवरुचिपरिष्कृता कविता च संस्कृतभाषायाः पत्रिकासु पृथक् प्रकाशनालयेषु च प्रकाशिता स्यात्-तदैव जनजीवनस्य निकटेन सम्पर्केण भाषाया अस्या अनुदिनं प्रवृद्धिः प्रसारश्च भवेत्। तदिदं कर्त्तव्यं पुरातनपरिपाटीरटनपटूनां पण्डितंमन्यानां, न्यायव्याकरणादिघोषण-मनुस्मृतिमहाभारतादिपाठान् विहाय, सामयिकपरिस्थितेः, सामयिकभाषायाश्चाऽणुमात्रमपि ज्ञानमनुपार्जितवतां छात्राणां चापेक्षया नवसभ्यानां नवसमाजानुभववतां च तादृशानामेव विद्यार्थिनां कर्तव्यत्वेनाऽधिकमायाति येषां कृते तदिदं निवेदनं मया प्रस्तूयते। ते नवीनसंस्कृतमासिकपत्राणां समुपादानं तेषु नवीनसंस्कृतसाहित्यसृष्टिं चाग्रेसरीभूय कर्तुमारभेरन्।

सर्वेषां च संस्कृतज्ञानामेका वाणी—"विरोधम्, ईर्ष्यां, काटवम्, निन्दां, खण्डनानि, पुरातनव्यतिकरं पाखण्डप्रपंचं च विहाय "सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्" इति मधुमिश्रं सन्देशं श्रावयेत्; अतीते परःशतवर्षात्मके काले विरलीभूताया देववाण्या महत्त्वोद्घोषेण सह संस्कृतजगति नवीना क्रान्तिः प्रस्तूयेत। एतदर्थमस्माभिः सङ्घटितः प्रयत्नो विधेयः। सर्वैरपि संस्कृतजनन्याः कृते स्वार्थं परिहृत्य कायेन, मनसा, वाचा, सर्वात्मना प्रयत्येत, छात्राश्चेमं क्रान्तिध्वजं सर्वतोऽग्रे समुद्धुन्वन्तु—देववाण्या विश्वजनीनो विजयघोषो दिग्दिगन्तमुद्भिद्य गगनाङ्गणे विजृम्भताम्; भूतभावनो भगवान् साहाय्यमस्माकमाचरेदित्येव मदीयाऽऽशंसा। इदमेव मदीयमावेदनम्।

—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



बालभारती—

# भाग्यं पुरुषार्थश्च

( ले० विद्याभूषणः पं० गणेशरामशर्मा, साहित्यरत्नम्, झालावाड )

एकदा कस्यचित् नृपस्य सभायां भाग्यपुरुषार्थयोः विवादः प्रचलितः तत्र एकः जनः भाग्यं बहु प्राशंसत्, अन्यः पुरुषार्थं अतीव अश्लाघत। नरेशः तयोः द्वयोः विवादं श्रुत्वा न्यायं कर्तुं एकं उपायं अकरोत्। सः तौ द्वौ अपि विवदमानौ पुरुषौ कारागारस्य एकस्मिन् अन्धकारमये कोष्ठे अक्षिपत्।

तत्र कारागारस्य अन्धकोष्ठे तौ द्वौ अपि विवदमानौ कंचित् कालं अतिष्ठताम्। एवं क्रमशः रात्रिः अभवत्। तौ अचिन्तयताम्—'आवां अद्य विवादं कृत्वा अकारणमेव नृपं अकोपयाव।' एवं पश्चात्तापं कुर्वाणौ तौ रात्र्याः प्रथमं प्रहरं तु येनकेनप्रकारेण व्यत्यवाहयताम्। भाग्यवादी तु 'यद्भाव्यं तद्भविष्यति!' इति उक्त्वा तत्रैव प्रकोष्ठे भूमौ एव अस्वपत्। सः निद्रासुखं अनुभवितुं आरभत।

ततः पुरुषार्थवादी अचिन्तयत्—'केवलं भाग्यस्य आश्रयात् अस्मात् अन्धकोष्ठात् कथं नाम मोक्षः भवेत्? तत् मया पुरुषार्थं अवलम्ब्य कोऽपि उपायः कर्तव्यः! कर्मप्रधाने अस्मिन् संसारे यः स्वयमेव आत्मनः उन्नतये मुक्तये वा उपायं न करोति, ईश्वरः अपि तं अलसं, कातरं, निर्बलं, अकर्मण्यं च मत्वा तस्य सहायतां न करोति। तस्मात् मया अत्र कारागारेऽपि किमपि उपायान्तरं अवश्यमेव कर्तव्यम्।" एवं विचिन्त्य सः तत्रैव अन्धकारमये कोष्ठे स्वस्य हस्तौ प्रसार्य अन्वेषणं कर्तुं तत्परः अभवत्। एवं अन्वेषयन् सः तत्र कोष्ठस्य भित्तौ नागदन्ते (खूंटी पर) अवलम्बमानं एकं तैलेन पूरितं वर्तिकया युक्तं दीपपात्रं तत्समीपमेव स्थितां एकां दीपशलाकानां पेटिकां च अलभत। दीपशलाकां एकां प्रज्वाल्य स तं दीपकं प्राज्वालयत्। दीपकस्य प्रकाशेन स यावत् पश्यति तावत् तत्र एकस्मिन् कोणे निर्मलेन सुपेयेन च जलेन भरितं एकं कुम्भं तस्य उपरि स्थापितं एकं जलपानाय योग्यं जलपात्रं च अपश्यत्। पुनः तत्र अन्यस्मिन् कोणे सुरक्षितया रीत्या स्थापितं घृतगुडपिष्टैः मिश्रितं एकं महान्तं मोदकं च दृष्टवान्। अपरत्र एकस्मिन् कोणे शयनयोग्यानि आस्तरणानि वस्त्राणि च अपश्यत्। अन्यत्र कोणे च स्थापितानि सुन्दराणि सुगन्धीनि पुष्पाणि तथा ताम्बूलवीटिकाः पुस्तकानि च प्राप्नोत्।

एव सर्वाणि तानि वस्तूनि लब्ध्वा सः बहु प्रसन्नः अभवत्। भाग्यैकशरणं शयानं निद्रावशं गतं तं स्वप्रतिवादिनं तत्क्षणं जागरयित्वा स अवदत्—'अहो! महिमा पुरुषार्थस्य!!' त्वं तु भाग्यवादी कमपि पुरुषोचितं उद्योगं उपायं वा अकृत्वा भाग्यमेव सर्वं मत्वा प्रसुप्तः। परं तु मया अत्र पुरुषार्थं आलम्ब्य किमपि प्रयतितम्! फलतः अयं दीपकः, अयं जलघटः, इमानि आस्तरणानि वस्त्राणि, पुष्पाणि, ताम्बूलानि मया अत्र प्राप्तानि! तत त्वं इदानीं आलस्यं प्रमादं च त्यक्त्वा उत्तिष्ठ, आवां इमं मोदकं भुक्त्वा क्षुधां निवारयाव। भोजनान्तरं च ताम्बूलानि चर्वयित्वा, पुष्पाणि आघ्राय, आस्तरणानि प्रसार्य, ससुखं शयावहै। पुस्तकानि चापि वाचयाव। एवं सुखेन रात्रिर्गमिष्यति।" इति।

एतत् श्रुत्वा भाग्यवादी अकथयत्—'साधु, साधु! बहु पराक्रान्तं त्वया! प्रशंसनीयोऽयं ते उत्साहः

न



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



आयुष्मतः !' एवम् उक्त्वा तौ प्रसन्नेन मनसा तं मोदकं अभक्षयताम्। ततः यथारुचि जलपानं कृत्वा ताम्बूल-वीटिकाश्च अचवयताम्। शयनीये आस्तीर्य तौ सानन्दं स्थितौ पुष्पाणि आघ्राय यथेच्छं पुस्तकानि च पठित्वा शांतिपूर्वकं अस्वपताम्।

प्रातः नृपस्य आज्ञया राजसेवकैः तस्य कोष्ठस्य द्वारं उद्घाट्य तौ द्वौ अपि बहिः निष्कास्य राजसभायां नृपस्य पुरतः उपस्थापितौ। तौ दृष्ट्वा नरेशः अपृच्छत्—"किं युवयोः विवादस्य निर्णयः जातः न वा ?' इति। तत् श्रुत्वा गर्वेण पुरुषार्थवादी अवदत्:—'राजन् ! निर्णयः जातः। पुरुषार्थस्य एव विजयः अभूत्। यतः मया तत्र कारागारस्य कोष्ठे पुरुषार्थं अवलम्ब्य प्रयत्नः कृतः। परिणामतः दीपकं, मोदकं, जलपात्रं, आस्तरणानि, ताम्बूलानि, पुष्पाणि च प्राप्य आवां द्वौ अपि क्षुधानिवृत्तिं अकरवाव। सुखेन अस्वपाव। यदि अहं पुरुषार्थं अवलम्ब्य कमपि उद्योगं न अकरिष्यं तदा अयं भाग्यवादीव अहमपि च आलस्यात् क्षुधातुरः एव अस्वप्स्यम्।" इति।

पुरुषार्थपरस्य तानि वचनानि श्रुत्वा नृपः तं भाग्यवादिनं अपृच्छत्—'भो भाग्यवादिन्। त्वं किं कथयसि ?' तदा सः अभाषत—"राजन् ! अहं तु मन्ये, भाग्यस्य एव विजयः अभवत्। यतः अहं तु भाग्यं एव सर्वत्र फलति इति सत्यं मन्यमानः "यद् भावि न तद्भावि भाविचेन्न तदन्यथा" इति निश्चिन्तः भूत्वा तत्र कारागारस्य अन्धकारमये कोष्ठे अशये, सुखेन निद्रायाः समाधि-सुखं च अन्वभवम्। रात्र्याः प्रथमे प्रहरे व्यतीते अयं पुरुषार्थवादी महाशयः मां अजागरयत। प्रबुद्धः अहं ज्वलितस्य दीपकस्य प्रकाशे सर्वां स्थितिं स्पष्टं अबुध्यम्। पुनरयं भाग्यवादिने मह्यं मोदकं, जलं, ताम्बूलं, पुष्पाणि, शय्यां च प्रददौ। अयं तु मे भाग्यस्य एव चमत्कारः यत् परिश्रमस्तु अनेन कृतः परं मया तु श्रमं विनैव सर्वं अन्नपानादि राजसिकं सुखं अनायासं प्राप्तम्। अपरं पुनः भोजनं कुर्वता मया मोदकमध्ये निहितं एतत् दीनारं (स्वर्णमुद्रा) प्राप्तम्।" एवम् उक्त्वा सः भाग्यभक्तः नृपस्य अग्रे दीनारं दर्शितवान्। एतत् सर्वं दृष्ट्वा पुरुषार्थवादी चकितः विस्मितश्च अभवत्। तदा नृपः अब्रवीत्—"युवां द्वौ अपि स्वविश्वासानुसारं विजयिनौ स्थः। अनेन पुरुषार्थवादिना उद्योगात् सुखं लब्धम्। भाग्यवादिना त्वया च भाग्यात् एव परिश्रमं विनैव स्वतः एव सिद्धं सर्वं सुखं प्राप्तम्। अतः अधुना अहं निर्णयामि यत् भाग्यवान् भाग्येन तथा च पुरुषार्थवान् पौरुषेण संसारे स्वमनोरथं साध्नोति। वस्तुतः भाग्यं पुरुषार्थश्च द्वौ अपि जीवने अस्माकं आवश्यकौ भवतः। तदेव उक्तम्।

"यथा चैकेन चक्रेण न रथस्य गतिर्भवेत्।
तथा पुरुषकारेण विना भाग्यं न सिद्ध्यति॥१॥"



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भगवतो बुद्धस्य चरित्रम्

[ शिवदत्तशर्मा चतुर्वेदः, जयपुरम् ]

साम्प्रतं वयं भारते परिव्याप्तां यां संस्कृतिमवलोकयामः नूनं तस्याः निर्माणे भगवतो बुद्धस्यास्ति महत्त्वपूर्णं स्थानम् । ईसातः शतकचतुष्टयपूर्वसमयं भगवान् गौतमः उत्तरभारते नेपालप्रदेशस्याधस्तात् कपिलवस्तुनामानं जनपदं स्वकीयेन जन्मना सनाथीकृतवान् । अस्य पितुः शुद्धोदन इति नाम मातुश्च मायादेवी इति । पितुर्नासीदेतदतिरिक्ता काऽपि सन्ततिरिति स गाढ़ेन प्रेम्णा अस्य पालनपोषणं चकार । सर्वविधसुखानां मध्ये परिवर्धितोऽप्ययं बाल्यात्प्रभृत्येव वीतरागः परदुःखकातरः एकान्तचिन्तकश्चासीत् । भविष्यवक्तृभिः प्रथममेव राजा प्रतिबोधित आसीत् यदयं बालः समस्तसंसारस्य कृते एकः अद्वितीयः वैराग्योपदेष्टा धर्मोपदेष्टा च भविष्यति । परं राज्ञः एतदभिमतं नासीत् अतः राजा शुद्धोदनः स्वसुतं नानाभोगविलासपाशेषु आबद्धुं नैकान् यत्नाननुष्ठितवान् । फलं तु विपरीतमेवाऽवलोक्यते स्म । अथावसरे प्राप्ते यशोधरानाम्न्या एकया रूपलावण्याब्धिभूतया शीलसम्पन्नया नवयुवत्या सह राजकुमारस्य पाणिग्रहणं समपद्यत । सांसारिकाणां पुरुषाणां कृते स्त्रीनामा एकोऽयं संमोहकः मंत्रः, उक्तं च 'कंदर्पदर्प-दलने विरला मनुष्याः' इति । परमत्र बुद्धविषये तु कंदर्पस्याशुगोऽपि निरर्थकप्राय एवासीत् । स मनागपि नासीदासक्तः अस्मिन् विषये । तस्य वैराग्यप्रवृत्तिरनुदिवसं परिवर्धमानैवावलोक्यते स्म सर्वैः । अनन्तरं किं जातमिति जानन्त्येव सर्वे । तस्य गृहत्यागः 'महाभिनिष्क्रमण' इति नाम्ना लोके ख्यातिमाजगाम । स कस्याऽप्यनिर्वचनीयस्यान्तरस्य ज्योतिषोऽन्वेषणे बद्धपरिकर आसीत । इममेवोपायं स्वात्मबोधाख्यं स संसारक्लेशोद्धाराय निश्चिकाय । अस्यैव चार्थे अनेकवर्षपर्यन्तं स तपस्तपन नानाविधानि कष्टान्यङ्गीकृतवान् । एकाप्या शरीर-पीडन-रूपा प्राचीना काचन परिपाटी आत्मोपलब्धि-साधनरूपिणी प्रचलिता आसीत प्रथमं स तस्या एव पथिकः समजायत । अत्र तस्य चत्वारः सहचरा अप्यासन् । परन्तु अत्यन्तं कष्टं सोढ्वापि यदा काऽपि फलोन्मुखता नानुभवगोचरा जाता तदा स इमं मार्गं मिथ्येति मत्वा तत्याज । अपरं मध्यममार्गं च समाश्रित्य तपस्तेपे । अन्ततः तेनैव मार्गेण स ज्ञानाधिगमे साफल्यमलभत । तेन करतलामलकवदवलोकितानि समस्तानि पूर्वजन्मानि । जन्मनः साफल्यं कुत्र प्रतिष्ठितं वर्तते इत्यपि तेन प्रत्यक्षीकृतम् ।

तेन काशीतः समारभ्य समस्तेऽपि भारते परिभ्रमणं कृतम् । तस्य जीवनं लोकमङ्गलायैवासीत । अचिरेणैव समस्तेऽपि भारते परिव्याप्तमासीत्तस्य यशःसौरभम् । तदानीं भारतवर्षे एकतन्त्राणि गणतन्त्राणि राज्यानि आसन् । तस्य स्वकीयस्य पितुः राज्यमपि गणतन्त्रात्मकम् एवासीत । तेषु सर्वेष्वपि राज्येषु सत्वरमेव भगवतो बुद्धस्य प्रभावः प्राचीयत । समस्ता अपि राजानः सादरं बुद्धस्याज्ञां शिरसि धारयन्ति स्म । अनेन रूपेण शक्यतेऽनुमातुं यन्नासीत् स केवलं धर्मोपदेष्टा परं तात्कालिकायां राजनीतावपि तस्य पूर्णः प्रभाव आसीत् । किमन्यत् बहवो राजानः तस्मै स्वानि राज्यानि समर्पयितुमपि समुत्सुका आसन् । परं येन



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सर्वैश्वर्यपरिपूर्णं स्वकीयस्य पितुः राज्यं परित्यक्त कथं स अन्यस्मिन् राज्यबन्धने बद्धुं शक्यः स्यात्।

स्वकीयेषु उपदेशेषु स धर्मतत्त्वान्युद्घाटितवान्, समाजनिर्माणमुपादिदेश, दुःखकारणान्युपशमयितुं संदिदेश। तस्य सिद्धान्तानुसारेण अस्मिन् जगति दुःख-व्यतिरिक्तं किमपि नास्ति सर्वत्रापि दुःखमेव परिव्याप्तं दृश्यते। एतदेव तस्य "दुःखं दुःखम्" इत्यादि सूत्रेण प्रकटीभवति। तस्य सिद्धान्तेषु आध्यात्मिकतायाः प्रभावप्रचुरं परिलक्ष्यते। धर्मप्राणं हि भारतमस्म-दीयम्। धर्मस्तु आध्यात्मतायामेव प्रतिष्ठितः। यदि आध्यात्मिकतायाः निराकरणं क्रियते कुतस्तदा धर्म-स्थितिरप्यवगन्तुं शक्यते। तस्मादेव महान् धर्मप्रचारको भगवान् बुद्धः सर्वतः पूर्वं आध्यात्मिकतायाः उपरि दृढां श्रद्धां बद्धुं लोकानादिदेश। तेन प्रचोदिताः शिष्याः सर्वत्राऽपि देशे पर्यटनं कृत्वा तत्सिद्धान्तानां प्रचुरं प्रचारं कृतवन्तः। न केवलं भारते वर्षे अपितु संसारस्य इतरेषु देशेष्वपि तज्जीवनकाल एव तस्य वरदानोपमा वाणी परिव्याप्ता आसीत्। अनन्तरं च सम्राडशोकस्य समये तु अधिकांशे संसारे बौद्धधर्मस्य प्रभावः विजृम्भमाण आसीत्। अद्यत्वेऽपि संसारस्य बहुषु देशेषु बौद्धधर्मस्य पर्याप्तः प्रभावो वर्तते।

यद्यपि भारतीयवैदिकसिद्धान्तेन सह तस्य विरोधं आमनन्ति इतिहासविदः, पर नैतत्समीचीनम्। आक्षेपवादानपाकृत्य यदि वयं भगवतो बुद्धस्य वचना-न्यनुशीलयामः तर्हि सोऽयं सिद्धान्तः स्फुटमवगम्यते यत् वेदेषु, आरण्यकेषु, ब्राह्मणेषु उपनिषत्सु च ये सिद्धान्ताः खचिताः सन्ति त एव भगवतो बुद्धस्यापि सिद्धान्ताः सन्ति। किमपि नवीनं तत्र नानुभूयते। परं यन्नूतनत्वं तत्र तत्त्विदं यत् स प्रत्येकस्यापि सिद्धान्तस्य व्यावहारिकदृष्ट्या व्याख्यानं कृतवान्। तस्य आचरणे यदासीत् तदेव तस्योपदेशेष्वपि दृश्यते। वैराग्यपरोप-कारादीनां स केवलमुपदेशे एव प्रयोगं न करोति स्म अपितु तस्य जीवनमपि एभिः सर्वैः परिपूर्णं परमपवित्रं चासीत्।

भगवान् बुद्धः समाजसुधारकोऽप्यासीत्। तदानीं-तने समाजे यास्त्रुटयस्तेनावलोकिताः स निर्भयरूपेण तासां प्रखरसमालोचनाग्नौ दाहं कृतवान्। तस्मिन् समये वैदिकं कर्मकाण्डं आडम्बरपूर्णं स्वरूपमलभत। यज्ञेषु पशुबलिदानस्य परिपाटी प्रवृद्धिं गताऽऽसीत्। पशुबलिमन्तरा यज्ञस्य साङ्गतासिद्धिरेव न जायते स्म। तामेतां दूषितां परिपाटीं मोक्षदायिकामुद्घोषयतां जनानां विचारस्य स्वकीयेन प्रखरतरेण युक्तिकौशलेन खण्डनमकरोत् भगवान् बुद्धः। तेन स्पष्टीकृतं यत् एते नानानिकृष्टकर्मयुक्ताः यज्ञाः कथमपि मोक्षदायका भवितुं न शक्नुवन्ति प्रत्युत एतेषामनुष्ठाने न आवागमनबन्धने भृशं निगडितो भवति मानवः। एतादृशैरुपदेशैश्च जनतायाः श्रद्धा विलुप्ता जाता। यज्ञेषु पशुबलेरच उपशमः प्राजायत। तस्य ज्ञानशक्तिरत्यन्तं प्रवृद्धा आसीत्।

सिद्धीनामपि स आकर एवासीत्। ईश्वरभावः यत्र प्रादुर्भूतो भवति सिद्धयस्तु तत्र प्रणतिपुरस्सर-मागच्छन्त्येव। अङ्गुलिमालनाम्नः प्रसिद्धस्य दस्योः नायासेनैव तेन पराभवः कृतः। देवदत्ताख्यः तस्य प्रतिद्वन्द्वी य आसीत् तस्य क्षमाशक्त्या स्वत एव पराभवो जातः एवं ये विरोधिनः आसन् ते सर्वे तस्या-द्भुतस्य तेजसः सम्मुखे सत्वरमेवास्तं प्रयाताः। तस्य केनाऽपि सह शत्रुता नासीत्। विश्वबन्धुत्वस्य पदे पदे दर्शनं जायते स्म तस्य चरित्रे। इदमेव कारणं यत्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# * सम्पादकीयम् *

## अखिलभारतीय–संस्कृतसाहित्यसम्मेलनस्य

त्रयोत्रिंशाधिवेशनम्—जूनमासस्य गत २-३-४ तारिकासु मोहमयीनगरे संस्कृतसाहित्यसम्मेलनस्य त्रयोविंशमधिवेशनं सफलतया सम्पूर्त्तिमगमत। सम्मेलनेऽस्मिन् उपद्विसहस्रं प्रतिनिधियो देशस्य औदीच्य-दाक्षिणात्यभागयोः उपस्थिता आसन्। सम्मेलनस्योद्घाटनं मोहमयीप्रदेशस्य राज्यपालः श्रीहरेकृष्णमेहतावमहोदयः सम्पादयामास। अधिवेशनस्याध्यक्षपदं माननीयाः वयोवृद्धाः श्रीगोवर्द्धनपीठाधीश्वराः पुरी-शङ्कराचार्याः श्रीभारतीकृष्णतीर्थमहाभागा अलमकुर्वन्। २ जूनतारिकायां त्रिवादनसमये वैदिकानां मङ्गलावतरणेन सहैव सम्मेलनकार्याणां शुभारंभोऽभूत्। श्रीशङ्कराचार्याणां श्रीराज्यपालमहाभागानां च सम्मेलनमण्डपे शुभागमनेन साकमेव मोहमय्याः कलेक्टरमहाभागः श्रीनाडकर्णीमहोदयः परिचयभाषणं प्रादात्। महाशयेनानेनोक्तं यदस्माकं राज्यपालमहाभागो न केवलं कतिपयविश्वविद्यालयानां भूतपूर्वो वर्त्तमानश्च कुलपतिः, अपितु संस्कृतं स्निह्यत्यपि। अद्य भूयसा काठिन्येन समायोजितस्य सम्मेलनस्य, यस्मिन् सार्द्धसहस्रजनाः प्रतिनिधित्वेन सम्मिलिताः, राज्यपालमहाभागः उद्घाटनं विदधातीति हर्षास्पदम्।

ततो मोहमयीराज्यपालः श्रीहरेकृष्णमेहतावमहाभागः स्वकीयमुद्घाटनभाषणमदात्। अनेनोक्तं यत् संस्कृतभाषा भारतीयजीवनविकासस्य कृते आवश्यकी। संस्कृते न केवलं धार्मिकम् अथवा सांस्कृतिकं साहित्यं लभ्यते अपितु राजनीतिकमपि साहित्यमत्र भूयस्तरामस्ति-चाणक्यो राजनीतेरेकतमो लेखकः। पञ्चतन्त्रम्, महाभारतस्य शान्तिपर्व, मुद्राराक्षसनाटकादयश्च राजनीतिरेव तु। एतस्य पुरातनराजनीतिज्ञानस्य कृते संस्कृतभाषायाः प्रसारः सर्वथाऽऽकाङ्क्षणीयः। एतस्या विश्वविद्यालयेष्वनिवार्यतायै, राष्ट्रभाषात्वाय चापि प्रयत्न आवश्यकः। किन्तु एतस्या भाषाया व्याकरणं सरलीक्रियेत इत्यस्यावश्यकताऽस्ति। भाषेयं सभ्यसमाजेऽद्यापि पठितुं भाषितुमवबोद्धुं च शक्यते। इयं पूर्वं काश्यां चिररात्राय व्यवहारभाषाऽभूत्। इयं पण्डितैर्वृथैव कठिनीक्रियते। अद्यापि सरला संस्कृतभाषा वक्तु बोद्धुं च पार्यते। अहं यद्यपि संस्कृतं वक्तुं न शक्नोमि तथापि बोद्धुं सम्यक् शक्नोमि। नेहरूमहोदयोऽपि मुद्राराक्षसनाटकदर्शने महान् उत्सु

---

...मस्तेऽपि संसारे तद्विचाराणां सम्मानमजायत। ...त्यादिभेदानामपि तद्विचारे कोऽपि संकोचः नासीत्। ...ऽपि अवरजातौ समुत्पन्नः पुरुषः स्वकीयामुन्नतिं सम्पादयितुं न शक्नोति-इति स नानुमनुते स्म। ...न्मतावलम्बिनां कृते सर्वाणि द्वाराण्युद्घाटिता न्यासन्।

एवं परिशीलनेन ज्ञायते यदसंशयं भगवान् बुद्धः अस्माकं भारतस्य महती विभूतिरासीत्। अद्यापि तस्य नाम्ना विश्वस्य सम्मुखे उन्नतं भवति भारतस्य शिरः। संसारस्य इतरदेशेष्वद्यापि तन्मतावलम्बिनां संख्या गरीयसी दृश्यते। अस्माकमपि भारतीयानां स्वतन्त्र-ताप्राप्तेरनन्तरमिदं कर्तव्यकोटौ प्रविष्टमावश्यकं कार्यं यद् वयमीदृशीनां विभूतीनां चरित्रानुशीलनेन स्वकीय चरित्रस्य निर्माणं कुर्याम। तस्मिन्नेव मार्गे पदमग्रे कुर्वन्तो वयं पुनरपि भारतं विश्वगुरुत्वस्य महनीये पदे प्रतिष्ठितं करिष्याम इति दृढो विश्वासः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कोऽभूत्। स समयो निकटे यदा प्रत्येकं जनः संस्कृतं शिक्षितुं बाध्यो भविष्यति। अहं विश्वसिमि यत्सभ्यसमाजो भाषामिमां दैनन्दिने व्यवहारे गृहीत्वा एतस्याः प्रचारे योगदानं कर्त्ता।

महोमयी—राज्यपालमहोदयस्य भाषणानन्तरं विन्ध्यप्रदेशस्य राज्यपालः स्वकीये भाषणे विश्वस्य प्रमुखतमाया, आध्यात्मिक्याश्चास्या भाषाया रक्षाया महतीमावश्यकतां घोषयामास। ततो गणेशशास्त्रिमहोदयः सम्मेलने प्राप्तान् संदेशान् श्रावयामास।

ततः श्रीपाददामोदरसातवलेकरमहाभागः (स्वागताध्यक्षः) राज्यपालमहाभागाय धन्यवादान् अदात्। महाभागेनानेन कथितं यद् द्वादशवर्षदेशीया बालका अपि व्यवहारे संस्कृतमेव वदन्ति इति बहुत्र मया दृष्टम्। अस्यामेव सभायां श्रीमाधवाचार्यस्यापि स्वागतसमितिप्रतिनिधिरूपेण भाषणमभूत्।

सातवलेकरमहोदयेन निजभाषणे सर्वेषां प्रतिनिधीनां स्वागतमाचरता प्रोक्तं यत्संस्कृतभाषा सर्वप्रान्तीयभाषासु अर्धाधिकशब्दरूपेण विद्यमाना। अर्थात् ६० प्रतिशतं शब्दाः प्रान्तीयभाषासु संस्कृतभाषाया लभ्यन्ते। इयमस्माकमद्यापि धार्मिकी भाषा। धर्मकर्माणि अनयैव भाषया भवन्ति। वस्तुत इयं भाषा न कठिना। सन्धेरल्पीयसा प्रयोगेण, समासराहित्यादिना, व्याकरणस्य दुरूहनियमशिथिलीकरणेन चेयं सरलीकर्तुं प्रसारयितुं च शक्या। विश्वभाषासु भूयांसः शब्दाः संस्कृतस्य प्राप्यन्ते।

सम्मेलनेऽस्मिन् वैदिकसाहित्यस्य गणितशास्त्रस्य चालौकिकज्ञानवन्तः श्रीभारतीकृष्णतीर्थमहाभागाः साभाप्रत्यमलंकुर्युरिति प्रस्तावोऽपि सातवलेकरमहाशयैरुपस्तुतः। श्रीकेदारनाथसारस्वतः समर्थितवान् प्रस्तावमिमम्। सभापतिना स्वासनेऽलंकृते प्रभावतीराजे सुरुचिरगीतेन संतोषितवती सभासदः। मुंबईशिक्षाविभागेन सम्मेलनाय पञ्चशतरूप्यकदानघोषणायां कृतायां संमेलनमन्त्री श्रीकेदारनाथसारस्वतो वार्षिकं विवरणमश्रावयत्। द्वारकापीठेश्वरशंकराचार्याणां श्रीमदभिनवसच्चिदानन्दतीर्थानां भाषणानन्तरं पुरीपीठेश्वराः श्रीभारतीकृष्णतीर्थपादाः स्वभाषणमारभन्त। अध्यक्षीयभाषणस्यास्य कतिपये अंशाः परस्ताद्भारत्यां प्रकाशमेष्यन्ति! अध्यक्षीयभाषणे संस्कृतभाषा आंग्लभाषापेक्षया न कठिना। काबुलादिविदेशवद्भारतेऽपि संस्कृतमनिवार्यं स्यात्, सुगभीरा सेयं भाषा मननार्हा इत्यादि मार्मिकमासीदुक्तम्।

**संस्कृतप्रदर्शिन्या उद्घाटनम्**— अधिवेशनस्य प्रथम एव दिवसे "भारती" मासिकपत्रकार्यालयेन समायोजिता संस्कृतप्रदर्शिनी प्रातः श्रीपाददामोदरसातवलेकरमहोदयेनोद्घाटिता। प्रदर्शिन्यामस्यां वैदिककालादारभ्य वर्त्तमानकालपर्यन्तं संस्कृतसाहित्यस्य विकासो रङ्गचित्रैः, रेखाचित्रैः, रूपरेखाभिः, चार्टैश्च प्रदर्शितोऽभूत्। संस्कृतस्य कथासाहित्यात् काव्येभ्यश्चापि सुरम्यस्थलानि कथाश्च चित्रितान्यभूवन्। प्रदर्शिनी सेयं उपदशसहस्रजनैर्दृष्टा उपस्तुता च। प्रतिनिधिभिः "एवंविधाः प्रयत्नाः संस्कृतप्रचारायावश्यका" इति मतं प्राकाशि। द्वारकापीठस्य जगद्गुरुशंकराचार्यैः, वैद्यगजाननमहाभागैः, अन्यैश्चापि जनैः प्रदर्शिन्यै लिखिता प्रशस्तिर्दत्ता। प्रदर्शिनीयं प्रयागे कुम्भमेलावसरे जालन्धर-जयपुर-कोटा-अलवर-इत्यादिनगरेषु संस्कृतसम्मेलनावसरेषु चाप्यायोजिताऽभवत्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अस्मिन्नेव दिवसे सायं नाटकद्वयस्यायोजनम-
त्। नाटकद्वयमिदं "लालावैद्यो" "मालाभविष्यं" च
नीत्। नाटकद्वयेऽपि नागपुरस्य सुप्रवाणैरभिनेतृभि-
सन्तोषिता द्रष्टारः।

अपरस्मिन् दिवसे—(३।६।५६) मुख्याधिवेशने
आः समारब्धाः। "संस्कृतं राष्ट्रभाषा भवेद्" इति
मधिकृत्य भूयान् विमर्शो विवादश्चारब्धः।
राञ्चलवासिभिः प्रतिनिधिभिः संस्कृतस्य राष्ट्र-
ते महान् आग्रहः प्रदर्शितः। एतेषामाकूतमासीत्
हिन्दीभाषा एकस्य प्रान्तस्य मातृभाषाऽस्ति। एवं-
भाषा न समग्रराष्ट्रस्य भाषा भवितुं योग्या।
संस्कृतं हि विश्वजनीना, राष्ट्रव्यापिनी च मूलभाषा,
अतः सैव राष्ट्रभाषात्वार्हा। कतिपयैरितरैः पण्डितैश्च
प्रस्तावोऽयं न यथावत्समर्थितः, तन्मते हिन्दी एवाभूद्
राष्ट्रभाषा, संस्कृतं तु तत्पृष्ठपोषिकैव इत्यादि।

राष्ट्रभाषात्वप्रस्तावस्य पक्षे श्रीचक्रदेवः, पं० ईश्व-
रचन्द्रशास्त्री, वासुदेवशास्त्री, माधवाचार्यः, माधवब्रह्म-
चारी, वेङ्कटेशशास्त्री पूना, वेङ्कटेशशास्त्री चिदम्बरम्,
पं० नन्दकिशोरशर्मा, कुलकर्णी नागपुरम् इत्यादयो
विद्वांसः अभाषन्त। सर्वेषां भावः सोऽयमेवासी-
द्यत् सर्वप्रान्तीयभाषाणां जननी सस्कृतं केवलमीदृशी
भाषा या सर्वस्मिन्नपि भारते समानरूपेण भाषितु-




सम्मेलनस्य प्रथमदिवसे द्वारकापीठेश्वराः श्रीमदभिनवसच्चिदानन्दतीर्था भाषमाणा दृश्यन्ते चित्रस्य दक्षिणतः। तदन्तिकं सम्मेलनाध्यक्षाः श्रीभारतीतीर्थपादा पुरीपीठेश्वराः स्थितासन्ति। श्वेतोष्णीषधराः श्रीपाददामोदरसातवलेकरमहोदया, [स्वागताध्यक्षः] अपि ध्यानमुद्राया-मवलोक्यन्ते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सवबोद्धुं च शक्या: । एतस्याः प्रचाराय इदमावश्यकं यदियं राष्ट्रभाषा घोषिता भवेत् इत्यादि । किन्तु प्रो. सुमनवारमहाशयोऽकथयत् यत्साम्प्रत सद्य एव संस्कृतं राष्ट्रभाषा न शक्यते निर्मातुम् । इयं हिन्दीभाषाया मूलरूपेणैव समादरार्हा । राष्ट्रभाषात्वाग्रहं विहाय अद्य एतस्याः पठनपाठने प्रचार्येताम् इत्येवाकांक्षितम इत्यादि । जयपुरीयेन शिवदत्तशार्मणा संस्कृतस्य राष्ट्रभाषात्वाय महतां बलिदानानां पण्डितैः परस्परं संस्कृते एव व्यवहारस्य चावश्यकता घोषिता ।जयपुर-संस्कृतकालेजाध्यक्षः श्रीचन्द्रशेखरशास्त्री अभाषत यद् वयं राष्ट्रभाषा संस्कृतं स्यादित्युद्घोषयामः किन्तु सत्यमनसा वक्तव्यं यत् चत्वारिंशत्कोटिषु कति अद्य संस्कृतं भाषन्ते बुध्यन्ति च—कति च पण्डताः स्व-बालान् संस्कृतं पाठयन्ति ।? अद्य ये संस्कृतभाषा-द्वारा धनमुपार्ज्य स्वसुतान् आङ्गलभाषां पाठयन्ति ते गां दुग्ध्वा खरीं पोषयन्ति ।

संक्षेपतः प्रश्नमिममाधारीकृत्य भूयान् विवादः प्रासरत् । श्रीमाधवाचार्येणापि विषयेऽस्मिन् बहु भाषितम् । संस्कृतभाषा यदीयन्तं प्रचारं लभेत यज्जनभाषा सा स्यात्तदा राष्ट्रभाषात्वं तस्यां उचित-मित्यादि बहूनामाशयोऽभूत् अन्ते प्रश्नस्यास्य निर्णया-र्थमेका उपसमितिर्निर्वाचिताऽभूत् ।

अस्मिन्नेव दिवसे सायं 'प्रस्तावानां स्वीकृति अनु-वृत्तमेव प्रस्तावमाधारीकृत्य श्रीसातवलेकरमहाशयस्य म. म. श्रीगिरधरशर्मणां च भाषणे संजाते यत्र सर्वे प्रतिनिधयः संतुष्टाः जाताः । महामहोपाध्यायैः सांप्रतिकीं राष्ट्रभाषापरिस्थितिमुपवर्ण्य हिन्दीभाषायाः संस्कृतस्य च स्थानं स्पष्टीकृतम् । रात्रौमृच्छकटिकं नाटकं संस्कृतेऽभिनीतम् । दिनेऽस्मिन् संयुक्तमहाराष्ट्रवादिभिर्नगरे विभिन्नक्षेत्रेषु उपद्रवा आसन् कृताः । अतएव नाटके पूर्णोपस्थितिः न आसीत् तथापि द्वादशशतकल्पैर्जनैः नाटकमिदं दृष्टम् । नाटकस्यास्य प्रस्तोतुः दाजीभाटवडेकरस्य अभूतपूर्वा सफलता संस्कृतनाट्यकलाया लोकप्रियतां पिशुनयतिस्म । पुरस्कारवितरणानन्तरं कार्यक्रमोऽयं पूर्णः ।

अन्तिमदिवसे [ ४ जून ]—प्रातः

अवशिष्टेषु प्रस्तावेषु विचारः कृतः । सम्मेलने पारितानां प्रस्तावानां विवरणं प्रामाणिकरूपेण भारत्यां प्रकाशमेष्यति । सायं त्रिवादनतः सार्धहोरां यावत् परिचयसभा चलिता । अस्यां बहूनां योग्यतमानां महानुभावानां परिचयः प्राप्तः । श्रीरामचन्द्र वामन कुंभारे महोदयः राजस्थानसंस्कृतसमितेः परिचय कार्यरूपरेखां चादात् ।

अध्यक्षमहोदयानां समुपस्थितौ मुख्यकार्य-क्रमः प्रारब्धः । इदानींतनी कार्यप्रणाली हृदयहारिणी गाम्भीर्यपूर्णा चाभवत् । म म. श्रीगिरधरशर्मणां, श्रीसातवलेकरमहोदयानां तथा श्रीमत्याः प्रभावतीराजे महोदयायाः, श्रीकपिलदेवमहोदयानां च हृदयानन्द-प्रदानि भाषणानि जातानि । भारते संस्कृतशिक्षा-प्रश्नः, विश्वविद्यालयेषु संस्कृतस्य स्थानमित्यादि विषया अभूवन् विवेचिताः ।

श्रीगिरधरशर्मणां भाषणे दार्शनिकतायाःवैज्ञानिक-तायाश्चपुटेन रमणीयाः विचाराःप्रस्तुताः । एतदनन्तरं प्रस्तावस्वीकृतिरभूत् । 'मधुरेण समापयेदि' त्युक्तिमनु-सृत्य संगीतकं वीणावादनं चाकर्ण्य कार्यकर्तृभिः सम्मे-लनस्य साङ्गता घोषिता ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



**भारतीयविद्याभवने पण्डितसभा**—मोहमयी-ते भारतीयविद्याभवने ४ जून-तारिकायां श्री जे० ०, दवे महोदयस्याध्यक्षतायां पंडितसभाया आयो-मक्रियत । सभायामस्यां राजस्थान-गुर्जर महाराष्ट्रा-न्तानामनेके पण्डिताः समवायन्त । पूर्वं श्रीदवे-येन संस्कृतस्य विशेषतामुपवर्ण्य तस्या जनतायां रस्यावश्यकता सूचिता । श्रीमहेशचन्द्रशास्त्रिणा तं यत् संस्कृतं प्रान्तीयभाषाणां जननी । भाषेयमा-ङ्गलभाषापेक्षया सुतरां सरला । विश्वसंस्कृतपरिषद:-स्तत्त्वावधाने बालकेषु संस्कृतस्यारम्भिकशिक्षायै प्रसारपरीक्षाणां या योजना प्रचलति तस्या विशदविवरणं श्रीशास्त्रिणा विहितं । एतदनन्तरं परिचयगोष्ठी संवृत्ता। श्री सी० एल्० शास्त्री, श्रीश्रीरामशर्मा, श्रीविजयकुमारत्यागी. श्रीगिरिराजशर्मा च क्रमशः अहमदाबाद्-हैदराबाद-बम्बई राजस्थानराज्येषु प्रचारप्रतिनिधयो मनोनीताः, तेषां परिचयोऽप्यभूत् कारितः ।

———


# अवध शुगर मिल्स लि०

## हरगाँव (उत्तरप्रदेशे)

## उच्चकक्षायाः शर्करा निर्मातारः

मैनेजिंग एजेन्ट्स्—

## दि कॉटन एजेन्ट्स् प्रायवेट लि०


प्रकाशकः—जयबहादुरसिंह पताः -भारती भवन, गोपालजी का रास्ता, जयपुर

मुद्रकः—राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ★ सूक्ति-सुधा ★

धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।
पञ्च यत्र न विद्यन्ते न तत्र दिवसं वसेत् ॥

धनिक लोग, विद्वान् ब्राह्मण, राजा, नदी और चिकित्सा करने वाला ये पाँच जिस देश में न हों उस देश में एक दिन भी न रहे।

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥

धन की तीन गतियां हैं अर्थात् धन के तीन ही उपयोग हैं। या तो उसका उपभोग किया जाय, या दान किया जाय या फिर वह यों ही नष्ट हो जाय। जो मनुष्य धन का न तो उपभोग करता है, न दान करता है-उसके धन की तीसरी दशा होती है अर्थात् वह नष्ट हो जाता है।

जातमात्रं न यः शत्रुं रोगं च प्रशमं नयेत् ।
महाबलोपि स नरो विनाशं गच्छति ध्रुवम् ॥

जो मनुष्य रोग और शत्रु के प्रकट होते ही उसे दबा नहीं देता, वह चाहे कितना ही बलवान् हो, निश्चित ही नष्ट हो जाता है।

दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
वित्तं त्यागनियुक्तं दुर्लभमेतच्चतुष्टयं लोके ॥

प्रिय वाणी बोलने के साथ ही दान, गर्व-रहित ज्ञान, क्षमासहित वीरता, त्याग की भावना के साथ धन सम्पत्ति, ये चार चीजें मिलना संसार में दुर्लभ है।

मोहमयीसम्मेलनस्योद्घाटनदृश्यम्- मोहमयी राज्यपालः श्रीहरेकृष्ण मेहताब महाभाग उद्घाटन-भाषणं वितरन् दृश्यते। चित्रस्य दक्षिणतः वेत्रासनयोः श्रीमदभिनव-सच्चिदानन्द-तीर्थाः द्वारकापीठेश्वरशंकराचार्याः [मालाधराः] पुरीशंकराचार्याः श्रीभारतीकृष्णतीर्थाः सम्मेलनाध्यक्षाश्च सन्ति। श्वेतोष्णीषधारिणः स्वागताध्यक्षाः श्रीपाददामोदरसातवलेकरमहाभागाः अपि वामतो दृश्यन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पुस्तकालय
गुरुकुल कांगड़ी
Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

( संस्कृतस्य प्रमुखं मासिकपत्रम् )

स्वराज्य-स्थापना-वीरः
सन्महाराष्ट्र-केसरी ।
लोकमान्येषु तिलक-
स्तिलकोऽयं प्रणम्यताम् ॥

★

वर्षम् ६ | दशमोऽङ्कः | मूल्यम् वार्षिकम् ३) रु० एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❋ विषय-सूची ❋


| क्रमः | लेखाः | लेखकाः | पृष्ठ संख्या |
|---|---|---|---|
| १. | वर्षासु विन्ध्यशोभा | सम्पादकः | |
| २. | सत्यायाः शान्तेः सत्य उपायः | श्रीहरगोविन्द पाराशरः, व्याकरणशास्त्री | २२० |
| ३. | भारते भिक्षुकसमस्या | श्रीगणेशरामशर्मा झालावाड़ | २२१ |
| ४. | लोकमान्य तिलकस्य पवित्रस्मृतिः | श्रीगजाननशास्त्री मुसलगांवकरः | २२५ |
| ५. | संस्कृतज्ञानां जनतायाः सर्वकारस्य च कर्तव्यम् | श्रीनटवर जोशी | २२८ |
| ६. | माया | श्रीरघुवीरप्रसादशर्मा पाण्डेय, पाटलिपुत्रम् | २३२ |
| ७. | व्यासजयन्ती | श्रीपि० वि० कृष्णाचार्यर संस्कृतउपाध्यायः काञ्चि | २३३ |
| ८. | सम्पादकीयम् | सम्पादकः | २३५ |
| ९. | संस्कृतसमाचाराः | ” | २३६ |
| १०. | सूक्ति-सुधा | ” | |


सूचना :—सर्वे ग्राहकाः सूच्यन्ते यत् पत्रव्यवहारावसरे निजग्राहकसंख्यां स्वस्मिन् पत्रे अवश्यं दर्शयेयुः। अन्यथा पत्रोत्तरे बाधा समुत्पत्स्यन्ते।

## —❋ "भारती" पत्रस्य उद्देश्यानि नियमाश्च ❋—

१. संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचारपरिपोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि।

२. 'भारती'पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम्।

३. मासिकपत्रमिदं प्रतिमासं पूर्णिमासं प्रतिपदायां तिथौ प्रकाशितं स्यात्।

४. एकस्यांकस्य मूल्यम् ।=) आणकषट्कम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
श्रीमथुरानाथशास्त्री
सहसम्पादकः—
कलानाथशास्त्री बी. ए.
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षः ६ | श्रावणशुक्ला १, सं० २०१३ | अङ्कः १०

## वर्षासु विन्ध्यशोभा

अन्योन्यकटकलग्नैः सर्वत्र दिशामुखेषु विसरद्भिः ।
छल्लीमिव बत मुञ्चति विन्ध्यो मेघैर्विघटमानैः ॥ १ ॥

परिपश्यन्ति पुलिन्दाः पर्वतशिखरस्थिता धनुःसक्ताः ।
हस्तिकुलैरिव विन्ध्यं विपूर्यमाणं नवाम्भोदैः ॥ २ ॥

वनदवमसीमलिनितो राजति विन्ध्यो घनैर्धवलैः ।
मधुमथनः क्षीरोदधिमथनोद्धतदुग्धसिक्त इव ॥ ३ ॥

अङ्गानि नवतृणांकुररोमाञ्चविमण्डितानि संवहते ।
प्रावृड्लक्ष्म्याः पीवरपयोधरप्रेरितो विन्ध्यः ॥ ४ ॥—सम्पादकः

---

सव्वत्थ दिसामुहपसारिएहिँ अण्णोण्णकडअलग्गेहिं ।
छल्लिं व्व मुअइ विञ्झो मेहेहिँ विसंघडन्तेहिं ॥ १ ॥

आलोअन्ति पुलिन्दा पव्वअसिहरट्ठिआ धणुणिसण्णा ।
हत्थिउलेहिँ व विञ्झं पूरिज्जन्तं णवब्भेहिं ॥ २ ॥

वणदवमसिमइलङ्गो रेहइ विञ्झो घणेहिँ धवलेहिं ।
खीरोअमन्थणुच्छलिअदुद्धसित्तो व्व महुमहणो ॥ ३ ॥

उव्वहइ णवतणंकुररोमञ्चपसाहिआइँ अङ्गाइं ।
पाउसलच्छीअ पओहरेहिँ परिपेल्लिओ विञ्झो ॥ ४ ॥ गाथासप्तशती



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सत्यायाः शान्तेः सत्य उपायः

( ले० श्रीहरगोविन्द पाराशरः, व्याकरणशास्त्री, काव्यतीर्थम्, साहित्यरत्नम् )

न खलु कश्चिज्जगत्येवम्भूतः जीवः यो न वाञ्छति स्वजीवने शान्तिम् । प्रत्येकजीवस्य विशेषतया मानवस्य लक्ष्यमिदमक्षयसुखप्राप्तिः । सः सुखस्य शान्तेश्च प्राप्त्यर्थं दैहिक-दैविक-भौतिकतापानां निराकरणाय सन्ततं यतते । स्वकर्तव्यैः मानवः भौतिकसुखमवाप्यैव विरमति । सः भौतिकीं शान्तिमेव स्वजीवनस्य लक्ष्यं निश्चित्य तां लब्ध्वा च स्वजीवनस्य कृतकृत्यतां स्वीकरोति । किन्त्वियन्न सत्या शान्तिः, यतः सः भौतिकपदार्थानां नाशे, दूरे सञ्जाते वा दुःखमनुभवति, अन्तकाले च वासनामपरित्यज्य तां वारम्वारं स्मृत्वा पुनः जननमरणादिरूपामशान्तिं प्राप्नोति ।

तर्हि का वास्तविकी शान्तिः ? इत्येवं पृष्टे उच्यते ? अस्माकं महर्षिभिः शास्त्रकारैश्चेदं कथ्यते—सत्या शान्तिस्तु सैव यस्यां मानवः न किञ्चिदपि वाञ्छति । लोभमोहादिकं परित्यज्य शोकन्न करोति 'मत्वा धीरो न शोचति" इति श्रुतेः । अन्यच्च सैव सत्या शान्तिः यया-उदासीनः शान्तः स्वात्मनि तुष्टः मानवः मुक्तिं लब्ध्वा जगति नावर्तते भूयोभूयः "न स पुनरावर्तते" इति श्रुतेः ।

अत्रेदं विचार्यम्—यदि उपर्युक्तस्वरूपैव सत्या शान्तिः तर्हि तस्याः प्राप्तिनिमित्तः कः सत्य उपायः ? यदि भौतिकसुखोपकरणैरियं प्राप्तव्येति ब्रूयात्तदेदमद्वैतवादिभिरुच्यते यद्भौतिकाः ऐहिकाः सर्वे पदार्था एव क्षणिकाः नाशशीलाः । नश्वरैरुपकरणैः न प्राप्तुं शक्या शाश्वती शान्तिः । उक्तञ्च "नास्त्यकृतः कृतेन" अकृतः-मोक्षः (सत्या शान्तिः) कृतेन-कर्मणा भौतिकोपकरणसमूहेन न प्राप्तुं शक्य इति भावः । अतएवेदं वक्तुं शक्यते यन्न प्राप्तव्या वास्तविकी शान्तिः भौतिकोपकरणैः ऐहिकसुखसाधनैः । अत आध्यात्मिकैः प्रयत्नैरेव लब्धुं शक्यास्माभिः सत्या शान्तिः ।

ब्रह्मवादिभिः कतिपयशास्त्रकारैश्च सत्यायाः शान्तेः सत्य उपायः "आत्मज्ञानम्" इति रूपेण प्रदर्शितः । आत्मज्ञानं भवसम्भवं खेदं परिहरतीति सर्वैरेव मन्यते । अस्माकं भारतीयेषु मोक्षप्रतिपादकेषु वेदब्राह्मणोपनिषद् ग्रन्थेषु आचार्यैः "आत्मज्ञानस्य" श्रवणमनननिदिध्यासनरूपः, यमनियम-आसन प्राणायाम प्रत्याहारधारणाध्यानसमाधिरूपः पन्था उपदिष्टः । सत्यः समीचीनश्च सः । तथाप्यस्य मार्गस्य सम्बन्धे कठोपनिषदि प्रोक्तम् "क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति" तुलसीकृतरामायणे चोक्तम्—"ज्ञान पन्थ कृपान की धारा । परत खगेश होइ नहिं बारा ।" इत्यादिभिः प्रमाणैर्ज्ञायते यदयं ज्ञानमार्गः न सर्वसुलभः सत्यायाः शान्तेरुपाय इति । अत एव कैश्चिद् श्रीशङ्कराचार्यसदृशैः ब्रह्मवादिभिः शास्त्रकृद्भिश्च आत्मज्ञानरूपः भगवत्प्राप्तिरूपो वा सत्यायाः शान्तेः सत्य उपायः "भगवद्भक्ति"रिति प्रोक्तः । वस्तुतस्तु कलौ युगे सर्वजनसुलभः शान्तिरुपायोऽयमेव "कलौ तद्धरिकीर्तनात्" इति श्रीमद्भागवते । अतएव समासेनायमुपायः निर्दिश्यते—

सत्यायाः शान्तेः प्राप्त्यर्थं भगवच्चरणारविन्दे साकारे रूपे सेवकसेव्यभावेन स्वचित्तवृत्तिर्नियोज्या ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भारते भिक्षुकसमस्या

## ( पूर्वानुवृत्तम् )

( पं० श्रीगणेशरामशर्मा श्रीराजेन्द्र इन्टर कालेज, झालावाड़ )

कानिचिद्वर्षाणि व्यतीयुर्यदात्र देशे विभाजनदुष्प्र-
त्मोहम्मदीयाः प्रजाः किंचिद्भयग्रस्ता इवासन्।
केचिज्जना ये तत्सम्प्रदायान्तर्गता एवासन्, स्वव-
घटनायोत्तरप्रदेशस्यानेकेषु स्थानेषु मोहम्मदीयेभ्यो
भिक्षाम् गृहीत्वात्मसाच्चक्रुः। इयं नु बत चर्चा
तसंस्थानां विद्यते परं वास्तविकीनां कासांचिद्राज-
नीतिगतसंस्थानामपि कतिपये सदस्या भिक्षोपार्जनस्य प्रकारेणानेन प्रचुरं धनं याचित्वा स्वार्थे प्रायुञ्जत। अत्रानेके दृष्टान्ताः प्रमाणानि च ख्यातिं प्राप्ताभ्यः संस्थाभ्यः सुलभास्सन्ति। भिक्षुनियन्त्रणविधाननियमाः केचिद्भविष्यति निर्मीयेरंस्तर्हि तेष्वेवंविधाभ्यो व्यक्तिभ्यः समाजरक्षात्मकश्चोपबन्धः परमावश्यकः।

---

सारिकविषयेषु विरक्तभावः समीचीनः, किन्तु ज्ञान-
राग्यस्य नात्र दृढबन्धः। भगवद्भक्तौ जगतः परि-
गस्य नाद्यावश्यकता। परञ्चात्र वैशिष्ट्यं यद्
तः कथाश्रवणे कीर्तने सत्सङ्गादौ मनसः नियुक्त-
त्वाभाविकरूपेणैव तस्मिन् जगत्प्रति वैराग्यभाव
ति। भक्तः जगतः प्रत्येकवस्तुषु स्वस्वामिन ईश्वर-
रूपमवलोकयति, अतः तस्य मनसि सदैव शान्तिः
सति। तस्य मनः स्वयमेवात्मनिग्रहे वसति, भगवति
न्यवृत्तित्वात्। अस्मादेव गीताप्रवचने आधुनिक-
र्येण बिनोबाभावेन स्पष्टमुल्लिखितम्। 'दुर्निग्रहं मनः
हं न स्वीकरोति, चाञ्चल्यन्न परित्यजति, तदेव मनः
ति मङ्गलमयेश्वरभावरूपिण्या दृष्ट्या आत्मवश्यं
लञ्च भवति।" मनोनिग्रहत्वाच्छान्तिः स्वात्मनि
ोति सर्वैरेव दार्शनिकैः स्वीक्रियते। शान्तसंयत-
ेन भगवद्भक्तः संसारे प्रत्येकरूपेण स्वाराध्यमेव
यति। भक्तः यत्करोति तस्मिन् कर्मण्येव स्वप्रभुं
ति, सर्वानात्मवद्देवाचरति, तद्रूपेणैव सर्वान्
जानाति। एवं सः सर्वत्र ईश्वरं पश्यन् एकत्वमेव पश्यति, श्रुतिरपि दृढयति—

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥

एकत्वभावे सञ्जाते आत्मा ईश्वरो वा स्वस्वरूप-प्रकटनेन आत्मविदं भक्तं वा स्वरूपां सत्यां शान्तिं प्रयच्छति "शश्वच्छान्तिं निगच्छति" इति स्मृतेः।

अतः निष्कर्षे इदं वक्तुं पार्यते यत्सत्या शान्तिः आध्यात्मिकी, स्ववेद्ये स्वलयरूपैव। तस्याः प्राप्तेरुपायः भगवति स्वेष्टे, अनन्यमनसा तस्मिन् स्वत्त्वविलयरूपानन्या भक्तिः। एवमनुचरिते मानवः सत्यां शान्तिं सारल्येन प्राप्नोति प्राप्स्यतीति निश्चप्रचम्। अतएव गीतायां श्रीभगवता कृष्णेनोपदिष्टम्—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥

गीता ९।३४



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कियद्भ्यो वर्षेभ्यः केचन नवीना भिक्षवो दृग्गोचरा भवन्ति। इमे खल्वाङ्गलभाषां धाराप्रवाहं भाषमाणा आंग्लवेषविन्यासाश्च भवन्ति। इत्थंविधेष्वमीषु प्रायो हीशुधर्मप्रचारका वा सामुद्रिकशास्त्रोक्तहस्तरेखाविज्ञानवेत्तारो दाक्षिणात्याश्चोपलभ्यन्ते। एते प्रातरेवागत्य स्पष्टतरांग्लभाषया मधुरं वार्तालापं नागरिकैः सहारभन्ते। ततः किंचित्परिचये संजाते कामपि सहायतां द्रव्यरूपां याचन्ते। यतस्ते बौद्धिकविकासक्रमदृष्ट्यान्यापेक्षयोच्चस्तरीयाः प्रसिद्ध्यन्ति। ततस्ते भिक्षामप्येकमुद्रात्मिकां वार्द्धमुद्रां वा कामयन्ते। विद्वदाभासा इमे तथाविधं भैक्ष्यं चापि सुखं लभन्ते।

अपरे पुनः केचन तादृशोऽपि भिक्षुका भवन्ति ये विनैव परिचयं विनैव प्राथमिकं कमपि वार्तालापं मिलनसमकालमेवेत्थं वक्तुमारभन्तेः—"श्रीमन्! भवत्सकाशे चत्वारः पणा यदि स्युस्तदा ते दीयन्तां मे!! दिनद्वयं व्यतीयाय परं नाहमिदानीं यावत् कुतोऽपि किमपि भोजनमलभे !!!" सम्भवति, सत्यमेवेदृशेषु केचित् क्षुत्क्षामकण्ठा भवेयुर्जना भारतेऽत्र देशे नः, यत्र जीविकावृत्तेरभावाच्छिक्षिता अपि लोकाः क्वचिन्निर्वाहयोग्यां वृत्तिं यथायोग्यां नो लभन्ते, परन्तु प्रकारेणानेन बहवो दाम्भिका भिक्षां याचमाना दरीदृश्यन्ते। कतिपये चैतादृशा अपि लभ्यन्ते भिक्षवो ये दिने क्वचिन्नियमितां जीविकामुपार्जयन्ति पुनः प्रातः सायं च पुष्कलां भिक्षां याचित्वा स्वस्यापेक्षातो न्यूनमायं विधिनानेन सम्पूर्य सुखं जीवन्ति।

देवपूजामिषाद्यजमानवृत्तिच्छलान्मन्त्रतन्त्रौषधिसाधनापकौशलाद्ग्रहगोचरफलादेशव्याजाद्वा केचन भिक्षावृत्तिं समाचरन्तो विद्यन्तेऽत्र देशेऽस्माकं भारतवर्षे। इमे नित्यमेवान्नमुष्टिं याचितुं प्रातर्गृहस्थानां वसतिषु 'हरे राम! हरे कृष्ण!! वासुदेव!!! श्रीकृष्ण!!! राधेश्याम!!! जय शिव शङ्कर!!!' इत्यादीनि मंगलनामानि भिक्षाया मूलमन्त्रानिव प्रोच्चैःस्वरमुच्चारयन्तो गृहाद्गृहं बंभ्रम्यमाणा भिक्षार्थं पर्यटन्ति। ईदृशाः केचित् स्वबालान् पत्नीं कन्यकाश्च वस्त्रविशेषैः सज्जीकृत्य नगररथ्यासु भिक्षार्थं प्रहिण्वन्ति। स्वयमपि च स्वाकारं प्रच्छाद्य भैक्ष्यं चरन्ति। यद्यपीमेऽन्तःसम्पन्ना भवन्ति परन्त्वमीषां दीनहीनवेशभूषां कातरमार्तस्वरं भगवन्नामग्रहणादिकं दृष्ट्वा श्रुत्वा चास्तिका लोकाः किलैतेभ्यो भिक्षान्नं वस्त्राणि धनं च प्रयच्छन्ति। याचितं भिक्षान्नवस्त्रादिकं विक्रीयैते सुवर्णं संचिन्वते।

केचन शरणार्थिनोऽपि च भिक्षावर्जनस्य कमपि नव्यमेवाभ्युपायमाविष्कृत्य प्राचालयन्। एवंविधानां केषांचित् बालकाः कुमार्यश्च देहलीप्रभृतिनगराणां वसतिषु मार्गे व्रजतो जनानवरुध्य भिक्षां याचन्ते। काश्चिद्योषितोऽपि च पथि गच्छतां जनानां वस्त्राञ्चलं विमुच्य दूरमपव्रजन्ति। एतादृशानां कन्यकाश्च गीतं वाद्यं नृत्यं वा शिक्षिता भवन्ति। कलालापकुशलास्ता एता भिक्षां धार्मिकीं वृत्तिमिव समर्थयन्ते। अपरं च गृहस्थभिक्षुकेषु केचित्तादृशा अपि सन्ति येऽस्माकं सहानुभूतिं जागरयितुं सफला निष्पद्यन्ते। एकदा लक्ष्मणपुरे (लखनऊ) अमीनाबादपार्कनाम्नि स्थाने धौतधवलवस्त्राच्छादितः कश्चिद्वृद्धो मां प्रत्युपागच्छत्। तं दृष्ट्वाहं तत्रास्थायापृच्छम्:—'अपि भवान् मया सह सम्भाषितुमिच्छति?' स उवाच—'आम्, श्रीमन्! भवत्सविधे केचित्पणास्तु न स्युः? अहमवोचम्—'महाशय! सन्त्यवश्यं मम समीपे कतिचन पणाः। किमर्थं भवानेवं पृच्छति? वदतु किं प्रयोजनं भवतो मया ??" सोऽब्रवीत्—'अहं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...श्चित् पणान् कामये भवत्तः !' ममौत्सुक्यं किंचिद्-...र्त । तत्राहमपृच्छम्—'कोयं प्रसङ्गोऽत्र भवतां मत्तो ...क्षायाचनस्य का वाचाति-महती नन्वावश्यकता ?' ...ऽवादीत्—'अहमस्मि सार्वकारभृत्यो गृहीतविश्राम-...तिः । चत्वारिंशद्रूप्यकाणि प्रतिमासं लभे । मम ...कः पुत्रोऽभूत्सोऽपि सर्वकारसेवासु नियुक्तो बभूव । ...रणाद्वयं तदेकाश्रयाः सर्वे कुटुम्बिन इदानीमगतिकाः ...न संजाताः । एभिश्चत्वारिंशद्रूप्यकैः परिवारद्वयस्य ...तुं नाहं प्रभवामि । अतएव हि लोकलज्जामपहाया-...दिनं सायं दयालुभ्यः सज्जनेभ्यो भिक्षां याचे । कदा-...वशतया भिक्षयैव कथमपि निर्वाहोऽस्माकं सम्भवेदिति-...क्ष्यं चरामि । मम च नेत्रज्योतिरधुना मन्दीभूता ...श्याशक्तिश्च मेऽपक्षीयमाणास्ति !'' एवं विधानां सेयं ...तिः सत्या वानृता वा भवेत् । परंयच्चित्रं सोऽवर्ण-तदत्रास्माकं देशेऽतीव स्वाभाविकं सम्भवति । भिक्षा-...षु निर्धनपरिवाराणां निर्धनात्येकः ।

बहुषु निर्धनपरिवारेषु वृद्धाः स्त्रियो भिक्षां याचित्वा ...णां परिमितमल्पमायं वर्द्धयित्वा काठिन्यात् स्वकुटुम्ब-परिपालनं कुर्वते । यदि कदाचित्ताः कारणविशेषाद्याव-...पेक्षितां भिक्षां न लभन्ते रिक्तहस्ता वा गृहान् प्रतिनि-...वर्तन्ते तदा तत्परिवारसदस्यैरन्येद्युः समधिकं धनमर्ज-...तुं सावधानाः क्रियन्ते, दुर्भाग्यादप्राप्ते तावति धने ...एताः कटूक्तिभिः संतप्यन्ते, यतस्तासाम् वृद्धानां भिक्षा-...र्जितेन द्रव्येणैव हि तेषां कुटुम्बिनां सर्वेषां जीविका-निर्वाहो जायते ।

काश्चन युवतयोऽप्यथ भिक्षायाचनाय नियुज्यन्ते ...ऽथवा स्वयमेवैतास्ता भैक्ष्यं चरन्ति । एवंविधाः ...युवतयः श्रीमतां गृहद्वारं निस्सङ्कोचं प्रविश्य ...ध्ययनकक्षे समीपमागत्य स्वकरुणकथालिखितं कर्गलमेकं भवतां हस्ते समवालम्बयन्ति । तत्र कर्गले तासां संकटगाथाः प्रभावोत्पादकैः शब्दैर्वाक्यैश्च सत्या वानृता वा कल्पनाप्रसूता वा वर्णितातिष्ठन्ति । ताः प्रायः स्वात्मानं दुष्कालपीडितं चोरापहृतधनं लुण्टाकलुण्ठितं च घोषयन्ति । साश्रुनयनास्ता एता भवतां मनसि करुणामुत्पाद्य विलापकलापान् गद्गदकण्ठमालप्य सहानुभूतिं समवेदनां चाविर्भावयन्ति । परिणामतो धनं प्राप्तुं सफला भवन्ति स्वचेष्टाभिः ।

भारतसदृशे निर्धने देशे धनोपार्जनोपयुक्तं कार्यजातमत्यल्पं जनसंख्याति महती वोभूयमाना वर्तते; तस्मात्केषांचिज्जनानां कृते भिक्षायाचनमनिवार्यमिवापतति । मनोविज्ञानवेत्तारो वदन्ति यन्मनुष्योऽत्यन्तं क्षुत्क्षामकण्ठः स्वोदरज्वालामतिदारुणां ज्वलन्तीमुपशमयितुं किमप्युपायान्तरं नावलम्बते तदासावपराधानपि कर्तुमुद्युङ्क्ते विवशतया भावशतशङ्कातङ्काकुलः ! एवं सति निर्धना दीनदीनाः साधनसम्पद्विहीनाः किंपचा अकिंचना जनाः कथं न भिक्षावृत्तिसदृशमनायाससुलभं साधनं स्वभावतो नाङ्गीकुर्युः ? हिन्दूनां तीर्थस्थानेषु तु भिक्षुकानामानन्दस्य परा कोटीवावलोक्यते । भारतीया महिलास्त्वतीव करुणहृदयाः शीलसौजन्यस्वभावा आस्तिक्यभावापन्ना दानधर्मादिकमतितरामुत्साहात्समाचरन्ति । दानपुण्ययोरस्याः सहजाताया धर्मवृत्तेर्भिक्षवोऽतीवानुचितं दुरुपयोगं कृत्वा भिक्षालाभं लभन्ते ! एकस्मिन् महति मेलके मया तथ्यमेतत् प्रत्यक्षमेवान्वभूयत यद्धि केचन निपुणा भिक्षुका लोकानां धर्मप्रवृत्तेस्तन्मनोदौर्बल्यस्य वा तेषामुच्चमानवतायाश्च दुरुपयोगं कर्तुं नानाप्रकारान् विधीनुपायान् साधनानि च कृत्रिमानि बताविर्भावयन्ति । न जाने कथमेते भिक्षाचार्याश्चातुर्य्यान्नीरोगेष्वपि स्वदेहाङ्गप्रत्यङ्गेषु व्रणविस्फो-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



टकुष्ठादीन् कृतकोपायैः समुत्पादयन्ति कथं वा नानारोगान् प्रदर्शयन्ति लोकेभ्यः ! तेषां कृत्रिमव्रणार्तिरोगपीडावेदनां चान्तर्मनसि विभाव्य सरलाः कारुणिकाः सहृदया जना एभ्यो धनं वितरन्ति सहानुभूतिं समवेदनां च प्रदर्शयन्ति ।

केचित् पुनर्भिक्षुका गोमुखा व्याघ्रा इवातिप्रचण्डा उद्दण्डा भयङ्कराश्च सिद्ध्यन्ति । तेषां बाह्यस्वरूपं भिक्षूनामिवावश्यं दृश्यते परमन्तस्तु ते प्रगल्भा अपराधिनां भवन्ति । एवंविधा भिक्षवो दिनेषु गृहाद्गृहं प्रतिपर्यटन्ति तद्गृहद्रव्याणि सुसूक्ष्मं निपुणं च निरीक्ष्य तत्सङ्के तं साधयन्ति रात्रौ च तत्सर्वं चोरयन्ति । वस्तुतो दरिद्राणां बुभुक्षितानां स्वोदरदरीपूरणायागत्या स्वीकृतभिक्षावृत्तीनां प्रजावलुण्टाकानां कृत्रिमाणां चामीषामन्तरं बोद्धुमति कठिनं जायते, परं राज्याधिकारिभिर्गृहीतेष्वेतेषु पर्यन्ते याथार्थ्याद्रहस्योद्घाटनं भवति । उत्तरप्रदेशस्य कतिपयेषु नगरेषु भिक्षुसमस्यासमाधानाय कश्चित्प्रयत्नो विधीयमानोऽस्ति । लक्ष्मणपुरे नगरपालिका किंचिद्भिक्षुसदनमेकमुद्घाटयत् परन्त्वयमुपायोऽतीव सामान्योऽपेक्षातो न्यूनफलदोऽजायत । तत्र सदने केवलं पञ्चाशच्छष्टिपरिमितानामेव भिक्षूणां कृते निवासस्य प्रबन्धोऽस्ति । कतिचिद्वर्षेभ्यः प्राक् किलैकस्मिन्दिने यदा कोटपालविभागस्य साहाय्येन नगरस्य सर्वेऽपि भिक्षवो निगृह्य भिक्षुसदनेषु निर्निरुद्धास्तदैकं मनोरञ्जकं दृश्यमदृश्यत । केचिद्भिक्षुकास्तु तत्र शांतमनसोऽवालोक्यन्त । कदाचित्ते मार्गान्मार्गं रथ्याया रथ्यान्तरं चत्वराच्चत्वरं गृहाद्गृहं प्रति सदासर्वदा सर्वतोदिग्भूयोभूयो भ्रमणानन्तरं भिक्षाप्राप्तिसमपेक्षयात्र सदन एकत्रैव भैक्ष्यं सुलभं भविष्यति वात्र कार्यं च यदि कर्तव्यं स्यात्तदा का हानिरिति चिन्तमाना जोषमतिष्ठन् । परमन्येषां बहूनां भिक्षूणां कृते तत्सदनं कारागारादप्यधिकं दुःखप्रदं प्रतीयते स्म । भिक्षुवर्येषु तेषु केचिदहिफेनभक्षणव्यसनिनः केचन वीटिकाधूम्रपानरसिका अन्ये भृङ्गाररससेविनो नस्यग्रहीतारश्चासन् । तत्र सदने मादकद्रव्याभावे त एते महान्तं क्लेशमन्वभूवन् ! अपरे केचित् स्वस्य दैनिकमुपार्जितं भिक्षाद्रव्यं क्वचित् जीर्णशीर्णभग्नावशेषेषु न्यदधत ततस्ते तन्निहितद्रव्यस्य कृते चिन्तातुरा अभूवन् । अन्ये केचन मनसीत्थं चिन्तमना आसन् यदि मे भिक्षुसदनाधिकारिणस्तांस्तत्र निरुध्य द्वित्रिरुप्यकपरिमाणात्तदायाद्धक्ष्यन्ति । ते किलाधिकारिणः स्वमुक्तये मुहुर्मुहुः प्रार्थयन्त । केचनान्ये भिक्षुकास्ताम्बूलचर्वणं विनातीव क्लेशमन्वभूवन् तथापरे सुरापास्तत्र वारुणीं विना जगन्मिथ्याकलयन् । पर्यन्ते तत्र भिक्षुसदने स्थानाभावात्कतिचन तत्कालमेव सद्योमुक्तिं लेभिरे, येऽद्यावधि स्वच्छन्दं प्रजानां धनापहारं शोषणं च कुर्वाणाः स्युः ।

समाजस्य विभिन्नगुणकर्मस्वभावा व्यक्तय इव भिक्षुवर्गेष्वपि च केचन सरलाः कतिपये कुटिलास्तीक्ष्णबुद्धयोऽपरे मृदुला ऋजवः कटुभाषिणो नीतिपथप्रवीणा वा भवन्ति भिक्षुकाः । ये चातीवकूटाभिसन्धिप्रतिभावन्तो लुब्धा भूरिलाभलवलिप्सवस्ते प्रचुरं धनमुपार्जयन्ति । पुनर्ये सरलमतयस्ते महता काठिन्येनोदरभरणक्षमामेवाल्पीयसीं भिक्षां कथमप्याप्तुं प्रभवन्ति । अत्र द्वितीयवर्गस्थेषु सरलप्रकृतिकेषु भिक्षुकेषु केचन ते भूमिहीना ग्रामीणा कर्षकाः श्रमजीविनोऽपि परिगण्यन्ते ये स्वयमुद्योगिन उपार्जनक्षमाः सन्तोऽपि च स्वक्षमतानुरूपं कार्यमलभमानाः स्वक्षेत्रात् स्थानात्स्थानान्तरं जीविकावृत्तिमन्वेष्टुं यतस्ततो भ्राम्यन्ति । तत्रापि च स्वानुकूलं व्यवसायमुद्योगयोग्यं कर्मक्षेत्रं साधनानि सुविधां



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



समितीनां निर्देशनाय च प्रांतसमितीनां तासां कृते अखिलभारतीयसंस्कृतसाहित्यसमितेरथवा सम्मेलन-श्यकता ।

सम्मेलनस्य तत्त्वावधाने विद्वद्भिः संस्कृतशिक्षा-ल्यां नव्य-ज्ञान-विज्ञानराहित्येन ये दोषा आगताः निराकर्तुं प्रयत्नकरणं नितांतमावश्यकम् । पाठन-ल्यां सारल्यं, सौकर्यं, मनोरंजकत्वं च सम्पादयितुं आवश्यं करणीया । यतः संस्कृत-छात्रा नीरसफक्किकां ला २ स्वयं फक्किकारूपा (फक्किं=फाकामिति हिन्दी तीति फक्किकः ते) भवितुमारब्धाः । अतः अस्यां ल्यां आमूलचूलपरिवर्तनं संस्कृतोन्नत्यै प्राथमिकीं श्यकतां बिभर्त्ति ।

संस्कृताध्यापकानां नूतन-पाठन-विधि-शिक्षणाय ते २ अखिलभारतीय-संस्कृतसाहित्यसम्मेलनस्य कत्वे अध्यापक शिक्षण-विद्यालयानां (Teachers ining Colleges) परमावश्यकता ।

अखिलभारतीयसंस्कृतसाहित्यसम्मेलनेनाऽपि प्राची-र्वाचीन-ज्ञानसमुद्रयोरवगाहनं कारयितुं हिन्दीसाहि-सम्मेलनवत् परीक्षा प्रवर्तनीया । यावत्पर्यन्तं सर्व-रेण अखिलभारतीय-संस्कृत-विश्वविद्यालयस्य स्थापना विधीयेत तावत्पर्यन्तं सम्मेलनस्य परीक्षाविभागस्य वधान एव विद्वद्भिः संस्कृतपरीक्षासु समस्तनव्य-नं सम्पादयितुं प्रयतनीयम् ।

गीर्वाणवाण्या वरदविदुषामेतदपि महत्वपूर्णकर्तव्यं ते सरलसंस्कृते-आधुनिकविषयेषु यथा विज्ञाने-तिहास-भूगोल-राजनीति-कथोपन्यासादिषु स्वलेखनी-त्कारप्रदर्शनपरा भवेयुः ।

संस्कृतलेखने देववाण्यपकर्षकालसूचिकां पाण्डि-त्यप्रदर्शनशैलीमन्धपरम्पराञ्च विहाय सरल,सरस,गम्भी-रलेखकानां वाल्मीकिव्यासकालिदासप्रभृतीनामनुकरणं प्रकुर्युः ।

संस्कृतकविभिः जनसम्पर्कं विधाय लोकजीवन-स्पर्शकारिणी रचना विधेया । यस्यां दीनहीननिपीडित-जनताया वेदना मूर्तिमती भूत्वा पाठकं करुणाविगलितं कारयितुं क्षमा स्यात् ।

अन्यभाषावित्संस्कृतज्ञैरन्यभाषापुस्तकानामनुवादका-र्यमपि करणीयम् । आयुर्विज्ञान, ज्योतिर्विज्ञानादिविष-येषु नवीन, ऋषि-अर्चनस्य (Research) महत्याऽऽ-वश्यकता । एतत् कार्यमपि सुयोग्यसंस्कृतमनीषिणामे-वाधीनम् ।

वर्तते प्रचारस्याऽस्मिन् युगे समाचारपत्राणां मह-त्ताऽवर्णनीया । अतः—"अखिलभारतीयसंस्कृतसाहि-त्यसम्मेलनस्य तत्वावधाने हिन्दुस्तानधर्मयुगादीनां सम-ताकारिणां दैनिक,सचित्र-साप्ताहिकसंस्कृतपत्राणां प्रका-शनं नितरामाऽऽवश्यकम् । पत्राणां भाषा अतीवसरल-संस्कृतैव स्यात् ।

राष्ट्रभाषाहिन्द्यै नवीनटेकनिकलशब्दानां संयोजना संस्कृतविद्वद्भिः करणीया ।

संस्कृतं राष्ट्रभारतीपदेऽभिषेक्तुमावश्यकमदः यत् संस्कृतस्य प्रचारः समाजस्य समस्तेषु वर्गेषु भवेदन्यथा संस्कृतस्य पूर्णसमुन्नतेराशा वृथैव । स्वापिविवेकानन्दे-नापि प्रोक्तम्—यत् "एकस्मिन्नेव शब्दे वक्तव्यं चेत् संस्कृतं सर्वस्वामिकं भवतु। न तत्र कस्याश्चिदपि एकस्या जातेः विशिष्टवर्गस्य वा एकाधिकारोऽस्तु-इत्येव मम मनीषा।"



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



संस्कृतसमितीनां संरक्षकत्वे स्थाने २ संस्कृतनाटकप्रदर्शनाय रंगस्थलव्यवस्थाऽपि संस्कृतविबुधैः कारणीया। मासिकसंस्कृतवादविवादलेखप्रतियोगिताश्च कार्याः।

संस्कृतविदुषां जयन्त्योऽपि सोत्साहेन सम्पादनीयाः अखिलभारतीयसंस्कृतसम्मेलनस्य नियोजकत्वे आगामिदशवर्षेषु संस्कृतं राष्ट्रभाषा कथं स्यादिति विचारणीयम्। संस्कृतोन्नत्यै सर्वकारं प्रति सम्मेलनस्वीकृतयोजना प्रेषणीया च, राज्यकार्यमपि कतिपयवर्षेषु मध्ये संस्कृतभाषायामेव भवेदिति प्रयतनीयम्।

प्रान्तीयधारासभा च संसत्सदस्यानां संस्कृतज्ञानां संस्कृतोन्नत्यै प्रस्तावान् प्रस्तुतान् कुर्यात्।

## संस्कृतछात्राणां कर्तव्यम्—

संस्कृतस्य प्रौढ़ज्ञानकरणं संस्कृतछात्राणां परमं कर्तव्यम्। यतः अमुं विना संस्कृतस्य प्रतिष्ठा कथं स्यादिति।

आंग्लभाषाछात्राणां बाह्योपकरणादीनामुज्ज्वलतां विलोक्य संस्कृतछात्रेषु यत् हीनभावनोत्पद्यते तां सर्वथा त्यजेयुः। तैर्विचारणीयं यद्बाह्योपकरणादीनामुज्ज्वलता वस्तुतः उज्ज्वलता न–चित्तस्यैवोज्ज्वलता सत्योज्ज्वलता। संघटनं कृत्वा स्वाधिकारम्प्रति सततं जागरूकाः संघर्षपराश्च भवेयुः।

वस्तुतस्तु चरित्रबलसंयुक्ताः अनुशासनपरा यदि संस्कृतछात्राः स्युस्तर्हि संस्कृतं स्वयमेव गीर्वाणवाणी समुन्नतिपदं आरोक्ष्यति।

एवं प्रकारेण यर्हि संस्कृतज्ञाः स्वकर्तव्यपालनपराः स्युस्तर्हि संस्कृतं नातिचिरं राष्ट्रभाषापदवीं धारयिष्यति।

## जनतायाः कर्तव्यम्—

परमस्मिन् विषये जनतायाः सहयोगोऽपि परमावश्यकः। जनताजनार्दनेन संस्कृतसेवकैः कृतं प्रत्येकं कर्म सहानुभूत्या अवलोकनीयम्। संस्कृतप्रेमिश्रेष्ठिनां तु कर्तव्यमदः यत्ते स्थाने २ आदर्शसंस्कृतशिक्षालयानां स्थापनार्थं संस्कृतसेवकानां सहायतार्थं च दानपरा भवेयुः। साधारणजनताया इदं करणीयं यत्सा स्वपुत्रान् संस्कृतशिक्षायामेव नियोजयेत्। यतः पाश्चात्त्यशिक्षाभ्यासिबालका स्वसंस्कृतिनिष्णाता भवितु न शक्नुवन्ति। अतः एव प्रोक्तं विवेकानन्देन स्वामिना—

सामाजिकाधःपातं निरोद्धुं सर्वोत्कृष्टा संस्कृतिः एव प्रभवति न तु अन्यविधो ज्ञानराशिः।......अतः सर्वेषामपि जनानां बहिरङ्गज्ञानाधानापेक्षया हृद्गुहान्तरङ्गे साधुसंस्कृतिप्रतिष्ठापनार्थमेव महान् प्रयत्नः आस्थेयः। सा च संस्कृतिः संस्कृताधीना एव। अतः संस्कृतिरक्षणाय संस्कृतस्य सार्वत्रिकं अध्ययनं अत्यावश्यकं अपरिहार्यं चेति।"

अतः मनसा वाचा कर्मणा केनाप्युपायेन शक्यसाहाय्यं जनताजनार्दनेनाऽवश्यं प्रदातव्यम्।

## सर्वकारस्य कर्तव्यम्—

स्वतन्त्रभारतराष्ट्रस्य सर्वकारेणापि संस्कृतोन्नतिं प्रति क्रियात्मककार्यं करणीयम्। यतः परममहनीया विद्वज्जनमाननीया सौभाग्यशोभनीया गौरवमयी गीर्वाणवाण्येव भारतीयसंस्कृतेरात्मा किंवा भारतस्याऽऽत्मा।

एकसहस्रावधिके भारतीयपराधीनताकाले यदि विदेशीयसर्वकारेण सांस्कृतिक–पुनीत-पयस्विन्या नवप्रवाहो न वर्धितः तत्तु अस्माकं दौर्भाग्यरजनी दोषै-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ऽऽसीत । किन्तु स्वतन्त्रताप्राप्त्युत्तरकालेऽपि आर्य-कृतिसभ्यता-संरक्षिका संस्कृतभाषा स्वसर्वकारेणैव स्यते चेत्तर्हि किं कथनीयम्—आस्माकीनानां दैवदु-तकः-आहोस्वित् सर्वकारस्य संस्कृतमाहात्म्याऽनभि-ऽथवा जानन्तोपि संस्कृततत्त्वं गजनिमीलिका। पि स्यात्। परमेतत् निर्विवादं यत् संस्कृतोन्नतिं विना तस्य मौलिकैकता खण्डिता भूत्वा भयावहां स्थिति-दयिष्यति। अपि च संस्कृतोन्नतिं बिनाऽन्य-भार-भाषाणामुन्नतिरपि परमकठिना। अतः प्रजाहितका-: सर्वकारस्य कर्तव्यमिदं यद् द्वितीयपंचवर्षीययोज-नां संस्कृतोन्नत्यै न्यूनातिन्यूनं एककोटिमितरूप्यकव्ययं येत्।

अस्मिन् द्वितीयपंचवर्षीययोजनाकाले सर्वकारेण लभारतीयसंस्कृतविश्वविद्यालयस्य निर्माणं विधे-। एतदन्तर्गता एकाऽनुसन्धानशाला (Research stitution) एकश्च बृहत्पुस्तकालयोपि भवेत्। त्र संस्कृतस्य प्राचीनार्वाचीनाऽलभ्यहस्तलिखित-कृतग्रन्थानां संग्रहः स्यात्।

एतद्व्यतिरिक्तं सर्वकारः संस्कृतस्योपाधिपरीक्षां लभाषोपाधिपरीक्षासमां कारयेत्। कतिपयवर्षानन्तरं तमेव उच्चपरीक्षामाध्यमं स्यादिति व्यवस्थां कारयेत्।

संस्कृताध्यापकानां जीवनस्तरमपि (Living ndard) उच्चं कुर्यात्।

योग्यतमदेशीय-विदेशीयसंस्कृतछात्राणां कृते वृत्ति स्थाऽपि कर्तव्या।

नवीनपाठ्यपुस्तकनिर्माणाय योग्यविद्वत्समितेः कप्रकाशनसंस्थानकस्य च प्रबन्धः करणीयः।

स्त्रीणां कृते संस्कृतशिक्षणाय विशेषव्यवस्था कार्या। सर्वासूच्चपरीक्षासु संस्कृताध्ययनमनिवार्यं विदध्यात्।

संस्कृतप्रचाराय अखिलभारतीयआकाशवाणी (All India Radio) केन्द्रतः संस्कृतकार्यक्रमाणां प्रसारण-योजनामपि कारयेत्।

संस्कृतकवीनां जयन्त्यवसरे सर्वकारीयः समारोहः सार्वजनिकोऽवकाशश्च विधेयः।

संस्कृताध्यापकानां वेतनस्तरमपि आंग्लाध्यापकैः समं कुर्यात्।

विदेशस्थितराजदूतालयेषु संस्कृतमेव प्रयोक्तव्यम्।

केन्द्रीयसूचनाप्रसारणमंत्रालयेन संस्कृतवृत्तचल-चित्रनिर्माणायाऽऽवश्यकः प्रबन्धो विधेयः।

प्रान्तीयसर्वकाराणाञ्च कर्तव्यमदः यत्ते द्वितीय-पंचवर्षीययोजनाकाले संस्कृतोन्नत्यै प्रान्तीयसंस्कृतविश्व-विद्यालयानां स्थापनं संस्कृतशिक्षालयानामार्थिकसाहा-य्यादिकार्यं च विदध्युः।

एतानि संस्कृतविदुषां-जनतायाः सर्वकारस्य च कर्त-व्यानि। यदि एते स्व स्व कर्तव्यपालनपरा भवेयुस्तर्हि अचिरादेव संस्कृतं भारतस्य राष्ट्रभाषा-भूत्वाऽन्तरराष्ट्रि-यभाषाऽपि भवितुं शक्नुयात। विश्वशान्त्यर्थं शान्त्यु-द्जनबमसमः संस्कृतस्योत्कर्षोऽपि उत्कर्षपूर्णशान्तिप्रदः स्यादित्यहमल्पधीर्मन्ये।

जय जय हे भगवति सुरभारति ! तव चरणौ प्रणमामः।
राष्ट्रगिरा स्यात् संस्कृतवाणी सततमदो वाञ्छामः॥

---



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# 卐 माया 卐

( पाण्डेय रघुवीरप्रसादशर्मा साहित्यविशारदः पाटलिपुत्रमहाविद्यालये, पाटलिपुत्रम् )

एकदा नारदः कृष्णं पप्रच्छ—'दर्शय मां मायाम्'। कतिपयदिवसाः व्यतीताः । कृष्णनारदौ मरुभूमिप्रदेशे यात्रां कर्तुम् प्रस्थितवन्तौ । बहून् क्रोशान् गत्वा कृष्णः प्राह—"नारद, तृषितोऽहम् ,शक्नोषि किं त्वं किंचित् जलं दातुं मह्यम् ? 'गच्छाम्यहं सत्त्वरम् , भद्र, तुभ्यमेव जलमानेतुम् ।' तथा च नारदो ययौ । अल्पदूरस्थः कश्चित् ग्रामः आसीत् , स ग्रामं विवेश जलान्वेषणाय । कस्मिंश्चित् द्वारि शब्दमकरोत् । एका लावण्यवती यौवनरता मृदुलाङ्गिनी बाला कपाटौ अनावृतौ कृत्वा बहिः आययौ । तस्याः प्रथमदृष्टिनिक्षेपमात्रेण स विस्मृतवान् क्षणे एव यत् तस्य स्वामी जलहैतुकीं प्रतीक्षामकरोत् , अपि च जलाभावे मृतक इव वर्त्ततेस्म । सर्वं विस्मृत्य तया रमण्या सह वार्त्तालापमारेभे । दिवसः व्यतीतः, परं हि स न प्रत्यावर्तितवान् स्वामिनः सकाशम् । अपरस्मिन् दिवसे स तत्र पुनः आययौ, रमण्या सह मधुरालापमारेभे च । आलापे संलापे प्रेम परस्परं जातम् । स तस्याः जनकमाहूय कथितवान् वार्त्ताम् अयाचत च ताम् विवाहाय । परिणयं कृत्वा तौ निवसतः स्म सन्तानं च प्राप्नुवन्तौ । द्वादशवर्षाणि व्यतीतानि । श्वशुरे पंचत्वं गते स तस्य सम्पत्तिमधिकृतवान् । स स्वभार्यया शिशुभिश्च सह स्वेच्छया ससुखं स्वक्षेत्रे स्व पशुभिः सम्पन्नः सुखमयजीवनं यापयामास ।

व्यतीते किंचित्काले जलप्लावनम् उग्ररूपेण बभूव। एकस्यां रात्रौ नद्यां जलं विवर्द्धमानमासीत् , तटानि भग्नानि, ग्रामः प्लावितः । गृहाणि पतितानि, जनाः पशवश्च जलधारया नीताः प्रवाहिता जले मग्नाश्च बभूवुः। धारया सह सर्वाणि वस्तूनि प्रवाहितानि ।

नारदः स्वरक्षां कर्तुं प्रायतत । एकेन हस्तेन स स्वप्राणवल्लभां गृहीतवान् , अपरेण द्वौ शिशू , अन्यः तस्य स्कन्धयोरासीत् । अनेन प्रकारेण सर्वं समावृत्य स भीषणप्लावनात् त्रातुं प्रयत्नशीलोऽभूत् । द्वि चतुराणि पदानि गत्वा स अतितीव्रां धारां अलभत । तस्य स्कंधाभ्यां पतितः शिशुः जले च मग्नः । नारदः चीत्कारमकरोत् । तस्य बालकस्य रक्षणचेष्टायां अपरः शिशुः तस्य करात् निष्क्रम्य जले प्रवाहितः । अन्ततो गत्वा तस्य पत्नी प्रवाहिता यद्यपि सा तेन सशक्तहस्तेन धृता आसीत् । स स्वयं तटे प्रक्षिप्तः, शोकसम्विग्नमानसः। तस्य पृष्ठभागात् नम्रः स्वरः आययौ—'वत्स ! कुत्रास्ति जलम् ? त्वं गतोऽभूः जलं प्राप्तुम् , अहम् अत्र तव प्रतीक्षायां स्थितः । त्वं अर्द्धघटिकापूर्वं गतोऽभूः ।

'अर्द्धघटिका !' नारदः साश्चर्यमुवाच । सम्पूर्णानि द्वादशवर्षाणि व्यतीतानि तस्य मनसि, दृश्यानि च सर्वाणि विघटितानि अर्द्धघटिकायामेव ।

कृष्णः प्राह—'नारद' इयमेव माया !'



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# व्यासजयन्ती

( पि॰ वि॰ कृष्ण वार्यर, संस्कृत उपाध्यायः, एच. ई. एच. एम. एम. एच. एस. काञ्च )

[ व्यासदिनमहामहे (२२-७-१९५६ व्यासपौर्णिमादिने) एरणाकुलम् महाराजकीयकलाशालायां सम्मिलितायां सभायां पठितः उपन्यासः ]

विदितमेव हि भवतां महात्मनां यत् केचन पण्डितम्मन्याः संस्कृतभाषां मृतभाषां निर्वक्तुं जाताभिलाषाः सन्तीति। तथापि भारतभूमेः स्वातन्त्र्यलाभात् परं केचित् विद्वांसः सा जीवद्भाषैवेति वक्तुमारभन्तेति सन्तोषावह एव। एतादृशेऽवसरे संस्कृतभाषायाः पितृतुल्यार्हस्य कस्यचन महाशयस्य जन्मदिनाघोषे संस्कृतभाषायाः क्रियमाणं प्राभषणं संस्कृताभिज्ञानां विदुषां सन्तोषमेवावहेदिति मे विश्वासः।

यो महामुनिः वेदव्यसनात् सञ्जातमहायशाः, यत् अष्टादशमहापुराणसिन्धुतोयजलाञ्जलिपानेन भासकालिदासादयोपि स्वकीयसारस्वतप्रक्रियां कर्तुं प्रभवन्ति स्म, यस्मै च वेदविदो ब्राह्मणाः प्रतिदिनं प्रतिसन्ध्यं "व्यासं वसिष्ठनप्तारं" "व्यासाय विष्णुरूपाय" इत्यादिभिः स्तोत्रैः नमस्कृतिं कुर्वन्ति, तस्मै पुराणानां कर्त्रे, गरीयसां महसां संहर्त्रे, विज्ञानविशेषाणां दात्रे, विदुरमरणावतीर्णस्य पितृपतेरपि पित्रे प्रथमतः नमस्कृतिं कुर्मो भक्तियुक्तेन मनसा॥

वेदानां व्यस्तिहेतोः व्यासः इति, द्वीपान्तर्भूतसंव्यापनात् द्वैपायन इति, कृष्णवर्णात् कृष्ण इति च समाख्यायमानः सोऽयं महामुनिः वैकर्तनीमुत्तर्तुमागतस्य मुनिवरस्य पराशरस्य तत्रैव नद्यां यदृच्छया दृष्टायां सत्यवत्यां दासपुत्र्यां सञ्जातः पुत्रः इति समाचक्षते पुराविज्ञाः। किन्तु न मम विश्वासभूमिमारोढुमलमयमितिहासः। प्रत्यूषसमये पराशरमुद्वहन्ती नौका तावत् नदीवेगेन कस्मिन्नपि द्वीपे संलग्ना, ततश्च तस्मिन्नेव द्वीपे प्रभातविभावसुसमप्रभः कोऽपि कुमारः पराशरेण दृष्टः स चानपत्यतया तं पुत्रनिर्विशेषेण वात्सल्येन पोषितवान् स एव व्यास इत्येव मे मनीषा। न कदापि कापि दाशकन्यका महायशसः महामुनेः सवित्री भवितुमर्हति।

सोयं व्यासः कृतयुगे वसिष्ठादीनां तपोधनानां कुले कृतावतार इति भारतीयाः वर्णयन्ति। आङ्गलेयास्तु व्यासो नाम न कश्चित् पुरुषविशेषः, किन्तु व्यासः इति गोत्रनामधेयाः, केचन तपोधनाः तत्तत्कालीनाः इति तर्कयन्ति। एतादृशचिन्तासागरमग्नो भूत्वा न वृथाकालं नाशयितुमिच्छामि। परन्तु युद्धाद्यधार्मिकमार्गनिरतेषु ज्ञानवैराग्यमोक्षादिषु विमुखीभूय बंभ्रम्यमाणेषु सर्वेष्वाङ्गलेयेषु भारतीयाः परं आध्यात्मनिरतां भूत्वा कर्मभूमिं भारतभुवं ससुखमावसन्ति चेत् तस्य निदानं व्यासप्रभृतीनां महामुनीनां परार्थपरित्यक्तजीवितानां सदुपदेशमाहात्म्यमेवेति निश्चप्रचमेव।

अपारे संसारे मज्जनोन्मज्जनमादधानेषु जनेषु तेषामनुजिघृक्षया सदुपदेशभूयिष्ठानि सत्कथासहस्रविलसितानि महापुराणानि निर्मातुमिच्छामावहन् तत्रभवान् व्यासमहामुनिरित्याहुः। तथाहि "अष्टादशपुराणानां कर्ता सत्यवतीसुतः" इति खलु पुराविदः कथयन्ति॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



"मद्वयं भद्वयं चैव बत्रयं वचतुष्टयम् अनापलिङ्गकूस्कानि पुराणानि महामुनेः" इति सूतश्लोकेन विख्याताख्येषु तेषु पुराणेषु कानिचित् वैष्णवैः भक्तैः परं पठ्यमानानि वराहादीनि, कानिचित् मार्कण्डेयादीनि शैवैः भक्तैः परं लालितानि च भवन्तीति वयमुत्पश्यामः। अनेन तेषां भिन्नकर्तृत्वं न शङ्कनीयम्। यथा पौरोगवः एकस्मिन्नेव महानसे बुभुक्षूणां रुचिभेदेन बहूनि व्यञ्जनानि व्यत्यस्तरुचीनि करोति तथा महामुनिरपि भिन्नमार्गावलम्बिनां मुमुक्षूणां भक्तानां भिन्नरुचित्वमभिलक्ष्य विविधानि पुराणानि निर्मितवानिति निश्चेतुमलम्। यतः भिन्नमार्गावलम्बिनामपि मोक्षदशायामेकस्मिन्नेव विलयः इति स सम्यक् जानात्येव। अन्यथा "एको देवः सर्वभूतेषु वासी, सर्वव्यापी, सर्वभूतान्तरात्मा" इत्याद्युपनिषद्वचनं कथं सङ्गतं भवेत्? अतएव "आकाशात् पतितं तोयं यथा गच्छति सागरं, सर्वदेवनमस्कारः केशवं प्रति गच्छति" इत्युक्तवान् महामुनिः।

एतान्यष्टादशपुराणानि मुद्रितानि न केवलं भारते, किन्तु देशान्तरेष्वपि प्रसिद्धानि, चरित्रान्वेषणविचक्षणैः बहुसंख्यकैः भक्तैश्च सादरं सश्रद्धं पठ्यन्ते कलियुगेऽस्मिन्नपि। तेषु पुराणेषु विष्णुभक्तैरमृतमिव पीयमानं, भगवतः विष्णोः विविधैरवतारैर्विभूषितं विशिष्य कृष्णस्य बालक्रीडादिभिरलंकृतं, मुमुक्षुभिः सप्ताहयज्ञादिषु पठ्यमानं, सरलं, सरसं कथाभिरुपकथाभिश्चालंकृतं भागवतपुराणं पुनरासेतुहिमाचलं प्रसृते भारते प्रसिद्धतममिति निर्मत्सरबुद्धिभिरङ्गीकृतमेव। यद्यपीदं पुराणं नाऽष्टादशपुराणान्तर्गतमिति मनीषिणः कथयन्ति तथाप्यस्य व्यासकर्तृत्वे नास्ति विवादो विदुषाम्। तत्रान्तर्गता सम्मताख्येन वृत्तविशेषेण ग्रथिता "जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि" इत्यादिपद्यैरारभ्यमाणा गोपिकागीता सर्वभागवतसारभूता भगवतो महर्षेः व्यासस्य महामुनित्वमिव महाकवित्वमपि प्रकाशयन्ती लसति। काले कदाचित् केरलीयैः कैरल्याः कण्ठाभरणभूत इति वर्णितः द्वितीयाक्षरप्रासोऽपि गोपिकागीतायां दृश्यत इतीदं कौतुकावहमेवास्माकं केरलीयानाम्।

"श्रुत्वा गुणान् भुवनसुन्दर शृण्वतां ते
निर्विश्य कर्णविवरैर्हरतोऽङ्गतापान्।
रूपं दृशां दृशिमतामखिलार्थलाभं
त्वय्यच्युताविशति चित्तमपत्रपं मे"

इत्यादिभिः पद्यैः ग्रथिता रुक्मिण्या श्रीकृष्णाय प्रहिता सन्देशवागपि सहृदयानामोदमहोदधौ मज्जयितुमलमिति निर्विवादमेव। एवं ध्रुवाम्बरीषाजामिलानां कथासु वर्ण्यमानासु महामुनिनानेन प्रदर्शितं कवितानिर्माणपाटवं तत्र सर्वत्राभेदेनास्वाद्यमानं स्वारस्यं च वर्णयितुं विस्तरभयात् मया न यत्नः क्रियते। तथापि वेदान्तसर्वस्वसारभूतः एकादशस्कन्धान्तर्भूतः उद्धवोपदेशः विशेषतः परिगणयितुमर्हतीति कथयनीयमेव।

अयि भोः महाशयाः, व्यासनिर्मितानि पुराणान्यधिकृत्य मया नातिविस्तीर्णतया यत् किमप्युपन्यस्तम्। तथापि तेन महामुनिना कृतं महाभारतमधिकृत्यापि किञ्चिदिवानुक्त्वा यद्युपन्यासोऽयं समाप्नुयात् तर्हि तदतीवासमीचीनतां व्रजेत्। अतः महाभारतं तद्द्वारा व्यासस्य महिमातिशयं च प्रख्यापयितुमुचितमिति मन्ये। अष्टादशपुराणानां निर्माणानन्तरं तेषु वर्णितः कथानां भागः ग्रन्थेनैकेन संक्षेपतः समाहृत्य कथनीयः इति कृत्वा तेन महामुनिना निर्मितं महाभारतमिति खलु विद्वांसो वदन्ति। अत एवाष्टादशपुराणानां संक्षेपात्मकतया ग्रन्थस्यास्य महत्त्वं, तादृशात् भारवत्त्वाच्च महाभारतमिति



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

इयं संस्कृतभाषा भारतीयाया एतस्याः सुम-
तृ प्रतीकम्—'पूना' प्रदेशस्थे "भाण्डारकर–शोध-
संस्थाने" भारतप्रधानमन्त्रिणः श्रीनेहरूमहोदयस्य भाष-
अगस्तमासस्य १ तारिकायामभूदिति पठितं स्यात्संवादपत्रपाठकैः। प्रधानमन्त्री 'भाण्डारकर-प्राच्यसंशोधनसंस्थाने' (भाण्डारकर ओरिएण्टलरिसर्च इन्स्टिट्यूट) सार्वजनिकसभायामासीद् भाषमाणः। पूर्वोक्त संशोधनसंस्थाने भारतीयसाहित्यस्य अक्षय्यो निधिः श्रीमन्महाभारतं बहोः कालान् मुद्रयमाणमस्ति इति ज्ञातं स्यात् संस्कृतसेविभिः। महाभारतस्यास्य संप्रति 'शान्ति-

---

...र्वा च सङ्गच्छते। "धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ, यदिहास्ति तदन्यत्र यन्नेहास्ति न कर्हिचित्" इत्ययं श्लोकः अस्य महाग्रन्थस्य सर्वग्रन्थसारभूतत्वं प्रख्यापयति। लक्षाधिकैः पद्यैः प्रथितोऽयमितिहासः लोके विद्यमानेषु तादृशेषु बृहत्तममिति सर्वे कथयन्ति। असंख्यैः उपाख्योपकथागणैः उपदेशैः स्तोत्रैः चातुर्वर्णिकानां धर्मसदाचारभेदैः सरससुपर्वणितैर्विभूषितस्यास्य ग्रन्थस्य ...रास्तिकैरधीयमाना समस्तोपनिषद्रहस्यभूता श्रीमद्भगवद्गीता सर्वहैन्दवग्रन्थानां नायकत्वमापादयति। ...तिदिनं भक्तसहस्रैः सादरं पठ्यमानं श्रीविष्णुसहस्रनामस्तोत्रमप्यस्मिन् ग्रन्थ एव सङ्घटितं महामुनिना॥

...वकहिडिम्बादीनां रूपवर्णनं, सर्वत्र सुलभतया वर्णितः ...नानां नदीविशेषाणां च विलासः, घटोत्कचप्रभृतीनां ...यात्रा, किं बहुना व्यासस्य तूलिकानिर्गतानि सर्वाण्यपि सहृदयस्य मनसि चित्रवत् प्रतिभान्ति। श्रीकृष्णविदुरसञ्जयादीनां राष्ट्रतन्त्रज्ञता तावदाधुनिकानपि ...समापयेत्॥

विदुरस्य सर्वज्ञता, भीष्मस्य परोपदेशनिपुणता, ...स्त्राभ्यसनपाटवं, कृष्णस्य भक्तवात्सल्यं आपदुद्धरणक्षमत्वं च, युधिष्ठिरस्य धर्मज्ञता, कर्णस्य दानशीलता, दुर्योधनस्य लोभः, याज्ञसेन्याः निश्चयदार्ढ्यं, भीमार्जुनयोर्भ्रातृभक्तिः, पृथायाः दुःखेष्वक्षोभ्यता चैवमादिविविधानां व्यक्तिविशेषाणां स्वभावस्य वैविध्यं वैचित्र्यं चावहन् महाग्रन्थोऽयं सर्वान् प्राचीनानर्वाचीनांश्च एतादृशसर्वातिशायिनो ग्रन्थस्य निर्माणेनैव वेदव्यासः सर्वेषामस्माकं स्मरणपथादगच्छन् सर्वदा विलसति।

एवं बहूनां पुराणानां महाभारतस्य च निर्माणेन सेतुहिमाचलपर्यन्तं व्याप्तस्य भारतखंडस्याध्यात्मिकशक्तिं सुदृढयन्, तद्द्वारा तस्य कर्मभूमित्वमपि सम्पादयन्, निःस्वार्थेन सेवनेन, निर्मत्सरेण कर्मणा च जनतामनुगृह्णन्, अतिपुरातनोऽप्याधुनिक इव विदुषां हृदयकमलेष्वनवरतं निवसन् वेदव्यास इव यद्यपरोऽस्ति सः वेदव्यास एवेत्येव वक्तव्यं भवति। तादृशस्य महाभागस्य जन्मदिनेऽस्मिन् तस्य स्मरणे, तदपदान् कीर्तने, तन्निर्मितानां ग्रन्थानां वर्णने चास्मादृशाः जनाः प्रयत्नलेशमपि यद्यातिष्ठेयुः तर्हि तदस्माकमवश्यकर्तव्यानुष्ठानव्यग्रतामेवोद्घोषयति।

अयि भोः महान्तः सन्तः अस्मत्कृतेऽस्मिन् प्रभाषणे दत्तश्रद्धानां युष्माकमयमञ्जलिः।

---



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पर्व-शल्यपर्वणोः' त्रयो भागाः पूर्तिं गताः। अतएव संस्थानेऽस्मिन् साहित्यसेविभिः राजकर्मचारिभिः अगस्तमासस्य प्रथमदिवसे सोयमुत्सवः समारोपितोऽभूत्। अस्मिन्नुत्सवे समवेतुमामन्त्रितोऽभूत् प्रधानमन्त्रिमहाभागः। वायुयानस्य अवमोचनस्थाने ['हवाई अड्डा'] समवतीर्यैव श्रीनेहरुमहाभागो मोहमयीप्रदेशस्य राज्यपालेन, मुख्यमन्त्रिणा च सह भाण्डारकरीयं संशोधनस्थानमिदमुपागमत्। चतुःक्रोशदीर्घेऽस्मिन् व्यायते मार्गे अपारा जनता निजस्य जननायकस्य चिरकांक्षित दर्शनमतीवोत्सुकतया कुर्वन्ती आसीत्।

पं० नेहरूमहोदयो निजभाषणस्य शीर्षकरूपेण प्रथम-प्रथममेव सोत्साहं समभाषत—"यत् देशस्याऽस्य राजनैतिकं कीदृशमपि स्वरूपं भवेत्, किन्तु संस्कृतभाषा आर्याणां मूलभाषारूपेण देशस्याऽस्य एकतामद्यावधि अक्षुण्णरूपेण स्थापयामास। सेयमार्यभाषा भारतीयजनतायाः सांस्कृतिक्याः एकतायाः सुमहामहत् प्रतीकम्।

अभाषत प्रधानमन्त्रिमहाभागः—यदा ह्यहं पुण्यपत्तनार्थं प्रस्थितोऽभवं तदा स्पष्टं मे प्रतिभातमभूद् यद् राजनैतिकीं मलिनतामुल्लंघ्य सत्यस्य विचारस्य च पुण्यमये प्रदेशेऽहं गच्छामि। अस्मिन्नवसरे द्वे अपि कार्ये मत्संमुखमतिमहत्त्वस्य समुपस्थिते, एकमिदं शोधसंस्थानम्, द्वितीयं चाद्यैव समुपस्थितं लोकमान्य-तिलक महाभागस्य निर्वाणदिनकार्यम्, यस्य कारणादिदं मे समागमनमत्राऽभूत्।"

## प्रशंसनीयं कार्यम्

पं० नेहरूमहाभागेनोक्तम्—"क्रियात्मकराजनीतिकार्यादपि समधिकसुस्थिरं तदिदमस्ति यदिदं विशालकायस्य महाग्रन्थस्य समीक्षात्मकं प्रकाशनं नाम। एवंविधा ग्रन्था अस्माकमतीतं महत्त्वमस्मान् पुनः पुनः स्मारयन्ति। संस्कृतसाहित्यस्य तदिदं महाकाव्यमस्माकं प्रशंसनीयस्याऽतीतस्याऽद्वितीय इतिहासः। अनेन हि स्पष्टमिदं प्रमाणितं भवति यत् संस्कृतभाषा सहस्रसहस्रवर्षाणि यावत् आर्यदेशस्याऽस्य मूलभाषारूपेण भूमण्डलेऽस्मिन् गौरवान्विता प्राचरत्।"

भारतमिदं संस्कृतभाषायाः, तथा ज्ञानप्रभुत्वस्य कारणादत्यन्तं समृद्धिशालि समभवत्। पुरातनं तदिदमेव ज्ञानस्वत्वम् ('विरासत') अद्यतनानां भारतीयसंतानानां सविधे महत्त्वाय विद्यते।" प्रधानमन्त्रिमहाभागो भारतीयजीवनं, तस्य संस्कृतेर्महत्त्वम्, भारतस्य पुरातनसमृद्धिशालितां चाऽऽलम्ब्य बारं बारं देशस्याऽस्य गौरवमघोषयत्। पं० नेहरूमहाभागेनोक्तम्—"संस्कृतं जनतायाः परस्परसंलापस्य भाषा कदापि नाऽभवत्। एषा हि अनन्तशताब्दीरारभ्य भारतस्य जीवने, तत्संस्कृतेश्च विषये प्रधानं मूलकारणमासीदिति कथने न कोऽपि मे संदेहः। एतदप्यहं निःसंशयं मन्ये यत्सेयं भाषा भविष्यत्कालेऽपि महत्त्वपूर्णमिदं पदमधिरूढा भवेत्। अनुसंधानक्षेत्रे भाण्डारकरीयस्याऽस्य शोधसंस्थानस्य भूरिभूरि महत्त्वं नूनम्। विवादास्पदतां परिहाय महाभारतस्य तदिदं संस्करणं भारतीयविकासयोजनायामतिमहत्त्वपूर्णं कार्यं सेत्स्यति। महाभारतस्याऽस्य भारतीयलोकानां मस्तिष्के अतिगभीरः प्रभावश्चिरकालात्सुस्थिरोऽभवत्, भविष्यत्काले चापि सोयं तिष्ठेत्।

संस्कृतभाषाया महत्त्वमुद्घोषयन् नेहरूमहोदयो मानवजीवने विचारशक्तेरेव सर्वोपरि महत्त्वमास्थापयत्।" यद्यपि क्रियाशक्तेः स्थानमपि न किञ्चिद् हीनम्, किन्तु विचारशक्तेः स्थानं सर्वाधिकमहत्त्व-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



र्णम् । प्रत्युत क्रियाऽपि विचारबलेनैव अनुप्राणिता भवति । पुरातनकाले भारतस्य महत्त्वपूर्णं यत्किल प्रदानम्' (देन) अस्ति, तद्धि संस्कृतभाषाद्वारा 'एकता' स्थापनं नूनम् । संस्कृतभाषाया अध्ययनं, सर्वतः प्रयोगश्च भारतस्य प्रत्येकप्रान्ते समभवत् । यद्यपि पुराकाले देशोऽयं बहुषु राजनैतिकभागेषु ('इकाइयां') विभक्तो ऽभवत् किन्तु संस्कृतभाषया, तत्प्रकटितविचारैश्च भारतस्य एकता सुस्थिरी कृता । सेयं संस्कृतभाषा पुरातनभारतस्य परम्परायाः, ज्ञानपिपासाप्रतिरोधकस्य च प्रतिनिधित्वं करोति । अद्यतनेऽस्मिन् भौतिकयुगे भारतीयज्ञानाऽर्जने एव सर्वात्मना प्रयतितव्यम् ।"

अस्मिन् प्रसङ्गे पं० नेहरूमहोदयो भाण्डारकरीयशोधसंस्थानस्य, अन्यान्यसंस्थानां च, भूरिप्रशंसामकरोत् या हि प्राचीनज्ञानस्य गवेषणे संलग्नाः सन्ति । निजभाषणस्योपसंहारे नेहरूमहोदयः सोत्साहं समभाषत—"भविष्यत्काले भारतस्य भवेत्कार्यं कीदृशमपि रूपं किन्तु मम नास्ति स्तोकोऽपि संदेहो यत् सेयं संस्कृतभाषा, तद्द्वारा प्राप्तव्यं ज्ञानं च सर्वदैवाऽस्माकं सहचरे भवेताम् ।"

**भीषणो दैवप्रकोपः**—अस्मिन् वर्षे स्थानस्थानतो दैवकृतानामुत्पातानां संवादाः समुपलभ्यन्ते । इन्द्रकृता वर्षा प्राणिनां जीवनदानाय संपद्यते । यदि कस्मिन्नपि वर्षे वर्षायास्त्रुटिश्चेत्सम्पद्यते तर्हि देशे सर्वतो हा हा कार इव प्रारभ्यते । मनुष्याणां पशूनां च जीवनसंशयः समुदेति । किन्तु सैव वृष्टिः सीमानमुल्लंघ्य यदि भीषणं रूपं धारयति तर्हि लोकानां जीवनदानस्थाने सैव जीवनापहर्त्री संभवति । अस्मिन् वर्षे प्रारम्भत एव वर्षायाः प्राचुर्यं परितः प्राऽलोक्यत । हिमालयाञ्चले

न्यू इण्डिया सूगर मिल्स लि०

हसनपुर रोड़ (बिहार)

शुद्धकणशालिन्याः इक्षुशर्करायाः निर्मातारः—

मैनेजिंग एजेंटस्

दी काटन एजेंटस् प्राईवेट लि०

कलकत्ता ★ बम्बई



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


वैशाखादेव वृष्टिः प्रारभ्यत, येन बदरीनाथयात्रिणां स्थाने स्थाने मार्गाऽवरोधः, धन-जनक्षयश्च संभाव्यते स्म। मद्रासप्रान्ततोऽपि कावेरीनद्याः पूरोपप्लवस्य संवादः पठितः पत्रपाठकैः। बिहारप्रान्ते तु प्रायः प्रतिवर्षमेव नदीनां पूरवृद्ध्या धन-जनहानिः श्रूयते।

ऐषमः राजस्थानतोऽपि वर्षाऽऽधिक्येन जनतायां हानेः कोलाहलः श्रूयते। मेदपाटे (मेवाड) ये तडागाः संपूर्णवर्षे निरन्तरवर्षया भ्रियन्ते स्म, ते हि दिनद्वय वृष्ट्यैव पूरिताः। 'जालोर' स्थाने भीषणवर्षया वाष्पशकटिमार्गस्य लोहलेखाः स्थाने स्थाने विशीर्णाः। 'मोदरा' नगरे स्थाने २ धान्यराशिर्भूमिसात् जातः। मेदपाटस्य बहुषु ग्रामेषु कृषीवलाः, अस्पृश्यजातीयाश्च जना गृहहीनाः संपन्नाः बहुषु स्थानेषु छागादयः पशवः प्रवाहे व्यपगताः। एवं सर्वतो विपद्ग्रस्ता जनाः सांप्रतं सर्वथा खिद्यन्ते। धनिकानां धनसाहाय्येन विपद्ग्रस्तेभ्यः अन्न-वस्त्रादिप्राप्तिर्भवति।

एकतो वर्षाऽधिक्येन लोकानां कोलाहलः श्रूयते, अपरतो भूकम्पेन जनानां विपत्तिरुपगता। पञ्चदशदिवसा व्यतीताः, कच्छप्रदेशे भयानको भूकम्पः समभवद् येन १०१ जनाः सर्वथा मृताः, त्रिशतं पुरुषाश्च आहताः समभवन्। अञ्जारप्रदेशे पञ्चशतं गृहाः सर्वथा धराशायिनो जाताः, अनुमानतस्तावन्त एव च विशीर्णाः। दमाकडा-दुधाईप्रभृतिग्रामेषु शत-शतगृहा विशीर्णाः। भूकम्पप्रारम्भे एव जना गृहान् परित्यज्य बहिः पलायिताः अतएव मनुष्यहानिर्न तावती जाता। गृहहीनानां सहायतार्थं स्थाने २ धनसंचयः क्रियते।


# हरिनगर सूगर मिल्स लि०

फैक्टरी

हरिनगर (एन० ई० रेल्वे) (चम्पारन जिला) उत्तर बिहार

दूरभाषयन्त्रम्—

'मर्यादा-रामनगर (चम्पारन)'

प्रधानकार्यालय :—

२०७, कालबादेवी रोड, बम्बई-२

दूरभाषयन्त्रम्—

'क्रिसूगर' (बम्बई)

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

* प्योअर, * फर्स्टक्लास, * क्रिस्टल * केन सूगर




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## स्कृतसमाचाराः—

नगरेगुरुपूर्णिमामहोत्सवः-सदैवानुसारेण २२-७- दिने स्थानीयसार्वजनिकश्रीसंस्कृतविद्यालये गुरु-मामहोत्सवः अपूर्वसमारोहेण सम्पादितः। प्रथम-ने हरिकीर्तनेन नगरभ्रमणं कृतम्। द्वितीयदिने पूज्य-श्रीगुरुदेवस्य पुष्पवृष्ट्या भव्यस्वागतम् तथा स्तिपाठानन्तरं पूजनञ्चाभूत्। ततः तेषां भाषणमभूत् भाषमाणैरुक्तम्। यत् प्राचीनप्रणाल्यनुसारेणैव यदि नाया: माध्यमो भवेत्, चेत् देशे कर्मठाः कर्तव्य-यणाः सच्चरित्राः देशभक्ताः अभिनेतारः समुद्भ-यन्ति। तदैव वैषम्यस्य नाशो भविष्यति। इदमेव तं देशोत्थाने सदुपायः। ततः धार्मिकसामा-कभजनानां पुरोगमनमभूत्। अस्मिन् शुभावसरे

---

क्षप्रदेशीयशासनविभागतः पञ्चविंशतिसहस्रमुद्राणां हाय्यं विपद्ग्रस्तेभ्यः प्रादीयत। कच्छ-सौराष्ट्रेषु भू-पो भीषणतया समभूदेव। किन्तु इतो दूरस्थेषु पुर-जूनागढ-जामनगर-भावनगरप्रभृतिष्वपि भूक-स्य आघाताः सुतरामनुभूयन्ते स्म। देशनेतारः सहा-यं कर्तुं कच्छादिप्रदेशेषु यात्रां कुर्वन्ति। मोहमयी-तिषु धनिकनगरेषु भूकम्पपीडितानां सहायतार्थं वस्त्रादिसंग्रहः क्रियते, प्रचुरमात्रायां प्रेष्यते च। बलीयान् विधिः। वर्तमानकालिकाः शासकाः देवतीर्थादिकं सव तिरस्कृत्य आत्मानः प्रभुत्वं र्शयन्ति, किन्तु देवतिरस्कारजनितां दैवीमापदं न ते काः परिचिन्वन्ति। संप्रति भगवानेव रक्षको याः।

—

कतिपयलब्धप्रतिष्ठाः नागरिकाः उपस्थिताः आसन्। सायंकाले मधुरध्वनिना कीर्तनं भूतम्। इत्थं सुचारु-रूपेण सम्पादितम्।

### व्यासजयन्तीमहोत्सवः

#### पण्डितसम्मानः

अस्माभिरत्र पर्तपुर्यां (गुण्टुरु) दुर्मुखसंवत्सराषाढपूर्णिमायां भानुवासरे (ता० २७-७-५६) पुण्यश्लोकस्य व्यासाचार्यस्य जयन्तीमहोत्सवः प्रचालितः आसीत्। महर्षिपूजानन्तरं मध्याह्ने तृतीयघण्टावादनसमये सभा सुमहती प्रचालिता।

महोपाध्यायाः मध्वश्रीकाशीकृष्णाचार्यमहोदयाः अध्यक्षपीठमलमकार्षुः।

श्रीचोप्पल्लिसूर्यनारायणावधानिनः संस्कृतविश्वपरिषदं, तन्निर्वाहकान्, तदभिमानिनश्च वैदिकेन वचसा आशिषमवादिषुः।

साहित्यविद्याप्रवीण-श्रीकूचिभद्रचन्द्रशेखरशर्मा, सं० वि० प० शाखायाः कार्यदर्शी) संस्कृतविश्वपरिषदः आशयान्, तत्प्रचारावश्यकतां च संस्कृतभाषायां स्फुटीकृत्य न्यवेदयत्।

व्यासजयन्तीमहोत्सवावसरे कतिपये च पण्डिताः श्रीराजावासिरेड्डि लक्ष्मीनरसम्मबहद्दर मन्नेसुलतान् राज्ञीभिः (चिन्तपल्लिराज्ञी) नूत्नवस्त्रैः (Kasmir Salva)स्सत्कृता अभवन्।

महोपाध्यायश्रीजम्मुलमडकमाधवरामशर्माणः महदश्च तान् पण्डितान् नामनिर्देशपुरसरं वर्णयन्तस्तेषां प्रतिभावैशिष्ट्यविशेषान् निरवर्णयन्। तदनु न्यायवादिभिः श्रीतूमुलूरि नागभूषणमहादयैः गीतापरीक्षायां कृतार्थानां विद्यार्थिनां पारितोषिकप्रदानोत्सवः निर्वर्तितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## ❀ सूक्ति-सुधा ❀

प्रायः सन्त्युपदेशार्हा धीमन्तो न जडाशयाः ।
तिलाः कुङ्कुमसौगन्ध्यवाहिनो न यवाः क्वचित् ॥१॥

अधिकतर बुद्धिमान लोगों को ही उपदेश दिया जाता है । मूर्खों को नहीं । सुगन्धी तेल बनाने के लिए तिलों में ही सुगन्ध दिया जाता है जौ में नहीं ॥१॥

संस्थितस्य गुणोत्कर्षः प्रायः प्रस्फुरति स्फुटम् ।
दग्धस्याऽगुरुखंडस्य स्फारीभवति सौरभम् ॥२॥

प्रायः मरजाने के उत्तर सब के गुण बडाई लायक हो जाते हैं । अगर के जलजाने पर उसका सुगंध सब तरफ फैलता है ॥२॥

पारितोषिकप्रदातारः श्रीदेचिराजु रामचन्द्रारावुमहोदयाः, श्री S. V. दीक्षितमहाशयाः M. A. B. Ed. सभायां सविशेषं प्रशंसिताः कार्यदर्शिना ।

अध्यक्षपादानां प्रथमाभिभाषणानन्तरं "पौराणिक-वाचस्पतयः" पण्डितप्रवराः श्रीनंडूरि सुब्रह्मण्यशर्माणः श्रीमद्भागवतमाहात्म्यविशेषान्, तत्महर्षेः व्यासस्य प्रतिभाविकासं च सम्यगुपावर्णयन् ।

अनन्तरं दर्शनाचार्याः श्रीजम्मुलमडकमाधवराम-शर्माणः पुराणानि, तद्विभागक्रमं तेषु तत्तत्प्रत्येकता-सौन्दर्यं तत्र च महर्षेः वेदव्यासस्य अपूर्वप्रतिभासम्पत्ति, तत्र सर्वशास्त्रसामग्रीसमुल्लासनं च विपुलीकृत्य आचख्युः ।

समनन्तरं कविशेखर मध्वश्री पल्ले पूर्णप्रज्ञाचार्य-महोदयैः महाभारते व्यासरचनावैशिष्ट्यं आमूलाग्र-मुपवर्णितम् ।

अन्ते च न्यायविद्याप्रवीणश्रीअम्बटिपूडिनरसिंह-शर्मभिः, साहित्यशिरोमणि श्रीअंबिकराजुवेङ्कटेश्वर-शर्मभिः, साहित्यविद्याप्रवीण-श्रीभारतुलवेङ्कटनरसिंह-शास्त्रिभिश्च व्यासप्रशंसापद्यावलिः मधुरं उपगीतासीत् ।

अध्यक्षमहोदयानां उपसंहारवाक्यानन्तरं कार्यद-र्शिभिः श्रीनेतिसुब्बरायशास्त्रिभिः सानन्दं धन्यवादा न-माभाषितम् ।

**व्यासजयन्तीसमारोहः**— श्रीसंस्कृतवाग्विवर्द्धि-नी-परिषद्द्वारा जयपुरे आचार्य श्रीचन्द्रशेखर द्विवेदिमहोदयस्य अध्यक्षतायां २२-७-५६ दिने आयो-जितः व्यासजयन्तीसमारोहः सानन्द प्रतिवर्षवत् सम्पन्नः ।

अत्र सर्वश्रीवैद्यजयरामदासस्वामी, डा. पुरुषो-त्तमलालभार्गवः, गणेशनारायणसोमाणी, इन्द्रलाल शास्त्री जैनः, सत्यानन्दमिश्रः इत्येतेषां विपश्चितां भाष-णानि भगवन्तं वेदव्यासं तदीयां रचनां चाधिकृत्य भूतानि ।

प्राचीनार्वाचीनगुरुशिष्यसम्बन्धं समालोचयता श्रीद्विवेदिमहोदयेन देशोन्नत्यै प्राचीनादर्शगुरुशिष्य-सम्बन्धनिर्माणाय परामृष्टम् । भवता अर्थशास्त्र-राजनीतिशास्त्र-नागरिकशास्त्र-भौतिकशास्त्रादिसामयिक-विषयैः समृद्धस्य संस्कृतसाहित्यस्य विशालः परिचयः प्रदत्तः ।

प्रकाशकः—जयबहादुरसिंह पताः—भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रकः—राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल

# भारती

( संस्कृतस्य प्रमुखं मासिकपत्रम् )

गीता येनाऽभिगीताऽभूत्पुरा भारतसंयुगे ।
हीनोद्धारसंतृष्णोऽस्तु श्रीकृष्णो भारते सदा ॥

वर्षम् ६ | एकादशोऽङ्कः | मूल्यम् वार्षिकम् ३) रु० एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❋ विषय-सूची ❋


| क्रमः | लेखाः | लेखकाः | पृष्ठ संख्या |
|---|---|---|---|
| १. | श्रीकृष्ण-दौत्यम् | भास्कर केशव ढोक | |
| २. | भगवद्गीतायां अहिंसा-विचारः | कृष्णलाल 'नादान' | २४६ |
| ३. | सरलीकरणं विकलीकरणं वा | स्वामी लक्ष्मणशास्त्री, नागौर | २४७ |
| ४. | अधुनापि भारते राष्ट्रियताया अभावः | जे० एन० श्रीमाली, शास्त्री | २४६ |
| ५. | श्रीभारविः | श्री ज्वालापतिलिङ्गशास्त्री, ईमनि [आन्ध्र] | २५१ |
| ६. | अहिंसा | राजकुमारोजैनः, दर्शनोपाध्यायः | २५२ |
| ७. | आडम्बर-रहित-जीवने एव सुखं शान्तिश्च सन्निहिता | श्रीधरप्रसादपंतः, पीलीभीत (उ० प्र०) | २५५ |
| ८. | कालिदाससमये चित्रकला | प्राध्यापकः साधुरामः | २५६ |
| ९. | "वाक्कीलस्य चातुरी" | वैद्यनाथशर्मा कलकत्तास्थः | २५६ |
| १०. | सम्पादकीयम्— | सम्पादकः | २५६ |
| ११. | सूक्ति-सुधा | ,, | |


सूचना :—सर्वे ग्राहकाः सूच्यन्ते यत् पत्रव्यवहारावसरे निजग्राहकसंख्यां स्वस्मिन् पत्रे अवश्यं दर्शयेयुः। अन्यथा पत्रोत्तरे बाधा समुत्पस्यन्ते।

## —❋ "भारती" पत्रस्य उद्देश्यानि नियमाश्च ❋—

१. संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचारपरिपोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि।

२. 'भारती'पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम्।

३. मासिकपत्रमिदं प्रतिमासं पूर्णिमासं प्रतिपदायां तिथौ प्रकाशितं स्यात्।

४. एकस्यांकस्य मूल्यम् ।≈) आणकषट्कम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादकः—
...र्षिकलानाथशास्त्री बी. ए.
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षः ६ | भाद्रपदशुक्ला १, सं० २०१३ | अङ्कः ११

...यनाटकम्—

## श्रीकृष्ण--दौत्यम्

[ ले० भास्कर केशव ढोक ]

...ती:—

कृष्णो विराजतां हृदि नः । कृष्णो विराजताम् ॥
मनसि वचसि काये रमतां नो देवः प्रीयताम् ॥

हत्वा कंसप्रमुखान् दुष्टान्
रक्ष गोद्विजवृन्दं सुजनान्
चकार धर्मावनं बहुविधाम्
लीलां सुन्दराम् ॥१॥

सखा पाण्डवानां यो भूत्वा
कृष्णां प्रियभगिनीमिव मत्वा
रक्ष लज्जां तस्याः, कृत्वा
खलु तां निर्भयाम् ॥२॥

अत्र मयेदं माधव-दौत्यम्
वर्णितमच्युतकृपया विमलम्
अधुना छात्रगणैरभिनीतम्
सुजनैर्दृश्यताम् ॥३॥

कौरवराजसभायां हरिणा
पुरस्कृतासीत् सामयोजना
मन्यन्ते स्म न ते मतिहीनाः
तस्य प्रार्थनाम् ॥४॥

अपनेतुं फाल्गुनसंमोहम्
कथितं तस्मै गीताज्ञानम्
उपकृतमखिलं येन हि विश्वम्
श्रीशो विजयताम् ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रथमः प्रवेशः ।

भीमः—आर्य ! दुर्योधनेन प्रहितः संदेशः अत्र भवता महाराजेन श्रुतः किम् ।

युधिष्ठिरः—अथ किम्–युद्धेन विना अस्माकं राज्यं प्रत्यर्पितुं स नेच्छति ।

भीमः—तत् प्रथममेव मया अभिहितम् । दुर्योधनस्य सदृशः हि स संदेशः । अधुना किं चिंतयति महाराजः ।

युधि०—व्यसनकाले श्रीकृष्ण एव अस्माकं गतिः । स एव अस्मान् अधुना मार्गं दर्शयिष्यति । अतः स मया अत्र आहूतः । अचिरेण एव सः अत्र आगमिष्यति इति अहं मन्ये । पश्चात् अयं प्रश्नः पुनर्विमर्षणीयो भविष्यति ।

भीमः—(अवलोक्य) एष भगवान् श्रीकृष्णः द्रौपद्या सह आगतः ।

(द्रौपद्या सह श्रीकृष्णः प्रविशति)

युधि०:—देव आगम्यताम्, चिंतितोपस्थितो भवान् । अनुगृहीतोऽस्मि । गृह्यताम् इदं आसनम् ।

श्रीकृष्णः—अहं तु भवतां स्नेहबंधने निबद्धोऽस्मि । भवद्भिः चिंतितः सन् अहं कथं न आगच्छेयम् । अपरं च–

यद्यत्काले स्मरति भवतां कोऽपि मां प्रेमभावात्  
तत्तत्काले स्फुरति हृदयं गूढभावैर्ममेदम् ।  
आविर्भूय प्रणतमुखराः कुंतला याज्ञसेन्याः  
मामाकृष्य स्वगतिकथनैरानयन्त्यत्र सद्यः ॥

कथ्यताम् किमर्थं अहं स्मृतोऽस्मि ।

युधि०:—हस्तिनापुरात् प्रत्यागतेन दूतेन अधुनैव संदेशः आनीतः । युद्धेन विना सुयोधनः अस्माकं राज्यं प्रत्यर्पितुम् नेच्छति ।

श्रीकृष्णः—तर्हि किं कर्तव्यम् अधुना ।

भीमः—योद्धव्यम् –किं अन्यत्, नान्यः उपायः विद्यते ।

युधि०—परं एकवारं पुनः संध्यर्थं प्रयत्नः कार्यः । अविचारतः किमपि न करणीयम् अस्माभिः

भीमः—युद्धेन विना नान्या गतिः । अस्माकं सर्वेसंधिप्रयत्नाः विफलीभविष्यति ।

श्रीकृष्णः—महाराजः युधिष्ठिरः किं मन्यते ।

युधि०—भगवता श्रीकृष्णेन स्वयं एकवारं सामप्रयत्नः करणीयः इति मे मतिः ।

भीमः—एतत् सर्वं निष्फलं भविष्यति । बाल्यादेव अस्मान् नाशयितुं तेन विविधाः प्रयत्नाः कृताः अन्यायेन अस्माकं राज्यलक्ष्मीः तेन अपहृता अधुना सः अनीतिमान् अधमाधमः दुर्योधन तां प्रत्यर्पितुम् कथं तत्परः भविष्यति । अपरं च अस्माकम् दोर्दंडेषु कालं अपि जेतुं क्षमं ब विद्यते । तर्हि दीनवत् एषा याचना किम क्रियते ।

श्रीकृष्ण;—महाराजस्य आज्ञया अहं हस्तिनापुरं गन्तु सन्नद्धोऽस्मि । परं, सर्वस्वनाशं प्रति अवि चारतः गच्छन्तं पदं प्रतीपयितुं असंभ अस्ति ।

युधि०—बांधवैः सह युद्धं न कस्यापि हिताय भवेत् अतः यावत्शक्यं युद्ध अवरोद्धुं अस्माभि उद्योगः कार्यः । देव ! पांडवाः पंचग्रामै संतुष्टाः भविष्यन्ति । यदि सुयोधनः अर्धराज्य दातुं नेच्छति तर्हि पंचग्रामाः तस्मै याच नीयाः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मः—किं पंचभिर्ग्रामैः संधिं कर्तुं इच्छति युधिष्ठिर-महाराजः ' तर्हि धिक् अस्माकम् बलम् धिक् क्षत्रियत्वम् हा ! हन्त !'

पुरा यद्बाहुभ्याममितनृपलक्ष्म्यो हि विजिताः
जरासंधो भग्नः खलनिशिचरास्ते विदलिताः ।
इमौ मे दोर्दंडौ बत विहतशक्तीव विपुलौ
सहेते निःशब्दं कथमहह मानावमथनम् ॥

अपि महाराजः कृष्णायाः मुक्तकेशान् न स्मरति ? अहं तु तत् विस्मर्तुं न शक्नोमि ! पुरा मत्कृता ज्ञा कदापि अन्यथा न भविष्यति । देवि द्रौपदि अद्य पुनः प्रतिज्ञां करोमि ।

तं सानुजं कुरुपतिं समरे निहत्य
कृत्वोरुयुग्ममनया गदया च भग्नम् ।
दुःशासनस्य रुधिरेण तवालकांस्तान्
आलिप्य बंधनयुताननघे करोमि ॥

दी:—समाश्वसितु नाथः । जानामि यत् भवता स्वप्रतिज्ञा अवश्यं पूरिता भवेत् । अरिरुधिरेण मे केशाः अवश्यं संयमिता भविष्यन्ति । (श्रीकृष्णं प्रति) प्रियभ्रातर् महाराजस्य इच्छया भवान् हस्तिनापुरं सुखं गच्छतु । परं एते मे केशाः भवता कदापि विस्मृताः न भविष्यन्ति इति अहं आशासे ।

श्रीकृष्णः—प्रिय भगिनि ! चिन्तां मा कुरु । तवावमानना विस्मर्तुं न शक्या । महाराजस्य आज्ञया मया एकवारं संधिप्रयत्नः अवश्यं कार्यः । किन्तु जानामि सम्यक् दुर्योधनम् । अपि च पतंगः यथा अग्निं उपरि पतति तथा द्विजशापग्रस्तः स मूढमतिः युद्धाय अवश्यं सन्नद्धः भविष्यति । अपरं च शकुनिकर्णादयः तस्य दुर्मन्त्रिणः निज-दुर्मंत्रेण तं मृत्युमुखे अवश्यं पातयिष्यन्ति । प्रिय भीमसेन, शांतिं धारय । तव प्रतिज्ञा अवश्यं सफलीभविष्यति । तथापि महाराजस्य आज्ञया मया सामप्रयत्नः अवश्यं करणीयः । महाराज, के पंचग्रामाः याचनीयाः ?

युधि०—इन्द्रप्रस्थं वृकप्रस्थं जयंतं वारणावतं एतान् चतुरः ग्रामान्, कमपि च पंचमं ग्रामं भवान् यच्छतु इति सुयोधनाय भवता कथनीयम् ।

श्रीकृष्णः—तथा

युधि०—मातरं गांधारीं मातरं कुन्तीं पितामहं गुरुद्रोणं, तातं धृतराष्ट्रं तातं च विदुरं प्रति अस्माकं सर्वेषां प्रणामः प्रापयितव्यः ।

श्रीकृष्णः—अवश्यमेव । गच्छाम्यहम् ।

युधि०—शुभास्ते पंथानः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# भगवद्गीतायां अहिंसा-विचारः

[ ले० कृष्णलाल 'नादान' ]

...रणभेरिनादो जायते। महता तुमुलेन अनुनाद्यन्त इव सर्वा दिशः। हन्त! तत् कुरुक्षेत्रं तच्च भीषणं भारतं युद्धम्। एकतो धार्तराष्ट्राणामन्यतश्च पाण्डवानामवस्थिताः सन्ति सुसन्नद्धायुधा योद्धुकामा योधाः। अपरस्मिन्नेव मुहूर्ते बान्धवा अपि परस्परं शत्रवो भविष्यन्ति। दुनोति च मोहवशादर्जुनस्य चेतः— "अहो! हिंसा! घोरहिंसा!! पापम्!!! किंकरवाणि? नाहं योत्स्ये।" एवं च तत्र समुपस्थिते विषमे भगवता गीता गीतावाणी अर्जुनमुद्बोधयति, तं च कर्मणि नियोजयति। श्रूयते प्रतिपदमत्र गीतायाम्, "अर्जुन युद्धस्व। अर्जुन प्रहारं कुरु" इति। क्वायं युद्धोपदेशः क्व चेयं तपस्विनी अहिंसा। कथमत्राऽऽहिंसा भवेत्? परन्तु एवं सत्यपि युद्धोपदेशे, अहिंसामूर्तेर्महात्मनो गान्धेर्गीता पथप्रदर्शिकाऽऽभूत् इति महद् इदमाश्चर्यम्। अन्योऽन्यविप्रतिषिद्धमेतत् प्रतिभाति।

परमन्वीक्षणेन सुस्पष्टं गीतायामहिंसासम्पादनमालक्ष्यते। अस्ति खलु तत्र अहिंसाभिप्रायप्रभेदः। न तत्र तथा अहिंसा यथा जैनमतावलम्बिनो मन्यन्ते, यतो हि किंचिदपि कर्म कुर्वता, न जातु जीवहत्यामविधाय मनुष्येण शक्यते वर्तितुम्। श्वसति, चलति, खादति मनुष्ये, सर्वदा असंख्याका जीविनो म्रियन्ते। तन्न शक्यते रोद्धुं पट्टिकयाऽपि परिधाप्य मुखम्। न जातु मानवः क्षणमपि तिष्ठत्यकर्मकृत्। अतएव मनुष्येण कर्म कर्तव्यम्—योगः कर्मसु कौशलम्। स्वभावेन तत्र या जीवहिंसा स्यात् सा वर्ततां नाम। न सा यथार्थं हिंसा। अहिंसैव सा। हिंसा तु तदैव स्यात् यदि मनुष्यो निजसन्तोषाय एव, निजसुखायैव च अकारणमेव निर्दोषमन्यं जनं कष्टे निपात्य तं निहत्य वा यतेत। एष एव विचारो वेदब्राह्मणसूत्ररामायणप्रभृतिषु ग्रन्थेषूपलभ्यते।

एतत्परिभाषानुसारेण अर्जुनेनापि हिंसा विहिता इतिचेन्न, यतो हि स्वधर्मानुचरणं तत्, सज्जनरक्षणं चैव। निस्वार्थेन मनुष्येण स्वकीयः स्वाभाविको धर्मोऽवश्यमेवाचरणीयः, कामं तत्र जीवनाशः स्यात्। उक्तमपि:—

"श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।"

सन्ति केचन अहिंसाप्रवर्तका महापुरुषा येषामियं मतिः यत् "यदि कश्चिदन्य एकस्मिन् कपोले चपेटिकाप्रहारं करोति, तर्हि अपरोऽपि कपोलस्तत्प्रहारार्थं दातव्यः।" एते महानुभावा आत्मरक्षामपि हिंसाकोटिमारोपयन्ति। एषां मते दुष्टाः सज्जनान् पीडयन्तु नाम, अल्पसंख्याका एव दुराचारिणो निखिलं राष्ट्रं दूषयन्तु नाम, यत् किञ्चिदपि स्यात्, परन्तु ते राष्ट्रघातिनो न दण्डार्हा यतोहि कथमपि दण्डेन, शरीरेण, मनसा, वाचा वा दुर्निवारा हिंसा सम्पत्स्यते। अहिंसाव्रते च भङ्गो जनिष्यते। किन्तु गीतायां नैतादृशमहिंसादर्शनम्। अखिलराष्ट्रहिताय सज्जनहिताय च अल्पसंख्याकानामेव दुष्टानां नाशो हिंसापदं नैव प्राप्नोति। अतएव व्यभिचारिणोऽपकारिणः सद्भ्रातृद्रोहिणो धार्तराष्ट्रान् प्रति युद्धाय भगवता पार्थ उत्साहितः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सरलीकरणं विकलीकरणं वा

[ ले० स्वामी लक्ष्मणशास्त्री, संस्कृतविद्यालयाध्यक्षः नागौर (राजस्थान) ]

साम्प्रतं भारतेऽत्र संस्कृतभाषायाः सरलीकरणाय दुषां विविधा विचारास्तत्र तत्र पत्रेषु पत्रिकासु सभासु मितिषु च महानिशान्धतमसमिवातितरां प्रसेस्त्रीय-णाः सर्वतोऽभिलक्ष्यन्ते ।

केचन विद्वांसोऽस्याः संस्कृतभाषाया व्याकरण-नियमान् सर्वानेव समूलमुन्मूलयितुमीहन्ते । अपरे च द्वित्रानेव विहाय शब्दानामखिलान् सन्धिनियमान् मूलतः समुच्छेदयितुमिच्छन्ति । अन्ये च व्याकरण-

---

गीतायां प्रस्तूयतेऽहिंसा ज्ञानिगुणेषु प्राधान्येन । था हि:—

"अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥" इति ।

अत्रास्मिन् श्लोके ये केचन गुणाः प्रशस्तास्ते सर्वे हिंसां प्रतिपादयन्ति, परिपोषयन्ति, संवर्धयन्ति च । हिंसोत्पादयितॄणां सर्वेषां विकाराणां गीतायां सुविहित-स्ति मनोवैज्ञानिकं विश्लेषणम् । गर्हिता तत्र प्रियाप्रिय-लाभालाभादिविवेकबुद्धिः, श्लाघिता च प्रतिपदं स्थिरा समाना धीः । "समत्वं योग उच्यते" इति । निषिद्धा त्र विषयासक्तिर्बहुमतश्च कर्मफलत्यागः । यतो विषया-सक्तिरेव जननी सर्वेषां मनोबुद्धिदेहजन्यविकाराणाम् । इयमेव पयस्विनी हिंसाकुलटायाः । तारका राक्षसी च अहिंसादेव्याः । विषयासक्ते सति मनुष्ये, तस्य जायते विषयेषु ईप्सा । अनया च कामो जायते प्रबलः । यदानीं च न चेत् प्राप्यते स विषयः, यतोहि विधिव-शमेवाखिलं जगदिदं, तर्हि क्रोधः समुद्भवति, येन मोहान्धो मनुष्यः स्वाभीष्टं कथमपि प्राप्तुं प्रयतते । त्सकाशम् अपि तस्याभीष्टं किंचिद्वर्तते विच्छिद्य स्य बाधास्तं स निहन्ति, पीडयति, नाशयति च, स्वय-मपि च परिणामतो बुद्धिनाशमापन्नः सर्वनाशमधि-गच्छति । तथा चोक्तं भगवताः—

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते ॥
क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥

एवं ज्ञायते यदिन्द्रियाणां विषयेष्वासक्तिरेव मूलं सर्वनाशपरिणामस्य हिंसाविषद्रुमस्य । तदस्य मूलच्छेदनायैव गीतायाम् इन्द्रियवशित्वं तदर्थं च साम्ययोग एव कुठाराघात इवाभिमतः । प्रियाप्रिये चेत् समे स्याताम् मनुष्याणां, तर्हि प्रियाढ्या जनाः प्रियाणि अन्येषां भद्राय वितरेयुः, प्रियवस्तुशून्याश्च अन्येभ्यः प्रियाण्याहर्तुं हिंस्रवृत्तयो न स्युः । परस्परं च जायते विश्वबन्धुत्वभाव एकात्मभावश्च । उक्तमेव हि:—

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥

इत्थं सर्वेषु एकात्मानुभूतौ सञ्जातायामन्योऽन्यस्य दुःखानि स्वकीयानीवानुभविष्यति, तत्परिहारार्थं च दत्तचित्तो भविष्यति । कथं तदा सम्भवो जुगुप्साया हिंसाया वा ? क्व तत्र पारस्परिको विरोधः ? गीतानुशासनेनैवं सर्वत्र अहिंसायाः साम्राज्यं शाश्वतिकी च शान्तिः सम्भाव्यते ।

—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



शास्त्रे नियतानां दशलकाराणां स्थाने केवलं त्रिचतुरान् पञ्चषान् वा लकारान् प्रयोक्तुं नितरामभिलषन्ति। केचन पाश्चात्यपठनपाठनप्रणालिविमुग्धचेतसोऽन्ये सुधारकरणविचक्षणा हिन्द्यादिदेशभाषाणामांग्लभाषादिविदेशभाषाणां शब्दान् किञ्चिन्मात्रेण परिवर्त्य ताश्च संस्कृतभाषायां सम्मिश्रय शुद्धां संस्कृतभाषां सर्वथा विकलाङ्गीं कर्तुं वाञ्छन्ति। इतरे चाधुनिका विद्वांसः शब्दानां कारकसमासादिप्रकरणान् धातूनां च णिजन्तादि प्रकरणान् सर्वथा निरर्थकान् विघोष्य तान् व्याकरणतो बहिष्कर्तुं कृतत्वराः सन्ति। तेष्वेके च सिद्धान्तकौमुद्यादिकान् व्याकरणग्रन्थान् कठिनतमत्वादतिविस्तृतत्वाच्च वर्त्तमानसमयस्य सर्वथैवानुपयुक्तानुद्घोष्य तत् स्थाने सुगमातिसुगमामतिसंक्षिप्ततमां च काञ्चन नूतनामेव व्याकरणसरणिं निर्मातुं नितरामीहन्ते। तेष्वप्येके च व्याकरणं विनैव संस्कृतमध्येतुमधीतिनः समुत्साहयन्ति। केचनोदारमतयश्चाधुना संस्कृतभाषामिमां पठितानामपठितानां च सर्वेषामेव भारतनिवासिनां जनानां मातृभाषां कर्तुं वाञ्छन्ति।

एवं संस्कृतभाषायाः सरलीकरणाय तस्याः प्रचारविवर्धनाय चाधुना नैके विचारास्तत्र तत्र विद्वद्भिरुपन्यस्ता वर्त्तन्ते। ते विचारा मामप्यत्र विषये किञ्चिद् वक्तुं मुखरीकुर्वन्ति।

यदियं संस्कृतभाषा विशेषतो विदुषामेवास्ति। यतस्त एवैनां शुद्धतयोच्चारयितुं परिपालयितुं च शक्नुवन्ति। संस्कृतभाषायां त्वेकैकस्य वस्तुनो नैके शब्दा एकैकस्य शब्दस्य नैकेऽर्थाः शब्दार्थवाक्यादीनां विविधाः प्रयोगाश्च विद्यन्ते। पदे पदे वाक्ये वाक्ये च शब्दानां धातूनां च विभिन्नानि रूपाणि भवन्ति। कथंकारमपठिताः साधारणजनास्तां संस्कृतभाषामनायासेन वक्तुमवबोद्धुं च प्रभवेयुः।

सत्यप्येवम्, बलाद् हठाद् वा यदि ते साम्प्रतिकाः सुधारकरणैकपक्षपातिनः संस्कृतभाषामिमां पठितानामपठितानां च सर्वेषामेव मातृभाषां कर्त्तुं प्रयतिष्यन्ते, तदेयं संस्कृतभाषा परवशेव सर्वैरेव जनैः साधारणतया निर्गलं यथेष्टं वा सततं प्रयुज्यमाना स्वल्पेनैव कालेन स्वस्य स्वाभाविकं सुस्वरूपं सौष्ठवं स्वारस्यं च सहसैव विहायान्यभाषावत् स्वस्य वैरूप्यं, वैरस्यं, नामान्तरं प्राप्स्यति। न तया भाषया चेतः पूर्वं विद्यमानं सर्वत्र प्रसृतं च संस्कृतभाषाया नानाविधं साहित्यमवबोद्धुमवबोधयितुं च कोऽपि प्रभविष्यति। न चेयं विकृता भाषा पूर्ववत् संस्कृतानुरागिणोऽनुरञ्जयितुं शक्ष्यति। पुनरपि यत्केचनैनां संस्कृतभाषामतिकठिनां मन्वते, तदपि सर्वथा न संगच्छते। यतोऽसौ संस्कृतभाषा शिरीषपुष्पादतिकोमला, वज्रादप्यतिकठिना चास्ति।

अस्याः सौगम्यं दौर्गम्यं वा केवलं प्रयोक्तुर्वैदग्ध्याधीनमेव खल्वस्ति। प्रयोक्तुर्वैदग्ध्येनैवास्यां संस्कृतभाषायां सरलातिसरलानि वाङ्मुखादीनि, कठिनातिकठिनानि महाकाव्यादीनि च यथेष्टं निर्मातुं शक्यानि।

उदाहरणरूपेणावलोक्यताम्!

पुरातनेषु श्रीवाल्मीकीयरामायणादिषु पुराणादिषु च कियदस्या भाषायाः सारल्यमुपलभ्यते, यां साधारणविद्वांसोऽप्यनायासेन विज्ञातुम्प्रभवन्ति। पुनस्तेष्वेव पुरातनेषु न्यायवैशेषिकादिषु षड्दर्शनेषु महाभाष्यादिषु च कियदस्याः संस्कृतभाषायाः काठिन्यमुपलक्ष्यते। यां महान्तोऽपि विद्वांसस्तत्वतोऽवगन्तुं न पारयेयुः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# अधुनापि भारते राष्ट्रियताया अभावः

## स्वातंत्र्यदिवसस्यावसरे विचारः

[ ले० जे० एन० श्रीमाली, शास्त्री, 'साहित्यरत्न' ]

स्वातन्त्र्यप्राप्तेरस्माकमयं नवमो वर्षः। निश्चितमेवास्माभिः अस्माकं सर्वकारेण च देशस्य विकासदिशायां साफल्याय समयेऽस्मिन् प्रभूतं प्रयतितम्। प्रथमद्वितीयपंचवर्षीयायोजनमवलम्ब्य अन्नजलविद्युत्कृषियातायातोत्पादनशिक्षादिषु प्रचुरप्रचारप्रसारादिरूपेण दृश्यते एव सफलता। समाप्ता राजानो भूस्वामिनः (जागीरदाराः), तेषां च दीनहीनेषु बर्बरता। विदेशेष्वपि चास्माकं प्रधानमंत्रिणः श्रीजवाहरलालस्य प्रभावात् प्रभूतादरो दृश्यतेऽस्माकं भारतदेशः। तथापि सखेदं निवेद्यते यद् वयं भारतीया अधुनापि नैव वर्तामहे आदर्शस्वतन्त्रनागरिकाः। अधुनापि दृश्यते भारतीयेषु राष्ट्रियतायाः अभावः।

'अहं भारतीयः, भारतश्च ममात्मनो देशः। मम सर्वस्वं भारताधीनं, भारतस्य च सर्वं वस्तुजातं बहुमूल्यमल्पमूल्यं वा ममैव नान्यस्य कस्यचन, यथा वयम् आत्मनो निकृष्टमुपयोगानर्हमपि पदार्थं रक्षामः तथैव राष्ट्रसम्पत्तिरपि स्वकीयेति मत्वाऽस्माभिः रक्षणीया।' चेद् यद्येतादृशो भावोऽस्मासु सर्वेषु तर्हि कथं प्रतिदिनमन्यान्यनगरेषु दृष्टिपथमागच्छेयुर्जनधनध्वंसकोपद्रवाऽनलाः। मोहमयी(बम्बई)नगरे यत्किंचिज्ज्ञातं तत्कस्य स्वाभिमानिनो देशभक्तस्य हृदयं न विदारयति ? क्वचिच्छुरिकाप्रहाराः, क्वचिद्यष्टिकाघाताः, क्वचिद्गुटिकाज्वालाः, क्वचित्सम्पत्तिदाहः क्वचिच्च नारीणां सम्मानापहरणप्रयासाः, सा एव स्थितिरापतिता यथा नव दशवर्षपूर्वं भारतांगभंगकाले सिन्धु-पंचनद-बंगादिप्रदेशेषु दृश्यते स्म। उन्मत्ता महाराष्ट्रीया अन्यप्रदेशीयान् तेषां सम्पत्तिं च इत्थं विनाशयन्ति स्म यथा ते अभारतीया विदेशीया वा आसन्। राजकीयसम्पत्तिध्वंसकालेऽपि न चिन्तितं केनापि यत्ते किं कुर्वन्ति स्म ? किं राजकीया सम्पत्तिर्विदेशीयानां सम्पत्तिरासीत् ? सत्यपि सर्वकारस्य दोषे राजकीया सम्पत्तिः राष्ट्रसम्पत्तिरस्तीति मत्वा रक्षणीया भवति। एतत् समाजदेशद्रोहिजघन्यापराधं कृत्वा न केवलमात्मनः प्रत्युत हिन्दुधर्मध्वजोद्धारकस्य महाराजशिवराजस्य जगद्गुरोर्भारतस्यापि मुखे मसी प्रक्षिप्ता।

यदि प्रतिष्ठिता आदरणीया विद्वांसो लोकसभासदस्या नेतारोऽपि 'बम्बई-निर्णयो बम्बई-वीथिकासु भविष्यति' सदृशीमपूतां गिरमुद्गिरन्ति तर्हि अपठितेषु असभ्योपद्रविदलेषु दोषारोपणं व्यर्थमेव प्रतिभाति। तदनन्तरं तानेव समर्थयन्तः श्रीयुतचिन्तामणिदेशमुखसदृशा योग्याः भारतीयजनजीवनाशावलम्बभूताः

---

वस्तुतः संस्कृतभाषाया व्याकरणमेव जीवनमस्ति। अतो व्याकरणनियमानामुच्छेदः परिवर्त्तनं वा नतस्याः सरलीकरणाय विशेषप्रसाराय वा समुचितः पन्थाः। पठतां कृते कक्षाक्रमेण सरलातिसरलानां पाठ्यपुस्तकानां निर्माणमेव केवलं संस्कृतभाषाया विशेषप्रचाराय श्लाघ्य उपायः।

अवशिष्टमुपरिष्टात् कदापि वक्ष्यते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



देशभक्तमन्त्रिणोऽपि प्रदेशस्यैकस्य कृते सम्पूर्णभारत-देशतरीमर्थसंकटावर्ते निपात्य पलायन्ते चेदन्येषां का कथा ? नाहं बम्बईनगरस्य महाराष्ट्रे विलयनस्य विरोधी तथापि तेषां तत्कृते कृतः आग्रहो हिंसात्मकत्वात्सत्यपि सत्ये दुराग्रहो जातः । अतएवैतस्य समर्थनं हिंसाया राष्ट्रस्यैकतायामविश्वासस्य वा समर्थनमिति मन्ये ।

अथान्यत्र वयं पंचनदप्रदेशं पश्यामः । विभाजनानन्तरमवशिष्टोऽयमर्धोऽपि प्रदेशः, 'क्षेत्रीयफार्मूलारूपेण' एनं पुनर्विभक्तुं प्रयततेऽस्माकं सर्वकारः । एतदपि राष्ट्रहितं गर्ते निपात्य जातिहितं व्यक्तिहितं वा साधयितुं भविष्यति । मास्टरतारासिंहो न जाने केन चक्षुषा 'सिखानां हितानि असुरक्षितानि' पश्यति ?

हिन्दुराष्ट्रधर्मसंम्मानरक्षायै त्यक्तक्षौरादिसर्वसांसारिकस्वार्थकर्माणो हिन्दुराष्ट्ररक्षाव्रतिनो हिन्दुशिष्याः (सिक्खाः) अद्यात्मनोऽहिन्दून्मन्यन्ते । तेषां मनसि अद्य हिंदुभ्यः 'सिक्खधर्मसंस्कृतिविनाशस्य' आशङ्का प्रादुर्भूता । तेभ्यो हिंदुभ्यो, ये भारतमातुर्वक्षोविदारकान् सद्यश्छिन्नायास्तस्याः कवोष्णशोणितारक्तहस्तान् पंचकोटिमौहम्मदान् स्ववक्षसि संस्थाप्य धारयन्ति । यैः स्वयं निराहारैर्निगृहैर्निर्वस्त्रैरप्युषित्वा तेभ्यो गृहाहारवस्त्राणि दीयन्ते । तेषां व्यापारे क्षतिमकुर्वन्तः सन्तो रामकृष्णभूमौ भारत- वर्षेऽत्र गोहिंसनं सहन्ते । ये शतशः सहस्रश्च श्रीकृष्णस्य मुखपद्मविनिःसृतांगीतां श्रुत्वाऽपि 'नष्टो मोहः स्मृतिर्लब्धे' त्यनवोच्य सर्वदा 'धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्' इत्येव मुहुर्मुहुः रटन्ति । ते हिंदवः सिखान् मारयिष्यन्ति ? मास्टरतारासिंहस्य मातृसमाः शतशो हिन्दुमातरः प्रतिवर्षं शतशः स्वपुत्रान् गुरोः श्रीनानकदेवस्य चरणयोः शिष्यरूपेण समर्पयन्ति । राष्ट्ररक्षायै अन्नधनदानेन सह हिन्दुमातॄणामेतत् 'पुत्रदानम्' (काममधुनैषा धार्मिकरूढिरेव स्यात्) हिंदु-सिक्खेतिहासस्य अनुच्छेद्या शृंखला विद्यते । अनेन ज्ञायते यत्पुरा मुगलराज्यकाले हिन्दुमातरो राष्ट्रधर्मरक्षणाय स्वेच्छया स्वपुत्रेषु एकतमं शिष्यरूपेण राष्ट्रपुरुषस्य चरणयोः समर्पयन्ति स्म । यस्मिन् सिक्खसमाजवृक्षे कैश्चित्स्वार्थान्धैर्विषसेकः क्रियते, स वृक्षो हिंदुभिः स्वशोणितदानेन आरोपितो वर्धितो रक्षितश्च, एनं हिन्दवश्छेत्स्यन्ति ? नातः परमसत्यं पापं देशद्रोहिता च भवितुमर्हति ।

एवमेव राज्यपुनर्घटनामवलम्ब्य प्रायशः समग्रदेशे उपद्रवा अभूवन् । ते अस्मासु राष्ट्रैक्यभावस्य न्यूनतामेव प्रकटयन्ति । फरुखाबादे मुस्लिमजमात-सम्मेलने यत्किंचित्समाचारपत्रेषु दृष्टं तेन सुस्पष्टं सिद्धयति यद् दुर्दैवात् कोटिशो भारतीया अधुनापि भारते भारतीयैकताया मूलभूतस्थानेषु तेषां विश्वासेषु मान्यतासु भारतीयजनधर्मसंस्कृतिषु असाम्प्रदायिकजनतन्त्रव्यवस्थासु च न श्रद्धां धारयन्ति इति । यत्र कुत्रापि सामाजिककार्यादिषु वास्तविकतापेक्षया प्रवंचनां प्रदर्शनं च वयमधिकाधिकं पश्यामः, सर्वेषु कार्येषु स्वार्थसाधने एव रता वयं देशस्य सहस्ररूप्यकानपि विनाश्य रूप्यकस्यैकस्य स्वलाभं स्वीकुर्मः । अतएव निर्माणादिकार्येषु व्ययानुरूपा सफलता नावलोक्यते । यदि सत्यमेव राष्ट्रहितधिया व्ययानुरूपं कार्यं भवेत्तर्हि निश्चितमेव देशोऽयमल्पकाल एव संसारस्य समृद्धदेशेषु स्थानमाप्तुं शक्नोति । अथ च भारतवर्षे भारतीयेषु सपद्येव सम्प्रदायवादप्रान्तीयवादहीना प्रबलराष्ट्रियता नोदयते चेदेतस्य दुष्फलम् अकथनीयं भवेत् ।

---



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# श्रीभारविः

( ले० कविभूषण-कविताप्रवीण-शतावधानि-ज्योतिर्विद्याविशारद-ज्वालापतिलिङ्गशास्त्री, ईमनि [आन्ध्र] )

ीकालिदासभवभूति कविद्वयस्य
ध्ये भवल्ललितपीठमलं करोमि ।
स्मात्तदीयमधुरं भवता परार्थं
ाव्ये गृहीतमिति गौरवमन्यलभ्यम् ॥ १

यासस्य भारतकथामृतसिंधुजात-
ाकोलमूर्छितसुयोधनकीर्तिकान्ता ।
ीभारवेर्मधुवचोमृतसेचनेन
ब्ध्वा स्मृतिं मधुरभावगुणैर्विभाति ॥ २

द्रौपदीवागधुनापि स्त्रीणां स्वेच्छाप्रवृत्तिं विहितां प्रदत्ते ।
ास्त्रीयधर्मस्सदनिन्द्यभाषा संदृश्यते स्त्रीनयरक्षणाय ॥ ३

ावद्वपुर्घनबलं तु वृकोदरस्य
ाद्वचोघनबलं प्रतिभाति काव्ये ।
ीतिदं च कठिनं मधुरं हितं च
द्धर्मजस्य हृदयप्रियमातनोति ॥ ४

यासस्य प्रियतार्जुनतपश्शक्तिः किराताकृते-
म्भोर्भक्तजनेषु दानगरिमा तावत्प्रशंसावचः ।
स्त्राणां महिमा शिवस्य च मनश्शक्तिर्गिरेर्वैभवं
ाव्ये भान्ति समग्रदर्शकजनेहामुत्र सौख्यप्रदे ॥५

सर्गदुर्बोधपदार्थगौरवं रसानुभूतिं मनसः प्रदास्यति ।
न्यभावे निकषोपले मणेः प्रकर्षणेनोद्गमति स्वभान्तरात्
॥६

विचित्रवृत्तं सुमहार्थकल्पितं रसप्रपूर्णं नरशंकरात्मकम् ।
अवक्रघण्टापथगम्यसन्निधि स्वकाव्यकूपं प्रतिभाति
भारवेः ॥७

ब्रह्माण्डोभयमार्गवर्तनवशान्नित्यं बभौ भारवेः
लोकस्योभयमार्गदर्शनवशाद्द्विद्बभौ भारवेः ।
तस्माद्द्वौ जगतां मनस्सु सततं स्तुत्यौ कृतिस्सत्कृतिः
भूयादित्यनुचिन्त्य लोकयुगसाहित्यात्मसंसिद्धये ॥८

ब्रह्मैकात्मनिसर्गसर्गमकरोल्लक्ष्मीं तथैकामपि
किं चित्रं क्व च तत्र नास्ति हि महान् श्रीभारविस्त्वेकतः ।
किं त्वष्टादशधा विशिष्टगुणसर्गांश्चापि लक्ष्मीस्स्वयं
कृत्वा लोकममोहयच्छ्रुतिपथाक्रान्तस्फुरद्भाषया ॥ ९

नवनवयुगभास्वत्सर्गसर्गादयशक्तिः
परिपरिकृतनिन्दादोषदोषार्कबिम्बः ।
कृतिकृतिसदलङ्कारकारोपपत्तिः
गुणिगुणितमहार्थप्राप्तभास्वद्यशश्श्रीः ॥ १०

एकानेकसवर्णतुल्ययमकोद्यत्सत्पदालंकृतिः
नानाचित्रविचित्रवर्णितकथाकल्पोज्ज्वलालंकृतिः ।
भाषाबन्धुरबन्धुतापरिचयार्थव्यंग्यभावध्वनि-
स्रोतः प्रोतसमानयानकृतिजाग्रत्कर्णधारी महान् ॥ ११

मधुरसालरसालफलोपमा, समधुरा मधुराक्षरवैखरी ।
श्रुतिहिताऽतिहिता विलसत्कृतिः, गुणवता नवता
कृतसत्कृतिः ॥१२

---



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# कालिदास-समये चित्रकला

प्राध्यापकः साधुरामः

कविकुल-गुरु-कालिदासस्य कृतिष्वनेकानि प्रमाणा-न्युपलभ्यन्ते यैर्ज्ञायते यच्चित्र-कलाऽतीव समुन्नतिं गता, सर्वजन-प्रिया चासीत्। 'प्रतिकृतिः', 'सादृश्यम्', 'आलेख्यं', चैते शब्दाश् 'चित्र'-शब्दस्य पर्याया एव दृश्यन्ते प्रयोगे।

काव्य-नाटकेषु परस्परं विरहितौ प्रेमिणौ, नायिका-नायकौ वा वियुक्तस्य प्रिय-जनस्य चित्रम् एव लिखित्वा विरह-व्यथाम् अपनोदयतः। 'मेघदूते' यक्षेण विधुरा स्वपत्नी पत्युर्विरह-जं कार्श्यम् अदृष्ट्वाऽपि "मत्सा-दृश्यं भाव-गम्यं लिखन्ती" ति संभाव्यते। असावपि "प्रणय-कुपितां" तां धातुरागैः शिलायाम् आलिख्य यावच्चरण-पतितम् आत्मानं लिखितुम् इच्छति तावत् प्रवृद्धै रश्रुभिस्तस्य दृष्टिरालुप्यते। 'विक्रमोर्वशीये'ऽपि राजा "प्रियाया आलेख्येऽसमाप्त एव नयने मे बाष्पे-णोपरुत्स्येते" इति परिदेवयते। अन्यत्र, वासन्ती-लताभूता महाराजेनालिङ्गित-मात्रैव प्रकृति-स्था संवृत्ता उर्वशी "मां नवेन सकामु काभिनव-चित्र-शोभिना पयो-मुचा वसतिं नय" इति राज्ञा प्रार्थ्यते। 'मालविकाग्नि-मित्रे' "यावच्चित्र-शालां गता देवी प्रत्यग्र-वर्णरागां चित्रलेखाम् आचार्यस्यावलोकयन्ती तिष्ठति" तावत् सहसा प्रविष्टेन राज्ञा चित्र-गताया देव्याः परिजन-मध्यगता मालविका दृष्टा।

'शाकुन्तले', राजा विदूषकं ब्रूते, "माढव्य, अन-वाप्त-चक्षुःफलोऽसि येन त्वया धात्रा 'चित्रे निवेश्य परिकल्पितसत्व-योगा' ऋषि-कन्यका न दृष्टा। अन्यत्र, शकुन्तलायाः पतिगृह-प्रस्थानकाले तस्याः सख्यौ अनुपयुक्त-भूषणत्वात् चित्र-परिचयेनैव तच्छरीर आभरण-विनियोगं कुरुतः। तदनु षष्ठेऽङ्के चतुरिकया आनीतं स्वहस्त-लिखितं शकुन्तलायाश्चित्रं दृष्ट्वा तत्रार्ध-लिखितं विनोद-स्थानम् अवलोक्य चतुरिकया पुनर्गत्वा आनीतया वर्तिकया राजा "स्रोतोवहां मालिनीं गौरी-गुरोः पावनान् पादान्, कृष्णमृगस्य शृङ्गे वाम-नयनं कण्डूयमानां मृगीं च निर्मातुम्" इच्छति। तथा च 'कुमारसम्भवे,' "अस्त-शिखरं गते रवेर्वपुषि" हरः पार्वतीं "रक्त-पीत-कपिश-कोटीन् पयोमुचो" दर्शयन्नाह, "अये कुटिल-केशि! एषां पयोमुचां कोटयोऽनया संध्यया वर्तिकाभिरिव साधु मण्डिताः" प्रतिभान्ति।

एभिः प्रमाणैर्ज्ञायते यन्न केवम् एकस्यैव जनस्य, किन्तु जनसमुदायस्यापि प्रतिकृतय आलिख्यन्ते स्म। अग्निमित्रेण मालविका देव्याः परिजन-मध्यगता दृष्टा, न त्वेकाकिनी आलिखिता। विदूषकोऽपि दुष्यन्तलिखिते चित्रे तिस्रो दर्शनीया युवतीरवलोक्य अभिज्ञान-विमूढः

---

तस्मादेव सर्वत्र अशान्तिः, सर्वत्र असन्तोषः, सर्वत्र दुःखम् सर्वदा कष्टम्, एवं तृष्णाया लिप्सायाश्च साम्रा-ज्यम् अस्ति।

सारांशोऽयं यत् यदि जनाः सुखिनो भूत्वा निवासं कर्तुमिच्छन्ति तर्हि ते स्वावश्यकवस्तूनां त्यागं कुर्युः यावत्परिमाणे आवश्यकताः न्यूनाः भविष्यन्ति, तावत् परिमाणे सुखं शान्तिश्च भविष्यतीति मे सम्मतिः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सन् पुनर्निपुणं निर्वर्ण्यं "शिथिल-केशबन्धोद्वान्त-कुसुमेन केशान्तेन, उद्भिन्नस्वेदबिन्दुना वदनेन, विशेषतोऽप्रसृताभ्यां बाहुभ्याम् अवसेक-स्निग्ध-तरुणपल्लवस्य चूत-पादपस्य पार्श्वे ईषत्-परिश्रान्ताम् इव लिखितां शकुन्तलां" संवित्ते। चित्राणां पश्चाद्भूमौ पशु-पक्षि-विहार-रमणीयानि, तरु-लता-विलास-मनोहराणि, कुशकुन्द-विकास-कमनीयानि, गिरि-सरिद्-उल्लास-लोभनीयानि प्रकृतेरद्भुतानि दृश्यान्यपि समुज्जम्भ्यन्ते स्म।

सर्व एव जनश् चित्रालेखने निपुणो बभूव। यतस्तल्लिखितानि चित्राण्यतितरां सादृश्य-भाञ्जि अभूवन्। तानि तु बहुधा निरूपयतां जनानां विभ्रम-कारीणि संजातानि। राजा दुष्यन्तः स्वहस्त-लिखित एव शकुन्तलाचित्रे जात-संमोहो यावत् प्रियाया बिम्बाधरं प्रशान्तं भ्रमरं कमलोदर-बन्धनस्थं चिकीर्षति तावद् विदूषकस्य पुरोभागितया "चित्रं खल्वेतद्" इति स्मारितोऽसौ विनष्ट-दर्शनसुखानुभवो वाष्पं विहरति।

एभिर्विवरणैश्चित्रकलायाः प्रौढिमाऽनुमीयते। चित्रेषु परिश्रमस्वेदोद्भेदादि-शरीर-विकाराः प्रणय-कोपादि-भाव-विकाराश्चातीव कौशलेन संदर्शिता बभूवुः इति एतेन चित्रकाराणां निरीक्षणसौक्ष्म्यं मनोविज्ञानाभिज्ञत्वं चानुमीयते।

भित्ति-चित्रम् अन्तरेणापि कालिदास-कृतिषु प्रमाणबाहुल्यम् अस्ति। खिष्टपूर्वे शताब्द-द्वये भित्तिचित्रकलायाः प्रचारो भारते समवर्ततेति अजन्तागुहाचित्रेभ्यः परिज्ञायते। कालिदाससमयेऽपि कलेयं लोकरूढा जनमनोरञ्जिनी च बभूव। अलकायाः प्रासादा बहिर्भित्तिषु इन्द्रचाप-वर्णपट्टैश् चित्रिताः सचित्राः सन्तः सेन्द्र-चापं मेघं तुलयितुम् अलं बभूवुः। "यत्र-

फोन— २६११६३ ग्रामस 'हिन्द'ग्राम

# हिन्द मिल्स लिमिटेड

**१५, दुगल रोड, बैलार्ड एस्टेट**

**बम्बई १.**

निर्मातारः—

कञ्चुकवस्त्रं (शर्टिंगस), शय्यावस्त्र (शीटिंगस-लिंपाई), लम्बवस्त्र (लांगक्लॉथ) ड्रिलस, मुलस, क्रेप-मुजरी वस्त्राणां, धौतानां, शाटिकानाम्, 'काकेट चिन्हितानां' तथा स्पेशल फाइबर सूत्राणां च।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वस्य घातमात्रमेव नास्ति हिंसा। धर्मदृष्ट्या तु यदि केनचिन्मनुष्येणाऽज्ञातावस्थायां कस्यचिज्जीवस्य घातो भवति ततोऽपि स हिंसको न भवति। यतः मनसि तु कस्यचिज्जीवस्य घातस्य भावना नासीत्। यदि च कस्यचित्पुरुषस्य हृदये जीवघातस्य भावाः सन्ति, किंतु कारणवशात्स तस्य जीवस्य प्राणघातं कर्तुं समर्थो न भवति, एतादृश्यामवस्थायामपि स हिंसको भविष्यति। श्री "उमास्वामी" अस्मिन् विषये प्रकाशं कुर्वन्नाह— "प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा"। "अनागारधर्मामृत" नामधेयग्रन्थेऽप्यस्योल्लेखोऽस्ति—

सा हिंसा व्यपरोप्यन्ते यत् त्रसस्थावरांगिनाम्!
प्रमत्तयोगतः प्राणा द्रव्यभावस्वभावकाः॥

अनेन प्रकारेण हिंसायाः वर्णने सति अहिंसायाः ज्ञानं स्वयमेव भवति। "न हिंसेति अहिंसा" अर्थात् हिंसायाः मनसा वाचा कर्मणा सर्वथा परित्यागोऽहिंसा।

अस्माकं प्राचीनधर्माचार्याः संसारे समस्तपापानां मूलं गृहञ्च केवलं हिंसामेव मन्यन्ते। अर्थात् संसारे नास्ति हिंसातिरिक्तमन्यत् प्रवृद्धतरं पापम्। सर्वेषां पापानां मूलं हिंसैवास्ति। अनेन महापापेनात्मरक्षायै मानवेन सदैव सतर्कतया स्वकार्यं कर्त्तव्यम्। तेन स्वसात्विकजीवननिर्वाहार्थमेतादृशानि साधनानि आश्रयणीयानि यैः स्वाज्ञानेऽपि कस्यचिज्जीवस्य लेशमात्रमपि कष्टं न भवेत्। केवलमित्थं करणादेव मनुष्यः स्वजीवने पूर्णरूपेणाऽहिंसामाधातुं नार्हति। एतदर्थं तु तेन स्वाभाविको गुणः क्षमाऽपि प्रयोक्तव्या। यतः क्षमारहिताऽहिंसा प्राणहीनशरीरमिवास्ति। यथार्थे अहिंसायाः प्राणाः क्षमा एवास्ति। महाभारते क्षमाया महत्वमाह—

अहिंसा परमो धर्मस्तथाऽहिंसापरोदयः।
अहिंसा परमं दानमहिंसा परमं तपः॥

अपर गैंजेज
सूगर मिल्स लि०
शिवपुर (उत्तर प्रदेश)
भारतवर्षस्य सर्वाधिकं बृहत् शर्करानिर्मातृ "मिलम्"
पवित्रकणाया इक्षुशर्कराया निर्माणकारकम्
मैनेजिंग एजेन्ट्स :—
दी काटन एजेन्ट्स प्राइवेट लि०
कलकत्ता ★ बम्बई



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# आडम्बर-रहित-जीवने एव सुखं शान्तिश्च सन्निहिता

(० श्रीधरप्रसाद पंतः 'सुधांशुः' साहित्यशास्त्री १ वर्षम्, "विशारदः" श्री दु० संस्कृत कालेज, पीलीभीत [उ.प्र.])

साम्प्रतम्प्रायः सर्वतः दुःखम् , कष्टम् , एवम् अशा- न्ति दृष्टिगोचरा भवन्ति। सर्वेजना अशान्तेः भीषण- ज्वालायां दह्यन्ते। केनापि अस्य मूलं कारणं ज्ञातुं न कृतम्। आगच्छन्तु, अद्यास्य मूलतत्वं ज्ञात्वा अस्य सदुपयोगं कुर्मः।

वस्तुतः यदि भवान् सुखिजीवनं व्यतीतं कर्तु- मिच्छति तर्हि सरलतां ( सादगी ) स्वीकरोतु। सरलता- यामेव सुखस्य निवासोऽस्ति, आडम्बरयुक्तजीवने कदाऽपि शान्तिश्च न भवति।

अद्यतनः समाजः आडम्बरपूर्णः एवं स्वार्थी चास्ति। मनुष्याणां तृष्णा अनुदिनं वृद्धिङ्गताऽस्ति। यदाऽस्माकं तृष्णापूर्तिर्न भवति। तदा वयं सर्वत्रैव कष्टस्य दुःखस्य अनुभूतिं कुर्मः। अनेकानेकानि निन्दितकार्याणि कृत्वापि तृष्णापूर्तिं कर्तुमिच्छामः, येन इह लोके तु कथं लोकान्तरेऽपि शान्तिर्न भवति।

जीवनं सुखमयं एवं शान्तिमयं निर्मातुं सर्वप्रथमं सन्तोषस्यावश्यकताऽस्ति। सन्तोषः एतादृक् अनु- पमवस्तु विद्यते येन जीवनं स्वर्गतुल्यम्भवितुमर्हति। तस्य वर्णनं कुर्वता प्रकृतिपुरोहितेन महाकविना भर्तृहरिणा उक्तम्——

सर्पाः पिबन्ति पवनं न च दुर्बलास्ते,
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति।
कन्दैः फलैर्मुनिवराः क्षपयन्ति कालम्,
सन्तोष एव पुरुषस्य परं निधानम्॥

अतोऽस्माभिः सन्तोषधारणं कृत्वा जीवनं सुखि कर्तव्यम्। चित्तं अभ्यासेन स्वाधीनं कृत्वा तृष्णा- पराजयः कार्यः। तदैव जीवने वास्तविकशान्तिः प्राप्ता भविष्यति।

उक्तं च——

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः
सम इह परितोषो निर्विशेषो विशेषः।
स हि भवति दरिद्रो यस्य तृष्णा विशाला,
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः॥

अतः स्पष्टमस्ति यत् मनसैव मनुष्यः धनवान् एवं दरिद्रीभवति। अतएव योगेश्वरश्रीकृष्णस्य आज्ञानु- सारम् "अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते" स्वचित्तं स्वाधीनं कर्तव्यम्। अन्यथा चञ्चलचित्तेन सुखानुभूतिः सर्वथा असम्भवाऽस्ति।

भारतीयदर्शनशास्त्रस्य अध्ययनेन ज्ञातमभवत् यत् प्राचीनसमये ऋषिमुनिवर्गाः परमसन्तोषिणः एवं वशि- नश्चासन्, ते संसारस्य समस्तेभ्यो भोगेभ्यो निःस्पृहाः सन्तः भोगमकुर्वन्। तदैव तेषां जीवनं परमसुखमयञ्चा- सीत्।

जीवनं सुखमयं निर्मातुं सर्वे उपायाः दर्शनेषु सन्निहिताः सन्ति। किन्तु अधुना ज्ञानलवदुर्विदग्धाः पुरुषाः तद् ज्ञानं न जानन्ति। अथवा ज्ञात्वा अपि कार्यरूपे परिणतं न कुर्वन्ति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अहिंसा

( ले० राजकुमारो जैनः "भारिल्लः" दर्शनोपाध्यायः )

अहिंसा तदमोघास्त्रमस्ति यद्बृहल्लघुसवलनिर्बल-समृद्धदीनास्तिकनास्तिकाश्च सर्वे प्राणिगणा लब्ध्वाऽनेन भयंकरातिभयंकरापत्तावपि शत्रुं पराजितं कृत्वा विजयलक्ष्म्याः पाणिग्रहणं कर्तुमर्हन्ति ।

मानवस्य स्वाभाविकगुणोऽस्ति मानवता । गुणविशिष्टेनानेनैवाद्य प्राणिवर्गे मानवः ईदृश उन्नतोत्कृष्टश्चास्ति । अहिंसा मानवतायाः तदंशोऽस्ति, यत् पृथक्करणेन मानवस्य मानवतेति गुणो नश्यति । दानवतायाञ्च परिणतो भवति । तथा मनुष्यः मानवभूतोऽपि दानवः भवति । अनेनेदं स्वयं ज्ञातं भवति यन्मानवजीवनेऽहिंसा कीदृशमुत्कृष्टं एवं ग्राह्यं वस्त्वस्ति ।

मानवः स्वजीवनं प्रायः भागद्वये विभक्तं करोति । प्रथमे तु राजनीत्यां परतश्च धर्मे । राजनीतिः धर्मश्च मानवजीवनस्य द्वे सशक्ते चक्रे स्तः । अभ्यां चक्राभ्यां विना जीवनचक्रिकायाः स्वनिश्चितलक्ष्यपर्यन्तं गमनमसम्भवमस्ति । एका वार्ताऽवश्यमेवास्ति यदाधुनिकेऽस्मिन् प्रगतिवादिनि वैज्ञानिके युगे मानवजीवनस्याधिकांशो भारो राजनैतिके चक्रे एव हि भवति । अर्थात् मानवजीवनस्याधिकः समयः धर्मापेक्षया राजनैतिके क्षेत्रे एव व्यतीतो भवति ।

धर्म एवं राजनीतिः द्वावपि मानवजीवनस्य द्वौ हस्तस्वरूपौ द्वे आवश्यकप्रधानांगे स्तः । तथापि द्वयोरेतादृशी विषमताऽस्ति यादृशी सर्पनकुलयोस्तथा मार्जारमूषकयोः । येन प्रकारेण एकस्मिन् खड्गगृहे द्वौ खड्गौ स्थातुं न समर्थौ स्तः । तेनैव प्रकारेण एकस्मिन्नेव स्थाने धर्मस्य राजनीत्याश्च निवासोऽसम्भवोऽस्ति । किंतु प्राणिमात्रस्यायं स्वाभाविको गुणोऽस्ति यत्स प्राणी स्वस्मिन् परस्परप्रतिद्वन्द्विनां गुणानामप्याश्रयं ददाति । इदमेव कारणमस्ति यदद्य परस्परप्रतिद्वन्द्वी धर्मो राजनीतिश्च न केवलं मानवमात्रस्यापितु प्राणिमात्रस्य द्वे प्रधानांगे स्तः । यतः द्वाभ्यामाभ्यामेव हि मानवः स्वस्यैहलौकिकं पारलौकिकं च ध्येयं पूर्णं कर्तुमर्हति । अनयोर्द्वयोर्लक्ष्ये पृथक् पृथक् स्तः । यस्याः वार्तायाः राजनीत्यां समर्थनं भवति, तां वार्तां धर्मः खण्डयति । तथा या वार्ता धर्मे ग्राह्या भवति, सैव वार्ता राजनीत्यां त्याज्या भवति । किंत्वहिंसा एकमेतादृशं वस्त्वस्ति यद् द्वयोरपि सादरमुपादेयं भवति । अस्यातिमहान्त्युदाहरणानि अद्याप्यस्मान् सम्बोधयन्ति कथयन्ति च—यदपि वस्तु त्वं प्राप्तुं वाञ्छसि तस्य प्राप्तिपूर्वं त्वं तद्वस्तु प्राप्तुं प्रयत्नं कुरु यल्लब्धानां तेषां वस्तूनां प्रधानकारणं, तथैकमात्रं सत्यसाधनमस्ति । तत् साधनं कारणञ्चास्त्यहिंसा । उदाहरणार्थमस्माकं स्वतन्त्रतामेव ग्रहणं कुरु । यस्य भारतवर्षस्य शतातिशतवर्षप्राचीनपरतन्त्रतां दूरीकर्तुं राजनीत्याः सहस्रशः प्रयत्ने कृतेऽपि साफल्यं हस्तगतं नाभवत् । तस्या एव स्वतन्त्रतायाः सफलतां राष्ट्रपिता बापूः स्वस्यामूल्यामोघास्त्राहिंसया एवावाप्तवान् । अधुना भवान् स्वयमनुमातुं शक्नोति यत् सहजप्राप्यामूल्यशस्त्रेणैतादृशं महद्वस्तु (यस्य प्राप्तिवाञ्छा भारतवासिषु बहुवर्षपूर्वमासीत्) प्राप्तमभवत् । तदा त्वेदृशं किं वस्त्वस्ति यदहिंसया



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नास्ति। अनेनेयं वार्ता स्वयंसिद्धाऽस्ति यद्राज-
महिंसायाः कीदृशं महत्वपूर्णं स्थानमस्ति।

अथ धर्मः। धर्मेऽप्यहिंसायाः न केवलं महत्वपूर्णं
मस्ति, अपित्वहिंसैव धर्मोऽस्ति। अद्य भारतवर्षे
येतादृशः कोऽपि धर्मो योऽहिंसायामर्हत्वं न ज्ञात-
, तथा तां स्वधर्मे महत्वपूर्णं सर्वोत्कृष्टस्थानं न
न्। प्रायः सर्वैरपि धमः "अहिंसा परमो धर्मः"
सत्यं पूर्णरूपेण स्वीकृतम्। यदि धर्मादहिंसातत्वं
क्रियेत तर्हि धर्मः इति नाम किञ्चिदपि वस्तु ना
यत्। अहिंसारहितधर्मो नेत्रहीनप्राणी इवास्ति।
मानवः यदप्राप्यस्थिरशान्त्यानन्दयोश्च कामनां
सरससुमधुरस्वप्नान् पश्यति, तत्स्थिरशान्त्या-
वहिंसयैव लब्धौ स्तः। अहिंसा संसारं शान्त्याः
शदात्री एकाऽद्वितीयाऽनुपमाऽकथनीयाऽदृश्या च
शक्तिरस्ति। अस्यैव विषयस्योल्लेखं कुर्वन् श्रीशुभचन्द्रा-
चार्य आह–

> अहिंसैव जगन्माताऽहिंसैवानन्दपद्धतिः।
> अहिंसैव गतिः साध्वी श्रीरहिंसैव शाश्वती॥
> अहिंसैव शिवं सूते दत्ते च त्रिदिवश्रियम्।
> अहिंसैव हितं कुर्यात् व्यसनानि निरस्यति॥
> तपःश्रुतयमज्ञानध्यानदानादिकर्मणाम्।
> सत्यशीलव्रतादीनामहिंसा जननी मता॥

**अहिंसायाः स्वरूपम्—**

अहिंसायाः स्वरूपस्य ज्ञानात्पूर्वं हिंसायाः स्वरूपस्य ज्ञानमत्यावश्यकम्। हिंसायाः विषये यदि कश्चिदल्पज्ञो मन्दबुद्धिः पृच्छ्येत तर्हि स इदमेव कथयिष्यति यत् कस्यचिदपि जीवस्य घातनमेव हिंसा। व्यवहारे इदं कथनं केषुचिदशेषु सत्यम्। किंतु यथार्थे कस्यचिज्जी-


हरिनगर सूगर मिल्स लि०

फैक्टरी

हरिनगर (एन० ई० रेल्वे) (चम्पारन जिला) उत्तर बिहार

दूरभाषयन्त्रम्—

'मर्यादा-रामनगर (चम्पारन)'

प्रधानकार्यालय :—

२०७, कालबादेवी रोड, बम्बई–२

दूरभाषयन्त्रम्—

'क्रिसूगर' (बम्बई)

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

* प्योअर, * फर्स्टक्लास, * क्रिस्टल * केन सुगर




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



स्यागारं धनपतिगृहाद् उत्तरेण, सुरपतिधनुश्चारुणा तोरणेन दूरादेव लक्ष्यम् आसीत्।" तस्य द्वारोपान्ते 'शङ्ख-पद्मौ' चालिखितौ आस्ताम्। वायुना नीता "जल-मुचो जालमार्गैर्विमानाग्रभूमीः प्रविश्यालेख्यानां नव-जलकणैर्दोषम् उत्पादयन्ति स्म। राजभवनभित्तिषु राजवंश्यानां चित्राणि, विशेष-घटना-परम्परोज्जृम्भ-कानि चान्यानि आलेख्यानि चित्रितानि समभूवन्। अयोध्यां प्रतिनिवृत्तौ सीता रामौ चित्रवन्ति सद्मानि प्रविश्य दण्डकेषु प्राप्तानि दुःखानि स्मारितौ अपि तानि इन्द्रियार्थ-सुखानुभूत्या न बहु अमन्येताम्। अयोध्याऽधिदेवता अर्धरात्रे शय्यागृहे प्रसुप्तं कुशं प्रबोध्य ध्वस्ताया अयोध्याया दुर्दशां वर्णयन्तीं परिदेवयते यद् 'विशीर्ण-भवनानां भित्तिषु आलिखिताः करेणुभिर्दत्त-मृणाल-भङ्गाः पद्म-वनावतीर्णाश्चित्र-द्विपाः सजीव-गजबुद्ध्या संरब्धसिंहै-र्नखांकुशाघातैर्विदीर्ण-कुम्भा विधीयन्ते।'

एतस्मात् प्रमाण-समुच्चयात् सुस्पष्टम् एव ज्ञायते यच्चित्रलेखनं लीला-मात्रकं विनोद-साधनं नासीद्, अपितु 'स्पृहणीया ललित-कला इयम्' इति कृत्वा राजभिः साधारणैर्जनैश्च, ललनाभिस्तु विशेषतोऽति-मनो-योगेनाभ्यस्यते स्म। मुनिकन्यास्तासां सख्योऽपि तपोवनाश्रमेषु विविक्ते चित्रकर्मणि प्रावीण्यम् आपा-दयन्। राजानो, राज्ञ्यो, राजकुमार्यो, यक्ष-यक्षिण्यो, राज-परिजनाः, प्रजाश्च सर्व एव चित्र-कर्माभिनन्दन्तस् तस्मिन् प्रावीण्यं लब्धुं प्रयत्नवन्तो बभूवुः। इन्दुमती "ललिते कलाविधौ" स्व-पत्युः "प्रियशिष्या" आसीत्। राज्ञाम् उपायनी-भूतः परिजनोऽपि शिल्पि-कारिका-भूयिष्ठोऽभूत्।

चित्र-कला निरीक्षणसौक्ष्म्यं, कल्पना-वैशद्यं परं मनः-समाधिं चापेक्षते। कालिदासोपवर्णनेभ्यो ज्ञायते यच्चित्रकारा अनुपस्थितानामपि जनानां रूपं समाधिना मनश्चक्षुषः पुर आधाय सादृश्य-निर्विशेषाणि चित्राणि आलिखितुम् अलं बभूवुः। मूल-रूपाद् रेखा-मात्रोऽपि व्यभिचारो, अणु-मात्रोऽपि प्रमादः शिथिल-समाधित्वं दोषायाकल्पत कर्तुः।

चित्रोपयोगिनो वर्णा नीली-आद्योषधीभ्यो, मनःशिला-गोरोचन-हरिताल-गैरिकादि-धातुभ्यो, लाक्षादि-वृक्ष-निर्यासेभ्यश्चोपालभ्यन्त। चित्रफलक-चित्रपट-लम्बकूर्च-तूलिका-वर्तिका-शलाका-वर्तिकाकरण्डकादीनि उपकरणानि चित्रकर्म-साधनान्यासन्, इति।

---

उच्चकक्षायाः, नवीनतायाः, दृढतायाश्च कृते—
**मुरारजी गोकुलदास, स्पीनिंग एण्ड वीविंग कं० लि०**
निर्मितानां वस्त्राणां क्रयः कार्यः
सुपारी बाग रोड परेल बम्बई नं० १२
टेलीफोन नं. ६००२१ टेलीग्रामस 'मोगोको'
(थ्री लाइनस) बम्बई
सर्वाधिकं सन्तोषप्रदं संस्थानम्
विशेषता—
(मिनरल खाकी तथा अन्य ड्रिलस, धोती तथा साडी, गाडलापेट, डोब्बी चाटर लांगक्लाथ, कोटिंग, शर्टिंग, वायला, मुल्स तथा अन्य फाइन एव मर्स-राइजड वस्त्र)
अभिकर्त्तारः (एजंट्स)—
पीरामल एण्ड सन्स
सेलिंग एजेंटस्
पीरामल एण्ड कं० लि०
चन्द्रचोक, मूलजी जेठा मार्केट बम्बई २.
टेलीफोन. ३३५१३.



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# "वाक्कीलस्य चातुरी"

(वैद्यनाथशर्मा कलकत्तास्थः)

एकदा कश्चिद् वाक्कीलो नगरान्तरस्थितन्यायालये स्वीयं कार्यं समाप्य शुल्कञ्चादाय स्वनगरं प्रति रेलयानेन प्रस्थितः। सर्वोच्चश्रेणीनिलये (Compartment) प्रविष्टोऽसौ। तत्र द्वौ जना एवोपविष्टा आस्तामेकस्तावद् वाक्कीलमहोदयोऽन्या चैका युवती-महिला।

वाक्कीलः स्वस्थाने सुखमासीनः प्राप्तं धनराशिं बहिष्कृत्याजीगणत्। तद्-द्रव्यराशिदर्शनसंजातलोभाया महिलाया मुखे जलं प्रास्रवत्। सा च वाक्कीलस्य द्रव्यग्रहणे मतिमकरोत्। प्रोक्तञ्च तया—भो महाशय! यदि त्वं संमानेच्छुस्तदा स्वं समग्रं धनं मे समर्पय नोचेदहमाक्रन्दिष्यामि यत्त्वया बलादिह ममाभिमर्षणं कृतमिति। झटिति राजपुरुषा आगत्य त्वां पाशैः भन्त्स्यन्ति। तच्छ्रुत्वाऽपि वाक्कीलमहोदयोनिर्भीक इव नैजे कार्ये व्यापृत आसीत्। तया महिलया पुनरुक्तोऽपि स तूष्णीमेव स्थितः।

ततः परं द्रव्यलिप्सया सा स्थानात् उत्थाय तन्निकटे गत्वोच्चैरवादीत्, 'अयि, किं बधिरोऽसि यन्मे वचो न शृणोषि'।, वाक्कीलोऽपि "आगतं तु भयं वीक्ष्य नरः कुर्याद् यथोचितम्" इति विचिन्त्य सपदि सावधानोऽभूत्। प्रत्युत्पन्नमतिना तेनात्मानं बधिरमिव संदर्श्य तां प्रति पत्रे किञ्चिद् विलिख्य प्रश्नः कृतः। वाक्कीलस्य कूटबुद्धिमजानतया लोभदुर्मदान्धया तया स्वाभिप्रायः पत्रे लिखितः। तस्मिन्नेव समये तत्पत्रं हस्तगतं कृत्वा वाक्कीलः स्मयमानरतामवोचत्, 'सुन्दरि, त्वमिदानीं सर्वथा मद्वशा। मिथ्याभयप्रदर्शनेन मां लुण्ठयितुमैषीः, क्षणं तिष्ठ, भुङ्क्ष्वाधुना स्वनिर्लज्जतायाः फलम्। पश्येदानीं दण्डनायका आवयोः कं कारागारे निक्षिप्स्यन्तीत्युक्त्वा स रेलयानसंलग्नसतर्क-करीं लोहशृङ्खलां (Alarm chain) समाक्रष्टुमुत्थितः।

सा महिला महतीं विपदं विशङ्कमाना स्वरक्षायाः कृते वाक्कीलस्य शरण्यतां विहाय उपायान्तरमदृष्ट्वा भयेन कदलीव वेपमाना तस्य चरणयोः पतिता। भृशं रुदती भविष्यति (Future) न केनाऽपि सममित्थं व्यवहरिष्यामीति प्रतिश्रुतिञ्च कुर्वती स्वापराधाय वाक्कीलं क्षमामयाचत। सा प्रबोधवचनैः समाश्वसिता पथि याने स्थिते अवतीर्य लज्जयाऽधोमुखी दृष्टिमार्गमतिक्रांता।

वाक्कीलमहोदयोऽपि सुखेन स्वचातुर्यात्तथाविधां सुविषमां दशां निस्तीर्णः स्वनगरं प्रापत्।


**श्रीनिवास फैब्रिक्स**

उच्चकक्षायाः कृते अद्वितीयसंस्थानम्, सूक्ष्मतन्तुसन्तानः

तथा अतिशोभनानां रङ्गाणां विविधताः

निर्यातस्य कृते पत्रव्यवहारः कार्यः—

दूरभाषः (फोन)-६००४५–६१८३४

**दी श्रीनिवास काटन मिल्स लि०**

डिलाइसल रोड लोअर परेल बम्बई १३.

मुख्यकार्यालयः (हैड आफिस)—

**'श्रीनिवास हाउस'**

वाडबी रोड, फोर्ट बम्बई १.

दूरभाषः (टेलीफोन) नं० २६२३६४ टेलीग्रामस

(५ लाइन्स) श्रीनिवास बम्बई

मैनेजिंग एजेंटस

**दी मारवाड टैक्सटाइल (एजेंसी) प्राइवेट लि०**

'श्रीनिवास हाउस' वाडबी रोड़

फोर्ट बम्बई




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—भगवत्याः संस्कृतसरस्वत्याः वर्तमानयुगेपि शक्तिपरिचयः

[डा० रघुवीरमहोदयस्य भारतीयसंस्कृतिप्रणयश्च]

आर्याणामादिमा भाषा सेयं संस्कृतभारती सर्वासां भाषाणां जननीति कैर्गुणैः प्रख्यायते, इदं हि मर्मपरीक्षकैः समये सति मूलविचारेण शक्यते परिज्ञातुम्। अस्यां भाषायां शब्दानामुत्पत्तिः प्रायो धातूनां सकाशाद् भवति। एते धातवोऽपि यदा उपसर्गैः सह संमिलिता भवन्ति तेभ्योऽपि पुनरनेके शब्दाः प्रादुर्भवन्ति। प्रसिद्धः सोयमर्थः साधारणानामपि संस्कृतज्ञानां यत् एकस्मादेव हरणार्थकाद् 'हृ' धातोः उपसर्गाणां योगाद् आहार-विहार-प्रहार-संहारादीनां नानार्थकानां शब्दानां समुद्भवः। एतदतिरिक्तं कृदन्त-तद्धितादयः प्रत्यया अपि तथा सन्ति येभ्यो नवीननवीनशब्दानां सिद्धिर्यथामनोरथं शक्यते कर्तुम्। प्रचलितास्तदिमे हिन्दीभाषायामपि साम्प्रतम्। यथा–प्रयोजनीय-उपयोगी-सुहावना-रमणीक-सराहनीय-पाश्चात्य-भौकोलिक-सांस्कृतिक-इत्यादयः।

एतस्मिन् विषये यैः साहित्य-सभ्यताप्रणयिभिरधिकतमं प्रयास आरब्धस्तेषु 'सरस्वती विहार'स्य (इन्टरनेशनल एकेडमी आफ् इण्डियन कल्चर नागपुर), तत्संचालकस्य डाक्टर रघुवीरमहोदयस्य च नाम चिरस्मरणीयं भवेत्। महाभागेनानेन १६३६ तमस्य खिष्टीय संवत्सरस्य समीपे हिन्दीभाषायामन्यान्यप्रान्तीयभाषासु च वैज्ञानिकशब्दावल्या निर्माणस्य कृतोभूत्प्रारम्भः। च योरोपीयभाषासु तस्य महाभागस्याऽभूत्प्रेरणा यत् आङ्गलभाषायामन्यासु या किल वैज्ञानिकशब्दावली अस्ति सा हि हिन्दीभाषा यामपि अनुसरणरूपेण स्थानमासादयतु। किन्तु अपरिवर्तितरूपे यदि वैदेशिकशब्दावली हिन्द्यां स्थानमासादयेत्तदाऽस्माकं साहित्यं वैदेशिकभाषाया अनुकरणमात्रं सिध्येत्। इमं भयानकं गत्यवरोधं दूरीकर्तुं डाक्टरमहोदयेन वैदेशिक-पारिभाषिकशब्दानामनूदितरूपेण स्वीकरणं, तत्र च श्रीमत्याः संस्कृतभाषाया आधारग्रहणं निर्धारितम्। डाक्टरमहोदयो बहुभाषाणामभिज्ञः। एतेन ज्ञानेन, संस्कृतसरस्वत्या आधारेण च विंशतिवर्षाणां सततपरिश्रमेण स ह्यस्मिन् विषये समभूत्सफलः। एतस्य फलस्वरूपे नागपुरनगरात् वैज्ञानिकशब्दानां बृहदाकारः कोषः प्रकाशितोभूद्, यस्मिन् १८०० पृष्ठानि, लक्षाधिकनवीनशब्दैः पूरितानि। कोषेणाऽनेन विज्ञानपाठ्यक्रमे ३४ संख्यकानि पुस्तकानि निर्मितानि, यैः इण्टरपरीक्षापर्यन्तं वैज्ञानिकशिक्षा निरर्गलं प्रादीयत।

न केवलं विज्ञानविषये एव, अपि तु प्रशासनसंबन्धेऽपि या पारिभाषिकशब्दानामावश्यकताऽभूत् सापि डाक्टरमहोदयेन संस्कृतभाषायाः साहाय्येन सफलतापूर्वकमभूत् पूरिता। प्रचलिताश्च ते नवीनाः शब्दाः साम्प्रतं हिन्दीभाषायां सर्वतः। यथा-संविधानम् (कांन्स्टिट्यूशन) विधानम् (लेजिस्लेशन), संसद् (पार्लियामैण्ट), अधिनियमः (एक्ट), सचिवः (सेक्रेटरी), आयुक्तः (कमिश्नर), शासनम् (गवर्नमैण्ट), प्रशासनम् (एडमिनिस्ट्रेशन) इत्यादि।

डाक्टरमहोदयस्य भारतीयसंस्कृतेर्विषये नैसर्गिकप्रेमैव कार्येऽस्मिन् सफलतां प्रददौ। भारतीयसंस्कृतेरुद्धाराय युरोपस्य एशियाप्रदेशस्य च बहुषु स्थानेषु परिभ्रमणं कृतवान् श्रीरघुवीरमहोदयः। साम्प्रतमेव



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यं चीनप्रदेशे रूसप्रान्ते च भ्रमणं कृत्वा परावृत्तः। तप्रदेशात् प्राचीन-हस्तलिखितग्रन्थानां, मूर्तीनां, भिलखादीनां च या सामग्री तेनोपलब्धा, तस्या शमात्रेण नवदेहल्यां शिक्षामन्त्रालयस्य तत्त्वावधाने ला विशाला प्रदर्शिनी समपद्यत। एवमेव रूस-मध्ये-या, मंगोलिया, तिब्बत, जावादिप्रदेशेभ्योपि भार-यसंस्कृतिसंबन्धिनी प्रचुरा सामग्री समुपलब्धा, यया विभूषितः संप्रति 'सरस्वतीविहारः'। महान् हर्षस्य षयो यत् 'इन्टरनेशनल एकेडमी' दिल्लीराजधान्यां ग्रमेव स्वकार्यं प्रारप्स्यते। अनेन हि विलुप्ताया रतीयसंस्कृतेः संबन्धे भूयांसि तथ्यान्याविष्कृतानि वेयुः। डाक्टररघुवीरमहाभागं, तस्य संस्कृतिप्रेमाणं चिरायुषं क्रियाद् भगवान्।

## वायुयानसेनायामपि भारतीयानां वीरता

व्योमयानं भारतीयानां कृते नवीनं नास्ति। रते न केवलं देवानामेव, अपि तु भूचारिणामपि मानानि पुरा भारतगगने अभ्राम्यन्। भगवान् रामचन्द्रो लंकाविजयसहायकैः सुग्रीव-विभीषणा-भिः सह यदा अयोध्यामुपागमत्तदा पुष्पकविमान-रहस्यैव अत्राऽऽगच्छत्। अयोध्यावासिभिः सर्वैरेव ष्पकविमानमवलोकितम्। किन्तु भौतिकेऽस्मिन् युगे ंसादिदेशवास्तव्यैरेव वायुयानमाविष्कृतम्। भारती-तु पश्चिमदेशवासिनां सहयोगेन व्योमयानसंचालन-विशिक्षितम्। किंतु निसर्गतः साहसिनो भारतीयवीराः नापि शनैः शनैः प्रावीण्यमधिजग्मुः। जोधपुरनगरे वायुसेना कालेजो' स्तीति भवेदेव विदितं लोकवृत्त-ज्ञानाम्। संप्रति अगस्तमासस्य २६ तारिकायां वायुसेनाकालेजेऽस्मिन् वायुसेनाशिक्षार्थिनां कृते आसीद्दीक्षान्तभाषणम्। अस्मिन् 'एयरकमोडोर' (वायुसेनाध्यक्षेण) आर. एच. डी. सिंहेन दीक्षान्तभाषणे प्रोक्तम्–"भारतीयवायुसेनाया निर्माणम् अनेकेषामध्यक्षाणां, तथा वायुसैनिकानां च प्रभूतेन परिश्रमेण, असाधारणेन बलिदानेन च जातम्। भारते-निष्ठा-सेवा-साहसादीनां गौरवपूर्णा परस्परा चिरात् प्रचलिता। एतस्याः संरक्षा भवतामेव हस्तेऽस्ति साम्प्रतम्।

द्वितीया कथा सेयमस्ति, यस्याः कृते भवतामवधानं भवेत्। भारतीयवायुसेनायाः स्वरूपमन्यापेक्षया नवीनमस्ति। अस्यां सर्वेषामपि प्रांतानां मनुष्याः संमिलिताः। सेयं सर्वस्यापि भारतस्य प्रतिनिधित्वं करोति। प्रादेशिक्यां भिन्नतायां सत्यामपि वायुसेनायाः अध्यक्षेषु, सैनिकेष्वपि च सुदृढो भ्रातृभावः। सोयं पञ्चशीलस्य प्रभावो भवेदित्यपि शक्यते वक्तुम्। सामञ्जस्यस्य सेयं भावना, वीरतायाश्च सेयं परम्परा सर्वदा जीविता तिष्ठेदिति भवत्सु आयत्तम्"। इत्यादि येभ्यः स्नातकेभ्यः उड्डयनचिह्नानि (विंग्ज) प्रादीयन्त, तेषु भारतीयनौसेनायाः अध्यक्षौ लेफ्टिनेंट एस० सी० चोपर, लेफ्टिनेंट आर० एस० ग्रेवार, एतदादीनामपि नामान्युल्लेखनीयानि। एवमेव राजकीय-अफ़गान-सेयायाश्चालकः मुहम्मदयाकूबः, एतदादयोप्युल्लेखार्हाः। ऐतिहासिककालादारभ्य अद्यावधि अपि निरन्तरं निगूढा सेयं भारतीयवीराणां साहसिकता धीरता च चिरं स्थायिनी भूयादिति देशहितैषिणां कामना।

## शोकसंवादः—

पं. श्रीरामकुमारशास्त्रिणः ('विजय') 'नीमकाथाना' (तोरावाटी) स्थानात्पत्रमुपगतं यत्र महाभागेनाऽनेन शोकसभायाः सूचना दत्ता, या हि संस्कृतसाहित्य-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सम्मेलनस्य तोमरवाटीशाखासभायाः तत्त्वावधाने २८ अगस्तदिवसे समायोज्यत । अस्यां साम्प्रतमेव दिवमुपगतस्य श्रीमुरारिमिश्रस्य शोकप्रकाशनमक्रियत । सभायामस्यां 'नीमकाथानास्थ' संस्कृतानुरागिजनतया मिश्रमहाभागस्य संस्कृतसाहित्यसेवां प्रशंसन्त्या, तस्य स्वर्गगमनेन प्रान्तस्यास्य महती क्षतिरभिव्यक्ता । मिश्र महाभागस्य जीवनविषये श्रीगिरिधरचोटिया, श्रीप्यारेमोहनसाहित्याचार्यप्रभृतीनां भाषणान्यभूवन् ।

दुःसंवादमिममधिगत्य तत्परिचिताः संस्कृतानुरागिणः सर्वे एव विषादमुपगच्छेयुः । पङ्क्तीनामासां लेखकस्य 'बगड' संस्कृतपाठशालायां मिश्रमहाभागेन सह प्रथमपरिचयोऽभवदिति स्मरामि । महाभागोयं पाठशालायामस्यां पाणिनीयव्याकरणस्य, साहित्यस्य च सफलतयाऽध्यापनमकरोत् । अन्तिमदर्शनं तु साम्प्रतमेव राजस्थानप्रान्तीयसंस्कृतसाहित्यसम्मेलनस्य' शीकराधिवेशने समभवत् । हन्त ! कोऽयं जानीते स्म यदिदं मिश्रमहोदयस्य दर्शनमन्तिमं भवेत् । चराचरनायको मिश्रमहोदयाय शाश्वतिकीं शान्तिं प्रदेयादिति भगवन्तमभ्यर्थयामहे ।

**संवादपत्राणां पृष्ठानुसारं मूल्यनिर्धारणं भवेत्-**

संवादपत्राणि जनशिक्षणस्य महत्त्वपूर्णं साधनम् । न केवलमिदमेव, अपितु जनमतपरिवर्तनस्य संवादपत्रेषु एषु महती शक्तिः । राजनैतिकेषु विषयेषु जनतायां प्रसृतेषु, संवादपत्राणि स्वस्याऽद्भुतां शक्तिं परितः प्रचालयितुं बद्धपरिकराणि भवन्ति । शनैः शनैश्च स्वविचारानुसारं जनताया मतपरिवर्तने पत्राणि इमानि सफलान्यपि भवन्ति । एवंविधशक्तिसंपन्नमिदं शस्त्रं यदि केवलं धनकुबेराणाम् (पूंजीपति) एव हस्तगतं भवेत्तर्हि अस्माकं जनतन्त्रस्य शनैः शनैः स्वरूपमेव अन्यरूपं भवेत् ! भौतिकस्वार्थमयं तदिदं युगं धनबलाऽधीनम् । वर्तमानकाले प्रायः सर्वेष्वपि क्षेत्रेषु धनबलसंपन्नाः पुरुषा विजयं लभन्ते । समाचारपत्राणामपि सांप्रतं विलक्षणा स्थितिः । वर्तमानकाले प्रायो बहून्येव पत्राणि किञ्चिदुद्देश्यमवलम्ब्य न प्रकाश्यन्ते जनतायाम् । तानि हि साम्प्रतं वाणिज्य-व्यवसायश्रेणौ अन्तर्भवन्ति । दुर्भाग्यवशात् कतिपयपत्राणां स्वामित्वं महतां धनपतीनां संप्रति हस्तगतम् । अतएव एकाधिकारस्थापनस्य भावना प्रबला संपद्यते ।

एवं स्थितौ लघुलघूनि पत्राणि, किं वा प्रादेशिकानि पत्राणि, बहुधा विलीनानि । किं वा विलयोन्मुखां दशामुपगतानि । तेषां विषये सर्वदा संदेहो भवति यत्तानि अग्रे प्रचलिष्यन्ति, अथवा निरुद्धानि भविष्यन्ति । अस्यां दशायामावश्यकमभूत् यत् लघुलघूनां, प्रादेशिकानां च पत्राणां सा स्पर्द्धा केनचिदुपायेन निरुध्येत या हि धनकुबेराधीनैः महद्भिः पत्रैः सह प्रवृत्ताऽस्ति तेषां पत्राणां जीवनस्थितये तेभ्यः संरक्षणदानमावश्यकमिवाऽभूत् ।

कतिपयमासेभ्यः तामिमां प्रतिस्पर्द्धां निरोद्धुं चर्चा अपि प्राचलन् । प्रान्तीयसर्वकारेण सर्वसंमतम् उपायमाविष्कर्तुं पत्राणां स्वामिनः, प्रकाशकाश्चापि परामर्शार्थं समाहूताः । किन्तु धनपतीनामन्तर्निगूढः स्वार्थः संवादपत्रोद्योगं देशे नोत्साहयेत् । अन्ते बहुधा विचारविमर्शाभ्यां प्रतिस्पर्द्धा निरोधनार्थं पृष्ठानुसारं संवादपत्राणां मूल्यनिर्धारणं स्थिरीकृतमभूत् । संसदि सूचनाप्रसारणमन्त्रिणा डा० बालकृष्णकेसकरमहोदयेन एकं विधेयकं प्रास्तूयत यस्मिन् ,सर्वकारस्याऽधिकारो भवेत् यत्पृष्ठानुसारं स हि पत्राणां मूल्यं निर्धारयेत् । संप्रति पत्रैः संबद्धा व्यक्तयः प्रार्थयेरन् यत् सर्वकारः पृष्ठानुसारं मूल्यनिर्धारणसमये तेषां हितं लक्ष्यीकृत्यैव निर्णयं प्रकाशयेदिति ।

**आयुर्वेदचिकित्साप्रणालीद्वारा देशस्याऽस्य महती सेवा**—श्रावणकृष्णप्रतिपदि (३१) जुलाई आयुर्वेदमार्तण्ड-भिषगाचार्य-स्वर्गवासि-श्रीलक्ष्मीरामस्वामिमहाभागानां सप्तदशो निर्वाणदिवससमारोहः पूर्वोक्तस्वामिमहाभागानामुद्याने (मोतीडूंगरी) निरवर्त्यत । यत्र हि राजस्थानस्य स्वास्थ्यमन्त्री श्रीबदरीप्रसादगुप्तमहाभागः अध्यक्षपदममण्डयत् । अध्यक्षपद-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



लं कुर्वाणेन स्वास्थ्यमन्त्रिमहोदयेन निजभाषणे सोपत्ति समर्थितं यत् आयुर्वेदीयां चिकित्सापद्धतिं निर्भरया अवलम्बमानमिदं भारतं सहस्र-सह स्रवर्षाणि सुस्थिरसभूत्सुरा। अनया प्रणाल्या भारतस्यास्य महती सेवा पुरा कृता, वर्तमाने क्रियते, अग्रे चापि यथायथं करिष्यते, इत्यस्माकं सुदृढो विश्वासः। मन्त्रिमहोदयेन ससमादरमुदीरितं "यत् स्वर्गवासिश्रीलक्ष्मीरामस्वामिमहाभागैरायुर्वेदस्य तु महती सेवा प्रत्यक्षं कृतैव, किन्तु स्वामिमहोदयानां जीवनकालो मानवसमाजस्य निरुपाधिसेवायामेव बहुधा व्यत्यगच्छदिति नातिशयोक्तिः।" स्वास्थ्यमन्त्रिमहोदयेन वैद्यसमाजं प्रति अनुरोधः कृतो यत् "स्वामिमहाभागस्याऽऽदर्शं गृहीत्वा आयुर्वेदविज्ञानस्य सेवायां स हि दृढप्रतिज्ञो भवेत्। आयुर्वेदीय चिकित्सापद्धत्यां मानवसमाजस्य समुचितसेवायाः पूर्णा क्षमता विद्यते। राजस्थानस्य ग्रामे ग्रामे चेदस्याः प्रसारो भवेत्तर्हि देशवासिनां महानुपकारो भवेदित्यत्र नास्ति संदेहः।" स्वास्थ्यमन्त्रिमहाभागेन-राजस्थानसर्वकारस्य पक्षात् आयुर्वेदचिकित्सापद्धतेः सर्वाङ्गीणोन्नतये प्रतिसमयं सहायतायाः समाश्वासनमदीयत। समारोहेऽस्मिन् अन्यान्यैरपि गण्य-मान्यमहाभागैः स्वामिमहोदयानामायुर्वेदसेवां, जनसमाजस्य सर्वविधं चोपकारमुपलक्ष्य भूयस्तरां समुदीरितमभूत्। तेषु स्वामश्रीमङ्गलदासमहोदय–श्रीजयरामदासस्वामि–महन्तश्रीगङ्गादासमहाभाग–राष्ट्रदूत(स्य)भूतपूर्वसम्पादकश्रीसुमनेशजोशिमहोदयानां नामानि विशेषतया उल्लेखनीयानि। पंक्तीनामासां लेखको 'भारती' सम्पादकोऽपि स्वामिमहाभागानां जीवनविषये स्वचक्षुर्भ्यां प्रत्यक्षीकृतमवर्णयत्, लोकसेवां च समार्थयत।

---

## "स्वर्गीयगुरुवर-आचार्य श्रीमुरारिमिश्राणां चरणारविन्दयोः श्रद्धाञ्जलिः"

[आचार्य श्रीसूर्यनारायणशास्त्रिणः प्र० अ० सं० विद्यालय, पावटा]

राजस्थानमरुस्थलस्य विभवाः सत्यं महाशाब्दिकाः
मिश्राः श्रीगुरवो मुरारिचरणा ज्ञानार्थिकल्पद्रुमाः ॥
अध्यक्षा बगड़स्थ संस्कृतमहाविद्यालयस्याद्य हा–
कष्टं दुर्विधिना हि संस्कृतगिरो लोकान्तरं प्रापिताः ॥१

काले शिष्यहिताय नीतिनिपुणैर्लोभं विजित्याऽञ्जसा
त्यक्तो यैर्धनसंग्रहोऽपि सुलभो भोगाद्युपायोऽद्भुतः ॥
नो हीनो गरिमा कदापि धनिनामग्रे सदा मानिभिः
भक्त्या नौमि हि तान् मुरारिचरणान् स्वर्गस्थितान् सद्गुरुन्
॥२॥

सद्विद्यासदनानुदात्तचरितानज्ञानविध्वंसिनः
शास्त्राम्भोनिधिमज्जनैकरसिकान् शिष्यैः शुभैः संवृतान्॥
कर्तव्यैकरतान् सुकीर्तिधवलान् विद्वत्सभापूजितान्
वन्दे श्रीगुरुमिश्रपादजलजान् साष्टाङ्गपातैर्मुदा ॥३॥

समेधमानं कलिदुष्प्रभावम्,
अत्यल्पसत्वांश्च समीक्ष्य लोकान् ॥
विरक्तचित्ता इह पूज्यपादाः
गता भवन्तः किमु नाकलोकम् ॥४॥

अप्राप्य छात्रानथवाऽत्र योग्यान्
शास्त्रार्थपात्रान् विनयादिशीलान् ॥
सुपर्वणः शिक्षयितुं दुरुहान्
ग्रन्थान् गताः किं विबुधेन्द्रलोकम् ॥५॥

यावत्स्मरामि भवतां सहवासदिष्टम्
तांस्तांश्च लोकहितकारिमहोपदेशान् ॥
आदर्शभूतसमुदात्तचरित्रजातान्
आनन्दपूर्णहृदयो नु भवामि तावत् ॥६॥

अभयादिगुणास्तु संपदो
ननु दैव्या भवतां शुभाकृतौ।
मनुजैरवलोकितास्तु यैः
अलभन्त द्रुतमेव ते मुदम् ॥७॥

भवतां गुणराशिकीर्तनक्षमता नास्ति मयीदृशी तु वः।
त्रिदिवस्थभवत्प्रसादिका कृतिरेषा हि भवेद्विनिर्मिता ॥८॥

---



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❀ सूक्ति-सुधा ❀

सौवर्णानि सरोजानि निर्मातुं सन्ति शिल्पिनः ।
तत्र सौरभनिर्माणे चतुरश्चतुराननः ॥ १ ॥

सोने का कमल बनाने वाले बहुत से कारीगर हो सकते हैं। किन्तु उस कमल में सुगन्ध डालने वाला एक चतुरानन (चारमुखवाला) ब्रह्मा ही चतुर है।

गुणिनां निर्गुणानां च दृश्यन्ते महदन्तरम् ।
हारः कण्ठगतः स्त्रीणां नूपुराणि च पादयोः॥ २ ॥

गुणवाले और निर्गुण पदार्थों में बड़ा भारी अन्तर है। गुण (डोरी और खूबी) वाला मोती का हार स्त्रियों के कण्ठ में रहता है। गुण (डोरी और विशेषता) रहित पाजेब (पैर में पहरने का भूषण) स्त्रियों के पैरों में ही स्थान पाते हैं ॥ २ ॥

सा श्रीर्या न मदं कुर्यात् स सुखी तृष्णयोज्झितः ।
तन्मित्रं यत्र विश्वासः पुरुषः स जितेन्द्रियः ॥ ३ ॥

लक्ष्मी वही है जो पाने वाले के मनमें अभिमान पैदा नहीं करे। सुखी वही है जिसको तृष्णा नहीं। मित्र वही, जिस पर विश्वास किया जाय। सच्चा पुरुष वही है जिसने अपनी इन्द्रियों को जीत लिया है ॥ ३ ॥

सदयं हृदयं यस्य भाषितं सत्यभूषितम् ।
कायः परहिते यस्य कलिस्तस्य करोति किम् ॥ ४ ॥

जिसका हृदय दयायुक्त है, जिसका वचन सत्य से भूषित है, जिसका शरीर सदा दूसरों के उपकारों में लगा रहता है उसका यह कलियुग क्या बिगाड़ कर सकता है ॥ ४ ॥

अकृतोपद्रवः कश्चिन्महानपि न पूज्यते ।
अर्चयन्ति नरा नागं न तार्क्ष्यं न गजादिकम् ॥५॥

आज कल का जमाना ऐसा है कि चाहे जितना बड़ा आदमी हो, जब तक कोई उत्पात (किसी का नुकसान) न करे तब तक उसकी कदर, संमान नहीं होता। देखिये - लोग नाग का पूजन करते है, गरुड़ अथवा इतने ऊंचे पूरे हाथी आदि की पूजा नहीं करते। लोगों को हानि पहुंचाता है अतएव डर कर लोग नाग की पूजा करते हैं।

आज्ञामात्रफलं राज्यं ब्रह्मचर्यफलं तपः ।
परिज्ञानफला विद्या दत्त-भुक्तफलं धनम् ॥६॥

राज्य का सच्चा फल है कि आज्ञा का भङ्ग न हो। अर्थात् राजाओं की हुकूमत यदि बराबर कायम है तो उनका राज्य चल रहा है, यह समझना चाहिये। तपस्या का फल है ब्रह्मचर्य यदि ब्रह्मचर्य भङ्ग हो गया तो तपस्या कैसी? विद्या का फल है कि तत्त्वज्ञान होजाना। धन का फल है। कि दूसरे को देना और स्वयम् उपभोग करना। इन दोनों से रहित हुआ तो धन मिलने का क्या फल ॥ ६ ॥

प्रकाशकः—जयबहादुरसिंह पताः—भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रकः—राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पुस्तकालय
Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

( संस्कृतस्य प्रमुखं मासिकपत्रम् )

भूमावादर्शितस्वर्गा दुर्गा दुर्गार्तिनाशिनी ।
भारतेऽखिलवर्गाणामपवर्गाय जायताम् ॥

वर्षम् ६ | द्वादशोऽङ्कः | मूल्यम् वार्षिकम् ३) रु० एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❀ विषय-सूची ❀


| क्रमः | लेखाः | लेखकाः | पृष्ठ संख्या |
|---|---|---|---|
| १. | दीनः | शिवशरणझा, झांसी | २६८ |
| २. | श्रीकृष्णदौत्यम् | भास्करकेशव ढोक | २७१ |
| ३. | पुरुषपरीक्षा | उत्तमराव विनीवाले | २७२ |
| ४. | संस्कृतज्ञान्प्रति | कालीरामशर्मा शास्त्री, अम्बाला छावनी | २७३ |
| ५. | "तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ" | कालिकाप्रसादशुक्लः, बड़ौदा | २७७ |
| ६. | भारतीयसंस्कृतेस्त्रय आदर्शाः | श्रीधरप्रसादपन्तः 'सुधांशुः' पीलीभींत (उ० प्र०) | २८० |
| ७. | आयुर्वेदीयचिकित्साप्रणाली, यूनानीचिकित्सापद्धतिश्च | सहसम्पादकः | २८३ |
| ८. | हिमालयाञ्चले बदरिकाश्रमयात्रा | सम्पादकः | २८५ |
| ९. | सम्पादकीयम्— | सम्पादकः | |
| १०. | सूक्ति-सुधा | " | |
| ११. | संस्कृतसमाचाराः | " | |


सूचना :—सर्वे ग्राहकाः सूच्यन्ते यत् पत्रव्यवहारावसरे निजग्राहकसंख्यां स्वस्मिन् पत्रे अवश्यं दर्शयेयुः। अन्यथा पत्रोत्तरे बाधा समुत्पत्स्यते।

## —❀ "भारती" पत्रस्य उद्देश्यानि नियमाश्च ❀—

१. संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचारपरिपोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि।

२. 'भारती'पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम्।

३. मासिकपत्रमिदं प्रतिमासं प्रतिपदायां तिथौ प्रकाशितं स्यात्।

४. एकस्यांकस्य मूल्यम् ।≈) आणकषट्कम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादकः—
[illegible]र्षिकलानाथशास्त्री बी. ए.
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षम् ६ | आश्विनशुक्ला १, सं० २०१३ | अङ्कः १२

## दीनः

(शिवशरणझा, झांसी)

अभिधीयते स दीनः ।

१

कष्टानि यस्य हेतोरिह सन्ति सन्ततानि ।
संसज्य तेषु येन गीतानि विस्मृतानि ।
संस्तौति यो, न दयते देवोऽपि जातु यस्मिन् ।
निःसीम-भीम-दुस्तर-सन्ताप-सिन्धु-लीनः ॥

२

[illegible]र्विसर्जयति यं भूरिश्रमाय गेहात् ।
सायं यमाह्वयति च रात्रौ विराम-कामात् ।
गोष्ठीषु जीर्णवासा यो गर्हणामुपैति ।
कतिपय-कुटुम्ब-रक्षा-चिन्ता-तडाग-मीनः ॥

३

तीव्रातपेन ग्रीष्मे तताप्यतेऽसहायः ।
शीताद् न चापि शिशिरे त्राणे भवत्युपायः ।
वर्षाम्बुनाऽभिषेकं प्रावृट् करोति यस्य ।
आवश्यकोपकरणैरस्त्येव यो विहीनः ॥

४

[illegible]कान्त-भोजनेन सततं कृशश्च कायः ।
कायाद् बहिः सरन्ति चास्थीनि, कोऽस्त्युपायः ?
कृत्वा प्रयत्नमपि यो नहि साध्य-सिद्धिमेति ।
भू-स्वामि-ऋणमदत्वा मृत्युश्च नास्त्यधीनः ॥

५

हसितुं च क्रीडितुं च यस्यास्ति नावकाशः ।
परिवार-पालनस्य कण्ठे स्थितोऽस्ति पाशः ।
जीवति न चैव म्रियते, मध्येऽवलम्बते यः ।
रोगाद्युपद्रवे तु यस्यास्ति नात्मनीनः ॥

६

[illegible]तु-कामनां हि कर्तुं यस्यास्ति नाधिकारः ।
गेहं मनःप्रदेशं चाऽवेष्टतेन्धकारः ।
पुण्य-स्थलानि द्रष्टुं यस्यान्तिके धनं नो ।
दुःखे सुखे समः सन् शान्त्यै सदैव क्षीणः ॥

७

सत्यं न चेदुपायो, लोपेऽथ दीनतायाः ।
सकृच्च दीन-देहे प्राप्तौ तु पीनतायाः ।
क्रान्तिस्तदा भविष्यति भू-लोक-कम्पयित्री ।
विधिराशु शान्ति-कामैरुद्भाव्यतां नवीनः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# श्रीकृष्णदौत्यम्

[ले॰ भास्करकेशव ढोक]

(पूर्वानुवृत्तम्)—

## द्वितीयः प्रवेशः

(दुर्योधनस्य प्रासादः)

दुर्योधनः—मातुल, अपि श्रुता भवता दूतेन आनीता वार्ता ?

शकुनिः– न श्रुता। का पुनः सा वार्ता ?

दुर्यो॰— अस्माकं निमंत्रणं अनादृत्य स शिशुपाल-वधकः पांडवानां दूतः कृष्णः विदुरगृहं भोजनार्थं गतः।

शकुनिः—एतत् मया पूर्वं एव तर्कितम्। अनेन हि तस्य राजकार्यपटुता धूर्तता च प्रकटीभवतः।

दुर्यो॰—अधुना पांडवैः प्रत्यक्षः श्रीकृष्णः दौत्याय प्रहितः। किं कर्तव्यमूढा भवति मे मतिः। किं करणीयम् स्यात् ?

कर्णः—तत् हि पूर्वमेव अस्माभिः निश्चितम्। युद्धं विना राज्यभागः सर्वथा न देयः। युद्धे अस्मान् विजित्य पांडवैः स्वराज्यं प्राप्यम् इति श्रीकृष्णाय स्पष्टं कथितव्यम्।

शकुनिः—श्रीकृष्णः अतीव मधुरालापी अस्ति। स्वभावपरेण अस्मान् सः मायावी मोहयेत् कदाचित्। अपरं च कपटप्रवंधे सः अतीव निपुणः।

यः कालं मुचकुंदकोपदहने नीत्वा दरीं दग्धवान्
द्विर्भग्नश्च वृकोदरेण मगधाधीशो हि यस्येंगितैः।
भूपानां परिपश्यतां बलवतां वै राजसूयाध्वरे
चैद्यो येन हतः स पाण्डवसखा दौत्यार्थमत्रागतः॥

तर्हि सावधानतया अस्माभिः वर्तितव्यम्।

दुर्यो॰—युद्धे समुपस्थिते श्रीकृष्णः पांडवानां अवश्यं साहाय्यं करिष्यति। कृष्णबलेन संयुक्ताः पांडवाः सामर्थ्यशालिनः अजेयाः च भविष्यन्ति।

कर्णः—न भेतव्यं भवता। मयि त्वत्सहाये सति किमर्थं तव एषा चिंता ?

दुर्यो॰—तव एव बलेन अहं पाण्डवानां विरोधं करोमि। एते भीष्म-विदुर-द्रोणाः पांडवानां कुशलं इच्छन्ति। शरीरेण ते अत्र संति किंतु मनसा ते पांडवानां समीपम् एव वर्तन्ते। न मे तेषु विश्वासः।

कर्णः—निश्चिन्तः भव। अयं कृष्णः स्वयमेव एकाकी अत्र आगच्छति। तर्हि सः प्रथममेव किं न बन्धने ग्रहीतव्यः। कृष्णे बंधनप्राप्ते पांडवा मृतप्रायाः भविष्यंति।

शकुनिः—यदि आवश्यक एष उपायः अपि अवश्यं करणीयः।

दूतः (आगत्य) देव, महात्मना विदुरेण सह श्रीकृष्णः राजसभां शीघ्रमेव आगमिष्यति।

दुर्यो॰—तर्हि वयं तत्रैव गच्छामः।

(सर्वे प्रस्थिताः)

## तृतीयः प्रवेशः

(राजसभा)

दुर्यो॰—भगवतः वासुदेवस्य वयं सहर्षं स्वागतं कुर्मः। निवेद्यताम् यदि वयं कामपि भवत्सेवां कर्तुं योग्याः।

धृत॰—वासुदेव, अपि मे पुत्रकाः पांडवा सपत्नीकाः कुशलिनः सन्ति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



श्रीकृष्णः – राजन् सर्वे कुशलिनः संति। भवत्स-
तान् सर्वान् पांडवैः सादरप्रणामः मन्मुखेन भणितः।

धृत०—उचितमेव एतत् तेषाम्। अद्य वासुदेवस्य रणरजोभिः एषा सभा पाविता। कस्मात् कारण-शेषात् अद्य भवतः अत्र प्रस्थानम् अभवत्? तत् तुमिच्छामः।

श्रीकृष्णः—भवन्तः सर्वे जानंति एव यत् पांडवैः कृतपणः सयशः पूर्णतया संपादितः। अधुना अस्माकं ज्यभागः अस्मभ्यम् तूर्णं देयः इति तेषां सविनयं र्थना अस्ति।

धृत०—जात दुर्योधन, अस्मिन् विषये किं चिंतितं या। भवता उचितमेव कर्तव्यम्।

दुर्यो०—अस्माभिः न किंचिदपि अनुचितं कृतम्। डवैः प्रतिज्ञा पूर्णतया न पालिता इति वयं मन्यामहे। तः ते राज्यं याचितुं न अर्हन्ति।

श्रीकृष्णः—अलीकम् एतत्। पांडवाः न्यायप्रियाः लशालिनः सत्यप्रियाः च संति। तैः नीतिविरुद्धं चरणं कदापि संभवनीयं न भवेत्।

र्मज्ञाः खलु पांडवाः सुकृतिनः सन्नीतिमन्तो बुधाः
दीनानां परिपालकाः खलु सतां सेवापरा निस्पृहाः।
स्वाराज्यार्थमपि त्यज्जंति सहसा सन्नीतिमार्गं न ते
वीरा बिभ्रति नो भयं लवमपि प्रत्यन्तकालादपि॥

अतः तेषां प्रार्थना अवश्यं सम्यक् चिंतनीया।

शकुनिः—अस्माभिः पूर्णतया सर्वमेव चिंतितम्; नंतरं च निश्चितम्। पांडवाः राज्याय पात्रं न संति।

श्रीकृष्णः—धृतराष्ट्रमहाराज! पितामहभीष्म, गुरु-द्रोण अन्ये च सभ्याः श्रूयताम्। दुर्मंत्रितः अयं र्योधनः पांडवान् प्रति महान्तं अन्यायं करोति। अस्य पापकर्मणः सुष्ठु परिणामः कदापि न भवेत्। यथा पांडवाः तथैव कौरवाः अपि मे प्रियाः सम्बन्धिनः च सन्ति। अहं उभयोः शुभं चिन्तयामि। अतः पुनः वदामि पांडवानां राज्यभागः तेभ्यः तूर्णं देयः।

कर्णः—युद्धं विना राज्यं प्रत्यर्पितुं दुर्योधनः कदापि सन्नद्धः न भविष्यति।

विदुरः—अस्य दुराग्रहस्य परिणामः कौरवाणां अनिष्टकारकः भविष्यति। पांडवाः धर्ममार्गानुचारिणः सन्ति। अपरं च श्रीकृष्णः तेषां सखा। एतत् चिंतनीयम्।

कर्णः—वयं पांडवेभ्यः सकृष्णेभ्यः न बिभिमः।

विदुरः—अलं एतेन प्रलापेन। अपि स्मर्यते घोष-यात्राप्रकरणं युष्माभिः।

गंधर्वैर्विजिताः स्वपाशविधृता बन्दीकृतास्ताडिताः
एते कर्णसुयोधनप्रभृतयो निर्लज्जवीरत्रुवाः।
श्रुत्वैतत् हि युधिष्ठिरेण सदयं संप्रेष्य भीमार्जुनौ
उन्मुक्ता अरिबन्धनात् कथमलं जेतुं ह्यमी पांडवान्॥

श्रीकृष्णः—युधिष्ठिरः युद्धाय अनुत्सुकः अस्ति। न कस्मादपि भयात्, अपितु कुलघातं निवारयितुम्। अतः स साम्ने तत्परः अस्ति। युधिष्ठिरेण केवलं पंचग्रामाः याचिताः। दीयतां ते तेभ्यः, निवार्यताम् अयं विनाशकारी कलहः।

दुर्यो०—युद्धं विना सूच्यग्रामपि भूमिं न दास्या-मि, किं पुनर् अर्धराज्यम्।

मद्भाग्यद्विषतां बलात् छलयतामस्मान् शिशुत्वे सदा
सौद्धत्यं मयमन्दिरे विहसतां मां भीमशक्तेर्मदात्।
संप्राप्ता स्वधियो बलेन हि मया लक्ष्मीररीणाभियम्
सा युद्धेन विना भवेत् कथमहो प्रत्यर्पिता शत्रवे॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


श्रीकृष्णः—बाढम् आत्मनाशाय तत्परोऽसि । अतः नास्ति काऽपि अन्या गतिः । अस्तु एतत् । गच्छामि ।

दुर्यो०—कृष्ण ! तत्रैव स्थीयताम् । सेवकाः ! (ते प्रविशंति) गृह्यताम् असौ बन्धने काराकारे च स्थापितव्यः ।

भीष्मविदुरौः— महान् अनर्थः । महान् अनर्थः अयम् । धृतराष्ट्र अवरोधय एनम् कुलघातम् । अन्यथा शिशुपालवधस्य पुनरावृत्तिः अत्र सुनिश्चितम् भविष्यति ।

श्रीकृष्णः—(विहस्य) न भेतव्यं युष्माभिः । मां ग्रहीतुं न कोऽपि समर्थः । जंबूकोपमाः एते उत्तरगोग्रहणप्रसंगे एकाकिनमपि नरशार्दूलं पार्थं जेतुं असमर्थाः । अपि तु तेन हि पराजिताः कृष्णीभूतमुखाः तत प्रत्यागताः । कथम् एते वराकाः मां अवरोद्धुं समर्थाः । दूरे तिष्ठन्तु ते ये स्वकुशलं इच्छन्ति ।

धृत०—दुष्ट दुर्योधन मा रुंद्धि वासुदेवम् । भगवन् श्रीकृष्ण क्षाम्यतु मां भवान् । एते मूर्खाः न जानन्ति तव प्रभावम् । सुखेनैव गच्छतु भवान् । कथ्यतां पांडवान् यत् तैः धर्मानुसरणम् यथापूर्वं सदा कर्तव्यम् ।

श्रीकृष्णः—तव अयं अनीतिमार्गगामी पुत्रः एव अस्मै उपदेशाय पात्रं, अस्ति पांडवाः आजन्मधर्मशीलाः सन्ति । अधर्मवृत्तिस्तु तान् दूरादपि न स्पृशति । धर्माज्ञया मया एषः संधिप्रयोगः कृतः कौरवाः दोषभागिनः । ते आत्मनः दुष्कर्मणाम् फलं अवश्यं प्राप्नुवन्ति । समाप्तं मे कार्यम् । ईश्वरो हि एतेभ्यः मूढकौरवेभ्यः सद्बुद्धिं प्रदद्यात् । गच्छामि अधुना । (निर्गच्छति)

(ईशस्तुतिः) भैरवी

प्रभुपदे प्रेम्णा प्रणमनम् । बालकानाम् ।
जगत्पावनं त्वत्पदस्मरणम् ।
सपदि स्मृतवतां दहत्यघवनम् ।
त्वां हि प्रपन्नश्छात्रगणोऽयम् ।
पाहि प्रभो तं शरणापन्नम् ॥१॥

त्वमेव साक्षात् विश्वविधाता ।
त्वमेव भर्ता विलयं कर्ता ।
चराचराणां जीवनदाता ।
त्वमेव सर्वेषामसि शरणम् ॥२॥

वितर दयाब्धेऽस्मासु सन्मतिम् ।
मातृभूमिरतिममलां प्रीतिम् ।
दृढनिश्चयमथ सत्यप्रीतिम् ।
अपनय सुखहां कुमतिं तूर्णम् ।३।

भारतभूराप्नोतु सत्वरम् ।
प्राग्वैभवममलं च गौरवम् ।
भारतयूनामेतत्साध्यम् ।
क्रियतां तस्मिन् सुयशोदानम् ।४।

---

## मा हसत :—

एकः पठानः स्वघटिकायन्त्रं सुधारयितुं घटिकानिक्रेतुरापणं गतः । पृष्टमनेनः "कियता मूल्येन घटिका मे सुधारिता भविष्यति ?" विक्रेता उक्तम्—स्वल्पेनैव । यावता मूल्येन इयं क्रीता, तावतोऽर्धं ददातु भवान् ।" पठानोऽवोचत्—"मया तु कलहावसरे मुक्कि (घूंसा) चतुष्टयाघातेनापहृताऽभूत् । मुष्टिद्वयं भवतेऽधुना ददाम्युत पश्चात् ?"



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# पुरुषपरीक्षा

[उत्तमराव विनीवाले]

धैर्यं नरो व्याघ्र-मुखाग्रतो वा
युद्धे शतघ्नेः पुरतोऽपि भक्ते ।
स विध्यते तु प्रमदाकटाक्षैः
यो धृष्यते नैव स वै महात्मा ॥१॥

यो व्याघ्रवत्कालकरालदंष्ट्रैः
कंठेऽपि वीरः खलु गृह्यमाणः ।
भयात्स्वधर्मं न जहाति भूम्याम्
लोकोत्तराणां स नरो वरेण्यः ॥२॥

न जायते बालसुभाषितेन
कुतूहलं यस्य कठोरचित्ते ।
स मानुषो नैव पशुस्तु साक्षात्
विद्येत हा पुच्छविषाणहीनः ॥३॥

यः स्वार्थलोभात्स्वजनान् निहन्ति
भूत्वा सहायो हतकः पराणाम् ।
स्वार्थो न वै सिध्यति तस्य पुंसः
स हन्यते सर्पसखेव कङ्कः ॥४॥

आधर्षणं वीक्ष्य कृतं खलेन
नार्याश्च तस्याः करुणार्तशब्दम् ।
श्रुत्वापि यः क्रुध्यति नैव तप्तः
क्लीबः स गण्यः पुरुषेषु जातः ॥५॥

त्यक्त्वा स्वधर्मं वृणुते विधर्मम्
आरोप्य दोषं निजपूर्वजेषु ।
विद्वान् नरो यः कुलपांसनः स
धिगज्ञानमेवं धिगियं च विद्या ॥६॥

ग्लायेन्न दुःखे न सुखे तु हृष्येत्
पश्येन्न भेदं ह्यधने धनाढ्ये ।
सर्वेषु भूतेषु दयान्वितो यः
श्रेष्ठः स पुंसां स्थितधीर्महात्मा ॥७॥

सत्तामदोन्मादगतो नरेन्द्रो
मनस्विनां यो वचनानि हित्वा ।
प्रवर्तते राष्ट्र – विनाशनाय
प्राज्ञैः स वध्यो ह्यविचारयद्भिः ॥८॥

सुखोपभोगाय धनं च भुंक्ते
कायं च यो दाररतिक्रियासु ।
वित्तापहाराय मनः पराणाम्
नराधमोयं भुवि भारभूतः ॥९॥

दारिद्र्यकाले व्यथते हृदन्त–
र्यो हस्तपादं न विचालयित्वा ।
श्वसन् हि भस्त्रेव मृतोपमः स
किं जीवनेनास्ति फलं तु तस्य ? ॥१०॥

किं कोमलं सज्जन-चित्तमेव
किं सुन्दरं विद्धि हरेः स्वरूपम् ।
का वीरता राष्ट्रकृतेऽसुदानं
का वै दया दीन – विपन्नरक्षा ॥११॥

कः सज्जनो भूतहिते रतो यः
को दुर्जनो द्वेष्टि निरागसं यः ।
प्राज्ञश्च को वेत्ति हिताहिते यो
मूर्खस्तु को, यो ह्युभयं न वेत्ति ॥१२॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृतज्ञान्प्रति

[ले० कालीरामशर्मा शास्त्री, मन्त्री संस्कृत–साहित्य–सम्मेलन, अम्बाला छावनी]

परतन्त्रतायां यादृशी-अवस्था संस्कृत-संस्कृतज्ञाना-मासीत्ततोऽपि निकृष्टतमा स्वतन्त्रतायां सञ्जाता इति नास्ति-अविदितं भवद्भिः। परतन्त्रतायां या संख्या संस्कृत – पाठशालानामासीदधुना तस्याश्चतुर्थांशोऽपि नावशिष्यते। यद्यपि कार्यं द्विगुणितं सञ्जातं परं संस्कृताध्यापकानां वेतनन्तदेव। किं कथयामि या आशा-आसन् परतन्त्रतायां यद्भारते स्वतन्त्रे सञ्जाते संस्कृत-संकृतज्ञानामुन्नतिः संभविष्यति ताः प्रभञ्जन विद्राविता मेघा इव न जाने कस्यां गुहायां विलीनाः। संस्कृतज्ञानामाशाः कमलकोशगतद्विरेफाशावत्:—

"रात्रिर्गमिष्यति भविष्यति सुप्रभातम्,<br>
भास्वानुदेष्यति हसिष्यति पंकजश्रीः।<br>
इत्थं विचिन्तयति कोशगते द्विरेफे,<br>
हा हन्त! हन्त! नलिनीं गज उज्जहार॥"

आंग्लभाषोपासकैर्गजैः कवलिताः। आंग्लभाषाध्यापकानां वेतनवृद्धिः संजाता, परं संस्कृतज्ञान्प्रति न केनाप्यवलोकितम्। वोटदानस्याधिकारे यदा कदाचिच्चर्चा भवति तदा त एव सीनेटसदस्याः 'संस्कृतज्ञा मूर्खाः" इत्युक्त्वा विरोधमाचरन्ति ये संस्कृतमेवाश्रित्य स्वोदरपूरणं कुर्वन्ति। नेतारस्तु "संस्कृतभाषा सर्वासां भाषाणाञ्जननी, तस्याः साहित्यमतीव विशालम्, नहि अन्या काचिद्भाषा या अस्याः समतां कुर्यात्। एषा देववाणी।" इत्येवमादीनि साररहितानि भाषणानि दत्त्वा वराकान् संस्कृतज्ञान् संतोषयन्ति। यदा वयं कथयामः संस्कृतज्ञानां वेतने वृद्धिः करणीया तदा नेतारः कथयन्ति आम्! विचारयामो वयम्। वयं संस्कृताय यद्भवन्तः कथयन्ति तदेव करिष्यामः। परन्तदपि पञ्जाबीकथनानुसारं "पञ्चायत का कहना सिर मत्थे पर परनाला उत्थे का उत्थे"। किमस्ति-अस्य निदानन्तदाहन्तु एतदेव कथयिष्यामि "संस्कृतज्ञानां नपुंसकता तथा संघटनाभावः"। परोपदेशाय तु एते कथयन्ति "संघे शक्तिः कलौ युगे" परं दीपकस्याधस्तात् अन्धकारः।

अधुनालस्यं विहाय प्रतिनगरं संस्कृतसभाः करणीयाः। समाचारपत्रेषु संस्कृतविषये लिखित्वान्दोलनं करणीयं येन संस्कृत-परिपन्थिनोऽवगच्छेयुर्यत् संस्कृतज्ञा अपि जीवन्ति तेऽपि किञ्चित् कर्तुं शक्नुवंति। केवलं पारितैः प्रस्तावैः किञ्चिन्नैव भविष्यति। अपितु-

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः"

---

# पाण्डित्यस्य सिद्धयोगः ('नुस्खा')

व्यासादीन् कविपुङ्गवाननुचितैर्वाक्यैः सलीलं हसन्<br>
उच्चैर्जला निमील्यलोचनयुगं श्लोकान् सगर्वं पठ।<br>
काव्यं धिक्कुरु यत्परैर्विरचितं स्पर्द्धश्च साद्धं बुधै-<br>
र्यद्यभ्यर्थयसे श्रुतेन रहितः पाण्डित्यमाप्तुं बलात्॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# "तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ"

[ले० कालिकाप्रसादशुक्लः, व्याकरणाध्यापकः, संस्कृ० महाविद्यालयः, बड़ौदा]

इदं धराधाम सर्गस्यादित एव बुद्धिवादस्य शास्त्र-वादस्य च विशालं मानवमस्तिष्कस्य चरमविकास-सीमा मनीषिमहत्भूमरिव जयतीति नास्ति प्रेक्षावतां तिरोहितम्। एकः पक्षोऽनपेक्षितशास्त्रतर्ककर्कशसाधा-रणमानवमस्तिष्कमेव प्रबलप्रमाणत्वेन परिगणयन्, दुर्वरप्रदेशात् प्रसूतं मतमेव सिद्धान्तभूतं मन्यमानः तदनुकूलमेव पन्थानमवलम्बितुमागृह्णाति स्वपक्षाव-लम्बिनः। अन्यश्च पक्षः कामं तद्विरुद्धवेदोदितहेयहा-नोपादेयोपादानशबलितपथस्य वेदमूलकातीतानागत-वस्तुजातसाक्षात्कारकलितान्तःकरणऋषिप्रणीतस्मृतिप्रति-पादितवर्त्मनश्चावलम्बन एव प्राणिजातस्य श्रेयः-श्रेयसी कलयति, समुपदिशति चानवद्यं तमेव पन्थान-माश्रयितुम्। विशेषतोऽनयोः पक्षयोः प्रथमस्य परिग्र-हीता भौतिकवादेऽभिनिवेशनिविष्टः पाश्चात्यो देशो नितरां नेत्रातिथीक्रियते. द्वितीयस्य च शास्त्रप्रतिपादित-मार्गैकशरणो भारतः। यद्यपि भरतभूमिरपि पक्षद्वय-स्यास्य द्वन्द्वादात्मानं मोचयितुं नाशकत्, परिणाम-तोऽत्रापि परस्पर कलहायमानानामास्तिकनास्तिकद्विवि-धदर्शनानां दर्शनं समभूत्। परिस्थितिविशेषे विकासो यस्याश्चापि द्विविधदर्शनानां समान एवासीत्। तथापि भारतस्य शास्त्रवादस्य विजयवैजयन्ती सर्वदैव समुल्ल-सन्ती, अजयत्, जयति, जेष्यति चेत्येवं भगवतो भूत-भावनस्य कश्चनापरिहेयः सङ्केतोऽस्तीत्यत्र नास्ति मत-भेदस्यावकाशः।

अहो? भारतेऽपि बुद्धिवादः? तत्रापि शास्त्रवादस्य निरुपयोगितायाम्? अलीकमेतत्! अथवा वर्तते चेत् वर्त-ताम्, भौतिकपदार्थचिन्तनाय चिरंजीवतात् पूर्वपक्षत्वेन शास्त्रवादस्य, सुखं तिष्ठतु समुद्रे रत्नेन सह शुक्तिकेव, न तत्र कश्चन मत्सरः, तेन न किञ्चिच्छिन्नं शास्त्र-वादस्य, प्रत्युत स्फटिकनिर्मलता प्रकाशिता भवति, स्वीकृता भवति चोपा देयता। परं विस्मयसागरस्तदैव वेलां विगलति, यदा बुद्धिवादाभिनिवेशानां साहसं लौकिक-बुद्ध्यचिन्त्यापरिमेयभावेष्वपि तत्त्वविनिश्चयात्तथैव न विरमति यथा लौकिकभावेषु। परन्तु बुद्धिवाद-कलितान्तःकरणैः कदापि न विस्मर्तव्यं यदचिन्त्याऽ-परिमेयभावानां धर्मादीनां निर्णये शास्त्रमेव प्रभवति, नानपेक्षितशास्त्रः कर्कशस्तर्कः—"तस्माच्छास्त्रं प्रमाणं ते कार्या-कार्य व्यवस्थितौ"। तर्कस्य वार्ता तावत् कोणे तिष्ठतु, अन्यानपेक्षप्रत्यक्षस्यापि मनाक् सामर्थ्यन्नास्ति धर्मादीनां पदार्थानां प्रामाण्ये, यतो हीन्द्रियसंयुक्तानां तत्तदिन्द्रियग्राह्यतत्तद्गुणानां द्रव्याणामेव प्रत्यक्षविष-यत्वेन विद्यमानोपलम्भनत्वाद्भविष्यति धर्मेऽरूपे ब्रह्मणि च प्रत्यक्षविषयता गगनकुसुमायिता [भविष्यति, यद्यपि श्रेयस्करभाष्ये गोदानादि द्रव्यं, यागादि क्रिया, नीचै-स्त्वादिगुणश्च फलसाधनत्वेन धर्मशब्देनोच्यते ना-पूर्वादि। य एव श्रेयस्करः स एव धर्मशब्देनोच्यते। न केवलं लोके, वेदेऽपि, "यज्ञेन यज्ञमयजन्त देवा-स्तानि धर्माणि प्रथमान्यासान्" इति यजति शब्दवाच्य-मेव धर्मं समामनन्ति। तेषाञ्चैन्द्रियिकत्वात्, धर्मस्य प्रत्यक्षविषयता वज्रलेपायत एव। तथापि तेषां फलसाधन-स्वरूपेण धर्मताऽस्ति, फलञ्च जन्मान्तरभावीति प्रत्यक्षगोचरता धर्मस्वरूपेण शशशृङ्गायमाणैवास्ति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



उक्तञ्चैतत्—

"द्रव्यक्रियागुणादीनां धर्मत्वं-स्थापयिष्यते ।
तेषामैन्द्रियकत्वेऽपि न ताद्रूप्येण धर्मता ॥१॥
श्रेयःसाधनता ह्येषां नित्यं वेदात् प्रतीयते ।
ताद्रूप्येण तु धर्मत्वं तस्मान्नेन्द्रियगोचरः ॥२॥"

"धर्मः स्वनुष्ठितः पुंसाम्" "धर्मः क्षरति कीर्त्तनात्" इत्यादिस्थाने यागादेरेव धर्मत्वस्य मीमांसाशास्त्रेण व्यवस्थापनात्, अन्यैः सर्वैश्च तथैवाभ्युपगम्यते । यद्येतादृशे प्रसङ्गे तर्कस्य कर्कशाकरे धर्मस्य शिखा स्यात्तदा वराकस्य धर्मस्य दुर्दशैव स्यात् —

यतो हि यागत्व स्वर्गसाधनत्वयोर्व्याप्यव्यापकभावस्य काप्यगोचरीकृतत्वेन "प्रमाणेन निश्चितायां व्याप्तौ साधनं साध्यं निश्चिनोती"ति नियमात् व्याप्तिग्रहाभावेन, तन्मूलकस्यानुमानस्यापि निरासात्, साहचर्य नियमस्य व्याप्तेरभावात् । वह्निधूमयोर्भोजनशालायां गृहीतमेव साहचर्यं पुरस्कृत्य पर्वते वह्निरनुमीयते धूमात् । युक्तिवादिनो नास्ति तद्वदिहापि । एवञ्च व्याप्तिग्रहाभावेऽवशैस्तर्कैकशरणैरत एव तार्किकैर्वक्तव्यं भवेत् "यद् वह्निरेव दहति न जलमिति स्वभाव एव प्रमाणमि"ति, न किमपि युक्त्यंतरं समुपस्थाप्येत, तथैव यागः स्वर्गसाधनम्, यागत्वात् (स्वभावात्) इति यागस्य कश्चन स्वभाव एव तादृशो येन स्वर्गं प्रापयतीत्येव तैर्वक्तव्यं भवेत् । परन्तु-अग्नेर्दाहकतायाः प्रत्यक्षसिद्धत्वेन वह्नेर्दाहजननस्वभावस्य सोरस्ताडं प्रतिपादयितुं शक्यत्वेऽपि यागे स्वर्गसाधनताया अप्रत्यक्षतया यागः स्वर्गसाधनस्वभाव इति निवेदयितुं मुखमपि कथमुद्घाटितम्भवेत् । यदि आगमात् यागत्वस्वर्गसाधनत्वयोर्व्याप्यव्यापकभावं विनिश्चित्यानुमितीच्छा ग्रानुमितौ प्रवृत्तिश्चेत्तदा नास्त्यस्माकं काचनापि विप्रतिपत्तिः प्रत्युत महान् प्रमोद एव । सम्यगुक्तम्:—

"हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्"

अतएव साधूक्तं महावैयाकरणेन भर्तृहरिपादेन—

"हस्तस्पर्शादिवांधेन विषमे पथि धावता ।
अनुमानप्रधानेन विनिपातो न दुर्लभः ॥
(ब्रह्म का० ४२ श्लोक)

जैमिनीयं मीमांसाशास्त्रमपि तदेव प्रतिपादयति:— "आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" अस्येदं तात्पर्यं यत् आगमानपेक्षशुष्कतर्कस्य न किमपि मूल्यम् । एतत्सर्वं मनसि निश्चित्य प्रोक्तं—

"न चागमादृते धर्मस्तर्केण व्यवतिष्ठते"
वाक्यपदी०, ब्रह्म का० ३० श्लोकः ।

योगाभ्यासजनितसंस्कारविशेषभावनाबलाज्जातं-- योगिप्रत्यक्षं धर्मनिर्णायकं भवेदित्यपि केषाञ्चिद् विदुषां मनोरथमात्रम् । भावना हि अनुभूतपदार्थगोचरनियतानुभूतेषु निश्चयरूपां स्मृतिं जनयति, सा च न प्रमाणं स्यात् यतो हि सा स्मृतिः । इदमत्राकूतं यत् ऋषीणां यद् अतीन्द्रियार्थविषयकं प्रातिभं ज्ञानं भवति तदपि आगममूलमेव न स्वोत्प्रेक्षामूलम् । आगमप्रतिपादितजपतपःस्वाध्यायाचरणपरिपूतात्मनामेव ऋषित्वेन आर्षज्ञानस्य प्रतिभासंज्ञकधर्मविशेषजन्यस्यागममूलकत्वमेव नितान्तमौचितीमादधाति । वैपरीत्ये तु ऋषिप्रणीतस्यागमत्वादागमप्रतिपादितस्याचरितुश्च ऋषित्वात् परस्पराश्रय आपतेत्—उक्तं च "एव यैः केवलं ज्ञानमिन्द्रियाद्यनपेक्षिणः । सूक्ष्मातीतादिविषयं जीवस्य परिकल्पितम् । नर्ते तदागमात् सिद्ध्येन्न च तेनागमो विना" (श्लोकवार्त्तिके ।) उक्तार्थाभिप्रायेणोक्तम्-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



…षीनामपि यज्ज्ञानं तदप्यागमपूर्वकम् ।'' (वाक्य-…य) ब्र का. ३० ।

…मास्तु तावत् यत्र तर्कस्य पादो न प्रसरति तत्र …ण धर्मप्रमितिः परन्तु यत्र तर्कः सर्वथा समर्थः यथा …कपालं शुचि प्राण्यङ्गत्वात्'' अग्निषोमीयपशुहिंसा …कसाधनम् पीडाजनकत्वात्, ब्रह्मवधादिवत्, इत्यादि-…े तर्केणैव धर्मप्रमितिः स्यान्नागमेन-इत्यपि केषा-…तार्किकल्पानां साहसमात्रमेव---यतो हि अस्य …स्यापातत एव रमणीयता वर्तते सद्विचारनिकषो-… त्रपुतामेव भजेत् ।

यतो हि अनादिकालतः शिष्टानां परम्परातः अवि-…न्नतया प्राप्तानि अत एव लोके प्रसिद्धानि धर्मा-…दि-परोक्षवस्तु-निर्णायकानि श्रुतिस्मृति-प्रभृति-…स्त्राणि तर्केण न कदापि पराभवितुं शक्येरन् । …कप्रसिद्धिपरम्परायाः पुरः तर्कस्य विद्वत्परिषदितदेव …यं भविष्यति यदेव कस्याश्चित् प्रामाणिकव्यक्तेः …त्तं कस्यचित्प्रमत्तस्य । अत आगमस्य तर्कद्वारा …ध्यता न स्यात्, प्रत्युत नरकपालस्य शुचित्वं यागीय-…साया अहिंसात्वं च प्रतिपादयतागमेनैव तर्कः परा-…येत,

"धर्मस्य चाव्यवच्छिन्नाः पन्थानो ये व्यवस्थिताः ।
न तांल्लोकप्रसिद्धत्वात् कश्चित्तर्केण बाधते ॥''

वाक्यपदीय ब्र. श्लो. ३१

येऽपि कर्कशतर्कैकशरणाः अनुग्रहाद् धर्मं, पीडा-…धर्मञ्चानुमिमते, तेषां पन्थानमाश्रयतां जनानां …पाने गुरुतल्पगमनेऽपि भूयान् धर्मः प्रसज्येत, …ो हि तत्रापि भूयसी उपकारिता वर्तत एव । तस्मादनु-…नेन परोक्षवस्तुनिर्णयेऽनर्थपरम्परामृगया न भवन्तु । तार्किकास्तदर्थं शास्त्रेण यन्निषिद्धं तदेवाधर्मः, यद्विहित तदेव धर्मः, तथा यस्य कर्मणो यत् फलं प्रतिपादितं तदेव फलं नान्यदिति समीचीनं पन्थानमाश्रयितु-मागममेवावलम्बन्ताम् । तादृश निश्चये तदेवोक्तम् भट्टपादेन "चोदनालक्षणो धर्मः'' इति सूत्रे । श्लोक-वार्तिकेऽपि

"धर्माधर्माविबोधस्य तेनायुक्तानुमानगीः ।
अनुग्रहाच्च धर्मत्वं पीडातश्चाप्यधर्मताम् ॥१॥
वदतो जपसीध्वादिपानादौ नोभय भवेत् ।
क्रोशता हृदयेनापि गुरुदाराभिगामिनाम् ॥२॥
भूयान् धर्मः प्रसज्येत भूयसी ह्युपकारिता ।
अनुमानप्रधानस्य प्रतिषेधानपेक्षिणः ॥३॥
हृदयक्रोशनं कस्मात् दृष्टां पीडामपश्यतः ।
तस्मादनुग्रहं पीडां तदभावमपास्य च ॥४॥
धर्माधर्माभिर्नित्यं मृग्यौ विधिनिषेधकौ ।
तस्माद् यद् यादृशं कर्म यत्फलोत्पत्ति शक्तिकम् ।
शास्त्रेण गम्यते तस्य तादृशस्यैव तत्फलम् ।

न केवलमतीन्द्रियपदार्थावबोध एव तर्कस्यासफलता अनुभूयते प्रत्युत लौकिकेष्वपि पदार्थेषु तर्कस्य सैव दुरवस्था सर्वतो भासते । यदि कश्चन बुद्धिवादी स्वां बुद्धिमवलम्ब्य सोरस्ताडं प्रतिपादयेत् यत् "शीतस्पर्शेन जलमनुमेयम्, उष्णस्पर्शेन तेजः'' परन्तु मनोरथमात्र-मेतत्तस्य यतोऽवस्थादेशकालभेदात् पदार्थानां शक्तिषु भूयान् भेदो दृश्यते । एवञ्च हेतूनां व्यभिचारात् अनुमितिः शशशृङ्गायमाणा स्यात् । तथाहि अवस्था-भेदात् – बीजानां मूषिकाघ्रातानामेवांकुरजननशक्ति-र्नान्यथा पिपल्यौषधेरार्द्रस्य कफजननशक्तिः शुष्कस्य च त्रिदोषशमनशक्तिः, यादृशं बलं यौवने न तादृशं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


बलं परिणतवयसि। देशभेदात् जह्नुकन्याया एव शीतस्पर्शो न बलाहकाग्निकुण्डजलेषु। कालभेदात्-हेमन्ते कूपोदकमुष्णं ग्रीष्मे च शीतम्, ग्रीष्मे अग्नेरत्युष्णः स्पर्शो न तथा हेमन्ते एवं भूयान् भेदो गणयितुमशक्यः। एवञ्च जलत्वसाधनेन उष्णत्वस्य शीतत्वस्य वा नानुमानं कर्त्तुं शक्यते तत्र तत्र व्यभिचारात्। अनुमातारो दृढं विश्वसन्ति यद् धूमो वह्निं न व्यभिचरति परन्तु इदन्तेषां विश्वासमात्रम्, अथवा अभिमानमात्रम्, अवस्था-देशकालभेदात् स्यादपि कश्चन तादृशो धूमो यो वह्निं व्यभिचरेदपि यथा शालूकादपि शालूको गोमयादपि। एवञ्च यदि लौकिकेषु पदार्थेषु एवमव्यवस्था तदाऽप्राकृतगम्ये पदार्थेऽनुमानस्य का दुरवस्था स्यात्। तत् साधूक्तं भर्तृहरिणा-"हस्तस्पर्शादिवान्धेन विषमे पथि धावता। अनुमानप्रधानेन विनिपातो न दुर्लभः। वा० ब्र० का० ४२ श्लोकः।)एतत्सर्वं पर्यालोच्यागमचक्षुरन्तरेण तर्कमात्रेण को मनीषी तत्त्वं निश्चेतुकामो भवेत्? तदुक्तम्-अवस्थादेशकालानां भेदाद् भिन्नासु शक्तिषु। भावानामनुमानेन प्रसिद्धिरिति दुर्लभा॥ वा० ब्र० ३२

शाङ्करभाष्येऽप्युक्तं "लौकिकानामपि मणिमन्त्रौषधिप्रभृतीनां देशकालनिमित्त वैचित्र्यवशाच्छक्तयो विरुद्धानेककार्यविषया दृश्यन्ते, ता अपि तावन्नोपदेशमन्तरेण केवलेन तर्केणावगन्तुं शक्यन्तेऽस्य वस्तुन एतावत्य एतत्सहाया एतद्विषया एतत्प्रयोजनाश्च शक्तय इति किमुताचिन्त्यस्वभावस्य" तस्माच्छब्दमूल एवातीन्द्रियार्थयाथात्म्यावगम" इति।

अयं दहति वह्नित्वादित्याद्यनुमानेन दाहजनकत्वानुमितिरपि शास्त्रतत्त्वावगाहनापटुसरलानां परप्रत्ययनेयमतीनां प्रतारणमात्रमेव, मणिमन्त्रादीनां प्रतिबन्धकद्रव्याणां समवधानेऽग्नित्वस्य दाहजनकत्वव्यभिचारस्य शतशोऽनुभवात्। एवञ्च वस्तुस्वभावो नानुमानेनावगन्तुं शक्यतेऽपितु आगमादेव।

अतएवोक्तं भर्तृहरिणा—"निर्ज्ञातशक्तेर्द्रव्यस्य तां तामर्थक्रियाम्प्रति। विशिष्टद्रव्यसम्बन्धे सा शक्तिः प्रतिबध्यते"। वा० ब्र० ३३

सुकुमारमतीनां तर्कस्याव्यवस्थावार्ता तावत् कोणे तिष्ठतु महापुरुषाणां कपिलकणादादीनामपि परस्परमतिशयविप्रतिपत्तिदर्शनेन तेषामपि तर्काः नितरां दुर्व्यवस्थामेवातन्वन्ति प्रेक्षावतां मानसमानसे, यतो हि आजानबाहुमहर्षिकपिलपादैर्महता प्रयत्नेन प्रकृतिर्जगत्कारणत्वेनोत्प्रेक्ष्यते, प्रातःस्मरणीयैः कणादपादैः परमाणुः तथात्वेनो(जगत्कारणत्वेन)त्प्रेक्ष्यते। अन्नानुरूपैव बुद्धिर्भवतीति महर्षिकणादेन सत्यापितम् अन्यैस्तर्कवादिभिरन्यथैव तर्क्यते। उक्तञ्च वाक्यपदीये "यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः। अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते" (वा० ब्रह्म का० श्लो० ३४) यतो यत्नेन निर्णीता अपि आगमानपेक्षाः पुरुषोत्प्रेक्षामात्रनिबन्धनास्तर्का अव्यवस्थिता भवन्तीति नागमगम्येऽचिन्त्यापरिमेयपदार्थे केवलेन तर्केण प्रत्यवस्थातव्यम्। आह च भगवान् बादरायणः तर्काप्रतिष्ठानादिति।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# भारतीय संस्कृतेस्त्रय आदर्शाः

[ले० श्रीधरप्रसादपन्तः 'सुधांशुः' पालीभीत (उ० प्र०)]

वर्तमानयुगे सत्यपि अत्युन्नते भौतिकवादे सर्वे याः वस्तुतः सुखिनः सन्ति किम् ? न सन्ति, इत्येक-प्रत्युत्तरम् ।

अद्य मानवस्तु प्रतिक्षण-कामस्य, क्रोधस्य, लोभस्य, स्य, तृष्णायाः, वासनायाः अशान्तेस्तथा मदस्य, रस्य, वैरस्य, हिंसायाः, अत्याचारस्य, अनाचा-, अनैतिकतायाश्च भीषणविभीषिकायां दह्यते ।

साम्प्रतिको मानवस्तु सर्वत्रैव दुःखस्य, कष्टस्य एवं न्तेरेवानुभवं करोति । परन्तु किमर्थम् ?

अस्य कारणमिदं यत् मनुष्यः भौतिकवादस्य डे, किन्तु, क्षणिकप्रकाशे, आध्यात्मवादस्य शाश्व-एवं दिव्यम् प्रकाशं विस्मृत्य-चाहर्निशं विषयाणां ं करोति । अस्माकं प्राचीनऋषि-महर्ष्यादयः याः विषवत् त्याज्याः' इत्यकथयन् तानेवाऽमृतवत् ते । अहो ! साम्प्रतम् मानवस्तु शरीरं त्यक्त्वाऽपि भवत् विषयान् प्रति आकर्षितोऽभूत् । किन्तु अनया त्या शान्तेः कामना तु मृगमरीचिका एवास्ति । नीतिकारेण महात्मना चाणक्येन सत्यमेव उक्तम् । ः—

"यो ध्रुवाणि परित्यज्य,
अध्रुवं परिषेवते ।
ध्रुवाणि तस्य नश्यन्ति,
अध्रुवं नष्टमेव हि ॥"

सुखम् एवं शान्तिस्तु मानसिकसन्तुलने एव सन्नि-ास्ति । गीतायां भगवता योगेश्वरेण श्रीकृष्णेन सो विषये उक्तम्—

"अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते"

अर्थात् शनैः शनैरभ्यासेन एवं वैराग्यप्रवृत्त्या मनः वशवर्ति भवति । यदास्माकं मनः वशवर्ति भविष्यति तर्हि स्वतः सर्वत्र सुखानुभूतिर्भविष्यति ।

किन्तु किञ्चित् कठिनकार्यमेतत् अस्माकम्, यतः चञ्चलचित्ताः स्मः मानवा वयम्, अस्माकम् समक्षे द्वौ मार्गौ स्तः । एकः श्रेयसो द्वितीयः प्रेयसश्च । वयं तु श्रेयो हित्वा प्रेयो गृह्णीमः, मणिं त्यक्त्वा काचस्य संग्रहं कुर्मः ।

उक्तञ्च:—

"श्रेयश्च प्रेयश्च मनुष्यमेत-
स्तौ सम्परीत्य विविनक्ति धीरः ।
श्रेयो हि धीरोऽभि प्रेयसो वृणीते,
प्रेयो मन्दो योगक्षेमाद्वृणीते ॥"

(कठोपनिषद् १।२।२)

अतएव गङ्गाप्रवाहवत् प्रवहमानस्य सुर्लभमानव-जीवनस्य सदुपयोगः कर्तव्यः । मानवजीवनस्य नश्वरतायाः सम्बन्धे कविता-वनिता कान्तेन-महाकविना भर्तृहरिणा उक्तम् ।

"भोगा न भुक्ता वयमेव भुक्ता-
स्तपो न तप्तं वयमेव तप्ताः ।
कालो न यातो वयमेव याता-
स्तृष्णा न जीर्णा वयमेव जीर्णाः ॥"

(वैराग्यशतक—१२)

अतः साम्प्रतिके युगे अत्र महती आवश्यकतास्ति यद्वयं स्वातीतवाङ्मयस्यानुसरणं कुर्मः अस्माकं भारतीय संस्कृते आदर्श-त्रयम् अस्ति जीवने येषामुप-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


योगोऽत्यावश्यकोऽस्ति भारतीयानां कृते अस्माकम् संस्कृते अतिपुनीतास्त्रय आदर्शाः निम्नाः सन्ति यथाः—

| | |
|---|---|
| १—दमनम् | १—त्यागः |
| २—दया | २—तपस्या |
| ३—दानम् | ३—तपोभूमिः |

अधुना वयं उक्तम् आदर्श-त्रयम् नितान्तं विस्मृत्य पुनरपि विषयाणां शुष्कमरुभूमौ सुखस्वरूपिणीं भागीरथीं अवलोकयामः। इदमस्माकं नितान्तं मूर्खतायाः प्रमाणं नास्ति किम् ?

अद्यापि यदा अस्मानभितः स्वार्थपरतायाः नृशंसतायाः, इन्द्रियलोलुपतायाः, असत्यतायाः, धूर्ततायाः, पाखण्डतायाः, प्रवञ्चनायाः, अत्याचारस्य, अनाचारस्य च नग्ननृत्यम् भवति, तथापि वयं पवित्रधराधाम्नि भारतेऽस्मिन् पुनः सुखस्य, शान्तेः, सौहार्दस्य च त्रिवेणीं प्रवाहयितु दमनम् (इन्द्रियनिग्रहः) दयाम् (आत्मवत्सर्वभूतेषु) एवं दानम् (त्यागः) स्वदैनिकजीवनस्य प्रमुखं अङ्गं विधाय भारतं विश्वराष्ट्राणां रङ्गमञ्चे (अन्तर्राष्ट्रिय) गौरवमये गुरुपदे प्रतिष्ठापयामः।

आशास्महे यत् सर्वतन्त्र स्वतन्त्र-भारतराष्ट्रस्य नागरिकाः स्वोज्वलभविष्यं निर्मातुं स्वजीवने भारतीय संस्कृतेरादर्शत्रयस्य दैनिकोपयोगं विधाय राष्ट्रप्रति स्वकर्तव्यस्य पालनं करिष्यन्ति, येन भारतराष्ट्रम् समृद्धिशालि, गौरवशालि च भविष्यति, तथा भारतीयाः अप्यतिसुगमेनोपायेन जीवनस्य परमोद्देश्यं मोक्षपदं लप्स्यन्ते इति।


## हरिनगर सूगर मिल्स लि०

फैक्टरी

हरिनगर (एन० ई० रेल्वे) (चम्पारन जिला) उत्तर बिहार

दूरभाषयन्त्रम्—

'मर्यादा-रामनगर (चम्पारन)'

प्रधानकार्यालय :—

२०७, कालबादेवी रोड, बम्बई-२

दूरभाषयन्त्रम्—

'क्रिसूगर' (बम्बई)

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

* प्योअर, * फर्स्टक्लास, * क्रिस्टल * केन सूगर




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# आयुर्वेदीयचिकित्साप्रणाली, यूनानीचिकित्सापद्धतिश्च

—सहसम्पादकः

भारते बहोः कालात्सेयमालोचना शिक्षितजनतायां प्रवृत्ता यत् भारतसर्वकारस्य स्वास्थ्यचिकित्सामन्त्रालयो देशीयचिकित्सापद्धतिं प्रति सापत्न्यव्यवहारं पुष्णाति। स्वल्पकालात्पूर्वम्–अखिलभारतस्य स्वास्थ्यमन्त्रिणी श्रीराजकुमारी अमृतकौरमहोदया 'आयुर्वैदिक–यूनानी बोर्डानां' तृतीयस्य अखिलभारतीयसंमेलनस्य उद्घाटनावसरे आयुर्वैदिकचिकित्सापद्धतेः प्रचुरामालोचनां कृत्वा तदिदं बहुतरं समर्थयितु प्रायतिष्ट यत् सर्वकारस्य दृष्टिः आयुर्वेदीयचिकित्सां प्रति सापत्न्यव्यवहारकलुषिता कथमपि नास्ति। किन्तु आयुर्वेदीय चिकित्साप्रणाल्यां विशदान्वेषणस्य, तथा प्रशिक्षणस्तरस्य उन्नमनाय प्रकाममावश्यकता।' अवश्यं विचारशीलां निष्पक्षपाताः पुरुषा आयुर्वेदपद्धत्यामन्वेषणादेरावश्यकतां स्वीकुर्वन्ति। किन्तु तदिदं तदैव संभवेद् यदा भारतसर्वकारः स्वदेशीयपद्धतेः संमानं च उपयोगितां च स्वीकुर्यात्।

देशीयचिकित्सापद्धतेः प्रगतिर्या साम्प्रतमवरुद्धा तस्येदमेव कारणमस्ति यत् वैदेशिकशासनकाले एतस्याः पद्धतेः प्रकाममवहेलनाऽभूत्। एतस्यै प्रणाल्यै प्रोत्साहनप्रदानस्य कथा दूरमास्ताम्, किन्तु येन केनापि प्रकारेण देशीयचिकित्सापद्धतीनामभिभवाय प्रयत्नः कृतोऽभूत्। एवमवस्थायामपि यदि निष्पक्षपातयादृष्ट्या अवलोक्येत तर्हि देशेऽस्मिन् परोलक्षाः पुरुषा प्राचीनचिकित्सापद्धतिं प्रति सांप्रतमपि श्रद्धाशालिनः सन्ति, प्रतिवर्षं च परोलक्षाः पुरुषाश्चिकित्सयाऽनया लाभमासादयन्ति। एवमवस्थायामस्याः पद्धतेर्भारतेऽस्मिन्नुपयोगिता स्वतएव प्रमाणिता भवति। इदानीमावश्यकतास्ति पद्धतेरस्याः प्रचारस्य च विकासस्य च। यावत्प्रमाणे सेयमायुर्वैदिकपद्धतिः सर्वकारद्वारा, जनताद्वारा च प्रसारमासादयेत्तावदेव पद्धतेरस्या उपयोगिता प्रतिपदं प्रवर्धेत, लाभश्चोत्तरोत्तरं प्रभवेत्।

एतदर्थं समयानुसारीणि अन्वेषणानि शासनाधिकारिभिः, समर्थैर्वैद्यैश्च कर्तव्यानि भवेयुः। प्रशिक्षणस्य पद्धतिर्यस्मिन् स्तरे प्रचलति तदपेक्षया उच्चीकरणस्याप्यपेक्षा समुद्भवेत्। किन्तु सर्वमिदं तदैव संभवेद् यदा देशस्य शासकाः शिक्षाधिकारिणश्च तामिमां पद्धतिं स्वीकुर्युः। एतदर्थे पद्धत्यामस्यां पूर्णविकासस्य प्रयत्नाः प्रवर्तेरन्। भारते पाश्चात्यचिकित्सापद्धतेः पूर्णतया प्रचारः प्राऽभवत्, प्रभवति च। लाभोऽपि युगानुसारं भवत्येवेति मन्तव्यमेव भवेत्। किन्तु सेयं पाश्चात्यचिकित्सापद्धतिरेतावन्महर्घाऽस्ति यद् भारतसदृशे साधारणदेशे सर्वसाधारणो नाऽनया पद्धत्या पूर्णलाभमासादयेत्। अस्माकं दीनदेशे, विशेषतश्च ग्रामेषु, सैव चिकित्सापद्धतिर्लोकानामुपयोगिनी संभवेद् या हि देशस्य जल-वाय्वोरानुकूल्येन सह समर्थाऽपि भवेत्। ततश्च यदि शासकाः समस्तानामपि देशवासिनां स्वास्थ्यसंपत्तये चिकित्सायाः सुव्यवस्थां कर्तुमभिलषन्ति तर्हि आयुर्वेदीयचिकित्सापद्धतेः एवं यूनानीभैषज्यप्रणाल्याश्च सर्वस्मिन्नपि देशे प्रचुरः प्रचारः कर्तव्यः स्यात्। येषु येषु स्थानेषु च सेयं देशीयपद्धतिः प्रचलति तत्र तत्र तस्यै प्रचुरं प्रोत्साहनं च देयं स्यादिति।

———



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# वेदानां पौरुषेयाऽपौरुषेयत्वविचारः

(ले० गजाननशास्त्री मुसलगांवकरः)

वेदानां पौरुषेयत्वापौरुषेयत्वविचारे को नाम वेदः ? तस्य किं लक्षणम् ? कियान् वेदग्रन्थः ? स च पौरुषेयो न वा इत्यादयो बहवः प्रश्नाः प्रादुर्भवन्ति ।

तत्र मंत्रब्राह्मणात्मकः शब्दराशिर्वेद इति वेदस्वरूपमामनन्ति । स च वेद्यन्ते धर्मादयश्चत्वारः पुरुषार्था अनेन इति व्युत्पत्त्या निष्पन्नः । तल्लक्षणं च— इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो बोधयति स वेद इति । अमुमेवाशयं प्राञ्च आचार्याः समग्रहीषुः पद्येनैकेन । यथा —

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥ इति

तत्र मंत्रभागस्यैव वेदत्वमभिप्रैति स्वामिदयानन्दः । परन्तु वेदव्याख्याने, वेदार्थोपबृंहणे वैदिककर्मानुष्ठानप्रतिपादने व्यापृताः प्रातःस्मरणीयचरिताः प्राचीनमहर्षयो बौधायनापस्तम्बकात्यायनादयः परिभाषाकथनावसरे 'मन्त्रब्राह्मणयोर्वेदनामधेयमि'ति मुक्तकण्ठं समुद्घोषयन् । वेदभाष्यप्रणेतारः सायणादयोऽपि इदमेव मतमनुसरन्तीति वेदभाष्यश्रौतसूत्रादिषु कृतपरिश्रमाणां विद्वदग्रेसराणां पुरस्तान्न किञ्चिद् वक्तव्यमवशिष्यते । एवञ्च मन्त्रब्राह्मणात्मके शब्दराशौ वेदशब्दो रूढ इति परिणितिष्ठति । एतेन मंत्रभागमात्रस्य वेदत्वं वदन् स्वामिदयानन्दो निराकृतो वेदितव्यः ।

स चायं वेदः पौरुषेयो न वेत्ययं प्रश्नः । तत्र प्रथमतः पौरुषेयवादिनां मतमुपन्यस्यते । ततस्तन्निराकरणपुरःसरं मीमांसकसम्मतं वेदानां विदुषां कीदृशोऽभिप्राय इति किञ्चित् प्रतिपाद्यते--

वैदेशिका विद्वांसो वेदं पुरातनमैतिहासिकं ग्रन्थं मन्वतेऽतः ऐतिहासिकदृष्ट्या ते वेदं समालोचयन्ति । तेषां विचारधारा ईदृशी वर्तते--वेदे नगराणां नामानि नदीनां नामानि स्त्रीणां पुंसां च तदीयान् व्यवहारांस्तात्कालिकं भौगोलिकं ज्ञानं खागोलिकं ज्ञानमित्यादिकं सर्वं प्राकृतदृष्ट्या समवलोक्य भारतीयानां हिन्दूशब्दवाच्यानामस्माकं ऋषिवंशप्रसूतानामितिहासप्रतिपादकोऽयं ग्रन्थ इति निर्धारयन्ति ।

अपि च कथयन्ति यदेतस्मिन् निर्णये भाषापरिज्ञानमप्यनुकूलमस्ति । ऋग्वेदे या भाषा, यजुर्वेदे सामवेदे च या भाषा तासां भाषाणां परस्परं भेदः शब्दसन्निवेशक्रमश्च विलक्षणोऽयमनुभूयते । अतः सर्वादौ ऋग्वेदस्य प्रादुर्भावः, अनन्तरं सामवेदस्य ततो यजुर्वेदस्येति वदन्तः स्वकपोलेन कञ्चन क्रमं कल्पयन्ति । किञ्च---तेषु तेषु मंत्रेषु विश्वामित्रवसिष्ठादयो ऋषयः स्मर्यन्ते, त एव वेदकर्तार इति उन्नयन्ति । अतो वेदः पौरुषेयो महर्षिभिः प्रणीतो भारतीयानां हिन्दूजातीयानामैतिह्यप्रातिपादक इत्यैकमुख्येन प्रतिपादयन्ति प्रचारयन्ति चेति ।

अत्र वयं वदामः- उपर्युक्तप्रकारेण वेदानामामायुष्कालनिर्धारणं पौरुषेयत्वव्यवस्थापनं चाविचाररमणीयमिति निश्चप्रचम् । यतो यस्य देशस्य इतिहासो वर्ण्यते, तत्रत्यो ग्रन्थस्तत्रत्या वेषभाषाऽऽचारव्यवहारसभ्यतासंस्कृत्यादय ऐतिह्यनिर्धारणे परमम्प्रमाणं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


भवन्तीति वैदेशिकानां विदुषां घण्टाघोषः । परमस्मिन् विषये भारतीयमाचारव्यवहारादिकं सर्वमपि एकपदेन तिःकृत्य स्वमनीषानुसारेण कैश्चन हेत्वाभासैः समय-निर्धारणादिकमकाण्डताण्डवं वैदेशिकानाम् । तस्मात् वेदानां पौरुषेयत्वव्यवस्थापनमैतिह्यपरत्वञ्च सम्प्रदाय-बहुप्रमाणविरुद्धम् ।

अत एव श्रुतिप्रतिपादितां शब्दसृष्टिमुपादाय प्रपञ्चस्य सृष्टिर्भगवता कृता । तया च--'स भूरिति व्याहरन्, भुवमसृजत्' इति श्रुतिः,

'सर्वेषाञ्च व नामानि कर्माणि च पृथक् पृथक ।

वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥'

इतिस्मृतिश्च ।

एवञ्च वेदे नदीनां, पुंसां, स्त्रीणां च नामान्युप-लभ्य लोकेऽपि एतैर्नामभिर्व्यवहार इति ध्रुवं वक्तुं पार्यते । आचारश्चायं साम्प्रतमपि भारते समुपलभ्यते तस्मात् वेदविषये वैदेशिकानां समालोचनमविचारित-रमणीयम् ।

भारतीयदर्शनेषु नैयायिकप्रभृतयो वेदानां पौरुषे-यत्वं मन्वते । तथा हि--अर्थं बुध्वा वाक्यरचनेति न्यायेन लौकिकेषु वाक्येषु प्रत्यक्षेण कर्ता समुपलभ्यते एवं वेदानामपि वाक्यसमुदायात्मकत्वेन पौरुषेयत्वम् । तथा चानुमानप्रयोगः--'वेदः पौरुषेयः वाक्यत्वात् भारतादिवत्' इति । किञ्च- लौकिकेषु वाक्येषु तात्पर्यज्ञानं कारणं तच्च तात्पर्यं पुरुषनिष्ठो धर्मः, एवं वेदेऽपि तात्पर्यज्ञानाश्रयत्वेन कश्चन पुरुषः स्वीक-र्तव्यः, स एवेश्वरो वेदकर्ता इति वर्णयन्ति ।

तत्रोच्यते -लौकिकेषु वाक्येषु कर्तारमुपलभामहे-ऽतो 'नहि दृष्टेऽनुपपन्नं नामे'ति न्यायेन पौरुषेयत्वम-भ्युपगच्छामो वयम् । वैदिकेषु वाक्येष्वपि यदि कर्ता स्यादस्माभिरुपलभ्येत अध्येतृपरम्परया वा स्मर्येत । यतो नोपलभ्यते न वा स्मर्यतेऽतो वयमवगच्छामो यदुपलब्धियोग्यस्यानुपलंभात् नास्तीति निश्चिनुमो वयम् । प्रतिपक्षानुमानञ्चेदम्--"वेदः अपौरुषेयः उपलब्धियोग्यत्वे सति अस्मर्यमाणकर्तृकत्वात्" इति ।

किञ्च—नैयायिकादयः सामान्यतो दृष्टेनानुमानेन यङ्कंचन कर्तारमनुमाय स्वाभिमतं कर्तारं निक्षिपन्ति । केचिद्धिरण्यगर्भमपरे प्रजापतिमन्ये ईश्वरमिति ।

श्रुतिश्च ब्रूते—अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदि-त्यात्सामवेद इति विरोधात् नैयायिकादिसम्मतं पौरुषे-यत्वं न क्षोदक्षमनिति निर्धारयामो वयम् ।

वेदान्तिनोऽपि—शास्त्रयोनित्वादित्यधिकरणे प्रथ-मवरणके ब्रह्मप्रभवत्वं वेदस्य वर्णयन्ति, उदाहरन्ति चेमां श्रुतिम्—

"अस्य महतो भूतस्य निश्वसितमेतद् ऋग्वेदो-यजुर्वेद इति । अतो वेदान्तिनामपि वेदानां पौरुषयत्व मेव सम्मतम् ।

तत्र मीमांसका एवं राद्धान्तयन्ति यद् वेदा अपौ-रुषेया इति ।

तेषामयमभिप्रायः—यत् भारतादिषु ग्रन्थेषु अध्ये-तृपरंपरया कर्तृत्वस्मरणमबाधितमनुवर्तते । वेदेषु पौरुषेयत्वमध्येतृपरंपरया न स्मर्यतेऽतः सर्वोप्युत्सर्गः सापवाद इति न्यायेन लौकिकानां वाक्यानां पौरुषेयत्वं भवतु नाम । वैदिकानान्तु अपौरुषेयत्वं कुतो नोपपद्यते, अध्ययनपरंपरया अनादित्वात् 'वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् । वेदाध्ययनसामान्यादधुनाध्ययनं यथा ॥' इत्यनुमानमत्र प्रमाणम् ।

इदं चापौरुषेयत्वं पुरुषास्वातन्त्र्यमेव । अस्याय-मभिप्रायः--यल्लौकिकेषु वाक्येषु आनुपूर्वीविरचने



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


पुरुषः स्वतन्त्रो दृष्टो न तथा वैदिकवाक्यानुपूर्वीकरणे। अतः पुरुषास्वातन्त्र्यमेव अपौरुषेयत्वमिति। यथोक्तं भट्टपादैः—

"यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता।" इति।

अपि च कल्पसूत्राधिकरणे—कल्पसूत्रापेक्षया वेदानां वैलक्षण्यं प्रतिपादयन्तो वार्तिककारा 'अग्न आयाहि वीतये' इत्यादिकाऽऽनुपूर्वी पुरुषैः कर्तुं न शक्यत इत्यादि वदन्तोऽन्त एवमुपसञ्जह्रुः।

एवञ्च यदाध्येतारोऽध्यापयितारः पार्श्वस्था वा वेदपदवाक्यतदर्थरूपाणि आलोचयन्ति तदा स्वसंवेद्यमेवापौरुषत्वमध्यवस्यन्ति। तदानीं बाह्यतार्किकाणां प्रतीतिभावना नोत्पद्यत इति। तत्तत्प्रतिपादनक्षमवेदोत्थापितन्यायोपनिबन्धनान्मीमांसकैः केवलं यश एव पीतमित्यतो वेदानामपौरुषेयत्वमिति सरमतः पक्षः।

अत्रेदं विचारमर्हति—यदस्माकं पुराणग्रन्थेषु ऐतिहासिकग्रन्थेषु च भारतभागवतादिषु अर्वाचीनैरैतिहासिकग्रन्थेषु चेदमवगम्यते—वेदः केनचिन्न प्रणायि, किन्तु कालमाहात्म्यादध्येतृपुरुषक्षयाद् वा देशोत्सादाद् वा वैदिकसम्प्रदायो यदा ह्रसिमानमुपैति, अपचीयते च वैदिको धर्मस्तदा भगवान् करुणावरुणालयो नारायणः केनचिद् पुरुषरूपेणावतीर्य वैदिकसम्प्रदायं प्रवर्तयति। तत्र भगवान् श्रीकृष्णो दत्तात्रेयरूपेण भुवि समवतीर्य वेदसम्प्रदायं ररक्षेति भागवतादौ कथोपलभ्यते। अमुमेवाशयं माघकवी राजसूयवर्णनप्रसंगेन वर्णयामास। यथा—

'सम्प्रदायविगमादुपेयुषीरेष नाशमविनाशिविग्रहः।
स्मर्तुमप्रतिहतस्मृतिश्रुतीर्दत्त इत्यभवदत्रिगोत्रजः॥'

अतो वेदसंप्रदायप्रवर्तनाय भगवान्नारायणो दत्तात्रेयरूपेणावततारेति सुविशदमवगम्यते।

अपरश्च तादृशः काल उपस्थितो यस्मिँश्च काले पुरुषाणां बुद्धिमांद्यात् आशयदोषात्, करालस्य कलेर्दौर्षाद्वा वैदिकसम्प्रदाये ह्रासमुपेयुषि भगवान् कृष्णः कृष्णद्वैपायनरूपेण भुवि समवतीर्य वेदान् विभज्य वैदिकसम्प्रदायं प्रवर्तयामास। तथा च—

'पराशरात्सत्यवत्यामंशांशकलया विभुः। अवतीर्णो महाभागो वेदांश्चक्रे चतुर्विधम्॥' ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः, चतस्रः संहिताश्चक्रे मंत्रैर्मणिगणा इवेति।'

अनेनेदमवगम्यते यद् वेदव्यासेन शाखाविभागमुखेन वैदिकसम्प्रदायोऽपचीयमानो यथापूर्वं प्रावर्तीति।

एतावता प्रमाणकलापेनेदमायाति—वेदकर्ता कोऽपि नास्ति किन्तु सम्प्रदायप्रवर्तका एवेति। तथाच—'युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः। लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा॥' शिवाद्या ऋषिपर्यंताः स्मार्तारोऽस्य न कारकाः' इति।

उपरितनाद्विचारादयमर्थः पर्यवस्यति—

१. ऋषिकर्तृका वेदा इति।
२. ईश्वरकर्तृका वेदा इति।
३. अपौरुषेया वेदा इति।

तत्र प्रथमं मतं वैदेशिकानान्तदनुसारिणां तद्वासनावासितान्तःकरणानां केषाञ्चिदुपेक्षणीयम्। ऋषिशब्दनिर्वचनदर्शनात्। तथाहि—"ऋषिर्दर्शनात् स्तोमान् ददर्शेत्यौपमन्यवः—तपस्यमानान् ब्रह्मस्वयंभ्वभ्यानर्षत् ऋषयोऽभवं तदृषीणामृषित्वमिति विज्ञायते"॥
(नि. नै. कां. अ. क. ११)

द्वितीयं मतं सांख्यमीमांसकभिन्नानां दार्शनिकानाम्
तृतीयं मतं कर्ममीमांसकानाम्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## हिमालयाञ्चले

# बदरीनाथयात्रा

वर्तमानसमयपर्यन्तमपि भारतवर्षमिदं धर्मप्रधानो देशः। अत्र हि सनातनधर्मं वंशपरम्परातः सेवमानानां धार्मिकाणां भूयसी संख्या। धार्मिकसमाजे च तीर्थयात्रा जीवनस्य सफलीकरणाय प्रधानमङ्गम्। तीर्थेषु अपि चतुर्धाम्नां यात्रा सुप्रथिता, अद्यावधि प्रचलिता च। चतुर्धामसु श्रीजगन्नाथ–श्रीरामेश्वर-श्रीद्वारकाधाम–श्रीबदरीनाथेति सर्वतः प्रसिद्धानि। साधारणोपि गृहस्थः स्वजीवने धार्मिकक्षेत्राणां यात्रां कृत्वा आत्मानं कृतार्थं मनुते। जीवनपर्यन्तमपि धनार्जनं कृत्वा येन केनापि प्रयत्नेन तीर्थयात्रां विदधाति। तीर्थयात्रार्थं पुरा ग्रामाणां नगराणां च जनाः संघीभूय पर्यटन्ति स्म। यतो हि नासन्पुरा यात्रार्थं रेलशकट्यादीनि यानानि। अत एव प्रायः पद्भ्यामटन्तो जनास्तीर्थयात्रापुण्यमर्जयन्ति स्म। किन्तु यतः प्रभृति भारते रेलशकटी–मोटरप्रभृतीनां सौकर्यमभूत्तदाऽऽरभ्य सेयं तीर्थयात्रा जनानां कृते सुतरां सुकरा समभवत्। किं बहुना, संप्रति तीर्थयात्रायाः कृते विशिष्टा शकटी (स्पेशलट्रेन) अपि रेलशकटिविभागेन प्रवर्तिता। किन्तु श्रीजगदीशादिधाम्नां कृते एव सेयं शकटियात्रा सुविधाऽऽवहा। बदरीनाथयात्रा तु हरिद्वारपर्यन्तमेव रेलशकटिविश्रमात् सर्वेषां यात्रिणां कृते कठिना। विशेषतश्च यात्रायामस्यां भूमण्डले सर्वापेक्षया समुन्नतो हिमालयः समारोहणीयो भवति। पर्वतारोहणे च भूयसः श्रमस्य, बलस्य, समयस्य चापेक्षा। अत एव सर्वेपि यात्राभिलाषुका बलवदिच्छायां सत्यामपि न सर्वस्मिन् काले स्वतन्त्रतया गन्तुं प्रभवन्ति।

यतो हि बदरिकाश्रमः सोयं समुद्रतलात् १०२४० 'फीट' मितः समुन्नतोऽस्ति। स हि अतिसमुन्नते हिमगिरेः शिखरेऽवस्थितः। एकस्मिन् वर्षे षण्मासान् यावत् बदरीनाथदेवस्य मन्दिरमिदं हिमाच्छादितं भवति। किन्तु ग्रीष्मकाले तदिदं दिव्यदर्शनं देवविभूतेरन्वेषकाणां कृते दिव्यतया देदीप्यमानं भवति। यथा हि भवाटव्यामितस्ततो बंभ्रम्यमाणानां जीवानां कृते स्वर्गस्य प्रवेशपत्रं प्रदातुमेव दिव्यतीर्थस्याऽस्य जागरणं मन्ये जातं स्यात्। प्रतिवर्षं वैशाखमासे (मईमासे) दिव्यमन्दिरस्याऽस्योद्घाटनस्य संवादं समाचारपत्रेभ्यः प्राप्नुवन्ति यात्रार्थिनः। वैशाखस्याऽक्षयतृतीयां महत्या उत्कण्ठया प्रतीक्षन्ते ते यात्रिणः। जलप्रपात–नानामहीरुहादिप्राकृतदृश्यैः सर्वेषां समाकर्षकमिदं दिव्यस्थलं बलात्प्रेरयतीव निजसमीपे समाक्रष्टुम्। किन्तु अद्यावधि यात्रायाः कृते सर्वविधसुविधानामभावेन तदिदं तीर्थं स्वास्थ्यस्य कृते नाऽऽसीत्तथाऽनुकूलम्। अत एव सांसारिककार्येभ्यः प्रतिनिवृत्य प्रायो वृद्धावस्थायामेव यात्रामिमां संपादयन्ति धार्मिकाः।

## हरिद्वारम्

सर्वतः पूर्वं हरिद्वारमिदं बदरिकाश्रमे प्राप्तव्यस्य हरेर्द्वारमिव संमुखे उपस्थितं भवति। अत एवात्र साधा-

---

इदमपि विचार्यमाणं नैयायिकसम्मतं पौरुषेयत्वं मीमांसकसम्मतेऽपौरुषेयत्वे एव पर्यवस्यति। यत आनुपूर्वीविपर्यासकरणे ईश्वरस्यापि सामर्थ्यं नास्ति 'धाता यथापूर्वमकल्पयत्' इति मंत्रवर्णात्।

अतः सूक्ष्मेक्षिकया प्रणिहितेन मनसा विचार्यमाणे सन्मीमांसकसम्मतं वेदानामपौरुषेयत्वमेवेति सर्वतोपरि विराजते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


रणतया यात्रिणोऽस्मिन् स्थाने प्रायो दिनद्वयं दिनत्रयं वा तिष्ठन्ति । उभयोः पार्श्वयोः पर्वतघनैर्वेष्ठिता गङ्गा, अनन्तकालाज्जागरूको दिव्यप्रहरीव प्रवहन्ती प्रतीयते । एतत्तीरगतं दृश्यमतिमनोहरं हृदयाकर्षकं च अत्र हि हरिपादुकास्थानं, ब्रह्मकुण्डश्चेत्यादिकमप्राकृतं द्वीपमिवाऽवभापते । एतदुपरि श्रीरामचन्द्र-श्रीगङ्गा-श्रीलक्ष्मीनारायणप्रभृतीनां मन्दिराणि यात्रिणां समूहैर्वेष्टितानि वीक्ष्यन्ते । सायंसमये हरिपादुकासमीपे भगवत्याः श्रीगङ्गाया आरार्तिकमतिदर्शनीयं भवति । सहस्रशो यात्रिणो गङ्गातटे समवयन्ति । पत्रपुटकेषु लघुलघून् दीपान् विन्यस्य भगवत्यां गङ्गायां प्रवाहयन्ति येन गङ्गावक्षः सर्वतो जाज्वल्यमानं भवति ।

## हृषिकेशः

हरिद्वारे धार्मिककार्याणि समाप्य, यात्रिगणो हृपीकेशं प्रति प्रतिष्ठते, यद्धि स्थानमितश्चतुर्दशमीलमितदूरे । बदरीनाथयात्रायाः कृते आवश्यकानि वस्तूनि प्रायः अस्मिन्नेव स्थाने संगृह्णन्ति यात्रिणः । यथा पर्वतारोहणे सहायिका वंशयष्टयः, वर्षाजलप्रतिरोधकानि आवरणवस्त्राणि, कम्बलानि, अन्यानि वा पर्वतयात्रोपयुक्तानि वस्तूनि । हृषीकेशे गङ्गातटे अनेकानि मन्दिराणि, आश्रमाश्च सन्ति, येषु अनेके साधवः संन्यासिनश्चाधिवसन्ति । अत्रत्याः साधवः, अन्यस्थानापेक्षया अर्चनीया भवन्ति, यतोहि प्रायः एते वस्तुतो विरक्ता मुमुक्षवश्च भवन्ति । स्वल्पदूरे एव स्वर्गाश्रमस्थानमतिदर्शनीयं, यत्र सत्संगो हरिकीर्तनादिकं च प्रायशो भवति । हरित-भरितायां किन्तु उच्चावचायां भूमौ प्रवहन्ती श्रीमती गङ्गा जलकलकलध्वनिभिरपूर्णा यात्रिणां हृदये प्रतिध्वनिमिवोत्पादयति । हृषीकेशस्थाने प्रायो यात्रिणां समूहः सर्वदा समवेत इव विलोक्यते

अवध सूगर मिल्स लि०

हरगाँव उत्तरप्रदेशे )

उच्चकक्षायाः शर्करानिर्मातारः

मैनेजिंग एजेंट्स्

★ दी कॉटन एजेन्टस् प्राईवेट लि० ★

कलकत्ता ★ बम्बई



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


## [स]म्पादकीयम्—

**धर्मप्राणस्य स्वामिरामचन्द्रवीरस्य एकपञ्चा-[श]द्दिवसानामनशनम् !!**—राजस्थानभूमिर्धर्मप्राणा-[न]ामार्याणां संस्कृतिविषये आदर्शभूमिः। अत्रत्यैः [अ]नेकैः क्षत्रियैर्निजप्राणानां बलिमपि दत्वा भारतीया [संस्]कृतिः संरक्षिता। आर्यसंस्कृतेश्च गावो ब्राह्मणाश्च [मूल]भूता इति जानन्ति सर्वेपि। किन्तु न केवलं भारते [...] अपितु गोब्राह्मणसंरक्षकाणां क्षत्रियराजन्यानां

[...]नभूमौ अस्मिन् राजस्थानेऽपि गोवंशस्य प्रत्यक्षं [वि]नाशः, तदीय-संचरणभूमेर्विलोपश्च संदृश्यते। [बी]कानेरनिकटे मोटासरस्थाने १५५ गावो वृषभाश्च विपाटिताः। करणपुरे ६०, उदरामसरे ८, एवं गङ्गा-पुर (जंक्शन स्य समीपेऽपि गवां हिंसनं संजातम्।

जयपुरप्रान्तस्य छापडा, रामपुरा, सीकरसमीपभूमौ या किल गोचरभूमिरासीत् तस्यां कृषिः प्रारब्धा। एव-मेव बीकानेर–जोधपुर–अलवर–भरतपुरप्रभृति-राज-स्थानी-यप्रदेशेष्वपि गोचारणभूमौ कृषिः प्रारब्धा येन गो-वृषभाणां चरणस्य न मनागपि सुविधा। पूर्वं हि राजस्थानभूमितो बहिः गवां नयनस्य, विक्रयणस्य चासीत्प्रतिबन्धः। किन्तु वर्तमानकाले सुस्पष्टं गोवृष-भादीनां विक्रयस्य कृते मेलका भवन्ति। येभ्यो गोवंशं नीत्वा बहिः प्रदेशेषु गवां सुस्पष्टं विलयाय चेष्टन्ते धनलोभिनो विधर्मीयाः। एवमेव गोचारणभूमेरुपर्यपि भूमिकरो दातव्यो भवति, येन गोवंशस्य निर्वाहे महत् संकटमिवोपस्थितम्।

गोवंशस्योपरि एवंविधान्यनेकानि संकटानि संवीक्ष्य धर्मप्राणेन वीररामचन्द्रेण एकपञ्चाशद्दिनानामनशनम-वलम्बितं, येन आर्यसंस्कृतेरभिमानं वहन्तो राजस्थानीयाः शासकाश्च, निवासिनश्च त्वरितमेव गोवंशोच्छेदस्य मूलघातं कुर्युः। तदिदमनशनव्रतं जन्माष्टमीमारभ्य प्रचलितम्। सांप्रतं रामचन्द्रवीरस्य शारीरकी परिस्थितिः संकटापन्ना श्रूयते। निष्ठीवनेन सह मुखतो रक्तमपि निःसरति। आर्यभूमौ राजस्थाने धर्मरक्षायाः कृते

---

[...]त्यासु धर्मशालासु बहुषु समयेषु स्थानप्राप्तिरपि [या]त्रिणां कृते दुर्लभा भवति। किन्तु 'कालिकमलीवाला' [इ]ति सर्वतः प्रख्यातस्य महात्मनो धर्मशाला न केवलं [हृ]षीकेश एव, अपि बदरीनाथस्य सर्वस्मिन्नपि प्रान्ते, [या]त्रिणां विश्रामोचितेषु ग्रामेषु सन्ति। निःसहायाः [सा]धवः, अन्ये च दीनाः 'कालीकमलीवाला' स्थानाद् [भो]जनं स्थानादि सौकर्यं चोपलभन्ते। 'कालीकमली-[वा]ला' सत्रस्य अत्रैव प्रधानं कार्यक्षेत्रमस्ति, यस्मात् [स्था]नात् भोजनादेरनुमतिपत्रं प्राप्नुवन्ति साधवः।

———— क्रमशः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


यद्येवं प्रत्यक्षमपघातः स्यात्तर्हि सेयं राजस्थानस्य सुस्पष्टा धर्मक्षतिः, मर्यादाविच्युतिश्च । जनताप्रमुखाः साम्प्रतमवधानपुरस्सरमेतस्य प्रतीकारं कुर्युरिति विश्वसिमः । अनशनानुष्ठानस्य स्थानं "सिरहड्योढी रथ्यायां 'चेलोंका मन्दिर' (जयपुरनगरम्)"

**भारतप्रधानमन्त्रिणः श्रीनेहरूमहोदयस्य अरबप्रदेशे अभूतपूर्वं स्वागतम्** — श्रीनेहरूमहोदयः सर्वस्मिन्नपि भूमण्डले शान्तेरुपासकः, दूतो वा परिगण्यते नूनमिति जानन्त्येव राजनैतिकाः । वर्तमानकाले भूमण्डलस्य सर्वाण्यपि राष्ट्राणि भारतप्रधानमन्त्रिणमिमं नेहरूमहोदयं निजनिजदेशे ससम्मानमामन्त्रयन्ति । महता समारोहेण चास्य स्वागतं कुर्वन्ति । किञ्चित्पूर्वं चीनराष्ट्रे-रूसराष्ट्रे चास्य सेयं शान्तियात्रा परिज्ञातैव मनाक् संवादपत्रपाठकैः । अधुना महाभागस्याऽस्य अरबनगरंप्रति यात्रा, अभूतपूर्वं स्वागतं च प्रत्येकभारतीयस्य प्रमोदाय भवेत् । सितम्बरमासस्य २४ तारिकायां महाभागोऽयं भारतराजधानी-देहलीतः स्वदलेन सह प्रस्थितोऽभूत् । भारतीयवायुसेनाया विशिष्टं विमानं 'राजहंसः' भारतीयं राष्ट्रध्वजं गगने प्रसारयन् प्रातरष्टवादने अरबदेशं प्रति प्रतिष्ठत । द्वितीयदिने (२५ तारिका) सायं सपादसप्तवादने 'रियाव' स्थाने सोयं महाभागः ससमारोहं प्रापत् । तत्र हि विमानविश्रमस्थाने युवराजः अमीरफैजलः, साऊदी अरबस्य प्रधानमन्त्री च नेहरू महोदयस्याभ्यर्थनामकुरुताम् । वायुयानस्य विश्रामस्थानेऽस्मिन् अपारा जनता नेहरूदर्शनार्थमुत्कण्ठिताऽऽसीत् । यथैव नेहरूमहोदयो विमानादवतीर्य भूमौ पदं न्यधात् तथैव परःसहस्रलोकानां करतलध्वनिभिर्गगनमगुञ्जत्

भारतीय-औषधानां सर्वाधिकं बृहत् विश्वस्तं निर्माणकेन्द्रम्

**श्री वैद्यनाथ-आयुर्वेद-भवनं**

**[प्रायवेट लिमिटेड]**

कलिकाता • पटना • झांसी • नागपुरम्

सर्वेषामयुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्तानां भेषजानां सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे

निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्येन भेषजानीमानि लभ्यन्ते



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"श्रो: शान्तेदूत नेहरू ! वयं तव स्वागतं कुर्मः" [...वा नेहरू रसूल उल् सलाम] इति हर्षध्वनयः [...]न्त।

[...]पी० आई० विशेषप्रतिनिधिनाऽत्र सूचना दत्ता-[...]त् नेहरूमहोदयस्य यादृशं सर्वश्रीसम्पन्न ससमा-[...]गतमत्राऽभवत् तादृशं स्वागतमेतद्देशीयैर्न [...]दपि विदेशीयातिथेरद्यावधि कलितमभूत्। [...]स्येतिहासेसोयं सर्वप्रथम एवाऽवसरोऽस्ति यस्मिन् [...]याः अवरोधप्रथाया आग्रहिण्योऽपि यवनमहिला [...]तसंख्यायां समवेता अभवन्। नेहरूदर्शनार्थ-[...]इमा विमानस्थानपर्यन्तं महामहतीषु मरुत्तर-[...]ु (ट्रंक) पूरिताः समागच्छन्, याहि शकट्यः [...]रेण सूक्ष्मवस्त्रेणाऽवगुण्ठिता आसन्। किन्तु [...]र्शनमिमाः प्रोन्मुक्तभावेनाऽकुर्वन्।

[...]रजनतामध्यगतो भारत प्रधानमन्त्रिमहोदयः [...]समारोहस्य समुचितमुत्तरं प्रददत् सोल्लासम-वदत् "यदहं श्रीमतां देशे शान्तिदेव्यास्तीर्थयात्रीभूत्वा समागतोऽस्मि"। ततो विमानस्थानात् नेहरूमहोदयः शाहमहाभागस्य हर्म्यमालां प्रत्यगच्छत्। अस्मात्स्थानाद्राजप्रसादाः सप्त 'मीला' न्तरिताः। यस्मिन् सुसज्जिते मरुत्तरयाने नेहरूमहोदयः स्थितोऽभूत् तस्य पृष्ठभागे द्वे 'जीप' शकट्यौ, तयोः पृष्ठे च गुलिकास्त्रयोः शकट्यः ('मशीनगन') अचलन्। दूरतरेऽप्यस्मिन् मार्गे संसरणस्योभयभागे अपारा जनता नेहरूदर्शनं प्रतीक्षमाणासीत्। सर्वतः करतलध्वनयो नेहरूविजय-ध्वनयश्चाश्रूयन्त। सर्वोऽप्ययं मार्गो ध्वजा-पताकाभि-र्मण्डितो व्यलसत्। नेहरूमहोदयो यथैव शाहमहो-दयस्य हर्म्यमुपागात्तथैव शाहो वहिरुपगत्य अतिप्रह-र्षेणाऽस्य स्वागतमकार्षीत् हर्म्ये स्थितो नेहरूमहोदयः कियन्तं समयं यावत् शाहेन सह वार्तालापमकरोत्।

---

कीदृशमपि वस्त्रं धारयेत,
सेकसरिया—निर्मितं वस्त्रं सर्वोत्तमं सिध्यति
निर्माणशैल्यां स्थायित्वे च सर्वोत्कृष्टम्
मलमल ● वायल ● पोपलिन ● शाटिकाः ● धौतानि
● कंचुकवस्त्रम् ● जीन ● कार्टिंग ● लट्ठा
● फलालैन ● छत्र-वस्त्रम् इत्यादीनि
सेकसरिया काटन मिल्स लि०
मिल : डीजल रोड़, बम्बई १३
कार्यालयः सेकसरिया चेम्बर्स, १३९ मीडोस स्ट्रीट, बम्बई १
शैल्यां स्थिरत्वे च श्रेष्ठम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

## ❀ सूक्ति-सुधा ❀

लोकेषु निर्धनो दुःखी ऋणग्रस्तस्ततोऽधिकम् ।
ताभ्यां रोगयुतो दुःखी तेभ्यो दुःखी कुभार्यकः ॥१॥

सबलोगों में वही दुःखी है जिसके पास धन नहीं । किन्तु जिसके सिर कर्ज है वह उससे भी दुःखी है इन दोनों से भी वह दुखी है जो रोगी है । और इन तीनों से वह दुःखी है जिसकी स्त्री खराब है ।१।

आज्ञाभङ्गो नरेन्द्राणां विप्राणां मानखण्डनम् ।
पृथक्शय्या च नारीणामशस्त्रवध उच्यते ॥२॥

बिना हथियार के ही प्राणघात के समान ये तीनों हैं–राजाओं की आज्ञाका भङ्ग ( हुकुम का तिरस्कार ), ब्राह्मणोंका अपमान, अपनी पत्नी को अलग सुलाना, अर्थात् शैय्यास्थान से दूर रखना ॥२॥

पण्डितैः सह सांगत्यं पंडितैः सह संकथाः ।
पण्डितैः सह मित्रत्वं कुर्वाणो नाऽवसीदति ॥३॥

पण्डितों के साथ संगति, पण्डितों के साथ बोलचाल, पण्डितों के साथ मित्रता, इनको करनेवाला कभी दुःखी नहीं होता ॥३॥

## संस्कृतसमाचाराः—

**पञ्जाम्बुप्रदेशे संस्कृतभाषया सह आर्याणां दुर्व्यवहारः**—विश्वविद्यालयस्य अनुदानाऽऽयोगाध्यक्षः श्रीचिन्तामणिदेशमुखमहाभागः पञ्जाम्बुप्रदेशे विचरन् पञ्जाम्बुप्रदेशस्य संस्कृतभाषासम्बन्धे असंभावनीयां परिस्थितिं प्रकटयामास । जालन्धरनगरे पत्रकारैः सह तस्य संलापः प्रक्रान्तोऽभूत् । तत्प्रसङ्गे देशमुखमहाभागेन प्रोक्तम्—"संस्कृतेन सह पञ्जाम्बुप्रदेशस्येव दुर्व्यवहारो मया कुत्रापि नाऽन्यत्राऽवलोकितः ।" स हि इतः पूर्वम् ओरिएण्टल कॉलेजस्य तथाऽन्यान्यासां च शिक्षासंस्थानां निरीक्षणं कृतवान् आसीत् । अतएव शिक्षासम्बन्धे यः किल महाभागस्याऽस्याऽनुभवो नवीनतया प्रादुर्भूतः स हि अतिप्रामाणिको, नितरां विचारणीयश्च । 'पञ्चनदप्रदेशोऽद्यावधि संस्कृतभाषायाः कृते विहारक्षेत्रमिवाऽऽसीत् । आर्याणामुद्गमभूमिरासीत् । एतस्यामनेके ग्रन्थकाराः प्रचारयामासुरार्याणां नानाविधाः संस्कृतीश्च" इति गच्छतु प्राचीना संकथा किन्तु एतत्कालपर्यन्तं पञ्जाम्बुविश्वविद्यालयतः प्रतिवर्षमनेके शास्त्रिपरीक्षोत्तीर्णाः स्नातकाः संपद्यन्ते स्म ये हि भारतस्य प्रत्येकप्रान्ते एव प्रकामं प्रतिष्ठां प्राप्नुवन् अद्य तस्यैव प्रान्तस्य एवंविधां परिस्थितिमवगम्य हन्त परिखिद्यते चेतः । पंक्तीनामासां लेखकोऽयमपि पञ्जाम्बुविश्वविद्यालयतः शास्त्रिपदवीं लब्धवान् । सर्वस्मिन्नपि विश्वविद्यालये तत्परीक्षोत्तीर्णेषु सर्वप्रथमोऽभूदिति संमानमपि सर्वतः समधिगतवान् । किन्तु भारतीयानां स्वराज्यप्रक्रमेपि–एवंविधस्य परिनिष्ठितप्रान्तस्यापि एवंविधमपवादं शृण्वतः सत्यं सीदन्तीव मेऽङ्गानि । तत्प्रान्तीयाः शिक्षाकर्णधाराः प्रतिविधेयासुरिदमित्यर्थये भगवन्तम् ।

**संस्कृतविश्वविद्यालयस्योपकुलपतिः**—विश्वविद्यालयस्य प्रारम्भं प्रतीक्षमाणाः संस्कृतानुरागिणः प्रसीदेयुर्यत् कुरुक्षेत्रे प्रारभ्यमाणस्य संस्कृतविश्वविद्यालयस्य यत्किञ्चित् कार्यं शनैः शनैर्भवत्येव । पञ्जाम्बुशिक्षाविभागस्य संचालकः ए० सी० जोशी नवनिर्मितस्य संस्कृतविश्वविद्यालयस्योपकुलपतिर्नियमितोऽस्ति । जोशीमहोदयो वर्तमानकार्यभारं संचालयन्नपि विश्वविद्यालयस्याऽस्य कार्यं यथावन्निर्वहयति ।

प्रकाशकः—जयबहादुरसिंह पताः—भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रकः—राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर ।
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

( संस्कृतस्य प्रमुखं मासिकपत्रम् )



गृहीतमणिकुम्भाभ्यां कुम्भिभ्यामम्भसा स्नुता ।
भारताय महालक्ष्मीर्महालक्ष्मीं ददात्वलम् ॥

वर्षम् ७ | प्रथमोऽङ्कः | मूल्यम् वार्षिकम् ३) रु० एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# विषय-सूची


| क्रमः | लेखाः | लेखकाः | पृष्ठ संख्या |
|---|---|---|---|
| १. | दिव्यदीपावलीयम् | सम्पादकः | |
| २. | दीपावल्यां शुभाशंसनम् | सहसम्पादकः | |
| ३. | नूतनवर्षारम्भः | सम्पादकः | ४ |
| ४. | कविप्रवरः शूद्रकः | वासुदेवशास्त्री, वागेवाडीकर | ७ |
| ५. | 'कृपा' राज्ञी | न. शठकोपः, विद्याप्रवीणः, उडीसा | ६ |
| ६. | आर्याणामुत्सवसमाजश्च दीपावली च | सम्पादकः | १२ |
| ७. | मौनाह्वानम् | मधुकरशास्त्री, भरतपुरम् | १८ |
| ८. | सम्पादकीयम्— | सम्पादकः | १६ |
| ९. | सत्-कार्यस्य फलम् | कमलानाथशर्मा, जयपुरम् | २१ |
| ११. | शुभाशीर्वादः | राष्ट्रपतिमहोदयस्य | २३ |
| १२. | शुभाशंसनम् | स्वामिमाधवानन्दानाम् | २३ |
| १३. | सूक्ति-सुधा | सम्पादकः | |


## आवश्यकम् निवेदनम्

सम्प्रति सर्वे संस्कृतज्ञाः संस्कृतानुरागिणः तथा 'भारती' पाठकाश्च सादरं संप्रार्थ्यन्ते यत् गीताजयन्ती महोत्सवस्य पूर्वसप्ताहे (मार्गशीर्षमासे सर्वेऽपि महानुभावाः सुरभारतीप्रचारसप्ताहस्य समायोजनम् कुर्युः। तत्र च संस्कृतस्य प्रचाराय प्रसाराय च नानासभानां समायोजनम् तथा संस्कृतप्रचारकाणां भारतीत्यादि संस्कृत-मासिकपत्राणां ग्राहकसंख्याभिवृद्ध्यर्थं प्रयत्नाश्च स्युः।

एतद्विषयकाः कार्यक्रमाः 'भारती' कार्यालये समागमिष्यन्ति चेत् ते अग्रिमाङ्के प्रकाशमेष्यन्तीति।

प्रबन्ध-सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादकः—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः बी.ए.
जयपुरम्

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भाग्याढ्या भारते भातु भारती ॥

वर्षम् ७ } कार्तिकशुक्ला १, सं० २०१३ { अङ्कः १

## दिव्यदीपावलीयम्

[ घनाक्षरी ]

खचितविचित्रचित्रजाला भाति भूमिरियं
सद्वन्दनमाला[1] द्वारराजिरसौ भासते
बालाऽऽमोदवर्द्धिनी विशालाऽङ्गणवेदिकासु
सूतपुष्पजाला पुष्पझरिका[2] प्रकाशते ।
मञ्जुनाथ मञ्जुचन्द्रशालामभिमण्ड्य जनाः
प्रतिगृहमेते किल कमलामुपासते
बालाकरदत्ता दीपमालादिनदैर्घ्यकरी
राजत्सौधमाला दीपमाला भूरि भासते ॥

—सम्पादकः

## दीपावल्यां शुभाशंसनम्

प्रत्यागाराऽट्ट-शृङ्गाटक-विपणि-घनोद्घोषघण्टापथाऽध्वं
श्रेणीयुग्मोपशोभिप्रचितरुचिलसद्दीप्रदीपप्रभाऽऽढ्या
देशस्याऽर्थे समस्तां जनपद-जनतां साधु संनाहयन्ती
सा पृथ्वीपान् प्रतीपानपि नयतु वशं दिव्यदीपावलीयम् ॥१॥

—सहसम्पादकः

१—वन्दनवार । २—अग्निक्रीडनकम् 'फूलझड़ी' ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अनुकरणमिदं समर्थितम्। ततश्च केन्द्रीयशासनस्य संस्कृतोद्धारविषये वर्तमाना नीतिः सुस्फुटमनुमातुं शक्यते नूनम्।

## आयोगस्य अपूर्णता

किञ्च-उत्तरप्रदेशः, विहारः, राजस्थानं, मध्यभारतं चेत्येतानि संस्कृतस्य प्रधानक्षेत्राणि सांप्रतं भारते। आयोगेऽस्मिन्नेतेषां प्रदेशानां नाऽऽलोक्येत समुचितं प्रतिनिधित्वम्। उत्तरप्रदेशे प्रमुखं वाराणसीस्थं संस्कृत-महाविद्यालयं को वा भारतीयो न जानीयात् यस्य हि भारतीयाभिः १२०० संस्कृतपाठशालाभिः सम्बन्धः। यश्च सांप्रतं विश्वविद्यालयस्य रूपं बिभर्ति। एवमेव राजस्थानं, तत्रापि जयपुरराजधानीं, को वा भारतवासी न वेत्ति, यत्र हि संस्कृतस्य उच्चोच्चपरीक्षाश्चिरकालाद् भवन्ति। यत्रत्या विद्वांसः समग्रेऽपि भारते स्ववैदुष्येण, सर्वोपजीव्याभिः कृतिभिश्च, प्रमुखं स्थानं वहन्ते। राजस्थानेन संस्कृतशिक्षावाः परिष्कारस्य कृते भूरितमसुद्युक्तम्। 'संस्कृतविकास समिति" नाम्ना आयोग एकः स्थापितो येन हि समग्रस्यापि भारतस्य संस्कृतप्रचारक्षेत्रेषु संस्कृतोन्नतेः प्रकारा अन्विष्टाः, एतद्विषये अभिज्ञाः शिष्टाः पुरुषाश्च सर्वतः पृष्टाः। ततश्च एवंविधान् प्रदेशान् आयोगेऽस्मिन् असंस्मरतां कथं वा प्रतिनिधित्वं प्रामाणिकं जायताम्?

## संस्कृतस्योपेक्षा

बहून् वारान् अखिलभारतीयसंस्कृतसंमेलनद्वारा, शिष्टमण्डलमुखेन च, बहुधा प्रार्थनायाम्, अनुरोधे चाऽपि कृते, संस्कृतपरीक्षोत्तीर्णैः सह वैषम्यव्यवहारो नाधुनापि शिक्षाकर्णधारैः परित्यक्तः। वैदेशिकभाषाऽभिज्ञाः विद्यालयेषु, शासनसंबन्धिकार्यालयेषु च सर्वतः पूर्वं स्थानं लभन्ते। संस्कृतस्य उच्चोच्चपरीक्षोत्तीर्णाः (वर्तमानयुगोचितसंपूर्णपाठ्यक्रमानुसारम्) संस्कृतस्नातकास्तु न तेषु स्थानेषु अभिषिच्यन्ते। वेतनस्तरे साम्प्रतमपि भूयान् भेदः। उपरितः शासनाधिकारिभिः संस्कृतं प्रति मौखिकी भक्तिः प्रदर्श्यते। सभामञ्चेषु लोकानुरोधेन संस्कृतस्य प्रशंसाऽपि गीयते, किन्तु कार्यसमये संस्कृतं, संस्कृतज्ञाश्च सर्वथा विस्मर्यन्ते। एवं परिस्थितौ संस्कृतस्य सर्वतः प्रसारः केन प्रकारेण स्यात्? नवीनसाहित्यस्य निर्माणं कया वा विधया संभवेत्? स्थायिसाहित्यं दूरे तिष्ठतु। किन्तु यानि मासिकादिपत्राणि पुरा सुदशायां प्रचरन्ति स्म तेषामपि दयनीयप्राया दशा।

## संस्कृतपत्राणि

अखिलभारतीयसंस्कृतसंमेलनस्य प्रमुखं पत्रं 'संस्कृतरत्नाकरः' तस्य संपादकस्य बलेनैव प्रचरति। 'मधुरवाणी' कदाचिदेव कर्णौ तर्पयति। प्रचारपरिश्रमे भूयः कृतेऽपि 'संस्कृतं' कथंचित्परिचलति। किं वा मुधा विस्तरेण, प्राचीनान्येव पत्राणि यदा यथाकथंचिद्दिनान्यतिवाहयन्ति तर्हि नवीनपत्रप्रचारस्य को वा सुयोगः? पाठकमहोदयानामनुग्रहभाजनं सेयं 'भारती' गतेषु वर्षेषु यथाबलविभवं पाठकान् सेवितवती। यथासमयमुपस्थितेरपि नियोगः संपादित एवानया अनुग्राहकमहाभागैरपि एतां प्रति अनुग्रहो न प्रकटि इति न शक्यते वक्तुम्। पाठकमहाभागानां द जातैव। किन्तु नियमानुसारं समये वार्षिकमूल्ये प्रेषिते सौकर्यं भवतीति न तैर्विस्मर्तव्यम्।

किञ्च येन प्रयत्नेन सेयं भारती पाठकमहाभागाननुवर्तते तथा अनुग्राहकमहोदया अपि यदि स्वल्पमपि



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# कविप्रवरः शूद्रकः

[ ले० महोपाध्याय पं० वासुदेवशास्त्री बागेवाडीकर ]

## कोऽयं शूद्रकः

प्रायः संस्कृतवाङ्मये प्राचां प्रथितयशसां ग्रन्थकर्तां वृत्तं यथार्थतः सहजं ज्ञातुं न शक्यते। केवलं बाह्याभ्यन्तरप्रमाणानुगतैस्तोकैरेवानुमातुं प्रयतितव्यम्। शूद्रकविषये तु न किमप्यैतिह्यं समुपलभ्यते। मृच्छकटिकनाटके—

"द्विरदेन्द्रगतिश्चकोरनेत्रः, परिपूर्णेन्दुमुखः सुविग्रहश्च।
द्विजमुख्यतमः कविर्बभूव प्रथितः शूद्रक इत्यगाधसत्त्वः॥"
ऋग्वेदं सामवेदं गणितमथ कलां वैशिकीं हस्तिशिक्षां,
ज्ञात्वा सर्वप्रसादाद् व्यपगततिमिरे चक्षुषी चोपलभ्य।
राजानं वीक्ष्य पुत्रं परमसमुदयेनाश्वमेधेन चेष्ट्वा,
लब्ध्वा चायुः शताब्दं दशदिनसहितं शूद्रकोऽग्निं प्रविष्टः॥

एवमादीनां श्लोकगतानां केषाञ्चित् समुल्लेखात् स च शिवभक्तः, द्विरदेन्द्रगतिः, चकोरनेत्रः, पूर्णेन्दुमुखः, सुदृढशरीरवान्, द्विजश्रेष्ठः, अगाधसामर्थ्यवानासीत्। ऋग्वेदं, सामवेदं, गणितशास्त्रं गीतनृत्यादिकलाश्चाशिक्षत। युद्धशीलो गजयुद्धाभिलाषी वेदविदां श्रेष्ठस्तपोधनोऽश्वमेधयाजी राजा बभूव। पुत्रं राजपदेऽभिषिच्य सोऽश्वमेधेनेजे। दशाधिकशतमितमायुर्लब्ध्वाऽयं शूद्रकोऽग्निं प्रविष्टः। एतस्य नाटकस्यावलोकनेन शूद्रकस्य हस्तिशिक्षाज्ञानं संगतिनैपुण्यं चेत्यादयो गुणाः प्रतीता भवन्ति।

असंदिग्धवृत्तानुपलब्धेः शूद्रको नाम न कोऽपि कविर्बभूवेति केचिद् विद्वांसः प्रतिपादयन्ति। परं परे नैतत् सहन्ते। स्कन्दपुराणादारभ्य कथासरित्सागरं यावत् पुरातनेषु नैकेषु ग्रन्थेषु शूद्रकस्य नृपस्य ग्रन्थकर्तृत्वेन निर्देशः समुपलभ्यते। बाणभट्टेनायं वर्णितः रामिलसोमिलकविभ्यामस्य कथा कथिता। दण्डि-वामन-राजशेखर-कल्हणप्रभृतिभिर्बहुभिर्ग्रन्थकृद्भिः

---

प्रयासं स्वीकुर्युस्तर्हि संस्कृतसरस्वत्याः सुमहती सेवा संविहिता स्यात्। एकैको ग्राहकमहोदयः स्वसंबन्धिनमेकैकमपि चेन्नवीनं ग्राहकं संपादयेत्तर्हि भारती सुखेन प्रचारं लभेत। मन्ये भारत्या अनुग्राहका ग्राहकमहाभागा अवश्यमत्र अवधानं दद्युः। सेयं भारती अपि उत्तरोत्तरं तेषां मनोऽनुरञ्जनाय प्रयतेत। अस्मिन् वर्षे बहूनामनुरोधेन 'बालस्तम्भः' प्रक्रान्तः, यत्र हि शिक्षमाणानामपि लेखाः प्रकाश्येरन्। यथासंभवं कथाः, विनोदवृत्तान्ताश्चापि संगृह्येरन्। बहुष्वंशेषु तदिदं श्रेयो लेखकमहोदयानामेव, यैर्लोकमनोरञ्जकैर्लेखैः पाठकमहाभागानां मनांस्यावर्जितानि। तेषु पं० श्रीमदनमोहनझा (मुजफ्फरपुर), वासुदेवशास्त्री बागेवाडीकर, शिवशरण झा (इटारसी), साहित्यविशारद पं० श्रीगणेशरामशर्ममहोदयप्रभृतयः प्रमुखतया उल्लेखनीयाः। अस्तु, किं वा मुखतो निवेदनेन। सेयं भारती ग्राहकमहोदयानां मनोविनोदनाय न किञ्चिदवशेषयेत्। पाठकमहाभागाश्चापि यथापूर्वमस्यामनुग्रहमास्थापयेयुः। पूरयताच्च चराचरनायको भगवान् भारत्या इव अनुग्राहकमहोदयानामप्यखिलान् मनोरथानिति सम्प्रार्थयामहे—

भवनं भव्यभावानां भाजनं भाग्यसंभृतेः।
भेषजं भवभीतीनां भारते भातु भारती॥१॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



शूद्रकः प्रसङ्गवशादुल्लिखितः । संस्कृतप्राकृतवाङ्मये तत्र तत्र शूद्रकस्य भूपालस्य नाम पठ्यतेऽनेकशः । तेन हि शूद्रकः केवलं कल्पनैकगम्यः ।

एवं स्थितेऽपि कोऽयं शूद्रको नाम ? कदा क्व च बभूव । इति जिज्ञासाऽवशिष्यत एव । पुरा पिशलनाम्ना विदुषा प्रतिपादितम् "दण्डी शूद्रकादभिन्न" इति । संप्रति सर्वेषां हेयत्वं गतमप्येतन्मतं प्रा.करमरकरमहाभागैर्विद्वत्प्रवरैरुररीकृतम् । उभयोर्ग्रन्थयोर्विचारमात्रसाम्ये विद्यमानेऽपि मृच्छकटिकगतायां समाजव्यवस्थायां दण्डिनः समयवर्तिन्या समाजव्यवस्थया संवादिन्यामपि प्रबलप्रमाणाभावान्नैतद् विदुषां पुरावृत्तविदां संमतं भवेत् । अन्यच्च काव्यादर्शदशकुमारचरितयोः कर्तुर्मृच्छकटिकस्य निर्माणवेलायां नामान्तरग्रहणस्य किं वा प्रयोजनम् ।

"शूद्रको नाम द्वितीयशतके समुत्पन्न आन्ध्रभृत्यवंशजः सिमुको भूमिपालः" इति वुयिलसनमहोदयस्य मतम् । परं शूद्रकस्य मृच्छकटिकनाटकस्य रचयितुर्वृत्तं समुपलभ्यमानं नानेन युज्यते ।" अभीरराजपुत्रः शिवदत्त एव शूद्रकः" इति स्टेनकोनावमहाभागो मन्यते । किन्त्वन्ये नानुमन्यन्ते । यत् सत्यं शिवदत्तेन तत्पुत्रेणेश्वरसेनेन वा आन्ध्रान् घातयित्वा चेदिवंशः प्रस्थापितः । अस्य राज्यपरिवर्तनस्य साम्यमस्मिन् नाटके प्रतिभाति । तथाप्यत्र पालकार्यकौ न केवलं तर्कगम्यौ । ताभ्यामितिहासगताभ्यां पुरुषाभ्यां भाव्यम् । तथा हि उज्जयिन्या राज्ञः प्रद्योतस्य गोपालपालकनामानौ सुतावास्ताम् । मृच्छकटिके आर्यको गोपालदारक इत्यभिहितः । तेन नाटकगतं राज्याक्रमणं पितृव्यभ्रातृव्ययोर्वैरानुबन्धि स्यात् । इत्येवानुमातुं शक्यते ।

शिवमारस्तस्य पौत्रः श्रीपुरुष एतावुभौ मृच्छकटिकं रचयामासतुः । इति सोलेतीरविदुषोऽभिप्रायः । सप्तत्यधिकषट्शतात् क्रिस्ताब्दादारभ्य पञ्चविंशत्यधिकसप्तशतं क्रिस्ताब्दं यावत् शिवमारो महीं शशास । ततो राज्यविप्लवे श्रीपुरुषो राज्यमधिगतवान् । शूद्रकस्येतिवृत्तं प्रायेण शिवमारस्येतिवृत्तेन युज्यते । इतीदं कर्नाटकस्थशिलोत्कीर्णैर्लेखैः स साधयति । तत्रापि कानिचिच्छङ्कास्थानानि विद्यन्ते । शिवमारस्य नैकानि नामानि । तानि चैतेषु लेखेषूत्कीर्णानि । परं तेषु शूद्रक इति नाम नोपलभ्यते । एतेन कानिचित् काव्यानि निर्मितानि । हस्तिशिक्षापरः कश्चिद्ग्रन्थोऽपि प्रणीतः । इत्येतल्लेखतो विदितं भवति । तत्रास्य नाटकस्य नामैव न दृश्यते । अपरं च मृच्छकटिकं नाटकमिदं द्वाभ्यां प्रणीतमित्येतत् प्रमाणतो न न साध्यते । अपि च केन कियानंशो ग्रथित इत्यपि सिद्धम् । किं च भासकृतं चारुदत्तं नाटकमस्य मृच्छकटिकस्य मूलमिति कल्पनाऽपि सर्वथाऽपास्ता भवति ।

मृच्छकटिकनाटकगतात् तत्तन्निर्देशानुरोधादयं शूद्रको द्वितीयशतकस्यान्ते ख्रिस्ताब्दीयस्य तृतीयशतकस्यारंभे वा समजायतेति वक्तुं शक्यते ।

वामनस्य काव्यालंकारवृत्तौ शूद्रकोऽयं दाक्षिणात्य इति निर्दिष्टं वर्तते । एतस्य मृच्छकटिकस्य रचयिता कविः कर्णाटकदेशीय इति तद्गतवर्णनवशात् प्रतिभाति । तथा हि—"भगवति सह्यवासिनि प्रसीद प्रसीद" । इति चाण्डालः सह्यवासिनीं स्मरति । वस्तुतः उज्जयिनीगता कथा । तदनुरोधादत्र विन्ध्यस्य स्मरणं प्रसङ्गोचितम् । परं न तथा । भक्तस्य भूयो भूयो



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# 'कृपा' राज्ञी (खण्डकाव्यम्)

( कवयिता; न. शठकोपः, विद्याप्रवीणः कुकुलुण्डा, वेल्लुगुण्ठा, गुगञ्जाम [उडीसा] )

(महासेनापतेः सिकन्दरस्य सेनया सह एकस्य स्वल्पराष्ट्रस्य साहसपूर्णसमरस्य सेयमैतिहासिकी कथा कविना आन्ध्रसाप्ताहिक "जागृति"पत्रिकायां प्रकाशितम् एकस्याः पुरातनहिन्दीरचनायाः आन्ध्रानुवादमाधारीकृत्य निबद्धा । ऐतिहासिकं खण्डकाव्यमेतदोजःपूर्णं प्रेरणापदं चेति सप्रमोदं प्रकाशयते पाठकानां प्रीतये । )

!—स० संपादकः

दुहाना सौहार्दं किमपि रमणीयं हृदि सतां
पुनाना तेजोभिः प्रसृमरघनच्छायसदृशैः ।।
वसाना पीतं वस्त्रमपि मणिहारावलियुता
शयाना भोगीन्द्रे भवतु शुभदा मूर्तिरनघा ।। १ ।।

श्रिया जुष्टं दुष्टैरनुपसरणीयं निरुपमं
दयाविष्टं मृष्टं दिविषदृषिवृन्दैरहरहः ।
हृदा स्पृष्टं कष्टापहमतुलभक्त्या जनिमतां
महोऽभीष्टं पुष्णात्वखिलजगतामाद्यमनघम् ।। २ ।।

या सा त्रिवर्गफलदानरता समन्तात्
नानानदीनदविराजितदिव्यहारा ।
शैलस्तनी जलधिनीलसुचेलयुक्ता
विद्योतते जगति भारतभूमिमाता ।। ३ ।।

देवा अपि प्रतिपदं जनिमाप्तुकामाः
यस्यां क्षितावभिलषन्ति हि मानवत्वम् ।
सेयं चकास्ति भरतक्षितिरार्यभावा
क्रुद्धं दहेदपि तृणं यदिह प्रजातम् ।। ४ ।।

---

निर्देशः । चन्दनकस्य कर्नाट-चोल-द्रविडादीनां भाषाणामुक्तिः । कर्नाटकलहस्य प्रयोगः । कुशावती, वेणा, इत्यादि भौगोलिकनिर्देशः । काणेलीसातः, खुण्टमोटक ढक्क्, दुब्ब, पिट्ट इत्यादयः शब्दाः । एवमादीन् समुद्दिश्य यत्सत्यं विचार्यमाणे एतदेव प्रतीतं भवति ।

## मृच्छकटिकस्य समयः

मृच्छकटिकस्य समयबोधः कथं जायत इत्येतत् तावत् तद्गतानां वृत्तविशेषाणां परीक्षणेन पर्यालोचनीयम् । बृहत्कथागतं कथावृत्तमस्मिन् नाटके संकीर्तितमित्यस्य निर्मितिः प्रथमशतकादूर्ध्वं नैव संभवति । तथा च सवृत्तिकाणां काव्यालङ्कारसूत्राणां कर्त्रा वामनेन स्वकृतावुदाहृतत्वान्नेदं नाटकं क्रिस्ताब्दसप्तमशतकादधस्तने काले निर्मितमिति प्रतीयते । अत्र राजाधिकरणे कायस्थ एकः सभ्यो विद्यते । कायस्थो मनुस्मृतौ धर्मसूत्रेषु च नोपलभ्यते । तथापि याज्ञवल्क्यस्मृतौ शब्दोऽयं समुपलभ्यते ।

"चाटतस्करदुर्वृत्तमहासाहसिकादिभिः ।
पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः ।।
या० स्मृ० (३३६ आ० अ०)

एतेन कायस्था ईदृशं संमानं क्रिस्ताब्दस्य द्वितीयशतकात् पूर्वं नालभन्त । अपि च मृच्छकटिकगतानां भूयसां संस्कृतप्राकृतशब्दप्रयोगवर्णनादीनामनुरोधवशादिदं नाटकं क्रिस्ताब्दस्य द्वितीयशतकान्ते ग्रथितमित्यनुमीयते । एवं च शूद्रकनाम्ना कविना भूमिपतिना मृच्छकटिकं नामेदं नाटकं तदानींतने काले निर्मितं नान्येन । एतदपि सिद्धम् ।

अनेन कविप्रवरेण रचितं मृच्छकटिकमग्रिमाङ्के विमृश्येत ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



दाने बलिः, शिबिरभूदसमः कृपायां
सत्ये ❀हरिः, पितृवचःपरिपालने च ।
रामो, निरर्गलगलद्धरिभक्तिभाजां
प्रह्लाद एवमभवन् इह कीर्तिमन्तः ।।५।।

यत्राबला अपि नृशंसबलैश्च पुंभिः
पादाहतोत्थितरजःपटवारिताश्च ।
युध्यन्त आहवतले गतसाध्वसा याः
+पुंसां पुनः कथयितुं किमिहास्ति धैर्यम् ! ।।६।।

ईदृग्विचित्रगुणशालिनि भारतेऽस्मिन्
रम्या विशुद्धसलिला मशकावतीति ।
स्रोतःस्विनी प्रवहति हृतसाध्वसेव
योषित् स्वधर्मपरिपालनबद्धभावा ।।७।।

हस्तापचेयपरिपक्वफलावनम्रैः
कूजन्मनोहरपतत्रिगणैरुपास्यैः ।
नानाविधैस्तरुलतादिभिरास्तृतेऽस्याः
तीरे चकास्ति नगरी मशकाभिधाना ।।८।।

यामश्वकायननृपाः नगरीं वितेनुः
दूरीकृतामरपुरीं किल राजधानीम् ।
अट्टालिकाभिरपि निर्जितचन्द्रिकाभिः
पूर्णं, शिलारचितदुर्गमशन्यभेद्यम् ।।९।।

यत्रत्यदेवनिलयेभ्य उदीर्यमाणाः
घण्टारवाः परिचयं ददतीव चित्ते ।
धर्मस्य, कामबधिरीकृतमानवानां
एत्य श्रुती भवविमोचनदायकस्य ।।१०।।

होमोत्थिता विमलगन्धयुताश्च धूमाः
व्याप्ताः पुनन्ति पुरुषानपवित्रदेहान् ।
स्वर्ग्यं सुखं किमपि हस्तगतं नु कर्तुं
ये ह्यूर्ध्वलोकमभियान्ति जवान्नराणाम् ।।११।।

अभ्रंलिहेषु भवनेषु निवासभाजः
पौरा हि यत्र मणिहाटकनिर्मितेषु ।
स्वर्गं तृणाय कलयन्ति तथाविधेऽस्मिन्
वीराग्रणीर्विलसति स्म कृपेति राज्ञी ।।१२।।

आसीत्तदा दिनमणेरवसानकालः
दुःखाग्नितप्तहृदयेव रराज शोणा ।
पृथ्वी, भविष्यति तमःकुहरे प्रविष्टे-
त्यार्तं रुदन्ति किमु संमिलिता विहङ्गाः ।।१३।।

चकास्ति भवनं पुरे बहुलरत्नचित्रैर्युतं
प्रकोष्ठमपि राजते, मणिवितानिम्ने 'कृपा' ।
प्रजासुखविनाशकान् नरपशून् विदेशागतान्
विजेतुमनुशीलयत्यमितवेगतो मन्त्रिणा ।।१४।।

"मन्त्रिन् ! किमस्ति बहुना पतिता विपत्तिः
जातौ क्षितौ च भरतस्य गवेषय त्वम् ।
मार्गं कमप्यनुपदं नृपशून्निहन्तुं
धर्मं च रक्षितुमिह प्रविभाति यत्ते ।।१५।।

आकर्ण्य वाचममलामबलोदितां तां
आह प्रबुद्धनयनः सचिवः स धीरम् ।
आलोच्य देव्यलमसाम्प्रतमेव सम्प्र-
त्येतद्विहाय सकलं कुरु सैन्यसज्जाम् ।।१६।।

मन्त्रिन् ! सिकन्दर इह प्रविभज्य सैन्यं
यद्वद् रुणद्धि नगरीमभितोऽस्मदीयाम् ।
तस्य प्रतीपकरणे कुरु बुद्धियोगं
अस्मासु दैवहतकस्य न पक्षपातः ।।१७।।

❀ हरिश्चन्द्रः इत्यर्थः । नामैकदेशग्रहणम् । + पुंसां धैर्यं प्रति कथयितुं किमस्ति ? इत्यन्वयः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


सर्वासु शक्तिषु सतीष्वपि जाग्रतीषु
उत्साहशक्तिरहिते पुरुषे न लक्ष्मीः ।
सा ह्यन्नता विलसतीह तृणांकुरेष्व-
प्यस्माकमस्तु न तु वा विधि-पक्षपातः ॥१८॥

यावत् सिकन्दर इतो नहि कान्दिशीकः
कन्दाशनो भजति कन्दरमुज्झितास्त्रः ।
तावद्भवेन्मनसि मे न हि निश्चलत्वं
तस्माद् व्रज त्वरितमेव रणोद्यमाय ॥१९॥

राज्या मुखात् द्य तिविनिर्जित-चन्द्रबिम्बात्
पीयूषनिर्झरमिव श्रु तिपेयवाक्यम् ।
कृत्वा हृदि प्रणुदितु ध्वजिनीं समन्तात्
युद्धाय बुद्धिकुशलः प्रययावमात्यः ॥२०॥

भीता भवेयुरवलोक्य रणं प्रजा इ-
त्याच्छाद्य धूलिनिचयं पदघातजातम् ।
त्रिंशत्सहस्रमभिजग्मुरमोघवीर्याः
रोद्धु सिकन्दरममु नु पदातिवीराः ॥२१॥

सहस्रं घोटकवाहाः जग्मुरखण्डितवैभववीर्याः ।
द्रुधुमजस्रं वारणवाहाः संख्यातीता योधा रिपुभिः ॥२२॥

ढक्कानिनादकरि घोंकृतिगर्जितेभ्यः
विक्षिप्तदीर्घकरवालशतह्रदेभ्यः ।
शौर्योग्रमारुतचलद्ध्वजिनीघनेभ्यः
उत्तानवृष्टिरभवत् क्षतजस्य भूमौ ॥२३॥

संग्रामस्तुमुलः प्रवृत्त उभयोर्घोरो हि तत्सैन्ययोः
शस्त्राशस्त्रि कचाकचि प्रवहिता रक्तस्य दीर्घा सरित् ।
आस्तीर्णं धरणीतलं क्षतहतांगैर्वीरकायैः क्षणात्
झञ्झामारुतभग्नवृक्षनिवहारण्यस्थलीवाभवत् ॥२४॥

...त पृष्ठादश्वस्य गिरेरिव पृथुः शिला ।
...कन्दरः कृपासैन्य-बाणाघातगतस्पृहः ॥२५॥

तं निन्युः सहसागत्य सैनिका रक्षणोद्यताः ।
संग्राममुपसंजह्रुः कृपायोधाः कृपालवः ॥२६॥

रता धर्मयुद्धे गता भारतीया
विहायाहवं वीक्ष्य शत्रु च दीनम् ।
अधर्मैकसक्तास्तदा शत्रुयोधाः
इमं कालमेव ह्यकुर्वन् कृतार्थम् ॥२७॥

सुषुप्तसर्पमारणोद्यतायुधा इवारयः
श्रमापनोदनेच्छया प्रशान्तसङ्गरोद्यमान् ।
हठान्निपत्य भारतीयसैनिकान् विदुद्रुहुः ।
पशुप्रवृत्तयोऽहह प्रणष्टधर्मबुद्धयः ॥२८॥

तस्करा इव सिकन्दरयोधाः संनिपत्य सहसा रुरुधुस्तान् ।
सैनिकान् भरतदेशनिवासान् धर्मयुद्धनिरतानभिवीक्ष्य॥२९॥

क्रमशः


उच्चकक्षायाः, नवीनतायाः, दृढतायाश्च कृते—

**मुरारजी गोकुलदास, स्पीनिंग एण्ड वीविंग कं० लि०**

निर्मितानां वस्त्राणां क्रयः कार्यः

सुपारी बाग रोड परेल बम्बई नं० १२
टेलीफोन नं. ६००२१ टेलीग्रामस 'मोगोको'
(थ्री लाइनस) बम्बई

सर्वाधिकं सन्तोषप्रदं संस्थानम्

विशेषता—
(मिनरल खाकी तथा अन्य ड्रिलस, धोती तथा साडी, गाडलापेट, डोब्बी चाटर लांगक्लाथ, कोंटिंग, शर्टिंग, वायला, मुल्स तथा अन्य फाइन एवं मर्सराइजड वस्त्र)

अभिकर्त्तार : (एजंट्स)—
**पीरामल एण्ड सन्स**
सेलिंग एजेंटस्
पीरामल एण्ड कं० लि०
चन्द्रचोक, मूलजी जेठा मार्केट बम्बई २.
टेलीफोन. ३३५१३.




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# आर्याणामुत्सवसमाजश्च दीपावली च

## उत्सवाः

आर्याणां समाजव्यवस्था भूमौ सर्वतः पुरातनीति सर्वसंमतः सिद्धान्तः, किन्तु सेयं व्यवस्था प्रत्येकयुगानुकूलान् आचार-व्यवहारान्, समयोपयोगीनि सुखसाधनानि च, अद्ययावद्यथावत्संयोजयामास । पाश्चात्यशिक्षया प्रौढिमुपगता वर्तमान-नेतॄणां बुद्धिर्भारतीयरीति-नीतिषु संस्कृतौ चाऽपि संशोधनं कर्तुं प्रगल्भते । किन्तु मर्मतो विचारे कृते शोधनकार्यमिदमतीव दायित्वपूर्णम्, असाधारणबुद्धिसाध्यं च । यतो हि समाजव्यवस्थापकैरार्यैः अग्राऽग्रतो भाविनीं युगानामावश्यकताम्, समाजस्य प्रगतिं च दूरदर्शिन्या मेधया सम्यक् प्रविचार्य समाजव्यवस्था सेयं परिचालिता । ततः समये समये व्यवस्थानामेतासां पूर्वापरं विचार्य, तासु संशोधनमपि प्रावर्तत । अत्र हि स्थूलं सर्वबोध्यं च प्रमाणमिदमेव यद्धर्मव्यवस्थापिकासु स्मृतिषु 'कलिवर्ज्य'प्रकरणमपि पृथङ् निर्दिष्टम् । यस्मिन् हि 'सेयं प्रथा पुराणयुगानुकूलाऽऽसीत्, सेयमस्मिन् युगे नोपयुक्ता, न स्वाभाविकीति, समाजहितकांक्षिभिर्नानुवर्तनीया' इत्यासीत्सूचितम् ।

वर्तमानकालिकाः शिक्षिताः, देशनेतारश्च, अद्य, महताऽभिमानेन घोषयन्ति यत् समाजे यावत् किल उत्सवा नानुष्ठीयन्ते, प्रमोददिनानि न प्रवर्तन्ते तावन् मानवजीवनेऽस्मिन् सुखं मानसिकोल्लासो वा नाऽऽविर्भवेत् । यदि सुखस्य प्रमोदस्य च न संगमस्तर्हि जीवनस्याऽपि न स्थिरता । किन्तु आर्याणां समाजव्यवस्था यैः किल मार्मिकैस्तत्त्वतो विचारिता ते हि सम्यक्परिजानन्ति यत्प्राचीनैरार्यैरेव मनुष्यजीवनस्य तदिदं तत्त्वं सम्यगभिज्ञातम्, निजसमाजे प्रवर्तितं च । अशिक्षितेषु ग्राम्येष्वपि हिन्दुसमाजस्य सेयं विशेषता प्रख्याता यत् 'अष्ट' वारा नवोत्सवाः ।[1] भारतीयानां समाजे द्वादशमासेषु ईदृशा बहवो मासाः सन्ति येषां त्रिंशद्दिनेषु न्यूनान्न्यूनाः दश पञ्चदश वा उत्सवाः सोत्साहं संमान्यन्ते । सोयं कार्तिकमासस्तादृशेष्वेव मासेषु प्रमुखः । अस्मिन् हि 'करक चतुर्थीम्' आरभ्य पूर्णिमापर्यन्तं बहव उत्सवाः, पुण्यपर्वाणि च समागच्छन्ति । बहुषु प्रान्तेषु कृष्णपक्षस्याऽष्टमीम् ('होई अष्टमी') आरभ्य अमावास्यां (दीपावली) यावत्, ततः शुक्लपक्षेऽपि 'भ्रातृद्वितीयाम्' यावत् निरन्तरं त एवोत्सवाः संभवन्ति यान्हि सर्वेऽपि भारतीयाः जातिनिर्विशेषं संमानयन्ति । एतदनन्तरं धार्मिकभित्तौ स्थिरीकृता 'गोपाष्टमी' 'देवप्रबोधिनी' प्रभृतयः तीर्थस्नानपूर्णिमापर्यन्ताः पुण्यदिवसाः संमिलन्ति । गवेषणादृष्ट्या यदि भवन्तो वीक्षेरन् तर्हि सोयं विशेषो भारतीयसमाजे एव संप्राप्येत । अस्मिन् दिने संपूर्णेऽपि मानवसमाजे सभ्यतायाः, सुखप्राप्तेश्चोपदेशकतागर्वं वहन्तः पश्चिमप्रदेशा अपि यथावत्परीक्ष्यन्तां श्रीमद्भिर्यत्तेऽपि उत्सवादीनां विषये भारतस्याऽस्य चरणसीमानमपि स्पृशन्ति न वा इति ।

## उत्सवैरेकता

बहवो महोदयाः सामाजिकेष्वमीषूत्सवेष्वपि छेदनभेदनं विधाय तदिदं साधयितुं प्रयतन्ते यद्वर्णाश्रमव्यवस्थायाः संबन्धो भारतीयेषूत्सवेष्वप्यासीत् । यथा —

१—'आठ बार नौ त्योंहार'



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



रक्षाबन्धनोत्सवो ब्राह्मणानाम्, यत्र हि ते 'श्रावणीम्' (उपाकर्म) विधाय अन्यवर्णानामपि रक्षानिमित्तं (रक्षासूत्रं) बध्नन्ति स्म। 'दशहरा' क्षत्रियाणाम्, यत्र हि शत्रुविजयाय मङ्गलप्रस्थानं कृत्वा ते देशस्य रक्षाम् कुर्वन्। 'दीपावली' वैश्यानामुत्सवः, यस्मिन् हि कृषि-वाणिज्यादिद्वारा लक्ष्मीं समुपार्ज्य ते तस्याः पूजनादिकं कुर्वन्ति। एवमेव 'होलिका' शूद्राणां महोत्सवो यत्र हि ते धूलि-कर्दमादिकमपि प्रक्षिप्य निजमानसोल्लासं प्रकाशयन्ति स्म।

अनेन 'वर्गीकरणेन' ते निजगवेषणापाटवमवश्यं प्रकटयितुं शक्नुवन्ति, किन्तु कतिपयमहाभागानां वर्णव्यवस्थाया उपरि तदिदं दोषस्थापनं नूनं विफलप्रयास एव भवेद् यत् वर्णव्यवस्थयाऽनया समाजे मिथो भेद-भावस्यैव प्रचारो जात इति। हन्त सोऽयं तेषां स्पष्टो भ्रमः, एकान्ततो विपरीता संकथा। एभिरुत्सवैरेव देशेऽस्मिन् संपूर्णस्यापि मानवसमाजस्यैकता स्थिरीकृता, अग्रे स्थिरीकरिष्यते च। दोषदर्शिनस्ते महाभागा एव प्रष्टव्याः—'रक्षाबन्धनम्' यद्धि भवता केवलं ब्राह्मणानामेव महोत्सवः साधयितुमिष्यते, सामाजिकभेदभावस्याऽऽवरणं च तत्र प्रच्छादयितुमिष्यते, तस्मिन्दिने किं क्षत्रिय-वैश्यादीनां समाजे सुमहोत्सवो न भवति? भवन्त एव पश्यन्तु-सर्वेषामपि वर्णानां गृहे गृहे भगिन्यः पुत्रिकाश्च भ्रातृ-भ्रातृजादीनां करे 'रक्षां' बध्नन्ति। प्रत्येकमनुष्यस्य प्रकोष्ठे नानावर्णाः स्वर्ण-रजतादिचमत्कृतिशालिन्यो 'रक्षिकाः' प्रकामं शोभन्ते। सामन्तानाम्, पदाधिकारिणां, श्रेष्ठिनामेव गृहे किम्, यः समाजो यावान् धनसंपन्नोऽस्ति तस्मिन् तावतैवोत्साहेन सोयमुत्सवः संमान्यते, शोभितश्च भवति। पुनश्चतुर्थवर्णः पटुकानां ['पटुवा' ये रक्षिकाः निर्मान्ति] समाजस्तु तावन्तमुत्सवं संमानयति यद् रक्षाबन्धनस्य द्वितीयदिने (भाद्रकृष्ण प्रतिपदि) 'गालवाश्रमे' 'पटुकानां मेलको' भवति, यस्मिन् तज्जातीयाः सर्वेऽपि स्त्रीपुरुषास्तस्मिन्दिने स्वतन्त्रतापूर्वकं भोजनादिगोष्ठीं कुर्वन्ति। ततः सेयं 'रक्षा' केवलं ब्राह्मणानामेव महोत्सव इति कथं साध्यते नूनम्?

अवश्यमिदं साधयितुं शक्यं यत रक्षाबन्धने ब्राह्मणानां प्रधानता, दशहरादिने क्षत्रियाणां प्राधान्यम्, दीपावल्यां वैश्यानां विशेषोत्सवो, यतो हि दीपावल्यां 'लक्ष्मीपूजा'याः समारोहः। लक्ष्म्याश्चोपार्जनं व्यापारादिद्वारा प्रधानतया वैश्यसमाजेन सह संबद्धम्। किन्तु किं ब्राह्मण-क्षत्रियाणां गृहे तस्मिन्दिने उत्सवो न भवति? स्पष्टमहं पश्यामि यद् ब्राह्मणानां राजन्यानां च भवनेषु वैश्यानामपेक्षयाऽपि तद्दिने महानुत्सवो भवति, पुरा चाऽभवत्। पुनः स्वचक्षुर्भ्यां दृष्टमेवा वेदयामि। यदा हि 'राजस्थाने'स्मिन् राजस्थाननाम्ना 'कांग्रेस' प्रबन्धो नाऽभवत्तदा जयपुरेऽस्मिन् दीपावलीदिवसे राजभवनेषु स महान् उत्सवोऽभवत् यस्मिन् हि 'मेलकस्य' विवाहस्याऽपि चापेया महामहान् समारोहः समभवत्। सर्वेष्वपि राज-भवनेषु गृहभित्तिषु कुड्येषु नवीनतया राग(रङ्ग)समायोजनम्, सर्वत्र चाऽपि महामूल्यैरास्तरणैर्भूमिस्तरणम्। सायंसमये काचनिर्मितेषु नानाकारेषु पुष्पपात्रेषु सर्वतोऽपि दीपप्रद्योतः प्रकृष्टामेव शोभां वर्द्धयामास। काचमणिमण्डितेषु दीपाधारेषु तादृशी रुचिरा रुचिरासीद् यामालोक्य जयपुरराजहर्म्यमिदं साक्षादिन्द्रभवनमिव प्रतीयते स्म।

दीपोद्द्योतसमये राजसभायाः (दरबार) समारोहोऽभवत् यस्मिन् सर्वे सामन्ताः, प्रजाप्रमुखाश्च महा-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


राजाय नानाविधान्युपायनानि समाहरन्। ततः सर्वेष्वपि राजकीयेषु प्रबन्धविभागेषु, कार्यालयेषु च ससमारोहं लक्ष्मीपूजाऽभवत्। दीपावलीदिवसे राजभवनस्य शोभावर्णनपरमेकं 'घनाक्षरी'पद्यमेव सेवायामावेदयामि—

काचमणिमञ्जुलसुदर्शदीपशाखिचयै-
विजितदिनेशविभा भूरि सभा भासते.
सजलजलदभासिवसनविभासिनोऽमी
सामन्ताः समन्तादिह मोदोन्मदमासते।
मञ्जुनाथ राजोचिततेजसा महेन्द्रसमो
मध्ये जयनगरनरेशोऽयं प्रकाशते
राजन्ते महीपा बत दीपावलीवैभवेन
मानमेदिनीपादद्य दीपावली राजते॥

इदानीं विचार्यतां श्रीमद्भिरेव, यत्सोयमुत्सवः केवलं वैश्यानामेव कथंकारं सिध्येत्?

अन्यस्थानानां कथा कर्णाकर्णिकया श्रुता परिगण्येत, किन्तु जयपुरनगरेऽस्मिन् चत्वारिंशत्पञ्चाशद्वर्षेभ्यः पूर्वं 'होलिका'महोत्सवः सोयं तादृशेन समारोहेण संमान्यते स्म यत्सर्वेष्वपि महोत्सवेषु सोयमेवोत्सवः प्रधानतया प्रतीयते स्म। संपूर्णं फाल्गुनमासं यावत् रसिकसमाजे फाल्गुनमण्डलानाम् 'घेर' अधिवेशनान्यभूवन् येषु सायं सर्वेषामपि रसिकानामागमनम्, वीनोदगीतयः, वर्णचूर्णेन[1] परस्परं वसन्तक्रीडनादिकमभवत्। अस्मिन्नुत्सवेऽपि प्रायः सर्वेषामेव वर्णानामेकत्र समावेशः प्रणय-विनोदादिकमलक्ष्यत, साम्प्रतमपि लक्ष्यते च। माहम्मदजातीयास्तु 'रङ्ग-विनोद'शृङ्गारगीतीनां धार्मिकभावेन 'परिहेय'[2] तां पालयन्ति। श्रूयते-यदि कस्यचिन्माहम्मदस्य वस्त्रे रङ्गजलस्य बिन्दुरपि निपतेत्तर्हि सः 'तौबा, तौबा,' इति चीत्कुर्वन् कलहाय समुद्यतो भवेत्। किन्तु जयपुरे अधिकांशाः 'कलावन्तो[3]' माहम्मदगायकास्तादृशा आसन् ये हि समग्रमपि फाल्गुनं मासं होलिकागीतीरतिविनोदेन गायन्तिस्म। होलिकागीतिगोष्ठीषु सहर्षं संमिलन्तिस्म, वर्णचूर्णेन परस्परं वसन्तक्रीडां विदधतिस्म।

क्षमामभ्यर्थ्य कञ्चिज्जयपुरीयं वृत्तान्तं स्मारयामि। मन्ये ३०, ४० वर्षेभ्यः पूर्वम्, यस्मिन्समये जयपुरराज्ये नवाबफैयाजअली खांमहोदयस्य मन्त्रित्वमासीत्। तेनैव महाभागेन होलिकोपरि तादृशः शृङ्गारपूर्णः कविप्रतिभाकल्प्यः पूर्णशोभामयश्च महोत्सवः प्रवर्तितोऽभूत्, यस्मिन् नगरशोभार्थं भारते सुप्रसिद्धस्य जयपुरस्यास्य मध्यचतुष्पटिकायाम् (सांगानेरी चौपड़) कौसुम्भरङ्गस्य, वर्णचूर्णस्य, रङ्गक्षेपकयन्त्रा (पिचकारी) दीनां च प्रशस्तः प्रबन्धः कृतोऽभूद्. येन हि नगरस्य प्रमुखा वेश्याः [गुणिजनकार्यालयाद्वृतिभोगिन्यः] परस्परं रङ्गक्रीडां विदध्युः, फाल्गुनगीतीश्च गायेयुः। नेदं विस्मरणीयम्—जयपुरे अधिकांशा वेश्या मुसल्मानमतभुक्ता आसन्। किन्तु ताः सर्वा अपि महोत्सवेऽस्मिन् निर्विरोधं प्रसन्नतया सममिलन्। वासन्तिकक्रीडां चेमां स्वर्गीयाऽप्सरसामिव केलिं कल्पयन्ति स्म। हन्त खेदः! सेयं क्रीडा कतिचिद्वर्षाण्येव प्राचलत्, अग्रे वारवधूप्रसङ्गस्योच्छृङ्खलत्वात्सेयं क्रीडा न्यरुध्यत राज्येनैव। इदानीमुच्यताम्--यत्र धार्मिकक्रूरतायां विश्वप्रसिद्धा मोहम्मदा अपि आर्याणामेषां प्रमोदोत्सवे संमिलन्ति स्म—अस्माकमिममुत्सवं निजो-

१—गुलाल। २—परहेज। ३—कलावँत।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सवतोऽप्यधिकेनोत्साहेन प्रमोदेन च संमानयन्ति स्म, त्र भवन्त उत्सवेष्वमीषु भेद-भावस्यावरणमाच्छादयितुमिच्छन्ति ?

आर्याणाममीषां समाजव्यवस्थैव तादृशी यस्यां भेदभावस्य स्पर्शोऽपि नास्ति। अन्यसंप्रदायं प्रति द्वेषस्य विद्रोहस्य वा कथैव नास्ति। प्रत्युत स्वस्वधर्मानुष्ठानस्याऽऽदेशः स्वमुखेनैव दीयते। सामाजिकोत्सवाः समाजे तत एव प्रवृत्ता येषु सर्वेऽपि सप्रमोदं मिथः सङ्गच्छेरन्, पारस्परिकप्रणयं च वर्द्धयेरन्। यत्र हि ग्राम-निवासात्, धार्मिकभावाच्च शतक्रोशान् दूरे नित्रस्ताः, प्रत्युत अन्यधर्मिणो जनान् खड्गधारायां हिंसया वाहयन्तः क्रूरा म्लेच्छा अपि येष्वस्माकमुत्सवेषु हृद्योत्साहेन संगच्छन्ते स्म, तत्र मिथो विद्रोहस्य का कथा ? यान् चाण्डालादीन् 'अस्पृश्य, अछूत' इति व्यपदिश्य "नवशिक्षिताः" निजसमाजे तानुत्तेजयन्ति, अथवा निजहस्तेनैव ते निजदेशे निजसमाजे च विद्रोहस्य वह्निं परितः प्रक्षिपन्ति, ते अन्तेऽवसायिनः शूद्रा अपि होलिकाद्वितीयदिने संमिलन्ति। ततः कथं वा आर्याणां वर्णव्यवस्थायां विद्रोहस्य विद्वेषस्य वा बीजं कल्पयन्ति भवन्तः ? अस्तु, प्रसङ्गवशादार्याणामुत्सवानामेषाम् 'अखिलभारतीयता' साधनाय बहु किल निवेदितवानस्मि। वास्तवे उत्सवास्त एव प्रोच्यन्ते येषु कीयं प्रति अप्रसन्नतायाः, मात्सर्यस्य वा स्मरणमपि न भवति।

## दीपावली

सर्वदा स्मरणीयमिदं यत्—भारतमिदं संस्कृतिमानो देशः। मानवसमाजाय सर्वतः प्रथमं सभ्यतायाः संस्कृतेश्च मार्गदर्शकः सोयमेव भूप्रदेशः। एतत् किल न केवलं वयमेव, अपि तु सप्तसमुद्रपारवासिनः पाश्चात्या विद्वांसोऽपि संमन्यन्ते यत् आर्याणां वैदिकी सभ्यता सर्वतः पुरातनीति। आर्याणां प्रत्येकपर्वाणि, उत्सवाश्च कंचिद् विशेषमेवाऽऽदाय प्रवृत्ताः। एतस्या दीपावल्या विषयेऽपि बहूनि सन्ति मतानि। यद्यपि सोयमुत्सवो यस्मिन् रूपे वर्तमानकाले संमान्यते तथा पुरा नासीदस्य रूपम्, किन्तु उत्सवस्याऽस्य मूलमतिप्राचीनकालादारभ्यते। ख्रिष्टसंवत्सरारम्भात् ५०० वर्षेभ्यः पूर्वमपि महोत्सवस्याऽस्य प्रमाणमुपलभ्यते। 'वात्स्यायन-कामसूत्रे' 'यक्षरात्रि' नामकस्योत्सवस्योल्लेखो विद्यते यस्मिन् रात्रौ द्यूतस्य जागरणस्य च विधानमस्ति। सेयं 'यक्षरात्रिः' कार्तिकशुक्लप्रतिपदि, यस्मिन् हि दिने संप्रति 'अन्नकूटम्' भवति, संमान्यते स्म। हेमचन्द्रसूरेः (जैनस्य) 'देशीनाममालायाम्, पुरुषोत्तमदेवस्य 'त्रिकाण्डशेषे' तथा इतोऽपि पुरातने [सप्तमशताब्दीभवे] श्रीहर्षकृत'नागानन्द' नाटकेऽपि महोत्सवस्याऽस्य सूचना समुपलभ्यते, किन्तु पुरा 'यक्षरात्रि' नाम्नैव महोत्सवस्यास्य प्रसिद्धिरासीत्।

अन्वेषणदृष्ट्या समालोचनेन सम्यगुपलभ्यते, यद्—देशानां भेदेन उत्सवस्याऽस्य स्वरूपं पृथक् पृथक् समवाप्यते। मध्यभारते, गुर्जरेषु, राजस्थानादिप्रदेशेषु चास्य स्वरूपं धन-पूजया व्यापारादिभिश्च संबद्धमवाप्यते। व्यापारिणाम् 'आय-व्ययपञ्जिकाः' (वही, खाते') अस्मादेव दिवसात्प्रारभ्यन्ते। भगवत्या महालक्ष्म्याश्चापि पूजा महता समारोहेण भवति। अयोध्याप्रान्ते—लङ्कां विजित्य निजराज्यमुपगतस्य भगवतः श्रीरामचन्द्रस्य स्वागतोत्सवसूचकोऽयं महोत्सवः।

दक्षिणभारते बलिपूजायाः स्मारकोऽयम् [ भगवता श्रीविष्णुना दैत्यराजस्य बलेरधिकारे प्रगतस्य स्वर्गस्य,



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भूमण्डलस्य च पुनः समवाप्तये दैत्यराजस्य बलेः सकाशात् त्रिपादपरिमिता भूमिर्याचिता। यत्र एकेन पदेन पृथिवी द्वितीयेनान्तरिक्षमधिगतम्। अव-शिष्टस्य तृतीयस्य कृते दानवीरः श्रीमान् दैत्य-राजः स्वयमात्मनो मस्तकमग्रे कृतवान्। परिणामे बलिः पातालमगात्। किन्तु एकस्मिन्दिने भूमौ समा-गत्य निजस्य प्राचीनवैभवमवालोकयितुमवाप्यत तस्मिन्नेव समये वरः। तदेव तदिदं 'बलि-पूजायाः' दिनम् ]। एतस्मात्प्रथमदिनं 'नरकचतुर्दशी'। यस्मि-न्दिने नरकासुरस्य संहारं कृत्वा भगवता त्रैलोक्यमिदं महासंकटात्सुरक्षितम्। जैनानां संवत्सरस्यापि शुभा-रम्भो दीपावलीमारभ्यैव भवति, यतो हि भगवतो महा-वीरस्य सोऽयमेव निर्वाणदिवसः।

संप्रति संपूर्णस्याऽपि राष्ट्रस्य दृष्ट्या विचारणीयं भवेत्। अस्माकमिदं भारतवर्षं कृषिप्रधानो देशः। वर्षासु कृषि-द्वारा अपारधान्यसंपत्तिरत्रैव देशे सम-भवत्। प्रत्युत 'अकृष्टपच्यम्'[1] धान्यमत्रैव सर्वतः समभूत्। वर्षाऽनन्तरम्, शरदृतौ भारतीयाः कृषीवलाः सर्वं धान्यराशिं समाहृत्य, गृहे वास्तविकं धनं समानीय, सत्यां लक्ष्मीपूजां कुर्वन्ति स्म। संपूर्णवत्सरं यावत्प्रति-दिनव्यवहरणेन मलिनीभूतं गृहं सर्वतः संमार्ज्य, त्रुटिं दूरीकृत्य, सुधया संलिप्य, दिव्यं कुर्वन्ति स्म। असंख्यै-र्दीपकैर्निजभवनं निजप्रतिवेषं च सर्वतः प्रद्योतयन्ति स्म, अन्धकारमपसारयन्ति स्म। दीपकैर्यथा बाह्यं तमो निरस्यते स्म तथा कृषिसमुत्थं धान्यं गृहमानीय, दारि-द्र्यरूपमन्धकारं विनिरस्य, हार्दिकेन प्रमोदेन हृदयस्य दुःखान्धकारमपि दूरीक्रियते स्म।

द्वितीयदिनस्य 'गोपूजा'ऽपि तस्या एव अङ्गम्। यस्या गोमातुः प्रशस्यां संततिं कृषिकार्ये संयोज्य सेयं धान्यसंपत्तिः, सत्या सेयं लक्ष्मीरधिगता, कृतज्ञतया धार्मिकदृष्ट्या च तस्या एव गोमातुः सेयं वरिवस्या[2] संपाद्यते। वृक्षैश्छायां संपाद्य पुष्कलानि हरितहरितानि तृणानि भोजयित्वा स्थाने स्थाने मिष्टसलिलस्य निर्झ-रान् प्रवाह्य येन गोधनस्य रक्षा कृता, तस्याऽभीष्टा संवृद्धिरापादिता, विशालस्य तस्य गोवर्द्धनगिरेः पूजनमपि तस्या एव अङ्गम्। तस्य संमुखे तत्स्वरूपो-चितस्य अन्नराशेः स्थापनमपि तस्या एव दीपावल्या अङ्गम्। आयोचितायाः कृतज्ञतायाः स्मारकम्, सत्याया लक्ष्मीपूजायाः परिकरः।

अस्ति गवेषणा अन्वेषकाणां---यत् प्राचीनार्या उत्तरध्रुवप्रदेशादस्मिन् भारते समुपगताः। ध्रुवप्रान्त-स्तु अतिशयशीतोऽभूत्। तुलासंक्रान्तेरनन्तरमन्धकार-स्यैव तत्रासीत्साम्राज्यम्। अतएव तस्मिन्प्रदेशे अग्नेरु-पासना दिनचर्याया अनिवार्यमेकमङ्गमासीत्। अनेन हि साधनेन ते शीतात्सुरक्षिता भूत्वा प्रकाशमपि पूर्ण-रूपेण समवाप्नुवन्। आर्याः शनैः शनैरुत्तरप्रदेशाद-स्मिन् प्रान्ते समागच्छन्, किन्तु समाजे प्रचलिता कार्यपरम्परा न तान् पर्यमुञ्चत्। वर्तमानकाले प्रचलिता दीपावली सेयं तस्यैव उत्तरप्रदेशीयजीवनस्य स्मारक-मेकं प्रतीकम्। प्रारम्भिकी सेयमग्नेरुपासना यज्ञेषु अग्निहोत्रादिहोमेषु च समभवत्, यस्यां हि 'गोपूजा' एकमनिवार्यमङ्गमासीत्।

ततः शनैः शनैरुत्तरप्रदेशाद्यथा यथा दक्षिण-प्रान्तं प्रति आर्याः प्रासरन् तथा तथा भौतिकीभिराव-

१—हलादिना कर्षणं विनैव केवलं बीजप्रक्षेपेण। २—पूजा।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



...ता भिर्धान्योत्पादनार्थमपि ते बाध्या अक्रियन्त। ...एव कृषिजन्य-लक्ष्मी (धान्य)पूजा, तत्सहकारिणी ...पूजा'पि च समपदन्यासमग्रे प्राचलत्। ...अन्वेषकाणामद्यत्वे महोन्नतमासनम्। ते हि ईषत् ...गदिन्या हेतुरूप-भित्तेरुपरि महोन्नतं भवनं निर्मान्ति। ...र्यगणा 'मध्य-एशियातः' प्रस्थाय शनैर्भारते प्रावि-...त" गवेषणा पश्चिमदेशादुत्थिता। अस्माकं नवीन-...ितानां मस्तिष्के तथा दृढतया च सेयं स्थिरीभूताऽ-...दू यथा वेद-स्मृत्यादीनां प्रमाणैः सुभृशं साधनेऽपि ...ात्य-गुरूणामसौ शिक्षा-मन्त्रो न कथञ्चित् शिथिली-...ति। आम्, सम्प्रति आङ्गलभाषाशिक्षितैरेव तदिदम-...ष्टं यत्–"भारतीया आर्या भारतस्यैव आदिनिवा-...ोऽभूवन्, न कुतश्चिद् बाह्यात्स्थानादागताः[1]।"

...एवमेव वैज्ञानिकानामियमप्यस्ति गवेषणा यदस्य ...पावली'महोत्सवस्य महत्त्वं वैज्ञानिकम्। विज्ञानस्य ...ढं तत्त्वं बहोः कालस्य व्यतिक्रमणेन जनसमाजस्य ...द्वतो लुप्तमभूत्। स्थूले स्वरूपे केवलं दृष्टिर्निबद्धा। ...कासुरसंग्रामः' न काचिद्दिव्या घटना। सोयं दरि-...या धनिकतायाश्च मिथः संघर्षः। यस्याऽवसानं ...त-धान्योत्पत्त्या स्वाभाविकरूपेण भवति। धान्यो-...: सोयं श्रीकृष्णः, येन हि दारिद्र्यरूपस्य नरकस्य ...रः प्रसह्य व्यधायि। इयं दरिद्रता यदि नरकस्य ...णां कारयति तर्हि दीपावल्याः सोयमुत्सवो दरिद्र-...ा तस्या उपरि विजयस्य स्मारकः। एवमेव बहवो ...दयाः कथयन्ति यत् 'बलिपूजा' अथवा 'बलेर्निग्रह-...' सेयं महतस्त्यागस्य किं वा धार्मिक-मर्यादायाः ...लमुच्चतमा स्मृतिः। एवं वा व्यपदिश्यतां यत्— ...म् अद्यतनस्य 'भूदानयज्ञस्य' आद्यतमा पृष्ठभूमिः।

अस्तु वा यत्किञ्चित्। दीपावलीमहोत्सवः सोयमतिप्राचीनो नितरां मौलिकश्च। यत्र हि प्राक्तनानामार्याणां प्राच्यसभ्यतायाः प्रस्फुटः प्रकाशः प्रकटमेव प्रतीयते। अतएव हि अतिचिरन्तनतायाः कारणादस्य स्वरूपं समये समये नानापरिवर्तनं प्राप। यस्मिन् प्रदेशे आर्याणाममीषां गमनमभूत् तस्य तस्यैव जलवाय्वोः, तदनुगामिनीनामावश्यकतानां चाऽनुसारेण उत्सवेऽस्मिन्ननेकविधानां कार्याणां संमिश्रणमपि मन्ये अनिवार्यमेव। मार्मिकविचारशीलाः स्वत एव स्वाभाविकमिमं विषयं तत्त्वतः परिजानते, नैतदर्थं विस्तारस्याऽऽवश्यकता। भव्यमिदं भारतं भूरि-भूरि वैभवैर्भृशं भरयन् भगवान् भविष्यत्यपि भारतभूमेर्भद्रभावनेन भ्रमं भजेदिति भूतभावनाद् भगवतोऽभ्यर्थना। भव्यम्....


श्रीनिवास फैब्रिक्स

उच्चकक्षायाः कृते अद्वितीयसंस्थानम्,

सूक्ष्मतन्तुसन्तानः

तथा अतिशोभनानां रङ्गाणां विविधताः

निर्यातस्य कृते पत्रव्यवहारः कार्यः—

दूरभाषः (फोन)-६००४५–६१८३४

दी श्रीनिवास काटन मिल्स लि०

डिलाइसल रोड लोअर परेल बम्बई १३.

मुख्यकार्यालयः (हैड आफिस)—

'श्रीनिवास हाउस'

वाडबी रोड, फोर्ट बम्बई १.

दूरभाषः (टेलीफोन) नं० २६२३६४ (५ लाइन्स) टेलीग्रामस श्रीनिवास बम्बई

मैनेजिंग एजेंटस

दी मारवाड टैक्सटाइल (एजेंसी) प्राइवेट लि०

'श्रीनिवास हाउस' वाडबी रोड फोर्ट बम्बई


१. 'भारतवैभव' नामनि मल्लिखिते नवीननिबन्धे सोयं विषयो विस्तरेणाऽऽलोचितः। रसिकैस्तत एव द्रष्टुं शक्यः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# मौनाह्वानम्

[ कविरत्न मधुकरशास्त्री साहित्याचार्यः, साहित्यरत्नम्, प्रधानाचार्यः राजकीय-संस्कृतविद्यालयः भरतपुरम् ]

★ [ 'अरुणरश्मयः' इत्याख्यमदीयप्रकाशितरचनातः । गीतिरियं 'मन डोले मेरा तन डोले' इत्यादि रागेण गीयते ]

नहि जानेऽहं नहि जाने संह्वयते गगनगवाक्षतो मां कोऽयं मौनं संस्मयन् ?
विशद-विशदविधुविभाविमुग्धो विश्वो विस्मयशाली,
वितरति लोचनपद्मसु रागं स्वप्नो मधुरिमशाली,
मनोज्ञः स्वप्नो मधुरिमशाली,
अज्ञातो भृशमज्ञातो मां ह्वयते तारकमण्डले ननु कोऽयं मौनं संस्मयन् ?
नहि जाने..........

सजलजलदनीलः परिगर्जति तमोभीम आकाशः,
अविरतवर्षणपुरस्सरो दीर्घश्च पवन-निःश्वासः,
अरे ! दीर्घश्च पवननिःश्वासः,
नहि जानेऽहं तु न जाने सेङ्गितमुद्दीप्य तु को ह्वयति मां विद्युतिं मौनं संस्मयन् ?
नहि जाने.........

सरस-सरस तरुणिमनि रसायाः परिविहरति मधुमासे,
व्याकुलहृदयोद्गारसदृशकुसुमस्फोटे सोच्छ्वासे,
अहा, कुसुमस्फोटे सोच्छ्वासे,
नवरसतः सौरभमिषतः सन्देशं कः प्रहिणोति मयि निर्व्याजं मौनं संस्मयन् ?
नहि जाने..........

विपुल-विपुल-कृति-जालव्यालादहं दिनान्ते मुक्ता,
विरसविरसशय्यायां विकला शये ग्लानिसंयुक्ता,
यदाऽहं शये ग्लानिसंयुक्ता,
उपयातो द्रुतमुपयातो मां स्वर्णिललोके भ्रामयति स्वप्ने को मौनं संस्मयन् ?
नहि जाने.........

अरुणकिरणपरिवरणलसत्स्वच्छन्दामन्दाऽऽनन्दे,
अलिकुलविलसितनवलकमलदलसुललितलतिकावृन्दे,
कमलदलसुललितलतिकावृन्दे,
अनुरागं ह्यभिनवरागं विविधं वितरति चतुरेश्वरो रे ! कोऽयं मौनं संस्मयन् ?
नहि जाने.........

विहतनिहितबोधां मां बुध्वा ज्योतिर्मय ! नो जाने !
अपरिचितं वर्त्मैव दर्शयसि कथं गते मज्ज्ञाने,
प्रियतम ! कथं गते मज्ज्ञाने ?
सुखदुःखे मम सुखदुःखे वरसहचरमेकं त्वां न जाने कस्त्वं मौनं संस्मयन् ?
नहि जानेऽहं नहि जाने संह्वयते गगन-गवाक्षतो मां कोऽयं मौनं संस्मयन् ?



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


## सम्पादकीयम्—

'अखिलभारतीयशिक्षासंमेलनस्य' एकत्रिंशसमधिवेशनम्—अक्टूबरमासस्य २३ तारिकायां एकादशवादने 'महारानीकालेजस्य' नवनिर्मिते सभाभवने शीर्षे सूचितस्य शिक्षासंमेलनस्याधिवेशनमभूत्। यस्योद्घाटनसमारोहो राजस्थानस्य मुख्यमन्त्रिश्रीमोहनलालसुखाडियामहोदयद्वारा समभूत्। संमेलनस्याध्यक्षः संस्त्सदस्यः आचार्यश्रीमन्नारायणमहाभागः आसीत्। प्रारम्भे स्वागतभाषणं राजस्थानस्य गृहमन्त्रिणा स्वागताध्यक्षेण श्रीरामकिशोरव्यासमहोदयेनाऽकारि। अध्यक्षपदाद् भाषणं कुर्वता श्रीमन्नारायणमहाभागेन समुदीरितम्—"सत्यां शिक्षां विना वास्तविकी राजनीतिर्न प्रचलति। वर्तमानं जगत् अधिकांशेषु राजनैतिकविचारधाराणां परस्पराकर्षणे निबद्धम्। वर्तमानकाले मुख्यतो द्वे विचारधारे राजनैतिकेषु प्रचलिते। एका व्यक्तिस्वातन्त्र्यसंबन्धिनी अपरा समाजस्य स्वातन्त्र्यवादिनी। किन्तु वयं भारते एवंविधां समाजरचनां कर्तुं वाञ्छामो यस्यां व्यक्तेः समाजस्य चैवं समन्वयो भवेद् यत्र द्वयोरपि विकासस्य पूर्णतयाऽवसरः प्राप्येत।" महाभागेनाऽनेन 'बुनियादी' शिक्षायाः भूरितमं समर्थनमकारि।

अवसरेऽस्मिन् शिक्षाप्रदर्शन्या अपि समारोहः समभूद् यस्या उद्घाटनं महाराज्ञ्याः श्रीगायत्रीदेव्याः करकमलेनाऽभूत्। संमेलनेऽस्मिन् बहुभिः संस्कृतशिक्षाशास्त्रिभिरपि संभूय "भारते संस्कृतविश्वविद्यालयानामावश्यकता" विषये भूयान् विचारविमर्शोऽपि कृतः। अध्यक्षमहोदयेन एको महत्त्वपूर्णो विषयः सर्वेभ्योऽपि सूचितो यस्योपरि सर्वैरपि देशकार्यकर्तृभिरवधानं दातव्यं स्यात्। महाभागेनानेन समर्थितं "यत् वर्तमानकाले सर्वैरप्यस्माभिः सर्वापि शक्तिरेतद्विषयोपरि समायोजनीया यत् अस्मद्देशस्य शिक्षाप्रणाली वास्तवरूपे भारतीया संपद्येत। एतावत्कालपर्यन्तमस्माकं शिक्षासंस्थानामियमरुन्तुदा आलोचना प्रवृत्ता—"यत् तासां स्वरूपमद्यापि भारतीयं नास्ति। तासां वातावरणमस्मिन् कालेऽपि प्राचीनसंस्कृतेः प्राचीनपरम्पराणां च कृते वैदेशिकमेवास्ति।" किन्तु एतस्य सर्वस्य नेदं प्रयोजनं यत् वयं संकुचितायै राष्ट्रीयतायै प्रश्रयं दद्मः। न च सोयमर्थो यद् वयं विद्यार्थिनां हृदये अहंमन्यतायाः निस्सारां भावनां जागरयितुमिच्छामः। सत्यं त्विदमस्ति यदस्माभिः सुसूक्ष्ममालोचनीयं यत् प्रत्येकदेशस्य आत्मा स्वीयः स्वानुकूलश्च भवति, यो हि तस्य प्राप्तव्यः स्वाधिकारपूर्णश्च भवति। अत एव तदिदमेवाऽत्यावश्यकं यद् वयस्माकं शिक्षासंस्थानां विकासं भारतस्य वास्तविकस्याऽऽत्मनोऽनुकूलमेव कुर्मः।

### डा० चन्द्रभानुगुप्तस्य भाषणम्

२४अक्टूबरदिने संस्कृतविभागे डा. चन्द्रभानुगुप्तस्य (दिल्लीविश्वविद्यालये संस्कृतविभागाध्यक्षस्य) प्रभावशालि भाषणमभूत्। गुप्तमहोदयेन प्रोक्तम्—"संस्कृतमेव भारतीयसभ्यतायाः, संस्कृतेश्च प्राणाः। एतत्कथनं नाऽत्युक्तिर्यत् भारतस्य सांस्कृतिकी एकता, भारतीयप्रान्तीयभाषाणां, तत्साहित्यस्य च विकासः, जनतायाः सांस्कृतिक-नैतिक-आध्यात्मिकविचारधाराणां निर्माणं, संस्कृतभाषाऽध्ययनोपर्यैव निर्भरम्। तद्दिनं भारतस्य कृते महद् दुर्भाग्यपूर्णं भवेद् यस्मिन् संस्कृतशिक्षा उपेक्षादृष्ट्या विलोक्येत। तत्फलस्वरूपे च भारतीया संस्कृतिः, तस्य सभ्यता च शनैः शनैः


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



विलुप्यमाना दृश्येत । ततश्च प्रत्येकभारतीयस्य कर्तव्यं यत् संस्कृतं पठेत्, तस्मै प्रोत्साहनं च दद्यात् ।"

संमेलनेऽस्मिन् 'संस्कृतविभागस्य' यदाऽधिवेशनमभूत्तदा सभायामस्यां भागं गृहीतवद्भिः सर्वैरेव सदस्यैः भारतसर्वकारस्य तथा अन्यान्यसंस्थानां च संस्कृतं प्रति विमुखताम् अरुचिं च संसूच्य महान् खेदः प्रकटितः । श्रीमन्नारायणमहाभागेन सर्वेभ्योऽपि सभास्तारेभ्यः पूर्णमाश्वासनं दत्तं यदहं यावद्बुद्धिबलोदयं तथा प्रयत्नं कुर्यां येन हि संस्कृतशिक्षायै पाठ्यक्रमे समुचितं स्थानं प्राप्येत । तस्मिन् समये डा. श्रीचन्द्रभानुगुप्तो विभागीयसंमेलनस्याऽस्य सभापतिरासीत् ।

## प्रतिनिधीनां संख्या

एकत्रिंशत्तमेऽस्मिन् अखिलभारतीयशिक्षासंमेलने १५०० पञ्चदशशतं प्रतिनिधयो भागं गृहीतवन्तः । तेषु बिहारतः २००, वङ्गेभ्यः १२५, बम्बईतः २८०, मध्यप्रदेशतः ५८, महीशूरतः ८, हैदराबादतः १०, दिल्लीतः २०, मध्यभारतात् २०, संयुक्तप्रदेशात् ६०, मद्रास-आन्ध्राभ्याम् ३० ।

★ अवध शूगर मिल्स लिमिटेड
★ अपर गैंगज शूगर मिल्स लिमिटेड
★ न्यू इण्डिया शूगर मिल्स लिमिटेड
★ न्यू स्वदेशी शूगर मिल्स लिमिटेड
★ भारत शूगर मिल्स लिमिटेड
★ गोविन्द शूगर मिल्स लिमिटेड
शुद्धकणवत्याः इक्षुशर्कराया निर्मातारः
मैनेजिंग एजेन्ट्स :—
दी काटन एजेन्ट्स प्राइवेट लिमिटेड
कलकत्ता ★ बम्बई



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


बालभारती

# सत्-कार्यस्य फलम्

( ले० कुमार कमलानाथशर्मा, आयुः दशवर्षाणि, कक्षा ८ जयपुरम् )

[ अस्मिन् वर्षे स्तम्भेऽस्मिन् वयं संस्कृतशिक्षार्थिभिर्बालकैर्लिखितान् लघुलेखान्, कथाश्च प्रकाशयितुमारभामहे। बालकाः स्वनिर्मिता लघुरचनाः अस्मभ्यं प्रेषयेयुः–वयं ताः संशोध्य प्रकाशयितुं प्रयत्नं करिष्यामः। येन तेषां भाषाज्ञानवृद्धिः, विनोदश्च भविष्यति। रचनाभिः सह आयुः श्रेणिश्च लेखनीये। ]—संपादकः

द्वे मित्रे आस्ताम्। ययोर्नामनी रामः मोहनः इति आस्ताम्। रामः उच्चकुलस्य आसीत्, किन्तु धृष्टः। मोहनः साधारणस्य कुलस्य आसीत्, किन्तु धीरः।

एकदा रामः अवदत्—"चल मित्र! त्वां एकं कौतुकम् दर्शयामि" इति। एवम् उक्त्वा स तं स्वेन सह अनयत्। तत्र गत्वा एकं अन्धं भिक्षुकं अदर्शयत्। यः तस्मै पणद्वयम् अददात् भिक्षुकः तस्मै गानं अश्रावयत्।

रामेण धृष्टतया भिक्षुकस्य पात्रात् एकः पणः उत्थापितः। तमेव पणं पुनः पात्रे स्थापयन् सः अवदत्—स्वामिन् इमम् पणम् गृहाण। वराकः भिक्षुकः तस्मै धन्यवादान् अददात्। एकं गानं अश्रावयत्।

इदं दृष्ट्वा मोहनस्य हृदये दया अभवत्। सः निज-पार्श्व-पुटकात् निःसार्य अष्टाणकान् भिक्षुकाय अददात्। भिक्षुकः प्रसन्नः अभवत्।

सः भिक्षुकः सत्य-भिक्षुकः न आसीत्। अपितु साक्षात् भगवान् आसीत्। रामस्य परीक्षां कर्तुं भिक्षुकस्य रूपं धृत्वा आगतः आसीत्। सः मोहनाय द्वे मंजूषिके अददात्। तयोः एकां मंजूषिकां रामः अचोरयत्। परन्तु यदा रामः गृहे गत्वा अपश्यत् तदा तस्याः मध्यात् वृश्चिकाः निरसरन् रामं अदशन् च। मोहनस्य मंजूषिकातः तु तस्य इच्छितं (इष्टम्) निःसरति स्म।

अनेन शिक्षा प्राप्यते यत् सत्कार्यस्य सर्वदा सत् फलम् भवति।

---

फोन— २६११६३

ग्रामस 'हिन्द'ग्राम

## हिन्द मिल्स लिमिटेड

**१५, दुगल रोड, बैलार्ड एस्टेट**

**बम्बई १.**

निर्मातारः—

कन्चुकवस्त्रं (शर्टिंगस), शय्यावस्त्र (शीटिंगस-लिपाई), लम्बवस्त्र (लांगक्लॉथ) ड्रिलस, मुलस, क्रेप-मुजरी वस्त्राणां, धौतानां, शाटिकानाम्, 'कार्केट चिन्हितानां' तथा स्पेशल फाइबर सूत्राणां च।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri




भारतीय-औषधानां सर्वाधिकं बृहत् विश्वस्तं निर्माणकेन्द्रम्

# श्री वैद्यनाथ-आयुर्वेद-भवनं

# [प्रायवेट लिमिटेड]

कलिकाता ● पटना ● झांसी ● नागपुरम्

सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्तानां भेषजानां
सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे

निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्येन भेषजानीमानि लभ्यन्ते

# हरिनगर सूगर मिल्स लि०

फैक्टरी

हरिनगर (एन० ई० रेल्वे) (चम्पारन जिला) उत्तर बिहार

दूरभाषयन्त्रम्—
'मर्यादा-रामनगर (चम्पारन)'

प्रधानकार्यालय :—
२०७, कालबादेवी रोड, बम्बई–२

दूरभाषयन्त्रम्—
'क्रिसूगर' (बम्बई)

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

* प्योअर, * फर्स्टक्लास, * क्रिस्टल * केन सुगर




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


राष्ट्रपति भवन
नई दिल्ली ४
२६ अक्टूबर, १९५६

मान्यनीयानां राष्ट्रपतिमहाभागानां "भारती" पत्राय

## शुभाशीर्वादः

भवतां पत्रं प्राप्तम्। एतत्कृते राष्ट्रपतिमहाभागाः हृदयेन धन्यवादान् वितरन्ति।

सेयं "भारती" संस्कृतमासिकपत्रिका गीर्वाणवाणीप्रचारप्रसारस्योद्देश्ये साफल्यमाप्नुयात् इति राष्ट्रपति-महाभागैः शुभाशीर्वादाः प्रदीयन्ते।

भवदीया
ज्ञानवती दरबार
(स्वकीयमन्त्रिणी)

योगिवर्य-राजगुरु-स्वामि श्री १०८ श्रीमाधवानन्दमहाभागानां
"भारती" पत्राय नववत्सरारंभे

## ★ शुभाशंसनम् ★

"भारती" पत्रं राजस्थाने तादृग् एकमात्रमेव पत्रं यद् गीर्वाणवाण्या उन्नत्यै प्रयत्नशीलम्। पत्रमिदं प्रकामं परिष्कृतं सरलं समुपयोगि च। अहं वाञ्छामि यदनुदिनं पत्रस्यास्य परिवृद्धिर्भवेत्। संपादकमण्डलं पत्रस्यास्य सुयोग्यं, संस्कृतभाषायाः समुन्नत्यै बद्धपरिकरं च। सम्पादक-मण्डलस्य प्रयत्नैः पत्रमिदं चिराय संस्कृतसेवां कुर्यादित्यहं कामये।

—राजगुरु-स्वामिमाधवानन्दः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❁ सूक्ति-सुधा ❁

शौर्यं शीलमनालस्यं पाण्डित्यं मित्रसंग्रहः ।
अचौर्यहरणीयानि पञ्चैतान्यक्षयो निधिः ॥१॥

बहादुरी, अच्छा स्वभाव, अनालस्य (किसी काम में भी सुस्ती नहीं करना), ज्ञान का अर्जन (समझदारी), मित्रों का इकट्ठा करना, इन धनों को चोर नहीं चुरा सकता । ये कभी नहीं खत्म होने वाला खजाना है ॥१॥

★

अयुक्तं स्वामिनो युक्तं युक्तं नीचस्य दूषणम् ।
अमृतं राहवे मृत्युर्विषं रुद्रस्य भूषणम् ॥२।

जो स्वामी (जो मालिक अर्थात् समर्थ) हो उसके लिए अयोग्य काम भी योग्य हो जाता है अर्थात् उसको अयोग्य कहकर कोई तिरस्कार नहीं कर सकता। किन्तु नीचा आदमी युक्त कार्य भी करे तो भी वह दूषण समझा जाता है । राहु के लिए अमृत भी मौत होगया [अमृत पीने गया था वहां उसकी नाड कट गई] । किन्तु भगवान् शंकर के लिए जहर पीना भी भूषण होगया । [विष की श्यामता कंठ में भूषण समान है ।] ॥२॥

★

अवज्ञात्रुटितं प्रेम नवीकर्तुं क ईश्वरः ।
सन्धिं न याति स्फुटितं लाक्षालेपेन मौक्तिकम् ॥३॥

अपमान करने से टूटे हुए प्रेम को फिर से ताजा करने को कौन समर्थ है । फटा हुआ मोती लाख के लेप (जोड) से कभी नहीं जुडता ॥३॥

★

हस्तादपि न दातव्यं गृहादपि न दीयते ।
परोपकरणार्थाय वचने किं दरिद्रता ॥४॥

हाथ से भी नहीं देना पडता और घर से भी नहीं दिया जाता पराये के उपकार करने केलिये क्या वचन में दरिद्रता दिखानी चाहिये ? अपने वचन से किसी की भलाई होती हो तो उसमें कंजूसी नहीं करनी चाहिये ॥४॥

★

शनैः पन्थाः शनैः कन्था शनैः पर्वतमस्तके ।
शनैर्विद्या शनैर्वित्तं पञ्चैतानि शनैः शनैः ॥५॥

धीरे धीरे रास्ते पर चलना, धीरे धीरे गुदड़ी तयार होती है, धीरे धीरे विद्यार्जन होता है और धन भी धीरे धीरे इकट्ठा होता है । ये पांचों बातें धीरे धीरे होती हैं ॥५॥

★

मक्षिका मशको वेश्या मूषको याचकस्तथा ।
ग्रामणी गणकश्चैव सप्तैते परभक्षकाः ॥६॥

मक्खी, मच्छर, वेश्या, चूहा, भिखारी, गांव का पटेल, ज्यौतिषी ये सातों दूसरों को खाने वाले हैं ॥६॥

प्रकाशक—जयबहादुरसिंह पताः—भारती भवन, गोपालजी का रास्ता, जयपुर
मुद्रकः—राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

( संस्कृतस्य प्रमुखं मासिकपत्रम् )



हिन्दुसंस्कृतिरक्षार्थं युध्यमानेन वैरिभिः ।
महाराणाप्रतापेन प्रतापी देश एषः न ॥

वर्षम् ७

चतुर्थाऽङ्कः

मूल्यम्
वार्षिकम् ३)
एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार-पञ्चनद-आन्ध्र-सर्वकारैः स्वीकृता—

# ❀ विषय-सूची ❀


| क्रमः | लेखाः | लेखकाः | पृष्ठ संख्या |
|---|---|---|---|
| १. | आधिः | शिवशरणझा, झाँसी | |
| २. | मेघदूते देश-प्रेम्णो गौरवम् | हीरालालपांडे साहित्याचार्य, भोपाल | ७६ |
| ३. | अजातशत्रुः राजेन्द्रः | वासुदेवशास्त्री, वागेवाडीकर, सोलापुरम् | ७७ |
| ४. | श्रीभवभूतिः | कविभूषण-ज्वालापतिलिंगशास्त्री, ईमनि (आन्ध्र) | ८१ |
| ५. | संस्कृत-भाषा-शिक्षणावश्यकता | श्रीउदयवीरशास्त्री, बीकानेर | ८२ |
| ६. | प्रतीकारः ( एकाङ्किनाटकम् ) | श्रीकृष्णलाल 'नादान' कमलानगरम् दिल्ली | ८४ |
| ७. | 'यूनेस्को' | श्रीजगदीशचन्द्रशर्मा बी० एस्० सी | ८६ |
| ८. | संस्कृतविषये मिथ्याजनभ्रान्तिः | अभिभाषणम् | ९२ |
| ९. | सम्पादकीयम् | सम्पादकः | ९५ |
| १०. | सूक्ति-सुधा | सम्पादकः | |


सूचना :—सर्वे ग्राहकाः सूच्यन्ते यत् पत्रव्यवहारावसरे निजग्राहकसंख्यां स्वस्मिन् पत्रे अवश्यं दर्शयेयुः। अन्यथा पत्रोत्तरे बाधा समुत्पत्स्यते।

## —✻ "भारती" पत्रस्य उद्देश्यानि नियमाश्च ✻—

१. संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचारपरिपोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि।

२. 'भारती'पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम्।

३. मासिकपत्रमिदं प्रतिमासं प्रतिपदायां तिथौ प्रकाशितं स्यात्।

४. एकस्यांकस्य मूल्यम् ।=) आणकषट्कम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादकः—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः बी.ए.
जयपुरम

# भारती

प्रबन्ध सम्पादकः—
गिरिराजशर्माशास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षम् ७ | माघ शुक्ला प्रतिपद्, सं० २०१३ | अङ्कः ४

## आधिः

[ले० शिवशरणझा, झाँसी]

न पृच्छति कोऽपि मामिति-'विद्यते तव काऽभिलाषा?'
सन्ति चेत् स्वप्नाः स्वकीया मञ्जवो मम वञ्चनाय
कस्तदा परिकुत्स्यतां प्राप्त-स्थितौ तु निदर्शनाय
को नु वक्ष्यति, जीवितुं मम युज्यते खलु यो विधिः
मया शरणं नचाप्तं यत्र विलसति जीवनाशा ॥

मानवा निलये, खगा नीडे-सुखं सर्वे स्वपन्ति
मम नयनयोर्नैति निद्रा, मन्दमङ्गानि त्वयन्ति
जाग्रतोऽनभिलाषया मम व्यत्ययुः बहु-वासराः
चितैः समुपेक्षितस्योत्पद्यते जीवन-जिहासा ॥

यत्तु दुर्लभ-दर्शनं तस्मिन् चिरादनुरागवान्
चित्रमेतत्, निज-कथायाः स्वयं श्रोता जातवान्
लालसा नश्यन्ति तरसा जीर्ण-भग्न-घटाम्बुवत्
स्यति जीवन-दिनान्ते मृत्यु-रजनी निष्प्रकाशा ॥

यद्नयनयो रुद्भवन्त्यश्रूणि हासात्पूर्वमेव
किञ्च विरमन्तीन्द्रियाणि ग्रहणशक्तेः युगपदेव
सर्वमेतत् पूर्वरूपं यद्रुजस्तां नैव जाने
व्याप्नुवन्ती हृत्प्रदेशानुद्भवति कृष्णा निराशा ॥

कामना-मृग एष धावति भागधेयमरुस्थले
लम्बते सुख-लोभ-भारो दुर्बले यस्या गले
फलति लोके प्राणिनां प्रायः प्रदेशोचित-विधिः
कथमहो, विषम-स्थले शान्तिं गमिष्यति मे पिपासा ॥

आदितो मम कामनाया विद्यते न कृतार्थता
जायते न च जीवनस्य कुत्रचित् चरितार्थता
मज्जतो नैराश्य-सिन्धौ लुप्तमिव तट-दर्शनम्
यामुपासे विषम-समये शान्तये, ननु गतिः का सा ?

नास्त्ययं कालोऽनुकूलः काल्पनिक-जन-जीवनाय
स्वार्थिके समयेऽद्य सर्वे सन्ति सम्यगुपेक्षणाय
स्नेह-शून्या नो ज्वलति कस्यापि जीवन-दीपिका
तत्कृते महती महीयं नास्ति किंचित् सावकाशा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# मेघदूते देश-प्रेम्णो गौरवम्

[ ले० हीरालालपांडे एम० ए० (हिन्दी, संस्कृत) शास्त्री, काव्यतीर्थ, साहित्याचार्य, भोपाल) ]

संस्कृतसाहित्ये प्रकृतेर्वर्णने महाकवेः कालिदासस्याद्वितीया क्षमता दृश्यते। कल्पनायाः उत्कृष्टविरहकाव्ये मेघदूते महाकविना प्रकृतिवर्णनाय महत् गौरवमदायि। अनेन वर्णनेन महाकविना कालिदासेन भारतवर्षं प्रति स्वहृदये निहितस्य स्नेहस्य प्रकाशने पूर्णतया सफलता प्राप्ता खलु। मेघदूते रामगिरितः प्रारभ्यालकापर्यन्तं प्राकृतिकसौन्दर्यस्याद्वितीयं वर्णनं दृश्यते। इत्थमेव महाकविना भूगोलस्य ज्ञानेन सह मेघयात्रायाः सूक्ष्माध्ययनसापेक्षो वैज्ञानिकदृष्टेः परिचयो दत्तः। देशविदेशयात्रायां कीदृशं ज्ञानार्जनं प्रशस्यमित्यस्यापि संदेशस्तत्र निगूढो वर्तते। कुबेरस्यालंकाधिपतेः शापेन पीडितो यक्ष एकं वर्षं यावत् स्वनगरीमत्यजत्। इत्थं यक्षः प्रियाया विरहानले स्वात्मानमतापयत्। स्वामिनो वियोगे सती पत्नी सर्वदैव स्वं जीवनं कांचनवत् पूतं दर्शयति। अतः महाकविर्मेघदूतनिर्माणेन नरस्य सतीं नारीं प्रति प्रेम्णः प्रकटनं कारयित्वा नरनारीभ्यामादर्शमार्गं प्रास्थापयत्।

विरहियक्षस्य हृदयेऽलकां प्रति स्नेहो देशप्रेमास्ति। तथा यक्षस्य स्वपत्नीं प्रति सत्यप्रेमा विवाहबंधनस्य पवित्रतां द्योतयति। यक्षस्य पुरस्तात् भगवतो रामस्य भगवत्याः सीतायाश्च परमपवित्रं जीवनमस्ति। भारतीयसंस्कृतिषु भगवनो रामस्य जीवनं परमं स्पृहणीयं स्वीकृतम्। अतएव महाकविकालिदासस्य यक्षेण भगवत्याः सीतायाः स्नानेन पवित्रितेषु रामगिरिपर्वतनिर्मितानामाश्रमाणां जलेषु स्वजीवनस्य पवित्रीकरणं श्रेष्ठं विचारितम्। मानवस्य जीवने परिस्थितेः प्रभावो दृश्यते। यदि च महापुरुषाणामादर्शं जीवनमस्माकं प्रत्यक्षं तर्हि स्वजीवनमपि सत्पथात् विमुखं कदापि न भवेत्। यक्षस्य पुरः प्रशस्तं रामसीताजीवनं वरीवर्तते अतएव तस्य मार्गे प्रतिकूलं निदर्शनं नास्त्येव। स्वात्म जागृताय प्रतिकूलमपि वातावरणमनुकूलं भवति अत्र केवलं दृष्टेर्भेदः खलु।

मेघदूतमद्वितीयं विरहखंडकाव्यमस्ति। कथावस्तु जीवनस्यैका मार्मिका घटना वर्तते। स्वल्पमपि कथानकमवलंब्य सुंदरस्य सफलस्य निर्दोषस्य च काव्यस्य निर्माणं महाकविकालिदासस्योत्कृष्टकाव्यप्रतिभायाः परिचायकं भवति। विरहियक्षः मेघं संदेशवाहं चिनोति यतः स संतप्तनेत्रेभ्यः शांतिं प्रददाति।

यक्षो निवेदयति—

> संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः
> संदेशं मे हर धनपतिक्रोधविश्लेषितस्य।
> गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
> बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥

पूर्वोक्ते पद्ये 'यक्षेश्वराणाम्' इति बहुवचनप्रयोगः 'अलकायाः प्रत्येकनिवासी प्रजातंत्रवत् अलकायाः स्वामी' इति व्यनक्ति।

मेघस्य प्रस्थाने शुभानि निमित्तानि समुपस्थितानि सन्ति। रामगिरितोऽग्रे मेघः प्रस्थितः। मालदेशं आगतः। कृषिर्मेघाधीना। ग्रामजीविभ्यः कृषिर्मेघाश्च प्राणाश्चायूंषि सन्ति। गृहव्यवस्थायाः चिन्तां गृह-लक्ष्म्यः कुर्वन्ति। अतः प्रोक्तम्—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अजातशत्रुः राजेन्द्रः

[ ले० वासुदेवशास्त्री वागेवाडीकर, सोलापुरम् ]

(गतडिसेम्बरमासस्य तृतीयदिने तत्र भवतां सुगृही-तनामधेयानां श्रीमतां राजेन्द्रमहाभागानां द्विसप्तति-वर्षापनतिथिः अभूत्। अतः परं शासकवर्गेषु एता-दृशः भारतीयसंस्कृतेः बलवत्पुरस्कर्ता महापुरुषः भविष्यति न वा इत्यत्र महान् संशयः। एवंविधानां उदात्तपुरुषाणां चरितावबोधः भारतीयानां चेतसि विशेषतः सत्प्रवृत्तेर्देशभक्तेश्च उद्गमः। इति बुद्ध्या भारतीयपाठकानां पुरतः तेषां महापुरुषाणां परिचयः अल्पांशेन स्थाप्यते।)

संप्रति प्रवर्तमानम् अध्ययनम् अध्यापनं च भार-तीयानां मनांसि उन्नमयितुं नार्हति। पुरा परंपरागतं यद् अध्यापनमासीत् तेन बालानामुपरि बहूपकृतम्।

---

त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः।
सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किंचित् पश्चात् व्रज लघुगतिर्भूय एवोत्तरेण॥

मेघो मालदेशात् पर्वतमाम्रकूटमागतः। अतः आम्रैर्नम्रीभूतैः काननाम्रैः शोभितं पर्वतमारूढे मेघे सुन्दरं दृश्यं भविष्यतीति वर्ण्यते—

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैः
त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां,
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः॥

अत्र कविना वसुंधराजनन्यै आम्रवृक्षेभ्यश्च गौरवं दत्तम्। मेघस्य किंचिद्दूरप्रयाणे विंध्याचलचरणेषु नर्मदा दृश्यते। कविर्मेघायोचितां संमतिं ददाति—

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिः
जंबूकुंजप्रतिहतरयं तोयमादाय गच्छेः।
अन्तःसारं घन! तुलयितुं नानिलः शक्ष्यति त्वां,
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय॥

अत्र द्वयोः गजमदजंबूकुञ्जयोस्तथा सूक्तेश्च सौरभं मनोज्ञत्वं वर्तते।

उज्जयिन्याः वर्णने महाकवेरनुरागः पदे पदे प्रस्फु-टति। तस्य मते सा दिवः कान्तिमत्खंडमेकं खलु। अतस्तस्य जन्मभूमिविषये विदुषां हृदये संदेहो जायते। इत्थमेव कविनालकायाः प्राकृतिकसौन्दर्यस्य तत्र निवासिनां वेषभूषादेश्च सूक्ष्मं मार्मिकञ्च वर्णनं कृतम्। यथा—

हस्ते लीलाकमलमलकं बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामाननश्रीः।
चूडापाशे नवकुरबकं चारुकर्णे शिरीषं,
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम्॥

इत्थं मेघदूते महाकविना प्राकृतिकसौन्दर्यचित्रण-द्वारा स्वस्य देशप्रेम्णः गौरवं यत्र तत्रोद्घाटितम्। जैना-चार्यश्रीवीरसेनेन मेघदूतपंक्तिसमाश्रयेण "पार्श्वा-भ्युदयम्" काव्यं विलिखितमित्थं तेन महाकवेर्मनो-भावानां सोल्लासं समर्थनं कृतमित्यवधेयम्। मेघदूत काव्यस्यानवद्यतापि तेन सम्यगुद्घोषिता। मेघदूते देशप्रेम्णो गौरवं महाकवेर्गौरवायैवेति विज्ञेयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



उत्तरभारते प्रचलिताद् रामलीलादिप्रयोगवशात् बालानामन्तःकरणानि सुसंस्कृतानि अभूवन्। अनक्षराः अपि ग्रामीणाः भारतीयाः बालवृद्धाः शालागतं शिक्षणं विनापि यथा सदा सदाचाररताः धर्मनिष्ठाः आसन् तथा संप्रति शिक्षिता अपि विरला दृश्यन्ते। येषां श्रुतिस्मृतीनां रामायणमहाभारतादीनां च दर्शनमपि सर्वथा दुर्लभं किमुत पठनं, तेऽपि क्वचिद् रामकृष्णादीनां क्वचिद् हनुमतः क्वचिद् युधिष्ठिरस्य वचनानि उदाहृत्य कथयन्ति स्म "अस्माभिरपि तथैव वर्तितव्यम्" तदा एवंविधाः अशिक्षिताः अपि भूयांसि स्मृतिवचांसि बहूनि स्तोत्राणि नानारसानि सुभाषितानि च मुखतः पठन्ति स्म। अस्य एतदेव कारणम्। यथा उत्सवादिप्रसङ्गतः अनवरतं संपद्यमानानि कथाकीर्तनानि शैशवाद् श्रवणविषयतां गच्छन्ति स्म। अनेनैव धर्मस्य संस्कृतेः तत्वज्ञानस्य सदाचारस्य च ज्ञानं संवर्धनं सर्वगतमासीत्। तेन च "भारतीनामस्माकं नीतिः परिपुष्टा" इति राजेन्द्रसहोदयानां दृढा मतिः। तथैव च ते सततं प्रतिपादयन्ति। आत्मनो धर्मे संस्कृतौ च निश्चलतायां विद्यमानायामपि अहो तेषां परधर्मसहिष्णुता। बहोः कालाद् युधिष्ठिर इव एवंविधः राष्ट्राध्यक्षः स्वातन्त्र्यभानोरुदये एव अस्माकं भाग्यवशाल्लब्धः। तत्र भवन्तो राजेन्द्राः इव राजेन्द्राः १८८४ तमस्य क्रिस्ताब्दस्य दिसेम्बरमासे तृतीयदिने जन्म अलभन्त।

फत्तेपुरशिक्रीतोऽयं सहायवंशः पुण्यतमे उत्तरप्रदेशे अल्पोढास्थानं संप्राप्तः। कानिचिद् दिनानि तत्र नीत्वा ततो मगधेषु सारणमण्डलान्तर्गते जिरादेयीग्रामे निवासमरचयत्। तं प्रदेशं तदा महाराजः इन्द्रप्रतापः अशात् अचिरादेव सहायवंश्यः चौधरिलालः तस्यामात्यपदमभूषयत्। तस्मिन् अमात्यपदमलंकुर्वाणे वसन्तेनाधिष्ठिता वनश्रीरिव समृद्धमभवत्। राजकुलेन समम् अमात्यकुलमपि महतीं प्रतिष्ठामगमत्। भाग्योदयं प्रतीक्षमाणम् इतस्ततः संचरमाणं तत्कुलम् एकस्यैव पुरुषस्य पौरुषेण कृतकृत्यतां प्राप्नोत्। अस्मिन्नेव धन्यतमे कुले पारतन्त्र्यशृङ्खलामुक्तस्य भारतराष्ट्रस्य प्रथमः अधिपतिः महादेवात् संभूतः। महादेवः साधुवृत्तो दीनत्राणपरायणः परोपकाररतश्च। तस्य महेन्द्रराजेन्द्रौ द्वौ सुतौ तिस्रः कन्यकाः आसन्।

पञ्चमवर्षदेशीयो राजेन्द्रः कस्यचिद् यवनपण्डितस्य सन्निधौ यावनाक्षरशिक्षां प्रारभत। तदा हि तत्र शिक्षाविभागे तस्याः एव प्रबलत्वमासीत्। वर्षद्वयानन्तरं राजेन्द्रः अध्ययनार्थं पटनानगरीं प्रविष्टः। तस्य ज्यायान् भ्राता प्रथममेव तत्र अधीयान आसीत्। विशाले सहायकुले संभूतौ एतौ द्वौ बालौ तत्र महता उत्साहेन अधीयाते स्म। राजेन्द्रः स्वावलम्बनेन स्वाध्ययनं संपादयते। विद्यामभ्यस्यतोऽस्य बालस्य मूलादारभ्य सुमहान् मतिप्रकर्षः सविशेषो दृष्टिगोचरतामयात्। प्रथमा संख्या प्रतिपरीक्षं राजेन्द्रं विहाय नान्यं विद्यार्थिनं वृणुते स्म। तदा तत्र राजेन्द्रस्य पालकत्वभारो ज्योतिर्विदा प्रख्यातपण्डितेन विक्रमादित्येन वोढः। पण्डितवरः प्रयतः प्रत्यहं प्रातः पुण्यतमायां नद्यां स्नात्वा सन्ध्यावन्दनं विधाय देवनार्चनादि कार्यं परिसमाप्य स्वपाल्यान् अपाठयत्। अस्य पण्डितप्रवरस्य विनयनवशात् सदाचारसंपन्नत्वाच्च सर्वेऽपि बालाः सदाचारपराः सुसंस्कृता अभवन्। तत्रापि राजेन्द्रः समधिकः।

द्वादशवर्षमनुभवतोऽस्य विवाहः महता वैभवेन विनयवत्या राजलक्ष्म्या देव्या सार्धं संपादितः। विवाहसंभारे प्रवृत्ते भूयो भूयः प्रबोध्यमानोऽपि बालोऽयं न



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कथंचित् प्रबोधं प्राप । वरयात्रा दशक्रोशायामा हस्त्यश्वसंकुला । नभस्तलं च आपूर्यमाणैर्मङ्गलध्वनिभिर्निनादितम् ।

१९०२ तने क्रिस्ताब्दे कलकत्ताविद्यापीठस्य प्रवेशपरीक्षायां बिहारनिवासी एष राजेन्द्रः प्रथमक्रमाङ्केन समुत्तीर्णः इत्ययं वार्ता धीमत्तमानां वङ्गीयविद्यार्थिनाम् प्रमन्दं विद्यासदम् अपाहरत् । बिहारप्रान्तः वङ्गापेक्षया निकृष्टतमो विद्यायां धीसत्त्वे च गणितः । बिहारनिवासी न कोऽपि छात्रः ईदृशस्य बहुमानस्य पर्याप्तः इति तेषां मतिः । परम् अनेन राजेन्द्रस्य यशसा सर्वेषां मनांसि आवर्जितानि । वृत्तपत्रैस्तु प्रशंसाकुसुमैः अभिवृष्टोऽयं बालः । "अस्य बालराजेन्द्रस्य मेधा सर्वातिशायिनी । अस्य भाविनं कल्पनैकगम्यं भाग्यविलासं विचिन्त्य चेतो न उत्कण्ठते इव । निराश्रयेन सहायेन इह जगति कापि मनीषा मानवलभ्या नास्य दुष्प्राप्या" इति । अहो राजेन्द्रस्य भाग्यराजेन्द्रता। न केवलं दैवसहायेन, किन्तु सहजैः प्रयत्नसाध्यैः सर्वोत्तमगुणैः पञ्चाशद्वर्षानन्तरं भविष्यवाणीयं सत्यतामापादिता लोकोत्तरपुरुषेणैतेन । बहोः कालात् स्वतन्त्रतां समधिगतस्य भारतसाम्राज्यस्य आभिमुख्यं पदं समधिगतम् । नास्ति खलु विशालस्यास्य स्वतन्त्रभारतवर्षस्य साम्राज्यस्य अध्यक्षपदाद् अन्यद् अभिमानास्पदं पदं जगत्यस्मिन् । अस्य युगस्य अपरः अजातशत्रुर्धर्मराजः एव एष भारतराजः राजेन्द्रः तानि सर्वाणि सन्ति महापुरुषेऽस्मिन् यानि किल श्रूयन्ते स्थितप्रज्ञानां लक्षणानि ।

विद्यापीठस्य विधिशाखायाः उत्तमां परीक्षां यथास्वभावं प्रथमक्रमेण समुत्तीर्णाः एते महाभागाः । पूर्वे वयस्येव आत्मनः अपूर्वया प्रज्ञया प्रतिभया शालीनतया च इमे विचक्षणाः सर्वेषां प्रेमभाजनं संजाताः । तदानींतने काले गोखलेतिलकप्रभृतयः स्वदेशकार्यधुरंधराः स्वबान्धवोद्धरणबद्धपरिकराः एतादृशेषु युवजनेषु बद्धदृष्टय आसन् । श्रुतमात्र एव गोखलेमहाभागाः संप्राप्तावसराः एतान् आकार्य उक्तवन्तः "भोः युवन्, विधिज्ञो भवान् लोकोत्तरेण प्रज्ञागुणेन विपुलं धनं संपादयेत् । तेन भव्यं भवनं, महान्ति गजाश्वादीनि विविधानि वाहनानि, आज्ञाकराः सेवकाः, एवमादीनि राजकल्पानि वैभवपूर्णानि साधनानि अपि अवाप्नुयात् । नास्त्यत्र संदेहलवोऽपि । परं पारतन्त्र्यजुषां स्वबान्धवानां स्वराष्ट्रस्य च समुद्धरणचिन्ता भवच्चित्तं किं न मनागपि स्पृशति । विशेषतः संप्रति भवादृशेषु विद्याविनयसंपन्नेषु युवजनेषु एतेषां समुद्धरणभारः किं न आपतति ।"

पूर्वमेव मनसि स्वधर्मे स्वसंस्कृतौ स्वराष्ट्रे च आहितादराणां तत्रभवतां राजेन्द्राणां चेतसि एतेन उप्तस्य राष्ट्रसेवाबीजस्य सुमहान् वृक्षः सुफलितः । महान्तं कुटुम्बभारं वहन्तो राजेन्द्रमहाभागा यद्यपि तस्मिन् काले सहसा स्वमनोगतं न संपादितवन्तः तथापि प्राप्तावसराः क्षणमात्रावधिमपि विलम्बं न विसोढवन्तः । इमं विषयमधिकृत्य एकदा ते आत्मनो ज्यायांसं भ्रातरं पत्रद्वारेण निवेदितवन्तः । "अयि भो भ्रातः सम्यग अवधीयताम् । स्वराष्ट्रं सेवितुं यथा मे मनः समुत्कण्ठते न तथा किमप्यन्यदुपभोक्तुं समवाप्तुं वा । "भारतपौरसेवकेन भाव्यम्" ( आइ० सी० एस ) इति तु न कदापि मया समालोचितम् । तद्वशाद् दास्यशृङ्खलया आजन्मनिबद्धः । न कदापि मोक्षः इति मे दृढा मतिः । यः सत्यं न परिपालयति स न कदापि कस्याप्युपकरोति । यथापूर्वं मम मनीषाऽनुमन्यताम् । त्वामेतद् याचेऽहम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मा विहन्यतां मेऽभ्यर्थनैषा स्नेहवता भवता। एष मे पन्थाः निरुद्धश्चेन्मे जीवनमेव विपन्नं स्यात्। किं बहुनोक्तेन, स्वदेशसेवां विना न किमपि कामये।"

कानिचिद् दिनानि अध्यापकवृत्तिं संपाद्य ततो विधिविद्याध्ययनम् अकुर्वन्। अन्तिमपरीक्षायां प्रथमक्रमाङ्केन उत्तीर्णतां संपादितवन्तः। प्रथमं कलकत्तायां ततः पटनानगर्यां प्रोच्चन्यायालये विधिज्ञत्वेन उपाचरन्। एते तत्र व्यवहरन्तः अचिरेणैव कालेन सर्वोत्तमाः विधिपण्डिताः इति विख्याताः। १६६७ तमे क्रिस्ताब्दे संजाते चम्पारण्यसत्याग्रहे एते संप्रविष्टाः। १६२० तमे क्रिस्ताब्दे वहिष्कारचेष्टायां स्वं विधिज्ञव्यवसायं परित्यक्तवन्तः। महात्मनां गान्धिमहाभागानां तत्त्वज्ञानस्य इमे परमश्रद्धालवः। तस्मिन् समये महामानसैरेभिः पाटनाविद्यापीठस्य कुलगुरुपदस्यापि त्यागो विहितः। अनन्तरं राष्ट्रियशिक्षणोद्देशेन प्रस्थापितस्य पाटनाराष्ट्रीयविद्यालयस्य प्रमुखत्वेन एते नियुक्ताः। अमीभिर्विहारप्रदेशे "युवकसंघटना" "भूकंपत्राणम्" इत्यादीनां नेतृत्वेन सर्वात्मना लोककार्यं संपादितम्। गयाराष्ट्रियसभायाः स्वागताध्यक्षपदं वरलीराष्ट्रियसभायाः हिन्दीसाहित्यसम्मेलनस्य च अध्यक्षपदम् एभिः समलङ्कृतम्। ऑगष्टमासस्य नवमदिनगतायाश्चेष्टायाः प्रसङ्गवशाद् अमी महोदयाः स्थानबद्धतां प्राप्ताः। हजारीबागकारायां निरुद्धैरेतैः "खण्डितो भारतवर्षः" इत्ययं ग्रन्थः प्रणीतः। अयं पाकिस्तानविषयात्मकः श्रेष्ठः ग्रन्थो गणितः। पाकिस्ताननिर्मितिः तत्परिणामश्चेति विषयोऽत्र प्रमाणैर्निरूपितः! एकतः देशस्यास्य विभाजनेन संस्कृतिराजकारणयोः विप्लवः, अन्यतः अखण्डितत्वाद् अल्पसंख्याकानां वर्णानां संरक्षणं विदधत् भारतम् एतयोः कतरत् श्रेयः इत्यस्य विवेचनं पाठकस्य विवेके निक्षिप्तम्।

विधिज्ञस्य व्यवहारे प्रबलतमोऽनुपमो द्रव्यौघस्तानभितः प्रावहत्। तथापि तमपि सहसा न्यवारयन्। यतो देशबन्धवानामापदुद्धरणधिया सुधियः इमे सततम् अस्वस्थमनसः आसन्। नचिरादेव हि चम्पारण्यं प्रविष्टान् गान्धिमहात्मनः अनुगताः। बह्वर्थकरं व्यवहारं परित्यजतामेतेषां महामनसां सन्निधौ केवलं पञ्चदशमात्ररूपकाः अवशिष्टाः। देशकार्यार्थम् एवंविधं वैराग्यं सेवमानास्ते प्रसङ्गवशादेकदा प्राहुः "पञ्चचत्वरिंशतं वर्षाणि यावद् गृहस्थाश्रमे निवसन्नहं पञ्चचत्वारिंशतं मासानपि गृहे न न्यवसम्।" १६१७ तमात् क्रिस्ताब्दादारभ्य १६४७ तमं क्रिस्ताब्दं यावत् एभिर्निरलसतया स्वदेशसेवाव्रतं परिपालितम्। तस्मिन्नवसरे तत्र भवद्भिः नैकवारं कारावासः अनुभूतः तत्र च विविधानां ग्रन्थानां निर्मितिः कृता। १६ ६ तमे क्रिस्ताब्दे कलकत्तानगर्यां संमिलिते राष्ट्रियसभायाः अधिवेशने स्वयंसेवककार्यं कुर्वद्भिः एतैः श्रीलोकमान्यतिलकमहोदयानां मुखात् स्वदेशीव्रतस्य चतुःसूत्रीं निशम्य स्वीकृतं स्वदेशीव्रतमद्य यावदखण्डतया परिपाल्यते। प्रगाढं पाण्डित्यम्, लोकोत्तरा प्रज्ञा अपूर्वं व्यवहारदाक्ष्यं, लोककविलक्षणं सहिष्णुत्वम्, अदृष्टपूर्वं वैराग्यशालित्वम् इत्येतैर्नैकैर्गुणैर्विराजन्ते राजेन्द्राः।

## अजातशत्रुः

"प्रतिपदं प्रमाद्यन्तो वयं वारंवारं स्खलनमनुभवामः। पुनः पुनः अपथं भजामः। नैकवारं नो राष्ट्रियसभा कुण्ठितगतिः अधः पतन्ती इव क्वचिद् दरीदृश्यते। परं विलोकयतामयं महापुरुषः यो न स्वयं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भारतस्य पञ्चत्रिंशत्कोटिपरिमितायां जनतायामल्पशोऽपि अष्टाविंशतिकोटिमतानि संस्कृतप्रसारपक्षे स्युरिति दृढं विश्वसिमः। अतः राष्ट्रं एकया संस्कृत्या, एकस्मिंश्च सूत्रे संग्रथितुं संस्कृतभाषायाः राष्ट्रव्यापकशृङ्खला एव साधनम्भवितुमर्हति इति कृत्वा, संस्कृताध्ययनाध्यापनं अनिवार्यं भवेदित्येवास्माकं प्रस्तावना।

(२) पठनकालः पठनपाठनक्रमश्च—

(क) शिशुकक्षायां सप्तमवर्षपर्यन्तं बालः स्वीयमातृभाषयैव सर्वं पठेत्। अर्थात्, तावत् एकस्या एव मातृभाषायाः पठनमुचितम्।

(ख) वयसः सप्तमवर्षादनन्तरम् अर्थात् तृतीयश्रेण्याः मातृभाषया सह संस्कृतस्याध्ययनं बालस्य प्रारभेत। संस्कृतभाषायाश्च स्तरः एवं निर्णयः यथा १९२६ खीस्टाब्दात् पूर्वं ब्रिटिशराज्यकाले आंग्लभाषाया आसीत्। येन बालः उच्चविद्यालयीयपरीक्षां यावत् व्याकरणस्य साधुज्ञानमाप्नुयात्, भाषायाश्च तादृशं ज्ञानमपेक्षेत येन निर्बाधं वादं विवदेत्, भाषेत लिखेच्च। महाविद्यालयीयपाठ्यक्रमेऽपि केनचिदपि विषयेण सह संस्कृतस्यैकं पत्रं सुरक्षितं स्यात् काम सः चिकित्साविद्यालयः (मैडिकल) स्यादुत शिल्पविद्यालयो (इञ्जिनियरिंग) यद्वा विज्ञानकलाविद्यालयो भवेत्, येन उच्चविद्यालयीयपठनप्राप्तोऽभ्यासः अवनत्यपेक्षया प्रतिसमेधेतव। अनेन च पथा ज्ञानविज्ञानचिकित्सासादिसंबंधिनः पाठ्यक्रमस्यान्तर्भूताः शब्दाः अपि संस्कृतमया भवेयुः, निर्दिष्टविषयाणां पुस्तकानि च संस्कृतेऽनुवदेयुः, अभिनवानि वा प्रणीयेरन्।

(३) प्रथमद्वितीयकक्षयोः केवलं मातृभाषा, तृतीयकक्षातश्च पञ्चमीं यावत् मातृभाषा संस्कृतभाषा च एवं षष्ठतोऽष्टमकक्षान्तं मातृभाषा, संस्कृतभाषा राष्ट्रभाषा चेति तिस्रो भाषाः शिक्षणीयाः। नवमकक्षातः एकादशश्रेण्यन्तं राष्ट्रभाषा संस्कृतञ्चेति भाषाद्वयमनिवार्यं कार्यम्। निरुक्तभाषाद्वयातिरिक्ता कापि तृतीया भाषा ऐच्छिकभाषा भवितुमर्हति, सा स्वीयमातृभाषा स्यात्, उत देशस्य काचिद् अन्या प्रान्तीयभाषा यद्वा वैदेशिकी भाषा भवेत्। वैदेशिकभाषामाश्रित्य विवादोऽनुचितः। न हि सर्वेऽपि विद्वांसः विदेशान् व्रजन्ति, विश्वविद्यालयेषु विदेशभाषाणां विशेषप्रबन्धो भवितुमर्हः। प्रतिप्रान्तं भाषाविज्ञानस्य शिक्षणस्य च उच्चस्तरेण एकैकः विश्वविद्यालयः स्थाप्येत, यत्र संस्कृतं-चोनी-जापानी-पारसी-उर्दू-पाली-अंग्रेजी-स्पेनिश-फ्रेञ्च-जर्मनी-रूसी आदि भाषाणां प्रौढं ज्ञानं दीयेत। येषु च छात्राः अधिकारिणः कार्यकर्त्तारश्च निर्वाचनद्वारा प्रेष्येरन्।

(४) संस्कृत-शिक्षणे केवलं भाषाज्ञानमपर्याप्तम्, अपि तु भूगोल-इतिहासादि विषयाणामप्यध्ययनं संस्कृतमाध्यमेनैव क्रियेत, येन विशेषविषयेषु श्रमो न भवेत्। हिन्दीसंस्कृतयोः पाठ्यक्रमे केषांचित् विषयाणां सम्मेलनमुचितम्। यथा सामान्यविज्ञानम् आदि। अर्थात् हिन्दीसंस्कृतभाषाशिक्षणाय यानि पुस्तकानि नियुक्तानि स्युः तेष्वेव इतिहास-भूगोल-सामान्यविज्ञानादि विषयाणां समावेशः स्यात्, येन संस्कृतादिभाषाज्ञानेन सहैव एषामपि विषयाणां ज्ञानं वर्धेत। एवञ्च विद्यार्थिनो व्यर्थश्रमस्य भारो दूरीभविष्यति। इदञ्च षष्ठकक्षात एव स्यात न तु पूर्वम्। संस्कृताध्ययनं षष्ठकक्षातः संस्कृतमाध्यमेनैव उचितम्। एवं इङ्गलिशभाषाध्ययनं नवमदशमैकादशश्रेणीषु राष्ट्रभाषया हिन्द्या संस्कृतमाध्यमेन वा स्यात्। इङ्गलिशमाध्यमेन इङ्गलिशाध्ययनं केवलं उपाधिश्रेणीष्वेव उचितम्। (क्रमशः)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# प्रतीकारः

( एकाङ्किनाटकम् )

[ ले० श्रीकृष्णलाल 'नादान' कमलानगरम् दिल्ली ]

[भारती द्वारा आयोजितायां एकांकिनाटक प्रतियोगितायां प्रथम स्थानं प्राप्तवतोर्नाटकयो रेकतरमिदं पाठकानां प्रमोदाय प्रकाश्यते—संपादकः]

## प्रथमं दृश्यम्

[स्थानम्—कुटीरस्य अभ्यन्तरम्। क्षीणकाया सुजाता [विधवावेषेण आसने स्थिता।

समयः—प्रातः।

(ततः प्रविशति अम्ब ३! अम्ब ३! इति रुदितं कुर्वन्नष्टावक्रः)

सुजाता—(ससंभ्रमनुत्थाय तमङ्के स्थापयित्वा तच्छिरश्चुम्बन्ती) एहि वत्स, कथं रोदिषि?........ किं केनापि ताडितोऽसि वत्स? कथय, कथय, अहमपि तं ताडयिष्यामि।

अष्टावक्रः—भ्राता कथयति........(इत्यर्द्धोक्ते पुनारोदिति)

सुजाता—वद, वद, किं कथयति श्वेतकेतुः?

(ततः प्रविशति श्वेतकेतुः)

वद, रे श्वेतकेतो, किमुक्तं त्वया येन रोदिति मे वत्सः।

(श्वेतकेतुः निरुत्तरः)

अष्टा०—अयं कथयति तव पिता नास्तीति।

सुजाता—कथं नास्ति मिथ्या वदति चपलोऽयम्। स एव ते पिता यस्याङ्के त्वं स्थितोऽभूः।

( सनिःश्वासं स्वगतम् ) कीदृशोऽयं विधिः।

(प्रविश्य) उद्दालकः—श्वेत, अष्टावक्र! सुजाते! कथं सर्वे शोकनिमग्ना इवालक्ष्यन्ते। (स्वगतम्) आः ज्ञातम्। अद्य श्वेतकेतुना अष्टावक्राय वृथैवोक्तं तव पिता नास्तीति। परं कं कालं रहस्यमिदं वर्तिष्यते। ततोऽधुना विज्ञापयामि अष्टावक्रम्। (प्रकाशम्) वत्स, अष्टावक्र, किं वृत्तम्? किं मात्रे कुपितोऽसि?

सु०—नहि, न हि, मया तु किञ्चिदपि नापभाषितम्।

उद्दा०—जानामि,... एहि वत्स!... श्वेतकेतुः सत्यमेव ब्रवीति।

अष्टा०—किं तातः कथयति? कथमेतत्?

उद्दा०—एवमेवैतत्।

(अपवार्य) सु०—किं करोति भवान्?

उद्दा०—परन्तु कथं जीवनपर्यन्तं रहस्यमिदं गोपायिष्यावः।

सु०—तावद् यथा भवानमिमन्यते।

उद्दा०—शृणु वत्स, तव पिता कहोड आसीत्। षोडश वर्षाणि पूर्वम् एकदा स पण्डितवरः जनकस्य सभायां वन्दिनाम्ना विदुषा शास्त्रार्थे प्रवृत्तः, तेन च पराजितः। क्रूरेण तेन विद्यामदान्वितेन वन्दिना तव पिता.... नद्यां निमज्जितः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहं तव पितामहः श्वेतकेतुश्च ते मातुलः।

अष्टा०—(पादयोः प्रणम्य) मातुल, यद् भवन्तं समवयस्कं मत्वा दुराचरितं मया, तत् सर्वं क्षम्यताम्।

श्वेत०—वयस्येषु किञ्चिदपि सदोषं नास्ति।

अष्टा०—(उद्दालकं प्रति) तात! पितुरपि प्रकृष्टतरां विद्यां मे देहि, यतः तं वन्दिनं पराजेष्ये।

उद्दा०—वत्स, प्रकृतोऽपि सर्वशास्त्रज्ञोऽसि। परन्तु बालत्वात् राजसभायां प्रवेशस्ते दुर्लभोऽस्ति।

अष्टा०—(सुजातामुपेत्य) अम्ब! आशीर्वादं मे देहि। भवत्या आशीर्वादेन सफलो मे मनोरथो भविष्यति।

सु०—शुभास्ते पन्थानः सन्तु पुत्र, पितुर्यशो वर्धय।

श्वेत०—एहि, अहमपि त्वया सह गच्छामि।

(निष्क्रान्तौ)

पटपरिवर्तनम्

## द्वितीयं दृश्यम्

[स्थानम्—राजर्षेर्जनकस्य प्रासादस्य प्रवेशद्वारम्।
द्वाःस्थौ सशस्त्रौ तिष्ठतः।]
समयः—प्रातः।

(ततः प्रविशतः मार्गे चलन्तौ श्वेतकेतुरष्टावक्रश्च)

अष्टा०—मातुल, अद्य मे प्रतिशोधाग्निरतिप्रचण्डो जातः, कीदृशः स वन्दी येन नद्यां निमज्जितो मे पिता। यदि पितुः लेशमात्रमपि तेजो मयि वर्तेत, तर्हि पण्डितोऽयं प्रतिशोधाग्नौ मे भस्मसात् भवेत्।

श्वेत०—पश्य तत्र, इदमेव द्वारं प्रतीयते राजकुलस्य।

(द्वारमुपेत्य एकं द्वास्थं प्रति)

अष्टा०—भोः द्वारपाल। इदमेव राजकुलम्?

द्वास्थः—अथ किम्।

श्वेत०—अत्र किं महायज्ञः कोऽपि वर्तते?

द्वास्थः—वर्तते खलु।

अष्टा०—श्रूयते, यत् कोऽपि वन्दिनामधेयः पण्डितो वादविवादप्रवरस्तत्र तिष्ठति।

द्वास्थः—(क्रुद्धः) अथ किम्। भवतु उत्सर, उत्सर।

अष्टा०—कथमुत्सर-उत्सरेति, आवां तु प्रासादं प्रवेष्टुकामौ।

द्वास्थः—(हास्यं कृत्वा) किमर्थम्?

अष्टा—वन्दिना सह विवादार्थम्।

द्वास्थः—(तारं हसति) वन्दिना सह विवादार्थम्। रे मूढ त्वया दर्पणे निजशरीरमपि कदाचित् दृष्टम्?

श्वेत०—समुदाचारो नोल्लंघनीयो मित्र!

अष्टा०—जानासि रे राजपुच्छ। कोऽहमस्मीति।

द्वास्थः—अथ त्वया किमाचारो लंघितः? नाहं तव प्रवेशम् अनुजानामि।

अष्टा०—कथं नानुजानासि?

द्वास्थः—(सस्मितम्) चल रे बालक, विकृतानि तेऽङ्गानि। कथं शास्त्रार्थाय प्रमत्तोऽसि। यज्ञे तु देशस्य सर्वे मान्याः पण्डिताः समागताः। तेषां विवादश्रवणमपि बुद्धेस्ते दुर्ग्राह्यम्।

श्वेत०—मा मैवम्। अयं शरीरेणैव बालकः।

द्वास्थः—परं वन्दिन आज्ञया विदग्धानां पण्डितानां च प्रवेशोऽनुज्ञातः, न तु बालकानाम्।

अष्टा०—शृणु रे,

न तेन स्थविरो भवति, येनास्य पलितं शिरः।
बालोऽपि यः प्रजानाति तं देवाः स्थविरं विदु-॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च,

न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ।

मयापि वेदा अधीताः, शास्त्राणि चाप्यधीतानि । दिदृक्षुरस्मि वन्दिनम् । अतो राज्ञे मां निवेदयत भवान् ।

द्वास्थः—यद्येतावान् उत्सुकस्त्वं तर्हि केनचिदुपायेन तव प्रवेशाय प्रयत्नं करिष्ये । कः कोऽत्र भो !

प्रतिहारी—(प्रविश्य) किमाज्ञापयति भवान् ?

द्वास्थः—तत्रभवान् महाराजो निवेद्यताम्—'द्वारे अष्टावक्रनामधेयः यज्ञं दिदृक्षुः कश्चित् ज्ञानवृद्धो बालकः प्राप्तः' इति ।

प्रती०—तथा (इति निष्क्रान्ता)

द्वास्थः—त्वयापि प्रवेशाय प्रयत्नः कर्तव्यः । स राजर्षिर्विनम्रतया निवेदनीयः ।

(ततः प्रविशति राजा जनकः)

अष्टा०—जयतु महाराजः ! जनकः—[कोऽयम् ? कहोडसूनुः ! कथं प्रवेशोऽपेक्ष्यते त्वया ?]

अष्टा०—महाराज, मया श्रुतं यत् कोऽपि विद्वान् वन्दी नाम शास्त्रार्थे पराजितान् सर्वान् भवतोऽनुचरैर्निमज्जयति अहमपि तेन वादविवादार्थमागतोऽस्मि ।

जनकः—कथं त्वयैतद् वक्तुं शक्यते ? तं वन्दिनं प्राप्य तु बहवो जेतुकामा ब्राह्मणा विलुप्तशोभाः समजायन्त । का ते विजयाशा वर्तते ?

अष्टा०—मनोरथन्तु मे भवानेव द्रक्ष्यति । यदि वन्दी मां जयेत् तं वाऽहं जयेयमिति ।

जनकः—भवतु तावत्, तदैव तव प्रवेशमनुज्ञास्यामि यदा मे द्वयोः प्रश्नयोरुत्तरं दास्यसि । प्रथमस्तावत् ये द्वे, अश्वे इव संयुक्ते स्तः, श्येनस्येव च पातो ययोः, तयोः को गर्भमाधत्ते, ते च कं गर्भं धारयतः ।

अष्टा०—ते विद्युत् वज्रश्च इत्येते स्तः । मेघस्ते सूते । मेघ एव ताभ्यां जन्यते ।

जनकः—अथ द्वितीयः—

किंस्वित् सुप्तन्न निमिषति
किंस्विज्जातं न चोपति ।
कस्यस्विद् हृदयं नास्ति,
किंस्विद्वेगेन बर्धते ॥

अष्टा०—मत्स्य सुप्तो न निमिषति,
अण्डं जातं न चोपति ।
अश्मनो हृदयं नास्ति,
नदी वेगेन वर्धते ॥

किं सन्तुष्टो महानुभावः ?

जनकः—(अष्टावक्रमाश्लिष्य) वत्स, अतिमानुषं ते बुद्धिविस्तारं मन्ये । सत्यमेव बालोऽपि स्थविरोऽसि । एहि, द्वारमपावृतम् । (उभौ परिक्रामतः) एष वन्दी तिष्ठति ।

अष्टा०—अनुगृहीतोऽस्मि भगवन् !

(पटपरिवर्तनम्)

## तृतीयं दृश्यम्

[स्थानम्—राजकुले सभाभवनम् । राजा जनक उच्चैरासने मन्त्रिभिः सार्धं तिष्ठति । नीचैः शोभते विवृतग्रन्थैः परीतस्तेजस्वी वन्दी ।]

समयः—प्रातः ।

———

जनकः—वन्दीसम्मुख आसने निषीद । श्वेतकेतो त्वमपि श्रोतॄणां मध्ये उपविश ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ष्टा०—महापण्डितं तेजस्विनं वन्दिनं प्रणमामि ।

दी—(उत्थाय) चिरायुर्भव । आस्यताम् ।

( उभौ निषीदतः )

तकः—भोः भोः, सभासदः ! भवन्तो विज्ञाप्यन्ते यद् वन्दिनोऽष्टावक्रस्य च मध्ये दार्शनिको वाद-विवादो भविष्यति ।

( एतच्छ्रुत्वा सभायां कोलाहलो भवति )

श्चित्—अयं बालकश्चापल्येनागत इति विचारयामि ।

परः—कथमेतत् सम्भवम् ।

तीयः—अद्य खलु मरणदिवसोऽस्य मन्दभाग्यजननीकस्य ।

तीयः—कथमुष्ट्र इव पृष्ठे ककुद्वान् चिरकालमयं स्थातुं शक्ष्यति ?

तकः—(हस्तौ उद्यम्य) शान्तिर्भवतु । शान्तिर्भवतु । परीक्षितोऽयं बालः प्रथममेव मया । तूष्णीं भूत्वा शृण्वन्तु भवन्तः । अस्मदीये देशे बालका अपि तीक्ष्णबुद्धयः सन्ति ।

( रवशून्यं भवति भवनम् )

तकः—आरभ्यतां विवादः ।

ष्टा०—पण्डित, सावधानो भव । अद्य ते दर्पदलनं भविष्यति । मयोक्तस्य प्रश्नस्योत्तरं ब्रूहि । तव प्रश्नस्य चाहमुत्तरं ब्रवीमि ।

न्दी—पश्य, जगति बुद्धितत्वमेकमेव । तदधीनं सर्व जगत् ।

ष्टा०—कथं बुद्धिरेव ? आत्मा बुद्धिश्च द्वे तत्त्वे—ताभ्यामेव जगद् व्यवहरति ।

न्दी—परन्तु एतदुपरि संसारे कर्म एव सर्वस्वम् । विना कर्म आत्मा वा बुद्धिर्वा किं करिष्यति । यतः कर्मणैव त्रिप्रकारं मनुष्यपशुपक्षिरूपं जगत् सूयते ।

अष्टा०—न ज्ञायते भवता, यत् कर्मणोऽग्रे संन्यासाख्यं ज्ञानिनां चतुर्थमपि स्थानं वर्तते ।

वन्दी—स्वर्गे पञ्चानामिन्द्रियाणां भोगः संन्यासादपि बहुमतः । पञ्चेन्द्रियाणि सर्वाणि कर्माण्यनुतिष्ठन्ति ।

अष्टा०—परं निष्कामयज्ञेन तु स्वर्गलाभादपि गरीयसी चित्तशुद्धिर्भवति—या षष्ठी दक्षिणैव यथा षण्णां धेन्वां दक्षिणा भवति ।

वन्दी—मनोबुद्धिसहितानि सप्त ज्ञानेन्द्रियाणि सप्तर्षय इव विराजन्ते । एतेषां विषया एव पूजासामग्र्यः सन्ति ।

अष्टा०—न केवलं मनोबुद्धिसहितानि परमहङ्कारसहितान्यपि अष्टेन्द्रियाणि सन्ति ।

वन्दी—सत्वरजस्तमोभिस्त्रिभिर्गुणैस्तेषां प्रधानांशैश्च नवभिर्भेदैः समग्रा सृष्टिर्विरचिता ।

अष्टा०—मनुष्यस्य शरीरे मुखं, नेत्रे, घ्राणे, कर्णौ, त्वक्, मनो, बुद्धिश्चैतानि दशेन्द्रियाणि सन्ति । एभिरेव अनासक्तितया ज्ञानं गृहीत्वा अज्ञानं च त्यक्त्वा मनुष्यो ब्रह्मप्राप्तौ सफलो भवति ।

वन्दी—मनुष्यस्यैकादशेन्द्रियाणि मनुष्यं, देवमपि च बध्नन्ति, कोऽपि नैतेषां विषयभोगविनिर्मुक्तोऽस्ति ।

अष्टा०—धर्मः, सत्यं, दमस्तपोऽमात्सर्यं, लज्जा, तितिक्षा, अनसूया, यज्ञो, दानं, धैर्यं महा-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्ञश्चैतानि द्वादश ब्रह्मप्राप्तेः साधनानि सन्ति ।

वन्दी—परन्तु, तिथिः, काल इति त्रयोदशमपि साधनमेकम् अस्ति, यत् त्वया नोक्तम् । श्लोकमुदाहरामि—

त्रयोदशी तिथिरुक्ता प्रशस्या
त्रयोदशद्वीपवती मही च ।

(इति चिन्तयंस्तिष्ठति)

जनकः—वन्दिन्, कथं तूष्णीं स्थितोऽसि । किमद्य बालकेनैव पराजितः ? (आसनादुत्थाय) वद पण्डित, वद ।

(सर्वे निस्तब्धाः सन्ति—जनकः पुनरप्यासन उपविशति)

श्वेतकेतुः—न शक्नोति वन्दी वक्तुम् । अष्टावक्र इदानीं श्लोकार्धं वक्ष्यति ।

अष्टा:—"त्रयोदशाहानि ससार केशी,
त्रयोदशादीन्यतिछन्दांसि चाहुः ॥"

महाब्राह्मण, दशेन्द्रियाणि, मनो, बुद्धिरहङ्कारश्च एतानि त्रयोदश तत्त्वान्येव विघूय मनुष्यो ब्रह्म प्राप्नोति ।

(सर्वत्र करतलध्वनिर्भवति । सभासदः कोलाहलं कुर्वन्ति । धन्योऽष्टावक्रः । धन्यः कहोडपुत्रः । इति शब्दः श्रूयते । वन्दी लज्जावनतमुखस्तिष्ठति ।)

अष्टा०—वद रे वन्दिन्, त्वमपि पराजितोऽसि, तथैव त्वां नद्यां निमज्जयिष्यामि यथा त्वया मे पिता निमज्जितः । महाराज, कथं तत्रभवता निःशब्देन स्थीयते ?

वन्दी—वत्स, न मया निमज्जितस्तव पिता ...

अष्टा०—अथ केन ?

वन्दी—मया तु स जलमग्ने नाम द्वीपे प्रेषितः । तत्र खलु वरुणस्य मे पितुर्महायज्ञः प्रवर्तते । अन्येऽपि द्विजास्तत्रैव यज्ञानुष्ठानाय प्रेषिताः ।

अष्टा०- कष्टं भोः । अतिदुर्गमे द्वीपे कारागार इव प्रक्षिप्तो मे पिता । न जाने तात इदानीं जीवति वा न वा ।

(इति चिन्तयन् आसने तिष्ठति)

वन्दी—उत्तिष्ठ, मा शुचः । मया द्वीपे दूताः सम्प्रेषिताः अद्यैव अन्यैर्द्विजैः सह तव पिताऽप्यागमिष्यति ।

अष्टा०—भवतु, तावद् गृहं गच्छामि ।

श्वेत०—अद्यैव यदि न दृश्यते भगवान् कहोडस्तर्हि त्वामपि जले निमज्जयिष्यामः । महाराजेनापि श्रूयतामेतत् ।

जनकः—अष्टावक्र, अद्याहं तव दिव्यामिव निगूढतत्त्वां वाचं श्रुत्वा धन्योऽस्मि जातः । अद्य त्वया प्रबोधित, इवास्मि वन्दिनं निःसारयामि ।

अष्टा०—अयमपि स्वपितुः सकाशे जलमग्ने द्वीपे सम्प्रेषणीयः ।

जनकः—सैनिकौ । निगृह्यतां वन्दी ।

केचन सभासदः—नैतद् युक्तम् । नैतद् युक्तम् ।

( द्वौ सैनिकौ बन्दिकरौ शृङ्खलया बध्नीतः । ततः प्रविशति दूतः )

दूतः—जयतु वन्दी । जयतु महाराजः । जलमग्नाद् द्वीपाद् द्विजा आनीताः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# 'यूनेस्को'

[यूनाइटेड-नेशन्स एज्युकेशनल साइण्टिफिक कल्चरल संस्था "संयुक्तराष्ट्रीयशिक्षाविज्ञानसंस्कृतिपरिषद्"]

[ श्री जगदीशचन्द्रशर्मा बी० एस् सी ]

[ विश्वस्य द्वयोर्महासमरयोरनन्तरमपि, मन्ये मानवस्याऽस्य युद्धपिपासा न शान्ता। वर्तमानकालस्य विषमा अन्ताराष्ट्रियपरिस्थितयः, ईजिप्टभूमौ आङ्गल-फ्रैञ्चसैनिकानामाक्रमणम्, हंग्रीदेशस्य विषये सोवियतसेनाया हस्तक्षेपश्च जनजीवनस्य सुरक्षायाः शान्तेश्च कृते एका प्रकाश्यघोषणैव नूनम्, किमन्यद् वक्तुं शक्यते ?

संयुक्तराष्ट्रसंघस्य स्थापना यस्योद्देश्यस्य पूर्तये कृताऽभूत्, तद्विषये संघोऽयं कियत् कृतकार्योऽभूदिति सोयमपि प्रश्नो विचारणीयो नूनम्। विश्वस्य एवं-विधायां संकटमयपरिस्थित्यां शान्तिस्थापनस्य सर्वतः सफलः सर्वतः सरलश्च मार्गः, राष्ट्रसंघस्य निरीक्षणे कार्यतत्परायाः, विश्वस्य एकमात्रं सांस्कृतिकशिक्षणात्मक-वैज्ञानिकसंस्थाया अस्या द्वारेणैव निर्दिष्टो भवेत्। नास्मिन् विषये वैमत्यं भवेत्कस्यचन विचारशीलस्य नूनम्। संपादकः]

अतीतस्य नवम्बरमासस्य ५मतारिकामारभ्य दिसम्बरमासस्य पञ्चमीतारिकां यावत्, नवीनदेहलीनगरस्य नवनिर्मिते 'विज्ञानभवने' "संयुक्तराष्ट्रशिक्षाविज्ञानसंस्कृतिपरिषदः ('यूनेस्को') "अखिलविश्वाधिवेशनं समारोहेण समपद्यत, यस्मिन् ७७ स्वतन्त्रराष्ट्राणां प्रतिनिधिभिरभूद् भागो गृहीतः। विश्वस्य सर्वाधिक-

---

जनकः—किं कहोडोऽपि प्राप्तः।

दूतः—प्राप्तः खलु।

जनकः—कहोडस्तावदत्रानीयताम् प्रथमम्।

दूतः—यदाज्ञापयति महाराजः। (निष्क्रान्तः)

अष्टा०—स्वयमेव पितृदर्शनाय गच्छामि ( इत्युद्यतो भवति )

श्वेत०—वत्स न त्वं तेन कदापि दृष्टः, अतस्त्वया न स संज्ञास्यते।

( ततः प्रविशतः दूतः कहोडश्च )

जनकः—स्वागतम्! पण्डितवर!

कहोडः—अनुगृहीतोऽस्मि। ( सविस्मयम् ) परन्तु किमेतत्? कथं वन्दी शृङ्खलाबद्धः। न मे बुद्धिर्विचारयितुं प्रभवति।

जनकः—विद्वत्श्रेष्ठ! वन्दी पराजितस्तव सुतेनाष्टावक्रेण। ( इत्यष्टावक्रं कहोडाय इङ्गितेन दर्शयति। अष्टावक्रः पितरं परिष्वजते )

कहोडः—वत्स, धन्योऽस्मि तव लाभेन। त्वां वीक्ष्य पुनर्जीवनमिवानुभवामि। यत् पित्रा न कृतं तत् सुतेन सम्पादितम् हन्त! सर्वेषां भवन्तु त्वादृशाः पुत्राः। अस्मिन् देशे त्वादृशा बुद्धि-प्रवरा बालका जायन्ताम्।

( सैनिकौ शृङ्खलाबद्धं वन्दिनमुत्सारयतः )

पटाक्षेपः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



विस्तृतेऽस्मिन् एशियामहाद्वीपे ऐतिहासिकः सोऽयं प्रथमोऽवसरोऽस्ति, यस्मिन् भारतराजधान्यां देहल्यां विश्वस्य सर्वतः प्रमुखाया एतस्याः संस्थायाः ('यूनेस्को') नवमे अखिलविश्वाधिवेशने, विश्वस्याऽस्य प्रत्येककोणतः भिन्नभिन्नविचारधाराधारिभिः अनेकैः प्रतिनिधिभिः स्वैरं भागो गृहीतः । संमेलनस्यास्य अध्यक्षोऽभूत् श्रीलूथर इवान्स महोदयः (Luthar Evans) भारतीयप्रतिनिधिमण्डलस्य नेतृत्वं चकार भारतशिक्षामन्त्री श्रीमौलानाअब्दुलकलामआजादमहाशयः । उपनेता चाऽऽसीत् प्रसिद्धः शिक्षाशास्त्री, मद्रासविश्वविद्यालयस्योपकुलपतिः डा॰ मुदालियरसहोदयः ।

## यूनेस्कोसंस्थाया इतिहासः

एतस्याः संस्थायाः स्थापना द्वितीयस्य विश्वयुद्धस्याऽनन्तरमभूत् । प्रथमस्य विश्वयुद्धस्य [सन् १९१४-१८] अनन्तरं स्थापिता संस्था (लीग ऑफ नेशन्स) विश्वस्मिन् शान्तिस्थापने यदाऽभूदसमर्था, तदा विश्वस्य सर्वैरेव राष्ट्रैः संभूय, द्वितीयविश्वयुद्धस्यानन्तरं संयुक्तराष्ट्रसंघस्य स्थापनाऽक्रियत । 'सेनफ्रान्सिस्कोनगरे', १९४५ तमख्रिष्टवत्सरस्य २४ अक्टूबरतारिकायांमेकपञ्चाशतदेशानां प्रतिनिधिभिः एकस्मिन् घोषणापत्रे हस्ताक्षराणि कृतान्यभूवन् । तदनुसारमेव संयुक्तराष्ट्रसंघस्य स्थापनमभूत् । घोषणापत्रस्य अस्य आमुखे इमे विचाराः प्राकाश्यन्त—

"राष्ट्रसंघस्य वयं सर्वेऽपि सदस्याः विश्वस्य जनतां युद्धोत्पातात् रक्षितुं निश्चिनुमः । या हि जनता अस्माकमेव जीवनकाले द्वौ वारौ यावत् अकथनीयदुःखस्य भोगिनी संवृत्ता ।

मानवस्य मौलिकाधिकारेषु पुनर्वारमात्मीयाम् आस्थां प्रकटयितुम्, सर्वेषामेव लघुमहतां राष्ट्राणां सभानाधिकारस्य कृते ।

"एवंविधपरिस्थितीनां निर्माणार्थम् यासां द्वारा अन्ताराष्ट्रियनियमानाम् अन्तर्गतभाविषु संधिषु, अन्यान्येष्वपि एवंविधेषु प्रयत्नेषु च, विश्वस्य राष्ट्राणि स्वीयामास्थां प्रकटयितुं शक्नुयुः ।"

"सामाजिकप्रगतेः, एवं जीवनस्तरस्य विकासस्य, च कृते ।"

"सहनशीलताभावनायाः प्रचारस्य कृते, तथा उत्तमप्रतिवेशिनामिव शान्तिपूर्णायाः प्रगतेः कृते ।"

पूर्वकथितानामेषामुद्देश्यानां पूर्तये वयं निश्चयं कुर्मो यद् विश्वस्य शान्तये, सुरक्षायै च परस्परं शस्त्रोत्थापनं न करिष्यामः [सामूहिकरुचेः प्रश्नभन्तरा] ।"

एतेषामुद्देश्यानां पूर्तिः केवलं संयुक्तराष्ट्रसंघस्य द्वारा आसीदसंभवा । यतो हि राष्ट्रसंघस्य संघटनं विशुद्धं राजनैतिकमेव । अतएव विश्वस्य सर्वेषामेव देशानां, सर्वासामेव व्यक्तीनां मस्तिष्के, शिक्षा-विज्ञान-संस्कृतीनां माध्यमेन शान्ति-समृद्ध्योर्भावनायाः प्रचारः काममस्तु । तत एव "संयुक्तराष्ट्रीयशिक्षाविज्ञानसंस्कृतिपरिषद्" स्थापनाऽभूत्, या हि संयुक्तराष्ट्रस्याधीना एका संस्थाऽस्ति । एतस्याः प्रधानकार्यालयः फ्रान्सस्य पैरिसराजधान्यामस्ति । 'यूनेस्को' संस्थाया उद्देश्येषु स्पष्टमिदं निर्दिष्टमस्ति यत् "आक्रमणस्य युद्धभावनायाश्च प्रादुर्भावो मानवस्य मस्तिष्के सर्वतः प्रथमं भवति । अतएव तदिदमप्यावश्यकं यत् शान्तिभावनायाः सर्जनमपि सर्वतः प्रथमं मानवमस्तिष्के एव क्रियेत ।" तत एव संस्थाया एतस्याः स्पष्टरूपेण राजनैतिकः संबन्धो नास्ति । प्रत्युत संस्थाया अस्याः कार्यक्षेत्रमस्ति—



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भिन्नदेशीयासु व्यक्तिषु शिक्षा-विज्ञान-संस्कृतीनां प्रचारः प्रसारश्चैतन्मात्रम्। कस्यचिदेकस्य देशस्य शिक्षा-संस्कृति-विज्ञानसाधनानि तस्यैव देशस्य निवासिषु सीमितानि भवेयुरेतन्नास्ति। अपि तु विश्वस्य सर्वेषामेव लघु-महतां राष्ट्राणां सर्वेषामेव नागरिकाणां कृते तानीमानि साधनानि उपलब्धानि क्रियेरन्, एतद्धि संस्थाया अस्या उद्देश्यम्।

युद्धकारणानां यदि मूलतो गवेषणा क्रियेत तर्हि स्पष्टमिदमस्माकं भवेद् यत्परस्परं मनुष्याणामपरिचयः तस्य तत्त्वतः अज्ञानमेव, युद्धस्य प्रधानं कारणमस्ति। एकदेशस्य व्यक्तीनां मस्तिष्के अपरदेशीयानां व्यक्तीनां कृते भय-घृणा-वैमनस्यादीनां या भावना सुस्थिरा भवति, सैव अवसरं प्राप्य युद्धस्य भयानकरूपे प्रस्फुटा भवति। तदिदं युद्धं च मानवजातेर्विकासे कथं नाम बाधकं भवति, तदिदं सर्वेषामेव स्वतो विदितम्। अतः युद्धप्रेरकभावनाया दूरीकरणाय 'यूनेस्को' सदृशी संस्था यावत्परिमाणे सहायिका भवितुमर्हति तावत् Uno संस्था न भवितुमर्हति। यतो हि 'यूनेस्को' संस्थाया उद्देश्यमेव तदिदमस्ति यत् युद्धस्य मूलकारणानां निराकरणं क्रियेत, इति।

सर्वतः सत्यमिदमस्ति यत् विश्वस्य बहूनां देशानां लक्षशो नागरिकाः विंशतितमशताब्द्या एतस्या अर्द्धभागेऽपि अज्ञानस्य गभीरेऽन्धकारे निमग्नाः सन्ति। अद्य यदा अमेरिका-रूससदृशानि प्रगतिशीलराष्ट्राणि 'एटम-हाइड्रोजनबम्बस्य' बलमवलम्ब्य समग्रमपि संसारं भीषयन्ति, तदा ईदृशा अपि देशाः सन्ति येषु विज्ञानस्य नाममात्रतोऽपि परिचयो नास्ति। एकतः-प्रत्येकव्यक्तेः कृते समानाधिकाराणां समानावसराणां च नियमा विचार्यन्ते, तत्र द्वितीयतः-दक्षिण-एफ्रिकासदृशेषु अनुन्नतदेशेषु कृष्णगौरयोर्भेदो वर्तमानकालेऽपि स्पष्टं वर्तमानोऽस्ति! एकतः-'सह-अस्तित्वस्य' 'पञ्च-शीलस्य' च उद्देश्यानि घोष्यन्ते। अपरतः उपनिवेशवादस्य भावना ईजिप्ट-हंग्रीसदृशेषु सुस्थिरा भवितु वाञ्छति। किमधिकविस्तरेण, अद्यतनस्य विश्वस्य संमुखे एवंविधा अनेकाः कठिनसमस्या उपस्थिताः सन्ति यासां निराकरणं 'यूनेस्को' सदृश-संस्थाद्वारा यथा सारल्येन भवितुमर्हति, न तथा द्वितीयसंस्थाद्वारा।

अद्यपर्यन्तम् साहित्य-कला-संस्कृतयो निजनिज-देशसीमापर्यन्तमेव सीमिता अतिष्ठन्। एतदतिरिक्तम् साहित्य-कला-संस्कृतीनामुपरि निजदेशेऽपि कतिपय-व्यक्तीनामेव सर्वाधिकारः समभवत्। किन्तु वर्तमान-समयः सूचयति यत् "एवंविधाः सीमाः दूरीकृत्य, संपूर्णविश्वस्य नागरिकाणां कृते सभ्यता-संस्कृति-साहित्य-कलादीनां सर्वेऽपि मार्गा उन्मुक्ताः क्रियेरन्। विश्वस्य सामान्यस्तरं सर्वथा उन्नतं कर्तुं शिक्षायाः संस्कृतेश्च विकासो भवेत्। एकस्य कस्यचिद्देशस्य भूमौ उत्पन्नानि वैज्ञानिकसाधनानि प्रगतिवाञ्छकानां सर्वेषामेव देशानां कृते उपलब्धव्यानि भवेयुः।" एवंविधानां प्रश्नानां विचारः श्रवणे अतीव रुचिकरः प्रतीयते, किन्तु वास्तवरूपे एषां पालनं कियत्पर्यन्तं भवतीति तदिदं विचारणीयं नाम। किं बहुना, अद्यापि 'यूनेस्को' सदृश्या विशुद्धशैक्षणिक-सांस्कृतिक-वैज्ञानिक-संस्थाया उपरि राजनैतिकीनां संकुचितानां विचारधाराणां प्रभुत्वं सुस्थिरमवलोक्यते। एतस्य निदर्शनमिदं सुस्पष्टमवलोक्यतां यत् चीनसदृशस्य सप्ततिकोटिव्यक्तीनां राष्ट्रस्यापि एकस्यां संस्थायां प्रतिनिधित्वं न भवेत्!! हन्त!



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# संस्कृतविषये मिथ्याजनभ्रान्तिः

मुम्बापुरीस्थ भारतीयविद्याभवनस्य संस्कृतपरीक्षाणां प्रमाणपत्रवितरणोत्सवे डा॰श्रीमथुरालालशर्ममहाभागानां भाषणम्

दिनांके ७-१-५७ सायं सार्धसप्तवादने सुबोध-इन्दरकालेजस्य भवने पूर्वं भारतीय-विद्या-भवनस्य संस्कृतपरीक्षाणां राजस्थाने संघटनकर्त्रा श्रीगिरिराज-शास्त्रिणा जयपुरीय-परीक्षाकेन्द्रस्य वार्षिकविवरणं श्रावितमभूत्। अनन्तरं डा॰ श्रीमथुरालालशर्मभिः परी-क्षोत्तीर्णेभ्यः छात्रेभ्यः प्रमाणपत्राणि वितीर्णानि। ततश्चाऽध्यक्षपदात् संस्कृतविषयमवलम्ब्य निम्नाङ्कितं सारगर्भितं भाषणं प्रत्तं डाक्टरमहोदयैः।

## संस्कृतविषये मिथ्याजनभ्रान्तिः

अद्यत्वे जनानां इयं मिथ्या धारणा वर्तते यत् संस्कृतमतिकठिनं वर्तते-इति। वयं सर्वेऽपि जनाः व्यवहारे यां हिन्दीभाषां प्रायो वदामः, सा संस्कृत-मेवाऽस्ति। केवलं संस्कृतस्यं व्याकरणस्य विभक्त्या-दीनां तत्र प्रयोगो न भवति बाहुल्येन। यथा—(हरि पुस्तक पढता है) हरिः पुस्तकं पठति। (भक्त कथा सुनता है) भक्तः कथां शृणोति। (बालक पाठशाला को जाता है) बालकः पाठशालां याति।

अत्र हिन्दीवाक्येष्वपि आधिक्येन संस्कृतशब्दा एव सन्ति व्यवहृताः। अपि च संस्कृते यथा माता, पिता, ग्रन्थः, पुस्तकम्-इत्यादयः शब्दाः प्रयुक्ता भवन्ति, तथैव हिन्द्यामपि। अतो ये संस्कृतं कठिनं वदन्ति ते नूनं भ्रान्ताः। संस्कृतस्याध्ययने आंग्लभाषा-वत् न भवति कष्टाधिक्यमपि।

संस्कृतेन चास्माकं देशस्य भाषासमस्याया अपि समुद्धारो वर्षे एकस्मिन् भवितुमर्हति। संस्कृतमङ्गी-कुर्युश्चेत् तर्हि संस्कृतमिदं बलात् स्थाप्यते इति न कोऽपि वक्तुं प्रभविष्यति। संस्कृतस्य स्वीकारे तु आसेतुहिमाचलं सर्वस्यापि तुल्यमेव कष्टं भविष्यति। परन्तु जनानामियं प्रकृतिरेव संजाता-यत् ते संस्कृतं नाङ्गीकुर्वन्ति। अद्यत्वे नवनीतस्य रोटिकायाश्च बोधाय बटर-टोस्टशब्दप्रयोगं कुर्वन्तो महान्तं गर्वं अनु-भवन्ति बहवोऽपि नव्यशिक्षिताः।

## आंग्लभाषापेक्षया संस्कृतं सरलम्

आंग्लभाषायां कियत् काठिन्यं वर्तते - इत्येतत्तु-एवं ज्ञातुं शक्यते-यदाधुनिका मैट्रिकपरीक्षोत्तीर्णा अपि केजुअल-प्रीविलेजादिशब्दानां सम्यगर्थं न जानन्ति। संस्कृतस्य सारल्यन्तु-एतावता सुस्पष्टं प्रती-यते-यत्-संस्कृतमिदं दशसहस्रवर्षेभ्यः पूर्वमपि भाष्यते स्म (उच्यते स्म)। अद्यापि तत् वयं किमपि-किमपि वक्तुं शक्नुमः। एतदपेक्षया तामिल-मराठी-बंगाली-प्रभृतिभाषा अतिकठिनाः सन्ति।

## प्रान्तीयभाषाः संस्कृतमेवाश्रिताः

हिन्दीतश्चारभ्य तेलगू-कन्नड-मलयालमभाषा यावत् सर्वा एव प्रान्तीयभाषाः संस्कृतमेवोपजीवन्ति। डा॰

---

एतत् समुचितमेव यद् भारते वर्तमानाया मरुभूमेः न्यूनतासंपादनार्थं 'यूनेस्को' संस्थया साहाय्यं दत्त-मस्ति। भारतीयाः कतिचन वैज्ञानिकाः, शिक्षाशास्त्रि-णश्च, विश्वस्य विभिन्नभागेषु प्रशिक्षणार्थं प्रेषिताः सन्ति, इदमपि दृष्टमेव। किन्तु उपनिवेशवादस्य सर्वतः प्रवहन्त्या भावनायाः कृते, हाइड्रोजन-एटमबम्बयो-रुत्पातस्य च कृते, अनया संस्थया कतमः सफलः सुदृढश्च पादन्यासः(कदम) कृतः? इति सर्वेऽपि विचा-रवन्तः पृच्छन्ति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



रघुवीरमहोदयेन: 'सबकी बोली' नाम्नि पुस्तके द्विसहस्रसंख्याका: शब्दा: एतादृशा: सन्ति लिखिता:, ये प्राय: प्रान्तीयभाषासु समानरूपेण व्यवह्रियन्ते ।

एषु ११०० शब्दास्तु शुद्धसंस्कृतस्यैव विद्यन्ते । यथा माता, पिता, गृहं श्राद्धं, पुस्तकालय:, ग्रन्थागार: इत्यादय: एवंविधा: सर्वासु अपि प्रान्तीयभाषासु प्राप्यन्ते । तामिलभाषाया विना अन्या: सर्वा: प्रान्तीयभाषा: संस्कृतमाश्रिता: सन्ति ।

## संस्कृतेराश्रयोऽपि संस्कृतमेव

संस्कृतेराश्रयोऽपि संस्कृतमेव विद्यते । भारतीयानामस्माकं यानि धार्मिककार्याणि यज्ञ-हवन-श्राद्ध-विवाहादीनि संपाद्यन्ते, तानि सर्वाण्यपि संस्कृत एव भवन्ति । ये संस्कृतं न जानन्ति तेषां विवाहेषु वर-वधूभ्यां पठनीयानांमन्त्राणां समुच्चारणमपि विवाहसंस्कार-सम्पादक आचार्य एव करोति । भगवन्तं परमात्मानं भजमानो मानवोऽपि 'रामाय नम:' इत्यादिमन्त्रान् संस्कृते समुच्चार्यैव जपति, न तु 'आई वाउ टू राम' इत्याद्युच्चार्य कदापि कोऽपि जपिष्यति । अद्यत्वे ये जना धर्मं हन्तुं वाञ्छन्ति, परं धर्मोऽयं न कदापि विनङ्क्ष्यति । अपि तु धर्मविधातका: स्वयमेव नाशमुपयास्यन्ति 'धर्म एव हतो हन्ति ।" इत्यादिशास्त्रस्य प्रामाण्यात् ।

## संस्कृतेनैव तथ्यमैतिहासिकं ज्ञानम्

भारतस्य आंधुनिकमितिहासं वेदितुमभिलष्यते चेत्तदा पूर्वं संस्कृतस्य ज्ञानोपार्जनमपि अवश्यं कर्तव्यं भविष्यति । तथा राममोहनरायस्य ब्रह्मसमाजाय, विवेकानन्दस्य दर्शनतत्त्वाय, रामतीर्थस्य दयानन्दस्य च साकल्येन बोधाय चापि संस्कृतस्याध्ययनमावश्यकमस्ति ।

भारतस्य प्राचीनमितिहासं विज्ञातुं ये वाञ्छन्ति, तदा ते वेदोपनिषत्पुराणस्मृतिसाहित्यदर्शनशास्त्राणां जीवात्म-परमात्मनो राजनीतेश्चापि सम्यग् बोधाय प्रथमं संस्कृतं पठेयु: । सर्वमिदं संस्कृते ज्ञाते विज्ञातं भवति ।

अद्य भवन्त: संस्कृतस्य एतासु परीक्षासु प्रवेशं लब्ध्वा समुत्तीर्णा: सन्ति । कतिपयवर्षानन्तरं एतत्परीक्षासु संख्यातीताश्छात्रा उत्तीर्णा: संभविष्यन्ति । उत्तरोत्तरञ्चैवं संस्कृतस्यास्य महत्त्वमपि वृद्धिं यास्यति । तदा सर्वेऽपि भवन्तो महान्तं गर्वमनुभविष्यन्ति ।

अन्ते च श्री डाक्टरमहोदयै: प्रोक्तं यत् केन्द्रव्यवस्थापकमहोदयस्य सहयोगे भवन्त: संस्कृतस्याग्रिम परीक्षास्वपि प्रविशन्तु, अन्यांश्चापि प्रेरयन्तु, येन सुरवाण्या: प्रचार: प्रसारश्च तीव्रगत्या सर्वासु दिक्षु संभवेदिति ।

इदमपि स्मरणार्हं यत् 'जयपुरस्य भारतीभवनं, गोपालजी का रास्ता-केन्द्रात् संस्कृत-परीक्षासु ३५ छात्रा: प्रविष्टा अभवन्, तेषु ३४ उत्तीर्णा: संजाता: । एकश्चानुत्तीर्ण: । जयपुरादतिरिक्तमपि शाहपुरा-पावटा कोटपुतली टोंक-टोडेत्यादिस्थानेभ्योऽपि एतासु संस्कृत परीक्षासु संभवत: २०० छात्रा: प्रवेशमलभन्त ।

इदानीं मार्चमासेऽस्मिन्नेव भाविनि-परीक्षासु उदयपुर कोटा-बीकानेरालवर दौसाप्रभृतिस्थानेभ्योऽपि संभवत: ४०० छात्रा भागं ग्रहीष्यन्ति । एतत्परीक्षाणां प्रार्थनापत्रपूर्तेरन्तिमा तिथि: १४ जनवरीमासस्य विद्यते तथा भाविन्यश्चैता: परीक्षा: मार्चस्य मासस्यास्य २-३ तारिकयो: संपत्स्यन्ते । केन्द्रस्थापनं कुत्रचित् येऽपि वाञ्छन्ति, ते 'भारतीय-विद्या-भवनं, ४ चौपाटी रोड, बम्बई" इति संकेते परीक्षामन्त्रि महोदयेन पत्रव्यवहारं कुर्युरिति ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri




# हरिनगर सूगर मिल्स लि०

फैक्टरी

हरिनगर (एन० ई० रेल्वे) (चम्पारन जिला) उत्तर बिहार

दूरभाषयन्त्रम्—

'मर्यादा—रामनगर (चम्पारन)'

प्रधानकार्यालय :—

२०७, कालबादेवी रोड, बम्बई—२

दूरभाषयन्त्रम्—

'क्रिसूगर' (बम्बई)

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

* प्योअर, * फर्स्टक्लास, * क्रिस्टल * केन सूगर

भारतय-औषधानां सर्वाधिकं बृहत् विश्वस्तं निर्माणकेन्द्रम्

# श्री वैद्यनाथ-आयुर्वेद-भवनं

# [प्रायवेट लिमिटेड]

कलिकाता ● पटना ● झांसी ● नागपुरम्

सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्तानां भेषजानां

सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे

निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्येन भेषजानीमानि लभ्यन्ते




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## [स]म्पादकीयम्—

**संस्कृतविश्वपरिषदः पञ्चमाधिवेशनम्**—भारती-[पाठ]कानां विदितमेव यत् जनवरीमासस्यास्य ११-१२-[१३] तारिकासु पञ्चाम्बुप्रान्तीये सुप्रसिद्धे धर्मक्षेत्रे 'कुरु-[क्षेत्रे]' संस्कृतविश्वपरिषदःपञ्चमाधिवेशनं समवर्तत । [अ]ध्यक्षपदमामण्डितमुत्तरप्रदेशस्य राज्यपाल श्रीके० [मा०] मुंशीमहाभागेन । अधिवेशनस्योद्घाटनं भारत-[राष्ट्र]पतिश्रीराजेन्द्रप्रसादमहोदयस्य करकमलद्वारा [सम]भूत् उद्घाटनं कुर्वता प्रोक्तं राष्ट्रपतिमहोदयेन—[सं]स्कृतभाषा भारतस्य संजीवनमौषधम् । एतस्या अध्य-[यने]नैव वयं वर्तमानकालिकानां नवयुवकानां महिलानां [च] मस्तिष्के समन्वयस्य शान्तेश्च भावनामुत्पादयितुं [प्रभ]वामः ।"

अवसरेऽस्मिन्नध्यक्षपदादाभाषमाणेन श्रीमुंशी-[मही]भागेन संस्कृतस्य देशेऽस्मिन् प्रसाराय प्रचाराय च [बह]ु समर्थनमक्रियत । नानाप्रान्तेभ्यः समागतैर्विद्वद्भिः [संस्]कृतभाषाप्रचारसंबन्धे नानाप्रस्तावाः समुपस्थापिताः, [येषा]ं स्पष्टीकरणं यथावकाशमग्रे कर्तुं शक्येत ।

### प्रगतकार्यविवरणम्

अधिवेशनस्याऽऽरम्भे मन्त्रिणा श्रीजयन्तकृष्ण-[हरि]कृष्णदवेमहोदयेन परिषदोऽस्याः पञ्चानां वर्षाणां [विव]रणमश्राव्यत । सर्वतः पूर्वं ५१ तमे ख्रिष्टीयवत्सरे [मई]मासे सोमनाथदेवालयस्य पुनर्निर्माणावसरे परिषदो-[ऽस्या]ः स्थापना मुंशीमहोदयद्वाराऽभूत् । ततः ५२ तमे [वत्]सरे सेयं परिषद् विद्याक्षेत्रे श्रीवाराणस्यामध्य-[ष्ठा]नात् । तदनन्तरं ५४ तमे वत्सरे एप्रिलमासस्य २४-[२५] तमतारिकयोः दक्षिणप्रान्तीये नागपुरेऽस्या अधि-[वेश]नमभूत् । अस्मिन्नधिवेशने प्राचीनप्रथया शास्त्र-चर्चाया अपि आयोजनमभूद्, यत्र प० ताताचार्य-प्रभृतयो दाक्षिणात्याः, पण्डितरामाज्ञापाण्डेय प्रभृतय-उत्तरदेशीया भागमगृह्णन् । तदनन्तरं ५५ तमे वत्सरे ११-१२-१३ नवम्बरमासीयतारिकासु आन्ध्रप्रान्तीये 'तिरुपति' क्षेत्रेऽस्याः सभभूत् । अधिवेशनमिदमतितमा-मुत्साहेन समवर्तिष्ट, यत्र अनेके दुर्लभा हस्तलिखित-ग्रन्थाः, चित्राणि, प्राचीनानि कलावस्तूनि, दुर्लभानि, अनर्घाणि नाणकानि च प्रदर्शिन्यामदर्श्यन्त ।

महामन्त्रिणा स्वीयाभिभाषणे समञ्जसमुक्तम्—वयं संस्कृतस्य शिक्षापद्धतिं नूतनतया तथा प्राणशीला-माकर्षिकीं च निर्वर्तयेम, तथा तस्य प्राचीनेतिहासस्य निधिः, प्राचीनदाद्यस्य ज्ञानस्य च शब्दकोषः, अना-वृत्तौ भवेताम् । धर्मतत्त्वयोश्चानुबन्धिनी सा भाषा अस्मासु स्फूर्तिं जनयेत् इत्यादि ।

### विश्वविद्यालयस्य शिलान्यासः

अस्मिन्नेव दिने राष्ट्रपतिमहोदयेन संस्कृतविश्व-विद्यालयस्य शिलान्यासः अकारि, यस्य निर्माणे १३५ लक्षमुद्राणां व्ययो निरधार्यत । समयेऽस्मिन् धार्मिका-योजनं प्राचीनपद्धत्या समभूत् यत्र वैदिकैर्मन्त्रैः, भगवद्गीताया श्लोकैश्च सर्वतः सभामण्डपः प्रति-ध्वनितोऽभूत् ।

पञ्चाम्बुदेशस्य शासनतन्त्रेण विश्वविद्यालयस्याऽस्य समावेशार्थे ४०० एकडमिता भूमिस्तस्मिन् सुप्रसिद्धे ऐतिहासिके भूभागे प्रादीयत, यत्र हि महाभारतस्य सुप्रसिद्धं तद् युद्धमभूत् । शिलान्यासं कुर्वता राष्ट्रपति-महोदयेन सोत्साहमभाष्यत—"अस्माकं जीवनं सुख-मयं संपादयितुं प्राचीनानामाधुनिकानां च विचाराणां समन्वयः सुतरामावश्यकः । एतत्समन्वयार्थं च भारती-यानां प्राचीनभाषाणामध्ययनमस्माकमनिवार्यं संप्रति



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## ❀ सूक्ति-सुधा ❀

वहेदमित्रं स्कन्धेन यावत्कालविपर्ययः ।
अथैवमागते काले भिन्द्याद् घटमिवाऽश्मनि ॥१

जब तक अपने अनुकूल समय न आवै अर्थात् जमाना बदला हुआ देखे, तब तक अपने बैरी को कन्धे पर भी उठाये रहे ! पर समय आते ही जिस तरह मट्टी के घड़े को पत्थर पर फोड़ देते हैं, इस तरह शत्रु को तुरत फोड दे, खतम करदे ॥१

दानं सत्त्वाश्रितं कुर्यान्न पश्चात्तापवान् भवेत् ।
बलिनाऽऽत्माऽर्पितो बन्धे दानशेषस्य शुद्धये ॥२

अपनी सत्ता के अनुकूल दान दे, अपनी जितनी शक्ति हो, उसही के अनुसार दान करै, दान का स्वीकार करै । राजा बलि ने अपनी शक्ति से बाहर दान अङ्गीकार करके अपनी आत्मा को बंधन में डाल दिया । [ वामनावतार विष्णु को ३ पैंड पृथ्वीदान की प्रतिज्ञा करके दैत्यराज बलि बन्धन में पड गये थे]॥

संपन्नम् । अस्मिन् विश्वविद्यालये संस्कृतस्य तथा अन्यासां प्राचीनभाषाणां चाध्ययने विशेषतः समायोजनं भवेत् । मम दृढोऽस्ति विश्वासो यत् नवीनोऽयं विश्वविद्यालयो भारतस्य प्राचीनं निधिं जनतायाः समीपे प्रापयितुं सर्वथा समर्थो भवेत् । प्राचीनं साहित्यं, तत्संबन्धिनो विचाराश्च, अस्माकं पैतृकसम्पत्तेरेको महत्त्वपूर्णोऽशः । यो हि न केवलमस्माकमेव कृते, अपि तु समग्रस्य विश्वस्य कृते लाभदायकः संसिध्येत् । भारतीयानां तु चिरन्तनोऽयं सिद्धान्तः, किन्तु समग्रस्यापि संसारस्य सान्प्रतं याचनाऽस्ति यत्— ज्ञानं विज्ञानं च, आध्यात्मिकी एवं भौतिकी चोन्नतिः, चरित्रनिर्माणं बौद्धिकविकासश्च, सर्वदा सहभाविनो भवेयुर्येन अणुवम्बनिर्माणस्य कार्यं मानवसंहारस्य स्थाने मानवकल्याणाय संभवेत् ।

### पण्डितान् प्रति

पण्डितान् प्रति सूचितं राष्ट्रपतिमहोदयेन यत्— समर्था अमी विद्वांसः सामयिकीनाम् आवश्यकतानामनुसारं सर्वथा सुविचार्य, सर्वतः संभूय च, संस्कृतस्याध्ययनं सरलं संपादयेयुः । पञ्जाम्बुराज्यपालेन प्रकाश्यसभायामाभाषितम्—"विश्वविद्यालयस्यास्य ध्येयमस्ति यत् विश्वविद्यालयीयपाठ्यविषयेषु पारंगतास्तु भवेयुरेव एतस्य स्नातकाः, किन्तु ते वास्तविका भारतीयाः, परंपरानुगत-पूर्वसम्पत्तेर्गर्ववाहिनोऽपि भवेयुः"।

### प्रदर्शनी

अधिवेशनेऽस्मिन् जनवरीमासस्य १० तारिकायां 'गीताभवने' संस्कृतप्रदर्शिन्याः उद्घाटनं माननीय-श्रीचन्द्रप्रकाशनारायणसिंहमहोदयद्वाराऽभवत् । अत्र हि जयपुरतः प्रचार्यमाणायाः "भारती" संस्कृतमासिकपत्रिकाया द्वारा वैदिक-पौराणिक-साहित्यिकचित्राणां समंजसं प्रदर्शनं त्वासीदेव । किन्तु एतदतिरिक्तम् शिमला-पटियालाप्रदेशतः समानीतानां हस्तलिखितप्राचीनसंस्कृतग्रन्थानां, मूर्तीनां चापि समायोजनमतिप्रशस्तमासीत् । यस्य हि प्रशंसा प्रदर्शनीप्रेक्षणानन्तरं पञ्जाम्बुराज्यपालेन, तथा के० एम० मुंशीमागेन च सुबहु प्रकाशिताऽभूत् ।

प्रकाशक—जयबहादुरसिंह पता—भारतीभवन, गोपालजी का रास्ता, जयपुर
मुद्रक—राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

12-3-57

# भारती

( संस्कृतस्य प्रमुखं मासिकपत्रम् )

स्वामिविवेकानन्दप्रभृतीनां यो गुरुर्गरीयान् वै ।
श्रीरामकृष्णनामाऽधर्पितधामा परमहंसः ॥

★

वर्षम् ७ | पञ्चमोऽङ्कः | मूल्यम् वार्षिकम् ३) एकस्याङ्कस्य ।=)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार-पञ्चनद-आन्ध्र-सर्वकारैः स्वीकृता-

## विषय-सूची


| क्रमः | लेखाः | लेखकाः | पृष्ठ संख्या |
|---|---|---|---|
| १. | जागृति-गीतम् | श्रीहीरालालपांडे 'हीरक', भोपाल | ९९ |
| २. | विचित्ररूपाः खलु चित्तवृत्तयः | श्रीगणेशरामशर्मा, साहित्यरत्नम्, झालावाड़ | १०० |
| ३. | तात्पर्यमवधार्यताम् | श्रीचन्द्रशेखर रामचन्द्र ताम्बे, जबलपुरम् | १०३ |
| ४. | प्रतिभा विलासः | श्रीएच्० वि० भुजङ्गाचार्यः | १०५ |
| ५. | 'नञोदय' टीकाकर्तुः परिचयः | श्रीरामेश्वरप्रसादशास्त्री, डीडवाना | १०९ |
| ६. | संस्कृत-भाषा-शिक्षणावश्यकता | श्रीउदयवीरशास्त्री, बीकानेर | १११ |
| ७. | कुचस्तोत्रम् | श्रीगजाननशास्त्री, मुगलगांव | ११२ |
| ८. | वासन्तिकविनोदवीथी | सम्पादकः | ११४ |
| ९. | सिंहकारक-मूर्खब्राह्मणत्रय-कथा | श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरम् | ११५ |
| १०. | हास्यालापाः | श्रीविनोदी जयपुरम् | ११७ |
| ११. | सम्पादकीयम् | सम्पादकः | ११८ |
| १२. | सूक्ति-सुधा | " | १२० |


### "भारती" पत्रस्य उद्देश्यानि नियमाश्च

१. संस्कृतभाषायाः प्रचारः, सरलेन संस्कृतेन सामयिकानां विचाराणाम्, उत्कृष्टाया मानसिकविचारपरिपोषिकायाः सामग्र्याश्च समर्पणम्, अस्य पत्रस्योद्देश्यानि ।

२. 'भारती'पत्रस्य वार्षिकं शुल्कं ३) रूप्यकत्रयम् ।

३. मासिकपत्रमिदं प्रतिमासं प्रतिपदायां तिथौ प्रकाशितं स्यात् ।

४. एकस्यांकस्य मूल्यम् ।=) आणकषट्कम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादकः—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः बी.ए.
जयपुरम

# भारती

प्रबन्ध-सम्पादकः—
गिरिराजशर्माशास्त्री

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

वर्षम् ७ | फाल्गुनशुक्ला प्रतिपद्, सं० २०१३ | अङ्कः ५

## जागृति-गीतम्

[ प्रो०—हीरालालपांड़े 'हीरक' राजकीय अन्तर्विद्यालय, भोपाल ]

त्यजत महत् हैन्यं दैन्यं रे !

उदेति सविता सह संदेशैः,
प्राची धत्ते नवलावण्यम,
गायन्ति भ्रमरा मधुगानम,
पिकाः कवन्ते पंचमतानम्,

धरत पौरुषं मा कार्पण्यम्,
कालिदासपुत्रा जागृत रे !

युगांधकारं हंत ! व्यतीतम्,
नवप्रभातं जागृतिगीतम्,
जगत् जागृतं साहित्यस्य,
भीतं सुरवाणीसाहित्यम्,

ततो हि भीताः सर्वे सन्तः,
जागृत प्राप्नुत युगबोधं रे !

अमरं भजत भारतीज्ञानम्,
भारतीयसंस्कृतिपरिधानम्,
विश्वविवर्धितनवविज्ञानम्,
सदा विजयते संगरूपानम,

सुधासमं संस्कृत-साहित्यम्,
सेव्यं श्राव्यं सर्वबुधै रे

जीवनस्य देयं विज्ञानम्,
दूरीकरणीयं कुध्यानम्,
हितंकरं खलु शांतिवितानम्,
कथं त्यजत हा ! निजाभिमानम्

शांतिविभवदाः संस्कृतयः रे !
उत्तिष्ठत जागृत जागृत रे !!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# विचित्ररूपाः खलु चित्तवृत्तयः

[ लेखकः—पं० श्रीगणेशरामशर्मा, साहित्यरत्नम्, ज्योतिषोपाध्यायः हिन्दीसंस्कृताध्यापकः श्रीराजेन्द्र-इण्टर कालेज, झालावाड़नगरम् झालावाड़, ( राजस्थानम् ) ]

संसारेऽस्मिन् मनुष्यः सर्वश्रेष्ठः प्राणी मन्यते। यदि वयमात्मदृष्ट्या मानवस्य निखिला अपि प्रवृत्तीर्निवृत्तीर्भावान् संवेदना अनुभूतीश्चित्तवृत्तीर्वालोचयामस्तदा 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।' इति

वत्सर्वेषामपि मनुष्याणां कासुचिदन्तर्वृत्तिष्वैक्यं पश्यामः। आत्मतत्त्वस्य सर्वान्त स्थितिसाम्यं, बुद्धिमनःप्राणेन्द्रियाणां ज्ञानकर्मगुणधर्मसाम्यं, पञ्चकोषगततत्तत्तत्वसाम्यं, भौतिकशरीररचनायाम स्थमज्जास्नक्स्नायुत्वगादीनां साम्यं, भावेषु रतिक्रोधोत्साहकरुणादीनां साम्यमित्यादि बहुसाम्यं विद्यते। बहुसंख्यानां तत्त्वानां सादृश्यादेवैका मानुषी जातिः परमेश्वरेण रचितेति सर्वेऽपि स्वीकुर्युः।

सत्यपि प्रतिमानवं विविधदृष्टिभिः साम्ये स्पष्टं विद्यमाने मानवान्तःकरणे तरङ्गायमाणानां कासांचन मनोवृत्तीनां कर्मप्रवृत्तीनां भावभावनानुभूतिसंवेदनानां गुणरूपशीलस्वभावाचारविचारादीनां पार्थक्यं भिन्नतां वैचित्र्यं चापि वयं कचित् कचित् साश्चर्यमवलोकामहे। यदि गभीरेण चेतसा, स्थिरया सूक्ष्मया च बुद्ध्या प्रशांतेन मस्तिष्केण किंचिद्विचारयामस्तदात्र सृष्टौ—विशेषतो मानवसृष्टौ सत्यामप्येकतायां महतीं भिन्नतामनुभवामः। न कस्यापि मनुष्यस्याकृतिः शरीरसंस्थानं बलं बुद्धिर्गुणा दोषाः शीलं स्वभावश्चान्येन सर्वांशतः समाना भवन्ति। व्यक्तीनां प्रत्येकं भिन्ना भिन्ना विभिन्ना गुणदोषा भावाभिप्राया बुद्धिधर्मा मनःसङ्कल्पविकल्पा विश्वासा अनुभूतयः संवेदनाः प्रतीतयो रुचयश्च पृथग्विधा विलोक्यन्ते। इत्थमैक्येऽप्यनैक्यमनैक्येऽपि चैक्यं परिपश्यतां ज्ञानिनामयमभिप्रायो यद्धि परमात्मना सृष्टोऽयं संसारः सर्वाश्चर्यमयस्तत्रापि मानवजीवोऽयं महानेवाश्चर्यमयस्तस्य मनोवृत्तयस्तु सुतरामतिविचित्रा विस्मयोत्पादिका भवन्ति, इति।

अथेत्थं स्थितौ केषांचन महात्मनां महापुरुषाणां विदुषां कवीनां वैज्ञानिकानां राष्ट्रनायकानां राजनीतिज्ञानां नेतृप्रवराणां समर्थानां लेखकानां च चित्तवृत्तयो विचारपरम्पराः कार्यपद्धतयो रुचयश्चाप्यतिविचित्रा अत्यद्भुता वास्माकं दृष्टिपथमवतरन्ति चेत्तदा तन्नासम्भवं न चैकान्ततो दुर्बोध्यं विस्मयावहं विलक्षणं मनोबुद्धिवाचामगोचरं वा। सर्वसाधारणानां लोकानां मनोवृत्तयः क्रियाकलापविधयो व्यवहारवर्तनप्रकाराः सामाजिकं वर्तनं मुखाकृतयश्चेष्टा गतिभङ्ग्यो भाषणविधय इङ्गितानि वा यदि चानन्यसामान्यानि विचित्राणि न्यूनान्यधिकानि वा दरीदृश्यन्ते तदा तद्रचनायां विधातुर्दोषस्तत्परिपालने पित्रोर्वा संरक्षकस्यासावधानता तत्समाजस्य शिक्षादीनाभावोऽसभ्यता संस्कारहीनता चेति कथ्यते परन्तु यदा सैव विचित्रता महापुरुषेषु सदाचारचारित्र्यनिर्मलचरितेषु प्रकृष्टप्रतिभावत्सु विद्वज्जनेषु कल्पनाप्रवणेषु भावुकेषु कवितल्लजेषु कुशलेषु कलाकारेषु क्रान्तिकारिषु प्रचण्डेषु लेखकेषु समर्थेषु



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


शासकेषु वान्येषु सुविख्यातेषु महामानवेषु परिलक्ष्यन्ते तदा 'एकोऽपि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।' इति वत्परिहार्यन्ते समाधीयन्ते च। विशेषज्ञास्त्वेवंविधे वैचित्र्ये दृष्टिपथमायाते सहसा नैव मुह्यन्ति परन्तु मनुष्यस्वभावस्य तादृशं वैचित्र्यं तच्चित्तवृत्तीनामत्यद्भुतां विचित्रतां च परिपश्यतामस्मादृशां जनसाधारणानां समाधानं न भवति प्रत्युत महदाश्चर्यं विस्मयः कौतुकं कुतूहलं च मनसि जायते। एवंविधेषु प्रसङ्गेषु प्राप्तेषु प्रायः सर्वेषामेव जनानां मनसि कापि जिज्ञासा जागर्ति, विनोदो भवति, मानवमनोवैज्ञानिकं सत्यं साक्षात्कर्तुमतीवोत्कटोत्कण्ठा महती बोभूयते। अद्य तावत्पाठकानां विनोदायानन्दाय कौतुकाय च केषांचिन्महामानवानां चरितचर्याचारवैचित्र्यं स्वभाववैचित्र्यं रुचिवैचित्र्यं चित्तवृत्तिवैचित्र्यं चाधिकृत्यात्र लेखनीं व्यापारयामः। तथा हि—

संसारप्रसिद्धो नन्दकुलस्योच्छेत्ता गुप्तसाम्राज्यस्य संस्थापकः कूटनीतिज्ञानां धुरन्धरो विष्णुगुप्तश्चाणक्यः स्वपदयोर्लग्नानां कुशकण्टकानां मूलतो विनाशाय तानुत्पाटयितुं तत्परतां दृढयामास कुशमूलेषु च तक्रमक्षिपच्चदिति जनश्रुतिः। एवंविधं दृढप्रतिज्ञमुत्साहिनं क्रोधादुद्धर्षं तं चाणक्यं दृष्ट्वा शकटारस्तं नन्दवंशविनाशाय प्रेरयामासेत्यपि च श्रूयते।

अद्वैतसिद्धान्तपरमाचार्यो महादार्शनिको जगद्गुरुः श्रीमानाद्यशङ्कराचार्यो नद्यां स्नातुं प्रविष्टो यदा केनचिन्नक्रेण गृहीतस्तदा तज्जननी भृशं चिन्ताकुलाभूत्। ग्राहग्रस्तोऽपि शङ्करोऽवसरमिमसुपयुक्तमाकलय्य स्वमातरं प्रव्रज्यां ययाचे तज्जननी चात्मजस्य जीवनापेक्षिणी शङ्करस्य संन्यासमनुमेन इत्यप्यनुश्रूयते।

महात्मा गान्धिर्महोदयः केनाप्युपायनीकृतं मर्कटमूर्तित्रयं स्वकोष्ठे संस्थाप्य तस्मात्प्रेरणां कामपि लभते स्म महतो राजनीतिसम्बन्धिनः कूटान् प्रश्नान् जटिलाः समस्याश्च समाधातुं स्वसम्मुखस्थां मर्कटमूर्तित्रयीमालोक्यालोक्य कामप्यपूर्वामिव बुद्धिप्रेरणां विचारस्फूर्तिं च प्राप्नोति कथयन्ति तज्जीवनविशेषज्ञाः सहकर्माणः।

सुप्रसिद्धो वंगीयोपन्यासलेखकः श्रीमान् बङ्किमचन्द्रश्चट्टोपाध्यायो महाभागः स्वगृहे सरस्वती-भवनम् (अध्ययनलेखनकक्षं) नानाविधैश्चित्रविचित्रैश्चित्रैरन्यैश्च बहुभिर्भव्योपकरणैः सदा सर्वदा सुसज्जितं रक्षति स्म। यदा स साहित्यसेवार्थं लेखनकर्मणि प्रवर्तते स्म तदा स तत्र न कस्याप्यन्यस्य जीवस्योपस्थितिं सेहे प्रत्युत संपूर्णां नीरवतां निस्तब्धतां परमां शांतिं च कामयते स्म। स स्वसेवकान् मुहुर्मुहुः सावधानान् विधायानुल्लङ्घनीयां गुर्वीं च निषेधाज्ञां समाज्ञापयति स्म यत्तस्याध्ययनलेखनकाले न कोऽपि जनो बहिस्तः कक्षाभ्यन्तरं प्रविशत्विति।

हिन्दीसाहित्यस्य युगनायको भारतेन्दुः श्रीमान् हरिश्चन्द्रो महाकविर्नाट्याचार्यो लेखकशिरोमणिश्चाभूदिति सर्वे वयं जानीमहे। महाभागस्यास्य स्वभावो मनोवृत्तयो जीवनक्रमप्रवृत्तयश्चातीव विचित्रा लोकोत्तरा आसन्। स खलु साहित्यसर्गे प्रेरणां प्राप्तुं काव्यरचनासु भावोन्मादं च लब्धुं स्वगृहे स्थितं सरस्वत्याराधनभवनं चित्रादिभिरन्यैश्च राजसोपकरणैः शृङ्गारयति स्म। स्वयमपि च भव्यवस्त्राण्यलङ्कारान् परिधाय पुष्पधूपादिभिः सुगन्धमयं वायुमण्डलं विधायैकान्ते लेखकाव्यादिकं लेखितुमियेष। भारतेन्दोर्हरिश्चन्द्रस्याध्ययनप्रकोष्ठे तदासन्दीं सर्वतोऽनेके ग्रन्थाः पुस्तकानि



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पत्राणि पत्रिकाश्च विकीर्णास्तस्थुः। तन्मध्ये स्थिरगम्भीरभावेन स्थिरतया निषण्णोऽसौ साहित्यसम्राट् नवीनसाहित्यसृष्टौ तत्परो बभूव।

एतदप्यनुश्रूयते यद्वङ्गदेशीयो महालेखकः श्रीमान् शरच्चन्द्रश्चट्टोपाध्यायो महाशयः स्वगृहे स्थितामेकामेव दारवीमासन्दीं निषीद्य जगत्प्रसिद्धानुपन्यासान्यानन्याश्च साहित्यसम्बन्धिनीर्नवरचनाः पूर्णतां निनाय।

विश्वकविः श्रीमान् रवीन्द्रनाथष्टेगोरमहाभागो रसोद्रेकं भावोन्मादं लेखनप्रेरणां वाप्तुं कस्यचिद्गीतिकाव्यस्य कामप्येकामुत्कृष्टतरां मनःप्रियां च पङ्क्तिं मधुरमन्द्रस्वरं मुहुर्मुहुर्गायन् गीतोपन्यासकाव्यकथादि साहित्यरचनासु प्रवर्तते स्म। स किल मौनमास्थाय किमपि लिखितुं न प्रोत्सेहे। स गायन्नेव साहित्यं स्रष्टुमभ्यस्तोऽभूत्। सः किंचिदेव लेखनानन्तरं तल्लेखन्या निरुद्ध इव व्यरंसीत्प्रायः। यदा चायं विश्वकविः साहित्यसर्गाय प्रेरणां लभते स्म तदैव लेखनकर्मणि प्रवर्तते स्म। रवीन्द्रनाथो यदा कदा स्वयं सुखासीनो मुखेनोच्चारयन् स्वरचना अन्येन केनापि लेखकेन लेखयितुं कामयते स्म परन्तु लिपीकरणे जातास्वशुद्धिषु स मार्मिकेण मधुरेण कलात्मकेन वा प्रकारेण लेखकमतक्षत्।

हिन्दीसाहित्योपन्याससम्राडमरकथाकारो गोदानरङ्गभूमिप्रभृतीनां विश्वविख्यातानामुपन्यासानां स्रष्टा श्रीमान् प्रेमचन्द्रो महालेखको न कस्मिन्नपि सुनिश्चिते समये न च सुव्यवस्थिते वातावरणे वा साहित्यसेवासम्पादनाय लेखादि लेखितुं प्रोत्सहते स्म। वस्तुतस्तु स यावज्जीवं दिवानिशं सततमविश्रान्तं च लोहलेखनीलीलालास्यमनाटयत्। अस्वस्थो रुग्णो मृत्युशय्यामवलम्बितोऽपि स निर्निरुद्धं निरन्तरं साहित्यसाधनायां दत्तचित्तस्तत्परश्चाभूत्। जायमानेऽपि बहुजनसम्मर्दे प्रवर्तमानेऽपि च कोलाहले वा महति जनरवे श्रीप्रेमचन्द्रो लेखनकर्मणि व्यापृतो न कामपि बाधां विघ्नं चासुविधां वान्वभूत्। एतदपि श्रूयते यच्छ्रीप्रेमचन्द्रः प्रायः सर्वा अपि स्वकीया रचनाः प्राचीनामेकां जीर्णां शीर्णां खट्वामेव निषण्णः परिपूर्णतां निनायेति।

अधुनातनेषु छायावादिषु हिन्दीकविवरेषु सुप्रसिद्धो महाकविः श्रीसुमित्रानन्दनपन्तमहाशयः प्रायः पर्यङ्के शयान एव काव्यादिकं विरच्य लिखति। प्रकृतिप्रसन्ने स्वच्छन्द उन्मुक्ते च वायुमण्डले मन्दगत्या लेखनमेवास्याभ्यास इत्युच्यते। एवमेवेदानीन्तनेषु छायावादिषु कविषु विख्यातो महाकविः श्रीसूर्यकान्तत्रिपाठी निराला महाशयो यदा साहित्यं स्रष्टुमुत्सहते तदासौ स्वकुटीरपार्श्वसहवर्तिनीं रथ्यामनु मन्दं मन्दमितस्ततोऽटन् भावप्रेरणां लब्ध्वा स्वकृतीर्लिखति।

उपरि वर्णितानां महापुरुषाणां या या विचित्राः प्रवृत्तयो वर्णितास्ते सर्वे भारतीयाः। केषांचिद्विदेशीयानामपि विषयेऽधस्तात्किमप्युच्यते:—×

एमेलीजोलाभिधानः सुप्रसिद्धो विद्वांल्लेखकः फ्रान्सराष्ट्रस्य राजधान्यां पेरिसनाम्न्यां नगर्यां वसति स्म। स यदा तन्नगरस्य राजमार्गेषु यातायातं प्रकुर्वाणो व्रजति स्म तदा तत्र बाष्पविद्युत्प्रकाशनाय संस्थापितान् स्तम्भान् सदैव सनियमं गणयति स्म।

आंग्लसाहित्यस्य विख्यातो मनीषी लेखकश्चाष्टादशशताब्द्यां जातानां सर्वेषामपि साहित्यसेविनाम् परमाचार्यो गुरुर्गरीयान् डाक्टरोपाधिभूषितः सेम्युअल

× विदेशीयानां स्वभाववैचित्र्यवर्णने कानिचित्तथ्यानि साप्ताहिकाद्धिन्दुस्तानपत्रान्मासिकान्नवनीतपत्राच्च संगृहीतानि। तत्पत्रद्वयलेखकसम्पादकप्रकाशकान् प्रति सादरं साभारं च कृतज्ञतां प्रकटयामः। —लेखकः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


# तात्पर्यमवधार्यताम्

[ लेखकः—चन्द्रशेखर रामचन्द्र ताम्बे, जबलपुरम् ]

एकदा कश्चिद्राजा मृगयां करिष्यन्प्रधानमन्त्रिणा सेवकेनैकेन च सार्धं गहनमरण्यमाविवेश । तत्र पशून् मृगयमाणाः पिपासापरवशाः सञ्जाताः । जलाभावेऽतीव खिन्ना अभूवन् । तदा राज्ञा सेवको जलान्वेषणाय प्रहितः । चिरात् स सेवकोऽद्राक्षीदेकस्य वृक्षस्याधः कस्यचिदन्धस्य मुनेरुटजम् । प्रतिनिवृत्तश्च स राज्ञे न्यवेदयत्—'राजन्नस्ति समीप एव जलप्राप्तेराशा । आज्ञाप्यते चेदानेतुं गच्छामि भवदर्थम् ।' राजोवाच —'यत्त्वयाऽस्मदर्थे जलान्वेषणं कृतं तत्त्वमेव प्रथमं गत्वा जलं पिब । तदनन्तरमावां गमिष्यावः ।' सेवकस्तथेत्यगच्छत् । उटजं प्रविश्यासनोपविष्टं नेत्रहीनं मुनिमब्रवीत्—'हे अन्धभिक्षुक किञ्चिज्जलं दीयतां तृष्णात्रस्तोऽस्मि' इति । मुनिरवोचत्—किमर्थमिह वने आगतोऽसि । सेवक इति मन्ये त्वाम् । सेवकोऽब्रवीत्—'सत्यमहं सेवक एकस्य राज्ञः' इति । स जलं पीत्वा राजानमुपागमत् । राजा मंत्रिणं प्रैषयत् जलं पातुम् । मंत्री मुनिं दृष्ट्वागदत्—'हे साधो ! मह्यं पिपासाकुलाय किञ्चिज्जलं दीयताम्' इति । मुनिरवादीत्—'कुत आयातोऽसि । मन्ये मंत्री असि' इति । मंत्री अवोचत्—यथा वदसि अहमेको राजमंत्री एव । पीतजलः सोऽपि राजसेवकयोः समीपं प्राप्तः । अन्ते राजाप्युटजद्वारं प्राप्य मुनिं सप्रश्रयमुवाच—'भो महाराज तृष्णार्तोऽहं जलकामनयात्रागतः' इति । मुनिनोक्तम्—'किमिति वनं प्राप्तोऽसि । मन्येऽहं भवन्तं कञ्चिद्राजानम्' इति । राजा प्रोवाच—'सत्यमहं

---

जोहन्सन इत्यभिधानो महाभागोऽपि च यदा इंग्लेण्डनगरस्य राजमार्गे गच्छति स्म तदा तत्रोभयपार्श्वयोः स्थापितान् विद्युद्दीपस्तम्भान् स्पृशन्नेव व्रजति स्म । प्रतिदिनमित्थं कुर्वन् कदाचित् कंचिदेकं स्तम्भं विस्मरति स्म चेत्तदासौ पुनः परिवर्त्य प्रत्येकं स्तम्भं स्पृशन् मुहुर्मुहुर्गणयितुं तत्परोऽभूत् । सोऽयं महाशयो यदा साहित्यं स्रष्टुं लेखने प्रवृत्ते तदा लेखनोपयुक्तायां काष्ठफलकचतुष्पद्यामेकां मार्जारीमपि नियतमुपवेशयति स्म ।

अथ एडगर एलेननामापरो लेखकः कश्चित् स्वपालितया बिडाल्या सहैव रात्रौ शयनमकार्षीत् । स एलेनेडगरमहाशयः स्वचरणकमलयोः सौन्दर्यस्याखर्वं गर्वं धत्ते स्म ।

मेकपीसथैकरे इत्यभिधानो महानेवांग्लोपन्यासलेखको यदा पथि संचरन् तद्गृहं प्राप यत्र निवसता तेन 'वेनिटीफेयर' नामकः सुप्रसिद्ध उपन्यासो लिखितोऽभूत्तदा स तत्र शिरोवेष्टनं (हैट) समुत्तार्य सादरं प्रणम्य तद्गृहं प्रति श्रद्धां भक्तिं सम्मानभावं च प्रादर्शयत् ।

—क्रमशः

श्रीनिवास फैब्रिक्स
उत्कृतायाः कृते अद्वितीयसंस्थानम्,
सूक्ष्मतन्तुसन्तानः
तथा अतिशोभनानां रङ्गाणां विविधताः
निर्यातस्य कृते पत्रव्यवहारः कार्यः—
दूरभाषः (फोन)-६००४५-६१८३४
दी श्रीनिवास काटन मिल्स लि०
डिलाइसल रोड लोअर परेल बम्बई १३.
मुख्यकार्यालयः (हैड आफिस)—
'श्रीनिवास हाउस'
वाडबी रोड, फोर्ट बम्बई १.
दूरभाषः(टेलीफोन) न० २६२३६४    टेलीग्रामस
(५ लाइन्स)    श्रीनिवास बम्बई
मैनेजिंग एजेंटस
दी मारवाड टैक्सटाइल (एजेंसी) प्राइवेट लि०
'श्रीनिवास हाउस' वाडबी रोड फोर्ट बम्बई


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



राजा। किन्तु कथं दृष्टिहीनेनापि भवताऽहं राजेति विज्ञातः ?' इति। तदा मुनिरकथयत्—यः किल प्रथमं जलं प्राप्तुकाम उपागतः स मामन्धभिक्षुक इति समबोधयत् अतः स सेवक इत्यहं विदितवान्। पश्चात् जलायागतो जनो मां समबोधत् साधो इति अतस्तमहं मन्त्री इति ज्ञातवान्। अन्ते भवानागत्य मां समबोधयत् महाराजेति। अतो भवान् राजा इति अवगतं मया। नात्र किमपि चित्रम्' इति। ते त्रयोऽपि प्रणम्य मुनिं निर्जग्मुस्तस्माद्विपिनात्।

× × × ×

एको लोभी द्वितीयो मत्सरी उभावप्येतौ सखायौ अभवताम्। एकदा तौ कंचिद् भग्नं देवालयं प्रविष्टौ विचारं कृतवन्तौ यदावाभ्यामत्रैवोपविश्य तपस्तपनीयं यतः कदाचित् प्रसन्नो देवो नौ महद् धनं दद्यादिति। एवं निश्चित्य ताभ्यां तपः प्रारब्धम्। मासत्रयानन्तरं देवस्तयोः कठिनतपसा सन्तुष्टः आकाशवाण्यावोचत्—'अहं युवयोः परिश्रमेण भृशं प्रसन्नीकृतोऽस्मि। वरमभिलषितं याचेथां, किन्तु यः पूर्वं याचेत तस्मादन्यो द्विगुणितं लभेतेति मम विधानम्।' एतद्वचः श्रुत्वा तयोः समस्योपस्थिता यत्केन खलु पूर्वं याच्या कार्या। एकः पूर्वं याचते तर्ह्यपरो द्विगुणितं प्राप्नोति। लोभिना चिन्तितं यत्किलाहं तु पश्चाद् याचिष्ये येन द्विगुणितं लप्स्ये इति। तेन स्वनिश्चयो मत्सरिणे निवेदितः। मत्सर्यप्यचिन्तयत्—मम सखा लोभी अस्ति अतः द्विगुणलाभायावश्यं न याचेत स पूर्वम्! मयैव पूर्वं याचितव्यं भवेत्। तत्किं धनं याचे येन स मत्तोपि द्विगुणं लभेत! कथमेतद्भवितुं शक्नोति यत्तस्य अनायासमेव द्विगुणलाभः भवतु, अस्त्युपायस्तस्य लोभस्य दण्डाय! सोऽब्रवीन्—मित्र, बाढम्, अहमेव पूर्वं याचेय यथा त्वमिच्छसि। आनन्दमग्नो लोभी अगदत् अथ किम्, याच्यताम्। मत्सरी अयाचत—हे देव, ममैकं नेत्रं स्फोट्यताम् (फोड़ दो) इति। ततो लोभिनो द्वे अपि नेत्रे स्फोटिते (फूट गये)।

× × × ×

एकदा शीतार्ता काशिराजस्य महिषी स्वसखीभिः सहोषसि गङ्गातीरं गता स्नातुम्। सर्वास्ताः स्नात्वा बहिरागम्य जलात्, शीतादात्मानं त्रातुमुपायमचिन्तयन्। तासामेकतमया सख्या शून्यमेकं पर्णकुटीरं (उटजं) विलोक्य राज्ञ्यै निवेदितम्। राज्ञी अवदत्—'इदमेव कुटीरमग्निप्रज्वालनायोपयुज्यतामत्र' इति। अपरा सखी करुणार्द्रहृदयोवाच—'महदनर्थकरमिदमध्यवसीयते। एतत्खलु कस्यचिद्दरिद्रस्य कुटीरमस्ति चेदधुना तेन रहितं किमर्थं विनाश्यते' इति। राज्ञी तां प्रतिषेधितवती—इयं ममाज्ञास्ति। एतत्प्रज्वाल्यमेव कुटीरं स्वशीतविनाशाय इदं क्षुद्रं कुटीरं स्वल्पेनैव मूल्येन किं पुनर्न निर्मातुं शक्यते? नात्र कापि हानिरिति।' सर्वास्तूष्णीं तमादेशं पालयामासुः। शीतं प्रशाम्य स्वस्वगृहं प्रति ता निरगच्छन्। राज्ञी अपि स्वप्रासादं सानन्दं प्रविष्टाभूत्। कतिचित्समयानन्तरमेव दरिद्रः स्वकुटीरस्थानं कुटीरशून्यं निरीक्ष्य राजानं निवेदितवान्—देव, न जाने कथं मम कुटीरं विनाशितम्। अहमतीव दीनहीनोऽधुना स्वावासरहितोऽपि जातः। किमत्र करवाणि इति। तदा राज्ञा सर्वमनुसंधाय विज्ञातं यत्तन्महिष्यैव स दरिद्रस्तां दशामानीत इति नृपेण सोऽन्यं शरणं प्रापितः। अनन्तरमेव चागत्य महिषीमलङ्कुर्वाणामवादीत् सरोषम्—त्वया खलु महदनुचितं विहितं यदकारणमेकस्य निर्धनस्य सर्वस्वभूतं कुटीरं दग्धं स्वमनोरञ्जनाय। राज्ञी उत्तरमदात्—'तदेतत्क्षुद्रं कुटीरं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# 'नलोदय' टीकाकर्तुः परिचयः

[ श्रीरामेश्वरप्रसादशास्त्री, साहित्यायुर्वेदाचार्यः, विद्यालंकारः प्राप्तस्वर्णपदः प्रधानाचार्यः, रामानुज संस्कृत कालेज डीडवाना ]

संस्कृतसाहित्ये समुपलभ्यमानानां कालिदासभारविश्रीहर्षादिकविवरनिबद्धानां महाकाव्यानाममन्दानन्दरससंदोहः सहृदयैर्विद्वद्भिर्यदास्वाद्यते पेपीयते चाकण्ठम्—तदेतेषां टीकाकर्तॄणां श्रीमल्लिनाथनारायणादिविदुषामविश्रान्तपरिश्रमस्य वैदुष्यस्यैव फलमिति विदन्त्येव सर्वे विपश्चितः। यद्येतेषां टीका नाभविष्यत तर्हि को नाम कालिदासप्रसादरसमाधुरीं पातुं श्रीहर्षस्य प्रयत्नविन्यस्तग्रन्थग्रन्थिमुद्धर्तुमविरलप्रयत्नेनापि सक्षमः स्यात्। यश्चाशयः गुरुमुखादप्यतिशयशुश्रूषया नोपलभ्यते प्रार्थनयापि न प्राप्यते स एव सुविशदं टीकानिर्मातॄणामहैतुकीकृपया संप्राप्तुं पार्यते। अतएव "टीका गुरूणां गुरु" रित्याभाणकं प्रसेस्रीयते।

अस्मिन् विषये एतत्त्ववधेयं विज्ञैराधुनिका यथा निजनामप्रख्यापनाय इतस्ततो कांश्चिच्छब्दान् भावान्वापहृत्य 'मघवा मूले विडौजाः पर्याये" विन्यस्य कठिनशब्दान् अस्पृश्यानिवास्पृश्य टीकाकार पदभाजो भवन्ति तथा प्राक्तना विद्वांसो नाकार्षुः—टीकानिर्माणकठिनमार्गे स एव पदं न्यदधात्—यः सर्वथा सर्वशास्त्रेषु कृतपरिश्रमः तद्विषयविशेषज्ञश्चाभूत्। किमधुना मल्लिनाथसदृशः सर्वशास्त्रपारदृश्वा नैषधीयमहाकाव्यटीकाकारश्रीनारायणसदृशो विषमस्थलपरिष्कर्ता टीकाकारो विपुलान्वेषणेनापि प्राप्यते। अर्थालङ्कारगर्भितानां काव्यानां तात्पर्यं यथाकथंचित् स्वप्रतिभया कश्चिज्ज्ञातुं जातु प्रभवेन्नाम परन्तु शब्दालङ्कारालङ्कृतानां तत्रापि यमकसंयमितानां कविवचनानां तात्पर्यमवगन्तुं विना-टीकया दुःशकमेव भवति। साम्प्रतं च नातिप्रसिद्धस्य संस्कृतसाहित्यार्णवरत्नस्य नलोदयाभिधस्य काव्यस्य सामान्यपरिचयप्रदानपूर्वकं तट्टीकाकर्तुः प्राप्तपुस्तकाधारेण कश्चित्संस्तवः भवतां पुरः स्थाप्यते।

## नलोदयकाव्यम्—

पुण्यश्लोकं नलमधिकृत्य गीर्वाणवाणीसाहितौ यत् साहित्यं समुपलभ्यते तदनुपममेवेति नाति तिरोहितं विपश्चिताम्। श्रीहर्षनिर्मितं श्रीनैषधीयमहाकाव्यमेवोपादीयताम्—किमस्त्यन्यत् सुरगव्यां अन्यस्यां वा भाषायामेतत्समं 'मृद्वीकामध्यान्निर्यन् मसृणरसझरीमाधुरीभाग्यभाजनं काव्य त्वम् ?" अनुपमकल्पनाकलितं वाचोयुक्ति विजृम्भितमेतदीयं सरसं रसं स्वादम् स्वादं को नाम रसिको रसामृतोर्मिषु न निमज्जति। त्रिविक्रमभट्टरचित "नलचम्पू" अपि किमप्यतिशयं गरिमाणं बिभर्ति—तस्याभिनवरचनाचातुरीं दर्शं दर्शं प्रस्तरहृदयोऽप्यहृदये नवनीतवत् मसृणीभवति। एवमेव "नलोदय" काव्यमपि यमकालङ्कृतिसाहित्ये सर्वाणि प्रत्नान्यर्वाचीनानि काव्यान्यतिशेते– इत्यत्र नास्ति प्रेक्षावतां वैमत्यम् आदित आरभ्य समाप्तिपर्यन्तं एकेनैवातितरां दुरूहेण निर्मातॄणां पठतां च शिरोव्यथासम्पादकेन वाग्देवतावतारमम्मटभट्टमते काव्यान्तर्गडुभूतेन यमकालङ्कारेण निर्माणकरणमस्य निर्मातुरधिकतरं शब्दयोजने प्रभावातिशयं पुष्णाति। दृश्यतां चास्य यमकरचनापाटवम्:—

हृद्य सदायादवतः पापाटव्या दुरासदा यादवतः।
अरिसमुदायादवतस्त्रिजगन्मागाः स्मरेण दायादवतः।
पिको पिको पिको पिको वियोगिनीरभर्त्सयत्।
वचांसि भंगमालपन् वितानितानितानिताः॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नयमानसमानवमानयमा वसरात्पनिवासममुं भवता ।
भवनीय मया यमनीनुदया नयतानयतानयतानयता ॥
मुदममुनामुक्तेन प्रायसद्राज्यं महात्मना मुक्तेन ।
धृतनागामुक्तेन प्राशासि नलेन धरणी मुक्तेन ॥

एतदन्यदपि वैशिष्ट्यमस्मिन् काव्ये समुपलभ्यते यत् नैकेनैव छन्दसा कविना रचना आरचिता—अपितु प्रभिन्नच्छन्दःसु निजरचनाचातुर्यं प्रकटीकृतम्—तथापि न कुत्रापि शब्ददारिद्र्यं न च भावाविष्करणे चमत्कृति सम्पादने च मनागपि शैथिल्यमत्तिलक्ष्यीभवति । शब्दाः प्रनृत्यन्त इव दरीदृश्यते भावगाम्भीर्यं च नातितिरोहितमामाश्रयते । किम्बहुना—आपाततः समानानां पृथगर्थानां नवीननवीनशब्दानां निर्माणेऽस्य कवेः भूयानधिकार आसीदत्र नास्ति कापि संशीतिः ।

## काव्यनिर्मातुः परिचयः—

नलोदयकाव्यस्य को निर्माता आसीदित्यत्राधुनापि वास्तविकः कोऽपि प्रकाशो नावाप्यते, संस्कृतसाहित्येतिहासनाम्ना प्रसिद्धेषु पुस्तकेषु अपि नलोदयमधिकृत्य तन्निर्मातारञ्चाभिप्रेत्य सन्देहदोलामध्यारोपिताः पाठकाः "श्रीबलदेवप्रसादरचितसंस्कृतकविचर्चा" पुस्तके तु अस्य नितरां गवेषणेनापि चर्चैव नोपलभ्यते । पं. सीतारामशास्त्री जोशी एम० ए० साहित्याचार्य, पं० विश्वनाथशास्त्री भारद्वाज एम० ए० काव्यतीर्थ प्रोफेसर हिन्दुविश्वविद्यालय—विद्वद्द्वयामारचिते "संस्कृतसाहित्य का संक्षिप्त इतिहास" नामके ग्रन्थे सेतुबन्धकाव्यनिर्मातुः प्रवरसेनस्य परिचयावसरे एतल्लिखितं संप्राप्यते—यत् नलोदयकाव्यं "प्रवरसेनविरचितमासीदिति प्राचामुक्तं साम्प्रतं संमान्या, अपि त्वधुनैव सिद्धं यदेतत् काव्यं कुलशेखरस्याथवा राजाश्रितस्य कस्यचित् वासुदेव कवेः कृतिरिति । परन्तु वासुदेवकवेः परिचयाऽवसरे "युधिष्ठिरविजयकाव्यस्यैवोल्लेख आभ्यां विहितः—नलोदयस्य तत्राभिधानमपि न निर्दिष्टम्—इत्यनेनात्र गम्यते इमौ विद्वांसावपि संदिहानावत्र विषये वर्तेत इति । अत्र कारणमेतदेव संभाव्यते यत् निर्मात्रा कुत्रचिदपि स्वपरिचयः स्वकाव्ये नैव प्रदत्तः । अन्यत्रापि तु क्वचित्तत्संस्तवो नोपलभ्यते—तर्हि केवलं कल्पनया विना पुष्टं प्रमाणं किमन्यत् स्यात् । केवलं यल्लिखितं प्रत्नपुस्तकेषु समधिगतं भवेत्तदेव प्रमाणकोटावाश्रयणीयं भवति ।

एवं च मयोपलब्धे नलोदयस्य मूलपुस्तके टीकापुस्तके च अस्य निर्मातुर्नाम प्रत्याश्वासान्ते 'इति श्रीरविदेवविरचितमहाकाव्ये नलोदये दमयन्तीस्वयम्वरोनाम प्रथम आश्वासः ।" द्वितीय आश्वासः इति समुपलभ्यते एवमेवास्य टीकाकर्त्रा रामर्षिणापि "रविदेवस्यैवास्य निर्मातृविषये नाम प्रदत्तम् । तेनैव ज्ञायते यदस्य कर्ता "रविदेवाख्य" एव कश्चित् कविवर इति । किन्तु कोऽयं रविदत्त इत्यत्र पुरातत्त्वविद्भिरेव विद्वद्भिः प्रकाश आपातनीयः । उपलब्धे काव्ये चत्वार एव आश्वासाः चतुर्णामेवाश्वासानां टीका संप्राप्यते, तथापि अस्य महाकाव्यनाम्ना व्यपदेश किम्मूलक इत्यवधारयितुं न शक्यते । प्रथमाश्वासे-दमयन्तीस्वयंवरवर्णनं द्वितीयाश्वासे च बसन्तक्रीडावर्णनं तृतीये च दमयन्तीविलापवर्णनं, चतुर्थे च राज्यप्राप्तिवर्णनमस्मिन् काव्ये संप्राप्यते-महाकाव्यनिर्देशेन महाकाव्यीयगुणान्वितत्वेऽस्य काव्यस्य वैपुल्यमपि संभाव्यते, परन्त्वस्मद् दृष्टिगोचरं त्वेतावदेव समागतम् ।

एतल्लेखनानन्तरं नलोदयस्य सं० १९८९तमे वर्षे रामपुरे मुद्रितमेकं पुस्तकं जयपुरराजकीयपुस्तकालये



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



गताङ्कतोऽनुवृत्तः—

# संस्कृत-भाषा-शिक्षणावश्यकता

[ ले० श्रीउदयवीरशास्त्री, बीकानेर ]

(५) प्रत्येकस्मिन्नुच्चविद्यालये महाविद्यालये च त्वारिंशद्वर्षेभ्यः अल्पायुषः अध्यापकाः अध्यक्षाश्च संस्कृताध्ययनमवश्यं कुर्युरिति सर्वकारेण उद्घोष्येत। न ते पञ्चसु वर्षेषु हिन्दीसंस्कृतयोः समीचीनं ज्ञानं भेरन् अन्यथा ते अग्रिमपाठ्यक्रमे समुचितं स्थानं प्राप्नुयुः, तेषामध्ययनाय अपि विशेषव्यवस्था धेया।

(६) इत एव एतादृशः पाठ्यक्रम निर्णयः यो योतुरूपं उचितकक्षासु स्थाप्येत। मन्वीथाः शिल्पविलये संस्कृताध्ययनमस्माभिः कार्यम्, एतदर्थं एकः दृशः कार्यक्रमः पाठ्यपुस्तकानि च विरच्येरन् येन थमवर्षीयश्छात्रः त्रिषु वर्षेषु चतुर्षु वा संस्कृतस्य ध्वभ्यासं कर्तुं प्रभवेत्। एवं द्वितीयवर्षीयः तदपेक्षया नं तृतीयवर्षीयश्च न्यूनतरं चतुर्थवर्षगतश्च ततोऽपि नतमं इति, परं हिन्दीसंस्कृतयोः साधारणज्ञानं तेषामप्यावश्यकमेव, येन पठनं बाधारहितं प्रचलेत्। एवमेव चिकित्साविज्ञानकलामहाविद्यालयेषु अपि भवितव्यम्। तात्पर्यमेतत् कस्यापि विद्यालयस्य कस्यापि च विषयस्य छात्राय संस्कृतज्ञानमावश्यकम् कर्तव्यम्।

(ग) ये छात्राः उच्चविद्यालयीय (हायरसेकण्ड्री) शिक्षाया अनन्तरं विशेषविषयत्वेन संस्कृतं नेतुं न सहन्ते तेषां कृते एकमावश्यकं प्रश्नपत्रं भवेत्। यस्मिन् किञ्चित्काव्यं किमपि नाटकं, कोऽपि ब्राह्मणोपनिषदादिग्रंथभागः, कतिचन वेदर्चः, किञ्चिच्छास्त्रार्थशास्त्रम् कियच्च विज्ञानम्, एवं प्रौढानुवादनिबन्धालंकाराश्च समाविष्टाः भवेयुः येन उच्चविद्यालयीयपरीक्षोत्तीर्णच्छात्रेभ्यः तेषां ज्ञानं अधिकं भवेत्, पूर्वाधीतस्य च विस्मृतिरपि न जायेत।

(२) (क) संस्कृतप्रधानपाठशालासु संस्कृतस्य प्राधान्यं भवेत्, प्रत्येकस्य च विषयस्य संस्कृतमाध्यमद्वारैव अध्यापनप्रबन्धः करणीयः। अल्पशोऽपि पञ्चमकक्षातः समस्तविषयाः संस्कृतमाध्यमेनैव पाठ्येरन्। सर्वशास्त्राणां पाठ्यक्रमः सुचारु प्रचलेत्, नवीनविचारप्रणाल्या च इतिहासभूगोलगणितविज्ञानादीनां समावेशेन संस्कृतभाषायाः स्वविषयस्य च प्रौढपाण्डित्यं लभमानानां संस्कृतसेविनां विद्या अर्थकरी बोभूयेत। इदमप्यावश्यकम् यत्ते वर्तमानयुगे सम्मान्यपदान्यपि प्राप्तुं प्रभूयासुः, भारतीय-प्रशासकीयसेवायां (I.A.S.), भारतीयवैदेशिकसेवायां (I F.S.), प्रान्तीयसेवायाञ्च I.P.S सैनिकसेवार्थञ्च इच्छानुसारं गन्तुं प्रभवेयुः।

---

दृष्टिपथमवतीर्णम्, तत्र च काव्यकर्ता "महाकवि लिदास इत्युल्लिखितमास्ते, परन्तु प्रसादगुणकवयिभिज्ञानशाकुन्तलादिनिर्मातुरयं कश्चिद् भिन्न एव लिदासः स्यात् इति प्रतीयते, टीकाकारश्च मैथिल ाकरः येन चेदं काव्यं सुबोधिनीटीकया समलंम्. बी० ए० इत्युपाधिधारिणा श्रीजीवारामविद्यागरभट्टाचार्येण परिष्कृत्य संशोधितम्। एवं च परांविभिन्नानिर्मातृटीकाकर्त्रोर्विनिर्णये पुरातत्वविद एव प्रभविष्यन्तीति विवेचनीयम्।

(क्रमशः)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# कुचस्तोत्रम्

[ श्री गजाननशास्त्री, मुगलगांव ]

"कुचयुगमिदमुरसी"ति ब्रुवतां भ्रान्ता मम त्वसौ सखि धीः ।
अहमहमिकया शैशवराज्याहरणाय भूभृतावुदितौ ॥ १ ॥
"एको गोत्रप्रत्यय" इति पाणिनिमुनिमतं ध्रुवं क्षेप्तुम् ।
वक्षस्तव द्विगोत्रप्रत्ययकृत् कुचयुगाच्छलात्कान्ते ॥ २ ॥
तव कुचयुगलस्यासौ चकास्ति चित्राकृतिर्वरारोहे ।
अचलत्वभागपि स्वयमहह मनो मे चलं तनुते ॥ ३ ॥

एतदतिरिक्तं न वयं कमपि प्रश्नं प्रतिवक्तुं समीहामहे परमिदमवश्यमीहामहे यत् पाठ्यक्रमनिर्धारणाय, प्रान्तीयस्तरेण विद्वन्मण्डलं सञ्चेयम्। प्रथमं उच्चविद्यालयीयपाठ्यक्रमः निर्मेयः, ततोऽपि च महाविद्यालयेभ्यः, सहैव शास्त्र्याचार्यश्रेणिपाठ्यक्रमेण सह अन्यविषयाणामध्ययनाय संस्कृते आधुनिकविषयाणां ग्रन्थनिर्माणाय पण्डिततल्लजानां समितिरप्येका स्थापनीया, ग्रन्थनिर्मातॄणां कृतेवेतनमपि समुचितं निश्चेयम्। तथा विश्वविद्यालयेषु संस्कृतसंबंधिगवेषणाकार्यमपि महता समुत्साहेन प्रारभ्येत, ग्रामे ग्रामे च संस्कृतमनिवार्यं क्रियेत।

अवधेयम्—

(१) अस्मन्निर्दिष्टलेखानुसारं संस्कृतप्रसाराय छात्रवृत्त्यादीनां प्रश्न एव नोत्पद्यते। न वयं संस्कृतं केवलं ब्राह्मणभाषां मन्यामहे इयमपि तथैवार्थंकरी यथा पूर्वं आंग्लानामाधिपत्यकाले इंगलिशभाषा आसीत्, किञ्च नेयम् केवलं भाषात्वेनैव ग्राह्या अपितु विषयत्वेनापि ग्रहणयोग्या। किं बहुना अस्माकं तु विचारे विज्ञानरूपेणापि अभिमतेयं सुरभारती। देशस्य प्राणभूता भविष्यती त असंदिग्धमिदम्। अस्यां आयुर्वेदः ज्यौतिषं अर्थशास्त्रम्, वास्तुकला, संगीतकला, वैदिकवाङ्मयञ्च विशेषतो राजन्ते। वैदिकवाङ्मये च प्राणिशास्त्रं, गणितज्ञानं वनस्पतिशास्त्रं, रसायनशास्त्रम्, भौतिकशास्त्रम्, आस्माकीनं निधिभूतं अध्यात्मविज्ञानञ्च प्रतिपदमुपलभ्यन्ते इति स्पष्टमिदं द्रक्ष्यामः। नूनम्, संस्कृतप्रधानशिक्षणालयेषु कौशलकर्म अवश्यं शिक्षणीयम्। यथा सूत्रनिर्मितिः, (तकली कातना) वस्त्रवयनं, तैलनिर्माणं, मधुमक्षिकापालनं गोपालनं, कृषिकर्म इत्यादीनि।

(२) यावत्यः संस्कृतशालाः सन्ति ताः सर्वाः सर्वकारेण स्वयमेव सञ्चालनीयाः तासां सर्वोऽपि व्ययः तेनैव सह्यः, तासां पाठ्यक्रमश्च निर्धारणीयः येन अध्यापकाः सुयोग्याः विद्वांसः स्युः योग्यतानुरूपञ्च तेभ्यः वेतनं दीयेत। संस्कृताध्यापकानामपि शैक्षणिकप्रवृत्तेरायोजनम् (सेमीनार) भवेत्, बालचरकार्यक्रमाश्च। संस्कृतछात्रा अपि राष्ट्रियसैनिकदले (एन सी सी.) लोकसहायकसेनादले च (ए० सी० सी० भागं गृह्णीयुः। केनापि प्रकारेण संस्कृतपाठशालानां स्थितिः आंग्लोच्चविद्यालयेभ्यः महाविद्यालयेभ्यश्च विषमा न्यूना वा न स्यात् तासां भवनान्यपि निजान्येव स्युरिति।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


सरभस मसकृत् कृतमपि मर्दनमेतत् त्वदीयकुचयुगलम् ।
वरवर्णिनि सहते यद् बीजं तत्रैनयोः क्षमाभृत्त्वम् ॥ ४॥
सुन्दरि कुचयुग्मस्य स्थानेऽनुल्लासि पुष्करत्वं ते।
भाति नखक्षतमिषतो यदत्र चन्द्रः कलाशेषः ॥ ५॥
"ललने नाभिसरस्या उपकण्ठे क्रीडनं समातनुतः।
कोकस्त्रीपुंसौ कुच-युगापदेशा"न्मतिर्मेऽसौ ॥ ६॥
करपीडनमहमनयानुभवितुमस्यास्मि वञ्चितेऽतीव ।
स्वयमभिलष्यति मामककरपीडन मुरसिजद्वयी सखि ते ॥ ७॥
हस्तेन कञ्चुलिकया रहितां कर्तुं कुचद्वयीं यावत्।
उद्युञ्जे सखि तावत् स्प्रष्टुमसौ मां विहस्तमातनुते ॥ ८॥
नूनं करिशिशुकुंभौ वक्षोजौ देवि तावकावेतौ।
कर एष मत्तकाशिनि यदेनयोरन्तिके सरति ॥ ९॥
पाणिनितन्त्रेणासौ विरुद्ध्यते 'प्रत्ययः परश्चे'ति।
क्षिपतीति कुचभरः सखि लकारपूर्वं कुचं सदा भोगी ॥ १०॥
अन्यथयन्तौ धातुर्नियमं ध्रुवमात्तगन्धमातनुतः।
महिले नेत्रमपीमावनुक्षणं तव कुचौ प्रवर्धिष्णू ॥ ११॥
दृष्टं निमित्तहेतोः कार्यस्य च जगनि पार्थक्यम्।
चित्रं जयति स्तनयोः कलशत्वं चक्रता च कामिनि ते ॥ १२॥
तथ्या जनोक्तिरेषा 'न वितृष्णो जायते समृद्धोऽपि।'
कुरुते कुचयुगमेतत् सहारमपि मन्मनोऽपहारं यत् ॥ १३॥
चित्रं तावक एष स्तनभारः कञ्चुकी दयिते ।
दृक्पथमवतीर्णोऽपि प्रसभं सम्मोहनं कुरुते ॥ १४॥
स्थितिरुरसिजभारस्य स्थाने पारे वचस्त्वदीयस्य।
वररुचिरेष प्रथितो यतसर्वत्राम्बुरुहनयने ॥ १५॥
चरवर्णिनि कुचभारो भवदीयोऽसौ जनार्दनो नूनम्।
निर्भरमेनं भद्रं श्रीर्यदसौ संपरिष्वजति ॥ १६॥
एष तव स्तनभारः कञ्जमुखि स्मरहरो नूनम्।
हारावलिमिषतो यच्छिरसा निर्जरधुनीं वहति ॥ १७॥
अञ्चेद्वाचमिमां यो रसिकवरः सानुरागममुमनिशम्।
श्रीसिन्धुरमुखकलिता ललितादेवी कुचद्वयी पायात् ॥ १८॥

---


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# वासन्तिकविनोदवीथी

एकस्यां सभायां स्त्रीणां प्रतिपदमुच्छृङ्खलताम्, शिक्षायाम् आचारव्यवहारादिषु च असमंजसं स्वातन्त्र्यं समालोचयन्नेकः सभ्यः समभाषत—"साम्प्रतं स्त्रीणां स्वातन्त्र्यमतिभूमिं गतम्। इमाः किल आवश्यकतातोऽप्यधिकं स्वतन्त्रचेष्टाः समजायन्त। नैताः सम्प्रति कांचिन् मर्यादां स्थापयितुं वाञ्छन्ति। साधारणतया किल समर्हणीयाऽस्माकं स्त्रीजातिः किन्तु सेयमुच्छृङ्खलता नितरां निवारणीया नाम नायकैः समाजस्य। ममाधिकारे यदि तदिदं स्वातन्त्र्यं समुद्भवेत्तर्हि अर्द्धचन्द्रं प्रदाय तदिदं सत्कुर्याम्।"

एका महिला सरभसमुत्थाय सोत्तेजनमवदत्—"महाभागेन किमिदमुदीरितम्? स्त्रीजातेरेतावान् अपमानः! सोऽपि मध्येसभम्!! हृदयेऽत्यन्तं खेदं च विषादं चामर्षं चाऽनुभवामि। किमहं कुर्याम्, मदीयो भर्ता यद्येवंविधः स्यात्तर्हि विषं दत्त्वा तत्कालं तमहं समापयेयम्।"

स महाशयः सस्मितमवादीत—"यद्येवंविधाया धर्मपत्न्या भर्तृत्वं मद्भाग्येऽभविष्यत् तर्हि स्वयमहं निजजीवनं समाप्तमकरिष्यम्, न किल भवत्या हस्तेन विषदान-पुण्यस्य प्रसङ्गः, समापतिष्यत्।"

× × × ×

भिक्षुकसाधुः—(श्रेष्ठिनं प्रति) भाग्यवन्! देहि किञ्चित्। सोऽयं पुण्यतमः प्रातः कालः।

श्रेष्ठी—(साधोः परिहासं कुर्वन्) भोः निष्कर्मणां कृते अत्र किं वर्तते? धर्मनाम्ना आडम्बरं ये रचयन्ति, तेभ्यो दातव्यं नास्त्यत्र किञ्चित्। भवतः समीपे एव यदि किञ्चित्स्यात्तर्हि स्थापयाऽत्र, येन व्यापारकार्यं क्रियेत।

साधुः—भाग्यवन्! मत्समीपे किं गवेषयसि? इदमस्ति मे कोपीनमात्रम्। एतदभ्यन्तरे यद् वर्तते तत्कामं गृह्णातु भवान्।

× × × ×

वाकीलः—(पण्डितं प्रति) भवता कथं ज्ञातं यन् ममाऽयं पुत्रः अग्रे गत्वा प्रसिद्धो राजनैतिको भविष्यतीति!

पण्डितः अयं वयसः प्रारम्भे एव तथाविधा वार्ताः करोति याः श्रवणे सुखदाः, अतीव उत्साहवर्द्धिन्यो भवन्ति, किन्तु तदनुसारं कर्तव्यं न कदाचिदपि विलोकितम्। वार्ताः सुबहुतराः करोति किन्तु तासु तत्त्वं न किञ्चिदपि भवति।

× × × ×

होटलस्य प्रबन्धकर्ता—(सीनेमाऽभिनेत्रीं प्रति) महोदये! नागदन्तस्थितः× सोऽयं हारो विस्मृतो भवत्या। सह नीयतां सोऽयम्।

अभिनेत्री—नाऽयं हारः। इयं हि विवाहे प्राप्तानाम् अभिज्ञानाऽङ्गुलीयकानां मालामात्रम्।

× × × ×

मैडममहोदया—आधिकरणिकमहाशय! ('रजिस्ट्रार!') राजेष्ट्रीकरणपुस्तके मम विवाहस्योल्लेखसूचनापि अङ्कनीया भवता।

रजिस्ट्रारः—सम्यक्। कच्चित् पूर्वमपि विवाहः संवृत्तः श्रीमत्याः? यदि संवृत्तस्तर्हि कदा केन, इति परिज्ञानमावश्यकम्। तस्य सूचनात्राऽपि अङ्कनीया स्यात्।

मैडम०—एतत्तु मम स्मरणशक्तेः परीक्षणमिव। यद्यहमिदमज्ञास्यं तर्हि दैनन्दिनीमेव ('डायरी') सह आनेष्यम्। नाहं स्वल्पकाले परिगणय्य वक्तुं शक्नुयाम्। विस्तृता संख्या।

× "खूंटी"।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



बालोपयोगि-लघुकथा —

# सिंहकारक-मूर्खब्राह्मणत्रय-कथा

( दीनानाथत्रिवेदी 'मधुपः' जयपुरम् )

## संस्कृते

[ स्वाभाविकी बुद्धिः बहुपुस्तकपठनाऽभावेऽपि वरम्। परं विद्या—यत्र केवलं पुस्तकरटनं वर्तते, सा न वरम्। विद्याया बुद्धिः उत्तमा भवति। विद्यावन्तोऽपि बुद्धिहीना विनश्यन्ति। यथा ते सिंहकारकाः मूर्खाः विनाशं गताः। यथा—]

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः परस्परं मित्रभावमुपगता वसन्ति स्म। तेषां त्रयः शास्त्रपारंगताः, परन्तु बुद्धिरहिताः। एकस्तु बुद्धिमान्, केवलं शास्त्र-पराङ् मुखः। अथ तैः कदाचित् मित्रैः मन्त्रितम्—'को गुणो विद्यायाः, येन देशान्तरं गत्वा भूपतीन् परितोष्या अर्थोपार्जना न क्रियते। तत्पूर्वदेशं गच्छामः।' तथा-नुष्ठिते किञ्चिन्मार्गं गत्वा तेषां ज्येष्ठतमः प्राह— 'अहो! अस्माकमेकश्चतुर्थो मूढ, केवलं बुद्धिमान्। न च राजप्रतिग्रहो बुद्ध्या लभ्यते—विद्यां विना। तस्मान्नैव स्वोपार्जितं दास्यामि। तद्गच्छतु गृहम्। ततो द्वितीयेन अभिहितम्—भोः सुबुद्धे! गच्छत्वं स्व गृहम्। यतस्ते विद्या नास्ति।

ततस्तृतीयेन अभिहितम्—अहो! न युज्यते एवं कर्तुम्। यतो वयं बाल्यात् प्रभृति एकत्र क्रीडिताः। तदा-गच्छतु महानुभावोऽस्मदुपार्जितवित्तस्य समभागी भवि-ष्यतीति। आगच्छतु एषऽपि—इति। तथानुष्ठिते तैः मार्गाश्रितैः अटव्यां कतिचिद् अस्थीनि दृष्टानि। ततश्च एकेन अभिहितम्— 'अहो! अद्य विद्याप्रत्ययः क्रियते।

## हिन्दी भाषायाम्

[ स्वाभाविक बुद्धि अनेक पुस्तकों के न पढने पर भी अच्छी है। परन्तु विद्या-जिसमें केवल पुस्तकों की रटाई है. वह अच्छी नहीं। विद्या से बुद्धि उत्तम होती है। पढे लिखे भी बुद्धिहीन नष्ट हो जाते हैं। जैसे वे सिंह को बनाने वाले मूर्ख नाश को प्राप्त हो गये। जैसे—]

किसी नगर में चार ब्राह्मणों के पुत्र आपस में मित्रता को प्राप्त हुए रहते थे। उनमें तीन शास्त्रों के पारंगत थे, परन्तु बुद्धिहीन थे। एक तो बुद्धिमान् था, केवल शास्त्र पढा लिखा नहीं था। इसके बाद उन मित्रों ने किसी समय सलाह की-विद्या से क्या फल है, जिससे देशान्तर में जाकर राजाओं को प्रसन्न करके धन इकट्ठा नहीं किया जाता है। इसलिए पूर्व-देश को चलते हैं वैसा करने पर कुछ रास्ते में जाकर उनमें सबसे बड़े ने कहा—आश्चर्य है, हमारे में चौथा एक मूर्ख है, सिर्फ बुद्धिमान् है। विना विद्या के केवल बुद्धि से ही राजा का दिया हुआ धनादि मिलता नहीं है। इस कारण मैं अपना इकट्ठा किया हुआ (धन) नहीं देदूँगा। अतः वह घर को जाय। पीछे दूसरे ने कहा—अरे अच्छी बुद्धिवाले जा तू सामने घर को, क्योंकि तेरे पास विद्या नहीं है।

फिर तीसरे ने कहा—अरे, ऐसा करना उचित नहीं है। क्योंकि हम सब बचपन से एक जगह(साथ) खेले हुए (मित्र) हैं इस कारण महानुभाव यह भी हम से इकट्ठे किये गये धन का बराबर का हिस्सादार होगा। यह भी आजाये।' वैसा करने पर रास्ते चलते हुए उन्होंने वन में कुछ हड्डियां देखी फिर एक ने कहा—अहो, आज विद्या के प्रभाव का प्रदर्शन किया जाता है। ये कुछ मरे हुए प्राणी की हड्डियां हैं, तो विद्या के



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कतिचित् एतानि मृतसत्त्वस्य अस्थीनि दृष्टानि । तद् विद्याप्रभावेण जीवनसहितानि कुर्मः । अहमस्थिसञ्चयं करोमि । ततश्च तेनौत्सुक्यादस्थिसंचयः कृतः । द्वितीयेन चर्ममांसरुधिरं संयोजितम् । तृतीयोऽपि यावत् जीवनं संचारयति तावत् सुबुद्धिना निषिद्धः भोः, तिष्ठतु भवान्, एष सिंहो निष्पाद्यते, यद्येनं सजीवं करिष्यति-ततः सर्वानपि व्यापादयिष्यति ।' इति तेनाभिहितः स आह—धिङ् मूर्ख ! नाहं विद्याया विफलतां करोमि ।' ततः तेन अभिहितम्—तर्हि प्रतीक्षस्व क्षणं यावदहं वृक्षमारोहामि । तथाऽनुष्ठिते यावत्सजीवः कृतः तावत् ते त्रयोऽपि सिंहेनोत्थाय व्यापादिताः । स च पुनर्वृक्षात् अवतीर्य गृहं गतः ।

प्रभाव से जीवन-सहित करें । मैं हड्डियों को एकत्रित करता हूँ । फिर उसने उत्सुकता से हड्डियों को एकत्रित कर दिया । दूसरे ने चर्म, मांस और रुधिर का संचार कर दिया । तीसरा भी—जब तक जीवन का संचार करता है, तब तक उस बुद्धिमान् ने मना कर दिया—'आप ठहरिए, यह सिंह बनाया जा रहा है, यदि इसको प्राणयुक्त करेंगे—तो (यह) सभी को मार डालेगा ।' इस प्रकार उससे कहा गया—वह बोला—धिक्कार है मूर्ख ! मैं विद्या को निष्फल नहीं करता । फिर उसने कहा—तो थोड़ी देर इन्तजार करो, जब तक मैं वृक्ष पर चढ जाऊं । वैसा करने पर ज्यों ही वह (सिंह) प्राणसहित किया गया, तब तक उस सिंह ने उठकर उन तीनों को मार डाला और वह पेड़ से नीचे उतर कर घर को चला गया ।

*
**


हरिनगर सूगर मिल्स लि०

फैक्टरी

हरिनगर (एन० ई० रेल्वे) (चम्पारन जिला) उत्तर बिहार

दूरभाषयन्त्रम्—

'मर्यादा-रामनगर (चम्पारन)'

प्रधानकार्यालय :—

२०७, कालबादेवी रोड, बम्बई-२

दूरभाषयन्त्रम्—

'क्रिसूगर' (बम्बई)

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

* प्योअर, * फर्स्टक्लास, * क्रिस्टल * केन सूगर




CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## हास्यालापाः

( श्री विनोदी जयपुरम् )

कश्चन रुग्णो गृहमागतं वैद्यमवोचत्—वैद्यराज ! ग्रहं सर्वा अपि वार्ताः क्षणेनाऽपि विस्मरामि । रोग-यास्य दूरीकरणोपायोऽस्ति कश्चिदिति । वैद्यः—यद्येवं, र्हि ममाऽत्रागमनशुल्कं कृपया पूर्वमेव दीयताम् । न्यथा तदपि भवता विस्मृतं स्यात् कदाचिदिति ।

० ० ० ०

क्रोडन् कश्चन बालश्चतुराणकीं(चवन्नी मुखे निधाय नगलितवान् । एतद् दृष्ट्वा दीना तन्माता निजपतिम-ादीत्—नाथ ! डाक्तरः सत्वरं समाहूयताम् । क्रीडता-ानेन चतुराणकी निगलितेति । ततस्तत्पतिदेवोऽप्यवोचत् ा तु घृष्टा (घिसी हुई) आसीत् अतो न कापि हानि-रिह जातेति ।

मोहनोऽब्रवीत्—ग्रामेऽस्मिन् न कोऽपि जनस्तावन्मम मातुलस्य बालमपि वक्रीकर्तुं समर्थः इति । तदा सोहनस्तमपृच्छत्—किं स भीम इव भीमकायो महाबलवान् वर्तते ? इति । मोहनः प्रत्यवोचत्—नहि, स खल्वाटोऽस्तीति ।

० ० ० ०

कश्चनैको जनः 'केशकर्तनालयं' गत्वा नापितमवदत्—महाशय । भवता गर्दभस्यापि केशकर्तनं विहितं कदाचित् ? इति' नापितः प्रत्युत्पन्नमतिः प्रतिवचनमयच्छत्—नैवं मया कदापि कृतम् । परं श्रीमान् उपविशतु, प्रयत्नमनुतिष्ठामीति ।

× × × × ★

भारतीय-औषधानां सर्वाधिकं बृहत् विश्वस्तं निर्माणकेन्द्रम्

श्री वैद्यनाथ-आयुर्वेद-भवनं

[प्रायवेट लिमिटेड]

कलिकाता ● पटना ● झांसी ● नागपुरम्

सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्तानां भेषजानां
सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे

निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्येन भेषजानीमानि लभ्यन्ते



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## सम्पादकीयम्—

काश्मीरदेशश्चिराद् भारतस्यैवाङ्गम्, भारतस्यैव संपत्तिः। हिमालयाञ्चले वर्तमाना इमे काश्मीराश्चिरकालाद् भारतेनैव संबद्धाः, भारतस्यैवांशभूताः। आर्या इमे मानवीयसभ्यताप्रवृत्तेरादिगुरवः। एतैरेव सभ्यतायाः पदाङ्काः सर्वतः पूर्वं भूमौ स्थापिताः, वर्तमानाः सभ्यंमन्याः पश्चिमदेशीयाः क्रमक्रमेण येषु अग्रसरा भूत्वा संप्रति सर्वसभ्यानां शिरोमणित्वेन आत्मनि अभिमन्यन्ते। आर्याणांमभीषामादिनिवासः पुरा हिमालयाञ्चले आसीदिति पश्चिमदेशीयैरन्वेषकैरेव समर्थितम्। लोकमान्यतिलकमहोदयादिभिश्चापि भारतीयानामार्याणामादिनिवासः पुरा तस्मिन्नेव प्रान्ते साधितोऽभूत्। किञ्च तदिदं तथ्यमार्याणां चिरप्रचलितात् ऋतु-मासादिगणनादपि सुस्पष्टं सिध्यति। आर्याणां वसन्ततुश्चैत्र-वैशाखै नाम मासौ। एभिर्दक्षिण-मध्यभारतनिवासिभिर्द्रष्टव्यं किमु वैशाखमासे वसन्तर्तोरनुभवस्तेषां भवति? राजस्थाननिवासिन एव वा प्रष्टव्याः, किमु अक्षयतृतीया-वैशाखी पूर्णिमा वा तेभ्यो वसन्तर्तोरानन्दमनुभावयति? वैशाखी पूर्णिमा सुस्पष्टं राजस्थाने ग्रीष्मर्तुमनुभावयति। साधारणजनतायां 'वैशाखज्येष्ठौ' ग्रीष्मस्याऽनुभावकौ। वैशाखस्य वसन्ते परिगणनमार्याणां हिमाचलप्रान्तवासित्वं सुस्पष्टं प्रत्याययति। हिमाचलाऽञ्चलराजिताः काश्मीराश्च अनन्तकालाद्भारतीयानां सर्वस्वभूताः।

गवेषणाप्रवणैरन्वेष्टव्यं यद् भारतीयानामार्याणां संस्कृतिश्चिरकालात्काश्मीरेषु प्रसिद्धा। 'प्रत्यभिज्ञादर्शन' नाम्ना माधवाचार्यादिभिः प्रसेधितं शैवशास्त्रं काश्मीरेष्वेव जन्म लेभे। एतच्छास्त्रस्य आदिप्रवर्तकौ सोमानन्दवसुगुप्तौ काश्मीरवासिनावेव। 'ईश्वरप्रत्यभिज्ञा' ग्रन्थस्य मूलप्रणेता आचार्यः श्रीमदुत्पलदेवः, तट्टीकाया

फोन— २६११६३ ग्रामस 'हिन्द'ग्राम

# हिन्द मिल्स लिमिटेड

१५, दुगल रोड, बैलार्ड एस्टेट

बम्बई १

निर्मातारः—

कञ्चुकवस्त्रं (शर्टिंगस), शय्यावस्त्र शीटिंगस-लिपाई), लम्बवस्त्र (लांगक्लॉथ)
ड्रिलस, मुलस, क्रेप-मुजरी वस्त्राणां धोतानां, शाटिकानाम्,
'काकेट चिन्हितानां' तथा स्पेशल फाइबर
सूत्राणां च।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मर्शिन्या निर्माता श्रीमदभिनवगुप्तोऽपि च काश्मीराभिजनावेव। किं विस्तरेण, काश्मीराश्चिरकालाद् भारताङ्गभूताः। अत्रत्याः कवयः परमाभिमानेन भारतीयसंस्कृतेर्मूलभूतां भगवतीं सरस्वतीं तत्राऽभ्यर्चयन्ति। किं बहुना, काश्मीरदेशं ते शारदादेशमेव प्रत्यभिजानते। कविमूर्द्धन्ये बिल्हणः परमगर्वेण जल्पति यत् संस्कृतकवितानां प्ररोहः काश्मीरेष्वेव स्वाभाविकः। यतो हि कुङ्कुमकेसराः कविताप्ररोहाश्च मिथः सहोदराः। ते काश्मीरेश्वेव प्ररोहन्ति। आह सः--

सहोदराः कुङ्कुम केसराणां
भवन्ति नूनं कविताविलासाः।
न शारदादेशमपास्य येषां
मयाऽद्य दृष्टः क्वचन प्ररोहः॥

काश्मीराणां भारताङ्गतासाधनाय एतावती भूमिका किमिति निबध्यते इति भवेद् भूयसां वितर्कः। किन्तु पापीयसा कलिना, नवशिक्षितराजनीतिपटुभिश्च सोयं व्यतिकरः समुपस्थापितो यत्काश्मीरान् बलादाच्छेत्तुं संप्रति पाकस्थानीया मुखमुत्थापयन्ति। अवश्यमत्र गुप्तरूपेण पश्चिमदेशीयानां गौराङ्गानामिङ्गितं खेलति। ते हि 'सुरक्षापरिषद्' नाम्ना कूटनीतिक्रीडनिकायां काश्मीरस्य प्रश्नं प्रचालयन्ति किन्तु सुस्पष्टं तथ्यमिदमेवास्ति यत्काश्मीराः पूर्वतः एव भारतान्तर्भूताः। तेषां जनमतमपि भारते विलयमेव कामयते स्म, कामयते च। आङ्गलैर्यदा भारतात् स्वशासनं पृथक् कृतं तदा सुस्पष्टं घोषितमभूद्--'यो' देशः स्वतन्त्रः स्थातुमभिलषति स तथा सूचयेदन्यथा यत्र देशे स विलयनमिच्छति तत्र सोऽन्तर्भावमयेत्' एतदनुसारं काश्मीरा भारते एव स्वस्थितिं सूचयांचक्रुः। अद्यावधि च काश्मीरा भारतान्तर्भुक्ता एव। सन्ति यद्यपि तत्रत्याः प्रजा भूयस्यो मोहम्मदाः, तथापि काश्मीरदेशं भारतान्तर्भुक्तमेव वाञ्छन्ति। किमधिकम्, वर्तमानकालेऽपि काश्मीरवासिन्यः प्रजाः, तासां प्रबन्धकाश्च भारते एव अन्तर्भावं घोषयन्ति। संवादपत्रपाठकैः परिज्ञातमेव यद् १८फर्वरीदिने काश्मीरराजधान्यां 'श्रीनगरे' काश्मीरप्रधानमन्त्रिणा बख्शो गुलाममुहम्मदेन सुस्पष्टं संघोष्य सूचितं यत् 'काश्मीराणां पूर्णतया विलयनं भारते पूर्वमेव समभूत्। काश्मीरजनतायाः प्रतिनिधिसभापि एतत्तथ्यं निजमुद्राप्रदानेन स्वीकरोति। एवं स्थितौ भारतात्पृथक्करणार्थं यदि राष्ट्रसंघः स्यात्, संपूर्णविश्वस्य अन्या वा काचित् शक्तिः स्याद्, यदि हस्तक्षेपं करिष्यति तर्हि वयं प्रस्तावशतमपि न स्वीकरिष्यामः।"

सुस्पष्टमिदं सिध्यति यत्काश्मीराः सर्वदा भारतान्तर्गता आसन्, अधुनापि तथैव सन्ति, वाञ्छन्ति च काश्मीरवासिन्यः प्रजा अप्येतदेव। अस्मिन्काले गौराङ्गकूटनीत्या राष्ट्रसंघस्य यच्चक्रं प्रचालितं तदेतत्तेषां विश्वप्रसिद्धं दुष्टनीतिचक्रमेव नात्र रहस्यमन्यत्। भारतीयाधि..रिणः सावधाना भूत्वा व्यवहरेयुरिति समयप्राप्तमेव। काश्मीराणां भारतान्तर्गतत्वं सर्वतः सर्वदा सुप्रसिद्धम्। ये महाभागा राजनीतिविषये न कदाचित्प्रवर्तन्ते तेऽपि काश्मीराणां भारतान्तर्गतत्वस्य विरोधं यदि दूरतोपि शृण्वन्ति तर्हि तेऽपि खिन्ना भूत्वा स्वस्य स्वमतं प्रकाशयन्ति।

'संस्कृतपण्डिताः प्रचलत्स्वपि देशीयविषयेषु न मनाङ् मनोयोगं ददति' इति सर्वैः संघोषितम्। किन्तु फर्वरीमासस्य १७ तारिकायां "वाराणसेयसंस्कृतपरिषदः" बाँसफाटकस्य राममन्दिरे महदेकं संमेलनमभूत् यत्र "संस्कृतभाषा भारतस्य सुचिरात्सर्वस्वभूता"



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ❀ सूक्ति-सुधा ❀

परेषां क्लेशदं कुर्यान्न पैशुन्यं प्रभुप्रियम्।
पैशुन्येन गतौ राहोश्चन्द्रार्कौ भक्षणीयताम् ॥१॥

अपने स्वामी को चाहे, प्रिय लगे किन्तु दूसरों को क्लेश देनेवाली चुगली प्रभु के पास कभी न करे। चुगली करने से सूर्य और चन्द्रमा भी राहु के भक्ष्य बन गये। [सूर्य चन्द्र के बीच राहु (दैत्य) अमृत पान के समय आ बैठा था। इसकी शिकायत करने से विष्णु ने गर्दन काटकर राहु केतु दो कर दिये किन्तु सूर्य चन्द्र आज तक राहु से ग्रसे जाते हैं ॥१॥

हितोपदेशं शृणुयात्कुर्वीत च यथोदितम्।
विदुरोक्तमकृत्वाऽभूत्कौरवः शोकशल्यभाक् ॥२॥

हितकारी मित्रों का हितकारक उपदेश सुने और और उसके अनुसार कर्तव्य करे। हितचिन्तक विदुर का उपदेश नहीं सुनकर, तथा उसके माफिक नहीं करके कौरव (कुरुवंशी धृतराष्ट्र, दुर्योधन) शोकरूपी बाण से बेधा गया। अर्थात् कुल क्षयरूपी दुःख से पीड़ित हुआ ॥२॥

मूर्खशिष्योपदेशेन दुष्टस्त्रीभरणेन च।
द्विषतां संप्रयोगेण पण्डितोप्यवसीदति ॥३॥

मूर्ख शिष्य को उपदेश देने से खराब स्त्री के भरणपोषण से, वैरियों का साथ करने से, अर्थात् वैरी की सलाह के अनुसार चलने से पण्डित भी पराजित होता है उसे भी अन्त में नीचा देखना पड़ता है ॥३॥

दूरस्थं जलमध्यस्थं धावन्तं धनगर्वितम्।
क्रोधवन्तं मदोन्मत्तं नमस्कारेऽपि वर्जयेत् ॥६॥

दूर देश में स्थित हो, जल के बीच में स्थित हो, दौड़ता हो, जिसको धन का घमण्ड हो, क्रोधी हो, नशे आदि से मस्त हो, ऐसे पुरुष को नमस्कार से भी अलग रखे, अर्थात् नमस्कार तक न करे ॥४॥

---

एतस्या उत्थानं देशस्य हिताय। यदि कश्चित् शक्तिरेतस्मिन् विषये प्रतिबन्धिका भवेत्तर्हि नैतद्भारतहिताय न चैतत् तत्सेविनामनुमतेन। संस्कृतशिक्षकाणां वेतनस्तरं अन्यशिक्षकेभ्यः किञ्चिदपि न्यूनं न वयं सहामहे। न चैतदुचितमेव। एतदुत्तरं काश्मीरसमस्यायाः संबन्धे प्रस्तावः श्रीगोपालचन्द्रमिश्र एम्० ए० महाभागेन समुपस्थापितो यत् काश्मीरा भारतस्य अविभाज्यभङ्गम्। अद्यापि वयम् उपनयनसंस्कारसमये काशीस्था अपि उपनीतं बालकं काश्मीरेषु अध्ययनार्थं प्रेषयन्तः काश्मीराणां भारतीयसंस्कृतेः केन्द्रत्वं प्रतिष्ठापयामः। उव्वटमम्मट-कैयटादयः काश्मीरका एवासन् येषां संस्कृतसाहित्ये महद्दानम्, गौरवं च। अतएव काश्मीराणां भारते एव विलयं सर्वात्मना वयं समर्थयामहे। सर्वे च संस्कृतपण्डिताः काश्मीरसुरक्षायै सर्वात्मना संनद्धा इति।

मन्ये एवं विधं सर्वमपि संकलितं तथ्यं परिज्ञाय भारतीयाः शासनसूत्रधाराः सर्वतः समुचितं समाचरेयुरिति किमधिकं विस्तरेण।

★

प्रकाशक—जयबहादुरसिंह पता—भारतीभवन, गोपालजी का रास्ता, जयपुर

मुद्रक—राजस्थान प्रिंटिंग वर्क्स, किशनपोल बाजार, जयपुर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

## संस्कृतस्य प्रमुखं मासिकपत्रम्

spirogyra

spirogyra



किरीटकान्त्या लसदुत्तमाङ्गा,
गृहीतकुम्भैः करिभिः स्नुताङ्गा।
लोकानपाङ्गांशुभिरार्द्रयन्ती,
स्यान्मङ्गलाढ्या जगतां रमेयम्॥

प्रथमोऽङ्कः

वार्षिकमूल्यम् ४) चतस्रो मुद्राः, एकप्रते
चत्वारिंशत् नवपणाः (४० नये पैसे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# विषय-सूची


| क्रम सख्या | लेखाः | लेखकाः | पृष्ठ |
|---|---|---|---|
| १. | पद्मालये मातः ! | सम्पादकः | |
| २. | अभिनववत्सरारम्भः | " | |
| ३. | भारती-विनयः | श्रीहरिशास्त्रीदाधीचः जयपुरम् | |
| ४. | आह्वानम् | श्रीश्यामनन्दनशास्त्री | |
| ५. | दीपावली-तत्त्वम् | श्रीघनश्यामचंद्रशास्त्री, लक्ष्मणगढ़ (सीकर) | |
| ६. | त्रयस्तमाखुव्यसनिनः | श्रीगणेशरामशर्मा, झालावाड़ | |
| ७. | महाकविकालिदासः | श्रीहीरालालपांडे, भोपाल | |
| ८. | स्वतन्त्रे नाम भारते शिक्षा कीदृशी भवेत् ? | श्रीमहेशदत्तः, पीलीभींत | |
| ९. | कविकुलगुरोः कालिदासस्य स्मारकम् | श्रीवासुदेवनागेशशास्त्री, बम्बई | |
| १०. | अनङ्गदा प्रहसनम् | श्रीजग्गूवकुलभूषणः, यादवगिरिः | |
| ११. | प्रातरुद्बोधनं | श्रीहरिशास्त्रीदाधीचः, जयपुरम् | |
| १२. | द्राक्षा-मृद्वीका | श्रीकन्हैयालालभेड़ा, बम्बई | |
| १३. | संस्कृतसमाचाराः | सह सम्पादक | |
| १४. | सूक्ति-सुधा | " | |


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एम. ए.
जयपुर

# भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः—
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर

वर्षम् ९ | कार्तिकशुक्ला प्रतिपद्, सं० २०१५ | अङ्कः १

## पद्मालये मातः!

—सम्पादकः

अये पद्मालये मातर्दयातः पाहि दीनं माम् ।
त्वरां वीत्स्व संसारेऽद्य निःसारे निलीनं माम् ॥१॥

मुग्धेन्दीवरसुन्दरे नयने सिन्धुकुमारि,
यदि धत्से, दारिद्र्यमपि तत्र न चाऽन्तिकचारि ।
गलत्करुणया घनालीनं विजीनं पाहि दीनं माम् ॥२॥

दृष्यद्धनततिदुर्वचननिचयनचिरनिर्वेदि ।
मम मानसमिदमिन्दिरे ! बत बहुतरपरिखेदि ॥
त्वमेवाऽऽख्याहि पन्थानं भवाऽरण्याऽध्वनीनं माम् ॥३॥

तव पदसरसिजरजसि यदि मानसमिदमुपयाति ।
सततमितरचिन्तनमपि प्रायः सपदि न भाति ॥
अये मथुरापतेः कान्ते ! त्वमन्ते पाहि दीनं माम् ॥४॥

—"गोविन्दवैभव" नामकाद् भक्तिकाव्यात्

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अभिनववत्सरारम्भः

संस्कृतसेवां प्रति सदैव सहृदयाः पाठकमहोदयाः !!

संचिकामिमामारभ्य श्रीमत्सेवायां चिरात्प्रमोदमाविन्दती सेयं 'भारती' नवमे संवत्सरे पदमादधातीति भवेदेव विदितं तत्रभवताम्। अष्टसु वर्षेषु क्रमादुन्नतिमाबिभ्रती सेयं 'भारती' पाठकमहाभागानां मनोऽभिरुचितां सेवामपि संपादयामासैव। सुरभारतीसंबद्धान् तत्तत्प्रान्तेषु जायमानान् नवीनसंवादान् सेयं संकलयामास। देववाणीसेवने सानुरागान् सहृदयपण्डितान् संनिवेद्य नानाविधान्निबन्धानियं संजग्राह। प्राचीनेतिहासनिपुणानां विदुषामैतिहासिकतथ्यपूर्णा नानाविधा मनोरमकथाः सेयं समग्रहीत्।

संस्कृतवाङ्मये प्रवेशमभिलषतां छात्राणामभिलषितमालक्ष्य तादृशानपि प्रबन्धानियं प्रकटयामास, येभ्यः शिक्षमाणानामनायासमेव संबभूव संस्कृताध्ययनेऽभिरुचिः। ये किल संस्कृतभाषामिमां विद्यालयेषु परिशीलयन्ति तेषामुत्साहसंवर्द्धनार्थं तैर्लिखितान् निबन्धान्, बालोपयोगिनीर्लघुकथाश्चाऽपि सेयं प्रकाशयामास। अत एव हि सोत्साहमितस्ततः प्रदेशेभ्यः प्रेषयामासुस्तत्तादृशीः कथाः किशोर–कुमाराः! अनेन हि संस्कृतभाषाप्रावीण्येन सह निबन्धलेखनाऽभिरुचिरपि तेषां प्रवृद्धिमभिययौ—इति हि विदितमभूत्तत्तेषां हितैषिमहोदयानां सकाशात्। "म्यम्माजगामधिकृत्य" इत्यादयो नवभाषापरिचायकाः, श्रीमल्लिनाथचौमालस्य गवेषणापूर्णाश्च कतिपये लेखाः अप्यनया प्रकाशिताः।

अवसराऽनुसारं प्रौढनिबन्धानपि यतस्ततः प्रकाशयत्येव सेयं 'भारती।' किन्तु बहूनां महाभागानामितोऽप्यधिकानां प्रौढप्रबन्धानां प्रकाशनाय प्रबभूवाऽऽग्रहः। किन्तु सांप्रतं स्वतन्त्रे एव किम्, सर्वतः स्वतन्त्रेऽस्मिन् भारते शिक्षितानां मनोऽभिरुचिः किंमुखा प्रवर्तते इति हि किञ्चिदवधानेन निरीक्षणीयं भवेत्। पश्चिमदेशीया गौराङ्गमहाभागाः इतः प्रस्थिताः, किन्तु तेषां शिक्षामन्त्रः, मन्त्रस्य अपूर्वः प्रभावश्च भारते नाऽशतोऽपि न्यूनीभूतः। प्रत्युत कदाचित् कदाचित् प्रवृद्ध इव संलक्ष्यते। नवीनाः, शिक्षमाणाश्चाऽपि सर्वे प्राचीनामार्यनीतिम् अन्ययैव दृष्ट्वा संप्रति समालोचयन्ति। शिक्षायाः प्राचीनमुद्देश्यं न ते सांप्रतमनुमन्यन्ते।

युगानुसारं शिक्षायाः प्रगतिः अवश्यावश्यं परिवर्तते। प्रवर्तमानं युगप्रभावं शिक्षाऽपि यथाशक्यमनुवर्तते। वर्तमानयुगस्य नागरिकान् सर्वतः समीक्षमाणाः शिक्षाविशेषज्ञा अपि समये समये शिक्षाक्रमे अङ्गीकुर्वन्त्येव सामयिकं परिवर्तनम्। किन्तु देशस्य मौलिकी संस्कृतिः शनैः शनैर्विलुप्ता भवेत्, विकृता वा संजायेत, एतादृशं परिवर्तनं शिक्षाक्रमे को वा देशहितैषी संमन्येत नूनम्?

संस्कृतभाषा सेयम् आर्याणां संस्कृतितः सम्बद्धा समाख्यायते। देशस्य शासनमञ्चमलंकुर्वाणाः देशस्य कर्णधारा अपि प्राचीनान् संस्कृतिप्रणयिनः संतोषयन्तः सन्तः समये समये समादिशन्ति यत् सेयं संस्कृतभाषा भारतस्य प्राचीनसंस्कृतेर्बोधिका। किं विस्तरेण, सर्वविधशिक्षाप्रचारणे गृहीतव्रता देशस्य शिक्षाधिकारणोऽपि संस्कृतभारतीमिमां प्राचीनसस्कृतिसंबद्धामेव बहुधा निर्दिशन्ति। प्राचीनसंस्कृतेः संबन्धे च वर्तमानयुगीयानां शिक्षितमहाभागानां कीदृशो दृष्टिकोण इति समयगतिसमीक्षकेभ्यो महोदयेभ्यो न नाम बोधनीयं नूनम्। ते हि प्राचीनसंस्कृतेरनुगमनं वर्तमानसमयात् प्रतीपगमनमिव भावयन्ति। विशेषतो विचारे तु प्राचीनां संस्कृतिमिमां 'सांप्रदायिकताकोटौ' समावेशयन्ति। ततश्च—प्राचीनसंस्कृतेर्यदा सेयं परिस्थितिस्तदा तत्संबद्धायाः संस्कृतभाषायाः कीदृशी परिस्थितिः स्यादिति स्वयमेव बोद्धुं शक्येत विचक्षणबुद्धिभिः।

सांप्रतं हि संस्कृतभाषा शिक्षाक्रमे विरलतामिव भजते। येषु येषु राज्येषु संस्कृतशिक्षायाः कृते नानाविधा विद्यालया आसन्, तेषु अपि शनैः शनैः विद्यालयानां संख्या क्रमशो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यते एव । येषु च विद्यालयेषु संस्कृतभाषा महतोत्साहेन
श्यते स्म, प्रतिवर्षं शतशो विद्यार्थिनः संस्कृतकक्षासु प्रवि-
न्तिस्म, तेष्वपि संस्कृतस्य गतिः शिथिला, विलुप्तप्राया च ।
त्यदीयवृत्तान्तापेक्षया परिचितो वृत्तान्तः सांप्रतं निवेद्यते ।
जस्थानराज्यस्य राजधानी तदिदं जयपुरं हिन्दुसंस्कृतिरक्ष-
णां सूर्यवंशीयक्षत्रियाणाम् अधिकारभूमिः । संस्कृतेः
रक्षणार्थम् अत्रत्यैः राजन्यैः निजमस्तकान्यपि न्यासीकृतानि ।
स्कृतिरक्षिकायाः संस्कृतभाषाया नानाप्रकारैः प्रवृद्धिः कृता ।
त्याः संस्कृतविद्यालयाः देशे सर्वतः समुन्नताश्चासन् ।
न्तु वर्तमानसमये तेषां दशा दुर्बला । किं बहुनां, येषु
मुखेषु माध्यमिकविद्यालयेषु ( हाईस्कूल ) पुरा परःशताः
स्कृतस्य विद्यार्थिनः संबभूवुः अद्यावधि परःशता येषां
नातकाः सांप्रतमुन्नतोन्नतानि अधिकारपदानि अधितिष्ठन्ति ।
दशेऽपि विद्यालयेषु संस्कृताध्यापनं दूरीभूतम् ।
अधिकम्, एतेषु राजकीयविद्यालयेषु संस्कृताध्यापक-
दमेव निरुद्धम् । एवंविधनिदर्शनैः अन्यान्य–राज्येषु
स्कृताध्ययनस्य कथा भूयस्तरां परिज्ञातुं शक्येत । यदा च
स्कृतस्य सेयं परिस्थितिस्तदा तस्मिन् साहित्यनिर्माणम्,
सिक-साप्ताहिकादिपत्राणां प्रचारणं च, कस्यामवस्थायां
वेदिति स्वत एवानुमातव्यं स्याल्लोकचर्याचतुराणाम् ।

नवीनं स्थायिसाहित्यमतिन्यूनं प्रकाशितम् । बहुत्र
साहित्यप्रकाशनसंस्थाः' ( एकादमी ) स्थाप्यन्ते, किन्तु तासां
रा पुस्तकप्रकाशनं विरलं, विरलतरम् च । तत्रापि संस्कृत-
या वराकी विस्मृतप्रांया । नाऽस्याः साहित्यं प्रकाशमुपगतम् ।
नाग्रतं हि "दुर्लभः संस्कृतस्याऽद्य लेखकोऽथ प्रकाशकः ।"
लश्च पत्रसाहित्यमपि विरलीभावमेव शनैः शनैरुपयाति ।
र्तमानवर्षेषु 'कर्गदं' पत्राणामतीव दुर्लभता । अधिकारिणा-
ज्ञापत्रं विना 'कर्गदानि' न लभ्यन्ते । येभ्यः पत्रेभ्यः
वतां कर्गदानामनुमतिः, तेभ्यः पत्रेभ्यो नैकमात्रं पत्रम-
धिकं प्रदीयते । अतएव यथाकथंचित्पत्राणि प्रचरन्ति ।
ज्ञाविभागस्य आलोचनापुस्तके संस्कृतपत्राणामाधिक्यवार्ता
नपरया श्रुता, किन्तु नवीनप्रचलितपत्राणां नास्माभिः
नुभवमकारि । भवेदत्र 'भारती'पत्रस्यैव भाग्यं विगुणम्,
स्य कृते सूचनामात्रमपि न प्रदीयते पत्राधिकारिभिः । आम्-
देपुर ( जिला शोलापुर ) तः 'विद्या' संस्कृतपत्रिका
नवीनाप्रचार्यते, या हि 'सत्यध्यानविद्यापीठस्य' मुखपत्रिका ।
यस्याः सम्पादकौ—श्रीपं० वरखेडनरसिंहाचार्यः, श्रीपं० गल-
गलीरामाचार्यश्च (मधुरवाणीसंपादकः) । मूल्यमस्याः वार्षिकं
मुद्रात्रयम् । अस्मत्सविधे या संख्या प्राप्ता, तस्यां 'तृतीय
वर्षस्य तृतीयः अङ्कः' इति निर्दिष्टम् । अतएव पत्रिकाया
एतस्या विषये सम्यक् परिज्ञायैव किञ्चिन् निवेद्यते ।

यैर्लेखकमहाभागैर्निजैरमूल्यैर्निबन्धैः (भारत्याः) एतस्याः
सेवा, पाठकमहाभागां मनोरंजनं च विहितं, तेषां हि सततं
कृतज्ञा भारतीपरिचालकाः । विशेषतस्तु डा० श्रीरसिकविहारी-
जोषिमहोदयः, साहित्यविशारदकविभूषणश्रीगणेशरामशर्मा
महाभागः पं० श्रीवासुदेवशास्त्री वागेवाडीकरमहोदयश्चैते
विशेषतोऽभिनन्दनीयाः यैर्हि निजनिबन्धैरनुगृहीताः पाठक-
महाभागाः । अग्रे चाप्यमी महोदया एवमेव भारतीमनुगृह्णी-
युरिति विनयात्प्रार्थयामहे ।

निम्नलिखितैरुदारमहाभागैः एकोत्तरशतं स्थायिधन-
राशिं प्रदाय आजीवनसदस्यताङ्गीकृता, इति सोल्लासमावेद-
यामः समर्पयामश्च भूरि भूरि साधुवादान् ।

१—श्रीईश्वरीप्रसादजी गोयंनका ( कलकत्ता )

२—श्रीलक्ष्मणप्रसादजी पोद्दार ( " )

३—भागीरथजी मोहता ( " )

बहूनां संभावितमहाभागानां भारतीकृते शुभसंदेशाः
समधिगतास्तत एव वयं सुप्रसीदामो यत्सेयं भारती लोकेभ्यः
सुप्रसादमधिगच्छतीति । सेवायाममीषां सविनयमावेदयामः
कृतज्ञताभारमिति किं वा विस्तरेण ।

भारत्या एतस्याः कृते कृतदयोदयाः पाठकमहोदयाः! नवीने-
ऽस्मिन् वर्षे तत्रभवतां मनोरञ्जनाय सेयं यावच्छक्यं प्रयतेतैव ।
भवन्तोऽपि एतस्या ग्राहकवृद्धये नूनमनुग्रहं कुर्युरेव, इति
सेयं भूयस्तरां समाशास्ते । यतो हि सर्वविधमहर्घतामये सम-
येस्मिन् पत्रप्रचारणं कियत्कठिनमिति न भवतामपरिज्ञातम् ।
सुकृतसहायकश्चराचरनायको भवेदस्माकं सर्वतोऽप्यभिलाष-
पूरकः । अस्तु—

"भारतवर्षेऽमुष्मिन् वर्षे हर्षप्रकर्षः स्यात्"

इति विनीतः संपादकः, भारतीपरिवारश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## भारती-विनयः

( ले० आशुकवि श्रीहरिशास्त्री दाधीचः जयपुरम् )

(१)

मातस्तव रजांसि विलसन्ति

तव समुज्वलाः कणाः (कोटिशः) कियन्तः
हीरा इव चेतांसि हरन्तः ।
येषां दीप्तिमवेक्ष्य रवीन्द्रग्रहाः स्मयं ह्युपयन्ति
मातस्तव रजांसि विलसन्ति ॥ १ ॥

(२)

तव स्तवनमीक्षणमभ्यर्चा,
निशि दिवा च तावकगुणचर्चा ।
जन्मजन्मनामपि मनुजानां पापानि क्षपयन्ति
मातस्तव रजांसि विलसन्ति ॥ २ ॥

(३)

ऋषयो मुनयो योगाभ्यस्ताः
परधाम्नो ज्ञानिनः प्रशस्ताः ।
लोकत्रयमभ्येत्य तवैव श्लाध्यान्गुणान्गृणन्ति
मातस्तव रजांसि विलसन्ति ॥ ३ ॥

(४)

यदा विपद्-घटिका त्वयि याति,
प्रेमपरीक्षा नः प्रतिभाति ।
तदा कोटिशः सुतास्त्वदीया दत्वा शिरो हसन्ति
मातस्तव रजांसि विलसन्ति ॥ ४ ॥

(५)

यदा दैत्यनरयोर्गण इच्छति,
रूपमीश्वरो धृत्वाऽऽगच्छति ।
तदा दिविषदः सर्वे मातस्त्वयि सुमानि वर्षन्ति
मातस्तव रजांसि विलसन्ति ॥ ५ ॥

## आह्वानम्

ले० श्यामनन्दनशास्त्री

आह्वयत्यतिताररुतितः कोऽपि मृत्योः पारतो माम् !

(१)

सैष चिरपरिचिततरो वीणातिशायी स्वरविशेषः
भङ्गिमा च स एव मादकताप्रदो भावाभिवेशः
निर्दिशति हिमगिरिशिखरतः कोऽपि करसंकेततो माम् !

(२)

कस्य भुवि सत्वाधिकारः क्षणयुगलमात्रं विलासः
शाखिजीवनमेव चपलं, कियदवधि नीड़ाधिवासः
संदिशति पारेऽरुणव्याजात् कोऽपि शून्यविहायसो माम् !

(३)

नश्वरे केयं चिचीषा गत्वरे का वाऽनुरक्तिः
सर्वतो मूर्त्तस्स एव कुतः परापरसंविभक्तिः
आदिशति कोप्यस्ति नास्ति' विवादतः परमोच्यतो माम् !
आह्वयत्यतिताररुतितः कोऽपि मृत्योः पारतो माम् !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# दीपावली-तत्त्वम्

ले० श्रीघनश्यामचंद्रशास्त्री, लक्ष्मणगढ़ (सीकर)

निखिलदर्शनमूर्द्धन्यं वेदान्तशास्त्रीयसिद्धान्तमनुसृत्यास्य तः सच्चिदानन्दपरब्रह्मपरमात्मनः परोक्षापरोक्षज्ञानाभ्यां श्वरसादिमिथ्यात्वेऽपि प्रवाहरूपेणानादित्वं प्रतिपादितम्। न्ने क्षणभंगुरे विचित्रभावापन्ने विश्वस्मिन्नस्मिन् अनन्त-सनाबद्धा असंख्यप्राणिनो जायन्ते, कालकरालगले पतिता यन्ते च, जन्ममृत्युजराव्याधिदुःखादीनां सांसारिकाभीलानां तेदिनमनुभवं कुर्वन्तोऽपि मोहिन्या मायाया भयङ्करावर्ते तेताः सन्तः स्वकीये कल्याणपथे मनागपि ध्यानं नो ददति। तुतस्तेषामेव जीवनं सफलं ये महामायाश[illegible]सका ता स्वयं शक्तिसम्पन्ना भवन्तः परोपकारस्य पवित्रोद्देश्येन तताजनाद्दर्नसेवनं स्वीयं महाव्रतं मन्यमाना देशस्य धार्मिकीं माजिकीं च व्यवस्थां यथावत् संचालयन्ति। तैरेवाप्तवरै-र्षिभिः संघशक्त्या सार्द्धं जगद्व्यवहारे चारुतां संपाद-मास्माकीने पावने भारतवर्षे शक्तिपूजया साकमेव श्रावणी, विजयादशमी, दीपावली, होलिकाभेदैश्चत्वारो त्सवाः कल्पिताः, तत्र प्राधान्येन विप्राणां कृते श्रावणी, त्रियाणां कृते विजयादशमी, विशां हिताय दीपावली, द्राणाञ्च कृते होलिकेति, एवं सत्यपि चत्वार इमे महोत्सवा मोदप्रमोददायकत्वेन समस्तवर्णानां कृते परस्परं प्रेम-ङ्गा वेविद्यन्ते। तत्राद्य श्रीदीपावलीसम्बन्धे किञ्चिद् विचा-ते।

भारतवर्षीयसमस्तजातीनां कृतेऽपूर्वानन्दच्छटावर्द्धकत्वेन उताद्य श्रीदीपमालिकादिने वयं श्रीमहालक्ष्मीमर्चयामो दीप-लया च गृहदेवस्थानापणहट्टमठादीन् शोभितान् कुर्वन्तो राजनं कुर्मः। वैदिकहिन्दुधर्मस्य पुरातनेनेतिहासेन ज्ञायते पुरा दैत्याधिपस्य बलिमहाराजस्यापूर्वां दानवीरतां निष्कामं विशुद्धभक्तियोगञ्चावलोक्य सर्वशक्तिसंपन्नो विष्णुभगवानत्यन्तं प्रासीददतो महाराजबलेः कीर्तिं चिरस्थायिनीं संपादयितुं वरं प्रादात् यत्—कार्तिककृष्णचतुर्दशीमारभ्य प्रतिपत्पर्यन्तं दिनत्रयं बलिराज्यस्य नाम्ना प्रसिद्धिं प्राप्स्यतीति, अत्र दीप-मालया प्रकाशविधानस्य महत् माहात्म्यं भविष्यति, दीप-मालाविधानेन धनधान्याधिष्ठात्री महालक्ष्मीश्च प्रसन्ना भवि-ष्यति, अत एवायं प्राचीनो महोत्सवः सर्वैः संपाद्यत इति। कतिपयकोविदानामिदमपि मतमस्ति यत् महाराजश्रीराम-चन्द्रेण विजयदशम्यां लोकरावणं रावणं निहत्य विजयश्रीः समधिगता तदुपलक्ष्ये साकेतपुर्यामनेकाहपर्यन्तं प्रकाशो विहित आसीत् स च कार्तिककृष्णामायां दीपमालाभिः सार्द्धं महता समारोहेण प्रवृत्त आसीदतोऽस्योत्सवस्य संबन्धः श्रीरामचन्द्रे-णाप्यस्ति किन्त्वनयोर्मध्ये पूर्वोक्तविषय एवाधिकां प्रमाण-कोटिमाटीकते।

भविष्योत्तरपुराणे—"अद्य राज्यं बलेर्लोको यथेष्टं चेष्ट-तामिति। लोकश्चापि पुरे हृष्टः सुधाधवलिताजिरे। तांबूल-हृष्टवदने कुंकुमक्षोदचर्चिते। दीपमालाकुले रम्ये विध्वस्त-ध्वान्तबन्धने।" अस्मिन् दिने श्रद्धाभक्त्या सह महालक्ष्मी-पूजनेन, अलक्ष्मीदारिद्र्यविनाशोऽखण्डसंपत्तिश्चोपलभ्यते, प्रकाशप्रधानमहाशक्त्याः संमुखे दीपकमालाप्रज्वालनेनैवास्य महोत्सवस्याभिधानं दीपमालिकेति संपन्नम्। अत्र शास्त्रीयं प्रमाणं श्रूयताम्। ब्रह्माण्डपुराणे स्पष्टमुदलेखि—

प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम्,
दीपवृक्षास्तथाकार्याः शक्त्या देवगृहेषु च।

बलिराज्ये दीपदानात् महालक्ष्मी स्थिरा भवेत्,
दीपैर्नीराजनादत्र सैषा दीपावलिः स्मृता।

बलिराज्यं समाश्रित्य यैर्न दीपावलिः कृता,
तेषां गृहे कथं दीपाः प्रज्वलिष्यन्ति केशव!

ततः प्रदोषसमये दीपान् दद्यान्मनोरमान्,
देवालये मठे वापि प्राकारोद्यानवीथिषु।
गोवाजिहस्तिशालायामेवं घस्त्रत्रयेऽपि च,

एवं रीत्या शास्त्रदृष्ट्या त्वस्य माहात्म्यं—वर्वर्त्येव, किन्त्वाधुनिकविज्ञानदृष्ट्या कृतायामपि मीमांसायामस्य साम-यिक्युपयोगिता स्पष्टीभवति। चातुर्मास्ये निरन्तरं जलप्रपाते-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नान्तराद्र तया वार्षिकदूषितवायुप्रभावेण च पतङ्गदंशमक्षिकाप्रभृति बहवो जन्तवः समुत्पद्यन्ते दुर्गन्धप्रसारश्च भवति, रोगस्य कीटाणवोऽप्याधिक्यमुपयन्ति, तच्छान्त्यै शरदृतुमध्ये विशेषशुद्धिसंपन्नोऽयं महोत्सवो महता समारोहेण प्रवर्तितः। निःस्वतासूचकं समस्तमवकरमलादिकं गृहात् शरीराच्च दूरीकृत्यात्र स्वच्छतापक्षपातिनीं श्रीलक्ष्मीमातरं सर्वे भारतीयाः सहर्षं मानयन्ति। इत्थमप्याकर्ण्यते यदेतन्महोत्सवानन्तरं दुष्टकीटादिजन्तवो महीगर्भ एवान्तर्हिता भवन्ति, यत्र तत्र च विलीयन्ते, मेध्यतया दीपकानाञ्च कान्त्या दुष्टकीटापसरणं घुणाक्षरन्यायेनानायासमेव जञ्जन्यते। निर्विवादोऽयं राद्धान्तो यदस्वास्थ्यकरापवित्रस्थानेषु श्रीरमा नैव विराजतेतराम्। अतः श्रियाः सुस्वागतायास्मिन्नवसरे सर्वेषु नगरग्रामखर्वटव्रजादिष्वपि मालिन्यमपनीयते, गोमयमृदालेपनपुरःसरं स्थानानि मञ्जुलानि निर्मीयन्ते, निर्णिक्तमनोज्ञस्थानेषु सुदीपकाः प्रज्वाल्यन्ते यदवलोकनेन सौन्दर्यमनुभूयते। शुभावसरेऽस्मिन्नस्माभिर्बाह्यशौचेन सत्रा नैजं दृढं संघटनं विधायाभ्यन्तररागद्वेषादिशत्रुभूतमलापनयनमपि, अवश्यं विधेलिमम्।

इदमपि शिक्षितनिवहेन ध्यानेऽवश्यं रक्षणीयं यदुक्तमहोत्सवचतुष्टयं वर्णभेदेन पृथक् २ प्राधान्येऽपि वर्णाश्रमधर्मरूपदुर्भेद्यदुर्गस्य दृढं द्वारमस्ति। अत्र सर्वे वर्णाः कृत्स्नसंप्रदायजनाश्चैकत्रिता भूत्वा समाजप्रचलितकुरीतिस्तोममपनीय सनातनवैदिकधर्मपताकां सर्वोच्चां विधातुमर्हन्ति। ईदृग्व्यवस्थाश्रेयस्त्रिकालज्ञवीतरागमहर्षिनिर्दिष्टमार्गानुगामिसुजनानामेवास्ति। यस्य वर्णभेदस्यास्तित्वं निराकर्तुं देशेऽस्मिन् "जातिपांतितोडकमंडलानां" सृष्टिर्भवन्त्यस्ति, तदीयकर्णधारा यदि शास्त्रानुसंधानपूर्वकं हिन्दुसंस्कृतेर्निर्बाधं वास्तवं मर्म ज्ञातुं धैर्येण सह प्रयतेरन् तर्हि तेषां स्फुटं ज्ञानं भवेद् यद् वर्णभेदः प्राकृतोऽस्तीति। इतिहासोऽत्र साक्षी—इतरसर्वदेशसमाजपद्धतयः कालस्य कराले कलेवरे विलीनाः समभूवन्—यतो हि समयपरिवर्तनेन साकं तासामपि प
वर्तनं विनाशश्च समभूदेव, किन्तु सनातनवैदिकहिन्दूनां जन
गतवर्णभेदमूलकसमाजव्यवस्थासामञ्जस्यस्थापकत्वेन नि
नेन अक्षुण्णभावेन विद्यमाना विराजते। अतो व्यवह
सत्तायां वर्णभेदसद्भावेऽपि निखिलहिन्दुजनतयाऽन्योन्यं प्रे
पूर्वकं महत्या मेध्यतया सह दीपावलीमहोत्सवं मन्यमान
श्रीमहालक्ष्मीरूपमहाशक्त्याः सध्यानपूजनं विधेयं येन वार
त्रिकी प्रकाशमयदीपावली स्यादिदमेवास्य महोत्सवस्य सम
तस्तत्वमस्ति।

अद्यत्व आस्माकाकर्मण्यतालस्यानैक्यबाह्याभ्यन्तरा
मणैर्भारतामम्नायाः सत्वरूपमजानतां गोवधाद्यंगच्छेदनप्र
तानां कतिपयराजनैतिकनेतृणां मनीषाभ्रमणे च भारत
श्रीकमला विहायास्मान् बहुदूरं पारेसमुद्रं प्रायासीत्
हाटकरत्नवार्ता तु दूर आस्तां वयं खाद्यपरिधेयादिपदार्था
यथाकाममलभमाना परानन्नापेक्षिणः संवृत्ताः। शिशव
स्माकं गोदुग्धाज्याभावेन चीत्कारं कुर्वाणा निभाल्यन
राजकीयप्रधानशासनविधानाभावेन धेनुवृन्दं विनश्यन्न
मात्रमवतिष्ठति, अकालमृत्युश्च नानारूपधरो भूत्वा महाज
भ्राम्यन्नस्ति, अतो वयमस्मिन् शुभावसरे शरणागताः स
स्वराश्च—

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम्।

इति श्रौतमन्त्रेण श्रीमहाशक्ति महालक्ष्म्याश्चरणपङ्कज
श्रद्धाञ्जलीन् समर्पयन्तः सप्रेम स्वागतं कुर्म्मो विनीतप्र
नाञ्च विदध्मो यत्, विश्वेश्वरी संस्कृतेलाप्रिया श्रीम
लक्ष्मीः स्वीयानुकंपाकटाक्षेण संकटापन्नभारतमेनत् क्षिप्र
पूर्ववत् श्रीदीपावलीसंस्कृततत्वमुपदिश्य समृद्धिसमलंकृतं वि
ध्यादिति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# महाकविकालिदासः

ले० श्रीहीरालाल पांडे, भोपाल

[ १ ]

"कुत आयातः"
"भारतदेशात्"
"किं जानासि–
भारतीयसंस्कृतेः पुरातन-
प्रतिनिधिभूतं देवस्वरूपं
महाकविं त्वम् ?"
"नाहं जाने"
"धिग् धिग् धिग् धिग्
किं ते ज्ञातं स्यादिह विश्वधरायाम् ?"
भारतीयनागरिकप्रतिष्ठा
संस्कृतनिष्ठा;
तस्याः सुरभारत्याः कविषु
महाप्रतिष्ठितमहातल्लजो
महाकविमणिहारसुतरलो
महाप्रभः खलु महाकौस्तुभः
का० देवतायाः वरदानं
महाकविरत्नं
कालिदास इव कालिदास इह।
महाकविः स प्रतिभालासः
कलकोमलवचसां सुविलासः
सूक्तिसुधाकरनीतिदिवाकर-
रूपमनुपमं दधत् स्वयं यो
जातः सूर्याचंद्रमसौ
महाकविः सः
भारतीयनरनारीवृत्त
यस्य लेखने महोज्ज्वलं
महाप्रशस्यं हितंकरम्।

[ २ ]

निजलेखिन्याः प्रबलप्रतापात्
विश्वं जित्वा प्राप्तं येन
विश्वमहाकविराजपदम्।
कथं न तमहं वंदे देवं
संस्कृतिकृष्यै वार्षिकमेघं
महाकविम्।
यस्य लेखिनी नारीरूपा
दिव्यसुंदरीं शकुन्तलां
विश्वसुंदरीरूपं दत्वा
सदासेव्यतां यया ध्वनंत्या
"ऋतुसंहारं" विनिर्मितम्।
वर्षाकाले परमभाग्यतः
कवेर्मानसे जातैकामरकल्पना–
"वर्षारंभे यदि कथचित्
भवे भवेयं परमवियोगी
तदा कीदृशी गतिर्मदीया"—
अतो मेघदूतं निर्मीतम्;
तत्र परंतपभारतीयपतिपत्नीव्रतयो-
र्निदर्शनं सत्यं हि मनोज्ञम्।
यस्य मनोज्ञे काव्यसुयुग्मे
अजरतिलापो यशो वितनुते;
कथं न खलु सः, रघुवंशवत् तत्
प्रवर्धमानं युगलं न जेता।
कुमारहीनोऽपि युगस्य धाता
विश्वस्य कल्याणविचारवद् भूः;
कुमारसम्भवमद्भुतं यो
दत्वा विहीनो ऋणांततेरभूत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमश्लोके 'कुमारसम्भवे
"स्थितः पृथिव्या इव मानदण्डः"
इदं गदित्वा जुघोष सत्यं
स्वदेशकीर्तिं गुरुगौरवं यः ।
"रत्नावली", "मालतीमाधव"–
युग्मं यस्या अनुजानुजवत्
तत्र नाटके शकुन्तलायां
प्रतिष्ठितात्मा खलु भारतीय-
महाकवेर्विश्वभुवो हिताय;
अतो जयेत् भव्यसुदिव्यकल्पना-
नवोपमावारिधिपूर्णचंद्रः
सुकालिदासोऽपि स्वकालिदासः ।


हरिनगर सूगर मिल्स लि०
*** फेक्टरी ***
हरिनगर [एन० ई० रेल्वे०] [चम्पारन जिला] उत्तर बिहार
दूरभाषयन्त्रम्—
मर्यादा–रामनगर [चम्पारन]
प्रधानकार्यालय—
२०७, कालबादेवी रोड, बम्बई–२
दूरभाषयन्त्रम्—
'क्रिसूगर' [बम्बई]
निर्मातारः—( अत्युत्तम-शुद्धशर्करायाः )
★ प्योअर, ★ फर्स्टक्लास, ★ क्रस्टल ★ फेन सूगर


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# स्वतन्त्रे नाम भारते शिक्षा कीदृशी भवेत् ?

( ले० आचार्य महेशदत्तः. पीलीभींत )

[ संस्कृतविद्यालयस्यैकस्याध्यक्षमहोदयस्येमे उद्गाराः सुखदकल्पनास्यूताः। सर्वकारस्य, ततोऽपि पूर्वं संस्कृतज्ञानां ध्यानमवश्यमाक्रष्टुं प्रभवेयुः। समग्रेऽपि निबन्धे केवलं पंचविंशतिवारं "च" इत्यस्य प्रयोगोऽस्ति। ]

भारतं स्वतन्त्रं जातम् किन्तु इदानीमपि भारतीयैर्यादृशः स्वातन्त्र्यलाभोऽभीष्ट आसीत् स बहुदूरम् प्रतीयते, भारतस्य आदर्शस्त्याग-तपोमय आसीत्, तस्यैव च बलेन सत्यता-सात्विकता-सदाचारताभ्यश्च भारतम् प्रसिद्धमपि चासीत्, किन्तु इतः स्वतन्त्रमपि भारतमिदानीमस्माद् विपरीतम् अनाचाराय,—दुराचाराय, भ्रष्टाचाराय तथाऽसत्यवादितायै चाऽनुदिनमग्रे सरञ्जायमानं दरीदृश्यते।

अत्र विषये यथाऽहमनुभवामि भारतीयानामस्यां प्रवृत्तौ वैदेशिकी रीतिर्नीतिश्च तदीयेन शासनेनैव इदानीमपि समागच्छन्ती प्रचलन्ती च शिक्षाया दूषिता प्रणाली एव नूतम् मुख्यतमं कारणमस्ति।

यावत् कालं शिक्षायाः शुद्धायाम् प्रणाल्यां सर्वकारो ध्यानन्न समादधाति तावद् भ्रष्टाचारस्याऽस्याः प्रवृत्तेर्निरोधः कठिन एव नास्ति, प्रत्युत असम्भव एव प्रतीयते। अतएव सर्वकारो यदीच्छति यद् भारतीया जनाः सुखेन, शान्त्या च स्वकीयम् पुरातनम् आदर्शम् पुनरपि प्राप्नुयुः, तदा शिक्षापद्धतौ वाञ्छितं सुधारम्—अविलम्बेन करोतु, नान्यथा भ्रष्टाचारस्य द्वितीयः पन्था विद्यते निरोधाय, अहमस्मिन् निबन्धे कतिपयान्—स्वविचारान् सर्वकारस्य समक्षे प्रस्तौमि।

(१) समस्तप्रदेशस्य सर्वेषु विद्यालयेषु शिक्षायाः—एक एव क्रमः अनुसर्तव्यः, यश्च क्रमशः प्राचीनाऽर्वाचीन-पद्धत्योरावश्यकस्य, अपेक्षितस्य च कार्यक्रमस्याऽनुरूपोऽस्तु।

(२) प्राइमरी कक्षात आरभ्य समस्तासु पाठशालासु 'विद्यालयेषु च क्रमशः कक्षानुरूपं संस्कृतशिक्षाया समावेशोऽस्तु योऽग्रे संस्कृतस्य चतुर्षु, पञ्चसु च पत्रेषु पूर्णो भवेत्।

(३) प्रदेशस्य सर्वेषां विद्यालयानां नामानि, उपाध्यक्षता सर्वाः कक्षाश्च समाना एव स्युः, हाईस्कूल, इण्टरमीडियेट, बी० ए० एम० ए० वैदेशिकान् उपाधीन् रविवासरीयम् अवकाशञ्च झटिति समाप्तं कुर्यात् सर्वकारः।

(४) तथा भारतीयपद्धत्यनुरूपमेव वेषभूषे अपि अनुपालनीये। शिक्षालयानां शिक्षकाः शिक्षार्थिनश्च समेऽपि अनिवार्यतो भारतीयम्—आदर्शम् अनुगच्छेयुस्तथाविधोऽनुरोधः कार्यः सर्वकारेण, शिक्षालयाश्च चतसृषु श्रेणीषु विभाजयितुं शक्नुवन्ति यथाः—पाठशाला, विद्यालयाः, महाविद्यालयाः, विश्वविद्यालयाश्च।

(५) प्रदेशस्य समस्तेषु विद्यालयेषु च संस्कृतस्य, अपेक्ष्यमाणः, प्रथमा, मध्यमा, परीक्षयोः पाठ्यक्रमः सञ्चालिते कक्षा १२ पर्यन्ते पाठ्यक्रमः नूतमनुस्यूतो भवेत्, यथासम्भवमुच्चकक्षासु संस्कृतस्य मध्यमाया अपि स्थानमवश्यं देयम्, येनच्छात्राः संस्कृतस्य लेखने भाषणे च सक्षमाः स्युः प्रवृत्तेश्चैषां जागरणञ्च जायते।

(६) कक्षा १२ पर्यन्तानां छात्राणां मध्यतः, संस्कृतस्य गम्भीराध्ययनाय तत्र संस्कृतेऽनुरागिणां श्रमशीलानाञ्च छात्राणां चयनं क्रियेत, ते चैवंविधां सुविधां वृत्तिञ्च लभेरन्, यथा—स्वस्था एवं निश्चिन्ताः सन्तस्तदध्ययने सफलताम् भजेरन्, ते समेऽपि विद्यालयाः, राजकीये नियन्त्रणे स्युः।

(७) तत्रत्याः शिक्षका अपि सर्वविधां सुविधां, उच्चैस्तमं वेतनञ्च प्राप्नुयुर्येन ते कामपि चिन्तान्न लभेरन्: स्वतन्त्रभारतस्य यावत् सर्वा शिक्षा संस्कृतनिष्ठा न क्रियते, वस्तुतः तांवद्भारतस्य स्वतन्त्रता व्यर्था एवाऽस्ति।

आशासे विश्वसिमि च विचारशीलो हि सर्वकारः—विषयेऽस्मिन् नूनमन्यूनं ध्यानं दास्यति झटित्येव, यतो हि—"शिक्षामूलम् मूलभूतं हि सर्वम्"।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# कविकुलगुरोः कालिदासस्य स्मारकम्

( ले० वासुदेवनागेशशास्त्री, औदुम्बरकर, बंबई )

न खलु न विदितं समास्वादितकवितामाधुरीकस्य कस्यापि नरस्य यद् ये नाम केचित् सरसकाव्यनिर्माणे लीलया प्रभवन्ति, आलिखन्तीव च सहृदयानां हृत्पटेषु जीवलोकस्य तांस्तान् भावविशेषान्, तेषां कविश्रेष्ठानां अंगुलीभिरिव गणनीयेषु रससिद्धेषु पुनरग्रणीषु कनिष्ठिकाधिष्ठित एव श्रीमान् महाकविः कालिदास इति । न केवलमयं काव्यनिर्माता, अपि तु विद्वदग्रणीरपीत्यपि न तिरोहितं तद्रचितवांङ्मयाम्भोधिमवगाहमानानाम् । तत्रापि न केवलं महाकाव्यस्य, खण्डकाव्यस्य, रूपककाव्यस्य वा कस्यचिद्रचयिता, अपि तु एषामशेषाणामपि काव्यप्रकाराणाम् । प्राचीनान्यप्यस्य वचनानि नवं नवमिव रसनिष्यन्दं प्रस्नवन्ति । अतएव चास्य काव्यं रमणीयं विभाति सर्वेषाम् । स्पष्टयति हि श्रीमान्माघः सरसयैव सरण्या रमणीयतां 'क्षणं क्षणं यन्नवतामुपैति तदेव रूपं रमणीयतायाः' इति । नावीन्यमेव पुनः काव्यत्वसम्पादकेषु कारणेषु प्रमुखमिति 'रमणीयार्थप्रतिपादकशब्दः काव्यम्' इति काव्यं लक्षयन् पण्डितराजः समुद्घोषयत्येव । इत्थं शास्त्रीयपद्धत्या अनुभवेन च सिद्धे कालिदासकाव्यानां नावीन्ये नैव स्यादत्र कस्यापि विप्रतिपत्तिः । अतएव चेद्देशस्य काव्यस्य तन्निर्मापकस्य च कवेः कालिदासस्य श्रेष्ठत्वे कालनिबन्धनं नैवापेक्षितमिति प्रतीमः । तद्धि प्राचीनकालादारभ्य नवं नवं रसनिष्यन्दं समुत्पादयति, भाविन्यपि काले समुत्पादयिष्यत्येवेति । अतएव सर्वदैवैतद्रसिकानां रुचये प्रभवति । एतादृशस्य पुनः कवेः केनापि प्रकारेण समाजस्य पुरस्तादादर्शस्थापनमिति प्रधानं किलैतत्कर्तव्यम् । कोमलं काव्यं हि सर्वेषामेव हृदयेषु श्रेयःप्रतिपादकमर्थं निधातुं कल्पत इति । अतएव च सम्प्रति भारतीयानुशासनद्वारा अनुष्ठीयमानः श्रीकालिदासस्मारकसमारोहः न केवलमुपयुक्तः, परन्तु भारतीय-राष्ट्रिय-कार्यजातेषु एकतमो भाग एव इत्याकलयामः ।

अत्रेदानीं स्वत एवेयं शङ्का समुद्भवति 'यथा—कः खलु प्रकारः स्यात् कवेः स्मारकस्येति, कच्चिन्महाकवेः पुत्तलिका स्थापिता भवेत् ? आहोस्वित् तच्चरित्रद्योतकचित्रविचित्रितं मन्दिरं निर्माप्येत ? किं वा कवेर्वाङ्मयस्य तट्टीकायाश्च पुनः संशोधनं भवेत् ? अथवा विद्वत्सभामाहूय प्राचीननूतनोभयपद्धत्या कविप्रणीतसमस्तवाङ्मय-रसग्रहणचर्चात्मकः प्रबन्धः प्रकाशितः स्यात् ? कवेः प्रादुर्भावादिविषये वा अद्यप्रभृति कृतप्रयत्नानां संग्रहो नूतनप्रयत्नपरिपाटी वा निश्चिता भवेत् ? इत्यादि । अन्येषां पुनर्मनःसु बहुविधा अन्या अत्याशङ्काः पदं निदध्युः । तथापि स्मारकनिर्माणकल्पना सर्वत्रैव पार्थिवविषयिणी वांङ्मयविषयिणी वेति द्विविधैव स्यात् । वयं त्वत्र पार्थिवस्मारकापेक्षया वांङ्मयं स्मारकमेव बहुमन्यामहे । पार्थिवं हि स्मारकं कांश्चिदेव वत्सरान् यावत् स्फूर्तिदायकं स्यात् । वाङ्मयं तु यावत् कवेः कृतिर्मण्डयिष्यति सारप्राङ्गणं तावत्कालपर्यन्तं प्रतिबिम्बमिव पुनः समवतिष्ठेत । भारतीयसंस्कृतिर्हि क्षणिकपार्थिवाद्यपेक्षया ज्ञाननिष्ठामेवावलम्बत इति निध्यायतामेतद्धीमद्भिः ।

एतावता विज्ञायेत यत् वाङ्मयस्मारकनिर्माणमेव हि पुत्तलिकाद्यपेक्षया बहूपकारकं स्यादिति । पार्थिवस्मारकस्य तु विरोधिन एव वयमिति कैश्चित्पुनरत्र आक्षिप्येत । अतस्तत्रोच्यते । न वयं पार्थिवस्मारकविरोधिनः । वयमपि सर्वे पार्थिवा एव । अतः पार्थिवत्वाभिमानोऽस्त्येवास्माकमपि । अतएव च तादृशं स्मारकमवश्यमेव करणीयमित्येव ब्रूमः । निराकारस्यापि पुनरीश्वरस्य प्रतिभाप्रकल्पनं क्रियत एवास्माभिः । तत्रास्माकं पार्थिवत्वाभिमान एव हेतुः । अतएव च महाकवेः पार्थिवं स्मारकं सर्वानपि प्रमोदयेदेव । परन्तु विचार्यताम् । अद्यावधि जगतीतले भूयांस एव विद्वांसो महात्मानः प्रबन्धकाराश्च बभूवुः । तत्र तु गणितिरेव नास्ति । तदानीमपि जनैः तत्तेषां पार्थिवाण्यपि स्मारकाणि निर्मापितान्येव स्युः । कियतां पुनस्तत्र अवशिष्टानि स्युरिदानीम् ? बहूनां पुनर्विनष्टान्येव स्युः । महासमर्थानां जगच्चालकानामेव स्मारकाणि समवशिष्टानीति ध्येयमिदम् । समवशिष्टस्य वा वेदव्यासस्य मूर्तिरूपस्मारकस्यापेक्षया तदीयानि, वेदव्यवस्थाः पुराणसम्पादनं, महाभारतरचना, ब्रह्मसूत्राणीत्यादीनि वाङ्मयान्येव स्मारकाणि सर्वत्र सम्पादयन्ति तद्गुण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कानां श्रेय इति अनुभवगोचर एवायमर्थः । तथापि न श्चिदपि काशिकापुरीनिवासिनी भगवतो व्यासस्य मूर्तिरनर्दिता इति ब्रवीति । इदं त्वत्रावधेयं यत् निर्माप्यं पार्थिवं स्मारकं, तथाऽपि वाङ्मयस्मारकनिर्माण एव विशेषतः प्रयतितव्यमिति ।

इदानीं कवेः वाङ्मयस्मारकस्य विषये यथामति किमपि कथयित्वा प्रबन्धमिममुपसंहर्तुमिच्छामः । प्रथमतस्तु कालिदासविषयकसमस्तवाङ्मयस्य महानेकः ग्रन्थालयः निर्मातव्यः । अत्र कालिदासचरित्रविषयकाः, तत्प्रादुर्भावसमयचर्चाबहुलाः ग्रन्थाः संगृह्येरन् । कालिदासविरचितस्यापि समस्तवाङ्मयस्य, तत्रलिखितानां टीकानां च संग्रहः आवश्यकः । तथैव तत्कृतीनां नानाभाषीया अनुवादाः तत्कृतिमाधारीकृत्य विलिखिताः ग्रन्था, तत्र विद्यमानाः साहित्यकाचर्चाः, ( काव्यविवेचनं, रसग्रहणमित्यादि ) इत्येतद्विषयकग्रंथानां नानाभाषासु वर्तमानानां समुच्चयः कर्तव्यः । अन्यग्रंथगतानामपि पुनः कालिदासविषयकाणां च निबन्धानां संग्रहोऽपेक्षित एव । एवं च 'कालिदासग्रन्थमन्दिर' प्रतिष्ठापनं प्रमुखं कर्तव्यम् ।

इदानीं प्राक् समुल्लिखितं प्रकारत्रयं यथायथं विचारयितव्यम् । तद्यथा । १. कविरचनातट्टीकासंशोधनम्, २.कविरचितवाङ्मयस्य साहित्यशास्त्रीयः परामर्शः, ३. कवेरैतिह्यम् इति । एते प्रकारत्रयात्मका अपि प्रयत्नाः ग्रंथालयनिर्माणोत्तरं तद्द्वारा अनुष्ठातव्याः । एतद्विषये 'कालिदासविद्वत्समितिः' स्थापयितव्या । अनया पुनः प्रकारत्रयविषयिण्यः तिस्रः परिषदो निर्मापयितव्याः । तत्र—

प्रथमः प्रकारः (संशोधनम्)—अत्र कविरचनाः, तत्रवर्तिन्यः संस्कृतटीकाः, तासां अन्यभाषीया अनुवादाः टिप्पण्यश्च गृह्यन्ते । तत्र संस्कृतटीकाशोधने विनियुक्ता विद्वांसः संस्कृतव्याकरणसाहित्योभयविज्ञातारः प्रशस्यन्ते । न खल्वत्र संस्कृतेतरभाषायाः परिचयस्यापेक्षा नियमनीया । तत्तद्भाषीयानुवादेषु पुनः संस्कृतविज्ञातृत्वं तत्तद्भाषाविज्ञत्वं चापेक्षितमेव एतैश्च साहित्यशास्त्रज्ञपद्धत्या उपयुक्तः पाठभेदनिर्णयः, टीकानामपि साहित्यव्याकरणरीत्या उपकारकत्वं शुद्धत्वं चेत्यादि विचार्य कालिदाससंहितानां शुद्धिः पाठकः तदनुकूलोपकारकटीकानुवादानां च उपयुक्ततरत्वं पुस्तकद्वारा समर्पणीयम् । अवश्यञ्च तत्तत्स्थलेषु भूगोल-खगोलछन्दोधर्मादिशास्त्रीयमपि ज्ञानमपेक्षितं स्यात् । पाठनिर्णये पुनरनुवादापेक्षया संस्कृतशास्त्राणां तदनुकूलसंस्कृतटीकानां च प्रामाण्यमधिकं स्यात् ।

द्वितीयः प्रकार—साहित्यशास्त्रीयपरामर्शः । अत्र रसादिसाहित्यपदार्थानामेव निष्पत्त्यादिविवरणं प्रधानं स्यात् । अतश्च सत्यप्यन्यशास्त्रविद्वत्त्वे काव्यनाट्यशास्त्रपारदृश्वत्वमेव ह्यत्र प्राधान्येनापेक्षितम् । प्राचीनपद्धत्या काव्यविवेचने तु संस्कृतसाहित्यशास्त्रीयमेव पाण्डित्यं प्रशस्यते । पाश्चात्यपद्धत्यां तु संस्कृतसाहित्यज्ञानस्य गुणीभावः नवीनकाव्यविवेचनशास्त्रीयं पाण्डियं प्रशस्तम् । केषु केषु पुनः साहित्यग्रन्थेषु कस्मिन् कस्मिन् विषये किं किं कालिदासवचनमुदाहृतम् इत्यस्यापि संग्रहः यथोपलब्धमपेक्षित इति मन्यामहे । एतद्विषये विनियुक्ता विद्वांसः अन्यभाषामजानन्तोऽपि प्रशस्यन्ते ।

तृतीयः प्रकारः, महाकवेरितिहासः—अत्र संस्कृतज्ञानामेव इतिहासवेत्तॄणामपेक्षा वर्तते । अद्यावधि संगृहीतस्य कवेरितिहासस्य.पुस्तकानां समुच्चयः समपेक्षित इति तु पूर्वमेवावोचाम । तत्र भारतीयपद्धत्या संशोधितस्येतिवृत्तस्य प्रामाण्यनिर्णयः नूतनपद्धत्या कृतनिर्णयस्य प्रामाण्यविचारश्च विधेयः इत्थमस्माभिर्यथामति प्रपञ्चितोऽयं विषयः । अत्रत्यं पुनर्गुणदोषविवेचनं विधाय विज्ञाप्य चान्या अपि सूचनाः, पुरः प्रचालनीयोऽयं महाकवेः कालिदासस्य स्मारकसम्बन्धी विषयः पण्डितप्रकाण्डैरिति तान् प्रार्थ्य विरमयामो लेखनीम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अनङ्गदा प्रहसनम्

ले० श्रीजग्गूबकुलभूषणः
साहित्यविद्वान् संस्कृत-पाटशाला, यादवगिरिः

टि०—( दक्षिणाञ्चलस्थविद्वान् श्रीजग्गूबकुलभूषणः प्रायः त्रिंशत्संख्याकानां नाटकप्रमुखानां ग्रन्थानां लेखकः। एतल्लिखितं प्राचीनप्रथानुसारि प्रहसनं प्रकाश्यते ।

—संपादकः )

श्रीमारपारवश्येन रामारासरसाकुलः ।
आरामे शौरिरारेभे यत्स देयान्मुदं सदा ॥

( प्रविश्य ) सूत्रधारः—

एवमार्यमिश्रान्विज्ञापयामिः—

नानानाटकनिर्माता यः कोविदमुदावहः ।
स एवास्यापि कर्ता हि, जग्गू बकुलभूषणः ॥

हन्त,

अनङ्गदा हि प्रमदा मदावलपदक्रमाः ।
क्रमाक्रान्तजगद्वित्ता मत्ता भान्ति तटित्समाः ॥

एष धूर्त्तः अनङ्गदापोषणेन अङ्गदालंकृतः इत एवाभिवर्त्तते ।

( इति निष्क्रान्तः )

ततः प्रविशति आढ्यसमुचितवेषः आसने निषण्णः धूर्तः

धूर्त्तः—( सहर्षशीर्षान्दोलनम् ) अस्मद्भाग्यविशेषादुपलब्धेयं दन्तपुत्रिकेव स्पृहणीयसौन्दर्या दर्यां पुत्रिका । यल्लाभादारभ्य सर्वैषामपीभ्यानाम् उपरि वर्त्ते विक्कृतनराधिपवैभवः । अद्य तावद्दिष्ट्या वत्सेयं कयोश्चिदिभ्यपुत्रयोः सहोदरयोः हृदयं प्रविष्टा । स्यादेतत् । तावुभावपि परस्परं प्रलोभनशीलौ, यथाकथञ्चित् मया वशमानीतौ । तदितस्तयोर्वित्तमखिलमपि मदीयं संवृत्तं इत्येव मन्ये । साधु वत्से साधु । सार्थयसि अनङ्गदेति भवदीयमभिधेयम् । यत्सौन्दर्यविभ्रमादिभिः ददास्यनंगं यूनां हृदयाय । यतश्च नैसर्गिक्या प्रतिभया परपुरुषेभ्यः निजांगं अदत्वैव समीहितं सम्पादयसि ।

मच्चितायत्तचेष्टेयं विभ्रमैर्वचनैरपि ।
आवर्जयति सर्वेषां यूनां चित्तमतन्द्रिता ॥

स्यान्नाम । वत्सामाहूय प्रकृतमावेदयामः । ( नेपथ्याभिमुखमवलोक्य ) वत्से इतस्तावत् ।

( ततः प्रविशत्यनङ्गदा )

अनङ्गदा—(सविभ्रमं तातस्य चेलाञ्चलेन निजांगुलीमावेष्टयन्ती) तात, अहमस्मि, को नियोगः ।

धूर्त्तः—(सस्मितं) वत्से, किमन्यत् न हि पुनर्वक्तव्यं भवदङ्गसङ्गलोलुपानां यूनां दिगम्बरत्वप्राप्तिरिति ।

अनङ्गदा—( स्मितं करोति )

धूर्त्तः—तदद्य प्रेष्येते द्वाविभ्यपुत्रौ ।

अनङ्गदाः—किमेकस्मिन् काल एव द्वावपि प्रेष्येते ?

धूर्त्तः—न हि, न हि,—क्रमशः—तदा, (कर्णे एवमिव) पश्य, स युवा इत एवाभिवर्तते, तदभ्यन्तरं याहि—

( अनङ्गदा सस्मितं सविभ्रमं निष्क्रान्ता )

( ततः कनीयान् इभ्यकुमारः प्रविशति )

कनीयान्:—मया तावदिदानीं तथा निर्वर्तनीयं कार्यम्, यथा अस्मद्भ्रातुः कर्णपथम् इदं वृत्तं न प्रविशेत् । भवतु प्रतिभावैभवेन समीहितं सम्पादयामि।(इत्युपसर्पति)

धूर्त्तः—(गाम्भीर्यमभिनयन्) अपि स्वागतम् । अलङ्क्रोत्वासनमिदं ।

कनी०—(आसने उपविश्य) इदं तावदानीतं (इति निजवारवाणभस्त्रिकातः धनग्रन्थिमादाय अर्पयति)

धूर्त्तः—(क्वापि दत्तदृष्टिः एकेनैव हस्तेन आदाय धनग्रन्थिं पेटिकान्तः पातयित्वा) साप्यानीयताम् एकावली ।

कनी०—तथैवास्तु, (सभयं परितः पश्यन् मन्दमुपसृत्य सदैन्यं) इदमेकमभ्यर्थये । अमुं उदन्तं कस्यचिदपि कर्णे मा पातयेति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



र्त्त:-(अधरतलनिहिततर्जनीमुखः) किमेतदपि वक्तव्यं, याहि, क्षिप्रमानय तामेकावलीम् । जानीहि भवत्कार्यं हस्तगतमिति ।

नी०— तथा (इति सहर्षं निष्क्रान्तः) ।

र्त्त:-(नेपथ्याभिमुखमवलोक्य) एकस्तावत्प्रयातः, अपरः प्राप्तः, भवतु नाम, 'श्रिया दुरापः कथमीप्सितो भवेत्

( ततः प्रविशति ज्येष्ठकुमारः )

ष्ठ कु:-अहो ! तस्यास्सौन्दर्यं, येन मम सर्वस्वदित्सा जाता । गाम्भीर्यं क्वापि लीनं, भवतु, तां कथमपि वशीकरोमि (इत्युपसृत्य) किमिदं निर्व्यापारं स्थीयते ।

र्त्त:-निषण्णोस्मि भवदागमनमेवानुपालयन्, किमानीतम्

०:-अथ किम्—(इति सुवर्णांगुलीयकमर्पयति) ।

र्त्त:-(अंगुलीयकं निजांगुलौ प्रवेशयन्) यद्यानीयते सापि सुवर्णमालिका तदा भवदायत्ता संवृत्तेति दृढं मन्यस्व,

०:-(सदैन्यं) सा त्वस्मत्पितृकण्ठे वर्तते, तदद्य नावकाशः तदानयनाय ।

र्त्त:-तर्ह्यत्रापि नावकाशः ।

०:-(साञ्जलिबन्धं) मा कुप्यतु भवान्, कथमप्यानीयते ।

र्त्त:-(सस्मितं) भवानपि मा कुप्यतु, कथमप्यवकाशो दीयते ।

०:-यथा सा मदीया भवेत् तथानुग्रहः कार्यः ।

र्त्त:-यद्यदानीयेत मालिका ।

०:-तथास्तु (इति परिक्रम्य स्वगतम्) भवतु बुद्धिवैभवेन कथमप्यपहृत्य दास्याम्यस्मै तां मालिकाम् अन्यथा दुर्लभैव सा (इति निष्क्रान्तः)

र्त्त:-अहो ! जगति कामवैभवं लुब्धमपि वदान्यं करोति ।

( प्रविश्य कनीयान् )

हन्त, अयःपेटिकान्तर्निहितामिमामेकावलीं चोरवृत्त्या मप्यानीतवानस्मि तदधुना मदधीना संवृत्तेयमनङ्गदा नुपसृत्य ददाति) ।

धूर्त्त:-साधु प्रगल्भोसि । (इति तां कण्ठे धृत्वा किमपि विलिख्य पत्रिकां पुनरुक्तीकृत्य च) मा तावदुद्घाटय पत्रिकां (इति तस्य हस्ते निधाय) अभ्यन्तरं प्रविश्य वत्सायै प्रयच्छ, सा तु समवलोक्य पत्रिकामिमाम् अनन्तरकरणीयं करिष्यति । (इति सम्प्रेषयति)

कनी०—(सहर्षं) अहमेव धन्यः । यतः दत्तावकाशोस्मि । (इति परिक्रामति)

धूर्त्त:-(स्व०)गच्छ अरे दास्याः पुत्र । सा तु भवन्तं दिगम्बरं करिष्यति (इति निष्क्रान्तः)

( ततः प्रविशति आसनोपविष्टा अनङ्गदा )

अनङ्गदा:-(सादरं सहर्षं चोत्थाय) अपि स्वागतं, आसनमिदं अलङ्करोतु भवान् (इत्यासने उपवेशयति)

कनी०:—पत्रिकामर्पयति ।

अन०:-(सविभ्रममादाय विलोक्य च) नाथ, पित्रा दत्तानुमतिरस्मि । भवदीया च संवृत्तास्मि (इति तस्य अंगुलिगतं अंगुलीयकं सव्रीडमादाय) अपि नामेदमंगुलीयस्थं रत्नं प्रशस्तम् ?

कनी०:—अथ किम् ! (इति निजकंचुकभस्त्रिकातः अन्यदंगुलीयकमादाय) पश्य, एतत्सदृशमेव (इति दर्शयति)

अनङ्गदा:-(सस्मितं तदप्यादाय सविभ्रमं द्वयमपि निर्वर्ण्य) धीमता कृतमिदं भवेत् । ईदृशं अंगुलीयकं अन्विष्टमप्यापणे न लब्धं ।

कनी०-प्रिये,यदि स्पृहा,भवत्सकाश एवास्त्विदम् इदं द्वयमपि ।

अनङ्गदा:-(तद्द्वयमपि निजांगुलौ नियोज्य तत्कण्ठलम्बि पीताम्बरं अवलोक्य हस्तेन परामृशन्ती सानुनयं) अनर्घमिदं पीताम्बरं अस्मत्पित्राऽसकृत् अभिलषितं ईदृशं न क्वापि लब्धम् ।

कनी०:—इदमपि भवदीयमेव (इत्यादाय अर्पयति)

अन०:-(तस्य तनुत्रमवलोक्य) नाहमादित्सया तनुत्रमेतत्पश्यामि ।

कनी०:—प्रिये ! अलं मनस्संकोचेन । यदि स्पृहा एतदपि अवमुच्य दीयते ।

( इति तदप्यवमुच्य ददाति )

( ततः प्रविशति ज्येष्ठः )

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ज्येष्ठ:—दत्तेयं पत्रिका धूर्त्तेन । तद्दर्शयाम्येनामनङ्गदायै ।

अन०:—(ससाध्वसाभिनयं विलोक्य) हन्त ! कोप्यायातः । तदद्य भवन्तं अनया मष्या तिरोहितं कृत्वा अभ्यन्तरे स्थापयामि ।

कनी०:—कथमियं मषी मां तिरोहितं करोति ।

अन०:—इयं तिरस्करिणी मषी । अनया प्रलिप्तमुखः संमुखे स्थितोपि न कस्यापि दृष्टिगोचरो भवति ।

कनी०:—तर्हि तथैवाचर इति तिष्ठति ।

अन०:—(मष्या मुखं कालीकृत्य अन्तः स्थापयित्वा) नाथ, अहमपि तिरोधानार्थं धृतपुरुषवेषा मषीकालितमुखी यावदागमिष्यामि भवत्सकाशं तावदिहैव तिष्ठतु भवान् ।

कनी०:—तथास्तु (इति निश्शब्दं तिष्ठति)

अन०:—ज्येष्ठमुपसृत्य (सादरं) अपि स्वागतम् । आसनमिदमलङ्करोतु भवान् ।

ज्ये०:—(उपविश्य) प्रिये ! दुकूलमिदं त्वदर्थमानीतम् । (इत्यर्पयति)

अन०:—समय एव न ज्ञायते । कालयन्त्राऽभावात् । अद्य कति घण्टाः ।

( इति सविभ्रमं पृच्छति )

ज्ये०:—निजतनुत्रभस्त्रिकया घण्टायन्त्रमादाय दर्शयति ।

अन०:—(सविभ्रमं यन्त्रमादाय उपरि भित्तिफलके निधाय) एतादृशयन्त्रग्रहणाय यत्किञ्चिद्धनं अपर्याप्तम् । तदद्य यदि सन्निहितं (इत्यर्द्धोक्ते लज्जां नाटयति । )

ज्ये०:—प्रिये ! अद्य यावद्वर्तते तावत्सर्वमपि ददामि ते । (इति निजतनुत्रभस्त्रिकापरम्परातः क्रमशः द्रविणमन्विष्य सर्वमपि दत्वा तनुत्रमपि निजाङ्गादवमुच्य) पश्य एतावदेव । नास्ति तावदितः काकणिकापि (इत्यवधूय दर्शयति)

अन०:—(सस्मितं तनुत्रमादाय पश्यन्तीव मन्दं भित्तिशङ्कौ योजयति)

ज्ये०:—प्रिये ! किमन्यदपेक्षितं । निवेदय । अहमेव भवदीयः संवृत्तोस्मि ।

अन०:—(ससाध्वसं अभितो विलोक्य) नाथ ! कोप्यागत इव दृश्यते । तदद्य तिरोधानार्थं मषीमिमां तव मुखे निक्षिपामि ।

ज्ये०:—किमियं मषी मां तिरोहितं करोति ?

अनं०:—अथ किम् ? तिरस्करिणी मषीयं ( इति मष्या मुखं कालीकृत्य) नाथ ! अहमपि धृतपुरुषवेषा तिरोधानार्थं अनयैव मष्या कालीकृतमुखी भवन्तं शब्दापयामि, तदा समागच्छतु भवानभ्यन्तरम् । ततश्च यथेच्छमावां विहरावः ।

ज्ये०:—तथैवास्तु (इति परितः पश्यंस्तिष्ठति)

अनं०:—(सस्मितं निष्क्रान्ता) नेपथ्ये (घण्टानादः)

ज्ये०:—(सहर्षमभ्यन्तरं प्रविश्य) प्रिये, अनङ्गदे (इति कनिष्ठं आलिङ्गति)

कनी०:—(स्वगतं) किमियं मामनंगदे, किमिदं ? अलं परिहासेन ।

ज्ये०:—(स्वगतं) किमेषा । धृतवेषान्तरा मामेवं कथयसि ? भवतु तावत् (प्रकाशं) प्रिये, किमेतत् मामप्यनङ्गदे, इति सम्बोधयसि, तदलं परिहासेन ।

कनी०:—(सादरं) अलं परिहासेन, त्वमेव प्रिया ।

(परस्परं सक्रोधं) त्वं प्रिया, अहं प्रियः, तदुपवनमेहि । यथेच्छं विहरावः (इत्युभावप्युत्थाय परिक्रम्य उभावपि परस्परं प्रिये इति सम्बोधयतः)

कनी०:—(सक्रोधं) प्रिये ! मुधा जल्पसि, पश्य मषीमिमां परिमृज्य दर्शयाभिमुखम् । तदा कः प्रियो भवति

ज्ये०:—(सक्रोधं) प्रिये ! किमनया चर्चया । अहमपि मषीमिमां परिमृज्य दर्शयामि मुखम् । तदा त्वमेव ज्ञास्यसि कः प्रियः इति (इत्युभावपि परिमृज्य मुखं परस्परं विलोक्य (स्वगतं) हन्त ! वञ्चितोस्मि वराक्या वाराङ्गनया ।

"प्रमदासु प्रमादो न यूना कार्यः कदाचन ।
दिगम्बरत्वं सिद्धं हि तथा यद्यावयोरिव ॥"

इति सलज्जं मुखेनैव दैन्यं दर्शयन्तौ निष्क्रान्तौ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri




जनसाधारणोपयोगिसूत्र-वस्त्र-निर्माणस्य कृते स्थानीयः प्रधानोद्योगः

# महाराजा श्री उम्मेद मिल्स लिमिटेड

पाली ( मरुधरा )

दीपावल्या अवसरोपरि ग्राहकाणाम् उपभोक्तॄणां शुभचिन्तकानां च सेवायाम्

हार्दिकानि अभिनन्दनानि समर्पयति

अस्माकं समर्घाणि सुन्दराणि च वस्त्राणि क्रीत्वा राष्ट्रीयमुद्योगं प्रोत्साहयत

वस्त्राणि

खादि, लम्बवस्त्रम् (लट्ठा) निष्प्रवाणि, धौतं च
चर्दराणि, द्विसूत्री, रक्त पापलीनानि, शर्टिङ्ग,
कोटिङ्ग, फलालैन, ड्रिल इत्यादयः

सूत्राणि

$1\frac{1}{2}$ काउन्टतः
२४ काउन्ट पर्यन्तम्

मैनेजिंग एजेन्ट्स

## श्री कृष्णाएजेन्सी प्राइवेट लि० पाली (मरुधरा)

तडित्पत्रम् :—उम्मेद मिल्स

दूरभाषः—५३,३३,७४७

★ अवध शूगर मिल्स लिमिटेड

★ अपर गैंगेज शूगर मिल्स लिमिटेड

★ न्यू इण्डिया शूगर मिल्स लिमिटेड

★ न्यू स्वदेशी शूगर मिल्स लिमिटेड

★ भारत शूगर मिल्स लिमिटेड

★ गोविन्द शूगर मिल्स लिमिटेड

शुद्धकणवत्याः इक्षुशर्कराया निर्मातारः

मैनेजिंग एजेन्ट्स :—

# दी काटन एजेन्ट्स प्राइवेट लिमिटेड

कलकत्ता ★ बम्बई


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



बालोपदेशमालायां

# प्रातरुद्बोधनं
## प्रथमो मणिः

( ले० साहित्यमहोपाध्याय-आशुकवि-कविभूषण श्रीहरिशास्त्रीदाधीचः जयपुरम् )

[ टिप्पणीः—बालकानां हृदये स एवोपदेशः स्थानं लभते यस्तैः सह आत्मीयतामास्थाय सुहृद्भावेन तेभ्यो दीयते । श्री हरिशास्त्रिणः प्रातरुद्बोधनं तयैव शैल्या लिखितं क्रमशः प्रकाश्यते । क्रमोऽयं स्तम्भरूपेण बालानां कृतेऽत्यन्तं रोचको नैतिकश्च स्यादिति विश्वसिमः । ]
—स० सम्पादकः

नित्यं रविः प्रातरुदेत्य लोके,
धत्ते प्रकाशं किरति प्रतापम् ।
स्वकर्मसु प्रेरयते च सर्वान्
प्रातर्द्रुतं जागृत बालका भोः ॥१॥

अयि—

बालकाः, पश्यत नित्यं भगवान् सूर्यः प्रातःकाले उदयते । उत्तिष्ठति क्षितिजप्रदेशतः । उदीयमान एव लोके ( संसारे सर्वत्र ) स्वप्रकाशं प्रसारयति, प्रतापं च किरति वर्षति आतपं वितनोति इत्यर्थः । पुनश्च सर्वान् प्राणिनः स्वस्वकर्मसु प्रेरयति । सूर्योदये जाते सर्व एव जनाः स्त्रियः खगा मृगाः सर्पाः कृमिकीटाद्याः स्वकर्मसु लगन्ति । उत्थाय उत्थाय शौचादि कृत्वा स्नानं परमेश्वरध्यानं पूजनं स्वाध्यायं च सेवादिवृत्तिं वा व्यापारं चापि मनुजाः कर्तुमारभन्ते । खगा मृगाश्चापि स्वं स्वमशनं गवेषितुं यत्र तत्र प्रचरन्ति । अर्थात् सर्वे स्वस्वकर्मणि प्रवृत्ता भवन्ति इति । सूर्यं दृष्ट्वा यथा सर्वे लोकाः उद्योगपरायणा भवन्ति तथा अस्माभिरपि स्वकर्मणि अध्ययनादौ प्रवर्तितव्यम् इति ध्यायद्भिर्भवद्भिः प्रातःकालात्पूर्वं एव उत्थातव्यम्, शयनं त्यक्तव्यम् । अन्नफलादि च सूर्यकिरणेभ्यः रसं, रसे च माधुर्यं प्राप्नुवन्ति । परिपक्वानि च फलानि परिपक्वाश्चौषध्यः उपभोगयोग्यानि भवन्ति । इति सूर्यस्य प्रकाशेन प्रतापेन च बहव उपकारा लोके भवन्ति । एष हि समयः अमृतवेला इति कथ्यते । प्रभातकालात् पूर्वं रात्रेः चतुर्थप्रहरस्य त्रयो भागाः भवन्ति । उषःकालः, अरुणोदयः, प्रभातं चेति । शास्त्रकारैरुक्तम्—पंच पंच उषःकालः सप्तपञ्चारुणोदयः । अष्टपञ्च भवेत्प्रातः शेषः सूर्योदयः स्मृतः । अस्य अर्थः—एवं शयताम् । पञ्च पञ्चाशत् (५५) घटिकामितं कालमारभ्य सप्तपंचाशद्घटिकापर्यन्तं घटीद्वयपरिमितः कालः उषः काल इति उच्यते । ततः पश्चात् सप्तपञ्चाशत्घटीकालमारभ्य अष्टपञ्चाशत्पर्यन्तं अरुणोदयकालो भवति तत उपरिष्टात् शेषः घटीद्वयपर्यन्तः कालः प्रभातकालः । इतः पूर्वं उषसि काले अरुणोदये वा काले विद्यार्थिभिः अन्यैरपि मानवैः सर्वैरपि शयनादुत्थातव्यं समुत्थाय च भगवतः परमेश्वरस्य स्मरणं च कर्तव्यम् ।

उषःकाले उत्थाय पठनं स्वाध्यायश्च बहु सुफलाय भवति । स हि कालः प्रतिभां नवनवां करोति, तदा हि पठितं चिरस्मरणाय भवति, स्थिरीभवति । न विस्मरति तत्कालीनं वृत्तं पठितं च कोऽपि विद्यार्थीजनः ।

अस्मिन् हि वै उषःकाले वायुः शीतलः सुगन्धवान् प्रचलति, परं नासातो जलपानं तु दृष्टिं प्रवर्धयते स्मृतिं च बहुलीकरोति पलितं च नैवागन्तुं ददाति । स्वास्थ्यं प्रददाति, इति आयुर्वेदविदो भाषन्ते ।

अयं हि समयो विद्याध्ययनं कुर्वतां भगवद्ध्यानं च कुर्वतां जनानां तथा साधयतां च कृते परमं रसायनमस्ति इति सुतरां निश्चयः ।

तदीदृशे लाभप्रदे नैरोग्यवर्धके काले, किं न प्रबुध्यते, अवश्यमेव आलस्यं विहाय सत्वरं प्रभातकालात् पूर्वमेव उषः काले समुत्थातव्यं पठितव्यं च सुमतिभिश्छात्रैः नैरोग्याभिलाषिभिश्च सर्वैरपि मानवैः ।

अस्मिन्समये प्रबोधं प्राप्य शौचस्नानादिभ्यो निवृत्य विद्वांसो ब्रह्मचारिणश्छात्राश्च सन्ध्योपासनं कृत्वा गायत्र्यादि स्वाभीष्टदेवतामन्त्रं जपन्ति । तेन तेषां मतिर्मनश्च निर्मलं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भवति, धारणाशक्तिश्च वर्धते, आलस्यं दूरं प्रयाति उत्साहो हर्षः प्रसन्नता च वर्धते। इति अस्माकमनुभवः।

अपरञ्च सूर्योदयकाले स्वपतां च बलहानिः बुद्धिमान्द्यं च, तथा महदालस्यं चोदयते। ते प्रतिदिनं कान्तिहीना लक्ष्यन्ते, ये सूर्योदयेऽपि ततः परमपि निद्रायां मग्ना स्वविस्तरेषु पतिता न चेतन्ते। लक्ष्मीरपि तान् त्यजति, तादृशानां समीपे पूर्वत उपस्थितापि सा शनैः २ पलायते, अर्थात् ते सूर्योदये स्वपन्तः पुरुषा (बाला वा स्त्रियोऽपि) धनहीना भवन्ति समृद्धिस्तेषां गृहादपैति। तदत्र प्राचीनं वृत्तमिदम् उदाहरणीयं पठत—एकदा नारदो नाम महर्षिः भगवतीं लक्ष्मीं प्रणम्य उवाच—भगवति महालक्ष्मि तवैव विलसितमिदं सर्वत्र, तवैव प्रभावाज्जगदिदं चमत्करोति। यत्र यत्र तव कलास्तत्र तत्र सर्वत्र सर्वप्रकारक आनन्दो दृष्टः त्वया निर्गुणोऽपि गुणवान् क्रियते, नीचोऽपि सर्वमान्यो भवति सर्वादृतो भवति परं पृच्छामि त्वाम् इदमहम्—यत् भवती नैकत्र चिरं स्थातुं क्षमेति किमिति ते चित्तम्, कीदृक् तव स्वभावः? कान् पुरुषान् आश्रयसे कांश्च त्यजसीति कृपया मह्यं निर्दिश।

लक्ष्मीरुवाच—देवर्षे, मदीयं स्वभावं सर्वे जानन्ति मदीयान् गुणानपि सर्वे गायन्ति समाह्वयन्ति वाञ्छन्ति मामेव सर्वे। अहं यान् यान् श्रयामि यैर्यैर्गुणैरहं प्रसन्ना भवामि तान् पुनः कदाचिद्वक्ष्यामि, परं यै यैः दुर्गुणैर्यान् यान् त्यजामि तत्र वसानाऽपि ततः सुदूरं प्रयामि तांस्तुभ्यं वदामि। शृणु—मदीयोऽयं निश्चयस्त्वया न विस्मर्तव्यः।

कुचैलिनं दन्तमलोपधारिणं
बह्वाशिनं निष्ठुरभाषिणं च।
सूर्योदये चास्तमिते शयानं
मुञ्चामि, तादृक् यदि चक्रपाणिः ॥१॥

अस्यार्थः—कुत्सितवसनवतां यस्य हि मलिनानि वस्त्राणि दुर्गन्धभरितानि त हि मानवं को नाम स्वभृत्यत्वे नियोजयेत्। विचार्यतां किञ्चित्, कथं स धनमर्जितुं शक्तः। इति कृत्वा उपदिशति कुचैलिनं इति। कुवस्त्रवन्तं लक्ष्मीस्त्यजति। इत्यर्थः दन्तमलोपधारिणम्—दन्तेषु मलं पूतिगन्धमन्नादि न मार्जयन्तं मुखे दुर्वासनायुक्तं मुखे दुर्गन्धवन्तमित्यर्थः, यस्य मुखाद्घ्राणेन समं दुर्गन्धः प्रसरति तादृशं जनमपि को नाम राजा वा धनिको वा वैश्यो वा स्वभृत्यत्वे नियोक्तुं वाञ्छति, न कोऽपि इति। स कथं द्रव्योपार्जनायां क्षमो भवेदिति कृत्वा निर्दिष्टं दन्तमलोपधारिणम्।

बह्वाशिनं बहु नियतभोजनादधिकं प्राश्नातीति तादृशम् बहुभोजना हि सदालसा रुग्णाश्च भवन्ति तादृशा न हि उपार्जनपरा भवन्तीति स्पष्टम्। निष्ठुरभाषिणं च निष्ठुरं क्रूरं कटु तीक्ष्णं कठोरमिति यावत् भाषणशीलं पुरुषं न कोऽपि स्वाश्रये रक्षितुं प्रभवतीति दुर्गुणोयमपि धनोपार्जनाया बाधक एवेति सर्वे जानन्ति।

तथा च सूर्योदये चास्तमिते, सूर्ये उदितेऽपि शयानं, शयनशीलं यो हि सूर्ये ह्यस्तमिते स्वपिति, सूर्योदये सत्यपि स्वपिति तादृशं पुरुषं न कोऽपि श्रीमान् सुमतिः उद्योगपतिः स्वाश्रयं दातुं न विचारयतीति सूर्योदये स्वपन् मानवोऽपि धनोपार्जनाय न क्षम इति कृत्वा उपदिष्टं सूर्योदये चास्तमिते शयानमिति। तत्त्वमिदं बुध्यताम्—लक्ष्मीर्वदति अहं कुचैलिनं दन्तमलवन्तं बहुभक्षकं कठोरवाचं सूर्योदये चास्तमिते शयनशीलं सत्वरमेव मुञ्चामि यदि भगवान् चक्रपाणिरपि तादृक् भवेत् तदाऽहं तमपि मुंचेयम् किमिति साधारणान न मुंचेयम् इति ध्रुवं धारणीयं भवद्भिः इत्येतेनोदाहरणेन—

अयि बालाः! ज्ञातं भवद्भिः प्रातः शयनं नामं दुर्गुण एवास्ते सर्वसम्मतः। तदयं त्याज्यो युष्माभिः। उषः काले च प्रबोधः सुगुणः सर्वमान्यः शास्त्रसम्मतश्च। अरुणोदयवेलापि सुखदा सुभगा च प्राचीनैर्विद्वद्भिः प्रोक्ता इति तत्रापि प्रबोधः सुखद एव, परं सूर्योदयपर्यन्तं शयनं तु सर्वप्रकारतो हानिप्रदं व्यसनवर्धकं, नैव कर्तव्यं नादरणीयमेव। ततः परमपि सूर्योदयात् पश्चात् होराद्वयं यावत् शयनं तु परमदुर्भाग्यकरं बलपुष्टिनैरोग्यहारकमेवेति नैवाचरणीयम्।

तदेवं सूर्योदयतः पूर्वं सम्यक् प्रबुध्यमानानां भवतां मतिर्मनश्च स्वास्थ्यं च विमलं प्रसन्नं च भविष्यति। अधीतं च ऊर्जस्वित् स्थिरं च भविष्यति। आलस्यम् च पराभविष्यति।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# द्राक्षा-मृद्वीका

( ले० वैद्यः श्रीकन्हैयालाल भेड़ा, बम्बई )

उत्पत्तिस्थानम्—काश्मीर-पञ्चनद-काबुल-बलूचिस्थान-अफगानिस्थान-गान्धार-फारस-यूरोपप्रभृतिदेशाः । हिमालयस्य पश्चिमभागेऽपि स्वयमेव भवति । मुम्बईप्रान्ते नासिकक्षेत्रमपि ।

वर्णनम्—इयं हि बहुवर्षायुःसुदीर्घलतायाः परं प्रसिद्धं फलम् । अस्य प्रधानतो भेदद्वयम् । एकं बृहत्—न्यूनाधिकबीजयुक्तम् । तानं (पक्वानि शुष्काणि च फलानि) मुनक्कादाखनाम्ना व्यवह्रियते । कृष्णं फलम् "अह्वदा कुल नकर" नामकमरबीभाषायाम् । द्वितीयं हि फलं ह्रस्वमिदं हि तदपेक्षया क्षुद्रं (वृत्तं) बीजरहितञ्च । वन्यपर्वतीयोद्यानजप्रभृतिभेदैः, वर्तुल, दीर्घ, ह्रस्वादि-आकारैः, श्वेत-रक्त-कृष्णादिरङ्गैश्च नानाविधानि फलानि भवन्ति । एषु पूर्वं पूर्वं श्रेष्ठतमम् । अथ च एषु तदेव फलं सर्वोत्तमम्भवति, यच्च ग्रीष्मर्तुभवं, यच्च बृहत् परिपुष्टञ्च, यस्य फलत्वचा तन्वी, यस्य स्थि च सूक्ष्मम्भवेत् ।

उपयुक्ताङ्गानि—पत्राणि, पुष्पाणि, निर्यासः, आर्द्राणि, शुष्काणि च फलानि ।

रासायनिकसंगठनम्—द्राक्षायाः फलेषु द्राक्षाशर्करा (ग्लुकोज) निर्यासः, कषायभागः (कषायिन-टैनिक),निम्बाम्लम् द्राक्षाम्लम् सेवाम्लम् (मलिक एसिड) तथा बहुविधानि क्षारद्रव्याणि यथा—क्लोराइड्स आफ पोटासियम्,सोडियम् सल्फेट आफ पोटास प्रभृतीनि, एवं लौहानि तथा एल्युमिन आदि पदार्थाः सन्ति । चिञ्चाम्लञ्च द्राक्षासु विशेषजातीयमम्लम् । शुष्कफलेषु निर्यासः, तथा शर्करातिरिक्तसाल्मीकृत स्वरूपे सुधा (केल्सीयम्), मनोशियम्, फास्फरस तथा अयांस्यपि भवन्ति । बीजेषु एकं घनं स्थिरं तैलं वसा वा तथा ५% कषायाम्लं भवति । कोमलशाखासु प्रतानेषु च टंकवाम्लं (बोरिक एसिड) जायते । द्राक्षारसेनैव आसवः, शुक्तम्, मद्यञ्च जायते ।

प्रकृतिः—सुपक्वेयं परमुष्णा स्निग्धा तथा चापक्वा शीता रूक्षा च । यथेयं परं मधुरा दीप्रपाचनी-सरा, बल्या, शुद्धरक्तानुकारिणी, मूत्रला शीघ्रपाचनी च । शलाटुः (अपक्वा) संग्राहिणी । रक्तपित्त, यकृत्, तृषा रोगेषु परं प्रशस्ता । अस्याः स्वरसेन निष्पन्नं शार्करं सौमनस्यजननं परं बलवर्धकञ्च । प्लीहशोथे वस्त्यश्मर्यां द्राक्षानिर्यासो मद्येन सह प्रयोजितो भवति । अस्याः पत्राणां लेपः कण्डु, दद्रु, पित्तजशिरोरोगेषु, नेत्रयोः श्वयथौ, दाहे च परं प्रसिद्धः फलेग्रहिः । अस्याः स्वरसश्चामाशयशक्तौ रक्तछर्दातिसाराभ्याममोघफलोदयः । पुष्पाणि च सुगन्धीनि, सौमनस्यानि हिक्कावमिहन्तॄणि च । एतासां किसलयैर्निर्मितं शार्करं पैत्तिकं हृत्स्पन्दनं मदं हृल्लासञ्च सद्य एव हत्वा परामग्निवृद्धिं विदधाति । पुष्पाणामर्कोपि पुष्पापेक्षया यावनीमते सूक्ष्मतरो बलवत्तरश्च । अस्याः काष्ठस्य भस्म रक्तिकाचतुष्टयोन्मितं अश्मर्यै शिरोरुजायै च पाने परं प्रशस्तम् । भस्मतः पानलेपाभ्यां भवति शान्तिरस्यापि । फलानामधिकसेवनाज्जायते चानाहः । तत्र वातानुलोमनहिंग्वादि चूर्णानामुपसेवनम् । अतश्च पाचनानुसारं मात्रया सेवनम् ।

अयं विशेषः—आर्द्रापेक्षया वानानि फलानि जीवनीय, सांद्रदोषपाचन प्रमाथि, कोष्ठमृदुकर-दोषादिविलयन, अंशामाशयलेखनीय, यकृद्बलदायक, हृदयबलप्रद, बाजीकर, कामोत्तेजक, बृहणीयानि सन्ति । बीजञ्च संग्राहि । चरकसुश्रुतवाग्भटादिप्रथितबृहत्त्रय्यां, धन्वन्तरिनिघन्टु, भावप्रकाशादि निघन्टुषुच विद्यन्ते चास्या विशदं गुणादयः । तथाच—तृष्णा दाह ज्वर श्वास रक्तपित्त क्षत क्षयान् ।

वातपित्तमुदावर्तं स्वरभेदं मदात्ययम्
तिक्तास्यतामास्य शोषंकासञ्चाशु व्यपोहति ।
मृद्वीका बृंहणी वृष्या मधुरास्निग्ध शीतला ।

(च० सू० २७)

—क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# ५-६-५८दिने मोहमयीनगरस्य सुप्रसिद्धो व्यवसायी एवम् उद्योगपतिः श्रीपीरामलमाखरियामहोदयो दिवमारूढः

संक्षिप्तपरिचयः—स्वर्गीयः श्रीपीरामलमाखरियामहो-

दयो मोहमयीनगरस्य सुप्रसिद्धो व्यवसायी एवमुद्योगपति-रासीत् । महोदयस्याऽस्य सितम्बरमासस्य (१९५८) ५तारि-कायामकस्मात् हृदयगतेरवरोधेन देहावसानमभूत् । आसीदस्य वयः ६७ वर्षात्मकम् । माखरियामहोदयः 'मारवाड़ी संमेल-नस्य' संरक्षकसदस्यः, प्रत्येककार्ये रुचिसंपन्नश्चासीत् । ५सि-म्बरदिने मोहमयीनगरस्य प्रमुखव्यापारः, सार्वजनिकसंस्थाश्च शोकनिरुद्धा आसन् ।

महोदयस्यास्य जन्म १८९१तमे ख्रिष्टीयवत्सरे शेखावा-प्रान्तस्य 'बगड' संस्थानेऽभवत् । पञ्चदशवर्षीय एवा-व्यावसायिकजीवनं प्रारभत । अनेकानि समाजोन्नतिकार्याणि सोयं चक्रे । शिक्षायाः प्रोत्साहनार्थं दशलक्षमुद्राणामेकं पृथग् निधिमयं स्थापयामास । 'बगड'स्थाने (राजस्थाने) एकं 'मिडिल' विद्यालयम्, बालिकाविद्यालयं औषधालयं चासौ निजधनेन स्थापयामास । एतदतिरिक्तमनेकाभ्यः सार्वजनिकसंस्थाभ्यः सोयमार्थिकीं सहायतां प्रददौ । मोहमयी-स्थानामनेकप्रतिष्ठानानां चाऽऽसीदयं संचालकः ।

'भारती' सेयमपि भवत्सुदृष्ट्या सुप्रासीदत् । भारतीपरि-वारो दिवंगतायात्मने शाश्वतीं शान्ति कामयते । तथा महो-दयस्याऽस्य सुयोग्या संततिः तद्वदेव आस्तिकभावापन्ना धर्म-संस्कृति-संस्कृतप्रचारकार्येषु सदैव सहयोगदायिनी भूयादिति भगवन्तमर्थयामहे ।

---

## संस्कृतसमाचाराः

### कालिदासजयन्ति

कविकुलगुरोः कालिदासस्य जयन्ती ऐषमो भारतव्यापिना किंवा आन्तरराष्ट्रियेण सुमहता संभारेण समायोजितेति पूर्वत एव विदितं पाठकानाम् । भारतसर्वकार-मध्यप्रदेशसर्वकारयो-र्वदान्यतया उज्जयिन्यामन्ताराष्ट्रीयस्तरोपरि जयन्ती संमानिता । २०ता०तः २६ता० पर्यन्तं सप्ताहोऽयं समभूत् । २० ता०यां राष्ट्रपतिमहोदय उज्जयिन्यामाजगाम यत्र तेन २१ तारिकायां मेघदूतचित्राणां प्रदर्शिन्याः एकस्या उद्घाटनं विहितम् । डा०हजारीप्रसादद्विवेदस्य प्रकाश्यभाषणे, कतिपयविचार-संगोष्ठीष्वपि च राष्ट्रपतिमहोदय समुपस्थित आसीत् । अस्मिन्नवसरे कुमारसंभव-ऋतुसंहारयोः सुरुचिपूर्णानि नितान्तमभिनन्द्यानि संगीतनाट्यानि, शाकुन्तलमालविका-विक्रमोर्वशीयानां संस्कृताभिनयाश्च समुल्लेखनीया आसन् । देहलीस्थभारतीयकलाकेन्द्र–श्रीरातञ्जनकर-कलिकातासंस्कृत विद्यालयादि प्रमुखव्यक्तीनां संस्थानां च प्रशंसनीयः प्रयत्नोऽभूत् । विक्रमविश्वविद्यालयायोजितं कविसंमेलनं २३ता० भारतीसंपादकमहोदयानामध्यक्षतायां समघटत यत्र विभिन्नभाषासु कालिदासाय काव्यमयाः श्रद्धांजलयः समार्प्यन्त । २२ तारिकायां २३ ता० यां च विचारगोष्ठ्योऽभूवन् । "कालिदासस्य जीवनकालः को निश्चितः?" "कालिदासकाव्ये...तायां प्रकृतिः" "किं शकुन्तलायाः परित्यागस्य विषये कण्वः पूर्वत एवाजानात्?" इत्यादीनां विषयाणामुपरि भारतख्यातिमतां विदुषां भाषणान्यभूवन् । एषु कार्य- क्रमेषु पंजाबराज्यपालः श्रीनरहरिविष्णुगाड़गिलः, संसदध्यक्षः श्रीमदनन्तशयनः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सूक्ति-सुधा

पुराणमित्येव न साधु सर्वं
न चापि सर्वं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद् भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ॥ कालिदासः

★

पुरानी और परम्परागत होने के कारण ही कोई चीज अच्छी नहीं हो जाती—न ही कोई चीज बिलकुल नई होने के कारण ही अच्छी होती है। नई और पुरानी दोनों ही कृतियों में अच्छाइयां और बुराइयां हो सकती है। समझदार लोग भलीभांति देखभाल कर ही चीज की परख करते हैं और उसे अपनाते हैं—मूर्खों को लोग जैसा कह देते हैं—वैसा ही मान जाते हैं।

★




अय्यङ्गारः, मध्यप्रदेशराज्यपालः श्रीपाटस्करमहाभागः, मुख्यमन्त्री श्रीकैलासनाथकाटजू, शिक्षामन्त्री श्रीशङ्करदयालशर्मेत्यादयो जननायकाः, महामहोपाध्याय वी०वी० मिराशी, डा० भगवत्शरण उपाध्याय, डा० वेंकटराघवन्, श्रीबलदेवोपाध्याय, श्रीओंकारनाथठाकुरप्रभृतयो भारतीयविद्वांसः, श्री वारान्निकोव श्रीमतीकमलारत्नम् प्रभृतयो वैदेशिकविद्वांसश्च समुपस्थिता ,आसन्। अन्तिमदिने 'कालिदासस्मारकस्य श्री काटजुना' शिलान्यासः कृतो यत्र भारतीसंपादकेन मंगलाशंसा कृता। कालिदासस्य कालसंबन्धे विदुषां बहुमतं प्रथमशताब्दीमेव स्पृशतिस्म किन्तु डा०भगवत्शरणोपाध्यायेन पर्यन्ततश्च श्रीवी० वी० मिराशीमहाभागेन कालिदासस्य गुप्तकालोद्भवत्वं विविधप्रमाणैः प्रस्तुतम्। श्रीअनन्तशयनम अय्यङ्गारेण सविनोदं कालिदासस्य गौडत्वे, द्राविडत्वे च संभाविते एतद्विषये गवेषणाया आवश्यकत्वं सूचितम्। श्रीओंकारनाथठाकुरेण गीता मेघदूतश्लोकाः। जयपुरनगरे २३तारिकायां महाराजाकालेजे कालिदासीयकवितानां पाठः तद्विषये विदुषां भाषणानि चाभूवन्। जयपुरसंस्कृतकालेजे २४-२५ नवम्बरतारिकयोर्जयन्ती ससमारोहं संमानिता। २४तारिकायां श्रीनिरञ्जननाथ आचार्यमहाभागानां साभापत्ये कालिदासाय श्रद्धांजलयः समर्पिताः कालिदासचित्रानावरणाय विधानसभायै प्रस्तावः प्रहितः, २५ ता० यां कालिदासाय काव्यमयाः श्रद्धांजलयोऽर्पिताः। सभापतीश्रीपूनमचन्द्रविश्नोई राजस्थानस्योपशिक्षामन्त्रिणः, भूतपूर्वलोकसेवायोगाध्यक्षाः श्रीदेवीशङ्करतिवारिणश्चास्ताम्। स्थानीयराजस्थानकालेजे २५ ता० यां कालिदासविषये भाषणाम्, २५ ता० यां छात्रैरभिनीतं शाकुन्तलस्य पूर्वार्धं च प्रस्तुते। २६ नवंबरदिने योधपुरे जयन्ती संमानिता। बीकानेरनगरेऽपि २५ नवंबर दिने भाषणैः, काव्यैश्च कालिदासाय श्रद्धांजलिः समर्पितः।

स० संपादकः

प्रकाशक :—जयबहादुरसिंह पता :— गोपालजी का रास्ता, जयपुर (राजस्थान)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

मुद्रक :—शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर।

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारती

## संस्कृतस्य प्रमुखं मासिकपत्रम्

संसारभी-ताप-हरा हि गीता
नीता निजान्तःकरणे जनेन ।
अन्यान्यधीतानि च न प्रतीच्छेत्
मुनिप्रतीता बत सेयमुक्तिः ॥१॥

वर्षम् ६ | द्वितीयाङ्कः | वार्षिकमूल्यम् ४) चतस्रो मुद्राः, एकः चत्वारिंशत् नवपणाः (४० नये पैसे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri





क्या आप इसे जानते हैं ?

मनुष्य को जीवन के त्रितापों से मुक्ति प्रदान करनेवाला यह सनातन ज्योतिर्लिंग देश के सबसे बड़े और विश्वासी आयुर्वेदीय प्रतिष्ठान का बोध-चिह्न बनकर लाखों-करोड़ों लोगों के जीवन को आरोग्य प्रदान करने के कार्य में आज अग्रसर है। आपने यदि अब तक बैद्यनाथ औषधियों के गुण का स्वयं अनुभव नहीं किया है, तो एक बार इसे अवश्य आजमाइये।

देशी दवाओं का सब से बड़ा और विश्वासी कारखाना

श्री बैद्यनाथ
आयुर्वेद भवन प्राइवेट लि०
कलकत्ता · पटना · झाँसी · नागपुर

P43


राजस्थन-मद्रास-मध्यप्रदेश-सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार-पञ्चनद-आन्ध्र बम्बई-सर्वकारै-स्वीकृता—

## विषय-सूची


| क्रम सख्या | लेखाः | लेखकाः | पृष्ठ सं० |
|---|---|---|---|
| १. | विषमता | श्रीव्रजमोहनझा | २७ |
| २. | प्राचीनइतिहासभूगोलयोर्ज्ञानार्थम् कुञ्जिका भूगोलः | श्रीमल्लिनाथशर्मान्त्रौमालः चुरू, राजस्थानम् | २८ |
| ३. | अन्तर्व्यूहः ! | श्रीगणेशरामशर्मा विद्याभूषणम् ,झालावाड़ | ३० |
| ४. | हेमन्तः | श्रीशङ्करलालशर्मा, भिषगाचार्यः, फतेहपुरम् | ३३ |
| ५. | राष्ट्रविजयाभ्यर्थना | श्रीहरिशास्त्री दाधीचः, जयपुरम् | ३४ |
| ६. | भारत्यै शुभसन्देशः | बम्बई राज्यपालस्य श्रीप्रकाशस्य | ३५ |
| ७. | द्राक्षा-मृद्वीका | श्रीकन्हैयालाल भेड़ा, बम्बई | ३६ |
| ८. | कालिदासस्य कविता | श्रीप्रभाकरशर्मा शास्त्रीः, जयपुरम् | ३७ |
| ९. | उज्जयिनीजातः कालिदासस्मृतिमहोत्सवः | श्रीगोपालनारायणपारीकः, एम. ए. | ४० |
| १०. | सम्पादकीयम् | सम्पादकः | ४४ |
| ११. | गुरुजनवन्दनम् | श्रीहरिशास्त्री दाधीचः, जयपुरम् | ४५ |
| १२. | लम्बकूर्चो मूर्खः | सहसम्पादकः | ४७ |
| १३. | सूक्ति-सुधा | सम्पादकः | |


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एम. ए.
जयपुर

# भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः—
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर

वर्षम् ६ | मार्गशीर्षशुक्ला प्रतिपद्, सं० २०१५ | अङ्कः २

## विषमता

(ले० पं० श्रीव्रजमोहनझा)

कस्मैचित्करुणासागरोऽसि, कस्मैचिद्विपदामाकरोऽसि ।
साम्राज्यं कस्मैचिद्विलासि, दारिद्र्यं कस्मैचिद्ददासि ॥
न्यायोऽयं नाथ ? विचित्रस्ते ।
पन्थाः खलु सोयं विषमस्ते ॥१॥

म्रियते कश्चिद्भुञ्जान एव, कश्चिद्भोजनमन्तरेणैव ।
व्यथयति कञ्चिन्मृदुतूलिकापि नन्दयति कमपि कर्कशशिलापि ।
श्वानोऽपि कस्य चिद्विलसन्ति ।
शिशवोऽपि कस्यचिद्विलपन्ति ॥२॥

खिन्नः कश्चित्प्रासादतोऽपि, हृष्टः परन्तु कोऽप्युटजतोऽपि ।
मिष्टान्नचर्वणाचणः कोऽपि, पिष्टान्नबिन्दुविकलस्तु कोऽपि ॥
सन्दृश्य न कोऽञ्चति रोमाञ्चम् ।
लभते न कश्च किल संकोचम् ॥३॥

कस्मैचिन्नालं मृत्तरोऽपि, रचितो द्रुतगामी स्पुतनिकोऽपि ।
इह धूम्रयानमपि कष्टतोऽपि नारोढुं शक्तः क्वापि कोऽपि ॥
कोऽप्यश्वजीवनं यापयति,
निजपृष्ठे नरभारं वहति ॥४॥

शृणुमः सर्वेषामेक एव, जनको जननी सर्वस्वमेव ।
द्वैधं कथमिति विदधासि देव ! हसतीह कोऽपि रोदिति क एव ॥
जन्मतः कोऽपि किं सत्कार्यः ?
अपरो वा किमिति तिरस्कार्यः ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# प्राचीनइतिहासभूगोलयोर्ज्ञानार्थम् कुञ्जिका भूगोलः

( ले० मल्लिनाथशर्माचौमालः चूरू, राजस्थानम् )

[ टि० श्रीचौमालमहोदयाः पुरातत्त्वस्य, संस्कृतेश्चाधिकारिणो विद्वांसः रोगशय्यानिषण्णा अशक्ता अपीमे गवेषणापूर्णान् लेखान् शिष्येभ्यो विलेख्य भारत्यै दयन्ते इत्येषामाभारिणः संस्कृतज्ञाः। स० संपादकः ]

आदौ अस्माकं भूपिंडः आत्मरूपे स्थितः आसीत्। आत्मनः आकाशरूपें परिणतः, आकाशाद् वायुरूपे परिणतः, वायोस्तेजोरूपे परिणतः, तेजसो जलरूपे परिणतः जलात् पृथ्वी ( स्थल ) रूपे परिणतः, स्थलात् औषधिरूपे औषधिभ्यो अन्नरूपे परिणतः, अन्नात् पुरुष (प्राणी) रूपे, परिणतः इति। भूपिंड़ोपरि यत् किंचिदेव चराचरम् दृश्यते तत्सर्वं आत्मनः एव विकासो दृश्यते नान्यत् किंचिदपि विद्यते। अत्रैतद् विचार्यते यत् भूपिंड़ो यदा अग्न्यात्मकगोलकः आसीत् तदा किं सर्वः एव गोलकः एकस्मिन्नेव समये शीतलीभूतः संजातः! नहि! एकदैव न शीतलः संजातः, यतो भूमध्यरेखासमीपे तु अन्यभागेभ्यः पश्चादेव शीतलत्वं गतः इति प्रतीयते। यतः एकस्तु भूपिंडः स्वयमेवाग्निगोलकः तथा सूर्यस्य तापोपि तत्राधिकमात्रायाम् पतति तेन तस्य साहाय्यमपि भवति अतः एतत् स्थानन्तु शीघ्रमेव शीतलं न भवति परञ्च भूपिंडस्य उत्तरदक्षिणध्रुवस्थाने एतादृशे विद्येते यत्र सूर्यस्य तापोतीवाल्पमात्रायाम् गच्छति तदपि केवलं षण्मासपर्यन्तमेव, ततः षण्मासपर्यन्तं तु तत्र सूर्यस्य दर्शनमपि न संभवम् अतः ध्रुवस्थानं सर्वतः प्रथमम् शीतलं जातं इति सिद्ध्यति यतः उत्तरध्रुवस्थानतः सूर्यः उत्तरायणकाले अतीव दूरतरम् भवेत् तथा भूपिंडः दूरतरं गच्छति। यदा दक्षिणायनम् भवेत् तदा भूपिंडः सूर्यस्य निकटस्थितो भवेत् तेन दक्षिणध्रुवस्थानं उत्तरध्रुवस्थानतः पश्चात् शीतलो जातः इति। पुनश्च वैदिकैर्मुनिभिः भूपिंडस्य नराकाररूपं चित्रम् ( नक्शा–ग्लोब ) ग्लोबरूपे गोलं च कल्पितम्। तस्य नराकारस्य ग्लोबरूपस्य चित्रे समष्टिरूपेण उत्तरीयगोलार्द्धं द्युलोकः कल्पितः तस्योत्तरीयध्रुवस्थानं, शिरो, मुखं वा कल्पितं, भूमध्यरेखा नाभिस्थानं कल्पितं तथा दक्षिणगोलार्द्धं समष्टिरूपेण चरणौ कल्पितौ ये च साम्प्रतं उत्तरदक्षिणअमेरिकादेशे स्तः। एवं भूपिंडस्य दक्षिणध्रुवस्थानं च पादतलं ( पातालं ) भूलोको भूमिलोकश्च कल्पितः एवं भूपिंडस्य नराकाररूपं मत्वा तं नराकारं साकारं ब्राह्मणप्रतिमाञ्च मत्वा कथ्यते "एषः ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः "इति सर्वेषां देवानां प्रतिमा (मूर्तिः) कल्पिताः। अतः एव कालात् मूर्तिकल्पना प्रारब्धासीत्। अतः एव भूपिंडस्य विभागविषयेपि वेदा वदन्ति नाभ्याःआसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत पद्भ्याम् भूमिर्दिशः श्रोत्रात् तथा लोकान् अकल्पयन्। एवमेव मनुनाप्युक्तम्। "तदण्डम–करोद्द्विधा" ताभ्यान्तु शकलाभ्याम् च दिवं भूमिं च निर्ममे। मध्ये व्योम दिशश्चाष्टावपां स्थानं च शाश्वतं। तत उत्तरीयशकलेन दिवं ( द्युलोकं ), दक्षिणखण्डेन भूमिं (भूलोकं) च अकल्पयन् अनयोः सन्धिरूपेण मध्यमेन व्योम (अन्तरिक्षं) लोकं कल्पितवन्त इति वेदानां धर्मशास्त्राणां च भूपिंडस्य विभागकल्पना अर्थात् वेदाः धर्मशास्त्राणि च भूपिंडस्य विभागत्रयं कल्पितवन्तो यथा उत्तरीयगोलार्द्धं द्युलोकं कल्पित्वा दक्षिणीयगोलार्द्धं च भूलोकं कल्पित्वा भूमध्यरेखां च अन्तरिक्षलोकं कल्पितवन्तः।

प्राचीनकाले उत्तरीयध्रुवस्थानरूपं सुमेरु (हिमालय) पर्वतकेन्द्रं मत्वा नवत्यंशेन यदि वृत्तं क्रियते तदेव तत्कालीना भूमध्यरेखा आसीत्। सा एव तत्काल आस्ट्रेलियाअफ्रीका आदि देशयोरपि दक्षिणतो आसीत् एतद्देशद्वयं द्युलोकान्तर्गतमेव मन्तव्यम्।

पुनः उत्तरीयगोलार्द्धे पौराणिकमुनीनाम् सप्तविभागकल्पनाप्यस्ति सा चैषा जम्बूद्वीपं, शाकद्वीपं, शाल्मलीद्वीपं कुशद्वीपं, क्रौञ्चद्वीपं, गोमेदद्वीपं, पुष्करद्वीपं इति एवमेव दक्षणीयगोलार्द्धेपि सप्त-खण्डकल्पनाऽस्ति यथा अतल, वितल, सुतल, तलातल, महातल, रसातल, पाताल, इति सप्तखण्डानि विहितानि। तत्रोत्तरीयगोलार्द्धस्य जम्बूद्वीपादि सप्तखण्डेषु आर्यजनाः देवाः ब्रह्मणः आज्ञया यत्र तत्र गत्वा खण्डेषु निवासिनो बभूवुः। एवमेव दक्षिणगोलार्द्धेपि अतलादिखण्डेषु अनार्यजनाः निवसन्तिस्म। एवं भूपिंडस्य उत्तरीयगोलार्द्धं दक्षिणीयगोलार्द्धं च आर्यैः अनार्यैश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



संकुलं जातं तथोत्तरगोलार्द्धस्य द्युलोकरूपस्य वेदा "अदिति" खण्डमपि वदन्ति यथा "अदितिर्द्यौः" यजुर्वेद, एवमेव दक्षिणीयगोलार्द्धस्य च दितिखण्डसंज्ञा कृता यथा "अदितिर्दितिर्द्वे शीर्षकपाले" अथर्ववेदः। अतः अदिति-खण्डे य उत्पन्नास्ते आदित्याः देवाः आर्याश्च अभूवन् तथा दितिखण्डे दक्षिणीयगोलार्द्धे ये उत्पन्नास्ते दैत्याः दानवाः अनार्याश्चासन्। एवं अदितिखण्डं (उत्तरीय गोलार्द्ध) तथा दितिखण्डं (दक्षिणीय गोलार्द्ध) च क्रमात् देवैः आर्यैः संकुलं आसीत्। तथा दिति खण्डं दैत्यैः दानवैरना-र्यैश्च संकुलं आसीत् एवं स्वकीयस्वकीयदेशेषु आदित्याः देवाः आर्याश्च सुखिनो निवसन्तिस्म एवमेव अनार्याः (दैत्या) स्वदेशे सुखिनो निवसन्तिस्म नहि च देवासुराणां कीदृशोपि द्वेषः आसीत्। परञ्च तस्मिन् काले न देवानां राजासीत् न दैत्यानां कोपि शासकः आसीत्। एवं सति भविष्यत्काले अरा-जकतयाभयात् प्रजापतिः देवमुख्यान् दैत्यमुख्यांश्च समाहूय व्यवस्थामकृत। लिखितं च विष्णुधर्मोत्तरे पुराणे अध्याये ५३—

अदितिश्च दितिश्चैव द्वे भार्ये कश्यपस्य च।
अदितिर्जनयामास देवानिन्द्रपुरोगमान् ॥१॥
दितिश्च जनयामास द्वौ पुत्रौ भीमविक्रमौ।
हिरण्याक्षं दुराधर्षं हिरण्यकशिपुं तथा ॥२॥
ततोऽभिषिक्तवान् शक्रं देवराज्ये प्रजापतिः।
दानवानां तथा राज्ये हिरण्याक्षम् बलोत्कटम् ॥३॥
अभिषिच्य तयोः प्रादात् स्वर्गं पातालमेव च।
पातालं शासति तथा हिरण्याक्षे महासुरे ॥४॥
धराधरा धरां त्यक्त्वा खमुत्पेतू रयात् पुरा।
पक्षवन्तो महाभागा नूनं भाव्यर्थचोदिताः ॥५॥
यदा तदा दैत्यपुरं सकलं व्याप्तमंभसा।
दृष्ट्वैव स्वपुरं व्याप्तमम्भसा दितिजोत्तम ॥६॥
दैत्यानुद्योजयामास जातशंकः सुरान् प्रति।
विजत्य त्रिदशान् जन्ये आजहार त्रिविष्टपं ॥७॥

श्लोकानां सारांशः कश्यपप्रजापतेर्दितिश्चादितिश्च द्वे भार्ये आस्ताम्। अदितिस्तु इन्द्रादीन् देवान् जनयामास तथा दितिश्च भीमविक्रमौ हिरण्याक्षहिरण्यकशिपू जनया-मास ततो देवराज्ये शक्रं अभिषिक्तवान् तथा दैत्यानां राज्ये पाताले बलोत्कटं हिरण्याक्षं अभिषिक्तवान् ततस्तयोरिन्द्र-हिरण्याक्षयोः स्वर्गस्य पातालस्य च राज्यं प्रादात् ततः स्व-स्वराज्यं गृहीत्वा स्वस्वराज्य शासनं च कृतवन्तौ। एवं शांतिपूर्वकं उभयो राज्ये प्रचलिते सति केनचित् भूगर्भीय क्षोभेण धराधराः पर्वताः धरां त्यक्त्वा रयात् खमुत्पेतुः यदा यदा दैत्यपुरं हिरण्याक्षस्य देशं नगरं वा जलेन व्याप्तं जातं स हिरण्याक्षः स्वदेशं पुरं वा जलेन व्याप्तं आलावितं च दृष्ट्वा सुरान् प्रति सशंको जातः अर्थात् एनं उपद्रवं सुरैः कृतं मन्यमानः सैन्यमुद्योजयामास। ततः ससैनिको हिर-ण्याक्षः देवान् विजित्य त्रिविष्टिपम् (स्वर्ग) आजहार स्वय-मिन्द्रो जातः। ततो देवैः प्रार्थितो विष्णुर्वराहावतारं कृत्वा पाताले गत्वा तदैव हिरण्याक्षस्य वधः कृतः, ततो अवशिष्टाः सैनिकाः ये स्वर्गे तेन स्थापिता आसन् ते देवैस्त्रिविष्टपात् आर्यावर्तात् निस्सारितास्ते च तस्मात् स्थानात् गत्वा ईरान, ईराक, अरब, अफ्रीका, यूरोपादिदेशेषु गत्वा तत्र स्थायिरूपेण निवासिनो बभूवुः तत्र ये आर्याः देवाः पूर्वतः एव तत्र निव-सन्तिस्मतैः सह मैत्रीं विधाय स्थिताः सन्तो निवसन्तिस्म अतो-नन्तरं हिरण्याक्षस्य भ्रात्रा हिरण्यकश्यपुना भ्रातृवधं श्रुत्वा सेनासंगठनं कृत्वा त्रिलोकीविजयार्थम् संकल्पः कृतः। विजयार्थम् गच्छन् हिरण्यकशिपुः आर्यावर्ते तु देवानां बलाधिक्यात् तत्र प्रवेष्टुं समर्थो न बभूव परंच अन्यान् शाकादिद्वीपा (ईरान, अरब, अफ्रीका) दीन् विजित्य तत्र स्वकीयं उपनिवेशं स्थापयित्वा तत्र शासको बभूव तेन तत्र स्थिताः आर्याः अनार्याः एव कृताः। तथा अन्यैः आर्यैः सह द्वेषं चकार आर्यास्तेन पीडिता दुःखिता बभूवुः तत्रत्यैः आर्यैः प्रह्लादः तत्पुत्रः आर्यधर्मेषु दिक्षितः कृतः भगवद्भक्तः च कृतः। तेन हिरण्यकशिपुना प्रहलादस्य निधनाय अनेके उपायाः रचिताः ततः प्रहलादेन स्तुतो भगवानविष्णुर्नृसिंहा-वतारं (स्वरूपं) धृत्वा हिरण्यकशिपुं जघान। हिरण्यकशिपोः स्मृतिचिन्हानि अधुनापि ईरानदेशे विकृतरूपे स्थितानि संति। अत्रान्वेषकानां कथनं विद्यते अत्र एशियामायिनर प्रदेशे प्राचीन काले कापि कशपिआई जातिः निवसतिस्म यस्याः पूर्वजस्य "कशपिओस" नामासीत्। अत्र कशपिओष हिर-ण्यकशिपुः एव आसीत् यस्य स्मृतौ काकेशस पर्वतः तथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# अन्तर्व्यूहः !
# INTERVIEW

( ले० श्रीगणेशरामशर्मा विद्याभूषणम्, झालावाड़ )

अधुनातनं युगमेतदिदमपेक्षते यद्धि नेतृत्वे, समाजसेवकत्वे, राजसेवायां, प्रशासनान्तर्गतविधिविधानेषु, साहित्योद्धारे सर्वत्राप्यादौ जनानां योग्यतापरीक्षणाय पात्रत्वनिर्णयाय चान्तर्व्यूहा विरच्येरन् । किं बहुना, शिक्षायां विवाहवाग्दानादिसम्बन्धस्थिरीकरणे, व्यवसायविशेषेषु, परिचयस्थापने, सामाजिकेषु व्यवहारेषु च सर्वत्रापि चान्तर्व्यूहरचनाभेदपुरस्सरं प्रवर्तन्ते जनाः । सार्वकारतन्त्रे नौकरीसिद्धिलाभायाधिकारित्वपदप्रतिष्ठामाप्तुं परीक्षाप्रदानायान्तर्व्यूहभेदनेऽहमहमिकया परीक्षार्थिनो जनाः प्रविशन्ति. इत्यपि वयं साक्षात्पश्यामः । इत्थमन्तर्व्यूहरचना तद्भेदश्च प्राप्तावसरो विषयो। नवीनोऽपि प्राचीनः, प्राचीनोऽपि च नव्य इति तमेवैतमधिकृत्य मम लेखनीव्यापारणं ननु नासामयिकं स्यात् । अथ च सुरभारत्याः, संस्कृतसाहित्यस्य, तत्सेवकानां च हितचिन्तकेभ्योऽनुभववद्भ्यो विदग्धजनेभ्यो बहुश्रुतेभ्यो विशेषज्ञेभ्यो बहुशः श्रुतं मया यत् सुरसरस्वत्या जीर्णोद्धाराय, समयोपयोगिसाहित्यसृष्ट्ये, संस्कृतभारत्या लोकप्रियताऽऽपादनाय, तदुपयोगित्वसिद्धये, तत्प्रचाराय, प्रसाराय च संस्कृतलेखकैर्युगापेक्षानुरोधात् सर्वसाधारणप्रजाजनानां परिचितेषु तेषु तेषु विषयेषु लोकमानसभावना अनुभूतयो व्यवहारव्यापाराः प्रतिनिधित्वेन नूनं चित्रणीयाः इति । तथा कृते प्रचारः साधीयान् सम्पद्येत संस्कृतभाषायास्तथा पुराणैकशरणानां सनातनपण्डितानां नव्ययुगीनसभ्यताव्यवहारेषु परिचयो वा दिग्दर्शनं वा सम्भवेत् ।

यतोऽहमविद्यो वा सविद्यो वाप्यथ लेखनीशरणो लेखकत्वे सोद्योगः कृतसङ्कल्पश्च कामं शास्त्रेष्वव्युत्पन्नस्तथापि मया लेखकत्वं तु कथमपि साध्यमेव, नवसभ्यताशिष्टाचारक्रमोऽनुवर्तितव्य एव, सभ्योचितं कर्तव्यं तु कथमपि निर्वाह्यमेव सुरभारतीसेवाविधाविति सर्वसाधारणपरिचितमिदानीन्तनमुपयोगितावादं स्पृशन्तं व्यावहारिकं कमपि विषयमधिकृत्य किमपि लेख्यमेवेति चिन्तयता मयाद्य भावात्मकमन्तर्व्यूहमात्मनः स्वयं विभेद्य, प्रतिभास्फोटं कृत्वा, विषयनिर्वाचिन्यां

---

कश्यपिअन् सागरोऽधुनापि हिरण्यकशिपोः स्मृतिं च घोषयति । तस्य उपनिवेशस्य राजधानी हिरकेनिया वा हिरण्यपुरी एव आसीत् । नृसिंहस्य विकृतसंज्ञा नारमसीन् वर्तते । हिरण्यकशिपुः नृसिंह आदि जनाः परशिया इतिहासे परदेशीया एव घोषिताः । नहि पराशियन इतिहासे तेषां वंशवृत्तस्य ज्ञानं अतस्ते परदेशिया एव तत्रामन्यन्त तत्र च नृसिंहादय आर्यावर्तियाः तथा हिरण्यकशिपुआदयश्च अनार्य । देशीयाश्च ईरानादिदेशेषु गत्वा तत्रोत्तरीयगोलार्द्धेऽपि आर्यैः सह अवसन् । तत्रत्या आर्याश्च अनार्यसंसर्गेण अनार्या एव जाताः यतः तत्रः ब्राह्मणानां अदर्शनेन च शनकैः क्रियालोपात् अनार्याः एव संजाताः ।

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥ मनु १०–४३
पौण्ड्रकाश्चोड्रद्रविड़ाः कम्बोजा यवनाः शकाः ।
पारदा पह्लवाश्चीनाः किराताः दरदाः खशाः ॥ मनु१०-४४
मुखबाहुरूपज्जानां या लोके जातयो बहिः ।
म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः ॥ मनु१०-४५

अर्थात् आर्यावर्तात् ब्राह्मणक्षत्रियेषु या जातयो बहिः ईरानादि देशेषु गताः ताः अपि अनार्यसंसर्गात् सर्वा एव अनार्यरूपा एव जाताः अतो नहि आर्यावर्तदेशे ( भारतवर्षे ) आर्य जातयः कस्मादपि अन्यदेशात् आगताः किन्तु आर्यावर्तदेशे समुत्पद्य देशान्तरे ( ईरानादि देशेषु ) गताः । अत्र ये ऐतिहासिका वदन्ति किं आर्यजातिः मध्यएशियाआदि देशेभ्यः भारते ( आर्यावर्ते ) समागता ते भ्रमवशेन अज्ञानादेव कथयन्ति । नहि तेषामार्यजातिविषये किमपि ज्ञानं अतः उपरिलिखितं च भूगोलस्य प्राचीनपरिस्थितं तथा ऐतिहासिकं परिस्थितं च ज्ञात्वैव भारतस्य प्राचीन इतिहासो लेखनीयः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मस्तिष्कनाडीतन्तुसमितौ महाभारतकालीनमतिप्राचीनं, वर्तमानकालीनमभिनवं च तदिदमुभयलोकसिद्धये प्रसिद्धये च स्यादिति किलान्तर्व्यूहमेव लेखनविषयं स्थिरीकृत्य प्रवृत्तम् ।

अयि, सहृदयधुरीणाः ! रसिकशिरोमणयो !! विनोदप्रियाः पाठकाः !!! महाभारतकालीनां पुराणीमन्तर्व्यूहकथां नु श्रीमन्तोऽवश्यमेव हि न्यूनाधिकं जानन्तः स्मरन्तः स्युर्भारतीये युद्धे स्वयं सेवकत्वायत्र हि सप्तमहारथिभिः पाण्डवकुमारोऽर्जुनो हत इति । अद्यत्वे पुनरस्मिन्नवयुगेऽन्तर्व्यूहरचनाया देशकालोपयुक्ताः केचन नवनवाः प्रकारा विषयः पद्धतयश्चाविष्कृताः प्रवीणैर्लोकमनोविज्ञानवेदिभिः । इदानीं देशे विदेशेषु चान्तर्व्यूहानां विविधा उपयोगाः प्रयोजनानि प्रचलनानि च परिदृश्यन्ते । न केवलं शासनतन्त्रेष्वेव प्रत्युत सामाजिकीषु प्रवृत्तिषु, राजनीतिरीतिमर्यादासु, तत्तत्तन्त्रप्रक्रियास्वपि चान्तर्व्यूहाः प्रचलन्ति सर्वतः ।

शिक्षायां प्रवेशलब्धये, निर्वाचनेषु-प्रतिनिधित्वप्राप्तये, नौकरीपरम्परासु नियुक्तिलाभाय, विवाहवाग्दानसंस्कारेषु वरकन्यानां गुणपरीक्षणाय चादौ प्रायः सर्वैरपि युवकैर्युवतीभिरन्तर्व्यूहो द्रष्टव्यो भेत्तव्यश्च भवति । अन्तर्व्यूहमेदनं नामाद्यत्वे शिष्टजनसमर्थितः सभ्यतानुगामी खल्वकण्टको राजमार्गः ! साहित्यसेविनोऽपि च यदा कदान्तर्व्यूहं साक्षात्कुर्वन्ति विद्वन्महारथानाम् । चित्रपटतारिका अभिनेतारः कलाकारा गायकाः पत्रकाराः सम्पादका वाणिज्यव्यवसायकराः सर्वेऽपि सत्यावश्यमन्तर्व्यूहं गृह्णन्ति प्रयच्छन्ति चान्येभ्यः । यूरोपामरीकादिदेशेषु चान्तर्व्यूहमेकमनुत्तमं परिचयमाध्यममिति व्यवहरन्ति कार्यार्थिनो निपुणा जनाः । कूटनीतिज्ञानां नेतृणां, नवनवाविष्कारपरायणानां वैज्ञानिकानां, विप्लवकारिणां दस्यूनां, साहसिकानां भूसमुद्रयाचिनां, युगपरिवर्तनविधायकानां क्रान्तिकारिणां महामनीषिणां महाकवीनां समर्थलेखकानां चान्तर्व्यूहो भाग्यादेव मिलतीति महद्गौरवमन्तर्व्यूहानां स्वयंसिद्धम् ।

अथान्तर्व्यूहानामादानं प्रदानं च विश्वजनीनमिति विश्वसतां सतां पुरतस्तद्गुणप्रभाववर्णने किंचित् प्रयतामः—

प्रणयिनामन्तर्व्यूहो मधुरः सुकुमारः सरसोऽपि च पर्यन्ते दुखान्तं नाटकमिव पर्यवस्यति, यदा कदा प्रहसनमात्रं च निष्पद्यते । कूटनीतिज्ञानामन्तर्व्यूहः संलापार्थजटिलः सरहस्यो गुरुभागावशिष्टो दुर्जरो विभ्रमः क्लिष्टश्च मारकं विषमिव मार्गानुरूपं पथ्योऽपथ्यः सुखाय दुःखाय वा कल्पते भुक्तभोगैः । समाजे वरकन्यापरीक्षणाय कृतोऽन्तर्व्यूहो व्यवह्रियमाणो भोजनभट्टानां नयनसुखानां कौतुकपरवशानां विनोदप्रियाणां सामाजिकानां पक्षे प्रायः सुखपरिणामो भवति । अन्ये किलान्तर्व्यूहा विविधफला निष्पद्यन्ते । तथाहि । द्राक्तराणामन्तर्व्यूहो जीवनमरणान्दोलनचपलः संशयारूढो रुग्णानां पक्षे पर्यवस्यति । वाक्कीलानामन्तर्व्यूहो भूयसीदक्षिणाप्रदाता स्यात् । नेतृप्रवराणामन्तर्व्यूहो देशसेवार्थं रोदनमात्रफलो भवति वा मग्णान्तमनशनहरितालान्दोलनव्रतदीक्षात्मको भवेत् । कवीनां कलालापाय, चित्रकाराणां विचित्रदर्शनाय, संगीताराधकानां सतालोऽपि रागात्मकत्वाय, आकाशवाणीकेन्द्राध्यक्षाणां गलास्फालनाय, मन्त्रिमहोदयानां सम्मानलाभाय, लेखकानामपलापाय, वैद्यानां वाजीकरणाय, ज्योतिर्विदां भाग्यभुक्तये, वैयाकरणानां शब्दास्फोटाय, विद्यालयाध्यापकानां मुखरत्वाय च परिगण्यते रसिकैस्तत्तत्त्ववेदिभिः । अन्ये चान्तर्व्यूहा नातिमहत्त्वपूर्णा इति केचिद्वदन्ति ।

यद्यपि विभिन्नानामन्तर्व्यूहानां महत्ता देशकालपात्राश्रयवशाद्भिन्नपरिणामा भवन्ति परं प्रशासनान्तः सार्वकारस्य विविधविभागेषु नौकरीवृत्तिमभिलषतामत्र पथि नवं नवं प्रविविक्षूणां लोकसेवायोगकार्यालये क्रियमाणानामन्तर्व्यूहानामुपाख्यानानि प्रभूतफलानि रोचकाण्यपि यदा कदाऽऽदर्शवादिनां स्पष्टवादिनां मुखरमुखराणामेतच्छास्त्रविज्ञानमजानतां च पक्षे करुणान्तानि नैराश्यपूर्णान्यपि परिणमन्ति पर्यन्त इत्यपि श्रूयते । वाग्जालजटिलो विषमोऽयं विषयोऽन्तर्गूढश्च समाम्नायते ततोऽस्यान्तर्व्यूहस्य विशेषज्ञतायां सश्रद्धं विश्वसिति लेखकोऽयमासां पङ्क्तीनामतोऽस्य विषयस्य विश्लेषणे महद्योग्यतासापेक्षेऽपि च यथाशक्ति प्रयतते ।

विरलाः खल्वन्तर्व्यूहभेत्तारो वीराः संसारेऽस्मिन् । आम्, केचन धनबलादन्ये पार्थसारथेः पक्षाश्रयणादर्जुन इव स्वालम्बादपरे सेवासाधनैरेके कुलक्रमागतेनाभिजात्यप्रामाण्यात्, परे तर्ककर्कशवाग्जल्पनाश्रयेण प्रगल्भवादविवादेन, केचन राजनीतिप्रावीण्यात्, कतिचिच्छासनविरोधापायशङ्कयान्ये भौतिकविग्रहसक्षमत्वेन, कतिपये नेतृप्रवराणां कृपाकटा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



क्षसाधनेनापरे वेशभूषाशृङ्गारसज्जया, केचिद्रूपमाधुरीमञ्जुलमुखच्छविछायाचाकचक्येन तथाकथितेनाकर्षकेन व्यक्तित्वेनान्ये भोगोपभोगप्रचुरैरुपकरणैस्तथापरे सुरासुवर्णसुन्दरीतिसकारत्रयीसेवनव्यसने सहधर्मत्वाच्चेत्थं नानाविधैर्बलैः पराक्रमैश्चान्तव्यूहान् भिन्दन्तीति लोके प्रवादः। सत्यं तु सर्वेश्वरोऽतर्न्यामी केवलं जानीते परं गुणानुरोधात्, प्रतिभाप्रकर्षेण, योग्यतया, विद्यया, शिक्षया, दीक्षयानुभवपाटवान्नीतिप्रौढेर्विधानप्रावीण्येन, परचित्तबोधपाटवात्, प्रत्युत्पन्नमतित्वेनात्मविकाशात्, ज्ञानविज्ञानमाहात्म्येन, साधनान्तरैश्चान्यान्यैरन्तव्यूहानर्जुनसूनुरभिमन्युरिव तामेतान् तृणाय मन्यमाना अपि महारथिभिर्विशेषज्ञैरन्तव्यूहभेदे मोमुह्यन्ते; तद्भेदनप्रक्रियां यथार्थमजानन्तो वराकाः।

नास्त्येवात्यन्ताभावोऽत्र जगति दुर्लभानामपि सत्पदार्थानाम्। केचिन्मनस्विनो महत्वाकाङ्क्षिणो वा गुणगर्विष्ठा वीराः किलान्तव्यूहभेदेऽतीव प्रवीणा निष्पद्यन्त इत्यपि सत्यम्।

अधुनातनान्तव्यूहरचनासु नानाविधाःप्रक्रियाः प्रकाराश्च प्रचलिता विद्यन्ते। तेषु सार्वकारनौकरीतन्त्रे या रचना विधीयते सातीव रोचका भवेत् पाठकानां सहृदयानां भुक्तभोगानां वा नवाभ्यासिनां, स्वयमन्तव्यूहविधायकानामप्याचार्यवर्याणामानन्दाय, हिताय, सुधाराय च स्यादिति तत्स्वरूपवर्णने किमपि प्रोच्यते:—

आदौ "लोकसेवायोगस्य" कार्यालये, कस्मिंश्चित् प्रकोष्ठे, तत्तद्विषयविशेषाणां विशेषज्ञाः स्वस्थानान्यधिकृत्योपविशन्ति परीक्षार्थिनां परीक्षणाय। ते स्वकीयां समग्रामपि च बौद्धिकीं योग्यतां व्यावहारिकीं च परीक्षणशक्तिं मस्तिष्काग्रवर्तिनीं कृत्वा, समस्तामपि च राज्यसत्ताप्रतिष्ठां, प्रभावशालितां, प्रगल्भां वाक्शक्तिं च निरस्त्रां क्रान्तिमिव कर्तुं तीव्रधाराप्रखरां विधायाभिमन्युकल्पं परीक्षार्थिनं परीक्षितुमुपक्रमन्ते। ये हि बालाः कुलीनाः वीरकुमारा अपि सन्तस्तत्रत्यं वातावरणाडम्बरघटाटोपं, प्रश्नबाणवर्षाप्रहारान् सर्वाङ्गभेदाकपदे प्रयुक्तान् सोढुं न प्रभवन्ति ते धैर्यच्युतिदोषात् लक्ष्यभेदे मोमुह्यमाना अन्ते बत कीर्तिशेषा भवन्ति।

—क्रमशः

★


# हरिनगर शूगर मिल्स लि०

★★★ फेक्टरी ★★★

हरिनगर [एन० ई० रेल्वे०] [चम्पारन जिला] उत्तर बिहार

दूरभाषयन्त्रम्—

मर्यादा—रामनगर [चम्पारन]

प्रधानकार्यालय—

२०७, कालबादेवी रोड, बम्बई—२

दूरभाषयन्त्रम्—

'क्रिसूगर' [बम्बई]

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

★ प्योअर, ★ फर्स्टक्लास, ★ क्रस्टल ★ फेन सूगर


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# हैमन्तः

( ले० वै० शङ्करलालशर्मा, भिषगाचार्यः, फतेपुरम् )

हिमे हिमांशुः परिवृद्धिमेति मार्गस्वभावादरुणश्च हीनः ।
नियन्त्रिताविन्दुरवी विधाने धात्राऽन्यजीवाः कुत एव लोके ॥१॥

विसर्गकालान्तिमभाग एष क्षपाकरः पूर्णबलो धरित्रीम् ।
आप्लावयन् सौम्यगुणैः स्वकीयैः बलाभिवृद्धिं कुरुते नराणाम् ॥२

सोमाभिवृद्ध्या सवितुः प्रकाशो मन्दो भवेच्चन्द्रमसः समानः ।
क्षीणे सतीने शिशिरः प्रवृद्धः शारीरकम्पं प्रकरोति पुंसाम् ॥३॥

यदा कदाचिन्नभसि प्रसारः पयोमुचां शीतसमीरणेन ।
सार्धं भवेच्छीतसमागमोऽति कष्टप्रदं निर्धनमानवानाम् ॥४॥

कालप्रभावाद्दिवसेशतेजो विधुप्रकर्षाच्च धरान्तराले ।
भूत्वा प्रछन्नं वसतीह तस्मात् धारागृहं कूपजलञ्च सोष्णम् ॥५॥

हिमानिलेनोपलकैश्च वृष्टया शीतप्रकर्षो दिवसेऽपि तस्मात् ।
सुखैषिभिः पौरजनैः स्वगेहो न मुच्यते शीतभयादिदानीम् ॥६॥

रात्रौ तडागादिजलाशया हि व्याप्तास्तुषारैरभितो भवन्ति ।
सूर्योदये ते शनकैर्द्रवन्ति परन्तु वारीण्यतिशीतलानि ॥७॥

आश्चर्यमेतत मनुजा यदा हि वांछन्ति सद्यः शिशिरं जलं वै ।
न प्राप्नुवन्त्यत्र विनेच्छयाऽपि सर्वत्र शीतं जलमस्ति सज्जन् ॥८॥

न रोचते शीतजलं नरेभ्यः स्नानादिशुद्ध्यादिषु शीतकाले ।
शीतेन कश्चित् कुरुते तु तेन शुद्धिं, प्रतिश्यायभवान् विकारान् ॥६॥

सधूमपानीयकणाः नभस्तः पतन्ति वृष्टेरनुतैश्च हंसे ।
आच्छादिते वासर मत्ररात्रितुल्यं मनुष्यैरवज्ञायते हि ॥१०॥

ध्वांक्षोष्ट्रखड्गा महिषा गजेन्द्रा मेषाश्च कन्दर्परयेण युक्ताः ।
सुपुष्पिताः हेमलतास्तिरीटा हेमन्तकाले समुपस्थिते च ॥११॥

मोचेक्षुनारङ्गसुदाडिमाश्च शाकाय कन्दा विविधाः फलन्ति ।
मरुस्थले मूलकगाजराणाम् संस्वादनं रोचयते नरेभ्यः ॥१२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



क्षेत्रेषु धान्यानि च यानि पूर्वं प्रवापितानि प्रचुरश्रमेण ।
रूढानि तानि प्रविलोक्य चित्ते ऽनुभूयते सम्प्रति हर्षपूरः ।।१३।।

तीक्ष्णाग्रभागैर्निचितानि कण्टैर्बहिस्तथान्ते मृदु शुभ्रवन्ति ।
रुच्यानि मिष्टानि च पल्वलेषु शृङ्गाटकानि प्रसृतानि सन्ति ।।१४।।

हिमातिपातेन लतातरूणाम् दलानि नष्टानि भवन्ति शीते ।
सार्द्रा क्षिती रात्रितुषारपातादहोऽतिकष्टः समयो हिमस्य ।।१५।।

मन्दप्रकाशात्तरणेस्तुषारपातात्तथोदीच्यसमीरहेतोः ।
धूमै रजोभिर्मलिना दिशश्च हेमन्तलिङ्गानि भवन्ति भूमौ ।।१६।।

शीतानिलस्पर्शविरुद्धवेगो वन्हिर्हिमे शक्तिमतां बलिष्ठः ।
मात्रास्वभावैर्गुरुभोज्यमत्र न प्राप्नुयाच्चेत्तनुधातुशोषी ।।१७।।

अतः सुमिष्टाम्लकटूष्णतिक्तक्षारोत्कटानि लवणायुतानि ।
स्निग्धानि भोज्यानि भवेद् यथेच्छम् नो चेत्पुनर्वातविकारभीतिः।।१७।।

हिमे नरा ये दधिदुग्धतक्राण्याभुञ्जते तैलपराश्च नित्यम् ।
सितागुडादीक्षुविकारजातं न बाधते तान् हिमजः सुशीतः ।।१६।।

अभ्यज्य तैलेन वपुः स्वकीयम् व्यायाममासेव्य ततः प्रभूतम् ।
स्नात्वोष्णवाराऽथ धृतौर्णवस्त्रः ध्यायेत् शिवं स्वान्तसरोजमध्ये ।।२०।।

दैर्घ्यान्निशानामुषसि क्षुधार्तः आवश्यकेभ्यश्च निवर्त्य धीमान् ।
वातादपाकं सुशलीकृतं वा गुन्द्रात्मगुप्तादिकृतञ्च खादेत् ।।२१।।

मस्तिष्कगोपाय ललाटलेपं कस्तूरिकाकुंकुमयोगजानाम् ।
कृत्वाऽत्र वस्त्राणि गुरूष्णवन्ति सेव्यानि शीतान्निजदेहगुप्त्यै ।।२२।।

सुरां प्रसन्नां प्रपिबेत् विचार्य कालञ्च दोषं प्रकृतिञ्च सम्यक् ।
शीतापहा वातबलासहन्त्री करोति वन्हिं वपुषश्च पुष्टिम् ।।२३।।

सूर्यातपं वन्हिनिषेवणञ्च गोधूमवज्रान्न नवोदनानि ।
माषान्नमुष्णं सलिलञ्च शुद्धौ यः सेवते तस्य न शीतभीतिः ।।२४।।

प्रजार्थमस्मिन् बलवान् मनुष्यो रात्रौ यथेच्छं प्रमदां स्वकीयाम् ।
प्रगाढमालिंग्य ततो बलस्य वृद्ध्यै सितामिश्रपयः पिबेच्च ।।२५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## राष्ट्रविजयाभ्यर्थना

( ले० आशुकवि श्रीहरिशास्त्री दाधीचः जयपुरम् )

राष्ट्रवर ! तव सुजयो विजयोऽस्तु !
तव स्वरूपे ह्येवास्माकं सर्वेषां विलयोऽस्तु ॥१॥

इयं जान्हवी शुचिसुविशाला,
विन्ध्यहिमालयपर्वतमाला ।
इति सर्वेषां हृदयेऽस्माकं ज्ञानस्याभ्युदयोऽस्तु,
राष्ट्रवर तव सुजयो विजयोऽस्तु ॥२॥

शंकर-राम-विवेकजनन्या,
वेदोपनिषत् श्रीस्तव धन्या ,
सैव दिशा पन्थाः स एव सर्वेभ्यस्तीर्थमयोऽस्तु,
राष्ट्रवर ! तव सुजयो विजयोऽस्तु ॥३॥

धरणीप्राङ्गलमास्ते यावत्
मनुजस्य स्मृतिरास्ते यावत्
कालचक्रसीमितगतिपुरतस्तावकक्रमनिचयोऽस्तु,
राष्ट्रवर तव सुजयो विजयोऽस्तु ॥४॥

## बम्बईराज्यपालस्य भारत्यै शुभसन्देशः

[ संस्कृतस्य सुमहान् प्रेमी माननीयः श्रीश्रीप्रकाशमहोदयो भारत्याः संस्कृतसाहित्यसेवां विलोक्य नितरां संतोषं व्यक्तं चकार । महाभागोयं संस्कृतविदुषो डा. भगवान्दासस्य सुयोग्यः सूनुः । भारत्यै प्रहितमेतस्य संदेशं वयं साभारं प्रकाशयामः ।

—स. सम्पादकः

बंबई गवर्नर्स कैंप
२३ नवम्बर,१९५८

### संदेशः

तस्मिन् दिने पंडितगिरिराजशर्मशास्त्रिणः कृपया मोहमय्यां मया सममिलन् तैश्च भारत्याः कतिपयेऽङ्का मह्यमुपहृताः। अहमेतेषां बहून् निबन्धान् अपठम्। एतान् दृष्ट्वा सुस्पष्टमिदमभवत् यत् संस्कृतभाषा न तावत् क्लिष्टा यावदिमां लोका अपदिशन्ति । यत्किमप्यस्तु, सा सरला विधातुं शक्यते, नूतननूतनानां विचाराणां व्यक्तीकरणस्य साधनमपि सा सरलतया भवितुं शक्नोति ।

अहं भारत्याः संचालकान्-संपादकौ च हृदयेनाभिनन्दयामि यत्ते एवंविधं सुन्दरमुपयोगि च कार्यं कुर्वन्ति । अहं कामये यदस्मिन् शुभकर्मणि तेऽधिकाधिकं सफला भवेयुः, तत्प्रयत्नैश्च संस्कृतस्याधिकाधिकः प्रचारो भूयात्—अस्माकं प्राचीनसंस्कृतेः पुनरधिगमाय वयं सर्वे च सफलाः स्याम ।

श्रीप्रकाश

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# द्राक्षा-मृद्वीका

( ले० वैद्य श्रीकन्हैयालाल भेड़ा, बम्बई )

( पूर्वानुवृत्तम् )

स्नेहोपगे, विरेचनोपगे, कासहरे, ज्वरहरे च गणे द्राक्षा नाम विद्यते । अतः परं शतशः प्रयोगेषु द्राक्षायाः नाम विद्यतेऽथ च फलानां प्रकृत्यैव हिततमेषु 'मृद्वीका फलानाम्' (च० सू० २५) इति निर्दिष्टमेव ।

सुश्रुतेऽपि—

तेषां द्राक्षा सरा स्वर्या मधुरा स्निग्धशीतला ।
रक्तपित्तज्वरश्वासतृष्णादाहक्षयापहा ॥

(सु. सू. ४६अ.) ।

पण्डितराजश्रीजगन्नाथेन द्राक्षायाः विषये बहु वर्णितम् । तेषु केचन इमे अंशाः—

"एकस्य वस्तुनो निमित्तवशाद् यदनेकैर्ग्रहीतृभिरनेकप्रकारकं ग्रहणं तदुल्लेखः" इति रसगङ्गाधरेऽधःस्थेन श्लोकेन गीतिवृत्तेन—उल्लेखालङ्कारेणोदाहृतश्च ।

उपरि करवालधाराकाराः क्रूरा भुजङ्गमपुङ्गवान् ।
अन्तः साक्षाद् द्राक्षा दीक्षागुरवो जयन्ति केऽपि जनाः ।

श्लोकेऽस्मिन् येषां मनो द्राक्षावन् मधुरं शीतलं हितकारि च ते अनिर्वचनीयमहिमानः सज्जनाः सर्वोत्कृष्टाः सन्तीति ।

अन्यच्च—

पण्डितराजेन नायकोक्त्या—स्पर्शात् पूर्वमपि रोमाञ्चोद्गमो नायिकाया नायके प्रेमातिशयं द्योतयति । स्पर्शानन्तरञ्च सहजमधुरोद्गमोऽप्यनुरागातिशयपोषको भवतीति शिखरिणीवृत्तेन दर्शितवता-अत्यन्तपरिपाकेन स्वयमेव प्रस्फुटन्ती द्राक्षा चातिमधुरेति सूचितम् ।

कपोलाद्उन्मीलत्पुलकनिकुरम्बौ मयि मनाक्
मृशन्त्यः स्मेरस्तवकितमुखाम्भोरुहरुचः ।

अन्यच्च—रसगङ्गाधरे-अतिशयोक्तिध्वनावुदाहृतेन नीचैःस्थितेन पद्येन शार्दूलविक्रीडितेन च बोधयति । किञ्च—भगवन्नाममाहात्म्यात् सर्वथाऽल्पज्ञोऽल्पशक्तिरपि जीवः, नानाविधजन्मवृत्तान्तप्रत्यक्षीकरणे शक्तिमान् जायते । अत्र सर्वथाऽशक्तेऽपि जीवे शक्तिसम्बन्धे स्थापिते चायं निष्कर्षः इह अमुत्र च यावन्ति मधुराणि वस्तूनि—आस्वादितानि, सर्वेभ्योऽपि तेभ्यो भगवन्नामाक्षरयोर्माधुर्यं गरिष्ठं भवतीति ।

मृद्वीका रसिता सिता समशिता स्फीतं निपीतं पयः
स्वर्यातेन सुधाऽप्यधायि कतिधा रम्भाधरः खण्डितः ।
सत्यं ब्रूहि मदीय जीव भवता भूयो भवे भ्राम्यता
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिल्लक्षितः ?

अन्यच्च—मन्दाक्रान्तावृत्तेन द्राक्षाया बहुमतां माधुरीमुद्गिरन् श्रीपण्डितराजो वदति—हे जिव्हे, यतस्त्वं रसान् जानासि, अतएव रसज्ञा इत्युच्यसे किन्तु तदैव ते नाम सार्थकं भवति यदा श्रीकृष्णस्य महापुरुषस्य नामोच्चारयति तदा हृद्देशे स्थितश्चानिर्वचनीयं परमानन्दं ददाति, अथ च सर्वदोचारितं अज्ञानजं तमो नाशयति, अतएव द्राक्षादिमधुरिमभ्यश्चास्य माधुर्यं सर्वोत्कर्षेण वर्तते ।

अन्यच्च—रसगङ्गाधरे गर्वाख्यभावः, यस्य च स्वरूपमिदम्— "रूपधनविद्यादिप्रयुक्तात्मोत्कर्षज्ञानाधीनपरावहेलनं गर्वः" इति वर्णने स्रग्धरावृत्तद्वारा मृद्वीकाया मध्यान्निर्गच्छतः कोमलरसस्य प्रवाहस्य मधुरतां निर्दिष्टवता पण्डितराजेन—अहमेवाऽखिले भारते काव्यरचनाचतुर इति गर्वोक्तिः प्रतिपादिता ।

आमूलाद्रत्नसानोर्मलयवलयितादाच कूलात् पयोधेः
यावन्तः सन्ति काव्यप्रणयनपटवः, ते विशंकं वदन्तु ।
मृद्वीकामध्यनिर्यन्मसृणरसझरीमाधुरीभाग्यभाजां
वाचामाचार्यतायाः पदमनुभवितुं कोऽस्ति धन्यो मदन्यः ।

पुनरपि—रसगङ्गाधरे शार्दूलविक्रीडितेन व्यतिरेकाऽलङ्कारे गीतिवृत्तेन च अत्यन्तपक्वाया द्राक्षाया मधुराया महत्वं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# कालिदासस्य कविता

( ले० श्रीप्रभाकरशर्मा शास्त्री, जयपुरम् )

[ लेखोऽयं जयपुरे कालिदासजयन्त्युत्सवावसरे पठितः प्रकाश्यते पाठकानां प्रमोदाय । —सं० सम्पादकः ]

"अस्पष्टदोषा नलिनीव हृष्टा हारावलीव ग्रथिता गुणौघैः ॥
प्रियाङ्कपालीव विमर्दहृद्या न कालिदासादपरस्य वाणी ॥"

संस्कृतसाहित्यजगति तत्रभवतः कालिदासस्य बहुमुखीं प्रगतिं दृष्ट्वा विद्वांसः "कविकुलचूडामणि"रित्युपाधिना अमुं संमानितं कुर्वन्ति । जयदेवमहाकविरपि कविवरं श्रीकालिदासं "कविकुलगुरुः कालिदासः" इत्याचष्टे ।

मान्यस्य कालिदासस्य काव्यादीनां सम्यगध्ययनानन्तरं स्पष्टमेव प्रतिभाति तस्य प्रतिभायाः श्रेष्ठत्वमुच्चैस्तमत्वं च । महाकविना कालिदासेन स्वनिर्मितेषु स्वल्पीयःस्वपि काव्य-नाट्कादिषु संसारस्य सारो निष्कृष्य समुपस्थापितः । अतः कालिदासकाव्यपठनानन्तरं नान्यस्य कस्यापि काव्यस्य पठनस्यावश्यकता मनागपि दरीदृश्यते ।

---

तथा द्राक्षादीरेतु माद्विकसुधासु द्राक्षायाः परं माधुर्यं व्यञ्जितम् ।

निर्माणे यदि मार्मिकोऽसिनितरामत्यन्तपाकद्रव-
न्मृद्वीकामधुमाधुरीमदपरीहारोद्धुराणां गिराम् ।
काव्यं तर्हि सखे सुखेन कथय त्वं संमुखे मादृशां
नो चेद् दुष्कृतमात्मना कृतमिव स्वान्ताद् बहिर्मा कृथः ।

श्रीहर्षोऽपि नैषधे—

वाचं तदीयां परिपीय मृद्वीं मृद्वीकया तुल्यरसां स हंसः
तत्याज तोषं परपुष्टघुष्टे घृणां च वीणाक्वणिते वितेने ।
( नै. ३—६० )

अत्रापि मृद्वीकया तुल्यां मधुरसां भैमीसम्बन्धिनीं वाचमिति कृत्वा तस्या माधुर्यं व्यञ्जितम् ।

कादम्बर्यामपि—द्राक्षाफलस्वादूनि च दलितानि स्वेच्छया ( विन्ध्याटवीवर्णने ) ।

यद्यपि न भवति हानिः परकीयां चरति रासभे द्राक्षाम् ।
असमञ्जसमिति मत्वा तथापि खलु खिद्यते चेतः ।
( भट्टादित्यस्य )

भारतीयजनश्रुतिमनुसृत्य यदि कालिदासस्य स्थितिकालो निर्णीयेत, तदा प्रथमशताब्दी एव युक्ततमा । यतो हि—ऐतिह्येन स्पष्टमेव प्रतिभाति यत् स राज्ञो विक्रमादित्यस्य नवरत्नेषु अग्रणीरासीत् । उक्तं चैकेन कविना—

शङ्कादि पण्डितवराः कवयस्त्वनेके,
ज्योतिर्विदः समभवंश्च वराहपूर्वाः ।
श्रीविक्रमस्य बुधसंसदि प्राज्यबुद्धे—
स्तैरप्यहं नयसखः किल कालिदासः ॥"

अन्येषु काव्यादिग्रंथेष्वपि तस्य विक्रमेण सह वसतिः प्रतिभाति "प्रिये, अभिरूपभूयिष्ठा परिषदियम्" इत्यत्र शाकुन्तलप्रस्तावनायामपि अभिरूपाः पण्डिताः मनोज्ञाश्च, भूयिष्ठाः बहवो यस्यामेतादृशी नवरत्नयुक्ता परिषत् एव द्योत्यते; यस्यां शाकुन्तलाभिनयं प्रदर्शयति कविः । राज्ञो विक्रमस्य च या परिषदासीत्—"अभिरूपभूयिष्ठा" इत्यनेन नवप्रसिद्धरत्नानामेव सा परिषद् आसीदिति प्रतीयते । विक्रमोर्वशीयनाटकेऽपि "विक्रम" नामनिपातो दृश्यते । संस्कृतसाहित्यस्य सुप्रसिद्ध इतिहासकारो बलदेवोपाध्यायोऽपि रामचन्द्रमहाकाव्यानुसारं वर्णयति यत्—

"ख्यातिं कामपि कालिदासकवयो नीताः शकारातिना"

इति अस्मिन् पद्येऽपि शकादीनामरातेः विक्रमस्य संकेतो लभ्यते । तस्मात् प्रथमविक्रमसमकालिकत्वमस्य सिद्धम् । स एवासीत् शकारातिरिति ।

"कालिदासत्रयी" प्रसिद्धा वर्ततेऽधुना । तत्र रघुवंशादिमहाकाव्यानां निर्माता, विश्वविख्यातो, विक्रमराज्यस्य सभासदः प्रसिद्धः कविः प्रथमः कालिदासः मुख्यः इति । तस्यैव जयन्तीमहोत्सवे वयमत्र समवेताः ।

कालिदासस्य रचनाचातुर्यं, कल्पनाकौशलं, भाषासौष्ठवं, अलंकारनैपुण्यं भारतीयसंस्कृतेः रक्षणमित्यादिकं सर्वं गुणगरिमाणं दर्शं दर्शं विस्मयन्ते लोकाः । अतएव उक्तं—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"साकूतमधुरकोमलविलासिनीकण्ठकूजितप्राये ।
शिक्षासमयेऽपि मुदे रतलीला-कालिदासोक्ती ॥"

इह खलु सकलेषु सुखसाधनेषु काव्यमेव परमसुखसाधनम् । काव्यं च द्विविधम्—दृश्यश्रव्यकाव्यभेदात् । कालिदासेन दृश्यकाव्येषु नाटकत्रयी रचिता(१)अभिज्ञानशाकुन्तलम् (२) मालवकाग्निमित्रम् (३) विक्रमोर्वशीयञ्च । तेषु सर्वश्रेष्ठं शाकुन्तलम् । श्रव्यकाव्ये च रघुवंशकुमारसंभवे द्वे महाकाव्ये रचिते । खण्डकाव्ये च मेघदूतम् ऋतुसंहारश्च प्रसिद्धे जगति । एवमस्य काव्यरचनायां सर्वतोमुखी प्रतिभा जागर्ति ।

तत्रभवता कालिदासेन प्रायः सर्वेषामेवालंकाराणां प्रयोगः कृतः, तथापि "उपमास्य" सर्वानलंकारानतिशेते । नैवं भूतो भविता वा न भूयः, यः कालिदासस्य उपमाविषये प्रतिस्पर्द्धी स्यात् उक्तं च केनाप्यभियुक्तेन—"उपमा कालिदासस्य भारवेरर्थगौरवम्" इति । कालिदासस्य उपमा न केवलं उपमा, अपितु सा पाठकस्य चक्षुःपटलसंमुखे सर्वमितिवृत्तं साक्षान् मूर्तिस्वरूपमिव स्थापयति—पश्यन्तु भवन्तः—रघुवंशे द्वितीये सर्गे कीदृशी मनोहारिणी उपमा—

"स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श ।
अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम् ॥"

एतद्व्यतिरिक्तं कालिदासस्य उक्तयः सूक्तयश्चापि स्फारयन्ति कालिदासस्य यशःसौरभम्—समस्तेऽपि भूमण्डले । स्पष्टमेव च प्रतिभाति यत् काव्येषु सर्वत्रैव सूक्तीनां बाहुल्यम् यथा—"गण्डकस्योपरि पिटकः संवृत्तः ! शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः । लभेत वा प्रार्थयिता न वा श्रियं श्रिया दुरापः कथमीप्सितो भवेत् , अनुद्धताः सत्पुरुषाः समृद्धिभिः, शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति, अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम् , विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः, याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा,

दूरभाषः— कलिकाताः ३४-५१५६
,, ३४-२६५७
,, ४६-१६११
जयपुरे ७३५
गांधीधामे ८८

तडित्संकेतः— ओरेक्यानाइट, कलिकाता
हेमेनाइट, जयपुर
,, गांधीधाम

मयूरभंज मिनरल सिंडीकेट, प्राइवेट लिमिटेड़
[ मयूरभंज-खनिज-प्रतिष्ठानम् निजम्, मर्यादितम् ]
—खनिज-स्वामिनौ निर्यातकर्तारश्च—
(माइन ओनर्स एण्ड़ एक्सपोर्टर्स)

मुख्यकार्यालयः—
५५, एजरामार्गः (एजरास्ट्रीट)
कलिकाता (कलकत्ता)

शाखाकार्यालयः—
जयपुरम् ( राजस्थानम् )
गांधीधामः (सोहमयीप्रदेशः)
रायरङ्गपुरम् (उड़ीसा)

लौहखनिजाः (आइरन ओर) चूर्णाश्म (लाइमस्टोन) चूर्णः (लाइम) फेनकाश्म (सोपस्टोन)
कालसाइट—चीनमृत्तिका (चाइनाक्ले) कियानाइट, मैंगेनीजखनिजाः (मैंगनीज ओर)
विवरणार्थं कृपया लिख्यताम् (एनक्वाइरीज सोलीसीटैड)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ाया: । एवं अर्थान्तरन्यासादीनामपि प्रयोगः यथास्थानं ी युक्त एव वरीवर्त्ति—उक्तं च महाकविना बाणेन—

"निर्गतामलवाक्यस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ॥" इति

कालिदासस्य विचारधारा भारतीयसंस्कृतिमपि बहु मन्यते। लिदासेन सर्वाङ्गसंपूर्णः आर्यधर्मः खलु प्रतिपाल्यते—तस्य चातुर्वर्ण्ये चातुराश्रम्ये च भूयिष्ठा श्रद्धा दरीदृश्यते "शैश-स्तविद्यानां, यौवने विषयैषिणाम् । वार्द्धके मुनिवृत्तीनां नान्ते—पद्यमिदं दृढयति पूर्वाम् भावनाम् । शाकुन्तल-केऽपि तेन राज्ञो दुष्यन्तस्य चरित्रं विशिष्टमेव प्रदर्शितम् लोकयन्तु—

ंशयं क्षत्रपरिग्रहक्षमा, यदार्यमस्यामभिलाषि मे मनः ।
हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥"

इति अन्तःकरणं लक्ष्यीकृत्य मनसि विश्वासे उत्पन्ने व स शकुन्तलया सह गान्धर्वविवाहं कुरुते । राजसभायां -"मूढः स्यामहमेषा वा वदेन् मिथ्येति संशये । दार-त्यागी भवाम्याहो, परस्त्रीस्पर्शपांसुलः ॥" इति स्पष्टमेव निबोधयति ।

एकस्य पौराणिकोपाख्यानस्य नाटकरूपे प्रदर्शनं, नाट्य-सामग्रीसंयुतं दोषानपास्य गुणानामेव विशिष्टतायाः प्रद-र्शनं सर्वं तत् किल कवेः कालिदासस्यैव कल्पनाचातुर्यम् ।

कुमारसंभवे च पार्वत्याः नखशिखवर्णनं, कामसंहारः, पार्वत्याः तपस्या, बटुकसंभाषणादिकं काव्यरूपेण प्रतिपादित-मपि शैलीविशेषात्—अभिनयानंदं प्रयच्छति पाठकेभ्यः । एव-मेव रघुवंशेऽपि दिलीपद्वारा नन्दिनीपूजा, सिंहदिलीपसंवादः, रघोर्जन्म, इन्द्रयुद्धम्, इन्दुमतीस्वयंवरः, रामचन्द्रस्य पुष्पक-विमानयात्रादिकं सर्वमेव श्रेष्ठतमम् । शाकुन्तलविषये तु प्रसिद्धमपि वर्तते—

"काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयी ।"

एषा श्लोकचतुष्टयी भारतीयभावनां सम्यक् प्रदर्श्य उपदेशात्मकं वर्णनं स्वाभाविक चित्रणं च सम्पादयति ।


जनसाधारणोपयोगिसूत्र-वस्त्र-निर्माणस्य कृते स्थानीयः प्रधानोद्योगः

महाराजा श्री उम्मेद मिल्स लिमिटेड

पाली (मरुधरा)

दीपावल्या अवसरोपरि ग्राहकाणाम् उपभोक्तॄणां शुभचिन्तकानां च सेवायाम्

हार्दिकानि अभिनन्दनानि समर्पयति

अस्माकं ससर्घाणि सुन्दराणि च वस्त्राणि क्रीत्वा राष्ट्रीयमुद्योगं प्रोत्साहयत

वस्त्राणि
ादि, लम्बवस्त्रम् (लट्ठा) निष्प्रवाणि, धौतं च
चर्दराणि, द्विसूत्री, रक्त पापलीनानि, शर्टिङ्ग,
कोटिङ्ग, फलालैन, ड्रिल इत्यादयः

सूत्राणि
$1\frac{1}{2}$ काउन्टतः
२४ काउन्ट पर्यन्तम्

मैनेजिंग एजेन्ट्स
श्री कृष्णाएजेन्सी प्राइवेट लि० पाली (मरुधरा)

उत्पत्रम् :—उम्मेद मिल्स
दूरभाषः—५३,३३,७४७


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# उज्जयिनीजातः कालिदासस्मृतिमहोत्सवः

राजस्थानराजतन्त्रेण 'राजस्थानपुरातत्त्वमन्दिरस्य' संगृहीतान् कालिदासीयान् कतिपयलिखितग्रन्थानादाय उज्जयिनी महोत्सवे संमिलितुमादेशः प्रादायि। तदनुसारमहं महोत्सवे सममिलम्। यत्र मया पुस्तकानि स्थापितानि तस्याः 'प्रदर्शिन्याः' वृत्तान्तमावेदयामि पुरस्तात्—

प्रदर्शिन्यामस्यां प्रधानतः कालिदासस्य 'मेघदूत' सम्बन्धीनि चित्राणि, विशेषतश्च विरहिण्या यक्षपत्न्याश्चित्राण्यासन्, यानि हि भारतस्य सर्वेभ्यः प्रान्तेभ्य एव नानाकलाकारैः प्रेषितानि। चित्रेष्वेषु महाकविना अभिव्यञ्जितानां कमनीयतममानवभावनानां साकारताप्रदर्शनस्य प्रयासः कृतोऽभूत्। एकस्मिन् कक्ष्ये चीन-रूस-हालैण्डचैकोस्लोवाकियासु अभिनीतानां कालिदासनाटकानां 'फोटो' चित्राणि चातुर्यपुरस्सरं सज्जीकृतान्यासन्। अत्रैव 'ईरानी' 'रूसी' भाषयोरनूदितस्य शाकुन्तलस्य पुस्तकान्यपि आसन्निहितानि। राजस्थानपुरातत्त्वमन्दिरात् मया नीतानि हस्तलिखितपुस्तकान्यपि अत्रैव स्थापितान्यभूवन्, येषु १४३१ तमविक्रमवर्षे लिखिताः कुमारसंभवस्यैका प्रतिलिपिरासीत्। अन्या अपि लिपयः अतिपुरातन्य आसन् याः प्रदर्शन्यामस्यामाकर्षणस्य विषया अभूवन्। २०–११–५८ दिवसस्य मध्याह्ने अवकाशप्राप्तः मुख्यन्यायाधीशश्रीपतञ्जलिशास्त्रिणा प्रदर्शिन्या उद्घाटनमक्रियत।

प्राप्तचित्रेषु सर्वश्रेष्ठं चित्रं ग्वालियरस्थ विश्वामित्रवासत्रानीकृतं निरधार्यत, यस्मै सहस्ररूप्यकाणां पुरस्कारः

---

वैदर्भीरीत्या आदर्शीभूता खलु कालिदासरचना। संस्कृतसाहित्ये चायं मूर्धाभिषिक्तः कविरित्यपि सर्वसंमतम्।

कालिदासस्य शकुन्तलायाः जर्मनानुवादो विलियमजोंस कृतो वर्तते। जर्मनमहाकविः "गैटे" एवं किल उदीरितवान्—"सुहृद्, यदि भवान् ऋतुमुखे उद्गतान् कोरकान्, ऋतुपर्यन्ते च पक्वानि फलानि येन च मनः मोह्यते, मोघते, तर्प्यते, तोष्यते, तत्सर्वं दिदृक्षति यथा च एकया मधुरसंज्ञया द्यावापृथिव्यौ उभे समभिहिते भवतः, तां शुश्रूषते तदा "शाकुन्तलं" पश्यतु।"

"मेघदूतं" कालिदासस्य खण्डकाव्यम्। काव्यञ्चेदं विप्रलंभप्रधानम्। यक्षिणीविरहे यक्षो विरहमभिलक्ष्यमेघेन सह सन्देशं प्रेषयति। उपमानानि प्रदर्शयन्ती लोके शास्त्रे च सर्वत्र अप्रतिबन्धं कवेः कल्पना विहरति। सा कल्पना एव कवित्वशक्तिं वर्द्धयति—सा च चरमसीमानं गता कालिदासे।

कालिदासः शृंगारस्य प्रेम्णश्च भावुकः कविः यतोहि—सर्वेषु काव्येषु तस्यैव बाहुल्यं दृश्यते—कुमारसंभवे—

"पुष्पं प्रवालोपहितं यदि स्यात् मुक्ताफलं वा स्फुटविद्रुमस्थम्।
ततोनुकुर्याद् विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य॥"

इत्यादि श्लोकाः साहित्ये शृंगारं विशदयन्ति।

"अनामिका सार्थवती बभूव" इत्यवलम्ब्य कालिदासस्य विषये किं किं निवेदयामः। हलायुधेन उक्तम्—

"महाकविं कालिदासं वन्दे वाग्देवतागुरुम्।
यज्ज्ञाने विश्वमाभाति दर्पणे प्रतिबिम्बवत्॥"

कविः पूर्णसरस्वती तु तस्य साम्यं विष्णुना सह अकरोत्—

"प्रतिपदमखिलार्थव्याकृतौ कः कृती स्यात्
सुमतिभिरनुकार्ये कालिदासस्य काव्ये।
प्रभवति परिमातुं को विशेषानशेषान्,
वपुषि सुकृतिदृश्ये विश्वरूपस्य विष्णोः॥"

इत्यादिना गीतस्तस्य महिमा।

महाकविः कालिदासः कदा कुत्र च जनिं लेभे, इत्यादिष संदिग्धविषयेषु विदुषां न किमपि निर्णयो वरीवर्ति। परं तत्रापि बहूनां विपश्चितां मतं वर्वर्ति यत् कविः कालिदासः कार्तिकशुक्लपक्षे एकादश्यां समजायत। अस्मिन्नवसरे तस्य महाकवेः कानपि कस्यांश्चिद् मात्रायाम् च गुणान् गायामः इति मात्रं हेतुः। अतएव एतादृशस्य जगत्प्रथितयशसः कविकुलगुरोः कालिदासस्य रचनाम्रेडनं तद्गुणगायनञ्चास्माकं मुख्यं कर्तव्यमेतज्जयन्तीमहोत्सवे। इति शब्द—पुष्पांजलिं समर्प्य विरम्यते—

"अन्ये प्रथन्तां कवयः सहस्त्रं अकद्वदा वा नु विकद्वदा वा।
ते प्रस्तुता नेह परन्तु कालिदासे कवौ नैव कदाप्युदासे॥"

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रदायि । जयपुरीयश्रीकृपालसिंहशेखावतनिर्मितचित्रमपि सादरं पुरस्कृतमभूत् । अस्मिन्नेव दिवसे अपराह्णे भारतराष्ट्रपतिः डा. श्रीराजेन्द्रप्रसादमहाभागो विशेषयानेन (स्पेशल) उज्जयिनीमागमत्, यस्य हि जनतया महता समारोहेण स्वागतमक्रियत । रात्रौ सप्तवादनतो नववादनपर्यन्तं 'ऋतुसंहारस्य' नृत्यरूपकं प्रास्तूयत, यत्र मणिपुरिकत्थकनृत्यादीन्यपि प्रदर्शितान्यासन् ।

२१–११–५८ दिने राष्ट्रपतिना समारोहस्यास्य औपचारिकमुद्घाटनं कृतम् । उद्घाटनभाषणे प्रोक्तं—'कालिदासस्य संस्कृतसाहित्ये तदेव स्थानं यद्धि इङ्गलैण्डे अंग्रेजीभाषायां, शेक्सपियरस्य । किन्तु देशेऽस्मिन् जनसाधारणस्य कालिदासविषये अतिन्यूनः परिचयः । वयं संस्कृति-साहित्यकलानां क्षेत्रेष्वपि महाकवये कालिदासाय तत्समुचितं स्थानं नाऽद्यावधि दातुमशक्नुम । खेदस्यायं विषयः ।

अवसरेऽस्मिन् ईरानराजदूतेन, रूसप्रतिनिधिश्रीवारांनिकोवेन, चीनिप्रतिनिधिश्रीबू०च्वेमहोदयेनाऽपि महाकाव्ये श्रद्धाञ्जलयोऽर्पिताः । ईरानराजदूतेन अंग्रेजीभाषायाम्, वारांनिकोवेन हिन्दीभाषायां चीनीप्रतिनिधिना च चीनीभाषायां भाषणमक्रियत, येषामनुवादो हिन्दीभाषायां तत्कालमश्राव्यत । रूसीप्रतिनिधिना सूचितं यत् रूसराष्ट्रे महाकविकालिदासस्य संमानाय तस्य प्रेषणशुल्कान्यपि 'डाकटिकट'प्रचारितानि । रात्रौ 'खैरागढ, मध्यप्रदेशस्य "इन्दिराकलासंगीतविश्वविद्यालय" द्वारा कुमारसंभवस्य संगीतरूपकं प्रास्तूयत ।

एवं किल २०–११–५८ तः—२६–११–५८ पर्यन्तम् उज्जयिन्यां समारोहः प्राचलत् । पूर्वाह्णे नानाविदुषां कालिदाससंबन्धे विविधविषयकाणि 'शोधपत्राणि' अपठ्यन्त येषु—बी० एच. कापडिया, महामहोपाध्याय वि० वि० मिराशी, रसिकबिहारी जोषी, डा. भगवत्शरण उपाध्याय, श्री सी. पी. शास्त्री, प्रो. वेंकटाचलम्, जर्मन डॉ. गुस्टॉव रॉथ, श्रीशिवराममूर्ति, श्रीमती कमलारत्नम्, डा० वी. राघवन, श्री जी. सी. झाला, विनायकशास्त्री टिल्लू एतानि नामान्युल्लेखनीयानि ।

महाकविकालिदासस्य जन्मविषये ईसवीयचतुर्थशताब्दी तथा प्रथमशताब्दी च भिन्नभिन्नविद्वद्भिः स्वस्वोद्भावितामिः उपपत्तिभिः प्रदर्शिता । किन्तु बहुमतानुसारं प्रथमा शताब्दी

★ अवध शूगर मिल्स लिमिटेड
★ अपर गैंगेज शूगर मिल्स लिमिटेड
★ न्यू इण्डिया शूगर मिल्स लिमिटेड
★ न्यू स्वदेशी शूगर मिल्स लिमिटेड
★ भारत शूगर मिल्स लिमिटेड
★ गोविन्द शूगर मिल्स लिमिटेड
शुद्धकणवत्याः इक्षुशर्करायाः निर्मातारः
मैनेजिंग एजेन्ट्स :—
दी काटन एजेन्ट्स प्राइवेट लिमिटेड
कलकत्ता ★ बम्बई

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



घोषितप्रायाऽऽसीत् । विवादोयमतिविद्वत्तापूर्णः लोका- कर्षकश्चासीत् । मध्यप्रदेशस्य मुख्यमन्त्रिणा डा. काटजू- होदयेन विनोदपूर्णरीत्या "सतां हि संदेहपदेषु वस्तुषु प्रमा- णमन्तःकरणप्रवृत्तयः" एतद्रीत्या अहं तु मन्ये यत् अद्यतः १५ वर्षेभ्यः पूर्वम् अस्यामुज्जयिन्यामेव कालिदासमहाभागो मान आसीत् इत्युपसंहृतम् ।

विशिष्टविदुषां व्याख्यानानि माधवकालेजस्य प्राङ्गणे पराह्णकाले समभवन्, येषु डा. राघवन् श्री शिवराममूर्ति, हजारीप्रसादद्विवेदी ( कालिदासवर्णिमंडनद्रव्याणां, प्रका- णां च विषये ) श्रीबलदेव उपाध्यायः ( कालिदासवक्त- नां दार्शनिक आधारः एतद्विषये ) सुरेन्द्रनाथशास्त्री कालिदासीयकतिपयपद्यानां रसास्वादने ), प्रभृतय उल्लेख- नाः । संगीतमार्तण्ड श्री ओंकारनाथठाकुरमहोदयस्य संगी- तमयभाषणमपि मनोरञ्जकमासीत् ।

श्रीमत्या कमलारत्नं महाभागया निजस्य रूसदेशीयेष्वनु- भवेषु सूचितं यत् रूसी जनता कालिदासकाव्यान्यत्यन्तं प्रेम्णा अभिरोचयति । बहोः कालात्पूर्वमेव कालिदासकाव्यानां रूसी भाषयाऽनुवादः प्रारब्धः । व्याख्यानमालाया अन्तिमदिने प्रसिद्धविदुषः भाषाशास्त्रज्ञस्य डा. श्रीसुनीतिकुमारचटर्जी महोदयस्य भाषणमभूत् यत्र तैः सूचितं यत् कालिदासकाल- निर्णयसमये अपरेषां देशानामपि परिस्थितयोऽस्माभिरन्वेष- णीयाः, यैर्देशैः सह भारतस्य सांस्कृतिकमादान-प्रदानं चाभ- वत् । यथा चीनप्रभृतेः ।

समारोहेऽस्मिन् राष्ट्रपतिमहोदयातिरिक्ताः—मध्यप्रदेशस्य राज्यपालमहोदयः, पञ्चाम्बुदेशस्य राज्यपालः श्रीनरहरि विष्णुगाड्गिलमहोदयः, लोकसभाध्यक्षः श्रीअनन्तशयनम् अय्यंगारः, बंगालविधानसभाध्यक्षः डा. श्रीसुनीतिकुमार चटर्जी, केन्द्रीयमन्त्री डा. केसकरः, हरिभाऊउपाध्यायः, विद्व- त्कविशिरोमणिभट्टश्रीमथुरानाथशास्त्रिमहोदयः, एतत्प्रभृती- नामागमनमप्यभूत् ।

२४-११-५८ दिवसस्य रात्रौ महाविशाले सभामण्डपे संस्कृत-हिन्दी-महाराष्ट्री-गुर्जरी-मालवीप्रभृतिभाषाणां कवि- सम्मेलनमभूत् उपस्थितपरस्सहस्रजनताया आसीत्समावेशः । सभापतेरासनमलंकृतमभूत् कविशिरोमणिभट्टश्रीमथुरानाथ- शास्त्रिमहोदयेन । संमेलनेऽस्मिन् संस्कृतप्रभृतिभाषाणां कवि- तापाठो महता संभारेणाऽभूत् । २५-११-५८ दिवसे प्रातः महाकालमन्दिरस्य समीपस्थे प्राङ्गणे डा. कैलाशनाथकाटजू महोदयेन "कालिदासस्मृतिमन्दिरस्य" शिलान्यासः कृतः । भवननिर्माणेऽस्मिन् षड्लक्षमुद्राणां व्ययः स्वीकृतोऽभूत् । समारोहेऽस्मिन् कविशिरोमणिमहाभागेन कालिदासस्य चिर- कालिकविशेषता सूचिताऽऽसीत् ।

समारोहयात्रायामस्यां मया महत्वपूर्णौ द्वौ संग्रहौ प्रत्यक्षी- कृतौ—प्रथमः—'सिन्धिया ओरिएण्टल इन्स्टिट्यूट'स्य लिखितपुस्तकसंग्रहः, यस्मिन् १०१२६ हस्तलिखिताः ग्रन्थाः संस्कृत-प्राकृत-अपभ्रंशादीनां सन्ति । दाराशिकोहद्वारा कारितः उपनिषदां पारस्यभाषानुवादः ( तिस्रः प्रतिलिपयः, हिजरीसन् १०५६, नारायणपण्डितद्वारा) ।

अपरश्च—वि० श्रीवांकणकरद्वारा कृतो निजस्य संग्रहः । अस्मिन् मध्यप्रदेशस्य विभिन्नस्थानेभ्यः कृतः प्रस्तरकालस्य नानाविधानामुपलायुधानां, गुप्तकालतः प्राक्तनीनां मुद्रा- मूर्तीनां शतशतचित्राणां संग्रहः, एतदाधारेण वांकणकरेण निर्धारितं यत् उज्जयिन्याः परिसरे गुप्तकालस्य अतिन्यूनानि मन्दिरमूर्त्यादीनि प्राप्यन्ते । अवशिष्टानि सर्वाणि गुप्तकालतः पूर्वतनानि । अतएव प्रतीयते चन्द्रगुप्तद्वितीयस्य समये उज्जयिनी तादृक्संवृद्धा नाऽऽसीत् । कालिदासेन यादृक् सबुद्धाया उज्जयिन्या वर्णनमुपात्तं तद्धि गुप्तकालतः प्राक्त- नस्य । अतएव कालिदाससमयः ततः पुरातनः । तदिदं मतं चटर्जीमहोदयादिभिरपि स्वीकृतम् ।

एवं महत्त्वपूर्णेऽस्मिन् समारोहे भागं गृहीत्वा वयं ततः सानन्दं परावृत्ताः ।

बहुरा श्रीगोपालनारायणपारीकः, एम्. ए.

★

अशुद्धिसंशोधनम्—भारत्या गताङ्के (नवमवर्षस्य प्रथमाङ्के) प्रकाशिता कविता "आह्वानम्" इति शीर्षिका श्रीव्रजमोहनझामहोदयरचिताऽस्ति । पाठकाः कृपया शोधयन्तु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



उच्चकलायाः, नवीनतायाः, दृढतायाश्च कृते

मुरारजी गोकुलदास, स्पिनिंग एण्ड वीविंग कं. लि.

निर्मितानां वस्त्राणां क्रयः कार्यः

सुपारी बाग रोड़
टेलीफोन नं० ६००२१
(थ्री लाइनस)

परेल बम्बई नं० १२
टेलीग्रामस 'मोगोको'
बम्बई

= सर्वाधिकं सन्तोषप्रदं संस्थानम् =

विशेषता—

(मिनिरल खाकीं तथा अन्य ड्रिलस, धोती तथा साडी, गाइलापेट, डोब्बी चाटर लांगक्लाथ, कौटिंग, शर्टिङ्ग, वायला, मुल्स तथा अन्य फाइन मर्सराइजड वस्त्र)

अभिकर्तारः (एजेंट्स)—पीरामल सन्स प्राइवेट लि०

सेलिंग एजेंट्स—पीरामल एण्ड कं० प्राइवेट लि०

चन्द्रचोक, मूलजी जेठा मार्केट बम्बई २.

टेलीफोन नं० २६३५३

फोन—२६११६३ मिल्स—६२५४३ ग्रामस—'हिन्द' ग्राम

हिन्द मिल्स लिमिटेड

१५, दुगल रोड, बैलार्ड एस्टेट

बम्बई १

निर्मातारः—

कुञ्चुकवस्त्रं (शर्टिङ्गस), शय्यावस्त्र (शीटिंगस-लिपाई), लम्बवस्त्र (लांगक्लॉथ ड्रिलस, मुलस, क्रेप-मुजरी वस्त्राणां धौतानां, शाटिकानाम्, 'काकेट चिन्हितानां' तथा स्पेशल फाइबर सूत्राणां च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# सम्पादकीयम्

## रूसराष्ट्रस्य भारतं प्रति उदारोदृष्टिकोणः

वर्तमानकाले सोवियतसंघस्य भारतं प्रति राजनैतिकी मैत्री तुरोत्तरं वर्धत इति प्रतीयते । कियत्कालात्पूर्वं खुश्चेव-वल्गामहाभागौ भारते समागत्य द्वयोरनयो राष्ट्रयोर्घनिष्ठमैत्रीं त्रयामासतुः । तदिदं सत्यमिवानुभूयते । भारतराजधान्याः (देहल्याः) पञ्चदशतारिकायाः संवादोऽस्ति यत्—"शुक्रवारे मस्कोनगरे पारस्परिकः सोयं निश्चयोऽभवद् यत् "सोवियत-संघो भारताय प्रावधिकशिक्षानां पूर्णां सहायतां दद्यात् । तदनुसारं ३६ लक्षमुद्रामूल्यां प्राविधिकशिक्षोपयोगिनीं सामग्रीं सोवियसंघो भारताय प्रतिपादयेत् तथा पञ्चाशत्संख्याकान् छात्रान् यान्त्रिक (इञ्जीनियरिङ्ग) शिक्षायां परिनिष्ठितान् कुर्यात् । एतदनुसारमिव अचिरात् रूसराष्ट्रमिदं स्वीयान् अध्यापकान् भारतीयशिक्षासंस्थानेषु प्रेषयेत् ये हि भौतिकविज्ञानस्य व्यावहारिकीं शिक्षां विद्यालयेषु प्रचारयेयुः रूसराष्ट्रे च भौतिकविज्ञानस्य शिक्षणाय यानि पाठ्यपुस्तकानि संन्ति तेषामाङ्गलभाषानुवादा अचिरादेव भारते प्रकाश्येरन् ।

यो ह्ययं पारस्परिको निर्णयोऽभवत्तदुपरि भारतदूत श्री के० पी० एस० मैनन् महोदयेन भारतप्रातिनिध्येन, तथा उच्चशिक्षासोवियतमन्त्रिणा श्री वी० पी० एलीयूतिनमहाशयेन रूसराष्ट्रप्रातिनिध्येन मिथो हस्ताक्षराणि कृतानि । विज्ञप्तावेकस्यां प्रकटीकृतं यत् सोवियत्संघः शिक्षाया एतस्याः कृते यत् किलोपकरणं दास्यति तस्य मूल्यं न कदाचिद् गृह्येत । अर्थात् सोवियतराष्ट्रमिदं भारतवर्षाय सादरमिदमुपायनं ददाति । पञ्चाशत्संख्याका यान्त्रिकविद्यार्थिनो भारतीयाः रूसराष्ट्रे द्वित्राणि वर्षाणि विज्ञानशिक्षां गृह्णीयुः, येन भारते समागत्य विभिन्नेषु शिक्षासंस्थानेषु भारतीयमध्यापकमण्डलं सुदृढं संपादयेयुः । तदिदं प्रशिक्षणं १९५९ तमे खिष्टवत्सरे प्रारभ्येत एतत्संबन्धिनं व्ययं च समग्रं सोवियतराष्ट्रमेव प्रदद्यात् ।

### यान्त्रिकगणकस्योपायनम्

कलिकात्तानगरस्य १७तमदिसम्बरदिवसस्याऽस्ति संवादो यत् "रूसदेशीयेन विद्युदणुवैज्ञानिकेन ('इलैक्ट्रोनिक') श्रीतूरीदलतोवमहोदयेन भारतीयायै संख्यावैज्ञानिकसंस्थायै संख्यागणकमेकं वैज्ञानिकयन्त्रमुपायनीकृतम् । एतेन हि यन्त्रेण मानवकृते श्रमे भूयसी सहायता भवेत् । अर्थात् गणितसम्बन्धि यत्कार्यं षट्शतमनुष्या एकस्यां घण्टायां कर्तुं शक्नुयुः, अथवा यत्कार्यमेको मनुष्यः ६०० घण्टाभिः कर्तुं पारयेत्, तत्कार्यं यन्त्रमिदम् एकया घण्टया सुखेन कर्तुं शक्नुयात् । रूसराष्ट्रेण तदिदं यन्त्रं संयुक्तराष्ट्रीय 'टैकनिकल' सहायताप्रशासनद्वारा उपहृतमभूत् । इदं यन्त्रं रूसराष्ट्रीयैरेव शिल्पवैज्ञानिकैः कार्यस्थाने स्थापितं परिचालितं च । प्रवर्द्धतां द्वयो राष्ट्रयोः सेयं राजनैतिकी मैत्री ।


श्रीनिवास फैब्रिक्स

उच्चकक्षायाः कृते अद्वितीयसंस्थानम्,

सूक्ष्मतन्तुसन्तानः

तथा अतिशोभनानां रङ्गाणां विविधताः

निर्यातस्य कृते पत्रव्यवहारः कार्यः—

दूरभाषः (फोन) ६००४५–६१८३४

दी श्रीनिवास काटन मिल्स लि०

डिलाइसल रोड लोअर परेल बम्बई १३.

मुख्यकार्यालयः (हैड आफिस)—

'श्रीनिवास हाउस'

वाडबी रोड, फोर्ट बम्बई १.

दूरभाषः (टेलीफोन) नं० २६२३६४ टेलीग्रामस

(५ लाइन्स) श्रीनिवास बम्बई

मैनेजिंग एजेण्टस

दी मारवाड टैक्सटाइल (एजेंसी) प्राइवेट लि०

'श्रीनिवास हाउस' वाडबी रोड फोर्ट बम्बई


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



113536

बालोपदेशमालायां

# गुरुजनवन्दनम्

## द्वितीयो मणिः

( ले० साहित्यमहोपाध्याय आशुकविः कविभूषणं श्रीहरिशास्त्री दाधीचः, जयपुरम् )

व्याधोऽपि पूर्वं पशुमांसवृत्तिमान्
मातुः पितुः प्राप्य शुभाशिषः पराः ।
महामनास्तत्त्वविवेकवानभूत्
बालाः स्वपित्रोः कुरुताभिवन्दनम् ॥१॥

प्रिया बालकाः ! अपि जानीथ, प्रभातवेलातः पूर्वं शयनादुत्थाय किं कर्तव्यमिति, नो चेत्, वयं किंचित् वदामः तदिदं शृणुत—

प्रातःप्रबोधनानन्तरं शीघ्रमुत्थाय स्वमातरं स्वपितरं पादयोः सभक्ति प्रणमत । एवं करणेन सा माता स पिताऽपि च युष्मभ्यं शुभाशिषं दास्यति । शतं जीव पुत्र, चिरंजीव पुत्र, सुखी भव, नैरोग्यं लभस्व, विद्वान् भव, समृद्धो भव, वर्द्धस्व धनवान् भवेत्यादिरूपाः आशिषः प्रदीयन्ते लोके मातृपितृभ्याम् । इमाश्चाशिषः रात्रौ वाचः संयतत्वात् प्रभाते प्रथमाविर्गतायाः वाचः सत्यभूतत्वात् सफला भवन्ति । तादृशीः शुभाशिषो गृह्णाना बालाः अवश्यं समुन्नतिमाप्नुवन्ति । बुद्धिस्तेषां प्रवर्धते, विद्याश्च सर्वा अपि फलन्ति । प्रतिभा समेधते, वाक्शक्तिः समृद्धा भवति, मनोबलं च पुष्यति, आयुश्च वृद्धिमाप्नोति, विघ्नाः प्रलीयन्ते, विपदो दूरं द्रवन्ते इत्यादि लाभा नैकशः उद्भवन्ति । अतः सर्वप्रथमं मातुः पितुश्च पादयोरभिवादनं कुरुत । शुभाशिषश्च तन्मुखोद्गताः स्वीकुरुत, एतेन भवतः स्वस्वकार्येषु साफल्यं प्राप्स्यथ ।

स्मृतिकाराः वदन्ति "माता पिता गुरुश्चैव पूजनीयः सदा नृणाम् । क्रियास्तथाऽफलाः सर्वा यस्यैते नादृतास्त्रयः" ( शङ्खस्मृतिः तृतीयाध्यायः ) तत्रापि पूर्वं मातुश्चरणयोः प्रणामः कार्यः पश्चात् पितरं वन्दध्वम् । पितुरपेक्षया मातुर्गरीयस्त्वात् पितुः शतगुणा माता इत्यादि प्रामाण्यात् । पित्रपेक्षया माता वस्तुतः प्रथमं वन्दनीया समासविधौ पाणिनिप्रभृतिभिरपि मातृपदस्य प्रथमं प्रयुक्तत्वात् मातृपदनिरुक्तौ अपि पश्यत मान्यतेः (मनपूजायां धातोः) तृच् प्रत्यये माता इति पदं सिद्ध्यति । मा माने माति गर्भस्वरूपेण जीवो यस्यां वा इति । यस्यां वयं विन्दुस्वरूपं आरभ्य हस्तपाद-

किसी समय व्याध भी पशु मांस की वृत्ति वाला होकर कालान्तर में माता-पिताओं के शुभाशीष प्राप्त करके महामना और तत्त्वविवेकवान् होगया । अतः बालकों ! अपने माता–पिताओं का अभिवादन करो ॥१॥

प्रिय बालकों क्या जानते हो कि प्रातःकाल के पूर्व शय्या से उठने ही के पूर्व क्या करना चाहिए ? यदि नहीं जानते हो तो हम कुछ कहते हैं, ध्यान से सुनो—

प्रातः जगने के पश्चात् शीघ्र उठकर अपने माता-पिता के चरणों में भक्तिपूर्वक नमन करो । इस प्रकार करने से वह माता और वह पिता भी तुमको शुभाशिष देंगे । पुत्र सौ वर्ष जीओ, चिरंजीव हो, सुखी हो, निरोगता प्राप्त करो, विद्वान् होओ, समृद्धिवान होओ, बड़े होओ, धनवान् होओ, इत्यादि प्रकार से माता-पिताओं द्वारा संसार में आशीष दी जाती है ।

यह आशीष रात्रि में वाणी के संयम रखने से प्रातः काल के समय में पहली निकली हुई वाणी सत्य होने में सफल होती है । वैसी शुभाशीष ग्रहण करने वाले बालक अवश्य समुन्नति को प्राप्त होते हैं । उनकी बुद्धि बढती है, सारी विद्याएं फलवाली होती हैं, प्रतिभा बढ़ती है, वाक् शक्ति समृद्ध होती है, और मनोबल पुष्ट होता है तथा आयु बढ़ती है विघ्न भागते हैं, विपत्ति दूर से ही नष्ट होजाती है, इत्यादि अनेक लाभ होते हैं ।

अतः सर्वप्रथम माता और पिता के चरणों में अभिवादन करो । इससे आप लोग अपने-अपने कार्यों में सफलता प्राप्त करोगे ।

स्मृतिकार भी कहते हैं कि माता-पिता और गुरु सदा मनुष्यों के लिए पूजनीय हैं । जिसके द्वारा ये तीनों अनादृत हैं उसके लिए सारी क्रियाएं फल-रहित होती हैं (शंखस्मृतिः तृतीयाध्यायः) ।

वहां भी पहले माताके चरणों में प्रणाम करना चाहिए फिर पिता को वन्दना करनी चाहिए । पिता की अपेक्षा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



शिरोवक्षोनेत्रनासाश्रवणाद्यवयववन्तो भूत्वा रसं बलं च प्राप्य पुष्णामः । नव वा दशमास पर्यन्तं तस्या अन्तः उदरे वसामः सा माता कथं नु वन्दनीया किं न पूज्या। पिता तु अस्माभिः पश्चात् परिचीयते ज्ञायते सोऽपि मातुरुपदेशत एव नान्यथा ज्ञातुं शक्यते । स च पालनात् रक्षणाद्वा पिता भवति, उत्पन्नस्य पालनं भवति, नानुत्पन्नस्येति पूर्वमुत्पत्तिरस्माकं मातुर्भवति ततः परिवर्धनानन्तरं स पालयति तदा पितृत्वं ज्ञायते । जन्मकालत एव सा मातैव समाश्रीयते स्तन्यपानादिभिः सैवास्मान्पालयति पुष्णाति तस्मात् कारणात् माता हि पितुः प्रथमं प्रणम्या, पूज्या चेति न सन्देहलेशोऽपि विधेयः ।

व्याकरणेऽपि पाणिनिना अभ्यर्हितं चेति पूर्वं मातृपदं विन्यस्यता मातुरभ्यर्हितत्वं स्वीकृतम् । अभ्यर्हितत्वं च पूज्यत्वं, समादरणीयत्वं चैव नान्यथा । धर्मशास्त्रेषु पुराणेष्वपि च मातुः पितुः पूजनप्रणामयोः सेवायाश्च बहूनि फलानि प्रदर्शितानि लेखविस्तरभयान्नात्र तान्युल्लिखामः संक्षेपत एवात्र किंचिदुद्धृतम् । तत एव बोद्धव्यं भवद्भिः ।

एवं मातुश्चरणवन्दनानन्तरं पितुः पादौ वन्दनीयौ उभयोरपि वन्दनावसरे अभिवादनं वचनतोऽपि प्रकाशनीयं भवति विना वचनं नमस्कारो न योग्यः साफल्यं नैव प्रददातीति वाचा तस्य प्रकाशनमावश्यकम् । ततः मातुः प्रणामे, शिरोवनामनपूर्वकं हस्ताभ्यां व्यत्यस्ताभ्यां ( वामेन वामं चरणं दक्षिणेन दक्षिणं चरणं स्पृशन्) चरणौ स्पृशन् वदेत भो मातः ( अम्ब ) प्रणमामि तत्रभवत्याश्चरणौ इति एवं पितुश्चरणप्रणामेऽपि पूर्वोक्तरीत्या भोः पितः प्रणमामि अहमत्रभवतश्चरणौ इति वदेत् । एवं भाषणेन वाचिकत्वं पदस्पर्शनेन शिरोवनामेन च कायिकत्वं भक्तिमुद्दिश्य मानसिकत्वं चेति प्रणामे त्रैविध्यं संभवति । तदुक्तं शास्त्रकारैः—

मातरि पितरि गुरौ च प्रयोजितं मानवैर्नमस्त्रिविधम् ।
दुरितान्यपहृत्य, चिरं सर्वश्रेयांस्युपानयति ॥१॥

अस्यार्थः—पूर्वोक्तप्रकारेण त्रिविधं मानसं कायिकं वाचिकं च नमस्करणं मातरि पितरि गुरौ च प्रयोजितं कृतं दुरितान्यशुभानि अपहृत्य सर्वविधानि श्रेयांसि कल्याणानि उपानयते प्रददाति इति ।

क्रमशः

माता श्रेष्ठ होने के कारण "पितुः शतगुणा माता" यह प्रमाणसिद्ध है । पिता की अपेक्षा माता वस्तुतः प्रथम वन्दनीय है । समासविधि पाणिनि इत्यादि ने भी पहले मातृ पद का प्रयोग किया है ।

मातृ पद की सिद्धि में भी देखो मान्यते ( मानपूजायां धातु से तृच्-प्रत्यय आने से ) मा यानी माति अर्थात् गर्भस्वरूप से जीव जिसमें रहता है वह मां । जिसमें हम बिन्दु स्वरूप से प्रारम्भ होकर हाथ, पांव, सिर, वक्ष, नेत्र, नासिका, श्रवण इत्यादि अवयववान् होकर रस और बल को प्राप्त कर पुष्ट होते हैं । नव या दस मास पर्यन्त जिसके उदर में निवास करते हैं । वह माता कैसे पूजनीय नहीं है। पिता तो हमसे बाद में परिचित होता है और वह भी माता के उपदेश से ही, अन्य कारण से नहीं जाना जा सकता और वह पालन करने से रक्षा करने से पिता होता है । उत्पन्न का पालन होता है, अनुत्पन्न का नहीं । पहले हमारी उत्पत्ति माता द्वारा होती हैं, तत्पश्चात् बड़े होने के बाद वह पालन करता है तब उसका पितापना माना जाता है । जन्मकाल से ही वह माता आश्रय देती है, अन्न-पान आदि से वही हमारा पालन-पोषण करती है । इस कारण से माता ही पिता से प्रथम वन्दनीय व पूजनीय है इसमें लेशमात्र भी सन्देह नहीं करना चाहिये ।

व्याकरण में भी पाणिनि ने पहले मातृपद को रख कर माता की विशेषता स्वीकार की है । धर्मशास्त्रों व पुराणों में माता-पिता का नमन, और सेवा का बहुत फल बताया है। लेख विस्तार के भय से उसका विस्तृत उल्लेख नहीं कर रहे हैं संक्षेप में ही उसका कुछ उल्लेख कर रहे हैं।

इस प्रकार माता की चरण वन्दना के पश्चात् पिता के चरणों में वन्दना करे । दोनों ही के वन्दन करते समय वाणी के द्वारा बोल कर करे । बिना वाणी के नमस्कार योग्य नहीं और न उसका फल प्राप्त होता है ।

वाणी से उसका प्रकाशन आवश्यक है । माता को प्रणाम करने में मस्तक झुकाने के साथ २ हाथों से बांयें हाथ से बांयें चरण को, दक्षिण हाथ से दक्षिण चरण को चरणों को स्पर्श करके बोले—हे माता ! तुम्हारे चरणों में प्रणाम करता हूँ इसी प्रकार पिता के चरणों में प्रणाम करते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



बालोपयोगिनी लघुकथा

## लम्बकूर्चो मूर्खः

—सह सम्पादकः

कस्यापि पुरुषस्य कूर्चं दीर्घमासीत् । स एकदा "लम्बकूर्चः प्रायो मूर्खो भवति" इति कस्मिन् अपि पुस्तके अपठत् । ततः आत्मानमपि मूर्खं मत्वा भृशं परितप्यमानः स मुखकेशानि ह्रस्वानि कर्तुं मध्ये गृहीतस्य कूर्चस्य अग्रं प्रज्वालितया दीपशलाकयाऽदहत् । अथ धगिति कृत्वा वह्निर्यदा तस्य मुष्टिदेशं प्रसर्पति तदा दाहभयेन स करग्रहमत्यजत् । दाढिकाबालाश्च सर्वे भस्मीभूताः । तद्यदा तस्य कूर्चं श्मश्रु च विनष्टं तदा सः मनस्यचिन्तयत्—"सत्यमेव अहं मूर्खोऽस्मि ।" इति संप्रधार्य सः आभाणकं सत्यमेव मानयति स्म ।

किसी आदमी की दाढ़ी लम्बी थी। उसने एक दिन "लम्बी दाढी वाला मूर्ख होता है" ऐसा किसी पुस्तक में पढ़ा। इसलिये उसने अपने आपको भी मूर्ख समझ कर बहुत कुछ पश्चात्ताप किया और बीच में से दाढ़ी पकड़ कर मुंह के बाल छोटे करने के लिए दाढी के आगे के हिस्से को जलती हुई दियासलाई से जलाने लगा। ज्योंही 'धक-धक' करके अग्नि उसकी मुट्ठी तक आई, त्योंही हाथ के जलने के डर से उसने हाथ की मुट्ठी छोड़ दी और दाढ़ी के सभी बाल जल गये। इसलिये जब उसकी दाढी और मूंछ जल गई और उड़ गई तब मन में सोचा—"सचमुच मैं मूर्ख हूँ।" इस प्रकार सोचकर उसने उस कहावत को ही माना।

एकः प्रसिद्धो वृद्धो नेतृमहाभागः एकया महिलया 'चाय'-पानार्थम् आमन्त्रितोऽभूत् । चायपानसमये महिला अत्यन्तमादरेण नेतृमहोदयं संबोधयन्ती वार्तालापमकरोत् "मान्यवर, पूज्यमहोदय"—इत्यादि । मध्य एव नेतृमहोदयेन कथितम्—

"मया सह किमिति भवती इयन्तमुपचारभावम्, आदरं च प्रदर्शयति—अहं तु एकः सामान्यो जनोऽस्मि । बहवो जना मां मूर्खराजः, मस्तिष्कहीनो वृद्धः" "इत्याद्यपि कथयन्ति !!"

महिलया सादरं प्रोक्तं—"ते तु भवतां घनिष्ठाः—चिरपरिचिता वा स्युः, अहं तु भवतां पूर्णं परिचयं न प्राप्तवती, अतस्तेषामेव तथा व्यवहारो शोभते, न मे !" नेतृमहोदयस्य मुखं लज्जानतमभूत् ।

हुए भी पूर्वोक्त रीति से हे पिताजी ! मैं आपके चरणों में प्रणाम करता हूँ, यह बोले ।

इस प्रकार भाषण से वाचिक का, और पद-स्पर्श व मस्तकनमन से शारीरिक, भक्तिपूर्वक उच्चारण करने से मानसिक ऐसे त्रिविध प्रणाम हो जाते हैं। शास्त्रकारों ने भी कहा है —माता-पिता और गुरु इन तीनों को तीन प्रकार से नमस्कार करें इससे पाप नष्ट होकर चिरकाल तक सब प्रकार का श्रेय प्राप्त होता है।

च्यवनप्राश
स्मृति-बल-पुष्टिवर्धकं रसायनम् ।
धूतपापेश्वर इण्डस्ट्रीज लि०
पनवेल मुंबई
पणिकः—श्री हाथी बन्धुः
( अ ) जोहरी आपणः जयपुरम्
( आ ) जालोरीद्वारम् जोधपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

११५३४



# सूक्ति-सुधा

अभूतमल्पकार्यं वा यो नरः कर्तुमिच्छति ।
सर्वारम्भेण तत्कुर्यात्सिंहादेकं प्रकीर्तितम् ॥१॥

थोड़ा वा बहुत, जो भी काम मनुष्य करना चाहे, उ सब प्रकार से (जी जान लड़ाकर) करे, यह एक शिक्षा सिं से लेनी चाहिए । (यह नीतिशास्त्र ने कहा है) ॥१॥

सर्वेन्द्रियाणि संयम्य बकवत्पतितो जनः ।
कालदेशोपपन्नानि सर्वकार्याणि साधयेत् ॥२॥

सब अपनी इन्द्रियां (जीभ, नाक, कान आदि) अप वशमें करके बगुले की तरह पड़ा हुआ देश और समय प आये हुए सब कामों को सिद्ध करले । ( बगुला जिस तर नदी किनारे आँख मूंद निश्चल होकर बैठ जाता है औ पास आई हुई मछली को निगल जाता है, इसी तरह व में करके समय और मौके पर आये हुए कामों को सि कर ले ) ॥२॥

बह्वाशी स्वल्पसंतुष्टः सुनिद्रः शीघ्रचेतनः ।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः ॥३॥

बहुत खाने वाला होकर भी थोड़े से आहार ( भोजन से सन्तुष्ट हो जाता है । बहुत देर तक सोनें वाला होकर भ जरा से खटके पर जागता है । स्वामी का भक्त और अवस आने पर बहादुरी दिखाता है । ये छह गुण कुत्ते जानो ॥३॥

अविश्रामं वहेद्भारं शीतोष्णं च न विन्दति ।
ससंतोषस्तथा नित्यं त्रीणि शिक्षेत गर्दभात् ॥४॥

बिना विश्राम किए रात दिन बोझा उठाए । गरम सरदी कुछ नहीं माने और सदा संतोषपूर्वक रहे ये तीन बातें गधे से सीखे ॥४॥

गूढमैथुनधार्ष्ट्यं च काले चाऽऽलयसंग्रहम् ।
अप्रमादमनालस्यं पञ्च शिक्षेत वायसात् ॥५॥

स्त्रीसंगम और धृष्टता (ढिठाई, बदमाशी) गुप्त (सब अलक्षित) करे । समय पर अपने मकान (घोंसले) को बनाये प्रमाद ( भूल ) न करे । सदा चौकन्ना रहे, आलस्य कभी न करे, यह पांच बातें कौए से सीखे ॥५॥

युद्धं च प्रातरुत्थानं भोजनं सह बन्धुभिः ।
स्त्रियमापद्गतां रक्षेच्चतुः शिक्षेत कुक्कुटात् ॥६॥

अवसर आते ही युद्ध ( लड़ाई ) करना, बहुत सवेरे उठना, अपने भाई बन्धुओं के साथ भोजन करना, स्त्री पर यदि आपत्ति आ जाय तो प्राणपण से उसकी रक्षा करना ये चार बातें कुक्कुट अर्थात् मुर्गे से सीखे ॥६॥

प्रकाशक:—जयबहादुरसिंह पता:—गोपालजी का रास्ता, जयपुर (राजस्थान)

मुद्रक:—श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Stock Verification-2024

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri